Almira 3
shelf 3
24

पं०

४७०३

४७०३

॥ अथ श्रीद्वारकामाहात्म्यंप्रारभ्यते ॥

श्री ५ को सरकार

॥ श्रीगणेशायनमः ॥ ॥ श्रीमल्लक्ष्मीवेङ्कटेशायनमः ॥ श्रीराधाकृष्णायनमः ॥ ॥ अथ द्वारकामाहात्म्यप्रारम्भः ॥ ॥
॥ बहुलाश्वउवाच ॥ ॥ त्रिषुलोकेषुविख्याताधन्यावैद्वारकापुरी ॥ परिपूर्णतमःसाक्षाच्छ्रीकृष्णोयत्रवासकृत् ॥ १ ॥ श्रीकृ
ष्णस्यांगसंभूतापुरीद्वारावतीश्रुता ॥ कस्मादिहागताब्रह्मन्कस्मिन्कालेवदप्रभो ॥ २ ॥ ॥ श्रीनारदउवाच ॥ ॥ साधुसा
धुत्वयापृष्टंद्वारकागमकारणं ॥यच्छ्रुत्वाशुद्धतांयातिलोकघात्यपिपातकी ॥ ३॥ शर्यातिर्नामराजाभूच्चक्रवर्तीमनोःसुतः ॥ चका
रराज्यंधर्मेणवर्षाणामयुतंभुवि ॥ ॥ ४ ॥ उत्तानबर्हिरानर्तोभूरिषेणइतित्रयः ॥ शर्यातेरभवन्पुत्राःसर्वधर्मभृतांवराः ॥ ५ ॥ उ
त्तानबर्हिषेपूर्वांभूरिषेणायदक्षिणां ॥ पश्चिमांचदिशंसर्वामानर्तायददौनृपः ॥ ६ ॥ ममेयंहिमहीकृत्स्नामयाधर्मेणपालिता ॥
बलार्जिताबलिष्ठेनयूयंतांपालयिष्यथ ॥ ७ ॥ पितुर्वचःसमाकर्ण्यआनर्त्तोमध्यमःसुतः ॥ ज्ञानीज्ञानमयंवाक्यमुवाचप्रहसन्नि
व ॥ ८ ॥ ॥ आनर्तउवाच ॥ ॥ तवेयंनमहीकृत्स्नानत्वयापालिताक्वचित् ॥ नत्वद्बलार्जिताराजन्बलिष्ठोभगवान्विभुः ॥ ९ ॥
महीश्रीकृष्णदेवस्यतेनैवपरिपालिता ॥तत्तेजसाजिताकृत्स्नावलिष्ठोनहरेःसमः ॥ १० ॥सएवविश्वंस्वकृतंसृजत्यत्तिचपातिच ॥

सएवब्रह्मपरमंकालःकलयतांप्रभुः ॥११॥योंतःप्रविश्यभूतानिभूतैरप्यखिलाश्रयः ॥ सविष्ण्वाख्योधियज्ञोसौपरिपूर्णतमः
स्वयम् ॥ १२ ॥ यद्भयाद्वातिवातोयंसूर्य्यस्तपतियद्भयात् ॥ यद्भयाद्वर्षतेदेवोमृत्युश्चरतियद्भयात् ॥ १३ ॥ परिपूर्णतमंसा
क्षाच्छ्रीकृष्णंपरमेश्वरम् ॥ भजसर्वात्मनाराजन्माहंकारंसमाचर ॥ १४ ॥ ॥ श्रीनारदउवाच ॥ ॥ ज्ञानंप्राप्तोपिशर्या
तिराक्षिप्तःपुत्रवाक्शरैः ॥ आनर्त्तंस्वसुतंप्राहरुषाप्रस्फुरिताधरः ॥ १५ ॥ ॥ शर्य्यातिरुवाच ॥ ॥ दूरङ्गच्छअसद्बुद्धे
गुरुवद्भाषसेकथम् ॥ यावद्भूतंतुमेराज्यंतावत्त्वंमामहींवसः ॥ १६ ॥ यस्त्वयाराधितःकृष्णःसोपिसर्वसहायकृत् ॥ नवीनांकिंम
हींतेवैभगवानेवदास्यति ॥ १७ ॥ ॥ श्रीनारदउवाच ॥ ॥ इत्युक्तस्तुतदानर्तोराजानंप्राहमानदः ॥ यत्रतेचमहीराज्यं
तत्रवासोनमेभवेत् ॥ १८ ॥ पित्रानिःसारितोराज्ञाप्यानर्त्तोब्धितटंगतः ॥ वेलामेत्यतपस्तेपेवर्षाणामयुतंजले ॥ १९ ॥ प्रे
मलक्षणयाभक्त्यासन्तुष्टोभगवान्हरिः ॥ तस्मैस्वंदर्शनंदत्वावरंब्रूहीत्युवाचह ॥ २० ॥ कृतांजलिपुटोभूत्वानर्तउत्थायशीघ्र
तः ॥ ननामकृष्णपादाब्जंरोमांचीप्रेमविह्वलः ॥२१॥ ॥आनर्त्तउवाच॥ ॥नमस्तेवासुदेवायनमःसंकर्षणायच ॥ प्रद्युम्नाया

निरुद्धायसात्वतांपतयेनमः ॥ २२ ॥ पित्रानिष्कासितोदेवत्वामहंशरणङ्गतः ॥ देहिमह्यंभूमिमन्यांयत्रवासोहिमेभवेत् ॥
॥ २३ ॥ ध्रुवोपियत्प्रसादेनययौसर्वोत्तमंपदं ॥ तस्मैनमोभगवतेप्रणतक्लेशहारिणे ॥ २४ ॥ ॥ श्रीनारदउवाच ॥ ॥ आ
नर्तमानतंदीनंभगवान्दीनवत्सलः ॥ प्रसन्नःश्रीमुखेनाहमेघगंभीरयागिरा ॥ २५ ॥ ॥ श्रीभगवानुवाच ॥ ॥ अन्यान
मेदिनीलोकेकिंकर्तव्यंमयानृप ॥ स्ववचस्तद्दतंकर्तुंत्वद्भक्त्यापरितोषितः ॥ २६ ॥ तस्माद्वैस्वस्यलोकस्यवैकुंठस्यपरंतप ॥ भू
खंडंयोजनशतंददामिविमलंशुभम् ॥ २७ ॥ ॥ श्रीनारदउवाच ॥ ॥ इत्युक्त्वानर्तंनृपतिंभगवान्भक्तवत्सलः ॥ वैकुंठा
च्चसमुत्पाट्यभूखंडंशतयोजनं ॥ २८ ॥ चक्रंसुदर्शनंधृत्वासमुद्रेभीमनादिनि ॥ दधारभगवान्देवस्तस्योपरिविदेहराट् ॥ २९ ॥
आनर्तोलक्षवर्षांतंतत्रराज्यंचकारह ॥ पुत्रपौत्रसमायुक्तोराजन्वैकुंठसंपदं ॥ ३० ॥ इदंश्रुत्वाथशर्यातिःपितावैविस्मितोभव
त् ॥ आनर्तोनामदेशोभूदानर्तस्यप्रशासतः ॥ ३१ ॥ रेवतस्तस्यपुत्रोभूत्श्रीशैलस्यगिरेःसुतम् ॥ समुत्पाट्यस्वहस्ताभ्या
मानर्तेपुन्यपातयत् ॥ ३२ ॥ सोभूद्रेवतनाम्नापिरैवतोनामपर्वतः ॥ कुशस्थलींविनिर्मायराज्यंकृत्वाथरेवतः ॥ ३३ ॥ समादाय

स्वकांकन्यांब्रह्मलोकंजगामह ॥ बलदेवविवाहेपितत्कथाकथितामया ॥ तस्माद्द्वारावतींपुण्यांमोक्षद्वारांविदुःसुराः ॥ ३४ ॥
इ०श्रीग०सं० श्रीद्वारकाखंडे श्रीद्वारकामहात्म्ये नारदबहुलाश्वसंवादे द्वारकोत्पत्तिवर्णनंनामप्रथमोऽध्यायः ॥ १ ॥
॥ श्रीनारदउवाच ॥ ॥ इत्थंमयातेकथितंद्वारकागमकारणं ॥ सर्वपापहरंपुण्यंकिंभूयःश्रोतुमिच्छसि ॥ १ ॥ ॥ बहुला
श्वउवाच ॥ ॥ सर्वतीर्थमयीभूमिर्द्वारकानगरीशुभा ॥ तत्रमुख्यानितीर्थानिवदमांमुनिसत्तम ॥ २ ॥ ॥ श्रीनारदउवाच ॥
आप्रभासात्तीर्थमयीमर्यादीकृत्यपुण्यदा ॥ भूमिर्मोक्षप्रदाराजन्द्वारकायोजनैःशतम् ॥ ३॥ द्वारकांनगरींदृष्ट्वानरोनाराय
णोभवेत् ॥ द्वारकायांमृतःकोपिगर्दभोपिचतुर्भुजः ॥ ४ ॥ पश्यन्शृण्वन्कथांतस्याद्वारकेतिवदन्क्वचित् ॥ दृष्ट्वादद्यात्तृणं
मृत्युंगतोयातिपरांगतिम् ॥ ५ ॥ एकदारेवतंभक्तंप्रेमानंदसमाकुलम् ॥ प्रेक्ष्यस्वदर्शनंदत्वाहरिरश्रुमुखोभवत् ॥ ६ ॥ तन्नेत्र
बिंदुसंभूतागोमतीसामहानदी ॥ यस्यादर्शनमात्रेणब्रह्महत्याप्रमुच्यते ॥ ७॥ गोमतीतीरजंपुण्यंरजोयोधारयेन्नरः ॥ शतज
न्मकृतात्पापान्मुच्यतेनात्रसंशयः ॥ ८ ॥ स्नानकालेगोमतीतिवदत्यपिनरःक्वचित् ॥ गोमत्यांस्नानजंपुण्यंलभतेवैनसंशयः॥

॥ ९ ॥ मकरस्थेरवौमाघेप्रयागेस्नानमाचरेत् ॥ शताश्वमेधजंपुण्यंसंप्राप्नोतिविदेहराट् ॥ १०॥ तत्सहस्त्रगुणंपुण्यंगोमत्यांम
करेरवौ॥गोमत्याश्चैवमाहात्म्यंवक्तुंनालंचतुर्मुखः ॥११ ॥ गोमत्यांचक्रतीर्थेषुपाषाणनिचयाश्चये ॥ तेसर्वेचक्रतांयांतिपूजनी
याःप्रयत्नतः ॥ १२ ॥ चक्रचिन्हेचक्रतीर्थेद्वादश्यांस्नानमाचरेत् ॥ चक्रपाणिपदंयातिपापानांभाजनोपिहि ॥ १३ ॥ कोटि
जन्मकृतैःपापैःपतितोयोपिपातकी ॥ चक्रतीर्थस्यसोपानमेत्यमुक्तिंसमाप्नुयात् ॥ १४ ॥ ॥ बहुलाश्वउवाच ॥ ॥ गोमत्यां
हिमहानद्यांचक्रतीर्थंशुभार्थदं ॥ कथंजातंबहुमतंतन्मेब्रूहिमहामुने ॥१५॥ ॥नारदउवाच॥ ॥अत्रैवोदाहरंतीममितिहासं
पुरातनम् ॥ यस्यश्रवणमात्रेणपापहानिःपरंभवेत् ॥ १६ ॥ अलकेशोराजराजोनिधीशोधर्मभृत्प्रभुः ॥ वैष्णवंयज्ञमारेभेकै
लासोत्तरभूमिषु ॥ १७ ॥ तस्ययज्ञेस्वयंविष्णुरागतोवैस्वधामतः ॥ ब्रह्माशिवोजंभभेदीवरुणोयादसांपतिः ॥ १८ ॥ वायुर्य
मोरविःसोमःक्षितिःसर्वजनेश्वरी ॥ गंधर्वाप्सरसःसिद्धाःसर्वेतत्रसमाययुः ॥१९॥ देवर्षयःसमाजग्मुस्तथाब्रह्मर्षयोनृप ॥ ध
नाध्यक्षोभवत्तस्यपुत्रस्तुनलकूबरः ॥ २० ॥ रक्षायांवीरभद्रोभूत्सत्सेवायांगजाननः ॥ तथामरुद्गणाःसर्वेपरिवेषणकारिणः॥

॥ २१ ॥ बाहुलेयःसभापूजामकरोद्धर्मतत्परः ॥ घंटानादःपार्श्वमौलिःकुबेरस्यतुमंत्रिणौ ॥२२ ॥ सर्वशास्त्रविदांश्रेष्ठौदाना
ध्यक्षौबभूवतुः ॥ एवंहिविधिवद्यज्ञोबभूवपरमोत्सवः ॥ २३ ॥ अध्वरावभृथस्नातोराजराजोमहामनाः ॥ परंभागंचदेवेभ्यो
विप्रेभ्योदक्षिणामदात् ॥ २४ ॥ एवंपूर्णेध्वरेमुख्येतुष्टेदेवर्षिसत्तमे ॥ आजगामाथदुर्वासादंडीछत्रीजटाधरः ॥ २५ ॥ क्रोधी
कृशःपादुकांघ्रिर्दीर्घश्मश्रुःकृशोदरः ॥ दर्भासनसमित्पात्रमृगचर्मधरःपरः ॥ २६ ॥ तमागतंसमागम्यपूजयित्वाविधानतः॥
भयभीतःपरिक्रम्यकुबेरःप्रणनामह ॥ २७॥ अद्यमेसफलंजन्मसफलंमंदिरंचमे ॥ अद्यमेसफलोयज्ञोब्रह्मंस्त्वय्यागतेसति
॥ २८ ॥ इत्थंसंतोषितस्तेनदुर्वासाभगवान्मुनिः ॥ देवंमनुष्यधर्माणंप्राहप्रहसिताननः ॥ २९ ॥ त्वंराजराजोधर्मात्मादानी
विप्रपरायणः ॥ कृतस्तेवैष्णवोयज्ञोविष्णुसंतोषकारणः ॥ ३० ॥ नयाचितोमयात्वंवैक्वापिवैश्रवणप्रभो ॥ अद्यैवयाचनांकुर्वे
ज्ञात्वात्वांदानिसत्तमम् ॥ ३१ ॥ मद्याञ्चांसफलीकुर्यास्तुभ्यंदास्यामिसद्वरम् ॥ नचेत्त्वांभस्मसात्कुर्वेशापेनातिभयेनवै ॥३२॥
वर्ततेत्वद्गृहेसर्वेत्रैलोक्यनिधयोनव ॥ तान्मेप्रयच्छभद्रंतेतदर्थंगतवानहम्॥ ३३ ॥ ॥ नारदउवाच ॥ ॥ एतच्छ्रुत्वाराजरा

जोदानशीलउदारधीः ॥ ओमितिप्रतिगृण्हीष्वप्राहतंगुह्यकेश्वरः ॥ ३४॥ एवंनिधीन्प्रदास्यंतंदानाध्यक्षौनिधीश्वरं ॥ घंटा
नादःपार्श्वमौलिरूचतुर्लोभमोहितौ ॥ ३५ ॥ ॥ द्वावूचतुः ॥ ॥ एकोयंब्राह्मणोलोभीनिधिभिःकिंकरिष्यति ॥ लक्षदिव्यं
देहिचास्मैवृत्तिंरक्षतथोत्तराम् ॥ ३६ ॥ ॥ नारदउवाच ॥ ॥ तद्वचःपरुषंश्रुत्वादुर्वासाक्रोधविग्रहः ॥ भ्रूभंगकुटिलीभूते
रक्तनेत्रेचकारह ॥ ३७ ॥ स्थलीवसर्वब्रह्मांडंचचालनिमिषद्वयम् ॥ प्रणतंधनदंवीक्ष्यताभ्यांशापंमहामुनिः ॥ ३८ ॥ ॥ मुनि
रुवाच ॥ ॥ घंटानादमहादुष्टपापबुद्धेतिलुब्धक ॥ ग्राहवत्वंधनग्राहीग्रहोभवमहाखल ॥ ३९ ॥ पार्श्वमौलेपापबुद्धेधनलोभ
मदान्वितः ॥ गजवत्प्रेरणांकुर्वंस्त्वंगजोभवदुर्मते ॥ ४० ॥ ॥ नारदउवाच ॥ ॥ताभ्यांशापंमुनिर्दत्वानिधिंनीत्वाकुबेरतः ॥
वरंददौपुनस्तस्मैदुर्वासादुर्लभंपरम् ॥ ४१ ॥ अस्माद्दानाच्चद्विगुणाभवंतुनिधयोनव ॥ इत्युक्त्वासनिधिःप्रागादहोतेजीय
साम्बलम् ॥४२॥ ॥ इ० श्रीग०सं० श्रीद्वा० द्वारकामा० ना० ब० गोमत्युपाख्याने चक्रतीर्थमाहात्म्यन्नामद्वितीयो० ॥ २ ॥
॥ श्रीनारदउवाच ॥ ॥ कुबेरमंत्रिणौदीनौविप्रशापविमोहितौ ॥ तत्रसाक्षात्स्वयंविष्णुःप्राहतौशरणंगतौ ॥ १ ॥ ॥ श्री

भगवानुवाच ॥ मदर्चासंयुतेयज्ञेभवंतौदुःखसंयुतौ ॥ ब्राह्मणानांवचोहंवैदूरीकर्तुंनचक्षमः ॥२॥ भवताग्राहमातंगौयुद्धंहियु
वयोर्यदा॥तदावैमत्प्रसादेनप्रकृतिंस्वांगमिष्यथः ॥ ३ ॥ ॥नारदउवाच॥ ॥ इत्युक्तौहरिणातौद्वौराजराजस्यमंत्रिणौ ॥
बभूवतुर्ग्राहगजौजातिस्मरणसंयुतौ ॥४॥ घंटानादोभवद्ग्राहोगोमत्यांचशतंसमाः ॥ विकरालोमहाभीमःशतहस्तवपुर्द्धरः॥
॥५॥पार्श्वमौलिर्गजेंद्रोभूद्रैवतस्यगिरेर्वने॥चतुर्दंतःकज्जलाभःपृष्ठप्राच्योधनुःशतम् ॥६॥ वंजुलैःकुरबैःकुंदैर्बदरैर्वेत्रवेणुभिः
॥ रंभाभूर्जवटैर्युक्तेकोविदारासनार्जुनैः ॥७॥ मंदारपाटलाशोकचूतचंपकचन्दनैः ॥पनसोदुंबराश्वत्थखर्जूरैर्बीजपूरकैः॥८॥
प्रपालाप्रौतकाम्रैश्चक्रमुकैःपरिमंडिते ॥ रैवतस्यवनेदीर्घैर्विचचारमहागजः ॥ ९ ॥ एकदामाधवेमासिगजेंद्रोगिरिगह्वरा
त् ॥ स्नातुंतांगोमतींगंगामाययौसगणोनदन् ॥ चिरंसमवगाह्याप्सुशुंडादंडैरितस्ततः॥ करेणुकलभान्सर्वान्स्नापयामास
नागराट् ॥ ११ ॥ महान्ग्रहोऽपितत्रस्थोबलीयान्दैवनोदितः ॥ अग्रहीच्चरणेनागंक्रोधपूरितविग्रहः ॥ १२ ॥ तेनैवतद्गृहेनी
तोगजेंद्रोबलदर्पितः ॥ तमाकृष्यबहिःप्राप्तंपुनस्तेनविकर्षितः ॥ १३ ॥ करेणवश्चकलभास्तंतारयितुमक्षमाः ॥ एवंतयोर्युध्य

तोऽश्वकर्षतोंतर्बहिर्मिथः ॥ १४ ॥ पंचाशत्पंचवर्षाणिव्यतीयुःपश्यतांसतां ॥ एवंकश्मलमापन्नोगजोजातिस्मरोमहान्॥१५॥
प्रेमलक्षणयाभक्त्याहरिपादकृताश्रयः॥सस्मारश्रीहरिंदेवंमृत्युपाशवशंगतः॥१६॥ ॥गजेंद्रउवाच॥ ॥श्रीकृष्णकृष्णसख
कृष्णवपुर्दधानकृष्णायतेप्रणतिरस्तुसुरेशविष्णो ॥ पूर्णप्रभोपरमपावनपुण्यकीर्तेमांपाहिपाहिपरमेश्वरपापपाशात् ॥ १७॥
॥ नारदउ० ॥ ॥एवंग्राहगृहीतांगंस्मरंतंचहरिंहरिः॥ ज्ञात्वारुह्यखगंवेगादधावद्दीनवत्सलः॥१८॥स्वयंखगात्समुत्तीर्य्यधा
वंश्चक्रंसमाक्षिपत् ॥ चक्रेप्राप्तेपूर्वमेवग्राहस्यापिशिरोद्धृतं ॥ १९ ॥ दैन्यंप्राप्तेधनमिवदेहाद्भिन्नंबभूवह ॥ पश्चात्प्रपतितं
चक्रंगोमत्यांचन्हदेनदत् ॥ पाषाणनिचयान्सर्वांश्चक्राकारांश्चकारह ॥ २० ॥ तन्नेमिसंघर्षभवंचक्रतीर्थंशुभावहं ॥ तच्चक्रद
र्शनाद्राजन्ब्रह्महत्याप्रमुच्यते॥२१॥ग्राहश्छिन्नशिराभूत्वापूर्वरूपंदधारह॥ श्रीकृष्णानुग्रहाद्धस्तीदिव्यरूपोबभूवसः॥२२॥
परिक्रम्यहरिंनत्वास्तुत्वादेवंकृताजली ॥ कुबेरमंत्रिणौतौद्वौजग्मतुःस्वपदंपुनः ॥ २३ ॥ देवेषुपुष्पंवर्षत्सुजयध्वनिनदत्सुच॥
जगामभगवान्साक्षात्स्वंधामप्रकृतेःपरं ॥ २४ ॥ चक्रतीर्थकथामेनांयःशृणोतिनरोत्तमः ॥ चक्रतीर्थस्नानफलंसंप्राप्नोतिन

संशयः ॥ २५ ॥ गजग्राहकथांपुण्यांयःशृणोतिसमाहितः ॥ दुःस्वप्नंनश्यतेतस्यसुस्वप्नंभवतिध्रुवम् ॥ २६ ॥ ॥ इतिश्रीम
द्गर्गा०सं० श्रीद्वारकाखण्डेद्वारकामाहात्म्ये नारदबहुलाश्वसंवादे चक्रतीर्थोत्पत्तौगजग्राहमोक्षोनामतृतीयोऽध्यायः ॥ ३ ॥
॥ श्रीनारदउवाच ॥ ॥ शंखोद्धारेतीर्थमुख्येस्वर्णदानंददातियः ॥ सगच्छेद्वैष्णवंलोकंसर्वोपद्रववर्जितम् ॥१॥ श्रीकृष्णभक्तः
शांतात्मात्रितोनाममहामुनिः ॥ तीर्थयात्राप्रसंगेनप्राप्तआनर्तभूमिषु ॥२॥ दृष्ट्वाशुभंसरःस्नात्वाहरेःपूजांचकारह॥तत्पूजायां
महाशंखंसुंदरैर्लक्षणैर्वृतम् ॥ ३ ॥ चोरयामासकक्षीवांस्तस्यशिष्योतिलोभतः ॥ पूजाशंखंगतंवीक्ष्यक्रुद्धःप्राहत्रितोमुनिः ॥
॥ ४ ॥ येननीतस्तुमेशंखःसशंखोभवतुध्रुवम् ॥ तदैवशंखरूपोभूत्कक्षीवाञ्छापपीडितः ॥ ५ ॥ तत्पादयोर्निपतितःपाहिमा
मित्युवाचह ॥ शीघ्रंशांतास्त्रितःप्राहदुर्मतेकिंकृतंत्वया ॥ स्तेयदोषाद्भुंक्ष्वपापंमद्वचोनोमृषाभवेत् ॥ ६ ॥ भजश्रीकृष्णपादा
ब्जंसतेमोक्षङ्करिष्यति ॥ इत्युक्त्वाथगतेराजंस्त्रितेदेवेमहामुनौ ॥ ७ ॥ सरोवरेनिपतितःकक्षीवाञ्छंखरूपधृक् ॥ प्रवदन्कृ
ष्णकृष्णेतिशतवर्षंस्थितोभवत् ॥ ८ ॥ परिपूर्णतमःसाक्षात्भगवान्भक्तवत्सलः ॥ आगत्यसरसस्तीरंमाभैष्टेत्यभयंददौ ॥

॥ ९ ॥ तांमेघनादगंभीरांगिरंश्रुत्वाजलेचरः ॥ चुक्रोशपाहिपाहीतिदेवदेवजगत्पते ॥ १० ॥ भुजगेंद्रभोगरुषाभुजेनभगवा
न्प्रभुः ॥ शंखंभक्तंगजमिवप्रोज्जहारदयापरः ॥ ११ ॥ तदैवदिव्यरूपोभूच्छंखरूपंविहायसः ॥ कृतांजलिर्हरिंनत्वास्तुति
श्चक्रेतदावचसः ॥ १२ ॥ ॥ कक्षीवानुवाच ॥ ॥ वासुदेवनमस्तेस्तुगोविन्दपुरुषोत्तम ॥ दीनवत्सलदीनेशद्वारकेशपरेश्वर
॥ १३ ॥ ध्रुवेध्रुवपदंदात्रेप्रल्हादस्यार्तिहारिणे ॥ गजस्योद्धारिणेतुभ्यंबलेर्बलिविदेनमः ॥ १४ ॥ द्रौपदीचीरसन्तानकारि
णेहरयेनमः ॥ गराग्निवनवासेभ्यःपाण्डवानांसहायिने ॥ १५ ॥ यादवत्राणकर्त्रेचशक्रादाभीररक्षिणे ॥ गुरुमातृद्विजानां
चपुत्रदात्रेनमोनमः ॥ १६ ॥ जरासन्धनिरोधार्तनृपाणांमोक्षकारिणे ॥ नृगस्योद्धारिणेसाक्षात्सुदाम्नोदैन्यहारिणे ॥ १७ ॥
वासुदेवायकृष्णायनमःसंकर्षणायच ॥ प्रद्युम्नायानिरुद्धायचतुर्व्यूहायतेनमः ॥ १८ ॥ त्वमेवमाताचपितात्वमेवत्वमेवबन्धुश्च
सखात्वमेव ॥ त्वमेवविद्याद्रविणंत्वमेवत्वमेवसर्वंममदेवदेव ॥ १९ ॥ ॥ श्रीनारदउवाच ॥ ॥ एवंस्तुत्वाहरिंराजन्कक्षीवा
न्प्रेमपूरितः ॥ विमानवरमास्थाययादवानांचपश्यताम् ॥ २० ॥ विभ्राजयन्दशदिशःशतसूर्यसमप्रभः ॥ जगामवैष्णवं

लोकंसर्वोपद्रववर्जितम् ॥ २१ ॥ शंखोद्धारःकृतोयस्मिन्हरिणामैथिलेश्वर ॥ तस्मात्तीर्थंमहापुण्यंशंखोद्धारप्रथांगतम् ॥
॥ २२ ॥ शंखोद्धारकथामेतांयःशृणोतिनरोत्तमः ॥ शंखोद्धारस्नानफलंलभतेवैनसंशयः ॥ २३ ॥ ॥ इतिश्रीमद्गर्गाचार्यसं
हितायां श्रीद्वारकाखण्डे द्वारकामाहात्म्येनारदबहुलाश्वसंवादे शंखोद्धारमाहात्म्यंनामचतुर्थोऽध्यायः ॥ ४ ॥ ॥
॥ श्रीनारदउवाच ॥ ॥ प्रभासस्यापिमाहाम्यंशृणुराजन्महामते ॥ सर्वपापहरंपुण्यंतेजसांवर्द्धनंपरं ॥ १ ॥ गोदावर्यांगुरौ
सिंहेहरक्षेत्रेचकुंभगे ॥ रविग्रहेकुरुक्षेत्रेकाश्यांचंद्रग्रहेतथा ॥ २ ॥ यत्पुण्यंलभतेराजन्स्नानतोदानतोनरः ॥ तस्माच्छतगुणं
पुण्यंप्रभासेचदिनेदिने ॥३॥ यत्रस्नात्वादक्षशापात्गृहीतोयक्ष्मणोडुराट् ॥ विमुक्तःकिल्मिषात्सद्योभेजेभूयःकलोदयम् ॥४॥
महापुण्यतमाराजन्यत्रप्रत्यक्स्वरस्वती ॥ तस्यांस्नात्वानरःपापीसाक्षाद्ब्रह्ममयोभवेत् ॥ ५ ॥ तत्तीरेवर्ततेराजन्नाम्नावैबोध
पिप्पलः ॥ कृष्णेनयत्रोद्धवायदत्तंभागवतंशुभं ॥ ६॥ तन्नत्वाभ्यर्च्यविधिवत्स्पृष्ट्वाश्रीबोधपिप्पलं ॥ शृणोतियोभागवतंपुराणं
ब्रह्मसंमितम् ॥ ७ ॥ श्लोकार्धंश्लोकपादंवामौनीनियतमानसः ॥ तस्यपाणौभवेद्राजन्वैष्णवंपरमंपदम् ॥ ८॥ प्रौष्ठपद्यांपू

र्णिमायांहेमसिंहसमन्वितम् ॥ ददातियोभागवतंसयातिपरमांगतिम् ॥९॥ पुराणंनश्रुतंयैस्तुश्रीमद्भागवतंक्वचित् ॥ तेषांवृ
थाजन्मगतंनराणांभूमिवासिनाम् ॥ १० ॥ यैर्नश्रुतंभागवतंपुराणंनाराधितोयैःपुरुषःपुराणः ॥ हुतंमुखेनैवधरामराणांतेषां
वृथाजन्मगतन्नराणाम् ॥ ११ ॥ द्वारावत्यांतीर्थराजंगोमतीसिन्धुसङ्गमम् ॥ यत्रस्नात्वानरोयातिवैकुण्ठंविमलंपदम् ॥१२॥
शताश्वमेधजंपुण्यंगङ्गासागरसङ्गमे ॥ तत्सहस्रगुणंप्रोक्तंगोमतीसिन्धुसङ्गमे ॥ १३ ॥ अत्रैवोदाहरंतीममितिहासंपुरातन
म् ॥ यस्यश्रवणमात्रेणपापतापात्प्रमुच्यते ॥ १४ ॥ आसीद्व्रजाऽह्वयेवैश्योराजमार्गपतिःपरः ॥ महागौरवसंयुक्तोनिधीशो
धनदोयथा ॥ १५ ॥ वेश्याप्रसङ्गनिरतोविटगोष्ठीविशारदः ॥ द्यूतक्रीडनकासक्तोलोभमोहमदान्वितः ॥ १६ ॥ मृषावादीम
हादुष्टःकुकर्मनिरतःसदा ॥ ब्राह्मणेभ्योनपितृभ्योनदेवेभ्योधनंददौ ॥ १७ ॥ हरेःकथांप्रेक्ष्यदूराद्दूरंवैनिर्ययौत्वरम् ॥ पित्रोः
सेवापिनकृतानपुत्रेभ्योधनंददौ ॥ १८ ॥ त्यक्त्वाभार्यांसभिन्नोभूद्धनाढ्योदुर्मतिःखलः ॥ वेश्याप्रसङ्गात्तस्यापिधनार्द्धंप्रक्ष
यङ्गतम् ॥ १९ ॥ अर्धन्तुतस्करैर्नीतंकिञ्चित्पृथ्व्याङ्गतंस्वतः ॥ पुण्येनवर्द्धतेलक्ष्मीःपापेनक्षीयतेध्रुवम् ॥ २० ॥ एवंसनिर्ध

नोजातोवेश्यासक्तोमहाखलः ॥ तस्मिन्गजाव्हयेरम्येचौरकर्मचकारह ॥ २१ ॥ चौर्यकर्मप्रकुर्वन्तंबध्वातंदामभिर्नृपः ॥ देशान्निःसारयामासशन्तनुर्नृपतीश्वरः ॥ २२ ॥ वनेपिनिवसन्सोपिजीवाहिंसाञ्चकारह ॥ समाद्वादशसाहस्रंनववर्षयदाघनः ॥ २३ ॥ पश्चिमान्तुदिशंप्रागाद्वैश्योदुर्भिक्षपीडितः ॥ वनेवैमारितःसोपिसिंहेनतलघाततः ॥ २४ ॥ तदैवयमदूतास्तंबत्ध्वापाशैरधोमुखम् ॥कशाघातैस्ताडयन्तोनिन्युर्मार्गेयमस्यच ॥ अथकश्चिन्महागृध्रोमांसन्तस्यभुजस्यच ॥ २५ ॥ गृहीत्वाखङ्गतःसद्यःखादंश्चंचुपुटेनतम् ॥ २६ ॥ निरामिषाःखगाश्चान्येसामिषंजग्मुरातुराः ॥ एवंकोलाहलेजातेशंखचिल्हादिभिःकृते ॥ २७ ॥ नजहौमुखतोमांसंपश्चिमाशांजगामह ॥ तत्समेनापिगृध्रेणतीक्ष्णतुण्डेनताडितात् ॥ २८ ॥ तन्मुखाखात्प्रपतन्मांसंगोमतीसिन्धुसङ्गमे ॥ तीर्थप्लुतेतस्यमांसेवैश्योयंपातकीमहान् ॥ २९ ॥ तेषांपाशान्स्वयंछित्वाभूत्वादेवश्चतुर्भुजः ॥ पश्यतांयमदूतानांविमानमधिरुह्यसः ॥ ३० ॥ विराजयन्दिशःसर्वाःपरंधामहरेर्ययौ ॥ ३१ ॥ गोमतीसिन्धुसङ्गस्यमाहात्म्यंशृणुतेनरः ॥ सर्वपापविनिर्मुक्तोविष्णुलोकंप्रयातिसः ॥ ३२ ॥ ॥ इतिश्रीगर्गाचार्यसंहितायां श्रीद्वार

काखण्डेद्वारकामाहात्म्ये नारदबहु० प्रभाससरस्वतीबोधपिप्पलगोमतीसिंधुसङ्गममाहात्म्यंनामपञ्चमोऽध्यायः ॥ ५ ॥
॥ नारदउवाच ॥ ॥ द्वारावत्याःसमुद्रस्यमाहात्म्यंशृणुमानद ॥ सर्वपापहरंपुण्यंतत्स्नानंफलदंस्मृतम् ॥ १ ॥ माधव्यांपूर्ण
मास्यांयोव्रतीस्नात्वानदीपतिं ॥ नत्वासंपूज्यविधिवद्रत्नदानंकरोतियः ॥२॥ तस्यदेहेत्रयोदेवानिवसंतिमहीपते ॥ यस्यदर्शन
मात्रेणनरोयातिकृतार्थताम् ॥ ३ ॥ तद्देहस्पर्शनात्सद्योब्रह्महत्याप्रमुच्यते ॥ यत्रयत्रगतःसोपितत्रतत्रचभूःशुभा ॥ ४ ॥ दृष्ट्वा
तंचमृतःपापीजगद्वधकरोपिहि ॥ छिनत्तिपापपटलंपरंमोक्षंप्रयातिहि ॥ ५ ॥ रैवतस्याथशैलस्यमाहात्म्यंशृणुमानद ॥ सर्व
पापहरंपुण्यंभुक्तिमुक्तिप्रदायकं ॥ ६ ॥ गौतमस्यसुतोधीमान्मेधावीनामवैष्णवः ॥ विंध्याचलेतपस्तेपेवर्षाणामयुतंशतम् ॥
॥ ७ ॥ तंद्रष्टुमागतःसाक्षादपांतरतमोमुनिः ॥ नोच्चचालासनात्सोपिमेधावीतपसोत्कटः ॥ ८ ॥ अपांतरतमस्तंवैशशापक्रोध
पूरितः ॥ सतामभक्तपापात्मंस्तपोबलविगर्वित ॥ ९ ॥ शैलवत्तेस्थितिश्चात्रत्वंशैलोभवदुर्मते ॥ इत्युक्त्वाथगतेसाक्षादपांतर
तमेमुनौ ॥ १० ॥ मेधावीशैलतांप्राप्तःश्रीशैलस्यसुतोऽभवत् ॥ जातिस्मरोमहाबुद्धिर्विष्णुभक्तेःप्रभावतः ॥ ११ ॥ एकदाम

न्मुखाच्छ्रुत्वामाहात्म्यंद्वारकापुरः ॥ प्रोवाचसोपिराजानंरैवतंगच्छसत्वरम् ॥१२॥ वदमत्प्रार्थनामुक्तांत्वंमहादीनवत्सलः ॥सो
यंमहाबलोराजाप्रसन्नोयदिवाभवेत् ॥ १३ ॥ तेननीतस्यमेवासोभविष्यतिहरेःपुरि ॥ इतिश्रुत्वामयाविष्णुर्भक्तानांशांतिका
रिणा ॥ १४ ॥ रैवतायाशुकथितंतथोक्तंपरमंवचः ॥ सप्रसन्नःप्राहराजन्नत्रकोपिनपर्वतः ॥ १५ ॥ तत्स्थापनांकरिष्यामिस
मुत्पाट्यभुजाबलात् ॥ समुन्नीयद्वारकायांप्रतिज्ञामकरोदिमां ॥ १६ ॥ एतस्मिंस्तंचोरयितुंप्रयातेनृपसत्तमे ॥ तत्पूर्वस्माद
हंप्राप्तःश्रीशैलस्यपुरेनृप॥ १७ ॥ कलिप्रियेणापिमयाश्रीशैलायमहात्मने ॥ कथितःसर्ववृत्तांतोनृपचौर्यसमन्वितः ॥ १८ ॥
श्रीशैलःपुत्रंमोहेननिर्भर्त्स्यैतिक्वयासिहि ॥ सुमेरुगिरिराजंचहिमवंतंनगेश्वरं ॥ १९ ॥ श्रीशैलःप्राहधर्मात्मापुत्रस्नेहसमा
कुलः॥एकोदैवेनदत्तोयंनपुत्राबहवश्चमे॥२०॥तंहर्तुमागतेराज्ञिरैवतेवैमहाबले॥विदेशंयातिपुत्रोमेतेनराज्ञामहात्मना॥२१॥
पुत्रस्नेहाभिभूतोहंयुवयोःशरणंगतः ॥ जित्वातंरैवतंशीघ्रंपुत्रंमादातुमर्हथ ॥ २२ ॥ जातेश्चकारणात्तौद्वौसुमेरुश्चहिमाचलः ॥
शैललक्षैःपरिवृतौयोद्धुमाजग्मतुर्द्रुतम् ॥ २३ ॥ ततोभुजाभ्यामुत्पाट्यहनुमानिवतंगिरिम् ॥ ऊर्द्ध्वंकृत्वाबलाद्राजायदागंतुम

नोदधे ॥ २४ ॥ तदैवचागतान्वीक्ष्यगिरीन्शस्त्रास्त्रधारिणः ॥ अट्टहासंचकारोच्चैस्तडित्पातमिवात्मनः ॥ २५ ॥ ननादतेनब्र
ह्मांडंसप्तलोकैर्बिलैःसह ॥ तदैवतेषांशस्त्राणिहस्तेभ्योन्यपतन्स्वतः ॥ २६ ॥ निःशस्त्रास्तेयदाशैलाःकुर्वंतःप्रध्वनिंमुहुः ॥ ग
च्छंतंसगिरिंजघ्नुर्मुष्टिभिर्जानुभिःपथि ॥ २७ ॥ यथापुराहनूमंतमनुयातामहाबलं ॥ तैस्ताडितोपिनजहौगिरिंराजाकराग्र
तः ॥ २८ ॥ मन्मुखाच्छ्रीहरिःश्रुत्वाशैलोद्योगंनृपोपरि ॥ सद्योभक्तसहायार्थंभगवान्भक्तवत्सलः ॥ २९ ॥ आगत्याकाश
मार्गेपिदत्वातेजः स्वकंपरम् ॥ माभैष्टेत्यभयंदत्वावरमंतरधीयत ॥ ३० ॥ गतेहरौभगवतिभगवत्तेजसान्वितः ॥ एकहस्ते
गिरिंधृत्वामुष्टिनावज्रघातिना ॥ ३१ ॥ सुमेरुंसंतताडाशुवज्रीवबलवत्तरः ॥ तस्यमुष्टिप्रहारेणमेरुर्विह्वलतांगतः ॥ ३२ ॥
हिमवंतंबाहुवेगात्पातयित्वामहीतले ॥ ममर्दपद्भ्यांचान्यांश्चविंध्यादीन्रणदुर्मदः ॥ ३३ ॥ विंध्यादयश्चतेसर्वेपादघातेनम
र्दिताः ॥ भयभीतारणंत्यक्त्वादुद्रुवुस्तेदिशोदश ॥ ३४ ॥ एवंजित्वाशैलसंघंतंशैलंशैलसन्निभः ॥ रैवतोपिजयारावैरानर्तेषुन्य
पातयत् ॥ ३५ ॥ सोभूद्रैवतनामापिराजन्रैवतकोऽचलः ॥ हरिभक्तःशैलमुख्योद्वारावत्यांविराजते ॥ ३६ ॥ तस्यदर्शनमात्रे

णब्रह्महत्याप्रमुच्यते ॥ स्पर्शनाच्छतयज्ञानांफलमाप्नोतिमानवः ॥ ३७ ॥ यात्रांकृत्वाप्रियस्यापिपरिक्रम्यनताननः ॥ भो
जनंब्राह्मणेदत्वायातिविष्णोःपरंपदम् ॥ ३८ ॥ ॥ इतिश्रीमद्गर्गाचार्यसंहितायांश्रीद्वारकाखंडे द्वारकामाहात्म्ये
नारदबहुलाश्वसंवादेरत्नाकररैवतकाचलमाहात्म्यंनामषष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥ ॥ छ ॥
॥ श्रीनारदउवाच ॥ ॥ तस्मिन्गिरौयज्ञतीर्थंरैवतेनकृतंपुरा ॥ यत्रकृत्वायज्ञमेकंकोटियज्ञफलंलभेत् ॥ १ ॥ कपिटंकंनाम
तीर्थंकपिपातसमुद्भवं ॥ गिरौरैवतकेराजन्सर्वपापप्रणाशनं ॥ २ ॥ भौमासुरसखोदुष्टोद्विविदोनामवानरः ॥ मारितोयत्ररा
मेणमुष्टिनावज्रपातिना ॥ ३ ॥ सद्योमुक्तिंगतःसोपिसतांहेलनवानपि ॥ तत्रस्नातुंसदादेवाआगच्छंतिनरेश्वर ॥ ४ ॥ कलविं
कस्ययात्रायांकोटिगोदानजंफलं॥एतच्चद्विगुणंपुण्यंदंडकाख्येवनेशुभे॥५॥तस्माच्चतुर्गुणंपुण्यंसैंधवाख्येमहावने॥जंबुमार्गे
पंचगुणंपुण्यंप्राप्नोतिमानवः ॥ ६ ॥ तस्माद्दशगुणंपुण्यंपुष्कराख्येवनेस्मृतम् ॥ तस्माद्दशगुणंपुण्यमुत्पलावर्तयात्रया ॥ ७ ॥
तस्माच्चनैमिषारण्येपुण्यंदशगुणंस्मृतम् ॥ तस्माच्छतगुणंपुण्यंकपिटंकेविदेहराट् ॥ ८ ॥ नृगकूपंद्वारकायांतीर्थानांतीर्थमुत्त

मम् ॥ यस्यदर्शनमात्रेणविप्रवध्यात्प्रमुच्यते ॥ ९ ॥ अज्ञानाद्ब्राह्मणस्यापिगांददौब्राह्मणायसः ॥ तेनपापेनकूपेवैकृकलास
वपुर्द्धरः ॥ १० ॥ नृगोपिदानिनांश्रेष्ठःपतितोथचतुर्युगं ॥ श्रीकृष्णेनतदुद्धारःकृतोवैपश्यतांसतां ॥११॥ तद्दिनान्नृगकूपस्तुती
र्थीभूतोमहीपते ॥ कार्तिकेपूर्णिमायांतुतस्मिन्स्नानंसमाचरेत्॥१२॥कोटिजन्मकृतात्पापान्मुच्यतेनात्रसंशयः॥ एकंयत्रापि
गोदानंकरोतिविधिवन्नरः ॥१३॥ कोटिगोदानजंपुण्यंलभतेवैनसंशयः ॥ गोपीभूमेश्चमाहात्म्यंशृणुपापहरंपरम् ॥ १४ ॥ य
स्यश्रवणमात्रेणकर्मबंधात्प्रमुच्यते ॥ गोपीनांयत्रवासोभूत्तेनगोपीभुवःस्मृताः ॥ १५ ॥ गोप्यंगरागसंभूतंगोपीचंदनमु
त्तमं॥गोपीचंदनलिप्तांगोगंगास्नानफलंलभेत्॥१६॥महानदीनांस्नानस्यपुण्यंतस्यदिनेदिने॥गोपीचंदनमुद्राभिर्मुद्रितोयः
सदाभवेत् ॥ १७॥ अश्वमेधसहस्राणिराजसूयशतानिच॥ सर्वाणितीर्थदानानिव्रतानिचतथैवच ॥ कृतानितेननित्यंवैसकृता
र्थोनसंशयः॥ १८ ॥ गंगास्मृद्विगुणंपुण्यंचित्रकूटरजःस्मृतं ॥ तस्माद्दशगुणंपुण्यंरजः पंचवटीभवं ॥ १९ ॥ तस्माच्छतगुणंपु
ण्यंगोपिचंदनकंरजः ॥ गोपिचंदनकंविद्धिवृंदावनरजःसमं ॥ २० ॥ गोपीचंदनलिप्तांगोयदिपापशतैर्युतः ॥ तंनेतुंनयमःश

क्कोयमदूतःक्कुतःपुनः ॥ २१ ॥ नित्यंकरोतियःपापीगोपीचंदनधारणं ॥ सप्रयातिहरेर्धामगोलोकंप्रकृतेःपरम् ॥ २२ ॥ सिं
धुदेशस्यराजाभूद्दीर्घबाहुरितिश्रुतः ॥ अन्यायवर्तीदुष्टात्मावेश्यासंगरतःसदा ॥ २३ ॥ तेनवैभारतेवर्षेब्रह्महत्याशतंकृतम् ॥
दशगर्भवतीहत्याकृतातेनदुरात्मना ॥ २४ ॥ मृगयायांतुबाणौघैःकपिलागोवधःकृतः ॥ सैंधवंहयमारुह्यमृगयार्थीगतोभव
त् ॥ २५ ॥ एकदाराज्यलोभेनमंत्रीक्रुद्धोमहाखलं ॥ जघानारण्यदेशेतंतीक्ष्णधारेणचासिना ॥ २६ ॥ भूतलेपतितंमृत्युगतं
वीक्ष्ययमानुगाः ॥ बध्वायमपुरींनिन्युर्हर्षयन्तःपरस्परम् ॥ २७ ॥ संमुखेवस्थितंवीक्ष्यपापिनंयमराड्वली ॥ चित्रगुप्तंप्राहतू
र्णंकायोग्यायातनास्यवै ॥ २८ ॥ ॥ श्चित्रगुप्तउवाच ॥ ॥ चतुराशीतिलक्षेषुनरकेषुनिपात्यतां ॥ निःसंदेहंमहाराजयावच्चं
द्रदिवाकरौ ॥ २९ ॥ अनेनभारतेवर्षेक्षणंनसुकृतंकृतं ॥ दशगर्भवतीघातःकपिलागोवधःकृतः ॥ ३० ॥ प्रजापीडाबहुकृतावे
श्यासंगःकृतोऽनिशम् ॥ अनेनधनलोभेनब्रह्महत्याशतंकृतम् ॥ ३१ ॥ तथावनमृगाणांचकृताहत्याःसहस्रशः ॥ तस्मादयंम
हापापीदेवताद्विजनिंदकः ॥ ३२ ॥ ॥ नारदउवाच ॥ ॥ तदायमाज्ञयादूतानीत्वातंपापरूपिणम् ॥ सहस्रयोजनायामेत

प्ततैलेमहाखले ॥ ३३ ॥ स्फुरदत्युच्छलत्फेनेकुंभीपाकेन्यपातयन् ॥ प्रलयाग्निसमोवन्हिंःसद्यःशीतलतांगतः ॥ ३४ ॥ वैदेह
तन्निपतनात्प्रल्हादक्षेपणाद्यथा ॥ तदैवचित्रमाचख्युर्यमदूतामहात्मने ॥ ३५ ॥ अनेनसुकृतंभूमौक्षणवन्नकृतंक्वचित् ॥ चित्र
गुप्तेनसततंधर्मराजोव्याचिंतयन् ॥ ३६ ॥ सभायामागतंव्यासंसम्पूज्यविधिवन्नृप ॥ नत्वापप्रच्छधर्मात्माधर्मराजोमहाम
तिः ॥ ३७ ॥ ॥ यमउवाच ॥ ॥ अनेनपापिनापूर्वंनकृतंसुकृतंक्वचित् ॥ स्फुरदत्युच्छलत्फेनेकुम्भीपाकेमहाखले ॥ ३८ ॥
अस्यक्षेपणतोवह्निःसद्यःशीतलताङ्गतः ॥ इतिसन्देहतश्चेतःखिद्यतेमेनसंशयः ॥ ३९ ॥ ॥ श्रीव्यासउवाच ॥ ॥ सू
क्ष्मागतिर्महाराजविदितापापपुण्ययोः ॥ तथाब्रह्मगतिःप्राज्ञैःसर्वशास्त्रविदांवरैः ॥ ४० ॥ दैवयोगादस्यपुण्यंप्राप्तंवैस्वयमर्थव
त् ॥ येनपुण्येनशुद्धोसौतच्छृणुत्वंमहामते ॥ ४१ ॥ कस्यापिहस्ततोयत्रपतिताद्वारकामृदः ॥ तत्रैवायंमृतःपापीशुद्धोभूत्त
त्प्रभावतः ॥ ४२ ॥ गोपीचन्दनलिप्तांगोनरोनारायणोभवेत् ॥ एतस्यदर्शनात्सद्योब्रह्महत्याप्रमुच्यते ॥ ४३ ॥ ॥ श्री
नारदउवाच ॥ ॥ इतिश्रुत्वाधर्मराजस्तमानीयविशेषतः ॥ विमानेकामगेरुछाप्यवैकुण्ठम्प्रकृतेःपरम् ॥ ४४ ॥ प्रेषयामास

सहसागोपीचन्दनकीर्तिवित् ॥ एवंतेकथितंराजन्गोपीचन्दनकंयशः ॥ ४५ ॥ गोपीचन्दनमाहात्म्यंयःशृणोतिनरोत्तमः॥
सयातिपरमन्धामश्रीकृष्णस्यमहात्मनः ॥ ४६ ॥ ॥ इतिश्रीमद्गर्गाचार्यसंहितायां श्रीद्वारकाखण्डे द्वारकामाहात्म्ये
कपिटङ्कनृगकूपगोपीभूमिमाहात्म्यंनामसप्तमोऽध्यायः ॥ ७॥ ॥ ॥ छ ॥ ॥ छ ॥
॥ श्रीनारदउवाच ॥ ॥ सिद्धाश्रमस्यमाहात्म्यंशृणुराजन्महामते ॥ यस्यस्मरणमात्रेणसर्वपापैःप्रमुच्यते ॥ १ ॥ यत्स्पर्श
नाद्धरेःसाक्षान्नवियोगोभवेत्क्वचित् ॥ तंचसिद्धाश्रमंनामवदंतीहपुराविदः ॥ २ ॥ दर्शनाद्यस्यसालोक्यंसामीप्यंस्पर्शनात्त
था ॥ सारूप्यंस्नानतोयातिसायुज्यंतन्निवासतः ॥ ३ ॥ तत्तीर्थस्यापिमहात्म्यंश्रुत्वाचंद्राननामुखात् ॥ राधास्नातुंमनश्चक्रे
कृष्णविक्षेपविव्हला ॥ ४॥ श्रीसिद्धाश्रमयात्रायांसूर्यपर्वणिमाधवे ॥ राधागंतुंमनश्चक्रउत्थायकदलीवनात् ॥ ५॥ गोपी
नांशतयूथेनसर्वगोपगणैःसह ॥ शतवर्षैव्यतीतेतुश्रीदाम्नःशापकारणात् ॥ ६ ॥ श्रीराधाशिबिकारूढाछत्रचामरवीजिता ॥
आनर्तेषुमहातीर्थेययौसिद्धाश्रमंसती ॥ ७॥ तत्रैवभगवान्साक्षाद्यादवैःपरिमण्डितः ॥ स्त्रीणांषोडशसाहस्त्रैर्यात्रार्थंचाय

यौनृप ॥ ८॥ बलिष्ठायेचगोपालाःकोटिशःशस्त्रपाणयः ॥ सिद्धाश्रमंतेजुगुपुःसर्वतोराधिकाज्ञया ॥९ ॥ शतयूथास्तथागो
प्योवेत्रहस्तामहाबलाः ॥ सिद्धाश्रमेचाविधिवत्स्नातींराधांसिषेविरे ॥ १० ॥ द्वारकावासिनांतेषांस्थितानांस्नानमिच्छतां॥
शस्त्रवेत्रैस्ताडितानांविविशुर्भगवत्स्त्रियः ॥ ११ ॥ केयंस्नातीतिपप्रच्छुर्यस्यावैभवमद्भुतम् ॥ यद्द्वौरवात्रसन्तीहसर्वेयादव
पुङ्गवाः ॥ १२ ॥ अहोकस्यप्रियाचेयंकानामकुत्रवासिनी ॥ त्वंसर्वज्ञोहिभगवन्वदनोदेवकीसुत ॥ १३ ॥ ॥ श्रीभगवानु
वाच ॥ ॥ वृषभानुसुतासाक्षाद्राधेयंकीर्तिनन्दिनी ॥ व्रजेश्वरीमद्दयितागोपिकाधीश्वरीवरा ॥ १४ ॥ स्नातुंसिद्धाश्रमंप्रा
प्ताव्रजात्गोपीगणैःसह ॥ यद्द्वौरवात्रसंत्येतेतस्यावैभवमद्भुतम् ॥ १५ ॥ श्रीकृष्णस्यवचःश्रुत्वासत्यभामाथमानिनी ॥ श
नैःप्राहसपत्नीनांरूपयौवनगर्विता ॥ १६ ॥ किंनुराधारूपवतीनाहंरूपवतीकिमु ॥ बहुभिर्याचितापूर्वंरूपौदार्यगुणान्विता
॥ १७ ॥ मद्रूपकारणात्सख्यःशतधन्वामृतोभवत् ॥ अक्रूरःकृतवर्माचपुरात्तौद्वौपलायितौ ॥ १८ ॥ दिनेदिनेस्वर्णभारानष्टौ
ससृजतिस्वतः ॥ दुर्भिक्षमार्यरिष्टानिसर्पादिव्याधयोऽशुभाः ॥ १९ ॥ नसंतिमायिनस्तत्रयत्रास्तेभ्यर्चितोमणिः ॥ मत्पित्रा

पारिबर्हेपिदत्तःसाक्षात्स्यमंतकः ॥ २० ॥ तेनजातंमद्गृहेपिसर्वंवैभवमद्भुतम्॥प्रेम्णापरेणश्रीकृष्णगरुडोपरिगामिनी॥२१॥
भौमासुरमहायुद्धंदृष्टंप्राग्ज्योतिषंपुरं ॥ ममापिकृपयायूयंतत्पुराच्चसमागताः ॥ २२ ॥ प्राप्ताःश्रीकृष्णपत्नीत्वंसमाएवनसं
शयः ॥ मद्गौरवाच्चशक्रायछत्रंदत्तमनेनवै ॥ २३ ॥ कुंडलेदेवमात्रेचदत्तेवैमत्प्रियेच्छया ॥ ऐरावतभवानागाभौमासुरसमृद्धयः
॥ २४ ॥ मदिच्छयासमानीताःश्रीकृष्णेनमहात्मना ॥ मत्कारणान्महावैरंशक्रेपिकृतवान्हरिः ॥ २५ ॥ मद्द्वारेवर्ततेनित्यंवृक्षें
द्रःपारिजातकः ॥ पातिव्रत्येनैवमयाश्रीकृष्णोयंवशीकृतः ॥ २६ ॥ सर्वोपस्करसंयुक्तोनारदायसमर्पितः ॥ मत्समानंनकस्या
स्तुगौरवंवैभवंतथा ॥ २७ ॥ रूपौदार्यंनकस्यास्तुराधायाःकिमुवर्णनम् ॥ यद्रूपोपरिचैद्याद्याअनेनयुयुधुर्युधि ॥ २८ ॥ हेसु
भ्रूरुक्मिणीसात्वंकथंरूपवतीनहि ॥ सागोपकन्यकासख्योयूयंवैराजकन्यकाः ॥ धन्यामान्याश्चसर्वावैयूयंमानवतीवराः ॥
॥ २९ ॥ एवंतुसत्यभामायांवदंत्यांमैथिलेश्वर ॥ भूत्वामानयुताःसर्वारुक्मिण्याद्यास्त्रियोवराः ॥३०॥ कुलकौशलशीलार्थरू
पयौवनगर्विताः ॥ श्रीकृष्णंमानदंप्राहुरष्टपट्टमहास्त्रियः ॥ ३१ ॥ ॥राज्ञ्यऊचुः ॥ ॥ श्रुतंतवमुखात्पूर्वंराधारूपंपरंस्मृतं ॥

यस्यांरक्तःसदात्वंवैत्वयिरक्ताचयासदा ॥ ३२ ॥ तांराधांद्रष्टुमिच्छामस्त्वत्प्रियांव्रजवासिनीं ॥ त्वद्वियोगेनसंखिन्नांस्ना
तुंचात्रसमागतां ॥ ३३ ॥ ॥ नारदउवाच ॥ ॥ तथास्तुचोक्त्वाश्रीकृष्णःपट्टस्त्रीपरिवेष्टितः ॥ षोडशस्त्रीसहस्त्राढ्योद्रष्टुंरा
धांजगामह ॥ ३४ ॥ श्रीहेमशिबिरेरम्येपताकाध्वजमंडिते ॥ चंद्रमंडलशोभाढ्यवितानतनितेशुभे ॥३५॥ मुक्ताजवनिकायत्र
वस्त्रैरास्तरणंशुभम् ॥ मालतीमकरंदाढ्यंसर्वतोगंधिसंकुलं ॥ ३६ ॥ तेनभृंगावलीचक्रेकलंकोलाहलंपरम् ॥ तत्रराधापट्टरा
ज्ञीश्रीकृष्णहृतमानसा ॥ ३७ ॥ हंसाभैर्व्यजनैर्दिव्यैर्वीज्यमानासखीजनैः ॥ छत्रदोलाधरैस्तत्रव्रजद्भिस्तामितस्ततः ॥३८॥
बालार्ककुंडलधराविद्युद्दाममनोहरा ॥ कोटिचंद्रप्रतीकाशातन्वीकोमलविग्रहा ॥३९॥ अंगुल्यग्रैःशोभनैःस्वैःपुष्पभूमिंमनो
हराम् ॥ शनैःशनैःपादपद्मंधारयंत्यतिकोमलं ॥ ४० ॥ दूरात्तांराधिकांप्रेक्ष्यकृष्णपत्न्यःसहस्त्रशः ॥ जग्मुर्मूर्च्छांमहाराजतद्रू
पेणातिमोहिताः ॥ ४१ ॥ तत्तेजसाहतरुचःसूर्यात्तारागणायथा ॥ गतरूपाभिमानास्ताऊचुःसर्वाःपरस्परम् ॥ ४२ ॥ अहोए
तादृशंरूपंत्रिलोक्यांनहिचाद्भुतम् ॥ श्रुतंयथातथादृष्टमद्वितीयंमनोहरम् ॥ ४३ ॥ एवंवदंत्यस्तांप्राप्ताःश्रीकृष्णस्यपुरःस

रा: ॥ गोपीनांराजपुत्रीणांनेत्राणिपरिरेभिरे ॥ ४४ ॥ ॥ इतिश्रीमद्गर्गाचार्यसंहितायां श्रीद्वारकाखण्डेनारदबहुलाश्व
संवादे द्वारकामाहात्म्येसिद्धाश्रममाहात्म्यंराधारूपदर्शनंनामाष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥ ॥ छ ॥
॥ श्रीनारदउवाच ॥ ॥ श्रीकृष्णमागतंवीक्ष्यपट्टराज्ञीसमन्वितं ॥ तदाजयजयारावंचक्रुर्गोप्योतिहर्षिताः ॥ १ ॥ सहसाश्री
हरिंराधापरिक्रम्यकृतांजलिः ॥ पद्माभाभ्यांतुनेत्राभ्यामानंदाश्रूणिमुंचती ॥ २ ॥ स्यमंतकखचित्पादंचिंतामणिखचित्तटम् ॥
पद्मरागलसन्मध्यंचंद्रमंडलवर्तुलं ॥ ३ ॥ कौस्तुभैःप्रखचित्पृष्ठंकुंभमंडलमंडितम् ॥ पारिजातकपुष्पाढ्यंपीयूषस्त्राविछ
त्रमत् ॥ ४ ॥ दत्वासिंहासनंतस्मैप्राहप्रहसितानना ॥ अद्यमेसफलंजन्मअद्यमेसफलंतपः ॥ ५ ॥ अद्यमेसफलोधर्मोहरेत्व
य्यागतेसति ॥ धन्यंसिद्धाश्रमस्नानंसफलीभूतमद्भुतम् ॥ मयापिनकृताभक्तिस्तवभक्तसहायिनः ॥ ६ ॥ बहवश्च्यसहायान्मे
त्वयादेवहताभुवि ॥ कंसोपिलोकविजयीयेनभीतोबभूवह ॥ ७ ॥ समारितोमद्वचनाच्छंखचूडस्त्वयाहरे ॥ मत्प्रेम्णापित्वयादे
ववैभवंदर्शितंव्रजे ॥ ८ ॥ शक्रस्यमानभंगोपिकृतोदेवत्वयाबलात् ॥ मत्कारणाद्व्रजंरक्षन्धृत्वागोवर्द्धनाचलं ॥ ९ ॥ यथेच्छा

लिंगितोरासेगोपीभिस्त्वंवशीकृतः ॥ इदंतेचरितंदेवनरलोकविडंबनम् ॥ १० ॥ ॥ श्रीनारदउवाच ॥ ॥ एवंवदंतीसारा
धात्वरंचंद्राननाज्ञया ॥ सादरेणहरेःपत्नीर्वीक्ष्यतागौरवंददौ ॥ ११ ॥ भैष्मींजांबवतींभामांसत्यांभद्रांचलक्ष्मणां ॥ कालिंदीं
मित्रविंदांचमिलित्वासापरस्परम् ॥ १२ ॥ षोडशस्त्रीसहस्त्रंचरोहिणीमुखमेवच ॥ प्रेमानंदमयीदोर्भ्यांपरिरेभेमुदान्विता ॥
॥ १३ ॥ ॥ श्रीराधोवाच ॥ ॥ चंद्रोयथैकोबहवश्चकोराःसूर्योयथैकोबहवोदृशःस्युः ॥ श्रीकृष्णचन्द्रोभगवांस्तथैकोभक्ताभ
गिन्योबहवोवयंच ॥ १४ ॥ पद्मप्रभावंमधुपोयथाहिरत्नप्रभावंकिलतत्परीक्षित् ॥ विद्याप्रभावंचयथाहिविद्वान्काव्यप्रभा
वंचयथाकवींद्रः ॥ १५ ॥ यथासहस्त्रेषुजनेषुसत्सुरसप्रभावंरसिकस्तथाहि ॥ जानातितत्वेननरेंद्रपुत्र्यःकृष्णप्रभावंभुविकृष्ण
भक्तः ॥ १६ ॥ ॥ नारदउवाच ॥ ॥ राधावाक्यंतदाश्रुत्वारुक्मिणीभीष्मनंदिनी ॥ सपत्नीसहिताप्राहराधांकमललोच
नां ॥ १७ ॥ ॥ रुक्मिण्युवाच ॥ ॥ धन्यासिराधेवृषभानुपुत्रित्वद्भक्तिभावेनवशीकृतोयं ॥ वदत्यलंयस्यकथांत्रिलोकीसएव
वार्तांवदतित्वदीयां ॥ १८ ॥ श्रुतंयथातेहरिभावलक्षणंतथाहिदृष्टंनहिचित्रमेवहि ॥ गच्छाशुचास्माच्छिबिराणियत्रहित्वांनेतु

मत्रागतवत्यआदृताः ॥ १९ ॥ ॥ नारदउवाच ॥ ॥ एवमुक्त्वाभीष्मसुताराधांकीर्तिसुतांतदा ॥ समानीयस्वशिबिरेसादरे
णमहात्मना ॥ २० ॥ शिबिरेसर्वतोभद्रेपद्मकिंजल्कवासिते ॥ हैमेशिरीषमृदुलेपर्य्यंकेसोपबर्हणे ॥ २१ ॥ सुखंनिवासया
मासवासःस्रङ्मंडनादिभिः ॥ संपूज्यविधिवद्धात्रौसपत्नीसहितासती ॥ २२ ॥ गोपीनांशतयूथंचसंपूज्यचपृथक्पृथक् ॥
वार्तालापान्बहुविधान्कृत्वाकृष्णप्रियास्ततः ॥ २३ ॥ स्वापयित्वाथतांजग्मुःस्वंस्वंवैशिबिरंमुदा ॥ २४ ॥ कृष्णपार्श्वेगताभैष्मी
दृष्ट्वाजाग्रदुपस्थितं ॥ कथंनशेषेभोस्वामिन्नितिकृष्णमुवाचह ॥ २५ ॥ रुक्मिणीवचनंश्रुत्वाभगवान्वृजिनार्दनः ॥ तूष्णींभूत्वा
क्षणंराजन्प्राहप्रहसिताननः ॥ २६ ॥ ॥ श्रीभगवानुवाच ॥ ॥ प्रत्युद्गमप्रस्रवणैराश्वासेनव्रजेश्वरी ॥ अर्चिताहित्वया
सुभ्रूःप्रसन्नासाभवत्परं ॥ २७ ॥ साचनित्यंहिपिबतीशयनादौपयःशुभं ॥ पयःपानंतुनकृतमद्यसुभ्रूस्तयाकिल ॥ २८ ॥ तेन
निद्रानयनयोर्नजातास्यामहामते ॥ तस्मान्ममापिप्रस्वापोनजातोभीष्मकन्यके ॥ २९ ॥ ॥ नारदउवाच ॥ ॥ इतिश्रुत्वा
परंभैष्मोसपत्नीभिःसमन्विता ॥ नीत्वादुग्धंतत्समीपंप्रययौपरमादरात् ॥ ३० ॥ उष्णंदुग्धंसितायुक्तंकचोलेहैमनेकृतं ॥

अपाययत्परंप्रीत्याराधांभीष्मकनंदिनी ॥ ३१ ॥ एवमभ्यर्च्यविधिवद्दत्वातांबूलवीटकं ॥ सत्यभामादिभिःशश्वत्सपत्नीभिः समन्विता ॥ ३२ ॥ आगत्यकृष्णसामीप्यंवदंतीस्वकृतंशुभं ॥ भेजेश्रीरुक्मिणीसाक्षाच्छ्रीकृष्णपदपंकजं ॥ ३३ ॥ संलालयंतीसततंकोमलैःकरपल्लवैः ॥ कृष्णपादतलोच्छालान्वीक्ष्यसाविस्मिताभवत् ॥ ३४ ॥ उच्छालकाःकथंजातास्तवपादतलेप्रभो ॥ अद्यैवभूताभगवन्नवेद्म्यत्रहिकारणं ॥ ३५ ॥ षोडशस्त्रीसहस्राणांशृण्वंतीनांहरिःस्वयं ॥ राधाभक्तिप्रकाशार्थंप्रसन्नःप्राहरुक्मिणीं ॥ ३६ ॥ ॥ श्रीभगवानुवाच ॥ ॥ श्रीराधिकायाहृदयारविंदेपादारविंदंहिविराजतेमे ॥ अहर्निशंप्रश्रयपाशबद्धंलवंलवार्द्धंनचलत्यतीव ॥ ३७ ॥ अद्योष्णदुग्धप्रतिपानतोंघ्रावुच्छालकास्तेममप्रोच्छलंति ॥ मंदोष्णमेवंनहिदत्तमस्मैयुष्माभिरुष्णंतुपयःप्रदत्तं ॥ ३८ ॥ ॥ श्रीनारदउवाच ॥ ॥ श्रीकृष्णस्यवचःश्रुत्वारुक्मिण्याद्यास्त्रियोवराः ॥ प्रेम्णापादंविमृज्याथविसिष्मुःसर्वतोनृप ॥ ३९ ॥ श्रीराधायाःपराप्रीतिर्माधवेमधुसूदने ॥ तत्समानानचैकैषाअद्वितीयामहीतले ॥ ४० ॥ ॥ इतिश्रीमद्गर्गाचार्यसंहितायां श्रीद्वारकाखंडे नारदबहुलाश्वसंवादेद्वारकामाहात्म्येसिद्धाश्रमे श्रीराधा

कृष्णसमागमोराधाप्रेमप्रकाशोनामनवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
॥ श्रीनारदउवाच ॥ ॥ श्रीराधायांपरांप्रीतिंज्ञात्वागोपीगणेषुच ॥ ऊचुर्हरिंराजपुत्र्यस्तद्रासप्रेक्षणोत्सुकाः ॥ १ ॥ ॥ प
ट्टराज्ञ्यऊचुः ॥ ॥ धन्यागोप्यस्तुतेभक्त्याप्रेमलक्षणसंयुताः ॥ याःप्राप्तारासरंगेवैतासांकिंवर्ण्यतेतपः ॥ २ ॥ वृंदावनेकृ
तोरासोविधिनायेनमाधव ॥ तंविधिंद्रष्टुमिच्छामोयदित्वंमन्यसेप्रभो॥३॥ त्वंचात्रैवतथाराधागोप्यःसर्वाव्रजांगनाः ॥ वयंचा
त्रैवदेवेशरासोयोग्योभवेदिह ॥ ४ ॥ पूर्णीकुरुजगन्नाथअस्माकंतुमनोरथं ॥ कृतोमनोरथोन्योपिरासक्रीडांविनाहरे ॥५॥
इतितासांवचःश्रुत्वाभगवान्प्रहसन्निव ॥ प्राहताःप्रेमसंयुक्तोगीर्भिःसंमोहयन्निव ॥ ६ ॥ ॥ श्रीभगवानुवाच ॥ ॥ रासेश्व
र्यास्तुराधायामनश्चेद्वंतुमंगनाः॥तदारासोभवेदत्रभवतीभिस्तुपृच्छ्यतां॥७॥इतिश्रुत्वावचस्तस्यरुक्मिण्याद्यानृपात्मजाः॥
राधामेत्यपरंप्रेम्णाप्राहुःप्रहसिताननाः ॥ ८ ॥ ॥ श्रीराज्ञ्यऊचुः ॥ ॥ रंभोरुचंद्रवदनेव्रजसुंदरीशेरासेश्वरिप्रियतमेसखि
शीलरूपे ॥ राधेसुकीर्तिकुलकीर्तिकरेशुभांगेत्वांप्रष्टुमागतवतीःसकलावयंस्म ॥ ९ ॥ रासेश्वरोपिकिलचात्ररसप्रदायीरासे

श्वरीत्वमपिगोपवरांगनाश्च ॥ एवंवयंस्मइतिसर्वविधौरसार्थैरासंकुरुप्रियतमेचतथाप्रियंनः ॥ १० ॥ ॥ श्रीराधोवाच ॥ ॥
रासेश्वरस्यपरमस्यसतांकृपालोरंतुंमनोयदिभवेत्तुतदात्ररासः ॥ शुश्रुषयापरमयापरयाचभक्त्यासंपूज्यतंकिलवशीकुरुत
प्रियेष्टाः ॥ ११ ॥ ॥ श्रीनारदउवाच ॥ ॥ राधायावचनंश्रुत्वाश्रीकृष्णोक्तंतथावदन् ॥ तथास्तुचोक्त्वासाराधाप्रसन्नाभून्म
हामनाः ॥ १२ ॥ माधवेपूर्णिमायांतुपुण्येसिद्धाश्रमेशुभे ॥ प्रदोषकालेचंद्राभेरासारंभोबभूवह ॥ १३ ॥ रासेश्वरस्यरासार्थे
रासेश्वर्यासमन्वितः ॥ रराजरासेरसिकोयथारत्यारतीश्वरः ॥ १४ ॥ यावत्योगोपिकाःसर्वायावत्योराजकन्यकाः ॥ तावद्रूप
धरोरेजेएकःकृष्णोद्वयोर्द्वयोः ॥ १५ ॥ तालवेणुमृदंगानांकलकंठैःसखीजनैः ॥ कलनूपुरकांचीनांमिश्रशब्दोमहानभूत् ॥१६॥
कोटिकंदर्पलावण्यःस्रग्वीकुंडलमंडितः ॥ पीतांबरधरोराजन्किरीटकटकांगदः ॥ १७ ॥ रासेश्वर्यासमंगायन्रासेरासेश्व
रःस्वयं ॥ स्त्रीगणैःसहितोराजंश्चंद्रस्तारागणैर्यथा ॥ १८ ॥ एवंसर्वानिशाराजन्क्षणवद्रासमंडले ॥ व्यतीताभून्महाराजम
हानंदमयीशुभा ॥ १९ ॥ श्रीरासमंडलंदृष्ट्वारुक्मिण्याद्यास्त्रियोवराः ॥ जग्मुस्ताःपरमानंदंसर्वाःपूर्णमनोरथाः ॥ २० ॥ प

रिपूर्णतमंसाक्षाच्छ्रीकृष्णंपुरुषोत्तमं॥रासांतेरुक्मिणीमुख्याःप्राहुःप्रेमपरायणाः॥२१॥ ॥राज्ञ्यऊचुः॥ ॥दृष्ट्वात्वद्रूपमाधुर्यं
रासरंगेमनोहरे ॥ गतंमनोनःस्वानंदंब्रह्मानंदंयथामुनिः ॥ २२ ॥ एतादृशोपिरासोन्योनभूतोनभविष्यति ॥ शतयूथस्तुगो
पीनामत्रमाधववर्तते ॥ २३॥ पत्न्यःषोडशसाहस्र्यःसखीभिःसहितावयं ॥ सखीकोटियुताश्चात्रअष्टपट्टमहास्त्रियः ॥२४॥ वृं
दावनेपिनैतादृक्भूतोवामाधवेश्वर ॥ ॥नारदउवाच॥ ॥ एवंकृताभिमानानांराज्ञीनांप्रहसन्हरिः ॥ प्राहेदंपृच्छयतांराधा
भवतीभिःपरस्परं ॥ २५ ॥ सत्यभामादिकाःसर्वाःपृच्छंतितांमनोहरां ॥ किंचिद्धसंतोमनसिप्राहराधापरंवचः ॥ २६ ॥ ॥
॥ श्रीराधोवाच ॥ ॥ ननुरासःपरंचात्रबहुस्त्रीगणसंकुलः ॥ पूर्वरासससमोनस्याद्यस्तुवृंदावनेऽभवत् ॥ २७॥ क्वचात्रवृंदार
ण्यंतद्दिव्यद्रुमलताकुलं ॥ प्रेमभारानतलतंमधुमत्तमधुव्रतं ॥ २८॥ पुष्पव्यूहान्वहंतीयायथोष्णिङ्मुद्रिताशुभा ॥ हंसपद्म
समाकीर्णाक्वचात्रयमुनानदी ॥ २९ ॥ माधव्यस्तुलताःक्वात्रपुष्पभारनताःपराः ॥ क्वपक्षिणःप्रेमपरागायंतिमधुरस्वनम् ॥
॥ ३० ॥ लोलालिपुंजाःकुंजाःक्वनिकुंजादिव्यमंदिराः ॥ क्ववायुःशीतलोमंदोवातिपद्मरजोहरन् ॥ ३१ ॥ शृंगैर्मनोहरैरुच्चैर्गि

रिर्गोवर्द्धनोचलः ॥ सर्वत्रफलपुष्पाढ्योदरीभिःक्वकरीवसः ॥ ३२ ॥ कालिंदीपुलिनेरम्येवायुनाचितसैकते ॥ वंशीवेत्रधरोम
ल्लपरिबर्हविराजितः ॥ ३३ ॥ क्वचात्रकृष्णश्रृंगारोवनमालाविभूषितः ॥ श्यामानामलकानांचवक्राणांगंधवारिणां ॥ ३४ ॥
चलितंहलितंक्वात्रकुंडलाभ्यांपरस्परम् ॥ श्रीमुखेकृष्णचंद्रस्यगंडस्थलमनोहरे ॥ ३५ ॥ पत्रावलीगंधलोभाद्भ्रमद्भृंगावलीयु
ते ॥ क्वप्रेम्णादर्शनंचैवस्पर्शनंहर्षणंतथा ॥ ३६ ॥ कामेषुतिग्मकोणैश्चनेत्रैःक्वापांगजोरसः ॥ आकर्षणंक्वहस्ताभ्यांहस्ताद्ध
स्तविसर्जनम् ॥ ३७ ॥ विलीनत्वंनिकुंजेषुसंमुखेनतुदर्शनम् ॥ गृह्णंक्वात्रचीराणांहरणंवेणुवेत्रयोः ॥३८ ॥ क्वप्रेम्णाचात्रबा
हुभ्यांकर्षणंचपरस्परं ॥ पुनःपुनस्तद्गृहणंभुजेचंदनचर्चिते ॥ ३९ ॥ यत्रयत्रचयालीलातत्रतत्रैवशोभते ॥ यत्रवृंदावनंनास्ति
तत्रमेनमनःसुखं ॥ ४० ॥ ॥ नारदउवाच ॥ ॥ राधावाक्यंततःश्रुत्वासर्वाःपट्टमहास्त्रियः ॥ जहुर्मानंस्वरासस्यविस्मिताह
र्षिताश्चताः ॥ ४१ ॥ एवंसिद्धाश्रमेरासंकृत्वाश्रीराधिकेश्वरः ॥ नीत्वागोपीगणान्सर्वान्राधयासहितोहरिः ॥ ४२ ॥ सभार्यो
भगवान्साक्षाद्द्वारकांप्रविवेशह ॥ कारयामासराधायैमंदिराणिपराणिच ॥ ४३ ॥ निवासयित्वासुसुखंसर्वास्ताश्चव्रजौक

सः ॥ इत्थंसिद्धाश्रमकथामयातेकथितान्नृप ॥ ४४ ॥ सर्वपापहरापुण्यासर्वेषांचैवमोक्षदा ॥ ४५ ॥ ॥ इतिश्रीमद्गर्गाचा
र्यसंहितायां श्रीद्वारकाखंडेनारदबहुलाश्वसंवादे द्वारकामाहात्म्ये सिद्धाश्रमेरासोत्सवोनामदशमोऽध्यायः ॥ १० ॥
॥ श्रीनारदउवाच ॥ ॥ द्वारावतीमण्डलन्तुशतयोजनविस्तृतम् ॥ तस्यप्रदक्षिणासर्वायोजनानाञ्चतुःशतम् ॥ १ ॥ तन्म
ध्येकृष्णरचितंदुर्गंद्वादशयोजनम् ॥ द्वितीयञ्चबहिर्दुर्गंनवत्याचतदुत्तरैः ॥ क्रोशैःसंघट्टितंराजञ्छ्रीकृष्णेनमहात्मना ॥ २ ॥
तृतीयञ्चतथादुर्गंद्व्यूनैश्चद्विशतैर्नृप ॥ क्रोशैःसंघट्टितंराजन्रत्नप्रासादसंयुतम् ॥ ३ ॥ तेषामन्तरदुर्गोपिश्रीकृष्णस्यमहात्म
नः ॥ मन्दिराणिविचित्राणिनवलक्षाणिसंतिहि ॥४॥ तत्रराधामन्दिरस्यद्वारेलीलासरोवरम् ॥ सर्वतीर्थोत्तमंराजन्गोलोका
च्चसमागतम् ॥ ५ ॥ यस्मिन्स्नात्वानरःपापीव्रतीभूत्वासमाहितः ॥ अष्टम्यांहेमदानञ्चदत्वानत्वाविधानतः ॥ ६ ॥ कोटिज
न्मकृतैःपापैर्मुच्यतेनात्रसंशयः ॥ प्राणांतेतन्नरंनेतुंगोलोकाच्चमहारथः ॥७॥ सहस्रादित्यसङ्काशआगच्छतिनसंशयः ॥ दश
कन्दर्पलावण्योरत्नकुण्डलमण्डितः ॥ ८ ॥ स्रग्वीपीताम्बरःश्यामःसहस्रार्कस्फुरद्द्युतिः ॥ सहर्षःपार्षदैर्युक्तश्चामरान्दोल

राजितः ॥ ९ ॥ जयध्वनिसमायुक्तोवेणुदुन्दुभिनादितः ॥ भूत्वैवंरथमास्थायगोलोकंयात्यसंशयम् ॥ १० ॥ अथतीर्थानि
चान्यानिशृणुराजन्महामते ॥ शतोत्तराणितत्रैवसहस्राणिचषोडश ॥ ११ ॥ अष्टभिःसहितान्येवपत्नीनांभवनानिच ॥ ता
निप्रदक्षिणीकृत्यनत्वानत्वापृथक्पृथक् ॥ १२ ॥ ज्ञानतीर्थेसमाप्लुत्यस्पृशेद्यःपारिजातकम् ॥ तस्यज्ञानंचवैराग्यंभक्तिर्भव
तितत्क्षणम् ॥ १३ ॥ श्रीकृष्णोहृदयेतस्यवसेद्धृष्टमनाःसदा ॥ समृद्धिसिद्धयःसर्वास्तंभजंतिनिसर्गतः ॥ १४ ॥ समुक्तःस
कृतार्थःस्याद्यःपश्येद्धरिमंदिरं ॥ तत्समोवैष्णवोनास्तितीर्थंचतत्समंनहि ॥ १५ ॥ पंचयोजनविस्तीर्णाद्भगवन्मंदिरात्ततः ॥
धनुःशतेकृष्णकुंडःकृष्णतेजःसमुद्भवः ॥ १६ ॥ यंस्नात्वाकुष्ठतोमुक्तःसांबोजांबवतीसुतः ॥ तस्यदर्शनमात्रेणसर्वपापैःप्रमुच्य
ते ॥ १७ ॥ तस्मादष्टादशपदेपूर्वस्यांदिशिमैथिल ॥ सर्वतीर्थोत्तमंपुण्यंबलभद्रसरोमहत् ॥ १८ ॥ पृथ्वीप्रदक्षिणांकृत्वाबलदे
वोमहाबलः ॥ यज्ञंयत्रविनिर्मायरेवत्याविरराजह ॥ १९ ॥ तत्रस्नात्वानरःसद्योमुच्यतेसर्वपातकात् ॥ पृथ्वीप्रदक्षिणायाश्च
फलंतस्यनदुर्लभं ॥ २० ॥ भगवन्मंदिराद्राजन्नूसहस्रधनुरग्रतः ॥ दक्षिणस्यांमहातीर्थंगणनाथस्यवर्तते ॥ २१ ॥ अनिर्दिशे

गतेराजन्प्रद्युम्नेस्वसुतेतदा॥गणेशपूजनंयत्रकारयामासरुक्मिणी॥२२॥यत्रस्नात्वाहेमदानंयोददातिनृपेश्वर॥पुत्रप्राप्तिर्भ
वेत्तस्यवंशस्तस्यविवर्द्धते ॥२३॥ भगवन्मंदिराद्राजन्दिग्विभागेचपश्चिमे ॥धनुषिद्विशतेचास्तेदानतीर्थंपरंशुभं॥२४॥ यत्र
श्रीकृष्णचंद्रस्यनित्यंदानंकरोतियः॥ तत्रस्नात्वानरोराजन्द्विपलंकांचनंतथा॥२५॥चतुर्गुणंतुरजतंपट्टांबरशतंतथा ॥ तथास
हस्रमौल्यानिनवरत्नानियानिच॥२६॥योददातिनरश्रेष्ठस्तस्यपुण्यफलंशृणु ॥ अश्वमेधसहस्राणिराजसूयशतानिच २७
दानतीर्थस्यपुण्यस्यकलांनार्हतिषोडशीं ॥ बद्रिकाश्रमयात्रायांयत्फलंलभतेनरः ॥२८॥ तस्माच्छतगुणंपुण्यंदानतीर्थेपरात्म
नः॥सैंधवारण्ययात्रायांमेषस्थेचदिवाकरे॥२९॥उत्पलावर्त्तयात्रायांवृषस्थेभास्करेसति ॥ स्नानंदानंलक्षगुणंभवतीहनसंश
यः॥३०॥तस्मात्कोटिगुणंपुण्यंदानतीर्थेविदेहराट्॥मासमेकंचयःस्नानंदानतीर्थेकरोतिहि॥३१॥तस्यजातंचयत्पुण्यंचित्रगुप्तो
नवेत्तितत्॥तस्यतीर्थस्यमाहात्म्यंवक्तुंनालंचतुर्मुखः॥३२॥सर्वेषांचैवदानानामश्वदानंपरंस्मृतम्॥अश्वदानाद्गजस्यापिगज
दानाद्रथस्यच॥ ३३ ॥ रथदानात्परंराजन्भूमिदानंविशिष्यते ॥ भूमिदानादन्नदानंमहादानंप्रकथ्यते ॥ ३४॥ अन्नदानस

मंदानंनभूतंनभविष्यति ॥ देवर्षिपितृभूतानांतृप्तिरन्नेनजायते ॥ ३५ ॥ दानतीर्थेह्यन्नदानंयःकरोतिमहामनाः ॥ ऋणत्रयंवि
मुच्याथयातिविष्णोःपरंपदम् ॥ ३६ ॥ दशैवमातृकेपक्षेराजेंद्रदशपैतृके ॥ प्रियायादशपक्षेतुपुरुषानुद्धरेन्नरः ॥ ३७ ॥ चतुर्भु
जादिव्यरूपानागारिकृतकेतनाः ॥ स्रग्विणःपीतवस्त्रास्तेप्रयांतिहरिमंदिरं ॥ ३८ ॥ भगवन्मंदिराद्राजन्नुत्तरस्यांदिशिश्रुत
म् ॥ क्रोशार्द्धेनृपशार्दूलमायातीर्थंमनोहरम् ॥ ३९ ॥ विराजतेयत्रनित्यंदुर्गादुर्गतिनाशिनी ॥ सिंहारूढाभद्रकालीचंडमुंड
विनाशिनी ॥ ४० ॥ स्यमंतकंसमाहर्तुमृक्षराजबिलंगते ॥ पुत्रेचदेवकीदेवींपूजयामाससत्फलैः ॥ ४१ ॥ तदाजगामप्रियया
समणिर्भगवान्हरिः ॥ तद्दिलात्तत्प्रसिद्धंस्यान्मायातीर्थंफलप्रदं ॥ ४२ ॥ मायातीर्थेचयःस्नात्वामायांसंपूज्यमानवः ॥ सर्वांम
नोरथप्राप्तिंप्राप्नुयान्नात्रसंशयः ॥ ४३ ॥ ॥ इतिश्रीमद्ध०सं०श्रीद्वारकाखंडे नारदब०संवादे द्वारकामाहात्म्ये प्रथमदुर्गे ली
लासरोवर हरिमंदिरज्ञानतीर्थकृष्णकुंडबलभद्रसरोगणेशतीर्थदानस्थलमायातीर्थमाहात्म्यंनामैकादशोऽध्यायः ॥ ११ ॥
॥ श्रीनारदउवाच ॥ ॥ द्वितीयस्यापिदुर्गस्यपूर्वद्वारेविदेहराट् ॥ इन्द्रतीर्थंमहापुण्यंकामदंसिद्धिदायकम् ॥ १ ॥ तत्रस्ना

त्वानरोराजन्निन्द्रलोकंप्रयातिहि ॥ इहैवचन्द्रसादृश्यंवैभवंप्राप्यतेनरः ॥ २ ॥ तथावैदक्षिणेद्वारेसूर्यकुण्डोभिधीयते ॥ य
त्रसत्राजितेनापिपूजितोभूत्स्यमन्तकः ॥ ३ ॥ तत्रस्नात्वापद्मरागंयोददातिनृपेश्वर ॥ सूर्यप्रभविमानेनसूर्यलोकंप्रयाति
हि ॥ ४ ॥ तथावैपश्चिमेद्वारेब्रह्मतीर्थंविशिष्यते ॥ तत्रस्नात्वानरोराजन्स्वर्णपात्रेचपायसम् ॥ ५ ॥ योददातिमहाबुद्धिस्त
स्यपुण्यफलंशृणु ॥ ब्रह्महापितृहागोघ्नोमातृहाचार्यहाघवान् ॥ ६ ॥ इन्द्रलोकेपदंधृत्वाबिभ्रद्ब्रह्ममयंवपुः ॥ चन्द्राभेनविमा
नेनयातिब्रह्मपदंसच ॥ ७ ॥ तथावैउत्तरेद्वारेक्षेत्रंस्यान्नैललोहितम् ॥ यत्रसाक्षान्महादेवोराजतेनीललोहितः ॥ ८ ॥ देव
तामुनयःसर्वेतथासप्तर्षयःपरे ॥ वसंतियत्रवैदेहतथासर्वेमरुद्गणाः ॥ ९ ॥ नीललोहितलिंगंतुयत्रसंपूज्ययत्नतः ॥ ऐश्वर्यमतु
लंलेभेरावणोलोकरावणः ॥ १० ॥ कैलासस्यापियात्रायांयत्फलंलभतेनृप ॥ तस्माच्छतगुणंपुण्यंनीललोहितदर्शनात् ॥ ११ ॥
नीललोहितकुण्डेवैस्नातोयस्त्रिदिनंनरः ॥ सयातिशिवलोकाख्यंपापायुतयुतोपिहि ॥ १२ ॥ सप्तसामुद्रकन्नामतीर्थयत्रवि
राजते ॥ तत्रस्नात्वानरःपापीपापसंघैःप्रमुच्यते ॥ १३ ॥ सप्तानाञ्चसमुद्राणांस्नानपुण्यंलभेत्त्वरम् ॥ विष्णुर्विरिंचोगिरिशश्च

न्द्रोवायुर्यमोरविः ॥ १४ ॥ पर्जन्योधनदःसोमःक्षितिरग्निरपांपतिः ॥ तत्पार्श्वेषुसदाह्येतेतिष्ठन्तिमनुजेश्वर ॥ १५ ॥ सप्तकोटीनितीर्थानिब्रह्माण्डेयानिकानिच ॥ सर्वाणितत्रतिष्ठन्तिसप्तसामुद्रकेनृप ॥ १६ ॥ तत्रस्नात्वानरःपश्चात्कृत्वासर्वपरिक्रमम् ॥ प्राप्नोतिद्वारकायाश्चयात्रायाःसकलंफलम् ॥ १७ ॥ सप्तसामुद्रकम्तेनयात्राफलदास्मृता ॥ सप्तसामुद्रकंतीर्थंविष्णुरूपंविदुःसुराः ॥ १८ ॥ ॥ इतिश्रीमद्गर्गाचार्यसंहितायां श्रीद्वारकाखण्डेनारदबहुलाश्वसंवादे द्वारकामाहात्म्ये द्वितीयदुर्गेइन्द्रतीर्थसूर्यकुण्डब्रह्मतीर्थनैललोहितसप्तसामुद्रकमाहात्म्यंनामद्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥

॥ श्रीनारदउवाच ॥ ॥ तृतीयस्यापिदुर्गस्यपूर्वद्वारेमहाबलः ॥ रक्षत्यहर्निशंराजन्हनूमानंजनीसुतः ॥ १ ॥ तंप्रेक्ष्यभगवद्भक्तंहनूमंतंमहाबलं ॥ जायतेभगवद्भक्तोहनूमानिवमानवः ॥ २ ॥ तथावैदक्षिणद्वारंचक्रंनामसुदर्शनम् ॥ रक्षत्यहर्निशंराजन्श्रीकृष्णगतमानसं ॥ ३ ॥ तस्यदर्शनमात्रेणभवेद्भक्तोहरेःपरः ॥ भक्तस्यापिसदारक्षांकरोतिहिसुदर्शनं ॥ ४ ॥ तथावैपश्चिमंद्वारंजांबवानृक्षराड्बली ॥ रक्षत्यहर्निशंराजन्भगवद्भक्तिसंयुतः॥५॥ तंप्रेक्ष्यभगवद्भक्तंजांबवंतंमहाबलं ॥ चिरजीवीहरेर्भ

क्तोभवतीहचमानवः ॥ ६ ॥ तथावैचोत्तरंद्वारंविष्वक्सेनोमहाबलः ॥ रक्षत्यहर्निशंराजन्श्रीकृष्णहृदयोमहान् ॥ ७ ॥ तस्यद
र्शनमात्रेणनरोयातिकृतार्थतां ॥ शृणुराजन्बहिर्दुर्गात्तीर्थंपिंडारकंस्मृतं ॥ ८ ॥ पिंडारकस्यमाहात्म्यंशृणुताद्राजसत्तम ॥
यस्यस्मरणमात्रेणमहापापात्प्रमुच्यते ॥ ९ ॥ अर्थसिद्ध्योरिवद्वारेरैवताद्रिसमुद्रयोः ॥ मध्येपिंडारकक्षेत्रंतीर्थानांतीर्थमुत्तमं
क्रतुराजंराजसूयंयदुराजोमहाबलः ॥ चकारयत्रवैदेहपरिपर्णतमाज्ञया ॥ ११ ॥ सर्वाणियत्रतीर्थानिसमाहूतानिसर्वतः ॥ नि
वासंचक्रिरेराजन्नुग्रसेनक्रतूत्तमे ॥ १२ ॥ तेनपिंडारकंनामसर्वतीर्थस्यपिंडतः ॥ तत्रस्नात्वानरःसद्योराजसूयफलंलभेत् ॥
१३ ॥यत्रैवत्रिदिनंस्नात्वाव्रतीभूत्वासमाहितः ॥ ब्राह्मणेभ्यःस्वर्णदानंदत्वायःप्रणतोभवेत् ॥ १४ ॥ इहैवनरदेवःस्यात्सम
हात्मानसंशयः ॥ नित्यंश्रृणोतिसततंबंदिवाग्भिर्यशःस्वयं॥१५॥सुवर्णरत्नवस्त्राद्यैःसुचंद्रवदनैःपरैः॥स्त्रीसंघैःसेवितोनित्यंहृ
ष्टपुष्टोमहाबलः ॥ १६ ॥ अहोरात्रंप्रताड्यंतेद्वारिदुंदुभयोघनाः ॥ करींद्राणांचचीत्कारैरश्वहेषैस्समन्वितं ॥ १७ ॥ विराज
तेराजसंघैःप्रेक्षयन्प्रांगणाजिरं ॥ रत्नप्रासादनिचयंध्वजमंडलमंडितं ॥१८॥ मत्तकुंजरकर्णाभ्यांताडिताभृंगमंडली ॥ अ

लंकरोतितद्वारंमंडितंमंडलेश्वरैः ॥ १९ ॥ पिंडारकस्नानमृतेकथंराज्यंभवेदिह ॥ अंतेमोक्षंकथंयातिनरःपापयुतोपिहि॥२०॥
पिंडारकस्नानमृतेनवर्मपिंडारकस्नानमृतेनकर्म ॥ पिंडारकस्नानमृतेनधर्मःपिंडारकस्नानमृतेनशर्म ॥ २१ ॥ पिंडारकस्नान
मृतेवियोगीपिंडारकस्नानकरस्तुयोगी ॥ पिंडारकस्नानकरःसुभोगीपिंडारकस्नानकरोनरोगी ॥ २२ ॥ द्वारावतींमाधवमास
मध्येप्रदक्षिणीकृत्यनमस्करोति ॥ सर्वाइहामुत्रचसिद्धयोपिवैदेहतत्पाणितलेभवंति ॥ २३ ॥ तीर्थाप्लुतोधःशयनःशुचिश्चमौ
नीव्रतीवायवभोजनेन ॥ आरभ्यचैत्रींकिलपौर्णमासींयोमाधवीमेत्यकरोतियात्रां ॥ २४ ॥ तत्पुण्यसंख्यांगदितुंनशक्यश्च
तुर्मुखोवेदमयोविधाता ॥ योमेघधारांगणयेत्कदाचित्कालेनपुण्यानिनकृष्णपुर्याः ॥ २५ ॥ यथातिथीनांहरिवासरश्चयथा
हिशेषोफणिनांफणींद्रः ॥ यथागरुत्मान्दिविपक्षिणांचयथापुराणेषुचभारतंच ॥ २६ ॥ यथाहिदेवेषुचदेवदेवःश्रीवासुदेवो
यदुदेवदेवः ॥ तथापुरीक्षेत्रसमस्तमध्येद्वारावतीपुण्यवतीप्रशस्ता ॥ २७ ॥ अहोतिधन्यायदुमंडलीभिर्विराजतेभूमितलेम
नोहरा ॥ वैकुंठलीलाधिकृताकुशस्थलीयथातडीद्भिर्जलदावलिर्दिवि ॥ २८ ॥ यत्रैवसाक्षात्पुरुषःपरेश्वरोधृत्वाचतुर्व्यूहमलं

विराजते ॥ यस्तूग्रसेनायददौनृपेशतांकृष्णायतस्मैहरयेनमोनमः ॥ २९ ॥ यदास्वलोकंभगवान्गमिष्यतिसंप्लावयिष्यत्यथतांतदार्णवे ॥ वैदेहदिव्यंहरिमंदिरंविनातस्मिन्निवासंभगवान्करिष्यति ॥ ३० ॥ शृण्वंतितत्रैवकलौजनाध्वनिंकृष्णोक्तमित्थंसततंदिनेदिने ॥ अवेदविद्योयदिवासविद्योयोब्राह्मणोवैसतुमामकीतनुः ॥ ३१ ॥ भूत्वाथविप्रोऽब्धितटादगाधंगत्वागृहीत्वाप्रतिमांपरस्य ॥ कृत्वाप्रतिष्ठांचविधायसौधंकरिष्यतेस्थापनमर्कएषः ॥ ३२ ॥ श्रीद्वारकानाथमितिस्वरूपंपश्यंतिये भक्तजनाःकलौयुगे ॥ गच्छंतितेविष्णुपदंनृदेवयोगीश्वराणामपिदुर्लभंयत् ॥ ३३ ॥ इदंमयातेकथितंनृदेवमाहात्म्यमेतत्किलकृष्णपुर्याः ॥ शृणोतियःश्रावयतेचभक्त्याश्रीद्वारकावासफलंलभेत्सः ॥ ३४ ॥ श्रीद्वारकायानृपखंडमेतन्मयातवाग्रेकथितंसुपुण्यं ॥ कीर्तिंकुलंभक्तिमतीवमुक्तिंददातिराज्यंचसदैवशृण्वतां ॥ ३५ ॥ ॥ इतिश्रीमद्गर्गाचार्यसंहितायां श्रीद्वारकाखंडे नारदबहुलाश्वसंवादे द्वारकामाहात्म्ये तृतीयदुर्गेपिंडारकमाहात्म्यंनामत्रयोदशोऽध्यायः ॥ १३ ॥ ॥ छ ॥

इदं पु०मुंबय्यां श्रीकृष्णदासात्मजाभ्यां गंगाविष्णु खेमराजगुप्ताभ्यांस्वीयश्रीवेंकटेश्वरमुद्रणालयेंकितम् शाके १८०७ संवत् १९४२

सूचीपत्र.

नाम.	किंमत. रु०	आ०
श्रीमहाभारत....	६०	०
योगवासिष्ठ संस्कृत	२५	०
वाल्मीकिरामायण....	१८	०
श्रीमद्भागवत श्रीधरीटीका	१२	०

नाम.	किंमत. रु०	आ०
मूलभागवत	६	०
देवीभागवत सटीक	१०	०
अध्यात्मरामायण टाईपका....	४	८
महाशिवपुराण सटीक...	१६	०

नाम.	किंमत.	
	रु०	आ०
सचूर्णिकभागवत	८	०
काशीखण्ड संस्कृत सटीक	७	०
पुरुषोत्तममाहात्म्य	०	१२
तुलसीकृतरामायण टाईपका अक्षर बडा	६	०
तुलसीकृतरामायण गणपतका	४	४
भक्तमालावाहरिभक्तिप्रकाशि०	५	०

नाम.	किंमत.	
	रु०	आ०
गर्गसंहिता टाईपकी	४	०
प्रेमसागर	१	४
विचारसागर	२	०
द्वारकामाहात्म्य	०	६
व्रतराज टाईपका	५	०
प्रतिष्ठासारसंग्रह	४	०

॥ इति श्रीद्वारकामाहात्म्यंसमाप्तम् ॥

४९०५

४९०५

॥ * ॥ अथ अयोध्यामाहात्म्यं प्रारभ्यते ॥ * ॥



श्रीवेंकटेश

श्रीगणेशायनमः ॥ श्रीमतेरामानुजायनमः ॥ अथायोध्यामाहात्म्यम् ॥ वंदेहंरामचंद्रस्यपादौप्रणतरक्षकौ ॥
सीतायाश्चपुनःपादौसर्वसिद्धिविधायकौ ॥ १ ॥ रामंरामानुजंसीतांभरतंभरतानुजम् ॥ सुग्रीवंवायुसूनुंच
प्रणमामिपुनःपुनः ॥ २ ॥ ॥ पार्वत्युवाच ॥ ॥ साधुभागवतश्रेष्ठसाधुमार्गप्रबोधक ॥ त्वयातुयत्परिज्ञातं
तन्नजानातिकश्चन ॥३॥ त्वत्तःश्रुतामहाभागनानातीर्थसमाश्रिताः ॥कथाःश्रावयभोदेवअयोध्यायामनोहराः
॥४॥ सांप्रतंश्रोतुमिच्छामिसरहस्यंसनातनम् ॥ अयोध्यायामहापुर्यामहिमानंगुणोज्ज्वलम् ॥ ५ ॥ कीदृशी
सासदामेध्यायोध्याविष्णुप्रियापुरी ॥ आद्यायागीयतेवेदैःपुरीणांमुक्तिदायका ॥६॥ संस्थानंकीदृशंतस्यास्त
स्यांकेचमहीभुजः॥ कानितीर्थानिपुण्यानिमाहात्म्यंतेषुकीदृशम्॥७॥अयोध्यासेवनान्नृणांफलंस्याद्वाथकीदृ
शम् ॥ उत्पत्तिश्चकथंजाताकानद्यःकेचसंगमाः ॥ ८ ॥ तत्रस्नानेनकिंपुण्यंदानेनचमहामते ॥ तत्सर्वंश्रोतुमि
च्छामित्वत्तःशिवगुणाधिकात् ॥ ९ ॥ एतत्सर्वंक्रमेणैवब्रूहिशर्वयथार्थतः ॥ अयोध्यायामाहापुर्यामाहात्म्यं
वक्तुमर्हसि ॥ १० ॥ एतेवैमुनयःसर्वेनानादेशनिवासिनः ॥ कथाःश्रावयभोःपुण्याःसर्वयज्ञफलंतव ॥ ११ ॥
श्रीशंकरउवाच॥यस्याःपश्चिमतोनदःप्रवहतिब्रह्मात्मजोघर्घरःसामीप्यंनजहातियत्रसरयूःपुण्यानदीसर्वदा॥

विद्यापात्रमहाधिकागिरिसुतेस्थानंचविष्णोर्हरेःसायोध्याविमलापुरीपुरिवरास्याद्वःसदानंददा ॥ १२ ॥
नमामिपरमात्मानंरामंराजीवलोचनम् ॥ अतसीकुसुमश्यामंरावणांतकमच्युतम्॥१३॥शृणुदेविसवत्सेत्वम
योध्यानगरंशुभम् ॥ सर्वतीर्थाधिकंपुण्यंश्रुत्वापापातिगोभवेत्॥१४॥चरितंरघुनाथस्यशतकोटिप्रविस्तरम् ॥
एकैकमक्षरंपुंसांमहापातकनाशनम् ॥ १५ ॥ रामरामेतिरामेतियेजपंतिचसर्वदा॥तेषांभुक्तिश्चमुक्तिश्चजायते
चात्रपार्वति ॥ १६ ॥ सृष्ट्यादौतुसमुत्पन्नात्रैलोक्येचविराजते॥नगरीनिर्मितापूर्वमीश्वरेणमहात्मना ॥ १७॥
तदुत्पत्तिंप्रवक्ष्यामिशृणुत्वंचमनोहरे ॥ स्वायंभुवोमनुर्नामब्रह्मणःप्रथमःसुतः॥१८॥प्रजानांपालकोराजासत्य
लोकंजगामह॥ब्रह्माणंचनमस्कृत्यविनयावनतःस्थितः ॥१९॥ कृतांजलिपुटोभूत्वाविनयानतकंधरः ॥ तंदृष्ट्वा
राजशार्दूलंविनयेनविराजितम्॥२०॥ततःप्रहस्योवाचेदंब्रह्मालोकपितामहः॥ब्रह्मोवाच॥सृष्ट्यर्थमागतोवत्स
किंकार्यंवदमेग्रतः॥२१॥शीघ्रंकथयमेसर्वंतवागमनकारणम्॥मनुरुवाच॥सृष्ट्यर्थंज्ञापितोहंवैतवाज्ञाप्रतिपालि
ता॥२२॥सृष्ट्यादौवसतस्तातस्थानंदेहिमनोरमम्॥ इतितस्यवचःश्रुत्वाब्रह्मालोकपितामहः ॥२३॥ जगामवि
ष्णुलोकंचमनुनासहपार्वति॥वैकुंठनिलयंपत्रंविकुंठासुतनिर्मितम्॥२४॥चतुरस्रंचतुर्द्वारंवरप्राकारतोरणम् ॥

सर्वदेवनमस्कार्यंजगाममनुनासह ॥ २५ ॥ यत्रवैमानिकाःप्रोक्ताललनायूथपास्ततः ॥ गायंतिसामगानि
त्यंगंधर्वाप्सरसस्तथा ॥ २६ ॥ सर्वेंचतुर्भुजाःप्रोक्तामणिकुंडलशोभिताः ॥ चंडप्रचंडौप्राग्द्वारेयाम्येभद्रसुभ
द्रकौ ॥ २७ ॥ जयविजयौवारुण्यांसौम्येधातृविधातरौ ॥ तन्मध्येतुमहापीठंनानारत्नोपशोभितम् ॥ २८ ॥
तस्योपरिमहाराजंसर्वलोकपितामहम् ॥ वासुदेवंजगन्नाथंब्रह्मालोकपितामहः ॥ २९ ॥ उवाचप्रांजलिर्ब्रह्मा
वाचामधुरयागिरा ॥ ब्रह्मोवाच ॥ देवाधिदेवदेवेशभक्तानुग्रहकारक ॥ ३० ॥ नगरंवसतिंदेहिमन्वर्थेंदेवसत्तम ॥
इतितस्यवचः श्रुत्वावासुदेवोजनार्दनः ॥ ३१ ॥ वैकुंठमध्येयत्प्रोक्तमयोध्यानगरंशुभम् ॥ अनेकाश्चर्यसंयुक्तं
सर्वसंपत्तिदंशुभम् ॥ ३२ ॥ दत्त्वाचमनुहस्तेचब्रह्मणाचानुमोदितः ॥ अथानुज्ञापितोब्रह्मामनुःस्वायंभुवश्चसः
॥ ३३ ॥ आगतोमर्त्यलोकेचविश्वकर्मसमन्वितौ ॥ वसिष्ठंप्रेषयामासपश्चात्तत्रजनार्दनः ॥ ३४ ॥ सुचारुःक्ष्मा
यत्रदृश्याह्ययोध्यांतत्रकल्पय ॥ आगत्यऋषिशार्दूलोवसिष्ठोमुनिसत्तमः ॥ ३५ ॥ विश्वकर्माणमाहूयपुरींवै
निर्ममेशुभाम् ॥ इतिविष्णोरादेशाच्चपुरीवैनिर्मिताशुभा ॥३६॥ अयोध्यारचितातेनसर्वदेवनमस्कृता ॥ अयो
ध्यानगरीरम्यारत्नमंडपशोभिता ॥ ३७ ॥ अनेकरत्नसंकीर्णाज्वलनार्कसमप्रभा ॥ आवासैरुत्तमैर्युक्तादि

व्यप्राकारतोरणा ॥ ३८ ॥ सुवर्णदुर्गसंयुक्तारौप्यताम्रककोष्ठका ॥ परिखामारकूटांचस्वर्णहर्म्यविराजिता
॥ ३९ ॥ प्राकारोपवनोद्यानपरिखारत्नतोरणा ॥ अनेकगृहसंयुक्तारचिताविश्वकर्मणा॥४०॥स्वर्णरौप्यायसैः
शृंगैः संकुलासर्वतोगृहैः ॥ नीलस्फटिकवैडूर्यमुक्तामरकततोरणैः ॥ ४१ ॥ क्लृप्तहर्म्यस्थलीरम्यासर्वदेवनम
स्कृता ॥ सभाचत्वररम्याभिःसर्वतोभवनैर्युता॥४२॥अयोध्यापरमामेध्यापुरीदुष्कृतिदुर्लभा ॥ कस्यसेव्याच
नोभव्यायस्यांसाक्षाद्धरिःस्वयम् ॥ ४३ ॥ सरयूतीरमासाद्यदिव्यापरमशोभना॥अमरावतीतिसाप्रायःश्रिता
बहुतपोधनैः ॥ ४४ ॥ हस्त्यश्वरथपत्त्याढ्याविभूत्याचविराजिता ॥ प्राकाराट्टप्रतोलीभिस्तोरणैः कांचनैः
शुभैः ॥ ४५ ॥ सुरूपवेद्यैः सर्वत्रसुविभक्तचतुष्पथा ॥ अनेकभूमिप्रासादबहुभांडसुविक्रया ॥ ४६ ॥ पद्मोत्प
लसुगंधीभिर्वापीभिरुपशोभिता ॥ देवतायतनैर्दिव्यैर्वेदघोषैश्चशोभिता ॥ ४७ ॥ वीणावेणुमृदंगादिशब्दैरु
त्कृष्टैर्युता ॥ शालैस्तालैर्नारिकेलैः पनसामलकैस्तथा ॥ ४८ ॥ तथैवाम्रकपित्थाद्यैरशोकैरुपशोभिता ॥
आरामैर्विविधैर्युक्तासर्वर्तुफलपादपैः ॥ ४९ ॥ मालतीजातिबकुलपाटलानागचंपकैः ॥ करवीरैःकर्णिकारैःके
तकीभिरलंकृता ॥ ५० ॥ निंबूजंबीरकदलीमातुलिंगमहाफलैः ॥ लसच्चंदनगंधाढ्यैर्नागरैरुपशोभिता ॥ ५१ ॥

देवतुल्यप्रभायुक्तैर्नृपपुत्रैश्चसंयुता ॥ सुरूपाभिर्वरस्त्रीभिर्देवस्त्रीभिरिवावृता ॥ ५२ ॥ श्रेष्ठैःसत्कविभिर्युक्ताबृहस्पतिसमैर्द्विजैः ॥ वणिग्जनैस्तथापौरैः कल्पवृक्षैरिवावृता ॥५३॥ अश्वैरुच्चैश्रवःप्रख्यैर्दन्तिभिर्दिग्गजैरिव ॥ इतिनानाविधैर्भावैरयोध्येन्द्रपुरीसमा ॥ ५४ ॥ यस्यांजातामहीपालाःसूर्यवंशसमुद्भवाः ॥ इक्ष्वाकुप्रमुखाः सर्वेप्रजापालनतत्पराः ॥ ५५ ॥ यस्यास्तीरेपुण्यतोयाकूजद्भृंगविहंगमा ॥ सरयूनामतटिनीमानसात्प्रभवोत्तमा ॥ ५६ ॥ पश्चिमोत्तरतःपुण्यापूर्वस्यांदिशिसर्वदा ॥ पुण्यवृद्धिकरीसाचघर्घरोत्तमसंगमा ॥ ५७ ॥ मुनीश्वराश्रिततटाजागर्तिजगदुच्छ्रिता ॥ गंगाचसरयूश्चैवब्रह्मद्रवइतीर्यते ॥ ५८ ॥ तस्मादिमेपुण्यतमेनद्यौ देवनमस्कृते ॥ एतयोःस्नानमात्रेणब्रह्महत्याव्यपोहति ॥ ५९ ॥ अहोपुण्यतमाभूमिरयोध्यापरिकीर्तिता ॥ अहोधन्यतमाभूमिस्तवजातासुलोचने ॥ ६० ॥ श्रूयतांमहिमातस्यामनोदत्त्वाचपार्वति ॥ अकारोवासुदेवःस्याद्यकारस्तुप्रजापतिः ॥ ६१ ॥ उकारोरुद्ररूपस्तुतांध्यायंतिमुनीश्वराः ॥ सर्वोपयानकैर्युक्तैर्ब्रह्महत्यादिपातकैः ॥६२॥ नयोध्यासर्वतोयस्मात्तामयोध्यांततोविदुः ॥ विष्णुराद्यापुरीचेयंक्षितिंनस्पृशतिप्रिये ॥ ६३ ॥ विष्णोःसुदर्शनेचक्रेस्थितापुण्यांकुरासदा ॥ केनवर्णयितुंशक्योमहिमास्याःसुबुद्धिना ॥ ६४ ॥ यत्रसाक्षा

त्स्वयंदेवोविष्णुर्वसतिसर्वदा ॥ सहस्रधारामारभ्ययोजनंपूर्वतोदिशि ॥ ६५ ॥ पश्चिमेचतथादेवियोजनंसं
मतोवधिः॥ दक्षिणोत्तरभागेतुसरयूस्तमसावधी॥६६॥एतत्क्षेत्रस्यसंस्थानंहरेरंतर्गृहंस्मृतम्॥मत्स्याकृतिरियं
भद्रेपुरीविष्णोरुदीरिता ॥ ६७ ॥ पश्चिमेमत्स्यमूर्द्धातुगोप्रताराश्रितःप्रिये ॥ पूर्वतःपुच्छभागोहिदक्षिणो
त्तरमध्यमः ॥ ६८ ॥ एतत्क्षेत्रस्यसंस्थानंमयासुंदरिवर्णितम् ॥ ६९ ॥ इति श्रीरुद्रयामलेहरगौरीसंवादे
अयोध्याखंडेपुरीवर्णनंनामप्रथमोऽध्यायः ॥ १ ॥ ॥ ॥ ॥ ॥
॥ पार्वत्युवाच ॥ किंफलंगमनेतत्रकिंफलंदर्शनेकृते ॥ कानितीर्थानितत्रैवकोदेवस्तद्वदस्वमे ॥ १ ॥ कस्मि
न्मासेतिथौकस्यांकस्मिन्पर्वणिमानवैः ॥ कर्तव्यंकानिदानानिकथयस्वमहामते ॥ २ ॥ शंकरउवाच ॥ शृ
णुपार्वतियत्नेनपरंगुह्यंसनातनम् ॥ यन्नकस्यचिदाख्यातंतद्वदामिसुविस्तरात् ॥३॥ यदामतिंप्रकुरुतेह्ययोध्यां
गमनंप्रति ॥ तदानरकनिर्मुक्तागायंतिपितरोदिवि ॥ ४ ॥ यावत्पदानिरामस्यमार्गगच्छतिमानुषः ॥ पदेपदेऽ
श्वमेधस्ययज्ञस्यलभतेफलम् ॥ ५ ॥ यात्रांनिर्गम्यमानस्ययःप्रेरयतिचापरान् ॥ सतुपापान्निवृत्तोवैलभते
वांछितंफलम् ॥ ६ ॥ अयोध्यांगम्यमानस्ययोददातिप्रतिश्रियम् ॥ पुत्रपौत्रसमायुक्तःक्रीडतेनंदनेवने ॥७॥

तथैवमधुरांवाणींक्रीडेचैत्ररथांतरे ॥ अध्वनिश्रांतदेहस्यवाहनंयःप्रयच्छति ॥ ८ ॥ हंसयुक्तविमानेनचेंद्रलोकंसगच्छति ॥ यात्रायांगम्यमानस्यमध्याह्नेक्षुत्पिपासिनः ॥ ९ ॥ अन्नंददातियोभक्त्याशृणुयल्लभतेफलम् ॥ गयाश्राद्धेनयत्पुण्यंलभतेमानवोभुवि ॥ १० ॥ प्रयागेवपनेनैवयत्पुण्यंलभतेभुवि ॥ अन्नदानेनतत्सर्वंपितॄणांतृप्तिमक्षयाम् ॥ ११ ॥ उपानहौचयोदद्यादयोध्यांप्रतिगच्छतः ॥ रामप्रसादात्पुरुषोगजस्कंधेनगच्छति ॥ १२ ॥ विघ्नमाचरतेयस्तुह्ययोध्यांप्रतिगच्छतः ॥ नरकेमज्जतेमूढःकल्पमात्रंतुरौरवे ॥ १३ ॥ मार्गस्थितस्यायोध्यायाःप्रयच्छतिकमंडलुम् ॥ प्रपादानसहस्रस्यफलमाप्नोतिमानवः ॥ १४ ॥ यात्रार्थंगच्छतोनुवैपादाभ्यंगंकरोतियः ॥ अथप्रक्षालयेत्पादौसर्वान्कामानवाप्नुयात् ॥ १५ ॥ कथांशृणोतियोविष्णोर्गीतंवायदिगच्छति ॥ अन्नंददातिमनुजस्तस्मादन्यतरोनहि ॥ १६ ॥ अयोध्यांदृश्यमानायांहृष्टरोमाचसुंदरि ॥ वाहनंसंपरित्यज्यलुंठतेधरणीगतः ॥ १७ ॥ पंचसूनाकृतंपापंतथामार्गकृतंचयत् ॥ कृमिकीटपतंगाश्चनिहताःपथिगच्छताम् ॥ १८ ॥ परान्नंपरपानीयंयःस्पृशेन्नचसंगमः ॥ तत्सर्वंनाशमायातिह्ययोध्यादर्शनेकृते ॥ ॥ १९ ॥ अयोध्यादर्शनंयस्तुकरोतिमनुजोयदि ॥ सप्तजन्मकृतंपापंनश्यतेनात्रसंशयः ॥ २० ॥ पठेन्नामस

हस्रंतुस्तवराजमथापिवा ॥ गजेंद्रमोक्षणंचापिपाथिगच्छञ्छनैःशनैः ॥ २१ ॥ पठतेमनुजोनित्यमयोध्यागम
नंप्रति ॥ गायमानोभगवतःप्रादुर्भावकथाःशुभाः ॥ २२ ॥ अथवापठतेनित्यंरामनामसहस्रकम् ॥ पठतेनाम
मात्रंतुमुच्यतेमहतोभयात् ॥ २३ ॥ अयोध्यांदृश्यमानांयोदंडवत्प्रणमेत्सुधीः ॥ सर्वपापविशुद्धात्माया
तिविष्णोश्चसंनिधिम्॥२४॥सर्वविघ्नविनाशंचरामंराजीवलोचनम् ॥ नीलोत्पलदलश्यामंपीतकौशेयवाससम्
॥ २५ ॥ दंडवत्प्रणमेद्भक्त्याहर्षसंयुक्तमानसः ॥ बालभावेकृतंपापंकौमारेयौवनेतथा ॥ २६ ॥ तत्सर्वंनाशमा
यातित्वयोध्यादर्शनेकृते ॥ रामदर्शनमात्रेणसर्वपापैःप्रमुच्यते ॥ २७ ॥ दर्शनाद्रामदेवस्यपापंसर्वंलयंव्रजे
त् ॥ पुनःशृणुमहाभागेसरयूतीर्थमुत्तमम् ॥ २८ ॥ यस्यदर्शनमात्रेणसर्वपापैःप्रमुच्यते ॥ दुरितौघक्षयकर
ममंगलविनाशनम् ॥ २९ ॥ सर्वकामप्रदंनृणांप्रणमेत्सरयूजलम् ॥ श्रीपार्वत्युवाच ॥ तीर्थविधिंचपृच्छामि
यथोक्तंफलमश्नुते ॥ ३० ॥ स्नानदानैर्नरोयातिविष्णुलोकेवसेत्सदा ॥ श्रीशंकरउवाच ॥ अनेनविधिनादेवि
शृणुतीर्थंयथातथा ॥ ३१ ॥ हंततेकथयिष्यामिषड्ऋषीणांपरायणम् ॥ तदेकाग्रमनादेविशृणुतीर्थेषुयत्फलम्
॥ ३२ ॥ यस्यहस्तौचपादौचजिह्वाचैवसुसंयता ॥ विद्यातपश्चकीर्तिश्चसतीर्थफलमश्नुते ॥ ३३ ॥ अकामु

कोनिरालंबःस्वल्पाहारोजितेंद्रियः ॥ विमुक्तःसर्वदोषैश्चसतीर्थफलमश्नुते ॥ ३४ ॥ प्रतिग्रहनिवृत्तश्चसंतुष्टो
येनकेनचित् ॥ अहंकारानिवृत्तश्चसतीर्थफलमश्नुते ॥ ३५ ॥ अक्रोधनश्चदेवेशिसत्यवादीदृढव्रतः ॥ आत्मो
पमश्चभूतेषुसतीर्थफलमश्नुते ॥ ३६ ॥ ऋषिभिःक्रतवःप्रोक्तावेदेष्वेवयथाक्रमम् ॥ फलंचेहयथाबुद्धिप्रेत्य
चेहचसर्वशः ॥ ३७ ॥ तेनशक्यादरिद्रेणयज्ञाःकर्तुंमहीतले ॥ बहूपकरणायज्ञानानासंभारविस्तराः ॥ ३८ ॥
प्राप्यंतेपार्थिवैरेतत्समृद्धैर्वानरैःक्वचित् ॥ नायंन्यूनैरेवगुणैर्नरैरकृतबुद्धिभिः ॥३९॥ योदरिद्रैरपिविधिःशक्यः
प्राप्तुंचसुंदरि ॥ तुल्योयज्ञफलैःपुण्यैस्तन्निबोधमहेश्वरि ॥ ४० ॥ ऋषीणांपरमंगुप्तंदेवानामपिदुर्लभम् ॥तीर्था
भिगमनंचैवयज्ञैरपिविशिष्यते ॥ ४१ ॥ अनुपोष्यत्रिरात्रंचतीर्थान्यनभिगम्यच ॥ अदत्त्वाकांचनंगाश्चं
दरिद्रोनामजायते ॥ ४२ ॥ अग्निष्टोमादिभिर्यज्ञैरिष्ट्वाविपुलदक्षिणैः ॥ सतत्फलमवाप्नोतितीर्थाभिगमने
नवै ॥ ४३ ॥ नृलोकेदेवलोकेचतीर्थंत्रैलोक्यविश्रुतम् ॥ अयोध्यानामविख्यातंसर्व देवनमस्कृतम् ॥ ४४ ॥
दशकोटिसहस्राणिदशकोटिशतानिच ॥ एतानिसर्वतीर्थानित्रिसंध्यंनिवसंतिच ॥ ४५ ॥ आदित्यावसवोरु
द्राःसाध्याश्चैवमरुद्गणाः ॥ गंधर्वाप्सरसश्चैवनित्यंसन्निहितास्तथा ॥ ४६ ॥ यत्रदेवास्तपस्तप्त्वादिव्याब्रह्मर्ष

यस्तथा ॥ दिव्ययोगान्महादेविपुण्येनमहतान्विताः ॥ ४७ ॥ अंन्यदेशोस्थितोयस्तुह्ययोध्यांमनसास्मरेत् ॥
नश्यंतिसर्वपापानिनाकपृष्ठेचपूज्यते ॥ ४८ ॥ तस्मिंस्तीर्थेचदेवेशिनित्यमेवपितामहः ॥ उवासपरमप्रीतोदे
वदानवसंयुतः ॥ ४९ ॥ अयोध्यायांमहादेविदेवाःशक्रपुरोगमाः ॥ सिद्धिंसमभिसंप्राप्ताःपुण्येनमहतान्विताः
॥ ५० ॥ तत्राभिषेकंयःकुर्यात्पितृदेवार्चनेरतः ॥ अश्वमेधाद्दशगुणंप्रवदंतिमनीषिणः ॥ ५१ ॥ अथैकंभो
जयेद्विप्रंसरयूतीरमास्थितः ॥ तेनासौकर्मणादेविप्रेत्यचेहचमोदते ॥ ५२ ॥ फलेनशाकमूलाभ्यांयेनवैवर्त
तेस्वयम् ॥ तद्वैदद्याद्ब्राह्मणायश्रद्धावाननसूयकः ॥ ५३ ॥ तेनैवप्राप्नुयात्प्राज्ञोहयमेधफलंनरः ॥ ब्राह्मणाःक्ष
त्रियावैश्याःशूद्राश्चैवेतरेजनाः ॥ ५४ ॥ नवियोनिंव्रजंत्येतेस्नात्वातीर्थेशुभार्थिनः ॥ चैत्रेमासिचसंप्राप्तेनवमी
दिनमाश्रितः ॥ ५५ ॥ योभिगच्छतिवैभद्रेह्ययोध्यांसरयूंप्रति ॥ फलंतत्राक्षयंदेविभवतीत्यनुशुश्रुम ॥ ५६ ॥
सायंप्रातःस्मरेद्यस्तुह्ययोध्यांचकृतांजलिः ॥ उपस्पृष्टानितीर्थानित्वयोध्यायाश्चभामिनि ॥ ५७ ॥ विष्णोः
पादमवंतिकांगुणवतींमध्यंचकांचींपुरींनाभिंद्वारवतींपठंतिहृदयंमायापुरींयोगिनः ॥ ग्रीवामूलमुदाहरंति
मथुरांनासांचवाराणसीमेतद्ब्रह्मपदंवदंतिमुनयोऽयोध्यांपुरींमस्तकम् ॥ ५८ ॥ जन्मप्रभृतियत्पापंस्त्रिया

वापुरुषस्यवा ॥ अयोध्यास्नानमात्रेणसर्व्वमेवप्रणश्यति ॥ ५९ ॥ यथासुराणांसर्वेषामादिश्चमधुसूदनः ॥
तथैवक्षेत्रतीर्थानामयोध्यात्वादिरुच्यते ॥ ६० ॥ प्राप्यद्वादशरात्राणियोऽध्यांनियतः शुचिः ॥ क्रतून्सर्वा
नवाप्नोतिस्वर्गलोकंसगच्छति ॥ ६१ ॥ येतुवर्षशतंपूर्णमग्निहोत्रमुपासते ॥ अयोध्यांवसतोरात्रिंफलंकोटि
गुणंस्मृतम् ॥ ६२ ॥ अयोध्यांदुष्करंगंतुमयोध्यादुष्करंतपः ॥ अयोध्यादुष्करंदानंवासश्चैवसुदुष्करः ॥
॥ ६३ ॥ उपोष्यद्वादशरात्रंनियतोनियतासनः ॥प्रदक्षिणाकृतायेनजंबूद्वीपस्यसाकृता॥६४॥अश्वमेधमवाप्नो
तिसर्वकामसमन्वितः ॥ अत्रोषित्वातुरजनींपूतात्मामानवोभवेत् ॥ ६५ ॥ नदुर्गतिमवाप्नोतिसिद्धिंप्राप्नो
तिचोत्तमाम् ॥ अयोध्यादर्शनाद्देविदिव्यदेहमवाप्नुयात् ॥६६॥ अयोध्याचपरंब्रह्मसरयूःसगुणःपुमान्॥तन्नि
वासीजगन्नाथःसत्यंसत्यंवदाम्यहम् ॥ ६७ ॥ यस्याःप्रभावमतुलंवेदादेवाःशिवोह्यहम् ॥ नहिवक्तुंसमर्थाःस्मो
विष्णुश्चसगुणःपुमान् ॥ ६८ ॥ इतिश्रीरुद्रयामलेहरगौरीसंवादेअयोध्यामाहात्म्यंनामद्वितीयोऽध्यायः ॥२॥
पार्वत्युवाच ॥ देवदेवमहादेवभक्तानुग्रहकारक ॥ ब्रूहिकांतसरय्वाश्चह्युत्पत्तिंममसांप्रतम् ॥ १ ॥ एतेवैमुन
यःसर्वेनानादेशनिवासिनः ॥ उत्काश्चेमेकथांश्रोतुंत्वत्तःसरयुसंभवाम् ॥ २ ॥ श्रीशंकरउवाच ॥ सरयूःस्वमु

खेनैवस्त्रामुत्पत्तिमुवाचह ॥ तामहंकथयिष्यामियाश्रुतापुरवासिभिः ॥ ३ ॥ एकदारामचंद्रस्तुबालरूपीसुकौ
तुकी ॥ सखीभिर्भ्रातृभिः सार्द्धंदुर्गंद्वारेचक्रीडति ॥ ४ ॥ वृषस्कंधः सखाकश्चित्तस्यस्कंधेरुरोहवै ॥ तथाभ
रतशत्रुघ्नौलक्ष्मणश्चनिजान्सखीन् ॥ ५ ॥ चामरैर्वीज्यमानाश्चतथाबालैः समंततः ॥ अलकैःकंपमानैश्चमु
खस्योपरिशोभिताः ॥ ६ ॥ मंत्रैर्मंत्रैस्तथामात्यैरक्षितःप्रभुरीश्वरः ॥ अंगेंगेचतथादिव्यंभूषणंविधिवत्प्रभुः
॥ ७ ॥ दिव्यगंधानुलिप्तांगोराजराजेश्वरात्मजः ॥ सखिस्कंधगतोरामोभ्रातृभिर्द्वारिनिर्ययौ ॥ ८ ॥ शिरसा
धारयन्रामःस्वर्णसूत्रस्यपट्टिकाम् ॥ कंचुकंचमहादिव्यंस्वर्णसूत्रेणशीलितम् ॥ ९ ॥ द्वारदेशंविनिर्गत्यरा
मोराजीवलोचनः ॥ तथाभरतशत्रुघ्नौलक्ष्मणश्चमहामतिः ॥ १० ॥ तथावेषेणतेबालाः क्रीडांचक्रुर्मनोरमाम् ॥
शतशोनागरास्तत्ररामंदृष्ट्वामुदंययुः॥११॥बालवृद्धाःपुरंध्र्यश्चलेभिरेपरमांमुदम् ॥ ज्येष्ठमासस्यपूर्णायांराजा
दशरथोनदीम्॥१२॥रामनिर्गमनात्पूर्वंसरयूंस्नातुमागतः॥रघुनाथःसखीनाहक्वचास्तिजनकोमम ॥१३॥ तत्र
सर्वैर्वयंशीघ्रंव्रजिष्यामोद्यमाचिरम् ॥१४॥ वेत्रधराऊचुः॥स्नानार्थंतुगतोराजाह्यधुनासरयूंनदीम्॥श्रीमद्भिस्त
त्रगंतव्यंनिकटेवर्ततेमनः ॥ १५ ॥ इतिवाक्यंतुतेषांवैरामःश्रुत्वाचबालवत् ॥ हास्यंकृत्वामुहुश्चोच्चैर्गच्छगच्छे

तिचाब्रवीत् ॥ १६ ॥ ताडयामासतंपद्भ्यांयस्यस्कंधेवतस्थिवान् ॥ अधावत्सोपिवेगेनबालैःसार्द्धंमहामतिः
॥ १७ ॥ सरयूंप्रतितेसर्वेबालास्तूर्णंप्रतस्थिरे ॥ मार्गेतत्रनरानार्योदृष्ट्वासर्वेमुदंययुः ॥ १८ ॥ राजापिसरयू
तीरेकृत्वासंध्याजपादिकम् ॥ गंतुंचक्रेमनःस्तावद्वसिष्ठादिभिरन्वितः ॥ १९ ॥ चाराआगत्यवेगेनरामाग
मनमब्रुवन्॥क्षणंतस्थौतदाराजारामागमनहर्षितः ॥ २० ॥ बालाःसर्वेसमाजग्मुःशतशोथसहस्रशः ॥ चतुराणां
चतुर्णांतुचत्वारोचतुरैःसह ॥ २१ ॥ बालकैस्तेकुमारास्तुभूपतेर्निकटंययुः ॥ प्रोत्तीर्यचवयस्यानांस्कंधेभ्यो
बालकास्तथा ॥ २२ ॥ नृपस्यनिकटेतस्थूरामोंकेपितुराविशत् ॥ कुथेपरमविस्तीर्णेस्वर्णसूत्रेणरंजिते ॥
॥ २३ ॥ निवेश्यबालकान्सर्वान्रामंप्राहनृपोत्तमः ॥ दंडवत्क्रियतांवत्सवासिष्ठ्यैतुपुनःपुनः ॥ २४ ॥ नरेश
स्यवचःश्रुत्वाबालाःसर्वेनदींप्रति ॥ साष्टांगंप्रणतिंचक्रुःप्रेम्णारामादयोर्भकाः ॥ २५ ॥ पुनर्निवेश्यतानग्रेकृ
त्वाचकरकुड्मलम् ॥ जगादसरयूंराजासर्वेषांचैवशृण्वताम् ॥ २६ ॥ राजोवाच ॥ नमस्तेसरयूदेविवसिष्ठत
नयेशुभे ॥ ब्रह्मादिसकलैर्देवैर्ऋषिभिर्नारदादिभिः ॥ २७ ॥ सदात्वंसेवितादेवितथासुकृतिभिर्नरैः ॥ मानसाच्च
समायातेजगतांपापहारिणि ॥ २८ ॥ स्मरतांपश्यतांदेविपापनाशेपटीयसि ॥ येपिबंतिजलंदेवित्वदीयंग

तमत्सराः ॥ २९ ॥ स्तनपानंतेनमातुःकरिष्यंतिकदाचन ॥ मनुप्रभृतिभिर्मान्यैर्मानितासिसदाशुभे ॥ ३० ॥
त्वत्तीरमरणेनैवत्वन्नामरटनेनच ॥ येत्यजंतितनुंदेवितेकृतार्थानसंशयः ॥ ३१ ॥ त्वंतुनेत्रोद्भवादेविहरेर्नारा
यणस्यहि ॥ महिमातवदेवैश्चगीयतेचमुहुर्मुहुः ॥ ३२ ॥ तत्रकाहिमनःशक्तिःस्तवनेमानुषस्यच ॥ त्वत्तीरेस
र्वतीर्थानिनिवसंतिचतुर्युगे ॥ ३३ ॥ नमोदेविनमोदेविपुनरेवनमोनमः ॥ हेवासिष्ठिमहाभागेप्रणतंरक्षबंध
नात् ॥ ३४ ॥ इमेबालास्त्वदीयाश्चवर्तंतेशरणंतव ॥ एतेरक्ष्याश्चपोष्याश्चतटेदेविसदात्मनः ॥ ३५ ॥ नद्य
ष्टकंविधायाथपुत्राणामुदयायच ॥ स्वर्णलक्षंचविप्रेभ्यः पुत्रहस्तैरदापयत् ॥ ३६ ॥ राज्ञःस्तवंसमाकर्ण्यसरयूः
कामरूपिणी॥दर्शनार्थंकुमाराणामाजगामतटेपुनः ॥ ३७ ॥ सर्वांगेषुदधानासाभूषणानिमनोहरा॥आगत्यनि
कटेतस्थौबालानांसन्मुखेसरित् ॥ ३८ ॥ जग्राहचरणौतस्याबालैःसहनरेश्वरः ॥ आशिषःसरयूर्दत्वाराम
मंकेन्यवेशयत् ॥ ३९ ॥ मुक्तामालांतुरामस्यददौकंठेस्वयंमुदा ॥ घ्राणंचकारमूर्ध्नस्तुप्रेम्णासासरयूर्नदी ॥
॥ ४० ॥ भूपतिंजगदेसातुशृणुराजन्वचोमम ॥ इमेचबालकाइष्टाःसर्वेषांमंडगोलके ॥ ४१ ॥ वसंतिममकु
क्षौहिपश्यतांज्ञानचक्षुषाम् ॥ त्वयाकृतमिदंयस्तुह्यष्टकंचपठेन्मम ॥ ४२ ॥ स्नानस्यसर्वतीर्थानांफलमाप्नोति

मानवः॥ उक्त्वैवंदर्शयामासरामादीन्निजकुक्षिगान् ॥ ४३ ॥ दृष्ट्वादशरथोराजाविस्मयंपरमंगतः ॥ पप्रच्छतां
प्रणम्यादौकदोत्पन्नासरिद्वरे ॥ ४४ ॥ वशिष्ठेनसमानीतामनोर्वैवस्वतांतरे ॥ वासिष्ठीतिसमाख्यातापुत्रामेद्यु
दरेधृताः ॥४५॥ कथ्यतामितिमेपृष्टंस्वमुखेनैवहेनादि ॥ श्रीशंकरउ० ॥ उवाचसरयूर्भूपंवाचागंभीरयानदी ॥
श्रूयतांराजशार्दूलह्युत्पत्तिंकथयामिते ॥ ४६ ॥ सृष्ट्यादौतुयदाब्रह्मापद्मनाभस्यनाभितः ॥ उत्पन्नोविष्णु
नाज्ञप्तस्तपसाराधयेतिमाम् ॥४७॥ तदाधातातपःकर्तुंमनश्चक्रेनिजासने ॥ दिव्याब्दानांसहस्रंचकुंभकेनव्य
वस्थितः ॥ ४८ ॥ ध्यायन्भगवतोरूपंकोटिमन्मथसुंदरम् ॥ निदेशेवर्तमानंतंविज्ञायकमलापतिः ॥ ४९ ॥
आरुह्यगरुडंवेगात्त्रिपाल्लोकात्समागमत् ॥ तंतदातादृशंदृष्ट्वाह्यात्मभक्तिपरायणम् ॥ ५० ॥ कृपयासंपरीत
स्तुजलंनेत्रान्मुमोचह ॥ पस्पर्शपाणिपद्मेनपद्मनाभोहिपद्मजम् ॥ ५१ ॥ स्पर्शनात्पद्मनाभस्यसुखात्सप्रपि
तामहः ॥ सुशीतेनैवस्पर्शेनसोत्यजत्कुंभकंविधिः ॥ ५२ ॥ उन्मील्यनयनेपश्यल्लोकनाथंपितामहः ॥ प्रणम्य
दंडवद्वेधास्तस्यापश्यच्चमाधुरीम् ॥ ५३ ॥ पतितंविष्णुनेत्राच्चजलंजग्राहपाणिना ॥ कमण्डलौतदाप्रेम्णास्था
पयामासविश्वसृट् ॥ ५४ ॥ चतुर्भिर्वदनैर्ब्रह्मातुष्टावजगतीपतिम् ॥ स्तोत्रेणचप्रसन्नोभूद्वरंदत्त्वाजगामसः ॥

॥ ५५ ॥ ब्रह्मापितज्जलंस्नात्वाब्रह्मद्रवमिदंशुभम् ॥ मनसारचयामासमानसंहिसरश्चसः ॥ ५६ ॥ जलस्यस
रसिन्यासंतस्मिंश्चक्रेचपद्मजः ॥ जलस्यद्रुहिणोज्ञात्वामाहात्म्यंपरमाद्भुतम् ॥ ५७ ॥ स्वयंतुजगतांसर्गेसंबभू
वपितामहः ॥ एवंबहुगतेकालेययुर्मन्वन्तराणिषट् ॥ ५८ ॥ सप्तमोवैश्राद्धदेवोयोध्यायामभवन्मनुः ॥ तस्यपु
त्रस्तुराजासीदिक्ष्वाकुस्तवपूर्वजः ॥ ५९ ॥ अभवत्पृथिवीपालस्तेनाज्ञप्तोमुनिःस्वयम् ॥ वसिष्ठोमानसंगत्वान
ग्रथभुजकोशिनम् ॥ ६० ॥ तुष्टावसंप्रसन्नोभूद्वरंब्रूहिद्विजोत्तम ॥ वव्रेमुनिर्नदींतस्मात्तेनदत्तंचनेत्रजम् ॥
॥ ६१ ॥ जलंयन्मानसेन्यस्तंब्रह्मणाब्रह्मयोनिना ॥ नदीरूपेणसाहंवैसरसस्तुविनिर्गता॥६२॥वसिष्ठःप्रययाव
ग्रेपश्चाच्चाहंतुतस्यवै॥विष्णुनेत्रसमुत्पन्नारामंकुक्षौबिभर्म्यहम् ॥६३॥ येध्यायंतिसदारामंममकुक्षिगतंनराः ॥
तेषांभुक्तिश्चमुक्तिश्चभविष्यतिनसंशयः॥६४॥रामंविद्धिपरंब्रह्मसच्चिदानंदमद्वयम् ॥ भक्तानांरक्षणार्थायदुष्टा
नांचवधायवै ॥ जातस्तवगृहेराजंस्तपसातोषितस्तव ॥ ६५ ॥ श्रीशंकरउवाच ॥विश्राव्यचात्मनोजन्मत्वंत
र्धानंहिसागता ॥ अयोध्यावासिनःसर्वेविस्मयंलेभिरेपरम् ॥ ६६ ॥ धन्योदशरथोराजाधन्येयंसरयूनदी ॥
इतिशुश्रावधर्मात्माधार्मिकाणांशिरोमणिः ॥ ६७ ॥ ततोदशरथोराजाविज्ञाप्यचात्मनोगुरुम् ॥ आज

गामगृहंध्यायन्भाग्यंस्वंचमहाम्मतिः ॥ ६८ ॥ वशिष्ठेनसमानीतावाशिष्ठीपरिकीर्तिता ॥ रामार्थंचसमाया
तारामगंगाचकथ्यते ॥ ६९ ॥ मन्वंतरसहस्रैस्तुकाशीवासेनयत्फलम् ॥ तत्फलंसमवाप्नोतिसरयूदर्शनेकृते॥
॥ ७० ॥ प्रयागेयोनरोगत्वामासद्वादशकंवसेत् ॥ तत्फलंसमवाप्नोतिसरयूदर्शनेकृते ॥ ७१ ॥ गयाश्रा
द्धंचयः कुर्यात्पुरुषोत्तमदर्शनम् ॥ तत्फलादधिकाप्रोक्ताकलौदाशरथीपुरी ॥ ७२ ॥ मथुरायांकल्पमेकंवसते
मानवोयदि ॥ तत्फलंसमवाप्नोतिसरयूदर्शनेकृते ॥७३॥ यागतिर्योगयुक्तानांवाराणस्यांतनुत्यजाम् ॥ साग
तिःस्नानमात्रेणसरय्वांहरिवासरे ॥ ७४ ॥ पुष्करेतुनरोगत्वाकार्तिक्यांकृत्तिकादिने ॥ तत्फलंसमवा
प्नोतिसरयूदर्शनेकृते ॥ ७५ ॥ कल्पकोटिसहस्राणिह्यवंतीवासमुत्तमम् ॥ तत्फलंसमवाप्नोतिसरयूदर्शनेकृ
ते ॥ ७६ ॥ षष्टिवर्षसहस्राणिभागीरथ्यवगाहनात् ॥ तत्फलंसमवाप्नोतिदृष्ट्वादाशरथींपुरीम् ॥ ७७ ॥ निमि
षंनिमिषार्द्धंवाप्राणिनांरामर्चिंतनम् ॥ यत्रकुत्रस्थितोजीवोह्ययोध्यांमनसास्मरेत् ॥७८॥ नतस्यपुनरावृत्तिः
कल्पांतरशतैरपि ॥ जलरूपेणब्रह्मैवसरयूमोक्षदासदा ॥ ७९ ॥ नैवात्रकर्मणांभोगोरामरूपोभवेन्नरः ॥

२

पशुपक्षिमृगाश्चैवत्वन्येयेपापयोनयः ॥ तेपिमुक्तादिवंयांतिममवाक्यंनसंशयः ॥ ८० ॥ ॥ इतिश्रीरु
द्रयामलेहरगौरीसंवादेसरयूत्पत्तिकथनंनामतृतीयोऽध्यायः ॥ ३ ॥ ॥ ॥ ॥
श्रीशंकरउवाच ॥ प्रथमंतत्रतीर्थंतुकथयामिवरानने ॥ स्वर्गद्वारंसमुत्पन्नंप्रथमंसरयूतटे ॥ १ ॥ मुक्तिद्वार
मिदंज्ञेयंस्वर्गप्राप्तिकरंनृणाम् ॥ स्वर्गद्वारस्यमाहात्म्यंविस्तराद्वक्तुमीश्वरः ॥२॥ नहिकश्चिदतोवच्मिसंक्षेपा
च्छृणुसुव्रते ॥ सहस्रधारामारभ्यपूर्वतःसरयूजले ॥ ३ ॥ षट्त्रिंशदधिकंप्रोक्तंधनुषांषट्शतानिच ॥ स्वर्गद्वार
स्यविस्तारःपुराणज्ञैःप्रकीर्तितः ॥ ४ ॥ स्वर्गद्वारसमंतीर्थंनभूतंनभविष्यति ॥ सत्यंसत्यंपुनःसत्यंनासत्यंमम
भाषितम् ॥ ५ स्वर्गद्वारसमंतीर्थंनास्तिब्रह्मांडगोलके ॥ दिव्यान्यपिचभौमानितीर्थानिसकलान्यपि ॥ ६ ॥
प्रातरागत्यतिष्ठं[illegible] तत्रसंसृत्यपार्वति ॥ तस्मादत्रप्रकर्तव्यंप्रातःस्नानंविशेषतः ॥ ७ ॥ सर्वतीर्थावगाहस्य
फलप्राप्तिमर्भ[illegible]ता ॥ त्यजंतिप्राणिनः प्राणान्स्वर्गद्वारेतुयेनराः ॥ ८ ॥ प्रयांतिपरमंस्थानंविष्णोस्तेनात्रसं
शयः ॥ मुक्तिद्वारमिदंयस्मात्स्वर्गप्राप्तिकरंनृणाम् ॥ ९ ॥ स्वर्गद्वारमितिख्यातंतस्मात्तीर्थमनुत्तमम् ॥ स्वर्ग
द्वारंसुदुष्प्राप्यंदेवैरपिनसंशयः ॥ १० ॥ यद्यत्कामयतेतत्रतत्तदाप्नोतिमानवः ॥ स्वर्गद्वारेपरासिद्धिःस्वर्गद्वा

रेपरागतिः ॥ ११ ॥ जप्तंदत्तंहुतंपूर्तंतपस्तप्तंकृतंचयत् ॥ ध्यानमध्ययनंदानंसर्वंभवतिचाक्षयम् ॥ १२ ॥
जन्मांतरसहस्रेणयत्पापंसमुपार्जितम् ॥ स्वर्गद्वारंप्रविष्टस्यतत्सर्वंव्रजतिक्षयम् ॥ १३ ॥ ब्राह्मणाःक्षत्रियावै
श्याःशूद्रावैवर्णसंकराः ॥ कृमिम्लेच्छाश्चयेचान्येसंकीर्णाःपापयोनयः ॥ १४ ॥ कीटाःपिपीलिकाश्चैवयेचा
न्येपापयोनयः ॥ कालेननिधनंप्राप्ताःस्वर्गद्वारेशृणुप्रिये ॥ १५ ॥ कौमोदकीकराःसर्वेपद्माक्षागरुडध्वजाः ॥
शुभंविष्णुपुरंदिव्यंप्रयांतिभवनंनराः ॥ १६ ॥ अकामोवासकामोवाचापितिर्यग्गतोपिवा ॥ स्वर्गद्वारेत्य
जन्प्राणान्विष्णुलोकेमहीयते ॥ १७ ॥ मुनयोदेवताःसिद्धाःसाध्ययक्षामरुद्गणाः ॥ यज्ञोपवीतमात्रेणवि
भागंचक्रिरेभुवः ॥ १८ ॥ मध्याह्नेनप्रकुर्वंतिसान्निध्यंदेवतागणाः ॥ तस्मादत्रप्रकुर्वंतिमध्याह्नेस्नानमादरात्
॥ १९ ॥ कुर्वंत्यनशनंपेतुःस्वर्गद्वारेजितेंद्रियाः ॥ प्रयांतिपरमंस्थानंयेचमासोपवासिनः ॥ २० ॥ अन्नदानरताये
चरत्नदाभूमिदानराः ॥ गोवस्त्रदाश्चविप्रेभ्यस्तेयांतिपरमांगतिम् ॥ २१ ॥ यत्रसिद्धामहात्मानोमुनयःपितर
स्तथा ॥ स्वर्गेप्रयांतितेसर्वेस्वर्गद्वारंतुतत्स्मृतम् ॥ २२ ॥ चतुर्धाचतनुंकृत्वादेवदेवोहरिःस्वयम् ॥ अत्रैवरमते
नित्यंभ्रातृभिःसहराघवः ॥ २३ ॥ ब्रह्मलोकंपरित्यज्यचतुर्वक्त्रःसनातनः ॥ अत्रैवरमतेनित्यंदेवःसहपिता

महः॥२४॥मेरुमंदरतुल्योपिराशिःपापस्यकर्मणः ॥स्वर्गद्वारंसमासाद्यपापंव्रजतिसंक्षयम् ॥ २५ ॥ यागतिर्ज्ञा
नतपसांयागतिर्यज्ञयाजिनाम् ॥ स्वर्गद्वारेमृतानांतुसागतिर्विहिताशुभा॥२६॥ऋषिदेवासुरगणैर्जपहोमपराय
णैः॥यतिभिर्मोक्षकामैश्चस्वर्गद्वारोनिषेव्यते॥२७॥स्वर्गद्वारिमृतःकश्चिन्नरकंनैवपश्यति ॥ केशवानुगृहीताश्च
सर्वेयांतिपरांगतिम्॥२८॥भूलोकेचांतरिक्षेचदिवितीर्थानियान्यपि ॥ अतीत्यतानितिष्ठंतिकृतार्थास्तेद्विजात
यः ॥ २९ ॥ विष्णुभक्तिंसमासाद्यरमंतेतुसुनिश्चिताः ॥ नतेषांपुनरावृत्तिःकल्पकोटिशतैरपि ॥ ३० ॥ हन्य
मानोपियोविघ्नैर्वसेदेवशतैरपि ॥ सयातिपरमंस्थानंयत्रगत्वानशोचति ॥ ३१ ॥ स्वर्गद्वारेवियुज्येतसयातिप
रमांगतिम् ॥ उत्तरंदक्षिणंचापित्वयनेनविकल्पयेत् ॥ ३२ ॥ सर्वस्तेषांशुभःकालःस्वर्गद्वारेमृताश्चये ॥ स्वर्ग
द्वारेनरःस्नात्वादृष्ट्वाचंद्रंहरिंविभुम् ॥ ३३ ॥ वपनंतत्रकुर्वीतव्रतीतत्रविचक्षणः ॥ अयोध्यानिलयंविष्णुंज्ञात्वा
शीतांशुरुत्सुकः ॥ ३४ ॥ आगत्यतीर्थमाहात्म्यंसाक्षात्कर्तुंसुधानिधिः ॥ आगत्यचात्रचंद्रोथतीर्थपात्रंचका
रसः ॥ ३५ ॥ क्रमेणविधिपूर्वेणनानाश्चर्यसमन्वितः ॥ समाराध्यततोविष्णुस्तपसादुश्चरेणवै ॥ ३६ ॥ तत्प्र
त्यक्षंसमासाद्यस्वाभिधानपुरःसरम् ॥ हरिंसंस्थापयामासतेनचंद्रहरिःस्मृतः ॥ ३७ ॥ सत्यायांसप्रहरयोर्वर्तं

तेपुण्यवर्द्धनाः ॥ गुप्तहरिश्चक्रहरिस्तथाविष्णुहरिःप्रिये ॥ ३८ ॥ धर्महरिर्बिल्वहरिस्तथापुण्यहरिःशुभः ॥
एतेषांदर्शनाद्देविपुण्यवृद्धिःप्रजायते ॥ ३९ ॥ तस्माच्चंद्रहरेः पूजाकर्तव्याचविचक्षणैः ॥ द्विजपूजाचंद्रपूजाह
रिपूजाविधानतः ॥ ४० ॥ वासुदेवप्रसादेनतत्स्थानंजातमद्भुतम् ॥ तद्धिगुह्यतमंस्थानंवासुदेवस्यसुव्रते ॥४१॥
सर्वेषामेवभूतानांहितुमोक्षस्यसर्वदा ॥ तस्मिन्सिद्धाःसदाविप्रागोविंदव्रतमास्थिताः ॥ ४२ ॥ नानालिं
गधरानित्यंविष्णुलोकाभिकांक्षिणः ॥ अभ्यस्यंतिपरंयोगंमुक्तात्मानोजितेंद्रियाः ॥ ४३ ॥ यथाधर्ममिहा
प्नोतिनान्यथान्यत्रकुत्रचित् ॥ दानंव्रतंतथाहोमःसर्वमक्षयतांव्रजेत् ॥ ४४ ॥ सर्वकामफलावाप्तिर्जायतेप्रा
णिनांसदा ॥ तस्मात्तत्रप्रकर्तव्यंदानंचविविधंतुवै ॥ ४५ ॥ अन्नदानंभूमिदानंगजदानंगवांतथा ॥ अश्वदानं
रथानांचशिबिकायास्तथैवच ॥ ४६ ॥ दानादिकंविप्रपूजादंपत्योश्चविशेषतः ॥ ज्येष्ठेमासिसितेपक्षेपंचद
श्यांविशेषतः ॥ ४७ ॥ तस्यसांवत्सरीयात्रादेवैश्चंद्रहरेःस्मृता ॥ सर्वदेवावलोकस्ययत्पुण्यंजायतेनृणाम् ॥
॥ ४८ ॥ तत्सर्वंजायतेपुण्यंप्राणिनामस्यदर्शनात् ॥ तस्मादेतन्महास्थानंपुराणादिषुगीयते ॥ ४९ ॥ इति
श्रीरुद्रयामलेहरगौरीसंवादेस्वर्गद्वारमहिमाकथनंनामचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ॥ ॥

॥ पार्वत्युवाच ॥ कदाप्रभृतिदेवेशस्वर्गद्वारेविराजते ॥ तन्मेकथयभोशीघ्रंप्रतिष्ठाकेनतेकृता ॥ १ ॥ श्रीशंक
रउवाच ॥ शृणुप्रियेमयाख्यातंयदाप्रभृतिमेस्थितिः ॥ वैकुंठभुवनेयातेरामचन्द्रेपरात्मनि ॥ २ ॥ पुत्रंकु
शंकुशावत्यांराज्यंदत्वामहामतिः ॥ अयोध्यायांतदादेवास्तीर्थानिनिवसंतिहि ॥ ३ ॥ तदायोध्यास्वयं
गत्वाह्यर्द्धरात्रेकुशावतीम् ॥ एकाकीचकुशोयत्रसुष्वापनृपतिर्गृहे ॥ ४ ॥ दृष्ट्वायोध्यामुवाचाथकुतश्चागमनं
तव ॥ देवीवामानुषीवात्वंकिन्नरीवासिशोभने ॥ ५ ॥ रघूणांचकुलेजातःपरस्त्रीषुनगच्छति ॥ हेतुनाकेन
भोदेविह्यागतासिममालयम् ॥ ६ ॥ अयोध्योवाच ॥ तवपित्रामहाराजनीतामेपुरवासिनः ॥स्वपदंगंतुकामेन
स्वर्गंप्राप्ताश्चकोटिशः ॥ ७ ॥ समग्रशक्तौत्वयिभोसूर्यवंशविभूषणे ॥ अवस्थामीदृशींप्राप्तानारकैरपिवर्जि
ता ॥ ८ ॥ भग्नामेरचनासर्वाशास्तापिप्रभुनाविना ॥ अस्तसूर्यायथासंध्यावायुनामेघमंडले ॥ ९ ॥ ईदृशी
नकृताकैश्चित्तवपूर्वैर्महात्मभिः ॥ तवपित्रायथावत्समयिवासंकुरुष्वच ॥ १० ॥ कुशउवाच ॥ एवंवदसि
भोदेविनास्तिदोषःपितुर्मम ॥ तववासाद्गताः सर्वेलोकंसंतानकंजनाः ॥ ११ ॥ अयोध्योवाच ॥ यदिवासाद्ग
ताःसर्वेजनाः स्वर्गंनसंशयः ॥ यदिस्वर्गोबहुमतस्तवराजन्हिवर्तते ॥ १२ ॥ मयिवासंकुरुष्वेतिह्यंतर्धानंच

सागता॥व्यतीतायांनिशायांतुमंत्रिणस्तदपृच्छत ॥ १३ ॥ मंत्रिणामनुमत्याततत्पुरंब्राह्मणसात्कृतम्॥सैन्येन
महतासार्द्धमाजगामात्मनःपुरीम् ॥ १४ ॥ वासयामासनगरंयथायोग्यंमहामतिः ॥ एकदानावमारूढोविज
हारसखीजनैः ॥ १५ ॥ दृतिभिःसिच्यमानोसौविजहारनदीजले ॥ कुमुदोनामनागस्तुसरय्वांवसतेसदा
॥ १६ ॥ कुमुद्वतीचभगिनीतस्यनागस्यसुंदरी ॥ मोहितारूपमालोक्यजहारकरकंकणम् ॥ १७ ॥ कुशोनैव
विजानीतेक्रीडनासक्तमानसः ॥ कृत्वाविहारंतुजलाद्बहिर्निर्गत्यभूमिपः ॥ १८ ॥ नददर्शात्मनोहस्तेतद्वै
विजयकंकणम् ॥ अगस्त्येनपुरादत्तंरामायपरमात्मने ॥ १९ ॥ रामचंद्रस्तुपुत्रायदत्वास्वपदमन्वगात् ॥
शुशोचतस्यलाभायभूषणार्थंनराजरा ॥ २० ॥ जगृहेविशिखंतीक्ष्णमाग्निमंत्रेणमंत्रितम् ॥ तंदृष्ट्वासरयूदे
वीपादपद्ममुपागता ॥ २१ ॥ ब्रुवंतीत्राहित्राहीतिममदोषोनविद्यते ॥ कुमुदोनामनागस्तुभगिन्यातस्यत
द्धृतम् ॥ २२ ॥ तच्छुत्वाजगृहेबाणंगारुडंतद्वधायवै ॥ सर्पराजस्तुतंदृष्ट्वाभगिन्यासहपार्वति ॥ २३ ॥ पपात
चरणोपांतेकंकणंचसमर्पयत् ॥ क्षमस्वममदौरात्म्यंभगिन्यायत्कृतंनृप ॥ २४ ॥ श्रीशंकरउवाच॥कुमुदो
ममभक्तोहिनागराजःप्रियोमम ॥ तस्यकष्टंसमालोक्यप्रत्यक्षमभवंप्रिये ॥ २५ ॥ मांदृष्ट्वाकुशराजस्तुजग्रा

हचरणौमम ॥ उवाचप्रांजलिर्भूत्वाममागमनकारणम् ॥ २६ ॥ तदाहमब्रुवंराजन्भक्तरक्षार्थमागतः ॥ कुमु
द्वत्यस्यभगिनीपत्न्यर्थंप्रतिगृह्यताम् ॥ २७ ॥ वरंब्रूहिमहाराजमुंचनागंमहाबल ॥ कुशउवाच ॥ स्वर्गद्वारेस
दातिष्ठनागेश्वरप्रथामगाः ॥ २८ ॥ इत्युक्त्वापूजयामासपूजोपकरणैःसमम् ॥ ॐ नमःशिवायेतिमंत्रंचा
पिजजापसः ॥ २९ ॥ प्रत्युवाचजनान्राजाकुशाख्यःपंकजेक्षणः ॥ स्वर्गद्वारेनरःस्नात्वादृष्ट्वानागेश्वरंशिवम्
॥ ३० ॥ पूजयित्वासुविधिवत्सर्वान्कामानवाप्नुयात् ॥ स्वर्गद्वारेनरःस्नात्वापूजयेद्वृषभध्वजम् ॥ ३१ ॥ सं
पूर्णातस्यययात्रास्यादन्यथार्द्धफलप्रदा ॥ श्रीशंकरउवाच ॥ इत्युवाचकुशोराजाप्रविवेशगृहंस्वकम् ॥ ३२ ॥
मांससंपूज्यविधिवन्नागोपिस्वगृहंगतः ॥ तदाप्रभृतिभोदेविस्वर्गद्वारेवसाम्यहम् ॥ ३३ ॥ तस्माच्चंद्रहरेःस्था
नादाग्नेय्यांदिशिसंस्थितः ॥ देवोधर्महरिर्नामकलिकल्मषनाशनः ॥ ३४ ॥ पुरासमागतोधर्मस्तीर्थयात्राचि
कीर्षया ॥ आगत्यचचकारोच्चैर्यात्रांतत्रादरेणसः ॥ ३५ ॥ दृष्ट्वामाहात्म्यमतुलमयोध्यायाःसविस्मयः ॥
विधायसभुजावूर्ध्वमिदमाहमुदान्वितः ॥ ३६ ॥ अहोरम्यमिदंतीर्थमहोमाहात्म्यमुत्तमम् ॥ यस्यांस्थितोह
रिःसाक्षात्केनेयमुपमीयते ॥ ३७ ॥ सुबाहवेनमस्तुभ्यंचारुजंघायतेनमः ॥ सुमुखायसुदिव्यायसुविद्याय

गदाभृते ॥ ३८ ॥ अहोतीर्थानिसर्वाणिविष्णुलोकप्रदानिवै ॥ अहोविष्णुरहोतीर्थमयोध्यायामहापुरी ॥
॥ ३९ ॥ अहोमाहात्म्यमतुलंकिन्नश्लाघ्यमिहास्थितम् ॥ इत्युक्त्वातत्रबहुशोननर्तचमुदाकुलः ॥ ४० ॥
धर्मोमाहात्म्यमालोक्यत्वयोध्यायाविशेषतः ॥ तंतथानर्तनासक्तंधर्मंदृष्ट्वाकृपान्वितः ॥ ४१ ॥ आविर्बभू
वभगवान्पीतवासाहरिःस्वयम् ॥ तंप्रणम्याथधर्मोपितुष्टावहरिमादरात् ॥ ४२ ॥ धर्मउवाच ॥ नमःक्षीरा
ब्धिवासायशेषपर्यंकशायिने॥नमोलक्ष्म्यंगसंस्पृष्टदिव्यपादायविष्णवे ॥ ४३ ॥ भक्तार्तिनिघ्नपादायनमो
योगप्रियायते ॥ शुभांगायसुनेत्रायमाधवायनमोनमः ॥ ४४ ॥ नमोरविंदपादायपद्मनाभायतेनमः ॥ नमः
क्षीराब्धिकल्लोलस्पृष्टगात्रायशार्ङ्गिणे ॥ ४५ ॥ ओंनमोयोगनिद्राययोगज्ञभावितात्मने ॥ तार्क्ष्यासनायदे
वायगोविंदायनमोनमः ॥ ४६ ॥ सुकेशायसुनासायसुललाटायचक्रिणे ॥ सुवस्त्रायसुवर्णायश्रीधरायन
मोनमः ॥ ४७ ॥ सुबाहवेनमस्तुभ्यंचारुजंघायतेनमः ॥ सुमुखायसुदिव्यायसुविद्यायगदाभृते ॥ ४८ ॥
केशवायचशांतायवामवायनमोनमः ॥ धर्मप्रियायदेवायनमस्तेपीतवाससे ॥ ४९ ॥ श्रीशंकरउवाच ॥ इति
स्तुतोजगन्नाथोधर्मेणश्रीपतिर्मुदा ॥ उवाचसहृषीकेशःप्रीतोधर्ममुदारधीः ॥५०॥ तुष्येहंभवतोधर्मस्तोत्रेणाने

नसुव्रत ॥ वरंवरयधर्मज्ञयस्तेस्यान्मनसःप्रियः ॥ ५१ ॥ स्तोत्रेणानेनयःस्तौतिमानवोमामतंद्रितः ॥ सर्वा
न्कामानवाप्नोतिपूजितःश्रीयुतःसदा ॥ ५२ ॥ धर्मउवाच ॥ यदितुष्टोसिमेदेवदेवदेवजगत्पते ॥ त्वामहंस्था
पयाम्यत्रनिजनाम्नाजगद्गुरो ॥ ५३ ॥ श्रीभगवानुवाच ॥ एवमस्तुभवत्वत्रनाम्नाधर्महरिर्विभुः ॥ स्मरणा
देवयस्यस्यात्सर्वकिल्बिषसंक्षयः ॥ ५४ ॥ श्रीशंकरउवाच ॥ एवमुक्तस्ततोधर्मोदेवदेवेनसादरम् ॥ स्थापया
मासविधिवन्नाम्नाधर्महरिंविभुम् ॥ ५५ ॥ सरयूसलिलेस्नात्वाशुचिस्तद्गतमानसः ॥ देवंधर्महरिंपश्येत्सर्वपा
पैःप्रमुच्यते ॥ ५६ ॥ अत्रदानंतथाहोमोजपोब्राह्मणभोजनम् ॥ सर्वमक्षय्यतांयातिविष्णुलोकनिवासकृत् ॥
॥ ५७ ॥ अज्ञानाज्ज्ञानतोवापियत्किंचिद्दुष्कृतंकृतम् ॥ प्रायश्चित्तंविधातव्यंमत्परेणप्रयत्नतः ॥ ५८ ॥ प्राय
श्चित्तेनविधिनापापंतस्यप्रणश्यति ॥ तस्मादत्रप्रकर्तव्यंप्रायश्चित्तंविधानतः ॥ ५९ ॥ प्रमादालस्यतोवापि
राजदेवग्रहार्तिभिः ॥ नित्यकर्मनिवृत्तिःस्यादस्यपुंसोऽवशात्मनः ॥ ६० ॥ तेनाथात्रविधातव्यंप्रायश्चितं
विधानतः ॥ अत्रसाक्षात्स्वयंदेवोविष्णुर्वसतिसादरः ॥ ६१ ॥ तस्माद्वर्णयितुंशक्योमहिमानहिमानवैः ॥ आ
षाढेशुक्लपक्षस्यचैकादश्यांसुलोचने ॥ ६२ ॥ तस्यसांवत्सरीयात्राकर्तव्यातुविधानतः ॥ विष्णुलोकमवाप्नोति

नरोयात्राविधानतः ॥ ६३ ॥ स्वर्गद्वारेनरःस्नात्वादृष्ट्वाधर्महरिंविभुम् ॥ सर्वपापविशुद्धात्माविष्णुलोकेवसेत्सदा ॥ ६४ ॥ तस्मादीशानकोणेतुजानकीतीर्थमुत्तमम् ॥ श्रावणस्यतृतीयायांशुक्लायांचविशेषतः ॥ ६५ ॥ तस्यसांवत्सरीयात्राकर्तव्यासुविचक्षणैः ॥ अत्रदानंतथाहोमोजपोब्राह्मणभोजनम् ॥ ६६ ॥ सर्वमक्षय्यतांयातिविष्णुलोकेवसेत्सदा ॥ तस्माद्दक्षिणकोणेतुरामतीर्थमनोहरम् ॥ ६७ ॥ ॥ इतिश्रीरुद्रयामलेहरगौरीसंवादे अयोध्यामाहात्म्यं नाम पंचमोऽध्यायः ॥ ५ ॥ ॥ ॥ ॥

॥ श्रीशंकरउवाच ॥ तस्माद्दक्षिणदिग्भागेस्वर्गद्वाराच्चपार्वती ॥ अयोध्यापीठमितिसाख्याताभूर्नगनंदिनी ॥ १ ॥ क्रोशमात्रंतुविस्तारश्चतुर्दिक्षुप्रमाणतः ॥ तन्मध्येचसभारम्यारामचंद्रस्यशोभने ॥ २ ॥ अनेकाश्चर्यसंयुक्तानानाधातुविचित्रिता ॥ कुबेरस्यचशक्रस्ययमस्यवरुणस्यवा ॥ ३ ॥ यादृशीरामचंद्रस्यसभाद्यापिनविद्यते ॥ मेरुमंदरतुल्योपिराशिःपापस्यकर्मणः ॥ ४ ॥ तत्क्षणान्नाशमाप्नोतिसभागृहविलोकनात् ॥ जन्मांतरसहस्रेषुयत्पापंसमुपार्जितम् ॥ ५ ॥ तत्सर्वंनाशमायातिसभागृहविलोकनात् ॥ तस्मिन्सभागृहेरम्येसर्वंदेवनमस्कृते ॥ ६ ॥ राजकार्यंचकुरुतेभ्रातृभिःसहराघवः ॥ उलूकगृध्रयोश्चापिशुनःसंन्यासिनःस्तथा ॥ ७ ॥

चकारन्यायंधर्मात्मावसिष्ठादिभिरन्वितः ॥ तत्रपूजाप्रकर्तव्याराघवाणांमहात्मभिः ॥ ८ ॥ जायतेपुण्यवृद्धि
श्चराघवेंद्रस्यदर्शनात् ॥ तस्मिन्सभागृहेरम्येसर्वदेवमनोहरम् ॥९॥ नाम्नालोकेचविख्यातंदंतधावनकुंडकम् ॥
यत्रस्नानेनदानेनगर्भवासक्षयोभवेत् ॥ १० ॥ नित्यदारामचंद्रस्तुतत्रागत्यवरानने ॥ दंतधावनकंभद्रेकुरु
तेभ्रातृभिः सह ॥ ११ ॥ कौंडिन्योब्राह्मणःकश्चिदेकदात्रसमागतः ॥ स्नानंकृत्वातटेचास्यध्यानतत्परमा
नसः ॥ १२ ॥ वायुनाप्रेरितंतस्यद्विजस्यतुमृगाजिनम् ॥दंतधावनकुंडस्यजलेनिपतितंशुभे ॥ १३ ॥ जलस्या
स्यप्रभावात्तुदिव्यरूपमपद्यत ॥ विमानवरमारूढोह्यप्सरोभिःसमन्वितः ॥ १४ ॥ चामरैर्वीज्यमानश्चवैजयं
त्याविभूषितः॥वीक्ष्यलोकाविमानस्थंविस्मयंपरमंगताः ॥ १५ ॥ तदारामःस्वयंजानन्ज्ञापयन्सर्वतोजनान् ॥
पप्रच्छदिव्यरूपंतंसुरंपरमधार्मिकः ॥ १६ ॥ कस्त्वंदिव्यवपुःप्राप्तःकस्मात्त्वंमृगतांगतः ॥ कथंसुरस्त्रीसहितः
किंचिकीर्षसितद्वद ॥ १७ ॥ रामस्यवचनंश्रुत्वादेवःप्रोवाचराघवम् ॥ तवाज्ञातंनसर्वत्रबाह्याभ्यंतरचारिणः ॥
॥ १८ ॥ तथापिपृच्छतेतुभ्यंकथयामियथातथम् ॥ अहंपुराभवेवैश्योजात्यारघुकुलोद्भव ॥१९॥ आचरन्प्रति
कूलंतुवेदस्यरघुनंदन ॥ धनगर्वेणभोदेवनियमव्रतवर्जितः ॥ २० ॥ स्नानदानादिरहितोवेश्याजनरतःसदा ॥

एकदातुलसीवृंदेजलंदत्तमजानता ॥ २१ ॥ तेनपुण्यप्रभावेणमृगत्वंगतवानहम् ॥ चर्ममेसाधुसंगेनकौशलेय
समागतम् ॥ २२ ॥ जलस्यास्यप्रभावेणदंतधावनकुंडके ॥ दिव्यंवपुर्मनोहारिलब्धंतवप्रसादतः ॥ २३ ॥ आ
ज्ञापयमहाबाहोत्वत्प्रसादादहंप्रभो ॥ गच्छामिशाश्वतंस्थानंतवदुःखादिवर्जितम् ॥ २४ ॥ नयत्रशोकोनजरा
नमृत्युःकालविभ्रमः ॥ तत्स्थानंदेवगच्छामित्वत्प्रसादाद्रघूत्तम ॥ २५ ॥ इत्युक्त्वातंपरिक्रम्यविमानवरमारु
हत् ॥ अनेकरत्नरचितंसर्वदेवैस्सुवंदितम् ॥ २६ ॥ गतोसौशाश्वतंस्थानंरामपादप्रसादतः ॥ पुनरावृत्तिरहि
तंशोकमोहविवर्जितम् ॥ २७ ॥ चैत्रशुक्लनवम्यांतुयात्रासांवत्सरीभवेत् ॥ सभायाःपश्चिमेभागेरामदुर्गस्तुवि
द्यते ॥ २८ ॥ पार्वत्युवाच ॥ भगवन्रामचन्द्रस्यपुर्यांसर्वेसमागताः ॥ वानराराक्षसाश्चैवतेषांस्थानानिमेव
द ॥ २९ ॥ श्रीशंकरउवाच ॥ राजद्वारेहनूमान्वैबायुपुत्रस्तुतिष्ठति ॥ तथातिष्ठतिसुग्रीवोदक्षिणेचहनूमतः
॥ ३० ॥ सुग्रीवस्यसमीपेतुह्यंगदोपिविराजते ॥ दुर्गस्यदक्षिणेद्वारेनलनीलौप्रतिष्ठितौ ॥ ३१ ॥ सुषेणोवानर
श्रेष्ठोनवरत्नस्यपूर्वतः ॥ नवरत्नादुत्तरेतुगवाक्षोनामवानरः ॥ ३२ ॥ दुर्गस्यपश्चिमेद्वारेदधिवक्रस्तुतिष्ठति ॥
दुर्गेश्वरेतिनाम्नाहंतस्मिन्द्वारेव्यवस्थितः ॥ ३३ ॥ ततःशतवलिर्वीरस्तदग्रेगंधमादनः ॥ ऋषभःशरभश्चैव

पनसोपिविराजते ॥ ३४ ॥ उत्तरेद्वारदेशेतुराजतेचविभीषणः ॥ विभीषणस्यमहिषीसरमानामराक्षसी ॥
॥ ३५ ॥ पूर्वेविभीषणस्यापिसदातिष्ठतिपूजिता ॥ रक्षणंधर्मशीलानांभक्षणंदुष्टचेतसाम् ॥ ३६ ॥ करोतिस
रमानित्यंकोशलायांप्रहर्षिता ॥ ततोविघ्नेश्वरोदेवःपूर्वभागेचतिष्ठति ॥ ३७ ॥ यस्यदर्शनतोनॄणांविघ्नलेशो
नजायते ॥ तस्मात्पूर्वदिशोभागेवीरःपिंडारकोबली ॥ ३८ ॥ कोशलारक्षणेदक्षोदुष्टताडनतत्परः ॥ ततःपू
र्वदिशोभागेवीरस्यशुभशंसिनः ॥ ३९ ॥ स्थानंमतंगजेंद्रस्यवर्ततेनियतात्मनः ॥ तदग्रेसरसिस्नात्वापूजांकु
र्याद्विचक्षणः ॥ ४० ॥ पूर्णांसिद्धिमवाप्नोतियामवाप्यनशोचति ॥ अयोध्यारक्षकोवीरःसर्वकामार्थसिद्धिदः ॥
॥ ४१ ॥ नवरात्रिषुपंचम्यांयात्रासांवत्सरीभवेत् ॥ गंधपुष्पादिधूपैश्चनैवेद्यैश्चविधानतः ॥ ४२ ॥ पूजनीयः
प्रयत्नेनसर्वकामार्थसिद्धिदः ॥ यंयंकाममिहेच्छेततंतंकाममवाप्नुयात् ॥ ४३ ॥ मंगलेमंगलेयात्रातस्ययस्या
त्प्रतिमासिकी ॥ ततःपूर्वदिशोभागेद्विविदोपिविराजते ॥ ४४ ॥ ईशानकोणकेमंदोबुद्धिमानवतिष्ठति ॥
ततोदक्षिणदिग्भागेजांबवांस्तुविराजते ॥ ४५ ॥ तस्माद्दक्षिणतोवीरःकेशरीचविराजते ॥ दुर्गभित्तौसदाह्येते
रक्षांकुर्वंतिवानराः॥४६॥राजद्वारेहनूमांस्तुवायुपुत्रोमहाबलः ॥ महावीरइतिख्यातःसर्वलोकेषुपूजितः ॥४७॥

तस्यपूजाप्रकर्तव्यानरैर्नारीभिरेवच ॥ स्थानाद्धनूमतश्चापि पूर्वस्यांदिशिवर्तते ॥ ४८ ॥ हनुमत्कुंडमितितत्ख्यातंसर्वार्थदंनृणाम् ॥ अंजनीनंदनोयत्रवांछितार्थप्रदायकः ॥ ४९ ॥ मंगलेमंगलेदेवियात्रास्यात्प्रतिमासिकी ॥ तस्मिन्कुंडेनरःस्नात्वापूजयेद्वायुनंदनम् ॥ ५० ॥ तस्यदर्शनमात्रेणकरस्थाःसर्वसिद्धयः ॥ अंजनीनंदनंदेवंजानकीशोकनाशनम् ॥५१॥ कपीशमक्षहंतारंवंदेलंकाभयंकरम् ॥ इतिमंत्रंसमुच्चार्यप्रणमेद्दंडवत्सुधीः ॥ ५२ ॥ धूपंदीपंचनैवेद्यंदत्वाचैवविधानतः ॥ ततःप्रविश्यदुर्गंतुपूजयेद्रत्नमंडपम् ॥ ५३ ॥ इति श्रीरुद्रयामलेहरगौरीसंवादे अयोध्यामाहात्म्येषष्ठोऽध्यायः ॥ ६ ॥ ॥ ॥ ॥ ॥

॥ श्रीशंकरउवाच ॥ अयोध्यानगरेरम्येरत्नमंडपमध्यगे ॥ ध्यायेत्कल्पतरोर्मूलेरत्नसिंहासनंशुभम् ॥ १ ॥ महामरकतप्रख्यंनानारत्नैश्चमंडितम् ॥ सिंहासनंचित्तहरंकांत्यातामिस्रनाशनम् ॥ २ ॥ तस्योपरिसमासीनंरघुराजंमनोहरम् ॥ ध्यायेत्कमलपत्राक्षंजानकीसहितंहरिम् ॥३॥ चंदनागरुकर्पूरवासितेरत्नमंडपे ॥ तन्मध्येकल्पवृक्षस्यच्छायायांपरमासने ॥ ४ ॥ नानारत्नमयेदिव्येसौवर्णेसुमनोहरे ॥ तस्मिन्बालार्कसंकाशेपंकजेष्टदलेशुभे ॥ ५ ॥ वीरासनेसमासीनंवामांकेसीतयासह ॥ सुस्निग्धंशाद्वलश्यामंकोटिवैश्वानरप्रभम्

॥ ६ ॥ युवानंपद्मनयनंकंबुग्रीवंमहाहनुम् ॥ विशालाक्षंसुसंरक्तंहस्तपादतलंशुभम् ॥ ७ ॥ बंधूकपुष्पसंकाशं
स्निग्धोष्ठद्वयशोभितम् ॥ पूर्णचंद्राननंस्निग्धनयनंचारुनासिकम्॥८॥करभोरुकमानीलकुंतलंस्मितसुंदरम् ॥
तरुणादित्यसंकाशंकुंडलाभ्यांविराजितम् ॥ ९ ॥ हारकेयूरकटकैरंगुलीयकभूषणैः ॥ श्रीवत्सकौस्तुभाभ्यां
चवैजयंत्याविभूषितम् ॥ १० ॥ हरिचंदनलिप्तांगं कस्तूरीतिलकांचितम् ॥ वरदाभयहस्ताभ्यांराजमानंमनोह
रम् ॥ ११ ॥ वामांकेसुस्थितांसीतांतप्तकांचनसन्निभाम् ॥ पद्माक्षींपद्मवदनांनीलकुंचितमूर्द्धजाम्॥१२॥सिंह
स्कंधस्वरूपांचकंबुकंठींसुलोचनाम् ॥ हरिचंदन.लिप्तांगींकस्तूरीतिलकांचिताम् ॥१३॥ तरुणादित्यसंकाशां
ताटंकद्वयमंडिताम् ॥ आरूढयौवनांनित्यंपीनोन्नतपयोधराम् ॥ १४ ॥ पश्चिमेलक्ष्मणंध्यायेद्धृतच्छत्रंमहाब
लम् ॥ पार्श्वेभरतशत्रुघ्नौवालव्यजनपाणिकौ ॥ १५ ॥ अग्रतश्चहनूमंतंबद्धांजलिपुटंमुदा ॥ सुग्रीवंजांबवंतं
चसुषेणंचविभीषणम् ॥ १६ ॥ नीलंनलंचांगदंचऋषभंदिक्षुपूजयेत् ॥ वसिष्ठंवामदेवंचजाबालिमथकाश्य
पम् ॥ १७ ॥ मार्कंडेयंचमौद्गल्यंतथापर्वतनारदौ ॥ धृष्टंजयंतंविजयंसुराष्ट्रंराष्ट्रवर्द्धनम् ॥ १८ ॥ अशोकंधर्मपा
लंचसुमंत्रंचाष्टमंत्रिणः ॥ इंद्रादिलोकपालांश्चदेवान्सर्वान्व्यवस्थितान् ॥ १९ ॥ विमानस्थांश्चसर्वत्रह्याका

शेतुविचक्षणः ॥ एवंध्यात्वानरोधीमान्मंत्रेणानेनपूजयेत् ॥ २० ॥ ॐ रामायनमोह्येषतारकोब्रह्मरूपकः ॥
नाम्नांविष्णोःसहस्राणामधिकोयंमहामनुः ॥ २१ ॥ अनंताभगवन्मंत्रानानेनसमतांगताः ॥ अस्यश्रवण
णमात्रेणसर्वएवदिवंगताः ॥ २२ ॥ धूपंदीपंचनैवेद्यंपुष्पंचंदनकंतथा ॥ मंत्रेणानेनवैकुर्यान्नत्वास्तोत्रमुदीर
येत् ॥ २३ ॥ राघवेंद्रमहाराजरावणांतकभोच्युत ॥ कामादिभिःपराभूतंरक्षमांशरणागतम् ॥ २४ ॥ रामा
यरामभद्रायरामचंद्रायवेधसे ॥ रघुनाथायनाथायसीतायाःपतयेनमः ॥ २५ ॥ संप्राप्यनगरींदिव्यामभि
षिक्तायसीतया ॥ राजेश्वराधिराजायसीतायाःपतयेनमः ॥ २६ ॥ ब्रह्मादिदेवदेवायब्रह्मण्यायमहात्मने ॥
जानकीप्राणनाथायरामभद्रायतेनमः ॥ २७ ॥ विभीषणश्चसुग्रीवोरक्षितौशरणागतौ ॥ तथामांदेवदेवेशपादौ
तेप्रणतोस्म्यहम् ॥ २८ ॥ एवंस्तुतिंविधायाथदत्वाचमहतींश्रियम् ॥ प्रणम्यदंडवद्भूमौसर्वान्कामानवा
प्नुयात् ॥ २९ ॥ पुत्रार्थीपुत्रमाप्नोतिधनार्थीधनमाप्नुयात् ॥ मोक्षार्थीमोक्षमाप्नोतितत्किंयदिहनाप्यते ॥ ३० ॥
तस्मादुत्तरदिग्भागेस्थानंचैवमनोहरम् ॥ सीतायाभवनंदिव्यंनाम्नाकनकमंडपम् ॥ ३१ ॥ यत्रवैजानकीदेवी
सखीभिः परिवारिता ॥ तत्रगत्वानरोधीमान्पूजांचैवतुकारयेत् ॥ ३२ ॥ धूपंदीपंचनैवेद्यंमंत्रेणानेनकारये

३

त् ॥ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम् ॥ ३३ ॥ ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम् ॥ संपूज्यविधि
वद्दत्वादानानिचमहामतिः ॥ स्तुतिःप्रसन्नचित्तेनकर्तव्याचविचक्षणैः ॥ ३४ ॥ वंदेविदेहतनयापदपुंडरीकं
कैशोरसौरभसमाहतयोगिचित्तम्॥हंतुंत्रितापमनिशंमुनिहंससेव्यंसन्मानसालिपरिपीतपरागपुंजम् ॥ ३५ ॥
एवंसंपूज्यविधिवज्जन्मभूमिंव्रजेन्नरः॥विघ्नेश्वरात्पूर्वभागेवसिष्ठाच्चोत्तरेतथा ॥३६॥ लोमशात्पश्चिमेभागेजन्म
स्थानंतुतत्स्मृतम्॥धनुःपंचाशतादूर्ध्वंस्थानंवैलोमशस्थलात् ॥३७॥विघ्नेश्वरात्सहस्राष्टावुन्मत्ताच्चधनुःशतम्॥
मध्येतुराजभवनंब्रह्मणानिर्मितंस्थलम् ॥ ३८ ॥ जन्मस्थानमिदंप्रोक्तंमोक्षादिफलदायकम् ॥ यदृष्ट्वाचमनुष्य
स्यगर्भवासक्षयोभवेत् ॥ ३९ ॥ विनादानेनतपसाविनातीर्थैर्विनामखैः ॥ नवमीदिवसेप्राप्तेव्रतधारीतुमान
वः ॥ ४० ॥ स्नानदानप्रभावेणमुच्यतेजन्मबंधनात् ॥ कपिलागोसहस्रंचयोददातिदिनेदिने ॥४१॥ तत्फलंसम
वाप्नोतिजन्मभूमेः प्रदर्शनात् ॥ जन्मांतरसहस्रेणयत्पापंसमुपार्जितम् ॥ ४२ ॥ सत्सर्वनाशमायातिजन्मभू
मेःप्रदर्शनात् ॥ मातापित्रोर्गुरूणांचभक्तिमुद्वहतांनृणाम् ॥ ४३ ॥ तत्फलंसमवाप्नोतिजन्मभूमेःप्रदर्शनात् ॥
पार्वत्युवाच ॥ भगवन्योगिनांश्रेष्ठनवम्यास्त्वंफलंवद ॥ ४४ ॥ व्रतस्यकरणेवापिकोविधिस्तत्रकार्यते ॥

पापानांप्रलयंकस्यचकारनवमीव्रतम् ॥ ४५ ॥ श्रीशंकरउवाच ॥ ततोहंकथयिष्यामिपृष्टोस्मिचयतस्त्व
या ॥ यस्यांहिजन्मरामस्यपूर्णस्यपरमात्मनः ॥ ४६ ॥ चैत्रेमासिसितेपक्षेनवम्यांचपुनर्वसौ ॥ ततोमध्याह्न
समयेकौसल्यासुषुवेसुतम् ॥ ४७ ॥ ततोदेवाःसगंधर्वाःसिद्धाश्चारणगुह्यकाः ॥ दिव्यतूर्याण्यवाद्यंतमुदिता
यत्रतत्रह ॥ ४८ ॥ चिंतामणिर्मणीनांतुवृक्षाणांकल्पवृक्षवत् ॥ व्रतानामपिसर्वेषांतथावैनवमीव्रतम् ॥ ४९ ॥
येकुर्वंतिव्रतंदेविनवमींमुक्तिदायिनीम् ॥ महोत्सवंतथापूजांतेपियांतिपरांगतिम् ॥ ५० ॥ देवानांकार्यसिद्ध्य
र्थंसाधूनांरक्षणायच ॥ वधार्थंयातुधानानामवतीर्णःस्वयंहरिः ॥ ५१ ॥ चैत्रेमासिनवम्यांतुजातोरामःस्वयंह
रिः ॥ पुनर्वस्वृक्षसंयुक्तासातिथिःसर्वकामदा ॥ ५२ ॥ श्रीरामनवमीप्रोक्तासूर्यकोटिशताधिका ॥ चैत्रेशुक्ला
तुनवमीपुनर्वसुयुतायदि ॥ ५३ ॥ तस्मिन्दिनेमहापुण्येराममुद्दिश्यभक्तितः॥यत्किंचित्क्रियतेकर्मतद्भवक्षय
कारकम् ॥ ५४ ॥ उपोषणंजागरणंराममुद्दिश्यतर्पणम् ॥ तस्मिन्दिनेतुकर्तव्यंब्रह्मप्राप्तिमभीप्सुभिः॥५५॥
रामएवपरंब्रह्मतद्दिनंरामतोषकम् ॥ उपोषणंजागरणंतस्मात्कुर्याद्विशेषतः ॥ ५६ ॥ यस्तुरामनवम्यांतुभुं
क्तेमोहाद्विमूढधीः ॥ कुंभीपाकेषुघोरेषुपच्यतेनात्रसंशयः ॥ ५७॥ यस्तुरामनवम्यांवैनियतस्तर्पयेत्पितॄन् ॥

तेसर्वेंतत्क्षणाद्देवियांतिविष्णोःपरंपदम् ॥ ५८ ॥ यस्तुरामनवम्यांतुदद्याद्वित्तानुसारतः ॥ यत्किंचिदपित
त्सर्वंमहादानसमंभवेत् ॥ ५९ ॥ धन्योलोकोव्रतपरोरामनामपरायणः ॥तिथिर्धन्याचनवमीयस्यांजातोहरिः
स्वयम् ॥ ६० ॥ येनवमीव्रतपरामहोत्सवरताश्चये ॥ गतिंभागवतींयांतिचाक्षयांसुरसेविताम् ॥ ६१ ॥ यस्तु
रामनवम्यांतुकुर्याद्रामव्रतंयदि॥तुलापुरुषदानादिफलंप्राप्नोतिमानवः ॥ ६२ ॥ सूर्यग्रहेकुरुक्षेत्रेमहादानैःकृतैर्हु
तैः॥तत्फलंसमवाप्नोतिश्रीरामनवमीव्रतात् ॥ ६३ ॥ कुर्याद्रामनवम्यांवैह्युपवासमतंद्रितः॥मातुर्गर्भमवाप्नोति
नैवरामोभवेत्स्वयम् ॥ ३४ ॥ नवमीचाष्टमीयुक्तावर्ज्याविष्णुपरायणैः ॥ उपोषणंनवम्यांतुदशम्यांचैवपार
णम् ॥ ६५ ॥ इतिश्रीरुद्रयामलेहरगौरीसंवादे अयोध्यामाहात्म्येसप्तमोऽध्यायः ॥ ७ ॥ ॥ ॥
श्रीशंकरउवाच ॥ जन्मस्थानंनरःप्राप्यकुर्याद्रामस्यपूजनम् ॥ सौवर्णंराजतंवापिकारयेद्रघुनंदनम्॥१॥मातु
रंकशयंराममिंद्रनीलमणिप्रभम् ॥ कोमलांगंविशालाक्षंविद्युद्वर्णांबरावृतम् ॥ २ ॥ भानुकोटिप्रतीकाशंकिरी
टेनविराजितम् ॥ रत्नग्रैवेयकेयूररत्नकुंडलमंडितम् ॥ ३ ॥ रत्नकांचनमंजीरकटिसूत्रैरलंकृतम् ॥ श्रीवत्सकौ
स्तुभोरस्कंमुक्ताहारोपशोभितम् ॥ ४ ॥ सौवर्णेराजतेपात्रेषट्कोणंचैवसंलिखेत् ॥ अलाभेबिल्वपीठेवास्था

पयेद्रघुनंदनम् ॥ ५ वस्त्रद्वयसमायुक्तंदिव्यरत्नविभूषितम् ॥ अत्रशक्तिसमायुक्तंदेवेशंपूजयेत्क्रमात् ॥ ६ ॥
प्रणवंपूर्वमुच्चार्यनमःशब्दंततोवदेत् ॥ भगवत्पदमाभाष्यवासुदेवायइत्यपि ॥ ७ ॥ इतिमंत्रेणतन्मध्येकु
र्यात्पुष्पांजलिंपुनः ॥ एवंसंपूजयेत्पीठंदेवमावाह्यपूजयेत् ॥ ८ ॥ अर्घादिधूपदीपंतानुपचारान्विधायच ॥
ततोनुज्ञाप्यदेवेशंपरिवारांश्चपूजयेत् ॥ ९ ॥ प्रथमंषट्सुकोणेषुहृदयादीनिषट्क्रमात् ॥ मूलमंत्रेणकर्तव्या
उपचाराश्चषोडश ॥ १० ॥ इंद्रादींल्लोकपालांश्चवसिष्ठादिमुनीनपि ॥ सर्वदिक्पालमंत्रेणपूजयेद्भक्तिसंयुतः
॥ ११ ॥ अशोककुसुमैर्युक्तमर्घ्यंदेवायचार्पयेत् ॥ दशाननवधार्थायधर्मसंस्थापनायच ॥ १२ ॥ दानवानां
विनाशायदैत्यानांनिधनायच ॥ परित्राणायसाधूनांजातोरामःस्वयंहरिः ॥ १३ ॥ गृहाणार्घ्यंमयादत्तंभ्रातृभिः
सहितोनघ ॥ प्रतियामंविशेषेणअर्चयेद्रघुनंदनम् ॥ १४ ॥ पुराणैस्तोत्रपाठैश्चवेदपारायणेनच ॥ नृत्यैर्गी
तैश्चवाद्यैश्चरात्रिशेषंव्यपोह्यच ॥ १५ ॥ प्रातःस्नात्वाचसावित्रींजप्त्वासंध्यामुपासयेत् ॥ षडक्षरेणमंत्रेणदे
वेशंमनसास्मरेत् ॥ १६ ॥ देवदेवंप्रणम्याथपूर्ववत्पूजयेत्सुधीः ॥ नवम्यांपूजनंतुभ्यंरामस्योदाहृतंमया ॥
॥ १७ ॥ माहात्म्यंकथयिष्यामिसेतिहासंपुरातनम् ॥ मरुकांतारदेशेचबभूवुः पंचपापिनः ॥ १८ ॥ एकस्तु

तैलकारोहिलुंपकेतिचकथ्यते ॥ तंतुकारोद्वितीयस्तुनाम्नाशंकुरितिस्मृतः ॥ १९ ॥ तृतीयस्तुनटोनाम्ना
लुंठकोसावुदाहृतः ॥ चतुर्थोधीवरोदुष्टोनाम्नालोकेषुजंतुहा ॥ २० ॥ पंचमःकुंभकारस्तुधर्महेतिप्रथामगा
त् ॥ पंचग्रामेषुपंचानामेकत्रास्थितिरन्वभूत् ॥ २१ ॥ तैलकारणगोदोषोबभूवतैलपीडने ॥ इतिदोषश्चरैर्ज्ञा
त्वाराज्ञाग्रामाद्बहिः कृतः ॥ २२ ॥ तंतुकारस्तुभार्यायामनुजस्यैवसंगकृत् ॥ नटश्चपथिकान्सर्वान्सदालुंठति
कानने ॥ २३ ॥ धनुर्बाणधरःपापीतंतुकारगृहेस्थितः ॥ नृपतिस्तौगृहीत्वाचयष्टिघातानकारयत्॥२४॥धीवरः
कुंभकारश्चसदाचौर्यपरायणौ ॥ राजलोकैर्गृहीतौचकदाचिच्चौर्यकर्मणि ॥ २५ ॥ बद्धानीतौनृपस्याग्रेपापि
नौपरतापिनौ ॥ विमलात्मेतिराजर्षिर्देहभंगंनचाकरोत् ॥ २६ ॥ एषराज्ञांपरोधर्मश्चौराणांमारणंतुयत् ॥ ज्ञा
निनाचमतेनैवतस्माद्राज्ञाविमोचितौ ॥ २७ ॥ देहभेदेनयोदंडःकर्तव्योविदुषानहि ॥ वपनंद्रविणादानंदेशा
न्निर्यापणंतथा ॥ २८ ॥ एषोहिसर्वदुष्टानांवधोनान्योस्तिदैहिकः ॥ तैलकारस्तंतुकारोनटश्चकुंभकारकः ॥
॥ २९ ॥ धीवरोपिमहापापीपंचानांमेलनंवने ॥ बभूवपापिनांदैवाद्धिंस्रानांपरतापिनाम् ॥ ३० ॥ ग्राममाग
त्यपंचैतेचौर्यंकुर्वंतिनित्यशः ॥ मुषित्वाद्रव्यमुरुचपलायंतिपुनःपुनः ॥ ३१ ॥ ग्रामांतरंपुनर्गत्वातत्रचौर्यंचच

क्रिरे ॥ तस्मिन्देशेचयेग्रामालुंठिताश्चैवपापिभिः ॥ ३२ ॥ मुषित्वाबहुलंद्रव्यंवेश्याभोगपरायणाः ॥ मद्य
पानरताश्चैवमांसाहारोपजीविनः ॥ ३३ ॥ गोविप्रसुरसाधूनांसदानिंदापरायणाः ॥ एवंतेपापिनोराज्ञास्वदे
शाच्चनिराकृताः ॥ ३४ ॥ राज्ञानिराकृताःसर्वैर्दुःखितास्तेतदाभवन् ॥ देशाद्देशांतरंगत्वानपुनःशर्मलेभिरे ॥
॥ ३५ ॥ किंकुर्मोथक्कगच्छामोजल्पंतश्चमुहुर्मुहुः ॥ भ्रमंतएवतेसर्वैर्नानादेशेचपामराः ॥ ३६ ॥ चक्रुरेनां
सितेसर्वैर्लोकेनानाविधानिच ॥ पापेनदुःखिताःसर्वेमुहुर्ग्लानिंचलेभिरे ॥ ३७ ॥ मधुमासेमहापुण्येनवम्यां
रामजन्मनि॥स्नानार्थंतुजनाःसर्वेचेंद्रप्रस्थात्प्रचेलिरे ॥ ३८ ॥ तेषांसंगस्तुतेषां वैचौराणामभिलुंपताम् ॥ एवं
विचार्यतेचौराःकरिस्यामोत्रचोरताम् ॥ ३९ ॥ पृष्टाश्चपथिकैःपंचह्यात्मानंतुब्रुवंतुनः ॥ चौराऊचुः ॥ वयंचया
त्रिणःसर्वेमरुकांतारवासिनः ॥ ४० ॥ तीर्थयात्रांकरिष्यामोभवतांसंगमेवयम् ॥ तेषामितीरितंवाक्यंकिंचि
न्नोचुश्चतेजनाः ॥ ४१ ॥ अयोध्यांचागतास्तेतुनराःसुकृतिनःप्रिये ॥ चौर्यस्यावसरस्तेषुनाभवत्पापकर्मणा
म् ॥ ४२ ॥ उपलभ्यत्वयोध्यायाःपूर्वद्वारेसमाययुः॥अयोध्यायांतुयेविप्रामूर्तिमंतस्तुतेसदा ॥ ४३ ॥ कामः
क्रोधश्चलोभस्तुदंभस्तंभोथमत्सरः॥निद्रातन्दातथालस्यंपैशुन्यमितितेदश ॥४४॥हस्तेदंडंगृहीत्वातुमूर्तिमंतो

विदुद्रुवुः ॥ बाध्यमानांश्चतान्दृष्ट्वादयायुक्तोब्रवीन्मुनिः ॥ ४५ ॥ असितोनाममेधावीनिषिषेधाथचागता
न् ॥ भविष्यतिमहापुण्यंयुष्माकंपापितारणे ॥ ४६ ॥ इतिश्रुत्वामुनेर्वाक्यंनोविघ्नंतेचचक्रिरे ॥ तस्मिन्नवस
रेचौराअसितंवाक्यमब्रुवन् ॥ ४७ ॥ चौराऊचुः ॥ भगवन्केनिषिद्धास्तेयेस्माकंरोधनेरताः ॥ संशयंछिंधिनो
ब्रह्मंस्तुभ्यंविप्रनमोनमः ॥ ४८ ॥ असितउवाच ॥ सभाग्याश्चभवंतोहियेषामागमनंत्विह ॥ एतेविघ्नाअयो
ध्यायांवार्यंतेहिनराधमाः ॥ ४९ ॥ मयानिवारिताःसर्वेत्यक्तायुष्मान्पुनर्गताः ॥ विधिपूर्वमयोध्यायांया
त्रांकुरुतसत्तमाः ॥ ५० ॥ तीर्थयात्राप्रभावेणपापराशिर्विनश्यति ॥ चौराऊचुः ॥ केनवैविधिनाब्रह्मंस्तीर्थया
त्रांचरेमहि ॥ ५१ ॥ येनपापावयंसर्वेव्रजिष्यामोमरावतीम् ॥ असितउवाच ॥ यस्यहस्तौचपादौचमनश्चैवसु
संयतम् ॥ ५२ ॥ विद्यातपश्चकीर्तिश्चसतीर्थफलमश्नुते ॥ पापंनकुरुतेयस्तुवाङ्मनोभ्यांजितेंद्रियः ॥ ५३ ॥
यथाशक्त्याचदानेनसतीर्थफलमश्नुते ॥ स्वर्गद्वारंसमासाद्यगमनंकारयेद्व्रती ॥ ५४ ॥ स्नात्वाव्रजेत्तुरामस्य
जन्मस्थानंविशेषतः ॥ गोहत्याब्रह्महत्याचगुरुस्त्रीगमनंतथा ॥ ५५ ॥ दोषैरेतैस्तथाप्यन्यैर्विमुक्तोजायतेक्ष
णात् ॥ मधुमासेसितेपक्षेनवम्यांरामजन्मनि ॥ ५६ ॥ समागतानराःसर्वेदेवगंधर्वकिन्नराः ॥ जन्मस्थानं

हिपश्यंतिस्नात्वाश्रीसरयूजले ॥ ५७ ॥ भवद्भिःक्रियतांयात्रापापनिर्नाशहेतवे ॥ अग्रेगच्छंतुपश्यंतुह्याश्च
र्यंपरमाद्भुतम् ॥ ५८ ॥ श्रीशंकरउवाच ॥ इत्युक्त्वांतर्दधेयोगीनाम्नासावसितोमुनिः ॥ नगरंविविशुस्तेचपंच
चौराश्चहर्षिताः ॥ ५९ ॥ इति श्रीरुद्रयामलेहरगौरीसंवादे अयोध्याखंडेऽष्टमोध्यायः ॥ ८ ॥ ॥
श्रीशंकरउवाच ॥ अयोध्यायास्तदामूर्तिंददृशुश्चाग्रतस्तुते ॥ शुक्लांबरधरादेवीसखीभिःपरिवारिता ॥ १ ॥
दिव्यमालांचसाकंठेबिभ्रतीसुमनोहरा ॥ शंखचक्रधरादेवीदिव्यचंदनभूषिता ॥ २ ॥ रामप्रियापुरीचाद्यावि
बुधैःसेविताचसा ॥ वसिष्ठवामदेवाद्यैर्मुनिवृंदैश्चशोभिता ॥ ३ ॥ ईदृशीविमलादृष्टाचौरैश्चनगनंदिनी ॥ यथा
पापैःपुरीदृष्टातथानान्यैश्चयात्रिभिः ॥ ४ ॥ असितस्यमुनेःसंगात्तथातस्यवरेणच ॥ अयोध्यादर्शनंचक्रुर्ले
भिरेपरमांमुदम् ॥ ५ ॥ पापैर्नयोध्यतेयस्मात्तेनाऽयोध्येतिकथ्यते ॥याथार्थ्यंतस्यशब्दस्यकथयिष्यामिपार्व
ति ॥ ६ ॥ दृष्ट्वापापानिचौराणांगदामुद्यम्यसापुरी ॥ दुद्रावपश्यतांतेषांचौराणांसंमुखेतथा ॥ ७ ॥ भयं
तुलेभिरेचौराअस्मान्किंतुहनिष्यति ॥ चौरदेहाद्विनिःसृत्यपापनांपापविग्रहाः ॥ ८ ॥ नीलवस्त्राःकराला
स्यास्तथावैनिम्ननासिकाः ॥ लोहभूषणसर्वांगास्तथारक्तशिरोरुहाः ॥ ९ ॥ हस्तेनरहिताःकेचित्पद्भ्यांकेचि

द्विवर्ज्जिताः ॥ नेत्रहीनास्तथाकेचित्कुब्जाःकाणास्तथाऽपरे ॥ १० ॥ भयंकरास्तथांचान्येकुष्ठिनश्चतथाऽपरे ॥
नानावेषधराश्चान्येपापानांपापविग्रहाः ॥ ११ ॥ उद्यतायुधदोर्दंडाःसत्यायाःसंमुखंगताः ॥ अयोध्यापिमहा
वीर्यांयथानाम्नीतथागुणा॥१२॥ताडिताःसत्ययासर्वेंगदयाभीमवेगया ॥ पलायनपराःसर्वेंपुरस्तस्यानतस्थि
रे ॥ १३ ॥ तस्थुर्बहिश्चसत्यायाःसमेत्याश्वत्थवृक्षके ॥ रुदंतोभैरवंनादंयेनलोकाविसिस्मिरे ॥ १४ ॥
पुर्यांचाकारिताश्चौराःस्वर्गद्वारंसमाययुः ॥ यस्मिन्दिनेगताश्चौरानवमीमधुमासिकी ॥ १५ ॥ स्नात्वातु
सरयूवारिजन्मस्थानंतुतेगताः ॥ व्रतिनोरामचन्द्रस्यजन्मभूमेःप्रदर्शनात् ॥ १६ ॥ पापमुक्तास्तदासर्वेंब
भूवुःपंचपापिनः ॥ तस्मिन्कालेतुचाहूतश्चित्रगुप्तोयमेनवै ॥ १७ ॥ कर्णेप्रोवाचगुह्यंचचौराणांसुखहेतवे ॥ य
मउवाच ॥ क्षम्यतामपराधस्तुयन्मयाप्रोच्यतेधुना ॥ १८ ॥ क्रियतांभवताचाद्यचौराणांपापमार्जनम् ॥ लेख
नंपापपंक्तेस्तुसत्ययाचप्रमार्जितम् ॥ १९ ॥ विष्णोराद्यापुरीसत्यातस्यामाहात्म्यमीदृशम् ॥ पापमुक्तास्तुते
सर्वेंपंचचौरास्तथाऽपरे ॥ २० ॥ मुमुक्षवस्तुयेकेचिदयोध्यांसमुपासते॥श्रीशंकरउवाच॥कृतांतस्यवचःश्रुत्वा
मलिनश्चबभूवह॥ २१॥ गतःपरिश्रमोऽस्माकंबहुकालकृतोलिपौ॥चित्रगुप्तउवाच ॥ एवंभवतुभोकाललेखादुप

रतावयम् ॥२२॥ जन्मभूमेस्तुरामस्ययदिपापानियांतिवै ॥ पापिनस्तुगमिष्यंतिसाकेतंरामजन्मनि ॥ २३ ॥
गतपापाभविष्यंतिकलिकालेतुपामराः ॥ एवंविश्राव्यतस्याग्रेविवर्णवदनश्वसः ॥ २४ ॥ ममार्जचालिर्पिंशी
ग्रंचौराणांपापसंभवाम् ॥ श्रीशंकरउवाच ॥ यमेनप्रेषितादूताःपर्यटंतिसदाक्षितौ ॥ २५ ॥ पुर्याःपरिसरेतेतुद
दृशुःपापविग्रहान् ॥ यमदूताऊचुः ॥ केयूयंपिप्पलेह्यस्मिन्दुःखशोकपरायणाः ॥ २६ ॥ किंकर्तुमाश्रितायू
यंपिप्पलेकुत्रवासिनः ॥ पापविग्रहाऊचुः ॥ मरुकांतारउत्पन्नाःपापिभिःप्रतिपालिताः ॥ २७ ॥ मातरंपितरं
त्यक्त्वामर्यादांवेदसंभवाम् ॥ अस्मासुप्रीतियुक्तैस्तैर्वयंसंप्रतिपालिताः ॥२८॥ तेवयंयात्रिसंगेनसाकेतंप्रतिचा
गताः ॥ ताडिताश्चवयंसर्वैंपुर्यांतुविमलाख्यया ॥ २९ ॥ देहंत्यक्त्वातुतेषांवैदुःखिताश्चवसेमहि ॥ नवमीचै
त्रमासस्यशुक्लाचाद्यप्रवर्तते ॥ ३० ॥ तस्याव्रतप्रभावेणसरयूस्नानतःपुनः ॥ दर्शनाद्रामदेवस्यजन्मभूमेर्वि
लोकनात् ॥ ३१ ॥ नाम्नासंतानकंलोकंविमानैस्तत्रतेगताः ॥ तेषांवियोगदुःखेनामित्राणांगमनेनच ॥ ३२ ॥
यैर्वयंपालितामित्रैर्धर्मंत्यक्त्वामहात्मभिः ॥ परित्यक्त्वाचतेस्मान्वैलोकंसंतानकंगताः ॥ ३३ ॥ मित्रसंगवि
योगेनदुःखिताश्चात्रसंस्थिताः ॥ श्रीशंकरउवाच ॥ मनोवैकरुणायांतुदूतानांचबभूवह ॥ ३४ ॥ अब्रुवन्वचनंक्रू

रंपापरूपाणिसांत्वयन् ॥ यमदूताऊचुः ॥ सहायंतुकरिष्यामोयुष्माकंमित्रमेलने ॥ ३५ ॥ कार्यंचविद्यतेस्मा
कंहताचाज्ञायमस्यवै ॥ ईदृशीविमलाधृष्टापापिनांचगतिप्रदा ॥ ३६ ॥ भवद्भिःस्थीयतांचात्रयावद्यामोयमं
प्रति ॥ श्रीशंकरउवाच ॥ उक्त्वासंयमनींजग्मुर्यमदूतास्त्वरान्विताः ॥ ३७ ॥ नज्ञायतेतथादूतादेवस्यचक्र
पाणिनः ॥ जन्मभूमेस्तुमाहात्म्यंवक्तुंशक्तोनपद्मजः ॥ ३८ ॥ पापकोटिसमायुक्तश्चैत्रेचनवमीतिथौ ॥ पाप
कोटिंनरस्त्यक्त्वाजन्मभूमेःप्रदर्शनात् ॥ ३९ ॥ प्राप्नोतिपरमंलोकंयत्रगत्वानशोचति ॥ प्रसन्नायस्यसत्या
चतस्यकिंकुरुतेयमः ॥ ४० ॥ भवतांदुष्टबुद्धिस्तुजातावैविमलांप्रति॥क्षमापनार्थंचवयंगमिष्यामोद्यमाचिरम्
॥४१॥श्रीशंकरउवाच॥इत्युक्त्वायमराजोपिभूतप्रेतगणैर्वृतः॥आरुह्यमहिषंवेगात्सत्यांप्रतिजगामह ॥ ४२ ॥
साकेतनिकटेदृष्ट्वाविश्वकर्मांचशिल्पिराट् ॥ यमराजेनसंपृष्टःकुतस्तेगम्यतेऽधुना ॥ ४३ ॥ नवमीविद्यतेचा
द्यतांत्यक्त्वाकुत्रयास्यसि ॥ विश्वकर्मोवाच ॥ आगम्यतेतुसाकेतात्स्नात्वाश्रीसरयूजले ॥ ४४ ॥ दर्शनंजन्म
भूमेस्तुदेवैःसार्द्धंकृतंमया ॥ ब्रह्मणातत्रचाज्ञप्तोगमिष्येतत्पदंध्रुवम् ॥ ४५ ॥ तत्रगत्वाचवेश्मानिकरिष्येया
त्रिणामपि ॥ नवमीव्रतिनांतत्रसरयूस्नायिनांपुरः ॥ ४६ ॥ जगामचातिवेगेनयमंविश्राव्यकारणम् ॥ निश

म्यतन्मुखोद्गीतंयमभृत्याविसिस्मिरे ॥ ४७ ॥ जगामयमराजोपिसाकेतनगरोद्भवम् ॥ माहात्म्यंश्रावयन्भृ
त्यांस्तमसांतुददर्शह ॥ ४८ ॥ महिषंचपरित्यज्यननामविधृतांजलिः ॥ आदौप्रणवमुच्चार्यविमलायैतुम
ध्यतः ॥ ४९ ॥ नमश्चांतेचसंयोज्यमंत्रोयंसमुदाहृतः ॥ सोन्वधावच्चवेगेनयत्रपुर्यामुखंस्थितम् ॥ गो
प्रतारंशिरस्तस्यास्ततःपूर्वंतुकंटकम् ॥ ५० ॥ तटेस्थित्वाशरय्वास्तुसत्यायाश्चस्तुतिंमुहुः ॥ अब्रवीत्परया
वाण्यामेघनादगभीरया ॥ ५१ ॥ इति श्रीरुद्रयामलेहरगौरीसंवादे अयोध्याखंडेनवमोऽध्यायः ॥ ९ ॥ ॥
यमराजउवाच ॥ अयोध्यायैनमस्तेतुरामपुर्यैनमोनमः ॥ आद्यायैचनमस्तुभ्यंसत्यायैतुनमोनमः ॥ १ ॥
सरय्वावेष्टितायैचनमोमातस्तुतेसदा ॥ ब्रह्मादिवंदितेमातर्ऋषिभिः पर्युपासिते ॥ २ ॥ रामभक्तप्रियेदेविस
र्वदातेनमोनमः ॥ येध्यायंतिमहात्मानोमनसात्वांहिपूजिते ॥ ३ ॥ तेषांनश्यंतिपापानिविजन्मोपार्जितानि
च ॥ अकारोवासुदेवःस्याद्यकारस्तुप्रजापतिः ॥ ४ ॥ उकारोरुद्ररूपस्तुतान्ध्यायंतिमुनीश्वराः ॥ सूर्यवंशो
द्भवानांतुराज्ञांपरमधर्मिणाम् ॥५॥ तेषांसामान्यधात्रीत्वंतथासुकृतिनामपि ॥ महिमानंनजानंतितवदेविमुनी
श्वराः ॥६॥ कथंतुज्ञायतेदेविमंदैर्बुद्धिविवर्जितैः ॥ नमस्तेस्तुसदादेविसदादेविनमोनमः ॥७॥ नमोयोध्येनमो

ऽयोध्येपापंनस्त्वमपाकुरु ॥ श्रीशंकरउवाच॥स्तुत्वैवंविररामाथसूर्यपुत्रोमहामनाः ॥८॥अयोध्यादर्शयामास
तनुंस्वांतस्यप्रीतये ॥ वंदितायमराजेनसत्याप्राहयमंत्विदम् ॥ ९ ॥ सत्योवाच ॥ वरंब्रूहिमहाबुद्धेप्रीताहंते
नसंशयः ॥ यदर्थंचागतोसित्वंतन्ममाग्रेचकथ्यताम् ॥ १० ॥ यमराजउवाच ॥ प्रसन्नामममातश्चेद्देहि
स्थानंचकंटकम् ॥ चौरेभ्यस्तुगतायेवैपापरूपाश्चपिप्पले ॥ ११ ॥ तेषांमोक्षविधानंचकथ्यतांदेविमेपुरः ॥
ममदूतापराधस्तुक्षम्यतांहरिपूजिते ॥१२॥ अयोध्योवाच॥यमस्थलंतुविख्यातंस्थानंचसरयूतटे॥ऊर्जेमासि
सितेपक्षेद्वितीयायांतुयेयम ॥ १३ ॥ स्नास्यंतियेनरास्तेषांतदातवभयंनहि ॥ यानितिष्ठंतिपापानिचौराणां
चापिपिप्पले ॥ १४ ॥ विलयंयांतुभोदेवममवाक्यात्तवापिच ॥ ममेदमष्टकंपुण्यंत्वयाभक्त्यातुयत्कृतम् ॥
॥ १५ ॥ यःपठेत्प्रातरुत्थायपापंतस्यप्रणश्यति ॥ प्राप्नोतिसकलानर्थान्मयादत्तान्नरःसदा ॥ १६ ॥ श्रीशं
करउवाच ॥ विश्राव्यवचनंसत्यायमायांतर्दधेस्वयम् ॥ तेनस्थितिस्तदाचक्रेवासिष्ठ्याः पुलिनेशुभे ॥ १७ ॥
चित्रगुप्तश्चतेदूतालज्जिताश्चाभवन्मुहुः॥विग्रहास्तुगतानाशंपापानांचक्षणात्तदा ॥ १८ ॥ भ्रातापियमुनायास्तु
स्थानंकृत्वापुरंगतः ॥ माहात्म्यंविमलायास्तुदूतेभ्यःश्रावयन्मुहुः ॥ १९ ॥ महात्म्यमीदृशंतुभ्यंमयाते

बहुवर्णितम् ॥ जन्मभूमेरयोध्यायानवम्याश्चैवपार्वति ॥ २० ॥ यइदंशृणुयान्नित्यंयश्चापिपरिकीर्तयेत् ॥
भुक्त्वाचाविपुलान्भोगान्नंतेचापिगतिंलभेत् ॥ २१ ॥ अगस्त्येनपुराप्रोक्तंसुतीक्ष्णायचपार्वति ॥ अहंश्रुत्वा
सुतीक्ष्णाच्चरामभक्त्यातुतेब्रुवम् ॥ २२ ॥ नशठायप्रवक्तव्यंनातपस्कायपापिने ॥ निंदकायगुरूणांचवेदानां
निंदकायच ॥ २३ ॥ निंदकायचपुण्यानांनतेषांकथयेत्क्वचित् ॥ ब्रूयाच्छ्रद्धावतेचैवभक्तिश्चेच्छूद्रयोषिताम्
॥ २४ ॥ विष्णुभक्तायप्रेम्णावैस्वयंब्रूयाद्विचक्षणः ॥ पठनंश्रवणंचास्यपापपर्वतदारकम् ॥ २५ ॥ पार्व
त्युवाच ॥ महानसस्यवैदेह्यामाहात्म्यंवदमेप्रभो ॥ यच्छुत्वादेववेशप्रसीदतिमनोमम ॥ २६ ॥ श्रीशंकर
उवाच ॥ शृणुदेविप्रवक्ष्यामिकथांपातकनाशिनीम् ॥ सीतायाःपाकसदनंसदापूर्णाविराजते ॥ २७ ॥ तस्य
दर्शनमात्रेणकरस्थाःसर्वसिद्धयः ॥ तस्मात्सर्वार्थदादेवियात्रास्यात्सार्वकालिकी ॥ २८ ॥ पाकस्थानस्यमा
हात्म्यंयःश्रोष्यतिनरोत्तमः ॥ आजन्मसंचितात्पापान्मुक्तोभवतितत्क्षणात् ॥ २९ ॥ पाकस्थानस्यमा
हात्म्यंमयास्वल्पंनिरूपितम् ॥ सकलंचास्यमाहाम्यंसम्यक्कोवेदसुंदरि ॥ ३० ॥ प्रत्यहंपश्यतोगेहेत्वन्नपूर्णा
विराजते ॥ अत्रक्षत्रवधात्पापाज्जामदग्न्योविमुक्तवान् ॥ ३१ ॥ ज्ञानाज्ञानकृतंपापंतत्क्षणादेवनश्यति ॥ अत्रसू

तवधात्पापाद्बलदेवोविमुक्तवान् ॥ ३२ ॥ देवेशिकिंबहूक्तेनश्रेयसांसाधनंपरम् ॥ जन्मस्थानाद्वायुकोणेपाक
स्थानंतुकथ्यते ॥ ३३ ॥ जन्मस्थानादुत्तरेतुवर्ततेभवनंशृणु ॥ चतुर्विंशत्प्रमाणंचस्थानंत्रैलोकपावनम् ॥
॥ ३४ ॥ कैकेय्याभवनंदिव्यंयत्रजातोरघूद्वहः ॥ भरतोनामधर्मात्मागुरुदेवार्चनेरतः ॥ ३५ ॥ तस्माद्दक्षि
णदिग्भागेवर्ततेपरमंमहत् ॥ सुमित्राभवनंरम्यंधनुस्त्रिंशच्चभामिनि ॥ ३६ ॥ यत्रजातौमहात्मानौतथाश
त्रुघ्नलक्ष्मणौ ॥ स्थानानांदर्शनाद्देविमुच्यतेव्याधिबंधनात् ॥ ३७ ॥ जन्मस्थानात्तुभोदेविचाग्निकोणेविराज
ते ॥ सीताकूपइतिख्यातोज्ञानकूपइतिश्रुतः ॥ ३८ ॥ जलपानंकृतंयेनतस्यकूपस्यपार्वति॥सज्ञानवान्भवेल्लोके
विबुधानांगुरुर्यथा ॥ ३९ ॥ वसिष्ठवामदेवाभ्यांजलपानंशुभेकृतम् ॥ महज्ज्ञानबलंप्राप्यतदालोकेप्रकाशि
तम् ॥ ४० ॥ देवधर्मंहरिस्थानाद्दक्षिणेदिग्दलेस्थितम् ॥ नाम्नालोकेसुविख्यातंतीर्थंसुग्रीवकुंडकम् ॥ ४१ ॥
सुग्रीवकुंडाद्वायव्येसुंदरंचमनोहरम्॥कुंडंविभीषणस्यापिसर्वकामफलप्रदम् ॥४२॥ तयोर्यात्रातुकर्तव्यानरैः
श्रद्धासमन्वितैः ॥ चैत्रशुक्लनवम्यांतुतयोर्यात्रातुवार्षिकी ॥४३॥दक्षिणेहनुमत्कुंडात्स्वर्णस्यखनिरुत्तमा ॥
यत्रचक्रेस्वर्णवृष्टिंकुबेरोरघुजाद्भयात्॥४४॥इति श्रीरुद्रयामलेहरगौरीसंवादे अयोध्याखंडेदशमोध्यायः १

पार्वत्युवाच॥भगवन्ब्रूहितत्त्वेनस्वर्णवृष्टिरभूत्कथम् ॥ कुबेरस्यकथंभीतिरुत्पन्नारघुभूपतेः ॥ १ ॥ एतत्सर्वंसमा
चक्ष्वविस्तरान्ममसुव्रत ॥ श्रुत्वाकथारहस्यानिनतृप्यतिमनोमम ॥ २ ॥ श्रीशंकरउवाच ॥ शृणुदेविप्रवक्ष्या
मिखनेरुत्पत्तिमुत्तमाम् ॥ तस्याःश्रवणमात्रेणजायतेविस्मयोमहान् ॥ ३ ॥ आसीत्पुरानरपतिरिक्ष्वाकुकुल
नंदनः ॥ रघुर्निजभुजोदारवीर्यपालितभूतलः ॥ ४ ॥ प्रतापतापितारातिवर्गोविख्यातसद्यशाः ॥ प्रजापाल
नयासम्यक्तेननीतिमतासदा ॥ ५ ॥ यशःपट्टेनसंवीतादिशोदशतपस्त्विषा ॥ सचक्रेप्रौढविभवंसाधनंवि
जयेक्रमात् ॥ ६ ॥ नानादेशान्समाक्रम्यचतुरंगबलान्वितः ॥ भूपतीन्वशमानीयवसुजग्राहदंडतः ॥ ७ ॥
उत्कृष्टान्नृपतीन्वीरोदंडयित्वाबलाधिकान् ॥ रत्नानिविविधान्याशुजग्राहातिबलस्तदा ॥ ८ ॥ सविजित्यदि
शःसर्वागृहीत्वारत्नसंचयम् ॥ अयोध्यामागतोराजाराजधानींचतांशुभाम् ॥ ९ ॥ तत्रागत्यचकाकुत्स्थोयज्ञा
योत्सुकमानसः ॥ चकारनिर्मलांबुद्धिंनिजवंशोचितक्रियः ॥ १० ॥ वसिष्ठमुनिमाज्ञाप्यवामदेवंचकश्यपम् ॥
जाबालिंचभरद्वाजंगालवंगौतमंतथा ॥ ११ ॥ अन्यानपिमुनिवरान्नानातीर्थसमाश्रितान् ॥ समानयद्वसि
ष्ठेनद्विजवर्येणभूपतिः ॥ १२ ॥ दृष्ट्वास्थितांस्तुतान्सर्वान्प्रदीप्तानिवपावकान् ॥ तानागतान्विदित्वातुरघुः

४

परपुरंजयः ॥ १३ ॥ निश्चक्रामयथान्यायंस्वयमेवमहायशाः ॥ ततोविनीतवत्सर्वान्काकुत्स्थोद्विजसत्तमान् ॥ १४ ॥ उवाचधर्मसंयुक्तंवचनंयज्ञसिद्धये ॥रघुरुवाच ॥ मुनयःसर्वएवैतेयूयंशृणुतमद्वचः ॥ १५ ॥ यज्ञंविधातुमिच्छामितत्राज्ञांदातुमर्हथ ॥ सांप्रतंममकोयज्ञोयुक्तःस्यान्मुनिसत्तमाः ॥ १६ ॥ एतद्विचार्यतत्त्वेन ब्रूथयूयंमुनीश्वराः ॥ मुनयऊचुः ॥ राजन्विश्वजिदाख्यातोयज्ञस्तेयज्ञसत्तमः ॥१७॥ सांप्रतंकुरुतंयज्ञंमाविलंबं वृथाकृथाः ॥ श्रीशंकरउवाच ॥ रघुश्चक्रेततोयज्ञंविश्वजिज्जयसंशयः ॥ १८ ॥ नानासंभारमतुलंकृतसर्वस्व दक्षिणम् ॥ नानाविधानिदानानिदत्तानिमुनितुष्टये ॥ १९ ॥ सर्वस्वमेवप्रददौद्विजेभ्योबहुमानतः ॥ द्विजेषुतेषु यातेषुयाजयित्वास्वकान्गृहान् ॥ २० ॥ बंधुष्वपिविसृष्टेषुमुनिषुप्रगतेषुच ॥ तेनयज्ञेनविधिवद्विहितेननरेश्वरः ॥ २१ ॥ विश्वामित्रमुनेरंतेवासीकौत्सइतिस्मृतः ॥ दक्षिणार्थंगुरोर्धीमान्याचितुंतंनरेश्वरम् ॥ २२ ॥ चतुर्दशसुवर्णानांकोटिमाहरसत्वरम् ॥ मद्दक्षिणेतिगुरुणानिर्बंधादुक्तवान्नृपा ॥ २३ ॥ आगतःसमुनिःकौत्सः ततोयाचितुमादरात् ॥ रघुंभूपालतिलकंदत्तसर्वस्वदक्षिणम् ॥ २४ ॥ तमागत्यमभिप्रेक्ष्यरघुरादरतस्तदा ॥ उत्थायपूजयामासविधिवत्सपरंतपः ॥ २५ ॥ सपर्ययार्घादिकयामृत्पात्रविहितक्रियः ॥ पूजासंभार

मालोक्यतादृशंसमुनीश्वरः ॥ २६ ॥ विस्मितोभून्निरानंदोदक्षिणाशांपरित्यजन् ॥ उवाचमधुरंवाक्यंवाक्यज्ञानविशारदः ॥ २७ ॥ कौत्सउवाच ॥ राजन्नभ्युदयस्तेस्तुगच्छाम्यन्यत्रसांप्रतम् ॥ गुर्वर्थाहरणायैवदत्तसर्वस्वदक्षिणम् ॥२८॥ त्वांनयाचेधनाभावादतोन्यत्रव्रजाम्यहम् ॥ श्रीशंकरउवाच ॥ इत्युक्तस्तेनमुनिनारघुःपरपुरंजयः ॥ २९ ॥ क्षणंध्यात्वाब्रवीदेनंविनयाद्विहितांजलिः ॥ रघुरुवाच ॥ भगवन्तिष्ठमद्गेहेदिनमेकंशुचिव्रत ॥३०॥ यावद्यतिष्येभगवदर्थार्थंमहमुच्चकैः ॥श्रीशंकरउवाच॥ इत्युक्त्वापरमोदारंवचोमुनिमुदारधीः ॥३१॥ प्रतस्थेस्थितधीस्तत्रकुबेरविजिगीषया ॥ तमायांतंकुबेरोपिविज्ञायाप्तजनोदितैः ॥ ३२ ॥ तत्प्रसन्नमनाश्चक्रेवृष्टिंस्वर्णस्यचाक्षयाम् ॥ स्वर्णवृष्टिरभूद्यत्रसास्वर्णखनिरुत्तमा ॥ ३३ ॥ तंमुनिंदर्शयामासखनिंजननिवेदिताम् ॥ तस्मैसमर्पयामासतांरघुःखनिमुत्तमाम् ॥ ३४ ॥ मुनींद्रोपिगृहीत्वातुततोगुर्वर्थमादरात्॥राज्ञेनिवेदयामाससर्वमन्यद्गुणाधिकम् ॥३५॥ वरानथददौतुष्टःकौत्सोमतिमतांवरः ॥ कौत्सउवाच ॥ राजँल्लभस्वपुत्रंत्वंनिजवंशगुणान्वितम् ॥ ३६ ॥ इयंस्वर्णखनिर्दिव्यामनोभीष्टफलप्रदा ॥ भूयादत्रपरंतीर्थंसर्वपापहरंसदा ॥ ३७ ॥ अत्रस्नानेनदानेननृणांलक्ष्मीःप्रजायते ॥ वैशाखेशुक्लद्वादश्यांयात्रासांवत्सरीभवेत् ॥ ३८ ॥ ना

नाभीष्टफलप्राप्तिर्भूयान्मद्वचनान्नृणाम् ॥ आश्विनेशुक्लपक्षेचदशम्यांस्नानमाचरेत् ॥ ३९ ॥ सर्वकामफलप्रा
प्तिर्जायतेचनृणांभुवि ॥ श्रीशंकरउवाच ॥ इतिदत्वावरान्कौत्सोराज्ञेसंतुष्टमानसः ॥ ४० ॥ प्रतस्थेनिज
कार्यार्थीगुरोराश्रममुत्सुकः ॥ राजाथकृतकृत्योहिशेषंसंगृह्यतद्धनम् ॥ ४१ ॥ द्विजेभ्योविधिवद्दत्वापाल
यामाससप्रजाः ॥ एवंस्वर्णखनेर्जातंमाहात्म्यंचमुनेर्वरात् ॥ ४२ ॥ पार्वत्युवाच ॥ भगवन्ब्रूहितत्त्वेनकथं
निर्वंधतोमुनिः ॥ विश्वामित्रोनिजंशिष्यंकौत्संक्रोधेनतादृशम् ॥ ४३ ॥ दुःष्प्राप्यमर्थंयत्नेनसतुप्रार्थितवांस्त
था ॥ एतत्सर्वंसमाचक्ष्वयद्यस्तिमयितेकृपा ॥ ४४ ॥ श्रीशंकरउवाच ॥ शृणुदेविकथामेतांसावधानंमनः
कुरु ॥ विश्वामित्रोमुनिश्रेष्ठोदिव्यविज्ञानलोचनः ॥ ४५ ॥ निजाश्रमेतपोत्यंतंचकारप्रयतव्रती ॥ एकदा
तत्तपोद्रष्टुंदुर्वासामुनिरागतः ॥ ४६ ॥ आगत्यचक्षुधाक्रांतउच्चैःप्रोवाचसद्विजः ॥ भोजनंदीयतांमह्यंक्षु
धापीडितचेतसे ॥ ४७ ॥ पायसंशुचिमुष्णंतुशीघ्रंक्षुच्छांतयेद्विज ॥ इतिश्रुत्वावचस्तस्यविश्वामित्रःप्रयत्न
तः ॥ ४८ ॥ स्थाल्यांपायसमादायतंसमभ्युत्थितःस्वयम् ॥ तदादायोत्थितंदृष्ट्वादुर्वासास्तंविलोकयन् ॥४९॥
उवाचमधुरंवाक्यंमुनिर्ज्वलनसन्निभः ॥ दुर्वासाउवाच ॥ क्षणंसहस्वविप्रेंद्रस्नानार्थंतुव्रजाम्यहम् ॥ ५० ॥ क्षणं

तिष्ठक्षणंतिष्ठचागच्छाम्येवसांप्रतम् ॥ इत्युक्त्वासजगामाशुदुर्वासाःस्वाश्रमंतदा ॥ ५१ ॥ विश्वामित्रस्तपो
निष्ठस्तदास्थाणुरिवाचलः ॥ वर्षाणांतुसहस्रंवैतस्थौस्थिरमतिस्तदा ॥ ५२ ॥ तस्यशुश्रूषणपरोमुनिःकौत्सो
यतव्रतः ॥ बभूवपरमोदारमतिर्विगतमत्सरः ॥ ५३ ॥ पुनरागत्यसमुनिर्दुर्वासागतकल्मषः ॥ भुक्त्वाथपा
यसंचोष्णंगतवांश्चनिजाश्रमम् ॥ ५४ ॥ तस्मिन्यातेमुनिवरेविश्वामित्रस्तपोनिधिः ॥ कौत्संविद्यावतांश्रेष्ठं
विससर्जगृहंप्रति ॥ ५५ ॥ सविसृष्टोगुरुंप्राहदक्षिणाप्रार्थ्यतामिति ॥ विश्वामित्रस्तुतंप्राहशुश्रूषातवदक्षिणा
॥ ५६ ॥ पुनःप्राहगुरुंशिष्योदक्षिणाप्रार्थ्यतामिति ॥ विश्वामित्रःपुनःप्राहषुश्रूषातवदक्षिणा ॥ ५७ ॥ पुनः
पुनर्गुरुंप्राहशिष्योनिर्बंधवान्यदा ॥ तदागुरुश्चक्रुद्धस्तुशिष्यंप्राहचानिष्ठुरम् ॥५८॥सुवर्णस्यसुवर्णस्यचतुर्दश
समाहर ॥ कोटिर्मेदक्षिणांविप्रपश्चाद्गच्छगृहंप्रति ॥ ५९ ॥ इत्युक्तोगुरुणाकौत्सोविचार्यसमुपागतः ॥ काकु
त्स्थंदिग्विजेतारंययाचेगुरुदक्षिणाम् ॥६०॥ इतितेकारणंसर्वमयाभद्रेप्रकीर्तितम् ॥ शृणुयाच्छ्रद्धयायस्तुसर्व
पापैःप्रमुच्यते ॥ ६१ ॥ ॥ इतिश्रीरुद्रयामलेहरगौरीसंवादे अयोध्याखंडे एकादशोऽध्यायः ॥ ११ ॥ ॥
श्रीशंकरउवाच ॥ खन्यादक्षिणदिग्भागेयज्ञवेदीप्रकीर्तिता ॥ यत्रयज्ञोबभूवाथरामस्यपरमात्मनः १ ॥

तस्याःपश्चिमदिग्भागअग्निकुंडंमनोहरम् ॥ नानारत्नैर्विंचित्रंचकांत्यातामिस्रनाशनम् ॥ २ ॥ ब्राह्मणाहरि
भक्तास्तुनिवसंतिसहस्रशः ॥ अग्नयःस्थापितास्तत्रब्राह्मणैर्वेदपारगैः ॥ ३ ॥ दक्षिणाग्निर्गार्हपत्याहवनीयोत्र
योग्नयः ॥ तत्रयात्राप्रकर्तव्यानरैःश्रद्धासमन्वितैः ॥ ४ ॥ अत्रयज्ञोमहादानंस्तोत्रस्यपठनंतथा ॥ अत्रस्ना
स्यंतियेमर्त्याअमर्त्यास्तेनसंशयः ॥ ५ ॥ स्वर्णचान्नंचवासांसिदेयानिश्रद्धयान्वितैः ॥ पयस्विनीचगौर्देया
सवत्सास्वर्णशृंगिका ॥ ६ ॥ अत्रस्नानेनदानेननृणांलक्ष्मीःप्रजायते ॥ मार्गशीर्षस्यकृष्णायांपक्षतौचवरान
ने ॥ ७ ॥ यात्रासांवत्सरीकार्यासर्वाभीष्टफलप्रदा ॥ यज्ञवेद्यांनरःकुर्यात्पिंडदानंविशेषतः ॥ ८ ॥ गयाश्राद्ध
समंप्रोक्तंपितॄणांतृप्तिकारकम् ॥ यत्पुण्यंक्रियतेतत्रह्यश्वमेधसमंभवेत् ॥ ९ ॥ यज्ञवेद्यादक्षिणेतुसंगमःसिद्धसं
वितः ॥ तिलोदकीसरय्वास्तुसंगत्याभुविविश्रुतः ॥ १० ॥ तत्रस्नात्वामहाभागेभवन्तिविरुजानराः ॥ दशा
नामश्वमेधानांकृतानांयत्फलंभवेत् ॥ ११ ॥ तदवाप्नोतिधर्मात्मायत्रस्नात्वायतव्रतः ॥ स्वर्णादिकंचयोदद्या
द्ब्राह्मणेवेदपारगे ॥ १२ ॥ शुभांगतिमवाप्नोतिह्यग्निवच्चैवदीप्यते ॥ तिलोदकीसरय्वास्तुसंगमेलोकविश्रुते ॥
॥ १३ ॥ दत्वान्नंतुविधानेननसभूयोभिजायते ॥ उपवासंचकृत्वातुविप्रांश्चतर्पयेन्नरः ॥ १४ ॥ सौत्रामणे

स्तुयज्ञस्यफलमाप्नोतिमानवः ॥ एकाहारस्तुयस्तिष्ठेन्मासंतत्रयतव्रतः ॥ १५ ॥ यावज्जीवकृतंपापसहस्रंत
स्यनश्यति ॥ अमायांचैवभाद्रस्ययात्रासांवत्सरीभवेत् ॥ १६ ॥ रामेणनिर्मितापूर्वंनदीसिंधुस्थितापरा ॥
सिंधुजानांतरंगानांजलपानायसुव्रते॥१७॥तिलवच्छयाममुदकंयतस्तस्याःसदाबभौ॥तिलोदकीतिसाख्याता
पुण्यतोयासदानदी ॥ १८ ॥ संगमादन्यतोयस्यांतिलोदक्यांशुचिव्रत ॥ स्नातोविमुच्यतेपापैःसप्तजन्मार्जि
तैरपि ॥ १९ ॥ तस्मात्तिलोदकीस्नानंसर्वपापहरंप्रिये॥कर्तव्यंचविषेशेणप्राणिभिर्धर्मकांक्षिभिः॥ २० ॥ स्नानं
दानंतपोहोमःसर्वमक्षयतांव्रजेत् ॥ तिलोदकीसरय्वाश्चपश्चिमेचतटेस्थिता ॥ २१ ॥ अशोकवाटिकानाम्ना
रामचंद्रस्यशोभने ॥ चंदनागुरुचूतैश्चतुंगकालेपकैरपि ॥ २२ ॥ देवदारुवनैश्चापिसमंतादुपशोभिता ॥ चंपका
गरुपुन्नागमधूकपनसासनैः ॥ २३ ॥ शोभितापारिजातैश्चविधूमज्वलनप्रभैः ॥ लोध्रनीपार्जुनैर्नागैःसप्तपर्ण्णा
तिमुक्तकैः ॥ २४ ॥ मंदारकदलीगुल्मलताजालसमावृता ॥ प्रियंगुभिःकदंबैश्चतथाबकुलकैरपि ॥ २५ ॥
जंबूभिर्दाडिमैश्चैवकोविदारैश्चशोभिता ॥ सर्वदाकुसुमैरम्यैःफलवद्भिर्मनोरमैः ॥ २६ ॥ दिव्यगंधरसोपेतैस्त
रुणांकुरपल्लवैः ॥ तथैवतरुभिर्दिव्यैःशिल्पिभिःपरिकल्पितैः ॥ २७ ॥ चारुपल्लवपुष्पाढ्यैर्मत्तभ्रमरसंकुलैः ॥

कोकिलैर्भृंगराजैश्चनानावर्णैश्चपक्षिभिः ॥ २८ ॥ शोभिताशतशश्चित्रैश्चूतवृक्षावतंसकैः ॥ शातकुंभनिभाःके
चित्केचिदग्निशिखोपमाः ॥ २९ ॥ नीलांजननिभाःकेचिद्भांतितत्रस्मपादपाः ॥ सुरभीणिचपुष्पाणिमाल्या
निविविधानिच ॥ ३० ॥ दीर्घिकाविविधाकाराःपूर्णाःपरमवारिणा ॥ माणिक्यकृतसोपानाःस्फाटिकांतर
कुट्टिमाः ॥ ३१ ॥ फुल्लपद्मोत्पलवनाश्चक्रवाकोपशोभिताः ॥ दात्यूहशुकसंघुष्टाहंससारसनादिताः ॥ ३२ ॥
तरुभिःपुष्पशबलैस्तीरजैरुपशोभिताः ॥ प्राकारैर्विविधाकारैःशोभिताश्चशिलातलैः ॥ ३३ ॥ तत्रैवचनगादे
शेवैडूर्यमणिसन्निभैः॥शाद्वलैःपरमैर्युक्ताःपुष्पितद्रुमकाननाः ॥३४॥तत्रसंघर्षजातानांवृक्षाणांपुष्पशालिनाम् ॥
प्रस्तराःपुष्पशबलानभस्तारागणैरिव ॥ ३५ ॥ नंदनंहियथेंद्रस्यवनंचैत्ररथंयथा ॥ तथाभातंहिरामस्यका
ननंतन्निवेशितम् ॥ ३६ ॥ बह्वासनगृहोपेतांलतापादपशोभिताम् ॥ अशोकवाटिकांस्फीतांप्रविश्यरघुनंदनः
॥ ३७ ॥ आसनेचशुभाकारेपुष्पप्राकारशोभिते ॥ कुशास्तरणसंस्तीर्णेरामःसंनिषसादह ॥ ३८ ॥ सीतामादा
यहस्तेनमधुमैरेयकंशुचि ॥ पाययामासकाकुत्स्थःशचीमिवपुरंदरः ॥ ३९ ॥ भोजनानिसुमिष्टानिफलानि
विविधानिच ॥ रामस्याभ्यवहारार्थंकिंकरास्तूर्णमाहरन् ॥ ४० ॥ अप्सरोगणसंघाश्चकिन्नरीणांगणास्तथा

दक्षिणारूपवत्यश्चस्त्रियःपानवशंगताः ॥४१॥ उपनृत्यंतिराज्ञस्तानृत्यगीतविशारदाः॥मनोभिरामारामास्ता
रामोरमयतांवरः ॥ ४२ ॥ रमयामासधर्मात्मानित्यंपरमभूषिताः ॥ सतयासीतयासार्द्धमासीनोविरराजह
॥ ४३ ॥ अरुंधत्यासहासीनोवसिष्ठइवतेजसा ॥ एवंरामोमुदायुक्तःसीतांसुरसुतोपमाम् ॥ ४४ ॥ रमयामास
वैदेहीमहन्यहनिदेववत् ॥ तथातयोर्विहरतोःसीताराघवयोश्चिरम् ॥ ४५ ॥ तस्यांतुवाटिकायांचसीताकुंडं
विराजते ॥ सीतयाकिलतत्कुंडंस्वयमेवविनिर्मितम् ॥ ४६ ॥ रामस्यवरदानेनमहाफलनिधीकृतम् ॥ श्रीराम
उवाच ॥ शृणुसीतेप्रवक्ष्यामिमाहात्म्यंभुवियादृशम् ॥ ४७ ॥ तवकुंडस्यसुभगेत्वत्प्रीत्याकथयाम्यहम् ॥ अ
त्रस्नानंचदानंचजपोहोमस्तपस्तथा ॥ ४८ ॥ सर्वमक्षयतांयातिविधानेनशुचिस्मिते ॥ मार्गकृष्णचतुर्दश्यां
तत्रस्नानंविशेषतः ॥ ४९ ॥ सर्वपापहरंदेविसर्वदास्नायिनांनृणाम् ॥ इतिरामोवरान्दत्वासीतायैतुप्रजाप्रियः
॥ ५० ॥ तदाप्रभृतिसर्वत्रतत्तीर्थंभुविपप्रथे ॥ सीताकुंडमितिख्याततंतीर्थेषुपरमाद्भुतम् ॥ ५१ ॥ तस्मिंस्तीर्थे
नरःस्नात्वारामचन्द्रमवाप्नुयात् ॥ तत्रस्नानेनदानेनतपसाचविशेषतः ॥ ५२ ॥ धूपैर्दीपैःसनैवेद्यैर्नाना
विभवविस्तरैः ॥ रामंससीतंसंपूज्यमुक्तः स्यान्नात्रसंशयः ॥ ५३ ॥ मार्गमासेनरःस्नात्वागर्भवासक्षयोभ

वेत् ॥ अन्यदापिनरः स्नात्वाविष्णुलोकंसगच्छति ॥ ५४ ॥ श्रीशंकरउवाच ॥ अतःपरंप्रवक्ष्यामितीर्थमन्य
च्छुभावहम् ॥ सीताकुंडात्पश्चिमेतुमहाविद्याभिधंमहत् ॥ ५५ ॥ तस्यदर्शनमात्रेणसिद्धयःस्युःकरेस्थि
ताः ॥ तदग्रेसरसिस्नात्वामहाविद्यांतुयोनरः ॥ ५६ ॥ पश्यतिश्रद्धयायुक्तः सयातिपरमांगतिम् ॥ सिद्ध
पीठमितिख्यातंसर्वप्रत्ययकारकम् ॥ ५७ ॥ धूपंदीपंचनैवेद्यंमंत्रेणानेनकारयेत् ॥ आदौप्रणवमुच्चार्यनमः
पश्चात्तुकीर्तयेत् ॥ ५८ ॥ चतुर्थ्यंतामहाविद्याततःस्तोत्रमुदीरयेत् ॥ भक्त्यापरमयादेविस्तुतिंकुर्यात्समा
हितः ॥ ५९ ॥ येत्वांदेविमहेश्वरिप्रतिदिनंध्यायंतिपूजापरास्तेतेभक्तगजामदच्युतिहतद्वारांतधूलीचयाः ॥
येत्वन्मंत्रवरंजपंतिविधिवत्तेदेविलोकेश्वरायेनिष्कामतयाभजंतिभवतींतेमुक्तिभाजोऽचिरात् ॥ ६० ॥ मं
त्रंयःश्रद्धयादेविशैवंशाक्तमथापिवा ॥ गाणपत्यंवैष्णवंचतत्रयः प्रयतोनरः ॥ ६१ ॥ एकाग्रमानसोभूत्वा
ह्याराध्यैवतुतान्सुरान् ॥ तस्यसिद्धिर्भवेन्नूनंचमत्कारोभवेन्नरैः ॥ ६२ ॥ तस्मादत्रप्रकर्तव्यंजपादिकमतंद्रि
तैः ॥ प्रतिमासस्यचाष्टम्यांयात्रास्यात्प्रतिमासिकी ॥ ६३ ॥ देयान्यन्नानिबहुशोनानाविधफलानिच ॥ क्षी
रेणस्नापनंकार्यंपूजनीयाप्रयत्नतः ॥६४॥ उच्चाटनंमोहनंचस्तंभनंचविशेषतः ॥ अत्रप्रजप्तोयत्नेनमंत्रःसर्वो

ऽपिसिध्यति ॥ ६५ ॥ सिद्धपीठेपरोमोक्षोवशीकरणमुत्तमम् ॥ जपोहोमस्तथादानंसर्वमक्षयतांव्रजेत् ॥ ६६ ॥
आश्विनेशुक्लपक्षस्यनवरात्रिषुयत्नतः ॥ तत्रगत्वानरोदेविसर्वपापैःप्रमुच्यते ॥ ६७ ॥ इति श्रीरुद्रयामले
हरगौरीसंवादे अयोध्याखंडेद्वादशोऽध्यायः ॥ १२ ॥ ॥ ॥ ॥ ॥
॥ श्रीशंकरउवाच ॥ विद्याकुंडाद्दक्षिणेतुखर्जूकुंडंचविद्यते ॥ यत्रस्नात्वानरोरोगात्कंड्वादिभ्योविमुच्यते ॥
॥ १ ॥ रविवारेतस्ययात्राकर्तव्यासुविचक्षणैः ॥ विद्याकुंडात्पश्चिमेचपर्वतोराजतेप्रिये ॥ २ ॥ नानावृक्षल
तागुल्मैःपरितःपरिवारितः ॥ तिलोदकीपरिसरेयत्रवातिसदानदी ॥ ३ ॥ एकदाजानकीभद्रेरामंवचनम
ब्रवीत् ॥ प्रसन्नमानसंज्ञात्वाक्रीडितुंकृतमानसा ॥ ४ ॥ जानक्युवाच ॥ राघवेंद्रमहाराजयदितुष्टोसिमेप्र
भो॥क्रीडार्थंपर्वतंदिव्यंसमानयरघूत्तम ॥ ५ ॥ सस्मारगरुडंरामःशीघ्रमागत्यपक्षिराट् ॥ उवाचवचनंश्रेष्ठं
किंकार्यंतद्वदप्रभो ॥ ६ ॥ रामउवाच ॥ वैनतेयत्वयागत्वाकौबेर्यांदिशिशीघ्रतः ॥ आनेतव्यःखगश्रेष्ठ
मणिपर्वतकःशुभः ॥७॥वैनतेयस्ततोगत्वापर्वतंमणिनायुतम् ॥ आनीयरामचंद्रायनमस्कृत्यपुरःस्थितः ॥८॥
॥ गरुडउवाच ॥ आनीतःपर्वतोदिव्यःस्थापनार्थंस्थलंवद ॥ रामचंद्रमहाबाहोजानकीप्रीतिवर्द्धनम् ॥ ९ ॥

॥ रामउवाच ॥ विद्याकुंडातपश्चिमेतुसमीपेस्थाप्यतांगिरिः ॥ जानकीप्रीतिजननःपर्वतोमणिसंज्ञकः ॥ १० ॥
राघवस्यवचःश्रुत्वास्थापयामासपर्वतम् ॥ तार्क्ष्योरामंनमस्कृत्यपरिक्रम्यदिवंययौ ॥ ११ ॥ राघवोजा
नकींप्राहदृश्यतांमणिपर्वतः ॥ सखीभिःक्रीड्यतांसार्द्धंत्वयाजनकनंदिनि ॥ १२ ॥ जानकीपर्वतंदृष्ट्वाततत
श्चालिभिरागता ॥ चकारक्रीडांसानित्यंसखीभिर्जनकात्मजा ॥ १३ ॥ मेरुमंदरतुल्योपिराशिःपापस्य
कर्मणः ॥ तत्क्षणान्नाशमायातिमणिपर्वतदर्शनात् ॥ १४ ॥ जन्मांतरसहस्रेषुयत्पापंसमुपार्जितम् ॥ तत्स
र्वंनाशमायातिमणिपर्वतदर्शनात् ॥ १५ ॥ पर्वताद्दक्षिणेभागेगाणेशंकुंडमुत्तमम् ॥ तत्रस्नानेनदानेनवांछितं
फलमाप्नुयात् ॥ १६ ॥ माघेमासिचतुर्थ्यांतुकृष्णपक्षेवरानने ॥ यात्रासांवत्सरीकार्यासर्वपापप्रणाशिनी ॥
॥ १७ ॥ गणेशंपूजयेत्तत्रव्रतीतुसुविचक्षणः ॥ धूपंदीपंचनैवेद्यंमंत्रेणानेनकारयेत् ॥ १८ ॥ ॐ नमःश्रीगणेशा
यपूजाकार्यायतात्मना ॥ स्तुतिःप्रसन्नाचित्तेनकर्तव्यातस्यप्रीतये ॥ १९ ॥ सिंदूरपूरारुणवारणास्योदा
स्योद्यतानांसकलार्थदाता ॥ विद्याब्धिमज्जज्जनतावलंबोलंबोदरोमेहृदयेसदास्तु ॥ २० ॥ नीलांजनाभंग
जतुंडवक्त्रंशत्रुंगृहीत्वानिजपुष्करेण ॥ उच्चालयंतंगगनेगणेशंध्यायेच्चनित्यंविधिवन्मनुष्यः ॥ २१ ॥ ग

णेशात्पश्चिमेभागेराज्ञोदशरथस्यहि॥कुंडंमनोरमंरम्यंमणिसोपाननिर्मितम् ॥ २२ ॥ तस्मात्पश्चिमदिग्भागे
कौसल्याकुंडमुत्तमम् ॥ तत्रस्नानेनदानेनसर्वसौख्यंप्रजायते ॥ २३ ॥ भाद्रेमासिपूर्णिमायांद्वयोर्यात्राशु
भप्रदा ॥ सुमित्रायास्तथाकुंडंपश्चिमेशुभदायकम् ॥ २४ ॥ भरतेनकृतंकुंडंदक्षिणेपापनाशनम्॥यात्राकुंडद्व
येकार्याभाद्रदर्शेशुभावहा ॥ २५ ॥ तस्मान्नैर्ऋत्यादिग्भागेदुर्भराख्यंसरःशुभम् ॥ महाभरेपरेतीर्थेतथादुर्भ
रसंज्ञके॥२६॥भाद्रेकृष्णचतुर्दश्यांयःस्नायाच्छ्रद्धयान्वितः॥शिवपूजांविष्णुपूजांद्विजपूजांविशेषतः ॥ २७ ॥
यः करोतिनरोभक्त्यावांछितार्थमिहाप्नुयात् ॥ विष्णुरुद्रौचतस्यास्तांसुप्रसन्नौसनातनौ ॥ २८ ॥ तयोःस्मर
णमात्रेणसर्वपापैःप्रमुच्यते ॥ महाभरोदुर्भरश्चभ्रातरौद्वौसमागतौ ॥ २९ ॥ सदाकमलपुष्पाणांभारेणकृत
जीविकौ ॥ पुष्पभारसमायुक्तावागतौतत्रशोभने ॥ ३० ॥ यत्रविष्णुशिवौस्यातांमंत्रयंतौभुवःस्थले ॥ तत्रै
वस्थापितोभारःकमलानांशुभनाने ॥ ३१ ॥ तेनतुष्टौतुतौदेवावूचतुःप्रीतमानसौ ॥ नाम्नातुयुवयोरत्रतीर्थे
पुण्येभविष्यतः ॥ ३२ ॥ नरोवायदिवानारीस्नानमत्रकरिष्यतः ॥ वांछितार्थसमायुक्तौद्वावप्यत्रभविष्य
तः ॥ ३३ ॥ महाभरात्तुवायव्येयोगिनीकुंडमुत्तमम् ॥ यत्रासतेचतुःषष्टियोगिन्योजलसंस्थिताः ॥ ३४ ॥

सर्वार्थसिद्धिदंनॄणांस्त्रीणांचैवविशेषतः ॥ संस्नातव्यंप्रयत्नेनयोगिनीप्रीतयेनृभिः ॥ ३५ ॥ अत्रस्नानंत
थादानंसर्वंसफलतांव्रजेत् ॥ यक्षिणीप्रथमंसिद्धाभवत्यत्रनसंशयः ॥ ३६ ॥ योगिनीकुंडतःपूर्वमुर्वशीकुंडमु
त्तमम् ॥ यत्रस्नात्वाचोर्वशीतुदेवलोकंसमागता ॥ ३७ ॥ पुराकिलमुनिर्धीरोरैभ्योनामतपोधनः ॥ चचार
हिमवत्पार्श्वेंनिराहारोजितेंद्रियः ॥ ३८ ॥ तत्तपोविपुलंदृष्ट्वाभीतःसुरपतिस्तदा ॥ उर्वशींप्रेषयामासत
पोविघ्नायचादरात् ॥ ३९ ॥ ततःसाप्रेषितेंद्रेणजगामगजगामिनी ॥ उवासहिमवत्पार्श्वेरैभ्याश्रमेह्यनुत्तमे
॥ ४० ॥ वनेफुल्लुलताकुंजेमत्तकूजद्विहंगमे ॥ किन्नरीकेलिसमितस्मितपांडुकुरंगके ॥ ४१ ॥ पुन्नागके
शराशोकक्लिन्नकिंजल्कपिंजरे ॥ कल्पितेकांचनगिरौद्धितीयइववेधसा ॥ ४२ ॥ सावनौकांतिसर्वस्वकोशः
कुसुमधन्वनः ॥ उर्वश्यप्सरसांश्रेष्ठालावण्यामृतवाहिनी ॥ ४३ ॥ अंगप्रभासुवर्णेनसितमौक्तिकशो
भिता ॥ तारुण्यरुचिरत्वेनतारुण्येनविभूषिता ॥ ४४ ॥ विलोललोचनापांगतरङ्गधवलोज्ज्लाम् ॥ कल्पंती
मेवचमुहुःकर्णोत्पलदलावलीम् ॥ ४५ ॥ कांतस्तनस्तबकिनीमरुणाधरपल्लवाम् ॥ सुधागर्भसमुद्भूतांपारिजा
तलतांयथा ॥ ४६ ॥ तनुमध्यांपृथुश्रोणींपीनोन्नतपयोधराम् ॥ निःशेषितरसस्येवशार्क्तिकुसुमधन्वनः॥ ४७॥

अपश्यदाश्रमेतस्मिन्मुनिरायतलोचनाम् ॥ नयनानलदग्धेनविरोधेनमनोभुवा ॥ ४८ ॥ त्रिनेत्रवंचनायैवकल्पितांललितांतनुम् ॥ तामाश्रमलतापुष्पकांचीरचितकुंतलाम् ॥ ४९ ॥ विलोक्यतांविशालाक्षींमुनिर्व्याकुलितेंद्रियः॥बभूवरोषसंतप्तःशशापचबहुच्छलात् ॥ ५० ॥ रैभ्यउवाच ॥ कुरूपतांयाहिक्षिप्रंयात्वंसौंदर्यगर्विता ॥ समागतातपोविघ्नहेतवेममसन्निधौ ॥ ५१ ॥ श्रीशंकरउवाच ॥ इतिशप्तारुषातेनमुनिनासाशुभेक्षणा ॥ उवाचप्रांजलिर्भूत्वाविनतामुनिमादरात् ॥ ५२ ॥ उर्वश्युवाच ॥ भगवन्मेप्रसीदत्वंपराधीनायतस्त्वहम् ॥ मच्छापस्यकथंमुक्तिर्भवित्रीनियतव्रत ॥ ५३ ॥ रैभ्यउवाच ॥ अयोध्यायामस्तितीर्थंतद्धामपरमंमहत् ॥ तत्रस्नानंकुरुष्वाद्यसौंदर्यंपरमाप्नुहि ॥ ५४ ॥ त्वन्नाम्नैवचविख्यातिंतत्तोयंयास्यतिध्रुवम् ॥ श्रीशंकरउवाच ॥ एवंसाविप्रवचनाद्विदधेसर्वमादरात् ॥ ५५ ॥ सुंदरीसाभवत्क्षिप्रंतत्स्थानंख्यातिमाययौ ॥ अत्रस्नानंतुयः कृर्याद्भोदेविविधिवन्नरः ॥ ५६ ॥ सौन्दर्यंपरमंतस्यभवेत्तत्रनसंशयः ॥ भाद्रशुक्लतृतीयायांयात्रासांवत्सरीभवेत् ॥ ५७ ॥ विष्णुस्तत्रजनैःपूज्यःसर्वकामार्थसिद्धये ॥ एवंकुर्वन्नरोनारीविष्णुलोकेवसेत्सदा ॥ ५८ ॥ इति श्रीरुद्रयामलेहरगौरीसंवादे अयोध्याखंडेत्रयोदशोऽध्यायः ॥ १३ ॥ ॥ ॥

॥ श्रीशंकरउवाच ॥ पूर्वस्मिन्नुर्वशीकुंडात्तीर्थंचातिमनोहरम् ॥ ख्यातंबृहस्पतेःकुंडंपंकजैरुपशोभितम् ॥ १ ॥
सर्वपापप्रशमनंपुण्यामृततरंगकम् ॥ यत्रसाक्षात्सुरगुरुर्निवासंकिलनिर्ममे ॥ २ ॥ यज्ञंचविधिवच्चक्रेबृहस्प
तिरुदारधीः ॥ नानामुनिगणैर्जुष्टंरम्यंबहुफलप्रदम् ॥ ३ ॥ इंद्रादयोपिविबुधायत्रस्नाताः प्रयत्नतः ॥ म
नोभीष्टफलप्राप्तिस्सौंदर्योदयतुंदिलाः ॥ ४ ॥ यत्रस्नानेनदानेननरोमुच्येतकिल्बिषात् ॥ भाद्रेशुक्लेचपं
चम्यांयात्रातत्रफलप्रदा ॥ ५ ॥ अन्यदापिगुरोर्वारेस्नानंबहुफलप्रदम् ॥ बृहस्पतेस्ततोविष्णोःपूजांतत्रसमाच
रेत् ॥ ६ ॥ सर्वपापविनिर्मुक्तोविष्णुलोकेवसेत्सदा ॥ भवेद्बृहस्पतेःपीडायस्यगोचरवेधतः ॥ ७ ॥ तेन त्र
विधिवत्स्नानंगुरुवारेसनामकम् ॥ कर्तव्यंसुप्रयत्नेनतस्यपीडानसंचरेत् ॥ ८ ॥ तस्मादत्रप्रकर्तव्यंस्नानंविधि
पुरःसरम् ॥ होमंबृहस्पतेर्मूर्तिंसुवर्णेनविनिर्मिताम् ॥ ९ ॥ स्नात्वादत्वाप्रयत्नेनपीतांबरयुतांजले ॥ वेदज्ञाया
तिशुचयेस्नात्वापीडापनुत्तये ॥ १० ॥ होमंचकारयेत्तत्रग्रहजाप्यविधानतः ॥ एवंकृतेनसंदेहोग्रहपीडावि
नश्यति ॥ ११ ॥ तद्दक्षिणेचभोदेविरुक्मिणीकुंडमुत्तमम् ॥ पार्वत्युवाच ॥ कथंवैरुक्मिणीदेवीश्रीकृष्णस्य
प्रियासती ॥ १२ ॥ द्वारकानिलयासातुचकारकुंडमुत्तमम् ॥ एकदायादवेन्द्रस्तुह्ययोध्यामाजगामह ॥१३॥

रुक्मिणीसहितोदेवःश्रीसत्यादिभिरन्वितः ॥ तीर्थयात्राप्रसंगेनस्नात्वाश्रीसरयूजले ॥ १४ ॥ मासमात्रंस्थितिंचक्रेस्वावतारमनुस्मरन् ॥ चकारयत्स्वयंदेवीरुक्मिणीकुंडमुत्तमम् ॥ १५ ॥ तत्रविष्णुःस्वयंचक्रेनिवासंसलिलेसदा ॥ वरप्रदानात्स्नेहेनभार्यायाःप्रगुणीकृतम् ॥ १६ ॥ तत्रस्नानंतथादानंहोमंवैष्णवमंत्रकम् ॥ द्विजपूजांविष्णुपूजांकुर्वीतप्रयतोनरः ॥ १७ ॥ तत्रसांवत्सरीयात्राकर्तव्यासुप्रयत्नतः ॥ ऊर्ज्जकृष्णनवम्यांतुसर्वपापापनुत्तये ॥ १८ ॥ पुत्रवान्जायतेवंध्योलक्ष्मीवान्नात्रसंशयः ॥ नारीभिर्वानरैर्वापिकर्तव्यंस्नानमादरात् ॥ १९ ॥ भुक्त्वाभोगान्समग्रांश्चविष्णुलोकेसमोदते ॥ लक्ष्मीकामनयातत्रस्नातव्यंचविशेषतः ॥ २० ॥ सर्वान्कामानवाप्नोतितत्रस्नानेनमानवः ॥ रुक्मिणीश्रीपतिप्रीत्यैदातव्यंचविशेषतः ॥ २१ ॥ ध्येयोलक्ष्मीपतिस्तत्रशंखचक्रगदाधरः ॥ पीतांबरधरःशार्ङ्गीनारदादिभिरीडितः ॥ २३ ॥ तार्क्ष्यासनोमुकुटवान्हेमांगदविभूषितः ॥ सर्वकामफलप्राप्तौवक्षोल्लसितकौस्तुभः ॥ २३ ॥ अतसीकुसुमश्यामःकमलायतलोचनः ॥ एवंकृतेनसंदेहःसर्वान्कामानवाप्नुयात् ॥ २४ ॥ इहलोकेसुखंभुक्त्वाहरिलोकेचमोदते ॥ अतःपरंप्रवक्ष्यामितीर्थमन्यदघापहम् ॥ २५ ॥ उत्तरेरुक्मिणीकुंडात्क्षीरोदकमितिस्मृतम् ॥ क्षीरोदकमितिस्थानंसर्वदुःखौघनाशनम्

॥ २६ ॥ पुरादशरथोराजापुत्रेष्टिंनामनामतः ॥ चकारविधिवद्यज्ञंपुत्रार्थंयत्रचासकृत् ॥ २७ ॥ क्रतुंसमाप
यामाससानंदोभूरिदक्षिणम् ॥ यज्ञांतेक्रतुभुक्तत्रमूर्तिमान्समदृश्यत ॥ २८ ॥ हस्तेहिहेमपात्रंचहविःपूर्णम
नुत्तमम् ॥ तस्मिन्हविषिसंक्रांतंवैष्णवंतेजउत्तमम् ॥ २९ ॥ चतुर्विधंविभज्यैवपत्नीभ्योदात्सपार्थिवः ॥ य
त्रतत्क्षीरसंप्राप्तिर्जातापरमदुर्लभा ॥ ३० ॥ क्षीरोदकमितिख्यातंतत्तीर्थंभुविपप्रथे ॥उदकेनाभिषिक्तंचसर्वोत्त
मफलप्रदम् ॥ ३१ ॥ तत्रस्नात्वानरोधीमान्विजितेंद्रियआदरात् ॥ सर्वान्कामानवाप्नोतिपुत्रांश्चबहुविश्रुता
न् ॥ ३२ ॥ आश्विनेशुक्लपक्षस्यचैकादश्यांसुलोचने ॥ तत्रस्नात्वाविधानेनदत्वाशक्त्याद्विजन्मने ॥ ३३ ॥
विष्णुंसंपूज्यविधिवत्सर्वान्कामानवाप्नुयात् ॥ पुत्रानवाप्नुयाद्विद्यांधर्मांश्चविविधान्नरः ॥ ३४ ॥ क्षीरोदका
त्पश्चिमेतुनाम्नाक्षीरेश्वरःस्मृतः ॥ राज्ञादशरथेनैवस्थापितोहंपुराप्रिये ॥ ३५ ॥ पूजातस्यप्रकर्तव्याधूपदी
पपुरःसरा ॥ स्तुतिःप्रसन्नचित्तेनकर्तव्याचमनीषिणा ॥ ३६ ॥ कैलासोनिलयःसखाधनपतिर्मौलौसुधा
दीधितिर्मूर्ध्निस्वर्गतरंगिणीविहरणंकल्पद्रुमाणांवनम् ॥ तद्विश्वेश्वरनःक्षमस्वसगणत्वाहूयपीठेस्थितंद्वित्रै
र्बिल्वदलैर्जलाक्षतफलैर्यद्वंचयामोवयम् ॥ ३७ ॥ एवंसंपूज्यविधिवत्सर्वान्कामानवाप्नुयात् ॥ तस्मात्क्षी

रोदकस्थानान्नैर्ऋत्येतीर्थमुत्तमम् ॥ ३८ ॥ कलिकिल्बिषसंहारकारकंप्रत्ययात्मकम्॥परंपवित्रमतुलंसर्वका
मार्थसिद्धिदम् ॥ ३९ ॥ धनयक्षइतिख्यातंपरंप्रत्ययकारणम् ॥ हरिश्चंद्रस्यराजर्षेरासीत्तत्रधनंमहत् ॥ ४० ॥
तस्यरक्षार्थमत्यर्थंस्थापितोयक्षउच्चकैः ॥ विश्वामित्रोमुनिवरोयाजयामासतंनृपम् ॥ ४१ ॥ हरिश्चंद्रंनरप
तिंराजसूयकरंपरम् ॥ राज्यंजग्राहसकलंचतुरंगबलान्वितम् ॥ ४२ ॥ धनंसंस्थापयामासभुवितत्रनसंश
यः ॥ तद्रक्षायैप्रयत्नेनयक्षंस्थापितवानसौ ॥ ४३ ॥ प्रमंथरइतिख्यातंप्रमोदानंदमंदिरम् ॥ रक्षांविदधत
स्तस्यबहुयत्नेनसर्वशः ॥ ४४ ॥ तुतोषसमुनिर्धीमान्कदाचिद्द्विजितेंद्रियः ॥ उवाचमधुरंवाक्यंप्रीत्यापरम
यायुतः ॥ ४५ ॥ विश्वामित्रउवाच ॥ वरंवरयधर्मात्मन्यस्तेमनसिवर्तते ॥ भक्त्यापरमयावीरतुभ्यंदास्या
मितेप्रियम् ॥ ३६ ॥ यक्षउवाच ॥ प्रयच्छसिवरंमह्यंप्रयच्छमनसेप्सितम् ॥ ममांगमतिदुर्गंधंशापाद्धनपतेर
भूत् ॥ ४७ ॥ सुगंधचौर्याद्ब्रह्मर्षेप्रसीदपरमेश्वर ॥ श्रीशंकरउवाच ॥ एवमुक्तेतुयक्षेणमुनिर्ध्यानस्थलोचनः
॥ ४८ ॥ तंविचिंत्यानयाभक्त्यात्वभिषेकंचकारसः ॥ तीर्थोदकेनविधिनाविश्वामित्रोमहातपाः ॥ ४९ ॥
ततःसोभूत्क्षणेनैवसुगंधतरविग्रहः ॥ तथाभूतःसमधुरंप्रोवाचप्रांजलिर्वचः ॥ ५० ॥ मुनेःपुरःस्थितोधीमा

न्विनयावनतःसदा ॥ नाथास्म्यहंत्वत्कृपयाजातःसुरभिविग्रहः ॥ ५१ ॥ एतत्स्थानंयथाख्यातिंयातिसर्वं
ज्ञतत्कुरु ॥ त्वत्प्रसादेनविप्रर्षेतथायत्नंविधेहिमे ॥ ५२ ॥ श्रीशंकरउवाच ॥ एवमुक्तःक्षणंध्यात्वाध्यान
स्तिमितलोचनः ॥ यक्षंप्रतिप्रसन्नात्माह्युवाचश्लक्ष्णयागिरा ॥ ५३ ॥ विश्वामित्रउवाच ॥ प्रसिद्धिमतुलां
यक्षतवस्थानंगमिष्यति ॥ धनयक्षइतिख्यातंनाम्नातीर्थंभविष्यति ॥ ५४ ॥ सौंदर्यंदंशरीरस्यपरंप्रत्यय
कारकम् ॥ यत्रस्नात्वाविधानेनदौर्गंध्यंत्यजतिक्षणात् ॥ ५५ ॥ दानंश्रद्धास्वशक्तिभ्यांलक्ष्मीपूजाविशेषतः
॥ तत्रस्नानेनदानेनलक्ष्मीप्राप्तिर्भवेन्नृणाम् ॥ ५६ ॥ पूजांकुर्यान्निधीनांचनवानामपिसुव्रतः ॥ इहलोकेसुखं
भुक्त्वापरलोकेसमोदते ॥ ५७ ॥ महापद्मश्चपद्मश्चशंखोमकरकच्छपौ ॥ मुकुंदकुंदनीलाश्चखर्वश्चनिधयोन
व ॥ ५८ ॥ एतेषामपिकुंडेत्रसन्निधिर्वर्ततेनघ ॥ एतेषांतुविशेषेणपूजाबहुफलप्रदा ॥ ५९ ॥ जलमध्येप्रक
र्त्तव्यंनिधिलक्ष्मीप्रपूजनम् ॥ अन्नंबहुविधंदेयंवासांसिविविधानिच ॥ ६० ॥ सुवर्णादियथाशक्त्यावित्तशा
ठ्यंविवर्जयेत् ॥ गुप्तदानंप्रयत्नेनकर्तव्यंचविधानतः ॥ ६१ ॥ फलान्यत्रसुवर्णानिदेयानिचविशेषतः ॥ कृ
ष्णपक्षेचतुर्दश्यांस्नानंबहुफलप्रदम् ॥ ६२ ॥ श्रद्धयापरयायुक्तैःकर्तव्यंश्रद्धयाधिकम् ॥ माघेकृष्णचतुर्दश्यां

यात्रासांवत्सरीभवेत् ॥ ६३ ॥ तत्रस्नानंपितॄणांतुतर्पणंचविशेषतः ॥ आब्रह्मस्तंबपर्यंतंजगत्तृप्यतुमेजलैः ॥
॥ ६४ ॥ अपसव्येनविधिनातर्पयेदंजलित्रयम् ॥ एवंकुर्वन्नरोयक्षनमुह्यतिकदाचन ॥ ६५ ॥ अत्रस्नातोदि
वंयातिह्यत्रस्नातःसुखीभवेत् ॥ अत्रस्नानेनतेयक्षकर्तव्यंपूजनंत्विह ॥ ६६ ॥ त्वत्पूजनेनविधिवन्नृणांपाप
क्षयोभवेत् ॥ नमःप्रमंथरायेतिपूजामंत्रोप्युदाहृतः ॥ ६७ ॥ तीर्थमध्येप्रकर्तव्यंपूजनंश्रद्धयान्वितैः ॥ नि
धिलक्ष्म्योस्तथायक्षतवपूजांविशेषतः ॥ ६८ ॥ एवंयःकुरुतेधीरःसर्वान्कामानवाप्नुयात् ॥ धर्मार्थीधर्ममाप्नो
तिपुत्रार्थीपुत्रमाप्नुयात् ॥ ६९ ॥ मोक्षार्थीमोक्षमाप्नोतिसर्वकामइहाप्यते ॥ यस्तुमोहान्नरोयक्षस्नानंनकु
रुतेकिल ॥ ७० ॥ तस्यसांवत्सरंपुण्यंत्वंग्रहीष्यसिसर्वशः ॥ श्रीशंकरउवाच ॥ इतिदत्वावरांस्तस्मैविश्वा
मित्रोमुनीश्वरः ॥ ७१ ॥ अंतर्दधेमुनिवरस्तदैवसतपोनिधिः ॥ तदाप्रभृतितत्स्थानंपरमांख्यातिमाययौ॥७२॥
तस्यतीर्थस्यसकलाभूमिःस्वर्णविनिर्मिता ॥ दिव्यरत्नौघरचितासमंताद्उपशोभिता ॥ ७३ ॥ एवंयःकुरुते
विद्वान्सयातिपरमांगतिम् ॥ तस्मात्पश्चिमदिग्भागेनाम्नाविष्णुहरिःस्मृतः ॥ ७४ ॥ देवोदृष्टप्रभावोसौप्रा
धान्येनवसत्यपि ॥ पार्वत्युवाच ॥ भगवन्किंप्रभावोसौयोयंविष्णुहरिस्त्वया ॥ ७५ ॥ कीर्तितोदेवशार्दू

लप्रसिद्धिंगतवान्कथम् ॥ एतत्सर्वंसमाचक्ष्वविस्तरेणममाग्रतः ॥ ७६ ॥ इति श्रीरुद्रयामलेहरगौरीसंवा
दे अयोध्याखंडेचतुर्दशोऽध्यायः ॥ १४ ॥ ॥ ॥ ॥ ॥ ॥
॥ श्रीशंकरउवाच ॥ विष्णुशर्मेतिविख्यातः पुराभूद्ब्राह्मणोजनः ॥ वेदवेदांगतत्वज्ञोधर्मकर्मसमन्वितः ॥ १ ॥
योगध्यानरतोनित्यंविष्णुभक्तिपरायणः ॥ सकदाचित्तीर्थयात्रांकुर्वन्वैष्णवसत्तमः ॥ २ ॥ अयोध्यामाग
तोविप्रोविष्णुंद्रष्टुमनाः स्वयम् ॥ तपसातोषितोविष्णुः साक्षाद्दृश्योभवेदिति ॥ ३ ॥ चिंतयन्मनसाधीरस्तपः
कर्तुंसमुद्यतः ॥ सवैतत्रतपस्तेपेशाकमूलफलाशनः ॥ ४ ॥ ग्रीष्मेपंचाग्निमध्यस्थोनयन्कालंमहामनाः ॥ वा
र्षिकेचनिरालंबोहेमंतेचसरोवरे ॥ ५ ॥ स्नात्वायथोक्तविधिनाकृत्वाविष्णोस्तथार्चनम् ॥ हृदिकृतेंद्रियग्रा
मोविशुद्धेनांतरात्मना ॥ ६ ॥ मनोविष्णौसमावेश्यविधायप्राणसंयमम् ॥ ॐ कारोच्चारणाद्धीमान्हृदिपद्मं
विकासयन् ॥ ७ ॥ तन्मध्येरविसोमाग्निमंडलानियथाक्रमम् ॥ कल्पयित्वाहरेः पीठंतस्मिन्देशेसनातनम्
॥ ८ ॥ पीतांबरधरंविष्णुंशंखचक्रगदाधरम् ॥ तंचपुष्पैः समभ्यर्च्यमनस्तस्मिन्निवेश्यच ॥ ९ ॥ ब्रह्मरूपंह
रिंध्यात्वाजपन्वैद्वादशाक्षरम् ॥ वायुभक्षः स्थितस्तत्रविप्रस्त्रीनयुतान्समाः ॥ १० ॥ ततोद्विजवरोध्यात्वा

स्तुतिंचक्रेहरेरिमम् ॥ प्रणिपत्यजगन्नाथंचराचरगुरुंहरिम् ॥ ११ ॥ विष्णुशर्माथतुष्टावनारायणमतंद्रितः ॥
॥ विष्णुशर्मोवाच ॥ प्रसीदभगवन्विष्णोप्रसीदपुरुषोत्तम ॥ १२ ॥ प्रसीददेवदेवेशप्रसीदकमलेक्षण ॥ जयकृ
ष्णजयाचिंत्यजयविष्णोजयाव्यय ॥ १३ ॥ जययज्ञपतेनाथजयविश्वपतेविभो ॥ जयपापहरानंतजयज
न्मदुरापह ॥ १४ ॥ नमःकमलनाभायनमःकमलमालिने ॥ नमःसर्वेशभूतेशनमःकैटभमर्दिने ॥ १५ ॥
नमस्त्रैलोक्यनाथायचतुर्मूर्तेजगत्पते ॥ नमोदेवाधिदेवायनमोनारायणायच ॥ १६ ॥ नमःकृष्णायरामाय
नमश्चक्रायुधायच ॥ त्वंमातासर्वलोकानांत्वमेवजगतःपिता ॥ १७ ॥ भयार्तानांसुहृन्मित्रंप्रियस्त्वंचपिता
महः ॥ त्वंहविस्त्वंवषट्कारस्त्वंप्रभुस्त्वंहुताशनः ॥ १८ ॥ करणंकारणंकर्त्तात्वमेवपरमेश्वरः ॥ शंखचक्र
गदापाणेमांसमुद्धरमाधव ॥ १९ ॥ प्रसीदमंदरधरप्रसीदमधुसूदन ॥ प्रसीदकमलाकांतप्रसीदभुवनाधिप
॥ २० ॥ श्रीशंकरउवाच ॥ इत्येवंस्तुवतस्तस्यमुनेर्भक्त्यामहात्मनः ॥ आविर्बभूवविश्वात्माविष्णुर्गरुड
वाहनः ॥ २१ ॥ शंखचक्रगदापाणिःपीतांबरधरोच्युतः ॥ उवाचसप्रसन्नात्माविष्णुशर्माणमव्ययः ॥ २२ ॥
॥ श्रीभगवानुवाच ॥ तुष्टोस्मिभवतोवत्समहतातपसाधुना ॥ स्तोत्रेणानेनसुमतेनष्टपापोसिसांप्रतम् ॥ २३ ॥

वरंवरयविप्रेंद्रवरदोहंतवाग्रतः ॥ नातस्ततपसाद्रष्टुंशक्यःकेनाप्यहंद्विज ॥ २४ ॥ विष्णुशर्मोवाच ॥ भग
वन्कृतकृत्योस्मिसांप्रतंतवदर्शनात् ॥ स्वभक्तिमचलामेकांममदेहिजगत्पते ॥ २५ ॥ श्रीभगवानुवाच ॥
भक्तिरस्त्वचलामेतेवैष्णवीमुक्तिदायिनी ॥ इदंस्थानंमहाभागत्वन्नाम्नाख्यातिमेष्यति ॥ २६ ॥ श्रीशंक
रउवाच ॥ इत्युक्तादेवदेवेशश्चक्रेणोत्खायभूतलम् ॥ जलंप्रकटयामासगांगंपातालतःक्षणात् ॥ २७ ॥ जले
नतेनभगवान्पवित्रेणदयानिधिः ॥ विरजस्कंगतमलंक्षणाच्चक्रेकृपावशात् ॥ २८ ॥ चक्रतीर्थमितिख्यातं
ततःप्रभृतिपार्वति ॥ जातंत्रैलोक्यविख्यातमघौघध्वंसकृच्छुभम् ॥ २९ ॥ तत्रस्नानेनदानेनविष्णुलोकंव्रजे
न्नरः ॥ ततस्तुभगवान्भूयोविष्णुशर्माणमच्युतः ॥ ३० ॥ कृपयापरयायुक्तउवाचद्विजवत्सलः ॥ श्रीभगवा
नुवाच ॥ त्वन्नामपूर्विकाविप्रमन्मूर्तिरिहतिष्ठतु ॥ ३१ ॥ विष्णुहरिरितिख्याताभक्तानांमुक्तिदायिनी ॥
श्रीशंकरउवाच ॥ इतिश्रुत्वावचोविप्रोवासुदेवस्यबुद्धिमान् ॥ ३२ ॥ स्वनामपूर्विकांमूर्तिंस्थापयामासच
क्रिणः ॥ ततःप्रभृतिभोदेविशंखचक्रगदाधरः ॥ ३३ ॥ पीतवासाश्चतुर्बाहुर्नाम्नाविष्णुहरिःस्मृतः ॥ कार्तिके
शुक्लपक्षस्यप्रारभ्यदशमीतिथिम् ॥ ३४ ॥ पूर्णिमामवधिंकृत्वायात्रासांवत्सरीभवेत् ॥ चक्रतीर्थेनरःस्नात्वा

सर्वपापैःप्रमुच्यते ॥ ३५ ॥ बहुवर्षसहस्राणिस्वर्गलोकेमहीयते ॥ पितॄनुद्दिश्ययस्तत्रपिंडान्निर्यापपिष्यति
॥ ३६ ॥ तृप्तास्तत्पितरोयांतिविष्णुलोकंनसंशयः ॥ चक्रतीर्थेनरः स्नात्वादृष्ट्वाविष्णुहरिंविभुम् ॥ ३७ ॥ सर्व
पापक्षयंप्राप्यनाकपृष्ठेसमोदते ॥ स्वशक्त्यातत्रदानानिदत्वानिष्कल्मषोभवेत् ॥ ३८ ॥ विष्णुलोकंवसेद्धी
मान्यावदिंद्राश्चतुर्द्दश ॥ अन्यदापिनरःस्नात्वातत्रतीर्थेजितेंद्रियः ॥ ३९ ॥ दृष्ट्वाविष्णुहरिंदेवंसर्वपापैःप्र
मुच्यते ॥ चक्रतीर्थस्यमाहात्म्यंमयाप्रोक्तंतवप्रिये ॥ ४० ॥ ईशान्येचक्रतीर्थात्तुतीर्थंचान्यन्मनोहरम् ॥ व
सिष्ठकुंडमाख्यातंसर्वपापहरंसदा ॥ ४१ ॥ वसिष्ठस्यसदातत्रनिवासस्तुतपोनिधेः ॥ अरुंधतीसदातस्यव
र्ततेनिर्मलव्रता ॥ ४२ ॥ अत्रस्नानंविशेषेणश्रद्धापूर्वमतंद्रितः ॥ यःकुर्यात्प्रयतोधीमांस्तस्यपुण्यमनुत्तमम्
॥ ४३ ॥ वामदेवस्यतत्रैवसन्निधिर्वर्ततेऽनघे ॥ वसिष्ठवामदेवौचपूजानीयौप्रयत्नतः ॥ ४४ ॥ पतिव्रतापूजनी
यारुंधतीचविशेषतः ॥ स्नातव्यंविधिनासम्यग्दातव्यंचस्वशक्तितः ॥ ४५ ॥ सर्वकामफलप्राप्तिर्जायतेनात्र
संशयः ॥ अत्रयःकुरुतेस्नानंसवसिष्ठसमोभवेत् ॥ ४६ ॥ भाद्रेमासिसितेपक्षेपंचम्यांनियतव्रतैः ॥ तस्यसांव
त्सरीयात्राकर्तव्याविधिपूर्विका ॥ ४७ ॥ विष्णुपूजाप्रयत्नेनकर्तव्याश्रद्धयान्वितैः ॥ सर्वपापविशुद्धात्मा

विष्णुलोकेवसेत्सदा ॥ ४८ ॥ इति श्रीरुद्रयामलेहरगौरीसंवादे अयोध्याखंडेपंचदशोऽध्यायः ॥ १५ ॥ ॥
॥ श्रीशंकरउवाच ॥ वसिष्ठकुंडाद्धोदेविईशानेदिग्दलेस्थितम् ॥ विख्यातंसागरंकुंडंसर्वकामार्थसिद्धिदम् ॥
॥ १ ॥ यत्रस्नानेनदानेनसर्वान्कामानवाप्नुयात् ॥ पूर्णिमायांसमुद्रस्यस्नानाद्यत्पुण्यमाप्नुयात् ॥ २ ॥
तत्पुण्यंपर्वणिस्नानेनरश्चाक्षयमाप्नुयात् ॥ तस्मादत्रविधानेनस्नातव्यंपुत्रकांक्षया ॥ ३ ॥ आश्विनेपौ
र्णमास्यांतुविशेषात्स्नानमाचरेत् ॥ एवंकुर्वन्नरोधीमान्सर्वपापैःप्रमुच्यते ॥ ४ ॥ अत्रस्नात्वानरोदत्त्वायथा
शक्त्यादिवंव्रजेत् ॥ सागराद्वायुकोणेतुब्रह्मकुंडंमनोरमम् ॥ ५ ॥ पुराब्रह्माजगत्सृष्ट्वाविज्ञायहरिमच्युतम् ॥
अयोध्यावासिनंदेवंतत्रचक्रेस्थितिंस्वयम् ॥६॥ आगत्यकृतवांस्तत्रयात्रांब्रह्मायथाविधि ॥ यज्ञंचविधिवच्च
क्रेनानासंभारसंभृतम् ॥ ७ ॥ तथासकृतवांस्तत्रब्रह्मालोकपितामहः ॥ कुंडंस्वनाम्नाविपुलंनानादेवसमन्वित
म् ॥ ८ ॥ विस्तीर्णजलकल्लोलकलितंकलुषापहम् ॥ कुमुदोत्पलकह्लारपुंडरीककुलाकुलम् ॥ ९ ॥ हंससार
सचक्राह्वविहंगममनोहरम् ॥ तटांतविटपच्छायंसुच्छायममलंसदा ॥ १० ॥ तत्रकुंडेसुराःसर्वेस्नात्वाश्र
द्धासमन्विताः ॥ बभूवुः सद्योविगतरजस्काविमलत्विषः ॥ ११ ॥ तदाश्चर्यंमहद्दृष्ट्वातेसर्वेसहसासुराः ॥ ब्र

ह्माणंप्रणिपत्योचुर्भक्त्याप्रांजलयस्तथा ॥ १२ ॥ देवाऊचुः ॥ भगवन्ब्रूहितत्वेनमाहात्म्यंकमलत्विषः ॥
॥ १३ ॥ अत्रस्नानेनसर्वेषामस्माकंविगतंरजः ॥ महदाश्चर्यमेतस्यदृष्ट्वाकुंडस्यविस्मिताः ॥ ३४ ॥ सर्वेव
यंसुरश्रेष्ठकृपयात्वमतोवद॥ब्रह्मोवाच ॥ शृण्वंतुत्रिदशाःसर्वेसावधानाःसुविस्मिताः ॥ १५ ॥ कुंडस्यह्यस्य
माहात्म्यंनानाफलसमन्वितम् ॥ अत्रस्नानेनविधिवत्पापात्मानोपिजंतवः ॥ १६ ॥ विमानंहंससंयुक्तमा
स्थायरुचिरांबराः ॥ निवसंतिब्रह्मलोकेयावदागतसंप्लवम् ॥ १७ ॥ अत्रस्नानेनदानेनयथाशक्त्यासुरोत्तमाः
॥ तुलाश्वमेधयोःपुण्यंप्राप्नुयान्मानवोभुवि ॥ १८ ॥ ममास्मिन्सरसिश्रीमाञ्जायतेस्नानतोनरः ॥
तुलाश्वमेधयोःपुण्यंप्राप्नुयान्मानवोभुवि ॥ १९ ॥ सर्वमक्षय्यतांयातिमहापातकनाशनम् ॥ ब्रह्मकुंडमिति
ख्यातिंक्षितौयास्यत्यनुत्तमाम् ॥ २० ॥ अस्मिन्कुंडेचसान्निध्यंभविष्यतिसदामम ॥कार्तिकेशुक्लपक्षस्यचतु
र्दश्यांसुरोत्तमाः ॥ २१ ॥ यात्राभविष्यतिसदासुराःसांवत्सरीमम ॥ पुण्यप्रदामहापापराशिनाशकरीसदा
॥ २२ ॥ स्वर्णपात्रंमहद्देयंवासांसिविविधानिच ॥ निजशक्त्याप्रकर्तव्यासुरास्तृप्तिर्द्विजन्मनाम् ॥ २३ ॥
॥ श्रीशंकरउवाच ॥ इत्युक्त्वादेवदेवेशोब्रह्मालोकपितामहः ॥ अंतर्दधेसुरैःसार्द्धंतीर्थंदृष्ट्वाचसुंदरि ॥

॥ २४ ॥ तदाप्रभृतितत्कुंडंविख्यातिंपरमांगतम् ॥ अन्यच्छृणुमहाभागेतीर्थंदुष्कृतिदुर्लभम् ॥ २५ ॥ ऋण
मोचनसंज्ञंतुसरयूतीरसंगतम् ॥ ब्रह्मकुंडात्तुभोदेविधनुःसप्तशतेनच॥२६ ॥पूर्वोत्तरदिशाभागेसंस्थितंसरयूज
ले ॥ ततःपूर्वंमुनिवरोलोमशोनामनामतः ॥ २७ ॥ तीर्थयात्राप्रसंगेनस्नानंचक्रेविधानतः ॥ ततःसऋणनि
र्मुक्तोबभूवगतकल्मषः ॥ २८ ॥ तदाश्चर्यंमहद्दृष्ट्वामुनिःसानंदमब्रवीत् ॥ पश्यंस्तीर्थस्यमहतोगुणान्माहा
त्म्यमुच्चकैः ॥२९॥ भुजावूर्द्धौतथाकृत्वाहर्षात्साश्रुविलोचनः ॥ लोमशउवाच ॥ ऋणमोचनसंज्ञंतुतीर्थमे
तदनुत्तमम् ॥ ३० ॥ अत्रस्नानेनजंतूनामृणनिर्यातनंभवेत् ॥ ऐहिकंपारलौक्यंचयद्दशात्रितयेभवेत् ॥ ३१ ॥
तत्सर्वंस्नानमात्रेणतीर्थेनश्यतितत्क्षणात् ॥ सर्वतीर्थोत्तमंचैतत्सद्यःप्रत्ययकारकम् ॥३२॥ मयाचास्यफलंस
म्यगनुभूतंक्षणादिह ॥ तस्मादत्रविधानेनस्नानंचैवस्वशक्तितः ॥ ३३ ॥ कर्तव्यंश्रद्धयायुक्तैःसर्वदाफलकां
क्षिभिः ॥ दातव्यंतुसुवर्णंचदेयमन्नादिशक्तितः ॥ ३४ ॥ श्रीशंकरउवाच ॥ इत्युक्त्वातीर्थमाहात्म्यंलोमशो
मुनिसत्तमः ॥ अंतर्दधेमुनिश्रेष्ठःस्तुवंस्तीर्थगुणान्मुदा ॥ ३५ ॥ एतत्तेकथितंदेविऋणमोचनसंज्ञकम् ॥ सर्व
पापविशुद्धात्मातत्रस्नानेनमानवः ॥ ३६ ॥ जायतेतत्क्षणादेवनात्रकार्याविचारणा ॥ ऋणमोचनतीर्थात्तुपू

र्वतःसरयूजले ॥ ३७ ॥ धनुर्विंशत्प्रमाणेनपापमोचनसंज्ञकम् ॥ पापमोचनतीर्थस्यदृष्टंमाहात्म्यमुत्तमम् ॥
॥ २८ ॥ पांचालदेशेसंभूतोनाम्नानरहरिर्द्विजः ॥ असत्संगप्रभावेणपापात्मासमजायत ॥ ३९ ॥ नाना
विधानिपापानिब्रह्महत्यादिकानिच ॥ कृतवान्पापिसंगेनत्रयीमार्गविर्निंदकः ॥ ४० ॥ सकदाचित्साधु
संगात्तीर्थयात्राप्रसंगतः ॥ अयोध्यामागतोदेविमहापातककृद्द्विजः ॥ ४१ ॥ पापराशिंविनाश्यैवनिष्पापः
समभूत्क्षणात् ॥ दिवः पपाततन्मूर्ध्निपुष्पवृष्टिश्चपार्वति ॥ ४२ ॥ दिव्यंविमानमारुह्यविष्णुलोकंगतोद्विजः
तद्दृष्ट्वामहदाश्चर्यंतीर्थस्यनगनंदिनि ॥ ४३ ॥ श्रद्धयापरयातत्रकुर्यात्स्नानंविशेषतः ॥ माघकृष्णचतुर्दश्यां
तत्रस्नानंप्रशस्यते ॥ ४४ ॥ दानंचमनुजैःकार्यंसर्वपापविशुद्धये ॥ अन्यदापिकृतेस्नानेसर्वपापक्षयोभवेत्
॥ ४५ ॥ इति श्रीरुद्रयामलेहरगौरीसंवादे अयोध्याखंडेषोडशोऽध्यायः ॥ १६ ॥ ॥ ॥ ॥
श्रीशंकरउवाच ॥ पापमोचनतीर्थात्तुपूर्वतः सरयूजले ॥ धनुःशत प्रमाणेनवर्ततेतीर्थमुत्तमम् ॥ १ ॥ सहस्रधा
रासंज्ञंतुसर्वकिल्बिषनाशनम् ॥ यस्मिन्रामाज्ञयावीरोलक्ष्मणःपरवीरहा ॥ २ ॥ प्राणमुत्सृज्ययोगेनययौ
शेषात्मतांपुरा ॥ शृणुप्रियेकथामेतांकथ्यमानांमयानघे ॥ ३ ॥ सहस्रधारातीर्थस्यसमुत्पत्तिमहोदयाम् ॥

पुरारामोरघुपतिर्देवकार्यंविधायवै ॥ ४ ॥ कालेनसहसंगम्यमंत्रंचक्रेनरेश्वरः ॥ आवांमंत्रयमाणौहियः प
श्येदंतिकागतः ॥ ५ ॥ त्वयात्याज्योभवेत्क्षिप्रमित्थंचक्रेससांविदम् ॥ तस्मिन्मंत्रयमाणेहिद्वारितिष्ठतिल
क्ष्मणे ॥ ६ ॥ आगतःसतपोराशिर्दुर्वासास्तेजसांनिधिः ॥ आगत्यलक्ष्मणंशीघ्रमित्यवोचत्क्षुधाकुलः ॥ ७ ॥
दुर्वासाउवाच ॥ सौमित्रेगच्छशीघ्रंत्वंत्वंरामाग्रेनिवेदय ॥ कार्यार्थिनमिदंवाक्यंनान्यथाकर्तुमर्हसि ॥ ८ ॥
श्रीशंकरउवाच ॥ शापाद्भीतः ससौमित्रिर्द्रुतंगत्वातयोःपुरः ॥ मुनिंनिवेदयामासरामाग्रेदर्शनार्थिनम्॥ ९ ॥
दुर्वाससंतपोराशिमत्रिनंदनमागतम् ॥ रामोपिकालमामंत्र्यप्रस्थाप्यचबहिर्ययौ ॥ १० ॥ दृष्ट्वामुनिंतंप्रण
तःसंभोज्यप्रभुरादरात् ॥ दुर्वाससंमुनिवरंप्रस्थाप्यस्वयमादरात् ॥ ११ ॥ सत्यभंगभयाद्वीरोलक्ष्मणंत्यक्त
वांस्तदा ॥ लक्ष्मणोपितदावीरःकुर्वन्नवितथंवचः ॥ १२ ॥ भ्रातुर्ज्येष्ठस्यसुमतिः सरयूतीरमाययौ ॥ तत्रग
त्वाचयोगज्ञोध्यानमास्थायसत्वरम् ॥ १३ ॥ चिदात्मनिमनःशांतंसंनियम्यव्यवस्थितः ॥ ततः प्रादुरभूत्त
त्रसहस्रफणमंडितः ॥ १४ ॥ शेषश्चक्षुःश्रवःश्रेष्ठः क्षितिंभित्त्वासहस्रधा ॥ सुरलोकात्सुरेंद्रोपिसमगादमरैः
सह ॥ १५ ॥ ततःशेषात्मतांयातेलक्ष्मणंसत्यसंगरः ॥ उवाचमधुरंशक्रःसुरसंघसमन्वितः ॥ १६ ॥ इंद्रउवा

च ॥ लक्ष्मणोत्तिष्ठशीघ्रंत्वमारुहस्वपदंस्वयम् ॥ देवकार्यंकृतंवीरत्वयारिपुनिषूदन ॥ १७ ॥ वैष्णवंपरमं
स्थानंप्राप्नुहित्वंसनातनम् ॥ भवन्मूर्तिःसमायातःशेषोपिविलसत्फणः ॥ १८ ॥ सहस्रधाक्षितिंभित्त्वासहस्र
फणमंडितः ॥ क्षितेःसदस्रच्छिद्रेषुयस्माद्भेदाःसमुद्गताः ॥ १९ ॥ तस्मादेतन्महातीर्थंसरयूतीरगंशुभम् ॥
ख्यातंसहस्रधारेतिभविष्यतिनसंशयः ॥ २० ॥ एतत्क्षेत्रप्रमाणंतुधनुषांपंचविंशतिः ॥ अत्रस्नानेनदानेन
श्राद्धेनश्रद्धयान्वितः ॥ २१ ॥ सर्वपापविशुद्धात्माविष्णुलोकंव्रजेन्नरः ॥ अत्रस्नातोनरोधीमाञ्शेषरूपिणमी
श्वरम् ॥ २२ ॥ तीर्थेसंपूज्यविधिवद्विष्णुलोकमवाप्नुयात् ॥ तस्मादत्रप्रकर्तव्यंस्नानंविधिपुरःसरम् ॥
॥ २३ ॥ शेषरूपीहरिर्ध्येयःपूज्याविप्राविशेषतः ॥ स्वर्णंचान्नंचवासांसिदेयानिश्रद्धयान्वितैः ॥ २४ ॥
स्नानंदानंहरेःपूजासर्वमक्षय्यतांव्रजेत् ॥ तस्मादेतन्महातीर्थंसर्वकामफलप्रदम् ॥ २५ ॥ क्षितौभविष्यतित
दानात्रकार्याविचारणा ॥ श्रावणेशुक्लपक्षस्ययातिथिःपंचमीभवेत् ॥ २६ ॥ तस्यामत्रप्रकर्तव्योनागानुद्दिश्य
यत्नतः ॥ उत्सवोविपुलःसद्भिःशेषपूजापुरस्सरः ॥ २७ ॥ उत्सवेतुकृतेसद्भिस्तीर्थेमहतिमानवैः ॥ संतोष्य
चद्विजान्भक्त्यानागपूजापुरःसरम् ॥ २८ ॥ संतुष्टाःफणिनःसर्वेपीडयंतिनमानुषम् ॥ वैशाखेमासियेस्नानं

कुर्वंत्यत्रसमाहिताः ॥ २९ ॥ नतेषांपुनरावृत्तिःकल्पकोटिशतैरपि ॥ तस्मादत्रप्रकर्तव्यंमाधवेयत्नतोनरैः ॥ ३० ॥ स्नानंदानंहरेःपूजाब्राह्मणस्यविशेषतः ॥ तीर्थेकृतात्रमनुजैःसर्वकामफलप्रदा ॥ ३१ ॥ विष्णुमुद्दिश्ययोदद्यात्सालंकारांपयस्विनीम् ॥ सवत्सामत्रसत्तीर्थेसत्पात्रायद्विजन्मने ॥ ३२ ॥ तस्यवासोभवेन्नित्यंविष्णुलोकेसनातने ॥ अक्षयंस्वर्गमाप्नोतितीर्थस्नानेनमानवः ॥ ३३ ॥ अत्रपूज्यौविशेषेणनरैःश्रद्धासमन्वितैः॥वैशाखेमास्यलंकारैर्वस्त्रैश्चाद्विजदंपती ॥ ३४ ॥ लक्ष्मीनारायणप्रीत्यैलक्ष्मीप्रीत्यैविशेषतः॥ सर्वाण्यपिचसंसृत्यस्थास्यंत्यत्रनसंशयः ॥ ३५ ॥ तस्मादत्रविधानेनवैशाखेस्नानतोनृणाम् ॥ सर्वतीर्थावगाहस्यभविष्यतिफलंमहत् ॥ ३६ ॥ श्रीशंकरउवाच ॥ इत्युक्त्वासुरराजेंद्रोलक्ष्मणंसुरसंगतम् ॥ शेषंप्रस्थाप्यपातालेभूभारधरणेक्षमम् ॥ ३७ ॥ लक्ष्मणंयानमारोप्यप्रतस्थेदिवमादरात् ॥ तदाप्रभृतितत्तीर्थंविख्यातिंपरमांययौ ॥ ३८ ॥ वैशाखेमासितीर्थस्यमहात्म्यंपरमंस्मृतम् ॥ पंचम्यामपिशुक्लायांश्रावणस्यविशेषतः ॥ ३९ ॥ अन्यदापर्वणिश्रेष्ठंविशेषात्स्नानमाचरेत् ॥ सहस्रधारातीर्थेचनरःस्वर्गमवाप्नुयात् ॥ ४० ॥ ॥ इति श्रीरुद्रयामलेहरगौरीसंवादे अयोध्याखंडे अंतःपुरप्रदक्षिणावर्णनंनामसप्तदशोऽध्यायः ॥ १७ ॥ ॥

पार्वत्युवाच ॥ भगवन्नद्भुतमिदंतीर्थमाहात्म्यमुत्तमम् ॥ श्रुत्वात्वत्तोममममनःपरमानंदमाययौ ॥ १ ॥ अन्यत्तीर्थांतरंब्रूहितत्त्वेनममसांप्रतम् ॥ नतृप्तिरस्तिमनसःशृण्वंत्याममसुव्रत ॥ २ ॥ श्रीशंकरउवाच ॥ विद्याकुंडाद्दक्षिणेतुवैतरणीविराजते ॥ वैतरण्यांकृतस्नानोयमलोकंनपश्यति ॥ ३ ॥ भाद्रेमासिपूर्णिमायांयात्रासांवत्सरीभवेत् ॥ घोषार्कतीर्थंपरमंवैतरण्यास्तुदक्षिणे ॥ ४ ॥ वर्ततेसुंदरंदेविसर्वपापापहंसदा ॥ यत्रस्नानेनदानेनसूर्यलोकेमहीयते ॥ ५ ॥ एतत्तीर्थस्यसदृशंनापरंविद्यतेक्वचित् ॥ व्रणीकुष्ठीदरिद्रोवादुःखाक्रांतोपियोनरः ॥ ६ ॥ करोतिविधिवत्स्नानंसर्वान्कामानवाप्नुयात् ॥ रविवारेविशेषेणकर्तव्यंस्नानमादरात् ॥ ७ ॥ भाद्रेमासितथामाघेशुक्लषष्ठ्यांप्रयत्नतः ॥ कर्तव्यंविधिवत्स्नानंसूर्यलोकाभिकांक्षया ॥ ८ ॥ पौषेमासितथास्नानंसूर्यवारेविशेषतः ॥ सप्तम्यांरवियुक्तायांस्नानंबहुफलप्रदम् ॥ ९ ॥ घोषाभिधोऽभवत्पूर्वंसूर्यवंश्योनरेश्वरः ॥ समुद्रमेखलामेकःपृथिवींसमपालयत् ॥ १० ॥ यद्यशांसिप्रकाशंतेत्रिलोकीमंडलेषुवै ॥ यत्प्रतापःस्फुरन्भातिप्रभाकरइवापरः ॥ ११ ॥ प्रचंडतरदोर्दंडखंडितारातिमंडलः ॥ सकदाचित्प्रजाःसर्वामन्त्रिषुन्यस्यभूतलम् ॥ १२ ॥ बभ्राममृगयासक्तोवनेतिगहनेद्रुमैः ॥ सराजापूर्वजन्मोत्थैःपा

पैरशुभसूचकैः ॥ १३ ॥ कृमिव्याप्तिकरांभोजःसुंदरोपिगतस्मयः ॥ मृगयायांभवेदेकःकदाचित्पर्यटन्वने
॥ १४ ॥ वराहसिंहहरिणान्निघ्नन्धावन्नितस्ततः॥तृषाक्रांतोम्लानतनुःसरोपश्यत्पुरोनृप॥१५॥ददर्शपार्णिप्रक्षा
ल्यनिष्कूर्मिजलगौरवात् ॥ ततोविधिवदाचम्यस्नानंचक्रेनरेश्वरः ॥ १६ ॥ ततोदेवशरीरोभूदानंदामलमा
नसः ॥ मुनिभिस्तीर्थमाज्ञायचक्रेसूर्यस्तुतिंप्रियाम् ॥ १७ ॥ राजोवाच ॥ भगवन्देवदेवेशनमस्तुभ्यंचिदा
त्मने ॥ नमःसवित्रेसूर्यायजगदानंददायिने ॥ १८ ॥ ॥ प्रभागेहायदेवायत्रयीमूर्तिमतेनमः ॥ विवस्वतेन
मस्तुभ्यंयोगज्ञायसदात्मने ॥ १९ ॥ परायपररूपायत्रिलोकीतिमिरच्छिदे ॥ अचिंत्यायसदातुभ्यंनमो
भास्वरतेजसे ॥ २० ॥ योगप्रियाययोगाययोगज्ञायसदानमः ॥ ओंकारायवषट्काररूपिणेव्रतधारिणे ॥
॥ २१ ॥ यज्ञाययजमानायहविषऋत्विजेनमः ॥ रोगघ्नायसुरूपायकमलानंददायिने ॥ २२ ॥ अतिसौ
म्यातितीक्ष्णायग्रहाणांपतयेनमः ॥ सत्रेशायनमस्तुभ्यंभक्तत्रायप्रियात्मने ॥२३॥ प्रकाशकायसततंलोकानां
प्रियकारिणे ॥ प्रसीदप्रणतायाथमह्यंभक्तिकृतेस्वयम् ॥ २४ ॥ श्रीशंकरउवाच॥इत्येवंस्तुवतस्तस्यसुप्रसन्नो
रविःस्वयम् ॥ आविर्बभूवसहसाभक्तस्याप्रियकाम्यया ॥ २५ ॥ उवाचमधुरंवाक्यंप्रश्रयानतमूर्द्धकम् ॥

रविरुवाच ॥ वरंवरयराजेंद्रप्रसन्नोस्मितवाग्रतः ॥ २६ ॥ ददामितद्वरंतेद्ययत्त्वयामनसेप्सितम्॥ राजोवाच ॥ भगवन्भास्करानंतप्रयच्छसिवरंयदि ॥ २७ ॥ मन्नाम्नाकृतमूर्त्तिस्त्वंतिष्ठस्वात्रसदाविभो ॥ रविरुवाच ॥ एवमस्तुमनुष्येंद्रतववांछामनोहरा ॥ २८ ॥ एतत्स्तोत्रंत्वयाप्रोक्तंयेपठिष्यंतिमानवाः ॥ तेषांतुष्टःप्रदास्यामिसर्वान्कामान्नरेश्वर ॥ २९ ॥ एतत्स्थानंपरांख्यातिंत्वन्नाम्नायास्यतिक्षितौ ॥ सर्वान्कामानवाप्नोतियोत्रस्नानंसमाचरेत् ॥ ३० ॥ मद्भक्तेनसदाराजन्कर्तव्यंस्नानमत्रवै ॥ यंयंकाममिहेच्छेतततंकाममवाप्नुयात् ॥ ३१ ॥ श्रीशंकरउवाच ॥ इतिदत्वावरंदेवःकृपयापरयायुतः ॥ भास्वान्सहस्राकिरणस्ततोंतर्द्धानमाययौ ॥ ३२ ॥ राजाभास्करदेहोत्थंरवितेजस्त्वनुत्तमम् ॥ प्रणम्यदंडवद्भक्त्याजगामस्वगृहंततः ॥ ३३ ॥ सूर्यकुंडेनरःस्नात्वासूर्यलोकेवसेत्सदा ॥ घोषार्ककुंडाद्भोदेविपश्चिमेदिग्दलेस्थितम् ॥ ३४ ॥ रतिकुंडमितिख्यातंसर्वपापापहंसदा ॥ यत्रस्नानेनदानेनपरांकांतिमवाप्नुयात् ॥ ३५ ॥ तत्पश्चिमदिशाभागेकुसुमायुधनागकम् ॥ कुंडंप्रसिद्धमतुलंसर्वकामार्थसिद्धिदम् ॥ ३६ ॥ यत्रस्नानेनदानेनकंदर्पस्यसमाकृतिः ॥ भवेन्नरोविधानेनप्रियेनास्त्यत्रसंशयः ॥ ३७ ॥ रतिकुंडेतथादेविकुसुमायुधकुंडके ॥ श्रद्धयाकुरुतेस्नानंससौ

ख्यंपरमाप्नुयात् ॥ ३८ ॥ कुंडद्वयेऽत्रमिथुनंयत्स्नानंकुरुतेसदा ॥ रतिकुंडेतथादेविकुसुमायुधकुंडके ॥
॥ ३९ ॥ श्रद्धयाचतयोःकुंडेस्नातव्यंधर्मकांक्षिभिः ॥ दानंदेयंयथाशक्त्यारतिकंदर्पतुष्टये ॥ ४० ॥ भवेतांनिय
तंतस्यसंतुष्टौरतिमन्मथौ ॥ माघेविशदपंचम्यामत्रस्नानंशुभप्रदम् ॥ ४१ ॥ रतिकुंडेनरःस्नात्वापश्चात्कं
दर्पकुंडके ॥ स्नातव्यंतद्दिनेदेविमिथुनेनप्रयत्नतः ॥ ४२ ॥ रतिकंदर्पयोःपूजाविधातव्याविशेषतः ॥ वस्त्रा
दिभिरलंकारैःसंपूज्यौद्विजदंपती ॥ ४३ ॥ सर्वान्कामानवाप्नोतिनात्रकार्याविचारणा ॥ चंदनागुरुकर्पूर
कस्तूरीकुंकुमादिभिः ॥ ४४ ॥ वासोभिर्विविधैःपुष्पैरर्चयेद्विजदंपती ॥ एवंकृतेनसंदेहोरतिकंदर्पतुष्टिकृत्
॥ ४५ ॥ इति श्रीरुद्रयामले हरगौरीसंवादे अयोध्याखंडेऽष्टादशोध्यायः ॥ १८ ॥ ॥ ॥ छ ॥
॥ श्रीशंकरउवाच ॥ कुसुमायुधकुंडात्तुप्रतीच्यांदिशिसंस्थितम् ॥ मंत्रेश्वरमितिख्यातंतत्स्थानंभुविदुर्लभम्
॥ १ ॥ तत्रतीर्थेनरःस्नात्वादृष्ट्वामंत्रेश्वरंशिवम् ॥ नतस्यपुनरावृत्तिःकल्पकोटिशतैरपि ॥ २ ॥ पुरारामो
देवकार्यंविधायामलकर्मकृत् ॥ कालेनसहसंगम्यमंत्रंचक्रेनरेश्वरः ॥ ३ ॥ स्वर्गंप्रतिप्रयाणाययात्राकाले
नरेश्वरः ॥ तत्रैवस्थापितंलिंगंमंत्रेश्वरइतिश्रुतम् ॥ ४ ॥ तदुत्तरेसरोरम्यंकुमुदोत्पलमंडितम् ॥ तत्रस्नानेन

दानेनब्राह्मणानांचपूजनैः ॥ ५ ॥ अक्षयंस्वर्गमाप्नोतिनात्रकार्याविचारणा ॥ मंत्रेश्वरस्यमहिमानहिकेना
पिशक्यते ॥ ६ ॥ सम्यग्वर्णयितुंदेवियदुत्तमफलप्रदम् ॥ मंत्रेश्वरसमंलिंगंनभूतंनभविष्यति ॥ ७ ॥ सुगं
धपुष्पधूपादिकुंकुमाद्यनुलेपनैः ॥ पूजनीयःप्रयत्नेनसर्वकामार्थसिद्धिदः ॥ ८ ॥ एवंकृतेनसंदेहोमुक्तिस्तस्य
करेस्थिता ॥ तस्यचोत्तरभागेतुशीतलावर्ततेनघे ॥ ९ ॥ तांसंपूज्यनरोविद्वान्सर्वपापैःप्रमुच्यते ॥ सर्वदापू
जनंतस्याःसोमवारेविशेषतः ॥ १० ॥ कर्तव्यंतुप्रयत्नेननृभिःसर्वार्थसिद्धये ॥ विस्फोटरोगादिभयेनरैस्तु
समुपस्थिते ॥ ११ ॥ कर्तव्यंपूजनंसम्यग्रोगादिभयनाशनम् ॥ तदुत्तरेतुतत्रैवबंदीदेवीतिविश्रुता ॥ १२ ॥
यस्याःस्मरणमात्रेणनिगडादिभयंनहि ॥ राज्ञाक्रुद्धेनयेबद्धाःशृंखलानिगडादिभिः ॥ १३ ॥ बंदींसंस्मृत्यते
देवींमुक्तियांतिक्षणान्नराः ॥ यात्रातस्याः प्रयत्नेनकर्त्तव्याफलकांक्षिभिः ॥ १४ ॥ मंगलेहिविशेषेणसर्वकामा
र्थसिद्धये॥गंधैःपुष्पैस्तथाधूपैर्दीपैरपिचसुव्रते ॥ १५ ॥ नैवेद्यैर्विविधैर्वापिपूजनीयाविशेषतः ॥ बंदीप्रीत्यैमहादे
विदेयंब्राह्मणभोजनम् ॥ १६ ॥ एवंकृतेनसंदेहःसर्वान्कामानवाप्नुयात् ॥ तदुत्तरदिशाभागेचुटकीतिप्रकी
र्तिता ॥ १७ ॥ वर्त्ततेपरमासिद्धिरूपिणीस्मरणान्नृणाम्॥सुसंदिग्धेषुकार्येषुभयेवासमुपागते ॥१८॥यस्याःस्म

रणतोनृणांसर्वसिद्धिःप्रजायते ॥ अग्रेतस्याःसदाकार्योंनृभिरंगुलितोध्वनिः ॥ १९ ॥ दीपदानंप्रयत्नेनकर्तव्यं
नियतात्मभिः ॥ सर्वाभीष्टप्रदंनृणांदीपदानंप्रशस्यते ॥ २० ॥ चतुर्दश्यांचतुर्दश्यांतस्ययात्राविनिर्मिता ॥ तत्प
श्चिमेदिशाभागेकुंडमस्तिशतक्रतोः ॥ २१ ॥ कार्तिकेकृष्णपक्षस्यत्वमायांचविशेषतः ॥ तत्रस्नानेनदानेनस्वर्ग
लोकमवाप्नुयात् ॥ २२ ॥ ततःपश्चिमदिग्भागेनिर्मलीकुंडमुत्तमम् ॥ ब्रह्महत्याभयाद्भीतोवृत्रंहत्वाशतक्रतुः
॥ २३ ॥ यत्रागत्यपुरोदेविवज्रीनिर्मलतांगतः ॥ अग्रेचमनुजाःपापाःसुरापागुरुतल्पगाः ॥ २४ ॥ अत्रस्नानेन
दानेननिर्मलाःस्युर्नसंशयः ॥ अन्यानियानिपापानिब्रह्महत्यासमानिच ॥ २५ ॥ तानिसर्वाणिनश्यंतिनिर्मली
कुंडमज्जनात् ॥ कुंडस्यवार्षिकीयात्राश्रावणेपूर्णिमातिथौ ॥ २६ ॥ तीर्थंतदुत्तरेश्रेष्ठंगोप्रताराभिधंमहत् ॥ वि
ष्णुस्थानंचतत्रैवनाम्नागुप्तहरिः स्मृतः ॥ २७ ॥ पुरादेवासुरेयुद्धेसंग्रामेभृशदारुणे ॥ दैत्यैर्वरमदोत्सिक्तैर्दे
वायुधिपराजिताः ॥ २८ ॥ तेषांपलायमानानांदेवानामग्रणीर्हरः ॥ पुरस्कृत्यचतान्सर्वांस्तथावैकमलासनम्
॥ २९ ॥ क्षीरोदशायिनंविष्णुंशेषपर्यंकशायिनम् ॥ लक्ष्म्योपविष्टयापार्श्वेचरणांबुजहस्तया ॥ ३० ॥ नारदाद्यैर्मु
निगणैर्गृहीतगुणगौरवम् ॥ गरुडेनपुरस्तेनानिशंप्रांजलिनास्तुतम् ॥ ३१ ॥ बिभ्रतंकुंडलेशुभ्रेकर्णाभ्यांमौक्तिको

ज्ज्वले ॥ शंखचक्रधरंदेवंश्वेतद्वीपनिवासिनम् ॥ ३२ ॥ कीरीटिनंपद्महस्तंवनमालाविभूषितम्॥शरणंसजगा
माशुविनीतात्मास्तुवान्निति ॥३३॥तस्मिन्नवसरेदेविसर्वदेवगणैरहम् ॥ ईश्वरउवाच ॥ नमस्तस्मैयमीक्षंतेयो
गिनोगतमृत्यवः ॥३४ ॥परमंपुरुषंपारेतमसांमहतांतथा ॥ यज्ञाययज्ञहविषऋग्यजुःसाममूर्त्तये ॥ ३५ ॥ न
मःसरस्वतीवासहंसायाक्षररूपिणे ॥ सत्यायधर्मनिधयेक्षेत्रज्ञायामृतात्मने ॥ ३६ ॥ सांख्ययोगप्रतिष्ठायन
मोमोक्षैकहेतवे ॥ घोरायमायानिधयेसहस्रशिरसेनमः ॥ ३७ ॥योगनिद्रात्मनेनाभिपद्मोद्भूतजगत्सृजे॥ नमः
सलिलरूपायकारणायजगत्सृजे ॥३८॥ कार्यब्रायाथबलिनेजीवायपरमात्मने ॥ गोप्त्रेप्राणायभूतानांनमोवि
श्वायवेधसे ॥ ३९ ॥ दृप्तायसिंहवपुषेदैत्यसंहारकारिणे ॥ वीर्य्यायानंतमनसेजगद्भावसृजेनमः ॥ ४० ॥ सं
सारहंत्रेमोहायज्ञानायतिमिराच्छिदे ॥अचिंत्यधाम्नेगुप्तायरुद्रायचद्विजायच ॥ १४ ॥ शांतायसुखकल्लोलकै
वल्यपददायिने ॥ सर्वभावातिरिक्तायनमःसर्वात्मनेतथा ॥ ४२ ॥ इंदीवरदलश्यामंस्फुरत्किंजल्कविभ्रमे
बिभ्राणंवाससीविष्णुंनौमिनेत्ररसायनम् ॥ ४३ ॥ श्रीशंकरउवाच ॥ मयास्तुतःप्रसन्नात्मावरदोगरुडध्वजः
॥ दृशासर्वान्विधायाथकृतकृत्यान्कृपान्वितः ॥ ४४ ॥ उवाचमधुरंवाक्यंप्रश्रयावनतान्सुरान् ॥ श्रीभगवा

नुवाच ॥ जानामिविबुधाःसर्वमभिप्रायंसमाधितः ॥ ४५ ॥ दैत्येंद्रैर्विक्रमाक्रांतंपदंसमरदर्पितैः ॥ सबलैर्बल
हीनानांप्रतापविजिताखिलैः ॥ ४६ ॥ सांप्रतंतुविधास्यामितपोयुष्मद्बलायवै ॥ अयोध्यानगरींगत्वाकरिष्ये
तपउत्तमम् ॥४७॥गुप्तोभूत्वाभवत्तेजोविवृद्ध्यैदैत्यशांतये ॥ भवंतश्चतपस्तीव्रंकुर्वंत्वमलमानसाः ॥ अयोध्यां
प्राप्यतांमेध्यांदैत्यनाशायसत्वरम्॥४८॥इति श्रीरुद्रयामलेहरगौरीसंवादे अयोध्याखंडे एकोनविंशोऽध्यायः॥
॥ श्रीशंकरउवाच ॥ इत्युक्त्वांतर्दधेदेवान्देवोगरुडवाहनः ॥ अयोध्यामागतःक्षिप्रंचकारतपउत्तमम् ॥ १ ॥ गु
प्तोभूत्वायदाविष्णुःसुरतेजोविवृद्धये ॥ तेनगुप्तहरिर्नामदेवोविख्यातिमागतः ॥ २ ॥ आगतस्यहरेःपूर्वंयत्रह
स्ततलाच्च्युतम् ॥ सुदर्शनाख्यंतच्चक्रंतेनचक्रहरिःस्मृतः॥ ३॥तयोर्दर्शनमात्रेणसर्वपापैःप्रमुच्यते॥हरेस्तेनप्र
भावेणदेवाःप्रबलतेजसः ॥ ४ ॥ जित्वादैत्यान्रणेसर्वान्संप्राप्यस्वपदान्यथ ॥ रेजिरेविपुलानंदाःसुराआ
नंदसंपदम् ॥ ५ ॥ ततःसर्वेसमेत्याशुबृहस्पतिपुरःसराः ॥ देवाःसेंद्रानमन्मौलिमालार्चितपदांबुजम् ॥६॥ हरिं
द्रष्टुमथागच्छन्नयोध्यांतुसमुत्सुकाः ॥ आगत्यचपुनःस्तुत्वानानाविधिगुणादरम्॥७॥भावपुष्पैःसमभ्यर्च्यन
त्वाप्रांजलयस्तदा ॥ हरिमेकाग्रमनसाध्यायंतोध्याननिष्ठिताः ॥ ८ ॥ ज्ञात्वागतान्समालोक्यभक्त्यापरम

यासुरान् ॥ प्रत्यक्षंप्राहविश्वात्मापीतवासाजनार्दनः ॥ ९ ॥ भगवानुवाच ॥ भोभोदेवाजितारातिबलाद्दिष्ट्या
हिसंगताः ॥ अधुनाभवतांनष्टंकिंकरोमिसुराअहम् ॥ १० ॥ तद्ब्रूथयूयंत्वरिताःकिंविलंबेननिर्भयाः ॥ देवाऊ
चुः ॥ भगवन्देवदेवेशत्वयिपश्यतिसर्वशः ॥ ११ ॥ सर्वंसमभवत्कार्यंयत्रत्वंनोजगद्गुरो ॥ तथापिसर्वदाभा
व्यंनिस्तंद्रेणत्वयाविभो ॥ १२ ॥ अस्मद्रक्षार्थमात्रेणावेजितेंद्रियवर्त्मना ॥ एवमेवसदाकार्यंशत्रुपक्षविनाश
नम्॥१३॥श्रीभगवानुवाच॥एवमेतद्विधास्यामिभवतामरिसंक्षयम्॥श्रीमतां तेजसोवृद्धिंकरिष्यामिमहासुराः
॥ १४ ॥ कथेयंचसदाख्यातिंलोकेयास्यतिचोत्तमा ॥ अहंनाम्नागुप्तहरिर्देवोभुवनविश्रुतः ॥ १५ ॥
मदीयंपरमंगुह्यंस्थानंख्यातिंसमेष्यति ॥ अत्रयःप्राणिनांश्रेष्ठःपूजांगुप्तहरेर्मम ॥ १६ ॥ करोतिपरयाभक्त्या
सयातिपरमांगतिम् ॥ अत्रयःकुरुतेदानंयथाशक्त्याजितेंद्रियः ॥ १७ ॥ सस्वर्गमतुलंप्राप्यनशोचतिकदाच
न ॥ अत्रमत्प्रीतयेदेवाःप्राणिभिर्धर्मकांक्षिभिः ॥ १८ ॥ दातव्यागौःप्रयत्नेनसवत्साविधिपूर्वकम् ॥ स्वर्णशृंगी
रौप्यखुरावस्त्रद्वयसमावृता ॥ १९ ॥ कांस्योपदोहनाताम्रपृष्ठीबहुगुणान्विता ॥ रत्नपुच्छाचनव्याचघंटाभ
रणभूषिता ॥ २० ॥ अर्चितागंधपुष्पाद्यैःसुप्रसन्नाचनिर्व्रणा ॥ द्विजायवेदविदुषेगुणिनेनिर्मलात्मने ॥ २१ ॥

विष्णुभक्ताय विदुषेत्वानृशंस्यरतायच ॥ ब्राह्मणायतुगौर्देयासर्वत्रसुखभागभवेत् ॥ २२ ॥ नदेयाद्द्विजमात्रा
यदातारंसोप्यधोनयेत् ॥ मत्प्रीतयेत्रदातव्यानिर्मलेनांतरात्मना ॥ २३ ॥ सर्वकामविशुद्ध्यर्थंयैर्वामद्भक्तित
त्परैः ॥ तेषांस्वर्गोक्षयोनित्यंमुक्तिःकरतलेस्थिता ॥ २४ ॥ तथाचक्रहरेःपीठेमत्प्रीत्यैदानमुत्तमम् ॥ जप
होमादिकंचापिकर्तव्यंयत्नतोनरैः ॥ २५ ॥ भवंतोपिविधानेनयात्रांकुरुतसत्तमाः ॥ अत्रस्नात्वाविधानेनद्र
ष्टव्योहिप्रयत्नतः ॥ २६ ॥ देवोगुप्तहरिर्नामसर्वकामार्थसिद्धिदः ॥ श्रीशंकरउवाच ॥ इत्युक्त्वांतर्दधेदेवःपीतां
बरधरोच्युतः ॥ २७ ॥ देवाअपिविधानेनकृत्वायात्रांप्रयत्नतः ॥ अयोध्यायांस्वसान्निध्यंचक्रुर्गुणविमोहि
ताः ॥ २८ ॥ तदाप्रभृतिभोदेवितत्स्थानंभुविपप्रथे ॥ कार्तिक्यांतुविशेषेणयात्रासांवत्सरीभवेत ॥ २९ ॥
स्नात्वादेवोर्चनीयोत्रसर्वकामफलप्रदः ॥ एवंयःकुरुतेयात्रांविष्णुलोकेसमोदते ॥ ३० ॥ तस्माद्गुप्तहरेः
स्थानादुत्तरेवर्ततेमहत् ॥ गोप्रताराभिधंतीर्थंसर्वपापप्रणाशनम् ॥ ३१ ॥ यत्रस्नानेनदानेनशोचतिनरः
क्वचित् ॥ गोप्रतारसमंतीर्थंनभूतंनभविष्यति ॥ ३२ ॥ वाराणस्यांयथादेविवर्ततेमणिकर्णिका ॥ उज्जयिन्यां
यथाचैवमहाकालनिकेतनम् ॥ ३३ ॥ नैमिषेचक्रवापीतुयथातीर्थोत्तमास्मृता ॥ अयोध्यायांतथादेविगोप्र

ताराभिधंमहत् ॥ ३४ ॥ यत्ररामाज्ञयादेविसाकेतनगरीजनः ॥ जगामस्वर्गमतुलंनिमज्यपरमांभसि ॥
॥ ३५ ॥ ॥ पार्वत्युवाच ॥ ॥ कथंजगामसस्वर्गंसाकेतनगरीजनः ॥ कथंचराघवोविद्वानेतत्कथ
यसुव्रत ॥ ३६ ॥ ॥ श्रीशंकरउवाच ॥ ॥ सावधानाकथामेतांप्रियेशृणुसविस्तराम् ॥ यथाजगा
मरामोसौस्वर्गंसचपुरीजनः ॥ ३७ ॥ पुरारामोविधायैवदेवकार्यमतंद्रितः ॥ स्वर्गंगंतुंमनश्चक्रेभ्रातृ
भ्यांसहधीरधीः ॥ ३८ ॥ शृणुसविस्तरंयेनवानराःकामरूपिणः ॥ ऋक्षगोपुच्छरक्षांसिसमुत्पेतुरने
कशः ॥ ३९ ॥ देवगंधर्वपुत्राश्चत्वष्टृपुत्राश्चवानराः ॥ रामक्षयंविदित्वातुसर्वएवसमागताः ॥ ४० ॥ तेराममम
नुगत्योचुःसर्वेवानरयूथपाः ॥ तवानुगमनेराजन्संप्राप्ताःस्मतिविहानघ ॥ ४१ ॥ यदिरामविनास्माभिर्गच्छेत्त्वं
पुरुषर्षभ॥हताःस्यामोस्तदाराजन्यमंदेडनेहनृप॥४२॥श्रुत्वातुवचनंतेषामृक्षवानररक्षसाम्॥ विभीषणमुवाचा
थराघवःश्लक्ष्णयागिरा ॥४३॥ यावत्प्रजाधरिष्यंतितावदेवविभीषण॥कारयस्वमहद्राज्यंलंकांत्वंपरिपालय॥
॥ ४४ ॥ स्थापितस्त्वंसखित्वेननान्यत्कुर्याद्वचोमम ॥ प्रजांत्वंरक्षधर्मेणनोत्तरंवक्तुमर्हसि ॥ ४५ ॥ एवमुक्त्वा
तुकाकुत्स्थोहनुमंतमथाब्रवीत् ॥ वायुपुत्रचिरंजीवमाप्रतिज्ञांवृथाकुरु ॥ ४६ ॥ यावल्लोकावदिष्यंतिमत्क

थांवानरर्षभ ॥ तावत्त्वंधारयप्राणान्प्रतिज्ञांपरिपालय ॥ ४७ ॥ मैंदश्चद्विविदश्चैवत्वमृतप्राशिनावुभौ ॥ या
वल्लोकाधारिष्यंतितावदेतौधारिष्यतः ॥ ४८ ॥ पुत्राः पौत्राश्चयेस्माकंतान्राक्षंत्विहवानराः ॥ एवमुक्त्वातु
काकुत्स्थःसर्वांस्तानृक्षवानरान् ॥ ४९ ॥ मयासार्द्धंप्रयातेतितदान्यान्राघवोब्रवीत् ॥ प्रभातायांतुशर्वर्यां
पृथुवक्षामहाभुजः ॥ ५० ॥ रामःकमलपत्राक्षःपुरोधसमथाब्रवीत् ॥ अग्निहोत्राणियांत्वग्रेदीप्यमानानिस
र्वशः ॥ ५१ ॥ वाजपेयान्यतंत्राणिनिर्यांतुचममाग्रतः ॥ ततोवासिष्ठस्तेजस्वीसर्वंनिरवशेषतः ॥ चकारविधि
वत्कर्ममहाप्रास्थानिकंविधिम् ॥५२॥ इतिश्रीरुद्रयामले हरगौरीसंवादे अयोध्याखंडे विंशोऽध्यायः ॥२०॥
श्रीशंकरउवाच ॥ ततःक्षौमांबरधरोब्रह्मचर्यसमन्वितः ॥ कुशानादायपाणिभ्यांमहाप्रस्थानमुद्यतः ॥ १ ॥
नव्याहरच्छुभंकिंचिदशुभंवानरेश्वरः ॥ निश्चक्रामास्यनगरात्सागरादिवचंद्रमाः ॥ २ ॥ रामस्यसव्य
पार्श्वेतुसपद्माश्रीः समागता ॥ दक्षिणेह्रीर्विशालाक्षीव्यवसायस्तथाग्रतः ॥ ३ ॥ नानाविधान्यायुधानिधनुश्च
ज्यासमन्वितम् ॥ अन्वव्रजंश्चकाकुत्स्थंसर्वेपुरुषविग्रहाः ॥ ४ ॥ वेदाब्राह्मणरूपेणसावित्रीसव्यदक्षिणे ॥
ॐ कारोथवषङ्कारःसर्वेरामंतदाव्रजन् ॥ ५ ॥ ऋषयश्चमहात्मानःसर्वेचैवमहीधराः ॥ अनुगच्छंतिकाकु

श्रीगणेशाय नमः। श्रीगुरुभ्यो नमः। श्रीगोपीजनवल्लभाय नमः। अथ पुरुषोत्तममाहात्म्यप्रारंभः। वंदे वन्दारुमन्दारं वृन्दावनवि-
नोदिनम्। वृंदावनकलानाथं पुरुषोत्तममद्भुतम् ॥१॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम्। देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥२॥ नैमि-
षारण्यमाजग्मुर्मुनयः सत्रकाम्यया। असितो देवलः पैलः सुमन्तुः पिप्पलायनः ३। सुमतिः काश्यपश्चैव जाबालिर्भृगुरङ्गिराः। वामदे-
वः सुतीक्ष्णश्च शरभंगश्च पर्वतः ४। आपस्तम्बोऽथ मांडव्योऽगस्त्यः कात्यायनस्तथा। रथीतरो ऋभुश्चैव कपिलो रैभ्य एव च ५। गौतमो
मुद्गलश्चैव कौशिको गालवः क्रतुः। अत्रिर्बभ्रुस्त्रितः शक्तिर्बुधो बौधायनो वसुः॥६॥ कौंडिन्यः पृथुहारीतौ धूम्रः शंकुश्च संकृतिः। शनि-
र्विभांडकः पंको गर्गः काणाद एव च॥७॥ जमदग्निर्भरद्वाजो धूम्रपो मौनभार्गवः। कर्कशः शौनकश्चैव शतानन्दो महातपाः॥८॥ विशा-
लाख्यो विष्णुवृद्धो जर्जरो जयजंगमौ। पारः पाशधरः पूरो महाकायोऽथ जैमिनिः॥९॥ महाग्रीवो महाबाहुर्महोदरमहाबलौ। उद्दाल-
को महासेन आर्त आमलकप्रियः॥१०॥ ऊर्ध्वबाहुरूर्ध्वपाद एकपादश्च दुर्धरः। उग्रशीलो जलाशी च पिंगलोऽत्रिर्ऋभुस्तथा॥११॥ शांडी-
रः करुणः कालः कैवल्यश्च कलाधरः॥ श्वेतबाहू रोमपादः कद्रुः कालाग्निरुद्रगः॥१२॥ श्वेताश्वतर एवाद्यः शरभंगः पृथुश्रवाः। एते
सशिष्या ब्रह्मनिष्ठा वेदवेदांगपारगाः॥१३॥ लोकानुग्रहकर्तारः परोपकृतिशालिनः। परप्रियरता नित्यं श्रौतस्मार्तपरायणाः॥१४॥ नैमि-
षारण्यमासाद्य सत्रं कर्तुं समुद्यताः। तीर्थयात्रामथोद्दिश्य गेहात्सूतो विनिर्गतः॥१५॥ पृथिवीं पर्यटन्नेव नैमिषं दृष्टवान्मु-
नीन्॥ तान्सशिष्यान्नमस्कर्तुं संसारार्णवतारकान्॥१६॥ सूतः प्रहर्षितः प्रागाद्यत्रासंस्ते मुनीश्वराः। ततः सूतं समायांतं रक्त-
वल्कलधारिणम्॥१७॥ प्रसन्नवदनं शान्तं परमार्थविशारदम्॥ अशेषगुणसंपन्नं ब्रह्मानन्दसंप्लुतम्॥१८॥ ऊर्ध्वपुंड्रधरं श्रीमन्नाम-
मुद्राविराजितम्॥ शंखचक्रधरं दिव्यं गोपीचन्दनमृत्स्नया॥१९॥ लसच्छ्रीतुलसीमाले जटामुकुटमंडितम्॥ जपन्तं परमं मंत्रं हरेःशर-
णमद्भुतम्॥२०॥ सर्वशास्त्रार्थसारज्ञं सर्वलोकहिते रतम्॥ जितेन्द्रियं जितक्रोधं जीवन्मुक्तं जगद्गुरुम्॥२१॥ व्यासप्रसादसंपन्नं
व्यासवद्विगतस्पृहम्। तं दृष्ट्वा सहसोत्थाय नैमिषेया महर्षयः॥२२॥ श्रोतुकामाः समावभुर्विचित्राः विविधाः कथाः॥ ततः सूतो विनी-
तात्मा सर्वान्मुनिवरान्मुदा॥ बद्धाञ्जलिपुटो भूत्वा ननाम दण्डवन्मुदा॥२३॥ ऋषय ऊचुः। सूत सूत चिरं जीव महाभागवतो भवा-
न्॥

अस्माभिस्त्वासनं तेऽद्य कल्पितं सुमनोहरम्॥२४॥ अत्रास्यतां महाभाग आओसीत्यवदन्द्विजाः। इत्युक्त्वा सूपविष्टेषु सर्वेष्वच न वाग्मिषु॥
२५॥ तपोवर्द्धिंततः पृष्ट्वा सर्वान्मुनिगणान्मुदा॥ निर्दिष्टमासनं भेजे विनयाद्रौमहर्षणिः॥२६॥ सुखासीनं ततस्तं तु विश्रान्तमुपलक्ष्य च॥
शौनकाद्याः कथाः पुण्या इदं वचनमब्रुवन्॥२७॥ ऋषय ऊचुः॥ सूत सूत महाभाग भाग्यवानसि सांप्रतम्॥ पाराशर्यवचोहार्दं त्वं वेद कृपया गुरोः॥२८॥

गृहेमाहात्म्यमुत्तमम् ॥ तद्गृहेसर्वतीर्थानिवसंतिनिरंतरम् ॥ ४१ ॥ मासोत्तमस्यमहिमानमनंतपुण्यं श्रुत्वासुविस्मितधियोमुनयश्चसर्वे ॥ ऊचुश्चसूततनयंविनयेनविष्वक्सेनांघ्रिसेवनविधौनिपुणानितांतम् ॥ ४२ ॥ ॥ ऋषयऊचुः ॥ ॥ सूतसूतमहाभागधन्योसित्वंमहामते ॥ त्वन्मुखामृतपानेनकृतार्थाःस्मोवयंभृशम् ॥ ४३ ॥ चिरंजीवसदासूतपौराणिकशिरोमणे ॥ अस्तुतेशाश्वतीकीर्तिर्जगत्पावनपावनी ॥ ४४ ॥ तुभ्यंप्रदत्तंनिमिषालयस्थैर्ब्रह्मासनंपूज्यतमंमुनीशैः ॥ त्वदीयवक्त्रांबुजनिर्गतश्रीमुकुंदवार्तामृतपानलोलैः ॥ ४५ ॥ विष्टरश्रवसएवपवित्रायावदेवविततःभुविकीर्तिः ॥ तावदत्रमुनिवर्यसमाजेश्रीहरेर्वदकथांकमनीयम् ॥ ४६ ॥ इत्थंद्विजाशीर्वचनंप्रगृह्यप्रदक्षिणीकृत्यद्विजान्समस्तान् ॥ नत्वागमद्देवनदींस्वकीयंकृत्यंविधातुंसचसूतसूनुः ॥ ४७ ॥ अन्योन्यमूचुर्निमिषालयस्थावरिष्टमाहात्म्यमिदंपुराणं ॥ मासस्यदिव्यंपुरुषोत्तमस्यसमीहितार्थार्पणकल्पवृक्षम् ॥ ४८ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादेपुरुषोत्तममाहात्म्यश्रवणफलकथनंनामएकत्रिंशोऽध्यायः ॥ ३१ ॥

४१०६

इदं पुस्तकं मुंबाख्यपुर्यां श्रीकृष्णदासात्मजेन खेमराजेन स्वकीये श्रीवेंकटेश्वराख्यमुद्रणालयेंकितम्
भूतैकवसुभू (१८१५) मितेशाके खशरांकभू (१९५०) मिते वैक्रमाब्दे च ॥

रुषोत्तममाराध्ययययुर्भगवदंतिकम् ॥ २७ ॥ तस्मात्सर्वप्रयत्नेनसंसेव्यःपुरुषोत्तमः ॥ सर्वसाधनतःश्रेष्ठःसर्वार्थप
दायकः ॥२८॥गोवर्धनधरंवंदेगोपालंगोपरूपिणम् ॥ गोकुलोत्सवमीशानंगोविंदंगोपिकाप्रियम् ॥ २९ ॥ कौंडि
न्येनपुराप्रोक्तमिमंमंत्रंपुनःपुनः ॥ जपन्मासंनयेद्भक्त्यापुरुषोत्तममाप्नुयात् ॥ ३० ॥ ध्यायेन्नवघनश्यामंद्विभुजंमुरली
धरम् ॥ लसत्पीतपटंरम्यंसराधंपुरुषोत्तमम् ॥ ३१ ॥ ध्यायंध्यायंनयेन्मासंपूजयन्पुरुषोत्तमम् ॥एवंयःकुरुतेभक्त्या
स्वाभीष्टंसर्वमाप्नुयात् ॥ ३२ ॥ गुह्याद्गुह्यतरंचैतन्नवाच्यंयस्यकस्यचित् ॥ मयापिकथितंनैवकस्याप्यग्रेतपोधनाः॥
॥ ३३ ॥ श्रोतव्यमेतत्सततंपुराणमभीष्टदंपावनमादरेण ॥ श्लोकैकमात्रश्रवणेनपुंसामघानिसर्वाणिनिहंतिविप्राः ॥
॥ ३४ ॥ गंगादिसर्वतीर्थेषुमज्जतोयत्फलंभवेत् ॥ तत्फलंश्रृण्वतस्तस्यमाहात्म्यंमुनिसत्तमाः ॥ ३५ ॥ इलांप्रदक्षि
णीकुर्वन्यत्पुण्यंलभतेनरः ॥ तत्पुण्यंश्रृण्वतस्तस्यमाहात्म्यंपौरुषोत्तमम् ॥ ३६ ॥ ब्राह्मणोब्रह्मवर्चस्वीक्षत्रियोवसु
धाधिपः ॥ वैश्योधनपतिर्भूयाच्छूद्रःसत्तमतांलभेत् ॥ ३७ ॥ येन्येकिरातहुणाद्याःपशुचर्यापरायणाः ॥ तेसर्वेमुक्ति
यांतिश्रुत्वामाहात्म्यमुत्तमम् ॥ ३८ ॥ पुरुषोत्तममाहात्म्यंलेखयित्वाद्विजन्मने ॥ संभूष्यवस्त्रभूषाभिर्विधिनायःप्र यच्छति ।
९ ॥ कुलत्रयंसमुद्धृत्यगोलोकंयातिदुर्लभम् ॥ यत्रास्तेगोपिकावृंदैर्वेष्टितःपुरुषोत्तमः ॥ ४० ॥ लिखि

ष्णोत्तममाराध्यययुर्भगवदंतिक हन् ॥ जांगलंदेशमासाद्यहस्तिनापुरगोऽभवं॥४२॥तत्रश्रुतंविष्णुरातोराज्यमु मा.
दायकः ॥२८॥गोवर्धनधरंवंदे ज्यमृषिभिर्बहुभिर्द्विजाः॥४३॥ तत्रसिद्धाःसमाजग्मुर्योगिनःसिद्धिभूषणाः॥ दे
न्येनपुराप्रोक्तमिमंमंत्रंपुनःपुन ॥४४॥ वातांबुपर्णाहाराश्चश्वासाहाराश्चकेचन ॥ फलाहाराःपरेकेचित्फेनाहारा
धरम् ॥ लसत्पीतपटंरम्यं कामस्तत्राहमगमंद्विजाः॥तत्राजगामभगवान्ब्रह्मभूतोमहामुनिः॥४६॥ व्यासपुत्रो
स्वाभीष्टंसर्वमाप्नुयात् ।धान् ॥ श्रीकृष्णचरणांभोजेमनसोधारणांदधत् ॥४७॥ तंदृष्ट्वर्षयोगीशंकंचुकंठंमहोन्न नाम।
॥ ३३ ॥ श्रोतव्यमेतत्खंगूढजत्रुंज्वलत्प्रभं ॥ ४८॥ अवधूतंब्रह्मभूतंष्ठीवद्भिर्बालकैर्वृतं॥ स्त्रीगणैर्धूलिहस्तैश्चम [illegible]निर्गतो यदा
॥ ३४ ॥ गंगादिसर्वे९ ॥ धूलिधूसरसर्वांगंशुकंदृष्ट्वामहामुनिं ॥ मुनयःसहसोत्तस्थुर्बद्धांजलिपुटामुदा ॥ ५०॥
णीकुर्वन्यत्पुण्यंलभेदृष्ट्वादूरतःस्थिताः॥पश्चात्तापसमायुक्ताःशुकंनत्वागृहान्ययुः॥ ५१ ॥ आसनंकल्पयांच
धाधिपः ॥ वैश्योऽमं ॥ आसेदुर्मुनयोंऽभोजकर्णिकायाश्छदाइव ॥५२॥ तत्रोपविष्टोभगवान्महामुनिर्व्यासा
याांतिश्रुत्वाब्धिचंद्रमाः ॥ पूजांदधद्ब्राह्मणकल्पितांतदाररराजताराव्रतचंद्रमाइव॥५३॥ इतिश्रीबृहन्नारदीये कृष्णो नम म—
त्म्येशुकागमनेप्रथमोऽध्यायः॥१॥सूतउवाच राज्ञापृष्टंशुकेनोक्तंश्रीमद्भागवतंपरं॥शुकप्रसादात्त

ःसर्वैविषयासक्तमानसाः ॥ १५ ॥ दारापत्यगृहासक्तस्तेषांहितकरंचयत् ॥ ममा
सि ॥ १६ ॥ त्वन्मुखाच्छ्रोतुकामोहंब्रह्मलोकादिहागतः ॥ उपकारप्रियोविष्णुरिति
कोपकारायकथासारंवदाधुना ॥ तस्यश्रवणमात्रेणनिर्भयंविंदतेपदं ॥ १८ ॥ ना
षिः ॥ कथांकथितुमारेभेपुण्यांभुवनपावनीं ॥ १९ ॥ ॥ श्रीनारायणउवाच ॥
रासेश्वरस्यरसिकाभरणस्यपुंसः ॥ वृंदावनेविहरतोव्रजभर्तुरादेःपुण्यांकथांभगव
मेषपतितोजगतांविधातातत्कर्मवत्सकथितुंभुविकःसमर्थः॥ त्वंचापिनारदमुनेभग
सामगम्यं ॥ २१ ॥ तथापिवक्ष्येपुरुषोत्तमस्यमाहात्म्यमत्यद्भुतमादरेण ॥ दारि
क्षदमाशुसेव्यं ॥ २२ ॥ ॥ नारदउवाच पुरुषोत्तमस्तुकोदेवोमाहात्म्यंतस्य
वस्तरेणवदस्वमे ॥ २३ ॥ सूतउवाच नारदोक्तंवचःश्रुत्वामुनिर्नारायणोब्रवी
पुरुषोत्तमं ॥ २४ ॥ श्रीनारायणउवाच पुरुषोत्तमेतिमासस्यनामाप्यस्तिसहेतु
च्यते ॥ २५ ॥ ऋषिभिःप्रोच्यतेतस्मान्मासःश्रीपुरुषोत्तमः ॥ तस्यव्रतविधा

रुषोत्तममाराध्यययुर्भगवदंति
दायकः ॥ २८ ॥ गोवर्धनधरं
न्येनपुराप्रोक्तमिमंमंत्रंपुनःपुन
धरम् ॥ लसत्पीतपटंरम्यंसर क
स्वाभीष्टंसर्वमाप्नुयात् ॥ वान्
॥ ३३ ॥ श्रोतव्यमेतत् खंगूढ
॥ ३४ ॥ गंगादिसर्वती ९ ॥ ध
णीकुर्वन्यत्पुण्यंलभते दृष्ट्वाद्
धाधिपः ॥ वैश्योधनं ॥ आसे
माप्नोतिश्रुत्वाब्धिचंद्रमाः ॥ पूजाद
त्म्येशुकागमनेप्रथमो-

नेनप्रीतःस्यात्पुरुषोत्तमः ॥ २६ ॥ नारदउवाच संतिमध्वादयोमासाःसेश्वरास्तेश्रुतामया ॥ तन्मध्येनश्रुतोमासः
पुरुषोत्तमसंज्ञकः ॥ २७ ॥ पुरुषोत्तमस्तुकोमासस्तस्यस्वामीकृपानिधिः ॥ पुरुषोत्तमःकथंजातस्तन्मेब्रूहिकृपानि
धे ॥ २८ ॥ स्वरूपंतस्यमासस्यसविधानंवदप्रभो ॥ किंकर्तव्यंकथंस्नानंकिंदानंतत्रसत्पते ॥ २९ ॥ जपपूजोपवासा
दिसाधनंकिंचभण्यतां ॥ तुष्येत्कृतेनकोदेवःकिंफलंवाप्रयच्छति ॥ ३० ॥ एतदन्यच्चयत्किंचित्तत्त्वंब्रूहितपोधन
अनापृष्टमपिब्रूयुःसाधवोदीनवत्सलाः ॥ ३१ ॥ नरायेभुविजायंतेपरभाग्यानुवर्तिनः ॥ दारिद्र्यपीडितानित्यंरोगि
णःपुत्रकांक्षिणः ॥ ३२ ॥ जडामूकादांभिकाश्चहीनविद्याःकुचैलिनः ॥ नास्तिकालंपटानीचाजर्जराःपरसेविनः
॥ ३३ ॥ नष्टाशाभग्नसंकल्पाःक्षीणसत्वाःकुरूपिणः ॥ रोगिणःकुष्ठिनोव्यंगानेत्रहीनाश्चकेचन ॥ ३४ ॥ इष्टमित्रक
लत्राप्तपितृमातृवियोगिनः ॥ शोकदुःखादिशुष्कांगाःस्वेष्टवस्तुविवर्जिताः ॥ ३५ ॥ पुनर्नैवंविधास्तेस्युर्यत्कृतेनश्रु
तेनच ॥ पठितेनानुचीर्णेनतद्वदस्वममप्रभो ॥ ३६ ॥ वैधव्यंवध्यतादोषहीनांगत्वदुराधयः ॥ रक्तपित्ताद्यपस्माररा
जयक्ष्मादयश्चये ॥ ३७ ॥ एतैर्दोषसमूहैश्चदुःखितान्वीक्ष्यमानवान् ॥ दुःखितोऽस्मिजगन्नाथकृपांकृत्वाममोपरि
॥ ३८ ॥ विस्तरेणवदब्रह्मन्मन्मनोमोदहेतुकं ॥ सर्वज्ञःसर्वतत्त्वानांनिधानंत्वमसिप्रभो ॥ ३९ ॥ सूतउवाच

इतिविधितनयोदितंरसालंजनहितहेतुनिशम्यदेवदेवः ॥ अभिनवघनरावरम्यवाचाऽवददभिपूज्यमुनिंसुधांशु
शांतं ॥ ४०॥ इतिश्रीबृहन्नारदीयेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादेप्रश्नविधिर्नामद्वितीयोऽध्यायः॥२॥
ऋषयऊचुः नारायणोनरसखोयदुवाचशुभंवचः ॥ नारदायमहाभागतन्नोवदसविस्तरं ॥ १ ॥ सूतउवाच
नारायणवचोरम्यंश्रूयतांद्विजसत्तमाः ॥ यदुक्तंनारदायैतत्तवक्ष्यामियथाश्रुतं ॥ २ ॥ ॥ श्रीनारायणउवाच
श्रृणुनारदवक्ष्यामियदुक्तंहरिणापुरा ॥ राज्ञेयुधिष्ठिरायैवश्रीकृष्णेनमहात्मना ॥ ३ ॥ एकदाधार्मिकोराजाऽजात
शत्रुर्युधिष्ठिरः॥ द्यूतेपराजितोदुष्टैर्धार्तराष्ट्रैश्छलप्रियैः॥ ४ ॥ समक्षमग्निसंभूताकृष्णाधर्मपरायणा ॥ दुःशासनेन
दुष्टेनकचेष्वादायकर्षिता ॥५॥ आकृष्टानिचवासांसिश्रीकृष्णेनसुरक्षिता ॥ पश्चाद्राज्यंपरित्यज्यप्रयाताःकाम्यकं
वनं ॥ ६ ॥ अत्यंतंक्लेशमापन्नाःपार्थावन्यफलाशिनः॥ विष्वक्कचाचिताःसर्वेगजाइववनौकसः॥ ७॥ अथतानदुः
खितान्द्रष्टुंभगवान्देवकीसुतः ॥ जगामकाम्यकवनंमुनिभिःपरिवारितः ॥ ८ ॥ तंदृष्ट्वासहसोत्तस्थुर्देहाःप्राणा
निवागतान् ॥ पार्थाःसस्वजिरेप्रीत्याश्रीकृष्णंप्रेमविह्वलाः ॥ ९ ॥ तौचानीनमतांभक्त्यायमौहरिपदांबुजं ॥ द्रौपदीतं
ननामाशुशनैःशनैरतंद्रिता॥ १०॥ तानूदृष्ट्वादुःखितान्पार्थान्रौरवाजिनवाससः॥ धूलिभिर्धूसरान्रूक्षान्सर्वतः
क चसंकृतान् ॥११॥ पाञ्चालीमपि

कृष्ण.... त्याव्हीमपित

न्वंगींताहशींदुःखसंवृताम् ॥ तेषांदुःखमतीवोग्रंदृष्ट्वैवातीवदुःखितः ॥ १२ ॥ धार्तराष्ट्रान्दग्धुकामोभगवान्भक्तवत्स
लः ॥ चक्रेकोपंसविश्वात्माभ्रूभंगकुटिलेक्षणः ॥ १३ ॥ कोटिकालकरालास्यःप्रलयाग्निरिवोत्थितः॥ संदष्टौष्ठपुटःप्रो
च्चैस्त्रिलोकींज्वलयन्निव ॥१४॥ सीतावियोगसंतप्तःसाक्षाद्दाशरथिर्यथा ॥ तमालक्ष्यतदावीरोबीभत्सुर्जातवेपथुः ॥
॥ १५ ॥ उत्थायकृष्णंतुष्टावबद्धांजलिपुटंभिया ॥ धर्मानुमोदितःशीघ्रंद्रौपद्याचतथापरैः ॥ १६ ॥ ॥ अर्जुनउवाच॥
हेकृष्णजगतांनाथनाथनाहंजगद्बहिः ॥ त्वमेवजगतांपातामांनपासिकथंप्रभो ॥१७॥यच्चक्षुःपतनेनैवब्रह्मणःपतनंभ
वेत् ॥ तत्कोपेनभवेत्किंवाकोवेदाकिंभविष्यति ॥१८॥ क्रोधंसंहरसंहर्तस्ताततातजगत्पते ॥ त्वद्विधानांचकोपेनजग
तःप्रलयोभवेत् ॥ १९ ॥ वंदेत्वांसर्वतत्त्वज्ञंसर्वकारणकारणम् ॥ वेदवेदांगबीजस्यबीजंश्रीकृष्णमीश्वरम् ॥ २० ॥
त्वमीश्वरोऽसृजःसर्वंजगदेतच्चराचरम्॥सर्वमंगलमांगल्यबीजरूपःसनातनः॥२१॥ सकथंस्वकृतंहन्याद्विश्वमेकापरा
धतः ॥ मशकान्भस्मसात्कर्तुंकोवादहतिमंदिरम् ॥२२॥ ॥ श्रीनारायणउवाच ॥ इतिविज्ञाप्यश्रीकृष्णंफाल्गुनःपर
वीरहा ॥ बद्धांजलिपुटोभूत्वाप्रणनामजनार्दनम्॥२३॥सूतउवाच ॥हरिःक्रोधंनिरस्याशुसौम्योभूच्चंद्रमाइव॥तमाल
क्ष्यतदासर्वेपांडवाःस्वास्थ्यमागताः ॥ २४ ॥ प्रीत्युत्फुल्लमुखाःसर्वेप्रणेमुःप्रेमविह्वलाः ॥ श्रीकृष्णंपूजयांचक्रुर्वन्यैर्मू

लफलादिभिः॥२५॥ ॥श्रीनारायणउवाच॥ ॥ ततःप्रसन्नंश्रीकृष्णंशरण्यंभक्तवत्सलम् ॥ विज्ञायावनतोभूत्वाबृहत्प्रे
मपरिप्लुतः ॥ २६ ॥ बद्धांजलिर्गुडाकेशोनामंनामंपुनःपुनः ॥ तंतथाकृतवान्प्रश्नंयथापृच्छतियंभवान्॥२७॥श्रुत्वैवंभ
गवान्दध्यौमुहूर्त्तंमनसाहरिः॥ध्यात्वाश्वास्यसुहृद्वर्गंपांचालींचधृतव्रताम् ॥ उवाचवदतांश्रेष्ठःपांडवानांहितंवचः॥
॥२८॥ ॥श्रीकृष्णउवाच॥ ॥ शृणुराजन्महाभागबीभत्सोह्यथमद्वचः॥अपूर्वोयंकृतःप्रश्नोनोत्तरंवक्तुमुत्सहे॥२९॥
एषगुह्यतरोलोकेऋषीणामपिदुर्घटः॥तथापिवक्ष्येमित्रत्वाद्भक्तत्वाच्चतवार्जुन॥ ३० ॥तदुत्तरमतीवोग्रंक्रमतःशृणुसुव्र
त॥ मध्वादयश्चयेमासालवपक्षाश्चनाडिकाः॥३१॥ यामास्त्रियामाऋतवोमुहूर्तान्ययनेउभे । हायनंचयुगान्येवपरार्धां
ताःपरेच्चये॥ ३२ ॥ नद्योर्णवन्हदाःकूपावापीपल्वलनिर्झराः ॥ लतौषधिद्रुमाश्चैवत्वक्सारापादपाश्चये॥३३॥ वन
स्पतिपुरग्रामगिरयःपत्तनानिच ॥ एतेसर्वेमूर्तिमंतःपूज्यंतेस्वात्मनोगुणैः॥३४॥नतेषांकश्चिदप्यस्तिह्यपूर्वःस्वामिव
र्जितः॥ स्वेस्वेधिकारेसततंपूज्यंतेफलदायिनः॥ ३५ ॥ स्वस्वामियोगमाहात्म्यात्सर्वेसौभाग्यशालिनः॥अधिमासः
समुत्पन्नःकदाचित्पांडुनंदन॥३६॥तमूचुःसकलालोकाअसहायंजुगुप्सितम्॥अनर्होमलमासोयंरविसंक्रमवर्जितः॥
॥३७॥ अस्पृश्योमलरूपत्वाच्छुभेकर्मणिगर्हितः ॥ श्रुत्वैतद्वचनंलोकान्निरुद्योगोहतप्रभः॥३८॥दुःखान्वितोतिखि

न्नात्माचिंताग्रस्तैकमानसः ॥ मुमूर्षुरभवत्तेनहृदयेनविदूयता ॥ पश्चाद्धैर्यंसमालंब्यमामसौशरणंगतः॥ ३९॥ प्राप्तोवै
कुंठभवनंयत्राहमवसंनर ॥ अंतर्गृहंसमागत्यमामसौदृष्टवान्परम् ॥ ४० ॥ अमूल्यरत्नरचितेहेमासिंहासनेस्थितम् ॥
तदानींमामसौदृष्ट्वादंडवत्पतितोभुवि ॥ ४१॥ प्रांजलिःप्रयतोभूत्वामुंचन्नश्रूणिनेत्रतः॥वाचागद्गदयासौम्यंबभाषेधैर्य
मुद्वहन् ॥ ४२ ॥ ॥ सूतउवाच ॥ ॥ इत्युक्त्वाबदरीनाथो विररामहामुनिः ॥ तच्छ्रुत्वापुनरेवाहनारदोभक्तवत्सलः॥
॥४३॥ ॥ नारदउवाच ॥ ॥ इत्थंगत्वाभवनममलंपूर्णरूपस्यविष्णोर्भक्तिप्राप्यंजगदघहरंयोगिनामप्यगम्यम् ॥ य
त्रैवास्तेजगदभयदोब्रह्मरूपोमुकुंदस्तत्पादाब्जंशरणमधितःकिंबभाषेऽधिमासः ॥ ४४ ॥ ॥ इतिश्रीबृहन्नारदीयपु
राणेपुरुषोत्तममाहात्म्येऽधिमासस्यवैकुंठप्रापणंनामतृतीयोऽध्यायः ॥ ३ ॥ ॥छ॥ ॥ छ ॥
॥ श्रीनारायणउवाच ॥ ॥ शृणुनारदवक्ष्येऽहंलोकानांहितकाम्यया ॥ अधिमासेनयत्प्रोक्तंहरेरग्रेशुभंवचः ॥ १ ॥
॥ अधिमासउवाच ॥ ॥ अयिनाथकृपानिधेहरेनकथंरक्षसिमामिहागतम् ॥ कृपणंप्रबलैर्निराकृतंमलमासेत्यभिधां
विधायमे॥ २॥शुभकर्मणिवर्जितंहिमांनिरधीशंमलिनंसदैवतैः ॥ अवलोकयतोदयालुताक्वगतातेद्यकठोरताकथम्॥
॥ ३ ॥ वसुदेववरांगनायथाखलकंसानलतःसुरक्षिता॥वदमांशरणागतंकथंनतथाद्यावसिदीनवत्सल॥ ४॥द्रुपदस्य

सुतायथापुराखलदुःशासनदुःखतोऽविता ॥ वदमांशरणागतंकथंनतथाद्यावसिदीनवत्सल ॥५॥ यमुनाविषतोयतोऽविताःपशुपालाःपशवोयथात्वया ॥ वदमांशरणागतंकथंनतथाद्यावसिदीनवत्सल ॥ ६ ॥ पशवःपशुपास्तदंगनाअवितादान्धनंजयाद्यथा ॥ वदमांशरणागतंकथंनतथाद्यावसिदीनवत्सल ॥७॥ पृथिवीपतयोयथावितामगधेशालयबंधनात्त्वया ॥ वदमांशरणागतंकथंनतथाद्यावसिदीनवत्सल ॥ ८ ॥ गजनायकृएत्यरक्षितोझटितिग्राहमुखाद्यथात्वया॥ वदमांशरणागतंकथंनतथाद्यावसिदीनवत्सल ॥ ९ ॥ श्रीनारायणउवाच ॥ ॥ इतिविज्ञाप्यभूमानंविररामानिरीश्वरः ॥ मलमासोऽश्रुवदनस्तिष्ठन्नग्रेजगत्पतेः ॥१०॥ तदानींश्रीहरिस्तूर्णंकृपयाप्लावितोभृशं ॥ उवाचदीनवदनंमलमासंपुरःस्थितम् ॥ ११ ॥ ॥ श्रीहरिरुवाच ॥ ॥ वत्सवत्सकिमत्यंतंदुःखमग्नोसिसांप्रतम् ॥ एतादृशंमहद्दुःखंकिंतेमनसिवर्तते॥१२॥त्वामहंदुःखसंमग्नमुद्धरिष्यामिमाशुचः ॥ नमेशरणमापन्नःपुनःशोचितुमर्हति ॥ १३ ॥इहागत्यमहादुःखीपतितोपिनशोचति॥किमर्थंत्वमिहागत्यशोकसंमग्नमानसः॥ १४॥अशोकमजरंनित्यंसानंदंमृत्युवर्जितम् ॥ वैकुंठमीदृशंप्राप्यकथंदुःखान्वितोभवान् ॥ १५॥ त्वामत्रदुःखितंदृष्ट्वावैकुंठस्थाःसुविस्मिताः॥किमर्थंमर्तुंकामोसितन्मेवत्सवदाधुना॥ १६ ॥ ॥ श्रीनारायणउवाच॥ ॥ श्रुत्वेदंभगवद्वाक्यंविभारइवभारभृत्॥श्वासोच्छ्वाससमायुक्तउवा

चमधुसूदनम्॥ १७॥ ॥ अधिमासउवाच॥ ॥ अज्ञातंकिंचिन्नैवास्तिसर्वत्रभगवंस्तव॥आकाशइवसर्वत्रविश्वंव्याप्य
व्यवस्थितः ॥ १८॥ चराचरगतोविष्णुःसाक्षीसर्वस्यविश्वदृक्॥कूटस्थेत्वयिसर्वाणिभूतानिचव्यवस्थया ॥ १९ ॥सं
स्थितानिजगन्नाथनकिंचिद्भवताविना ॥ किन्नजानासिभगवन्निर्भाग्यस्यममव्यथाम् ॥२०॥ तथापिवच्मिमहेनाथदुःख
जालमपावृतम् ॥ तादृशंनैवकस्यापिनश्रुतंनावलोकितम् ॥२१॥ क्षणालवामुहूर्ताश्चपक्षामासादिवानिशम्॥स्वामि
नामधिकारैस्तेमोदंतेनिर्भयाःसदा ॥२२॥ नमेनामनमेस्वामीनहिकश्चिन्ममाश्रयः॥तस्मान्निराकृतःसर्वैःसाधिदेवैःसु
कर्मणः ॥ २३ ॥ निषिद्धोमलमासोयमित्यंधोऽवटगःसदा ॥ तस्माद्विनष्टुमिच्छामिनाहंजीवितुमुत्सहे॥२४॥कुजीवि
तादृरंमृत्युर्नित्यदग्धःकथंस्वपेत्॥अतःपरंमहाराजवक्तव्यंनावशिष्यते ॥ २५ ॥परदुःखासहिष्णुस्त्वमुपकाराप्रियोम
तः॥ वेदेषुचपुराणेषुप्रसिद्धःपुरुषोत्तमः ॥२६ ॥ निजधर्मंसमालोच्ययथारुचितथाकुरु॥पुनःपुनःपामरेणनवक्तव्यःप्र
भुर्महान् ॥ २७ ॥ मरिष्येऽहंमरिष्येऽहंमरिष्येऽहंपुनःपुनः ॥ इत्युक्त्वामलमासोऽयंविररामविधेःसुत ॥२८॥ ततःपपा
तसहसासंनिधौश्रीरमापतेः ॥ तत्रतंपतितंदृष्ट्वासंसज्जातास्तुविस्मिता॥ २९ ॥ ॥श्रीनारायणउवाच॥ ॥ इत्युक्त्वाविर
तिमुपागतेऽधिमासेश्रीकृष्णोबहुलकृपाभरावसन्नः॥प्रावोचज्जलदगभीररावरम्यंनिर्वाणंशिशिरमयूखवन्नयंस्तम्॥३०॥

॥सूतउवाच॥ नारायणस्यनिगमाङ्घ्रिपरायणस्यपापौघवार्धिवडवाग्निवचोवदातम्॥श्रुत्वाप्रहर्षितमनामुनिराबभाषेशु
श्रूषुरादिपुरुषस्यवचांसिविप्राः॥३१॥इतिश्रीबृहन्ना॰पुराणेपुरुषोत्तममा॰मलमासविज्ञप्तिर्नामचतुर्थोऽध्यायः॥४॥
॥ नारदउवाच ॥ ॥ किमुवाचमहाभागश्रुत्वातद्वचनंहरिः ॥ चरणाग्रेनिपतितमधिमासंतपोनिधे॥१॥ ॥श्रीनारा
यणउवाच ॥ ॥ शृणुनारदवक्ष्यामियदुक्तंहरिणानघ ॥ धन्योऽसित्वंमुनिश्रेष्ठयन्मांपृच्छसिसत्कथाम् ॥२॥ ॥ श्री
कृष्णउवाच ॥ ॥ शृणुतत्रत्यवृत्तांतंप्रवक्ष्यामितवाग्रतः ॥ नेत्रकोणसमादिष्टस्तदानींहरिणार्जुन ॥३॥वीजयामास
पक्षेणतंमासंमूर्च्छितंखगः ॥ उत्थितःपुनरेवाहनैतन्मेरोचतेविभो ॥ ४ ॥ ॥ अधिमासउवाच ॥ ॥ पाहिपाहिजग
द्धातःपाहिविष्णोजगत्पते ॥ उपेक्षसेकथंनाथशरणंमामुपागतम् ॥ ५॥इत्युक्त्वावेपमानंतंविलपंतंमुहुर्मुहुः ॥ तमुवाच
हृषीकेशोवैकुंठनिलयोहरिः ॥ ६ ॥ ॥ श्रीविष्णुरुवाच॥ ॥ उत्तिष्ठोत्तिष्ठभद्रंतेविषादंवत्समाकुरु ॥त्वद्दुःखंदुर्निवार्यंमे
प्रतिभातिनिरीश्वर ॥ ७ ॥ इत्युक्त्वामनसिध्यात्वातदुपायंक्षणंप्रभुः ॥ विनिश्चित्यपुनर्वाक्यमुवाचमधुसूदनः ॥ ८ ॥
॥ श्रीविष्णुरुवाच ॥ ॥ वत्सागच्छमयासार्धंगोलोकंयोगिदुर्लभं ॥ यत्रास्तेभगवान्कृष्णःपुरुषोत्तमईश्वरः॥९॥गोपि
कावृंदमध्यस्थोद्विभुजोमुरलीधरः ॥ नवीननीरदश्यामोरक्तपंकजलोचनः ॥ १०॥शारदीयपार्वणेंदुशोभातिरोचनान

नः ॥ कोटिकंदर्पलावण्यलीलाधाममनोहरः ॥ ११॥ पीतांबरधरःस्रग्वीवनमालाविभूषितः ॥ सद्रत्नभूषणःप्रेमभूष
णोभक्तवत्सलः ॥१२॥चंदनोक्षितसर्वांगःकस्तूरीकुंकुमान्वितः ॥ श्रीवत्सवक्षाःसंभ्राजत्कौस्तुभेनविराजितः॥१३॥
सद्रत्नसाररचितकिरीटीकुंडलोज्ज्वलः ॥ रत्नसिंहासनारूढःपार्षदैःपरिवेष्टितः ॥१४॥ सएवपरमंब्रह्मपुराणपुरुषोत्त
मः ॥ स्वेच्छामयःसर्वबीजंसर्वाधारःपरात्परः ॥१५ ॥निरीहोनिर्विकारश्चपरिपूर्णतमःप्रभुः॥ प्रकृतेःपरईशानोनिर्गुणो
नित्यविग्रहः॥१६ ॥गच्छावस्तत्रत्वद्दुःखंश्रीकृष्णोव्यपनेष्यति ॥ ॥श्रीनारायणउवाच ॥ इत्युक्तातंकरेकृत्वागोलोकं
गतवान्हरिः ॥ १७॥ अज्ञानांधतमोध्वंसंज्ञानवर्त्मप्रदीपकम् ॥ ज्योतिःस्वरूपंप्रलयेपुरासीत्केवलंमुने ॥१८॥सूर्य
कोटिनिभंनित्यमसंख्यंविश्वकारणम्॥विभोःस्वेच्छामयस्यैवतज्ज्योतिरुल्बणंमहत्॥१९॥ज्योरिरभ्यंतरेलोकत्रयमे
वमनोहरं॥तस्यैवोपरिगोलोकःशाश्वतोब्रह्मवन्मुने॥२०॥त्रिकोटियोजनायामोविस्तीर्णोमंडलाकृतिः॥ तेजःस्वरूपः
सुमहद्रत्नभूमिमयःपरः॥२१॥अदृश्योयोगिभिःस्वप्नेदृश्योगम्यश्चवैष्णवैः॥ ईशेनविधृतोयोगैरंतरिक्षस्थितोवरः २२
आधिव्याधिजरामृत्युशोकभीतिविवर्जितः॥सद्रत्नभूषितासंख्यमंदिरैःपरिशोभितः ॥२३॥ तदधोदक्षिणेसव्येपंचाश
त्कोटिविस्तरात् ॥ वैकुंठःशिवलोकश्चतत्समःसुमनोहरः ॥२४ ॥कोटियोजनविस्तीर्णोवैकुंठोमंडलाकृतिः॥ लसत्पी

तपटारम्यायत्रातिष्ठंतिवैष्णवाः ॥२५॥शंखचक्रगदापद्मश्रियाजुष्टचतुर्भुजाः ॥स्त्रियोलक्ष्मीसमाःसर्वाःकूजन्नूपुरमेख
लाः॥ २६ ॥ सव्येनशिवलोकश्चकोटियोजनविस्तृतः॥ लयशून्यश्चसृष्टौचपार्षदैःपरिवारितः ॥२७॥निवसंतिमहा
भागागणायत्रकपर्दिनः ॥ भस्मोद्धूलितसर्वांगानागयज्ञोपवीतिनः ॥ २८ ॥ अर्धचंद्रलसद्भालाःशूलपट्टिशपाण
यः ॥ सर्वेगंगाधराःशूरास्त्र्यंबकाजयशालिनः॥२९॥गोलोकाभ्यंतरेज्योतिरतीवसुमनोहरम् ॥ परमाल्हादकंशश्वत्प
रमानंदकारणम्।३०।ध्यायंतेयोगिनःशश्वद्योगेनज्ञानचक्षुषा।तदेवानंदजनकंनिराकारंपरात्परम्।३१।तज्ज्योतिरंत
ररूपमतीवसुमनोहरम्॥इंदीवरदलश्यामंपंकजारुणलोचनम्॥३२॥ कोटिशारदपूर्णेंदुशोभातिरोचनाननम्॥कोटिम
न्मथसौंदर्यलीलाधाममनोहरम्॥३३॥ द्विभुजंमुरलीहस्तंसस्मितंपीतवाससम् ॥ श्रीवत्सवक्षसंभ्राजत्कौस्तुभेनविरा
जितम् ॥३४॥ सद्रत्नकोटिखचितकिरीटकटकोज्ज्वलम् ॥रत्नसिंहासनस्थंचवनमालाविभूषितम् ॥३५॥तदेवपरमं
ब्रह्मपूर्णंश्रीकृष्णसंज्ञकम् ॥ स्वेच्छामयंसर्वबीजंसर्वाधारंपरात्परम् ॥३६॥ किशोरवयसंशश्वद्गोपवेषविधायकम्॥ को
टिपूर्णेंदुशोभाढ्यंभक्तानुग्रहकारकम् ॥ ३७ ॥ निरीहंनिर्विकारंचपरिपूर्णतमंप्रभुम् ॥रासमंडपमध्यस्थंशांतंरासेश्वरंह
रिम् ॥ ३८ ॥मंगलंमंगलार्हंचसर्वमंगलमंगलम् ॥ परमानंदराजंचसत्यमक्षरमव्ययम् ॥३९॥सर्वसिद्धेश्वरंसर्वसिद्धि

रूपंचसिद्धिदम् ॥ प्रकृतेःपरमीशानंनिर्गुणंनित्यविग्रहम् ॥ ४० ॥ आद्यंपुरुषमव्यक्तंपुरुहूतंपुरुष्टुतम्॥नित्यंस्वतंत्रमे
कंचपरमात्मस्वरूपकम् ॥ ४१ ॥ ध्यायंतेवैष्णवाःशांताःशांतंशांतिपरायणम् ॥ एवंरूपंपरंबिभ्रद्भगवानेकएवसः ॥
॥ ४२ ॥ ॥श्रीनारायणउवाच॥ ॥एवमुक्त्वाततोविष्णुरधिमाससमन्वितः ॥गोलोकमगमच्छीघ्रंविरजोवेष्टितंपरम्
॥ ४३ ॥ ॥ सूतउवाच॥ ॥इतीरयित्वागिरमात्तसत्क्रियांमुनीश्वरेतूष्णिमवस्थितेमुनिः॥जगादवाक्यंविधिजोमहो
त्सवाच्छुश्रूषुरानंदनिधेर्नवाःकथाः ॥ ४४ ॥ ॥ इतिश्रीबृहन्नारदीयपुराणेश्रीनारायणनारदसंवादेपुरुषोत्तममाहा
त्म्येविष्णोर्गोलोकगमनेपंचमोऽध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
नारदउवाच वैकुंठाधिपतिर्गत्वागोलोकेकिंचकारह ॥ तद्वदस्वकृपांकृत्वामह्यंशुश्रूषवेऽनघ ॥ १ ॥ श्रीनारायणउवा
च ॥ ॥ शृणुनारदवक्ष्येऽहंयज्जातंतत्रतेनघ ॥ विष्णुर्गोलोकमगमदधिमासेनसंयुतः॥२॥तन्मध्येभगवद्धाममणि
स्तंभैःसुशोभितम्॥ ददर्शदूरतोविष्णुर्ज्योतिर्धाममनोहरम्॥३॥तत्तेजःपिहिताक्षोसौशनैरुन्मील्यलोचने॥मंदंमंदंज
गामाधिमासंकृत्वास्वपृष्ठतः ॥ ४ ॥ उपमंदिरमासाद्यसाधिमासोमुदान्वितः ॥ उत्थितैर्द्वारपालैश्चवंदितांघ्रिर्हरिःशनैः
॥ ५ ॥प्रविष्टोभगवद्धामशोभासंमुष्टलोचनः ॥तत्रगत्वाननामाशुश्रीकृष्णंपुरुषोत्तमम्॥६ ॥गोपिकावृंदमध्यस्थंरत्न

सिंहासनासनम् ॥ नत्वोवाचरमानाथोबद्धांजलिपुटःपुरः॥ ७ ॥ ॥ श्रीविष्णुरुवाच॥ वंदेविष्णुंगुणातीतंगोविंदमेकम
क्षरं ॥ अव्यक्तमव्ययंव्यक्तंगोपवेषविधायिनम् ॥८॥किशोरवयसंशांतंगोपीकांतंमनोहरम्॥ नवीननीरदश्यामंकोटि
कंदर्पसुंदरं ॥ ९ ॥ वृंदावनवनाभ्यंतेरासमंडलसंस्थितं॥लसत्पीतपटंसौम्यंत्रिभंगललिताकृतिं॥ १० ॥रासेश्वरंरास
वासंरासोल्लाससमुत्सुकं ॥ द्विभुजंमुरलीहस्तंपीतवाससमच्युतम् ॥ ११ ॥इत्येवमुक्त्वातंनत्वारत्नसिंहासनेवरे॥पार्ष
दैःसत्कृतोविष्णुःसउवासतदाज्ञया ॥ १२ ॥ ॥ श्रीनारायणउवाच ॥ इतिविष्णुकृतंस्तोत्रंप्रातरुत्थाययःपठेत् ॥
पापानितस्यनश्यंतिदुःस्वप्नःसत्फलप्रदः ॥ १३ ॥भक्तिर्भवतिगोविंदेपुत्रपौत्रविवर्द्धिनी ॥ अकीर्तिःक्षयमाप्नोतिसत्की
र्तिर्वर्द्धतेचिरं॥ १४ ॥उपविष्टस्ततोविष्णुःश्रीकृष्णचरणांबुजे॥नामयामासतंमासंवेपमानंतदग्रतः॥ १५ ॥तदापप्रच्छ
श्रीकृष्णःकोयंकस्मादिहागतः ॥ कस्माद्रुदतिगोलोकेनकश्चिद्दुःखमश्नुते ॥ १६ ॥ गोलोकवासिनःसर्वेसदानंदपरिप्लु
ताः॥स्वप्नेपिनैवशृण्वंतिदुर्वार्तांचदुरन्वयाम्॥ १७ ॥तस्मादयंकथंविष्णोमदग्रेदुःखितःस्थितः॥मुंचन्नश्रूणिनेत्राभ्यांवे
पतेचमुहुर्मुहुः ॥ १८ ॥ ॥ श्रीनारायणउवाच ॥ नवांबुदानीकमनोहरस्यगोलोकनाथस्यवचोनिशम्य॥उवाचवि
ष्णुर्मलमासदुःखंप्रोत्थायसिंहासनतःसमग्रम् ॥ १९ ॥ ॥ श्रीविष्णुरुवाच ॥ वृंदावनकलानाथश्रीकृष्णमुरलीधर ॥

॥ श्रूयतामधिमासीयंदुःखंवच्मितवाग्रतः ॥२०॥ तस्मादहमिहायातोगृहीत्वामुंनिरीश्वरम् ॥दुःखदावानलंतीव्रमेत
दीयंनिराकुरु ॥२१॥ अयंत्वधिकमासोस्तिव्यपेतरविसंक्रमः ॥ मलिनोयमनर्होस्तिशुभकर्मणिसर्वदा ॥ २२ ॥ नस्ना
नंनैवदानंचकर्तव्यंप्रभुवर्जिते ॥ एवंतिरस्कृतःसर्वैर्वनस्पतिलतादिभिः ॥२३ ॥मासैर्द्वादशभिश्चैवकलाकाष्ठालवादि
भिः ॥ अयनैर्हायनैश्चैवस्वामिगर्वसमन्वितैः॥२४ ॥इतिदुःखानलेनैवदग्धोयंमर्तुमुन्मुखः ॥ अन्यैर्दयालुभिःपश्चात्प्रे
रितोमामुपागतः॥२५॥शरणार्थीहृषीकेशवेपमानोरुदन्मुहुः ॥ सर्वंनिवेदयामासदुःखजालमसंवृतम्॥२६ ॥एतदीयं
महद्दुःखमनिवार्यंभवद्दते॥अतस्त्वामाश्रितोनूनंकरेकृत्वानिराश्रयम्॥२७॥परदुःखासहिष्णुस्त्वमितिवेदांविदोजगुः॥
अतएनंनिरातंकंसानंदंकृपयाकुरु॥२८॥त्वदीयचरणांभोजंगतोनैवावशोचते ॥ इतिवेदविदोमिथ्याकथंभाविजगत्प
ते॥२९॥मदर्थमपिकर्तव्यमेतद्दुःखनिवारणं॥ सर्वंत्यक्त्वाहमायातोयातंमेसफलंकुरु॥३०॥मुहुर्मुहुर्नवक्तव्यंकदापि
प्रभुसन्निधौ ॥ वदंत्येवंमहाप्राज्ञानित्यंनीतिविशारदाः ॥ ३१ ॥ इतिविज्ञाप्यभूमानंबद्धांजलिपुटोहरिः ॥ पुरस्तस्थौभ
गवतोनिरीक्षंस्तन्मुखांबुजम् ॥ ३२ ॥ ॥ऋषयऊचुः॥ ॥ सूतसूतवदान्योसिजीवत्वंशाश्वतीः समाः ॥पिबामोयन्मुखा
त्सेव्यंहरिलीलाकथामृतम्॥ ३३॥गोलोकवासिनासूतकिमुक्तंकिंकृतंवद॥विष्णुश्रीकृष्णसंवादःसर्वलोकोपकारकः ॥

॥३४॥ विधिसुतःकिमपृच्छदृषीश्वरंतदधुनावदसूततपस्विनः॥परमभागवतःसहरेस्तनुस्तदुदितंवचनंपरमौषधम्॥
॥३५॥इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादेपुरुषोत्तमविज्ञप्तिर्नामषष्ठोऽध्यायः॥ ६ ॥
॥ सूतउवाच ॥ भवद्भिर्यःकृतःप्रश्नस्तमचीकरदाशुगः ॥ यदुत्तरमुवाचेशस्तद्वदामितपोधनाः ॥ १ ॥ ॥ नारदउवा
च ॥ विष्टरश्रवसिमौनमास्थितेसंनिवेद्यपरदुःखमपारं ॥ किंचकारपुरुषोत्तमःपरस्तद्वदस्वबदरीपतेऽधुना ॥ २ ॥
॥ श्रीनारायणउवाच॥ ॥गोलोकनाथोयदुवाचविष्णुंतदेवगुह्यंकथयामिवत्स॥वाच्यंसुभक्तायसदास्तिकायशुश्रूषवे
दंभविवर्जिताय॥३॥सुकीर्तिकृत्पुण्यकरंयशस्यंसत्पुत्रदंवश्यकरंचराज्ञां॥दारिद्र्यदावाग्निरनल्पपुण्यैःश्राव्यंतथाका
र्यमनन्यभक्त्या॥४॥श्रीपुरुषोत्तमउवाच॥समीचीनंकृतंविष्णोयदत्रागतवान्भवान्॥मलमासंकरेकृत्वालोकेकीर्तिम
वाप्स्यसि ॥ ५ ॥यस्त्वयोरीकृतोजीवःसमयैवोररीकृतः॥अतएनंकरिष्यामिसर्वोपरिमयासमम्॥ ६ ॥गुणैःकीर्त्यानुभा
वेनषड्भगैश्चपराक्रमैः॥भक्तानांवरदानेनगुणैरन्यैश्चमामकैः॥७॥अहमेतैर्यथालोकेप्रथितःपुरुषोत्तमः ॥ तथायमपि
लोकेषुप्रथितःपुरुषोत्तमः ॥ ८ ॥ अस्मैसमर्पिताःसर्वेयेगुणामयिसंस्थिताः॥पुरुषोत्तमेतिमन्नामप्रथितंलोकवेदयोः॥
॥ ९ ॥ तदप्यस्मैमयादत्तंतवतुष्ट्यैजनार्दन ॥ अहमेवास्यसंजातःस्वामीचमधुसूदन॥ १० ॥एतन्नाम्नाजगत्सर्वंपवि

त्रंचभविष्यति ॥ मत्सादृश्यमुपागम्यमासानामधिपोभवेत् ॥ ११ ॥ जगत्पूज्योजगद्वंद्योमासोयतुभविष्यति॥पूजका
नांचसर्वेषांदुःखदारिद्र्यखंडनः ॥ १२॥सर्वेमासाःसकामाश्चनिष्कामोयंमयाकृतः ॥मोक्षदःसर्वलोकानांमत्तुल्योयंम
याकृतः ॥ १३ ॥ अकामःसर्वकामोवायोधिमासंप्रपूजयेत् ॥कर्माणिभस्मसात्कृत्वामामेवैष्यत्यसंशयम्॥ १४ ॥यदर्थं
चमहाभागायतिनोब्रह्मचारिणः ॥ तपस्यंतिमहात्मानोनिराहारादृढव्रताः ॥ १५ ॥ फलपत्रानिलाहाराःकामक्रोधवि
वर्जिताः ॥ जितेंद्रियचयाःसर्वेप्रावृट्कालेनिराश्रयाः॥ १६ ॥ शीतातपसहाश्चैवयतंतेगरुडध्वज॥तथापिनैवमेयांति
परमंपदमव्ययम् ॥ १७॥ पुरुषोत्तमस्यभक्तास्तुमासमात्रेणतत्पदम् ॥ अनायासेनगच्छंतिजरामृत्युविवर्जितम् ॥
॥ १८॥ सर्वसाधनतःश्रेष्ठःसर्वकामार्थसिद्धिदः॥ तस्मात्संसेव्यतामेवमासोयंपुरुषोत्तमः ॥ १९ ॥सीतानिक्षिप्तबीजा
निवर्धंतेकोटिशोयथा ॥तथाकोटिगुणंपुण्यंकृतंमेपुरुषोत्तमे॥ २० ॥चातुर्मास्यादिभिर्यज्ञैःस्वर्गंगच्छंतिकेचन॥तत्रत्यं
भोगमासाद्यपुनर्गच्छंतिभूतलम् ॥ २१ ॥ विधिवत्सेवतेयस्तुपुरुषोत्तममादरात् ॥ कुलंस्वकीयमुद्धृत्यमामेवैष्यत्यसं
शयम् ॥ २२ ॥ मामुपेतोत्रसंसारंजन्ममृत्युभयाकुलम् ॥ आधिव्याधिजराग्रस्तंनपुनर्यातिमानवः॥ २३ ॥ यद्गत्वान
निवर्तंतेतद्धामपरमंमम ॥ इतिच्छंदोवचःसत्यमसत्यंजायतेकथम् ॥ २४॥एतन्मासाधिपश्चाहंमयैवायंप्रतिष्ठितः॥

पुरुषोत्तमेतिमन्नामतदप्यस्मैसमर्पितम्॥२५॥तस्मादेतस्यभक्तानांममचिंतादिवानिशम्॥ तद्भक्तकामनाःसर्वाःपूर
णीयामयैवहि ॥ २६ ॥ कदाचिन्ममभक्तानामपराधोधिगण्यते॥पुरुषोत्तमभक्तानांनापराधःकदाचन ॥२७॥मदारा
धनतोविष्णोमदीयाराधनंप्रियम्॥ मद्भक्तकामनादानेविलंबेहंकदाचन॥२८॥मदीयमासभक्तानांनविलंबःकदाचन
॥ मदीयमासभक्तायेममैवातीववल्लभाः ॥ २९ ॥ यएतस्मिन्महामूढाजपदानादिवर्जिताः॥ सत्कर्मस्नानरहितादेवती
र्थद्विजद्विषः ॥ ३० ॥जायंतेदुर्भगादुष्टाःपरभाग्योपजीविनः॥नकदाचित्सुखंतेषांस्वप्नेपिशशशृंगवत्॥३१ ॥तिरस्कु
र्वंतियेमूढामलमासंममप्रियम्॥ नाचरिष्यंतियेधर्मंतेसदानिरयालयाः ॥ ३२ ॥पुरुषोत्तममासाद्यवर्षेवर्षेतृतीयके॥
नाचरिष्यंतिधर्मंयेकुंभीपाकेपतंतिते ॥ ३३ ॥ इहलोकेमहद्दुःखंपुत्रपौत्रकलत्रजम्॥ प्राप्नुवंतिमहामूढादुःखदावानल
स्थिताः ॥ ३४॥ तेकथंसुखमेधंतेयेषामज्ञानतोगतः॥श्रीमान्पुण्यतमोमासोमदीयःपुरुषोत्तमः॥३५ ॥याःस्त्रियःसुभ
गाःपुत्रसुखसौभाग्यहेतवे ॥ पुरुषोत्तमेकरिष्यंतिस्नानदानार्चनादिकम्॥ ३६ ॥ तासांसौभाग्यसंपत्तिसुखपुत्रप्रदोह्य
हम्॥ यासांमासोगतःशून्योमन्नामापुरुषोत्तमः ॥ ३७॥नतासामनुकूलोऽहंनसुखंस्वामिजंभवेत्॥भ्रातृपुत्रधनानांच
सुखंस्वप्नेपिदुर्लभम्॥ ३८॥ तस्मात्सर्वात्मनासर्वैःस्नानपूजाजपादिकम्॥ विशेषेणप्रकर्तव्यंदानंशक्त्यनुसारतः ॥

॥ ३९ ॥ येनाहमर्चितोभक्त्यामासेस्मिन्पुरुषोत्तमे ॥ धनपुत्रसुखंभुक्त्वापश्चाद्गोलोकवासभाक् ॥४०॥ममाज्ञयाजनाः
सर्वेपूजयिष्यंतिमामकम् ॥ सर्वेषामपिमासानामुत्तमोयंमयाकृतः॥ ४१॥अतस्त्वमधिमासस्यार्चितांत्यक्त्वारमापते॥
गच्छवैकुंठमतुलंगृहीत्वापुरुषोत्तमम् ॥ ४२ ॥ ॥श्रीनारायणउवाच॥ ॥इतिरसिकवचोनिशम्यविष्णुःप्रबलमु
दापरिगृह्यमासमेनम् ॥ नवजलदरुचंप्रणम्यदेवंझटितिजगामनिजालयंखगेन ॥ ४३ ॥ इतिश्रीबृहन्नारदीयपुराणेपु
रुषोत्तममाहात्म्येश्रीनारायणनारदसंवादेऽधिमासस्यैश्वर्यप्राप्तिर्नामसप्तमोऽध्यायः ॥ ७॥ ॥ ॥ ॥ ॥
॥ सूतउवाच ॥ ॥ नारदःकृतवान्प्रश्नंपुनरेवतपोधनाः ॥ विष्णुश्रीकृष्णसंवादंश्रुत्वासंतुष्टमानसः ॥ १ ॥ ॥ नारद
उवाच ॥ ॥ वैकुंठंगतवतिरुक्मिणीशेकिंजातंतदनुवदप्रभोमे ॥वृत्तांतंहरिसुतकृष्णयोश्चसर्वेषांहितकरभाविपुंसोः ॥
॥ २ ॥ इतिसंप्रश्नसंहृष्टोभगवान्बदरीपतिः ॥ उवाचपुनरेवामुंजगदानंददंबृहत् ॥ ३ ॥ ॥ श्रीनारायणउवाच ॥ ॥
अथश्रीरुक्मिणीनाथोवैकुंठंगतवान्मुदा ॥ तत्रगत्वाधिमासंतंवासयामासनारद ॥ ४॥तत्रत्यवसतिंप्राप्यमोदमानोभ
वत्तदा ॥ मासानामधिपोभूत्वारमतेविष्णुनासह ॥ ५ ॥ द्वादशस्वपिमासेषुमलमासंवरंप्रभुः ॥ विधायमनसातुष्टोबभूव
प्रकृतिप्रियः ॥ ६ ॥ अथार्जुनमुवाचेदंभगवान्भक्तवत्सलः ॥ युधिष्ठिरंचपांचालींनिरीक्षन्कृपयामुने ॥७॥ ॥ श्रीकृ

षणउवाच ॥ जानेऽहंराजशार्दूलतपोवनमुपागतैः ॥भवद्भिर्दुःखसंमग्नैर्नादृतःपुरुषोत्तमः ॥ ८॥वृंदावनकलानाथव
ल्लभःपुरुषोत्तमः॥प्रमादाद्गतवान्मासोभवतांकाननौकसाम् ॥९॥युष्माभिर्नैवविज्ञातोभयद्वेषसमन्वितैः ॥ गांगेयद्रोण
कर्णेभ्योभयसंत्रस्तमानसैः॥१०॥कृष्णद्वैपायनादाप्तविद्याराधनतत्परे॥इंद्रकीलंगतवतिबीभत्सौरणशालिनि॥११॥
तद्वियोगपरिक्लिष्टैर्नज्ञातःपुरुषोत्तमः ॥ युष्माभिःकिंप्रकर्तव्यमदृष्टमवलंब्यताम्॥ १२ ॥ अदृष्टंयादृशंपुंसांतादृशंभास
तेसदा॥अवश्यमेवभोक्तव्यमदृष्टजनितंफलम्॥१३॥सुखंदुःखंभयंक्षेममदृष्टात्प्राप्यतेजनैः ॥तस्माददृष्टनिष्ठैश्वभव
द्भिःस्थीयतांसदा ॥ १४ ॥ अथापरंप्रवक्ष्यामिभवतांदुःखकारणं ॥ सेतिहासंमहाराजश्रूयतांमन्मुखादहो ॥ १५ ॥
॥ श्रीकृष्णउवाच ॥ पांचालीयंमहाभागापूर्वजन्मनिसुंदरी ॥ मेधाविद्विजमुख्यस्यपुत्रीजातासुमध्यमा ॥ १६॥ का
लेनगच्छताराजन्संजातादशवार्षिकी ॥ रूपलावण्यललितानयनापांगशालिनी॥१७॥चातुर्यगुणसंपन्नापितुरेकैव
पुत्रिका ॥ वल्लभातीवतेनेयंचतुरागुणसुंदरी ॥ १८ ॥लालितापुत्रवन्नित्यंनकदाचित्प्रलंभिता ॥ साहित्यशास्त्रकुशला
नीतावपिविशारदा॥ १९ ॥तन्मातास्वर्गतापूर्वंपित्रासापोषितामुदा॥पार्श्वस्थालिसुखंदृष्ट्वापुत्रपौत्रसुखस्पृहा ॥२०॥
तर्कयंतीतदाबालामामेवंचकथंभवेत्॥ गुणभाग्यनिधिर्भर्तासुखदःसत्सुताःकथम्॥२१ ॥एवंमनोरथंचक्रेदैवेनध्वंसि

तंपुरा ॥ किंकृत्वाकिंविदित्वामेकमुपास्येसुरेश्वरम् ॥ २२ ॥ कंवामुनिमुपातिष्ठेकिंवातीर्थमुपाश्रये ॥ ममभाग्यंकथंसु
संभर्ताकोपिनवांछति ॥ २३ ॥ पंडितोपिपितामूढोममभाग्यवशादहो ॥ विवाहकालेसंप्राप्तेनदत्तासदृशेवरे ॥ २४ ॥
अध्यक्षाहंसखीमध्येकुमारीदुःखपीडिता ॥ नाहंस्वामिसुखाभिज्ञायथाचालिगणोमम ॥ २५ ॥ ममभाग्यवतीमाता
कथंस्वर्गंगतापुरा ॥ एवंचिंताकुलाबालामनोरथमहोदधौ ॥ २६ ॥ निमग्नामोहसलिलेशोकमोहोर्मिपीडिता ॥ मेधा
वीऋषिराजोसौविचचारमहीतले ॥ २७ ॥ कन्यादाननिमित्तंचविचिन्वन्सदृशंवरम् ॥ तादृशंवरमप्राप्यनिराशःस्व
मनोरथे ॥ २८ ॥ सुतास्वकीयभाग्याभ्यांभग्नसंकल्पपंजरः ॥ अवापदैवयोगेनज्वरंतीव्रंसुदारुणम् ॥ २९ ॥ स्फुटत्सर्वां
गसंभिन्नतापज्वालासमाकुलः ॥ श्वासोच्छ्वाससमायुक्तोमहादारुणमूर्च्छया ॥ ३० ॥ प्रस्खलन्निपतन्भूमौमदिरामत्तव
द्भृशम् ॥ आगच्छन्नेवभवनंसपपातधरातले ॥ ३१ ॥ यावत्सुतासमायातापितरंभयविह्वला ॥ तावन्मुमूर्षुःसंजाताभू
सुरस्तामनुस्मरन् ॥ ३२ ॥ भाविनार्थबलेनैवसहसाजातवेपथुः ॥ कन्यादानप्रसंगोत्थमहोत्सवविवर्जितः ॥ ३३ ॥
अथप्राचीनगार्हस्थ्यकृतधर्मपरिश्रमात् ॥ संसारवासनांत्यक्त्वाहरौचित्तमधारयत् ॥ ३४ ॥ सस्मारश्रीहरिंतूर्णंमेधावी
पुरुषोत्तमम् ॥ इंदीवरदलश्यामंत्रिभंगललिताकृतिम् ॥ ३५ ॥ रासेशराधारमणप्रचंडदोर्दंडदूराहतनिर्जरारे ॥ अत्युग्र

दावानलपानकर्तःकुमारिकोत्तारितवस्त्रहर्तः ॥ ३६ ॥ श्रीकृष्णगोविंदहरेमुरारेराधेशदामोदरदीननाथ॥मांपाहिसंसा
रसमुद्रमग्नंनमोनमस्तेहृषिकेश्वराय ॥ ३७॥ इतिमुनिवचनंनिशम्यदूराज्झटितिययुश्चचरामुकुंदलोकात् ॥ तदनुमृ
तमुनिंकरेगृहीत्वाचरणसरोरुहमीयुरीश्वरस्य ॥३८॥ प्राणोत्क्रमणमालोक्यहाहेतिसासुतारुदत् ॥ अंकेकृत्वापितुर्देहं
विललापसुदुःखिता ॥ ३९ ॥ कुररीवाचिरंसातुविलप्यभृशदुःखिता॥ उवाचपितरंबालाजीवंतमिवविह्वला ॥ ४० ॥
॥ बालोवाच ॥ ॥ हाहापितःकृपासिंधोआत्मजानंददायक॥कस्यांकेमांनिधायाद्यगतोसिवैष्णवंपुरम्॥ ४१ ॥पितृ
हीनांचमांतातकोवासंभावयिष्यति॥ नभ्रातानैवबंधुश्चनमेमातातपस्विनी॥४२॥भोजनाच्छादनेचिंतांकोमेतातक
रिष्यति ॥ कथंतिष्ठाम्यहंशून्येवेदध्वनिविवर्जिते॥४३॥आश्रमेतेमुनिश्रेष्ठअरण्यइवनिर्जने ॥ अतःपरंमरिष्यामिजी
वनेकिंप्रयोजनम् ॥ ४४ ॥ असंपाद्यैववैवाहंविधिंदुहितृवत्सल॥क्वगतोसिपितस्तातइहागच्छतपोनिधे ॥ ४५ ॥ वा
णींवदसुधाकल्पांकथंतूष्णीमवस्थितः ॥ उत्तिष्ठोत्तिष्ठहेतातचिरंसुप्तोसिसांप्रतम् ॥ ४६ ॥ इत्युक्त्वाश्रुमुखीबालाविल
लापमुहुर्मुहुः ॥ मुक्तकंठंरुरोदार्ताकुररीवसुदुःखिता॥४७॥तत्सुतारोदनंश्रुत्वाविप्रास्तद्वनवासिनः ॥ अतीवकरुणं
को वारोदित्यस्मिंस्तपोवने॥४८॥मेधाऋषेःसुताशब्दंशनैर्निश्चित्यतापसाः ॥ ससंभ्रमाःसमाजग्मुर्हाहाकारसमन्वि

ताः॥ ४९ ॥ आगत्यददृशुःसर्वेसुतांकस्थंमृतंमुनिं ॥ ततःसंरुरुदुःसर्वेमुनयःकाननौकसः ॥ ५०॥ सुतोत्संगाच्छवंनी
त्वाश्मशानेशिवसंनिधौ॥अंत्येष्टिंविधिनाकृत्वातेऽदहन्काष्ठवेष्टितम्॥५१॥ततःकन्यांसमाश्वास्यसर्वेतेस्वगृहान्ययुः॥
कन्याधैर्यंसमालंब्ययथाशक्त्यकरोद्व्ययम् ॥ ५२ ॥ इत्यौर्ध्वदेहिकविधिंप्राणिधायापित्र्यंपुत्रीनिवासमकरोच्चतपोवने
स्मिन् ॥ साविऽ्यथेपितृजदुःखदवाग्निदग्धारंभेववत्समरणात्सुरभीवबाला॥ ५३ ॥ इतिबृहन्नारदीयपुराणेपुरुषोत्तम
माहात्म्येश्रीनारायणनारदसंवादेकुमारीविलापोनामाष्टमोऽध्यायः॥ ८ ॥ ॥ छ ॥ ॥ छ ॥
॥ सूतउवाच ॥ ॥ ततस्तंविस्मयाविष्टःपप्रच्छनारदोमुनिः ॥ मेधाविद्विजवर्यस्यसुतावृत्तांतमद्भुतम् ॥ १ ॥ नारद
उवाच ॥ ॥ मुनेमुनिसुतातत्रकिंचकारतपोवने॥कोवामुनिवरस्तस्याःपाणिग्रहमचीकरत्॥२॥श्रीनारायणउवाच ॥
निवसंत्यास्ततस्तस्याःकियान्कालोविनिर्गतः ॥ स्मारंस्मारंस्वपितरंशोचंत्याश्चमुहुर्मुहुः॥ ३ ॥शून्यसद्मनिसंविष्टांयू
थभ्रष्टांमृगीमिव ॥गलद्बाष्पौघनयनांज्वलद्धृदयपंकजाम्॥४॥विनिःश्वासपरांदीनांसंरुद्धामुरगीमिव॥चिंतयंतीमप
श्यंतींदुःखपारंकृशोदरीम्॥ ५॥तामाससादभगवान्भविष्यद्बलनोदितः॥यदृच्छयावनेतस्मिम्परमःकोपनोमुनिः॥
॥ ६ ॥ यद्विलोकनमात्रेणत्रस्येदपिशतक्रतुः ॥ जटाकलापसंछन्नःसाक्षादिवसदाशिवः॥७॥ यस्त्वज्जनन्याराजेंद्रशैश

वेतिप्रसादितः ॥ त्रिदशाकर्षिणींविद्यांददावस्यैसुपूजितः ॥ ८ ॥ येनाहमपिभूपालसर्वदेवनमस्कृतः॥ रथेसंयोजितः
साक्षाद्रुक्मिण्यासहनारद ॥ ९ ॥ उभाभ्यांचालितेमार्गैरथेदुर्वाससान्विते ॥अत्युग्रयातृषाशुष्यत्ताल्वोष्ठपुटयानया॥
॥ १० ॥ सूचितोहंजलार्थिन्यास्कंधस्थयुगयापुरा॥गच्छन्नेवपदाग्रेणसंपीड्यवसुधातलम् ॥ ११ ॥ आनीतवान्भोगव
तींप्रियाप्रेमपरिप्लुतः ॥ सैवोर्ध्वगामिनीभूत्वातावन्मात्रेणवारिणा ॥ १२ ॥न्यवारयन्महाराजरुक्मिणीतृषमुल्बणाम् ॥
तद्दृष्ट्वातत्क्षणोद्भूतक्रोधेनप्रज्वलन्निव ॥ १३ ॥ प्रलयाग्निरिवोत्तिष्ठन्शशापकोपनोमुनिः ॥अहोश्रीकृष्णतेत्यंतंवल्लभा
रुक्मिणीसदा ॥ १४ ॥ यद्भवान्मामवज्ञायप्रियाप्रेमपरिप्लुतः॥पाययामासपानीयंमाहात्म्यंदर्शयन्स्वकम्॥ १५ ॥ दंप
त्योरुभयोरेववियोगोस्तुयुधिष्ठिर ॥ इतियोदत्तवान्शापंसएवमुनिसत्तमः ॥ १६ ॥ साक्षाद्रुद्रांशसंभूतःकालरुद्रइवा
परः ॥ अत्रेरुग्रतपःकल्पवृक्षादिव्यफलंमहत् ॥१७॥ पतिव्रताशिरोरत्नाऽनुसूयागर्भसंभवः ॥दुर्वासानाममेधावीयथा
वैमूर्तिमत्तपः ॥ १८ ॥ नैकतीर्थजलक्लिन्नजटाभूषितसच्छिराः ॥तमालोक्यसमायांतंकुमारीशोकसागरात्॥ १९ ॥उ
न्मज्ज्योत्थायधैर्येणववंदेचरणौमुनेः॥ नत्वास्वाश्रममानीयजानकीवाल्मिकिंयथा॥ २० ॥अर्घ्यपाद्यैर्वन्यफलैःपुष्पैश्च
विविधैर्मुनिं ॥ स्वागतंपृच्छ्यसाबालापूजयामाससादरं ॥ ततःसविनयाराजन्नुवाचमुनिकन्यका॥ २१ ॥बालोवाच॥

नमस्तेस्तुमहाभागअत्रिगोत्रादिवाकर ॥ कुतोधिगमनंसाधोदुर्भगायाममाश्रमे॥ ममभाग्योदयोजातस्तवागमनतोमु
ने ॥ २२ ॥ अथवामत्पितुःपुण्यप्रवाहप्रेरितोभवान् ॥ संभावयितुंमामेवह्यागतोमुनिसत्तमः॥२३॥ भवादृशांपादरज
स्तीर्थरूपंमहात्मनां॥स्पृशंत्याःसफलंजन्मसफलंचाद्यमेव्रतम्॥२४॥अद्यमेसफलंपुण्यमद्यमेसफलोभव॥भवादृशा
महापुण्यायन्मेदृष्टिपथंगताः ॥ २५ ॥ एवमुक्ताचसाबालातस्थौतूष्णींतदग्रतः ॥ सस्मितंमुनिराहेदंदुर्वासाःशंकरांश
जः ॥ २६ ॥ ॥ दुर्वासाउवाच ॥ ॥ साधुसाधुद्विजसुतेकुलमभ्युद्धृतंपितुः॥मेधाऋषेःसुतपसःफलमेतादृशीसुता॥
॥ २७ ॥ कैलासादहमागच्छंज्ञात्वातेधर्मशीलताम्॥त्वदाश्रममनुप्राप्तस्त्वयासंपूजितोस्म्यहम्॥२८॥गामिष्यामिव
रारोहेशीघ्रंबदरिकाश्रमम् ॥ द्रष्टुंनारायणंदेवंसनातनमुनीश्वरम् ॥ २९ ॥ तपश्चरंतमेकाग्रमत्युग्रंलोकहेतवे ॥ ॥बा
लोवाच ॥ ॥ ऋषेत्वद्दर्शनादेवशुष्कोमेशोकसागरः॥३०॥अतःपरंशुभंभावियस्मात्संभावितात्वया॥समुद्भूतबृहज्ज्वा
लदावहव्यभुजंमुने ॥ ३१ ॥ किंनवेत्सिदयासिंधोतंनिर्वापयशंकर॥हर्षहेतुर्नमेकश्चिद्दृश्यतेसुविचारतः॥३२॥नमा
तानपिताभ्रातायोमेधैर्यंप्रयच्छति ॥ कथंकारमहंजीवेदुःखसागरपीडिता ॥ ३३ ॥ यांयांदिशंप्रपश्यामिसासाशून्या
विभातिमे ॥ ममदुःखप्रतीकारंकुरुशीघ्रंतपोनिधे॥३४॥ नमांकामयतेकश्चित्पाणिग्रहणहेतवे ॥ अतःपरंभविष्यामि

वृषलीतिमहद्भयम्॥ ३५॥तस्मान्नजायतेनिद्रानरुचिर्भोजनेमम॥ब्रह्मन्मुमूर्षुरस्म्येवइतिमेनिश्चयोऽधुना॥ ३६ ॥इत्यु
क्त्वाश्रुमुखीबालाविरराम तदग्रतः ॥ दुर्वासास्तदुपायार्थंविचारमकरोत्तदा॥ ३७ ॥ ॥ श्रीनारायणउवाच ॥ ॥ इति
मुनितनयावचोनिशम्यबहुलतमामुनिराड्विचार्यछंदः ॥अतिशयकृपयाविलोक्यबालांकिमपिहितंनिजगादसारभूतं
॥ ३८ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येदुर्वासस्तपोवनागमनंनामनवमोऽध्यायः ॥ ९ ॥ ॥छ॥
॥ नारदउवाच ॥ ॥किंविचार्यबृहद्धामापरमःकोपनोमुनिः॥अब्रवीदृषिकन्यांतांतन्मेब्रूहितपोनिधे ॥ १ ॥सूतउवाच॥
नारदस्यवचःश्रुत्वाप्रोवाचबदरीपतिः ॥ दुर्वासोवचनंगुह्यंसर्वेषांहितकृद्द्विजाः ॥ २ ॥ ॥ श्रीनारायणउवाच ॥ शृणु
नारदवक्ष्येऽहंयदुक्तंमुनिनातदा ॥ मेधावितनयादुःखमपनेतुंकृपालुना ॥ ३ ॥ ॥दुर्वासाउवाच॥ ॥ शृणुसुंदरिवक्ष्या
मिगुह्याद्गुह्यतरंमहत् ॥ आख्येयंनैवकस्यापित्वदर्थंतुविचारितम् ॥ ४ ॥ नविस्तरंकरिष्यामिसमासेनब्रवीमिते॥इत
स्तृतीयःसुभगेमासस्तुपुरुषोत्तमः॥५॥तस्मिन्स्नातोनरस्तीर्थेमुच्यतेभ्रूणहत्यया ॥ एतत्तुल्योनकोप्यन्यःकार्तिकादि
षुसुंदरि॥६॥सर्वेमासास्तथापक्षाःपर्वाण्यन्यानियानिच ॥ पुरुषोत्तममासस्यकलांनार्हंतिषोडशीम्॥ ७ ॥साधनानिस
मस्तानिनिगमोक्तानियानिच ॥ मासस्यैतस्यनार्हंतिकलामपिचषोडशीम्॥८॥ द्वादशाब्दसहस्राणिगंगास्नानेनयत्फ

लं ॥ गोदावरीसकृत्स्नानाद्यत्फलंसिंहगेगुरौ ॥९ ॥ तदेवफलमाप्नोतिमासेवैपुरुषोत्तमे ॥सकृत्सुस्नानमात्रेणयत्रकुत्रा
पिसुंदरि ॥ १० ॥श्रीकृष्णवल्लभोमासोनाम्नाचपुरुषोत्तमः॥तस्मिन्संसेवितेबालेसर्वंभवतिवांछितम्॥ ११ ॥तस्मान्निषे
वयाशुत्वंमासंतंपुरुषोत्तमम्॥मयापिसेव्यतेसोऽयंपुरुषोत्तमवन्मुदा ॥ १२ ॥ एकदाभस्मसात्कर्तुमंबरीषंक्रुधामया ॥
मुक्ताकृत्यातदाबालेसुनाभंहरिणाज्वलत् ॥ १३ ॥ मामेवभस्मसात्कर्तुंतदानींप्रेरितंमयि॥पुरुषोत्तमव्रतादेवतच्चक्रंसं
न्यवर्तत ॥ १४ ॥ त्रैलोक्यंभस्मसात्कर्तुंसमर्थंतच्चसुंदरि ॥ मय्यकिंचित्करंजातंतदामेविस्मयोऽभवत् ॥ १५ ॥ त
स्माद्भजस्वसुभगेश्रीमंतंपुरुषोत्तमम् ॥ इत्युक्त्वामुनिशार्दूलोविरराममुनेःसुताम् ॥१६ ॥ ॥श्रीकृष्णउवाच॥ ॥ दु
र्वासोवचनंश्रुत्वाबालामूढधियावदत् ॥ भाविनाप्रेरिताराजन्नसूयाप्रेरितासती ॥ १७ ॥ दूर्वाससंमुनिश्रेष्ठंमनसिक्रो
धसंयुता ॥ ॥ बालोवाच ॥ ॥ नमह्यंरोचतेब्रह्मन्यदुक्तंभवतामुने॥ १८ ॥कथंमाघादयोमासाअकिंचित्करतांग
ताः ॥ कथंकार्तिकमासंत्वमूनंवदसितद्वद ॥१९ ॥ वैशाखःसेवितःकिंवानदास्यतिसुकामितम् ॥ सदाशिवादयोदेवाः
फलदाःकिंनसेविताः॥ २० ॥ अथवाभुविमार्तंडोदेवःप्रत्यक्षदर्शनः ॥ सकिंनदाताकामानांदेवीचजगदंबिका ॥ २१॥
गणेशःसेवितःकिंवानसंयच्छतिकामितम् ॥ व्यतीपातादिकान्योगान्देवान्शर्वादिकानपि ॥ २२ ॥ सर्वानुल्लं

द्यवदतस्त्रपाकिंतेनजायते ॥ अयंतुमलिनोमासःसर्वकर्मविगर्हितः ॥ २३ ॥ असूर्यसंक्रमःश्रेष्ठःक्रियतेचकथंमुने ॥ वेदाहंसर्वदुःखानांपारदंश्रीहरिंपरम् ॥ २४ ॥ नान्यंपश्यामिभूदेवचिंतयंतीदिवानिशं ॥ रामाद्वाजानकीजानेः शंकरात्पार्वतीपतेः ॥ २५ ॥ नान्यःकोपिमहान्देवोयोमेदुःखंव्यपोहति ॥ एतान्विहायविप्रेंद्रकथंस्तौषिमलंमुने ॥ ॥ २६ ॥एवमुक्तस्तयाविप्रपुत्र्यासक्रोधनोमुनिः ॥ जाज्वल्यमानोवपुषाक्रोधसंरक्तलोचनः ॥२७॥ तथापिनशशापैनांमित्रजांकृपयान्वितः ॥ मूढेयंनैवजानातिहिताहितमपूर्णधीः ॥२८॥पुरुषोत्तममाहात्म्यंदुर्ज्ञेयंविदुषामपि॥ किमुताल्पधियांपुंसांकुमारीणांविशेषतः ॥ २९ ॥ पितृहीनाकुमारीयंबालादुःखाग्निभार्जिता ॥ अतीवोग्रतरंशापंमदीयंसहते कथम् ॥ ३० ॥ इत्येवंकृपयाक्रोधंसंजहारमनःस्थितम् ॥ स्वस्थोभूत्वामुनिःप्राहतांबालामतिविव्हलाम् ॥३१॥ ॥दुर्वासाउवाच ॥ अहोबालेनमेकोपोमित्रजेत्वयिकश्चन ॥ यत्तेमनसिनिर्भाग्येयथारुचितथाकुरु ॥ ३२ ॥ अपरंश्रूयतां बालेभविष्यंकिंचिदुच्यते ॥ पुरुषोत्तममासस्ययत्त्वयाऽनादरःकृतः ॥ ३३ ॥ सर्वथातत्फलंभाविइहवापरजन्मनि ॥ अतःपरंगमिष्यामिनरनारायणालयम् ॥ ३४ ॥ नचशप्तामयाभीरुमन्मित्रंतेपितायतः ॥हिताहितंनजानासिबालभावाच्छुभाशुभम् ॥ ३५ ॥ स्वस्तितेस्तुगमिष्यामिमास्तुकालात्ययोमम ॥ शुभंशुभेतरंभाविनकेनाप्यनुलंघ्यते॥ ३६॥

॥ श्रीकृष्णउवाच ॥ ॥इत्युदीर्यजगामाशुतामसस्तापसोमुनिः॥तत्क्षणंनिष्प्रभासाभूत्पुरुषोत्तमहेलया ॥३७॥विमृश्यसुचिरंकालंतत्कालफलदंशिवम्॥आराधयामिदेवेशंतपसापार्वतीपतिम्॥३८॥इतिनिश्चित्यमनसामेधावितनया नृप ॥ दुष्करंतत्तपःकर्तुमियेषस्वाश्रमेस्थिता ॥ ३९ ॥ ॥ सूतउवाच॥ ॥ आर्षेयीप्रबलमुनेर्वचोविनिंद्यप्रोद्युक्तांधकरिपुसेवनेवनेस्वे ॥ लक्ष्मीशंबहुलफलप्रदंविहायसावित्रीपतिमपितादृशंनिरस्य ॥ ४० ॥ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादेकुमारीशिवाराधनोद्योगोनामदशमोऽध्यायः ॥ १० ॥ ॥ छ ॥

नारदउवाच ॥ ॥ अचीकरत्कुमारीयंमहत्कर्मसुदुष्करम् ॥ मुनीनामपिसर्वेषांतन्मेवदमहामुने ॥ १ ॥ श्रीनारायणउवाच ॥ ॥ अथारभतकल्याणीतपःपरमदारुणम्॥चिंतयंतीशिवंशांतंपंचवक्त्रंसनातनम्॥२ ॥भुजंगभूषणंदेवंनंदिभृंगिनिषेवितम् ॥ चतुर्विंशतितत्त्वैश्चगुणैस्त्रिभिरभिष्टुतम्॥३॥महासिद्धिभिरष्टाभिःप्रकृत्यापुरुषेणच ॥ चंद्रखंडलसद्भालंजटाजूटाविराजितम् ॥ ४ ॥ चचारदुश्चरंबालातमुद्दिश्यपरंतपः ॥ पंचाग्नीनांचमध्येसास्थायिनीग्रीष्मगेरवौ॥ ॥ ५ ॥ हेमंतेशिशिरेचैवशीतवार्यंतरास्थिता ॥ व्यक्तवक्त्रातथारेजेजलस्थंकमलंयथा ॥ ६ ॥ शिरोधःप्रसृतश्यामनीलालकविगुंठिता ॥ जंबालवल्लरीपुंजैर्वेष्टितेवाबभौजले ॥७॥ ब्रह्मरंध्रोद्गतश्रीमद्धूमराजिर्व्यदृश्यत॥नलिनंसेव्यमा

नेवमिलिंदालिःप्रसार्पिणी ॥ ८ ॥ वर्षास्वनावृताशेतेस्थंडिलेवृसिकान्विते ॥ संध्ययोरुभयोस्तन्वीधूमपानमचीकर
त् ॥ ९ ॥ पुरंदरःपरांचिंतामवापाश्रुत्यतत्तपः ॥ दुर्धर्षादिविजैःसर्वैःस्पृहणीयामहर्षिभिः ॥ १० ॥ एवंतपसिवृत्ताया
मार्षैय्यांनृपनंदन ॥ गतान्यब्दसहस्राणिनवराजन्यभूषण ॥ ११ ॥ संतुष्टस्तपसातस्याभगवान्पार्वतीपतिः ॥
दर्शयामासबालायैनिजंरूपमगोचरम् ॥ १२ ॥ तद्दृष्ट्वासहसोत्तस्थौदेहःप्राणमिवागतम् ॥ तपःकृशापिसाबालाहृ
ष्टपुष्टातदाभवत् ॥ १३ ॥ भूरिवातपसंक्लिष्टादेवमीढागरीयसी ॥ साबालाऽवनताभूत्वाववंदेगिरिजापतिम् ॥ १४ ॥
मानसैरुपचारैस्तंसंपूज्याविश्ववंदितम् ॥ तुष्टावजगतांनाथंभक्तियुक्तेनचेतसा ॥ १५ ॥ ॥ बालोवाच ॥ ॥ अयेशै
लजावल्लभप्राणनाथप्रभोभर्गभूतेशगौरीशशंभो ॥ तमःसोमसूर्याग्निदिव्यत्रिनेत्रमदाधारमुंडास्थिमालिन्नमस्ते ॥
॥ १६ ॥ नरोनेकतापाभिभूतांगपीडःपरंघोरसंसारवार्धौनिमग्नः ॥खलव्यालकालोग्रदंष्ट्राभिदष्टोविमुच्येद्भवंतंशरण्यं
प्रपन्नः ॥ १७ ॥ विभोयेनबाणःस्वकीयीकृतश्चमृताजीवितालर्कभूपालपत्नी ॥ दयानाथभूतेशचंडीशभव्यभवत्राणमृ
त्युंजयप्राणनाथ ॥ १८ ॥ मखध्वंसकर्तःसमस्तारिहर्तःसदासेवकानांभवध्वंसकर्तः ॥ नमोजन्महर्तःपुरासृष्टिकर्त
स्त्वदीयानवप्राणनाथाघहर्तः ॥१९ ॥ इत्येवंमनसावाचाशिवंस्तुत्वातपस्विनी ॥ विरराममहाभागामेधावितनयानृ

प ॥ २० ॥ ॥श्रीकृष्णउवाच ॥ ॥ तत्कृतंस्तोत्रमाकर्ण्यतपसोग्रतरेणच ॥प्रसन्नवदनांभोजस्तामुवाचसदाशिवः॥
॥ २१ ॥ शिवउवाच ॥वरंवरयभद्रंतेयस्तेमनसिवांछितः ॥ प्रसन्नोस्मिमहाभागेमामाखिदतपस्विनि॥२२॥ तदाक
र्ण्यकुमारीयंमहानंदपरिप्लुता ॥ उवाचवचनंराजन्सुप्रसन्नंसदाशिवम् ॥ २३ ॥ ॥ बालोवाच॥ ॥दीननाथदयासिंधो
प्रसन्नश्चेन्ममोपरि ॥तदामत्कामितंदेहिमाविलंबंकुरुप्रभो ॥ २४ ॥पतिंदेहिपतिंमह्यंपतिंपतिमहंवृणे॥पतिंदेहिमहा
देवनान्यन्मेचिंतितंहृदि॥२५॥एवमुक्तातदार्षेयीविररामकपर्दिनम्॥तदाकर्ण्यमहादेवोजगादमुनिकन्यकाम्॥२६॥
शिवउवाच ॥ ॥ त्वयायत्स्वमुखेनोक्तंतदस्तुमुनिकन्यके॥पंचकृत्वस्त्वयायस्मात्पतिःसंप्रार्थितोऽधुना॥२७॥तस्मा
त्पंचभविष्यंतिपतयस्तवसुंदरि ॥ शूराःसकलधर्मज्ञाःसाधवःसत्यविक्रमाः ॥२८॥ यज्वानःस्वगुणख्याताःसत्यसंधा
जितेंद्रियाः॥त्वन्मुखप्रेक्षकाःसर्वेराजन्यागुणशालिनः॥२९॥ ॥श्रीकृष्णउवाच॥ ॥ इत्याकर्ण्यवचस्तस्यधूर्जटेरन
तिप्रियम् ॥ उवाचावनताभूत्वाबालावाक्यविशारदा॥३०॥ ॥बालोवाच॥ ॥एवंमेगिरिजाकांतमास्तुलोकेऽतिकौ
तुकम् ॥ एकस्याएकएवास्तिभर्तानार्याःसदाशिव ॥३१॥ नदृष्टानश्रुताक्वापिनार्येकापंचभर्तृका ॥एकस्यपंचपत्न्य
स्तुपुरुषस्यभवंतिहि ॥ ३२ ॥ त्वदीयाहंकथंशंभोभवेयंपंचभर्तृका॥ नैवार्हसिवचस्त्वेवंमयिवक्तुंकृपानिधे॥३३॥तवैव

जायतेलज्जात्वदीयाहंयतःप्रभो ॥ इत्याकर्ण्यवचस्तस्याःशंकरःप्राहतांपुनः ॥३४॥ ॥शिवउवाच ॥ ॥ मास्तुतेस्मि
न्भवेभीरुभव्यंतत्परजन्मनि ॥ अयोनिसंभवातत्रभविष्यसितपोबलात् ॥३५॥भर्तृजंसुखमासाद्यततोगंत्रीपरंपदम्॥
दुर्वासामेप्रियामूर्तिःसत्वयाऽवमतःपुरा ॥ ३६ ॥ सचेत्कोपावृतःसुभ्रुनिर्दहेद्भुवनत्रयम्॥त्वयागर्वातिरेकेणब्रह्मतेजःप्र
मर्दितम्॥३७॥पुरुषोत्तमस्त्वयामासोनकृतोभगवत्प्रियः ॥ यस्मिन्नर्पितमैश्वर्यंश्रीकृष्णेनात्मनःस्वकम् ॥ ३८॥ अहं
ब्रह्मादयोदेवानारदाद्यास्तपस्विनः ॥ यदादेशकराबालेतदाज्ञांकोविलंघयेत् ॥३९॥समासोनत्वयामूढेपूजितोलोक
पूजितः ॥ अतस्तेपंचभर्तारोभविष्यंतिद्विजात्मजे॥४०॥ नान्यथाभावितद्बालेपुरुषोत्तमखंडनात् ॥ योवैनिंदतितंमा
संसयातिघोररौरवम्॥४१॥विपरीतंभवेत्तस्यनकदाप्यन्यथाभवेत्॥पुरुषोत्तमस्ययेभक्ताःपुत्रपौत्रधनान्विताः॥४२॥
ऐहिकामुष्मिकींसिद्धिंयातायास्यंतियांतिच ॥ वयंसर्वेपिगीर्वाणाःपुरुषोत्तमसेविनः ॥ ४३॥ यस्मिन्संसेवितेशीघ्रंप्रीय
तेपुरुषोत्तमः॥ सेवनीयंकथंमासंनभजामसुमध्यमे॥४४॥अत्युत्कटानांमहतांवचोमिथ्याकथंवद॥अनुनेयाहिमुनयः
सदसद्वादवादिनः॥४५॥वदन्नेवंनीलकंठःक्षिप्रमंतर्दधेहरः ॥ चकितासावदद्बालायूथभ्रष्टामृगीयथा॥४६॥ ॥सूतउ
वाच ॥ ॥शशांकलेखांकितभालदेशेसदाशिवेशैवदिशंप्रयाते ॥ चिंताबबाधेमुनिराजकन्यांहत्यायथावृत्रहणंमुनीशाः

॥ ४७ ॥ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येशिववाक्यंनामएकादशोध्यायः ॥ ११ ॥ ॥ छ ॥
॥ नारदउवाच ॥ ॥ शितिकंठेगतेनाथबालाकिमकरोच्छुचा ॥ तन्मेवदविनीतायशुश्रूषाधर्मसिद्धये ॥ १ ॥ ॥ श्री
नारायणउवाच ॥ ॥ एवमेवपुरापृष्टःश्रीकृष्णःपांडुसूनुना ॥ यदुवाचवचोराज्ञेतन्मेनिगदतःशृणु ॥ २ ॥ ॥ श्रीकृ
ष्णउवाच ॥ ॥ एवंगतेशिवेराजन्साबालाविगतप्रभा ॥ निःश्वासपरमाभीतासाश्रुनेत्राकृशोदरी ॥ ३ ॥ हृदयाग्निल
सज्ज्वालाज्वलितांगीकुमारिका ॥ दावाग्निदग्धपत्रासालतेवसातपस्विनी॥ ४ ॥दुःखमीर्ष्यामाप्तवत्यामेवंकालोमहा
न्गतः॥ असौतामवचरुकंदताद्दशींतापसींप्रभुः ॥ ५॥ सहसातांसमापन्नांफणीवाखुनिवेशनम्॥इतिकालेनबलिनाव
शंनीतातपस्विनी ॥६॥प्रावृण्मेघावृतेव्योम्निविद्युत्सौदामिनीयथा॥तथाऽऽश्रमेस्वकेनष्टातपसादग्धकल्मषा ॥७॥
तदानीमेवधर्मिष्ठोयज्ञसेनोनराधिपः ॥ बृहत्संभारसंपन्नमकरोद्यज्ञमुत्तमम् ॥८॥ तद्यज्ञकुंडादुद्भूताकुमारीकनकप्रभा
॥ सेयंद्रुपदशार्दूलतनयाप्रथिताभुवि॥९॥द्रौपदीसर्वलोकेषुह्यार्षेयीयापुराऽभवत् ॥ सेयंस्वयंवरेराजन्मत्स्यवेधेकृते
सति॥१०॥लब्धार्जुनेनपांचालीक्षुभितेराजमंडले॥तृणीकृत्यनृपान्सर्वान्भीष्मकर्णादिकान्बहून् ॥ ११॥ सेयंकच
ग्रहंप्राप्तादुष्टदुःशासनान्मुने ॥ वचांसिकर्णशूलानिश्राविताबरवर्णिनी ॥ १२ ॥ मयाचोपेक्षिताराजन्पुरुषोत्तमहेल

नात् ॥ यदामयिकृतस्नेहामन्नामान्यवदन्मुहुः ॥१३॥ दामोदरदयासिंधोकृष्णकृष्णजगत्पते ॥ हेनाथहेरमानाथकेश
वक्लेशनाशन ॥ १४ ॥ नमातानतातोनचभ्रातृवर्गोनसख्योनजामिर्नवैभागिनेयः ॥नबंधुर्नचेष्टोनवैप्राणनाथोहृषीके
शसर्वंभवानेवमेस्ति॥ १५॥गोविंदगोपिकानाथदीनबंधोदयानिधे॥दुःशासनपराभूतांकिंनजानासिमांप्रभो ॥ १६ ॥
दुःशासनपराभूतातदाद्रुपदनंदिनी ॥ मदीयस्मरणंप्राप्ताविस्मृतापिमयापुरा ॥ १७ ॥ शीघ्रंगरुडमारुह्यतत्रागत्य
स्थितेनवै॥पूरितानिमयाराजन्नस्यैवासांस्यनेकशः॥१८॥सदामयिकृतस्नेहामत्प्राणामत्परायणा ॥ ममातिवल्लभासा
ध्वीसखीमेप्राणसन्निभा ॥१९॥ तथाप्युपेक्षितेयंसापुरुषोत्तमहेलनात् ॥ पुरुषोत्तमतिरस्कारकर्तारंपातयाम्यहम् ॥
॥ २०॥ सर्वथामुनिदेवानांसेव्योयंपुरुषोत्तमः ॥ किंपुनर्मानुषाणांतुसर्वार्थफलदायकः ॥ २१ ॥ तस्मादाराधयस्वैन
मागामिपुरुषोत्तमम्॥वर्षेचतुर्दशेपूर्णेसर्वंतेभविताशुभम्॥२२॥व्यलोकिचिकुरव्रातोयैरस्याःपांडुनंदन ॥ तन्नारीणा
महंराजन्निर्वापिष्येऽलकान्रुषा॥२३॥सुयोधनादिभूपालान्सर्वान्नेष्येयमक्षयम्॥सर्वशत्रुक्षयंकृत्वात्वंचराजाभविष्यसि
॥ २४ ॥ नमेक्षीरोदतनयाप्रियानापिहलायुधः ॥ नतथादेवकीदेवीप्रद्युम्नोनापिसात्यकिः ॥ २५ ॥ यादृशामेप्रिया
भक्तास्तादृशोनास्तिकश्चन॥ येनमेपीडिताभक्तास्तेनाहंपीडितःसदा॥२६॥हेष्योमेनास्तितत्तुल्योयमस्तस्यफलप्र

दः ॥ नावलोक्योमयादुष्टोदंडार्थमपिपांडव ॥ २७ ॥ ॥ श्रीनारायणउवाच ॥ ॥श्रीकृष्णस्तान्समाश्वास्यपांडवान्
द्रौपदींतथा॥कुशस्थलींजिगमिषुरुवाचमधुसूदनः ॥ २८ ॥ राजन्नद्यगमिष्यामिद्वारकांविरहाकुलां ॥ वसुदेवोमहाभा
गोबलदेवोममाग्रजः ॥ २९ ॥ मन्माता देवकीदेवीगदसांबादयोऽपरे ॥ आहुकाद्याश्चयदवोरुक्मिण्याद्याश्चयाःस्त्रियः
॥ ३० ॥ सर्वेतेऽनिमिषैर्नेत्रैर्मदागमनकांक्षिणः ॥ मामेवचिंतयंत्येवंमद्दर्शनसमुत्सुकाः॥ ३१ ॥ ॥श्रीनारायणउवाच॥
इत्युक्तवंतंदेवेशंकथंचित्पांडुनंदनाः ॥ हरिप्रयाणमालक्ष्यतमूचुर्गद्गदाक्षरम् ॥ ३२ ॥जीवनंनोभवानेवयथावारिजलौ
कसां ॥ पुनर्दर्शनमल्पेनकालेनास्तुजनार्दन ॥ ३३ ॥ पांडवानांहरिर्नाथोनान्यःकश्चिज्जगत्त्रये ॥ इत्थंसर्वेवदंत्यद्धा
तस्मान्नःपाहिसर्वदा॥ ३४ ॥नविस्मार्यावयंसर्वेत्वदीयाजगदीश्वर॥अस्मच्चेतोमिलिंदानांजीवनंत्वत्पदांबुजम्॥ ३५ ॥
अवलंबनमेवास्तुप्रार्थयामोमुहुर्मुहुः ॥ असकृत्पांडुपुत्रेषुगृणत्स्वेवंयदूद्वहः ॥ ३६ ॥ मंदंमंदंसमारुह्यरथंप्रेमपरि
प्लुतः ॥ ययौद्वारवतीमेनान्पराकृत्यानुगच्छतः ॥ ३७ ॥ ॥ श्रीनारायणउवाच ॥ अथश्रीद्वारकानाथेगतेद्वारवतीं
तदा ॥ राजापिसानुजस्तप्यंस्तीर्थानिविचचारह ॥ ३८ ॥ पुरुषोत्तमेमनःकृत्वाब्रह्मन्श्रीभगवत्प्रिये ॥ अनुजानाहकृ
ष्णांचविष्वक्सेनवचःस्मरन् ॥ ३९ ॥ अहोश्रुतमतीवोग्रंमाहात्म्यंपौरुषोत्तमम् ॥ कथंसुखानिलभ्यंतेनाभ्यर्च्यपुरुषो

त्तमम् ॥ ४० ॥ सधन्योभारतेवर्षेसपूज्यःश्रेष्ठएवसः ॥ विविधैर्नियमैर्यस्तुपूजयेत्पुरुषोत्तमम् ॥ ४१ ॥ एवंसर्वेषुती
र्थेषुभ्रमंतःपांडुनंदनाः ॥ पुरुषोत्तमासाद्यव्रतंचेरुर्विधानतः॥४२॥ तदंतेराज्यमतुलमवापुर्गतकंटकम् ॥ पूर्णेचतुर्द
शेवर्षेश्रीकृष्णकृपयामुने ॥ ४३ ॥ दृढधन्वानृपःपूर्वंसूर्यवंशसमुद्भवः ॥ पुरुषोत्तममासस्यसेवनान्महतींश्रियम्॥४४॥
पुत्रपौत्रसुखंचैवभुक्त्वाभोगाननेकशः ॥ जगामभगवल्लोकमगम्यंयोगिनामपि ॥ ४५ ॥ एतन्मासस्यमाहात्म्यमतुलं
मुनिसत्तम ॥ नाहंवक्तुंसमर्थोऽस्मिकल्पकोटिशतैरपि ॥ ४६ ॥ ॥ सूतउवाच ॥ ॥ पुरुषोत्तममासस्यकृष्णद्वैपा
यनादहं॥माहात्म्यंश्रुतवान्विप्राः सोपिवक्तुंशशाकनो॥४७॥अस्यमाहात्म्यमखिलंवेत्तिनारायणःस्वयम्॥अथवाभग
वान्साक्षाद्वैकुंठनिलयोहरिः ॥ ४८ ॥ ब्रह्मादिदेवानतपादपीठगोलोकनाथेनस्वकीकृतस्य ॥ सर्वंमहात्म्यंपुरुषो
त्तमस्यदेवोनजानातिकुतोमनुष्यः ॥ ४९ ॥ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसं
वादेपुरुषोत्तमव्रतोपदेशोनामद्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
ऋषयऊचुः ॥ ॥ सूतसूतमहाभागवदनोवदतांवर ॥ दृढधन्वाकथंप्रापपुरुषोत्तमसेवनात्॥ १ ॥ सौराज्यंपुत्रपौत्रादी
न्ललनांचपतिव्रतां ॥ कथंचभगवल्लोकमवापयोगिदुर्लभम्॥२॥शृण्वतांतेमुखांभोजात्कथासारंमुहुर्मुहुः॥अलंबुद्धि

नेंनस्तातयथापीयूषपानतः ॥३॥ अतोविस्तरतोब्रूहिइतिहासंपुरातनम्॥अस्मद्भाग्यबलेनैवयात्रासंदर्शितोभवान्॥
॥ ४ ॥ ॥ सूतउवाच ॥ ॥सनातनमुनिर्विप्रानारदायपुरातनम् ॥ इतिहासमुवाचेमंसएवप्रोच्यतेऽधुना ॥ ५ ॥श्रृ
ण्वंतुमुनयःसर्वेचरित्रंपापनाशनम् ॥ यथाधीतंगुरुमुखाद्राज्ञोवैदृढधन्वनः ॥ ६ ॥ ॥ श्रीनारायणउवाच ॥ ॥ श्रृणुरा
जन्प्रवक्ष्येहंभूपस्यदृढधन्वनः ॥ कथांपुरातनींरम्यांस्वर्धुनीमिवपावनीम् ॥ ७ ॥ आसीद्धैहयदेशस्यगोप्ताश्रीमान्मही
पतिः॥ चित्रधर्मेतिविख्यातोधीमान्सत्यपराक्रमः॥८॥तस्यपुत्रोऽतितेजस्वीदृढधन्वेतिविश्रुतः॥ससर्वगुणसंपन्नःसत्य
वाग्धार्मिकःशुचिः ॥ ९ ॥ आकर्णांतविशालाक्षःपृथुवक्षामहाभुजः ॥ अवर्धतमहातेजाःसार्धंगुणगणैरसौ॥ १० ॥
अधीत्यसांगान्निगमांश्चतुरश्चतुरोमुदा ॥ सकृन्निगदमात्रेणप्रागधीतानिवस्फुटम् ॥ ११ ॥ दक्षिणांगुरवेदत्त्वासंपू
ज्याविधिवच्चतम् ॥ गुरोरनुज्ञयाधीमान्पितुःपुरमजीगमत् ॥ १२ ॥ जनयन्नयनानंदंनिजपत्तनवासिनाम् ॥ चित्र
धर्मापितंपुत्रंदृष्ट्वालेभेपरांमुदम् ॥ १३ ॥ युवानंसर्वधर्मज्ञंप्रजानांपालनेक्षमम् ॥ अतःपरंकिमत्रास्तिसंसारेसारव
र्जिते ॥ १४ ॥ आराधयामिश्रीकृष्णंद्विभुजंमुरलीधरम् ॥ प्रसन्नवदनंशांतंभक्तानामभयप्रदम् ॥ १५ ॥ ध्रुवांबरी
षशर्यातिययातिप्रमुखान्नृपाः ॥ शिबिश्चरंतिदेवश्चशशबिंदुर्भगीरथः ॥ १६ ॥ भीष्मश्चविदुरश्चैवदुष्यंतोभरतोपि

वा ॥ पृथुरुत्तानपादश्चप्रल्हादोऽथविभीषणः ॥ १७ ॥ एतेचान्येचराजानस्त्यक्त्वाभोगाननेकशः ॥ अध्रुवेणध्रुवंप्राप्ता
आराध्यपुरुषोत्तमम् ॥ १८ ॥ अतोमयापिकर्तव्यमरण्येहरिसेवनम् ॥ छित्त्वास्नेहमयंपाशंदारागारसुतादिषु ॥
॥ १९ ॥ इतिनिश्चित्यमनसासमर्थैंदृढधन्वनि ॥ धुरंन्यस्यजगामाशुविरक्तःपुलहाश्रमम् ॥ २० ॥ तत्रगत्वातपस्ते
पश्रीकृष्णंमनसास्मरन् ॥ निस्पृहःसर्वकामेभ्यो निराहारोनिरंतरम् ॥२१॥ कियत्कालंतपस्तप्त्वाहरेर्धामजगामसः॥
दृढधन्वापिशुश्रावस्वपितुर्वैष्णवींगतिम् ॥ २२ ॥ हर्षशोकसमाविष्टोह्यकरोदौर्ध्वदेहिकम् ॥ पितृभक्त्यामहीपालोवि
द्वज्जनवचःस्थितः ॥ २३ ॥ पुष्करावर्तकेपुण्येनगरेऽत्यंतशोभिते ॥ राज्यंचकारभूपालोनीतिशास्त्रविशारदः ॥ २४ ॥
तस्यशीलवतीभार्यानाम्नायागुणसुंदरी ॥ विदर्भराजतनयारूपेणाप्रतिमाभुवि ॥ २५ ॥ पुत्रान्सासुषुवेदिव्यांश्चतु
रश्चतुरान्शुभान् ॥ पुत्रींचारुमतींनामसर्वलक्षणसंयुताम् ॥ २६ ॥ चित्रवाक्चित्रवाहश्चमणिमांश्चित्रकुंडलः ॥ सर्वे
तेमानिनांशूराविख्यातानामभिःपृथक् ॥ २७ ॥ दृढधन्वागुणैःख्यातःशांतोदांतोदृढव्रतः ॥ रूपवान्गुणवान्शूरःश्री
मान्प्रकृतिसुंदरः ॥ २८ ॥ वेदवेदांगविद्वाग्मीधनुर्विद्याविशारदः ॥ सुनिर्जितारिषड्वर्गःशत्रुसंघविदारणः ॥ २९ ॥
क्षमयापृथिवीतुल्योगांभीर्यैंसागरोपमः ॥ पितामहसमःसाम्येप्रसादेगिरिशोपमः ॥ ३० ॥ एकपत्नीव्रतधरोरघुना

थइवापरः ॥ अत्युग्रवीर्यःसद्धर्मीकार्तवीर्यइवापरः ॥ ३१ ॥ ॥ श्रीनारायणउवाच ॥ ॥ एकदानिशिसुप्तस्याचिं
तासीत्तस्यभूपतेः ॥ अहोऽयंवैभवःकेनपुण्येनमहताभवत् ॥३२॥ नमयाचतपस्तप्तंनदत्तंनहुतंक्वचित्॥ कमिदंपरि
पृच्छामिममभाग्यस्यकारणम् ॥३३॥ एवंचिंतयतस्तस्यरजनीविरतिंगता ॥ ब्राह्मेमुहूर्तउत्थायस्नानंकृत्वायथावि
धि ॥ ३४ ॥ उपस्थायार्कमुद्यंतंसंतर्प्यभगवत्कलाः ॥ दत्त्वादानानिविप्रेभ्योनमस्कृत्वाऽश्वमारुहत् ॥ ३५ ॥ ततोर
ण्यंजगामाशुमृगयासक्तमानसः ॥ मृगान्वराहान्शार्दूलान्जघानगवयान्बहून् ॥ ३६ ॥ कश्चिन्मृगोरतोऽरण्येवा
णेनदृढधन्वना ॥ वनाद्वनांतरंयातोबाणमादायसत्वरम् ॥ ३७॥ शोणितस्रुतिमार्गेणराजाप्यनुययौमृगम्॥ मृगःकु
त्रापिसंलीनोराजाबभ्रामतद्वनम् ॥ ३८ ॥ तृषाक्रांतःसकासारंददर्शसागरोपमम्॥तत्रगत्वाशुपीत्वासौपानीयंतीरमा
गतः ॥ ३९ ॥ ततोददर्शन्यग्रोधंघनच्छायंमहातरुम् ॥ तज्जटायांनिबद्ध्याश्वंनिषसादमहीपतिः ॥ ४० ॥ तत्रागम
त्खगःकश्चित्कीरःपरमशोभनः ॥ मानुषीमीरयन्वाणीमतुलांनृपमोहिनीम् ॥ ४१॥शुकःपपाठसुश्लोकमेकमेवपुनःपु
नः ॥ संबोध्यदृढधन्वानमेकाकिनमुपस्थितम्॥४२॥विद्यमानातुलसुखमालोक्यातीवभूतले ॥ नचिंतयासितत्त्वंत्वंत
त्कथंपारमेष्यसि॥४३॥वारंवारमिदंपद्यंपपाठनृपतेःपुरः॥श्रुत्वातस्यवचोराजामुमुदेमुमुहेपिच॥४४॥किमेतदुक्तवा

न्कीरएकंपद्यंपुनःपुनः॥ नारिकेलमिवागम्यंदुर्बोधंसारसंभृतम्॥ ४५ ॥किंवानायंभवेत्कृष्णद्वैपायनसुतःपरः॥ श्रीकृ
ष्णसेवकंमूढंमग्नंसंसारसागरे ॥ ४६॥ विष्णुरातमिवोद्धर्तुंकृपयामांसमागतः॥ इतिचिंतयतस्तस्यतत्सेनासमुपागता
॥४७॥कीरस्त्वदर्शनंप्राप्तोबोधयित्वानराधिपम्॥राजास्वपुरमागत्यकीरवाक्यमनुस्मरन्॥ ४८ ॥ वाच्यमानोपिनावो
चद्विनिद्रस्त्यक्तभोजनः ॥ राज्ञीरहःसमागत्यराजानंपर्यपृच्छत ॥ ४९ ॥ ॥ गुणसुंदर्युवाच ॥ ॥ भोभोपुरुषशार्दूल
दौर्मनस्यमिदंकुतः॥उत्तिष्ठोत्तिष्ठभूपालभुंक्ष्वभोगान्वचोवद ॥५० ॥एवंस्त्रियानुनीतोपिनकिंचिदवदन्नृपः॥ स्मरन्शु
कवचस्तथ्यंदुर्ज्ञेयममरैरपि ॥ ५१ ॥ सापिबालाविनिःश्वस्यभर्तृदुःखातिपीडिता ॥ नबुबोधनिजस्वामिचिंताकारण
मुत्कटम्॥५२॥एवंचितानिमग्नस्यराज्ञःकालःकियान्गतः॥संदेहसागरोत्तारेहेतुंनैवाभिपश्यत ॥ ५३ ॥ ॥नारदउ
वाच ॥ ॥इतिचिंतयतोधरापतेर्वदजातंदृढधन्वनश्श्वाकिं॥विमलंचरितंहिवैष्णवंकलुषंहंतिमनाक्श्रुतम्मुने॥५४॥ ॥इ
तिश्रीबृहन्नारदीयपु॰पुरुषोत्तममा॰श्रीनारायणनारदसंवादेदृढधन्वोपाख्यानेदृढधन्वनोमनःखेदोनामत्रयोद॰ ।१३
॥ श्रीनारायणउवाच ॥ ॥अथचिंतातुरस्यास्यगृहंवाल्मीकिराययौ॥ योरामचरितंदिव्यंचकारपरमाद्भुतम्॥१॥दूरा
दालोक्यभूपालःसमुत्थायससंभ्रमं ॥ अनीनमत्तच्चरणौदंडवद्भक्तिसंयुतः॥ २ ॥ संपूज्यस्थापयामासतमृषिंपरमासने

॥ पादावंकगतौकृत्वाकराभ्यांसमलालयत् ॥ ३ ॥ पादावनेजनीरापःशिरसाधारयन्मुदा ॥ उवाचास्निग्धयावाचास्मरन्
कीरवचोनृपः ॥ ४ ॥ ॥ दृढधन्वोवाच ॥ भगवन्कृतकृत्योहंभाग्यवानस्मिसांप्रतम् ॥ अद्यमेसफलंजन्मह्यद्यार्थो
धिगतःप्रभो ॥ ५ ॥ श्रुतंमेसफलंजातंयद्भवानक्षिगोचरः ॥ किंवर्ण्यंमेमहद्भाग्यंजगत्पावनपावन ॥ ६ ॥ ॥ श्रीनारा
यणउवाच ॥ इत्युक्त्वामुनिशार्दूलंविररामसभूपतिः ॥ वाल्मीकिरपितंदृष्ट्वाराजानंविनयान्वितम् ॥ ७ ॥ उवाचपर
मप्रीतोहर्षयन्जनतांमुनिः ॥ ॥ वाल्मीकिरुवाच ॥ ॥ साधुसाधुनृपश्रेष्ठत्वय्येतदुपपद्यते ॥ ८ ॥ चिंतातुरःकथंराजन्
वदसर्वंमनोगतम् ॥ किंचिद्वक्तुंस्पृहातेस्तितद्वदस्वमहामते ॥ ९ ॥ ॥ दृढधन्वोवाच ॥ ॥ भवदीयपदांभोजकृपयामे
सुखंसदा ॥ परंत्वेकोमहान्विद्वन्संदेहोहृदयेमम ॥ १० ॥ तमपाकुरुशल्यंत्वंवन्यकीरमुखोद्गतम् ॥ कदाचिन्मृगया
कामोगतोहंगहनेवने ॥ ११ ॥ भ्रमन्नपश्यंकासारंतत्रपीतंजलंमया ॥ श्रमापनोदनाकांक्षीमहान्यग्रोधमाश्रितः ॥ १२
स्निग्धच्छायंसुनिबिडंमनोनयननंदनम् ॥ तत्रापश्यंस्थितंकीरंमनोमोदविधायकम् ॥ १३ ॥ दत्तदृष्टिरहंयावज्जातस्तस्मि
न्पतत्रिणि ॥ तावन्मांसंमुखीभूयश्लोकमेकंपपाठह ॥ १४ ॥ विद्यमानातुलसुखमालोक्यातीवभूतले ॥ नचिंतयसित
त्त्वंत्वंतत्कथंपारमेष्यासि ॥ १५ ॥ इतिवाचःशुकेनोक्ताआकर्ण्याहंसुविस्मितः ॥ नतज्जानाम्यहंब्रह्मन्किमुवाचहरिच्छदः

॥१६॥इमंमेहार्दसंदेहंभवानुच्छेत्तुमर्हति॥ममराज्यसुखंपुत्राश्चत्वारश्चारुदर्शनाः॥१७॥पत्नीपतिव्रतारम्यागजाश्वर
थपत्तयः॥समृद्धिरतुलाब्रह्मन्केनपुण्येनमेऽधुना॥१८॥ एतत्सर्वंसमासेनविचार्यवक्तुमर्हसि ॥ श्रुत्वावाक्यानिभूपस्य
वाल्मीकिर्मुनिसत्तमः ॥ १९ ॥ प्राणायामपरोभूत्वामुहूर्तंध्यानमास्थितः॥ करामलकवद्विश्वंभूतंभव्यंभवच्चयत्॥२०
विलोक्यहृदिनिश्चित्यराजानंप्रत्युवाचसः॥ ॥वाल्मीकिरुवाच ॥ शृणुभूपतिशार्दूलप्रागजन्मचरितंतव॥२१॥पुराज
न्मनिराजेंद्रभवान्द्रविडदेशजः॥द्विजःकश्चित्सुदेवाख्यस्ताम्रपर्णीतटेवसन् ॥२२॥ धार्मिकःसत्यवादीचयथालाभेन
तोषवान् ॥ वेदाध्ययनसंपन्नोविष्णुभक्तिपरायणः ॥ २३ ॥ अग्निहोत्रादियागैश्चतोषयामासतंहरिम् ॥ सदैवंवर्तमान
स्यभार्यासीद्वरवर्णिनी॥२४ ॥ गौतमीतिसुविख्यातागौतमस्यसुताशुभा॥पतिंपर्यचरत्प्रेम्णाभवानीवभवंप्रभुम्॥ २५
गृहमेधविधौतस्यवर्तमानस्यधर्मतः॥व्यतीतःसुमहान्कालःप्रापासौ संततिंनहि ॥२६॥एकदासनसंविष्टःसेव्यमानः
स्वकांतया॥उवाचवचनंविप्रोविषण्णोगद्गदाक्षरम्॥ २७ ॥अयिसुंदरिसंसारेसुखंनास्तिसुतात्परम् ॥ लोकांतरसुखं
पुण्यंतपोदानसमुद्भवम्॥ २८ ॥संततिःशुद्धवंश्याहिपरत्रेहचशर्मणे ॥ तमप्राप्यवरंपुत्रंजीवितंममनिष्फलम्॥२९ ॥
नलालितोमयापुत्रोवेदार्थोनप्रबोधितः ॥ नोद्वाहश्चकृतस्तस्यवृथाजन्मगतंमम ॥३०॥ सद्योमेमृतिरेवास्तुनह्यायुश्च

प्रियंमम ॥ इत्थंप्रियवचःश्रुत्वासुंदरीखिन्नमानसा ॥ ३१ ॥ समाश्वासयितुंधीराप्रियवाक्यविशारदा ॥ अवीवदद्वचःसौम्यंप्रियप्रेमपरिप्लुता ॥ ३२ ॥ ॥ गौतम्युवाच ॥ ॥ मामाप्राणेश्वरब्रूहितुच्छवाक्यानिसांप्रतम् ॥ भवद्विधाभागवतानैवमुह्यंतिसूरयः ॥ ३३ ॥ सत्यधर्मपरोसित्वंजितःस्वर्गस्त्वयाविभो ॥ कथंपुत्रैःसुखावाप्तिर्ज्ञानिनस्तवसुव्रत ॥ ३४ ॥ चित्रकेतुःपुराब्रह्मन्पुत्रशोकेनतापितः ॥ सनारदेनांगिरसाभ्येत्यसंतारितोभवत् ॥ ३५ ॥ तथांगराजादुष्पुत्राद्वेनाद्वनमगान्निशि ॥ तथातेसंततिःस्वामिन्दुःखदाचभविष्यति ॥ ३६ ॥ तथापितवसत्पुत्रलालसाचेत्तपोधन ॥ आराधयजगन्नाथंहरिंसर्वार्थदंमुदा ॥ ३७ ॥ यमाराध्यपुराब्रह्मन्कर्दमःपुत्रमाप्तवान् ॥ सांख्याचार्यस्तुतंदेवंकपिलंयोगिनांवरम् ॥ ३८ ॥ धर्मपत्न्यावचश्चेत्थंश्रुत्वाविप्रशिरोमणिः ॥ निश्चित्यैवंतयासार्धंताम्रपर्णीतटंगतः ॥ ३९ ॥ स्नात्वाथविरजेपुण्येचचारपरमंतपः ॥ शुष्कपर्णजलाहारःपंचमेपंचमेदिने ॥ ४० ॥ चत्वार्यब्दसहस्राणिगतान्येवंतपोनिधेः ॥ तस्यैतत्तपसाब्रह्मंस्त्रयोलोकाश्चकंपिरे ॥ ४१ ॥ अत्युग्रंतत्तपोदृष्ट्वाभगवान्भक्तवत्सलः ॥ प्रादुर्बभूवतरसागरुडोपरिसंस्थितः ॥ ४२ ॥ ॥ श्रीनारायणउवाच ॥ ॥ तंदृष्ट्वानवजलदोपमंमुरारिंदोर्दंडैर्जगदवनक्षमैश्चतुर्भिः ॥ संलक्ष्यंमुदितमुखंसुदेवशर्मासाष्टांगंनतिमकरोन्मुदामुकुंदम् ॥ ४३ ॥ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममा० श्रीनारायणनारदसंवादेचतुर्दशोऽध्यायः ॥ १४ ॥

॥श्रीनारायणउवाच॥ ॥ततस्तुष्टावतंदेवंश्रीकृष्णंभक्तवत्सलम्॥बद्धांजलिपुटोभूत्वासुदेवोगद्गदाक्षरम्॥१ ॥नमस्ते
देवदेवेशत्रैलोक्याभयदप्रभो ॥ सर्वेश्वरनमस्तेस्तुत्वामहंशरणंगतः ॥२॥ पाहिमांपरमेशानशरणागतवत्सल ॥ जगद्वं
द्यनमस्तेस्तुप्रपन्नभयभंजन ॥ ३ ॥ जयस्वरूपंजयदंजयेशंजयकारणम् ॥ विश्वाधारंविश्वसंस्थंविश्वकारणकारणम्
॥४॥ विश्वैकरक्षकंदिव्यंविश्वघ्नंविश्वपंजरम्॥फलबीजंफलाधारंफलमूलंफलप्रदम्॥५॥तेजःस्वरूपंतेजोदंसर्वतेज
स्विनांवरम् ॥ कृष्णंविष्णुंवासुदेवंवंदेहंदीनवत्सलम् ॥ ६ ॥ नत्वाब्रह्मादयोदेवाःस्तोतुंशक्ताजगत्प्रभो ॥ कथंमंदोमनु
ष्योहमल्पबुद्धिर्जनार्दन ॥ ७ ॥ अतिदुःखतरंदीनंत्वद्भक्तंमामुपेक्षसे ॥ तत्कथंलोकबंधुत्वंप्रभोलोकेवृथागतम्॥ ८ ॥
वाल्मीकिरुवाच ॥ ॥ इत्यभिष्टूयभूमानंद्विजस्तस्थौहरेःपुरः ॥ तदाकर्ण्यहरिर्वाक्यमुवाचजलदस्वनः ॥ ९ ॥ ॥श्री
हरिरुवाच॥ ॥सम्यक्संपादितंवत्सयत्त्वयाचरितंतपः॥किमिच्छसिमहाप्राज्ञतपोधनवदस्वमे॥१०॥तत्तेहंवितरिष्या
मिसंतुष्टस्तपसातव ॥ एतादृशंमहत्कर्मनकेनापिकृतंपुरा ॥ ११॥ ॥ सुदेवउवाच॥ ॥ यदिप्रीतोसिहेनाथदीनबंधो
दयानिधे ॥ सत्पुत्रंदेहिमेविष्णोपुराणपुरुषोत्तम ॥१२॥ हरेपुत्रंविनाशून्यंगार्हस्थ्यंमेनरोचते ॥ इतिविप्रवचःश्रुत्वाज
गादहरिरीश्वरः ॥१३॥ ॥ श्रीहरिरुवाच ॥ ॥ अदेयमपितेसर्वंदास्येपुत्रंविनाद्विज ॥ तवपुत्रसुखंवत्सविधात्रानैवनि

र्मितम् ॥ १४ ॥ त्वदीयभालफलकेवर्णाःसर्वेमयेक्षिताः ॥ तत्रनैवास्तितेपुत्रसुखंसप्तसुजन्मसु ॥१५॥इत्याकर्ण्यहरे
र्वाक्यंवज्रनिर्घातनिष्ठुरम् ॥ सपपातमहीपृष्ठेछिन्नमूलइवद्रुमः ॥ १६ ॥ पतिंपतितमालोक्यप्रमदात्यंतदुःखिता ॥
पश्यंतीस्वामिनंपुत्रस्पृहाशून्यमरूरुदत् ॥ १७ ॥ पश्चाद्धैर्यंसमालंब्यसावोचत्पतितंपतिम् ॥ ॥ गौतम्युवाच॥ ॥उ
त्तिष्ठोत्तिष्ठहेनाथकिंनस्मरसिमेवचः ॥ १८ ॥ विधात्रालिखितंभालेतल्लभेतसुखासुखम् ॥ किंकरोतिरमानाथःस्वकृतं
भुंजतेनरः ॥१९॥ अभाग्यस्यकृतोद्योगोमुमूर्षोरिवभेषजम् ॥ तस्यसर्वंभवेद्व्यर्थंयस्यदैवमदक्षिणम्॥२०॥क्रतुदानत
पःसत्यव्रतेभ्योहरिसेवनम् ॥ श्रेष्ठंसर्वेषुवेदेषुततोदैवबलंवरम् ॥ २१ ॥ तस्मात्सर्वत्रविश्वासंविहायोत्तिष्ठभूसुर॥दैवमे
वावलंब्याशुहरिणाकिंप्रयोजनम् ॥२२॥ इत्याकर्ण्यवचस्तस्यास्तीव्रशोकसमन्वितम् ॥ वैनतेयोवदद्विष्णुंक्षोभसंजा
तवेपथुः॥२३॥ ॥गरुडउवाच ॥ ॥शोकसागरसंमग्नांब्राह्मणींवीक्ष्यहेहरे ॥ तथैवब्राह्मणंनेत्रगलद्बाष्पकलाकुलम्
॥ २४ ॥ दीनबंधोदयासिंधोभक्तानामभयंकर ॥ भक्तदुःखासहिष्णोस्तेदयाद्यक्वगताप्रभो॥२५॥अहोब्रह्मण्यदेवस्त्वं
त्वद्धर्मःक्वगतोऽधुना॥त्वद्भक्तस्यचतुर्धापिमुक्तिःकरतलेस्थिता॥२६॥अहोतथापिनेच्छंतिविहायभक्तिमुत्तमाम्॥तद
ग्रेसिद्धयश्चाष्टौकिंकरीभूयसंस्थिता ॥ २७॥ त्वदाराधनमाहात्म्यमेवंसर्वत्रविश्रुतम् ॥ तर्हिविप्रस्यपुत्रेच्छापूरणेकःप

रिश्रमः ॥ २८ ॥ गजमर्पयतःपुंसोह्यंकुशेकःपरिश्रमः ॥ अतःपरंनकेनापिसेव्यतेतेपदांबुजम्॥२९॥यददृष्टगतंपुंस
स्तदेवभविताध्रुवम् ॥ इतिलोकेप्रथाजातात्वद्भक्तिर्विलयंगता॥३०॥कर्तुमकर्तुंसामर्थ्यंतवसर्वत्रविश्रुतम् ॥तदेवाद्य
गतंनाथनचेदस्मैसुतप्रदः॥३१॥अतस्त्वंसर्वथादेहिपुत्रमेकंद्विजन्मने॥सुदामात्वांसमाराध्यलेभेवैभवमुत्तमम्॥३२॥
सांदीपिनिर्मृतंपुत्रमवापत्कृपयातव ॥ इतितेशरणंप्राप्तौदंपतीपुत्रलालसौ॥३३॥ ॥ श्रीनारायणउवाच॥ ॥इतिग
रुडवचोनिशम्यविष्णुर्वचनमुवाचखगंसुधोपमानम्॥अयिखगवरपुत्रमेकमस्मैवितरमनोगतमाशुवैनतेय ॥ ३४ ॥इ
तिहरिवचनंनिजानुकूलंझटितिनिशम्यखगोतिहृष्टचेताः॥अददददतिविषण्णमानसायसुतमनुरूपमिलासुरायरम्यम्
॥ ३५ ॥इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येदृढधन्वोपाख्यानेश्रीनारायणनारदसंवादेसुदेववरप्रदानंनामपं
चदशोध्यायः ॥ १५ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
॥ श्रीनारायणउवाच ॥ ॥ शृणुनारदवक्ष्येहंयदुक्तंदृढधन्वने ॥ वाल्मीकिनामहाप्राज्ञचरितंपरमाद्भुतम्॥१॥ ॥ वा
ल्मीकिरुवाच॥ ॥ दृढधन्वन्महाराजशृणुष्ववचनंमम॥सुपर्णःकेशवादेशादिदमाहद्विजेश्वरम् ॥ २ ॥ ॥ गरुडउवा
च॥ ॥ सप्तजन्मसुतेपुत्रसुखंनास्तीतियद्वचः॥हरिणोक्तंद्विजश्रेष्ठतत्तथैवतवाधुना ॥ ३ ॥ तथापिस्वामिनाज्ञप्तःकृप

यादग्मितेसुतम्॥मदंशसंभवःपुत्रोभवितातेतपोधन॥४॥येनत्वमाशिषःसत्यालप्स्यसेगौतमीयुतः॥ परंतज्जनितंदुः
खंयुवयोर्भविताध्रुवम्॥५॥धन्योसिद्विजशार्दूलयत्तेजाताहरौमतिः॥ सकामाप्यथनिष्कामाहरिभक्तिर्हरेःप्रिया॥६॥
जलबुद्बुदवत्पुंसांशरीरंक्षणभंगुरम्॥ तदासाद्यहरेःपादंधन्याश्चिंतयतेहृदि॥७॥हरेरन्योनसंसारात्तारयेद्बहुदुस्तरात्।
हरेरेवकृपालेशान्मयादत्तःसुतस्तव॥८॥मनसिश्रीहरिंधृत्वाविचरस्वयथासुखम्॥ उदासीनतयास्थित्वाभुंक्ष्वसंसार
जंसुखम्॥९॥ ॥वाल्मीकिरुवाच॥ ॥दंपत्योःपश्यतोःसद्योदत्त्वावरमनुत्तमम्॥खगद्वाराहरिःशीघ्रंययौनिजनिके
तनम्॥१०॥ सुदेवोपिसपत्नीकोवरंलब्ध्वामनोगतम्॥ आसाद्यस्वगृहंभेजेगार्हस्थ्यसुखमुत्तमम्॥११॥ किय
त्कालक्रमेणास्यादोहदःसमपद्यत॥ दशमेमासिसंप्राप्तेपूर्णोगर्भोबभूवह॥१२॥ प्रसूतिकालेसंप्राप्तेसासूतसुतमुत्तम
म्॥ सुदेवस्त्वात्मजेजातेजाताह्लादोबभूवह॥१३॥ आहूयजातकंकर्मचकारद्विजसत्तमान्॥ बृहद्दानंददौतेभ्यःसु
स्नातोद्विजसत्तमः॥१४॥ नामचास्याकरोद्धीमान्ब्राह्मणैःस्वजनैर्वृतः॥ अयंसुतःसुपर्णेनदत्तःप्रेम्णाकृपालुना
॥१५॥शारदेंदुरिवप्रोद्यत्तेजस्वीशुकसन्निभः॥ शुकदेवेतिनामायंपुत्रोस्तुममवल्लभः॥१६॥ अवर्धतसुतःशीघ्रं
शुक्लपक्षइवोडुपः॥ पितुर्मनोरथैःसाकंमातृमानसनंदनः॥१७॥ उपनीयसुतंतातःसावित्रींदत्तवान्मुदा॥ सं

स्कारंवैदिकंप्राप्यब्रह्मचर्यव्रतेस्थितः ॥ १८ ॥ तत्तेजसान्वितोरेजेसाक्षात्सूर्यइवापरः ॥ वेदाध्ययनमारेभेकुमारो
बुद्धिसागरः ॥ १९ ॥ सद्बुद्ध्यानंदयामासस्वगुरुंगुरुवत्सलः ॥ सकृन्निगदमात्रेणविद्यांसर्वामुपेयिवान् ॥ २० ॥
॥ वाल्मीकिरुवाच ॥ ॥ एकदादेवलोऽभ्यागात्कोटिसूर्यसमप्रभः ॥ तमालोक्यसुदेवोसौननामदंडवन्मुदा ॥२१॥
पूजयामासविधिवदर्घ्यपाद्यादिभिर्मुनिम् ॥ आसनंकल्पयामासदेवलायमहात्मने॥२२ ॥तत्रोपविष्टोभगवान्देवलो
देवदर्शनः॥ चरणेपतितंदृष्ट्वाकुमारंदेवलोब्रवीत् ॥ २३ ॥ ॥ देवलउवाच ॥ ॥ भोभोसुदेवधन्योसितुष्टस्तेभ-
गवान्हरिः॥यतस्त्वंप्राप्तवान्पुत्रंदुर्लभंसुंदरंवरम्॥२४॥एतादृशःसुतःक्वापिकस्याप्यनवलोकितः ॥ विनीतोबुद्धिमा
न्वाग्मीवेदाध्ययनशीलवान्॥२५॥एहिपुत्रकिमेतत्तेकरेपश्यामिकौतुकम्॥सच्छत्रंचामरयुगंकमलंयवसंयुतम्॥ २६
आजानुलंबिनौहस्तौहस्तिहस्तसमौतव ॥ आकर्णांतविशालेचचक्षुषीमधुपिंजरे॥२७॥ वपुर्वर्तुलकंमध्यंवलित्रयवि
भूषितम् ॥ एवमुक्त्वासुतंदृष्ट्वापुनराहोत्सुकंद्विजम्॥ २८ ॥अहोसुदेवतनयस्तवायंगुणसागरः॥ गूढजत्रुःकंबुकंठःस्नि
ग्धकुंचितमूर्धजः ॥ २९ ॥ तुंगवक्षाःपृथुग्रीवःसमकर्णौवृषांसकः ॥ सर्वलक्षणसंपूर्णःपुत्रोभाग्यनिधिर्महान् ॥३० ॥
एकएवमहान्दोषोयेनसर्वंवृथाकृतम्॥इत्युक्त्वामौलिमाधुन्वन्विनिःश्वस्याब्रुवन्मुनिः ॥ ३१ ॥ पूर्वमायुःपरीक्षेतपश्चा

लक्षणमादिशेत्॥निरायुषःकुमारस्यलक्षणैःकिंप्रयोजनम्॥ ३२॥सुदेवतनयोऽयंतेद्वादशेहायनेजले॥मृत्युमेष्यतितस्मात्त्वंशोकंमाकुरुमानसे ॥ ३३ ॥ अवश्यंभाविनोभावाभवंत्येवनसंशयः ॥ तत्रप्रतिविधिर्नास्तिमुमूर्षोरिवभेषजम्॥ ॥ ३४ ॥ ॥ वाल्मीकिरुवाच ॥ इत्युदीर्यगतोब्रह्मलोकंदेवलकोमुनिः॥सुदेवःसहगौतम्यापपातधरणीतले॥ ३५॥ विललापचिरंभूमौदेवलोक्तंवचःस्मरन् ॥ अथसागौतमीपुत्रंस्वांकमारोप्यधैर्यतः॥ ३६ ॥ चुचुंबवदनंप्रेम्णापश्चात्पतिमुवाचसा ॥ ॥ गौतम्युवाच ॥ ॥द्विजराजनकर्तव्याभीतिर्भाव्येषुवस्तुषु ॥ ३७॥ नाभाव्यंभविताकुत्रभाव्यमेवभविष्यति॥किंनुनोदुःखमापन्नानलरामयुधिष्ठिराः ॥ ३८॥ बंधनंबलिराजापिप्राप्तवान्यदवःक्षयम्॥हिरण्याक्षोवधंघोरोवृत्रोपिनिधनंगतः ॥ ३९ ॥ कार्त्तवीर्यःशिरश्छेदंरावणोपितथाप्तवान् ॥ विरहंरघुनाथोपिजानक्याःप्राप्तवान्मुने ॥ ४० ॥परीक्षिदपिराजर्षिर्ब्राह्मणान्मृत्युमाप्तवान्॥एवंयेभाविनोभावाभवंत्येवमुनीश्वर ॥ ४१ ॥ अतउत्तिष्ठहेनाथहरिंभजसनातनम् ॥ शरण्यंसर्वजीवानांनिर्वाणपददायकम् ॥ ४२ ॥ ॥ वाल्मीकिरुवाच ॥ ॥ इतिनिजवनितावचोनिशम्यप्रकृतिमुपागतवान्सुदेवशर्मा ॥ हृदिहरिचरणांबुजंनिधायझटितिजहौशुचमात्मजाद्भवित्रीम्॥४३॥इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादेदृढधन्वोपाख्यानेसुदेवप्रतिबोधोनामषोडशोऽध्यायः १६

॥ नारदउवाच ॥ ॥ ततःकिमभवत्तस्यप्रबुद्धस्यमहीपतेः ॥ तन्मेवदकृपासिंधोश्शृण्वतांपापनाशनम् ॥ १ ॥ ॥ श्री
नारायणउवाच ॥ ॥ स्वकीयचरितंश्रुत्वाप्राक्तनंचकिताननम् ॥ राजानंपुनरेवाहवाल्मीकिःश्रवणोत्सुकम् ॥ २ ॥
॥ वाल्मीकिरुवाच ॥ ॥ इतिताःशीतलावाचःसमाकर्ण्यप्रियामुखात् ॥ सुदेवोधैर्यमालंब्यहरौचित्तमधारयत् ॥ ३ ॥
निःश्वस्यदीनवदनोयद्भाव्यंतद्भविष्यति ॥ इतिनिश्चित्यमनसापुष्पाद्यर्थंवनंययौ ॥ ४ ॥ एवंकृतवतस्तस्यकियान्का
लोगतःक्रमात् ॥ समित्कुशफलाद्यर्थंकदाचित्काननंययौ ॥ ५ ॥ सुदेवोमनसाध्यायन्हरेःपादसरोरुहम् ॥ तस्मिन्नेवदिने
गच्छद्वापींसूनुःसुहृद्वृतः ॥ ६ ॥ प्रविश्यवापींचिक्रीडेवयस्यैःसहवारिणि ॥ जलयंत्रैःक्षिपन्वारिबालकेषुस्मयन्मुहुः ॥ ७ ॥
जलेक्रीडांमुहुःकुर्वन्ग्रीष्मेमोदमुपाययौ ॥ एवंसर्वेषुबालेषुक्रीडत्सुप्रेमनिर्भरम् ॥ ८ ॥ अगाधसलिलेतिष्ठन्बालकैरुप
मर्दितः ॥ सपलायनमान्विच्छन्सुहृद्वर्गभयाद्द्रुतम् ॥ ९ ॥ विधिनानोदितस्तत्रानियम्यश्वासमात्मनः ॥ ममज्जागाधतो
येसौवंचयन्नात्मनःसखीन् ॥ १० ॥ तत्रापिव्याकुलीभूयततोनिर्गंतुमुन्मनाः ॥ सहसामृतिमापन्नःकुमारोऽगाधवारिणि
॥ ११ ॥ जलादनिर्गतंवीक्ष्यसर्वेंचकितमानसाः ॥ समानवयसःसर्वेंहाहाकृत्वाप्रधाविताः ॥ १२ ॥ गौतम्यैकथयामासु
र्बृहच्छोकपरायणाः ॥ वज्रपातसमांवाचंबालानामनतिप्रियाम् ॥ १३ ॥ श्रुत्वाभूमौपपाताशुगौतमीपुत्रवत्सला ॥ एत

स्मिन्नेवसमयेवनाद्विप्रःसमाययौ ॥१४॥ निशम्यपुत्रमरणंत्वष्टेवावापतद्भुवि ॥ ततउत्थायतौविप्रदंपतीवापिकांगतौ
॥१५॥मृतंपुत्रंसमालिंग्यस्वांकेकृत्वाकलेवरम् ॥ सुदेवःपुत्रवदनंचुचुंबचमुहुर्मुहुः॥१६॥ततःस्वांकेस्थितंपुत्रंमृतंवी
क्षन्मुहुर्मुहुः ॥ सरुदन्विलपन्नेवगद्गदाक्षरमूचिवान् ॥ १७ ॥ ॥सुदेवउवाच ॥ ॥ वदपुत्रशुभांवाणींममशोकविना
शिनीं ॥ शीतलांललितांवत्समनसोमोदमावह ॥१८॥ विहायपितरौवृद्धौनत्वंगंतुमिहार्हसि ॥ वत्साह्वयतिसन्मित्रंवे
दाध्ययनहेतवे॥१९॥मुदाह्वयत्युपाध्यायस्त्वामध्यापनहेतवे॥तूर्णमुत्तिष्ठहेपुत्रकथंसुप्तोसिसांप्रतम् ॥२०॥ त्वांविहा
यनगच्छामिगृहेकिंमेप्रयोजनं ॥ शून्यारण्यमिवाद्यैवत्वदृतेसदनंमम॥२१॥वनेपिनैवगच्छामिगमनेकिंप्रयोजनम् ॥
फलमूलप्रियत्वंचेन्नोत्तिष्ठसिममाग्रतः॥२२॥नमायाचरितंगर्ह्यंब्रह्महत्यापिनोकृता ॥ केनकर्मविपाकेनपुत्रोमेनिधनं
गतः ॥२३॥अहोधातःकिमेतावत्फलंलब्धंत्वयामहत् ॥लोचनंममदीनस्यवृद्धस्याकृष्यनिर्दय॥२४॥निर्धनस्यधनं
बालंदंपत्योरवलंबनं॥हरतस्तेकथंलज्जाजायतेनहिकुत्रचित् ॥२५॥सर्वत्रसदयस्त्वंवैमयिनिर्दयतांगतः॥कथमित्य
न्यथाभावोममभाग्यवशादहो ॥ २६ ॥ कुत्राहंशोधयाम्यद्यपुत्रंप्रकृतिसुंदरं॥ द्रक्ष्येतवाननंकुत्रपुत्रचारुसुलोचनम् ॥
॥२७॥ पर्जन्यःस्रवतेवारिसूतेधान्यंवसुंधरा॥ गिरयोरत्नजातानिमुक्तासारंपयोनिधिः ॥२८ ॥नतंदेशंप्रपश्यामियत्र

पुत्रंमृतंलभेत्॥ यद्गात्रंतुसमालिंग्यहृद्गतंतापमुत्सृजेत्॥२९॥हेवत्सत्वंसकृद्वाचंश्रावयाशुदयांकुरु॥विलपत्यातितेमा
ताकुररीवगतत्रपा॥३०॥तांदृष्ट्वातुकथंपुत्रदयानोत्पद्यतेतव ॥ अननुज्ञाप्यपितरौनकदापिभवान्गतः ॥ ३१॥आ
वामपृष्ट्वाकिंदीर्घमार्गंयातोसिपुत्रक॥वेदाध्ययनसद्वाणींकस्यश्रोष्यामिसांप्रतम् ॥३२ ॥ त्वामनुस्मरतोवत्सकलवा
क्यंमनोहरम्॥शतधादीर्यतेनोद्यह्यायसंहृदयंमम॥३३ ॥मन्येसुधन्यंकिलकोशलेंद्रंयःकाननंदाशरथौप्रयाते ॥ दधा
रनोऽसून्सुततापदग्धोधिङ्मांसुतस्यप्रलयेप्यनष्टम् ॥ ३४॥गोविंदविष्णोयदुनाथनाथश्रीरुक्मिणीप्राणपतेमुरारे ॥
दीनानुकंपिन्भगवन्दयालोमांपाहिपुत्रानलतापतप्तम्॥३५॥देवाधिदेवाखिललोकनाथगोपालगोपीशरथांगपाणे॥
कलिंदकन्याविषदोषहारिन्मांपाहिपुत्रानलतापतप्तम् ॥ ३६ ॥ वैकुंठविष्णोनरकासुरारेचराचराधारभवाब्धिपोत॥
ब्रह्मादिदेवानतपादपीठमांपाहिपुत्रानलतापतप्तम् ॥ ३७ ॥ शठोमदन्योभवितानकोपियोदेवकीसूनुवचोविलंघ्य ॥
पुत्रेदुराशांकृतवानभाग्योलभेतकोदृष्टविनष्टवस्तु ॥ ३८ ॥ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्री
नारायणनारदसंवादेदृढधन्वोपाख्यानेसुदेवाविलापोनामसप्तदशोध्यायः ॥ १७ ॥ ॥ ॥ ॥ ॥
॥ नारदउवाच ॥ दृढधन्वामहीपालंकिमुवाचततःपरम् ॥ वाल्मीकिर्भगवान्साक्षात्तद्वदस्वतपोनिधे ॥ १ ॥ ॥ श्री

नारायणउवाच ॥ ॥ दृढधन्वासराजर्षिःश्रुत्वाप्राक्तनमात्मनः ॥ सविस्मयःसमापृच्छद्वाल्मीकिंमुनिसत्तमम् ॥ २ ॥
॥ दृढधन्वोवाच ॥ ॥ ब्रह्मंस्तववचोरम्यंसुधाकल्पंनवंनवम् ॥ पीत्वापीत्वानतृप्तोस्मिभूयोवदततःपरम्॥ ३॥ ॥वा
ल्मीकिरुवाच॥ ॥एवंविलपतस्तस्यविप्रस्यजगतीपते ॥ अकालजलदोभ्यागाद्गर्जयंश्चदिशोदश॥४॥ववौवायुःख
रस्पर्शःकंपयन्निवपर्वतान् ॥ बृहल्लसन्महाविद्युत्स्वनेनापूरयन्दिशः ॥५॥ यावन्मासंववर्षैवमहीपूर्णजलाभवत् ॥ ना
सौविज्ञातवान्किंचित्पुत्रशोकाग्नितापितः॥६॥नपपौबुभुजेचैवपुत्रपुत्रइतिब्रुवन् ॥ एवंविलपतस्तस्यमासोयोविगत
स्तदा॥७॥श्रीकृष्णवल्लभोमासःसोभवत्पुरुषोत्तमः॥आजानतोपितस्यासीत्पुरुषोत्तमसेवनम्॥ ८॥ तेनात्यंतप्रसन्नः
सन्प्रादुरासीद्धरिःस्वयम् ॥ नवीनजलदश्यामोवनमालाविभूषितः॥९॥प्रादुर्भूतेजगन्नाथेविलीनाघनराजयः ॥ततो
ददर्शविप्रोसौश्रीकृष्णंपुरुषोत्तमम् ॥ १०॥ सहसांकगतंपुत्रदेहंभुविविधायच ॥ सपत्नीकोनमश्चक्रेदंडवच्छ्रीहरिंमुदा
॥११॥ बद्धांजलिपुटोभूत्वासंस्थितःश्रीहरेःपुरः ॥ श्रीकृष्णएवशरणंममास्त्वितिविचिंतयन्॥ १२॥भगवानपितुष्टःस
न्पुरुषोत्तमसेवनात् ॥ अवोचन्मधुरांवाणींबृहत्पीयूषवर्षिणीम् ॥१३॥ ॥ श्रीहरिरुवाच ॥ भोभोसुदेवधन्योसिभा
ग्यवान्सांप्रतंभवान् ॥ त्वद्भाग्यंवर्णितुंकोवासमर्थोभुवनत्रये ॥ १४ ॥ शृणुवत्सप्रवक्ष्येहंयत्तेभावितपोधन ॥ द्वादशाब्द

सहस्रायुःपुत्रस्तेभविताद्विज॥ १५॥ अतःपरंनसंदेहस्तवपुत्रोद्भवेसुखे॥मयायंतेसुतोदत्तःप्रसन्नेनद्विजोत्तम॥ १६॥
तवपुत्रसुखंदृष्ट्वादेवगंधर्वमानवाः ॥ सस्पृहास्तेभविष्यंतिप्रसादान्मेद्विजोत्तम ॥ १७॥ अत्रतेकथयिष्यामिइतिहासंपु
रातनम् ॥ मार्कंडेयेनमुनिनापुराप्रोक्तंरघुंनृपम् ॥ १८ ॥ पुरामुनीश्वरःकश्चिद्धनुर्नामामहामनाः ॥ पश्यन्पुत्राधिनिर्द
ग्धान्लोकान्दीनमनाअभूत्॥ १९॥अमरंपुत्रमन्विच्छंस्तपस्तेपेसुदारुणम्॥सहस्राब्देगतेकालेदेवास्तमब्रुवन्मुनि
म्॥ २० ॥ वरंवरयभद्रंते यस्तेमनासिवांछितः॥प्रसन्नाःस्मोवयंसर्वेतीव्रेणतपसातव॥२१॥ ॥श्रीनारायणउवाच॥ ॥
इतिदेववचःश्रुत्वासुतृप्तोऽमृतसन्निभम् ॥वव्रेतपोधनःपुत्रममरंबुद्धिशालिनम्॥२२॥तमूचुर्निर्जराःसर्वेनैवंभूतोस्तिभू
तले॥पुनराहमुनिर्देवान्निमित्तायुर्भवत्विति ॥२३॥ सुराःप्रोचुर्निमित्तंकिंवदसोप्यवदन्मुनिः ॥असौमहान्गिरिर्यावत्ता
वदायुर्विधीयताम्॥२४॥एवमस्त्वितिसंपाद्यसेंद्रादेवादिवंययुः॥धनुःशर्मासुतंलेभेकालेनाल्पेनतादृशम् ॥ २५॥ स
पुत्रोववृधेतस्यतारापतिरिवांबरे ॥ प्राप्तेतुषोडशेवर्षेपुत्रंप्राहमुनीश्वरः ॥ २६ ॥ हेवत्समुनयःसर्वेनावज्ञेयाःकदाचन॥
शिक्षितोपियथापुत्रःसोद्वेगानकरोन्मुनीन्॥२७॥निमित्तायुर्बलोन्मत्तोब्राह्मणानवमन्यते ॥ कदाचिन्महिषोनाममुनिः
परमकोपनः ॥२८॥पूजयामासविधिनाशालग्रामशिलांशुभाम् ॥ तदानींससमागत्यतामादायत्वरान्वितः ॥ २९ ॥

चिक्षेपनिजचांचल्यात्कूपेपूर्णजलेहसन्॥ततःक्रोधसमाविष्टःकालरुद्रइवापरः॥३०॥शशापधनुषःपुत्रमद्यैवम्रियता
मयम्॥नमृतंपुत्रमालक्ष्यदध्यौमनसिकारणम्३१निमित्तायुरयंदेवैःकृतोयंधनुषःसुतः॥इतिचिंतापरेणाशुनिःश्वासः
प्रकटीकृतः।३२॥महिषाःकोटिशोजातातैर्गिरिःशकलीकृतः॥तदानींमृतिमापन्नोमुनिपुत्रोतिदुर्मदः॥३३॥धनुःशर्मा
तिदुःखेनविललापमुहुर्मुहुः॥विलप्यबहुधाविप्रोगृह्यपुत्रकलेवरम्।३४।प्रविवेशचितावन्हिंपुत्रदुःखातिपीडितः ॥एवं
हठात्पुत्रायेनसुखंयांतिकुत्रचित्।३५।वैनतेयेनयोदत्तस्तनयोऽयंतपोधन॥तेनत्वंपुत्रवान्लोकेस्पृहणीयोभविष्यसि
॥३६॥पुरुषोत्तममाहात्म्यात्प्रसन्नेनमयानघ।सुचिरंस्थापितोयंहितनयःसुखदोस्तुते॥३७॥ गार्हस्थ्यमतुलंभुक्त्वासह
पुत्रेणसर्वदा॥ततस्त्वंब्रह्मणोलोकंगत्वातत्रमहत्सुखम् ३८ दिव्याब्दवर्षसाहस्रंभुक्त्वागंतासिभूतले॥ततोराजाचक्रव
र्तीभविष्यसिद्विजोत्तम॥३९॥दृढधन्वेतिविख्यातःसमृद्धबलवाहनः॥संवत्सराणामयुतंराज्यंभोक्ष्यसिपार्थिवम्।४०॥
अव्याहतबलैश्वर्यमाखंडलपदाधिकम्। गौतमीयंतवांगार्धहारिणीमहिषीतदा॥४१॥पतिसेवारतानित्यंनाम्नाचगुण
सुंदरी ॥ चत्वारस्तेसुताभाव्याराजनीतिविशारदाः ॥ ४२ ॥ कन्यैकाचमहाभागासुशीलासुवरानना॥भुक्त्वाभोगान्म
हाभागसुरासुरसुदुर्लभान्॥४३॥कृतार्थोहंधरापीठेइत्यज्ञानविमोहितः॥ अतिदुस्तरसंसारविषयाकृष्टमानसः॥४४॥

यदाविस्मरसेविष्णुंसंसारार्णवतारकम् ॥ अयंतेतनयोविप्रशुकोभूत्वातदावने ॥ ४५ ॥ वटवृक्षंसमाश्रित्यत्वामेवंबोध
यिष्यति ॥ वैराग्योत्पादकंपद्यंपठन्नेवमुहुर्मुहुः॥ ४६॥श्रुत्वावाक्यंशुकप्रोक्तंदुर्मनागृहमेष्यसि ॥ अथचिंतार्णवेमग्नंत्य
क्त्वाविषयजंसुखम् ॥ ४७ ॥ वाल्मीकिस्त्वांसमागत्यबोधयिष्यतिभूसुर ॥ तद्वाक्यैश्छिन्नसंदेहस्त्यक्त्वालिंगंहरेःपदम्
॥४८॥गमिष्यसिसपत्नीकःपुनरावृत्तिवर्जितम्॥वदत्येवंमहाविष्णौसमुत्तस्थौद्विजात्मजः।४९॥दंपतीतौसुतंदृष्ट्वाम
हानंदौबभूवतुः ॥ सुराःसर्वेपिसंतुष्टाववृषुःकुसुमाकरान्॥५०॥ननामशुकदेवोपिश्रीहरिंपितरौचतौ ॥गरुडोप्यतिसंहृ
ष्टस्तंदृष्ट्वाससुतंद्विजम्॥५१॥ब्राह्मणश्चकितोभूत्वाननामश्रीहरिंतदा॥बद्धांजलिपुटोविप्रःप्रोवाचजगदीश्वरम्॥५२॥
हृदिस्थंसंशयंछेत्तुंहर्षगद्गदयागिरा॥५३। चत्वार्यब्दसहस्रमेवमनिशंतप्तंतपोदुष्करंतत्रागत्यवचस्त्वयानिगदितंयन्मां
हरेकर्कशम् ॥हेवत्साद्यविलोकितंतवसुतोनैवास्तिनैवास्तिहितद्वाक्यंव्यतिलंघ्यमेमृतसुतोत्थानेचहेतुंवद ॥ ५४ ॥
॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादेसुदेवपुत्रजीवनंनामाष्टादशोध्यायः ॥ १८ ॥
॥ सूतउवाच ॥ ॥इतिब्रुवाणंप्राचीनंमुनिमाहतपस्विनः ॥ प्रीणयन्निवसद्वाचानारदोमुनिसत्तम ॥१॥किमुवाचोत्तरंब्र
ह्मन्सुदेवंतपसांनिधिम् ॥ प्रसन्नोभगवान्विष्णुस्तन्मेब्रूहितपोनिधे ॥ २ ॥ ॥ श्रीनारायणउवाच ॥ ॥ इत्थमावेदि

तोविष्णुःसुदेवेनमहात्मना ॥ प्रत्याहप्रीणयन्वाचाभगवान्भक्तवत्सलः ॥ ३ ॥ हरिरुवाच ॥ ॥ द्विजराजकृतंयत्तेनै
तदन्यःकरिष्यति॥ नतद्वेत्तिभवान्नूनंयेनाहंतुष्टिमाप्तवान्॥४॥अथममप्रियोमासःप्रयातःपुरुषोत्तमः॥तत्सेवातेसमज
निशोकमग्नस्यसास्त्रियः॥५॥एकमप्युपवासंयःकरोत्यस्मिंस्तपोनिधे॥असावनंतपापानिभस्मीकृत्यद्विजोत्तम ॥ सुर
यानंसमारुह्यवैकुंठंयातिमानवः॥६॥मासमात्रंनिराहारोह्यकालजलदागमात्॥ त्रिषुकालेषुतेस्नानंसंजातंप्रतिवासर
म्॥७॥अभ्रस्नानंत्वयालब्धंमासमात्रंतपोधन ॥ उपवासाश्चतेजातास्तावन्मात्रमखंडिताः ॥ ८॥ शोकसागरमग्न
स्यपुरुषोत्तमसेवनम्॥अजानतोपिसंजातंचेतनारहितस्यते॥९॥त्वदीयसाधनस्यास्यप्रमाणंकःकरिष्यति॥एकतः
साधनान्येववेदोक्तानिचयानिवै॥१०॥तानिसर्वाणिसंगृह्यह्येकतःपुरुषोत्तमम् ॥ तोलयामासदेवानांसन्निधौचतुरान
नः॥११॥लघून्यन्यानिजातानिगुरुश्चपुरुषोत्तमः ॥ तस्माद्भूमिस्थितैर्लोकैःपूज्यतेपुरुषोत्तमः ॥ १२ ॥ पुरुषोत्तममा
सस्तुसर्वत्रास्तितपोधन ॥ तथापिपृथिवीलोकेपूजितःसफलोभवेत् ॥१३॥ तस्मात्सर्वात्मनावत्सभवान्धन्योस्तिसां
प्रतम् ॥ यदस्मिंस्तप्तवानुग्रंतपःपरम्दारुणम् ॥१४॥मानुषंजन्मसंप्राप्यमासेश्रीपुरुषोत्तमे ॥ स्नानदानादिरहिताद
रिद्राजन्मजन्मनि॥१५॥तस्मात्सर्वट्मनासेव्योमत्प्रियःपुरुषोत्तमः ॥ समेवल्लभतांयातिधन्योभाग्ययुतोनरः॥ १६ ॥

॥ ॥श्रीनारायणउवाच ॥ ॥ एवमुक्त्वाहरिःशीघ्रंजगामजगदीश्वरः ॥ वैनतेयंसमारुह्यवैकुंठममलंमुने ॥ १७॥
सपत्नीकःसुदेवस्तुमुमुदेहर्निशंभृशम्॥मृतोत्थितंशुकंदृष्ट्वापुरुषोत्तमसेवनात् ॥१८॥ अजानतोममैवासीत्पुरुषोत्तमसे
वनम् ॥ तदेवसफलंजातंयेनपुत्रोमृतोत्थितः ॥ १९ ॥ अहोएतादृशोमासोनैवदृष्टःकदाचन॥इत्येवंविस्मयाविष्टस्तं
मासंसमपूजयत् ॥ २० ॥ तेनपुत्रेणमुमुदेसपत्नीकोद्विजोतमः॥पितरंनंदयामासशुकदेवोपिसत्कृतैः ॥ २१ ॥स्तुव
न्मासंचविष्णुंचपूजयामाससादरम् ॥ कर्ममार्गस्पृहांत्यक्त्वाभक्तिमार्गैकसस्पृहः ॥ २२ ॥ सर्वदुःखापहंमासंवार्ष्ठंपुरु
षोत्तमम् ॥ जपहोमादिभिस्तास्मिन्नभजच्छ्रीहरिंस्त्रिया ॥ २३ ॥ भुक्त्वाथविषयान्सर्वान्सहस्राब्दमहर्निशम् ॥ जगाम
परमंलोकंसपत्नीकोद्विजोत्तमः ॥२४॥ योगिनामपिदुष्प्रापंयाजकानांतुतत्कुतः ॥यत्रगत्वानशोचंतिवसंतोहरिसान्नि
धौ ॥ २५ ॥ तत्रत्यंसुखमासाद्यसपत्नीकोभुवंगतः॥सएवदृढधन्वात्वंप्रथितःपृथिवीपतिः ॥ २६ ॥ पुरुषोत्तममासस्य
सेवनात्सकलर्द्धिभाक्॥महिषीयंपुराराजन्गौतमीपतिदेवता ॥२७ ॥ एतत्तेसर्वमाख्यातंपृष्टवानसियन्मम॥शुकस्तु
तवभूपालपूर्वजन्मनियःसुतः॥२८॥ शुकदेवइतिख्यातोहरिणायोनुजीवितः॥ द्वादशाब्दसहस्रायुर्भुक्त्वावैकुंठमेयिवा
न्॥२९॥सएवारण्यसरसिवटवृक्षंसमाश्रितः॥त्वामेवागतमालोक्यपितरंपूर्वजन्मनः ॥ ३० ॥ हितानामुपदेष्टारंप्रत्य

क्षंदैवतंमम ॥ संसारसागरेमग्नंविषयव्यालदूषिते॥३१॥अत्यंतकृपयाविष्टश्चिंतयामासकीरजः ॥ नबोधयामिचेद्भूपं
ममापिबंधनंभवेत् ॥ ३२ ॥ पुन्नामनरकाद्यस्तुत्रायतेपितरंसुतः ॥ इतिश्रुत्यर्थबोधोपिस्यादेवाद्यान्यथामम ॥ ३३ ॥
तस्मादुपकरिष्यामिपितरंपूर्वजन्मनः ॥ अवधार्यवचश्चेत्थंकीरजोऽजीगदन्नृप ॥३४॥ इत्येतत्कथितंसर्वंयद्यत्पृष्टंत्व
यानघ ॥ अतःपरंगमिष्यामिसरयूंपापनाशिनीम् ॥ ३५ ॥ ॥ श्रीनारायणउवाच ॥ ॥ इत्येवंप्रथमजनुश्चरित्रमु
क्त्वाभूपस्यप्रथितयशस्विनश्चिराय ॥ गच्छंतंमुनिमनुनीयराजराजःप्रावोचत्किमपिनमन्नगण्यपुण्यः॥३६॥इतिश्रीबृ
हन्नारदीयपुराणेपुरुषोत्तममाहात्म्ये श्रीनारायणनारदसंवादेवाल्मीकिनोक्तदृढधन्वोपाख्यानेपुरुषोत्तममाहात्म्यकथनं
नामैकोनविंशतितमोऽध्यायः ॥ १९ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
॥ सूतउवाच ॥ ॥ नारायणमुखाच्छ्रुत्वाप्राक्तनंदृढधन्वनः ॥ नातितृप्तमनाविप्रानारदःपृष्टवान्मुनिम् ॥ १ ॥ ॥ ना
रदउवाच ॥ ॥ किमुवाचमहाराजोवाल्मीकिंमुनिसत्तमम् ॥ तन्मेवदविनीतायतपोधनसुविस्तरम् ॥ २ ॥ ॥ श्रीना
रायणउवाच ॥ ॥शृणुनारदवक्ष्येहंयदुक्तंदृढधन्वना ॥ अनुनीयमहाप्राज्ञंवाल्मीकिंमुनिसत्तमम् ॥ ३ ॥ ॥दृढधन्वो
वाच ॥ ॥ पुरुषोत्तममासोयंकथंकार्योमुमुक्षुभिः॥कीदृशीकस्यपूजाचकिंदानंकोविधिर्मुने॥४॥एतत्सर्वंसमाचक्ष्वस

वँल्लोकहितायमे॥सर्वँल्लोकहितार्थायचरंतिहिभवादृशाः ॥ ५॥ असौमासःस्वयंसाक्षाद्भगवान्पुरुषोत्तमः ॥ तस्मिन्कृते
महत्पुण्यंत्वन्मुखात्संश्रुतंमया॥६॥पूर्वजन्मन्यहंभूत्वासुदेवोब्राह्मणोत्तमः ॥ विधिनाकृतवान्मासंदृष्ट्वापुत्रंमृतोत्थितम्
॥ ७॥ अजानतोपिमेब्रह्मन्पुत्रशोकादचेतसः ॥ निराहारस्यसततंगतश्चपुरुषोत्तमः ॥ ८॥ तस्याप्येतत्फलंजातंशु
कदेवोमृतोत्थितः ॥ अनुभूतमिमंमासंसेवेतहरिणोदितः ॥ ९ ॥ इहजन्मनितत्सर्वंविस्मृतंमेतपोधन ॥ एतत्पूजावि
धानंमेवदविस्तरतःपुनः ॥ १० ॥ ॥ वाल्मीकिरुवाच ॥ ॥ब्राह्मेमुहूर्तेचोत्थायपरंब्रह्मविचिंतयेत्॥ततोव्रजेनैर्ऋता
शांबृहत्सोदकभाजनः ॥ ११ ॥ ग्रामाद्दूरतरंगच्छेत्पुरुषोत्तमसेवकः ॥ दिवासंध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखः ॥
॥ १२ ॥ अंतर्धायतृणैर्भूमिंशिरःप्रावृत्यवाससा ॥ वक्त्रंनियम्ययत्नेननोष्ठीवेन्नोच्छ्वसेदपि ॥ १३ ॥ कुर्यान्मूत्रपुरी
षंचरात्रौचेद्दक्षिणामुखः ॥ गृहीतशिश्नश्चोत्थायगृहीतशुचिमृत्तिकः ॥ १४ ॥ गंधलेपक्षयकरंकुर्याच्छौचमतंद्रि
तः ॥ एकालिंगेगुदेपंचत्रिर्वामेदशचोभयोः ॥ १५ ॥ द्विसप्तपादयोश्चैवगार्हस्थ्यंशौचमुच्यते ॥ कृत्वाशौचंतुप्रक्षा
ल्यपादौहस्तौचमृज्जलैः ॥ १६ ॥ तीर्थेशौचंनकुर्वीतकुर्वीतोद्धृतवारिणा ॥ अरत्निद्वयसंचारित्यक्त्वाकुर्यादनुद्धृते ॥ ॥३२॥
॥ १७ ॥ पश्चात्तच्छोधयेत्तीर्थमशुद्धमन्यथाहितत् ॥ एवंशौचंप्रकुर्वीतपुरुषोत्तमसद्व्रती ॥ १८ ॥ ततःषोडशगंडूषा

न्प्रकुर्याद्द्वादशैववा ॥ मूत्रोत्सर्गेतुगंडूषानष्टौवाचतुरोगृही ॥ १९ ॥ उत्थायनेत्रेप्रक्षाल्यदंतकाष्ठंसमाहरेत् ॥ इमंम
त्रंसमुच्चार्यदंतधावनमाचरेत् ॥ २० ॥ आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ॥ ब्रह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पते
॥ २१ ॥अपामार्गंबादरंवाद्वादशांगुलमव्रणम्॥कनिष्ठांगुलिवत्स्थूलंपर्वार्द्धकृतकूर्चकम् ॥२२ ॥ शुचिर्द्वादशगंडूषैर्नि
षिद्धंभानुवासरे ॥ आचम्यप्रयतःसम्यक्प्रातःस्नानंसमाचरेत् ॥२३॥ स्नानादनंतरंतावत्तर्पयेत्तीर्थदेवताः॥ समुद्रगा
नदीस्नानमुत्तमंपरिकीर्तितम्॥२४॥वापीकूपतडागेषुमध्यमंकथितंबुधैः ॥ गृहेस्नानंतुसामान्यंगृहस्थस्यप्रकीर्तितम्
॥ २५ ॥ ततश्चवाससीशुद्धेशुक्लेचपरिधायच ॥ उत्तरीयंसदाधार्यंब्राह्मणेनविजानता ॥ २६ ॥ उपविश्यशुचौदेशे
प्राङ्मुखोवाउदङ्मुखः ॥ भूत्वाबद्धशिखःकुर्यादंतर्जानुभुजद्वयम् ॥ २७ ॥ सपवित्रेणहस्तेनकुर्यादाचमनक्रियाम् ॥
नोच्छिष्टंतत्पवित्रंतुभुक्तोच्छिष्टंतुवर्जयेत्॥२८॥आचम्यतिलकंकुर्याद्गोपीचंदनमृत्स्नया॥ऊर्ध्वपुंड्रमृजुंसौम्यंदंडाका
रंप्रकल्पयेत्॥२९॥ऊर्ध्वपुंड्रंत्रिपुंड्रंवामध्येछिद्रंप्रकल्पयेत् ॥ निवसत्यूर्ध्वपुंड्रेतुश्रियासहहरिःस्वयम्॥ ३० ॥त्रिपुंड्रं
धूर्जटिःसाक्षादुमयासहसर्वदा ॥ विनाछिद्रंतुतंपुंड्रंशुनःपादसमंविदुः ॥ ३१ ॥ श्वेतंज्ञानकरंप्रोक्तंरक्तंवश्यकरंनृणाम्
॥ पीतंसर्वार्द्धिदंप्रोक्तमन्यत्तुपरिवर्जयेत्॥३२॥शंखचक्रादिकंधार्यंगोपीचंदनमृत्स्नया ॥सर्वपापक्षयकरंपूजांगंपरिकी

र्तितम्॥३३॥शंखचक्रादिचिह्नानिदृश्यंतेयस्यनिग्रहे॥ मर्त्यौंमर्त्यौंनविज्ञेयःसनित्यंभगवत्तनुः॥३४॥पापंसुकृतरूपं
तुजायतेतस्यदेहिनः॥शंखचक्रादिचिह्नानियोधारयतिनित्यशः॥३५॥नारायणायुधैर्नित्यंचिह्नितोयस्यविग्रहः ॥पा
पकोटियुतस्यापितस्यकिंकुरुतेयमः३६॥प्राणायामंततःकृत्वासंध्यावंदनमाचरेत् ॥पूर्वसंध्यांसनक्षत्रामुपासीतयथा
विधि ॥ ३७॥ गायत्रीमभ्यसेत्तावद्यावदादित्यदर्शनम् ॥ सावित्रैरनघैर्मंत्रैरुपस्थायकृतांजलिः॥३८॥ आत्मपादौत
थाभूमौसंध्याकालेऽभिवादयेत् ॥ यस्यस्मृत्येतिमंत्रेणयदूनंपरिपूरयेत्॥३९॥ यस्तुसंध्यामुपासीतश्रद्धयाविधिवद्द्वि
जः॥ नतस्यकिंचिद्दुष्प्रापंत्रिषुलोकेषुविद्यते ॥४०॥ दिवसस्यादिमेभागेकृत्यमेतदुदीरितम् ॥ एवंकृत्वाक्रियांनित्यां
हरिपूजांसमाचरेत्॥४१॥उपलिप्तेशुचौदेशेनियतोवाग्यतःशुचिः ॥वृत्तंवाचतुरस्रंवामंडलंगोमयेनतु ॥ ४२ ॥ विधा
याष्टदलंकुर्यात्तंडुलैर्व्रतसिद्धये ॥ सौवर्णंराजतंताम्रंमृन्मयंसुदृढंनवम्॥४३॥अव्रणंकलशंशुद्धंस्थापयेन्मंडलोपरि ॥
तत्रोदकंसमापूर्यशुद्धतीर्थाहृतंशिवम्॥४४॥कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः ॥ मूलेतत्रस्थितोब्रह्मामध्येमातृ
गणाःस्मृताः ॥ ४५ ॥ कुक्षौतुसागराःसर्वेसप्तद्वीपावसुंधरा ॥ ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः ॥ ४६ ॥ अंगैश्चस
हिताःसर्वेकलशंतुसमाश्रिताः॥एवंसंस्थाप्यकलशंतत्रतीर्थानियोजयेत् ॥ ४७॥ गंगागोदावरीचैवकावेरीचसरस्वती

॥ आयांतुममशांत्यर्थंदुरितक्षयकारकाः॥४८॥ततःसंपूज्यकलशमुपचारैःसमंत्रकैः ॥गंधाक्षतैश्चनैवेद्यैःपुष्पैस्तत्का
लसंभवैः॥४९॥तस्योपरिन्यसेत्पात्रंताम्रंपीतांबरावृतम् ॥ तस्योपरिन्यसेद्धैमंराधयासहितंहरिम् ॥ ५०॥ राधयास
हितःकार्यःसौवर्णःपुरुषोत्तमः ॥ तस्यपूजाप्रकर्तव्याविधिनाभक्तितत्परैः॥ ५१ ॥पुरुषोत्तममासस्यदैवतंपुरुषोत्तमः॥
तस्यपूजाप्रकर्तव्यासंप्राप्तेपुरुषोत्तमे॥५२॥संसारसागरेमग्नमुद्धारयतियोध्रुवम् ॥ कोनसेवेततंलोकेमर्त्योमरणधर्म
वान्॥५३॥पुनर्ग्रामाःपुनर्वित्तंपुनःपुत्राःपुनर्गृहम् ॥ पुनःशुभाशुभंकर्मनशरीरंपुनःपुनः ॥ ५४ ॥ तद्रक्षितंतुधर्मार्थंध
र्मोज्ञानार्थमेवहि ॥ ज्ञानेनसुलभोमोक्षस्तस्माद्धर्मंसमाचरेत् ॥५५॥ देहरूपस्यवृक्षस्यफलंधर्मःसनातनः॥ धर्महीन
स्तुयोदेहोनिष्फलोवंध्यवृक्षवत् ॥ ५६ ॥ नमाताचसहायार्थेनकलत्रसुतादयः॥ नपितासोदरावित्तंधर्मस्तिष्ठति केव
लम्॥ ५७ ॥ जराव्याघ्रीवभयदाव्याधयःशत्रवोयथा ॥ आयुर्यातिप्रतिदिनंभग्नभांडात्पयोयथा ॥ ५८ ॥ तरंगतर
लालक्ष्मीर्यौवनंकुसुमोपमम् ॥ विषयाःस्वप्नविषयाइवसर्वेनिरर्थकाः॥ ५९ ॥ चलंवित्तंचलंचित्तंचलंसंसारजंसुखम्
॥ एवंज्ञात्वाविरक्तःसन्धर्माभ्यासपरोभवेत् ॥ ६० ॥ अर्धग्रस्तोऽहिनाभेकोमक्षिकामत्तुमिच्छति ॥ कालग्रस्तस्त
थाजीवःपरपीडाधनाहृतः ॥ ६१ ॥ मृत्युग्रस्तायुषःपुंसःकिंसुखंहर्षयत्यहो ॥ आघातंनीयमानस्यवध्यस्येवनिरर्थ

कम् ॥ ६२ ॥ धर्मार्थंचयदाचित्तंनचित्तं सुलभंतदा॥यदावित्तंनचतदाचित्तंधर्मोन्मुखंभवेत् ॥ ६३॥ चित्तवित्तेयदा
स्यातांसत्पात्रंनतदालभेत् ॥ एतत्त्रितयसंबंधोयदाकालेतुसंभवेत् ॥६४॥अविचार्यतदाधर्मंयःकरोतिसबुद्धिमान्॥
वित्तप्राचुर्यसंसाध्यधर्माःसंतिसहस्रशः ॥ ६५॥पुरुषोत्तमेस्वल्पवित्तसाध्योधर्मोमहान्भवेत् ॥ स्नानंदानंकथायांचवि
ष्णोःस्मरणमेवच ॥ ६६ ॥ एतन्मात्रोपिसद्धर्मस्त्रायतेमहतोभयात्॥ ६७॥गंगैवतीर्थंस्मरएवधन्वीवित्तंतुविद्यैवगुणा
स्तुरूपम् ॥ मासेषुसर्वेषुतथैवसाक्षान्मासोत्तमोयंपुरुषोत्तमोहि ॥ ६८ ॥यद्यप्यसौनिंद्यतमःपुरासीत्सर्वेषुकृत्येषुमखा
दिकेषु ॥ तथापिसाक्षाद्भगवत्प्रसादात्तन्नामनाम्नाभुविविश्रुतोऽभूत् ॥६९॥यथाहास्तिपदेलीनंसर्वप्राणिपदंभवेत् ॥ ध
र्माःकालास्तथासर्वेविलीनाःपुरुषोत्तमे॥७०॥यथामरतरंगिण्यानसमाःसकलापगाः ॥ कल्पवृक्षेणनसमायथासकल
पादपाः ॥ ७१ ॥ चिंतारत्नेन रत्नानिनसमानियथाभुवि॥कामधेन्वायथाधेन्वोनराज्ञापुरुषाःसमाः ॥७२ ॥नवेदैःसर्व
शास्त्राणिपुण्यकालास्तथाखिलाः॥पुरुषोत्तममासेनसमोमासोनकर्हिंचित् ॥७३॥पुरुषोत्तममासस्यदैवतंपुरुषोत्तमः
तस्मात्संपूजयेद्भक्त्याश्रद्धयापुरुषोत्तमम्॥७४ ॥शास्त्रज्ञंनिपुणंशुद्धंवैष्णवंसत्यवादिनम् ॥विप्राचार्यमथाहूयपूजांतेन
प्रकल्पयेत् ॥ ७५ ॥संसारसागरमतीवगभीरवेगमंतस्थमोहमदनादितिमिंगिलौघम् ॥ उल्लंघ्यगंतुमभिवांछतिभारते

स्मिन्संपूजयेत्सपुरुषोत्तममादिदेवम् ॥ ७६ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादे
हृढधन्वोपाख्यानेआह्निककथनंनामविंशतितमोऽध्यायः ॥ २० ॥ ॥ छ ॥ ॥ छ ॥
॥ ॥ वाल्मीकिरुवाच ॥ ॥ अनलोत्तारणंकृत्वाप्रतिमायास्ततःपरम् ॥ प्राणप्रतिष्ठांकुर्वीतह्यन्यथाधातुरेवसा ॥ १ ॥
प्रतिमायाःकपोलौद्वौस्पृष्ट्वादक्षिणपाणिना ॥ प्राणप्रतिष्ठांकुर्वीततस्यांदेवस्यवैहरेः ॥ २ ॥ अकृतायांप्रतिष्ठायांप्राणानां
प्रतिमासुच ॥ यथापूर्वंतथाभागःस्वर्णादीनांनदेवता ॥ ३ ॥ अन्येषामपिदेवानांप्रतिमास्वपिपार्थिव ॥ प्राणप्रतिष्ठाक
र्तव्यातस्यांदेवत्वसिद्धये ॥ ४ ॥ पुरुषोत्तमबीजेनतद्विष्णोरित्यनेनच ॥ तथैवहृदयेंगुष्ठंदत्त्वाशश्वच्चमंत्रवित् ॥ ५ ॥
एभिर्मंत्रैःप्रतिष्ठांतुहृदयेपिसमाचरेत् ॥ अस्यैप्राणाःप्रतिष्ठंतुअस्यैप्राणाःक्षरंतुच ॥ ६ ॥ अस्यैदेवत्वसंख्यायैस्वा
हेतियजुरीरयन् ॥ मूलमंत्रैरंगमंत्रैर्वैदिकैरित्यनेनच ॥ ७ ॥ प्राणप्रतिष्ठांसर्वत्रप्रतिमासुसमाचरेत् ॥ अथवानाममं
त्रैश्चचतुर्थ्यंतैःप्रयत्नतः ॥८॥ स्वाहांतैश्चप्रकुर्वीततत्तद्देवाननुस्मरन् ॥ एवंप्राणान्प्रतिष्ठाप्यध्यायेच्छ्रीपुरुषोत्तमम् ॥
॥ ९ ॥ श्रीवत्सवक्षसंशांतंनीलोत्पलदलच्छविम् ॥ त्रिभंगललितंध्यायेत्सराधंपुरुषोत्तमम् ॥ १० ॥ देशकालौसमु
ल्लिख्यनियतोवाग्यतःशुचिः ॥ षोडशैरुपचारैश्चपूजयेत्पुरुषोत्तमम् ॥ ११ ॥ आगच्छदेवदेवेशश्रीकृष्णपुरुषोत्तम ॥ रा

धयासहितश्चात्रगृहाणपूजनंमम ॥ १२ ॥ श्रीराधिकासहितपुरुषोत्तमायनमःआवाहनंसमर्पयामि ॥ इत्यावाहनम्॥ नानारत्नसमायुक्तंकार्तस्वरविभूषितम् ॥ आसनंदेवदेवेशगृहाणपुरुषोत्तम ॥ १३ ॥ श्रीराधिका०आसनं० ॥ गंगादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतम् ॥ तोयमेतत्सुखस्पर्शंपाद्यार्थंप्रतिगृह्यताम् ॥ १४ ॥ इतिपाद्यम् ॥ नंदगोपगृहेजातोगोपिकानंदहेतवे ॥ गृहाणार्घ्यंमयादत्तंराधयासहितोहरे॥ १५॥इत्यर्घ्यम् ॥गंगाजलंसमानीतंसुवर्णकलशस्थितम्॥आचम्यतांहृषीकेशपुराणपुरुषोत्तम॥ १६ ॥इत्याचमनम्॥कार्यंमेसिद्धिमायातुपूजितेत्वयिधातरि॥पंचामृतैर्मयानीतैराधिकासहितोहरे॥ १७॥इतिस्नानम् ॥ पयोदधिघृतंगव्यंमाक्षिकंशर्करातथा ॥ गृहाणेमानिद्रव्याणिराधिकानंददायक॥ १८॥ इतिपंचामृतस्नानम् ॥ योगेश्वरायदेवायगोवर्धनधरायच ॥ यज्ञानांपतयेनाथगोविंदायनमोनमः ॥ १९ ॥ गंगाजलसमंशीतंनदीतीर्थसमुद्भवम् ॥ स्नानंदत्तंमयाकृष्णगृह्यतांनंदनंदन ॥२० ॥ इतिपुनःस्नानम्॥ पीतांबरयुगंदेवसर्वकामार्थसिद्धये ॥ मयानिवेदितंभक्त्यागृहाणसुरसत्तम ॥ २१ ॥ इतिवस्त्रम्॥आचमनम्॥दामोदरनमस्तेस्तुत्राहिमांभवसागरात् ॥ ब्रह्मसूत्रंसोत्तरीयंगृहाणपुरुषोत्तम॥२२॥उपवीतम्॥ आचमनम् ॥श्रीखंडंचंदनंदिव्यंगंधाढ्यंसुमनोहरम् ॥ विलेपनंसुरश्रेष्ठप्रीत्यर्थंप्रतिगृह्यताम् ॥२३॥चंदनम्॥अक्षतास्तुसुरश्रेष्ठाःकुंकुमाक्ताः

सुशोभिताः ॥ मयानिवेदिताभक्त्यागृहाणपुरुषोत्तम॥२४॥ इत्यक्षतान्॥ माल्यादीनिसुगंधीनिमालत्यादीनिवैप्रभो
॥ मयाहृतानिपूजार्थंपुष्पाणिप्रतिगृह्यताम्॥ २५ ॥इतिपुष्पाणि ॥ततोंगपूजा ॥नंदात्मजोयशोदायास्तनयःकेशिसू
दनः॥भूभारोद्धारकश्चैवह्यनंतोविष्णुरूपधृक्॥२६॥प्रद्युम्नश्चानिरुद्धश्चश्रीकंठःसकलास्त्रधृक् ॥ वाचस्पतिःकेशवश्च
सर्वात्मेतिचनामतः॥२७॥पादौगुल्फौतथाजानूजघनेचकटीतथा॥मेढ्रंनाभिंचहृदयंकंठंबाहूमुखंतथा ॥२८॥ नेत्रेशि
रश्चसर्वांगंविश्वरूपिणमर्चयेत्॥पुष्पाण्यादायक्रमशश्चतुर्थ्यंतैर्जगत्पतिम्॥२९प्रत्यंगपूजांकृत्वातुपुनश्चकेशवादिभिः
॥चतुर्विंशतिमंत्रैश्चचतुर्थ्यंतैश्चनामभिः ॥ ३०॥ पुष्पमादायप्रत्येकंपूजयेत्पुरुषोत्तमम् ॥३१ वनस्पतिरसोदिव्योगं
धाढ्योगंधउत्तमः॥आघ्रेयःसर्वदेवानांधूपोऽयंप्रतिगृह्यताम्॥ ३२॥इतिधूपम् ॥ त्वंज्योतिःसर्वदेवानांतेजसांतेजउत्त
मम् ॥ आत्मजोतिःपरंधामदीपोयंप्रतिगृह्यताम्॥३३ ॥इतिदीपम् ॥ नैवेद्यंगृह्यतांदेवभक्तिंमेह्यचलांकुरु ॥ईप्सितं
मेवरंदेहिपरत्रचपरांगतिम् ॥ ३४ ॥ इतिनैवेद्यम् ॥मध्येपानीयम्॥उत्तरापोशनम् ॥गंगाजलंसमानीतंसुवर्णकलश
स्थितम्॥आचम्यतांहृषीकेशत्रैलोक्यव्याधिनाशन॥३५॥इत्याचमनम् ॥ इदंफलंमयादेवस्थापितंपुरतस्तव ॥तेन
मेसुफलावाप्तिर्भवेज्जन्मनिजन्मनि।३६।इतिश्रीफलम् ॥ गंधकर्पूरसंयुक्तंकस्तूर्यादिसुवासितम्॥करोद्वर्तनकंदेवगृह्य

णपरमेश्वर ॥ ३७ ॥ इतिकरोद्वर्तनम् ॥ पूगीफलंसमायुक्तंसकर्पूरंमनोहरम्॥भक्त्यादत्तंमयादेवतांबूलंप्रतिगृह्यताम्
॥३८॥तांबूलम् ॥ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः ॥ अनंतपुण्यफलदमतःशांतिंप्रयच्छमे॥३९॥ इतिदक्षि
णाम्॥शारदेंदीवरश्यामंत्रिभंगललिताकृतिम्॥नीराजयामिदेवेशंराधयासहितंहरिम्॥४०॥इतिनीराजनम्॥ रक्षरक्ष
जगन्नाथरक्षत्रैलोक्यनायक ॥ भक्तानुग्रहकर्तात्वंप्रदक्षिणांगृहाणमे ॥ ४१ ॥ इतिप्रदक्षिणाम् ॥ ॥ यज्ञेश्वरायदेवाय
तथायज्ञोद्भवायच ॥ यज्ञानांपतयेनाथगोविंदायनमोनमः ॥ ४२ ॥ इतिमंत्रपुष्पम् ॥ ॥ विश्वेश्वरायविश्वायत
थाविश्वोद्भवायच ॥ विश्वस्यपतयेतुभ्यंगोविंदायनमोनमः ॥ ४३ ॥ इतिनमस्कारम् ॥ मंत्रहीनेतिमंत्रेणक्षमाप्यपुरु
षोत्तमम् ॥ स्वाहांतैर्नाममंत्रैश्चतिलहोमोदिनेदिने ॥४४॥दीपःकार्यस्त्वखंडश्चयावन्मासंचसर्पिषा ॥ पुरुषोत्तमस्य
प्रीत्यर्थंसर्वार्थफलसिद्धये॥४५॥यस्यस्मृत्येतिमंत्रेणनमस्कृत्यजनार्दनम्॥यदूनंतत्तुसपूर्णंविधायविचरेत्सुखम्॥४६
इत्थंश्रीपुरुषोत्तमंनवघनश्यामंसराधंमुदासंप्राप्तेपुरुषोत्तमेऽवनितलेलब्ध्वाजनुर्मानवम् ॥ भक्त्यायःपरिपूजयेत्प्रति
दिनंकृत्वागुरुंवैष्णवंभुक्त्वाह्यत्रसुखंसमस्तमतुलंपश्चात्सगच्छेत्परम् ॥ ४७॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहा
त्म्येश्रीनारायणनारदसंवादेदृढधन्वोपाख्यानेपुरुषोत्तमपूजनविधिर्नामैकविंशोऽध्यायः ॥ २१ ॥ ॥ छ ॥

राजोवाच ॥ ॥ पुरुषोत्तमस्यनियमान्व्रतिनोवदविस्तरात् ॥ किंभोज्यंकिमभोज्यंवावर्ज्यावर्ज्यैंतपोधन ॥ १ ॥ श्री
नारायणउवाच ॥ ॥ सएवंभगवान्पृष्टोभूभृतावाल्मिकोमुनिः ॥ पुंसांनिःश्रेयसार्थायतमाहबहुमानयन् ॥ २ ॥
वाल्मीकिरुवाच॥ ॥पुरुषोत्तममासेयेनियमाःपरिकीर्तिताः ॥ तान्शृणुष्वमयाराजन्कथ्यमानान्समासतः ॥ ३॥ह
विष्यान्नंचभुंजीतप्रयतःपुरुषोत्तमे ॥ गोधूमाःशालयःसर्वाःसितामुद्गायवास्तिलाः॥४॥कलायकंगुनीवारावास्तुकंहि
लमोचिका ॥ आर्द्रकंकालशाकंचमूलंकंदंचकर्कटीम् ॥५॥ रंभासैंधवसामुद्रेलवणेदधिसर्पिषी॥पयोनुद्धृतसारंचपन
साम्रेहरीतकी ॥ ६ ॥ पिप्पलीजीरकंचैवनागरंचैवतिंतिडी ॥ क्रमुकंलवलीधात्रीफलान्यगुडमैक्षवम् ॥ ७ ॥अतैलप
क्वंमुनयोहविष्यंप्रवदंतिच ॥ हविष्यभोजनंनृणामुपवाससमंविदुः ॥ ८ ॥ सर्वामिषाणिमांसंचक्षौद्रंसौवीरकंतथा ॥
राजमाषादिकंचैवराजिकामादकंतथा ॥ ९ ॥ द्विदलंतिलतैलंचतथान्नंशल्यदूषितम् ॥ भावदुष्टंक्रियादुष्टंशब्ददुष्टंच
वर्जयेत्॥१०॥परान्नंचपरद्रोहंपरदारागमंतथा ॥तीर्थंविनाप्रयाणंचपरदेशंपरित्यजेत् ॥ ११ ॥ देववेदद्विजानांचगुरु
गोव्रतिनांतथा॥स्त्रीराजमहतांनिंदांवर्जयेत्पुरुषोत्तमे ॥ १२॥ प्राण्यंगमामिषंचूर्णंफलेजंबीरमामिषम् ॥ धान्येमसूरि
काप्रोक्ताअन्नंपर्युषितंतथा ॥ १३ ॥ अजागोमहिषीदुग्धादन्यदुग्धादिचामिषम् ॥ द्विजक्रीतारसाःसर्वेलवणंभूमिजंत

था ॥१४॥ ताम्रपात्रस्थितंगव्यंजलंचर्मणिसंस्थितम् ॥ आत्मार्थंपाचितंचान्नमामिषंतद्बुधैःस्मृतम् ॥१५॥ ब्रह्मचर्य
मधःशय्यांपत्रावल्यांचभोजनम् ॥ चतुर्थकालेभुक्तिंचप्रकुर्यात्पुरुषोत्तमे॥ १६॥ रजस्वलांत्यजम्लेच्छपतितैर्व्रात्यकैः
सह् ॥ द्विजद्विट्वेदबाह्यैश्चनवदेत्पुरुषोत्तमे ॥ १७ ॥एभिर्दृष्टंचकाकैश्चसूतकान्नंचयद्भवेत्॥द्विःपाचितंचदग्धान्नंनैवा
द्यात्पुरुषोत्तमे ॥१८॥ पलांडुंलशुनंमुस्तांछत्राकंगृंजनंतथा॥नालिकंमूलकंशिग्रुंवर्जयेत्पुरुषोत्तमे॥१९ ॥एतानिव
र्जयेन्नित्यंव्रतीसर्वव्रतेष्वपि ॥ कृच्छ्राद्यंचापिकुर्वीतस्वशक्त्याविष्णुतुष्टये ॥ २० ॥ कूष्मांडंबृहतीचैवतरुणीमूलकंत
था ॥ श्रीफलंचकलिंगंचफलंधात्रीफलंतथा॥ २१॥ नारिकेलमलाबुंचपटोलंबदरीफलम्॥ चर्मवृंताजिकंवल्लीशाकं
तुजलजंतथा॥२२॥शाकान्येतानिवर्ज्यानिक्रमात्प्रतिपदादिषु ॥ धात्रीफलंरवौतद्वद्वर्जयेत्सर्वदागृही ॥ २३ ॥ यद्य
द्योवर्जयेत्किंचित्पुरुषोत्तमतुष्टये ॥ तत्पुनर्ब्राह्मणेदत्त्वाभक्षयेत्सर्वदैवहि॥२४॥कुर्यादेतांश्चनियमान्व्रतीकार्तिकमाघ
योः ॥ नियमेनविनाराजन्फलंनैवाप्नुयाद्व्रती ॥ २५॥ उपोषणेनकर्तव्यःशक्तिश्चेत्पुरुषोत्तमः॥अथवाघृतपानंचपयः
पानमयाचितम्॥ २६॥ फलाहारादिवाकार्यंयथाशक्त्याव्रतार्थिना ॥ व्रतभंगोयथानस्यात्तथाकार्यंविचक्षणैः ॥२७॥
पुण्येन्हिप्रातरुत्थायकृत्वापौर्वाह्निकीःक्रियाः ॥ गृह्णीयान्नियमंभक्त्याश्रीकृष्णंचहृदिस्मरन् ॥२८॥उपवासस्यंनक्तस्य

चैकभुक्तस्यभूपते॥एकंचनिश्चयंकृत्वाव्रतमेतत्समाचरेत् ॥२९॥ श्रीमद्भागवतंभक्त्याश्रोतव्यंपुरुषोत्तमे॥तत्पुण्यंव
चसावक्तुंविधातापिनेशक्नुयात् ॥ ३०॥ शालिग्रामार्चनंकार्यंमासेश्रीपुरुषोत्तमे॥तुलसीदललक्षेणतस्यपुण्यमनंतक
म्॥ ३१ ॥यथोक्तव्रतिनंदृष्ट्वामासेश्रीपुरुषोत्तमे॥ यमदूताःपलायंतेसिंहंदृष्ट्वायथागजाः ॥ ३२ ॥ एतन्मासव्रतंराजन्
श्रेष्ठंक्रतुशतादपि ॥ क्रतुंकृत्वाप्नुयात्स्वर्गंगोलोकंपुरुषोत्तमे॥३३ ॥ पृथिव्यांयानितीर्थानिक्षेत्राणिसर्वदेवताः ॥ तद्देहे
तानितिष्ठंतियःकुर्यात्पुरुषोत्तमम् ॥३४॥ दुःस्वप्नंचैवदारिद्र्यंदुष्कृतंत्रिविधंचयत् ॥ तत्सर्वंविलयंयातिकृतेश्रीपुरुषोत्त
मे॥३५॥पुरुषोत्तमसेवायांनिश्चलंहरिसेवकम् ॥विघ्नाद्रक्ष्यंतिशक्राद्याःपुरुषोत्तमतुष्टये ॥ ३६ ॥ पुरुषोत्तमस्यव्रति
नोयत्रयत्रवसंतिच ॥ भूतप्रेतपिशाचाद्यानतिष्ठंतितदग्रतः ॥ ३७ ॥एवंयोविधिनाराजन्कुर्याच्छ्रीपुरुषोत्तमम् ॥सह
स्रवदनोनालंतत्फलंवक्तुमंजसा ॥ ३८ ॥ ॥ श्रीनारायणउवाच ॥ ॥ पुरुषोत्तमंप्रियममुंपरमादरेणकुर्यादनन्यमन
सापुरुषोत्तमोयः ॥ पुरुषोत्तमप्रियतमःपुरुषःसभूत्वापुरुषोत्तमेनरमतेरसिकेश्वरेण ॥ ३९ ॥ इतिश्रीबृहन्नारदीयपुराणे
पुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादेदृढधन्वोपाख्यानेपुरुषोत्तमव्रतनियमकथनंनामद्वाविंशोऽध्यायः॥ २२ ॥
॥ राजोवाच ॥ ॥ किंफलंदीपदानस्यमासेश्रीपुरुषोत्तमे॥ तन्मेवदमुनिश्रेष्ठकृपयादीनवत्सल॥१॥ ॥श्रीनारायणउ

वाच ॥ ॥ इत्थंविज्ञापितःप्राहवाल्मीकिर्मुनिसत्तमः॥प्रवृद्धहर्षोराजानंविनीतंप्रहसन्निव ॥२॥ ॥वाल्मीकिरुवाच ॥
शृणुष्वराजशार्दूलकथांपापप्रणाशिनीम् ॥ यांश्रुत्वायातिविलयंपापंपंचविधंमहत् ॥३॥सौभाग्यनगरेराजाचित्रबाहु
रितिश्रुतः ॥ सत्यसंधोमहाप्राज्ञश्चासीच्छूरतरःपरः ॥ ४ ॥ सहिष्णुःसर्वधर्मज्ञःशीलरूपदयान्वितः॥ब्रह्मण्योभगवद्भ
क्तःकथाश्रवणतत्परः॥ ५॥स्वदारनिरतःशश्वत्पशुपुत्रसमन्वितः॥चतुरंगबलोपेतःसमृद्ध्याधनदोपमः॥६॥तस्यभा
र्याचंद्रकलाचतुःषष्टिकलान्विता ॥ पतिव्रतामहाभागाभगवद्भक्तिसंयुता॥७॥ तयासहमहीपालोबुभुजेमेदिनींयुवा ॥
विनाश्रीकृष्णदेवंसनैवजानातिदैवतम्॥ ८ ॥एकस्मिन्दिवसेराजाचित्रबाहुर्महीपतिः॥ दृष्ट्वासमागतंदूरादगस्त्यमुनि
पुंगवम्॥९॥प्रणम्यदंडवद्भूमौविधिनातमपूजयत् ॥कल्पयित्वासनंभक्त्यातस्थौमुनिवराग्रतः॥१०॥विनयावनतोभू
त्वाजगादमुनिसत्तमम्॥राजोवाच॥अद्यमेसफलंजन्मह्यद्यमेसफलंदिनम्११॥अद्यमेसफलंराज्यमद्यमेसफलंगृहं॥
यस्त्वंसमागतोमेद्यगृहेश्रीकृष्णसेवकः॥१२॥ मुक्तोहंपापसंघाताद्यत्त्वयाहंनिरीक्षितः॥तुभ्यंसमर्पितंराज्यंगजाश्वरथ
संयुतम्॥ १३॥ वैष्णवोसिमुनिश्रेष्ठनास्त्यदेयंमयातव ॥ मेरुतुल्यंभवेत्स्वल्पंवैष्णवायसमर्पितम्॥१४॥ कपर्दिकाप्र
माणंतुव्यंजनंवान्नमुत्तमम्॥ नयच्छतिदिनेयस्तुवैष्णवायद्विजन्मने॥१५॥तद्दिनंविफलंतस्यकथितंवेदपारगैः॥ वि

ष्णुभक्ताश्चयेकेचित्सर्वेपूज्याद्विजातयः॥१६॥ तेषांसंभावनाकार्यावाङ्मनःकायकर्मभिः ॥ कथितंममगर्गेणगौतमे
नसुमंतुना॥१७॥तावत्प्रभाचताराणांयावन्नोदयतेरविः॥तावदन्येद्विजन्मानोयावन्नायातिवैष्णवः॥ १८ ॥ ॥ अग
स्त्यउवाच ॥ चित्रबाहोमहाभागधन्यस्त्वंसांप्रतंनृप॥इमाधन्याःप्रजाःसर्वायस्त्वंरक्षतिवैष्णवः॥ १९ ॥ तस्मिन्रा
ष्ट्रेनवस्तव्यंयस्यराजानवैष्णवः॥वरोवासोवनेशून्येनतुराष्ट्रेह्यवैष्णवे॥२०॥चक्षुर्हीनोयथादेहःपतिहीनायथाप्रिया॥
निरक्षरोयथाविप्रस्तथाराष्ट्रमवैष्णवम्॥२१॥दर्भहीनायथासंध्यातिलहीनंचतर्पणम् ॥ वृत्त्यर्थंदेवसेवाचतथाराष्ट्रम
वैष्णवम्॥२२॥सकेशाविधवायद्वद्व्रतंस्नानविवर्जितम्॥ शूद्रश्चब्राह्मणीगामीतथाराष्ट्रमवैष्णवम्॥ २३॥ सराजाप्रो
च्यतेसद्भिर्यःश्रीकृष्णपदाश्रयः॥ तद्राष्ट्रंवर्धतेनित्यंसुखीभवतितत्प्रजा ॥ २४ ॥ दृष्टिर्मेसफलाराजन्यन्मयात्वंनिरी
क्षितः॥ अद्यमेसफलावाणीह्युच्यतेयत्त्वयासह ॥२५॥इदंराज्यंत्वयाराजन्प्रकर्तव्यंममाज्ञया॥प्रतिष्ठितोमयाराज्ये
गमिष्याम्यस्तुस्वस्तिते ॥ २६ ॥ ॥ श्रीनारायणउवाच ॥ ॥ इत्युक्त्वागंतुकामंतमगस्त्यंमुनिपुंगवम्॥ ननामपर
याभक्त्यामहिषीसापतिव्रता ॥ २७॥ ॥ अगस्त्यउवाच ॥ ॥ अवैधव्यंसदातेस्तुभक्त्याभजपतिंशुभे॥ दद्यातेस्तुस
दाभक्तिःश्रीगोपीजनवल्लभे॥२८॥ इत्थमाशीर्ददानंतंभूयःप्राहमहीपतिः ॥ बद्धांजलिपुटोभूत्वाविनयानतकंधरः ॥

॥२९॥ चित्रबाहुरुवाच ॥ ॥ विपुलामेकथंलक्ष्मीःकथंराज्यमकंटकम्॥पतिव्रताकथंपत्नीकिंकृतंसुकृतंमया ॥३०॥
एतन्मेब्रूहिविप्रेंद्रतवाहंशरणंगतः ॥ करस्थामलवत्सर्वंजानासित्वंमुनीश्वर ॥ ३१ ॥ ॥श्रीनारायणउवाच ॥ ॥इ
त्थमावेदितोराज्ञाह्यगस्त्योमुनिपुंगवः॥समाहितमनाभूत्वाजगादनृपसत्तमम्॥३२॥ ॥अगस्त्यउवाच ॥ ॥ मया
विलोकितंसर्वंप्राक्तनंचरितंतव ॥ तत्सर्वंकथयाम्यद्यसेतिहासंपुरातनम्॥३३॥ चमत्कारपुरेरम्येमणिग्रीवाभिधानभृ
त्॥त्वमभूःशूद्रजातीयोजीवहिंसापरायणः ॥ ३४ ॥ नास्तिकोदुष्टचारित्रःपरदारप्रधर्षकः ॥ कृतघ्नोदुर्विनीतश्चशिष्टा
चारविवर्जितः ॥३५॥ याचेयंभवतोभार्यापूर्वजन्मनिसुंदरी॥ कर्मणामनसावाचापतिसेवापरायणा॥३६॥पतिव्रता
महाभागाधर्मनिष्ठामनस्विनी॥भावंनकुरुतेदुष्टंतवोपरिकदाचन ॥३७॥ ज्ञातिभिस्त्वंपरित्यक्तोबंधुभिःपापकर्मकृत् ॥
राज्ञाक्रुद्धेनतेसर्वंगृहीतंधनमुत्तमम्॥३८॥ततोऽवशिष्टंयत्किंचिद्गृहीतंज्ञातिभिस्तदा ॥ गतेद्रव्येधनाकांक्षातवासी
द्विपुलातदा॥३९॥क्षीयमाणेधनेसाध्वीनत्वामत्यजदुन्मनाः ॥ एवंतिरस्कृतःसर्वैर्गतवान्निर्जनंवनम्॥४०॥ हत्वाजी
वाननेकांश्चत्वंचकर्थात्मपोषणम्॥एवंवर्तयतस्तस्यपत्न्यासहमहीपते॥४१॥एकदाधनुरुद्यम्यमणिग्रीवोवनंगतः ॥
बहुव्यालमृगाकीर्णंमृगमांसाजिघृक्षया ॥ ४२॥ तस्मिन्निर्मानुषेऽरण्येमध्येमार्गंमहामुनिः॥उग्रदेवइतिख्यातोदिङ्मू

ढोविह्वलोभवत्॥४३॥तृषासंपीडितोत्यर्थंमध्यंदिनगतेरवौ ॥ तत्रैवपतितोराजन्मुमूर्षुरभवत्तदा ॥ ४४ ॥ तंदृष्ट्वाते
दयाजातादिग्भ्रष्टंदुःखितंद्विजम् ॥उत्थाप्यतंद्विजन्मानंगृहीत्वास्वाश्रमंगतः ॥४५॥दंपतिभ्यांकृतासेवादुःखितस्य
द्विजन्मनः ॥ उग्रोदेवोमहायोगीमुहूर्तानंतरंतदा ॥ ४६ ॥ अवाप्यचेतनांतत्रविस्मयंसमजीगमत् ॥ तत्रस्थोहंकुत
श्चात्रकेनानीतोवनांतरम् ॥ ४७ ॥ ॥ श्रीनारायणउवाच ॥ ॥ मणिग्रीवोवदद्विप्रंरमणीयमिदंसरः ॥ अत्रास्तेशीत
लंवारिपद्मिनीपुष्पवासितम्॥४८॥तत्रस्नात्वाजलेशीतेकृत्वापौर्वाह्णिकीःक्रियाः ॥ कुरुब्रह्मन्फलाहारंपिबवारिसुशीत
लम् ॥ ४९ ॥ सुखेनकुरुविश्रामंमयासंरक्षितोऽधुना ॥ उत्तिष्ठत्वंमुनिश्रेष्ठप्रसादंकर्तुमर्हसि ॥ ५० ॥ ॥ अगस्त्यउवा
च ॥ ॥ लब्धसंज्ञस्तदाविप्रउग्रदेवोगतश्रमः॥मणिग्रीववचःश्रुत्वासमुत्तस्थौतृषातुरः ॥५१॥ मणिग्रीवभुजालंबीज
गामसरसीतटम् ॥ उपविष्टश्चित्रबाहोतत्तटेवटशोभिते ॥ ५२ ॥ विश्रम्यतत्क्षणंविप्रोवटच्छायामधिश्रितः ॥ स्नात्वा
नित्यविधिंकृत्वावासुदेवमपूजयत्॥५३॥देवान्पितॄंश्चसंतर्प्यपपौनीरंसुशीतलम् ॥ उग्रदेवस्ततःशीघ्रंवटमूलमुपा
श्रितः॥५४॥मणिग्रीवःसपत्नीकोननाममुनिसत्तमम्॥ विनयेनावदद्वाचमातिथ्यंकर्तुमुन्मनाः ॥ ५५ ॥ ॥ मणिग्री
वउवाच ॥ ॥ अस्मत्संतारणायाद्यमदाश्रममुपागतः ॥ ब्रह्मंस्त्वद्दर्शनादेवपापंमेविलयंगतम् ॥५६॥इत्युक्त्वातंप्रिया

माहमणिग्रीवोमुदान्वितः ॥ अयिसुंदरिपक्वानिस्वादूनियानियानिच ॥ ५७॥ तानिचूतफलानित्वंशीघ्रमानयमाचिर
म्॥अन्यत्कंदादियत्किंचित्तदानयशुभानने ॥ ५८ ॥ निजनाथवचःश्रुत्वाफलान्यादायसुंदरी ॥ कंदादिकंचविप्राग्रे
स्थापयामासहर्षतः॥५९॥मणिग्रीवःपुनर्वाक्यमुवाचमुनिसत्तमम् ॥ फलान्यंगीकुरुब्रह्मन्कृतार्थीकुरुदंपती ॥ ६० ॥
॥ उग्रदेवउवाच ॥ ॥ त्वामहंनैवजानामिकस्त्वंभोःकथयस्वमे ॥ अज्ञातस्यनभोक्तव्यंब्राह्मणेनविजानता ॥ ६१ ॥
॥ मणिग्रीवउवाच ॥ ॥ शूद्रोहंद्विजशार्दूलमणिग्रीवाभिधानतः ॥ स्वजनैर्जातिवर्गैश्चपरित्यक्तःस्वबांधवैः ॥ ६२ ॥
इत्थंशूद्रवचःश्रुत्वाफलाहारमचीकरत् ॥ उग्रदेवःप्रसन्नात्माततोनीरमपीपिबत् ॥ ६३ ॥ ततोविप्रंसुखासीनंमणिग्री
वोऽवदद्वचः ॥ लालयंस्तत्पदांभोजयुगंस्वांकगतंमुहुः॥६४॥ ॥ मणिग्रीवउवाच ॥ ॥ क्वगंतव्यंमुनिश्रेष्ठकुतस्त्वं
चेहकानने ॥ निर्जनेनिर्जलेदुष्टेहिंस्रजंतुसमाकुले॥ ६५ ॥ ॥ उग्रदेवउवाच ॥ ॥ ब्राह्मणोऽहंमहाभागप्रयागंगंतुमु
त्सहे ॥ अधुनाज्ञातमार्गेणसंप्राप्तोदारुणेवने॥६६॥तत्रश्रांतस्तृषाक्रांतोमुमूर्षुरभवंक्षणात् ॥ जीवितंमेत्वयादत्तंब्रूहि
किंतेददाम्यहम् ॥ ६७ ॥ अरण्यंकेनदुःखेनदंपतिभ्यांसमाश्रितम् ॥ तद्दुःखमपनेष्यामिमणिग्रीववदस्वमे ॥६८ ॥
॥ अगस्त्यउवाच ॥ इत्युग्रदेववचनंललितंनिशम्यपत्न्याःसमक्षमनुनीयमुनीश्वरंतम् ॥ दारिद्र्यसागरतितीर्षुरसौ

स्वकीयंवृत्तांतमाहानिजकर्मंविपाकमुग्रम् ॥ ६९ ॥ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणना
रदसंवादेदृढधन्वोपाख्यानेत्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ छ ॥ ॥ छ ॥
॥ ॥ मणिग्रीवउवाच ॥ ॥ चमत्कारपुरेरम्येविद्वज्जनसमाकुले ॥ ममवासोऽभवत्तत्रधर्मपत्न्यासहद्विज ॥ १ ॥
धनाढ्यस्यपवित्रस्यपरोपकृतिशालिनः ॥ कदाचिद्दैवयोगेनदुर्बुद्धिःसमपद्यत ॥ २ ॥ निजधर्मपरित्यागःकृतोमेदु
ष्टबुद्धिना ॥ परस्त्रीसेवनंनित्यमपेयंपीयतेस्मह ॥ ३ ॥ चौर्यहिंसापरश्चाहंपरित्यक्तःस्वबंधुभिः ॥ बृहद्बलेनभूपेनमद्गृ
हंलुंठितंतदा ॥ ४ ॥ अवशिष्टंचयत्किंचिद्गृहीतंबंधुभिर्धनम् ॥· एवंतिरस्कृतःसर्वैर्वनवासमचीकरम्॥५॥कृत्वाजीवव
धंनित्यंजीवेयंभार्ययासह ॥ एतस्मिन्विपिनेघोरेवसतोमेदुरात्मनः ॥ ६ ॥ कुरुष्वानुग्रहंब्रह्मन्पापयुक्तस्यसांप्रतम् ॥
प्राचीनपुण्यपुंजेनसंप्राप्तोगहनेभवान् ॥ ७ ॥तवाहंशरणंयातःसपत्नीकोमहामुने ॥ उपदेशप्रसादेनकृतार्थीकर्तुमर्हसिं
॥८॥येनमेतीव्रदारिद्र्यंविलयंयातितत्क्षणात् ॥ अतुलंवैभवंलब्ध्वाविचरामियथासुखम् ॥ ९ ॥ ॥ उग्रदेवउवाच ॥
कृतार्थोसिमहाभागयदातिथ्यंकृतंमम ॥ अतस्तेभाविकल्याणंसपत्नीकस्यसांप्रतम् ॥ १० ॥ विनाव्रतैर्विनातीर्थैर्विना
दानैरयत्नतः ॥दारिद्र्यंतेलयंयातितथानिर्धारितंमया ॥ ११ ॥अतःपरंतृतीयोस्तिमासःश्रीपुरुषोत्तमः ॥ भवद्भ्यांतत्र

विधिनादंपतीभ्यांप्रयत्नतः॥१२॥कर्तव्यंदीपदानंचपुरुषोत्तमतुष्टये॥तेनतेतीव्रदारिद्र्यंसमूलंनाशमेष्यति॥१३॥
तिलतैलेनकर्तव्यःसार्पिषावैभवेसति॥तयोर्मध्येनकिंचित्तेकाननेवसतोऽधुना।१४।इंगुदीजेनतैलेनदीपःकार्यस्त्वया
नघ॥यावन्मासंसनियमंमाणिग्रीवस्त्रियासह ॥ १५ ॥ अस्मिन्सरोवरेस्नात्वासहपत्न्यानिरंतरम्॥ एवमेवहिकर्तव्यंमा
समात्रंत्वयावने॥१६॥अयमेवोपदेशस्तुसपत्नीकायमेकृतः ॥ त्वदातिथ्यप्रसन्नेनमयानिगमनिश्चितम् ॥ १७ ॥ अ
न्यथादीपदानंहिरमावृद्धिकरंनृणाम् ॥ विधिनाक्रियमाणंचेत्किंपुनःपुरुषोत्तमे॥ १८॥ वेदोक्तानिचकर्माणिदानानिवि
विधानिच।।पुरुषोत्तमदीपस्यकलांनार्हंतिषोडशीम्॥१९॥तीर्थानिसकलान्येवशास्त्राणिसकलानिच॥पुरुषोत्तमदीप
स्यकलांनार्हंतिषोडशीं॥२०॥योगोज्ञानंतथासांख्यंतंत्राणिसकलान्यपि ॥ पुरुषोत्तमदीपस्यकलांनार्हंतिषोडशीं ॥
॥२१॥कृच्छ्रचांद्रायणादीनिव्रतानिनिखिलानिच ॥ पुरुषोत्तमदीपस्यकलांनार्हंतिषोडशीम्॥२२॥वेदाभ्यासोगया
श्राद्धंगोमतीतटसेवनम्॥पुरुषोत्तमदीपस्यकलांनार्हंतिषोडशीम् ॥२३॥उपरागसहस्राणिव्यतीपातशतानिच॥पुरु
त्तषोम० ॥ २४ ॥ कुर्वादिक्षेत्रवर्याणिदंडकादिवनानिच ॥ पुरुषोत्तम० ॥ २५ ॥ एतद्गुह्यतमंवत्सनाख्येयंयस्यकस्य
चित् ॥ धनधान्यपशुव्रातपुत्रपौत्रयशस्करम्॥२६॥वंध्यावंध्यत्वशमनमवैधव्यकरंस्त्रियाः॥राज्यदंराज्यभ्रष्टस्यचिं

तितार्थकरंनृणाम्॥२७॥कन्याविंदेतभर्तारंगुणिनंचिरजीविनम् ॥ कांतार्थीलभतेकांतांसुशीलांचपतिव्रताम्॥२८॥
विद्यार्थीलभतेविद्यांसुसिद्धिंसिद्धिकामुकः ॥ कोशकामोलभेत्कोशंमोक्षार्थीमोक्षमाप्नुयात्॥२९॥ विनाविधिंविनाशास्त्रं
यःकुर्यात्पुरुषोत्तमे ॥ दीपंतुयत्रकुत्रापिकामितंसर्वमाप्नुयात् ॥ ३० ॥ किंपुनर्विधिनावत्सदीपंकुर्यात्प्रयत्नतः॥ त
स्माद्दीपःप्रकर्तव्योमासेश्रीपुरुषोत्तमे ॥ ३१ ॥ एतदुक्तंमयातेद्यतीव्रदारिद्र्यनाशनम् ॥स्वस्तितेऽस्तुगमिष्यामिसं
तुष्टःसेवयातव ॥ ३२ ॥ ॥ अगस्त्यउवाच ॥ ॥ इत्युक्त्वाविप्रवर्यौसौप्रयागंसंजगामह ॥ द्विभुजंमुरलीहस्तंम
नसाश्रीहरिंस्मरन् ॥ ३३ ॥ अनुगत्वोग्रदेवंतंकियन्मासंनिजाश्रमात् ॥ पुनरावव्रतुर्नत्वादंपतीहृष्टमानसौ ॥ ३४ ॥
आसाद्यस्वाश्रमंभक्त्यापुरुषोत्तममानसौ ॥ निन्यतुर्मासयुगलंद्विजभक्तिपरायणौ ॥ ३५ ॥ गतेमासद्वयेश्रीमाना
गतःपुरुषोत्तमः ॥ तौतस्मिंश्चक्रतुर्दीपंगुरुभक्तिपरायणौ ॥ ३६ ॥ इंगुदीजेनतैलेनवैभवार्थमतंद्रितौ ॥ एवंतयोः
कृतवतोर्जगामपुरुषोत्तमः ॥ ३७ ॥ उग्रदेवप्रसादेनविनिर्धूतमनोमलौ ॥ कालस्यवशमापन्नौपुरंदरपुरींगतौ॥३८॥
तत्रत्यंभोगमासाद्यपृथिव्यांभारताजिरे ॥ उग्रदेवप्रसादेनवरंजनुरवापतुः ॥ ३९ ॥ वीरबाहुसुतस्त्वंचचित्रबाहुरि
तिश्रुतः ॥ पूर्वस्मिन्योमणिग्रीवोमृगाहिंसापरायणः ॥ ४० ॥ इयंचंद्रकलानाम्नीमहिषीयाधुनातव ॥ सुंदरीतिसमा

ख्यातापुनर्जनुषितेंऽगना॥४१॥पातिव्रत्येनधर्मेणतवाद्यांगार्धहारिणी॥पतिव्रताहियानारीपतिपुण्यार्धभागिनी॥४२
कृतेनदीपदानेनमासेश्रीपुरुषोत्तमे ॥ इंगुदीजेनतैलेनतवराज्यमकंटकम् ॥४३ ॥ किंपुनःसार्पिषादीपंतिलतैलेनवा
पुनः ॥ यःकरोतिह्यखंडंवैमासेश्रीपुरुषोत्तमे ॥ ४४ ॥ पुरुषोत्तमदीपस्यफलमेतन्नसंशयः ॥ किंपुनश्चोपवासाद्यैश्वर
तःपुरुषोत्तमम् ॥ ४५ ॥ ॥ वाल्मीकिरुवाच ॥ ॥ चित्रबाहुचरितंपुरातनंसन्निरूप्यकलशोद्भवोमुनिः॥सत्कृतिं
समधिगम्यतत्कृतामक्षयाशिषमुदीर्यनिर्ययौ ॥ ४६ ॥ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनाराय
णनारदसंवादेदृढधन्वोपाख्यानेदीपमाहात्म्यकथनंनामचतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ छ ॥ ॥ छ ॥
॥ दृढधन्वोवाच ॥ ॥ अथसम्यग्वदब्रह्मन्नुद्यापनविधिंमुने॥पुरुषोत्तममासीयव्रतिनांकृपयानृणाम् ॥१॥ ॥ वाल्मी
किरुवाच ॥ समासतःप्रवक्ष्यामिमासेश्रीपुरुषोत्तमे ॥ उद्यापनविधिंसम्यग्व्रतसंपूर्णहेतवे ॥२॥कृष्णपक्षेचतुर्दश्यांन
वम्यांपुरुषोत्तमे ॥ अष्टम्यांवाथकर्तव्यमुद्यापनमुदीरितम् ॥ ३ ॥ यथालब्धोपहारेणमासेश्रीपुरुषोत्तमे॥पुण्येस्मिन्प्रा
तरुत्थायकृत्वापौर्वाह्णिकीःक्रियाः ॥ ४ ॥ समाहितमनाभूत्वात्रिंशद्विप्रान्निमंत्रयेत् ॥ सपत्नीकान्सदाचारान्विष्णुभक्ति
परायणान् ॥ ५ ॥यथाशक्त्याथवासप्तपंचवित्तानुसारतः॥ततोमध्याह्नसमयेद्रोणमानेनभूपते॥६॥तदर्धेनतदर्धेनाने

जशक्त्यनुसारतः ॥ पंचधान्येनकुर्वीतसर्वतोभद्रमुत्तमम् ॥७॥ चत्वारःकलशाःस्थाप्याहैमावाराजताःशुभाः ॥ ताम्रा
वामृन्मयाःशुद्धाअव्रणामंडलोपरि ॥ ८ ॥ चतुर्दिक्षुचतुर्व्यूहप्रीतयेश्रीफलान्विताः ॥ सद्वस्त्रवेष्टितानागवल्लीदलस
मन्विताः ॥ ९ ॥ वासुदेवंहलधरंप्रद्युम्नंदेवमुत्तमम् ॥ अनिरुद्धंचतुर्ष्वेवंस्थापयेत्कलशेषुच ॥ १० ॥ पुरुषोत्तमव्रतारं
मेस्थापितंपुरुषोत्तमम् ॥ सराधंदेवदेवेशंकलशेनसमन्वितम् ॥ ११ ॥ ततआनीयतन्मध्येमंडलोपरिविन्यसेत् ॥ आ
चार्यंवैष्णवंकृत्वावेदवेदांगपारगम्।१२।विप्राश्चत्वारएवात्रवरणीयाजपार्थिना॥द्वेद्वेवस्त्रेचदातव्येहस्तमुद्रादिसंयुते॥
॥ १३ ॥ आचार्यंसमलंकृत्यवस्त्रभूषादिभिर्मुदा ॥ ततोदेहविशुद्ध्यर्थंप्रायश्चित्तंसमाचरेत् ॥ १४ ॥ ततःपूर्वोक्तविधि
नापूजाकार्यासहस्त्रिया ॥ चतुर्व्यूहजपःकार्योवृतैर्विप्रैश्चतुर्विधः ॥ १५॥ चतुर्दिक्षुप्रकर्तव्यादीपाश्चत्वारउद्धृताः॥अ
र्घ्यदानंततःकार्यंनारिकेलादिभिःक्रमात् ॥ १६ ॥ पंचरत्नसमायुक्तैर्जानुभ्यांसक्तभूतलः ॥ स्वपाणिपुटमध्यस्थैर्यथा
लब्धैःफलैःशुभैः॥१७॥श्रद्धाभक्तिसमायुक्तःसपत्नीकोमुदान्वितः ॥ अर्घ्यंदद्यात्प्रहृष्टेनमनसाश्रीहरिंस्मरन् ॥ १८ ॥
अर्घ्यमंत्रः ॥ देवदेवनमस्तुभ्यंपुराणपुरुषोत्तम ॥ गृहाणार्घ्यंमयादत्तंराधयासहितोहरे ॥ १९॥ वंदेनवघनश्यामंद्वि
भुजंमुरलीधरम् ॥ पीतांबरधरंदेवंसराधंपुरुषोत्तमम् ॥ २० ॥ एवंभक्त्याहरिंनत्वासराधंपुरुषोत्तमम् ॥ चतुर्थ्यंतैर्ना

ममंत्रैस्तिलहोमंचकारयेत्॥२१॥ततस्तदंतेतन्मंत्रैःकार्येतर्पणमार्जने॥नीराजयेत्ततोदेवंसराधंपुरुषोत्तमम्॥२२॥
अथनीराजनमंत्रः॥ नीराजयामिदेवेशमिंदीवरदलच्छविम् ॥ राधिकारमणंप्रेम्णाकोटिकंदर्पसुंदरम् ॥ २३ ॥ अ
थध्यानम् ॥ अंतर्ज्योतिरनंतरत्नरचितेसिंहासनेसंस्थितंवंशीनादविमोहितव्रजवधूवृंदावनेसुंदरम् ॥ ध्यायेद्राधिक
यासकौस्तुभमणिप्रद्योतितोरस्थलंराजद्रत्नकिरीटकुंडलधरंप्रत्यग्रपीतांबरम्॥२४॥ ततःपुष्पांजलिंदत्त्वाराधिका
सहितेहरौ॥ नमस्कारंप्रकुर्वीतसाष्टांगंगृहिणीयुतः ॥ २५ ॥ नौमिनवघनश्यामंपीतवाससमच्युतम् ॥ श्रीवत्स
भासितोरस्कंराधिकासहितंहरिम्॥२६॥पूर्णपात्रंततोदद्याद्ब्राह्मणेसहिरण्यकम्॥आचार्यायततोदद्याद्दक्षिणांविपुलां
मुदा॥२७॥आचार्यंतोषयेद्भक्त्यावस्त्रैराभरणैरपि॥सपत्नीकंततोदद्यादृत्विग्भ्योदक्षिणांपराम्॥२८॥धेनुरेकाप्रदात
व्यासुशीलाचपयस्विनी॥ सचैलाचसवत्साचघंटाभरणभूषिता॥२९॥ताम्रपृष्ठीहेमशृंगीसरौप्यखुरभूषिता॥घृतपा
त्रंततोदद्यात्तिलपात्रंतथैवच॥३०॥उमामहेश्वरंदद्याद्दंपत्योःपरिधायकम्॥पदमष्टविधंदद्यादुपानद्युगलंतथा॥३१॥
श्रीमद्भागवतंदद्याद्वैष्णवायाद्विजन्मने॥ शक्तिश्चेन्नविलंबेतचलमायुर्विचारयन्॥ ३२ ॥ श्रीमद्भागवतंसाक्षाद्भगवद्रूप
मद्भुतम्॥ योदद्याद्वैष्णवायैवपंडिताययाद्विजन्मने॥३३॥ सकोटिकुलमुद्धृत्यह्यप्सरोगणसेवितः॥ विमानमधिरुह्यैति

गोलोकंयोगिदुर्लभम्॥ ३४॥कन्यादानसहस्राणिवाजपेयशतानिच॥सधान्यक्षेत्रदानानितुलादानानियानिच ॥३५॥
महादानानियान्यष्टौछंदोदानानियानिच॥श्रीभागवतदानस्यकलांनार्हंतिषोडशीम्॥ ३६ ॥ तस्माद्यत्नेनतद्देयंवैष्ण
वायद्विजन्मने ॥ संभूष्यवस्त्रभूषाभिर्हैमसिंहासनस्थितम् ॥ ३७॥ कांस्यानिसंपुटान्येवत्रिंशद्देयानिसर्वथा ॥ त्रिंशत्त्रिं
शदपूपैश्चमध्येसंपूरितानिच॥ ३८॥प्रत्यपूपंतुयावंतिछिद्राणिपृथिवीपते॥तावद्वर्षसहस्राणिवैकुंठेवसतेनरः ॥३९॥
ततःप्रयातिगोलोकंनिर्गुणंयोगिदुर्लभम् ॥ यद्गत्वाननिवर्तंतेज्योतिर्धामसनातनम् ॥४०॥सार्द्धप्रस्थद्वयंकांस्यसंपुटं
परिकीर्तितम्॥निर्धनेनयथाशक्त्याकार्याणिव्रतपूर्तये ॥ ४१ ॥ अथवापूपसामग्रीमपक्वांसफलांपरां ॥ तत्राधायप्रदे
यानिपुरुषोत्तमप्रीतये॥४२॥निमंत्रितानांविप्राणांसस्त्रीकाणांनराधिप॥ संकल्पंचप्रकुर्वीतपुरुषोत्तमसन्निधौ॥४३॥
॥ अथप्रार्थना ॥ ॥ श्रीकृष्णजगदाधारजगदानंददायक ॥ऐहिकामुष्मिकान्कामान्निखिलान्पूरयाशुमे ॥ ४४ ॥ इ
तिसंप्रार्थ्यगोविंदंभोजयेद्ब्राह्मणान्मुदा ॥ सपत्नीकान्सदाचारान्संस्मरन्पुरुषोत्तमम् ॥ ४५॥ संपूज्यविधिवद्भक्त्या
भोजयेद्घृतपायसैः ॥ विप्ररूपंहरिंस्मृत्वास्त्रीरूपांराधिकांस्मरन् ॥४६॥भोजनस्यतुसंकल्पमाचरेद्विधिनाव्रती॥ द्रा
क्षाभिःकदलीभिश्चचूतैश्चविविधैरपि ॥ ४७ ॥ घृतपाचितपक्वान्नैःशुभैश्चमाषकैर्वटैः ॥ शर्कराघृतपूरैश्चफाणितैःखं

डमंडकैः ॥ ४८ ॥ उर्वारुककर्कटीशाकैरार्द्रैकैश्चसुनिंबुकैः ॥अन्यैश्चविविधैःशाकैराम्रैःपक्वैःपृथक्पृथक्॥ ४९ ॥चतुर्धा
भोजनैरेवषड्रसैःसहसंगतैः ॥ वासितान्गोरसांस्तत्रपरिवेष्यमृदुब्रुवन् ॥ ५० ॥ इदंस्वादुमुदाभोज्यंभवदर्थंप्रकल्पि
तम्॥याच्यतांरोचतेब्रह्मन्यन्मयापाचितंप्रभो॥ ५१ ॥धन्योस्म्यनुगृहीतोस्मिजातंमेजन्मसार्थकम्॥ भोजयित्वामुदा
विप्रान्देयास्तांबूलदक्षिणाः॥ ५२ ॥एलालवंगकर्पूरनागवल्लीदलानिच॥कस्तूरीमुरमांसीचचूर्णंचखदिरंशुभम्॥ ५३ ॥
एतैश्चमीलितैर्देयंतांबूलंभगवत्प्रियम्॥तस्मादेवंविधायैवदेयंतांबूलमादरात्॥ ५४ ॥तांबूलंयोद्विजाग्र्यायएवंकृत्वाप्र
यच्छति ॥सुभगश्चभवेदत्रपरत्रामृतभुग्भवेत् ॥ ५५ ॥परितोष्यसपत्नीकान्यस्तेदद्याच्चमोदकान् ॥ पत्नीभ्योवैणवीर्दे
द्यादलंकृत्यविधानतः॥ ५६ ॥आसीमांतमनुव्रज्यब्राह्मणांस्तान्विसर्जयेत् ॥ मंत्रहीनेतिमंत्रेणक्षमाप्यपुरुषोत्तमम् ॥
॥ ५७ ॥यस्यस्मृत्येतिमंत्रेणनमस्कृत्यजनार्दनम् ॥ यदूनंतत्तुसंपूर्णंविधायविचरेत्सुखम् ॥ ५८ ॥अन्नंविभज्यभूतेभ्यो
यथाभागमकुत्सयन् ॥ भुंजीतस्वजनैःसार्धंमिथ्यावादविवर्जितः ॥ ५९ ॥ दर्शस्यदिवसेप्राप्तेकुर्याज्जागरणंनिशि ॥ रा
धिकासहितंहैमंपूजयेत्पुरुषोत्तमम्॥ ६० ॥ पूजांतेचनमस्कृत्यसपत्नीकोमुदान्वितः॥व्रतीविसर्जयेद्देवंसराधंपुरुषोत्त
मम् ॥ ६१ ॥ आचार्यायततोदद्यादुपहारंसमूर्तिकम् ॥ अन्नदानंयथायोग्यंदद्यादिच्छानुसारतः ॥ ६२ ॥येनकेनाप्यु

पायेनव्रतमेतत्समाचरेत्॥कुर्याच्चपरयाभक्त्यादानंवित्तानुसारतः॥ ६३ ॥नारीवाथनरोवापिव्रतमेतत्समाचरेत्॥दुः
खदारिद्र्यदौर्भाग्यंनाप्नुयाज्जन्मजन्मनि॥६४॥येकुर्वंतिजनालोकेनानापूर्णमनोरथाः ॥ विमानान्यधिरुह्यैवयांतिवैकुं
ठमुत्तमम्॥ ६५ ॥ ॥ श्रीनारायणउवाच ॥ ॥ इत्थंयोविधिमवलंब्यचर्करीतिश्रीकृष्णप्रियतममासमादरेण ॥ गो
लोकंव्रजातिविधूयपापराशिंचात्रत्यंसुखमनुभूयपूर्वपुंभिः ॥६६॥ इतिश्रीबृहन्नारदीयपुराणेनारायणनारदसंवादेदृढध
न्वोपाख्यानेव्रतोद्यापनविधिकथनंनामपंचविंशोऽध्यायः ॥ २५ ॥ ॥ छ ॥ ॥ छ ॥
अथोद्यापनानंतरंव्रतनियममोक्षणमुच्यते॥ ॥वाल्मीकिरुवाच॥ ॥अशेषपापनाशार्थंप्रीतयेगरुडध्वजे ॥ गृहीतनि
यमत्यागश्चोच्यतेविधिपूर्वकः॥१॥नक्तभोजीनरोराजन्ब्राह्मणान्भोजयेदथ ॥ अयाचितेव्रतेचैवस्वर्णदानंसमाचरेत्
॥ २ ॥ अमावास्याशनोयस्तुप्रदद्याद्गांसदक्षिणाम् ॥ धात्रीस्नानंनरोयस्तुदधिवाक्षीरमेवच ॥ ३ ॥ फलानांनियमे
राजन्फलदानंसमाचरेत्॥तैलस्थानेघृतंदेयंघृतस्थानेपयस्तथा॥४॥धान्यानांनियमेराजन्गोधूमान्शालितंडुलान्
॥ भूमौचशयनेराजन्सतूलींसपरिच्छदाम्॥५॥सुखदांचात्मनोन्यस्यह्यंतर्यामीप्रियोजनः ॥पत्रभोजीनरोयस्तुभोज
नंघृतशर्कराम्॥६॥मौनेघंटांतिलांश्चैवसहिरण्यान्प्रदापयेत्॥दंपत्योर्भोजनंचैवसस्नेहंचसुशोभनम्॥७॥नखकेशधरो

राजन्नादर्शंदापयेद्बुधः॥ उपानहौप्रदातव्येउपानहविवर्जनात्॥८॥लवणस्यपरित्यागेदातव्याविविधारसाः॥दीपदा
नेनरोदद्यात्पात्रयुक्तंचदीपकम्॥ ९ ॥अधिमासेनरोभक्त्यासवैकुंठेवसेत्सदा॥ दीपंचसघृतंताम्रंकांचनीवर्तिसंयुतम्
॥ १० ॥ पलमात्रंप्रदेयंस्याद्व्रतसंपूर्णहेतवे ॥ एकांतरोपवासेनकुंभानष्टौप्रदापयेत् ॥ ११ ॥ सवस्त्रान्कांचनोपेतान्
मृन्मयानथकांचनान् ॥ मासांतेमोदकांस्त्रिंशच्छत्रोपानहसंयुतान् ॥१२॥ अनड्वांश्चप्रदातव्योधौरेयस्तुधुरिक्षमः ॥
सर्वेषामप्यलाभेचयथोक्तकरणंविना ॥ १३ ॥ द्विजवाक्यंस्मृतंराजन्संपूर्णव्रतसिद्धिदम् ॥ एकान्नेननरोयस्तुमलमा
संनिषेवते ॥ १४ ॥ चतुर्भुजोनरोभूत्वासयातिपरमांगतिम् ॥ एकान्नान्नापरंकिंचित्पवित्रमिहविद्यते॥ १५ ॥एकान्ना
न्मुनयःसिद्धाःपरंनिर्वाणमागताः ॥ अधिमासेनरोनक्तंयोभुंक्तेसनराधिपः ॥ १६ ॥ सर्वान्कामानवाप्नोतिनरोनैवात्र
संशयः ॥ पूर्वाण्हेभुंजतेदेवामध्याह्नेमुनयस्तथा॥१७॥अपराण्हेपितृगणाःस्वात्मार्थस्तुचतुर्थकः॥सर्ववेलामतिक्रम्य
यस्तुभुंक्तेनराधिप ॥ १८॥ ब्रह्महत्यादिपापानिनाशंयांतिजनाधिप॥नक्तभोजीमहीपालसर्वपुण्याधिकोभवेत्॥१९॥
दिनेदिनेऽश्वमेधस्यफलंप्राप्नोतिमानवः ॥ तस्मिन्विवर्जयेन्माषमधिमासेहरिप्रिये ॥२०॥ सर्वस्मान्मुच्यतेपापाद्विष्णु
लोकंसगच्छति ॥ तिलयंत्राणिपापात्माकुरुतेब्राह्मणोपिसन्॥२१॥तिलानांसंख्ययाराजन्सवैतिष्ठतिरौरवे ॥ चांडा

लयोनिमाप्नोतिकुष्ठरोगेणपीड्यते ॥ २२॥ शुक्लेकृष्णेनरोभक्त्याद्वादशींसमुपोषयेत्॥ आरुह्यगरुडंयातिनरोभूत्वाचतु
र्भुजः॥२३॥सदेवैःपूज्यमानोपिह्यप्सरोगणसेवितः ॥दशमींद्वादशींचैवएकभुक्तंचकारयेत्॥२४॥प्रीतयेदेवदेवस्यन
रःस्वर्गमवाप्नुयात्॥भक्त्याचसर्वदाराजन्दर्भकूर्चंनवर्जयेत् ॥ २५॥ दर्भेणमार्जयेद्यस्तुपुरीषंमूत्रमेवच ॥ श्लेष्माणंरु
धिरंवापिविष्ठायांजायतेकृमिः॥२६॥पवित्राःपरमादर्भादर्भहीनावृथाक्रियाः ॥ दर्भमूलेवसेद्ब्रह्मामध्येदेवोजनार्दनः ॥
॥ २७॥ दर्भाग्रेतुह्युमानाथस्तस्माद्दर्भेणमार्जयेत्॥नदर्भानुद्धरेच्छूद्रोनपिबेत्कपिलापयः ॥ २८॥ मध्यपत्रेनभुंजीत
ब्रह्मपत्रस्यभूपते॥नोच्चरेत्प्रणवंमंत्रंपुरोडाशंनभक्षयेत् ॥२९॥नासनंनोपवीतंचनाचरेद्वैदिकींक्रियाम् ॥ निर्विंध्या
चरणंकुर्वन्पितृभिःसहमज्जति ॥३०॥ पतंतिनरकेघोरेयावदिंद्राश्चतुर्दश ॥ पश्चाच्चकौक्कुटींयोनिंसौकरींवानरींचवा
॥३१॥एतस्मात्कारणाच्छूद्रःप्रणवंवर्जयेत्सदा ॥ नमस्कारेणविप्राणांशूद्रोनश्यतिभूमिप ॥३२॥एतत्कृत्वामहाराज
परिपूर्णंव्रतंचरेत्॥अदत्त्वादक्षिणांवापिनरकंयांतिवैनराः॥३३॥व्रतवैकल्यमासाद्यह्यंधःकुष्ठीप्रजायते॥ ३४ ॥ धरा
मराणांवचनैर्नरोत्तमादिवौकसांवैपदमाप्नुवंति ॥ नोल्लंघयेद्भूपवचांसितेषांश्रेयोभिकामीमनुजःसविद्वान्॥ ३५॥ इदं
मयाधर्मरहस्यमुत्तमंश्रेयस्करंपापविमर्दनंच ॥ फलप्रदंमाधवतुष्टिहेतोःपठेच्चनित्यंमनसोभिरामम् ॥३६॥ यःशृणो

तिनरोराजन्पठतेवापिसर्वदा ॥ सयातिपरमंलोकंयत्रयोगीश्वरोहरिः ॥ ३७ ॥ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादेगृहीतनियमत्यागोनामषड्विंशोऽध्यायः ॥ २६ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीनारायणउवाच ॥ ॥ इत्युक्त्वाविरतंराजामुनीश्वरमनीनमत् ॥ अपूजयत्ततोभक्त्यासपत्नीकोमुदान्वितः ॥ १ ॥ उररीकृत्यतत्पूजामाशीर्वादमुदीरयत् ॥ स्वस्तितेस्तुगमिष्यामिसरयूंपापनाशिनीम् ॥ २ ॥ आवयोर्वदतोरेवंसायंकालोऽधुनाभवत् ॥ इत्युक्त्वाशुजगामैववाल्मीकिर्मुनिसत्तमः ॥ ३ ॥ आसीमांतमनुव्रज्यराजाप्यागतवान्गृहम् ॥ आगत्यस्वप्रियामाहसुंदरींगुणसुंदरीम् ॥ ४ ॥ ॥ दृढधन्वोवाच ॥ ॥ अयिसुंदरिसंसारेह्यसारेकिंसुखंनृणाम् ॥ रागद्वेषादिषट्शत्रौगंधर्वनगरोपमे ॥ ५ ॥ कृमिविड्भस्मसंज्ञांतेदेहेमेकिंप्रयोजनम् ॥ वातपित्तकफोद्रेकमलमूत्रासृगाकुले ॥ ६ ॥ अध्रुवेणशरीरेणध्रुवमर्जयितुंवने ॥ गमिष्यामिवरारोहेसंस्मरन्पुरुषोत्तमम् । ७ । तदाकर्ण्यप्रियाप्राहसाध्वीसागुणसुंदरी ॥ विनयावनताभूत्वाबद्धांजलिपुटाशुचा ॥ ८ ॥ गुणसुंदर्युवाच । ॥ अहमप्यागमिष्यामित्वयैवसहभूपते ॥ पतिव्रतानांस्त्रीणांतुपतिरेवहिदैवतम् ॥ ९ ॥ पत्यौगतेतुयानारीगृहेतिष्ठतिसौनवे ॥ स्नुषाधीनातुसानारीशुनीवपरवेश्मनि । १० । मितंपिताददात्येवमितंभ्रातामितंसुतः ॥ अमितस्यप्रदातारंभर्तारंकानुनव्रजेत् ॥ ११ ॥ प्रियावाक्यमुरीकृत्यसुतंराज्येभिषि

च्यच ॥ सहपत्न्याययौशीघ्रमरण्यंमुनिसेवितम् ॥ १२ ॥ हिमाचलसमीपेचगंगामासाद्यदंपती ॥ त्रिकालंचक्रतुः
स्नानंसंप्राप्तेपुरुषोत्तमे॥१३॥पुरुषोत्तमंसमासाद्यविधिनातत्रनारद॥तपस्तेपेसपत्नीकःसंस्मरन्पुरुषोत्तमम्॥१४॥
ऊर्ध्वबाहुर्निरालंबःपादांगुष्ठेनसंस्थितः ॥ नभोदृष्टिर्निराहारःश्रीकृष्णंतमजीजपत् ॥ १५ ॥ एवंव्रतविधौतस्यतस्थु
षश्चतपोनिधेः ॥ सेवाविधौप्रपन्नासीन्महिषीसापतिव्रता ॥ १६ ॥ एवंकृतवतस्तस्यसंपूर्णेपुरुषोत्तमे ॥ विमानमा
गमत्तत्रकिंकिणीजालमंडितम् ॥ १७ ॥ पुण्यशीलसुशीलाभ्यांसेवितंसहसागतम् ॥ तद्दृष्ट्वाविस्मयाविष्टःसपत्नीको
महीपतिः॥१८॥अनीनमद्विमानस्थौपुण्यशीलसुशीलकौ ॥ ततस्तौतंसपत्नीकंविमानंनिन्यतुर्नृपम् ॥ १९ ॥ विमा
नमधिरुह्याथसपत्नीकोनराधिपः ॥ गोलोकंगतवान्शीघ्रंदिव्यंधृत्वावपुर्नवम् ॥ २० ॥ एवंदृष्ट्वातपोराजामासेश्री
पुरुषोत्तमे ॥ निर्भयंलोकमासाद्यमुमोदहरिसन्निधौ ॥ २१ ॥ पतिव्रताचतत्पत्नीसापितल्लोकमाययौ ॥ पुरुषोत्तमेत
पस्यंतंसंसेव्यनिजवल्लभम् ॥ २२ ॥ ॥ श्रीनारायणउवाच ॥ ॥ वर्णयामिकिमद्याहंयदेकरसनामम ॥ पुरुषोत्तम
समंकिंचिन्नास्तिनारदभूतले ॥ २३ ॥ सहस्रजन्मतप्तेनतपसातन्नगम्यते॥यत्फलंगम्यतेपुंभिःपुरुषोत्तमसेवनात्॥
॥ २४ ॥ व्याजतोपिकृतेतस्मिन्मासेश्रीपुरुषोत्तमे ॥ उपवासेनदानेनस्नानेनचजपादिना ॥२५॥ कोटिजन्मकृताने

कपापराशिर्लयंव्रजेत् ॥ यथाशाखामृगस्याशुत्रिरात्रस्नानमात्रतः ॥ २६ ॥ अजानतोपिदुष्टस्यप्राक्तनानांकुकर्मणाम् ॥ संचयोविलयंयातोमासेश्रीपुरुषोत्तमे ॥ २७ ॥ सोपिदिव्यंवपुर्धृत्वाविमानमधिरुह्यच ॥ अगमाद्दिव्यगोलोकंजरामृत्युविवर्जितम् ॥ २८ ॥ अतःश्रेष्ठतमोमासःसर्वेभ्यःपुरुषोत्तमः ॥ दुष्टंशाखामृगंयोसौव्याजेनापिहरिंनयत् ॥२९॥अहोमूढानसेवंतेमासंश्रीपुरुषोत्तमम्॥तेधन्याःकृतकृत्यास्तेतेषांचसफलोभवः ॥ ३०॥ पुरुषोत्तममासंयेसेवंतेविधिपूर्वकम् ॥ स्नानदानजपैर्होमैरुपोषणपुरःसरैः ॥ ३१ ॥ ॥ नारदउवाच ॥ ॥ सर्वार्थसाधनंवेदेमानुषंजनुरुच्यते॥अयंशाखामृगोप्यद्धामुक्तोयद्व्याजसेवनात् ॥ ३२ ॥तद्वदस्वकथामेतांसर्वलोकहितायमे॥ कुत्रासौकृतवान्स्नानंत्रिरात्रंतपसांनिधे ॥ ३३ ॥ कोसौकपिःकिमाहारःकुत्रजातःक्वचावसत् ॥ व्याजेनतस्यकिंपुण्यंजातंश्रीपुरुषोत्तमे ॥ ३४ ॥ तत्सर्वंविस्तरेणैवमह्यंशुश्रूषवेवद ॥ नतृप्तिर्जायतेत्वत्तःशृण्वतोमेकथामृतम् ॥३५॥ ॥ श्रीनारायणउवाच ॥ ॥ कश्चित्केरलदेशीयोद्विजःपरमलोलुपः ॥ नित्यंधनचयेदक्षः सरघेवधनप्रियः ॥ ३६॥ लोकेकदर्यइत्याख्यांगतस्तेनैवकर्मणा ॥ चित्रशर्मापुरानामतस्यासीत्पितृकल्पितम्॥३७॥सदन्नंचसुवस्त्रंचनभुक्तंतेनकुत्रचित् ॥नस्वाहानस्वधावापिकृतातेनकुबुद्धिना ॥ ३८ ॥ यशोर्थेनकृतंकिंचित्पोष्यवर्गोनपोषितः ॥ सर्वंभूमिगतंचक्रेधन

मन्यायसंचितम् ॥ ३९ ॥नमाघेतिलदानंचकृतंतेनकदाचन॥कार्तिकेदीपदानंचब्राह्मणानांचभोजनम्॥४०॥वैशाखेधान्यदानंचव्यतीपातेचकांचनम्॥वैधृतौराजतंदानंसर्वदानान्यमूनिच॥४१॥रविसंक्रमणेकालेनदत्तानिकदाचन॥चंद्रसूर्योपरागेचनजप्तंनहुतंक्वचित्॥४२॥अवीवदद्दीनवाचंसर्वत्राश्रुपरिप्लुतः॥ वर्षवातातपक्लिष्टःकृशःश्यामकलेवरः॥४३॥चचारधनलोभेनमूढधीर्भूतलेसदा॥कोपियच्छतुयत्किंचित्पामरायमुहुर्वदन्॥ ४४॥सगोदोहनमात्रंहिकुत्रापिस्थातुमक्षमः॥लोकधिक्कारसंदग्धोबभ्रामोद्विग्नमानसः॥४५॥तन्मित्रंवाटिकानाथःकश्चिदासीद्वनेचरः ॥सतंनिवेदयामासस्वदुःखंसंरुदन्मुहुः ॥४६॥ तिरस्कुर्वंतिमांनित्यंपुटभेदनवासिनः ॥अतस्तत्रमयास्थातुंनशक्यंपुटभेदने॥४७॥इत्येवंवदतस्तस्यकदर्यस्याद्विजन्मनः॥अतिदीनतरांवाचमाकर्ण्यकृपयाप्लुतः॥४८॥मालाकारःप्रपन्नंतंदीनंमत्वाकरोद्दयाम्॥हेकदर्यत्वमत्रैववाटिकायांवसाधुना॥४९॥मालाकारवचःश्रुत्वाकदर्यःसर्वनागरैः ॥ तिरस्कृतःसतद्वाटीमध्युवासमुदायुतः ॥५०॥ नित्यंतन्निकटस्थायीतदाज्ञापरिपालकः॥ तेनवाटीपतिस्तस्मिन्विश्वासमकरोद्दृढम्॥५१॥अतिविश्वस्तचित्तेनतस्मिन्सवाटिकापतिः॥तमेवाचीकरद्विप्रंस्वकल्पंवाटिकापतिम्॥५२ ॥ततःसर्वात्मभावेनममायमितिनिश्चयात् ॥ विहायवाटिकाचिंतांसिषेवेराजमंदिरम् ॥ ५३ ॥ राजद्वारेसदाकार्यंतस्यात्यंतमत्रीभव

तू॥पराधीनतयाचासौवाटिकांनजगामह ॥५४॥ तत्फलानिकदर्यस्तुजघासनिर्भरंमुदा ॥ अक्रीणतावशिष्टानिलोभे
नातीवदुर्बलः॥५५॥अगृह्णाद्द्रविणंतज्जंसर्वंस्वयमशंकितः॥यदापृच्छद्वनाधीशस्तदग्रेवीवदन्मुधा ॥५६॥ भ्रामंभ्रा
मंचनगरंयाचंयाचंचभैक्षकम्॥घासंघासंदिवारात्रौपरिचर्यामितेवनम्॥५७॥ तथाप्यस्यफलान्याशन्मासंगच्छंतिप
क्षिणः॥पश्याश्वंतोमयाकेचिन्नाशिताःखचराभृशम्॥५८॥तेषांमांसानिपक्षाणिपतितानीहसर्वतः ॥ तद्दृष्ट्वातीवविश्व
स्यजगामवाटिकापतिः॥५९॥एवंप्रवर्तमानस्यजग्मुर्वर्षाणिदुर्मतेः॥सप्ताशीतिःकदर्यस्यजराजर्जरितस्ततः॥६०॥
ममारमूढधीस्तत्रनैवापवह्निदारुणी ॥नाभुक्तंक्षीयतेपापमितिवेदविदोवदन् ॥ ६१ ॥तस्माद्धाहाप्रकुर्वाणोमुद्गराघात
पीडितः॥अजीगमन्महामार्गंकृच्छ्रेणातिविभीषणम् ॥ ६२ ॥ स्मरन्पूर्वंकृतंकर्मप्रलपन्बुद्बुदाक्षरम् ॥ अहोमेपश्यता
ज्ञानंकदर्यस्यचदुर्मतेः॥६३॥आसाद्यमानुषंदेहंदुर्लभंत्रिदशैरपि॥खंडेस्मिन्भारतेपुण्येकृष्णसारमृगान्विते॥ ६४॥
किंकृतंधनलोभेनव्यर्थंनीतंजनुर्मया॥तद्धनंतुपराधीनंचिरकालार्जितंमया॥ ६५ ॥ किंकरोमिपराधीनःकालपाशावृ
तोधुना॥मानुषंजनुरासाद्यनाकिंचित्कृतवान्शुभम्॥६६॥नदत्तंनहुतंवह्नौनतप्तंहिमगह्वरे ॥ नगांगंसेवितंतोयंमाघेम ॥४९॥
करगेरवौ॥६७॥उपवासत्रयंचांतेनकृतंपुरुषोत्तमे॥ नकृतंकार्तिकेप्रातःस्नानंसतारकागणम् ॥ ६८ ॥ नपुष्टश्चमया

देहोमानुषःपुरुषार्थदः ॥ अहोमेसंचितंद्रव्यंस्थितंभूमौनिरर्थकम् ॥ ६९ ॥जीवोजीवनपर्यंतंक्लेशितोदुष्टबुद्धिना॥कदा
चिज्जाठरोवन्हिर्नान्नैर्निर्वापितोमया ॥ ७० ॥ नापिसद्वसनाच्छन्नःस्वदेहःपर्वणिक्वचित् ॥ नज्ञातयोबांधवाश्वस्वजनाः
स्वसृजाअपि ॥ ७१ ॥ जामाताचसुतावापिपितामातानुजास्तथा ॥ पतिव्रतापिगृहिणीब्राह्मणानैवतोषिताः ॥ ७२ ॥
मिष्टान्नैरेकवारंचतर्पितानमयाक्वचित् ॥ एवंविलपमानंतंनिन्युःकीनाशसन्निधिम्॥७३॥तंदृष्ट्वाचित्रगुप्तस्तुविलोक्यै
तच्छुभाशुभम् ॥ अवोचत्स्वामिनंधर्मंकदर्योयंद्विजाधमः ॥७४॥नकिंचित्सुकृतंत्वस्यधनलुब्धस्यदुर्मतेः॥असावची
करत्पापंपुष्कलंवाटिकास्थितः ॥ ७५ ॥ अचूचुरत्फलान्यद्धाविश्वस्तोवाटिकापतेः॥ततोजघासतान्येवपक्वानियानि
यानिच ॥ ७६ ॥ अक्रीणादवशिष्टानिधनलोभेनदुर्मतिः ॥ फलचौर्यकृतंपापंविश्वासघातजंपरम् ॥ ७७ ॥ एतत्पाप
द्वयंचास्मिन्नत्युग्रंवर्ततेप्रभो ॥ अन्यान्यपिचपापानिसंत्यस्मिन्विविधानिच ॥ ७८ ॥ ॥ नारदउवाच ॥ ॥ इत्थं
निशम्यविधिनंदनचित्रगुप्तवाक्यंक्रुधाप्रवलयाप्लुतधर्मराजः ॥ आहैषयातुकपिजन्मसहस्रकृत्वोविश्वासघातकृतिजंफ
लमस्यपश्चात् ॥ ७९ ॥ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादेकदर्योपाख्यानेस
प्तविंशोऽध्यायः ॥ २७ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीनारायणउवाच ॥ ॥ तन्निशम्यभटानाहचित्रगुप्तश्चिरंभृशम्॥ पूर्वंलोभाभिभूतोयंपश्चाच्चौर्यमचीकरत्॥ १॥
अतःप्रेतत्वमासाद्यपश्चाद्भवतुवानरः॥ततश्चाहंप्रदास्यामिबह्वींनरकयातनाम्॥ २ ॥अयमेवक्रमःश्रेयान्धर्मराजगृहे
भटाः ॥ इत्येवंचित्रगुप्तेनसमादिष्टाविभीषणाः ॥ ३ ॥ तथाचक्रुर्भटाःशीघ्रंताडयंतश्चतंद्विजम् ॥ प्रेतत्वंप्रापितःपूर्वंका
ननेविफलेद्विजः ॥ ४॥ निर्जलेबहुकालंचप्रेतयोनिमवाप्यसः ॥क्षुत्तृड्भ्यांव्याकुलोत्यंतंबभ्रामगहनेवने॥५॥प्रेतयो
निगतंदुःखमनुभूयततःपरम्॥ फलचौर्यसमुद्भूतांकपियोनिमजीगमत् ॥ ६ ॥दिव्येकालंजरेशैलेजंबुखंडमनोहरे॥
सुशीतलजलच्छायेफलपुष्पसमन्विते ॥ ७ ॥तत्रासीद्देवराजेननिर्मितंकुंडमुत्तमम्॥सरोवरसमंपुण्यंसत्सेव्यंपापना
शनम्॥ ८॥ मृगतीर्थमितिख्यातंसुराणामपिदुर्लभम् ॥ यस्मिन्कृतेनश्राद्धेनपितरोयांतिसद्गतिम् ॥ ९ ॥ तत्रदै
त्यभयाद्देवामृगाभूत्वानिरंतरम्॥ अभिसस्नुर्निरातंकामृगतीर्थमतोविदुः ॥ १० ॥ ॥ तत्रायंप्रथमंजन्मकापेयंलब्ध
वान्द्विजः ॥ फलचौर्यकृतात्पापादासाद्यमानुषींतनुम्॥ ११ ॥ ॥ नारदउवाच ॥ ॥ त्रैलोक्यपावनेरम्येमृग
तीर्थेकथंकपिः ॥ आवासमकरोद्दुष्टःपापकोटिसमन्वितः ॥ १२ ॥ छिंधिमेसंशयंनाथतपोधनमनोगतम् ॥ भवादृशां
नगोप्यंहिस्वशिष्येषुकदाचन॥ १३ ॥ ॥ सूतउवाच ॥ ॥ एवंसन्नोदितोविप्रानारदेनतपोनिधिः ॥ उवाचप

रमप्रीतःसत्कुर्वन्नारदंमुनिम् ॥ १४ ॥ ॥ श्रीनारायणउवाच ॥ ॥ कश्चिद्वैश्योमहानासीन्नाम्नावैचित्रकुंडलः ॥ त
त्पत्नीतारकानाम्नीपातिव्रत्यपरायणा ॥ १५ ॥ तावुभौचक्रतुर्भक्त्यापुण्यंश्रीपुरुषोत्तमम् ॥ तयोःकृतवतोर्मासोगतः
श्रीपुरुषोत्तमः ॥ १६ ॥ चरमेऽह्निसंप्राप्तेउद्यापनमथाकरोत् ॥ सपत्नीकोमुदायुक्तःश्रद्धयाचित्रकुंडलः ॥ १७ ॥ द्वि
जानाकारयामासवेदवेदांगपारगान् ॥ उद्यापनविधिंकर्तुंसपत्नीकान्गुणान्वितान् ॥ १८ ॥ कदर्योप्यगमत्तत्रधनलो
भेननारद ॥ उद्यापनविधौपूर्णेसंजातेचित्रकुंडलः ॥ १९ ॥ अत्युग्रदानैस्तान्विप्रान्सपत्नीकानतोषयत् ॥ तुष्टेषुतेषुस
र्वेषुभूयसींदक्षिणामदात् ॥ २० ॥ तद्दत्तभूयसीतुष्टाअन्येविप्रागृहान्ययुः ॥ अतिलुब्धःकदर्यस्तुरुदंस्तस्थौतदग्रतः ॥
॥ २१ ॥ विनयावनतोभूत्वासगद्गदमुवाचह ॥ चित्रकुंडलवैश्येशभगवद्भक्तिभासुर ॥ २२ ॥ पुरुषोत्तमव्रतंसम्यग्भवता
विधिनाकृतम् ॥ नतथाचकृतंकेनकुत्रापिपृथिवीतले ॥ २३ ॥ भवानद्यकृतार्थोसिभाग्यवानसिसर्वथा ॥ यत्त्वयाप
रयाभक्त्यासेवितःपुरुषोत्तमः ॥ २४ ॥ धन्यस्तवपिताधन्यामाताचपतिदेवता ॥ याभ्यामुत्पादितःपुत्रस्त्वादृशोहरि
वल्लभः ॥ २५ ॥ धन्याद्धन्यतरश्चायंमासःश्रीपुरुषोत्तमः ॥ यत्सेवनादवाप्नोतिह्यैहिकामुष्मिकंफलम् ॥ २६ ॥ दृष्ट्वा
हितावकींपूजांचकितोहंविशांपते ॥ अहोमयामहत्कर्मकृतमेतन्नसंशयः ॥ २७ ॥ अन्येभ्योब्राह्मणेभ्यश्चधनंदत्तंबृह

न्मुदा ॥ नददासिकथंमह्यंभाग्यहीनायभूरिद ॥ २८ ॥ इतिविज्ञापितस्तेनतस्मैधनमदादसौ ॥ तद्गृहीत्वाकरोद्विप्रो
धनंभूमिगतंमुदा ॥ २९ ॥ तत्रानेनमहापूजादृष्टाश्रीपौरुषोत्तमी ॥ पुरुषोत्तममासश्चधनलोभेनसंस्तुतः ॥ ३० ॥
पूजादर्शनमाहात्म्यात्पुरुषोत्तमसंस्तवात् ॥ धनलोभकृताद्वापिमृगतीर्थमुपागतः ॥ ३१ ॥ ॥ सूतउवाच ॥ ॥ दर्श
नात्स्तवनाद्वापिधनलोभकृतादपि ॥ दुष्टशाखामृगस्यापिजातंसत्तीर्थसेवनम् ॥ ३२ ॥किंपुनःश्रद्धयाकर्तुर्दर्शनस्तवने
द्विजाः ॥ पुरुषोत्तमदेवस्यसपत्नीकस्यसादरम् ॥ ३३ ॥ ॥ नारदउवाच ॥ ॥सुशीतलजलेब्रह्मन्स्निग्धच्छायेमनो
हरे ॥ सद्वृक्षमंडितेऽरण्येतत्स्थितेःकारणंवद ॥ ३४ ॥ ॥ श्रीनारायणउवाच ॥ ॥ शृणुनारदवक्ष्यामितुभ्यंशुश्रूषवेऽ
नघ ॥ अत्रास्तिकारणंकिंचिच्छ्रवणात्पापनाशनम् ॥ ३५ ॥यदादाशरथीरामःसर्वार्थफलदायकः ॥हतवान्रावणंदुष्टंब
ध्वासेतुंमहोदधौ ॥ ३६ ॥विभीषणादृतेतेनराक्षसानावशेषिताः ॥ ततोवन्हिविशुद्धासाजानकीस्वीकृताधुना ॥ ३७ ॥च
तुर्मुखमहेशानपुरंदरपुरःसरैः ॥ दशवक्त्रवधप्रीतैर्हैरामत्वंवरंवृणु ॥ ३८ ॥ इत्युक्तेऽवीवदद्रामोभक्तानामभयंकरः ॥
सुराःशृणुतमद्वाक्यंयदिदेयोवरोऽधुना ॥ ३९ ॥ अत्रयेवानराःशूरारक्षोभिर्निहताश्चते ॥ संजीवयततानाशुसुधावृ
ष्ट्याममाज्ञया ॥ ४० ॥ तथेत्युक्त्वासुधावृष्ट्यावानरान्समजीवयन् ॥ चतुर्मुखमहेशानपुरंदरपुरःसराः ॥ ४१ ॥

पूजादर्शनमाहात्म्यात्पुरुषोत्तमसंस्तवात् ॥ धनलोभकृताद्वापिमृगतीर्थमुपागतः ॥ ३१ ॥ सूतउवाच दर्शना
त्स्तवनाद्वापिधनलोभकृतादपि ॥ दुष्टशाखामृगस्यापिजातंसत्तीर्थसेवनं ॥ ३२ ॥ किंपुनःश्रद्धयाकर्तुर्दर्शनस्तवने
द्विजाः ॥ पुरुषोत्तमदेवस्यसपत्नीकदस्यसादरं ॥ ३३ ॥ नारदउवाच सुशीतलजलेब्रह्मन्स्निग्धच्छायेमनोहरे
सद्वृक्षमंडितेरण्येतत्स्थितेःकारणंवद ॥ ३४ ॥ श्रीनारायणउवाच शृणुनारदवक्ष्यामितुभ्यंशुश्रूषवेऽनघ ॥ अत्रा
स्तिकारणंकिंचिच्छ्रवणात्पापनाशनं ॥ ३५ ॥ यदादाशरथीरामःसर्वार्थफलदायकः ॥ हतवान्रावणंदुष्टंबध्वासेतुं
महोदधौ ॥ ३६ ॥ बिभीषणादृतेतेनराक्षसानावशेषिताः ॥ ततोवह्निविशुद्धासाजानकीस्वीकृताधुना ॥ ३७ ॥ चतु
र्मुखमहेशानपुरंदरपुरःसरैः ॥ दशवक्त्रवधप्रीतैर्हेरामत्वंवरंवृणु ॥ ३८ ॥ इत्युक्तेऽवीवदद्रामोभक्तानामभयंकरः ॥
सुराःशृणुतमद्वाक्यंयदिदेयोवरोऽधुना ॥ ३९ ॥ अत्रयेवानराःशूरारक्षोभिर्निहताश्चते ॥ संजीवयतताना शुसुधावृ
ष्ट्याममाज्ञया ॥ ४० ॥ तथेत्युक्त्वासुधावृष्ट्यावानरान्समजीवयन् ॥ चतुर्मुखमहेशानपुरंदरपुरःसुराः ॥ ४१ ॥
ततःसंजीविताःसर्वैवानराजयशालिनः ॥ अडुढौकन्रामभद्रेचिरंसुप्तोत्थिताइव ॥ ४२ ॥ अथपुष्पकमारुह्यवा
नरान्सर्वतःस्थितान् ॥ अजीगदत्सपत्नीकःप्रसन्नमुखपंकजः ॥ ४३ ॥ श्रीरामउवाच हेसुग्रीवहनूमंतौहेतारात्म

जजांबवन् ॥ मित्रकार्यंकृतंसर्वंभवद्भिःसहवानरैः ॥ ४४ ॥ आज्ञापयंतुतान्सर्वान्भवंतोवानरानितः ॥ भवदाज्ञा
पिताःसर्वैयथेष्टंयांतुतेयतः ॥ ४५ ॥ यत्रयत्रवनेएतेमामकादीर्घजीविनः ॥ वसंतिवानरास्तत्रवृक्षाःपुष्पफलान्वि
ताः ॥ ४६ ॥ नद्योमृष्टजलावाथशीतलंसुभगंसरः ॥ नकेपिधर्षयिष्यंतिसर्वैयांतुममाज्ञया ॥ ४७ ॥ अतोरामप्रभा
वेणयतोवानरजातयः ॥ तत्रनद्योमृष्टजलाःसरश्चसुभगंवने ॥ ४८ ॥ लसत्फलामहावृक्षाःपुष्पपल्लवसंयुताः ॥ परं
तुसुखदुःखानिप्राक्तनादृष्टजानिच ॥ ४९ ॥ यत्रयत्रवसेज्जंतुस्तत्रतत्रोपयांतिहि ॥ नाभुक्तंक्षीयतेकर्मइतिवेदानु
शासनं ॥ ५० ॥ श्रीनारायणउवाच अथासौवानरस्तत्रववृधेपर्वतोपमः ॥ बृहत्क्षुत्तृट्समायुक्तोलोलुपोव्यचर
द्वने ॥ ५१ ॥ जन्मतस्तस्यवक्त्रेभूत्पीडापित्तसमुद्भवा ॥ ययास्तृक्च्यवतेवक्त्रव्रणतश्चदिवानिशं ॥ ५२ ॥ अत्यंतवेद
नाविष्टोनात्तुंशक्तस्तुकिंचन ॥ सचवानरचापल्याद्द्रुमेभ्यःसत्फलानिच ॥ ५३ ॥ लुनीयवदनाभ्याशेनीत्वातत्याज
भूरिशः ॥ नैकत्रपीडयास्थातुंशक्तोसौवानरःक्वचित् ॥ ५४ ॥ वृक्षाद्वृक्षांतरंगच्छन्मेनेमृत्युंसुखावहं ॥ कदाचिदप
तद्भूमौविललापातिदुःखितः ॥ ५५ ॥ अरूरुदद्भग्नगात्रोनीरभ्रष्टोयथाझषः ॥ असौक्षुत्तृट्समाविष्टःश्लथद्देहोगलन्मु
खः ॥ ५६ ॥ पेतुर्दंतास्तथासर्वैव्रणरोगेणपीडिताः ॥ पूर्वजन्मकृतात्पापादेवंदुःखमजीगमत् ॥ ५७ ॥ एवंप्रवर्त्तमा

नस्यनिराहारस्यनित्यशः ॥ दैवयोगात्समागच्छन्मासःश्रीपुरुषोत्तमः ॥ तस्मिन्नपितथैवास्तेशीतवातादिपी
डितः॥ कदाचिद्बहुलेपक्षेविचरन्गहनेवने ॥ ५९ ॥ तृषितःकुंडनिकटेनाशक्नोत्पातुमम्मृतं ॥ क्षुधाविष्टोपिचापल्या
त्तत्रोच्चैर्वृक्षमारुहत् ॥६०॥ वृक्षाद्वृक्षांतरंगच्छन्मध्येकुंडमपीपतत् ॥ सचिरायनिराहारःश्लथादिंद्रियजर्जरः ॥६१॥
निर्बलःशिथिलप्राणःकुंडप्रांतमुपाश्रितः ॥ एवंदिनानिचत्वारिदशमीदिनतःकपेः ॥ ६२ ॥ गतानिलुंठतःकुंडेमा
सेश्रीपुरुषोत्तमे ॥ पंचमेदिवसेप्राप्तेमध्यंदिनगतेरवौ ॥ ६३ ॥ व्यसुःपपाततत्तीर्थेतोयक्लिन्नवपुःकपिः ॥ सतंदेहंस
मुत्सृज्यविनिर्धूतमलाशयः ॥ ६४ ॥ सद्योदिव्यवपुःप्रापदिव्याभरणभूषितं ॥ इंदीवरदलश्यामंकोटिकंदर्पसुंदरं ॥
॥ ६५ ॥ स्फुरद्रत्नकिरीटंचसुचारुझषकुंडलं ॥ लसत्पीतपटंपुण्यंसद्रत्नकटिमेखलं ॥ ६६ ॥ लसत्केयूरवलयंमुद्रिका
हारशोभितं ॥ नीलकुंचितसुस्निग्धचिकुरावृतसन्मुखं ॥ ६७ ॥ तदानीमागमच्छीघ्रंविमानंवैष्णवाश्रितं ॥ भेरीमृ
दंगपटहवेणुवीणाबृहत्स्वनं ॥ ६८ ॥ नृत्यद्देवांगनंदिव्यंगायद्गंधर्वकिन्नरं ॥ तन्निरीक्ष्यमहाभागोदिव्यदेहधरःकपिः
॥६९॥ विस्मयंपरमंयातोमहापापस्यमेकुतः ॥ एतत्पुण्यतमस्यैवयोग्यंवैमानिकंसुखं ॥ ७० ॥ अथकाचित्तदुप
रिदधारच्छत्रमिंदुभं ॥ चक्रतुश्चामरेतस्यकेचिदप्सरसौमुदा ॥७१॥ काचित्तांबूलहस्ताचननृतुश्चाप्सराःपुरः ॥ का

चिद्भृंगारकंहैमंस्वर्धुनीवारिसंभृतं ॥ ७२ ॥ हस्तेकृत्वापुरस्तस्थौगीतवाद्यादितत्परा ॥ एवंवैभवमालोक्यचित्रन्यस्त
इवाभवत् ॥ ७३ ॥ किमेतत्केनपुण्येनममापुण्यस्यदुर्मतेः ॥ नास्तिमेसुकृतंकिंचिद्येनयामिहरेःपदं ॥ ७४ ॥ श्रीना
रायणउवाच इत्थंतर्कयतोबृहत्सुखनिधिंदिव्यंविमानंपुरोदृष्ट्वाविस्मितचेतसोहरिभटौज्ञात्वास्यहार्दंपरं ॥ बध्वा
ग्रेकरसंपुटंसविनयंनत्वातदीयंपदंवाक्यंसुंदरमूचतुःकपिजनुस्त्यक्त्वापुरःसंस्थितं ॥ ७५ ॥ इतिश्रीबृहन्नारदीयपुरा
णेश्रीनारायणनारदसंवादेकदर्योपाख्यानेकपिजन्मनिविमानागमनंनामाष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ छ ॥
पुण्यशीलसुशीलावूचतुः विभोप्रयाहिगोलोकंकथमत्रविलंबसे ॥ पुरुषोत्तमसान्निध्यंत्वयालब्धंविशेषतः ॥
॥ १ ॥ कदर्यउवाच बहूनिममकर्माणिसंतिभोग्यान्यनेकशः ॥ केनमेनिष्कृतिर्जातायतोगोलोकमाप्नुयां ॥ २ ॥
यावंत्योवर्षधाराश्चतृणानिभूरजःकणाः ॥ यावंत्यस्तारकाव्योम्नितावत्पापानिसंतिमे ॥ ३ ॥ कथमेतन्मयाप्राप्तंवपु
र्दिव्यंमनोहरं ॥ एतत्कारणमत्युग्रंमह्यंब्रूतंहरेःप्रियौ ॥ ४ ॥ श्रीनारायणउवाच इतिवाचमुपाकर्ण्यहरेर्दूतावथोच
तुः ॥ हरिदूतावूचतुः ॥ अहोदेवकथंनैवविज्ञातंसाधनंमहत् ॥ ५ ॥ प्रभोनज्ञायतेकस्मान्मासःसर्वोत्तमोत्तमः ॥ विष्णु
प्रियोमहापुण्योनाम्नावैपुरुषोत्तमः ॥ ६ ॥ तस्मिंस्त्वयातपश्चीर्णमशक्यंयत्सुरैरपि ॥ अविज्ञातंमहाराजकपिदेहेनका

केचिदप्सरसोमुदा॥७०॥काचित्तांबूलहस्ताचननृतुश्चाप्सराःपुरः ॥ काचिद्भृंगारकंहैमंस्वर्धुनीवारिसंभृतम्॥७१॥
हस्तेकृत्वापुरस्तस्थौगीतवाद्यादितत्परा ॥ एवंवैभवमालोक्यचित्रन्यस्तइवाभवत् ॥ ७२॥ किमेतत्केनपुण्येनममापु
ण्यस्यदुर्मतेः ॥ नास्तिमेसुकृतंकिंचिद्येनयामिहरेःपदम् ॥ ७३ ॥ ॥ श्रीनारायणउवाच ॥ ॥ इत्थंतर्कयतोबृहत्सु
खनिधिंदिव्यंविमानंपुरोदृष्ट्वाविस्मितचेतसोहरिभटौज्ञात्वास्यहार्दंपरम् ॥ बद्ध्वाग्रेकरसंपुटंसविनयंनत्वातदीयंपदंवा
क्यंसुंदरमूचतुःकपिजनुस्त्यक्त्वापुरःसंस्थितम् ॥ ७४ ॥ इतिश्रीबृहन्नारदीयपुराणेश्रीनारायणनारदसंवादेकदर्योपा
ख्यानेकपिजन्मनिविमानागमनंनामाष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ छ ॥ ॥ छ ॥
पुण्यशीलसुशीलावूचतुः ॥ विभोप्रयाहिगोलोकंकथमत्रविलंबसे॥पुरुषोत्तमसान्निध्यंत्वयालब्धंविशेषतः॥१॥ ॥क
दर्यउवाच ॥ ॥ बहूनिममकर्माणिसंतिभोग्यान्यनेकशः ॥ केनमेनिष्कृतिर्जातायतोगोलोकमाप्नुयाम् ॥ २ ॥ यावं
त्योवर्षधाराश्चतृणानिभूरजःकणाः ॥ यावंत्यस्तारकाव्योम्नितावत्पापानिसंतिमे ॥३॥ कथमेतन्मयाप्राप्तंवपुर्दिव्यंम
नोहरम् ॥ एतत्कारणमत्युग्रंमह्यंब्रूतंहरेःप्रियौ ॥ ४ ॥ ॥ श्रीनारायणउवाच ॥ ॥ इतिवाचमुपाकर्ण्यहरेर्दूतावथो
चतुः ॥ हरिदूतावूचतुः ॥ अहोदेवकथंनैवविज्ञातंसाधनंमहत् ॥ ५ ॥ प्रभोनज्ञायतेकस्मान्मासःसर्वोत्तमोत्तमः ॥ वि

ष्णुप्रियोमहापुण्योनाम्नावैपुरुषोत्तमः॥६॥तस्मिंस्त्वयातपश्चीर्णमशक्यंयत्सुरैरपि ॥ अविज्ञातंमहाराजकपिदेहेनकानने॥७॥मुखरोगादनाहारव्रतंजातमजानतः॥त्वयाचकपिचांचल्यात्फलान्युत्कृत्यवृंततः ॥ ८ ॥ क्षिप्तानिपृथिवीपीठेतृप्तास्तैरितरेजनाः॥पानीयमपिनोपीतमंतर्दुःखेनभूरिशः॥९॥संजातंतेतपस्तीव्रमज्ञानात्पुरुषोत्तमे ॥ परोपकारःसंजातःफलपातेनतेऽनघ॥१०॥शीतवातातपारौद्राःसोढाविचरतावने॥महातीर्थेवरेरम्येपंचाहंप्लवनंकृतम्॥ ११ ॥ तस्मात्तेस्नानजंपुण्यंमासेश्रीपुरुषोत्तमे ॥ एवंरुग्णस्यतेजातमज्ञानात्तपउत्तमम्॥१२॥तदेतत्सफलंजातमनुभूतंत्वयाधुना॥व्याजतोपिकृतेनैवसफलंस्याद्यथातव॥१३॥ किंपुनःश्रद्धयैतस्मिन्मासेश्रीपुरुषोत्तमे ॥ विधिनाकुर्वतःकर्मज्ञात्वामाहात्म्यमुत्तमम्॥ १४ ॥ यस्त्वयासाधितःस्वार्थस्तादृक्कर्तुंचकःक्षमः ॥ यस्मिन्नेकोपवासेनमुच्यतेपापराशिभिः ॥१५॥नैतत्तुल्यंभवेत्किंचित्पुरुषोत्तमप्रीतिदम्॥ तेधन्याःकृतकृत्यास्तेतद्व्रतंयेप्रकुर्वते॥१६॥दुर्लभंमानुषंजन्मभूखण्डेभारताजिरे ॥ तादृशंजनुरासाद्यसेवंतेपूरुषोत्तमम्॥१७॥ तेसदासुभगाःपुण्यास्तेषांचसफलोभवः॥येषांसर्वोत्तमोमासःस्नानदानजपैर्गतः ॥ १८ ॥ दानानिपितृकार्याणितपांसिविविधानिच ॥ तानिकोटिगुणान्येवसंप्राप्तेपुरुषोत्तमे ॥ १९ ॥धिकृतंचनास्तिकंपापंशठंधर्मध्वजंखलम्॥ पुरुषोत्तममासाद्यस्नानदानविवर्जितः॥ २० ॥ ॥श्रीनारायण

उवाच ॥ ॥ पुण्यशीलसुशीलाभ्यामदृष्टंवर्णितंनिजम् ॥ तच्छ्रुत्वाचकितोहृष्टःपुलकांकितविग्रहः॥२१॥तीर्थदेवान्न
मस्कृत्यकालंजरगिरिंततः॥ननामकाननाधीशान्सर्वगुल्मलतातरून् ॥ २२ ॥ ततःप्रदक्षिणीकृत्यंविमानंविनयान्वि
तः॥आरुरोहघनश्यामोलसत्पीतांबरावृतः ॥ २३॥ पश्यत्सुसर्वदेवेषुगंधर्वाद्यैरभिष्टुतः ॥ वाद्यमानेषुवाद्येषुकिन्नराद्यै
र्मुहुर्मुहुः॥२४॥पुष्पवृष्टिमुचोदेवामंदंमंदंमुदान्विताः ॥सादरंपूजयांचक्रुःपुरंदरपुरःसराः ॥ २५ ॥ ततोजगामगोलो
कंसानंदंयोगिदुर्लभम् ॥ गोपगोपिगवांसेव्यंरासमंडलमंडितम् ॥२६॥यत्रगत्वानशोचंतिजरामृत्युविवर्जिते ॥तत्रा
सौचित्रशर्माचपुरुषोत्तमसेवनात्॥२७॥व्याजेनापिमुमोदोच्चैर्विहायवानरंवपुः ॥ द्विभुजंमुरलीहस्तंदृष्ट्वाश्रीपुरुषोत्तम
म्॥२८॥ ॥श्रीनारायणउवाच ॥ ॥ इदमाश्चर्यमालोक्यदेवाःसर्वेसुविस्मिताः ॥ स्वंस्वंस्थानंययुःसर्वेशंसंतंपुरु
षोत्तमम् ॥ २९ ॥ ॥नारदउवाच ॥ ॥ दिवसस्यादिमेभागेत्वयाह्निकमुदीरितम् ॥तद्दिवापरभागीयंकथंकार्यंतपो
धन ॥ ३० ॥ गृहस्थस्योपकारायवदमेवदतांवर ॥ सदासर्वोपकारायचरंतिहिभवादृशाः ॥ ३१ ॥ ॥ श्रीनारायणउ
वाच ॥ ॥ प्रातःकालोदितंकर्मसमाप्यविधिवत्ततः॥कृत्वामाध्याह्निकींसंध्यांतिलतर्पणमाचरेत्॥३२॥देवामनुष्याः
पशवोवयांसिसिद्धाश्चयक्षोरगदैत्यसंघाः॥प्रेताःपिशाचाउरगाःसमस्तायेचान्नमिच्छंतिमयात्रदत्तम् ॥३३॥ ततःपंच

महायज्ञान्कुर्याद्भूतबलिंततः॥काकस्यचशुनश्चैवबलिंदत्त्वैवमुच्चरन्॥३४॥इत्युक्त्वासर्वभूतेभ्योबलिंदद्यात्पुनःपृथक्
॥ततआचम्यविधिवच्छ्रद्धयाप्रीतमानसः॥३५॥द्वारावलोकनंकुर्यादतिथिग्रहणायच ॥ गोदोहकालंभाग्यात्तुप्राप्तश्चे
दतिथिर्यदि॥३६॥आदौसत्कृत्यवचसादेववत्पूजयेत्सुधीः ॥ तोषयेत्परयाभक्त्यायथाशक्त्यन्नपानतः ॥ ३७॥ भिक्षां
चभिक्षवेदद्याद्विधिवद्ब्रह्मचारिणे ॥ आकल्पितान्नादुद्धृत्यसर्वव्यंजनसंयुतात् ॥३८॥यतिश्चब्रह्मचारीचपक्वान्नस्वामि
नावुभौ॥तयोरन्नमदत्त्वैवभुक्त्वाचांद्रायणंचरेत्॥ ३९ ॥ यतिहस्तेजलंदद्याद्भैक्षंदद्यात्पुनर्जलम्॥तद्भैक्षंमेरुणातुल्यंत
ज्जलंसागरोपमम्॥४०॥सत्कृत्यभिक्षवेभिक्षांयःप्रयच्छतिमानवः ॥ गोप्रदानसमंपुण्यमित्याहभगवान्यमः ॥ ४१ ॥
ततश्चभोजनंकुर्यात्प्राङ्मुखोमौनमास्थितः ॥ प्रशस्तेशुद्धपात्रेचभुंजीतान्नमकुत्सयन् ॥ ४२ ॥ नैकवासाःसमश्नीया
त्स्वासनेनिजभाजने ॥ स्वयमासनमारुह्यस्वस्थचित्तःप्रसन्नधीः॥४३॥ एकएवतुयोभुंक्तेस्वकीयेकांस्यभाजने॥चत्वा
रितस्यवर्धंतआयुःप्रज्ञायशोबलम्॥४४॥सत्यंत्वर्त्तेतिमंत्रेणजलमादायपाणिना ॥ परिषिच्यचभोक्तव्यंसघृतंव्यंज
नान्वितम्॥४५॥भोजनात्किंचिदन्नाद्यमादायैवंसमुच्चरेत्॥नमोभूपतयेपूर्वंभुवनपतयेनमः॥ ४६ ॥ भूतानांपतयेप
श्चाद्धर्मायचततोबलिम्॥दत्त्वाचचित्रगुप्तायभूतेभ्यइदमुच्चरेत्॥४७॥यत्रक्वचनसंस्थानांक्षुत्तृषोपहतात्मनाम्॥भूता

नांतृप्तयेऽक्षय्यमिदमस्तुयथासुखम् ॥ ४८ ॥प्राणायापानसंज्ञायव्यानायचततःपरम्॥उदानायततोब्रूयात्समानाय
ततःपरम्॥४९॥प्रणवंपूर्वमुच्चार्यस्वाहांतेचघृतप्लुतम् ॥ पंचकृत्वोग्रसेदन्नंजिह्वयानतुदंशयेत्॥५० ॥ततश्चतन्मना
भूत्वाभुंजीतमधुरंपुरः॥लवणाम्लौतथामध्येकटुतिक्तौततःपरम्॥५१॥प्राग्द्रवंपुरुषोश्नीयान्मध्येतुकठिनाशनम् ॥अं
तेपुनर्द्रवाशीतुबलारोग्येनमुंचति॥५२॥अष्टौग्रासामुनेर्भक्ष्याःषोडशारण्यवासिनः ॥द्वात्रिंशच्चगृहस्थस्यत्वमितंब्रह्म
चारिणः ॥५३॥ नाद्याच्छास्त्रविरुद्धंतुभक्ष्यभोज्यादिकंद्विजः॥अभोज्यंप्राहुराहारंशुष्कंपर्युषितंतथा ॥ ५४ ॥ सर्वंस
शेषमश्नीयाद्घृतपायसवर्जितम्॥अग्रांगुलिषुतच्छेषंनिधायभोजनोत्तरम् ।५५। जलपूर्णांजलिंकृत्वापीत्वाचैवतदर्ध
कम्॥अग्रांगुलिस्थितंशेषंभूमौदत्त्वांजलेर्जलम्॥५६॥शेषंनिषिंचेत्तत्रैवपठन्मंत्रमिमंबुधः॥अन्यथापापभाग्विप्रःप्राय
श्चित्तेनशुध्यति॥५७॥रौरवेपूयनिलयेपद्मार्बुदनिवासिनाम्॥अर्थिनामुदकंदत्तमक्षय्यमुपतिष्ठतु ॥ ५८ ॥ निषिच्या
नेनमंत्रेणकुर्याद्दंतविशोधनम् ॥ आचम्यपात्रमुत्सार्यकिंचिदार्द्रेणपाणिना ॥ ५९ ॥ ततःपरंसमुत्थायबहिःस्थित्वास
माहितः ॥ शोधयेन्मुखहस्तौचमृदाशुद्धजलेनच॥६०॥कृत्वाषोडशगंडूषान्शुद्धोभूत्वासुखासनः ॥इमौमंत्रौपठन्नेवपा
णिनोदरमालभेत्॥६१॥अगस्त्यंकुंभकर्णंचशनिंचवडवानलम् ॥ आहारपरिपाकार्थंस्मरेद्भीमंचपंचमम्॥६२॥आ

तापीमारितोयेनवातापीचनिपातितः॥समुद्रःशोषितोयेनसमेगस्त्यःप्रसीदतु॥६३॥ततःश्रीकृष्णदेवस्यकुर्वीतस्मर
णंमुदा ॥ भूयोप्याचम्यकर्तव्यंततस्तांबूलभक्षणम् ॥६४॥ भुक्तोपविष्टःश्रीकृष्णंपरंब्रह्मविचारयेत्॥सच्छास्त्रादिवि
नोदेनसन्मार्गाद्यविरोधिना ॥ ६५ ॥ ततश्चाध्यात्मविद्यायाःकुर्वीतश्रवणंसुधीः॥ सर्वथावृत्तिहीनोपिमुहूर्तंस्वस्थमान
सः॥६६॥श्रुत्वाधर्मंविजानातिश्रुत्वापापंपरित्यजेत् ॥ श्रुत्वानिवर्ततेमोहःश्रुत्वाज्ञानामृतंलभेत् ॥६७॥ नीचोपिश्रव
णेनाशुश्रेष्ठत्वंप्रतिपद्यते ॥ श्रेष्ठोपिनीचतांयातिरहितःश्रवणेनच ॥६८॥ व्यवहारंततःकुर्याद्बहिर्गत्वायथासुखम्॥श्री
कृष्णंमनसाध्यायेत्सर्वार्थसिद्धिदायकम् ॥ ६९ ॥ सूर्येऽस्तशिखरंप्राप्तेतीर्थंगत्वाथवागृहम्॥सायंसंध्यामुपासीतधौतां
घ्रिसपवित्रकः॥७०॥यःप्रमादान्नकुर्वीतसायंसंध्यांद्विजाधमः ॥ सगोवधमवाप्नोतिमृतेरौरवमाप्नुयात् ॥७१॥कदाचि
त्काललोपेपिसंकटेवापथिस्थितः॥आनिशीथात्प्रकुर्वीतसायंसंध्यांद्विजोत्तमः।७२॥यस्त्रिसंध्यामुपासीतब्राह्मणःश्रद्ध
यान्वितः॥तत्तेजोवर्धतेत्यन्तंघृतेनेवहुताशनः॥७३॥सादित्यांपश्चिमांसंध्यामर्धास्तमितभास्कराम्॥प्राणानायम्यसं
प्रोक्ष्यमंत्रेणाब्दैवतेनतु॥७४॥सायमग्निश्चमेत्युक्त्वाप्रातःसूर्येत्यपःपिबेत्॥प्रत्यङ्मुखोपविष्टस्तुवाग्यतःसुसमाहितः॥
॥७५॥प्रणवव्याहृतियुतांगायत्रींतुजपेत्ततः ॥ अक्षसूत्रंसमादायसम्यगातारकोदयात् ॥ ७६ ॥ वारुणीभिस्तदादि

त्यमुपस्थायप्रदक्षिणम् ॥ कुर्वन्दिशोनमस्कुर्याद्दिगीशांश्चपृथक्पृथक् ॥ ७७ ॥ उपास्यपश्चिमांसंध्यांहुत्वाग्निमश्नियात्ततः ॥ भृत्यैःपरिवृतोभूत्वानातितृप्तोथसंविशेत् ॥७८॥सायंप्रातर्वैश्वदेवःकर्तव्योबलिकर्मच ॥ अनश्नतापिसततमन्यथाकिल्बिषीभवेत् ॥ ७९ ॥कृतपादादिशौचस्तुभुक्त्वासायंततोगृही ॥गच्छेच्छय्यांततोमृद्वीमुपधानसमन्विताम् ॥ ८० ॥ स्वगृहेप्राक्शिराःशेतेश्वाशुरेदक्षिणाशिराः ॥ प्रवासेपश्चिमाशिरानकदाचिदुदक्शिराः ॥ ८१ ॥ रात्रिसूक्तंजपेत्स्मृत्वादेवांश्चसुखशायिनः ॥ नमस्कृत्याव्ययंविष्णुंसमाधिस्थःस्वपेन्निशि ॥ ८२ ॥अगस्त्योमाधवश्चैवमुचुकुंदोमहाबलः ॥ कपिलोमुनिरास्तीकःपंचैतेसुखशायिनः॥८३॥मांगल्यंपूर्णकुंभंचशिरःस्थानेनिधायच॥वौदिकैर्गारुडैर्मंत्ररक्षांकृत्वास्वपेत्ततः ॥ ८४॥ऋतुकालाभिगामीस्यात्स्वदारनिरतःसदा॥पर्ववर्जंव्रजेदेनांतद्व्रतीरतिकाम्यया॥८५॥प्रदोषपश्चिमौयामौवेदाभ्यासेनतौनयेत् ॥ यामद्वयंशयानस्तुब्रह्मभूयायकल्पते॥८६ ॥एतत्सर्वमशेषेणकृत्यजातंदिनेदिने ॥ कर्तव्यंगृहिभिःसम्यग्गृहस्थाश्रमलक्षणम् ॥ ८७ ॥ अहिंसासत्यवचनंसर्वभूतानुकंपनम्॥शमोदानंयथाशक्तिगार्हस्थ्योधर्मउच्यते ॥ ८८॥ परदारेष्वसंसर्गोधर्मस्त्रीपरिरक्षणम् ॥अदत्तादानविरमोमधुमांसविवर्जनम्॥८९॥एषपंचविधोधर्मोबहुशाखःसुखोदयः ॥ देहिभिर्देहपरमैःकर्तव्योदेहसंभवः ॥ ९० ॥ ॥ श्रीनारायणउवाच ॥ ॥ अ

शेषवेदोदितसच्चरित्रमेतद्गृहस्थाश्रमलक्षणंहि ॥ उक्तंसमासेनचलक्षणेनतुभ्यंमुनेलोकहितायसम्यक्॥ ९१ ॥ ॥इ
तिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादेआह्निककथनंनामएकोनत्रिंशोऽध्यायः ॥ २९ ॥
नारदउवाच ॥ ॥ स्तुतापतिव्रतानारीत्वयापूर्वंतपोनिधे॥तल्लक्षणानिसर्वाणिसमासेनवदस्वमे॥ १॥ ॥सूतउवाच॥
नोदितोनारदेनेत्थंपुरातनमुनिःस्वयं ॥ पतिव्रतायाःसर्वाणिलक्षणान्याहभूसुराः ॥ २ ॥ ॥ श्रीनारायणउवाच ॥ ॥
श्रृणुनारदवक्ष्यामिसतीनांव्रतमुत्तमम् ॥ कुरूपोवाकुवृत्तोवासुस्वभावोथवापतिः ॥ ३॥रोगान्वितःपिशाचोवाक्रोधनो
वाथमद्यपः ॥ वृद्धोवाप्यविदग्धोवामूकोंऽधोवधिरोपिवा ॥ ४ ॥ रौद्रोवाथदरिद्रोवाकदर्यःकुत्सितोपिवा ॥ कातरःकित
वोवापिललनालंपटोपिवा ॥ ५ ॥ ॥ सततंदेववत्पूज्यःसाध्व्यावाक्कायकर्मभिः॥नजातुविषमंभर्तुःस्त्रियाकार्यंकथंच
न ॥ ६ ॥ बालयावायुवत्यावावृद्धयावापियोषिता ॥ नस्वातंत्र्येणकर्त्तव्यंकिंचित्कार्यंगृहेष्वपि ॥ ७ ॥ अहंकारंविहा
याथकामक्रोधौचसर्वदा ॥ मनसोरंजनंपत्युःकार्यंनान्यस्यकुत्रचित् ॥ ८॥ सकामंवीक्षिताप्यन्यैःप्रियवाक्यैःप्रलोभि
ता ॥ स्पृष्टावाजनसंमर्दैर्नविकारमुपैतिया॥ ९॥यावंतोरोमकूपाःस्युःस्त्रीणांगात्रेषुनिर्मिताः ॥ तावद्वर्षसहस्राणिनाकं
ताःपर्युपासते ॥ १० ॥ पुरुषंसेवतेनान्यंमनोवाक्कायकर्मभिः ॥ लोभितापिपरेणार्थैःसासतीलोकभूषणा ॥ ११ ॥ दौ

त्येनप्रार्थितावापिबलेनविधृतापिवा ॥ वस्त्राद्यैर्वासितावापिनैवान्यंभजतेसती ॥ १२ ॥ वीक्षितावीक्षतेनान्यैर्हासि
तानहसत्यपि ॥ भाषिताभाषतेनैवसासाध्वीसाधुलक्षणा ॥ १३ ॥ रूपयौवनसंपन्नागीतेनृत्येऽतिकोविदा ॥ स्वानु
रूपंनरंदृष्ट्वानयातिविक्रृतिंसती ॥ १४ ॥ सुरूपंतरुणंरम्यंकामिनीनांचवल्लभम् ॥ यानेच्छतिपरंकांतंविज्ञेयासाम
हासती ॥ १५ ॥ देवोमनुष्योगंधर्वःसतीनांनापरःप्रियः ॥ अप्रियंनैवकर्त्तव्यंपत्युःपत्न्याकदाचन ॥ १६ ॥ भुक्तेभुंक्ते
यथापत्यौदुःखितेदुःखिताचया ॥ मुदितेमुदितात्यर्थंप्रोषितेमलिनांबरा ॥ १७ ॥ सुप्तेपत्यौचयाशेतेपूर्वमेवप्रबुध्य
ति ॥ प्रविशेच्चैवयावन्हौयातेभर्त्तरिपंचताम् ॥ १८ ॥ नान्यंकामयतेचित्तेसाविज्ञेयापतिव्रता ॥ भक्तिंश्वशुरयोःकुर्या
त्पत्युश्चापिविशेषतः ॥ १९ ॥ धर्मकार्येनुकूलत्वमर्थकार्येपिसंचये ॥ गृहोपस्करसंस्कारेसक्तायाप्रतिवासरम् ॥ २० ॥
क्षेत्राद्वनाद्वाग्रामाद्वाभर्त्तारंगृहमागतम् ॥ प्रत्युत्थायाभिनंदेतआसनेनोदकेनच ॥ २१ ॥ प्रसन्नवदनानित्यंकालेभो
जनदायिनी ॥ भुक्तवंतंतुभर्त्तारंनवदेदप्रियंक्वचित् ॥ २२ ॥ आसनेभोजनेदानेसंमानेप्रियभाषणे ॥ दक्षयासर्वदाभा
व्यंभार्ययागृहमुख्यया ॥ २३ ॥ गृहव्ययनिमित्तंचयद्द्रव्यंप्रभुणार्पितम् ॥ निर्भृत्यगृहकार्यंसाकिंचिद्बुद्ध्यावशेषये
त् ॥ २४ ॥ त्यागार्थमर्पितेद्रव्येलोभात्किंचिन्नधारयेत् ॥ भर्तुराज्ञांविनानैवस्वबंधुभ्योदिशेद्धनम् ॥ २५ ॥ अन्या

लापमसंतोषंपरव्यापारसंकथाः ॥ अतिहासातिरोषंचक्रोधंचपरिवर्जयेत् ॥ २६ ॥ यच्चभर्त्तानपिबतियच्चभर्त्तान
खादति ॥ यच्चभर्तानचाश्नातिसर्वंतद्वर्जयेत्सती ॥ २७ ॥ तैलाभ्यंगंतथास्नानंशरीरोद्वर्तनक्रियाम् ॥ मार्जनंचैवद
न्तानांकुर्यात्पतिमुदेसती ॥ २८ ॥ त्रेताप्रभृतिनारीणांमासिमास्यार्तवंमुने ॥ तदादिनत्रयंत्यक्त्वाशुद्धास्याद्गृहकर्मणि
॥ २९ ॥ प्रथमेहनिचांडालीद्वितीयेब्रह्मघातिनी ॥तृतीयेरजकीप्रोक्ताचतुर्थेहनिशुध्यति॥ ३० ॥स्नानंशौचंतथागानं
रोदनंहसनंतथा ॥ यानमभ्यंजनंनारीद्यूतंचैवानुलेपनम् ॥ ३१ ॥दिवास्वप्नंविशेषेणतथावैदंतधावनम्॥मैथुनंमानसं
वापिवाचिकंदेवतार्चनम्॥ ३२ ॥वर्जयेच्चनमस्कारंदेवतानांरजस्वला॥रजस्वलायाःसंस्पर्शंसंभाषांचतयासह॥ ३३॥
त्रिरात्रंस्वमुखंनैवदर्शयेच्चरजस्वला ॥ स्ववाक्यंश्रावयेन्नैवयावत्स्नातानशुद्धितः ॥ ३४ ॥ स्नात्वान्यंपुरुषंनारीनप
श्येच्चरजस्वला ॥ ईक्षेतभास्करंदेवंब्रह्मकूर्चंततःपिबेत् ॥ ३५॥केवलंपंचगव्यंचक्षीरंवात्मविशुद्धये॥यथोपदेशंनिय
तावर्तयेतवरांगना ॥ ३६ ॥ गर्भिणीचेद्भवेन्नारीतदानियमतत्परा ॥ अलंकृतासुप्रयताभर्त्तुःप्रियहितेरता ॥ ३७ ॥ति
ष्ठेत्प्रसन्नवदनास्वधर्मनिरताशुचिः ॥ कृतरक्षासुभूषाचवास्तुपूजनतत्परा ॥ ३८ ॥ कुस्त्रीभिर्नाभिभाषेतशूर्पवातंचव
र्जयेत् ॥ मृतवत्सादिसंसर्गंपरपाकंचसुंदरी ॥ ३९ ॥नबीभत्संकिंचिदीक्षेन्नरौद्रांशृणुयात्कथां ॥गुरुंवात्युष्णमाहारम

जीर्णंनसमाचरेत् ॥ ४० ॥ अनेनविधिनासाध्वीशोभनंपुत्रमाप्नुयात् ॥ अन्यथागर्भपतनंस्तंभनंवाप्रपद्यते ॥ ४१ ॥
हीनांनिजगुणैरन्यांसपत्नींनैवगर्हयेत्॥ईर्ष्यारागसमुद्भूतेविद्यमानेपिमत्सरे ॥ ४२ ॥ अप्रियंनैवकर्त्तव्यंसपत्नीभिःप
रस्परम् ॥ नगायेदन्यनामानिनकुर्यादन्यवर्णनम् ॥ ४३ ॥ नवसेद्दूरतःपत्युःस्थेयंवल्लभसन्निधौ ॥ निर्दिष्टेचमहीभागे
वल्लभाभिमुखावसेत् ॥ ४४ ॥ नावलोक्यादिशःस्वैरंनावलोक्यःपरोजनः ॥ विलासैरवलोक्यंस्यात्पत्युराननपंकज
म्॥४५॥कथ्यमानाकथाभर्त्राश्रोतव्यासादरंस्त्रिया ॥ पत्युःसंभाषणस्याग्रेनान्यत्संभाषयेत्स्वयम् ॥ ४६ ॥ आहूता
सत्वरंगच्छेद्रतिस्थानंरतोत्सुका॥पत्यौगायतिसोत्साहंश्रोतव्यंहृष्टचेतसा॥४७॥गायंतंचपतिंदृष्ट्वाभवेदानंदनिर्वृता॥
भर्तुःसमीपेनस्थेयंसोद्वेगंव्यग्रचित्तया॥४८॥कलहोनविधातव्यःकलियोग्येप्रियेस्त्रिया ॥ भर्त्सितानिंदितात्यर्थंताडि
तापिपतिव्रता ॥४९॥ व्यथितापिभयंत्यक्त्वाकंठेगृह्णीतवल्लभम् ॥ उच्चैर्नरोदनंकुर्यान्नैवाक्रोशेच्चतंप्रति॥ ५०॥पलाय
नंनकर्त्तव्यंनिजगेहाद्बहिःस्त्रिया ॥उत्सवादिषुबंधूनांसदनंयदिगच्छति॥५१॥लब्ध्वानुज्ञांतदापत्युर्गच्छेदध्यक्षरक्षि
ता ॥ नवसेत्सुचिरंतत्रप्रत्यागच्छेद्गृहंसती॥५२॥प्रस्थानाभिमुखेपत्यौमासन्मंगलभाषिणी॥नवार्योसौनिषेधोत्त्यान
कार्यंरोदनंतदा ॥ ५३ ॥ अकृत्वोद्वर्तनंनित्यंपत्यौदेशांतरेगते ॥वधूर्जीवनरक्षार्थंकर्मकुर्यादनिंदितम्॥५४॥श्वश्रूश्व

शुरयोःपार्श्वेनिद्राकार्यानचान्यतः ॥ प्रत्यहंपतिवार्तांचतयान्वेष्याप्रयत्नतः ॥ ५५ ॥दूताःप्रस्थापनीयाश्चपत्युःक्षेमो
पलब्धये ॥ देवतानांप्रसिद्धानांकर्त्तव्यमुपयाचनम्॥५६॥एवमादिविधातव्यंसत्याप्रोषितकांतया॥अप्रक्षालनमंगा
नांमलिनांबरधारणम्॥५७॥तिलकांजनहीनत्वंगंधमाल्यविवर्जनम्॥नखरोम्णामसंस्कारोदशनानाममार्जनम्५८
उच्चैर्हासःपरैर्नर्मपरचेष्टाविचिंतनं॥स्वेच्छापर्यटनंचैवपरपुंसांगमर्दनम्॥५९॥अटनंचैकवस्त्रेणनिर्लज्जत्वंयथागतिः॥
इत्यादिदोषाःकथितायोषितोनित्यदुःखदाः ॥ ६० ॥ निर्वृत्यगृहकार्याणिहरिद्रालेपनैस्तनुं ॥ प्रक्षाल्यशुचितोयेनकु
र्यान्मंडनमुज्ज्वलम् ॥ ६१ ॥ समीपंप्रेयसोगच्छेद्विकसन्मुखपंकजा ॥ अनेननारीवृत्तेनमनोवाग्देहसंयुता॥६२॥आ
हूतागृहकार्याणित्यक्त्वागच्छेच्चसत्वरम्॥किमर्थंव्याहृतास्वामिन्सप्रसादोविधीयताम्॥६३ ॥माचिरंतिष्ठतेद्वारिनद्वा
रमुपसेवयेत्॥स्वामिनादापितंकिंचित्कस्मैचिन्नददात्यपि॥६४ ॥सेवयेद्भर्तुरुच्छिष्टमिष्टमन्नफलादिकम्॥महाप्रसाद
इत्युक्त्वामोदमानानिरंतरम् ॥ ६५ ॥ सुखसुप्तंसुखासीनंरममाणंयदृच्छया॥आतुरेष्वपिकार्येषुपतिंनोत्थापयेत्क्वचित्
॥६६॥नैकाकिनीक्वचिद्गच्छेन्ननग्नास्नानमाचरेत् ॥ भर्तृविद्वेषिणींनारींसाध्वींनोभावयेत्क्वचित् ॥ ६७ ॥नोलूखलेन
मुसलेनवर्धिन्यांदृषद्यपि॥नयंत्रकेपिदेहल्यांसतीचोपविशेत्क्वचित्॥६८॥तीर्थस्नानार्थिनीनारीपतिपादोदकंपिबेत्॥

शंकरादपिविष्णोर्वापतिरेवाधिकःस्त्रियाः॥६९॥व्रतोपवासनियमंपतिमुल्लंघ्ययाचरेत्॥आयुष्यंहरतेभर्तुर्मृतानरकमृ
च्छति ॥ ७० ॥ उक्ताप्रत्युत्तरंदद्यान्नारीक्रोधेनतत्परा ॥सरमाजायतेग्रामेसृगालीनिर्जनेवने॥७१ ॥स्त्रीणांहिपरमश्चै
कोनियमःसमुदाहृतः ॥ अभ्यर्च्यभर्तुश्चरणौभोक्तव्यंचसदास्त्रिया ॥७२॥ याभर्तारंपरित्यज्यमिष्टमश्नातिकेवलम्॥
उलूकीजायतेक्रूरावृक्षकोटरशायिनी ॥ ७३ ॥ याभर्तारंसमुत्सृज्यरहश्चरतिकेवलम् ॥ ग्रामेवासूकरीभूयाद्वल्गुलीवा
श्वविड्भुजा॥७४॥याहुंकृत्याप्रियंब्रूतेसामूकाजायतेखलु ॥ यासपत्नीसदेर्ष्यैंतदुर्भगासान्यजन्मनि ॥ ७५ ॥ दृष्टिंवि
लुप्यभर्तुर्यांकंचिदन्यंसमीक्षते॥काणावाविमुखीचापिकुरूपाचैवजायते॥७६ ॥बाह्यादागतमालोक्यत्वरिताचजला
सनैः ॥ तांबूलैर्व्यजनैश्चैवतालसंवाहनादिभिः ॥ ७७ ॥अतिप्रियतरैर्वाक्यैर्भर्तारंयासुसेवते॥पतिव्रताशिरोरत्नंसाना
रीकथितावुधैः ॥ ७८ ॥ भर्त्तादेवोगुरुर्भर्ताधर्मतीर्थव्रतानिच ॥तस्मात्सर्वंपरित्यज्यपतिमेकंसमर्चयेत्॥ ७९ ॥जीवही
नोयथादेहःक्षणादशुचितांव्रजेत् ॥ भर्तृहीनातथायोषित्सुस्नाताप्यशुचिःसदा॥८० ॥अमंगलेभ्यःसर्वेभ्योविधवाह्य
त्यमंगला ॥ विधवादर्शनात्सिद्धिर्जातुक्वापिनजायते ॥८१॥ विहायमातरंचैकामाशीर्वादप्रदायिनीम् ॥ अन्याशिषम
पिप्राज्ञस्त्यजेदाशीविषोपमाम्॥८२॥कन्यांविवाहसमयेवाचयेयुरितिद्विजाः ॥ भर्तुःसहचरीभूयाज्जीवतोजीवतापिवा

॥८३॥तस्माद्भर्तानुयातव्योदेहवच्छाययास्वया॥एवंसत्यासदास्थेयंभक्त्यापत्यनुकूलया॥८४॥व्यालग्राहीयथाव्या
लंबिलादुद्धरतेबलात्॥एवमुत्क्रम्यदूतेभ्यःपतिंस्वर्गंनयेत्सती॥८५॥यमदूताःपलायंतेसतीमालोक्यदूरतः ॥ अपि
दुष्कृतकर्माणमुत्सृज्यपतितंपतिम् ॥ ८६॥यावत्स्वलोमसंख्यास्तितावत्कोटचयुतानिच॥भर्तास्वर्गसुखंभुंक्तेरममा
णापतिव्रता॥८७॥शीलभंगेनदुर्वृत्ताःपातयंतिकुलद्वयम्॥पितुःकुलंतथापत्युरिहामुत्रचदुःखिताः॥८८॥अनुयातिन
भर्तारंयदिदैवात्कथंचन॥तत्रापिशीलंसंरक्ष्यंशीलभंगात्पतत्यधः॥८९॥तद्वैगुण्यात्पितास्वर्गात्पतिःपततिनान्यथा॥
विधवाकबरीबंधोभर्तृबंधायजायते ॥ ९० ॥ शिरसोवपनंकार्यंतस्माद्विधवयासदा ॥ एकाहारःसदाकार्योनद्वितीयःक
दाचन ॥ ९१ ॥ पर्यंकशायिनीनारीविधवापातयेत्पतिम् ॥ तस्माद्भूशयनंकार्यंपतिसौख्यसमीहया॥ ९२॥ नैवांगो
द्वर्तनंकार्यंनतांबूलस्यभक्षणम् ॥ गंधद्रव्यस्यसंभोगोनैवकार्यस्तयाक्वचित् ॥९३॥तर्पणंप्रत्यहंकार्यंभर्तुःकुशतिलो
दकैः ॥ तत्पितुस्तत्पितुश्चापिनामगोत्रादिपूर्वकम् ॥९४॥ श्वेतवस्त्रंसदाधार्यमन्यथारौरवंव्रजेत्॥ इत्येवंनियमैर्युक्ता
विधवापिपतिव्रता ॥ ९५ ॥ ॥ श्रीनारायणउवाच ॥ ॥ नैतादृशंदैवतमस्तिकिंचित्सर्वेषुलोकेषुसदैवतेषु ॥ यदाप
तिस्तुष्यतिसर्वकामाँल्लभ्यात्प्रकामंकुपितश्चहन्यात्।९६।तस्मादपत्यंविविधाश्चभोगाःशय्यासनान्यद्भुतभोजनानि॥

वस्त्राणिमाल्यानितथैवगंधाःस्वर्गेंचलोकेविविधाचकीर्तिः॥९७॥ ॥इतिश्रीबृ॰पतिव्रताधर्मनिरूपणेत्रिंशो॰॥३०॥
॥ सूतउवाच ॥ ॥ इत्थंपतिव्रताधर्ममाकर्ण्यनारदोमुनिः ॥ किंचित्प्रष्टुमनाविप्रामुनिमाहपुरातनम् ॥ १ ॥ ॥ ना॰
रदउवाच ॥ ॥ सर्वदानाधिकंकांस्यसंपुटंपरिकीर्तितम् ॥ एतत्कारणमव्यक्तंवदमेबदरीपते ॥ २ ॥ ॥ श्रीनाराय
णउवाच ॥ एकदैतद्व्रतंब्रह्मन्नचीकरदुमापुरा ॥ तदापृच्छन्महादेवंकिंदेयंदानमुत्तमम् ॥ ३ ॥ येनसंपूर्णतांयातिव्र
तंमेपौरुषोत्तमम्॥तन्मेवददयासिंधोसर्वेषांहितहेतवे॥४॥तच्छ्रुत्वामनसिध्यायन्ध्यायन्श्रीपुरुषोत्तमम्॥ उमामजी
गदच्छंभुःसर्वलोकहितैषिणीम् ॥ ५ ॥ ॥श्रीमहादेवउवाच ॥ नशक्यंकिंचिदेवास्तिदानंश्रीपुरुषोत्तमे ॥ व्रतपूर्ण
विधिंकर्तुमपर्णेछंदासिकच्चित्॥६ ॥यद्यद्दानंगिरिसुतेह्युत्तमंपरिकीर्तितम् ॥ श्रीकृष्णवल्लभेमासितत्सर्वंगौणतांगतम्
॥ ७ ॥ तस्मादेतादृशंदानंनैवास्तिक्वापिसुंदरि॥येनतेव्रतसंपूर्तिर्भवेच्छ्रीपुरुषोत्तमे॥८॥पुरुषोत्तममासेस्मिन्व्रतसंपू
र्णहेतवे ॥ ब्रह्मांडसंपुटाकारंतदर्हंदेयमंगने॥९॥नशक्यंतत्तुकेनापिदातुंकापिवरानने॥तस्मादेतत्प्रतिनिधिंकृत्वाकां
स्यस्यसंपुटम् ॥ १० ॥तन्मध्येपूरयित्वैवापूपांस्त्रिंशन्मितान्मुदा॥सप्ततंतुभिरावृत्यसंपूज्यविधिवत्प्रिये॥११॥देयंवि
प्रायविदुषेव्रतसंपूर्तिहेतवे॥एवंत्रिंशन्मितान्येवदेयानिसतिवैभवे॥१२॥इत्याकर्ण्यवचोरम्यंधूर्जटेरुपकारकम्॥अबीभ

वदुमाहृष्टासर्वलोकहितैषिणी॥१३॥त्रिंशत्कांस्यानिविद्वद्भ्यःसंपुटानिव्यतीर्यसा॥पूर्णंव्रतविधिंकृत्वामुमोदातीवनारद
॥१४॥ ॥सूतउवाच॥ ॥इत्याकर्ण्यमुनिर्विप्रानारायणवचोमृतम्॥पुनराहातितृप्तोसौनामंनामंपुनःपुनः॥ १५॥॥ना
रदउवाच॥ ॥सर्वेभ्यःसाधनेभ्योयंमासःश्रीपुरुषोत्तमः॥वरीयान्निश्चितोमेद्यश्रुत्वामाहात्म्यमुत्तमम्॥१६॥श्रुत्वापिजा
यतेभक्त्यामहापापक्षयोनृणाम्॥किंपुनःश्रद्धयाकर्तुर्विधिनाचेतिमेमतिः।१७।अतःपरंनकिंचिन्मेश्रोतव्यमवशिष्यते
पीयूषात्यंतसंतृप्तोनान्यत्तोयंसमीहते ॥ १८॥ ॥ सूतउवाच ॥ ॥ इत्युक्त्वाविरतोविप्रोनारदोमुनिसत्तमः ॥ अनी
नमत्पादपद्मंपुरातनमुनेःपरम् ॥ १९ ॥भारतेजनुरासाद्यपुरुषोत्तममुत्तमम्॥ नसेवंतेनशृण्वंतिगृहासक्तानराधमाः॥
॥ २० ॥ गतागतंभजंतेत्रदुर्भगाजन्मजन्मनि ॥ पुत्रमित्रकलत्राप्तवियोगाद्दुःखभागिनः ॥ २१ ॥ अस्मिन्मासेद्विज
श्रेष्ठानासच्छास्त्राण्युदाहरेत् ॥ नस्वपेत्परशय्यायांनालपेद्वितथंक्वचित् ॥ २२ ॥ परापवादान्नब्रूयान्नकथंचित्कदाच
न॥परान्नंचनभुंजीतनकुर्वीतपरक्रियाम्॥२३॥वित्तशाठ्यमकुर्वाणोदानंदद्याद्द्विजातये॥विद्यमानेधनेशाठ्यंकुर्वाणो
रौरवंव्रजेत् ॥ २४ ॥दिनेदिनेद्विजेंद्रायदत्त्वाभोजनमुत्तमम्॥दिवसस्याष्टमेभागेव्रतीभोजनमाचरेत्॥२५॥धन्यास्ते
पुरुषालोकेयेनित्यंपुरुषोत्तमम्॥अर्चयंतिविधानेनभक्त्याप्रेमपुरःसरम्॥२६॥इंद्रद्युम्नःशतद्युम्नोयौवनाश्वोभगीरथः॥

४१०४

४१०४

अथोपासनास्तबके श्रीस्कांदमहापुराणोक्तं वैशाखमासमाहात्म्यं सटीकं प्रारभ्यते॥२॥

अथ वैशाखमासमाहात्म्यस्थविषयानुक्रमणिका प्रारभ्यते ॥

अध्यायाः	विषयाः	प०	पृ०
१	सूतशौनकसंवादे वैष्णवादिधर्मजिज्ञासोरंबरीषस्य नारदं प्रति प्रश्नः, नारदकृतवैशाखमासप्रशंसा, वैशाखस्नानमहिमा च.	२	१
२	वैशाखप्रशंसा, ततो वैशाखमासव्रताकरणे दोषप्रसङ्गः, व्रतप्रशंसा, वैशाखे जलप्रपादानम्, व्यजनच्छत्रपादत्राणदानप्रशंसा, अन्नदानप्रशंसा च.	३	२
३	शय्याकम्बलवस्त्रकर्पूरकुसुमकुंकुमचंदनगोरोचनताम्बूलफलादिदानम्, विश्राममण्डपकरणम्, कूपतडागोद्यानप्रशंसा, पुत्राभावे पुत्रवत्सप्तपदार्थवर्णनम्, ताम्बूलतक्रदधितंदुलघृतगुडेक्षुदण्डेक्ष्वादिरसपानकदानमाहात्म्यम्.	४	२
४	वैशाखव्रतिनां वर्ज्यपदार्थाः, गृहस्नाने दुष्टफलम्, व्रताकरणे दोषः, नदीसप्तगंगादेवखातवापीषु स्नानं दानं च, मधुसूदनप्रार्थनार्घ्यदानपूजनादिकम्.	६	१
५	वैशाखमासस्य हेतुपूर्वकं श्रेष्ठत्वकथनम्.	९	१
६	वैशाखमासे जलदानमाहात्म्यकथनम्, तद्विषये हेमाङ्गदराजकथा, वैशाखमासे जलादानात्तस्य तिर्यग्योनिप्राप्तिः, मैथिलराजगृहे गोधिकात्वं प्राप्तस्य तस्य श्रुतदेवसकाशान्मुक्तिः.	१०	२
७	तदद्भुतं दृष्ट्वा विस्मितेन मैथिलेन पृष्टेन श्रुतदेवेन वैशाखमासे जलदानादिमाहात्म्यकथनम्, तद्विषये स्वपितुर्वृत्तान्तकथनम्.	१२	१
८	मैथिलपृष्टेन श्रुतदेवेनेश्वरपार्वतीसंवादद्वारा वैशाखमाहात्म्यविषय इक्ष्वाकुतनयस्य काकुत्स्थस्येतिहासकथनम्.	१३	२
९	मैथिलपृष्टेन श्रुतकीर्तिविप्रेण कुमारजन्मकथनम्, वैशाखधर्मप्रशंसा च.	१७	१
१०	अशून्यव्रतकथनम्, वैशाखमासे छत्रदानादिप्रशंसा.	२०	१
११	मैथिलनृपेण वैशाखधर्मप्रसिद्धिकरणम्, तेन सर्वजनानां सद्गतिप्राप्त्या नरकाणां शून्यतया खिन्नस्य यमस्य ब्रह्मसमीपे गमनम्.	२२	१
१२	ब्रह्मणे यमेन स्वदुःखनिवेदनम्.	२५	१
१३	वैशाखमाहात्म्यकथनपूर्वकं ब्रह्मणा यमस्य समाधानकरणम्, तथापि खेदयुक्तेन यमेन सार्कं ब्रह्मणो विष्णुसमीपे गमनम्, विष्णुना यमाय वरप्रदानम्, तत्र वैशाखधर्माणां प्रशंसा.	२६	२
१४	वैशाखस्नानप्रशंसा, वैशाखमाहात्म्यकथाश्रवणप्रशंसा, तत्र कर्मनिष्ठतपोनिष्ठद्विजकथा.	२८	१
१५	पञ्चालदेशाधिपस्य पुरुयशसो नृपस्य वैशाखधर्माचरणात्स्वराज्यप्राप्तिः.	२९	२
१६	अथ पुरुयशसाऽक्षय्यतृतीयायां विष्णोः स्तुतिकरणम्, विष्णुकृपया च तस्य सायुज्यमुक्तिप्राप्तिः.	३२	१
१७	वैशाखधर्मकथनोपक्रम उपानद्दानप्रसङ्गेन शङ्खनामकद्विजकथानकम्, तत्र शङ्खनामकद्विजेन व्याधाय वैशाखधर्मकथनप्रसङ्गेन दन्तिलकोहलमुक्तिप्राप्तिवृत्तांतकथनम्.	३३	२
१८	व्याधस्य पूर्वजन्मवृत्तान्तकथनम्.	३५	१
१९	ब्रह्मशब्दप्रतिपादनपूर्वकं सर्वदेवापेक्षया प्राणस्य मुख्यत्वकथनम्, प्राणदेवस्य महत्त्वलोपे कण्वशापप्रतिपादनम्, त्वं गुरुद्रोही भवेति कण्वं प्रति प्राणवायुना शापप्रदानम्.	३७	१
२०	सत्त्वादिभिर्गुणैर्जीवानां तत्तदनुरूपजन्मकर्मादिफलप्राप्तिकथनम्, प्रलयवर्णनम्, व्यूहावतारकर्मनिरूपणम्, धर्मभेदनिरूपणपूर्वकं भगवद्भक्तलक्षणनिरूपणम्, वैशाखमासधर्मनिरूपणम्.	३९	२
२१	वैशाखमासमाहात्म्यश्रवणेन सर्पस्य मुक्तिः, तस्यैव पूर्वजन्मवृत्तान्तकथनम्, शंखव्याधसंवादे व्याधस्य जन्मान्तरे वाल्मीकर्षित्वप्राप्तिकथनम्.	४२	२
२२	वैशाखस्थतिथिमाहात्म्यवर्णनम्, कलिधर्मनिरूपणम्.	४४	२
२३	अक्षय्यतृतीयामाहात्म्यम्.	४७	२
२४	वैशाखशुक्लद्वादशीमाहात्म्यम्, काश्मीरदेशस्थदेवद्विजकथा.	४८	२
२५	वैशाखशुक्लत्रयोदशी–चतुर्दशी–पूर्णिमातिथीनां माहात्म्यवर्णनम्, वैशाखमाहात्म्यश्रवणफलवर्णनम्.	५१	२

इति वैशाखमासमाहात्म्यस्थविषयानुक्रमणिका संपूर्णा ॥

॥ ॥ श्रीगणेशाय नमः ॥ ॥ नत्वा श्रीगोकुलाधीशपादपंकजमाधुरीम् ॥ कुर्वे माधवमासस्य माहात्म्यविशदीक्रियाम् ॥ १ ॥ अथ तत्र भगवान्सकलनिगमागमपारंगतः परमेष्ठिसुतो नारदोऽम्बरीषराजपृष्टः सन् पुरा ब्रह्मणा स्वस्मै प्रोक्तं वैशाखमासमाहात्म्यमंबरीषराज्ञे कथयाम्बभूव ॥ तथा च पाद्मे—"एकदा नारदो लोकान्पर्यटन्भगवत्प्रियः ॥ मथुरायामम्बरीषं कृष्णाराधनमानसम् ॥ महाभागं व्रतपरं ददर्श मुनिसत्तमः ॥ स आगतं मुनिवरं सत्कृत्य नृपसत्तमः ॥ भवंत इव पप्रच्छ श्रद्धया हृष्टमानसः" इति । तत्राऽम्बरीषो माधवमासविषये परमेष्ठिनो ब्रह्मणः अंगभुवं तनयं नारदं प्रति पप्रच्छ ॥ १ ॥ अंजसा अनायासेन ॥ २ ॥ ३ ॥ ४ ॥ वैशाखमासे कर्तव्यध

॥ ॥ श्रीगणेशाय नमः ॥ ॥ अथ वैशाखमासमाहात्म्यप्रारंभः ॥ ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ १ ॥ ॥ सूत उवाच ॥ ॥ भूयोऽप्यंगभुवं राजा ब्रह्मणः परमेष्ठिनः ॥ पुण्यं माधवमाहात्म्यं नारदं पर्यपृच्छत ॥ १ ॥ ॥ अंबरीष उवाच ॥ ॥ सर्वेषामपि मासानां त्वत्तो माहात्म्यमंजसा ॥ श्रुतं मया पुरा ब्रह्मन्यदा चोक्तं तदा त्वया ॥ २ ॥ वैशाखः प्रवरो मासो मासेष्वेतेषु निश्चितम् ॥ इति तस्माद्विस्तरेण माहात्म्यं माधवस्य च ॥ ३ ॥ श्रोतुं कौतूहलं ब्रह्मन्कथं विष्णुप्रियो ह्यसौ ॥ के च विष्णुप्रिया धर्मा मासे माधववल्लभे ॥ ४ ॥ तत्राप्यस्य तु कर्तव्याः के धर्मा विष्णुवल्लभाः ॥ किं दानं किं फलं तस्य कमुद्दिश्याऽऽचरेदिमान् ॥ ॥ ५ ॥ कैर्द्रव्यैः पूजनीयोऽसौ माधवो माधवागमे ॥ एतन्नारद विस्तार्य मह्यं श्रद्धावते वद ॥ ६ ॥ ॥ श्रीनारद उवाच ॥ ॥ मया पृष्टः पुरा ब्रह्मा मासधर्मान्पुरातनान् ॥ व्याजहार पुरा प्रोक्तं यच्छ्रियै परमात्मना ॥ ७ ॥ ततो मासा विशिष्योक्ताः कार्तिको माघ एव च ॥ माधवस्तेषु वैशाखं मासानामुत्तमं व्यधात् ॥ ८ ॥ मातेव सर्वजीवानां सदैवेष्ट प्रदायकः ॥ दानयज्ञव्रतस्नानैः सर्वपापविनाशनः ॥ ९ ॥ धर्मयज्ञक्रियासारस्तपःसारः सुरार्चितः ॥ विद्यानां वेदविद्येव मंत्राणां प्रणवो यथा ॥ १० ॥

र्मान्पृच्छति—तत्रापीति । कं देवम् उद्दिश्य अधिकृत्य ॥ ५ ॥ व्रताचरणद्रव्याणि पृच्छति—कैर्द्रव्यैरिति । द्रव्यैः सामग्रीभिः माधवागमे वैशाखमाससंप्राप्तौ विस्तार्य शब्दप्रपंचेन । कृष्णभक्तिजिज्ञासाविषये विशेषप्रश्नः पाद्मे—"कथमाराध्यते सोऽयं केशवः क्लेशनाशनः ॥ भक्तिप्रियोऽसौ भगवान्कया भक्त्या प्रसीदति ॥ कथं भक्तिर्भवेदस्मिन्सर्वैराराध्यते कथम् ॥ वैष्णवोऽसि हरेस्तस्य प्रियोऽसि परमार्थवित् ॥ तेन त्वामेव पृच्छामि ब्रह्मन्ब्रह्मविदुत्तम" इति ॥ ६ ॥ यत्पुरा परमात्मना श्रियै प्रोक्तं तन्मह्यं व्याजहार प्रोक्तवान् ॥ ७ ॥ विशिष्य मुख्यत्वेन उक्ताः । माधवः वैशाखः । व्यधादकरोत् ॥ ८ ॥ माधवपदनिरुक्तिमाह—मातेवेति ॥ ९ ॥ सर्वश्रेष्ठवस्तूनां मध्ये श्रेष्ठतरत्वमस्य वैशा

भूरुहाणां सुरतरुर्धेनूनां कामधेनुवत् ॥ शेषवत्सर्वनागानां पक्षिणां गरुडो यथा ॥ ११ ॥ देवानां तु यथा विष्णुर्वर्णानां ब्राह्मणो यथा ॥
प्राणवत्प्रियवस्तूनां भार्येव सुहृदां यथा ॥ १२ ॥ आपगानां यथा गंगा तेजसां तु रविर्यथा ॥ आयुधानां यथा चक्रं धातूनां कांचनं
यथा ॥ १३ ॥ वैष्णवानां यथा रुद्रो रत्नानां कौस्तुभो यथा ॥ मासानां धर्महेतूनां वैशाखश्चोत्तमस्तथा ॥ १४ ॥ नानेन सदृशो लोके
विष्णुप्रीतिविधायकः ॥ वैशाखस्नाननिरते मेषे प्रागर्यमोदयात् ॥ १५ ॥

खस्य नियमयति—धर्मेति ॥ १० ॥ ११ ॥ १२ ॥ आपगानां नदीनाम् ॥ १३ ॥ धर्महेतूनां धर्मकार्यनिमित्तभूतानाम् ॥ १४ ॥ वैशाखस्नाननिरते मनुष्ये विष्णुः प्रीतिं करोतीत्युत्तरेणान्वयः । तत्र स्नाननिरतः कीदृग्विधियुक्तो भाव्य इत्याकांक्षायामाह पाद्मे—"अंबरीष उवाच ॥ को विधिः किं तपो दानं स्नानं केशवपूजनम् ॥ कृपया वद विप्रर्षे तदा स नारदोऽब्रवीत् ॥ मेषसंक्रमणे भानोर्माधवे मासि सत्तम ॥ महानद्यां नदीतीर्थे नदे सरसि निर्झरे ॥ देवखाते वापिकूपे यथाप्राप्तजलाशये ॥ मधुमासस्य शुक्लायामेकादश्यामुपोषयेत् ॥ पंचदश्यां ततो धीरो मेषसंक्रमणेऽपि वा ॥ वैशाखस्नाननियमं ब्राह्मणानामनुज्ञया ॥ मधुसूदनमभ्यर्च्य कुर्यात्सुस्नानपूर्वकम् ॥" इत्यादिः । स्नानसमये दर्भपाणिराचांतः नारायणं स्मरन्, प्रत्यक्षगंगाऽभावे चतुर्हस्तात्मकं स्थलं प्रकल्प्य, तत्र गंगामावाह्य नमस्कृत्य सविधि मृत्तिकास्नानं कृत्वा तीर्थस्नानं कुर्यात् ॥ तत आचम्य शुक्ले वाससी परिधाय देवऋषिमनुष्यपितृतर्पणं कृत्वा सूर्यायार्घ्यं दत्त्वा नमस्कृत्य द्विजं गां कांचनं स्पृष्ट्वा पश्चाच्च स्वगृहं व्रजेत् ॥ "आश्रमस्थांश्च संपूज्य प्रतिमां चापि पूजयेत् ॥ पूर्वं भक्त्या च गोविंदं गृहे च नियतात्मवान् ॥ वैशाखं सकलं मासं नित्यस्नायी जितेंद्रियः ॥ जपन्हविष्यं भुञ्जानो भूशय्यानियमस्थितः ॥ एकभुक्तमथो नक्तमयाचितमतंद्रितः ॥ वैशाखे विधिवत्स्नानद्वयं नद्यादिके बहिः ॥ व्रतं दानं जपो होमो मधुसूदनपूजनम् ॥ अपि जन्मसहस्रोत्थं पापं हरति दारुणम्॥ त्रिसन्ध्यं पूजयेदीशं लक्ष्म्या च मधुसूदनम् ॥ सुवर्णं तिलपात्राणि दुग्धपात्राणि शक्तितः ॥ पादत्राणातपत्राब्जकुम्भान्दद्याद्द्विजातिषु ॥ सर्वपापविनिर्मुक्तो याति सोऽपि परं पदम् ॥ वैदिकस्तांत्रिको मिश्रः श्रीविष्णोस्त्रिविधो मखः ॥ वैदिको मिश्रको वाऽपि विप्रादीनामुदाहृतः॥तांत्रिको विष्णुभक्तस्य शूद्रस्यापि प्रकीर्तितः ॥ कृतन्यासः कृतन्यासां हर्यर्चां विधिनाऽर्चयेत् ॥ सुदर्शनं पांचजन्यं गदाऽसीषुधनुर्हलान् ॥ मुशलं कौस्तुभं मालां श्रीवत्सं चाऽपि पूजयेत् ॥ नंदोपनंदं गरुडं प्रचण्डं चण्डमेव च ॥ बलं महाबलं चैव कुमुदं कुमुदेक्षणम् ॥ दुर्गां विनायकं व्यासं विष्वक्सेनं गुरून्सुरान् ॥ स्वस्वस्थानेष्वभिमुखान्पूजयेत्प्रोक्षणादिभिः ॥ सूक्तादिनाऽभिषेकं च कुर्याद्वै विभवे सति ॥ होमादिकं प्रकुर्वीत कथाश्रवणमाचरेत् ॥" इति ॥ १५ ॥

॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ क्रतुशतं क्रतुशतजन्यम् ॥ २१ ॥ २२ ॥ बाह्ये निर्झररूपे अल्पके अल्पकुण्डरूपे लिखितपापानि यमशासने लिखितानि पापानीत्यर्थः ॥ २३ ॥ अंभसि शीतोदके ॥ २४ ॥ बहिर्जलं नदीतडागादिषु स्थितं जलमित्यर्थः ॥ २५ ॥ "तावत्षड्घटिकामध्ये तस्मात्स्नानं समाचरेत्" इत्यनेन स्नानस्यैव महाफलदायकत्वं सूचितं महापातकहानिश्च भवति । अत्र प्रसिद्धा पंचपातकीकथा पाद्मे—"पुरा मुनिशर्मानाम कश्चि द्ब्राह्मणः माधवे मासि तीर्थप्रसंगेन रेवायां स्नानार्थं प्रतिसञ्चरन्सन्नग्रतोऽतिविकृतिरूपान्पञ्च पुरुषान्दृष्ट्वा इमे क इति यावद्विचारयति तावत्ते तद्दर्शनेन शुद्धांतःकरणाः बद्धां

लक्ष्मीसहायो भगवान्प्रीतिं तस्मिन्करोत्यलम् ॥ जंतूनां प्रीणनं यद्वदन्नेनैव हि जायते ॥ १६ ॥ तद्वद्वैशाखस्नानेन विष्णुः प्रीणात्यसंशयम् ॥ वैशाखस्नाननिरताञ्जनान्दृष्ट्वाऽनुमोदते ॥ १७ ॥ तावतापि विमुक्तोऽघैर्विष्णुलोके महीयते ॥ सकृत्स्नात्वा मेषसंस्थे सूर्ये प्रातः कृताह्निकः ॥ ॥ १८ ॥ महापापैर्विमुक्तोऽसौ विष्णोः सायुज्यमाप्नुयात् ॥ स्नानार्थं मासि वैशाखे पादमेकं चरेद्यदि ॥ १९ ॥ सोऽश्वमेधायुतानां च फलमाप्नोत्यसंशयम् ॥ अथवा कूटचित्तस्तु कुर्यात्संकल्पमात्रकम् ॥ २० ॥ सोऽपि क्रतुशतं पुण्यं लभेदेव न संशयः ॥ यो गच्छेद्धनुरायामं स्नातुं मेषगते रवौ ॥ २१ ॥ सर्वबंधविनिर्मुक्तो विष्णोः सायुज्यमाप्नुयात् ॥ त्रैलोक्ये यानि तीर्थानि ब्रह्मांडांतर्गतानि च ॥ २२ ॥ तानि सर्वाणि राजेन्द्र संति बाह्येऽल्पके जले ॥ तावल्लिखितपापानि गर्जंति यमशासने ॥ २३ ॥ यावन्न कुरुते जंतुर्वैशाखे स्नानमंभसि ॥ तीर्थादिदेवताः सर्वा वैशाखे मासि भूमिप ॥ २४ ॥ बहिर्जलं समाश्रित्य सदा सन्निहिता नृप ॥ सूर्योदयं समारभ्य यावत्षड्घटिकावधि ॥ २५ ॥ तिष्ठंति चाऽऽज्ञया विष्णोर्नराणां हितकाम्यया ॥ तावन्नागच्छतां पुंसां शापं दत्त्वा सुदारुणम् ॥ स्वस्थानं यांति राजेन्द्र तस्मात्स्नानं समाचरेत् ॥ ॥ २६ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे वैशाखमासप्रशंसापूर्वकवैशाखस्नानमाहात्म्यवर्णनंनाम प्रथमोऽध्यायः ॥ १ ॥

जलिपुटाः संतः स्वस्ववृत्तांतं प्रोचुः । हे द्विजवर्य भवंतं पुरुषोत्तमं मन्यामहे, त्वं प्रसीद, आत्मदुःखमावेदयामः, यतः युष्मत्सदृशाः साधवः दुःखहंतारः संति । तत्रैक आह—अहं पंचालदेशीयो नरवाहनोनाम क्षत्रियः मार्गे ब्राह्मणहननेनेदृशीं दशां प्राप्तः, अयं द्वितीयः चन्द्रशर्मानाम द्विजः मगधदेशीयः गुरुघातपातकेनेदृशीं दशां प्राप्तः, तृतीयोऽयं देवशर्मा ब्राह्मणः सुरापानवेश्यागमनदोषेणेदृशीं दशां प्राप्तः, अयं चतुर्थः विधुरोनाम वैश्यः मोहान्मासत्रयं मातृगमनदोषेणेदृशीं दशां प्राप्तः, अयं पञ्चमः नंदनामा वैश्यः

धनलोभेन महापातकिनां संसर्गकरणेन चौर्यादिकर्मणा चेदृशीं दशां प्राप्तः—एवं वयं पञ्च पापिष्ठाः अनेकतीर्थेषु भ्रमंतस्तथाऽपि शुद्धा न जाताः दुःखं च न गतमतः पापना
शनोपायं वद ॥ ॥ मुनिशर्मोवाच ॥ ॥ हे पुरुषाः यूयमज्ञानतः पापकारिणोऽपि सत्यभाषिणः अनुतापयुक्ताश्च जाताः अतः मया अनुग्राह्याः ॥ "मासे तु वै माधव
संज्ञकेऽस्मिन्यः स्नाति पापैः स विमुच्यते हि ॥ मेषस्थिते भास्वति नर्मदायाः शर्मप्रदे वारिणि वारिताऽघे ॥ तस्मादहो सह मया सुकृतैकसारवैशाखमासि च भवंत उपेत्य
रेवाम् ॥ मज्जन्तु पातककृतो मुनिवृंदजुष्टे रेवाजले निखिलपापभयापहत्यै" एवमुक्तास्ते सर्वे मुनिना सह रेवां गत्वा पापप्रशमनं स्तोत्रं जपंतः विधिना स्नानं चक्रुः तेन पाप
निर्मुक्ताः दिव्यदेहाश्च जाताः" इति ॥ २६ ॥ इति वैशाखमासमाहात्म्यटीकायां प्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥ माधवसमो मासो नास्ति वैशाख एव मुख्यः अग्रे सर्वत्र

॥ ॥ नारद उवाच ॥ ॥ न माधवसमो मासो न कृतेन युगं समम् ॥ न च वेदसमं शास्त्रं न तीर्थं गंगया समम् ॥ १ ॥ न जलेन समं
दानं न सुखं भार्यया समम् ॥ न कृषेस्तु समं वित्तं न लाभो जीवितात्परः ॥ २ ॥ न तपोऽनशनात्तुल्यं न दानात्परमं सुखम् ॥ न धर्मस्तु
दयातुल्यो न ज्योतिश्चक्षुषा समम् ॥ ३ ॥ न तृप्तिरशनात्तुल्या न वाणिज्यं कृषेः समम् ॥ न धर्मेण समं मित्रं न सत्येन समं यशः ॥ ४ ॥
नारोग्यसममुत्थानं न त्राता केशवात्परः ॥ न माधवसमं लोके पवित्रं कवयो विदुः ॥ ५ ॥ माधवः परमो मासः शेषशायिप्रियः सदा ॥ अव्र
तेन क्षिपेद्यस्तु मासं माधववल्लभम् ॥ ६ ॥ तिर्यग्योनिं स यात्याशु सर्वधर्मबहिष्कृतः ॥ अव्रतेन गतो येषां माधवो मर्त्यधर्मिणाम् ॥ ७ ॥
इष्टापूर्तं वृथा तेषां धर्मो धर्मभृतां वरः ॥ प्रवृत्तानां तु भक्ष्याणां माधवेऽनियमे कृते ॥ ८ ॥ अवश्यं विष्णुसायुज्यं प्राप्नोत्येव न संशयः ॥ संतीह
बहुवित्तानि व्रतानि विविधानि च ॥ ९ ॥ देहाऽऽयासकराण्येव पुनर्जन्मप्रदानि च ॥ वैशाखस्नानमात्रेण न पुनर्जायते भुवि ॥ १० ॥ सर्व
दानेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ॥ तत्फलं समवाप्नोति माधवे जलदानतः ॥ ११ ॥ जलदानासमर्थेन परस्यापि प्रबोधनम् ॥ कर्तव्यं
भूतिकामेन सर्वदानाधिकं हितम् ॥ १२ ॥

एवमेव योज्यम् ॥ १ ॥ न जलेन समं दानं जलेन तुल्यमन्यद्दानं नास्ति, जलस्यैव मुख्यदानत्वात् । भार्यया सममन्यत्सुखं नास्ति, भार्यैव परमं सुखमित्यर्थः । कृषेरन्य
त्तुल्यं वित्तं नास्ति कृषिरेव मुख्यं धनम् ॥२॥ अनशनादुपोषणादन्यत्तपो नास्ति, उपोषणमेव तपः ॥ चक्षुषा सममन्यज्ज्योतिर्नास्ति, चक्षुरेव ज्योतिः ॥३॥ अशनात्तु
ल्या भोजनेन तुल्या ॥ ४ ॥ उत्थानं प्राप्तिः । विदुः जानंति ॥ ५ ॥ अव्रतेन व्रतमकृत्वा ॥ ६ ॥ तिर्यग्योनिं पशुपक्ष्यादियोनिम् ॥ ७ ॥ इष्टापूर्ते जलघट्टादिबंधने
तेषां धर्मभृतामपि पुरुषाणां माधवे मासि भक्ष्याणां भक्षणीयपदार्थानामनियमे कृते सति वृथा धर्मो भवति ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ स्वयं जलदानासमर्थेन परस्य

जलदाने प्रबोधनं 'त्वं जलं देहि' इत्याकारकं भूतिकामेनैश्वर्येच्छावता कर्तव्यम् ॥ १२ ॥ १३ ॥ प्रपा—'पाणपोही' इति प्रसिद्धं स्थानम् "प्रपा पानीय शालिका" इत्यमरः तस्य दानमुत्सर्जनं मार्गे पानीयशालिकाबन्धनमित्यर्थः ॥ १४ ॥ १५ ॥ १६ ॥ सलिलं, छत्रं, व्यजनं, देयं ब्राह्मणायेति वक्ष्यमाणसंबंधः ॥ १७ ॥ १८॥ माधवे जलदानादियथोक्तदानाकरणेऽनिष्टं फलमाह—अदत्त्वेत्यनेन । उदककुम्भमुदकविशिष्टमक्षय्यतृतीयायां दीयमानं कुम्भम् ॥ १९ ॥ २० ॥ विहगाधिपतिः देव

एकतः सर्वदानानि जलदानं हि चैकतः ॥ तुलामारोपितं पूर्वं जलदानं विशिष्यते ॥ १३ ॥ मार्गेऽध्वगानां यो मर्त्यः प्रपादानं करोति हि ॥ स कोटिकुलमुद्धृत्य विष्णुलोके महीयते ॥ १४ ॥ देवानां च पितॄणां च ऋषीणां राजसत्तम ॥ अत्यंतप्रीतिदं सत्यं प्रपादानं न संशयः ॥ १५ ॥ प्रपादानेन संतुष्टा येनाऽध्वश्रमकर्षिताः ॥ तोषितास्तेन देवाश्च ब्रह्मविष्णुशिवादयः ॥ १६ ॥ सलिलं सलिलेच्छूनां छत्रं छायामपीच्छताम् ॥ व्यजनं व्यजनेच्छूनां वैशाखे मासि भूमिप ॥ १७ ॥ जलं छत्रं च व्यजनं दानं येषां विशिष्यते ॥ माधवे मासि संप्राप्ते ब्राह्मणाय कुटुम्बिने ॥ १८ ॥ अदत्त्वोदककुम्भं च चातको जायते भुवि ॥ १९ ॥ यो दद्याच्छीतलं तोयं तृषार्ताय महात्मने ॥ तावन्मात्रेण राजेंद्र राजसूयायुतं लभेत् ॥ २० ॥ घर्मश्रमार्तविप्राय वीजयेद्व्यजनेन यः ॥ तावन्मात्रेण निष्पापो विहगाधिपतिर्भवेत् ॥ २१ ॥ अदत्त्वा व्यजनं भूप वैशाखे तु द्विजातये ॥ वातरोगशताकीर्णो नरकानेव विंदति ॥ २२ ॥ यो वीजयेत्पटेनाऽपि पथि श्रांतं द्विजोत्तमम् ॥ तावताथ विमुक्तोऽसौ विष्णुसायुज्यमाप्नुयात् ॥२३॥ यस्तालव्यजनं वाऽपि दत्त्वा शुद्धेन चेतसा ॥ विधूय सर्वपापानि ब्रह्मलोकं स गच्छति ॥ २४ ॥ सद्यः श्रमहरं पुण्यं न दद्याद्व्यजनं नरः ॥ नारकीं यातनां भुक्त्वा कश्मलो जायते भुवि ॥ २५ ॥ आध्यात्मिकादिदुःखानां शांतये मनुजेश्वर ॥ छत्रं दद्यात्प्रयत्नेन वैशाखे मासि वा सकृत् ॥ २६ ॥ अच्छत्रदो नरो यस्तु वैशाखे माधवप्रिये ॥ छायाहीनो महाक्रूरः पिशाचो भुवि जायते ॥ २७ ॥ यो दद्यात्पादुके दिव्ये माधवे माधवप्रिये ॥ यमदूतौ तिरस्कृत्य विष्णुलोकं स गच्छति ॥ २८ ॥ पादत्राणं तु यो दद्याद्वैशाखे माधवागमे ॥ न तस्य नारको लोको न क्लेशा ऐहिकाश्च ये ॥२९॥ पादुके याचमानाय यो दद्याद्ब्राह्मणाय च ॥ स भूपालो भवेद्भूमौ कोटिजन्मस्वसंशयम् ॥३०॥ अनाथमंडपं मार्गे श्रमहारि करोति यः ॥ तस्य पुण्यफलं वक्तुं ब्रह्मणाऽपि न शक्यते ॥३१॥

राजः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ कश्मलः कुष्ठवान् ॥ २५ ॥ आध्यात्मिकादिदुःखानामाध्यात्मिकाधिदैविकाधिभौतिकदुःखानां शांत्यर्थं छत्रं दद्यात् ॥ २६ ॥ छायाहीनो मरुस्थल्यादिनिर्वृक्षदेशेषु जायमान इत्यर्थः ॥ २७ ॥ २८ ॥ पादत्राणमुपानहम् । इह भवा ऐहिका आध्यात्मिकादयः ॥ २९ ॥ ३० ॥ अनाथमण्डपं

मार्गे वर्तमानमनाथविश्रांत्यर्थं छायामण्डपम् । अनाथस्य भग्नं पतितं वा गृहम् । यः करोति सम्यक्कृत्वा ददाति इत्यर्थः ॥ ३ १॥ फलविश्रांतिः फलानामियत्तया गणनम्॥
॥ ३२ ॥ सद्यः स्वाप्यायनं सद्यस्तृप्तिकरम् ॥ ३३ ॥ ३४ ॥ ३५ ॥ अन्नदानाकरणे प्रत्यवायमाह—वैशाख इति । भूसुरे द्विजायेत्यर्थः । चतुर्थ्यर्थे सप्तमी ॥ ३६ ॥
यथाविभूति स्वसामर्थ्यानुरोधेन ॥ ३७ ॥ विस्मारयति, अयमत्र निष्कर्षः—यस्मै अन्नं ददाति स याचकः स्वमातापित्रादीन्विस्मृत्यान्नदातारमेव स्मरतीति ॥ ३८ ॥

मध्याह्ने ब्राह्मणं प्राप्तमतिथिं भोजयेद्यदि ॥ न तस्य फलविश्रांतिर्ब्रह्मणाऽपि निरूपिता ॥ ३२ ॥ सद्यः स्वाप्यायनं नृणामन्नदानं नराधिप ॥
तस्मान्नान्नेन सदृशं दानं लोकेषु विद्यते ॥ ३३ ॥ मार्गश्रांताय विप्राय प्रश्रयं प्रददाति यः ॥ तस्य पुण्यफलं वक्तुं ब्रह्मणाऽपि न शक्यते ॥
॥ ३४ ॥ दारापत्यगृहादीनि वासोऽलंकारभूषणम् ॥ असह्यं नाश्नतः पुंसः सह्यं भुक्तवतो ध्रुवम् ॥ ३५ ॥ तस्मादन्नसमं दानं न भूतं न भविष्यति
॥ वैशाखे येन चादत्तं मार्गश्रांते च भूसुरे॥३६॥ स पिशाचो भवेद्भूमौ स्वमांसान्येव खादति ॥ यथाविभूति दातव्यं तस्मादन्नं द्विजातये
॥ ३७ ॥ अन्नदो मातृपित्रादीन्विस्मारयति भूमिप ॥ तस्मादन्नं प्रशंसंति लोकास्त्रैलोक्यवर्तिनः ॥ ३८ ॥ मातरः पितरश्चापि केवलं जन्महेतवः
॥ अन्नदं पितरं लोके वदन्ति च मनीषिणः ॥३९॥ अन्नदे सर्वतीर्थानि अन्नदे सर्वदेवताः ॥ अन्नदे सर्वधर्माश्च तिष्ठंत्यरिधराजय ॥४०॥
इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे दाननिरूपणंनाम
द्वितीयोऽध्यायः ॥ २ ॥ ॥छ॥ ॥ नारद उवाच ॥ ॥ यो मर्त्यो द्विजवर्याय पर्यंकं तु ददाति हि ॥ यत्र स्वस्थः सुखं शेते शीतानिलनिषेवितः
॥ १ ॥ धर्मसाधनभूते हि देहे नैरुज्यमाप्नुते ॥ तं दत्त्वा सकलं तापं निरस्य गतकल्मषः ॥ २ ॥ अखण्डपदवीं याति योगिनामपि दुर्लभाम् ॥
वैशाखे घर्मतप्तानां श्रान्तानां तु द्विजन्मनाम् ॥३॥ दत्त्वा श्रमापहं दिव्यं पर्यंकं मनुजेश्वर ॥ न जातु सीदते लोके जन्ममृत्युजरादिभिः॥४॥
गृहीत्वा ब्राह्मणो यत्र शेते चाजीवमास्थितः ॥ आसीने सकलं पापं ज्ञानतोऽज्ञानतः कृतम् ॥ ५ ॥ विलयं याति राजेंद्र कर्पूर इव चाग्निना ॥
शयने ब्रह्मनिर्वाणं स नरो याति निश्चितम् ॥ ६ ॥

अन्नदातुः सर्वाधिक्यमनुवदति—मातर इति ॥ ३९ ॥ अरिधराजय शत्रुनगरविध्वंसक ॥ ४० ॥ इति वैशाखमासमाहात्म्यटीकायां द्वितीयोऽध्यायः ॥ २ ॥ ॥ छ ॥
अथ वैशाखमासे दानधर्माननुवदन्पर्यंकदानं प्रस्तौति—य इति ॥१॥ नैरुज्यमारोग्यम् ॥२॥ अखंडपदवीम् अव्युच्छिन्नं मुक्तिमार्गम्॥ ३ ॥ ४ ॥ ५ ॥ निर्वाणम् अपुन

रावृत्तिम् ॥ ६ ॥ स्नानं वल्लभं प्रियं यस्मिन् हरेरिति शेषः तस्मिन् ॥ ७ ॥ ८ ॥ शतपौरुषम् आत्मानमारभ्य भविष्यच्छतपुरुषपर्यंतम् ॥ ९ ॥ उपबर्हणम् उच्छीर्षकम् ॥ १० ॥ उपबर्हणं विशिनष्टि—सुखमिति ॥ ११ ॥ १२ ॥ ब्रह्मभूयाय ब्रह्मलोकं प्रति गंतुं कल्पते समर्थो भवति । तार्णं तृणैर्निर्मितं कटम् अथवा अन्यत्कटं

यो दद्यात्कशिपुं मासे वैशाखे स्नानवल्लभे ॥ सर्वभोगसमायुक्तस्तस्मिन्नेव हि जन्मनि ॥ ७ ॥ सान्वयो वर्तते नूनं रोगादिभिरनाहतः ॥
आयुष्यं परमारोग्यं यशो धैर्यं च विंदति ॥ ८ ॥ नाधार्मिकः कुले तस्य जायते शतपौरुषम् ॥ भुक्त्वा तु सकलान्भोगांस्ततः पञ्चत्वमेष्यति ॥ ९ ॥
निर्धूताखिलपापस्तु ब्रह्मनिर्वाणमृच्छति ॥ श्रोत्रियाय द्विजेंद्राय यो दद्यादुपबर्हणम् ॥ १० ॥ सुखं निद्रा विना येन न नृणां
जायते क्वचित् ॥ सर्वेषामाश्रयो भूत्वा भुवि साम्राज्यमश्नुते ॥ ११ ॥ पुनः सुखी पुनर्भोगी पुनर्धर्मपरायणः ॥ आसप्तजन्म राजेंद्र जायते
सर्वतो जयी ॥ १२ ॥ पश्चात्सप्तकुलैर्युक्तो ब्रह्मभूयाय कल्पते ॥ तार्णं कटं तु यो दद्यात्कटमन्यदथापि वा ॥ १३ ॥ तत्र शेते स्वयं विष्णुर्यत्रस्थः परमेश्वरः
॥ यथा जलगता चोर्णा न जलैर्भिद्यते क्वचित् ॥ १४ ॥ तथा संसारगो जन्तुः संसारे न च बध्यते ॥ आसने शयने
सक्तः कटदः सर्वतः सुखी ॥ १५ ॥ प्रश्रये शयनार्थाय यो दद्यात्कटकंबलम् ॥ तावन्मात्रेण मुक्तः स्यान्नात्र कार्या विचारणा ॥ १६ ॥
निद्रया हीयते दुःखं निद्रया हीयते श्रमः ॥ सा निद्रा कटसंस्थस्य सुखं संजायते ध्रुवम् ॥ १७ ॥ यो दद्यात्कंबलं राजन्वैशाखे माधवाऽऽगमे
॥ अपमृत्योः कालमृत्योर्मुक्तो जीवति वै शतम् ॥ १८ ॥ दद्याद्वस्त्रं सूक्ष्मतरं द्विजेंद्रे घर्मकर्शिते ॥ पूर्णमायुः समाप्नोति परत्र च परां
गतिम् ॥ १९ ॥ अतस्तापहरं दिव्यं कर्पूरं तु द्विजातये ॥ दत्त्वा मोक्षमवाप्नोति दुःखशांतिं च विंदति ॥ २० ॥ कुसुमानि च यो दद्यात्कुंकुमं च
द्विजातये ॥ सार्वभौमो भवेद्राजा सर्वलोकवशंकरः ॥ २१ ॥ पुत्रपौत्रादिभोगांश्च भुक्त्वा मोक्षमवाप्नुयात् ॥ त्वगस्थिगतसंतापं सद्यो हरति
चन्दनम् ॥ २२ ॥ तापत्रयविनिर्मुक्तस्तद्दत्त्वा मोक्षमाप्नुयात् ॥ औशीरं चाषकं कौशं यो दद्याज्जलवासितम् ॥ २३ ॥

खर्जूरादिपत्रविनिर्मितम् ॥ १३ ॥ तृणविनिर्मितकटदानप्रभावं वर्णयति—यथेति ॥ १४ ॥ १५ ॥ प्रश्रये विश्रांतिस्थाने धर्मशालादौ पांथायेति शेषः ॥ १६ ॥ १७ ॥ कम्बलदानप्रशंसामाह—यो दद्यादिति । माधवाऽऽगमे माधवस्य आगमः यस्मिन् ॥ १८ ॥ १९ ॥ २० ॥ कुंकुमं केशरमित्यर्थः ॥ २१ ॥ २२ ॥ कौशं सुगन्धवि

शिष्टकुशसंस्कृतं केवलकुशैर्वा संस्कृतम् ॥ २३ ॥ निर्वृतिं मोक्षमानंदं वा ॥ २४ ॥ २५ ॥ २६ ॥ शतपत्रीं नीलकमलिनीम् । यूथीं मालतीम् ॥ २७ ॥ मधुशासनो विष्णुस्तस्य शासनादाज्ञया ॥ २८ ॥ २९ ॥ ३० ॥ विश्राममण्डपं विश्रामस्य विहारस्य मंडपम् ॥ ३१ ॥ सुच्छायाविशिष्टं मण्डपं प्रपया पानीयशालिकया सहितम् ॥ ३२ ॥ पुत्रैः किं फलमित्युक्त्या पुत्रेण यथा पुन्नामनरकादिनिरासः स्वर्लोकप्राप्तिर्भवति तद्वदनेन सुकर्मणाऽपि फलं लभ्यत इति सूचितम् ॥ ३३ ॥ तदेव विशद

सर्वभोगेषु राजेंद्र स तु देवसहायवान् ॥ पापहानिं दुःखहानिं प्राप्य निर्वृतिमाप्नुयात् ॥ २४ ॥ गोरोचं मृगनाभिं च दद्याद्वैशाखधर्मवित् ॥
तापत्रयविनिर्मुक्तः परं निर्वाणमृच्छति ॥ २५ ॥ तांबूलं च सकर्पूरं यो दद्यान्मेषगे रवौ ॥ सार्वभौमसुखं भुक्त्वा परं निर्वाणमृच्छति ॥ २६ ॥
शतपत्रीं च यूथीं च मेषमासे ददन्नरः ॥ स सार्वभौमो भवति पश्चान्मोक्षं च विंदति ॥२७॥ केतकीं मल्लिकां वाऽपि यो दद्यान्माधवाऽऽगमे ॥
स तु मोक्षमवाप्नोति मधुशासनशासनात् ॥ २८ ॥ पूगीफलं तु यो दद्यात्सुगन्धं तु द्विजातये ॥ नारिकेलफलं राजंस्तस्य पुण्यफलं शृणु ॥
॥ २९ ॥ सप्त जन्म भवेद्विप्रो धनाढ्यो वेदपारगः ॥ पश्चात्सप्तकुलैर्युक्तो विष्णुलोकं स गच्छति ॥ ३० ॥ विश्राममण्डपं यस्तु कृत्वा दद्या
द्विजन्मने ॥ तस्य पुण्यफलं वक्तुं नाहं शक्नोमि भूपते ॥ ३१ ॥ सुच्छायामण्डपं यस्तु सिकताऽऽकीर्णमञ्जसा ॥ सप्रपं कारयेद्यस्तु स तु
लोकाधिपो भवेत् ॥ ३२ ॥ मार्गोद्यानं तडागं वा कूपं मण्डपमेव च ॥ यः करोति स धर्मात्मा तस्य पुत्रैस्तु किं फलम् ॥ ३३ ॥ कूपस्तडाग
मुद्यानं मण्डपं च प्रपा तथा ॥ सद्धर्मकरणं पुत्रः संतानं सप्तधोच्यते ॥ ३४ ॥ एतेष्वन्यतमाभावे नोर्ध्वं गच्छंति मानवाः ॥ सच्छास्त्र
श्रवणं तीर्थयात्रा सज्जनसंगतिः ॥ ३५ ॥ जलदानं चान्नदानमश्वत्थारोपणं तथा ॥ पुत्रश्चेति च संतानं सप्तेमेऽतिविदो विदुः ॥ ३६ ॥ नासं
ततिर्लभेल्लोकान्कृत्वा धर्मशतान्यपि ॥ तस्मात्संतानमन्विच्छेत्संतानेष्वेकतो व्रजेत् ॥ ३७ ॥ पशूनां पक्षिणां चैव मृगाणां चैव भूरुहाम् ॥
नोर्ध्वलोकं सुखं याति मनुष्याणां तु का कथा ॥ ३८ ॥ पूगीफलसमायुक्तं नागवल्लीदलैर्युतम् ॥ कर्पूरागुरुसंयुक्तं दद्यत्तांबूलमुत्तमम् ॥ ३९ ॥
शारीरैः सकलैः पापैर्मुच्यते नात्र संशयः ॥ तांबूलदो यशो धैर्यं श्रियमाप्नोति निश्चितम् ॥ ४० ॥

यति—कूप इति ॥ ३४ ॥ ३५ ॥ अतिविदोऽतिनिपुणा इमे पूर्वोक्ताः सप्त संतानमेवंति विदुर्जानंति ॥ ३६ ॥ संतानप्राप्त्यर्थमुपायान्वदिष्यन्संतानं प्रस्तौति—नासंततिरिति ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

॥ ४१ ॥ घर्मकालेषु उष्णकाल इत्यर्थः ॥ ४२ ॥ अध्वश्रांतद्विजन्मने पांथाय ब्राह्मणायेत्यर्थः ॥ ४३ ॥ ४४ ॥ अहं ब्रह्मा ॥ ४५ ॥ गव्यं गोसंबंधि, तेसो रूपं तेजस्वि ॥ ४६ ॥ उर्वारुकं कर्कटीफलविशेषं 'फूट' इति गुर्जरभाषायां प्रसिद्धम् ॥ ४७ ॥ ४८ ॥ ४९ ॥ पानकं बिंबदाडिमीरसपानकं शर्करामिश्रितजलं वा । फलेन खर्बुजाख्येन सहितं शर्कराजलम् । सुधापानम् अमृतपानम्, भवेदिति शेषः ॥ ५० ॥ चूतसुपक्वफलसंयुतं पानकं गुर्जरभाषायां

रोगी दत्त्वा विरोगः स्यादरोगी मोक्षमाप्नुयात् ॥ वैशाखे मासि यो दद्यात्तक्रं तापविनाशनम् ॥ ४१ ॥ विद्यावान्धनवान्भूमौ जायते नात्र संशयः ॥ न तक्रसदृशं दानं घर्मकालेषु विद्यते ॥ ४२ ॥ तस्मात्तक्रं प्रदातव्यमध्वश्रांतद्विजातये ॥ जंबीरसुरसोपेतं लसल्लवणमिश्रितम् ॥४३॥ यस्तक्रमरुचिघ्नं तु दत्त्वा मोक्षमवाप्नुयात् ॥ यो दद्याद्दधिखंडं तु वैशाखे घर्मशांतये ॥ ४४ ॥ तस्य पुण्यफलं वक्तुं नाहं शक्नोमि भूमिप ॥ यो दद्यात्तंडुलान्दिव्यान्मधुसूदनवल्लभे ॥ ४५ ॥ स लभेत्पूर्णमायुष्यं सर्वयज्ञफलं लभेत् ॥ यो घृतं तेजसो रूपं गव्यं दद्याद्द्विजातये ॥ सोऽश्वमेधफलं प्राप्य मोदते विष्णुमंदिरे ॥ ४६ ॥ उर्वारुगुडसंमिश्रं वैशाखे मेषगे रवौ ॥ सर्वपापविनिर्मुक्तः श्वेतद्वीपे वसेद्ध्रुवम् ॥ ४७ ॥ यश्चेक्षुदंडं सायाह्ने दिवा तापोपशान्तये ॥ ब्राह्मणाय च यो दद्यात्तस्य पुण्यमनंतकम् ॥ ४८ ॥ वैशाखे पानकं दत्त्वा सायाह्ने श्रमशान्तये ॥ सर्वपापविनिर्मुक्तो विष्णोः सायुज्यमाप्नुयात् ॥४९॥ सफलं पानकं मेषमासे सायं द्विजातये ॥ दद्यात्तेन पितॄणां तु सुधापानं न संशयः॥५०॥ वैशाखे पानकं चूतसुपक्वफलसंयुतम् ॥ तस्य सर्वाणि पापानि विनाशं यांति निश्चितम् ॥ ५१ ॥ यो दद्याच्चैत्रदर्शे तु कुम्भं पूर्णं तु पानकैः ॥ गयाश्राद्धशतं तेन कृतमेव न संशयः ॥ ५२ ॥ कस्तूरीकर्पुरोपेतं मल्लिकोशीरसंयुतम् ॥ कलशं पानकैः पूर्णं चैत्रदर्शे तु मानवः ॥ दद्यात्पितॄन्समुद्दिश्य स षण्णवतिदो भवेत् ॥ ५३ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे दाननिरूपणंनाम तृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ तैलाभ्यङ्गं दिवा स्वापं तथा वै कांस्यभोजनम् ॥ खट्वानिद्रां गृहे स्नानं निषिद्धस्य च भक्षणम् ॥ १ ॥

'गोलकेरी' महाराष्ट्रभाषायां 'गुळांबा' इति प्रसिद्धम् । वा अपक्वं चूतफलं भर्जयित्वा तद्रसं शर्कराजीरकमिश्रितम् ॥ ५१ ॥ चैत्रदर्शे चैत्रामावस्यायाम् ॥ ५२ ॥ षण्णवतिदः षण्णवतिश्राद्धप्रद इत्यर्थः ॥ ५३ ॥ ५४ ॥ इति वैशाखमासमाहात्म्यटीकायां तृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ अथ वैशाखमासे व्रताचरणं

प्रस्तौति—तैलाभ्यंगमिति । कांस्यभोजनं कांस्यपात्रभोजनम् । निषिद्धस्य मसूरादेः ॥ १ ॥ द्विभुक्तं द्विवारं भोजनम् ॥ २ ॥ श्रांतानाम् अध्वपरिश्रमखिन्नानाम् । द्विजन्मनां ब्राह्मणानाम् ॥ पादावनेजनं पादप्रक्षालनम्, यदिति शेषः । तत् तदेव व्रतम्, अस्मादधिकं व्रतमन्यत्किंचिन्नास्तीति ध्वनिः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ अस्नायी शीतोदकस्नानरहितः, अपत्राशी पलाशादिपत्रेषु भोजनविरहितः ॥ ७ ॥ गृहे स्नानं यः करोति स इति शेषः ॥ ८ ॥ ९ ॥ अवैशाखाद्वैशाखनियमानामकरणात् ॥ १० ॥

वैशाखे वर्जयेदष्टौ द्विभुक्तं नक्तभोजनम् ॥ पद्मपत्रे तु यो भुंक्ते वैशाखे व्रतसंस्थितः ॥ २ ॥ स तु पापविनिर्मुक्तो विष्णुलोकं च गच्छति ॥ वैशाखे मासि मध्याह्ने श्रांतानां तु द्विजन्मनाम् ॥ पादावनेजनं कुर्यात्तद्व्रतं सुव्रतोत्तमम् ॥ ३ ॥ अध्वश्रान्तं द्विजं यस्तु मध्याह्ने स्वगृहागतम् ॥ उपवेश्यासने रम्ये कृत्वा पादावनेजनम् ॥ ५ ॥ धृत्वा शिरसि ताश्चापो विध्वस्ताखिलबंधनः ॥ गंगादिसर्वतीर्थेषु स्नातो भवति निश्चितम् ॥ ६ ॥ अस्नायी वाऽप्यपत्राशी वैशाखं तु नयेद्यदि ॥ रासभीं योनिमासाद्य पश्चादश्वतरो भवेत् ॥ ७ ॥ दृढाङ्गो रोगहीनश्च तथा स्वस्थोऽपि मानवः ॥ वैशाखे तु गृहे स्नात्वा चांडालीं योनिमाप्नुयात् ॥ ८ ॥ वैशाखे मासि राजेन्द्र मेषसंस्थे दिवाकरे ॥ न करोति बहिःस्नानं श्वानयोनिशतं व्रजेत् ॥ ९ ॥ अस्नात्वा चाप्यदत्त्वा च वैशाखो येन नीयते ॥ स पिशाचो भवेन्नूनमवैशाखादथो व्रजेत् ॥ १० ॥ यो न दद्याज्जलं चान्नं वैशाखे लोभमानसः ॥ पापहानिं दुःखहानिं नैवाप्नोति न संशयः ॥ ११ ॥ नदीस्नानं तु यः कुर्याद्वैशाखे विष्णुतत्परः ॥ जन्मत्रयार्जितात्पापान्मुच्यते नात्र संशयः ॥ १२ ॥ समुद्रगनदीस्नानं कुर्यात्प्रातर्भगोदये ॥ सप्तजन्मार्जितैः पापैस्तत्क्षणादेव मुच्यते ॥ १३ ॥ कुर्यादुषसि यः स्नानं सप्तगङ्गासु मानवः ॥ कोटिजन्मार्जितात्पापान्मुच्यते नात्र संशयः ॥ १४ ॥ जाह्नवी वृद्धगङ्गा च कालिंदी च सरस्वती ॥ कावेरी नर्मदा वेणी सप्तगंगाः प्रकीर्तिताः ॥ १५ ॥ देवखातेषु यः कुर्यात्प्रातर्वैशाखमज्जनम् ॥ जन्मारभ्य कृतात्पापान्मुच्यते नात्र संशयः ॥ १६ ॥ वैशाखे मासि संप्राप्ते यो वापीष्ववगाहनम् ॥ प्रातः कुर्यान्महाराज महापातकनाशनम् ॥ १७ ॥ अपि गोष्पदमात्रेषु बहिःस्थेषु जलेषु च ॥ तिष्ठंति सरितः सर्वा गंगाद्या इति निश्चयः ॥ इति जानन्समाप्नोति सर्वतीर्थाधिकं फलम् ॥ १८ ॥ क्षीरं रसाधिकं क्षीरादधिकं दधि भूमिप ॥ दध्नोऽधिकं घृतं यद्वदूर्जो मासोऽधिकस्तथा ॥ १९ ॥

॥ ११ ॥ १२ ॥ भगोदये सूर्योदये ॥ १३ ॥ सप्तगंगासु जाह्नवीवृद्धगंगेत्यादिश्लोकोक्तसप्तगंगांतर्गतायां कस्यांचिन्नद्याम् ॥ १४ ॥ १५ ॥ देवखातेषु देवालयसमीपवर्तिदेवनामप्रसिद्धकुण्डेषु ॥ १६ ॥ १७ ॥ गोष्पदमात्रेषु अत्यल्पेषु ॥ १८ ॥ वैशाखमासस्याधिक्येन श्रैष्ठ्यं क्रमेण प्रतिपादयति—क्षीरमित्यादि ॥ १९ ॥

धर्मः वटबीजवद्वर्द्धते परंत्वत्र धर्मगतिः अतिसूक्ष्माऽस्ति, कुत्रचिन्महता प्रयासेन स्वल्पो धर्मो भवति, कुत्रचिदल्पायासेन महद्धर्मसाधनं भवत्ति, अत्र दृष्टांतमाहपाद्मे— "धर्मस्य गतयः सूक्ष्मा दुर्ज्ञेया हीश्वरैरपि ॥ मुह्यंते चात्र विद्वांसोऽचिंत्यशक्तिहरेः कृतौ ॥ स्वल्पायासमहायासौ यद्यल्पत्वमहत्त्वयोः ॥ महापुण्यास्ततस्ते स्युः सततं कर्षकादयः ॥ मूत्रोत्सर्गे च सिंहादेरायासबहुलत्वतः ॥ पंचगव्यात्प्रशस्तं वै व्रतांगत्वेन नो भवेत् ॥ इति कर्तव्यबाहुल्यं महत्त्वं च तदल्पता ॥ यथाऽल्पनाशो महता महन्नाशस्तथाऽल्पतः ॥ किं नाल्पविस्फुलिंगेन तृणराशिः प्रदह्यते ॥ विष्णुभक्तिमता वीर यत्किञ्चित्क्रियतेऽल्पकम् ॥ सुकृतं माधवे मासि तदक्षय्यफलं भवेत् ॥ एवं शास्त्रोक्तविधिना स्वल्पेनापि

कार्तिकादधिको माघो माघाद्वैशाख उत्तमः ॥ तस्मिन्मासे कृतो धर्मो वर्द्धते वटबीजवत् ॥ २० ॥ आढ्यो वाऽतिदरिद्रो वा परतंत्रोऽथ वा नरः ॥ यद्वस्तु लभते तेन तद्दातव्यं द्विजातये ॥ २१ ॥ कन्दमूलफलं शाकं लवणं गुडमेव च ॥ कोलं पत्रं जलं तक्रमानंत्यायोपकल्पते ॥ ॥ २२ ॥ नादत्तं लभते क्वापि ब्रह्माद्यैस्त्रिदशैरपि ॥ २३ ॥ दानेन हीनो हि भवेदकिंचनो निष्किञ्चनत्वाच्च करोति पापम् ॥ पापादवश्यं नरकं प्रयाति दातव्यमस्मात्सुखमिच्छता तदा ॥ २४ ॥ यथा गृहं सर्वगुणोपपन्नं परिच्छदैर्हीनमशोभनं तथा ॥ मासेषु धर्मः सकलेष्वनुष्ठितो वैशाखहीनस्तु वृथैव याति ॥ २५ ॥ यथैव कन्या सकलैश्च लक्षणैर्युक्ताऽपि जीवत्पतिलक्षणा न हि ॥ क्रियाऽपि सांगा सकलाऽपि राजन्वैशाखहीना तु वृथैव तां विदुः ॥ २६ ॥ दयाविहीनास्तु यथा गुणा वृथा वैशाखधर्मेण विना तथा क्रियाः ॥ शाकं तु यद्वल्लवणेन हीनं न रोचते सर्वगुणोपपन्नम् ॥ २७ ॥ वैशाखहीनं तु तथैव पुण्यं न साधुसेव्यं न फलाप्तिहेतुः ॥ यद्वन्न भूषासहिताऽपि शोभते वस्त्रेण हीना ललना सुरूपा ॥ क्रियाकलापः सुकृतोऽपि पुंभिर्न भासते तन्मधुमासहीनम् ॥ २८ ॥ तस्मात्सर्वप्रयत्नेन येन केनाऽपि जन्तुना ॥ धर्मो वैशाखमासे तु कर्तव्य इति निश्चयः ॥ २९ ॥ मधुसूदनमुद्दिश्य मेषसंस्थे दिवाकरे ॥ प्रातः स्नात्वाऽर्चयेद्विष्णुमन्यथा नरकं व्रजेत् ॥ ३० ॥

न संशयः ॥ पापस्य महतो वापि क्षयो वृद्धिः सुकर्मणः ॥ फलाधिक्यं भवेद्भूय आधिक्याद्भाविकर्मणोः ॥ सूक्ष्मा धर्मस्य विज्ञेया गतिस्तु विबुधैरपि ॥" इति ॥ २० ॥ ॥ २१ ॥ कोलं बदरीफलम् ॥ २२ ॥ २३ ॥ दानप्राशस्त्यमुपवर्णयति—दानेनेति । आकिंचनो दरिद्रः ॥ २४ ॥ परिच्छदैर्गृहोपस्करणैः हीनं गृहं यथा अशोभनं तथेति समन्वयः ॥ २५ ॥ अपरान्दृष्टांतानाह—यथैवेति । जीवत्पतिलक्षणा जीवत्पतित्वलक्षणविशिष्टा ॥ २६ ॥ २७ ॥ मधुमासहीनं वैशाखमासहीनमित्यर्थः ॥ २८ ॥ २९ ॥ ३० ॥

पुनरपि स्नानमाहात्म्यं कथयति—कश्चिदिति। स्पष्टार्थः। अत्र प्रसिद्धा कथा पाद्मे—"कश्चिन्महीरथनामा नृपः पूर्वपुण्यवशात्प्राप्तराज्यैश्वर्यो मन्त्रिणि राज्यं विन्यस्य स्वयं केवल महर्निशं कामिनीविलासासक्तो बभूव, तेन कर्मणा गतायुःखण्डान्न बुबुधे, तदा तत्कुलगुरुः कश्यपः—"निवारयति नो मोहादधर्मान्नृपतिं गुरुः ॥ सोऽपि तत्पापभाग्यस्मात्" इति शास्त्रं विचिंत्यानेकमार्गोपदेशैर्महीरथं बोधयामास। तद्यथा—"अनर्थे किं प्रसक्तस्त्वं स्वधर्मं नानुतिष्ठसि॥अविश्राममभक्ष्याम्बु ह्यपाथेयमदेशिकम्॥मृतःकांतारमध्वानं कथमेको गमिष्यसि ॥ कामो हि बलवान्राजञ्च्छरीरस्थो रिपुर्महान् ॥ न तस्य वशगो भूयाज्जनः श्रेयोऽभिलाषुकः ॥ पुरोहितो यतस्तेऽहं सदसत्कर्मभागपि ॥ तस्मात्त्वां बोधयिष्यामि सर्वपापविनाशने ॥ वैशाखस्य व्रतं सर्वं समाचर विधानतः ॥ आ जन्मतोऽपि विहितानि महांति राजन्घोराणि तानि दुरितानि विहाय मर्त्यः ॥ वैशाखमासविहिताऽऽचरणप्रभावपुण्येन तेन हरिमंदिरमेति चांते" इत्युक्तो नृपः स्वमनसि अतीव पश्चात्तापं कृत्वा गुरूपदिष्टमार्गेण आमरणं वैशाखधर्मानाचरन्नंते विमानमारुह्य विष्णुलोकं जगाम। "स गच्छन्पथि शुश्राव जीवानां क्रन्दतां पुनः ॥ निरये पच्यमानानामारावं विविधं तदा" श्रुत्वाऽतिदुःखितो राजा किमेतदिति दूतानपृच्छत्, दूताश्चास्मिन्यमलोके नानापातकिनः स्वस्वपातकानुरूपं नानायातनाः भुञ्जाना आक्रन्दंते, हे राजन् वैशाखे प्रातःस्नातस्य तव वपुषो वायुस्पर्शात्क्षणं लब्धसौख्याः आक्रन्दरहिताः जाताः तदाऽतिवि

कश्चिन्महीरथोराजा कामासक्तो जितेन्द्रियः ॥ वैशाखस्नानयोगेन वैकुण्ठं गतवान्स्वयम् ॥ ३१ ॥
वैशाखः सफलो मासो मधुसूदनदैवतः ॥ तीर्थयात्रातपोयज्ञदानहोमफलाधिकः ॥ ३२ ॥

स्मितः करुणानिधिः महीरथो राजा विष्णुदूतानुवाच "नार्तजन्तूनहं हित्वा पीडितो गंतुमुत्सहे ॥ स पापिष्ठो य आर्तानां शोकं नापहरेत्क्षमः ॥ मदङ्गसङ्गमोत्सृष्टवायुस्पर्शेन ते यदि ॥ जंतवः सुखिनो जातास्तस्मात्तत्र नयंतु माम् ॥ संतस्त एव ये लोके परदुःखनिवारणाः॥" तदा विष्णुदूतैस्तत्र नीतो राजा वदति "यद्यस्ति सुकृतं किंचिन्मम तेनैव जंतवः। स्वर्गं गच्छन्तु मुक्ताङ्गाः स्थानं चैषां वसाम्यहम् ॥ एवं भूपवचः श्रुत्वा दूताः प्रोचुर्नृपोत्तमम् ॥ अनेन तव कारुण्यधर्मेण वचसा नृप ॥ बभूव वृद्धिर्धर्मस्य संचितस्य विशेषतः ॥ माधवे मासि पूर्णायां स्नानदानादिकं त्वया ॥ यत्तीर्थे विहितं वीर सर्वाघविनिषूदनम् ॥ तदेभ्यो देहि विधिवत्कृत्वा साक्ष्ये हरिं प्रभुम् ॥ इत्युक्तः स तदा देवं कृत्वा साक्ष्ये गदाधरम् ॥ तेभ्यस्त्रिवाचिकं पुण्यं दयावान्विधिना ददौ ॥ दत्ते माधवमासस्य तस्मिन्नेकदिनोद्भवे ॥ सुकृते जंतवो याम्ययातनादुःखवर्जिताः ॥ विमानवरमारूढास्ते सर्वे त्रिदिवं ययुः ॥ प्रणमंतः स्तुवंतस्तं पश्यंतः संप्रहर्षिताः ॥ संस्तूयमानो मुनिदेवसंघैर्यत्तद्विशेषेण च लब्धपुण्यः ॥ परं पदं योगिवरैरलभ्यं ययौ जगन्नाथगणाभिवन्द्यः" इति ॥३१॥ ३२ ॥

वैशाखस्नानविधिं प्रत्याह—मधुसूदनेति ॥ ३३ ॥ ३४ ॥ ३५ ॥ यथोक्तफलं शास्त्रोक्तं फलं ददातीति तथा ॥ ३६ ॥ ३७ ॥ माधवोद्भवैर्वैशाखसमुद्भवैः, प्रसूनैः पुष्पैः । अत्र पुष्पप्रसङ्गेन बाह्याभ्यंतरपुष्पाण्याह पाद्मे—"अहिंसा प्रथमं पुष्पं द्वितीयं करणग्रहः ॥ तृतीयकं भूतदया चतुर्थं क्षांतिरेव च ॥ शमस्तु पंचमं पुष्पं ध्यानं चैव तु षष्ठकम् ॥ सत्यं च सप्तमं पुष्पमेतैस्तुष्यति केशवः ॥ पुष्पांतराणि सन्त्येव बाह्यानि नृपसत्तम ॥ आंतरैरेव तुष्येत यतो भक्तिप्रियोऽच्युतः॥ वारुणं सलिलं पुष्पं सौम्यं घृतपयोदधि ॥ प्राजापत्यं तथाऽन्नादि आग्नेयं धूपदीपकम् ॥ फलपुष्पादिकं चैव वानस्पत्यं तु पंचमम् ॥ पार्थिवं कुशमूलाद्यं वायव्यं गंधचंदनम्॥

॥ ॥ प्रार्थनामंत्रः ॥ ॥ मधुसूदन देवेश वैशाखे मेषगे रवौ ॥ प्रातः स्नानं करिष्यामि निर्विघ्नं कुरु माधव ॥३३॥ ॥ अर्घ्यमंत्राः ॥ ॥ वैशाखे मेषगे भानौ प्रातःस्नानपरायणः ॥ अर्घ्यं तेऽहं प्रदास्यामि गृहाण मधुसूदन ॥ ३४ ॥ गंगाद्याः सरितः सर्वास्तीर्थानि च ह्रदाश्च ये ॥ प्रगृह्णीत मया दत्तमर्घ्यं सम्यक्प्रसीदथ ॥ ३५ ॥ ऋषभः पापिनां शास्ता त्वं यमः समदर्शनः ॥ गृहाणार्घ्यं मया दत्तं यथोक्तफलदो भव ॥ ३६ ॥ इति चार्घ्यं समर्प्याथ पश्चात्स्नानं समाचरेत् ॥ वाससी परिधायाथ कृत्वा कर्माणि सर्वशः ॥ ३७ ॥ मधुसूदनमभ्यर्च्य प्रसूनैर्माधवोद्भवैः ॥ श्रुत्वा विष्णुकथां दिव्यामेतन्मासप्रशंसिनीम् ॥ ३८ ॥ कोटिजन्मार्जितात्पापान्मुक्तो मोक्षमवाप्नुयात् ॥ ३९ ॥ न जातु खिद्यते भूमौ न स्वर्गे न रसातले ॥ न गर्भे जायते क्वापि न भूयः स्तनपो भवेत् ॥ ४० ॥ वैशाखे कांस्यभोजी यस्तथा चाश्रुतसत्कथः ॥ न स्नातो नापि दाता च नरकानेव गच्छति ॥ ४१ ॥ ब्रह्महत्यासहस्रस्य पापं शाम्येत्कथंचन ॥ वैशाखे येन न स्नातं तत्पापं नैव गच्छति ॥ ४२ ॥ स्वाधीनेन स्वकायेन जले स्वातंत्र्य वर्तिनि ॥ स्वाधीनजिह्वयोच्चार्यं हरिरित्यक्षरद्वयम् ॥ ४३ ॥ न कुर्याद्यदि वैशाखे प्रातःस्नानं नराधमः ॥ जीवन्नेव स पंचत्वमागतो नात्र संशयः ॥ ४४ ॥ येन केनाप्युपायेन माधवे मधुसूदनम् ॥ नार्चयेद्यदि मूढात्मा शौकरीं योनिमाप्नुयात् ॥ ४५ ॥

शुद्धाख्यं विष्णुपुष्पं च वाद्यं विष्णुपदं स्मृतम् ॥ एभिस्तु पूजितः पुष्पैः सद्यो विष्णुः प्रसीदति ॥" इति ॥ ३८ ॥ जातु कदाचिदपि ॥ ३९ ॥ श्रुतसत्कथः श्रुताः सत्कथा येन सः ॥ ४० ॥ वैशाखनियमाचरणहीनानां गत्यन्तराभाव इति तावदनुवदति—ब्रह्महत्यासहस्रस्येत्यादि ॥ ४१ ॥ ४२ ॥ जीवन्नेव पंचत्वमागतः जीवन्मृत इत्यर्थः ॥ ४३ ॥ ४४ ॥ ४५ ॥

॥ ४६ ॥ अथ भक्तिभेदान् व्रतभेदांश्चाह—विविधैरिति । वैशाखमासे मानसिकादिभक्तिमार्गैः च परं मानसिकादिव्रतैः यः विष्णुं नित्यमनन्यबुद्धिः सन् आराधयन् सगुणं निर्गुणं वा ध्यायेत्स मुक्तिं यातीति । तत्र भक्तिभेदानाह पाद्मे—“ध्यानधारणया बुद्ध्या वेदानां स्मरणेन च ॥ विष्णुप्रीतिकरी चैषा मानसी भक्तिरुच्यते ॥ वेदमंत्रसमुच्चारैरविश्रान्तं दिवानिशम् ॥ जप्यैश्चारण्यकैश्चैव वाचिकी भक्तिरिष्यते ॥ व्रतोपवासनियमैः पञ्चेंद्रियजयेन च ॥ कायिकी भक्तिरुद्दिष्टा सर्वसिद्धिविधायिनी ॥ पाद्यार्घ्याद्युपचारैश्च नृत्यवादित्रगीतकैः ॥ बलिभिर्जागरार्चाभिर्लौकिकी भक्तिरीरिता ॥ ऋग्यजुःसामजप्यैश्च संहिताऽध्ययनादिभिः ॥ हविर्होमक्रियाभिश्च या भक्तिः सा तु वैदिकी ॥” इति । अथ व्रतभेदानाह तत्रैव—“अहिंसा सत्यमस्तेयं ब्रह्मचर्यमकल्पता ॥ एतानि मानसान्याहुर्व्रतानि हरितुष्टये ॥ एकभक्तं तथा नक्तमुपवासमयाचितम् ॥ इत्येवं कायिकं पुंसां व्रतमुक्तं नरेश्वर ॥ वेदस्याध्ययनं विष्णोः कीर्तनं सत्यभाषणम् ॥ अपैशुन्यमिदं राजन्वाचिकं व्रतमुच्यते ॥ पतिरूपो हिताचारैर्मनोवाक्कायसंयमैः ॥ व्रतैराराध्यते स्त्रीभिर्वासुदेवो दयानिधिः ॥” इति । विष्णोराराधनं ध्यानं च कुर्यादित्युक्तम्, तत्र हरेः पूजास्थानान्याह तत्रैव—“सूर्योऽग्निर्ब्राह्मणो

योऽर्चयेत्तुलसीपत्रैर्वैशाखे मधुसूदनम् ॥ नृपो भूत्वा सार्वभौमः कोटिजन्मसु भोगवान् ॥ पश्चात्कोटिकुलैर्युक्तो विष्णोः सायुज्यमाप्नुयात् ॥
॥ ४६ ॥ विविधैर्भक्तिमार्गैश्च विष्णुं सेवेत यो व्रतैः ॥ सगुणं निर्गुणं वाऽपि नित्यं ध्यायेदनन्यधीः ॥ ४७ ॥ इति श्रीस्कान्दे महापुराण
एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे वैशाखधर्मप्रशंसानाम चतुर्थोऽध्यायः ॥ ४ ॥

गावो वैष्णवः खं मरुज्जलम् ॥ भूरात्मा सर्वभूतानि पूजास्थानानि वै हरेः ॥ धिष्ण्येष्वेतेषु श्रीविष्णुं ध्यायन्नर्चेत्समाहितः ॥” इति । ध्यानभेदमाह तत्रैव—“यथा ध्यानप्रसङ्गेन कर्मणोऽपि क्षयो भवेत् । तद्ध्यानं द्विविधं तस्य प्रोक्तं शंकरपूर्वकैः ॥ निर्गुणं सगुणं वाऽपि तत्राद्यं शृणु मानद ॥ केवलो ज्ञानदृष्ट्याऽसौ दृश्यते योगयुक्तिभिः ॥ परमात्मपरै राजन्सततं ध्यानतत्परैः ॥ हस्तपादविहीनश्च सर्वं गृह्णाति गच्छति ॥ मुखनासाविहीनश्च भुंक्ते जिघ्रति भूपते ॥ अकर्णः शृणुते सर्वं सर्वसाक्षी जगत्पतिः ॥ अरूपो रूपसंबद्धः पंचवर्गवशं गतः ॥ सर्वलोकस्य यः प्राणः पूज्यते सचराचरैः ॥ अजिह्वो वदते सर्वं वेदशास्त्रानुगं तथा ॥ त्वग्विहीनः स्पृशेत्सर्वं शीतोष्णादि नराधिप ॥ सदानंदो विविक्ताक्ष एकरूपो निराश्रयः ॥ निर्गुणो निर्ममो व्यापी सगुणो निर्मलो जनः ॥ अवश्यः सर्ववश्यात्मा सर्वदः सर्ववित्तमः ॥ तस्य माता न चैवान्यः स वै सर्वमयो विभुः ॥ एवं सर्वमयं ध्यानं यश्च पश्यत्यनन्यधीः ॥ स याति परमं स्थानममूर्तममृतोपमम् ॥ द्वितीयं तु प्रवक्ष्यामि तच्छृणुष्व महामते ॥ मूर्ताऽऽकारं तु साकारं निरालम्बं

निरामयम् ॥ यस्य वासनया सर्वं ब्रह्माण्डं वासितं नृप ॥ स तस्माद्वासुदेवोऽपि प्रोच्यते विधिपूर्वकैः ॥ स्निग्धप्रावृड्घनश्यामं सूर्यतेजःसमप्रभम् ॥ शङ्खचक्रगदापद्मधारिणं कमलापतिम् ॥ कंबुग्रीवं चतुर्बाहुं सुरेशानं च शार्ङ्गिणम् ॥ केयूरहारकटककटिसूत्राङ्गुलीयकैः । विराजितं कुण्डलाभ्यां वपुषाऽलंकृतेन च ॥ वाससा हेमवर्णेन प्रावृतं गरुडासनम् ॥ ध्यायेच्च सगुणं राजन्भक्ताऽघौघहरं हरिम् ॥ एवं ते ध्यानमुद्दिष्टं द्विविधं नृपसत्तम ॥ यत्कृत्वा मुच्यते पापैर्मनोवाक्कायसंभवैः ॥ ” इत्यादि । अनन्यधीः न विद्यते अन्याश्रया धीर्बुद्धिर्यस्य ॥ ४७ ॥ इति वैशाखमासमाहात्म्यटीकायां चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ अथ सर्वेभ्योऽपि दानधर्ममासेभ्यो वैशाखस्यैव मुख्यतानि

॥ ॥ अम्बरीष उवाच ॥ ॥ वैशाखः सर्वधर्मेभ्यस्तपोधर्मेभ्य एव च ॥ स कथं सर्वमासेभ्यो दानेभ्योऽप्यधिकोऽभवत् ॥ १ ॥ ॥ नारद उवाच ॥ ॥ तद्वक्ष्यामि महाप्राज्ञ शृणु चैकमना भव ॥ कल्पांते देवराड्विष्णुः शेषशायी महाप्रभुः ॥ २ ॥ कुक्षिस्थलोकसङ्घोऽयं स शेते प्रलयार्णवे ॥ अनेको ह्येकतां प्राप्य भूतिभिर्योगमायया ॥ ३ ॥ निमेषस्यावसाने तु श्रुतिभिर्बोधितस्ततः ॥ कुक्षिस्थजीवसंघानां रक्षां चक्रे दयानिधिः ॥ ४ ॥ तत्तत्कर्मफलप्राप्त्यै सृष्टिं स्रष्टुं मनो दधे ॥ तस्य नाभेरभूत्पद्मं सौवर्णं भुवनाश्रयम् ॥ ५ ॥ ब्रह्माणं जनयामास वैराजं पुरुषाह्वयम् ॥ तस्मिन्ससर्ज भगवान्भुवनानि चतुर्दश ॥ ६ ॥ भिन्नकर्माशयान्प्राणिसङ्घांश्च विविधान्बहून् ॥ त्रिगुणान्प्रकृतिं लोके मर्यादाश्चाधिपांस्तथा ॥ ७ ॥ वर्णाश्रमविभागांश्च धर्मक्लृप्तिं च सोऽकरोत् ॥ वेदैश्चतुर्भिस्तंत्रैश्च सहितान्स्मृतिभिस्तथा ॥ ८ ॥ पुराणैरितिहासैश्च स्वाज्ञारूपैर्महेश्वरः ॥ ऋषीन्प्रवर्तकांश्चक्रे धर्मगुप्त्यै महाप्रभुः ॥ ९ ॥ तैः प्रवर्तितधर्मास्तु वर्णाश्रमविभागजाः ॥ प्रजाः श्रद्दधिरे सर्वाः स्वोचितान्विष्णुतोषदान् ॥ १० ॥ तांस्तु प्रवर्तमानांस्तु स्वाश्रमान्द्रष्टुमीश्वरः ॥ हृदिस्थोऽप्यव्ययः साक्षाद्विभीषार्थं परीक्षया ॥ ११ ॥

दानं विशदयितुं पृच्छति राजाम्बरीषः—वैशाख इति॥ १ ॥देवराट् देवराजः, कल्पान्ते महाप्रलये॥ २ ॥कुक्षिस्थः सामीप्याज्जठरस्थः लोकानां संघः समूहो यस्य सः परमात्मा अनेकोऽपि सन् भूतिभिर्योगमायया चैकतां प्राप्य प्रलयार्णवे शेते इत्यभिसंधिः ॥ ३ ॥ निमेषस्य नेत्रनिमीलनस्य निद्राया इत्यर्थः । श्रुतिभिर्वेदवाक्यैः ॥ ४ ॥ तत्तदित्यादि । तादृशतादृशपुण्यपापादिरूपफलप्राप्त्यर्थं स परमेश्वरः । यदेति शेषः। मनो दधे मनसि कृतवान् । तदेत्यप्यध्याहारेणोत्तरार्धाभिसंधिः ॥ ५ ॥ तस्मिन् विराड्रूपे ब्रह्माणि ॥ ६ ॥ सृष्टपदार्थान्परिगणयति—भिन्नेत्यादि । भिन्नाः कर्माणि आशयाश्च येषां तेषां प्राणिनां समूहान् ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ विभीषार्थम् अयमधर्मः

अस्मिन्नाचरिते विष्णुः कुप्यति इति भयदानाय ॥ ११॥ अनूनान्प्रशस्तान् संचिन्तयत् अडभाव आर्षः समचिंतयत् ॥१२॥१३॥१४॥ कर्षणादितश्चेतश्च व्यग्रत्वात् ॥
॥ १५ ॥ १६ ॥ प्रातः प्रातःकाले शीतबाहुल्यादिति भावः ॥ १७ ॥ अनिशं निरंतरम्, अंजसा साहजिकमेव ॥ १८ ॥ १९ ॥ प्रेक्षाया भगवद्दर्शनस्य ॥ २० ॥

अनूनान्कुशलान्यत्र धर्मान्कुर्वंति वै प्रजाः ॥ स कालः को भवेद्विद्वानिति सांचिंतयत्प्रभुः ॥ १२ ॥ वर्षाकालो मया सृष्टः सीदंत्यस्ता इमाः
प्रजाः ॥ तत्रानूनान्न कुर्वंति धर्मान्पंकाद्युपद्रुताः ॥१३॥ तान्दृष्ट्वा कोप एव स्यात्तेषु तुष्टिर्न मे भवेत् ॥ मयेक्षिता न सीदंतु तस्मात्तानवलोकये
॥१४॥ शरद्यपि तथा पूर्तिः कर्षणान्नैव जायते ॥ केचित्पक्वफलासक्ताः केचिद्वृष्टिभिरर्दिताः ॥१५॥ केचिच्छीतार्दिताश्चैव तान्दृष्ट्वा रोष एव मे ॥
वैगुण्यं पश्यतश्चैव न मे तोषोऽभिजायते ॥ १६ ॥ उत्थापनं तु नेच्छंति प्रातर्हेमंत आगते ॥ कोपो मेऽनुत्थितान्दृष्ट्वा प्रातः सूर्योदये सति ॥
॥ १७ ॥ शिशिरेऽपि तथैवार्ताः प्रातःकाल इमाः प्रजाः ॥ तथा पक्वफलादानाशक्ता ह्यनिशमंजसा ॥ १८ ॥ पुंनः शीतार्दिताः प्रातःस्नानार्थमिति
चिंतिताः ॥ तेषां तु कर्मलोपः स्यान्नैव पूर्तिः कथंचन ॥ १९ ॥ प्रेक्षायाः समयो नाऽय मिति चिंताऽऽकुलो विभुः ॥ वसंतसमयं मेने
सर्वापत्तिनिवारकम् ॥ २० ॥ स्नाने दाने तथा यागे क्रियायां भोग एव च ॥ नानाधर्मविधाने च ह्यनुकूलस्त्वयं ह्युतुः ॥ २१ ॥ अप्रयासेन
लभ्यानि द्रव्याण्यसुभृतां ध्रुवम् ॥ येन केनापि द्रव्येण तुष्टिस्तनुभृतां भवेत् ॥ २२ ॥ विष्णोराधारभूतानां तद्द्रव्यं धर्मसाधनम् ॥ वसंते सकलं
द्रव्यं प्राणिनां तु सुखावहम् ॥ २३ ॥ दानयोग्यं धर्मयोग्यं भोगयोग्यं तु सर्वशः ॥ निर्धनानां तु पङ्ग्वादिविकलानां महात्मनाम् ॥ २४ ॥
द्रव्याणि च सुलभ्यानि जलादीनि न संशयः ॥ द्रव्यैरेतैः स्वात्महितं धर्मं कुर्वंति मत्प्रियाः ॥ २५ ॥ पत्रैः पुष्पैः फलैरन्यैः शाकैश्चापि
प्रियोक्तिभिः ॥ स्रक्तांबूलैश्चन्दनाद्यैः पादप्रक्षालनादिभिः ॥ २६ ॥ प्रश्रयाद्यैरहो तेषां वरदोऽहमितीरयन् ॥ संचिंत्य भगवान्विष्णुः
प्रतस्थे रमया सह ॥ २७ ॥

भोगे यथासांगभगवदाराधने ॥ २१ ॥ असुभृतां प्राणिनाम् ॥ २२ ॥ विष्णोराधारभूतानां विष्णुभक्तियुतत्वाद्विष्णुरेव आधारभूतो येषामित्यर्थः । प्राणिनां धर्मसाधनं
तद्द्रव्यं पूजनानुष्ठानसामग्रीभूतं सकलं कृत्स्नं सुखावहं भवति ॥ २३ ॥ २४ ॥ मत्प्रियाः अहं प्रियो येषाम् ॥ २५ ॥ २६ ॥ प्रश्रयाद्यैः प्रणामप्रभृतिभिः, ईरयन् वदन्,

भगवान् रमया सह प्रतस्थे ॥ २७ ॥ वसंतशोभां वर्णयति–वनानीति । विकसंति कुसुमानि येषु तानि ॥ २८ ॥ २९ ॥ ३० ॥ मीनादिकर्कटान्तं मीनसंक्रांतिमारभ्य यावत्कर्कसंक्रांतिपर्यन्तम् ॥ ३१ ॥ कृताकृतसपर्यया क्वचित्कृता क्वचिदकृता च सपर्या पूजा यस्याः सा तया रमयेति पूर्वेणान्वयः । तत्र मुन्याश्रमादिषु इष्टान् मनोरथान् ददाति विष्णुरिति अनुवृत्तिः ॥ ३२ ॥ ३३ ॥ ३४ ॥ देशागतं देशस्थितिपर्यालोचनायागतम्, महार्हणैरुपायनपुरःसरपूजनैः ॥ ३५ ॥ करादिकं राजदेयकरादि

वनानि सर्वतः पश्यन्विकसत्कुसुमानि च ॥ हृष्टपुष्टजनाकीर्णं मत्तालिद्विजसेवितम् ॥ २८ ॥ आश्रमाणां महार्हाणां वनग्रामनिवासिनाम् ॥ प्रांगणादीनि रम्याणि ह्युद्यानानि स्थलानि च ॥ २९ ॥ रमायै दर्शयन्विष्णुः सह देवैर्मुनीश्वरैः ॥ सिद्धचारणगन्धर्वकिन्नरोरगराक्षसैः ॥ ३० ॥ स्तूयमानोऽभ्यगाद्गेहान्वर्णाश्रमनिवासिनाम् ॥ मीनादिकर्कटांतं वै स तिष्ठन्रमया सुरैः ॥ ३१ ॥ सार्द्धं प्रतीक्ष्यपुरुषान्कृताकृतसपर्यया ॥ तत्र धर्मवतां पुंसां ददातीष्टान्मनोरथान् ॥ ३२ ॥ मत्तान्न सहते पुंसो हरत्यायुर्धनादिकम् ॥ यदि कुर्वंति वैशाखे सपर्यां परमात्मनः ॥ ३३ ॥ तत्रापि चलमूर्तीनां साधूनां यत्र वै विभुः ॥ मासेष्वन्येषु यज्जातं कर्मलोपं सहिष्यति ॥ ३४ ॥ यथा देशागतं भूपं दृष्ट्वा जानपदाः प्रजाः ॥ यदि तं चोपतिष्ठन्ति प्रश्रयाद्यैर्महार्हणैः ॥ ३५ ॥ तदा करादिकं न्यूनं पूर्णं जानाति पार्थिवः ॥ पुनरप्यधिकं चेष्टं तुष्टो दास्यति निश्चितम् ॥ ३६ ॥ तदा त्वकृतपूजानां दण्डं तेषां करोति च ॥ तथा विष्णुः स्वकीयानां वैशाखे माधवागमे ॥ ३७ ॥ सपर्यां कुर्वतां पुंसां ददातीष्टान्मनोरथान् ॥ अकुर्वतां तथा पुंसां धनादीनि हरत्यलम् ॥ ३८ ॥ धर्मगोप्तुर्महाविष्णोर्देवदेवस्य शार्ङ्गिणः ॥ परीक्षाकाल एवाऽयं तस्मान्मासोत्तमो ह्ययम् ॥ ३९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदांबरीषसंवादे वैशाखश्रेष्ठत्वनिरूपणंनाम पञ्चमोध्यायः ॥ ५ ॥ ॥ छ ॥ ॥

कम् ॥ ३६ ॥ अकृतपूजानां राजपूजनाविमुखानां स राजा दण्डं करोति यथा तथा विष्णुरित्यादि ॥ ३७ ॥ ३८ ॥ अयं वसंतकालः धर्मं करोति नवेति परीक्षाकालोऽस्ति, अतः अयं वैशाखमासः सर्वेषूत्तमः । अनेन अस्मिन्मासे धर्मकार्यमवश्यं कर्तव्यमेवेति ध्वनिः सूचितः ॥ ३९ ॥ इति वैशाखमासमाहात्म्यटीकायां पंचमोऽध्यायः ॥ ५ ॥ ॥ छ ॥

अध्वगाश्च ते तप्ताश्चेति कर्मधारयः । तिर्यग्योनिं पशुपक्ष्यादिजन्म ॥ १ ॥ गृहगोधायाः पल्ल्याः ॥ २ ॥ ब्रह्मण्यः ब्राह्मणहितकारी, वदान्यः अतिदाता, जितामित्रः जितशत्रुः ॥ ३ ॥ यावत्यो यावत्संख्याकाः तावतीस्तावत्संख्याकाः ॥४॥ येन हेमाङ्गेन इष्टे सति यज्ञे कृते सति तत्रोपयुज्यमानैर्दर्भैर्भूमिर्बर्हिष्मती यत्र तत्र दर्भपुंजमयी कृतेति भावः ॥ ५ ॥ सुखलभ्यधिया जलं तु सुखेन लभ्यते तस्य दानेन किमिति बुद्ध्या ॥ ६॥ बोधितः जलदानं कुर्वित्युपदिष्टः ॥ ७ ॥ हेतुवादैस्तर्कवादैः॥ ८ ॥

॥ ॥ नारद उवाच ॥ ॥ वैशाखेऽध्वगतप्तानां तृषार्तानां महीपते ॥ जलदानमकुर्वाणस्तिर्यग्योनिमवाप्नुयात् ॥ १ ॥ अत्रैवोदाहर
न्तीममितिहासं पुरातनम् ॥ विप्रस्य गृहगोधायाः संवादं परमाद्भुतम् ॥ २ ॥ पुरा चेक्ष्वाकुवंशेऽभूद्धेमांग इति भूमिपः ॥ ब्रह्मण्यश्च वदान्यश्च
जितामित्रो जितेन्द्रियः ॥ ३ ॥ यावत्यो भूमिकणिका यावन्तो जलबिंदवः ॥ यावन्त्युडूनि गगने तावतीरददात्स गाः ॥ ४ ॥ येनेष्ट
यज्ञदर्भैश्च भूमिर्बर्हिष्मती शुभा ॥ गोभूतिलहिरण्याद्यैस्तोषिता बहवो द्विजाः ॥ ५ ॥ तेनादत्तानि दानानि न विद्यन्त इति श्रुतम् ॥ तेनादत्तं
जलं चैकं सुखलभ्यधिया नृप ॥ ६ ॥ बोधितो ब्रह्मपुत्रेण वसिष्ठेन महात्मना ॥ अमौल्यं सर्वतो लभ्यं तद्दाता किं फलं लभेत् ॥ ७ ॥ दुर्बुद्ध्या
हेतुवादैश्च न जलं दत्तवान्द्विजे ॥ अलभ्यदाने पुण्यं स्यादिति वाक्यं सुयुक्तिमत् ॥ ८ ॥ स आनर्च द्विजान्व्यङ्गान्दरिद्रान्वृत्तिकर्शितान् ॥
नार्चयच्छ्रोत्रियान्विप्रांस्तत्त्वज्ञान्ब्रह्मवादिनः ॥ ९ ॥ प्रख्यातान्पूजयिष्यंति सर्वे लोका महार्हणाः ॥ अनाथानामविद्यानां व्यंगानां च द्विजन्म
नाम् ॥१०॥ दरिद्राणां गतिः का वा तस्मात्ते मे दयास्पदम् ॥ इति दुर्धीरपात्रेषु दत्तवान्किमपि स्वयम् ॥ ११ ॥ तेन दोषेण महता चातकत्वं
त्रिजन्मसु ॥ एकजन्मनि गृध्रत्वं श्वाऽभवत्सप्तजन्मसु ॥१२॥ पश्चान्नृपगृहे जातो भूपोऽयं गृहगोधिका ॥ श्रुतकीर्त्याख्यभूपस्य मिथिलाधिपते
र्नृप ॥१३॥ गृहद्वारप्रतोल्यां च वर्तते कीटकाशना ॥ सप्ताशीतिषु वर्षेषु स्थितं तेन दुरात्मना ॥ १४ ॥ विदेहाधिपतेर्गेहे कदाचिदृषिसत्तमः ॥
श्रुतदेव इति ख्यातः श्रौतो मध्याह्न आगतः ॥ १५ ॥

व्यंगान् काणांधबधिरकुब्जान्, वृत्तिकर्शितान् वृत्तिहीनान्, आनर्च पूजितवान्; श्रोत्रियादीन् द्विजान्नार्चयत् ॥ ९ ॥ १० ॥ दुर्धीर्दुर्बुद्धिः, अपात्रेषु अयोग्येषु, किमपि द्रव्यं स्वयं वसिष्ठाज्ञामगृहीत्वैव ॥ ११ ॥ १२ ॥ १३ ॥ गृहद्वारप्रतोल्यां गृहद्वाराभ्यन्तरोपरितनप्रदेशे, कीटकाशना कीटकानश्नातीति तथा, दुरात्मना दुराचारप्रवृत्तमनसा ॥ १४ ॥ १५ ॥

पादावनेजनीः पादप्रक्षालनसम्बन्धिनीः ॥ १६ ॥ उत्सिक्तैरूर्ध्वमुत्सारितैः दैवेनोपदिष्टेन गृहगोधिकात्वमोक्तव्यकालेन ॥ १७ ॥ जातस्मृतिः उत्पन्नपूर्वजन्मकर्मस्मरणः, ब्राह्मणं श्रुतदेवम् ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ पूर्तानि देवालयतीर्थघट्टादिबन्धनादीनि, धर्मराजः वैशाखमासः ॥ २३ ॥ २४ ॥ अलर्कत्वं भ्रान्त

तं दृष्ट्वा सहसोत्थाय जातहर्षो नराधिपः ॥ मधुपर्कादिभिः पूज्य तस्य पादावनेजनीः ॥ १६ ॥ अपो मूर्ध्ना वहन्क्षिप्रं तदोत्सिक्तैश्च बिंदुभिः ॥ दैवोपदिष्टकालेन प्रोक्षिता गृहगोधिका ॥ १७ ॥ सद्यो जातस्मृतिरभूत्स्मृतकर्मादिदुःखिता ॥ त्राहित्राहीति चुक्रोश ब्राह्मणं गृहमागतम् ॥ १८ ॥ तिर्यग्जंतुरवं श्रुत्वा ब्राह्मणो विस्मितोऽवदत् ॥ कुतः क्रोशसि गोधे त्वं दशेयं केन कर्मणा ॥ १९ ॥ त्वं देवः पुरुषः कश्चिन्नृपो वाऽथ द्विजोऽथ वा ॥ कस्त्वं ब्रूहि महाभाग त्वामद्याहं समुद्धरे ॥ २० ॥ इत्युक्तः स नृपः प्राह श्रुतदेवं महामतिम् ॥ अहमिक्ष्वाकुकुलजो वेदशास्त्रविशारदः ॥ २१ ॥ यावत्यो भूमिकणिका यावन्तस्तोयबिंदवः ॥ यावंत्युडूनि गगने तावतीरददं स्म गाः ॥ २२ ॥ सर्वे यज्ञा मया चेष्टाः पूर्तान्याचरितानि मे ॥ दानान्यपि च दत्तानि धर्मराजस्त्वनुष्ठितः ॥ २३ ॥ तथापि दुर्गतिर्जाता मम चोर्ध्वगतिं विना ॥ त्रिवारं चातकत्वं मे गृध्रत्वं चैकजन्मनि ॥ २४ ॥ सप्तजन्मस्वलर्कत्वं प्राप्तं पूर्वं मया द्विज ॥ सिंचताऽनेन भूपेन त्वपः पादावनेजनीः ॥ २५ ॥ बिंदवो दूरमुत्क्षिप्तास्तैः सिक्तोऽहं कथंचन ॥ तेन जन्मस्मृतिरभूत्सर्वपाप्मा हतश्च मे ॥ २६ ॥ गोधाजन्मानि भाव्यानि ह्यष्टाविंशतिकानि मे ॥ दृश्यन्ते दैवसृष्टानि बिभ्ये तैर्जन्मभिर्भृशम् ॥ २७ ॥ न कारणं प्रपश्यामि तन्मे विस्तरतो वद ॥ इत्युक्तः स ऋषिः प्राह ज्ञात्वा विज्ञानचक्षुषा ॥२८॥ शृणु भूप प्रवक्ष्यामि तव दुर्योनिकारणम् ॥ न जलं तु त्वया दत्तं वैशाखे माधवप्रिये ॥२९॥ तज्जलं सुलभं मत्वा ह्यमूल्यमिति निश्चितम् ॥ नाध्वगानां द्विजातीनां घर्मकालेऽप्यजानता ॥ ३० ॥ तथा पात्रं समुत्सृज्य ह्यपात्रे प्रतिदत्तवान् ॥ ज्वलन्तमग्निमुत्सृज्य नहि भस्मनि हूयते ॥ ३१ ॥

श्वत्वम् ॥ २५ ॥ सर्वपाप्मा सर्वपापम् ॥२६॥ अष्टाविंशतिकानि गोधाजन्मानि गोधायोनौ दैवसृष्टानि अष्टाविंशतिर्जन्मानि भविष्यंतीति दृश्यंते तैर्जन्मभिरहं बिभ्ये इति श्लोकार्थः ॥ २७ ॥ २८ ॥ २९ ॥ अमूल्यम् अतीव जघन्यमिति त्वया मत्वा घर्मकाले उष्णकाले, अजानता अविदुषा ॥ ३० ॥ पात्रं योग्यम्, अपात्रे प्रतिग्रहा

नर्हे, अर्थांतरमुपन्यस्यति—ज्वलन्तमिति ॥ ३१ ॥ ३२ ॥ ३३ ॥ पूज्यतायां पूजनीयत्वे अनाथत्वं प्रयोजकतां कारणताम् न इयाद्गच्छेत्, अनाथ इति मत्वा पूजनीयो भवतीति न युक्तमिति तात्पर्यम् । तद्रक्षणमात्रमेवोचितमिति वदति—पंग्वाद्या य इति ॥ ३४ ॥ ३५ ॥ अत्यर्थमत्यंतम् ॥ ३६ ॥ साधु सुष्ठु वृत्तं येषां तेषां ज्ञानिनामित्यर्थः । पुमर्थानां धर्मार्थकाममोक्षाणाम् ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ तैः साधुभिः, सुशिक्षिताः सम्यगुपदिष्टाः, जन्ममृत्युजराद्यैरिति । सुधया अमृतेन, आप्यायितास्तर्पिताः, सीदन्त इत्यत्राऽन्वेति ॥ ४१ ॥ शान्तये पूर्वजन्मकृतपापनिरासाय ॥ ४२ ॥ हे अनुत्तम हे सकलश्रेष्ठ अंबरीष ॥ ४३ ॥ गृहगोधिकां गृहगोधिकादेहम् ॥ ४४ ॥ मैथिलस्य जनकस्य ॥ ४५ ॥ अनुज्ञातः गृहीतमुन्यनुज्ञः ॥ ४६ ॥ अतन्द्रितो निरलसः ॥ ४७ ॥ ४८ ॥ वसिष्ठेन बोधित उपदिष्टः ॥ ४९ ॥

बहुधा वर्णितस्याऽपि सौगन्ध्यादियुतस्य च ॥ कण्टकान्वितवृक्षस्य न कुर्वंति समर्चनम् ॥३२॥ विशिष्टानां पादपानामश्वत्थः सेव्यतां गतः ॥ तुलसीं तु समुत्सृज्य बृहती पूज्यते नु किम् ॥ ३३ ॥ अनाथत्वं पूज्यतायां न प्रयोजकतामियात् ॥ पंग्वाद्या येऽप्यनाथा हि दयापात्रं हि केवलम् ॥ ३४ ॥ तपोनिष्ठा ज्ञाननिष्ठाः श्रुतिशास्त्रविशारदाः ॥ विष्णुरूपाः सदा पूज्या नेतरे तु कदाचन ॥ ३५ ॥ तत्रापि ज्ञानिनोऽत्यर्थं विप्रा विष्णोः सदैव हि ॥ ज्ञानिनामपि भूपाल विष्णुरेव सदा प्रियः ॥ तस्माज्ज्ञानी सदा पूज्यः पूज्यात्पूज्यतरः स्मृतः॥ ३६ ॥ अवज्ञा साधुवृत्तानामिहाऽमुत्र च दुःखदा ॥ सेवा वै महतां पुंसां पुमर्थानां हि कारणम् ॥ ३७ ॥ कोटयोऽप्यन्धजातीनां न पश्यंति यथाऽयथम् ॥ एवं मन्दायुतानां तु संगतिर्नार्थदा भवेत् ॥ ३८ ॥ नह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ॥ ते पुनंत्युरुकालेन दर्शनादेव साधवः ॥ ३९ ॥ न साधुसेवनात्कापि सीदन्ते तैः सुशिक्षिताः ॥ जन्ममृत्युजराद्यैर्वा सुधयाऽऽप्यायिता यथा ॥ ४० ॥ न जलं तु त्वया दत्तं साधवो वा न सेविताः ॥ तेन ते दुर्गतिश्चेयं प्राप्ता चेक्ष्वाकुनंदन ॥ ४१ ॥ वैशाखे मत्कृतं पुण्यं तुभ्यं दास्यामि शान्तये ॥ भूतं भव्यं भवद्येन कर्मजातं विजेष्यसि ॥ ४२ ॥ इत्युक्त्वाऽप उपस्पृश्य ददौ पुण्यमनुत्तमम् ॥ ४३ ॥ यदा दत्तं ब्राह्मणेन स्नानं चैकदिने कृतम् ॥ तेन ध्वस्ताऽखिलाघस्तु त्यक्त्वा तां गृहगोधिकाम् ॥ ४४ ॥ दिव्यं विमानमारुह्य दिव्यस्रग्वस्त्रभूषणः ॥ पश्यतामेव भूतानां मैथिलस्य गृहांतरे ॥ ४५ ॥ बद्धाञ्जलिपुटो भूत्वा परिक्रम्य प्रणम्य च ॥ अनुज्ञातो ययौ राजा स्तूयमानोऽमरैर्दिवम् ॥ ४६ ॥ तत्र भुक्त्वा महाभोगान्वर्षायुतमतन्द्रितः ॥ स एव चेक्ष्वाकुकुले काकुत्स्थोऽभून्महाप्रभुः ॥ ४७ ॥ सप्तद्वीपवतीपालो ब्रह्मण्यः साधुसंमतः ॥ देवेन्द्रस्य सखा विष्णोरंश एव महाप्रभुः ॥ ४८ ॥ बोधितस्तु वसिष्ठेन वैशाखोक्तान्मनोरमान् ॥ अनुष्ठायाखिलान्धर्मांस्तेन ध्वस्ताखिलाऽशुभः ॥ ४९ ॥

समासाद्य प्राप्य इत्थमितिहासं प्रोच्य वर्णनीयकथांशमुपसंहरति–वैशाख इति ॥ ५० ॥ प्रीणाति प्रीतो भवति ॥ ५१ ॥ चातुर्वर्ण्यनरैर्ब्राह्मणक्षत्रियविट्शूद्रैः, चतुराश्रमवर्तिभिर्ब्रह्मचारिगृहस्थवानप्रस्थसंन्यासिभिः, माधवस्यागमः प्राप्तिर्यस्मिन्वैशाखे महाधर्मोऽनुष्ठेयः करणीयः ॥ ५२ ॥ इति वैशाखमासमाहात्म्यटीकायां षष्ठोऽध्यायः ॥६॥ अथ वैशाखधर्मान्प्रति जनकपृष्टः श्रुतदेवः सविस्तरमाहेति कथाप्रसंगमनुसंधत्ते–राजेति । अद्भुतं कीटदेहस्य सायुज्यप्राप्तिरूपम् ॥ १ ॥ २ ॥ ३ ॥ व्याजहारो

दिव्यं ज्ञानं समासाद्य विष्णोः सायुज्यमाप्तवान् ॥ वैशाखः शुभदस्तस्मात्पुंभिः सर्वैरनुष्ठितः ॥५०॥ आयुर्यशःपुष्टिदोऽयं महापापौघनाशनः ॥ पुमर्थानां निदानं च विष्णुः प्रीणात्यनेन तु ॥ ५१ ॥ चातुर्वर्ण्यनरैः सर्वैश्चतुराश्रमवर्तिभिः ॥ अनुष्ठेयो महाधर्मो वैशाखे माधवागमे ॥ ५२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे गृहगोधिकाख्यानंनाम षष्ठोऽध्यायः ॥ ६ ॥ ॥छ॥ ॥ नारद उवाच ॥ ॥ राजा तदद्भुतं दृष्ट्वा मैथिलो धर्मवित्तमः ॥ कृताञ्जलिः सुखासीनं विस्मितो वाक्यमब्रवीत् ॥ ॥१॥ ॥ मैथिल उवाच ॥ ॥ दृष्टमेतन्महाश्चर्यं साधूनां चरितं तथा ॥ येन धर्मेण मुक्तोऽभूद्राजा चेक्ष्वाकुनन्दनः ॥ २ ॥ तं धर्मं विस्तरेणैव श्रोतुं कौतूहलं हि मे ॥ मह्यं श्रद्धावते विद्वन्कृपया विस्तराद्वद ॥ ३ ॥ इति राज्ञा सुसंपृष्टः श्रुतदेवो महामनाः ॥ साधुसाध्विति संभाष्य व्याजहार नृपोत्तमम् ॥ ४ ॥ ॥ श्रुतदेव उवाच ॥ ॥ सम्यग्व्यवसिता बुद्धिस्तव राजर्षिसत्तम ॥ वासुदेवप्रियान्धर्माञ्छ्रोतुं यस्मान्मतिस्तव ॥ ५ ॥ बहुजन्मार्जितं पुण्यं विना कस्यापि देहिनः ॥ वासुदेवकथालापे मतिर्नैवोपजायते ॥ ६ ॥ यूने राजाधिराजाय जातेयं मतिरीदृशी ॥ शुद्धं भागवतं मन्ये तेन त्वां साधुसत्तमम् ॥ ७ ॥ तस्मात्तुभ्यं ब्रुवे सौम्य धर्मान्भागवताञ्छुभान् ॥ याञ्ज्ञात्वा मुच्यते जंतुर्जन्मसंसारबन्धनात् ॥ ८ ॥ यथा शौचं यथा स्नानं यथा सन्ध्या च तर्पणम् ॥ अग्निहोत्रं यथा श्राद्धं तथा वैशाखसत्क्रियाः ॥ ९ ॥ वैशाखे माधवे धर्मानकृत्वा नोर्ध्वगो भवेत् ॥ न वैशाखसमो धर्मो धर्मजातेषु विद्यते ॥ १० ॥

क्तवान् ॥ ४ ॥ व्यवसिता निश्चिता ॥ ५ ॥ वासुदेवकथानामालापे संकीर्तने ॥ ६ ॥ यूने तरुणायापि तुभ्यमिति शेषः । एतेन तारुण्ये धर्मे मतिः प्रायः सुकृतिनामेव जायत इति ध्वनिः ॥ भागवतं भगवद्भक्तम् ॥७॥८॥ यथा शौचमित्यादि वैशाखधर्माणां नित्यत्वं वदति ॥९॥ ऊर्ध्वगः स्वर्गादिलोकगः, धर्मजातेषु धर्मसमूहेषु ॥१०॥

अराजकाः राजशासनविहीनाः प्रजा इव ये बहवो धर्माः सन्ति ते उपद्रवैर्लुप्यन्ति ॥ ११ ॥ पथि मार्गे छायादीनाम् आदिशब्देन अन्नच्छत्रादिसंग्रहः । निर्मितिः
निर्माणम् ॥ १२ ॥ गोतिलयुक्तमधोर्दानम्—मधुशब्दस्य पुंस्त्वमार्षम् । गोरसानां दधिक्षीरतक्रघृतानाम् ॥ १३ ॥ १४ ॥ चूतफलमाम्रफलम् । उर्वारुकरसायनं निम्ब
फलरसायनम् ॥ १५ ॥ चित्राणि नित्यंनित्यं नवनवानि ॥ १६ ॥ करीरकम् उदकुम्भदानं लोके करवा इति प्रसिद्धम् ॥ १७ ॥ १८ ॥ १९ ॥ वृषपत्नीनां धेनू

संत्येव बहवो धर्माः प्रजाश्चाराजका इव ॥ उपद्रवैश्च लुप्यंति नात्र कार्या विचारणा ॥ ११ ॥ सुलभाः सकला धर्माः कर्तुं वैशाखचोदिताः ॥
उदकुम्भं प्रपादानं पथिच्छायादिनिर्मितिः ॥ १२ ॥ उपानत्पादुकादानं छत्रव्यजनयोस्तथा ॥ तिलयुक्तमधोर्दानं गोरसानां श्रमापहम् ॥ १३ ॥
वापीकूपतडागादिकरणं पथिकाश्रयम् ॥ नारिकेलेक्षुकर्पूरकस्तूरीदानमेव च ॥१४॥ गन्धानुलेपनं शय्याखट्वादानं तथैव च ॥ तथा चूतफलं रम्य
मुर्वारुकरसायनम् ॥ १५ ॥ दानं दमनपुष्पाणां तथा सायं गुडोदकम् ॥ चित्राण्यन्नानि पूर्णायां दध्यन्नं प्रत्यहं तथा ॥ १६ ॥ तांबूलस्य सदा
दानं चैत्रदर्शे करीरकम् ॥ रवावनुदिते सूर्ये प्रातः स्नानं दिनेदिने ॥ १७ ॥ मधुसूदनपूजा च कथायाः श्रवणं तथा ॥ अभ्यंगवर्जने चैव तथा वै
पत्रभोजनम् ॥१८॥ मध्येमध्ये श्रमार्तानां वीजनं व्यजनेन च ॥ सुगंधैः कोमलैः पुष्पैः प्रत्यहं पूजनं हरेः ॥१९॥ फलं दध्यन्ननैवेद्यं धूपदीपौ
दिनेदिने ॥ गोग्रासं वृषपत्नीनां द्विजपादावनेजनम् ॥ २० ॥ गुडनागरदानं च धात्रीपिष्टप्रदापनम् ॥ पथिकानां प्रश्रयं च दानं तन्दुल
शाकयोः ॥ एते धर्माः प्रशस्ता हि वैशाखे माधवप्रिये ॥ २१ ॥ तथा च विष्णोः कुसुमार्पणं हरेः पूजा च कालोचितपल्लवाद्यैः ॥ दध्यन्ननैवे
द्यनिवेदनं च समस्तपापौघविनाशहेतुः ॥ २२ ॥ नारी पुष्पैर्माधवं नार्चयेद्या कालोत्पन्नैर्मन्दिरे वा गृहे वा ॥ पुत्रं सौख्यं क्वाऽपि नाप्नोति हंति
चायुर्भर्तुः स्वात्मनो वा महात्मन् ॥ २३ ॥ रमासहाये माधवे मासि विष्णौ परीक्षायै धर्मसेतोः प्रजानाम् ॥ गृहं याते मुनिभिर्दैवतैश्च काले
पुष्पैर्नार्चयेद्यस्तु मूढः ॥ २४ ॥ स मूढात्मा रौरवं प्राप्य पश्चाद्यायाद्योनिं राक्षसीं पञ्चवारम् ॥ जलं चान्नं सर्वदा देयमस्मिन्क्षुधार्तानां प्राणिनां
प्राणहेतुः ॥ २५ ॥ तिर्यग्जंतुर्जायते वार्यदानादन्नादानाज्जायते वै पिशाचः ॥ अन्नादाने चानुभूतां कथां ते ह्यहं वक्ष्ये चाद्भुतां भूमिपाल ॥२६॥

नाम् ॥ २० ॥ गुडनागरदानं गुडमिश्रशुण्ठीप्रदानम्; धात्रीपिष्टम् आमलकीचूर्णम् ॥ २१ ॥ कालोचितपल्लवाद्यैः वसन्तकालोत्पन्नपत्रपुष्पफलादिभिः ॥ २२ ॥ या
च नारी माधवं श्रीकृष्णं पुष्पैर्नार्चयेदित्याद्यभिसन्धिः ॥ २३ ॥ मुनिभिर्दैवतैश्च सह धर्मसेतोः परीक्षार्थं रमासहाये विष्णौ गृहं समायाते इत्यभिसंधिः ॥ २४ ॥ प्राणहेतु
जीवनस्य साधनमिति जलान्नयोर्विशेषणम् ॥ २५ ॥ वार्यदानाज्जलादानात्, अन्नादाने जायमानां मया अनुभूताम् इति सत्यतानिर्बंधनम् ॥ २६ ॥

रेवातीरे नर्मदातीरे स्वं मांसमश्नातीति तथा नष्टं चैतन्यं चलनवलनादिसामर्थ्यं यस्य सः ॥२७॥ कर्मणा दैवयोगेन यस्य क्षुधा तृषा च बह्वीत्यभिसंधिः, प्राणपर्यंतं प्राणस्यापि ॥२८॥ जलं दृष्ट्वा दृष्टिमात्रेणैव कालकूटविषसदृशं भवति ॥ २९ ॥ त्रुट्वात्रुट्वा त्रोटयित्वात्रोटयित्वा, क्षुधातृषाभ्यां व्यथितं पीडितम् ॥ ३० ॥ स राक्षसो मां हन्तुं प्राद्रवत्, मम तेजसा निहतः कृतप्रतीकारो दुद्रुवे पलायांचकार, कृपया क्लिन्नमार्द्रीभूतं चेतो यस्य सः । मे मया तृतीयार्थे षष्ठी ॥ ३१ ॥ कृच्छ्रात्कष्टात्, मा विषीद मा

रेवातीरे मत्पिताऽभूत्पिशाचः स्वमांसाशी क्षुत्तृषाश्रांतगात्रः ॥ छायाहीने शाल्मलीवृक्षमूले ह्यन्नाभावान्नष्टचैतन्य एषः ॥ २७ ॥ क्षुधा तृषा
कर्मणा यस्य बह्वी सूक्ष्मं छिद्रं कण्ठनालस्य चाऽऽसीत् ॥ मांसं चान्तःकण्ठमध्ये निषण्णं कुर्यात्पीडां प्राणपर्यन्तमेव ॥ २८ ॥ जलं दृष्ट्वा
कालकूटप्रकल्पं कौप्यं शीतं वाऽपि कासारसंस्थम् ॥ तस्यास्तीरे चागतं दैवयोगाद्गङ्गायात्राकारणान्मार्गमध्ये ॥ २९ ॥ दृष्ट्वाऽद्भुतं शाल्मली
वृक्षमूले त्रुट्वा त्रुट्वा भक्षयन्तं स्वमांसम् ॥ क्रोशन्तं तं बहुधा शोचमानं क्षुधातृषाव्याधितं कर्मभिःस्वैः ॥ ३० ॥ स मां हन्तुं प्राद्रवत्पापकर्मा
मत्तेजसा निहतो दुद्रुवे च ॥ तं चाऽब्रवं कृपया क्लिन्नचित्तो मा भैष्ट त्वं ह्यभयं मे हि दत्तम् ॥ ३१ ॥ कस्त्वं तात ब्रूहि सद्योऽत्र हेतुं कृच्छ्राद
स्मान्मोचये मा विषीद ॥ इत्युक्तो मां प्राह पुत्रं त्वजानन्पुरानर्ते भूवराख्ये पुरे च ॥ ३२ ॥ नाम्ना मैत्रः सांकृतेर्गोत्रजोऽहं तपोविद्यादानयज्ञादि
निष्ठः ॥ मयाऽधीताध्यापिताः सर्वविद्याः कृतो मया सर्वतीर्थाऽवगाहः ॥ ३३ ॥ दत्तं नाऽन्नं मासि वैशाखसंज्ञे लोभाद्भिक्षामात्रमप्येव काले ॥
शोचे चाऽहं प्राप्य पैशाचयोनिं नाऽन्यो हेतुः सत्यमेवोक्तमङ्ग ॥ ३४ ॥ पुत्रोऽधुना वर्तते मद्गृहे च भूरिख्यातिः श्रुतदेवाऽभिधानः ॥ वाच्या
तस्मै मद्दशा चाऽऽत्मजाय वैशाखान्नादानतोऽभूत्पिशाचः ॥ ३५ ॥ दृष्टस्तीरे ते पिता नर्मदाया नोर्ध्वं गतो वर्तते वृक्षमूले ॥ खादन्मांसं स्वीय
मेवाऽन्वखिद्यत्पितुर्मुक्त्यै मासि वैशाखसंज्ञे ॥ ३६ ॥ प्रातः स्नात्वा पूजयित्वा च विष्णुं निर्व्याजान्मां तर्पयित्वा जलैश्च ॥ देयं चाऽन्नं द्विज
वर्ये गुणाढ्ये मुक्तो यो वै याति विष्णोः पदं च ॥३७॥ इत्थं चोक्तं त्वत्पुरस्ताद्वदेति दया चैषा मत्कृते नाऽत्र शंका ॥ भद्रं भूयात्सर्वतो मंगलं
ते श्रुत्वा चाऽहं भाषितं मे पितुश्च ॥ ३८ ॥

खेदं प्राप्नुहि, पुरानर्ताख्ये देशे भूवराख्ये नगरे ॥३२॥३३॥ अङ्ग हे श्रुतदेव ॥३४॥ वैशाखे अन्नस्याप्रदानात् ॥ ३५ ॥ अन्वखिद्यत् मांसं खादित्वा पश्चात्खेदं प्राप्त वान् ॥ ३६ ॥ निर्व्याजादकपटेन, अनेन सुकर्मणाऽहमेव मोक्ष्ये इति न, अपि तु त्वमपि मोक्ष्यस इत्याह—मुक्तो यो वै इति ॥ ३७ ॥ मत्कृते मदर्थम्, दया कर्तव्येति

शेषः । अहं श्रुतदेवः ॥ ३८ ॥ कायं देहं दण्डवत्पातयित्वा साष्टांगं प्रणिपत्येत्यर्थः । निंदन्निंदन् सन् स्वयमेवात्मानं निंदन्, अहं ते तव पुत्रः दैवेन इहाऽऽगतः ॥ ३९ ॥
भूसुराणां ब्राह्मणानाम्, विनिंद्यः कर्मभ्रष्टश्चाऽहमस्मि यतः पितॄणां क्लेशमोक्षो नाऽभूत्, आख्याहि कथय ॥ ४० ॥ प्रीतः सर्वांतरात्मा अन्तःकरणं यस्य सः ॥ ४१ ॥
सान्वयस्य सवंशस्य, पित्रा पिशाचरूपेण, आदिष्टः कृतानुज्ञः, कृतयात्रः कृतगयावर्जनादिः, माधवे वैशाखे, अन्नदानमकरमकरवम् ॥ ४२ ॥ मां प्रति समेत्य

दुःखात्कायं दंडवत्पातयित्वा भृशार्तोऽहं पादयोर्भूरिकालम् ॥ निंदन्निंदन्भूर्यहं बाष्पनेत्रः पुत्रोऽहं ते तात दैवाऽऽगतोऽहम् ॥ ३९ ॥ कर्मभ्रष्टो
भूसुराणां विनिन्द्यो नाऽभूद्यस्मात्क्लेशमोक्षः पितॄणाम् ॥ आख्याहि त्वं कर्मणा केन मुक्तो भविता वै तत्करोमि द्विजेंद्र ॥ ४० ॥ ततः प्राह
प्रीतसर्वान्तरात्मा यात्रां कृत्वा शीघ्रमागत्य गेहम् ॥ प्राप्ते मासे मेषसंस्थे च भानौ निवेद्याऽन्नं विष्णवे त्वं गुणाढ्यम् ॥ ४१ ॥ दानं देहि द्विज
वर्यं महात्मंस्तस्मान्मोक्षो भविता सान्वयस्य ॥ पित्राऽऽदिष्टः कृतयात्रः स्वगेहे प्राप्याऽकरं माधवे चाऽन्नदानम् ॥४२॥ तस्मान्मुक्तो मत्पिता
मां समेत्य यानारूढो ह्यभिनंद्याऽऽशिषा च ॥ गतो लोकं श्रीपतेर्दुर्विभाव्यं यस्मिन्गता न निवर्तंति भूयः ॥४३॥ तस्माद्दानं सर्वशास्त्रेषु चोक्तं
तुभ्यं प्रोक्तं धर्मसारं सुधर्म्यम् ॥ किमन्यत्ते श्रोतुमिच्छा वदस्व श्रुत्वा सर्वं ते वदामीति सत्यम् ॥ ४४ ॥ इति श्रीस्कांदे महापुराण एकाशीति
साहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे पिशाचमोक्षप्राप्तिर्नाम सप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥
॥ ॥ मैथिल उवाच ॥ ॥ ब्रह्मन्निक्ष्वाकुतनयो जलाऽदानाच्च चातकः ॥ त्रिवारमभवत्पश्चान्मद्गृहे गोधिका तथा ॥ १ ॥ कर्मानुगुणमेतद्धि
युक्तं तस्याकृतात्मनः ॥ सतामसेवनात्तस्य गृध्रत्वं सारमेयता ॥ २ ॥ सप्तवारमिति प्रोक्तं तन्मे भाति च नोचितम् ॥ संतो न दूषितास्तेन न
तथा कृपणा अपि ॥ ३ ॥ तस्मादसेविनस्तस्य फलाऽभावो भवेद्ध्रुवम् ॥ नानर्थकरणाभावादिदं हि परपीडनम् ॥ ४ ॥

यानाऽऽरूढो विमानाऽऽरूढः श्रीपतेर्लोकं वैकुण्ठम् ॥ ४३ ॥ सुधर्म्यं सुष्ठुधर्मादनपेतम् ॥ ४४ ॥ इति वैशाखमासमाहात्म्यटीकायां सप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥
इक्ष्वाकुतनयः काकुत्स्थः ॥ १ ॥ अकृतात्मनः सम्यगसम्पादितपुण्यकर्मणः, सारमेयता श्वानयोनिः ॥ २ ॥ सप्तवारमिति । यत्त्वया सप्तवारमेवमभूदिति प्रोक्तं तन्म
उचितं विश्वसनीयं न भाति, यतः—तेन काकुत्स्थेन, सन्तः साधवो न दूषिताः तथा कृपणा अपि न दूषिताः ॥ ३ ॥ अनर्थानां करणस्याऽभावात्परपीडनं न भवति,

अनेन तन्त्र कृतमिति ध्वनिः ॥ ४ ॥ आत्मप्रियस्य तव प्रियस्य ममेत्यर्थः ॥ ५ ॥ व्याहर्तुं वक्तुम् ॥ ६ ॥ शिवायै पार्वत्यै ॥ ७ ॥ स्थितिं रक्षाम्, आमुष्मिकीं पारलौकिकीम्, ऐहिकीमेतल्लोकसंबंधिनीम्, पर्यकल्पयत् कृतवान् ॥ ८ ॥ ९ ॥ श्रुतौ वेदे त्रय एव पूर्वश्लोकोक्तास्त्रयो हेतवः जलसेवाऽऽन्नसेवौषधसेवारूपास्त्रयो हेतवः, ऐहिकस्थितावपि भवंति ॥ १० ॥ तथा पारलौकिकस्थितावपि साधुसेवा, विष्णुसेवा, धर्मपथस्य धर्ममार्गस्य सेवा, एते हेतवो भवन्ति ॥ ११ ॥ पाथेयं मार्गनिर्वाहार्थमन्नं

अनिमित्तमिदं कस्मात्कुयोनित्वमवाप्तवान् ॥ तदेतं संशयं छिंधि शिष्यस्याऽऽत्मप्रियस्य च ॥ ५ ॥ इति राज्ञा सुसंपृष्टः श्रुतदेवो महायशाः ॥ साधुसाध्विति संभाष्य वचो व्याहर्तुमाददधे ॥ ६ ॥ ॥ श्रुतदेव उवाच ॥ ॥ शृणु राजन्प्रवक्ष्यामि यत्पृष्टं तु त्वयाऽनघ ॥ शिवायै च शिवेनोक्तं कैलासशिखरेऽमले ॥ ७ ॥ सृष्ट्वेमान्सकलाँल्लोकान्पश्चात्तेषामवस्थितिम् ॥ आमुष्मिकीमैहिकीं च द्विविधां पर्यकल्पयत् ॥ ८ ॥ हेतुत्रयं च प्रत्येकं हेतुस्थित्यै महाप्रभुः ॥ जलसेवा चान्नसेवा सेवा चैवौषधस्य च ॥ ९ ॥ यत्र चैते महाभाग ह्यैहिकस्थितिहेतवः ॥ एवमामुष्मिके राजंस्त्रय एवेरिताः श्रुतौ ॥ १० ॥ साधुसेवा विष्णुसेवा सेवा धर्मपथस्य च ॥ पुरा संम्पादिता ह्येते परलोकस्य हेतवः ॥ ११ ॥ गृहे संपादितं यद्वत्पाथेयं पद्धतौ यथा ॥ ऐहिका हेतवो राजन्सद्यः सपादितार्थदाः ॥ १२ ॥ किं चेष्टमपि साधूनां मनसो यदि दुस्सहम् ॥ कुतश्चित्कारणाद्राजंस्तच्चानर्थाय कल्पते ॥ १३ ॥ अप्रियं किमु वक्तव्यं दुःखहेतुरिति स्फुटम् ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥१४॥ पापघ्नं महदाश्चर्यं शृण्वतां रोमहर्षणम् ॥ यज्ञदीक्षामुपगतः पुरा दक्षः प्रजापतिः ॥ १५ ॥ आह्वानार्थं भूतपतेरगमद्रजताचलम् ॥ तं दृष्ट्वा नोत्थितः शंभुस्तस्यैव हितकाम्यया ॥ १६ ॥ सर्वामरगुरुश्चाऽहं छन्दोगम्यः सनातनः ॥ भृत्या ह्येते बलिहराश्चन्द्रेन्द्राद्याः सुरेश्वराः ॥ १७ ॥ स्वामी भृत्याय नोत्तिष्ठेत्स्वभार्यायै पतिस्तथा ॥ गुरुः शिष्याय नोत्तिष्ठेदिति शास्त्रविदां मतम् ॥१८॥ न संबन्धो गुरुत्वे च कारणं त्विति वै श्रुतिः ॥ बलं ज्ञानं तपः शांतिर्यत्र चैवाऽधिकं भवेत् ॥ १९ ॥

पद्धतौ मार्गे, सम्पादितार्थदा आचारितार्थदाः ॥ १२ ॥ १३ ॥ १४ ॥ रोमहर्षणं यस्य श्रवणे नाङ्गे पुलका उद्भवंति, यज्ञदीक्षामुपगतः यज्ञे दीक्षितः ॥ १५ ॥ भूतपतेः शंकरस्य, रजताचलं कैलासम् ॥१६॥ छन्दोगम्यः वेदेऽपि यस्य कथाऽस्ति एवंरूपः, बलिहराः करप्रदातारः ॥१७॥ प्रासंगिकं धर्मं वदति—स्वामीति ॥१८॥१९॥

नीचा अधमाः प्रेष्यतां दास्यम् ईयुः प्राप्नुयुः, आग्रहादतिशयप्रीत्या ॥ २० ॥ २१ ॥ मृडं शिवं, प्रजापतिर्दक्षः ॥ २२ ॥ अकृतात्मनः अशिक्षितस्य ॥ २३ ॥
बहुवयाः वृद्धः, चर्मावशेषितः अस्थिपंजरो वृषः, इत्थं यस्य वित्तम् ऐश्वर्यमिति पाखंडानां गोचरो दृश्यः, न तु सरलबुद्धीनाम् ॥ २४ ॥ वृथाऽहंकारिणः अस्य
शिवस्य, दैवं भागधेयम्, मंगलं कुतो दास्यति ॥ २५ ॥ गजाजिनं गजचर्म ॥ २६ ॥ वृकाद्वृकसदृशात्, तस्माज्ज्ञानं धीरता च पलायिते ॥ २७ ॥ साधुसंमतः सज्जन

स गुरुश्चेतरेषां च नीचा ईयुश्च प्रेष्यताम् ॥ उत्तिष्ठन्ति च स्वाम्याद्या भृत्यादीन्यदि चाऽऽग्रहात् ॥ २० ॥ आयुर्वित्तं यशस्तेषां सद्यो नश्यति
सन्ततिः ॥ तस्मादहं तु नोत्तिष्ठे प्रियोऽयं श्वशुरो मम ॥ २१ ॥ इति तस्य हितान्वेषी नोच्चचालाऽऽसनाद्विभुः ॥ नोत्थितं तु मृडं दृष्ट्वा
कुपितोऽभूत्प्रजापतिः ॥ २२ ॥ अनिंदद्बहुधा तस्मै पुरतो गिरिजापतेः ॥ अहो दर्पमहो दर्पं दरिद्रस्याऽकृतात्मनः ॥ २३ ॥ यस्य वित्तं बहुवया
वृषश्चर्मावशेषितः ॥ अत एव कपालास्थिधरः पाखण्डगोचरः ॥ २४ ॥ वृथाऽहंकारिणो दैवं कुतो दास्यति मंगलम् ॥ लोके कृत्येन कर्माणि
शुचीनीति विदो विदुः ॥ २५ ॥ धत्ते दरिद्रः शीतार्तः पवित्रं च गजाजिनम् ॥ वेश्म श्मशानं यस्य स्याद्भुजंगः किल भूषणम् ॥ २६ ॥
न धीरताऽपि च ज्ञानं वृकात्तस्मात्पलायिते ॥ भूतप्रेतपिशाचादि दुर्जनैः संगतोऽनिशम् ॥ २७ ॥ न कुलं श्रूयते क्वाऽपि नाऽसौ वै साधुस
म्मतः ॥ वृथा विश्रंभितः पूर्वं नारदेन दुरात्मना ॥ २८ ॥ येनाऽहं बोधितः प्रादां कन्यां चैतां सतीं मम ॥ पृथग्धर्मगता चैषा सुखं वसतु तद्गृहे
॥ २९ ॥ नास्माभिः श्लाघनीयोऽसौ मत्सुताऽपि कथंचन ॥ यथा कुलालकलशश्चंडालस्य वशं गतः ॥ ३० ॥ इति दक्षो विमूढात्मा ह्युमां
नाहूय तं मृडम्॥ बहुधा तं विनिर्भर्त्स्य तूष्णीमेव गृहं ययौ ॥ ३१ ॥ यज्ञवाटं ततो गत्वा ऋत्विग्भिर्मुनिभिः सह ॥ ईजे यज्ञविधानेन निंदन्नेव
महाप्रभुम् ॥ ३२ ॥ ब्रह्मविष्णू विहायैव सर्वे देवाः समागताः ॥ सिद्धचारणगन्धर्वा यक्षराक्षसकिन्नराः ॥ ३३ ॥ तदा देवी सती पुण्या स्त्रीचाञ्च
ल्यात्प्रलोभिता ॥ उत्सुका चोत्सवं द्रष्टुं बन्धूंस्तत्र समागतान् ॥ ३४ ॥ निवार्यमाणा रुद्रेण तरला स्त्रीस्वभावतः ॥ प्रत्युक्ताऽपि पुनश्चैव
गन्तव्यमिति निश्चिता ॥ ३५ ॥

मान्यः, दुरात्मना दुष्टेन नारदेन, वृथा व्यर्थं, विश्रम्भितः विश्वासपात्रीकृतः ॥ २८ ॥ पृथग्धर्मगता अन्यधर्मानुचारिणी, सुखं सुखेन, तद्गृहे वसतु ॥ २९ ॥ ३० ॥
नाहूयाऽऽह्वानमकृत्वा, विनिर्भर्त्स्य विनिन्द्य ॥ ३१ ॥ महाप्रभुं शंकरम् ॥ ३२ ॥ ३३ ॥ स्त्रीचांचल्यात्स्त्रीनिष्ठचंचलतास्वभावात्, प्रलोभिता लुब्धा ॥ ३४ ॥
प्रत्युक्ता निषिद्धा ॥ ३५ ॥

स निन्दति सभामध्ये सदा मां वरवर्णिनि ॥ तच्चासह्यं च त्वं श्रुत्वा कायं सत्यं प्रहास्यसि ॥ ३६ ॥ असह्यमपि सोढव्यं मयाऽपि गृहमिच्छता ॥ मया यथा कृतं देवि तथा त्वं नैव वर्तसे ॥३७॥ तस्मान्मा गच्छ शालां वै न शुभं तु भवेद्ध्रुवम् ॥ इत्येवं बोधिता देवी चापल्यं पुनरागमत् ॥ ३८ ॥ निश्चक्राम सती गेहादेकाकी पादचारिणी ॥ तां दृष्ट्वा वृषभस्तूष्णीं पृष्ठे देवीमुवाह सः ॥ ३९ ॥ कोटिशो भूतसंघाश्च ह्यनुजग्मुः सतीं तदा ॥ यज्ञवाटं तु सा गत्वा पत्नीशालां ययौ पुरा ॥ ४० ॥ तूष्णीमास सतीं दृष्ट्वा खेदात्तस्माद्विनिर्गता ॥ पतिवाक्यं तु संस्मृत्य जगामोत्तरवेदिकाम् ॥ ४१ ॥ पिता सभ्याश्च तां दृष्ट्वा स्थितास्तूष्णीं हताशिषः ॥ सा रुद्राहुतिपर्यंतं पश्यन्ती पितृचेष्टितम् ॥ त्यक्त्वा रुद्रं च जुह्वंतमुवाचाऽश्रुकुलेक्षणा ॥ ४२ ॥ ॥ देव्युवाच ॥ ॥ महदुल्लंघनं पुंसां न प्रायः श्रेयसे भवेत् ॥ लोककर्ता लोकभर्ता सर्वेषां प्रभुरव्ययः ॥ ४३ ॥ एवंभूतस्य रुद्रस्य कथं नो दीयते हविः ॥ जातां न किं ते दुर्बुद्धिं हरंत्यन्ये समागताः ॥ ४४ ॥ न चेदृशा महात्मानः किमेषां विमुखो विधिः ॥ ४५ ॥ इत्येवं भाषमाणां तां पूषा देवो जहास ह ॥ श्मश्रूणां चालनं चक्रे भृगुर्हतशुभस्तथा ॥ ४६ ॥ भुजपादोरुकक्षाणां स्फालनं चक्रिरे परे ॥ बहुधा निन्दनं चक्रे तत्पिता हतभाग्यवान् ॥ ४७ ॥ तच्छ्रुत्वा रुद्रभार्या सा कोपाकुलितमानसा ॥ प्रायश्चित्तं श्रुतेः कर्तुं देहं तत्याज सा सती ॥ होमाग्नौ वेदिकामध्ये सर्वेषामेव पश्यताम् ॥ ४८ ॥ हाहाकारो महानासीद्दुद्रुवुः प्रमथा द्रुतम् ॥ आचख्युर्देवदेवाय वृत्तान्तमखिलं तदा ॥ ४९ ॥ तच्छ्रुत्वा सहसोत्थाय रुद्रः कालांतकोपमः ॥ जटामुत्पाट्य हस्तेन भूतले तामताडयत् ॥ ५० ॥ ततोऽभवन्महाकायो वीरभद्रो महाबलः ॥ सहस्रबाहुरभवत्कालांतकसमप्रभः ॥ ५१ ॥

वरवर्णिनि हे प्रिये असह्यं तद्दुःसहं तं प्रकारं कायं प्रहास्यसि मारिष्यसि ॥ ३६ ॥ ३७ ॥ शालां यज्ञशालाम्, मा गच्छ गमनं मा कुरु ॥ ३८ ॥ सती एकाकी पादचारिणी च भूत्वा गृहान्निश्चक्राम निर्गतवती, तां निर्गच्छन्तीं दृष्ट्वा वृषभः तूष्णीमेव पृष्ठे उवाह ॥ ३९ ॥ ४० ॥ सतीं दृष्ट्वा खेदात्तूष्णीमासन्, सर्वां यज्ञवाटस्थास्तत्सम्बंधिन्यः स्वस्रादय इति शेषः ॥ ४१ ॥ हताशिषः अदत्ताऽऽशीर्वचनाः ॥ रुद्रं त्यक्त्वा रुद्राहुतिं विहाय, जुह्वन्तं पितर दृष्ट्वाऽश्रुभिराकुले ईक्षणे यस्याः सा सती उवाच ॥ ४२ ॥ ४३ ॥ हविर्हविर्भागः ते तव जातां दुर्बुद्धिमन्ये समागता इमे ऋत्विजः न हरंति किम् ॥ ४४ ॥ विधिर्दैवम् ॥ ॥ ४५ ॥ हतशुभः अमंगलः ॥ ४६ ॥ स्फालनं ताडनम्, परे सभासदः, तत्पिता दक्षः ॥ ४७ ॥ श्रुतेः भर्तृनिंदाश्रवणस्य प्रायश्चित्तं कर्तुं देहं होमाग्नौ तत्याज ॥४८॥ दुद्रुवः पलायांचक्रिरे, देवदेवाय महेश्वराय, आचख्युः कथयांबभूवुः ॥ ४९ ॥ तां जटाम् ॥ ५० ॥ ततो जटाताडनात्, कालान्तकसमा प्रभा यस्य सः ॥ ५१ ॥

मत्सृष्टिः ममोत्पादनम्, मा मां नियोजयाऽऽज्ञापय ॥ ५२ ॥ ५३ ॥ हन मारय, मत्प्रिया सती, एतेन वीरभद्रेण सह गच्छन्तु ॥ ५४ ॥ ५५ ॥ जटा
भूर्वीरभद्रः ॥ ५६ ॥ यद्यदंगं पूर्वं येन येन ताडितं तत्तच्चिच्छेद ॥ ५७ ॥ मुनीनां मन्त्रैः प्रगुप्तमभिरक्षितं तद्दक्षशिरः बलादपि न कृन्तति ॥ ५८ ॥ ५९ ॥ ६० ॥

बद्धांजलिपुटो भूत्वा व्याजहार हरं तदा ॥ मत्सृष्टिस्तु यदर्थं ते तदर्थं मा नियोजय ॥ ५२ ॥ इत्युक्तः प्राह तं क्रुद्धो धूर्जटिश्च पुरः स्थितम् ॥
॥५३॥ हन त्वं निन्दकं दक्षं यदर्थे मत्प्रिया हता ॥ भूतसंघास्तु गच्छन्तु सहैतेन महाबलाः ॥ ५४ ॥ इत्यादिष्टा भगवता ययुर्यज्ञसभां तदा ॥
जघ्नुः सर्वान्महावीरान्देवासुरनरादिकान् ॥५५॥ पूष्णश्च हसतो दंतान्जटाभूश्च बभञ्ज ह ॥ श्मश्रूण्युत्पाटयांचक्रे भृगोस्तस्य दुरात्मनः ॥५६॥
यद्यदास्फालितं पूर्वं तत्तच्चिच्छेद वीर्यवान् ॥ ततो दक्षशिरो हर्तुं बहूद्योगं चकार ह ॥ ५७ ॥ मुनिमंत्रप्रगुप्तं तु नैव कृंतति तद्बलात् ॥ हरो
ज्ञात्वा तु चिच्छेद स्वयमेत्य दुरात्मनः ॥ ५८ ॥ एवं मखगतान्हत्वा साऽनुगः स्वालयं ययौ ॥ हतावशिष्टाः केचित्तु ब्रह्माणं शरणं ययुः ॥
॥ ५९ ॥ तैरन्वितो ययौ ब्रह्मा कैलासं तु शिवालयम् ॥ ततो रुद्रं सान्त्वयित्वा वचोभिर्विविधैरपि ॥ ६० ॥ तेनैव सहितः प्रागाद्यज्ञवाटं महा
प्रभुः ॥ तेनैवोज्जीवयामास सर्वान्यज्ञसमागतान् ॥ ६१ ॥ ख्यात्यै प्रादादजमुखं दक्षस्य तु तदा शिवः ॥ अजश्मश्रूण्यदाच्छंभुर्भृगवे तु
महात्मने ॥ ६२ ॥ पूष्णश्च दंतान्न प्रादात्पिष्टादं च चकार ह ॥ तदङ्गानां व्यतिकरं केषांचिदपि वै शिवः ॥ ६३ ॥ शिवमापुश्च ते सर्वे ब्रह्मणा च
शिवेन च ॥ पुनः प्रवर्तितो यज्ञो यथापूर्वं महात्मनः ॥ ६४ ॥ यज्ञान्ते सर्वदेवाश्च जग्मुस्ते स्वंस्वमालयम् ॥ नैष्ठिकं ब्रह्मचर्यं तु कृत्वा रुद्रो
महातपाः ॥ ६५ ॥ तेपे गंगातटे रुद्रः पुन्नागतरुमूलगः ॥ दक्षात्मजा सती देवी त्यक्तदेहा पतिव्रता ॥ ६६ ॥ जज्ञे हिमाद्रेर्मेनक्यां ववृधे तस्य
वेश्मनि ॥ एतस्मिन्नेव काले तु तारकाख्यो महासुरः ॥ ६७ ॥ स तीव्रतपसाऽऽराध्य ब्रह्माणं परमेष्ठिनम् ॥ अवध्यत्वं वरं वव्रे देवासुरनरोरगैः
॥ ६८ ॥ आयुधैरस्त्रसंघैश्च सर्वैरेव महाबलैः ॥ रुद्रपुत्रं विना दैत्य ह्यवध्यः सकलैरपि ॥ ६९ ॥

तेनैव ब्रह्मणैव सह ॥ ६१ ॥ ६२ ॥ दन्तान्विनैव पिष्टभक्षणशक्तिं चकार, व्यतिकरम् अंगवैकल्यं समीचकारेति शेषः ॥ ६३ ॥ शिवं कल्याणम् ॥ ६४ ॥ नैष्ठिकं
तीव्रम् ॥ ६५ ॥ गंगातटे मायापुरीसमीपवर्तिगंगातीरे ॥ ६६ ॥ हिमाद्रेर्हिमालयान्मेनक्यांनाम तत्पत्न्यां जाता सती ववृधे ॥ ६७ ॥ ६८ ॥ रुद्रपुत्रं भविष्यमाणं

स्कन्दम् ॥ ६९ ॥ ७० ॥ लोकबाधनप्रकारमाह—दासा इति । देव्यो देवपत्न्यः ॥ ७१ ॥ वेधा ब्रह्मा ॥ ७२ ॥ तस्मै तारकासुराय ॥ ७३ ॥ सत्रे दक्षयज्ञे, त्यक्त
कलेवरा कृतदेहत्यागा ॥ ७४ ॥ योजयध्वं पार्वत्या सह संयोजनं कुरुत ॥ ७५ ॥ धिषणेन बृहस्पतिना, सम्मन्त्र्य विचारं कृत्वा, पाकशासनः देवेन्द्र इन्द्रः ॥ ७६ ॥
स्मरन् मदनं बलिभिदिंद्रः ॥ ७७ ॥ तद्दक्षयज्ञवृत्तांतम् ॥ ७८ ॥ दशकन्यया दशभिः कन्याभिः सह, वियुक्ता हरेण सह जातविरहा तव कन्या, मृडः शिवश्च, तव

इति तस्मै वरं प्रादाद्ब्रह्मा लोकपितामहः ॥ अस्त्रीकत्वादपुत्रत्वाद्रुद्रस्येति तथास्त्विति ॥ ७० ॥ वरं गृहीत्वा स्वगृहं प्राप्य लोकान्बबाध ह ॥
दासा देवा मार्जनादौ दास्यो देव्यश्च तद्गृहे ॥ ७१ ॥ ततस्तत्पीडिता देवा ब्रह्माणं शरणं ययुः ॥ तैः पीडां वर्णितां श्रुत्वा वेधाः प्राह सुरानि
दम् ॥ ७२ ॥ वरप्रदानकालेऽहं रुद्रपुत्रं विना सुराः ॥ नान्यैर्वध्य इति प्रादां वरं तस्मै दुरात्मने ॥ ७३ ॥ पुरा सती रुद्रपत्नी सत्रे त्यक्तकले
वरा ॥ जाता हिमवतः पुत्री पार्वतीति च यां विदुः ॥७४॥ रुद्रो हिमवतः पृष्ठे तपश्चरति दुश्चरम् ॥ योजयध्वं च पार्वत्या रुद्रं लोकेश्वरं प्रभुम् ॥
॥ ७५ ॥ पुनर्देवेन्द्रसदने संगतैरमरेश्वरैः ॥ धिषणेनाऽपि सम्मंत्र्य देवेंद्रः पाकशासनः ॥ ७६ ॥ सस्मार च स कार्यार्थं नारदं स्मरमेव च ॥
तत्राऽऽगतौ ततस्तौ तु बलभिद्वाक्यमब्रवीत् ॥ ७७ ॥ हिमवन्तं भवान्गत्वा वचसा तं निबोधय ॥ पुत्री तव प्राग्दक्षस्य हरपत्नी सुता सती ॥
॥ ७८ ॥ तपश्चरति ते शृंगे वियुक्ता दशकन्यया ॥ मृडस्तस्य सपर्यायै विनियोजय तत्प्रियाम् ॥ ७९ ॥ तस्यैव पत्नी भविता स एव भविता
पतिः ॥ इत्याऽऽदिष्टो मघोना च नारदोपेत्य तं गिरिम् ॥ ८० ॥ तथैव कारयामास देवेन्द्रेणोदितं यथा ॥ पश्चात्कामं समाहूय मघवानिद
माह च ॥ ८१ ॥ देवानां च हितार्थाय तथा मृडहिताय च ॥ वसन्तेन समायुक्तो गत्वा रुद्रतपोवनम् ॥ ८२ ॥ गुणान्विजृम्भयित्वा तु वासं
तान्हृच्छयावहान् ॥ यदा सन्निहिता देवी पार्वती तु मृडस्य च ॥ ८३ ॥ तदा प्रयुज्य त्वं बाणान्मोहयस्व महाप्रभुम् ॥ तयोस्तु संगमे जाते
कार्यं नोऽद्धा भविष्यति ॥ ८४ ॥ इत्यादिष्टः स्मरस्तूर्णं प्रतस्थे बाढमित्यथ ॥ सवसंतः सरतिकः सानुगस्तद्वनं ययौ ॥ ८५ ॥

शृंगे दुश्चरं तपश्चरतीत्युभयत्राऽपि सम्बध्यते । विनियोजय देहि ॥७९॥ मघोना इन्द्रेण, नारदः उपेत्य संधिरार्षः ॥ ८० ॥ ८१ ॥ ८२ ॥ वासंतान्वसंतर्तुसम्बन्धिनः,
हृच्छ यावहान्मदनोद्दीपकान्गुणान्विजृंभयित्वा प्रकाशयित्वा ॥ ८३ ॥ नोऽस्माकं कार्यम् अद्धा प्रत्यक्षं तदैवेत्यर्थः ॥ ८४ ॥ आदिष्ट आज्ञापितः, स्मरः कामः, बाढमिति

स्वीकारार्थेऽव्ययम्, तूर्णं झटिति, प्रतस्थे सानुगः रंभादिगणसमन्वितः, सद्वनं रुद्रतपोवनम् ॥ ८५ ॥८६॥ स्वाङ्कं समारोप्य पार्वतीमिति शेषः, व्याहर्तुं वक्तुम् ॥८७॥
स मदनः, प्राणप्रियासंगमस्य पार्वतीसमागमस्य, अयं काल इति निश्चितो जातनिश्चयः सन्, पेशलम् अतिचपलम् ॥ ८८ ॥ वृक्षजवनिकाम् आच्छादकं कृत्वा ॥८९॥
कश्मलीकृतं कष्टीकृतम् ॥९०॥ क्रुद्धः ललाटाक्षं भालस्थवह्निनेत्रमुन्मील्य संधिरार्षः, अपास्य त्यक्त्वा ॥९१॥ सशरासनः सधनुष्कः ॥ ९२ ॥ दुद्रुवुः पलायाञ्चक्रिरे

अकाले तु वसंततुं जृंभयित्वा स्वशक्तितः ॥ तद्वने सर्वतो रम्ये मन्दाऽनिलनिषेविते ॥ ८६ ॥ कदाचिद्देवदेवोऽपि पार्वत्याश्च सपर्यया ॥ प्रीतः
स्वाङ्कं समारोप्य किंचिद्व्याहर्तुमारभत् ॥ ८७ ॥ प्राणप्रियासङ्गमस्य कालोऽयमिति निश्चितः ॥ पेशलं धनुरादाय स तस्थौ हरपृष्ठतः ॥
॥ ८८ ॥ कृत्वा जवनिकां वृक्षं बाणमेकं मुमोच ह ॥ द्वितीयमपि संधाय चक्रे मोक्तुं महोद्यमम् ॥ ८९ ॥ अथ क्षुब्धमना भूत्वा मृडश्चिंता
मवाप ह ॥ न मे मनश्चलेत्क्वापि केन वा कश्मलीकृतम् ॥ ९० ॥ इति चिन्ताकुलो वामे पार्श्वे कामं ददर्श ह ॥ क्रुद्धोन्मील्य ललाटाक्षं
स्वाङ्काद्देवीमपास्य च ॥ ९१ ॥ तस्याक्ष्णः समभूदग्निस्तीक्ष्णो लोकविभीषणः ॥ तेन दग्धोऽभवत्सद्यो मन्मथः सशरासनः ॥ ९२ ॥ कार्य
सिद्धिं च पश्यंतो दुद्रुवुश्चामरा दिवम् ॥ शंकमानाः स्वदण्डं च वसन्तो रतिरेव च ॥ ९३ ॥ निमील्य लोचने भीता देवी दूरं प्रदुद्रुवे ॥ सन्नि
धानं स्त्रियो हर्तुं मृडोप्यंतरधीयत ॥ ९४ ॥ रुद्रस्येष्टं प्रकुर्वाणो देवश्च मनसो हितम् ॥ लेभेऽनर्थमनिर्वृत्तं विप्रियं कुर्वतस्तु किम् ॥ ९५ ॥
तस्मादिक्ष्वाकुतनयः साधूनामप्रियः सदा ॥ तस्मादात्महितां सेवां नाऽकरोन्मन्दधीः सताम् ॥ ९६ ॥ अनुभूतं महद्दुःखं तस्माद्दुर्योनिरेव च ॥
तस्मात्कुर्यात्तु साधूनां सेवां सर्वार्थसाधिनीम् ॥ ९७ ॥ रुद्रस्याऽप्रियकारित्वात्स्मरो भाविनि जन्मनि ॥ दुःखं तु बहुलं लेभे जन्मकाले महा
प्रभुः ॥ ९८ ॥ इतिहासमिमं पुण्यं ये शृण्वन्ति दिवानिशम् ॥ जन्ममृत्युजरादिभ्यो मुच्यंते नाऽत्र संशयः ॥ ९९ ॥ इति श्रीस्कांदे महापुराण
एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे दाक्षायण्यपमाने दक्षयज्ञविध्वंसपूर्वकपार्वती
जन्मादिकामदहनवर्णनंनामाष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥

दिवं स्वर्गं, रतिः कामपत्नी ॥ ९३ ॥ देवी पार्वती ॥ ९४ ॥ देव इन्द्रः मनसो हितं हिताय; रुद्रस्य इष्टं प्रियं कुर्वाणः सन्ननर्थं लेभे, तद्विप्रियम् अनिष्टं कुर्वाणः अनर्थं
न लभेत किम् ॥ ९५ ॥ ९६ ॥ ९७ ॥ अप्रियकारित्वादनिष्टकरणात्, भाविनि भविष्यमाणे ॥ ९८ ॥ ९९ ॥ इति वैशाखमासमाहात्म्यटीकायामष्टमोऽध्यायः ॥८॥

कस्मात्पुरुषात्, तस्मिन् जन्मनि, कर्मणः सह लंघनात् रुद्रदेवापकारकरणात् ॥ १ ॥ कुमारजन्म स्कंदजन्म ॥ २ ॥ तत्पत्नी कामपत्नी ॥ ३ ॥
भस्मावशेषितं पतिं पुरतो दृष्ट्वा मुमोह मुमूर्च्छ मुहूर्तेन घटिद्वयावच्छिन्नसमयेन, सजातसंज्ञा लब्धचेतना, चित्रधा अनेकप्रकारेण, विललाप विलापं कृतवती ॥४॥तच्चिताग्नौ
कामचिताग्नौ त्यक्तुकामा मोक्तुकामा; माधवं वसंतम् ॥ ५ ॥ तात्कालिकीं चिताविरचनादिरूपां क्रियां कर्त्तुं सस्मार स्मृतवती, वीरपत्न्याः वीरस्य मदनस्य पत्न्याः रत्याः

॥ ॥ मैथिल उवाच ॥ ॥ तस्य दग्धस्य कामस्य कस्माज्जन्माऽभवद्विभो ॥ किं दुःखमभवत्तस्मिन्कर्मणः सह लंघनात् ॥ १ ॥ एतदाचक्ष्व
मे ब्रह्मञ्च्छ्रोतुं कौतूहलं हि मे ॥ ॥ श्रुतदेव उवाच ॥ ॥ कुमारजन्म वक्ष्यामि श्रवणात्पापनाशनम् ॥ २ ॥ यशस्यं पुत्रदं धर्म्यं सर्वरोगविनाशनम्
॥ शंभुना तु हते कामे तत्पत्नी रतिसंज्ञिका ॥३॥ मुमोह पुरतो दृष्ट्वा पतिं भस्मावशेषितम् ॥ जातसंज्ञा मुहूर्तेन विललाप च चित्रधा
॥ ४ ॥ यद्विलापाद्वनं चापि समदुःखमभूत्तदा ॥ तच्चिताग्नौ स्वकायं तु त्यक्तुकामा च माधवम् ॥ ५ ॥ पत्युः सखायं सस्मार कर्तुं तात्कालिकीं
क्रियाम् ॥ स आगतश्चितिं कर्त्तुं वीरपत्न्या महाप्रभुः ॥ ६ ॥ स तु त्रस्तः सखीं दृष्ट्वा क्षणं मूर्च्छापरोऽभवत् ॥ रतिं तु सान्त्वयामास
सान्त्वैर्बहुविधैरपि ॥ ७ ॥ पुत्रतुल्योऽस्मि ते भद्रे स्थिते मयि च नाऽर्हसि ॥ कायं त्यक्तुं धर्महेतुमित्याद्यैर्बहुधाऽपि सा ॥ ८ ॥ नैव स्थातुं
मनश्चक्रे तेन संस्तम्भिता रतिः ॥ दृष्ट्वा दार्ढ्यं वसन्तोऽपि चितिं चक्रे सरित्तटे ॥ ९ ॥ साऽवगाह्य द्युनद्यां च कृत्वा कार्याणि सर्वशः ॥
सन्नियम्येन्द्रियग्रामं निवेश्यात्मनि वै मनः ॥ १० ॥ चितिमारोढुमारेभे ततो जाताऽशरीरवाक् ॥ मा प्रवेशय कल्याणि वह्निं पतिपरायण। ॥
॥ ११ ॥ भविष्यति च ते पत्युर्हराद्विष्णोश्च यादवात् ॥ जन्मद्वयं क्रमेणैव तत्र चोत्तरजन्मनि ॥ १२ ॥ भैष्म्यां कृष्णान्महाविष्णोः प्रद्युम्नाख्यो
भविष्यति ॥ वसिष्यसि त्वं च शापाद्ब्रह्मणः शंबरालये ॥ १३ ॥ प्रद्युम्नाख्येन ते पत्या संगतिश्च भविष्यति ॥ इत्युक्त्वा विरराामाऽथ वाणी
चाऽऽकाशगोचरा ॥ १४ ॥ श्रुत्वा तां तु निवृत्ताऽभून्मरणे कृतनिश्चया ॥ ततो देवाः समाजग्मुः स्वार्थे कामे हते हरात् ॥ १५ ॥

॥ ६ ॥ त्रस्तः खिन्नः, सांत्वैः शांतिवचनैः ॥ ७ ॥ धर्महेतुं धर्मकारणीभूतम् ॥ ८ ॥ संस्तम्भिता कृतप्रतिरोधा ॥ ९ ॥ द्युनद्यां भागीरथ्याम्, अवगाह्य स्नानं कृत्वा,
कार्याणि शवपिंडप्रदानादीनि ॥ १० ॥ अशरीरवाक् आकाशवाणी ॥ ११ ॥ हरात् शंकरात्, यादवात् यादवरूपधारिणो विष्णोश्च सकाशात्ते पत्युर्जन्मद्वयं भविष्यति
॥ १२ ॥ भैष्म्यां रुक्मिण्याम्, त्वं च ब्रह्मणः शापाच्छम्बराऽऽलये वसिष्यसि ॥ १३ ॥ १४ ॥ मरणे कृतनिश्चया रतिः ताम् आकाशवाणीं श्रुत्वा निवृत्ताऽभूत्,

स्वार्थे स्वकार्याय, कामे हते मृते सति हरात्सकाशात् समाजग्मुः, स्वं स्वमालयमिति शेषः॥ १५ ॥१६॥ अनंगोऽपि भस्मीभूतांगोऽपि ॥ १७ ॥ रतिदोषमाविष्कुर्वंति—पूर्वकल्प इति ॥ १८ ॥ निष्कृतिं प्रायश्चित्तम् ॥ १९ ॥ २० ॥ उपलब्धिः प्राप्तिः, भविता भविष्यति ॥ २१ ॥ २२ ॥ दिवाकरे सूर्ये, मेषसंस्थे वैशाखमासे ॥ ॥ २३ ॥ अवार्यवीर्यवान् अनुल्लंघ्यपराक्रमः ॥ २४ ॥ कामदोषमाविष्करोति—पूर्वकल्प इति । तेन कारणेन ॥ २५ ॥ प्रपेदे प्राप, परमात्मनः पुत्रोऽपि इत्यनेन वैशाख

रत्या कृतं प्रपश्यन्तो गुर्विन्द्राग्निपुरोगमाः ॥ तां ते निवर्तयामासुर्वरेण महता सतीम् ॥ १६ ॥ अनंगोऽपि भवेत्साऽङ्गो मृत एवाऽक्षिगो
भवेत् ॥ इति तां तु विनिर्वर्त्य धर्मं चोपदिदेशिरे ॥ १७ ॥ पूर्वकल्पे त्वयं राजा सुंदराख्यो महाप्रभुः ॥ त्वमेव पत्नी तत्राऽपि रजःसंकर
कारिणी ॥ १८॥ तेनेयञ्च दशाभूत्ते कुर्विदानीं च निष्कृतीम् ॥ मंदाकिन्यां तु वैशाखे प्रातःस्नानं तदा कुरु ॥ १९ ॥ मधुसूदनमभ्यर्च्य
कथां दिव्यां तथा शृणु ॥ अशून्यशयनंनाम व्रतमारभ भामिनि ॥ २० ॥ धर्मेणाऽनेन ते भद्रे व्रतेनाऽपि च माधवे ॥ नूनं ते भविता
पत्युरुपलब्धिर्न संशयः ॥ २१ ॥ इति तस्यै वरं दत्त्वा देवा जग्मुर्यथाऽऽगताः ॥ तथा कृच्छ्रान्निवृत्ता सा देवी कामसती तथा ॥ २२ ॥
गंगाऽवगाहनं चक्रे मेषसंस्थे दिवाकरे ॥ अशून्यशयनंनाम व्रतं चाऽपि महामनाः ॥ २३ ॥ तेन पुण्यप्रभावेन सद्यः कामोऽक्षिगोचरः ॥
अभूत्तस्यै महाराज लोके चावार्यवीर्यवान् ॥ २४ ॥ पूर्वकल्पेऽप्ययमपि राजा धर्मपरायणः ॥ वैशाखोक्तान्महाधर्मान्नाकरोत्तेन वै स्मरः॥२५॥
देहहानिं प्रपेदेऽसौ पुत्रोऽपि परमात्मनः ॥ वृथा नीते तु वैशाखे मेषसंस्थे दिवाकरे ॥ २६ ॥ अवस्थेयं च देवानां मनुष्याणां तु का कथा ॥
त्र्यंबकेंऽतर्हिते पश्चान्निराशा गिरिकन्यका ॥ २७ ॥ तूष्णीं स्थितां तदा भ्रांतां तां दृष्ट्वा हिमवान्गिरिः ॥ चकितः स्वगृहं निन्ये दोर्भ्यां तां
परिरभ्य च ॥ २८ ॥ रूपौदार्यगुणान्दृष्ट्वा हरस्यैव महात्मनः ॥ स एव मे पतिर्भूयादिति तन्निष्ठमानसा ॥ २९ ॥ गंगोपकूलमापेदे तपस्तप्तुं
धृतव्रता ॥ निवारिताऽपि सा देवी पित्रा मात्रा स्वकैर्जनैः ॥ ३० ॥ अर्चयन्ती महालिंगं निराहारा जटाधरा ॥ दिव्यवर्षसहस्रान्ते
प्रत्यक्षोऽभून्महेश्वरः ॥ ३१ ॥

धर्माणामत्याधिक्यं प्रदर्शितम् ॥ २६ ॥ गिरिकन्यका पार्वती, निराशा हतेच्छा ॥ २७ ॥ दोर्भ्यां बाहुभ्यां, परिरभ्याऽऽलिंग्य ॥ २८ ॥ तन्निष्ठमानसा शिवनिमग्नांतःकरणा ॥ २९ ॥ गंगाया उपकूलं तीरसमीपे, धृतव्रता कृतव्रतनिश्चया, पित्रा हिमालयेन, निवारिताऽपि पार्वती तपस्तप्तुम् आपेदे प्राप ॥ ३० ॥ जटाधरा अनेन

तापसी वृत्तिरुदीरिता, न तु अव्रतावत्केशसंस्कारोपभोगवती । महालिंगम् अर्चयन्ती पूजयन्ती, आसीदिति शेषः । उत्तरार्द्धे च तत इति शेषः ॥ ३१ ॥ वर्णी ब्रह्मचारी, पर्णशालामुखे गत्वेति शेषः । विभुः शम्भुः, पार्वत्या इति शेषः । तस्मिन्नात्मनि शिव एवेत्यर्थः । निष्ठा एकांतस्थितिर्यस्य तच्च तन्मनश्च दाढर्य दृढतां नानाविधैरपि व्यस्ताप व्यस्तैरपि वाक्यैर्ज्ञात्वा ॥ ३२ ॥ वरानना पार्वती रुद्रं प्रति त्वं पतिर्भव इति वरं वव्रे ॥ ३३ ॥ ३४ ॥ कन्यां प्रष्टुं कन्या कस्मै दीयते इति विचारयितुम् ॥ ३५ ॥

भूत्वा वर्ण्यपि सायाह्ने पर्णशालामुखे विभुः ॥ स्वनिष्ठमनसो दाढर्यं वाक्यैर्नानाविधैरपि ॥ ३२ ॥ ज्ञात्वा वरादरं भद्रे वरयेति महाप्रभुः ॥ सा वव्रेऽथ पतिं रुद्रं त्वं भवेति वरानना ॥३३॥ स तथैव वरं दत्त्वा ऋषीन्सस्मार सप्त च ॥ आजग्मुस्तेऽपि मुनयः स्थिताः प्राञ्जलयः पुरः ॥३४॥ ऋषीणां ज्ञापयामास कन्यां प्रष्टुं हिमालयम् ॥ तथाऽऽदिष्टा भगवता कन्यार्थं हिमवद्गृहम् ॥३५॥ प्रापुर्विहायसा सर्वे द्योतयन्तो दिशो दश ॥ प्रत्युज्जगाम स गिरिः सप्तैतान्ब्रह्मवित्तमान् ॥ ३६ ॥ संपूज्य विधिवत्सर्वान्सुखासीनानपृच्छत ॥ धन्योऽस्मि कृतकृत्योऽस्मि यद्भवंतो गृहाऽऽगताः ॥ ३७ ॥ भवदागमनं मन्ये मम जन्मफलं त्विति ॥ न कृत्यं विद्यतेऽस्माभिः पूर्णार्थानां महात्मनाम् ॥ ३८ ॥ तथाऽपि ब्रूत कार्यं वो यत्कर्तव्यं मयाऽधुना ॥ इत्युक्तास्ते तथा प्रोचुर्हिमवंतं महागिरिम् ॥ ३९ ॥ त्वया स्वसदृशं वाक्यमुक्तं गिरिपते दृढम् ॥ अस्मदागमने हेतुं वक्ष्यामस्ते महोदये ॥ ४० ॥ कन्या ते पार्वतीनाम पूर्वं दक्षात्मजा सती ॥ जाता तव कुमारी या यज्ञे त्यक्तकलेवरा ॥ ४१ ॥ अस्याः पाणिग्रहे दक्षः शंभुर्नाऽन्यो जगत्त्रये ॥ देया सा शंभवे देवी भवताऽऽनंत्यमिच्छता ॥ ४२ ॥ पूर्वजन्मसहस्रेषु भवता सुकृतं कृतम् ॥ इदानीं तव दिष्ट्या तु परिपाकमुपागतम् ॥ ४३ ॥ तेषां तद्वचनं श्रुत्वा संहृष्टाऽऽत्मा महागिरिः ॥ व्याजहार पुनर्वाक्यं पुत्री वल्कलधारिणी ॥ ४४ ॥

विहायसा आकाशमर्गेण, प्रत्युज्जगामाभिमुखं गतवान् ॥ ३६ ॥ ३७ ॥ कृत्यं कर्तव्यं कार्यम् ॥ ३८ ॥ ३९ ॥ ते तव, सदृशं योग्यं, महत्त्वयोग्यमित्यर्थः । ते तव, महोदये महोत्कर्षार्थं, निमित्ते सप्तमी ॥ ४०॥४१॥ अस्यास्तव कन्यायाः, दक्षः समर्थः, आनंत्यम् अनंतपुण्यफलम् ॥४२॥ दिष्ट्या भाग्यवशात्, परिपाकं पूर्णावस्थाम् ॥ ४३ ॥ हिमवतोऽपि तदेवेष्टं कन्याया अपि तदेवेष्टमिति हिमवांस्तदेव वर्णयति—तेषामिति ॥ ४४ ॥

॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ षण्मातरः ब्राह्मी, कौमारी, वैष्णवी, वाराही, इन्द्राणी, चामुंडा, कृत्तिकादयोऽपि वा ॥ ४९ ॥ ५० ॥ ब्रह्मघोषैः "स्वस्ति न
इन्द्र" इत्यादिपुण्याहवाचनिकैर्मंगलाशासकवेदमंत्रघोषैः ॥ ५१ ॥ त्रिलोक्यां प्राणिनां महोत्सवश्चासीत् हे नृप मैथिल ॥ ५२ ॥ लोकशंकरो लोकहितकरः,
लोकधर्मानुद्यानक्रीडादिरूपान्, अनुव्रतो अनुसृतः ॥ ५३ ॥ नंदिनीतीरे नन्दिनीनदीतटे, वनराजिषूद्यानपंक्तिषु रेम इति वक्ष्यमाणेन सम्बंधः ॥ ५४ ॥ मत्तालिद्वि

गंगातीरे निराहारा तपस्तपति दुश्चरम्॥ काङ्क्षमाणा पतिं शंभुं तस्या इष्टमिदं त्विति॥४५॥दत्ता कन्या मया तस्मै त्र्यंबकाय महात्मने ॥ शीघ्रं
गत्वा भवंतस्तु यत्र शम्भुर्महाप्रभुः ॥ ४६ ॥ प्रीत्या हिमवता दत्तां गृहाणेति निवेद्य च ॥ भवंत एव कुर्वंतु चैतद्वैवाहिकीं क्रियाम् ॥ ४७ ॥ इत्यु
क्तास्ते हिमवता तमामंत्र्य शिवं ययुः ॥ लक्ष्म्याद्या योषितः सर्वा विष्णवाद्या देवता अपि ॥ ४८ ॥ षण्मातरोऽथ मुनयो द्रष्टुं जग्मुर्महोत्स
वम् ॥ शिवः सर्वामरगणैर्मुनिभिर्मातृभिस्तथा ॥ ४९ ॥ अन्वितो वृषभारूढः प्रमथानां गणैर्वृतः ॥ भेरीशंखमृदंगाद्यैः काहलीपटहादिकैः ॥
॥ ५० ॥ ब्रह्मघोषैर्बंदिभिश्च प्राविशद्धिमवत्पुरीम् ॥ सुमुहूर्ते शुभे लग्ने शुभग्रहनिरीक्षिते ॥ ५१ ॥ विवाहमकरोच्छैलः प्रहृष्टेनांतरात्मना ॥
महोत्सवस्तदा चाऽऽसीत्त्रिलोक्यां प्राणिनां नृप ॥ ५२ ॥ महोत्सवे निवृत्ते तु शंकरो लोकशंकरः ॥ रेमे स्वच्छंदया देव्या लोकधर्माननुव्रतः॥
॥ ५३ ॥ ऋद्धिमद्धिमवद्गेहे देवेंद्रभवनोपमे ॥ शर्वर्यां नंदिनीतीरे वनराजिषु शंकरः ॥ ५४ ॥ मत्तालिद्विजसन्नादमयूररवमंडिते ॥ दिव्यवर्षसह
स्राणि रेमे स्वच्छंदया विभुः ॥ ५५ ॥ स्त्रीणामिंद्रवराभावात्तस्मिन्काले नृपोत्तम ॥ पुंसः संगात्पुनर्गर्भो नारीणां स्रवति ध्रुवम् ॥ ५६ ॥ प्रत्यहं
रमणाद्देव्यां नाभूद्गर्भो हराद्धत ॥ देवानामभवच्चिन्ता पुत्रालाभाद्धराद्विभो ॥ ५७ ॥ सर्वे संगत्य संमंत्र्य मिथ एवं बभाषिरे ॥ कामीवाऽभूद्रतौ
नित्यं सक्तो देव्या हरः स्वराट् ॥ ५८ ॥ नाऽस्माकं सिद्ध्यते कार्यं नित्यं गर्भस्य संस्रवात् ॥ पुना रतिर्यथा नाऽभूत्तथाऽस्माभिर्विधीय
ताम् ॥ ५९ ॥ मिथ एवं तु संभाष्य व्यचिन्वन्क्षणमत्र ते ॥ अग्निं कृत्ये विनिश्चित्य ह्यूचुर्मानपुरःसरम् ॥ ६० ॥

जसन्नादमयूररवमंडिते मत्तभ्रमरकोकिलादिकूजनाशिखंडिशब्दसंशोभिते ॥ ५५ ॥ तस्मिन्काले शिवपार्वतीविवाहसमये, स्त्रीणां यावत्स्त्रीत्वजात्यवच्छिन्नानामिन्द्रस्य गर्भ
धारणे वराभावात्पुनः द्वितीयमैथुनसमये स्त्रीणां पूर्वगर्भः स्रवति अस्रावीत् ॥ ५६ ॥ अतो हेतोः शंकरस्य पार्वत्या सह प्रत्यहं रमणात्पूर्वगर्भनाशोऽभवत् तेन हरात्पार्वत्यां
गर्भो नाऽभून्न ववृधे ॥ ५७ ॥ रतौ सुरते, कामी इव अत्यंतकामुक इव, देव्या सह सक्तोऽभूत् ॥ ५८ ॥ ५९ ॥ व्यचिन्वन् कार्यदक्षं शोधयामासुः ॥ ६० ॥

॥ ६१ ॥ रत्यंते सुरतांते, पुनः यथा रतिर्न भवेत् अन्यपुरुषदर्शनेन लज्जया सुरतप्रवृत्त्यवष्टम्भसम्भवात् ॥ ६२ ॥ स्मरांतकं शिवम्, तत्त्वसंप्रश्नव्याजेन तत्त्वविचारण
मिषेण ॥ ६३ ॥ ओमिति स्वीकारार्थे निपातः ॥ ६४ ॥ वीर्योत्सर्गाच्छुक्रनिर्मोकादादावेव रतांतरे सुरतमध्ये, विवस्त्रा नग्ना, विमनाः खिन्ना, ययौ अंतःपुरं ययौ
॥ ६५ ॥ अविसृष्टं पार्वतीयोनौ न निक्षिप्तम् ॥ ६६ ॥ त्वया करणभूतेन ॥ ६७ ॥ तदुल्बणम् अतिजाज्वल्यमानं शिवस्य वीर्यम् उदरे धृत्वा दह्यमानोऽग्निः ॥६८॥

अग्ने मुखं त्वं देवानां त्वं बन्धुर्गतिरेव च ॥ इदानीमपि गच्छ त्वं रमते यत्र वै हरः ॥ ६१ ॥ रत्यन्ते दर्शयाऽऽत्मानं पुना
रतिर्यथा न वै ॥ त्वां दृष्ट्वा व्रीडिता देवी ततश्चापसरेद्ध्रुवम् ॥ ६२ ॥ शिष्यो भूत्वा तु रत्यन्ते पृच्छ तत्त्वं स्मरान्तकम् ॥ तत्त्वसम्प्रश्नव्याजेन
कालं बहु नय प्रभो ॥ ६३ ॥ बहुकाले गते देवी कुमारं प्रसविष्यति ॥ देवैरेवं प्रार्थितोऽग्निरोमित्युक्त्वा हरं ययौ ॥ ६४ ॥
वीर्योत्सर्गात्पूर्वमेव गतो वह्नी रतांतरे ॥ तं दृष्ट्वा व्रीडिता देवी विवस्त्रा विमना ययौ ॥ ६५ ॥ रतिं विहाय त्वरया ततो रुद्रो
ऽतिकोपितः ॥ वह्निं प्राह गृहाणेदमभिसृष्टं तु दुर्मते ॥ ६६ ॥ मद्वीर्यं दुःसहं पाप रतौ विघ्नस्त्वयाऽभवत् ॥ उत्सृजामि च मद्वीर्यं त्वन्मुखे
हव्यवाहन ॥ ६७ ॥ इत्युक्त्वोत्सृष्टवान्वीर्यं हव्यवाहमुखे हरः ॥ तद्धृत्वा दह्यमानः सन्स्वोदरे वीर्यमुल्बणम् ॥ ६८ ॥ चिंतयानो ययौ धाम
देवानां यज्ञपूरुषः ॥ कथंचित्प्राणतो मुक्तो देवेभ्यस्तन्न्यवेदयत् ॥ ६९ ॥ देवा वह्नीरितं श्रुत्वा हर्षशोकौ समाययुः ॥ स्थितं वीर्यमिति ह्लादं
कथं तु प्रसवो भवेत् ॥ ७० ॥ इति दुःखं तदा चाऽऽसीद्वह्नेः कुक्षौ तु शांभवम् ॥ ववृधे तेज आक्षिप्तं दश मासा गतास्तदा ॥ ७१ ॥ नाऽ
पश्यत्प्रसवोपायं बहुदुःखपरायणः ॥ देवान्वै शरणं प्राप गर्भमोचनहेतवे ॥ ७२ ॥ ते देवा वह्निना साकं प्रापुर्गंगां यशस्विनीम् ॥ गंगां
स्तोत्रेण ते स्तुत्या प्रार्थयामासुरंजसा ॥ ७३ ॥ त्वं माता सर्वदेवानां त्वमेव जगतां पतिः ॥ देवतार्थं तु त्वं भद्रे धत्स्व तेजस्तु शांभवम् ॥७४॥
तद्वह्नेर्वर्द्धते गर्भो नास्त्रीत्वात्प्रसवोऽस्य च ॥ तस्मादेनं च नः सर्वान्समुद्धर दयां कुरु ॥ ७५ ॥ इत्येवं प्रार्थिता देवी तथाऽस्त्विति वचोऽब्रवीत् ॥
देवास्तु वह्नये प्राहुर्मंत्रं गर्भविमोचनम् ॥ ७६ ॥ तन्मंत्राद्गर्भमाकृष्य व्यसृजद्धव्यवाहनः ॥ गंगायां शांभवं तेजो भास्वल्लोकसुदुःसहम् ॥ ७७ ॥

देवानां धाम स्वर्गं ययौ ॥ ६९ ॥ वह्नीरितमग्निवाक्यम्, हर्षशोकौ शिवसुतो भविष्यतीति हर्षम् अग्नेस्तापो भवतीति शोकम् । तदेवाह–स्थितमिति ॥७०॥ शिवेन आक्षिप्तं
तेजः शुक्रम् ॥ ७१ ॥ ७२ ॥ गंगां भागीरथीं स्तोत्रेण वैभववर्णनेन स्तुत्या स्वकार्यप्रार्थनया ॥ ७३ ॥ पतिः पालनकर्त्री धत्स्व धारय ॥ ७४ ॥ एनं वह्निं, समुद्धर
परिपालय ॥ ७५ ॥ प्राहुरुपदिदिशुः ॥ ७६ ॥ भास्वल्लोकसुदुःसहं तेजस्विनामप्यसह्यतेजस्कम् ॥ ७७ ॥

सा गंगा कतिचिन्मासांस्तद्वीर्यमूढ्वा धारयित्वा तत्प्रभावेण शिववीर्यप्रभावेण, निर्जला वीर्यस्यात्युल्बणत्वात् ॥ ७८ ॥ ७९ ॥ शरकांडे नदीमध्ये जायमानतृणविशेषखंडे
॥ ८० ॥ चोदिताः प्रेरिताः षोढा षट्प्रकारेण, निर्भिन्नं शांभवं तेजः, संधाय संधितं कृत्वा ॥ ८१ ॥ तं षण्मुखं पुरुषम् ॥ ८२ ॥ ८३ ॥ शैलं कैलासं तत्स्थलं यत्र

सा चोढ्वा कतिचिन्मासान्न शशाक ततः परम् ॥ निर्जला तत्प्रभावेण स्फुटद्रक्तकलेवरा ॥ ७८ ॥ बहुदुःखाऽऽकुला देवी पातिव्रत्यप्रभावतः ॥
उज्जहार स्वोदरस्थं गर्भं लोकैकपावनी ॥ ७९ ॥ शरकांडे तु चिक्षेप दह्यमानं समन्ततः ॥ शरकांडैस्तु संभिन्नः षोढा भिन्नो बभूव ह ॥ ८० ॥
षट्कृत्तिकाः समाजग्मुर्ब्रह्मणा चोदितास्तदा ॥ शरकांडे विनिर्भिन्नं षोढा संधाय शांभवम् ॥ ८१ ॥ षण्मुखं पुरुषं कृत्वा त्वेकदेहमिति
स्फुटम् ॥ कृत्तिका विधिनाऽऽज्ञप्तास्तं तथा चक्रिरे दृढम् ॥ ८२ ॥ तद्देहं पुरुषाकारं षण्मुखं शरकांडगम् ॥ अरक्ष्यमाणमेवासीच्छरकांडेषु वै
चिरम् ॥ ८३ ॥ एकदा वृषभाऽऽरूढौ पार्वतीपरमेश्वरौ ॥ श्रीशैलं गंतुमनसौ तत्स्थलं परिजग्मतुः ॥ ८४ ॥ तदासीत्पार्वती देवी सद्यः स्नुतप
योधरा ॥ विस्मिता चावदद्रुद्रं स्नुतौ कस्मात्पयोधरौ ॥ ८५ ॥ कारणं ब्रूहि विश्वात्मन्नित्युक्तस्तु हरोऽब्रवीत् ॥ शृणु देवि प्रवक्ष्यामि पुत्रोऽयो
वर्तते तव ॥ ८६ ॥ त्वयि वीर्यमनुत्सृष्टं प्रागेवाऽऽगाद्धविर्वहः ॥ तं दृष्ट्वा व्रीडिता त्वं वै प्रविष्टा च स्थलान्तरम् ॥ ८७ ॥ मया कोपाद्वह्नि
मुखे विसृष्टं वीर्यमुल्बणम् ॥ देवानां च प्रसादेन गंगायां व्यसृजद्विभुः ॥ ८८ ॥ गंगा च दह्यमाना सा व्यक्षिपच्च शरान्तरं ॥ तत्र षोढा
प्रभिन्नं तु मातृभिश्च दृढीकृतम् ॥ ८९ ॥ पुरुषाकृतिमापेदे तं दृष्ट्वा ते स्तनौ स्नुतौ ॥ पालनीयं महावीर्यं विष्णुना समविक्रमम् ॥ ९० ॥ अयमे
वौरसः पुत्रस्तव भाति विनिश्चितम् ॥ तस्माद्गृहाण शीघ्रं त्वं तेनाऽऽख्यातिरतीव ते ॥ ९१ ॥ इत्याऽऽज्ञप्ता शंभुना सा तमादायाऽर्भकं द्रुतम् ॥
अंकमारोप्य तं देवी पाययामास सा स्तनौ ॥ ९२ ॥ देवेन मोहिता देवी पुत्रस्नेहपराऽभवत् ॥ पुनः कैलासमगमत्प्रभुणा सह शांकरी ॥ ९३ ॥
लालयंती सुतं देवी संतोषं परमं ययौ ॥ एवं कुमारजननं वर्णितं ते मयाऽद्भुतम् ॥ ९४ ॥

शरकांडे पुरुष आसीत्तदूर्ध्वम् ॥८४॥८५॥८६॥ हविर्वहो वह्निः ॥ ८७ ॥ ८८ ॥ मातृभिः षट्कृत्तिकाभिः, दृढीकृतं संहितम् ॥ ८९ ॥ पुरुषाकृतिं पुरुषाकारम्,
आपेदे प्राप, तद्वीर्यमिति तं गर्भं विष्णुना समविक्रमं विष्णुतुल्यपराक्रमम् ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥

॥ ९५ ॥ अनु वारंवारम् ॥ ९६ ॥ ९७ ॥ यत्प्रभावात् वैशाखप्रभावात् ॥ ९८ ॥ ९९ ॥इति वैशाखमासमाहात्म्यटीकायां नवमोऽध्यायः ॥ ९ ॥ ॥छ॥ ॥
॥ अथाशून्यशयनव्रतविधानं प्रस्तौति—यदिति ॥ १ ॥ २ ॥ ३ ॥ जीमूताभः जीमूतो मेघस्तस्याभेवाऽऽभा यस्येति मेघश्याम इत्यर्थः ॥४॥५॥ ६ ॥ ७ ॥ चतुर्विधं

य इदं शृणुयान्नित्यं कुमारजननं शुभम् ॥ पुत्रपौत्राभिवृद्धिं तु लभते नाऽत्र संशयः ॥ ९५ ॥ महद्दुःखं तु जनने हरस्याऽपि यतोऽभवत् ॥ प्रीत्यानुश्रुतवैशाखधर्मोऽप्यप्रतिमो भवेत् ॥ ९६ ॥ तस्माद्वैशाखधर्मो हि सर्वाघौघविनाशनः ॥ अवैधव्यप्रदः पुण्यः सर्वसंपद्विधायकः ॥९७॥ अनंगोपि हि सांगत्वं यत्प्रभावात्समाप्तवान् ॥ अस्नात्वा चाप्यदत्त्वा च वैशाखो यस्य वै गतः ॥९८॥ अपि धर्मकृतो वाऽपि भवेद्दुःखपरंपरा ॥ सर्वधर्मो हितः स्याच्च यद्येकोऽयमनुष्ठितः॥ ९९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदांबरीषसंवादे कुमारोत्पत्तिकथनंनाम नवमोऽध्यायः ॥ ९ ॥ ॥छ॥ ॥ ॥ मैथिल उवाच ॥ ॥ यत्कामपत्नीचरितमशून्यशयनव्रतम् ॥ देवोपदिष्टं तस्याऽस्य विधानं ब्रूहि भूसुर ॥ १ ॥ किं दानं को विधिस्तस्य पूजनं किं फलं तथा ॥ एतदाचक्ष्व भूदेव श्रोतुं कौतूहलं हि मे ॥ २ ॥ ॥ श्रुतदेव उवाच ॥ ॥ शृणु भूयः प्रवक्ष्यामि व्रतं पापप्रणाशनम् ॥ अशून्यशयनं नाम रमायै हरिणोदितम् ॥ ३ ॥ येन चीर्णेन देवेशो जीमूताऽऽभः प्रसीदति ॥ लक्ष्मीभर्त्ता जगन्नाथः समस्ताऽघौघनाशनः ॥ ४ ॥ अकृत्वा यस्त्विदं राजन्व्रतं पातकनाशनम् ॥ गार्हस्थ्यमनुवर्तेत तस्येदं निष्फलं भवेत् ॥ ५ ॥ श्रावणे शुक्लपक्षे तु द्वितीयायां महीपते ॥ अशून्यशयनाख्यं तद्ग्राह्यं व्रतमनुत्तमम् ॥६॥ चातुर्मास्ये तु संप्राप्ते हविष्याशी भवेन्नरः ॥ चतुर्भिः पारणं मासैः सम्यङ्निष्पाद्यते प्रभो ॥७॥ लक्ष्मीयुक्तो जगन्नाथः पूजनीयो जनार्दनः ॥ पारणे दिवसे प्राप्ते भक्ष्यं चैव चतुर्विधम् ॥ ८ ॥ उपायनं च दातव्यं ब्राह्मणाय कुटुंबिने ॥ सौवर्णीं राजतीं चापि मूर्तिं कुर्यान्मनोरमाम् ॥ ९ ॥ पीताम्बरधरां दिव्यां वनमालाविभूषिताम् ॥ शुक्लपुष्पैः सुगंधैश्च पूजयेत्पुरुषोत्तमम् ॥ १० ॥ शय्यादानैर्वस्त्रदानैर्विप्राणां भोजनैस्तथा ॥ दम्पत्योर्भोजनैश्चैव दक्षिणाभिः प्रपूजयेत् ॥ ११ ॥ एवं तु चतुरो मासान्पूजयित्वा जनार्दनम् ॥ मार्गशीर्षादिमासेषु पूजयेत्पूर्ववद्धरिम् ॥ १२ ॥ रक्तवर्णं हरिं ध्यायेद्रुक्मिणीसहितं तथा ॥ चैत्रादींश्चतुरो मासानेवं संपूजयेत्ततः ॥ १३ ॥ भूम्या सह स्थितं देवमर्चयेद्भक्तिपूर्वकम् ॥ सनंदनाद्यैर्मुनिभिः स्तूयमानमकल्मषम् ॥ १४ ॥ आषाढस्य च मासस्य द्वितीयायां समापयेत् ॥ अष्टाक्षरेण मंत्रेण जुहुयादनले शुभे ॥ १५ ॥

लेह्यचोष्यपेयखाद्यभेदेनेति ॥ ८ ॥ ९ ॥ १० ॥ भाजनैः पात्रैः ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ अष्टाक्षरमंत्रो यथा—"ॐ नमो नारायणाय" इति ॥ १५ ॥

विष्णुगायत्री यथा "ॐ नारायणाय विद्महे वासुदेवाय धीमहि ॥ तन्नो विष्णुः प्रचोदयात्" इति ॥.१६ ॥ १७ ॥ श्रावणादिमासचतुष्टये लक्ष्मीनारायणस्य सौवर्णीं प्रतिमां
दद्यात् ॥ १८॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ तस्यां शय्यायाम् अपूपैः उत्तमशय्योपस्करपदार्थैः ॥ २३ ॥ विशिष्टाय दानयोग्याय ॥ २४ ॥ २५ ॥ २६ ॥

मार्गशीर्षादिमासानां पारणे भूमिपालक ॥ जुहुयाद्विष्णुगायत्र्या चैत्रादीनां निबोधय ॥ १६ ॥ पौरुषेण च मंत्रेण जुहुयादनले शुभे ॥ पश्चा
मृतं पायसं च ह्यपूपं घृतपाचितम् ॥ १७ ॥ एवं क्रमेण द्रव्याणि प्रतिमासु निबोधय ॥ सौवर्णीं प्रतिमां दद्याल्लक्ष्मीनारायणस्य च ॥ १८ ॥
सौवर्णीं मध्यमे दद्यात्कृष्णस्य परमात्मनः ॥ राजतीं त्वंतिमे दद्याद्वराहस्य महात्मनः ॥ १९ ॥ ब्राह्मणान्भोजयेत्पश्चान्नामभिः केशवादिभिः ॥
वस्त्रयुग्मैरलंकारैर्यथावित्तानुसारतः ॥ २० ॥ अर्चयित्वा ततो दद्यादपूपान्घृतपाचितान् ॥ उपायनार्थे विप्रेभ्यो द्वादशभ्यो निवेदयेत् ॥ २१ ॥
आचार्याय ततो दद्यात्प्रतिमां पूर्वकल्पिताम् ॥ शय्यां संकल्पितां पूर्णां सर्वालंकारभूषिताम् ॥ २२ ॥ तस्यामभ्यर्च्य विधिवल्लक्ष्मीनारायणं
परम् ॥ कांस्यपात्रेण सहितामपूपैर्बहुभिस्तथा ॥ २३ ॥ वस्त्रालंकारसहितां दक्षिणाभिस्तथैव च ॥ ब्राह्मणाय विशिष्टाय वैष्णवाय कुटुंबिने ॥
॥ २४ ॥ दातव्या विधिवत्पूज्य ब्राह्मणांश्चापि भोजयेत् ॥ ॥ दानमन्त्रः ॥ ॥ लक्ष्म्या अशून्यं शयनं यथा तव जनार्दन ॥२५॥ शय्या ममाप्य
शून्या स्याद्दानेनाऽनेन केशव ॥ एवं सम्प्रार्थ्य देवेशं स्वयं भोजनमाचरेत् ॥ २६ ॥ पुरुषो वा सती वाऽपि विधवा वा समाचरेत् ॥ अशून्य
शयनार्थं च कर्तव्यं व्रतमुत्तमम् ॥ २७ ॥ एवं तव मया ख्यातं विस्तरान्नृपसत्तम ॥ सुप्रसन्ने जगन्नाथे भवेयुर्विविधाः प्रजाः ॥ २८ ॥ तस्मिं
स्तुष्टे तु देवेशे देवानामपि दुर्लभाः ॥ तस्मात्सर्वप्रयत्नेन व्रतमेतत्समाचरेत् ॥ २९ ॥ अवश्यं गन्तुकामेन तद्विष्णोः परमं पदम् ॥ एवमुक्तं मया
सर्वं किमन्यच्छ्रोतुमिच्छसि ॥ ३० ॥ इत्युक्तस्तेन राजर्षिः पुनरप्याह तं मुनिम् ॥ वैशाखे छत्रदानस्य माहात्म्यं विस्तराद्वद ॥ ३१ ॥ शृण्वतो
ऽपि न तृप्तिर्मे वैशाखोक्तान्च्छुभावहान् ॥ ३२ ॥ इति तद्वचनं श्रुत्वा यशस्यं पुण्यवर्द्धनम् ॥ प्रत्युवाच महाभागं श्रुतदेवो महायशाः ॥३३ ॥
॥ श्रुतदेव उवाच ॥ ॥ वैशाखे घर्मतप्तानां मानवानां महात्मनाम् ॥ ये कुर्वन्त्यातपत्राणं तेषां पुण्यमनंतकम् ॥ ३४ ॥ अत्रैवोदाहरन्तीममिति
हासं पुरातनम् ॥ वैशाखधर्ममुद्दिश्य पुरा कृतयुगे कृतम् ॥ ३५ ॥

॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ धर्मानिति शेषः ॥ ३२ ॥ ३३ ॥ आतपत्राणम् उष्णाद्रक्षणम् ॥ ३४ ॥ कृतं जातम् ॥ ३५ ॥

॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ कर्तुमिति शेषः ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ शरासनात् धनुष्यात् ॥ ४६ ॥ ४७ ॥ ४८ ॥

वङ्गदेशे पुरा कश्चिद्धेमकान्त इति श्रुतः॥ कुशकेतोः सुतो धीमान्राजा शस्त्रभृतां वरः ॥ एकदा मृगयाऽऽसक्तो गहनं वनमाविशत् ॥ ३६ ॥ तत्र नानाविधान्हत्वा मृगान्क्रोडादिकान्बहून् ॥ श्रांतो मध्याह्नवेलायां मुनीनामाश्रमं ययौ ॥ ३७ ॥ तदा शतार्चिनोनाम ऋषयः शंसितव्रताः ॥ समाधिस्था न जानन्ति बाह्यकृत्यं च किंचन ॥ ३८ ॥ तान्दृष्ट्वा निश्चलान्विप्रान्क्रुद्धो हंतुं मनो दधे ॥ भूपं निवारयामास शिष्याणामयुतं तदा ॥ ३९ ॥ दुर्बुद्ध शृणु नो वाक्यं गुरवस्तु समाधिगाः ॥ नो जानन्ति बहिःकृत्यं तस्मात्क्रोधं न चार्हसि ॥ ४० ॥ ततः शिष्यानुवाचेदं वचनं क्रोधविह्वलः ॥ यूयं कुरुध्वमातिथ्यमध्वश्रांतस्य मे द्विजाः॥ ४१ ॥ एवमुक्ताश्च भूपेन शिष्या ऊचुस्तदा नृपम् ॥ नाऽऽज्ञप्ता गुरुभिर्भूप वयं भिक्षाशिनः पुनः ॥ ४२ ॥ गुरुतन्त्राः कथं कर्तुमातिथ्यं ते वयं क्षमाः ॥ प्रत्याख्यातो नृपः शिष्यैस्तान्हंतुं धनुराददे ॥ ४३ ॥ मृगदस्युभयादिभ्यो बहुधा रक्षिता मया ॥ ते मामेवोपशिक्षंति मया दत्तप्रतिग्रहाः ॥ ४४ ॥ एते मां न विजानंति कृतघ्ना भूरिमानिनः ॥ घ्नतोपि मे न दोषः स्यादेतान्वै ह्याततायिनः ॥ ४५ ॥ एवं विक्रुद्धमानः सञ्छरान्मुंचञ्च्छरासनात् ॥ तान्विद्रुताननुद्रुत्य जघ्ने शिष्यशतत्रयम् ॥४६॥ दुद्रुवुर्भयतः सर्वे विहायाऽऽश्रममञ्जसा ॥ विद्रावितेषु शिष्येषु बलादाश्रमसंस्थितान् ॥ ४७ ॥ संभाराञ्जगृहुः शीघ्रं सैनिकाः पापबुद्धयः ॥ यथेष्टं भोजनं चक्रुर्नृपेणैवानुमोदिताः ॥ ४८ ॥ ततः सेनाऽऽवृतो राजा पुरीमागाद्दिनात्यये ॥ कुशकेतुस्ततः श्रुत्वा तनयस्य विचेष्टितम् ॥ ४९ ॥ पुरान्निर्यातयामास गर्हयन्गर्हयन्सुतम् ॥ राज्यानर्हं क्षमाहीनं स्वदेशादपि भूमिप ॥ ५० ॥ पित्रा त्यक्तस्ततो राजा हेमकांतोऽतिविह्वलः ॥ वनं विवेश गहनं हत्याभिश्च सुपीडितः ॥ ५१ ॥ बहुकालमवासीच्च गह्वरे निर्जने वने ॥ आहारं कल्पयामास व्याधधर्ममुपाश्रितः ॥ ५२ ॥ न क्वाऽपि स्थितिमापेदे हत्ययाऽभिद्रुतो भृशम् ॥ अष्टाविंशतिवर्षाणि गतान्यस्य दुरात्मनः ॥ ५३ ॥ तीर्थयात्राप्रसंगेन त्रितोनाम महामुनिः ॥ तस्मिन्नरण्ये वैशाखे रवौ मध्यंदिने गते ॥ ५४ ॥

दिनात्यये सायंकाले ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥

॥ ५५ ॥ ५६ ॥ ब्रह्मपत्रैः पलाशवृक्षपत्रैः, जग्राह दधारेत्यर्थः । अलाबुस्थं तुम्बीफलपात्रस्थम् ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥

गच्छन्नातपविक्रांतस्तृषया चाऽपि पीडितः ॥ क्वचिद्वृक्षविहीने तु प्रदेशे मूर्च्छितोऽभवत् ॥ ५५ ॥ दैवाद्दृष्ट्वा हेमकांतस्त्रितंनाम महामुनिम् ॥ तृषार्तं मूर्छितं श्रांतं कृपां चक्रे नृपाधमः ॥५६॥ ब्रह्मपत्रैस्तदा छत्रं कृत्वा चाऽऽतपवारणम् ॥ मुनेर्जग्राह शिरसि ह्यलाबुस्थं जलं ददौ ॥ ५७ ॥ लब्धसंज्ञोऽभवत्तेन ह्युपचारेण वै मुनिः ॥ पत्रच्छत्रं क्षत्रदत्तं गृहीत्वा गतविक्लमः ॥ ५८ ॥ ग्रामं क्वचिच्छनैः प्राप्य किञ्चिदाप्यायितेन्द्रियः ॥ तेन पुण्यप्रभावेन ब्रह्महत्याशतत्रयम् ॥ ५९ ॥ विनष्टमभवत्तस्य क्षणादेव महात्मनः ॥ ततो विस्मयमापन्नो हेमकान्तो महारथः ॥६०॥ बहुधा पीड्यमानस्य ब्रह्महत्याः कथं गताः ॥ केनाऽपि निष्कृता ह्येताः क्व गताः केन हेतुना ॥६१॥ इत्येवं चिन्तयामास ब्रह्महत्याविमोचनम् ॥ एवं चाऽज्ञस्थिते राज्ञि यमदूता अथाऽऽगमन्॥६२॥ नेतुमेनं महात्मानं हेमकांतं वने स्थितम् ॥ ग्रहणीं जनयामासुः प्राणान्हर्तुं महात्मनः॥६३॥ तदा प्राणवियोगार्तः पुरुषांस्त्रीन्ददर्श ह ॥ यमदूतान्महाघोरानूर्ध्वकेशान्भयंकरान् ॥ ६४ ॥ चिन्तयानः स्वकर्माणि तूष्णीमासीत्तदा नृपः ॥ छत्रदानप्रभावेन जाता विष्णुस्मृतिर्नृप ॥ ६५ ॥ तेन स्मृतो महाविष्णुर्विष्वक्सेनं स्वमंत्रिणम् ॥ उवाच तूर्णं त्वं गच्छ यमदूतान्निवारय ॥६६॥ वैशाखधर्मनिरतं हेमकांतं तु पालय ॥ निष्पापमेनं मद्भक्तं पित्रे देहि पुरं गतः ॥ ६७ ॥ मदीरितेन वाक्येन कुशकेतुं च बोधय ॥ सर्वधर्म्मोज्झितो वापि ब्रह्मचर्यादिवर्जितः ॥ ६८ ॥ वैशाखधर्मनिरतो मत्प्रियः स्यान्न संशयः ॥ कृतागाश्चाऽपि त्वत्पुत्रो मुनित्राणपरायणः ॥ ६९ ॥ वैशाखे छत्रदानेन निष्पापो नाऽत्र संशयः ॥ तेन पुण्यप्रभावेन शांतो दान्तश्चिरायुषः ॥ ७० ॥ शौर्यौदार्यगुणोपेतस्त्वत्समोऽयं गुणैरपि ॥ तस्मादेनं राज्यभारे संस्थापय महाबलम् ॥ ७१ ॥ विष्णुनैवं समाज्ञप्तमित्यादिश्य नृपोत्तमम् ॥ पितुर्वंशे हेमकांतं स्थाप्याऽऽयाहि च मां पुनः ॥ ७२ ॥ इत्यादिष्टो भगवता विष्वक्सेनो महाबलः ॥ हेमकान्तं समासाद्य यमदूतान्निवार्य च ॥ ७३ ॥ पाणिना शंतमेनैव पस्पर्शांगेषु भूमिपम् ॥ भगवद्भक्तसंस्पर्शाद्धतव्याधिः क्षणादभूत् ॥ ७४ ॥

ग्रहणीं संग्रहणीरोगम् ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ कृतागाः कृतापराधः ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥

॥ ७५॥७६॥७७॥७८॥७९॥८०॥८१॥८२॥ पुमर्थहेतून् धर्मार्थकाममोक्षप्रापकान् ॥८३॥ ८४ ॥ इति वैशाखमासमाहात्म्यटीकायां दशमोऽध्यायः ॥ १० ॥

विष्वक्सेनस्ततस्तेन सह तस्य पुरीं ययौ ॥ तं दृष्ट्वा विस्मितो भूत्वा कुशकेतुर्महाप्रभुः ॥ ७५ ॥ ननाम शिरसा भक्त्या दण्डवत्पतितो भुवि ॥ गृहं प्रवेशयामास पार्षदं परमात्मनः ॥ ७६ ॥ स्तुत्वा च विविधैः स्तोत्रैः पूजयामास वैभवैः ॥ तस्मै प्रीतमनाः प्राह विष्वक्सेनो महाबलः ॥ ॥ ७७ ॥ हेमकान्तं समुद्दिश्य यदुक्तं विष्णुना पुरा ॥ तच्छ्रुत्वा कुशकेतुश्च पुत्रं राज्ये निवेश्य च ॥ ७८ ॥ विष्वक्सेनाभ्यनुज्ञातः सभार्यो वनमाविशत् ॥ विष्वक्सेनो हेमकान्तमनुमंत्र्याभिपूज्य च ॥ ७९ ॥ श्वेतद्वीपं ययौ धीमान्विष्णुपार्श्वे महामनाः ॥ हेमकांतस्ततो राजा वैशाखोक्ताञ्छुभावहान्॥८०॥ विष्णुप्रीतिकरान्धर्मान्प्रतिवर्षं चकार ह ॥ ब्रह्मण्यो धर्ममार्गस्थः शान्तो दान्तो जितेन्द्रियः ॥ ८१ ॥ दयालुः सर्वभूतेषु सर्वयज्ञेषु दीक्षितः ॥ प्रवृद्धः सर्वसम्पद्भिः पुत्रपौत्रादिभिर्वृतः ॥ ८२ ॥ भुक्त्वा भोगान्समस्तांश्च विष्णुलोकमवाप्तवान् ॥ ८३ ॥ नेक्षे तु वैशाखसमांश्च धर्मान्सुखप्रयत्नान्बहुपुण्यहेतून् ॥ पापेन्धनाग्निनिभान्सुलभ्यान्धर्मादिमोक्षान्तपुमर्थहेतून् ॥ ८४ ॥ इति श्रीस्कान्दे महापुराण एकाशीति साहस्र्यां संहितायां द्वितीये वैष्णवखंडे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे छत्रदानप्रशंसने हेमकांतस्य ब्रह्महत्यादिपापशमनवर्णनंनाम दशमोऽध्यायः ॥ १० ॥ ॥ छ ॥ ॥ मैथिल उवाच ॥ ॥ वैशाखधर्माः सुलभाः पुण्यराशिविधायकाः ॥ विष्णुप्रीतिकराः सद्यः पुमर्थानां तु हेतवः ॥ १ ॥ न प्रख्याताः कथं लोके शाश्वताः श्रुतिचोदिताः ॥ प्रख्याता राजसा धर्मास्तामसा अपि भूरिशः ॥ २ ॥ दुर्घटा बहुयत्नाश्च बहुद्रव्यव्ययावहाः ॥ केचिन्माघं प्रशंसन्ति चातुर्मास्यान्परे जगुः ॥ ३ ॥ व्यतीपातादिधर्मांश्च वर्णयन्तीह भूरिशः ॥ एतद्विवेकं विस्तार्य श्रोतुकामाय मे वद ॥ ४ ॥ ॥ श्रुतदेव उवाच ॥ ॥ शृणु भूप प्रवक्ष्यामि न प्रख्याता इमे कथम् ॥ इतरेषां च धर्माणां कथं ख्यातिश्च भूतले ॥ ५ ॥ राजसास्तामसा भूमौ बहवः कामुका जनाः ॥ इच्छंत्यैहिकभोगांस्ते पुत्रपौत्रादिसंपदः ॥ ६ ॥ क्वचित्कथंचन क्वाऽपि जनेष्वेकोऽतिकृच्छ्रतः ॥ स्वर्गाय यतते लोके तस्माद्यज्ञादिसत्क्रियाः ॥ ७ ॥ कुरुतेऽतिप्रयत्नेन मोक्षं नोपासते नरः ॥ क्षुद्राशा भूरिकर्माणो जनाः काम्यानुपासते ॥ ८ ॥

अथ वैशाखधर्माणां श्रेष्ठत्वं प्रतिपादयितुं मैथिलनृपस्य प्रश्नं प्रस्तौति—वैशाखेत्यादिना ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

॥ ९ ॥ १० ॥ तथा वैशाखधर्माऽऽचरणेन सर्वः मनोरथः सिद्धो भवति, अन्यदिति शेषः ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ वृक्षे वृक्षच्छायासु ॥

प्रख्याता राजसा धर्मास्तामसा अपि तेन वै ॥ न ख्याताः सात्त्विका धर्मा हरिप्रीतिकरा इमे ॥ ९ ॥ निष्कामिका इमे धर्मा ह्यैहि
काऽऽमुष्मिकप्रदाः ॥ न जानन्ति जना मूढा मोहिता देवमायया ॥ १० ॥ यथाऽऽधिपत्ये संप्राप्ते सर्वसिद्धो मनोरथः ॥ मोहनार्थं
स्थलं प्राप्तमाधिपत्येन हीयते ॥ ११ ॥ कारणं च प्रवक्ष्यामि गोपने भूतलेंऽजसा ॥ यद्वैशाखोक्तधर्माणां सात्त्विकानां नृणामिह ॥ १२ ॥
सार्वभौमः पुरा काश्यामिक्ष्वाकुकुलभूषणः ॥ कीर्तिमानितिविख्यातो नृगपुत्रो महायशाः ॥ १३ ॥ जितेंद्रियो जितक्रोधो ब्रह्मण्यो राज
सत्तमः ॥ एकदा मृगयासक्तो वसिष्ठाश्रममाययौ ॥ १४ ॥ गच्छन्मार्गे ददर्शाऽसौ वैशाखे घर्मनिष्ठुरे ॥ भूयोभूयः कार्यमाणाञ्छिष्यांस्तस्य
महात्मनः ॥ १५ ॥ क्वचित्प्रपां प्रकुर्वन्ति छायामण्डपमेव च ॥ तटप्रपातं निस्तीर्य वापीं कुर्वन्ति निर्मलाम् ॥ १६ ॥ सूपविष्टान्क्वचिद्वृक्षे व्यज
नैर्वीजयन्ति च ॥ क्वचिद्दद्युर्हीक्षुदण्डान्क्वचिद्गन्धान्क्वचित्फलम्॥१७॥मध्याह्ने छत्रदानं च सायाह्ने पानकस्य च ॥ क्वचिद्यच्छंति ताम्बूलं नेत्रे
कर्पूरलेपनम् ॥ १८ ॥ सुच्छाये च वने केचित्सुसंमृष्टांऽगणेषु च ॥ केचिदास्तरयंत्यद्धा वालुकानि हितानि च ॥ १९ ॥ कुर्वन्त्यांदोलिकां राज
न्वृक्षशाखावलंबिनीम् ॥ के यूयमिति पप्रच्छ वासिष्ठा इति तेऽब्रुवन् ॥ २० ॥ किमेतदिति पप्रच्छ धर्मा वैशाखचोदिताः ॥ पुमर्थहेतव इमे
क्रियन्तेऽस्माभिरञ्जसा ॥ २१ ॥ वसिष्ठस्याऽऽज्ञया चेति तेऽब्रुवन्नृपसत्तमम् ॥ एतदाचरणे पुंसां किं फलं कस्तु तुष्यति ॥२२॥ एतद्विस्तार्य
मे ब्रूत यूयं सम्यग्यथाश्रुतम् ॥ इति राज्ञा तु संपृष्टाः प्रत्यूचुस्ते महीपतिम् ॥ २३ ॥ गुरोराज्ञाक्रमेणैव कुर्वतां पथि सत्क्रियाः ॥ नास्माक
मवकाशोऽत्र गुरुं पृच्छ यथोचितम् ॥ २४ ॥ स वेत्ति तत्त्वतो नूनं धर्मानेतान्महायशाः ॥ इति शिष्यैर्वसिष्ठस्य प्रत्युक्तस्तु द्रुतं ययौ ॥२५॥
वसिष्ठस्याऽश्रमं पुण्यं विद्यायोगोपबृंहितम् ॥ समायान्तं नृपं वीक्ष्य वसिष्ठः प्रीतमानसः ॥२६॥ आतिथ्यं विधिवच्चक्रे सानुगस्य महात्मनः॥
सूपविष्टः कृताऽतिथ्यः प्रीतः पप्रच्छ तं गुरुम् ॥ २७ ॥ ॥ राजोवाच ॥ ॥ मार्गे दृष्टं महाश्चर्यं त्वच्छिष्यैश्च कृतं शुभम् ॥ मया पृष्टं च
तैर्नोक्तं क्रियमाणं शुभावहम् ॥ २८ ॥ नास्माकमवकाशोऽत्र ह्येतद्धर्मप्रशंसने ॥ कर्तव्या च क्रियाऽस्माभिर्गुरुणा या च चोदिता ॥ २९ ॥

॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ उपबृंहितं वर्धितम् ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥

॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ अथ कर्मणो महदल्पफलव्यवस्थामुपदर्शयति—महदिति सार्द्धेन । महत् महाप्रयासादिभिः साध्यं यत् कर्म तत् अल्पदम् अल्पफलदं भवति, अल्पम् अल्पप्रयासादिसाध्यं कर्म भूरिदं

गुरुं गच्छेति तैरुक्त आगतोऽहं तवांतिकम् ॥ मृगयाऽऽसक्तचित्तेन श्रांतेनातिथ्यमिच्छता ॥ ३० ॥ दृष्टं मार्गे त्विदं पुण्यं तव शिष्यैश्च कारितम् ॥ जिज्ञासाऽऽसीत्ततः श्रोतुं धर्मानेतान्मुनीश्वर ॥ ३१ ॥ त्वमादिरादिमान्धर्मान्समाचरसि वै यतः ॥ तान्धर्माञ्च्छ्रोतुकामाय शिष्याय प्रणताय च ॥ ३२ ॥ श्रद्दधानाय मे ब्रूहि विस्तरान्मुनिपुंगव ॥ इतीक्ष्वाकुकुलीनेन राज्ञा पृष्टो महायशाः ॥ ३३ ॥ मनसा तोषमापेदे सम्यक्पृष्टोऽधुनाऽमुना ॥ अहो व्यवसिता बुद्धी राजंस्तेऽद्य सुशिक्षिता ॥ ३४ ॥ यस्माद्विष्णुकथायां च तद्धर्माचरणेऽपि च ॥ मतिरात्यंतिकी जाता सुकृतं फलितं तव ॥ ३५ ॥ इति संभाष्य राजानं जातहर्षस्तमब्रवीत् ॥ शृणु भूप प्रवक्ष्यामि यत्पृष्टोऽहं त्वयाऽधुना ॥ ३६ ॥ यस्य श्रवणमात्रेण मुच्यते सर्वकिल्बिषैः ॥ सर्वधर्मान्परित्यज्य वर्तते विषयात्मकः ॥ ३७ ॥ वैशाखस्नाननिरतः स प्रियो मधुविद्विषः ॥ सांगान्धर्माननुष्ठाय वैशाखो येन नादृतः ॥ ३८ ॥ स्नानदानार्चनैः पुण्यैस्तस्य दूरतरो हरिः ॥ अस्नाप्य चाऽप्यदत्त्वा च वैशाखो येन नीयते ॥ ३९ ॥ कर्मणा स तु चण्डालो नाऽत्र कार्या विचारणा ॥ वैशाखोक्तैर्महाधर्मैर्येन चाऽऽराधितो हरिः ॥ ४० ॥ तैश्च तोषं समायाति प्रददाति समीहितम् ॥ लक्ष्मीभर्त्ता जगन्नाथो ह्यशेषाघौघनाशनः ॥ ४१ ॥ धर्मैः सूक्ष्मैश्च प्रीणाति न प्रयासैर्धनैरपि ॥ भक्त्या संपूजितो विष्णुः प्रददाति समीहितम् ॥ ४२ ॥ तस्माद्राजन्सदा भक्तिः कर्तव्या मधुविद्विषः ॥ जलेनाऽपि जगन्नाथः पूजितः क्लेशहा हरिः ॥ ४३ ॥ परितोषं व्रजत्याशु तृषार्तः सलिलैर्यथा ॥ महदप्यल्पदं कर्म तथा ह्यल्पं च भूरिदम् ॥ ४४ ॥ कर्मणाऽल्पत्वभूरित्वे न हेतू महदल्पके ॥ किन्तु कर्मस्वरूपं च गहना कर्मणो गतिः ॥ ४५ ॥ वैशाखोक्ता इमे धर्माः स्वल्पाऽऽयासकृता अपि ॥ बहुव्ययविनाशाश्च विष्णोः प्रीतिकराः शुभाः ॥ ४६ ॥

भूरिफलप्रदायकं भवति ॥ ४४ ॥ कर्मणः अल्पत्वभूरित्वे अल्पभूरिप्रदायकत्वे हेतू कारणे महदल्पके तत्तत्कर्मणः महत्त्वाल्पत्वेन किंतु कर्मस्वरूपमेव महदल्पफलप्रदत्वे हेतुः । गहना दुर्ज्ञेया ॥ ४५ ॥ ४६ ॥

वैशाखोक्तान् धर्मानिति शेषः ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ मतङ्ग एव मातङ्गस्तस्मिन् मातंगे गजे 'मतङ्गजो मजो नागः' इत्यमरः
॥ ५२ ॥ विषयात् देशात् ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ रविसूनुर्यमः वैलेख्यं लेखनकर्माभावम् अगमत् ॥ ६१ ॥

तस्मात्त्वमपि भूपाल वैशाखोक्तान्समाचर॥त्वद्राष्ट्रीयैर्जनैः सर्वैः कारयेमाञ्छुभावहान्॥४७॥न करोति च यो धर्मान्वैशाखोक्तान्नराधमः॥बहुधा
शिष्यमाणोऽपि स दण्डयस्तव भूपते ॥४८॥ इत्यावश्यकतां सम्यक्छास्त्रैर्व्युत्पाद्य तस्य च ॥ पश्चाद्वैशाखनिर्दिष्टान्धर्मान्प्रोवाच सर्वशः॥४९॥
श्रुत्वा तान्सकलान्धर्मान्गुरुं संपूज्य भक्तितः ॥ स राजा गृहमागत्य सर्वान्धर्मांश्चकार ह ॥ ५० ॥ भक्तिमान्केशवे राजन्देवदेवे निरञ्जने ॥ नाऽ
न्यं पश्यति देवेशात्पद्मनाभान्महीपतिः ॥ ५१ ॥ भेरीमुद्राह्य मातंगं स्वराष्ट्रेऽघोषयद्भटैः ॥ अष्टवर्षाधिको मर्त्यो ह्यशीतिर्नहि पूर्यते ॥ ५२ ॥
प्रातर्न स्नाति मेषस्थे सूर्ये सर्वोऽपि यो जनः ॥ स मे दंडयश्च वध्यश्च निर्यास्यो विषयाद्ध्रुवम् ॥ ५३ ॥ पिता वा यदि वा पुत्रो भार्या वाऽथ
सुहृज्जनः ॥ वैशाखधर्महीनश्च निर्ग्राह्यो दस्युवन्मया ॥ ५४ ॥ दातव्यं विप्रमुख्येभ्यः स्नात्वा प्रातर्जले शुभे ॥ प्रपादानादिधर्मांश्च कुरुध्वं
शक्तितोऽनघाः ॥ ५५ ॥ विप्रं च धर्मवक्तारं ग्रामेग्रामे न्यवेशयत् ॥ पञ्चानामपि ग्रामाणामकरोदधिकारिणम् ॥ ५६ ॥ दण्डार्थं त्यक्तधर्माणां
दशवाजिनिषेवितम् ॥ एवं प्रवृत्तः सर्वत्र सार्वभौमस्य शासनात् ॥ ५७ ॥ प्रवृद्धो धर्मवृक्षोयं सर्वदेशेषु विस्तरात् ॥ ये केचिन्निधनं यांति
भूपालविषये नराः ॥ ५८ ॥ प्रमादाच्च नृपश्रेष्ठ ते यांति हरिमन्दिरम् ॥ अवश्यं वैष्णवो लोकः प्राप्यते मानवैर्ध्रुतम् ॥ ५९ ॥ व्याजेनाऽपि
सकृत्स्नातः प्रातर्मेषगते रवौ ॥ सर्वपापविनिर्मुक्तो याति विष्णोः परं पदम् ॥ ६० ॥ न प्राप्नोति यमं धर्मं सकृद्वैशाखस्नानतः ॥ वैलेख्यमगम
द्राजा रविसूनुस्तदा नृप ॥ ६१ ॥ लेख्यकर्मणि विश्रान्तश्चित्रगुप्तोऽभवत्तदा ॥ मार्जितानि च लेख्यानि पुरा पापोद्भवानि च ॥ ६२ ॥ गच्छ
द्भिर्वैष्णवं लोकं स्वकर्मस्थैर्जनैः क्षणात् ॥ शून्यास्तु नरकाः सर्वे पापिप्राणिविवर्जिताः ॥ ६३ ॥ भग्नयानोऽभवन्मार्गो वैशाखस्य प्रभावतः ॥
सर्वेऽपि विमलाकारा जना यान्ति हरेः पदम् ॥ ६४ ॥ दिवौकसां तु ये लोकाः शून्याः सर्वे तथाऽभवन् ॥ शून्ये त्रिविष्टपे जाते शून्येषु नर
केषु च ॥ ६५ ॥ नारदो धर्मराजानं गत्वा चेदमुवाच ह ॥ नाक्रन्दः श्रूयते राजन्प्राक्च्छुतो नरके यथा ॥ ६६ ॥ तथा न क्रियते लेख्यं
किंचिद्दुष्कृतकर्मणाम् ॥ चित्रगुप्तो मुनिरिव स्थितोऽयं मौनसंस्थितः ॥ ६७ ॥

॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥

॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ सः पापदण्डाधिकार्य्यप्यहं काष्ठसमः काष्ठवन्निग्रहानुग्रहासमर्थः ॥ ७७ ॥ ७८ ॥ भवं भविष्यामीत्यर्थः ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ सज्जीकृतसर्वस्वः सज्जीकृताः सन्नद्धीकृताः सर्वस्वाः स्वकीयाः सेना इति यावत् येन सः ॥ ८३ ॥

कारणं ब्रूहि राजेंद्र न यान्ति तव मन्दिरम् ॥ मनुष्याः पापकर्माणो मायादम्भविवर्धिताः ॥ ६८ ॥ एवमुक्ते तु वचने नारदेन महात्मना ॥ प्राह वैवस्वतो राजा किंचिद्दैन्यसमन्वितः ॥ ६९ ॥ योऽयं नारद भूपालः पृथिव्यां सांप्रतं स्थितः ॥ सोऽतिभक्तो हृषीकेशे पुराणपुरुषोत्तमे ॥ ७० ॥ प्रबोधयति वैशाखधर्मे भेरीस्वनेन च ॥ अष्टवर्षाधिको मर्त्यो ह्यशीतिर्न हि पूर्यते ॥ ७१ ॥ यो वै ह्यकृतवैशाखः स मे दण्ड्यो न संशयः ॥ तद्भयाद्धि जनाः सर्वे नोल्लंघंति कदाचन ॥ ७२ ॥ गच्छंति वैष्णवं धाम कर्मणा तेन नारद ॥ वैशाखसेवनाल्लोका यास्यंति हरिमंदिरम् ॥ ७३ ॥ तेन राज्ञा मुनिश्रेष्ठ मार्गो लुप्तो ममाऽधुना ॥ कृता हि नरकाः शून्या लोकाश्चापि दिवौकसाम् ॥ ७४ ॥ विश्रांतो लेखको लेखे लिखितं मार्जितं जनैः ॥ वैशाखमासधर्मस्य माहात्म्यं त्वीदृशं मुने ॥ ७५ ॥ ब्रह्महत्यादिपापानि विमुक्तानि जनैर्द्विज ॥ कृत्वा वैशाखकृत्यानि यांति विष्णोः परं पदम् ॥ ७६ ॥ सोऽहं काष्ठसमो जातो न कश्चिन्मम गोचरः ॥ युद्धं कृत्वा तु तं हन्मि सर्वथाऽद्य महाबलम् ॥ ७७ ॥ अकृत्वा स्वामिकार्यं तु निर्व्यापारो यदि स्थितः ॥ तस्य वित्तं समश्नाति स याति नरकं ध्रुवम् ॥ ॥ ७८ ॥ यदि देवादवध्योऽयं तदा ब्रह्माणमेत्य च ॥ निवेद्य तस्मै तत्सर्वं पश्चात्स्वस्थस्थितिर्भवम् ॥ ७९ ॥ इत्युक्त्वा द्विजमामंत्र्य सानुगः प्रययौ भुवम् ॥ स कालो महिषारूढो दण्डमुद्यम्य भीषणम् ॥ ८० ॥ मृत्युरोगजराद्यैश्च पार्षदैश्च महोत्कटैः ॥ पञ्चाशत्कोटिसंख्याकैर्यमदूतैर्वृतस्ततः ॥ ८१ ॥ स तूर्णं तस्य राजर्षे रुरोध सकलां पुरीम् ॥ शंखं दध्मौ महाघोरं सर्वलोकभयंकरम् ॥ ८२ ॥ तच्छ्रुत्वा स तु राजर्षिर्ज्ञात्वा वैवस्वतं यमम् ॥ स सज्जीकृतसर्वस्वः पत्तनान्निर्ययौ रुषा ॥ ८३ ॥ तयोर्युद्धमभूत्तत्र भीषणं रोमहर्षणम् ॥ मृत्युं कालं तथा रोगं यमं दूतपतिं तथा ॥ ८४ ॥ जित्वा क्षणेन राजर्षिर्द्रावयामास रोषतः ॥ ततः क्रुद्धो यमो राजा स्वयमभ्येत्य तं रुषा ॥ ८५ ॥ युयोध बहुभिर्बाणैः सिंहनादं चकार ह ॥ चकर्त राजा तस्याऽपि कार्मुकं विशिखैस्त्रिभिः ॥ ८६ ॥

॥ ८४ ॥ ८५ ॥ चकर्त चिच्छेद 'कृती—छेदने' इति धातोर्लिट्लकारस्य रूपम् ॥ ८६ ॥

॥ ८७ ॥ निचखान चिक्षेप ॥ ८८ ॥ आरि अराः सन्ति यस्य तदरि सुदर्शनचक्रम् ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ मूर्तामूर्तजनैः
मूर्ता ब्रह्मोपासकाः, अमूर्ता जीवन्मुक्तास्तैर्वृतम् ॥ ९६ ॥ ९७ ॥ विग्रहसंस्थितैर्देहधरैः ॥ ९८ ॥ ९९ ॥ १०० ॥१०१॥१०२॥१०३॥ सूरस्यापत्यं सौरिः 'सूर

पुनश्चर्मासिमादाय यमो हंतुमथाऽऽगमत् ॥. तं दृष्ट्वा तु नृपः क्रुद्धः पुनश्छित्त्वाऽसिचर्मणी ॥ ८७ ॥ निचखान ललाटे च शरं कालोरग
प्रभम् ॥ यमस्तेनाऽऽहतः क्रुद्धस्ततो दंडमुपाददे ॥ ब्रह्मास्त्रेण च संमंत्र्य दण्डं तस्मै मुमोच ह ॥ ८८ ॥ हाहाकारो महानासीज्जनानां पश्यतां
तदा ॥ तदा विष्णुः स्वभक्तस्य रक्षायै प्राहिणोदरि ॥ ८९ ॥ विष्णुमुक्तं तदा चक्रं शीघ्रमागत्य तद्रणे ॥ यमदण्डेन संयुध्य तद्ब्रह्मास्त्रं निवार्य
च ॥९०॥ यमं हंतुमथारेभे सहस्रारं महाद्भुतम् ॥ देवभक्तस्ततो भीतस्तदाऽस्तौच्चक्रमञ्जसा ॥९१॥ सहस्रार नमस्तेऽस्तु विष्णुपाणिविभूषण ॥
त्वं सर्वलोकरक्षायै हरिणा च धृतं पुरा ॥ ९२ ॥ त्वां याचेऽद्य यमं त्रातुं विष्णुभक्तं महाबलम् ॥ ९३ ॥ नृणां देवद्रुहां कालस्त्वमेव हि न
चाऽपरः॥ तस्मादेनं यमं रक्ष कृपां कुरु जगत्पते ॥ ९४ ॥ नृपेणैवं स्तुतं चक्रं यमं हित्वा नृपांतिकम् ॥ पुनर्ययौ महाराज देवानां पश्यतां दिवि
॥ ९५ ॥ ततो यमोऽतिनिर्विण्णो ब्रह्मणः सदनं ययौ ॥ स ददर्श समासीनं मूर्तामूर्तजनैर्वृतम् ॥९६॥ ध्रुवाश्रयं जगद्बीजं सर्वलोकपितामहम्॥
उपास्यमानं विबुधैर्लोकपालैर्दिगीश्वरैः ॥ ९७ ॥ इतिहासपुराणाद्यैर्वेदैर्विग्रहसंस्थितैः ॥ मूर्तिमद्भिः समुद्रैश्च नदीभिश्च सरोवरैः ॥ ९८ ॥
देहवद्भिस्तथा वृक्षैरश्वत्थाद्यैरशेषितैः ॥ वापीकूपतडागैश्च मूर्तिमद्भिश्च पर्वतैः ॥ ९९ ॥ अहोरात्रैस्तथा पक्षैर्मासैः संवत्सरैस्तथा ॥ कलाकाष्ठा
निमेषैश्च ऋतुभिश्चाऽयनैर्युगैः ॥ १०० ॥ संकल्पैश्च विकल्पैश्च निमिषोन्मेषणैस्तथा ॥ ऋक्षैर्योगैश्च करणैः पूर्णिमाभिः सुसंक्षयैः ॥ १०१ ॥
सुखैर्दुःखैर्भयैश्चैव लाभाऽलाभैर्जयाजयैः॥ सत्त्वेन रजसा चैव तमसा च समन्वितम्॥१०२॥ शांतमूढाऽतिप्रौढैश्च विकारैः प्राकृतैरपि ॥ वायुना
देवदेवेन श्लेष्मपित्तादिभिर्वृतम् ॥ १०३ ॥ तेषां मध्येऽविशत्सौरिः सव्रीडा च वधूर्यथा ॥ विलोकयन्धरापृष्ठं म्लानवक्त्रं व्यदर्शयत् ॥१०४॥
संप्रविष्टं यमं दृष्ट्वा सकाशस्थं सहानुगम् ॥ विस्मितास्ते मिथः प्रोचुः किमर्थं भास्करिस्त्विह ॥ १०५ ॥ संप्राप्तो लोककर्तारं द्रष्टुं देवं पिताम
हम् ॥ निर्व्यापारः क्षणमपि योऽयं नास्ति रवेः सुतः ॥ १०६ ॥

सूर्यार्य मादित्य' इत्यमरः ॥ सूर्यपुत्रो यमः । वधूर्नवोढा स्त्रीः ॥ १०४ ॥ भास्करस्यापत्यं पुमान्भास्करिः 'अत इञ्' इत्यनेन इञ् । भास्करिर्यमः ॥ १०५ ॥१०६॥

संमार्जितो मृष्टः वर्णरहित इति यावत्, पटो यस्य एवंभूतोऽयम् इति आश्चर्यातिशयः महदाश्चर्यमित्यर्थः ॥ १०७ ॥ १०८ ॥१०९॥ कृत्तमूलश्छिन्नमूलः ॥११०॥ ॥ १११ ॥ ११२ ॥ ११३ ॥ अशोभनं विपत्तिम् ॥ ११४ ॥ ११५ ॥ मार्तंडिं यमं, शालो वृक्षविशेषस्तद्वत्पीनानाम् ॥ ११६ ॥ व्योमसूनुर्वायुः तस्याकाशसम्भवत्वात् । तथा च श्रुतिः—"आकाशद्वायुः वायोरग्निः" इत्यादिः ॥ ११७ ॥ हे पटो स्वकर्मदक्ष ॥ ११८ ॥ ११९ ॥ १२० ॥ इति वैशाखमासमाहात्म्यटीकायामेकादशोऽध्यायः ॥ ११ ॥ छ ॥ अथ यमः स्वदुःखं वर्णयति—शृण्वित्यादिना यावदध्यायसमाप्ति ॥ १ ॥ नियोगी दण्डाधिकारी नियोगं दण्डम् ॥ २ ॥

सोऽयमभ्यागतः कस्मात्कच्चित्क्षेमं दिवौकसाम् ॥ आश्चर्याऽतिशयोऽयं च संमार्जितपटस्त्वयम् ॥१०७॥ लेखकस्तमनुप्राप्तो दैन्येन महताऽन्वितः ॥ न कदाचित्पटो ह्यस्य मार्जितो धर्मभीरुणा ॥१०८॥ यन्न दृष्टं श्रुतं वाऽपि तदिहाऽद्य प्रपद्यते ॥ एवमुच्चरतां तेषां भूतानां भूतशासनः ॥ निष्पपाताऽग्रतो भूमौ ब्रह्मणो रविनंदनः ॥१०९॥ कृत्तमूलो यथा शाखी त्राहित्राहीति वै रुदन् ॥ परिभूतोऽस्मि देवेश संमार्जितपटःकृतः ॥११०॥ त्वयि नाथे न विफलं पश्यामि कमलासन ॥ १११ ॥ एवमुक्त्वा हि निश्चेष्टो बभूव नृपसत्तम ॥ ततः कोलाहलः शब्दः सभायां समजायत ॥ ॥ ११२ ॥ यो हि खेदयते मर्त्यान्सर्वान्स्थावरजंगमान् ॥ स वै रुदति दुःखार्तः कस्माद्वैवस्वतो यमः ॥ ११३ ॥ जनसंतापकर्त्ता यः सोचिराद्यात्यशोभनम् ॥ नहि दुष्कृतकर्त्ता हि नरः प्राप्नोति शोभनम् ॥ ११४ ॥ ततो निवारयामास वायुस्तेषां वचस्तदा ॥ लोकानां समवेतानां मतं ज्ञात्वा स वेधसः ॥ ११५ ॥ निवार्य लोकान्मार्तंडिं शनैरुत्थापयन्मरुत् ॥ भुजाभ्यां शालपीनाभ्यां लोकसूत्र उदारधीः ॥११६॥ विह्वलं तं परायत्तमासने संन्यवेशयत् ॥ आसनस्थमुवाचेदं व्योमसूनू रवेः सुतम् ॥ ११७ ॥ केन त्वमभिभूतोऽसि केन स्थानान्निवारितः ॥ केनाऽयं मार्जितो देव पटो लेखपटस्तव ॥११८॥ ब्रूहि सर्वमशेषेण कुतो हेतोस्त्वमागतः ॥ यः प्रभुस्तात सर्वेषां स ते कर्ता ममाऽपि च ॥ अपि कस्माच्च मार्तंडे दुःखं हृदयसंस्थितम् ॥११९॥ स एवमुक्तः श्वसनेन सत्यमादित्यसूनुर्वचनं बभाषे ॥ विलोक्य वक्त्रं कुशकेतुसूनोः सगद्गदं चेदमहोऽतिदीनम् ॥ १२० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमाससमाहात्म्ये नारदाम्बरीषसंवादे कीर्तिमद्विजयवर्णनंनामैकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ यम उवाच ॥ ॥ शृणु मे वचनं नाथ लोपितोऽहं पितामह ॥ मरणादधिकं मन्ये मत्पदस्य च खण्डनम् ॥ १ ॥ नियोगी न नियोगं हि करोति कमलासन ॥ प्रभोर्वित्तं समश्नाति स भवेत्काष्ठकीटकः ॥ २ ॥

॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ साधये प्रवर्तये ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ योगः कर्मकांडं, सांख्यं जीवब्रह्मतत्त्वनिर्णायकं शास्त्रम् ॥ १२ ॥ १३ ॥

योऽश्नाति लोभाद्वित्तानि प्रज्ञावांश्च महीपते ॥ स तिर्यग्योनिनरके याति कल्पशतत्रयम् ॥ ३ ॥ निःस्पृहो नाऽऽचरेद्यस्तु नियोगं पद्मसंभव ॥ भुक्त्वा तु नरकान्घोरान्स पुमान्वायसो भवेत् ॥ ४ ॥ आत्मकार्यपरो यस्तु स्वामिकार्यं विलुंपति ॥ भवेद्वेश्मनि पापात्मा आखुः कल्पशतत्रयम् ॥ ५ ॥ नियोगी यश्च भूत्वा वै तिष्ठन्नित्यं स्ववेश्मनि ॥ शक्तस्तु कार्यकरणे मार्जारो जायते नरः ॥ ६ ॥ सोऽहं देव तवादेशात्प्रजा धर्मेण साधये ॥ पुण्येन पुण्यकर्तारं पापं पापेन कर्मणा ॥ ७ ॥ सम्यग्विचार्य मुनिभिर्धर्मशास्त्रान्वितैः प्रभो ॥ कल्पादौ वर्तमानस्य यातना दापयन्मम ॥ ८ ॥ कर्तुं नियोगमेवं हि त्वदीयो नैव शक्नुयाम् ॥ राज्ञा कीर्तिमता भग्नो नियोगस्तव च क्षितौ ॥ ९ ॥ भयादस्य जगन्नाथ पृथिवीं सागराम्बराम् ॥ वैशाखधर्मसहितां पालयन्वर्तते क्वचित् ॥ १० ॥ विहाय सर्वधर्मांश्च विहाय पितृपूजनम् ॥ विहायाऽग्निसपर्यां तु तीर्थयात्रादिसत्क्रियाः ॥ ११ ॥ योगसांख्यावुभौ त्यक्त्वा त्यक्त्वा प्राणनिरोधनम् ॥ त्यक्त्वा होमं च स्वाध्यायं कृत्वा पापानि भूरिशः ॥ १२ ॥ प्रयान्ति वैष्णवं लोकं कृत्वा वैशाखसत्क्रियाः ॥ मनुजाः पितृभिः सार्द्धं तथैव च पितामहैः ॥ १३ ॥ तेषामतीतपितरः पितॄणां पितरस्तथा ॥ तथा मातामहा यांति तेषां वै जनकादयः ॥ १४ ॥ तेषामपि च नेतारो जनित्रीणां च पूर्वजाः ॥ एतद्दुःखं पुनर्देव मम मस्तकभेदनम् ॥ १५ ॥ प्रियायाः पितरो यान्ति मार्जयित्वा लिपिं मम ॥ पितॄणां बीजजो यस्तु धात्र्या कुक्षौ धृतो विभो ॥ १६ ॥ यदंकेन कृतं कर्म तदंकेनैव भुज्यते ॥ तन्निरस्य कृतं सर्वं जानंस्त्वेकः कुले तु यः ॥ १७ ॥ तारयेत्तावुभौ पक्षौ षड्विंशोपर्यलं विभो ॥ प्रियायाश्चाऽपि वै तात सर्वे वै कुक्षिसंभवाः ॥ १८ ॥ तेऽपि सर्वे जगन्नाथ यान्ति विष्णोः परं पदम् ॥ न मे प्रयोजनं देव नियोगेनेदृशेन वै ॥ १९ ॥ वैशाखधर्मनिरतः स मां त्यक्त्वा व्रजेद्धरिम् ॥ त्रिःसप्तकुलमुद्धृत्य त्यक्तपापोऽतिशोभनः ॥ २० ॥ स त्यक्त्वा मम मार्गं हि प्रयाति हरिमंदिरम् ॥ न यज्ञैस्तादृशैर्देव गतिं प्राप्नोति मानवः ॥ २१ ॥ सर्वतीर्थैर्न दानाद्यैर्न तपोभिश्च न व्रतैः ॥ अपि वा सकलैर्धर्मैर्युक्तो नाऽऽप्नोति तां गतिम् ॥ २२ ॥

॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ त्रिःसप्तकुलम् एकविंशतिकुलानि ॥ २० ॥ २१ ॥ २२ ॥

प्रयागपातात् प्रयागे देहत्यागात्, भृगोः पर्वतशिखरात् ॥ २३ ॥ २४ ॥ २५ ॥ विकर्मस्था निषिद्धकर्मकर्तारः अविकर्मस्थास्तद्भिन्ना विध्युक्तकर्मकर्तारः ॥ २६ ॥ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ प्रतीपः पराङ्मुखः ॥ ३४ ॥ ३५ ॥ ३६ ॥ व्यवसितं कर्तुं निश्चितम् ॥ ३७ ॥ ३८ ॥

प्रयागपाताद्रणमध्यपाताद्भृगोश्च पातान्मरणाच्च काश्याम् ॥ न तां गतिं यांति जनाश्च सर्वे वैशाखनिष्ठेन च या प्रपद्यते ॥ २३ ॥ प्रातः स्नात्वा देवपूजां च कृत्वा श्रुत्वा कथां मासमाहात्म्यसंज्ञाम् ॥ धर्मान्कृत्वा चोचितान्वैष्णवांश्च स वै भवेद्विष्णुलोकैकनाथः ॥ २४ ॥ अप्रमाण महं मन्ये लोकं विष्णोर्जगत्पतेः ॥ यो न पूर्येत कोटचोघैः सर्वतः कमलासन ॥ २५ ॥ माधवावसथेनेह समस्तेन पितामहम् ॥ विकर्मस्थाऽविकर्मस्थाः शुचयोऽशुचयस्तथा ॥२६॥ कृत्वा वैशाखकृत्यानि लोका यान्ति नृपाऽऽज्ञया ॥ योऽस्माकं हि महच्छत्रुर्भवतां च विशेषतः॥२७॥ निग्राह्यो जगतां नाथ भवताऽसौ महीपतिः ॥ हित्वा हि सकलान्धर्मान्सकृद्वैशाखस्नानतः ॥ २८ ॥ असंस्कृतजना यांति वैकुण्ठं हरिमंदिरम् ॥ अस्माभिस्तु कृतोपेक्षो विष्णुपादैकसंश्रयः ॥ २९ ॥ समस्तं नेष्यते लोकं पार्थिवो नात्र संशयः ॥ एष दण्डपटो ह्यद्य तव पद्भ्यां निवेदितः ॥३०॥ लोकपालत्वमतुलमर्जितं तेन भूभुजा ॥ किमपत्येन जातेन मातुः क्लेशकरेण वै ॥३१॥ यो न पातयते शत्रुं ज्येष्ठमासीव भास्करः ॥ वृथासुता हि युवतिर्जाता चेद्धि कुपुत्रिणी ॥३२॥ न तस्याः स्फुरते कीर्तिर्घनस्येव शतह्रदा ॥ यत्पितुर्नोद्धरेत्पापाद्विद्यया वा बलेन वा ॥३३॥ मातुर्जठरजो रोगः स प्रसूतो धरातले ॥ धर्मे चाऽर्थे च कामे च यत्प्रतीपो भवेत्सुतः ॥ ३४ ॥ मातृहा ह्युच्यते सद्भिः स पुत्रः पुरुषाधमः ॥ तन्माता नृपपत्नी च लोकविख्यातसत्क्रिया ॥ ३५ ॥ एकैव वीरसूर्लोके वीरः स नात्र संशयः ॥ यथा वै कीर्तिमाज्ञातो मल्लिपेमार्जनाय वै ॥ ॥ ३६ ॥ नेदं व्यवसितं देव केनचित्क्षत्रियेण हि ॥ पुराणेषु जगन्नाथ न श्रुतं पटमार्जनम् ॥ ३७ ॥ सोऽहं न जानामि जगत्पतीश ऋते क्षितीशं हरितत्परं तम् ॥ प्रचोदयन्तं पटहं सुघोषाद्विलोपयानं मम वेश्ममार्गम् ॥ ३८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे यमदुःखनिरूपणंनाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥

इति वैशाखमासमाहात्म्यटीकायां द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥

॥ अथ यमस्य वचनं श्रुत्वा ब्रह्मोत्तरं ददात्यस्मिंस्त्रयोदशे–किमाश्चर्यमित्यादिना । सतां गणेषु साधूनां समुदायेषु ॥ १ ॥ शासनात् वैशाखधर्माः सर्वैरनुष्ठेया इति
नियोगात् ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ समीहते यत्नं करोति ॥ १२ ॥ शक्तिविनिष्क्रांते शक्तिमुल्लंघ्य वर्तमाने अशक्ये

॥ ॥ ब्रह्मोवाच ॥ ॥ किमाश्चर्यं त्वया दृष्टं किमर्थं खिद्यते भवान् ॥ सद्गणेषु कृतस्तापः स तापो मरणांतिकः ॥१॥ तस्योच्चारणमात्रेण प्राप्यते
परमं पदम् ॥ न गच्छंति हरेर्लोकं कथं भूपस्य शासनात् ॥ २ ॥ एकोऽपि गोविन्दकृतः प्रणामः शताश्वमेधावभृथेन तुल्यः ॥ यज्ञस्य कर्त्ता
पुनरेति जन्म हरेः प्रणामो न पुनर्भवाय ॥ ३ ॥ कुरुक्षेत्रेण किं तस्य सरस्वत्या च किं तथा ॥ जिह्वाग्रे वर्तते यस्य हरिरित्यक्षरद्वयम् ॥ ४ ॥
ब्राह्मणः श्वपचीं भुंजन्विशेषेण रजस्वलाम् ॥ यदि विष्णुं स मरणे स्मरेन्नाप्नोति तत्पदम् ॥ ५ ॥ अभक्ष्यभक्षणाज्जातं विहायाघस्य संचयम् ॥
प्रयाति विष्णुसायुज्यं यतो विष्णुप्रिया स्मृतिः ॥ ६ ॥ एवं विष्णुप्रियो मासो वैशाखो नाम वै यम ॥ यद्धर्मश्रवणादेव मुच्यते सर्वकिल्बिषैः
॥ ७ ॥ यातीति किमु वक्तव्यं तस्यानुष्ठानतत्परः ॥ यस्मिन्संगीयते यो हि प्रीयते पुरुषोत्तमः ॥ ८ ॥ कथं न याति च गतिं तस्याऽनुष्ठानतत्परः ॥ अस्माकं जगतां नाथो जनिता पुरुषोत्तमः ॥ ९ ॥ तस्येष्टान्माधवे मासि धर्मानेतान्करोत्ययम् ॥ तस्य विष्णुः प्रसन्नात्मा सहाये
सर्वदा स्थितः ॥ १० ॥ न तस्य भूपतेः सौरे समर्थस्त्वं च शिक्षणे ॥ न वासुदेवभक्तानामशुभं विद्यते क्वचित् ॥ जन्ममृत्युजराव्याधि
भयं नैवोपजायते ॥ ११ ॥ नियोगी स्वामिकार्येषु यावच्छक्ति समीहते ॥ तावता स कृतार्थः स्यान्नरकान्नैव गच्छति ॥ १२ ॥ कार्ये शक्ति
विनिष्क्रान्ते स्वामिने च निवेदयेत् ॥ अनृणस्तावता भृत्यो नियोगी सुखमश्नुते ॥ १३ ॥ तस्मान्निवेदितार्थस्य न ऋणं न च पातकम् ॥
यत्ने कृते स्वकर्तव्ये नापराधोस्ति देहिनः ॥ १४ ॥ तस्मादशक्यकार्येऽस्मिन्न विशोचितुमर्हसि ॥ १५ ॥ इत्युक्तो ब्रह्मणा सौरिः
पुनरत्यंतखिन्नधीः ॥ उवाच दीनया वाचा गलद्बाष्पाऽऽकुलेक्षणः ॥ १६ ॥ प्राप्तं तात मया सर्वं त्वदंघ्रिभजनेन वै ॥ नाऽहं यास्ये पुनः कर्तुं
नियोगं पद्मसंभव ॥ १७ ॥

इति यावत् ॥ १३ ॥ नियोगी कार्ये नियुक्तः ॥ १५ ॥ १६ ॥ १७ ॥

॥ १८ ॥ १९ ॥ विज्वरः गततापः ॥ २० ॥ २१ ॥ पश्चात्तदीरितं विष्णुप्रोक्तं कर्म समाचर इति शेषः ॥ २२ ॥ २३ ॥ प्रत्युक्तिर्विरुद्धभाषणम् ॥
॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ कंजजः विष्णुनाभिकमलोत्पन्नो ब्रह्मा ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

प्रशासति महावीर्ये भूपेऽस्मिन्भूमिमण्डले ॥ चालयित्वा स्वधर्मांश्च तमेकं भूपतिं विभो ॥१८॥ कृतकृत्योऽस्मि तनयो गयायां पिण्डदो यथा॥
कृपालो तदिदं कार्यं साधयस्व ममाव्ययम् ॥ १९ ॥ विज्वरस्तु ततो भूयः शासनं ते करोम्यहम् ॥ श्रुत्वा ब्रह्मा यमेनोक्तं पुनश्चिंतापरायणः ॥
॥ २० ॥ तमुवाच पुनर्ब्रह्मा सांत्वयन्बहुधाप्यमुम् ॥ ॥ ब्रह्मोवाच ॥ ॥ न निग्राह्यस्त्वया राजा विष्णुधर्मपरायणः ॥ २१ ॥ यदि च्छल
यसे कोपाद्गच्छामो ह्यंतिकं हरेः ॥ निवेद्य सकलं तस्मै कर्म पश्चात्तदीरितम् ॥ २२ ॥ स एव कर्त्ता लोकस्य धर्मस्य परिपालकः ॥ स च दण्ड
धरोऽस्माकं शास्ता कर्त्ता नियामकः ॥२३॥ न तदुक्तेऽस्ति प्रत्युक्तिरस्माकं विहिता वृष ॥ न राजोक्तेस्तु प्रत्युक्तिर्दृश्यते क्वाऽपि भूतले ॥ २४ ॥
इत्याश्वास्य यमं तेन साकं क्षीरांबुधिं ययौ ॥ ब्रह्मा तुष्टाव चिन्मात्रं निर्गुणं परमेश्वरम् ॥ २५ ॥ सांख्ययोगैरद्वितीयमेकं तं पुरुषोत्तमम् ॥
आविरासीत्तदा विष्णुर्ब्रह्मणा संस्तुतो हरिः ॥ २६ ॥ प्रणामं चक्रतुस्तस्मै यमो ब्रह्मा च सत्वरम् ॥ तावुवाच महाविष्णुर्मेघगंभीरया गिरा ॥
॥ २७ ॥ कस्माद्युवामिहाऽऽयातौ किं दुःखं दनुजैरभूत् ॥ म्लानं यममुखं कस्मात्केन वा नतकंधरः ॥ २८ ॥ एतद्वदस्व मे ब्रह्मन्नित्युक्तश्चाह
कंजजः ॥ त्वद्दासवर्ये भूपाले भूमिं शासति वै नराः ॥ २९ ॥ वैशाखधर्मनिरता यांति ते परमव्ययम् ॥ ततो यमपुरी शून्या तेन चाऽतीव दुः
खितः ॥ ३० ॥ तेन युद्धं चकाराऽसौ हंतुं दंडमथाऽददे ॥ त्वच्चक्रेण पराभूतो ययावद्य ममान्तिकम् ॥ ३१ ॥ न च शक्ता वयं दंडं त्वद्भक्तानां
महात्मनाम् ॥ तस्मात्त्वामेव शरणं वयं प्राप्ता महाविभो ॥ ३२ ॥ तस्माद्भूपं दंडयित्वा पालयैनं यमं स्वकम् ॥ इत्युक्तः प्रहसन्प्राह ब्रह्माणं
यममेव च ॥ ३३ ॥ लक्ष्मीं वाऽपि परित्यक्ष्ये प्राणान्देहमथाऽपि वा ॥ श्रीवत्सं कौस्तुभं मालां वैजयंतीमथाऽपि वा ॥३४॥ श्वेतद्वीपं च वैकुंठं
क्षीरसागरमेव च ॥ शेषं च गरुडं चैव न भक्तं त्यक्तुमुत्सहे ॥ ३५ ॥ विसृज्य सकलान्भोगान्मदर्थे त्यक्तजीवितान् ॥ मदात्मकान्महाभागा
न्कथं तांस्त्यक्तुमुत्सहे ॥ ३६ ॥ तस्मात्त्वद्दुःखशमने ह्युपायं कल्पयाम्यहम् ॥ तस्य चायुर्मया दत्तमयुतं भूपतेर्भुवि ॥ ३७ ॥

अयुतं दशसहस्रसंख्यापरिमितम् ॥ ३७ ॥

दुरात्मवान् दुष्टबुद्धिः ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ सहस्रे पुरुषाणां सहस्रे ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ कुर्वंति आचरंति,
वैशाखधर्मानिति शेषः ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ अतिविस्मयेत्यादिश्लोकार्द्धे ब्रह्मेति कर्तृपदमध्याहार्यम् ॥ ५४ ॥ ५५ ॥ ५६ ॥

गतान्यष्टौ सहस्राणि तत्रेदानीं नरांतक ॥ आयुःशेषे तेन नीते मत्सायुज्यं गतेऽपि च ॥३८॥ भविष्यति ततो राजा वेनोनाम दुरात्मवान् ॥ स लुंपति महाधर्मान्सर्वानेतान्छ्रुतीरितान् ॥३९॥ तदा वैशाखधर्माश्च विच्छिन्नाःस्युर्न संशयः ॥ स्वकृतेनैव पापेन वेनो दग्धो भविष्यति ॥४०॥ पश्चादहं पृथुर्भूत्वा पुनर्धर्मान्प्रवर्तये ॥ तदा जनेषु प्रख्यातान्वैशाखोक्तान्करोम्यहम् ॥४१॥ मद्भक्तो मद्गतप्राणो यस्तु विन्यस्तसंग्रहः ॥ एकः सहस्रे भविता तस्य प्रख्यापयेद्धि तान् ॥ ४२ ॥ कश्चिदेव हि जानातु धर्मानेतान्क्षितौ मम ॥ ततस्ते भविता कार्यं मा विषीद नरांतक ॥ ४३ ॥ दापयिष्यामि ते भागं मासेऽस्मिन्माधवेऽपि च ॥ नरैः सर्वैश्च वैशाखधर्मनिष्ठैर्महात्मभिः ॥ ४४ ॥ भूपेनाऽपि च कालेन खेदं शमय तेन च ॥ वीर्यशुल्कं तु ते भागं शत्रोर्भुंक्ते बलाधिकात् ॥ ४५ ॥ गृह्णन्गृह्णन्स्वकं भागं न भागी दुःखमर्हति ॥ त्वामुद्दिश्य न कुर्वंति प्रत्यहं ये नरा भुवि ॥४६॥ स्नानं चार्घ्यं सोदकुंभं दध्यन्नं चांतिमे दिने ॥ वैशाखे सकलं कर्म तेषां च विफलं भवेत् ॥ ४७ ॥ तस्मात्क्रोधं त्यज नृपे भागदे मत्परायणे ॥ ये के चाऽपि च कुर्वंति लोके ते भागदा नराः ॥ ४८ ॥ वैशाखोक्ते महाधर्मे तेषां विघ्नं च मा कुरु ॥ मामेव ये यजंत्यद्धा त्वां हित्वा धर्मपालकम् ॥ ४९ ॥ मदाज्ञया महाभाग तदा दंडं च त्वं कुरु ॥ नृपाद्भागं दापयितुं सुनंदं प्रेषयामि च ॥५० ॥ मच्छासनात्स वै गत्वा भागं ते दापयिष्यति ॥ तिष्ठत्येवं यमे स्वस्य सन्निधौ गरुडासनः ॥ ५१ ॥ सुनन्दं प्रेषयामास नृपं बोधयितुं विभुः ॥ सोऽपि गत्वा बोधयित्वा पार्श्वं च पुनरागमत् ॥ ५२ ॥ इत्याश्वास्य यमं विष्णुस्तत्रैवान्तरधीयत ॥ यमं स्वयं सांत्वयित्वा समनुज्ञाप्य वेगतः ॥ ५३ ॥ अतिविस्मयमापन्नो ययौ धाम सहानुगैः ॥ यमोऽपि स्वपुरीं प्रायात्किंचित्संहृष्टमानसः ॥ ५४ ॥ पश्चाद्विष्णोर्निदेशेन सुनन्दपरिबोधितः ॥ भागदाः सकला लोका ये वैशाखपरायणाः ॥ ५५ ॥ धर्मराजं पुरस्कृत्य ये न कुर्वंति मानवाः ॥ तेषां हि स्वयमादत्ते पुण्यं वैशाखसंभवम् ॥ ५६ ॥ कुर्याच्च प्रत्यहं स्नानं दद्यादर्घ्यं यमाय वै ॥ वैशाखे सकलं पुण्यमन्यथा विफलं भवेत् ॥ ५७ ॥

अन्यथा यमायार्घ्यमदत्वा ॥ ५७ ॥

॥ ५८ ॥ ५९ ॥ ६० ॥ सीदते वृत्तिहीनायेति यावत् ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ वैवस्वतस्थः वैवस्वतमन्वन्तरोत्पन्नः ॥

सोदकुम्भं च दध्यन्नं पौर्णमास्यां च माधवे ॥ धर्मराजं समुद्दिश्य दातव्यं प्रथमं जनैः ॥ ५८ ॥ पश्चात्पितॄन्समुद्दिश्य गुरुमुद्दिश्य वै नरः ॥
मधुसूदनमुद्दिश्य पश्चाद्देवं जनार्दनम् ॥ ५९ ॥ शीतलोदकदध्यन्नं तांबूलं च सदक्षिणम् ॥ सफलं कांस्यपात्रस्थं ब्राह्मणाय निवेदयेत् ॥ ६० ॥
दद्याच्च प्रतिमां दिव्यां मधुसूदनदेवताम् ॥ मासधर्मप्रवक्त्रे च दद्याद्विप्राय सीदते ॥ ६१ ॥ तमेव धर्मवक्तारं पूजयेद्विभवैः स्वकैः ॥ इत्यादिष्टः
सुनन्देन तथा राजा चकार ह ॥ ६२ ॥ स नीत्वा चायुषः शेषं भुक्त्वा भोगान्यथेप्सितान् ॥ पुत्रपौत्रादिभिर्युक्तो जगाम हरिमंदिरम् ॥ ६३ ॥
वैकुण्ठस्थे नृपे तस्मिन्वेनो राजाऽधमोऽभवत् ॥ सर्वे धर्माश्च वैशाखधर्मा अपि विशेषतः ॥ ६४ ॥ दुरात्मना च तेनैव लुप्ता एव बभूविरे ॥ न
प्रख्याताः पुनर्भूमौ भूरिशो मोक्षहेतवः ॥ ६५ ॥ यः कश्चिन्नैव जानाति वैशाखोक्तानिमाञ्छुभान् ॥ बहुजन्मार्जिते पुण्यपरिपाक उपागते ॥
॥ ६६ ॥ वैशाखोक्तेषु धर्मेषु मतिरात्यन्तिकी भवेत् ॥ ॥ मैथिल उवाच ॥ ॥ पूर्वमन्वंतरस्थो हि वेनो राजा दुरात्मवान् ॥ ६७ ॥ अयं
वैवस्वतस्थो हि राजा चेक्ष्वाकुनंदनः ॥ इति श्रुतं मया पूर्वमिदानीं चोच्यते त्वया ॥ ६८ ॥ अयं वैकुण्ठगः पश्चाद्वेनो राजा भविष्यति ॥ इत्ये
तं संशयं छिंधि श्रुतदेव महामते ॥ ६९ ॥ ॥ श्रुतदेव उवाच ॥ ॥ पुराणेषु च वैषम्यं युगकल्पव्यवस्थया ॥ न चाप्रामाण्यशंका ते कथाया
व्यत्यये क्वचित् ॥ ७० ॥ गते दैनंदिने कल्पे यथैषा शाश्वती शुभा ॥ मार्कंडेयेन मे प्रोक्ता सा चोक्ता तव भूपते ॥ ७१ ॥ तस्मान्न ख्याति
मायान्ति धर्मा वैशाखसंभवाः ॥ कश्चिदेव हि जानाति विरक्तो विष्णुतत्परः ॥ ७२ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां
संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदांबरीषसंवादे यमदुःखसांत्वनंनाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ छ ॥ ॥ श्रुतदेव
उवाच ॥ ॥ यः प्रातः स्नाति वैशाखे मेषसंस्थे दिवाकरे ॥ मधुसूदनमभ्यर्च्य कथां श्रुत्वा हरेरिमाम् ॥ १ ॥ स तु पापविनिर्मुक्तो याति
विष्णोः परं पदम् ॥ वाच्यमानां कथां हित्वा योऽन्यां सेवेत मूढधीः ॥ २ ॥

॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ इति वैशाखमासमाहात्म्यटीकायां त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ छ ॥ ॥ अथ चतुर्दशे स्नानस्य कथायाश्च माहात्म्यं
कथयति—यः प्रातरिति ॥ १ ॥ अन्याम् अन्यधर्मविषयाम् ॥ २ ॥

॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ नीरजं रजोगुणरहितम् ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥

रौरवं नरकं प्राप्य पैशाचीं योनिमाप्नुयात् ॥ अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥ ३ ॥ पापघ्नं पावनं धर्म्यं सद्यो वंद्यं पुरातनम् ॥ पुरा
गोदावरीतीरे क्षेत्रे ब्रह्मेश्वरे शुभे ॥ ४ ॥ दुर्वासशिष्यौ परमहंसौ ब्रह्मैकनिष्ठितौ ॥ सदैवोपनिषद्विद्यानिष्ठितौ निरपेक्षितौ ॥ ५ ॥ भिक्षा
मात्राशिनौ पुण्यौ तौ गुहावासिनावुभौ ॥ सत्यनिष्ठतपोनिष्ठाविति ख्यातौ जगत्त्रये ॥ ६ ॥ तयोर्मध्ये सत्यनिष्ठः सदा विष्णुकथापरः ॥
श्रोतॄणामप्यभावे च व्याख्यातॄणां तथा नृप ॥ ७ ॥ तदा कर्मकला नित्याः करोत्यद्धा मुनीश्वरः ॥ श्रोता चेदस्ति यः कश्चित्तस्मै व्याख्या
त्यहर्निशम् ॥ ८ ॥ यदि व्याख्याति कश्चिद्वा पुण्यां विष्णुकथां शुभाम् ॥ तदा संकुच्य कर्माणि शृणोति श्रवणे रतः ॥ ९ ॥ अतिदूर
स्थतीर्थानि देवतायतनानि च ॥ हित्वा कथाविरोधीनि तथा कर्माणि भूरिशः ॥ १० ॥ शृणोति च कथां दिव्यां श्रोतृभ्यो वक्ति वै स्वयम् ॥
विना कथां न जानाति सेव्यमन्यन्नरेश्वर ॥ ११ ॥ व्याख्याति च गृहे स्वस्य वक्ता रोगाद्युपद्रुतः ॥ कूपस्नानपरो भूत्वा शृणोत्येव कथां
मुनिः ॥ १२ ॥ कथायाश्च विरामे तु स्वकृत्यं साधयत्यलम् ॥ कथां वै शृण्वतः पुंसो जन्मबन्धो न विद्यते ॥ १३ ॥ सत्त्वशुद्धिस्ततो
विष्णावरतिश्चैव गच्छति ॥ रतिश्च जायते विष्णौ सौहृदं चैव साधुषु ॥ १४ ॥ नीरजं निर्गुणं ब्रह्म सद्यो हृद्यवरुध्यते ॥ ज्ञानहीनस्य वै
पुंसः कर्म वै निष्फलं भवेत् ॥ १५ ॥ बहुधाचरितं चाऽपि यथैवांधकदर्पणम् ॥ कर्माणि क्रियमाणानि बहुधा शोचितात्मभिः ॥ १६ ॥
सत्त्वशुद्ध्यै भवंत्येव सत्त्वशुद्ध्या श्रुतिं व्रजेत् ॥ श्रुतेस्तु ज्ञानमासाद्य ज्ञात्वा ध्यानाय कल्पते ॥ १७ ॥ बहुधा श्रवणं ध्यानं मननं श्रुतिचो
दितम् ॥ यत्र विष्णुकथा नास्ति यत्र साधुजना नहि ॥ १८ ॥ साक्षाद्गंगातटं वाऽपि त्याज्यमेव न संशयः ॥ यद्देशे तुलसी नास्ति वैष्णवं
धाम वा शुभम् ॥ १९ ॥ यत्र विष्णुकथा नास्ति मृतस्तत्र तमो व्रजेत् ॥ यद्ग्रामे वैष्णवं धाम नास्ति कृष्णमृगोऽपि वा ॥२०॥ यत्र विष्णुकथा
नास्ति साधवो वा तदाश्रयाः ॥ मृतस्तत्र पुमान्क्षिप्रं श्वानयोनिशतं व्रजेत् ॥२१॥ विचार्योपनिषद्विद्यामिति निश्चित्य वै मुनिः ॥ सदा विष्णु
कथाऽऽसक्तो विष्णुस्मृतिपरायणः ॥ २२ ॥ न किंचिदधिकं जातु मन्यते श्रवणात्परम् ॥ इतरस्तु तपोनिष्ठः कर्मनिष्ठो दुराग्रही ॥ २३ ॥

॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

॥ २४ ॥ कर्मलोपभयात् आह्निकलोपभयात् ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ शुष्ककंठोष्ठतालुकः शुष्कं कण्ठोष्ठतालुकं यस्य ॥ २९ ॥ दिव्याः अयुताः इतिच्छेदः, संधिरार्ष ः। दिव्या देवसम्बन्धिनः, अयुताः दशसहस्रसंख्यापरिमिताः समाः वर्षाणि ॥३०॥ ३१ ॥ ३२ ॥ ३३ ॥ पैठिनसीं महाराष्ट्रभाषायां 'पैठण' नाम्ना प्रसिद्धाम्

न व्याख्याति स्वयं वाऽपि न शृणोति च सत्कथाम् ॥ वाच्यमानां कथां हित्वा तीर्थस्नानाय गच्छति ॥२४॥ तीर्थेऽपि च प्रवृत्तायां कथायां भूमिपालक ॥ कर्मलोपभयाद्दूरं याति चांचल्यशक्तितः ॥२५॥ व्रजंति गृहकृत्यार्थं संगमात्परतो जनाः ॥ न श्रोतारो न वक्तारस्तस्य पार्श्वे तु कर्मिणः ॥२६॥ दुरात्मनस्तु दुर्बुद्धेः काल एवं क्षयं गते ॥ जिह्वां श्रुतिं च न क्वापि संप्राप्ता हि कथा विभोः ॥२७॥ अश्रोतृत्वादवक्तृत्वाद्दुर्बुद्धित्वाद्दुराग्रहात् ॥ पश्चात्पंचत्वमासाद्य सद्यो धर्मेण वै मुनिः ॥ २८ ॥ पिशाचोऽभूच्छमीवृक्षे च्छिन्नकर्णाह्वयोऽबलः ॥ निराश्रयो निराहारः शुष्ककण्ठोष्ठतालुकः ॥२९॥ एवं वै खिद्यमानस्य समा दिव्यायुतागताः ॥ नापश्यत्स्वस्य त्रातारं निराहारोऽतिदुःखितः ॥ ३० ॥ स्वकृतं चिंतया नश्च मत्तोन्मत्त इवाभ्रमत् ॥ क्षुधया पर्यटन्वाऽपि निर्वृतिं नाप मूढधीः ॥ ३१ ॥ कृशानुसदृशो वायुरंगं स्पृष्ट्वा कृतात्मनः ॥ कालाग्नितुल्या आपश्च फलपुष्पादिकं विषम् ॥ ३२ ॥ न क्वापि सुखमापेदे कर्मठो दीनधीरयम् ॥ एवं व्यवसिते तस्मिन्नरण्ये जनवर्जिते ॥ ३३ ॥ कथया रहिते क्षेत्रे स्वाश्रये साधुवर्जिते ॥ दैवादायात्सत्यनिष्ठस्तदा पैठिनसीं पुरीम् ॥ ३४ ॥ गच्छन्मार्गे ददर्शाऽसौ छिन्नकर्णं बहुव्यथम् ॥ दृष्ट्वाऽऽत्मानं द्रावयन्तं रुदंतं क्षुधयाऽऽतुरम् ॥ ३५ ॥ मा भैषीरिति चाभाष्य कोऽसीत्याह मुनीश्वरः ॥ दशेदृशी च कस्मात्ते न ते दुःखमतः परम् ॥ ॥ ३६ ॥ इत्याश्वस्तोऽमुना च्छिन्नकर्णः प्राहातिविह्वलः ॥ तपोनिष्ठो यतिरहं शिष्यो दुर्वाससः परम् ॥ ३७ ॥ ब्रह्मेश्वरक्षेत्रवासी कर्मनिष्ठो दुराग्रही ॥ कर्मलोपभयान्मौढ्यान्मया दुर्बुद्धिना मुने ॥ ३८ ॥ साधुभिर्वाच्यमानाऽपि नादृता विष्णुसत्कथा ॥ न व्याख्याता च श्रोतृभ्यः कथा कर्मनिकृंतनी ॥ ३९ ॥ तेन कर्मविपाकेन महताऽहं मृतिं गतः ॥ छिन्नकर्णोऽभवं नाम्ना पिशाचो दुःखविह्वलः ॥ ४० ॥ न पश्यामि च त्रातारं दुःखादस्मात्कथंचन ॥ तव दृष्टिपथं यातो दिष्ट्याऽहं गतकल्मषः ॥ ४१ ॥ अद्य मे देवतास्तुष्टा गुरवः साधवश्च ये ॥ हरिश्च मे प्रसन्नोऽभूद्यतस्ते दर्शनं मम ॥ ४२ ॥

॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ वाच्यमानां पठिताम् ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥

॥ ४३ ॥ ४४ ॥ सद्योध्वस्ताऽखिलाऽशुभः सद्यः तत्क्षणमेव ध्वस्तमखिलमशुभं पातकं यस्य ॥ ४५ ॥ ४६ ॥ ४७ ॥ माहात्म्यश्रवणस्य एवं चिंतयानः इत्यत्र
प्रभावमिति शेषः ॥ ४८ ॥ ४९ ॥ ५० ॥ इति वैशाखमासमाहात्म्यटीकायां चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥ ॥ वैशाखे जलदानमाहात्म्यं प्रतिपादयितु

पपात पादयोर्भूमौ त्राहित्राहीति वै रुदन् ॥ ततस्तु कृपयाऽऽविष्टः सत्यनिष्ठो महायशाः ॥४३॥ दोर्भ्यामुत्थापयामास शंतमाभ्यां मुनीश्वरः ॥
ततस्त्वप उपस्पृश्य ददौ पुण्यमनुत्तमम् ॥४४॥ वैशाखमासमाहात्म्यश्रवणस्य मुहूर्तजम् ॥ तेन पुण्यप्रभावेन सद्योध्वस्ताखिलाशुभः ॥ ४५ ॥
पिशाचदेहनिर्मुक्तो दिव्यदेहधरोऽभवत् ॥ दिव्यं विमानमारुह्य तं प्रणम्य महामुनिम् ॥४६॥ आमंत्र्य च परिक्रम्य ययौ विष्णोः परं पदम् ॥
सत्यनिष्ठस्ततो धीमान्ययौ पैठिनसीं पुरीम् ॥ ४७ ॥ माहात्म्यश्रवणस्यैवं चिंतयानः पुनःपुनः ॥ ॥ श्रुतदेव उवाच ॥ ॥ यत्र विष्णुकथा
पुण्या शुभा लोकमलाऽपहा ॥ ४८ ॥ तत्र सर्वाणि तीर्थानि क्षेत्राणि विविधानि च ॥ यत्र प्रवहते पुण्या शुभा विष्णुकथाऽऽपगा ॥ ४९ ॥
तद्देशवासिनां मुक्तिः करसंस्था न संशयः ॥ ५० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे नार
दाम्बरीषसंवादे कथाप्रशंसायां पिशाचमुक्तिप्राप्तिर्नाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥ ॥ श्रुतदेव उवाच ॥ ॥ भूयः शृणुष्व भूपाल
माहात्म्यं पापनाशनम् ॥ वैशाखस्य च मासस्य वल्लभस्य मधुद्विषः ॥ १ ॥ पुरा पांचालदेशे तु राजा पुरुयशोऽभवत् ॥ तनयो भूरियशसः
पुण्यशीलस्य धीमतः ॥ २ ॥ पितर्युपरते भूप राज्यस्थो धर्मलालसः ॥ शौर्यौदार्यगुणोपेतो धनुर्विद्याविशारदः ॥ ३ ॥ शशास पृथिवीं सर्वां
स्वधर्मेण महामतिः ॥ पूर्वजन्मजलादानाद्दोषेण महता वृतः ॥ ४ ॥ संपद्धानिमवापाऽसौ कालेन कियताऽनघ ॥ हया गजा मृतिं याता
महद्रोगेण पीडिताः ॥ ५ ॥ दुर्भिक्षमतुलं चासीन्निर्मानुष्यविधायकम् ॥ राज्यं कोशं तदा चाऽऽसीद्गजभुक्तकपित्थवत् ॥ ६ ॥ बलहीनं नृपं
ज्ञात्वा कोशराष्ट्रविवर्जितम् ॥ तं जेतुमेष समय इति निश्चितमानसाः ॥ ७ ॥ आजग्मुः शतशो भूपा रिपवस्तस्य भूपतेः ॥ जिग्युर्युद्धेन तं
भूपं पांचालविषयाधिपम् ॥ ८ ॥ पराजितस्ततो राजा विवेश गिरिगह्वरे ॥ शिखिन्या भार्यया साकं धात्र्यादिगणसंयुतः ॥ ९ ॥

मितिहासं प्रस्तौति–भूय इत्यादिना ॥ १ ॥ २ ॥ ३ ॥ पूर्वजन्मनि वैशाखमासे जलादानात् इत्यर्थः ॥ ४ ॥ ५ ॥ गजभुक्तकपित्थं यथा अन्तःशून्यं भवति तथा
सर्वं शून्यं भूतमित्यर्थः ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ ३४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ ब्राह्मणौ वदतं कथयतमित्यर्थः ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

अज्ञातपद्धतिश्चान्यैर्बहुदुःखसमाकुलः ॥ त्रिपंचाशत्समाश्चैव नीतास्तेन विलीयता ॥ १० ॥ चिन्तयामास भूपालः किमेतदिति भूरिशः ॥
कर्मणा जन्मशुद्धोऽहं मातृपितृहिते रतः ॥ ११ ॥ गुरुभक्तः सदाक्षिण्यो ब्रह्मण्यो धर्मतत्परः ॥ दयावान्सर्वभूतेषु देवभक्तो जितेन्द्रियः॥ १२ ॥
न भ्राता मे न पुत्रो मे न च मे सुहृदो हिताः ॥ दयापौरुषविख्याताः कुलीनस्याऽपि मे कुतः ॥ १३ ॥ केन वा कर्मणा चाप्तं दारिद्र्यं भूरि
दुःखदम् ॥ केन वाऽपजयो मेऽद्य केन वा वनवासिता ॥ १४ ॥ इति चिन्ताकुलो राजा गुरुं सस्मार खिन्नधीः ॥ याजोपयाजकौनाम सर्वज्ञौ
मुनिसत्तमौ ॥ १५ ॥ आजग्मतुर्मुनींद्रौ तौ राज्ञाहूतौ महामती ॥ तौ दृष्ट्वा सहसोत्थाय राजा पांचालवल्लभः ॥ १६ ॥ ननाम शिरसा भक्त्या
प्रवासेनाऽतिपीडितः ॥ राजचिह्नविहीनश्च केनाप्यज्ञातपद्धतिः ॥ १७ ॥ तूष्णीं तस्थौ मुहूर्तं हि पतित्वा भुवि पादयोः ॥ दोर्भ्यामुत्थापि
तस्ताभ्यां परिमृष्टाऽश्रुलोचनः ॥ १८ ॥ विधिवत्पूजयामास वन्यैरेवाऽर्हणैः शुभैः ॥ सूपविष्टौ तु तौ विप्रौ पप्रच्छाऽऽनतकन्धरः ॥ १९ ॥
ब्राह्मणौ वदतं दुःखकारणं च क्षितीशितुः ॥ कर्मणा जन्मशुद्धस्य पितृदेवप्रियस्य च ॥ २० ॥ पापभीरोः कृपालोश्च गुरुभक्तस्य मे कुतः ॥
दारिद्र्यं कोशहानिश्च रिपुभिश्च पराभवः ॥ २१ ॥ कस्मादरण्यवासश्च कुत एकाकिता मम ॥ न पुत्रो न च मे भ्राता न हिताः सुहृदश्च मे ॥
॥ २२ ॥ दुर्भिक्षं वा कुतश्चासीद्देशे मत्पालितेऽनघे ॥ एतद्विस्तार्य मे ब्रूतं कारणं मुनिपुंगवौ ॥ २३ ॥ इत्युक्तौ तौ मुनिश्रेष्ठौ भूतेनात्यन्त
दुःखिना ॥ प्रत्यूचतुर्महात्मानौ किंचिद्ध्यानपरायणौ ॥ २४ ॥ ॥ याजोपयाजकावूचतुः ॥ ॥ शृणु भूप प्रवक्ष्यावस्तव दुःखस्य कारणम् ॥
पुरा भूप महापापी व्याधस्त्वं दशजन्मसु ॥२५॥ निष्ठुरः सर्वलोकानां सदा हिंसापरायणः ॥ धर्मलेशाकरः क्वापि न दमो न च वै शमः ॥२६॥
न जिह्वा वक्ति नामानि विष्णोर्वापि कथंचन ॥ चेतः स्मरति गोविन्दचरणांबुरुहद्वयम् ॥ २७ ॥ न प्रणामः कृतः क्वापि शिरसा परमा
त्मने ॥ नव जन्मानि ते भूप गतान्येवं दुरात्मनः ॥ २८ ॥ दशमे जन्मनि प्राप्ते व्याधस्त्वं सह्यभूवरे ॥ निष्ठुरः सर्वलोकानां नराणां त्वं न
रांतकः ॥ २९ ॥ दयाहीनः शस्त्रजीवी सदा हिंसापरायणः ॥ निर्गुणः सकलत्रस्त्वं मार्गपीडाकरः शठः ॥ ३० ॥

॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥

गौडदेशस्थानां गौडदेशोद्भवानां नैजं स्वकीयम् ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ सर्वभूतानामन्तके नाशकरे क्रूरप्राणिनिवासात् एतादृशे पथि मार्गे ॥ ३८ ॥ घर्मपीडितौ घर्मेण सूर्यकिरणतापेन पीडितौ दुःखितौ ॥ ३९ ॥ जटा प्रसिद्धा, चीरं वल्कलं तयोर्धरः धारकः ॥ ४० ॥ शरी शरो बाणः, सोऽस्यास्तीति

प्रजानां गौडदेश्यानां राक्षसो मानुषाशनः ॥ एवं चाब्दान्यतीतानि नैजं हितमजानतः ॥ ३१ ॥ बालापत्यमृगाणां च पक्षिणां च वधात्तव ॥
दयाहीनस्य दुर्बुद्धेर्जन्मन्यस्मिन्नपुत्रता ॥ ३२ ॥ विश्वासघातकत्वेन भ्रातरो नैव सोदराः ॥ मार्गपीडाकरत्वेन सुहृज्जनविवर्जितः ॥ ३३ ॥
साधूनां च तिरस्काराच्छत्रुभिस्ते पराजयः ॥ कदाप्यदत्तदोषेण दारिद्र्यं पतितं गृहे ॥ ३४ ॥ सदैवोद्वेगकारित्वात्प्रवासस्ते दुरासदः ॥ सर्वेषाम
प्रियत्वाच्च दुःखमत्यंतदुःसहम् ॥ ३५ ॥ निराहारोप्यतः पूर्वं सदा क्रूरेण कर्मणा ॥ तस्माद्राज्यापहारस्ते जन्मन्यस्मिन्महामते ॥ ३६ ॥ अथ
ते सत्कुलीनत्वे हेतूंश्चापि ब्रवीम्यहम् ॥ यदाऽभूर्गौडदेशीयो ह्यंतिमे व्याधजन्मनि ॥ ३७ ॥ स्वकर्मनिरते क्रूरे विपिने कण्टकाविले ॥ तिष्ठ
त्येवं दयाहीने सर्वभूतांतके पथि ॥ ३८ ॥ वैश्यावाजग्मतुर्दिव्यौ धनाढ्यौ घर्मपीडितौ ॥ मुनिश्च कर्षणोनाम वेदवेदांगपारगः ॥ ३९ ॥
जटाचीरधरः पुण्यः कमण्डलुपरिग्रहः ॥ तान्दृष्ट्वा धनुरादाय मार्गं रुद्ध्वा व्यवस्थितः ॥ ४० ॥ अनुद्रुत्य शरी वैश्यौ कृत्वा छिन्नशरीरकौ ॥
तयोरेकं च त्वं हत्वा गृहीत्वाऽखिलतत्पणम् ॥ ४१ ॥ अपरं हन्तुमुद्युक्ते स दुद्राव भयाद्द्रुतम् ॥ पणं गुल्मे विनिक्षिप्य भीतः प्राणपरीप्सकः ॥
॥ ४२ ॥ कर्षणोऽपि मुनिः शीघ्रं व्याधान्मृतिविशंकया ॥ आतपे धावमानः संस्तृषाघर्मप्रपीडितः ॥ ४३ ॥ मूर्च्छामाप गलत्स्वेदः संज्ञामात्रा
वशेषितः ॥ विहायैनं दुद्रुवे च वैश्यो जीवनतत्परः ॥ ४४ ॥ त्वं तावनुद्रुतौ दृष्ट्वा मूर्छितं पथि भूसुरम् ॥ पणं कुत्र विनिक्षिप्तं कियद्दूरं गतो
वणिक् ॥ ४५ ॥ इति पृष्टं द्विजं श्रांतमुज्जीवयितुमुद्यतः ॥ फूत्कृत्वा कर्णयोस्तस्य नागरं स्मृतिकारणम् ॥ ४६ ॥ पल्वलस्थोदकेनैव कृमि
कर्दमसंयुजा ॥ नेत्रे संमृज्य श्रांतस्य पर्णैः संवीज्य तन्मुखे ॥ ४७ ॥ ससंज्ञं च मुनिं कृत्वा त्वमाथ स्वस्थमानसः ॥ मा शंका ते मुने कार्या
मत्तः शस्त्रभृतो वने ॥ ४८ ॥ निष्किंचनः सुखी लोके कुतस्ते भयमुल्बणम् ॥ भिन्नपात्रेण जीर्णेन न मे किंचिद्भविष्यति ॥ ४९ ॥

वाणसहित इत्यर्थः । पणं भांडम् वित्तमित्यर्थः ॥ ४१ ॥ गुल्मे लतादीनां ग्रन्थिरूपे ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ नागरं शुण्ठीचूर्णम् ॥ ४६ ॥ कृमिकर्दमाभ्यां संयुजा सहितेन ॥ ४७ ॥ ४८ ॥ उल्बणम् अतिदुःखदम् ॥ ४९ ॥

पलायता धावमानेन । परस्मैपदमार्षम् ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ आरावम् आक्रोशम् ॥ ५४ ॥ ५५ ॥ पलाशं पत्रम् ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥

एतावद्वद मे विद्वन्वणिक्कुत्र पलायितः ॥ कुत्र गुल्मे धनं क्षिप्तं तेन शीघ्रं पलायता ॥ ५० ॥ अन्यथा त्वां हनिष्यामि यदि मिथ्या वदिष्यसि ॥
॥ ॥ कर्षण उवाच ॥ ॥ धनं गुल्मे विनिक्षिप्तं मार्गादस्मात्पलायितः ॥५१॥ इति प्राह भयात्सोपि पृष्टः प्राणपरीप्सया॥ गच्छ विप्र सुखं मार्गं
मत्तो भीतिं विहाय च ॥ ५२ ॥ इतो विदूरे सलिलं तडागे वर्तते शुभम् ॥ तत्पीत्वा सलिलं पुण्यं गच्छ ग्रामं गतश्रमः ॥ ५३ ॥ अधुनैवा
गमिष्यंति राजकीयाः पथा जनाः ॥ मत्पदान्वेषणे सक्ताः श्रुत्वा रावं वणिक्पतेः ॥ ५४ ॥ तृषार्तमनुगंतुं मे न शक्यं त्वां ततो द्विज ॥ वीज
यानेन पर्णेन घर्मः किंचिद्गमिष्यति ॥ ५५ ॥ तस्मै दत्त्वा पलाशं च त्वमागा विपिनं पुनः ॥ तेन पुण्यप्रभावेन वैशाखे घर्मघर्वरे ॥ ५६ ॥
स्वकार्यार्थं कृतेनापि मुनेस्त्राणाय पद्धतौ ॥ जन्मासीत्ते महापुण्ये राजवंशेऽतिविस्तृते ॥ ५७ ॥ यदीच्छसि सुखं राज्यं धनधान्यादिसंपदः ॥
स्वर्गापवर्गौ यदि वा सायुज्यं वा हरेः पदम् ॥ ५८ ॥ कुरु वैशाखधर्मांस्त्वं सर्वसौख्यमवाप्स्यसि ॥ मासोऽयं माधवोनाम तृतीया चाक्षया
ह्वया ॥ ५९ ॥ गां च सकृत्प्रसूताख्यां देहि विप्राय सीदते ॥ तेन ते कोशपूर्तिः स्याच्छय्यां देहि सुखं भवेत् ॥ ६० ॥ कुरु च्छत्रप्रदानं च
साम्राज्यं ते भविष्यति ॥ स्नानं कुरु यथान्यायं तथैवार्चय माधवम् ॥ ६१ ॥ देहि त्वं प्रतिमां दिव्यां कृत्वा तेन जयो भवेत् ॥ आत्मतुल्यगु
णान्पुत्रान्यदि कामयसे नृप ॥ ६२ ॥ सर्वभूतहितार्थाय प्रपादानं च त्वं कुरु ॥ वैशाखोक्तानिमान्धर्मान्सम्यगाचर भूमिप ॥ ६३ ॥ तेन ते
सकला लोका वशं यांति न संशयः ॥ निष्कामकेन चित्तेन यदि धर्मान्करिष्यसि ॥ ६४ ॥ वैशाखे पुण्यमासेऽस्मिन्प्रीतये मधुघातिनः ॥
प्रत्यक्षो भविता विष्णुस्तव निर्मलचेतसः ॥ ६५ ॥ येन चाचरिताः पुंसा धर्मा ह्येते शुभावहाः ॥ तेषां च ह्यक्षया लोकाः पुराणे कवयो विदुः॥
॥ ६६ ॥ एतत्सर्वं तव प्रोक्तं यथादृष्टं यथाश्रुतम् ॥ इति राजानमामंत्र्य ब्राह्मणौ च पुरोधसौ ॥ ६७ ॥ याजोपयाजकौनाम जग्मतुस्तौ
यथागतौ ॥ ततो राजा महावीर्यः पुरोधोभ्यां च बोधितः ॥ ६८ ॥

॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ राजानं कथयित्वा इति शेषः, आमंत्र्य आपृच्छय ॥ ६७ ॥ ६८ ॥

॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ अर्बुदं दशकोटिसंख्याकम्, दीर्घग्रीवा उष्ट्रा तेषामयुतं दशसहस्राणि ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥

वैशाखधर्मात्सकलांश्चकार श्रद्धयाऽन्वितः ॥ यथोपदिष्टं च तथा मधुसूदनमर्चयत् ॥ ६९ ॥ ततो लब्धप्रभावः सम्बंधुभिः सकलैर्वृतः ॥ पांचालनगरीं प्राप हतशेषबलान्वितः ॥ ७० ॥ ततस्तु शत्रवो भूपा उपश्रुत्य च भूपतेः ॥ प्रवेशं च पुरस्याऽथ पुनराजग्मुरुद्धताः ॥ ७१ ॥ तदा पांचालभूपेन नृपाणामभवद्रणम् ॥ जिग्ये सर्वान्महाबाहूनेक एव महारथः ॥ ७२ ॥ पलायितेषु भूपेषु नानादेशपथिष्वपि ॥ राज्ञां कोशगजानश्वान्स्वयं जग्राह वीर्यवान् ॥ ७३ ॥ अश्वानां निर्बुदं चैव गजानां च त्रिकोटिकम् ॥ रथानामर्बुदं चैव दीर्घग्रीवायुतं तथा ॥ ७४ ॥ रासभाणां त्रिलक्षाणि प्रापयामास तां पुरीम् ॥ वैशाखधर्ममाहात्म्यात्क्षणात्सर्वे च भूभृतः ॥ ७५ ॥ करदा भग्नसंकल्पाः पादाक्रांता बभूविरे ॥ सुभिक्षमतुलं चासीत्पांचालविषयेषु च ॥ ७६ ॥ एकच्छत्रमभूद्राज्यं प्रसादान्मधुघातिनः ॥ पुत्राः पंचाऽपि तस्यासञ्छौर्य्यौदार्यगुणान्विताः ॥ ७७ ॥ धृष्टकीर्तिर्धृष्टकेतुर्धृष्टद्युम्नस्तथाऽपरे ॥ विजयश्चित्रकेतुश्च मयूरध्वजसन्निभाः ॥ ७८ ॥ अनुरक्ताः प्रजाश्चासन्धर्मेण प्रतिपालिताः ॥ वैशाखस्य प्रतापेन प्रत्ययस्तत्क्षणादभूत् ॥ ७९ ॥ पुनश्चकार तान्धर्मान्पांचालनगरीश्वरः ॥ अकामुकेन चित्तेन प्रीतये मधुघातिनः ॥ ८० ॥ धर्मेणानेन संतुष्टो भगवान्मधुसूदनः ॥ अक्षयायां तृतीयायां प्रत्यक्षः समजायत ॥ ८१ ॥ तं दृष्ट्वा विस्मितो भूत्वा परमात्मानमच्युतम् ॥ नारायणं चतुर्बाहुं शंखचक्रगदाधरम् ॥ ८२ ॥ पीतांबरधरं देवं वनमालाविभूषितम् ॥ सलक्ष्मीकं सानुगं च गरुडोपरि संस्थितम् ॥ ८३ ॥ निरीक्ष्य दुःसहं तेजः सद्यो मीलितलोचनः ॥ उत्पतन्संपतन्हर्षान्मत्तोन्मत्त इव भ्रमन् ॥ ॥ ८४ ॥ पुलकांकितसर्वांगो गलद्बाष्पाकुलेक्षणः ॥ तुष्टाव परया भक्त्या प्रांजलिः प्रणतो भुवि ॥ ८५ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे पांचालदेशाधिपतेर्जयप्राप्तिदारिद्रनाशवर्णनं नाम पंचदशोऽध्यायः ॥ १५ ॥ ॥ छ ॥

॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ मत्तोऽनवहितः उन्मत्तश्चित्तविक्षेपवान् ॥ ८४ ॥ इति वैशाखमासमाहात्म्यटीकायां पंचदशोऽध्यायः ॥ १५ ॥ ॥ छ ॥ ॥

पुरुयशसा कृता विष्णुस्तुतिः, तस्मै विष्णुना दत्तं वरप्रदानम्, पुरुयशसो विष्णुसायुज्यं च वर्ण्यते तद्दर्शनेत्यादिना ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ आत्मना स्वमायया ॥ ५ ॥

॥ ॥ श्रुतदेव उवाच ॥ ॥ तद्दर्शनाह्लादपरिप्लुताशयः सद्यः समुत्थाय ननाम मूर्ध्ना ॥ चिरं निरीक्ष्याऽऽकुललोचनो ह्यमुं विश्वात्मदेवं
जगतामधीशम् ॥ १ ॥ दधार पादाववनिज्य तज्जलं यत्पादजाऽऽब्रह्म जगत्पुनाति ॥ समर्चयामास महाविभूतिभिर्महार्हवस्त्राभरणानुलेपनैः
॥ २ ॥ स्रग्धूपदीपामृतभक्षणादिभिस्त्वग्गात्रवित्तात्मसमर्पणेन ॥ तुष्टाव विष्णुं पुरुषं पुराणं नारायणं निर्गुणमद्वितीयम्
॥ ३ ॥ निरंजनं विश्वसृजामधीशं वन्दे परं पद्मभवादिवंदितम् ॥ यन्मायया तत्त्वविदुत्तमा जना विमोहिता विश्वसृजामधीश्वरम् ॥
॥ ४ ॥ मुह्यंति मायाचरितेषु मूढा गुणेषु चित्रं भगवद्विचेष्टितम् ॥ अनीह एतद्बहुधैक आत्मना सृजत्यवत्यत्ति न सज्जतेऽप्यथ ॥ ५ ॥
समस्तदेवासुरसौख्यदुःखप्राप्त्यै भवान्पूर्णमनोरथोऽपि ॥ तत्राऽपि काले स्वजनाभिगुप्त्यै बिभर्षि सत्त्वं खलनिग्रहाय ॥ ६ ॥ तमोगुणं राक्षस
बन्धनाय रजोगुणं निर्गुण विश्वमूर्ते ॥ दिष्ट्या त्वदंघ्रिः प्रणताघनाशनस्तीर्थास्पदं हृदि धृतः सुविपक्वयोगैः ॥ ७ ॥ उत्सिक्तभक्त्युपहृताशय
जीवभावाः प्रापुर्गतिं तव पदस्मृतिमात्रतो ये ॥ भवाख्यकालोरगपाशबन्धः पुनःपुनर्जन्मजरादिदुःखैः ॥ ८ ॥ भ्रमामि योनिष्वहमाखुभक्ष्यवत्प्रवृद्धतर्षस्तव
पादविस्मृतेः ॥ नूनं न दत्तं न च ते कथा श्रुता न साधवो जातु मयाऽपि सेविताः ॥ ९ ॥ तेनारिभिर्ध्वस्तपराध्यर्लक्ष्मीर्वनं
प्रविष्टः स्वगुरुह्यघं स्मरन् ॥ स्मृतौ च तौ मां समुपेत्य दुःखात्संबोधयांचक्रतुरार्तबंधू ॥ १० ॥ वैशाखधर्मैः श्रुतिचोदितैः शुभैः स्वर्गापवर्गादिपुमर्थहेतुभिः
॥ तद्बोधतोऽहं कृतवान्समस्ताञ्च्छुभावहान्माधवमासधर्मान् ॥ ११ ॥ तस्मादभून्मे परमः प्रसादस्तेनाखिलाः संपद ऊर्जिता
इमाः ॥ नाग्निर्न सूर्यो न च चन्द्रतारका न भूर्जलं खं श्वसनोऽथ वाङ्मनः ॥ १२ ॥ उपासितास्तेऽपि हरंत्यघं चिराद्विपश्चितो घ्नन्ति मुहूर्तसेवया
॥ यान्मन्यसे त्वं भविनोऽपि भूरिशस्त्यक्तेषणांस्त्वत्पदन्यस्तचित्तान् ॥ १३ ॥ नमः स्वतंत्राय विचित्रकर्मणे नमः परस्मै सदनुग्रहाय ॥
त्वन्मायया मोहितोऽहं गुणेषु दारार्थरूपेषु भ्रमाम्यनर्थदृक् ॥ १४ ॥

सत्त्वं तदाख्यं गुणम् ॥ ६ ॥ ७ ॥ ८ ॥ प्रवृद्धो वृद्धिं गतस्तर्षो वासना यस्य ९ ॥ १० ॥ पुमर्था धर्मार्थकाममोक्षाख्याः पुरुषार्थास्तेषां हेतवः साधनानि ॥
॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

मूलं संसारकारणमविद्या तस्य नाशकम् ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ गच्छतु निर्गच्छतु नाशं प्राप्नोतु इति यावत् ॥ २३ ॥

त्वत्पादपद्मे सतिमूलनाशने समस्तपापापहरं सुनिर्मलम् ॥ सुखेच्छयानर्थनिदानभूतैः सुतात्मदारैर्ममताभियुक्तः ॥ १५ ॥ न क्वापि निद्रां लभते
न शर्म प्रवृद्धतर्षः पुनरेव तस्मिन् ॥ लब्ध्वा दुरापं नरदेवजन्म त्वं यत्नतः सर्वपुमर्थहेतुः ॥१६॥ पदारविन्दं न भजामि देव संमूढचेता विषयेषु
लालसः ॥ करोमि कर्माणि सुनिष्ठितः सन्प्रवृद्धतर्षस्तदपेक्षया ददत् ॥ १७ ॥ पुनश्च भूयामहमद्य भूयामित्येव चिन्ताशतलोलमानसः॥ तदैव
जीवस्य भवेत्कृपा विभो दुरंतशक्तेस्तव विश्वमूर्ते ॥ १८ ॥ समागमः स्यान्महतां हि पुंसां भवांबुधिर्येन हि गोष्पदायते ॥ सत्संगमो देव यदैव
भूयात्तर्हीश देवे त्वयि जायते मतिः ॥१९॥ समस्तराज्यापगमं हि मन्ये ह्यनुग्रहं ते मयि जातमञ्जसा ॥ यथार्य ते ब्रह्मसुरासुराद्यैर्निवृत्ततर्षैरपि
हंसयूथैः ॥ २० ॥ इतः स्मराम्यच्युतमेव सादरं भवापहं पादसरोरुहं विभो ॥ अकिंचनप्रार्थ्यममन्दभाग्यदं न कामयेऽन्यत्तव पादपद्मात् ॥
॥ २१ ॥ अतो न राज्यं न.सुतादिकोशं देहेन शश्वत्पतता रजोभुवा ॥ भजामि नित्यं तदुपासितव्यं पादारविंदं मुनिभिर्विचिन्त्यम् ॥ २२ ॥
प्रसीद देवेश जगन्निवास स्मृतिर्यथा स्यात्तव पादपद्मे ॥ सक्तिः सदा गच्छतु दारकोशपुत्रात्मचिह्नेषु गणेषु मे प्रभो॥ २३ ॥ भूयान्मनः कृष्ण
पदारविन्दयोर्वचांसि ते दिव्यकथानुवर्णने ॥ नेत्रे ममेमे तव विग्रहेक्षणे श्रोत्रे कथायां रसना त्वदर्पिते ॥ २४ ॥ घ्राणं च त्वपादसरोजसौरभे
त्वद्भक्तगन्धादिविलेपने सकृत् ॥ स्यातां च हस्तौ तव मन्दिरे विभो संमार्ज्जनादौ मम नित्यदेव ॥ २५ ॥ पादौ विभोः क्षेत्रकथाऽनुसर्पणे
मूर्धा च मे स्यात्तव वन्दनेऽनिशम् ॥ कामश्च मे स्यात्तव सत्कथायां बुद्धिश्च मे स्यात्तव चिंतनेऽनिशम् :॥ २६ ॥ दिनानि मे स्युस्तव सत्क
थोदयैरुद्गीयमानैर्मुनिभिर्गृहागतैः ॥ हीनः प्रसंगस्तव मे न भूयात्क्षणं निमेषार्द्धमथाऽपि विष्णो ॥ २७ ॥ न पारमेष्ठ्यं न च सार्वभौमं न
चापवर्गं स्पृहयामि विष्णो ॥ त्वत्पादसेवां च सदैव कामये प्रार्थ्यां श्रिया ब्रह्मभवादिभिः सुरैः ॥ २८ ॥ इति राज्ञा स्तुतो विष्णुः प्रसन्नः कम
लेक्षणः ॥ मेघगम्भीरया वाचा तमुवाच क्षितीश्वरम् ॥ २९ ॥ ॥ श्रीभगवानुवाच ॥ ॥ जाने त्वां दासवर्यं मे निष्कामुकमकल्मषम् ॥ अथाऽपि
ते प्रदास्यामि वरं दैवतदुर्लभम् ॥ ३० ॥

त्वदर्पिते अन्ने रुचिशीलेत्यर्थः ॥ २४ ॥ २५ ॥ २६ ॥ तव कथादिभिर्हीनः रहितः प्रसंगः कालः ॥ २७ ॥ पारमेष्ठ्यं ब्रह्मपदम् ॥ २८ ॥ २९ ॥ ३० ॥

॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ सर्वसंपत्तेः प्रवर्षः प्रकृष्टा वृष्टिर्यस्यां सा भुक्तिः ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ प्रायश्चित्त

आयुष्यं चायुतं दिव्यं संपदश्च नरेश्वर ॥ भक्तिर्मयि दृढा भूयादन्ते सायुज्यमेव च ॥ ३१ ॥ त्वया कृतेन स्तोत्रेण मां स्तुवन्ति च ये भुवि ॥ तेषां तुष्टः प्रदास्यामि भुक्तिं मुक्तिं न संशयः ॥ ३२ ॥ तृतीयैषाऽक्षयानाम भुवि ख्याता भविष्यति ॥ यस्यां तव प्रसन्नोऽहं भुक्तिमुक्तिफलप्रदः ॥ ३३ ॥ ये कुर्वंति नरा मूढाः स्नानदानादिकाः क्रियाः ॥ व्याजेनाऽपि स्वभावाद्वा यांति मत्पदमव्ययम् ॥ ३४ ॥ ये चाऽक्षयतृतीयायां पितॄनुद्दिश्य मानवाः ॥ श्राद्धं कुर्वंति तेषां वै तदानंत्याय कल्पते ॥ ३५ ॥ न चानया तिथिर्लोके समा वा नाधिका भुवि॥ अस्यां कृतं स्वल्पमपि तदक्षय्यफलं भवेत् ॥ ३६ ॥ यो गां दद्यान्नृपश्रेष्ठ ब्राह्मणाय कुटुंबिने ॥ सर्वसंपत्प्रवर्षाख्या भुक्तिमुक्तिः करे स्थिता ॥ ३७ ॥ यो हि दद्यादनड्वाहं सर्वपापविनाशनम् ॥ कालमृत्युविमुक्तः सन्दीर्घायुष्यमवाप्नुयात् ॥ ३८ ॥ वैशाखमासे यो धर्मान्कुरुते मत्प्रियावहान् ॥ तेषां मृत्युजराजन्मभयं पापं हराम्यहम् ॥ ३९ ॥ यथा वैशाखधर्मैस्तु तुष्टः स्यां सकलैरपि ॥ मासधर्मैर्न तुष्टः स्यां मासो मे माधवः प्रियः ॥ ॥ ४० ॥ सर्वधर्मोज्झिता वापि ब्रह्मचर्यविवर्जिताः॥ वैशाखमासनिरता यांति मत्पदमव्ययम् ॥४१॥ यद्दुरापं तपोभिश्च सांख्ययोगैर्मखैरपि ॥ तद्धाम परमं यांति वैशाखनिरता नराः ॥ ४२ ॥ अपि पापसहस्रं वा मासोऽयं हरतेऽनघ ॥ प्रायश्चित्तविहीनं वा मत्पादस्मरणं यथा ॥४३॥ गुरूपदिष्टः कांतारे वैशाखे निरतो भवान् ॥ समाराध्य जगन्नाथं तेनाप्तमखिलं नृप ॥ ४४ ॥ धर्मेणानेन संप्रीतः प्रत्यक्षोऽहं भवामि ते ॥ भुक्त्वा भोगान्यथाकामान्देवैरपि सुदुर्लभान् ॥ ४५ ॥ इति तस्मै वरं दत्त्वा देवदेवो जनार्दनः ॥ पश्यतामेव सर्वेषां तत्रैवांतरधीयत ॥ ४६ ॥ ततो भूपालवर्योऽसौ बभूवात्यंतविस्मितः ॥ हृष्टपुष्टतनुर्भूप लब्धनष्टधनो यथा ॥ ४७ ॥ ततः शशास पृथिवीं तच्चित्तस्तत्परायणः ॥ महद्भिर्बोधितो नित्यं गुरुभिश्च निरंतरम् ॥ ४८ ॥ नान्यं प्रियतमं मेने वासुदेवमृते नृपः ॥ यत्संपर्कात्प्रिया आसन्दारामात्यसुतादयः ॥ ४९ ॥ सर्वान्धर्मांश्चकाराऽसौ वैशाखोक्तान्पुनःपुनः ॥ तेन पुण्यप्रभावेन पुत्रपौत्रादिभिर्वृतः ॥ ५० ॥ भुक्त्वा मनोरथान्सर्वान्देवानामपि दुर्लभान् ॥ अंते जगाम सायुज्यं विष्णोर्देवस्य चक्रिणः ॥ ५१ ॥

विहीनंमन्वाद्युक्तप्रायश्चित्तरहितं यत्पापसहस्रम् ॥ ४३ ॥ कांतारं वनम् ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥

॥ ५२ ॥ इति वैशाखमासमाहात्म्यटीकायां षोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ पुनश्च वैशाखधर्मान्वक्तुं प्रस्तौति—वैशाख इत्यादिना ॥ १ ॥ २ ॥ पारमंतं फलमिति यावत् ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ भावितां विचारिताम् ॥ ७ ॥ ८ ॥ तप उष्णं तेन कर्षितः ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ शर्कराभिर्वालुकाभिराविले व्याप्ते इत्यर्थः ॥ १४ ॥ १५ ॥ १६ ॥

य इदं परमाख्यानं शृण्वन्ति श्रावयंति च ॥ ते सर्वे पापनिर्मुक्ता यांति विष्णोः परं पदम् ॥ ५२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे पांचालाधिपतेः सायुज्यप्राप्तिर्नाम षोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ ॥ श्रुतकीर्तिरुवाच ॥ ॥ वैशाखधर्मानखिलानिहामुत्र फलप्रदान् ॥ भूयोऽपि शृण्वतश्चासीत्तृप्तिर्नाऽद्यापि मानद ॥ १ ॥ यत्र चाकैतवो धर्मो यत्र विष्णुकथाः शुभाः ॥ तच्छास्त्रं शृण्वतो नैव तृप्तिः कर्णरसायनम् ॥ २ ॥ पूवजन्मकृतं पुण्यं दिष्टया पारमुपागतम् ॥ आतिथ्यव्यपदेशेन यद्भवान्गृहमागतः ॥ ३ ॥ वचोऽमृतं मुखांभोजनिःसृतं परमाद्भुतम् ॥ पीत्वा तृप्तः पारमेष्ठ्यं मोक्षं वा च न कामये ॥ ४ ॥ तस्मात्तानेव धर्मान्मे भुक्तिमुक्तिप्रदायकान् ॥ विष्णुप्रीतिकरान्दिव्यान्भूयो विस्तरतो वद ॥ ५ ॥ इत्युक्तस्तु पुरा राज्ञा श्रुतदेवो महायशाः॥ संहृष्टाऽऽत्मा शुभान्धर्मान्पुनर्व्याहर्तुमारभत् ॥ ६ ॥ ॥ श्रुतदेव उवाच ॥ ॥ शृणु राजन्प्रवक्ष्यामि कथां पापप्रणाशिनीम् ॥ वैशाखधर्मविषयां भावितां मुनिभिर्मुहुः ॥ ७ ॥ पंपातीरे द्विजः कश्चिच्छंखोनाम महायशाः ॥ गुरौ सिंहगते चागान्नदीं गोदावरीं शुभाम् ॥ ८ ॥ तीर्त्वा भीमरथीं पुण्यां कांतारे कण्टकाचले ॥ निर्जले निर्जने घोरे वैशाखे तपकर्षितः ॥ ९ ॥ वृक्षे चोपविवेशाऽसौ मध्याह्नसमये द्विजः ॥ तदा कश्चिद्दुराचारो व्याधश्चापधरः शठः ॥ १० ॥ निर्घृणः सर्वभूतेषु कालांतक इवाऽपरः ॥ तं कुण्डलधरं विप्रं दीक्षितं भास्करोपमम् ॥ ११ ॥ दृष्ट्वा बद्ध्वा स जग्राह कुण्डलादिकमुग्रधीः ॥ उपानहौ च च्छत्रं च अक्षमालां कमण्डलुम् ॥ १२ ॥ पश्चाद्विसृज्य तं विप्रं गच्छेत्याह विमूढधीः ॥ १३ ॥ ततः स गच्छन्पथि शर्कराऽऽविले सूर्यांशुतप्ते जलवर्जिते खरे ॥ संतप्तपादस्तृणछादिते स्थले क्वचिच्चचारोपवसन्नूर्ध्वरेताः ॥ १४ ॥ स वै द्रुतं संपतन्क्वापि तुष्यन्हाहेति वादी स जगाम तूर्णम् ॥ दृष्ट्वा मुनिं खिद्यमानं पृथिव्यां मध्यं गते पूष्णि दया बभूव ॥ १५ ॥ व्याधस्य धर्मविमुखस्य च पापबुद्धेस्तस्मै ददामि सुखदां खलु पादरक्षाम् ॥ १६ ॥

॥ १७ ॥ १८ ॥ सीदते दुःखिताय ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ सत्त्वशुद्धिरन्तःकरणशुद्धिः ॥ २९ ॥

चौर्येणैव स्वधर्मेण या गृहीता वनांतरे ॥ तदीयमेव तत्सर्वं व्याधानां धर्मनिर्णयः ॥ तस्मादुपानहौ दास्ये मुहुर्दुःखापनुत्तये ॥ १७ ॥
तेन श्रेयो भवेद्यच्च तद्भवेन्मम पापिनः ॥ जीर्णे चोपानहौ द्वे च वर्तेते पादयोर्मम ॥ न ताभ्यामस्ति मे कृत्यं तस्मात्ते वै ददाम्यहम् ॥
॥ १८ ॥ इति निश्चित्य मनसि तूर्णं गत्वा ददौ च ते ॥ शर्करातप्तपादाय द्विजवर्याय सीदते ॥ १९ ॥ उपानहौ गृहीत्वा ते
निर्वृतिं च परां ययौ ॥ सुखी भवेति तं व्याधमाशीर्भिरभिनन्द्य च ॥ २० ॥ नूनं सुपक्वपुण्योऽयं वैशाखे दत्तवानमू ॥ व्याध
स्यापि च दुर्बुद्धेः प्रायो विष्णुः प्रसीदति ॥ २१ ॥ सर्वस्याऽऽस्या च भूयोऽपि यत्सुखं तदभून्मम ॥ ततोऽभिश्रुत्य तद्वाक्यं किमेतदिति
विस्मितः ॥ २२ ॥ व्याजहार पुनर्विप्रं ब्रह्मिष्ठं ब्रह्मवादिनम् ॥ त्वदीयं तु मया दत्तं कथं पुण्यं भवेन्मम ॥ २३ ॥ प्रशंससि च वैशाखं हरि
स्तुष्टो भवेदिति ॥ एतदाचक्ष्व मे ब्रह्मन्को वैशाखस्तु को हरिः ॥ २४ ॥ को धर्मः किं फलं तस्य शुश्रूषोर्मे दयानिधे ॥ इति व्याधवचः श्रुत्वा
शंखस्तुष्टमना अभूत् ॥ २५ ॥ प्रशंसन्स च वैशाखं पुनर्विस्मितमानसः ॥ इदानीं दत्तवान्पादत्राणे मे लुब्धकः शठः ॥२६॥ यद्दुर्बुद्धेश्च वैषम्यं
जातं चित्रमहो बत ॥ सर्वेषामेव धर्माणां फलं जन्मांतरेषु वै ॥ २७ ॥ वैशाखमासधर्माणां फलं सद्यः क्षणे नृणाम् ॥ पापाचारस्य दुर्बुद्धेर्व्या
धस्यापि दुरात्मनः ॥ २८ ॥ दैवादुपानहोर्दानात्सत्त्वशुद्धिरभूदहो ॥ यच्च विष्णोः प्रियं कर्म यत्तत्सन्तोषनिर्मलम् ॥ २९ ॥ तदेव धर्ममित्या
हुर्मन्वाद्या धर्मवित्तमाः ॥ धर्मा माधवमासीयाः प्रिया विष्णोरतीव ते ॥ ३० ॥ धर्मैर्माधवमासीयैर्यथा तुष्यति केशवः ॥ न तथा सर्वदानैश्च
तपोभिश्च महामखैः ॥ ३१ ॥ नानेन सदृशो धर्मः सर्वधर्मेषु विद्यते ॥ मा गयां यांतु मा गंगां मा प्रयागं तु पुष्करम् ॥ ३२ ॥ मा केदारं कुरु
क्षेत्रं मा प्रभासं स्यमन्तकम् ॥ मा गोदां मा च कृष्णां च मा सेतुं मा मरुद्वृधम् ॥ ३३ ॥ वैशाखधर्ममाहात्म्यं शंसंती च कथाऽऽपगा ॥
तत्र स्नातस्य वै विष्णुः सद्यो ह्यवरुध्यते ॥ ३४ ॥ मासे माधवसंज्ञेऽस्मिन्यस्त्वल्पेनैव साध्यते ॥ न तद्बहुव्ययैर्दानैर्न धर्मैर्वाऽपि वै मखैः ॥
॥ ३५ ॥ मासोऽयं माधवोनाम व्याध पुण्यविवर्द्धनः ॥ तस्मिन्मह्यं त्वया दत्ते पादुके तापनाशने ॥ ३६ ॥

॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

विधास्यति करिष्यति ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ निरीक्षं तावत्र परस्मैपदमार्षम् ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥

तेन ते पूर्वकालीनं पुण्यं पाकमुपागतम् ॥ तुष्टस्तु भगवान्प्रायः श्रेयो व्याध विधास्यति ॥ ३७ ॥ अन्यथा ते कथं भूयाद्बुद्धिरेतादृशी
शुभा ॥ मुनावेवं ब्रुवाणे च मृत्युना प्रेरितो बली ॥ ३८ ॥ सिंहो व्याघ्रवधार्थाय प्राद्रवत्क्रोधविह्वलः ॥ मध्ये दृष्ट्वा च मातङ्गं दैवाद्देवेन
कल्पितम् ॥ ३९ ॥ तं हंतुमुद्यतोऽगच्छत्पदाक्रांतं व्यवस्थितम् ॥ तयोर्युद्धमभूद्राजन्सिंहमातंगयोर्वने ॥ ४० ॥ श्रांतौ युद्धाच्च विरतौ
निरीक्षंतौ च तस्थतुः ॥ व्याधमुद्दिश्य यच्चोक्तं मुनिना च महात्मना ॥ ४१ ॥ समस्तपातकध्वंसि दैवाच्छुश्रुवतुश्च तौ ॥ तेनैव मासमा
हात्म्यश्रवणेनामलाशयौ ॥ ४२ ॥ शापान्मुक्तौ च तौ देहात्सद्यो मुक्तौ दिवं गतौ ॥ दिव्यरूपधरौ दिव्यौ दिव्यगंधानुलेपनौ ॥ ४३ ॥
दिव्यं विमानमारूढौ दिव्यनारीनिषेवितौ ॥ सद्योऽवनतमूर्द्धानौ प्रांजली चोपतस्थतुः ॥ ४४ ॥ मुनींद्रो धर्मवक्ता च व्याधमुद्दिश्य वै पथि ॥
तौ दृष्ट्वा विस्मितः प्राह कौ युवामिति निश्चलः ॥ ४५ ॥ दुर्योनौ तु कुतो जन्म युवयोर्वा कथं मृतिः ॥ अहेतोर्विपिने चाऽस्मिन्परस्परवधो
द्यतौ ॥ ४६ ॥ एतत्सर्वं सुविस्तार्य सम्यग्वदत मेऽनघौ ॥ इत्युक्तौ मुनिना तेन वचः प्रत्यूचतुः पुनः ॥ ४७ ॥ मतंगस्य मुनेः पुत्रौ दंतिलः
कोहलोऽपरः ॥ शापदोषेण तौ जातौ नाम्ना दंतिलकोहलौ ॥ ४८ ॥ रूपयौवनसंपन्नौ सर्वविद्याविशारदौ ॥ आवामुद्दिश्य प्रोवाच पिता
धर्मार्थकोविदः ॥ ४९ ॥ मतंगोनाम ब्रह्मर्षिः सर्वधर्मविदुत्तमः ॥ वैशाखे मासि तनयौ मधुसूदनवल्लभे ॥ ५० ॥ प्रपां कुरुत मार्गे च
जनान्वीजयतं क्षणम् ॥ मार्गे छायां विधत्तां च भूर्यन्नं शीतलांबु च ॥ ५१ ॥ कुरुतं स्नानमुषसि तथैवार्चयतं विभुम् ॥ कथां च शृणुतं नित्यं
यया बन्धो निवर्तते ॥ ५२ ॥ एवं च बहुभिर्वाक्यैर्बोधितावपि दुर्मती ॥ क्रुद्धोऽभवं दंतिलोऽहं मत्तोऽहं कोहलाह्वयः ॥ ५३ ॥ क्रुद्धः शशाप
तौ सद्यः पिता धर्मेषु लालसः ॥ ५४ ॥ पुत्रं च धर्मविमुखं भार्यां चाऽप्रियवादिनीम् ॥ अब्रह्मण्यं च राजानं त्यजेत्सद्यो न चेत्पतेत् ॥
॥ ५५ ॥ दाक्षिण्यादर्थलोभाद्वा संसर्गं ये प्रकुर्वते ॥ ते सर्वे नरकं यांति यावदिंद्राश्चतुर्दश ॥ इति ज्ञात्वा शशापावां मदक्रोधपरिप्लुतौ ॥५६॥

॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ अब्रह्मण्यं ब्रह्मणे ब्राह्मणाय वेदाय वा साधुर्ब्रह्मण्यस्तद्विपरीतोऽब्रह्मण्यस्तमित्यर्थः ॥ ५५ ॥ ५६ ॥

॥ ५७ ॥ ५८ ॥ ५९ ॥ श्रवणे कर्णे ॥ ६० ॥६१॥६२॥६३॥६४॥६५॥६६॥६७॥ इति वैशाखमासमाहात्म्यटीकायां सप्तदशोऽध्यायः ॥१७॥ ॥छ॥

क्रुद्धोऽयं दंतिलो भूयात्सिंहः क्रोधपरिप्लुतः ॥ मत्तस्तु कोहलो भूयान्मत्तो मातंगयूथपः ॥५७॥ कृतानुतापौ पश्चात्तु प्रार्थयावो विमोचनम् ॥ आवाभ्यां प्रार्थितो भूयो विशापं च ददौ पिता ॥ ५८ ॥ युवां प्राप्य च दुर्योनिं कियत्कालांतरेऽपि च ॥ संगमो भविता तत्र परस्परवधैषिणोः ॥ ५९ ॥ तस्मिन्नेव हि समये संवादो व्याधशंखयोः ॥ वैशाखधर्मविषयो दैवाद्वां श्रवणेऽपि च ॥ ६० ॥ गमिष्यति क्षणादेव तस्मान्मुक्तिर्भविष्यति ॥ शापान्मुक्तौ पूर्वमेव रूपमास्थाय पुत्रकौ ॥ ६१ ॥ मामेव प्राप्य वसतं नान्यथा मे वचो भवेत् ॥ इति शप्तौ च गुरुणा दुर्योनिं प्राप्य दुर्मती ॥ ६२ ॥ प्राप्य दैवात्संगतिं च परस्परवधैषिणौ ॥ संवादं युवयोर्दिव्यं शुभं तं शुश्रुवावहे ॥ ६३ ॥ तेन सद्यो विमुक्तिश्च क्षणादेवाऽऽवयोरभूत् ॥ इति सर्वं समाख्याय प्रणम्य च मुनीश्वरम् ॥ ६४ ॥ समामंत्र्याभ्यनुज्ञातौ जग्मतुः पितुरंतिकम् ॥ तदेवं संप्रदृश्याह मुनिर्व्याधं दयानिधिः ॥ ६५ ॥ पश्य वैशाखमाहात्म्यश्रवणस्य फलं महत् ॥ मुहूर्तश्रवणादेव तयोर्मुक्तिः करे स्थिता ॥ ६६ ॥ इति ब्रुवाणं मुनिपुंगवं तं दयानिधिं निःस्पृहमग्र्यबुद्धिम् ॥ विशुद्धसत्त्वं सुकृतैकपात्रं स न्यस्तशस्त्रः पुनराह व्याधः ॥ ६७ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे दंतिलकोहलमुक्तिप्राप्तिवृत्तान्तवर्णनं नाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ छ ॥ ॥ व्याध उवाच ॥ ॥ भवताऽनुगृहीतोऽस्मि मुने पापोऽतिदुष्टधीः ॥ दयालवो महांतो हि स्वभावादेव साधवः ॥ १ ॥ क्व व्याधश्चाऽकुलीनोऽहं क्व च वा मतिरीदृशी ॥ केवलं भवतामेव मन्येऽनुग्रहमुत्तमम् ॥२॥ अथ साधो च शिष्योस्मि कृपापात्रोस्मि मानद ॥ अनुग्राह्योऽस्मि पुत्रोऽस्मि कृपां कुरु दयानिधे ॥३॥ यथा मे न पुनर्भूयादसन्मतिरनर्थदा ॥ सद्भिस्तु संगतेः क्वापि न भूयो दुःखमश्नुते ॥४॥ तस्माद्बोधय मां विप्र सूक्तैस्तैर्वृजिनापहैः ॥ येन चाद्धा तरिष्यंति संसाराब्धिं मुमुक्षवः ॥५॥ साधूनां समचित्तानां तथा भूतदयावताम् ॥ न च हीनोत्तमः क्वापि नात्मीयो हि परस्तथा ॥६॥ ऐकाग्र्येण विचिंत्याथ चित्तशुद्धिं च पृच्छति ॥ सर्वदोषयुतो वापि सर्वधर्मोज्झितोऽपि वा ॥ ७ ॥ कृतानुतापश्च यदा यदा पृच्छति वै गुरून् ॥ तदैवोपदिशंत्यद्धा ज्ञानं संसारमोचकम् ॥ ८ ॥

॥ अथात्र पुनरपि वैशाखधर्मान्वक्तुं प्रस्तौति—भवतेत्यादिना ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ सूक्तैः सुवचनैः ॥ ५ ॥ ६ ॥ ७ ॥ उपदिशंति ते गुरवः इति शेषः ॥ ८ ॥

पापनाशस्य भाविनी कर्त्री ॥ ९ ॥ मम शुश्रूषुत्वात् नतत्वाच्च तव संगतेः शुद्धत्वाच्च इति योज्यम् ॥ १० ॥ ११ ॥ शं कल्याणमिच्छसि ॥ १२ ॥१३॥ १४ ॥ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ कलारावैर्मधुरशब्दैः, नयनोत्सवं नयनयोरुत्सवो यस्मात्तत् ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

यथा गंगा मनुष्याणां पापनाशस्य भाविनी ॥ तथा मन्दसमुद्धारस्वभावाः साधवः स्मृताः ॥ ९ ॥ मा विचारय मां बोद्धुं दयालो भक्तवत्सल ॥ शुश्रूषुत्वान्नतत्वाच्च शुद्धत्वात्तव संगतेः ॥ १० ॥ इति व्याधवचः श्रुत्वा पुनर्विस्मितमानसः ॥ साधुसाध्विति संभाष्य धर्मानेतानुवाच ह ॥ ११ ॥ ॥ शंख उवाच ॥ ॥ विष्णुप्रीतिकरान्दिव्यान्संसाराब्धिविमोचकान् ॥ कुरु धर्मांश्च वैशाखे यदि व्याध शमिच्छसि ॥ ॥ १२ ॥ आतपो बाधते घोरो न च्छाया नांबु चात्र च ॥ तस्मात्स्थलांतरं यावो यत्र च्छाया तु वर्तते ॥ १३ ॥ तत्र गत्वा जलं पीत्वा सुच्छायां च समाश्रितः ॥ तत्र ते वर्णयिष्यामि माहात्म्यं पापनाशनम् ॥ १४ ॥ विष्णोर्माधवमासस्य यथादृष्टं यथाश्रुतम् ॥ इत्युक्तो मुनिना तेन व्याधः प्राह कृताञ्जलिः ॥ १५ ॥ इतो विदूरे सलिलं वर्तते च सरोवरे ॥ कपित्थास्तत्र वै संति फलभारेण पीडिताः ॥ १६ ॥ गच्छावस्तत्र संतुष्टिर्भविता नात्र संशयः ॥ व्याधेनैवं समादिष्टस्तेन साकं ययौ मुनिः ॥ १७ ॥ कियद्दूरं ततो गत्वा ददर्शाग्रे सरोवरम् ॥ बककारण्डवाकीर्णं चक्रवाकोपशोभितम् ॥ १८ ॥ हंससारसक्रौंचाद्यैः समंतात्परिशोभितम् ॥ कीचकैश्च सुघोषैश्च कूजितं भ्रमरैरपि ॥१९॥ नक्रकच्छपमीनाद्यैर्वगाह्यं सुमनोहरम् ॥ कुमुदोत्पलकह्लारपुंडरीकादिभिर्महत् ॥ २० ॥ शतपत्रैः कोकनदैः समन्तात्परिशोभितम् ॥ पक्षिणां च कलारावैर्मुखर नयनोत्सवम् ॥ २१ ॥ तटे कीचकगुल्मैश्च तथा वृक्षैश्च शोभितम् ॥ वटैः करंजैर्नीपैश्च चिंचिणीभिस्तथैव च ॥ २२ ॥ निम्बप्लक्षप्रियालैश्च चंपकैर्बकुलैः शुभैः ॥ पुन्नागैस्तुंबरैश्चैव कपित्थामलकैरपि ॥ २३ ॥ निष्पेषणैश्च जंबूभिः समंतात्परिशोभितम् ॥ वन्यमातंगसारंगवराहमहिषादिभिः ॥ २४ ॥ शशैश्च शल्लकैश्चैव गवयैरुपशोभितम् ॥ खड्गनाभिमृगाद्यैश्च व्याघ्रैः सिंहैर्वृकैरपि ॥ २५ ॥ खरांतकैश्च शरभैश्चमरीभिः सुमंडितम् ॥ शाखाशाखांतरं शीघ्रं प्लवमानैः प्लवंगमैः ॥ २६ ॥

शाखाशाखान्तरैः एकशाखाया अन्यशाखां प्रति प्लवमानैः प्लवकर्तृभिः प्लवंगमैः कपिभिः ॥ २६ ॥

॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ इह मर्त्यलोके अमुत्र परलोके ॥ ३३ ॥ ३४ ॥ तमोमयम् अज्ञानबहुलम् ॥ ३५ ॥ ३६॥३७॥ ३८ ॥

मार्जारैश्चैव भल्लूकैर्भीषणं रुरुभिस्तथा ॥ झिल्लीशब्दैश्च क्रेंकारैः कीचकानां रवैस्तथा ॥२७॥ घोरवायुविनिर्घातदारुभारैः समन्वितम् ॥ एतादृशं सरो दिव्यं व्याधेनैव प्रदर्शितम् ॥२८॥ ददर्श मुनिशार्दूलस्तृषया बाधितो भृशम् ॥ स्नात्वा मध्याह्नवेलायां सरस्यस्मिन्मनोरमे ॥२९॥ वाससी परिधायाऽथ कृत्वा माध्याह्निकीः क्रियाः ॥ देवपूजां ततः कृत्वा भुक्त्वा फलमतन्द्रितः ॥ ३० ॥ व्याधोपनीतं सुस्वादु कपित्थं श्रमहारि च ॥ सुखोपविष्टः पप्रच्छ व्याधं धर्मरतं पुनः ॥ ३१ ॥ किं वक्तव्यं मया ह्यद्य तवादौ धर्मतत्पर ॥ धर्माश्च बहवः संति नानामार्गाः पृथग्विधाः ॥ ३२ ॥ तत्र वैशाखमासोक्ताः सूक्ष्मा अपि महार्थदाः ॥ सर्वेषामेव जंतूनामिहाऽमुत्र फलप्रदाः ॥ ३३ ॥ यत्प्रष्टव्यं मनसि ते यच्चादौ तच्च पृच्छताम् ॥ इत्युक्तो मुनिना तेन व्याधः प्रांजलिरब्रवीत् ॥ ३४ ॥ ॥ व्याध उवाच ॥ ॥ केन वा कर्मणा चाऽऽसीद्व्याधजन्म तमोमयम् ॥ केन वा चेदृशी बुद्धिः संगतिर्वा महात्मनः ॥ ३५ ॥ एतच्चान्यत्समाचक्ष्व यदि मां मन्यसे प्रभो ॥ इत्युक्तः पुनरप्याह शंखो नाम महामुनिः ॥ ३६ ॥ मेघगंभीरया वाचा स्मयमानमुखांबुजः ॥ ॥ शंख उवाच ॥ ॥ शाकले नगरे पूर्वं द्विजस्त्वं वेदपारगः ॥ ३७ ॥ स्तंबोनाम महातेजास्तथा श्रीवत्सगोत्रजः ॥ तवेष्टा गणिका काचिदासीत्तत्संगदोषतः ॥ ३८ ॥ त्यक्त्वा नित्यक्रिया नित्यं शूद्रवद्गृहमागतः ॥ शून्याचारस्य दुष्टस्य परित्यक्तक्रियस्य च ॥३९॥ ब्राह्मणी च तदा चाऽऽसीद्भार्या कांतिमती तव ॥ सा त्वां पर्यचरत्सुभ्रूः सवेश्यं ब्राह्मणाधमम् ॥ ४० ॥ उभयोः क्षालयंती च पादांस्त्वत्प्रियकारिणी ॥ उभयोरप्यधः शेते उभयोर्वचने रता ॥ ४१ ॥ वेश्यया वार्यमाणाऽपि पातिव्रत्यव्रतस्थिता ॥ एवं शुश्रूषयंत्या हि भर्तारं वेश्यया सह ॥ ४२ ॥ जगाम सुमहान्कालो दुःखिताया महीतले ॥ अपरस्मिन्दिने भर्ता माषं च मूलकान्वितम् ॥४३॥ अभक्षयच्छूद्रधर्मान्निष्पावांस्तिलमिश्रितान् ॥ तदपथ्यमशित्वा तु वमंश्चैव विरेचयन् ॥४४॥ अपथ्याद्दारुणो रोगो व्यजायत भगंदरः ॥ स दह्यमानो रोगेण दिवारात्रं तु भूरिशः ॥ ४५ ॥ यावदास्ते गृहे वित्तं तावद्वेश्या च संस्थिता ॥ गृहीत्वा तस्य सा वित्तं पश्चान्नोवास मंदिरे ॥ ४६ ॥ अन्यस्य पार्श्वमासाद्य गता घोरा सुनिर्घृणा ॥ ततः स दीनवचनो व्याधिबाधासुपीडितः ॥ ४७ ॥

॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ माषम् उडीद इति महाराष्ट्रजनपदप्रसिद्धम् ॥ ४३ ॥ निष्पावान् पावटे इति नाम्ना प्रसिद्धान् ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥

॥ ४८ ॥ पावनि पत्या सह धर्माचरणेन पातिव्रत्येन वा भर्तारं पावयति तत्संबुद्धिः ॥ ४९ ॥ ५० ॥ ५१॥५२ ॥ दग्धः इति एवं छेदः, अत्र संधिरार्षः ॥ ५३ ॥

उक्तवान्स रुदन्भार्यां रुजा व्याकुलमानसः ॥ परिपालय मां देवि वेश्याऽऽसक्तं सुनिष्ठुरम् ॥ ४८ ॥ न मयोपकृतं किंचित्त्वयि सुंदरि पावनि ॥
को भार्यां प्रणतां पापो नानुमन्येत गर्हितः ॥ ४९ ॥ स षंढो भविता भद्रे दश जन्मसु पंचसु ॥ दिवारात्रं महाभागे निंदितः साधुभिर्जनैः ॥
॥ ५० ॥ पापयोनिमवाप्स्यामि त्वां साध्वीमवमन्य वै ॥ अहं क्रोधेन दग्धोऽस्मि तवापमानजेन वै ॥ ५१ ॥ एवं ब्रुवाणं भर्तारं कृताञ्जलि
पुटाऽब्रवीत् ॥ न दैन्यं भवता कार्यं न व्रीडा कांत मां प्रति ॥ ५२ ॥ न चाऽपि त्वयि मे क्रोधो येन दग्धो वदस्यथ ॥ पुरा कृतानि पापानि
दुःखानीह भवंति हि ॥ ५३ ॥ तानि या क्षमते साध्वी पुरुषो वा स उत्तमः ॥ यन्मया पापया पापं कृतं वै पूर्वजन्मनि ॥ ५४ ॥ तद्भुंजत्या
न मे दुःखं न विषादः कथंचन ॥ इत्येवमुक्त्वा भर्तारं सा सुभ्रूस्तमपालयत् ॥ ५५ ॥ आनीय जनकाद्वित्तं बंधुभ्यो वरवर्णिनी ॥ क्षीरोद
वासिनं देवं भर्त्तारं सा त्वचिंतयत् ॥ ५६ ॥ शोधयन्ती दिवारात्रौ पुरीषं मूत्रमेव च ॥ नखेन कर्षती भर्त्तुः कृमीन्कष्टाच्छनैःशनैः ॥ ५७ ॥
न सा स्वपिति रात्रौ तु न दिवा वरवर्णिनी ॥ भर्त्तुर्दुःखेन संतप्ता दुःखितेदमवोचत ॥ ५८ ॥ देवाश्च पांतु भर्तारं पितरो ये च विश्रुताः ॥
कुर्वंतु रोगहीनं मे भर्त्तारं गतकल्मषम् ॥ ५९ ॥ चंडिकायै प्रदास्यामि रक्तमांससमुद्भवम् ॥ सुष्ठ्वन्नं माहिषोपेतं भर्त्तुरारोग्यहेतवे ॥ ६० ॥
मोदकान्कारयिष्यामि विघ्नेशाय महात्मने ॥ मन्दवारे करिष्यामि चोपवासान्दशैव तु ॥ ६१ ॥ नोपभुंजामि मधुरं नोपभुंजामि वै घृतम् ॥
तैलाभ्यंगविहीनाहं स्थास्ये नैवात्र संशयः ॥६२॥ जीवताद्रोगहीनोऽयं भर्त्ता मे शरदां शतम् ॥ एवं सा व्याहरद्देवी वासरे वासरे गते ॥६३॥
तदा चाऽऽगान्मुनिः कश्चिन्महात्मा देवलाह्वयः ॥ वैशाखे मासि घर्मार्तः सायाह्ने तस्य वै गृहम् ॥ ६४ ॥ तदा वै भार्यया चोक्तं भिषग्वै गृह
मागतः ॥ तेन वै रोगहानिः स्यात्तस्याऽऽतिथ्यं करोम्यहम् ॥ ६५ ॥ ज्ञात्वा त्वां धर्मविमुखं भिषग्व्याजेन वंचितः ॥ पादावनेजनं कृत्वा
तज्जलं मूर्ध्नि साक्षिपत् ॥ ६६ ॥ पानकं च ददौ तस्मै घर्मार्ताय महात्मने ॥ त्वयाऽनुमोदिता सायं घर्मतापनिवारकम् ॥ ६७ ॥

॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ महिष्या इदं माहिषं दध्यादि तेनोपेतम् ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥

॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ अवगुह्य आलिंग्य ॥ ७३ ॥ ७४ ॥ ७५ ॥ व्याध्यं जन्म व्याधिजन्मेत्यर्थः ॥ ७६ ॥ साधुजाने साध्वी
जाया यस्य स साधुजानिः सुभार्यस्तत्संबुद्धौ हे साधुजाने ॥ "जायाया निङ्" इति बहुव्रीहौ जायाशब्दस्य निङादेशः ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ इति वैशाख

स प्रातरुदिते सूर्ये मुनिः प्रायाद्यथाऽऽगतः ॥ अथ चाल्पेन कालेन सन्निपातोऽभवत्तव ॥६८॥ त्रिकट्व्यां नीयमानायां भर्त्तांगुलिमखंडयत् ॥
उभयोर्दंतयोः श्लेषः सहसा समपद्यत ॥ ६९ ॥ तत्खंडमंगुलेर्वक्त्रे स्थितं भर्तुः सुकोमलम् ॥ खण्डयित्वांगुलिं भर्ता पंचत्वमगमत्तदा ॥ ७० ॥
शय्यायां सुमनोज्ञायां स्मरंस्तां पुंश्चलीं शुभाम् ॥ मृतं विज्ञाय भर्त्तारं भार्या कांतिमती तव ॥७१॥ विक्रीय चाऽपि वलयं गृहीत्वा चेंधनं बहु ॥
चक्रे चितिं तेन साध्वी मध्ये कृत्वा पतिं तदा ॥ ७२ ॥ अवगुह्य भुजाभ्यां च पादौ चाश्लिष्य पादयोः ॥ मुखे मुखं विनिक्षिप्य हृदयं हृदये
तथा ॥ ७३ ॥ जघने जघनं देवी ह्यात्मानं सन्निवेश्य च ॥ दाहयामास कल्याणी भर्तृदेहं रुजान्वितम् ॥ आत्मना सह कल्याणी ज्वलिते जात
वेदसि ॥७४॥ विमुच्य देहं सहसा जगाम पतिं समालिंग्य मुरारिलोकम् ॥ पानीयदानेन च माधवेऽस्मिन्पादावनेजादपि योगिगम्यम्॥७५॥
त्वमंतकाले गणिकाविचिंतया देहं त्यक्त्वा मुक्तसमस्तकिल्बिषः ॥ जन्म व्याध्यं प्राप्यसे घोररूपं हिंसासक्तः सर्वदोद्वेगकारी ॥ ७६ ॥ दत्ता
त्वया पानकस्याऽपि दाने मासेऽनुज्ञा माधवे साधुजाने ॥ व्याधो जातस्तेन जाता सुबुद्धिर्धर्मान्प्रष्टुं सर्वसौख्यैकहेतून् ॥ ७७ ॥ धृतं मूर्ध्ना पाद
शौचावशिष्टं जलं मुनेः सर्वपापापहारि ॥ तेनेयं ते संगतिर्मे वनेऽस्मिन्यया भूयः संपदः सन्ततिश्च ॥ ७८ ॥ इत्येतत्सर्वमाख्यातं पूर्वजन्मनि
यत्कृतम् ॥ कर्म पुण्यं पापकं च दृष्टं दिव्येन चक्षुषा ॥ ७९ ॥ गोप्यं वा ते प्रवक्ष्यामि यद्भवाञ्छ्रोतुमिच्छति ॥ जाता ते चित्तशुद्धिर्वै स्वस्ति
भूयान्महामते ॥ ८० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदांबरीष
संवादे व्याधोपाख्याने व्याधस्य पूर्वजन्मकथनंनामाष्टादशोऽध्यायः ॥ १८ ॥ ॥ छ ॥ ॥ व्याध उवाच ॥ ॥ विष्णुमुद्दिश्य
कर्तव्या धर्मा भागवताः शुभाः ॥ तत्राऽपि माधवीयाश्च इत्युक्तं तु त्वया पुरा ॥ १ ॥ स विष्णुः कीदृशो ब्रह्मन्किं वा तस्य हि लक्षणम् ॥ किं
मानं तस्य सद्भावैः कैर्ज्ञेयो भगवान्विभुः ॥ २ ॥ कीदृशा वैष्णवा धर्माः केनाऽसौ प्रीयते हरिः ॥ एतदाचक्ष्व मे ब्रह्मन्किंकराय महामते ॥३॥

मासमाहात्म्यटीकायामष्टादशोऽध्यायः ॥ १८ ॥ छ ॥ वैशाखमासे विष्णुमुद्दिश्य धर्मानाचरेदित्युक्तम्, तच्छ्रुत्वा विष्णुस्वरूपं व्याधः पृच्छति ॥ १ ॥ २ ॥ ३ ॥

॥४॥ भावितः ध्यानविषयीकृतः, आत्मा विष्णुस्वरूपैः अथवा भावितात्मभिः शुद्धांतःकरणैरिति व्याख्येयम् ॥ ५ ॥ ६ ॥७॥ आवृत्तिर्लोकान्तरम्, जन्मनो जन्मांतरं
प्रति पुनः गमनम्, नियमः दंडधारणम् ॥ ८ ॥ प्रकाशो ज्ञानम्, वृत्तिराजीवनम् ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ अनुमया अनु

इति पृष्टस्तु व्याधेन पुनः प्राह स वै द्विजः ॥ प्रणम्य जगतामीशं नारायणमनामयम् ॥ ४ ॥ ॥ शंख उवाच ॥ ॥ शृणु व्याध
प्रवक्ष्यामि विष्णुरूपमकल्मषम् ॥ यदचिन्त्यं विरिंच्याद्यैर्मुनिभिर्भावितात्मभिः ॥ ५ ॥ पूर्णशक्तिः पूर्णगुणो निर्दिष्टः सकलेश्वरः ॥ निर्गुणो
निष्कलोऽनंतः सच्चिदानन्दविग्रहः ॥ ६ ॥ यदेतदखिलं विश्वं चराचरमनीदृशम् ॥ साधिशंसाऽऽश्रयं यच्च यद्वशे नियतं स्थितम् ॥ ७ ॥
अथ ते लक्षणं वच्मि ब्रह्मणः परमात्मनः ॥ उत्पत्तिस्थितिसंहारा ह्यावृत्तिर्नियमस्तथा ॥ ८ ॥ प्रकाशौ बन्धमोक्षौ च वृत्तिर्यस्माद्भवंत्यमी ॥
स विष्णुर्ब्रह्मसंज्ञोऽसौ कवीनां संमतो विभुः ॥ ९ ॥ साक्षाद्ब्रह्मेति तं प्राहुः पश्चाद्ब्रह्मादिकानपि ॥ ब्रह्मशब्दं सोपपदं ब्रह्मादिषु विदो विदुः ॥
॥ १० ॥ नान्येषां ब्रह्मता क्वाऽपि तच्छक्त्येकांशभागिनाम् ॥ तदेतच्छास्त्रगम्यं हि जन्माद्यस्य महाविभोः ॥ ११ ॥ शास्त्रं च वेदाः स्मृतयः
पुराणं वै तदात्मकम् ॥ इतिहासः पंचरात्रं भारतं च महामते ॥ १२ ॥ एतैरेव महाविष्णुर्ज्ञेयो नान्यैः कथंचन ॥ नावेदविदमुं विष्णुं मनुते
च नरः क्वचित् ॥ १३ ॥ नेंद्रियैर्नानुमानैश्च न तर्कैः शक्यते विभुम् ॥ ज्ञातुं नारायणं देवं वेदवेद्यं सनातनम् ॥ १४ ॥ अस्यैव जन्मकर्माणि
गुणाञ्ज्ञात्वा यथामति ॥ मुच्यंते जीवसंघाश्च सदा तद्वशवर्तिनः ॥ १५ ॥ क्रमाद्विष्णोश्च माहात्म्यं यथा सातिशयं भवेत् ॥ एकैकस्मि
न्स्थिता शक्तिर्देवर्षिपितृमातृके ॥ १६ ॥ प्रत्यक्षेणाऽऽगमेनापि तथैवाऽनुमयाऽपि च ॥ आदौ नरोत्तमं विद्याद्बले ज्ञाने सुखे तथा ॥ १७ ॥
तस्माद्भूतं शतगुणं विद्याज्ज्ञानादिभिर्वृतम् ॥ भूतान्मनुष्यगंधर्वान्विद्याच्छतगुणाधिकान् ॥ १८ ॥ तत्त्वाभिमानिनो देवांस्तेभ्यो विद्याच्छता
धिकान् ॥ तत्त्वाभिमानिदेवेभ्यः सप्तैव ऋषयो वराः ॥१९॥ सप्तर्षिभ्यो वरो ह्यग्निरग्नेः सूर्यादयस्तथा ॥ सूर्याद्गुरुर्गुरोः प्राणः प्राणादिंद्रो महा
बलः ॥ २० ॥ इन्द्राच्च गिरिजा देवी देव्याः शंभुर्जगद्गुरुः ॥ शंभोर्बुद्धिर्महादेवी बुद्धेः प्राणो बलाधिकः ॥ २१ ॥ न प्राणात्परमं किंचित्प्राणे
सर्वं प्रतिष्ठितम् ॥ प्राणाज्जातमिदं विश्वं प्राणात्मकमिदं जगत् ॥ २२ ॥

मानेन ॥ १७ ॥ १८ ॥ १९ ॥ प्राणः वाय्वात्मकः ॥ २० ॥ प्राणः मुख्यप्राणः ॥ २१ ॥ २२ ॥

सूत्रं चेष्टाप्रवर्तकम् ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ पद्मसृष्टौ पाद्मे कल्पे ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ निष्कामति
निष्क्रान्ते सति ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ काणमन्धमिति व्याख्येयं लोचनद्वयात्तद्देवतानिष्क्रान्तेरनंतरमेवोक्तत्वात्, अन्यथा

प्राणे प्रोतमिदं सर्वं प्राणादेव हि चेष्टते ॥ सर्वाधारमिमं प्राहुः सूत्रं नीलांबुदप्रभम् ॥२३॥ लक्ष्मीकटाक्षमात्रेण प्राणस्यास्य स्थितिर्भवेत् ॥ सा
लक्ष्मीर्देवदेवस्य कृपालेशैकभाजिनी ॥ २४ ॥ न विष्णोः परमं किंचिन्न समो वा कथंचन ॥ ॥ व्याध उवाच ॥ ॥ कथं जीवेष्वयं प्राणः सूत्र
नामाऽधिकोऽभवत्॥२५॥ निर्णयो वा कथं ह्यस्य प्राणाधिक्यं कथं विभो ॥ एतदाचक्ष्व मे ब्रह्मन्कथं प्राणाद्विभुः परः ॥२६॥ ॥ शंख उवाच ॥
शृणु व्याध प्रवक्ष्यामि यत्पृष्टो निर्णयस्त्वया ॥ प्राणाधिक्यं समुद्दिश्य जीवैश्च सकलैरपि॥२७॥पुरा नारायणो देवः पद्मसृष्टौ सनातनः ॥ सृष्ट्वा
ब्रह्मादिकान्देवानिदं प्राह जनार्दनः ॥ २८ ॥ साम्राज्येऽहं स्थापयेयं ब्रह्माणं वः पतिं प्रभुम् ॥ यो युष्मास्वधिको देवो यौवराज्ये सुरेश्वराः ॥
॥ २९ ॥ तं स्थापयत शीलाढ्यं शौर्यौदार्यगुणान्वितम् ॥ इत्युक्ता विभुना देवाः सर्वे शक्रपुरोगमाः ॥३०॥ एवं विवदिरेऽन्योन्यमहं भूयामहं
त्विति ॥ सर्वे विवदमानाश्च सूर्यं केचित्परं विदुः ॥ ३१ ॥ शक्रं केचित्परं कामं केचित्तूष्णीं तु तस्थिरे ॥ ते निर्णयमपश्यंतः प्रष्टुं नारायणं
ययुः ॥ ३२ ॥ नमस्कृत्य पुनः प्राहुः सर्वे प्रांजलयोऽमराः ॥ विचारितं महाविष्णो सर्वैरस्माभिरंजसा ॥ ३३ ॥ अस्मासु देवमधिकं नैव
विद्मः कथंचन ॥ त्वमेव निर्णयं ब्रूहि देवाः संशयिनः खलु ॥ ३४ ॥ इति पृष्टोऽमरैः सर्वैः प्रहसन्निदमब्रवीत् ॥ देहादस्माच्च वैराजाद्यस्मिन्नि
ष्क्रामति ह्ययम् ॥ ३५ ॥ पतिष्यति प्रविष्टे तु यस्मिन्वै ह्युत्थितो भवेत् ॥ स देवो ह्यधिको नूनं नापरस्तु कथंचन ॥ ३६ ॥ इत्युक्तास्ते ततः
सर्वे तथास्त्विति वचोऽब्रुवन् ॥ निश्चक्राम जयंताह्वः पादात्पूर्वं सुरेश्वरः ॥ ३७ ॥ तदा पंगुममुं प्राहुर्न देहः पतितस्तदा ॥ शृण्वन्पिबन्वदञ्जि
घ्रन्पश्यन्नास्तेऽचलन्नपि ॥ ३८ ॥ पश्चाद्गुह्याद्विनिष्क्रांतो दक्षोनाम प्रजापतिः ॥ तदा षंढममुं प्राहुर्न देहः पतितस्तदा ॥ ३९ ॥ शृण्वन्पिबन्व
दञ्जिघ्रन्पश्यन्नास्ते चलन्नपि ॥ पश्चाद्धस्ताद्विनिष्क्रांत इन्द्रः सर्वामरेश्वरः ॥ ४० ॥ हस्तहीनममुं प्राहुर्न देहः पतितस्तदा ॥ शृण्वन्पिबन्व
दञ्जिघ्रन्पश्यन्नास्ते चलन्नपि ॥ ४१ ॥ लोचनाभ्यां विनिष्क्रांतः सूर्यस्तेजस्विनां वरः ॥ तदा काणममुं प्राहुर्न देहः पतितस्तदा ॥ ४२ ॥

एकेनाक्ष्णा हीन इति व्याख्याने विरोधः स्यात् ॥ ४२ ॥

अजिघ्राणं गन्धग्रहणमकुर्वंतम् ॥ ४३ ॥ मृतं न प्राहुः ॥ ४४ ॥ तदा अरसज्ञं मधुरादिरसज्ञानरहितम् ॥ ४५ ॥ वाचः वागाख्यज्ञानेंद्रियात् ॥ ४६ ॥

शृण्वन्पिबन्वदञ्जिघ्रन्पश्यन्नास्ते चलन्नपि ॥ घ्राणात्पश्चाद्विनिष्क्रांतौ नासत्यौ विश्वभेषजौ ॥ अजिघ्राणममुं प्राहुर्न देहः पतितस्तदा ॥
॥ ४३ ॥ शृण्वन्पिबन्वदन्नैव जिघ्रन्नास्तेऽचलन्नपि ॥ श्रोत्राद्दिशो विनिष्क्रांता न देहः पतितस्तदा ॥ तदामुं बधिरं प्राहुर्मृतं नैव कथंचन॥४४॥
पिबन्वदन्नपि तदा ह्यशृण्वन्नचलन्नपि ॥ वरुणो रसनायास्तु विनिष्क्रांतस्ततः परम् ॥ तदाऽरसज्ञमेवाहुर्न देहः पतितस्तदा ॥ ४५ ॥ जीवं
श्चलन्नदन्नास्ते तथा जानञ्छ्वसन्नपि ॥ ततो वाचो विनिष्क्रांतो वह्निर्वागीश्वरो विभुः ॥ ४६ ॥ तदा मूकममुं प्राहुर्न देहः पतितस्तदा ॥ जीवंश्च
लन्नदन्नास्ते तथा जानञ्छ्वसन्नपि ॥४७॥ पश्चाद्रुद्रो विनिष्क्रांतो मनसो बोधनात्मकः॥ तदा जडममुं प्राहुर्न देहः पतितस्तदा ॥४८॥ जीवंश्चल
न्नदन्नास्ते तथा जानञ्छ्वसन्नपि ॥ पश्चात्प्राणो विनिष्क्रांतो मृतमेनं तदा विदुः ॥ पुनरेवं तदा प्राहुर्देवा विस्मितमानसाः ॥ ४९ ॥ देहमुत्था
पयेद्यस्तु पुनरेवं व्यवस्थितः ॥ स एव ह्यधिकोऽस्मासु युवराजा भविष्यति ॥ ५० ॥ इत्येवं तु प्रतिश्रुत्य विविशुश्च यथाक्रमम् ॥ जयंतः
प्राविशत्पादौ नोत्तस्थौ तत्कलेवरम् ॥ ५१ ॥ गुह्यं च प्राविशद्दक्षो नोत्तस्थौ तत्कलेवरम् ॥ इन्द्रो हस्तौ विवेशाऽथ नोत्तस्थौ तत्कलेवरम् ॥
॥ ५२ ॥ चक्षुः सूर्यः प्रविष्टोऽभून्नोत्तस्थौ तत्कलेवरम् ॥ दिशः श्रोत्रे प्रविविशुर्नोत्तस्थौ तत्कलेवरम् ॥ ५३ ॥ वरुणः प्राविशज्जिह्वां नोत्तस्थौ
तत्कलेवरम् ॥ नासां विविशतुर्दस्रौ नोत्तस्थौ तत्कलेवरम् ॥ ५४ ॥ वह्निश्च प्राविशद्वाचं नोत्तस्थौ तत्कलेवरम् ॥ मनश्च प्राविशद्रुद्रो नोत्त
स्थौ तत्कलेवरम् ॥ ५५ ॥ पश्चात्प्राणो विवेशासौ तदोत्तस्थौ कलेवरम् ॥ तदा देवा विनिश्चित्य प्राणं देवाधिकं विभुम् ॥ ५६ ॥ बले ज्ञाने च
धैर्ये च वैराग्ये प्राणनेऽपि च ॥ ततोऽभिषेचयांचक्रुर्यौवराज्ये महाप्रभुम् ॥५७ ॥ उत्कृष्टस्थितिहेतुत्वादुक्थमेकं तदा जगुः ॥ तस्मात्प्राणात्मकं
विश्वं सर्वं स्थावरजंगमम् ॥ ५८ ॥ अंशैः पूर्णैर्बलाढ्यैश्च पूर्णोऽयं जगतां पतिः ॥५९॥ न प्राणहीनं जगदस्ति किंचित्प्राणेन हीनं न च वै समे
धते ॥ न प्राणहीनं स्थितमत्र किंचित्प्राणेन हीनं न च किंचिदस्ति ॥ तस्मात्प्राणः सर्वजीवाधिकोऽभूद्बलाधिकः सर्वजीवांतरात्मा ॥ ६० ॥

॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ प्रतिश्रुत्य प्रतिज्ञाय ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ प्राणने जीवने ॥ ५७ ॥ उक्थम् एतन्नाम्ना प्रसिद्धं साम ॥
॥ ५८ ॥ ५९ ॥ ६० ॥

॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ पूर्वबन्धानुगं पूर्वः अनादिर्यो बन्धोऽविद्यालक्षणस्तमनुगच्छति तादृशं लिंगं लिंगशरीरम् ॥ ६७ ॥ ॥ ६८ ॥

प्राणात्कोऽपि ह्यधिको वा समो वा शास्त्रे दृष्टः श्रुतपूर्वो न चाऽऽस्ते ॥ ६१ ॥ तत्तत्कार्यानुगः प्राणो ह्येको देवो ह्यनेकधा ॥ तस्मात्प्राणं वरं प्राहुः प्राणोपासनतत्पराः ॥ लीलयैव जगत्स्रष्टुं हन्तुं पालयितुं प्रभुः ॥ ६२ ॥ शेषाऽहिशिवशक्राद्याश्चेतनाश्च जडा अपि ॥ वासुदेवादृते कोऽपि नैनं परिभविष्यति ॥ ६३ ॥ सर्वदेवात्मकः प्राणः सर्वदेवमयो विभुः ॥ वासुदेवाऽनुगो नित्यं तथा विष्णुवशस्थितः ॥ ६४ ॥ वासुदेवप्रतीपं तु न शृणोति न पश्यति ॥ देवाः प्रतीपं कुर्वंति रुद्रेंद्राद्याः सुरेश्वराः ॥ ६५ ॥ प्रतीपं क्वाऽपि कुरुते न प्राणः सर्वगोचरः ॥ तस्मात्प्राणो महाविष्णोर्बलमाहुर्मनीषिणः॥६६॥एवं ज्ञात्वा महाविष्णोर्माहात्म्यं लक्षणं तथा ॥ पूर्वबन्धानुगं लिंगं जीर्णां त्वचमिवोरगः॥६७॥विसृज्य परमं याति नारायणमनामयम् ॥ श्रुत्वा शंखोदितं वाक्यं पुनर्व्याधः प्रसन्नधीः ॥ ६८ ॥ प्रश्रयाऽवनतो भूत्वा पुनः पप्रच्छ तं मुनिम् ॥ब्रह्मन्महानुभावस्य प्राणस्याऽस्य जगद्गुरोः ॥ ६९ ॥ न ख्यातो महिमा लोके कथं सर्वेश्वरस्य वै ॥ देवानां च मुनीनां च भूपानां च महात्मनाम् ॥ ७० ॥ महिमा श्रूयते लोके पुराणेषु सहस्रशः ॥ एतदाचक्ष्व मे ब्रह्मञ्छ्रोतुं कौतूहलं हि मे ॥ ७१ ॥ ॥ शंख उवाच ॥ ॥ पुरा प्राणो हरिं देवं नारायणमनामयम् ॥ अश्वमेधैर्यष्टुकामो गङ्गातीरं ययौ मुदा ॥ ७२ ॥ हलैश्चकार भूशुद्धिं नानामुनिगणैर्युतः ॥ अन्तर्वल्मीकलीनस्तु कण्वो नाम समाधिगः ॥ ७३ ॥ हलोत्कृष्टो विनिष्क्रांतः क्रोधादिदमुवाच ह ॥ दृष्ट्वा पुरः स्थितं प्राणं शशाप ह महाविभुम् ॥ ७४ ॥ अद्यप्रभृति न ख्यातिं महिमा भुवनत्रये ॥ तव प्राप्नोति देवेश भूलोके तु विशेषतः ॥ ७५ ॥ प्रख्यातास्ते भविष्यंति ह्यवतारा जगत्त्रये ॥ इत्युक्तो मुनिना तेन वायुः क्रोधात्तमब्रवीत् ॥ ७६ ॥ विनापराधं शप्तोऽस्मि तितिक्षुं मां निरागसम् ॥ तस्मात्कण्व महाबाहो गुरुद्रोही भवाऽऽशु च ॥ ७७ ॥ लोके निन्दितवृत्तिश्च भवेत्याह सदागतिः ॥ ततः प्रभृति लोकेऽस्मिन्प्राणस्याऽस्य महाप्रभो ॥ ७८ ॥ न ख्यातो महिमा लोके भूलोके तु विशेषतः ॥ शापात्कण्वो गुरुं जग्ध्वा सूर्यशिष्योऽभवत्तदा ॥ ७९ ॥

॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ सदागतिः प्राणः ॥ ७८ ॥ ७९ ॥

इतः अस्मात्परम् ॥८०॥ इति वैशाखमासमाहात्म्यटीकायामेकोनविंशोऽध्यायः ॥१९॥ ॥छ॥ ॥ अथ विंशे व्याधः जीवविषयं प्रश्नं करोति—किं जीवा इत्यादिना ॥ ॥१॥२॥३॥४॥५॥६॥७॥८॥९ ॥ १० ॥ पुण्यादिति । पुण्यकर्मणा स्वर्गप्राप्तिः, पापकर्मणा नरकलोकप्राप्तिर्भवति, तत्र विशेषकथानकमस्ति पाद्मे, तदेवात्र किंचित्प्रदर्श्यते—“सर्वमासेषु वैशाखे एव कथमधिका प्रीतिरिति धरया पृष्टः श्रीवराहः प्रोवाच, हे पृथ्वि ! वैशाखे हिरण्याक्षं मधुदैत्यं च हत्वा, तवोद्धारः कृतः । वैशाखशुक्लतृतीयायां त्रेतायुगस्य त्रयीधर्मस्य ज्ञानवर्णव्यवस्थितेश्च प्रवृत्तिर्जाता तस्मादयं पवित्रो मासः, मम प्रियश्च, इत्युक्त्वा वैशाखधर्मान्वक्तुकामः इतिहासं प्रस्तौति—कदाचिद्यमः गंगा

इत्येतत्कथितं सर्वं यत्पृष्टं तु त्वयाऽधुना ॥ यच्छ्रोतव्यमितो व्याध पृच्छ मां मा विचारय ॥ ८० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे वायुशापकथनंनामैकोनविंशोऽध्यायः ॥ १९ ॥ ॥ छ ॥ ॥ ॥ व्याध उवाच ॥ ॥ किं जीवा विभुना सृष्टाः कोटिशोऽथ सहस्रशः ॥ दृश्यंते भिन्नकर्माणो नानामार्गाः सनातनाः ॥ १ ॥ नैकस्वभावा एते हि कुत एव महामते ॥ सर्वं तत्पृच्छते मह्यं विस्तरात्तत्त्वतो वद ॥ २ ॥ ॥ शंख उवाच ॥ ॥ त्रिविधा जीवसंघा हि रजःसत्त्वतमोगुणाः ॥ राजसा राजसं कर्म तामसास्तामसं तथा ॥ ३ ॥ सात्त्विकाः सात्त्विकं कर्म कुर्वंत्येते यथाक्रमम् ॥ क्वचिच्च गुणवैषम्यमेतेषां संसृतौ भवेत् ॥ ४ ॥ तेनैवोच्चावचं कर्म कुर्वंतः फलभागिनः ॥ क्वचित्सुखं क्वचिद्दुःखं क्वचिच्चोभयमेव च॥५॥गुणानामेव वैषम्यात्प्राप्नुवन्ति नरा इमे॥ प्रकृतिस्था इमे जीवा बद्धा एतैर्गुणैस्त्रिभिः ॥ ६ ॥ गुणकर्माऽनुरूपेण कर्मणां व्यत्ययः फलम् ॥ गुणानुगुण्यं भूयस्ते प्रकृतिं यांत्यमी जनाः ॥ ॥ ७ ॥ प्रकृतिस्थाः प्राकृतिका गुणकर्माऽभिमूर्छिताः ॥ गतिं प्राकृतिकीं यांति व्यत्ययः प्रकृतेर्न हि ॥ ८ ॥ तामसा दुःखबहुलाः सदा तामसवृत्तयः ॥ निर्दया निष्ठुरा लोके सदा द्वेषैकजीविनः ॥ ९ ॥ राक्षसाद्याः पिशाचांतास्तामसीं यांति वै गतिम् ॥ राजसा मिश्रमतयः कर्तारः पुण्यपापयोः ॥ १० ॥ पुण्यात्स्वर्गं प्राप्नुवन्ति क्वचित्पापाच्च यातनाम् ॥ अत एते मन्दभाग्या आवर्तंते पुनः पुनः ॥ ११ ॥

यमुनयोर्मध्यदेशे महद्ग्रामस्थितं वसिष्ठगोत्रसंभूतं यज्ञदत्तनामकं ब्राह्मणमानय नाऽन्यं तत्पार्श्ववर्तिनं तद्गोत्रोत्पन्नं तन्नामानं तदनुरूपमानयेति दूतं प्रत्याह । दूतश्च तथेत्युक्त्वा यमनिर्दिष्टं ब्राह्मणं विहाय तत्पार्श्ववर्तिनं तदनुरूपं ब्राह्मणमानीय यमाग्रे निवेदयामास यमश्च प्रतिकूलं कर्म ज्ञात्वा तस्मै पूजां कृत्वा प्रोवाच, नीयतामेष सोऽन्यस्त्वानीयतामिति, एवमुक्ते तु वचने धर्मराजेन स द्विजः निर्विण्णः सन्नुवाच—हे धर्म ! ‘कस्मादहमिहानीतः कस्मात्प्रेषयसे पुनः ॥ गन्तुं नैवोत्सहे तत्र मर्त्यलोके पुनः प्रभो ॥’

यम उवाच ॥ हे द्विज क्षीणायुषामत्र वासः युक्तः तव तु दशवर्षात्मकं शेषमायुरस्ति तदंते लोकप्राप्तिर्भावि अतः तव प्रष्टव्यं चेत्पृच्छ तद्वदामि॥ब्राह्मण उवाच ॥ केन कर्मणा नरकलोकप्राप्तिः, केन कर्मणा स्वर्गलोकप्राप्तिः, मम च केन कर्मणा तव लोके गंतव्यं भविष्यति तद्वद ॥ यम उवाच ॥"कर्मणा मनसा वाचा ये धर्मविमुखा नराः ॥विष्णुभक्तिविहीना ये ते वै निरयगामिनः॥पश्यंति भेदबुद्ध्या ये ब्राह्मणं शंकरं हरिम्॥क्षेत्रवृत्तिगृहच्छेदं प्रीतिच्छेदं च ये नराः॥आशाच्छेदं च कुर्वंति ते वै निरयगामिनः॥अनाथं वैष्णवं दीनं रोगार्तं वृद्धमेव च ॥ नाऽनुकम्पयते मूढः स ज्ञेयो नरकातिथिः ॥ नियमांस्तु समादाय यः पश्चादजितेंद्रियः ॥ विलोपयति मूढात्मा स वै निरयभाजनम् ॥ अभक्ष्यभक्षका ये च अगम्यागमतत्पराः ॥ हिंसका निंदकाः क्रूरास्ते वै निरयगामिनः ॥ शृणु विप्र यथा यांति नराः स्वर्गं दयालवः ॥ येऽर्चयंति हरं विष्णुं ध्यायंति च स्मरंति च ॥ लभंते ते हरिस्थानं श्रुतिरेषा सनातनी ॥ स्वधर्मकर्मनिरता वासुदेवपरायणाः ॥ त्यक्तदानफला ये च ते नराः स्वर्गगामिनः ॥ वर्जयंति दिवास्वापं नराः सर्वसहाश्च ये ॥ पर्वण्याश्रयभूता ये ते मर्त्याः स्वर्गगामिनः ॥ द्विषतामपि ये द्वेषान्न वदंत्यहितं कदा ॥ कीर्त्तयन्ति गुणांश्चैव ते नराः स्वर्गगामिनः ॥ प्रवृत्तौ च निवृत्तौ च श्रुतिशास्त्रोक्तमेव च ॥ आचरंति प्रतीता ये ते नराः स्वर्गगामिनः ॥ ये शांताः परदारेषु कर्मणा मनसा गिरा ॥ रमयंति न सत्त्वस्थास्ते नराः स्वर्गगामिनः ॥ यस्मिन्कस्मिन्कुले जाता दयावन्तो यशस्विनः ॥ सानुक्रोशाः सदाचारास्ते नराः स्वर्गगामिनः ॥ व्रतं रक्षंति ये कोपाच्छ्रियं रक्षंति मत्सरात् ॥ विद्यां मानापमानाभ्यां ह्यात्मानं तु प्रमादतः ॥ मतिं रक्षंति ये लोभान्मनो रक्षंति कामतः ॥ धर्मं रक्षंति दुःसंगात्ते नराः स्वर्गगामिनः ॥ एकादशीव्रतपरा मधुसूदनपूजकाः ॥ वेतसीं यमुनां सीतां पुण्यां गोदावरीं नदीम् ॥ सेवंते ये शुभाचारास्ते नराः स्वर्गगामिनः ॥ स्नाताश्चर्मण्वतीतीरे त्रिरात्रं नियता नराः ॥ व्यासाश्रमे नर्मदायां ते नराः स्वर्गगामिनः ॥ गंगाजले प्रयागे वा केदारे पुष्करेऽपि वा ॥ व्यासाश्रमे प्रभासे च मृतास्ते स्वर्गगामिनः ॥ द्वारावत्यां कुरुक्षेत्रे योगाभ्यासेन वा मृताः ॥ हरिरित्यर्णयुगलं वक्त्रे येषां हरिप्रियाः ॥ श्रोतारो धर्मशास्त्राणां धर्मप्रत्ययसंगताः ॥ प्रियंकराश्च बालानां स्वर्गलोके वसंति ते ॥ भोजनेषूपपन्नेषु भोज्यं पृच्छंति सादरम् ॥ अभिन्नमुखरागेण शिष्टास्ते स्वर्गगामिनः ॥ नरनारायणाऽऽवासे त्रिरात्रं ये समाश्रिताः ॥ मज्जन्त्यलकनन्दायां धन्यास्ते केशवप्रियाः ॥ काशीवासरता ये च विश्वेश्वरप्रपूजकाः ॥ दर्शश्राद्धरता ये च ते नराः स्वर्गगामिनः ॥ प्रेतकल्पोक्तविधिना मृता ये च नरोत्तमाः ॥ निर्ममा निरहंकारास्ते नराः स्वर्गगामिनः ॥ हेमंते दारुदो यश्च तथा ग्रीष्मे जलप्रदः ॥ वर्षास्वाश्रमदाता च स्वर्गलोके महीयते ॥ ॥ ब्राह्मण उवाच ॥ ॥ त्वयोक्तं सर्वमेवैतद्बहुधा दुष्करं कलौ ॥ तदेकं कथ्यतां धर्मं सर्वधर्मोत्तमोत्तमम् ॥ ॥ यम उवाच ॥ ॥ वैशाखे विधिना स्नानं नद्यां यः प्रातराचरेत् ॥ अर्धोदिते सहस्रांशौ व्रतधर्मपरायणः ॥ तस्य पुण्यं महीदेव किंचिद्वक्तुं न शक्यते ॥ वैशाखधर्माचरणं मधुसूदनपूजनम् ॥ त्रिरात्रमंतिमं वाऽपि व्रतं स्वर्गतिदायकम् ॥ एतन्माधवमासस्य समासात्किञ्चिदीरितम् ॥ अथ गच्छ महाभाग देवलोकादितो भवान् ॥ निपात्य भुवि ते देहं रुदंत्यद्याऽपि

बांधवाः ॥ विलप्यमानैरपि बन्धुभिस्ते न यावदग्नौ तव यच्छरीरम् ॥ प्रक्षिप्यते हंत जवेन तावद्याहि स्वयं सुप्त इव प्रबुद्धः ॥ मम प्रसादादिह पुण्ययोगः श्रुतो यथावत्त
मिमं विधेहि ॥ विधानतो वै समये समं ते समागमोंऽते भविता सुरैश्च ॥ ॥ सूत उवाच ॥ ॥ इति देववचः श्रुत्वा नत्वा धर्माधिपं ततः ॥ पुनः पपात स इह पारि
तुष्टमना द्विजः ॥ धर्मराजप्रसादेन ततस्तत्र महीतले ॥ संसुप्त इव चोत्तस्थौ बन्धुवर्गसमन्वितः ॥ विधिमेनं द्विजो भूमौ वर्षेवर्षे च स स्वयम् ॥ चकार कारयामास माधव
धर्मशीला दयावन्तः श्रद्धावन्तोऽनसूयकाः ॥ सात्त्विकाः सात्त्विकीं वृत्तिमनुतिष्ठंत आसते ॥ १२ ॥ ते चोर्ध्वं यांति विमला गुणापाये
महौजसः ॥ विभिन्नकर्मणां चातः पृथग्भावाः पृथग्विधाः ॥ १३ ॥ गुणकर्मानुरूपेण तेषां विष्णुर्महाप्रभुः ॥ कर्माणि कारयत्यद्धा
स्वस्वरूपाप्तये विभुः ॥ १४ ॥ विष्णोर्वैषम्यनैर्घृण्ये पूर्णकामस्य वै नहि ॥ सृष्टिं स्थितिं हृतिं चैव सममेव करोत्ययम् ॥ १५ ॥
स्वगुणादेव ते सर्वे कर्मणः फलभागिनः ॥ आरामोप्तान्यथा सर्वान्समं वर्षयति द्रुमान् ॥ १६ ॥ एककुल्याजला ह्यंग द्रुमाश्च प्रकृतिं
गताः ॥ नारामोप्तरि वैषम्यं नैर्घृण्यं वा कथंचन ॥ १७ ॥ ॥ व्याध उवाच ॥ ॥ जनानां पूर्णभोगानां कदा मुक्तिर्भवेन्मुने ॥ सृष्टिकाले
ऽथवा ह्यंतकाले वा स्थापनस्य च ॥ १८ ॥ कच्चिच्च सृष्टिकालस्य संहारस्याऽपि वै स्थितेः ॥ एतद्विस्तार्य मे ब्रह्मन्भगवच्चेष्टितं वद ॥ १९ ॥
॥ ॥ शंख उवाच ॥ ॥ चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते ॥ रात्रिश्च तावती तस्य ह्यहोरात्रं दिनं भवेत् ॥ २० ॥ दशपंचदिनान्याहुः
पक्षं मासो द्वयात्मकः ॥ मासद्वयमृतुं प्राहुरयनं च ऋतुत्रयम् ॥ २१ ॥ अयने द्वे वत्सरः स्यात्तादृक्च्छतसमा यदि ॥ गच्छंति ब्रह्मणो ह्यस्य
ब्रह्मकल्पं तदा विदुः ॥ २२ ॥ तावान्हि प्रलयः काल इति वेदविदां मतम् ॥ प्रलयस्त्रिविधः प्रोक्तो मानवो मानवात्यये ॥ २३ ॥ दैनंदिनो
द्वितीयो हि ब्रह्मणो दिवसात्यये ॥ ब्रह्मणोऽथ लये पश्चाद्ब्राह्मं च प्रलयं विदुः ॥ २४ ॥ ब्रह्मणस्तु मुहूर्तें तु मनोस्तु प्रलयं विदुः ॥ प्रलयेषु
व्यतीतेषु चतुर्दशसु वै क्रमात् ॥ २५ ॥ दैनंदिनलयं प्राहुः प्रलयानां स्थितिं पुनः ॥ त्रयाणामेव लोकानां लयो मन्वंतरे भवेत् ॥ २६ ॥ चेतना
नां तदा नाशो न लोकानां क्षयो भवेत् ॥ उदकैरेव पूर्तिश्च यथा पूर्वं तथा पुनः ॥ २७ ॥ मन्वंतरांते भूयात्तु चेतनानां पुनर्भवः ॥ दैनंदिनलये
व्याध सर्वस्यापि क्षयो भवेत् ॥ २८ ॥ सत्यलोकं विना सर्वे लोका नश्यंति साधिपाः ॥ सचेतनाः साधिभूताः प्रसुप्ते चतुरानने ॥ २९ ॥
स्नपनं परात् ॥ तस्य पुण्यप्रभावेन परं पदमवाप्तवान्" इति ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ द्वयात्मकः पक्षद्वय
प्रमाणः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ चेतनानां प्राणिनाम् ॥ २७ ॥ २८ ॥ २९ ॥

॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ चतुर्व्यूहात्मकः अनिरुद्धप्रद्युम्नसंकर्ष

तत्त्वाभिमानिनो देवाः केचिच्च मुनयस्तथा ॥ शिष्यंति सुप्ताः सर्वेऽपि सत्यलोकव्यवस्थिताः ॥ ३० ॥ तिष्ठंति सुप्तिमापन्ना यावत्कल्पमतींद्रियाः ॥ पुनर्निशात्यये ब्रह्मा यथापूर्वमकल्पयत् ॥ ३१ ॥ ऋषीन्देवान्पितॄँल्लोकान्धर्मान्वर्णान्पृथक्पृथक् ॥ पुनर्दशावतारा हि विष्णोर्देवस्य चक्रिणः ॥ ३२ ॥ नियमेन भवंत्येते तथान्येऽपि च भूरिशः ॥ देवता ऋषयश्चैव आकल्पं च गिरां पतेः ॥ ३३ ॥ पुनरेवाऽभिवर्तंते ब्रह्मणा सह मुक्तिगाः ॥ भूपाश्च साधवो ये च सिद्धिं प्राप्ताः परं गताः ॥ ३४ ॥ तेनैव चाभिवर्तंते सत्यलोकव्यवस्थिताः ॥ तद्राशिगाः पुनर्यांति तन्नाम्ना श्रुतिसंस्थिताः ॥ ३५ ॥ तत्तद्गोत्रेषु जायंते तत्तत्कर्मरताः सदा ॥ दैत्यानामपि सर्वेषां यदा कलियुगात्ययः ॥ ३६ ॥ कलिना सह गच्छंति स्वां गतिं निरयालयाः ॥ तेषां च राशिसंस्था ये तन्नामानोऽपरेऽपि च ॥३७॥ जायंते कर्मणा स्वेन तत्तत्कर्मविधायकाः॥सृष्टिकालं प्रवक्ष्यामि मुक्तिकालं तथैव च ॥ ३८ ॥ब्रह्मादीनां च देवानां समाहितमना भव ॥ निमेषो देवदेवस्य ब्रह्मकल्पसमो मतः ॥ ३९ ॥ तस्यावसाने चोन्मेषो देवदेवशिखामणेः ॥ निमेषांऽते भवेदिच्छा स्रष्टुं लोकांश्च कुक्षिगान् ॥ ४० ॥ सोऽपश्यत्स्वोदरे सर्वाञ्जीवसंघाननेकशः ॥ सृज्यान्मुक्तानमून्सर्वाँल्लिंगभंगमुपागतान् ॥ ४१ ॥ सुप्ताः सृतिस्थाः सर्वेऽपि तमोगा अपि सर्वशः ॥ पूर्वकल्पे लिंगभंगमापन्ना विधिपूर्वकाः ॥ ४२ ॥ मानवांता जीवकोशा जीवन्मुक्ताश्च मुक्तिगाः ॥ पूर्वकल्पे विमुक्ताश्च ब्रह्माद्या मानवांतकाः ॥ ४३ ॥ ध्यानसंस्था हि तिष्ठंति विष्णुकुक्षिगता अपि ॥ उन्मेषस्यादिमे भागे चतुर्व्यूहात्मको विभुः ॥ ४४ ॥ भूत्वा तु पूर्वसाद्गुण्याद्वासुदेवाच्च व्यूहगात् ॥ दत्त्वा तु ब्रह्मणो मुक्तिं सायुज्याख्यां महाविभुः ॥ ४५ ॥ दत्त्वा तदनु सायुज्यं तत्त्वज्ञानं महात्मनाम् ॥ सारूप्यं चैव केषांचित्सामीप्यं च तथा विभुः ॥ ४६ ॥ सालोक्यं च तथाऽन्येषां दत्त्वा देवो जनार्दनः ॥ अनिरुद्धवशे सर्वान्स्थिताँल्लोकानलोकयत् ॥ ४७ ॥ प्रद्युम्नस्य वशे दत्त्वा सृष्टिं कर्तुं मनो दधे ॥ मायां जयां कृतिं शांतिमुपयेमे स्वयं हरिः ॥ ४८ ॥ चतुर्व्यूहैः पूर्णगुणैर्वासुदेवादिकैः क्रमात् ॥ ताभिर्युक्तो महाविष्णुश्चतुर्व्यूहात्मको विभुः ॥ ४९ ॥ भिन्नकर्माशयं लोकं पूर्णकामो व्यजीजनत् ॥ उन्मेषांते पुनर्विष्णुर्योगमायां समाश्रितः ॥ ५० ॥

णवासुदेवाख्यस्वरूपचतुष्टययुतः ॥ ४४ ॥ सद्गुणानां समूहः साद्गुण्यं तस्मात् ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥

॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ नित्याः प्रतिदिनं चित्तशुद्ध्यर्थमाचरणीयाः नैमित्तिका निमित्तं कालादिविशेषमुपलभ्य चित्तशुद्ध्यर्थं विहिताः काम्याः

संकर्षणाद्व्यूहगाच्च हरत्येतच्चराचरम् ॥ तदेतत्सर्वमाख्यातं कार्यं चिंत्यं महात्मनः ॥ ५१ ॥ यदचिंत्यं दुर्विभाव्यं ब्रह्माद्यैरपि योगि
भिः ॥ ॥ व्याध उवाच ॥ ॥ के वा भागवता धर्माः कैर्विष्णुश्च प्रसीदति ॥ ५२ ॥ तानहं श्रोतुमिच्छामि सांप्रतं वद नो
मुने ॥ ॥ शंख उवाच ॥ ॥ येन चित्तविशुद्धिः स्याद्यः सतामुपकारकः ॥ ५३ ॥ तं विद्धि सात्त्विकं धर्मं यश्च केनाप्य
निंदितः ॥ श्रुतिस्मृत्युदितो यस्तु यदि निष्कामिको भवेत् ॥ ५४ ॥ यस्तु लोकाऽविरुद्धोऽपि तं धर्मं सात्त्विकं विदुः ॥ चतुर्विधा हि ते धर्मा
वर्णाश्रमविभागतः ॥ ५५ ॥ नित्यनैमित्तिकाः काम्या इति ते च त्रिधा मताः ॥ ते सर्वे स्वस्वधर्माश्च यदा विष्णोः समर्पिताः ॥ ५६ ॥
तदा वै सात्त्विका ज्ञेया धर्मा भागवताः शुभाः ॥ देवतांतरदैवत्याः सकामा राजसा मताः ॥ ५७ ॥ यक्षरक्षःपिशाचादिदैवत्या लोकनिष्ठुराः ॥
हिंसात्मका निंदिताश्च धर्मास्ते तामसाः स्मृताः ॥ ५८ ॥ सत्त्वस्थाः सात्त्विकान्धर्मान्विष्णुप्रीतिकराञ्छुभान् ॥ कुर्वंत्यनीहया नित्यं ते वै
भागवताः स्मृताः ॥ ५९ ॥ येषां चित्तं सदा विष्णौ जिह्वायां नाम वै विभोः ॥ पादौ च हृदये येषां ते वै भागवताः स्मृताः ॥ ६० ॥ सदाचार
रता ये च सर्वेषामुपकारकाः ॥ सदैव ममताहीनास्ते वै भागवताः स्मृताः ॥ ६१ ॥ येषां च शास्त्रे विश्वासो गुरौ साधुषु कर्मसु ॥ ये विष्णु
भक्ताः सततं ते वै भागवताः स्मृताः ॥ ६२ ॥ येषां हि संमता धर्माः शाश्वता विष्णुवल्लभाः ॥ श्रुतिस्मृत्युदिता ये च ते धर्माः शाश्वता
मताः ॥ ६३ ॥ अटनं सर्वदेशेषु वीक्षणं सर्वकर्मणाम् ॥ श्रवणं सर्वधर्माणां विषयाऽऽसक्तचेतसाम् ॥ ६४ ॥ अकिंचित्करमेतेषां षंढस्येव
वरस्त्रियः ॥ साधूनां दर्शनेनैव मनो द्रवति वै सताम् ॥ ६५ ॥ चंद्रस्य कौमुदीसंगाच्चंद्रकांतशिला यथा ॥ क्वचित्सच्छास्त्रश्रवणाद्विषयै रहितं
मनः ॥ ६६ ॥ तिष्ठत्येव सतां पुंसां तेजोरूपं ह्यकल्मषम् ॥ पद्मबन्धोः प्रभासंगात्सूर्यकांतशिला यथा ॥ ६७ ॥ निष्कामैर्हि जनैर्यैस्तु
श्रद्धया समुपाश्रितः ॥ यो विष्णुवल्लभो नित्यं धर्मो भागवतो मतः ॥ ६८ ॥ तैर्दृष्टा बहवो धर्मा इहाऽमुत्र फलप्रदाः ॥ विष्णुप्रीतिकराः
सूक्ष्माः सर्वदुःखविमोचकाः ॥ ६९ ॥

प्रसिद्धाः ॥ ५६ ॥ भागवता विष्णुसंबंधिनः ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥

॥ ७० ॥ प्रश्रया गृहादौ आश्रयास्तेषाम् ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ उर्वारुकस्य कर्कटीफलस्य रसायनस्य पूर्वोक्तपानकप्रमुखस्य प्रदानम् ॥७६॥ ॥ ७७ ॥ ७८ ॥ ७९ ॥ अलाबुं दुग्धतुंबी महाराष्ट्रभाषायां दुधा भोपळा इति प्रसिद्धम्, गृंजरं गाजर इति प्रसिद्धम्, तिलपिष्टकं तिलैः कृतं किमपि खाद्यम्, आरनालं कांजिकम्, भिःसटं कमलकंदः अथवा दग्धान्नम्, घृतकोशातकी घोसाळे गिलिका इति प्रसिद्धम् ॥८०॥ उपोदकी थोरमयाळ पूईशाक इति प्रसिद्धा, कलिंगं

दध्नः सारमिवोद्धृत्य धर्मं वैशाखसंभवम् ॥ रमायै भगवानाह क्षीराब्धौ हितकाम्यया ॥ ७० ॥ मार्गच्छायाविनिर्माणं प्रपादानं च वै तथा ॥
व्यजनैर्व्यजनं चैव प्रश्रयाणां समर्पणम् ॥ ७१ ॥ छत्रस्योपानहोर्दानं दानं कर्पूरगन्धयोः ॥ वापीकूपतडागानां निर्माणं विभवे सति ॥ ७२ ॥
सायाह्ने पानकस्यापि दानं तु कुसुमस्य च ॥ तांबूलदानं पापघ्नं गोरसानां विशेषतः ॥ ७३ ॥ लवणान्विततक्रस्य दानं श्रांताय वै पथि ॥
अभ्यंगकरणं चैव द्विजपादावनेजनम् ॥ ७४ ॥ कटकम्बलपर्यंकदानं गोदानमेव च ॥ मधुयुक्ततिलानां च दानं पापविनाशनम् ॥ ७५ ॥
सायाह्ने चेक्षुदण्डानां दानमुर्वारुकस्य च ॥ रसायनप्रदानं च पितृनिर्वापणं तथा ॥ ७६ ॥ एते धर्मा षिशिष्योक्ता मासेऽस्मिन्माधवप्रिये ॥
प्रातः सूर्योदये स्नात्वा शृण्वन्द्विजकुलेरितम् ॥७७॥ नित्यकर्माणि कृत्वैवं मधुसूदनमर्चयेत् ॥ कथां माधवमासीयां शृणुयाच्च समाहितः॥७८॥
तैलाभ्यंगं वर्ज्जयेच्च कांस्यपात्रे तु भोजनम् ॥ निषिद्धभक्षणं चैव वृथाऽऽलापं तु वर्जयेत् ॥ ७९ ॥ अलाबुं गृंजरं चैव लशुनं तिलपिष्टकम् ॥
आरनालं भिस्सटं च घृतकोशातकीं तथा ॥८०॥ उपोदकीं कलिंगं च शिग्रुशाकं च वर्जयेत ॥ निष्पावानि कुलित्थानि मसूराणि च वर्जयेत्॥
॥ ८१ ॥ वृंताकानि कलिंगानि कोद्रवाणि च वर्जयेत् ॥ तंदुलीयकशाकं च कौसुम्भं मूलकं तथा ॥ ८२ ॥ औदुंबरं बिल्वफलं तथा श्लेष्मा
तकीफलम् ॥ सर्वथा वर्जयेद्विद्वान्मासेऽस्मिन्माधवप्रिये ॥ ८३ ॥ एतेष्वन्यतमं भुक्त्वा स चंडालो भवेद्ध्रुवम् ॥ तिर्यग्योनिशतं याति नात्र
कार्या विचारणा ॥ ८४ ॥ एवं मासव्रतं कुर्यात्प्रीतये मधुघातिनः ॥ एवं व्रते समाप्ते तु प्रतिमां कारयेद्विभोः ॥ ८५ ॥

सर्षपम् इति प्रसिद्धम् अन्यत्सुगमम् ॥ ८१ ॥ कलिंगानि कलिंगडनाम्ना प्रसिद्धानि फलानि कौसुंभं करडई इति प्रसिद्धशाकम् ॥ ८२ ॥ श्लेष्मातकीफलं भोंकर इति प्रसिद्धम् ॥ ८३ ॥ ८४ ॥ अथ व्रतांते कर्तव्यतामाह—तत्र एवं मासव्रतं कुर्यात्, एवं व्रते समाप्ते तु इत्यनेन वचनेन व्रतारंभसमाप्तिरुक्ता, परं तत्र कस्मिन्दिने आरंभः कस्मिन्दिने समाप्तिः कार्येति जिज्ञासायामाह पाद्मे—"प्रारभेत व्रतमिदं पौर्णमास्यां मधोर्नृप ॥ यमैश्च नियमैर्युक्तः शक्त्या किंचित्प्रदाय च ॥ हविष्यभुग्भूमि

शायी ब्रह्मचर्यव्रते स्थितः॥ कृच्छ्रादितपसा क्षामो ध्यायन्नारायणं हृदि ॥ एवं प्राप्य च वैशाखीं दद्यान्मधुतिलादिकम् ॥ भोजनं द्विजमुख्येभ्यो भक्त्या धेनुं सदक्षिणाम् ॥
अच्छिद्रं प्रार्थयेच्चापि तस्य स्नानस्य भूसुरान् ॥ यथा लक्ष्मीः प्रिया भूप माधवस्य जगत्पतेः ॥ तथैव माधवो मासो मधुसूदनवल्लभः ॥ एवं विधियुतो मर्त्यः स्नात्वा द्वादश
वत्सरम् ॥ उद्यापनं चरेच्छक्त्या मधुसूदनतुष्टये ॥ इदं माधवमासस्य माहात्म्यं कथितं तव॥" इति ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥९२॥

मधुसूदनदैवत्यां सवस्त्रां च सदक्षिणाम् ॥ स्वर्चितां विभवैः सर्वैर्ब्राह्मणाय निवेदयेत् ॥ ८६ ॥ वैशाखसितद्वादश्यां दद्याद्दध्यन्नमंजसा ॥ सोद
कुम्भं सतांबूलं सफलं च सदक्षिणम् ॥८७॥ ददामि धर्मराजाय तेन प्रीणातु वै यमः॥ अपसव्यात्समुच्चार्य नामगोत्रे पितुस्ततः॥८८॥ दद्याद्दध्य
न्नमक्षय्यं पितॄणां तृप्तिहेतवे ॥ गुरुभ्यश्च तथा दद्यात्पश्चाद्दद्याच्च विष्णवे॥८९॥शीतलोदकदध्यन्नं कांस्यपात्रस्थमुत्तमम्॥सदक्षिणं सतांबूलं सभ
क्ष्यं च फलान्वितम् ॥९०॥ ददामि विष्णवे तुभ्यं विष्णुलोकजिगीषया ॥ इति दत्त्वा यथाशक्त्या गां च दद्यात्कुटुंबिने ॥ ९१ ॥ एवं मासव्रतं
कुर्याद्यो दंभेन विवर्जितः ॥ स सर्वैः पातकैर्हीनः कुलमुद्धृत्य वै शतम् ॥ ९२ ॥ पश्यतामेव भूतानां भित्त्वा वै सूर्यमंडलम् ॥ याति विष्णोः परं
धाम योगिनामपि दुर्लभम् ॥९३॥ व्याख्यात्येवं द्विजकुलवरे माधवीयांश्च ॥ धर्मान्विष्णवादीष्टानतिमहितरान्व्याधपृष्टान्समस्तान् ॥९४॥ वटः
सद्यः पश्यतामेव भूमौ पपाताहो पंचशाखी द्रुमोऽयम् ॥ वृक्षात्तस्मात्कोटरे संस्थितो हि व्यालः कश्चिद्दीर्घदेही करालः ॥ हित्वा देहं पाप
योनिं च सद्यः स वै तस्थौ प्रांजलिर्नम्रमूर्धा ॥ ९५ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखंडे वैशाख
मासमाहात्म्ये नारदाम्बरीषसंवादे भागवतधर्मकथनंनाम विंशोऽध्यायः ॥ २० ॥ ॥ छ ॥ ॥ श्रुतदेव उवाच ॥ ॥ ततस्तु विस्मितो भूत्वा
शंखो व्याधसमन्वितः ॥ को भवानिति तं प्राह दशैषा च कुतस्तव ॥ १ ॥ केन वा कर्मणा सौम्य मतिस्तव शुभावहा ॥ अकस्मात्ते कथं
मुक्तिरेतदाचक्ष्व विस्तरात् ॥ २ ॥ शंखेनैव तदा पृष्टो दण्डवत्पतितो भुवि ॥ प्रश्रयाऽवनतो भूत्वा प्रांजलिर्वाक्यमब्रवीत् ॥ ३ ॥ अहं पुरा द्विजः
कश्चित्प्रयागे बहुभाषणः ॥ रूपयौवनसंपन्नो विद्यामदसुगर्वितः ॥ ४ ॥ धनाढ्यो बहुपुत्राढ्यः सदाऽहंकारदूषितः॥ कुसीदस्य मुनेः पुत्रो नाम्ना
रोचन इत्यहम् ॥ ५ ॥ आसनं शयनं निद्रा व्यवायोऽक्षपरिक्रियाः ॥ लोकवार्ता कुसीदं वा व्यापारास्ते ममाऽभवन् ॥ ६ ॥

॥ ९३ ॥ ९४ ॥ ९५ ॥ इति वैशाखमासमाहात्म्यटीकायां विंशोऽध्यायः ॥ २० ॥ छ ॥ अथ सर्पदेहान्मुक्तस्य पुरुषस्य कथां विवक्षुः प्रश्नमुत्थापयति–तत इत्यादिना
॥ १ ॥२ ॥ ३ ॥ ४ ॥ ५ ॥ अक्षपरिक्रिया द्यूतक्रीडा ॥ ६ ॥

तंतुमात्राणि अतिसूक्ष्माण्यपि कर्माणि लोकपरंपरागतानि, कुर्वे अकरवम् ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ अचरम् अकरवं लोकवार्ता लौकिकी कथा तया अभिरंजनात् मनोरंजनात् ॥ १४ ॥ १५ ॥ पंचत्वं मरणम् ॥१६॥ तप्तानि यानि सीसजलानि सीसरसास्तैः पूर्णम् मन्वंतानि मन्वंतराणि ॥१७॥ १८ ॥

तंतुमात्राणि कर्माणि लोकनिन्दाविशंकितः ॥ सदंभश्च सदा कुर्वे न श्रद्धा मे कदाचन ॥ ७ ॥ दुर्बुद्धेर्मम दुष्टस्य कियत्कालो गतोऽभवत् ॥ तदा वैशाखमासेऽस्मिञ्जयंतोनाम वै द्विजः ॥ ८ ॥ श्रावयामास तन्मासधर्मान्भागवतप्रियान् ॥ तत्क्षेत्रे वासिनां पुण्यकर्मणां च द्विजन्मनाम् ॥ ९ ॥ नारीनराः क्षत्रियाश्च वैश्याः शूद्राः सहस्रशः ॥ प्रातः स्नात्वा समभ्यर्च्य मधुसूदनमव्ययम् ॥ १० ॥ कथां शृण्वंति सततं जयन्तेन समीरिताम् ॥ शुचिभूत्वा मौनधरा वासुदेवकथारताः ॥ ११ ॥ वैशाखधर्मनिरता दंभालस्यविवर्जिताः ॥ तां सभां च प्रविष्टोऽहं कौतुकाच्च दिदृक्षया ॥ १२ ॥ सोष्णीषेण मया मूर्ध्ना नमस्कारोऽपि न कृतः ॥ तांबूलं च मुखे कृत्वा कंचुकं च मया धृतम् ॥१३॥ कथाविक्षेपमचरं लोकवार्ताभिरंजनात् ॥ सर्वेषां चित्तचांचल्यमभूद्वै लोकवार्तया ॥ १४ ॥ क्वचिद्धासः प्रसार्याहं क्वचिन्निंदन्क्वचिद्धसन् ॥ एवं कालो मया नीतः कथा यावत्समाप्यते ॥ १५ ॥ पश्चात्तेनैव दोषेण सद्योऽल्पायुर्विनष्टधीः ॥ सन्निपातेन पञ्चत्वं प्राप्तोऽहं च परे दिने ॥१६॥ तप्तसीसजलैः पूर्णं निरयं च हलाहलम्॥ प्राप्य भुक्त्वा यातनां च मन्वन्तानि चतुर्दश ॥१७॥ युक्तेष्वथ च लक्षेषु तथा चतुरशीतिभिः ॥ क्रमाद्योनिषु जातोऽहमिदानीं चावसन्द्रुमे ॥१८॥ दशयोजनविस्तीर्णे शतयोजनमुन्नते ॥ व्यालोऽहं तामसः क्रूरः सप्तयोजनकोटरे ॥१९॥ भूत्वा वसामि विप्रर्षे कर्मणा बाधितः पुरा ॥ अयुतं च समा याता निराहारस्य कोटरे ॥ २० ॥ दैवात्तव मुखांभोजसमीरितकथामृतम् ॥ श्रुत्वा चक्षुर्द्वयेनाहं सद्यो ध्वस्ताशुभो मुने ॥२१॥ व्यालयोनिं विसृज्याऽहं दिव्यरूपधरः पुमान् ॥ प्रांजलिः प्रणतो भूत्वा पादौ ते शरणं गतः॥२२॥ कस्मिञ्जन्मनि त्वं बंधुर्न जाने मुनिसत्तम ॥ न मयोपकृतं क्वाऽपि सानुकम्पः कुतः सताम् ॥ २३ ॥ साधूनां समचित्तानां सदा भूतदयावताम् ॥ परोपकारप्रकृतिर्न चैषामन्यथा मतिः ॥ २४ ॥ मामद्यानुगृहाण त्वं यथा धर्मे मतिर्भवेत् ॥ न भूयाद्विस्मृतिः क्वाऽपि विष्णोर्देवस्य चक्रिणः ॥ २५ ॥ महतां साधुवृत्तानां संगतिश्च सदा भवेत् ॥ दारिद्र्यमेकमेव स्यान्मदांधपरमांजनम् ॥ २६ ॥

॥ १९ ॥ २० ॥ चक्षुर्द्वयेन श्रुत्वा सर्पस्य चक्षुःश्रवत्वात् चक्षुर्भ्यां श्रवणम् ॥ २१ ॥ २२ ॥ सतां सानुकंपः कुतः कदापि साधूनामुपरि दया न कृतेत्यर्थः ॥ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

॥ २७ ॥ गताध्वसः गतसाध्वसः ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥

इति तं बहुधा स्तुत्वा प्रणम्य च पुनः पुनः ॥ प्रांजलिः प्रणतस्तस्थौ तूष्णीमेव तदग्रतः ॥ २७ ॥ शंखो दोर्भ्यां समुत्थाप्य पूर्णप्रेमपरिप्लुतः ॥
पस्पर्श पाणिना चांगं शंतमेन गताध्वसः ॥ २८ ॥ चक्रे सोऽनुग्रहं तस्मिन्दिव्यरूपधरे द्विजे ॥ प्राह तं कृपयाऽऽविष्टो भाविवृत्तान्तमञ्जसा ॥
॥ २९ ॥ द्विज त्वं मासमाहात्म्यश्रवणाच्च हरेरपि ॥ माहात्म्यश्रवणात्सद्यो विध्वस्ताऽखिलबंधनः ॥ ३० ॥ अतिहाय कलंकं च क्रमाद्गत्वा
पुनर्भुवि ॥ दशार्णे विषमे पुण्ये भविता त्वं द्विजोत्तमः ॥ ३१ ॥ वेदशर्मेति विख्यातः सर्ववेदविशारदः ॥ तत्र ते भविता जातिस्मृतिरात्यंतिकी
शुभा ॥३२॥ तथा स्मृतानुबन्धस्त्वं त्यक्तसर्वेषणः शुभः॥करोषि सकलान्धर्मान्वैशाखोक्तान्हरिप्रियान् ॥ ३३ ॥ निर्द्वन्द्वो निःस्पृहोऽसंगो गुरु
भक्तो जितेन्द्रियः ॥ सदा विष्णुकथालापो भविता तत्र जन्मनि ॥३४॥ ततः सिद्धिं समाप्याथ विध्वस्ताऽखिलबन्धनः ॥ प्राप्नोषि परमं धाम
योगैरपि दुरासदम् ॥३५॥ मा भैषीः पुत्र भद्रं ते भविता मत्प्रसादतः ॥ हास्याद्भयात्तथा क्रोधाद्द्वेषात्कामादथाऽपिवा ॥३६॥ स्नेहाद्वा सकृदुच्चार्य
विष्णोर्नामाऽघहारि च ॥ पापिष्ठा अपि गच्छन्ति विष्णोर्धाम निरामयम् ॥३७॥ किमु तच्छ्रद्धया युक्ता जितक्रोधा जितेन्द्रियाः ॥ दयावन्तः
कथां श्रुत्वा गच्छंतीति द्विजोत्तम ॥३८॥ केचित्केवलया भक्त्या कथालापैकतत्पराः ॥ सर्वधर्म्मोज्झिता वाऽपि यांति विष्णोः परं पदम्॥३९॥
द्वेषादिना च भक्त्या वा केचिद्विष्णुमुपासते ॥ तेऽपि यांति परं धाम पूतनेवासुहारिणी ॥ ४० ॥ महद्भिः संगतो नित्यं वाग्विसर्गस्तदाश्रयः ॥
मुमुक्षूणां च कर्तव्यः स विधिः श्रुतिचोदितः ॥ ४१ ॥ स वाग्विसर्गो जनताऽघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि ॥ नामान्यनंतस्य
यशोंकितानि यच्छृण्वन्ति गायन्ति गृणंति साधवः ॥ ४२ ॥ यः कष्टसेवां न च कांक्षते विभुर्न वासनं भूरि न रूपयौवने ॥ स्मृतः सकृद्गच्छति
धाम भास्वरं कं वा दयालुं शरणं व्रजेत ॥ ४३ ॥ तमेव शरणं याहि नारायणमनामयम् ॥ भक्तवत्सलमव्यक्तं चेतोगम्यं दयानिधिम् ॥ ४४ ॥
कुरु सर्वानिमान्धर्मान्वैशाखोक्तान्महामते ॥ तेन तुष्टो जगन्नाथः शर्म ते च विधास्यति ॥ ४५ ॥ इत्युक्त्वा विररामाथ व्याधं दृष्ट्वा सुविस्मितः॥
स दिव्यः पुरुषः प्राह पुनस्तं मुनिपुंगवम् ॥ ४६ ॥ ॥ दिव्यपुरुष उवाच ॥ ॥ धन्योस्म्यनुगृहीतोऽस्मि त्वया शंख दयालुना ॥ दिष्ट्या गता
मे दुर्योनिर्यामि चैव परां गतिम् ॥ ४७ ॥ इति तं च परिक्रम्य ह्यनुज्ञातो दिवं ययौ ॥ ततः सायमभूद्राजञ्छंखो व्याधेन तोषितः ॥ ४८ ॥

अवद्धवत्यपि अशुद्धेऽपि ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥

॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ निववृते परावृत्तः ॥ ५९ ॥ चूतमाम्रफलम् ॥ ६० ॥ ६१ ॥ ६२ ॥

संध्यां सायन्तनीं कृत्वा रात्रिशेषं निनाय च ॥ नानाख्यानैश्च भूपानां देवानां च महात्मनाम् ॥ ४९ ॥ लीलाभिरवताराणां दृष्टगो
ष्ठिभिरेव च ॥ ब्राह्मे मुहूर्ते चोत्थाय पादौ प्रक्षाल्य वाग्यतः ॥ ५० ॥ ध्यायंश्च तारकं ब्रह्म कृत्वा शौचादिसत्क्रियाम् ॥ वैशाखे मेषगे सूर्ये
स्नात्वा प्राक्च भगोदयात् ॥ ५१ ॥ कृत्वा संध्यादिकं कर्म तथा संतर्प्य चाऽखिलान् ॥ व्याधमाहूय हृष्टात्मा मूर्ध्नि प्रोक्ष्य निरीक्ष्य च ॥ ५२ ॥
रामेति द्व्यक्षरं नाम ददौ वेदाधिकं शुभम् ॥ विष्णोरेकैकनामाऽपि सर्ववेदाधिकं मतम् ॥ ५३ ॥ तेभ्यश्चाऽनंतनामभ्योऽधिकं नाम्नां सहस्र
कम् ॥ तादृङ्नामसहस्रेण रामनाम समं मतम् ॥ ५४ ॥ तस्माद्रामेति तन्नाम जप व्याध निरंतरम् ॥ धर्मानेतान्कुरु व्याध यावदामरणांति
कम् ॥ ५५ ॥ ततस्ते भविता जन्म वल्मीकस्य ऋषेः कुले ॥ वाल्मीकिरिति नाम्ना च भूमौ ख्यातिमवाप्स्यसि ॥ ५६ ॥ इति व्याधं समा
दिश्य प्रतस्थे दक्षिणां दिशम् ॥ व्याधोऽपि तं परिक्रम्य प्रणम्य च पुनःपुनः ॥ ५७ ॥ किंचिद्दूरानुगो भूत्वा स रुदन्विरहातुरः ॥ यावद्दृष्टि
पथं तावत्पश्यंस्तस्य गतिं पुनः ॥ ५८ ॥ पुनर्निववृते कृच्छ्रात्तमेव हृदि चिंतयन् ॥ वनं निर्माय तन्मार्गे प्रपां कृत्वा सुनिर्मलाम् ॥ ५९ ॥
अतियोग्यानिमान्धर्मान्वैशाखोक्तांश्चकार ह ॥ वन्यैः कपित्थपनसैर्जंबूचूतादिभिः फलैः ॥ ६० ॥ मार्गगानां श्रमार्तानामाहारं परिकल्पयन् ॥
उपानद्भिश्चंदनैश्च छत्रैश्च व्यजनैरपि ॥६१॥ वालुकास्तरणोपेतच्छायाभिश्च क्वचित्क्वचित् ॥ आजहाराथ पांथानां श्रमं स्वेदोद्भवं तथा ॥६२॥
प्रातः स्नात्वा दिवारात्रं जपन्रामेति वै मनुम् ॥ व्याधजन्मनि नामाऽसौ वल्मीकस्य सुतोऽभवत् ॥ ६३ ॥ कृणुर्नाम मुनिः कश्चित्तस्मिन्नेव
सरोवरे ॥ तपो वै दुस्तरं तेपे बाह्यव्यापारवर्जितः ॥ ६४ ॥ वल्मीकमभवद्देहे तस्य कालेन भूयसा ॥ वल्मीक इति तं प्राहुरतो वै मुनिपुंग
वम् ॥ ६५ ॥ पश्चात्तपोविरामांते कृणौ स्मृतिपथं गते ॥ स्त्रियोऽनुस्मरतो राजन्स्खलितं चेंद्रियं मुनेः ॥ ६६ ॥ जग्राह शैलुषी काचित्तस्यां
जज्ञे वनेचरः ॥ वाल्मीकिरिति विख्यातो भुवनेषु महायशाः ॥ ६७ ॥ यो वै रामकथां दिव्यां स्वैः प्रबंधैर्मनोहरैः ॥ लोके प्रख्यापयामास
कर्मबन्धनिकृंतनीम् ॥ ६८ ॥

॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥

॥ ६९ ॥ ७० ॥ इति वैशाखमासमाहात्म्यटीकायामेकविंशोऽध्यायः ॥ २१ ॥ छ ॥ पुनर्मैथिलेयः श्रुतदेवं प्रति वैशाखधर्मान्पृच्छति—केत्यादिना ॥ १ ॥ २ ॥ ॥ ३ ॥ ४ ॥ ५ ॥ इमास्तिथयः ॥ ६ ॥ ७ ॥ सुगुणोत्तमः सुगुणः उत्तमश्च ॥ ८ ॥ ९ ॥ वैशाखे गोचरो वैशाखसंबंधी ॥ १० ॥ ११ ॥ नारका

॥ ॥ श्रुतदेव उवाच ॥ ॥ पश्य वैशाखमाहात्म्यं भूपालाद्याऽपि भूतिदम् ॥ व्याधोप्युपानहौ दत्त्वा ऋषित्वं प्राप दुर्लभम् ॥ ६९ ॥ य इदं परमाख्यानं पापघ्नं रोमहर्षणम् ॥ शृणुयाच्छ्रावयेद्वाऽपि न भूयः स्तनपो भवेत् ॥ ७० ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे व्याधोपाख्याने वाल्मीकेर्जन्मकथनन्नामैकविंशोऽध्यायः ॥ २१ ॥ ॥ छ ॥

॥ ॥ मैथिलेय उवाच ॥ ॥ का ह्यस्मिंस्तिथयः पुण्या मासे वैशाखसंज्ञके ॥ कानि दानानि शस्तानि तासुतासु विशेषतः ॥ १ ॥ काः प्रख्याताश्च वै लोक एतदाचक्ष्व विस्तरात् ॥ ॥ श्रुतदेव उवाच ॥ ॥ त्रिंशच्च तिथयः पुण्या वैशाखे मेषगे रवौ ॥ २ ॥ एकादश्यां कृतं पुण्यं कोटिकोटिगुणं भवेत् ॥ सर्वदानेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ॥ ३ ॥ समवाप्नोति वैशाख एकादश्यां जलाप्लुतः ॥ स्नानं दानं तपो होमो देवतार्चनसत्क्रियाः ॥ ४ ॥ कथायाः श्रवणं चैव सद्यो मुक्तिविधायकम् ॥ रोगाद्युपहतो यस्तु दारिद्र्येणाऽपि पीडितः ॥ ५ ॥ श्रुत्वा कथामिमां पुण्यां कृतकृत्यो भवेन्नरः ॥ अस्नात्वा चाऽप्यदत्त्वा च येन नीता इमाः शुभाः ॥ ६ ॥ स गोघ्नश्च कृतघ्नश्च पितृघ्नश्च महान्स्मृतः ॥ जलाशयाश्च स्वाधीनाः स्वाधीनं च कलेवरम् ॥ ७ ॥ माधवो मनसा सेव्यः कालश्च सुगुणोत्तमः ॥ साधवश्च दयावंतः को न सेवेत माधवम् ॥ ८ ॥ दरिद्रैश्च धनाढ्यैश्च पंगुभिश्चांधकैस्तथा ॥ षंढैश्च विधवाभिश्च नारीभिश्च नरैस्तथा ॥ ९ ॥ कुमारयुववृद्धैश्च रोगार्तैरपि भूमिप ॥ अतीवसुखसाध्यो हि धर्मो वैशाखगोचरः ॥ १० ॥ मासमेनमनुप्राप्य धर्मान्कुरु इमाञ्छुभान् ॥ को न यत्नं च कुरुते तस्मात्को न्वपरः शुभः ॥ ११ ॥ योऽतीव सुलभान्धर्मान्न करोति नराऽधमः ॥ तस्यैव सुलभा लोका नारका नात्र संशयः ॥ १२ ॥ अथातः संप्रवक्ष्यामि तस्मिन्मासे च कोत्तमा ॥ तां तिथिं सर्वपापघ्नीं दध्नः सारमिवोद्धृताम् ॥ १३ ॥ चैत्रे मासि महापुण्ये मेषसंस्थे दिवाकरे ॥ पापघ्नी पितृदैवत्या गयाकोटिफलप्रदा ॥ १४ ॥ अत्रैव श्रूयते पुण्या पितृगाथा पुरातनी ॥ शृणु तां सत्कथां राजन्सावर्णौ शासति क्षितिम् ॥ १५ ॥

नरकस्थानभूताः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ शिश्नस्य निग्रहः कामजय इत्यर्थः, जिह्वाया निग्रहः

त्रिंशत्कलियुगस्यांते सर्वधर्मविवार्जिते ॥ आनर्ते तु द्विजः कश्चिद्धर्मवर्ण इति श्रुतः ॥ १६ ॥ दृष्ट्वा कलियुगे राजञ्जनान्पापरतान्मुनिः ॥ तस्यैव प्रथमे पादे वर्णधर्मविवर्जिते ॥१७॥ स कदाचित्सत्रयागं मुनीनां तु महात्मनाम् ॥ अगमत्पुष्करे क्षेत्रे कुर्वतां मौनधारिणाम् ॥१८॥ तत्र चासन्पुण्यकथा ऋषीणां शास्त्रगोचराः॥ तत्र केचित्कलियुगं प्रशशंसुर्धृतव्रताः ॥१९॥ कृते यद्वत्सरात्साध्यं पुण्यं माधवतोषणम् ॥ त्रेतायां मासतः साध्यं द्वापरे पक्षतो नृप ॥ २० ॥ तस्माद्दशगुणं पुण्यं कलौ विष्णुस्मृतेर्भवेत् ॥ अत्यल्पमपि वै पुण्यं कलौ कोटिगुणं भवेत् ॥ २१ ॥ दया पुण्यविहीने तु दानधर्मविवर्जिते ॥ दयादानं च कुरुते सकृदुच्चार्य वै हरिम् ॥ २२ ॥ स एव चोर्ध्वगो नूनं दुर्भिक्षे चान्नदस्तथा ॥ एतत्प्रसंगावसरे नारदोऽभ्येत्य वै मुनिः ॥ २३ ॥ करेणैकेन शिश्नं च जिह्वां चैकेन वै हसन् ॥ प्रगृह्योन्मत्तवत्तत्र ननर्त मुनिसत्तमः ॥ २४ ॥ सभ्यास्तदा तमित्यूचुः किमेतदिति नारद ॥ प्रत्युवाच स तान्सर्वान्नृत्यं कुर्वन्हसन्सुधीः ॥ २५ ॥ संतोषाद्यदिह प्रोक्तं नृत्यद्भिर्भावितात्मभिः ॥ सिद्धा वयं न संदेहः पुण्योऽयं कलिरागतः ॥ २६ ॥ तत्सत्यं न च संदेहो बहु स्वल्पेन साध्यते ॥ स्मरणात्तोषमायाति केशवः क्लेशनाशनः ॥ २७ ॥ तथापि वः प्रवक्ष्यामि दुर्घटं च द्वयं ध्रुवम् ॥ शिश्नस्य निग्रहः पुत्रा जिह्वाया अपि नित्यशः ॥ २८ ॥ द्वयं यद्धि भवेद्यस्य स एव स्याज्जनार्दनः ॥ भवद्भिर्नात्र स्थातव्यं तस्मात्कलियुगागमे ॥ २९ ॥ पाखंडं भारतं हित्वा संचरध्वं यथासुखम् ॥ यत्र कुत्रापि देशेषु मनो यत्र प्रसीदति ॥ ३० ॥ इति तद्वचनं श्रुत्वा मुनयः शंसितव्रताः ॥ सत्रं समाप्य सहसा ययुस्ते च यथासुखम् ॥ ३१ ॥ धर्मवर्णोऽपि तच्छ्रुत्वा त्यक्तुं भूमिं मनो दधे ॥ स व्रतं चोर्ध्वतेजस्कं धृत्वा दण्डकमंडलू ॥ ३२ ॥ जटावल्कलधारी च भूत्वा चैवं ययौ पुनः ॥ कलौ युगे त्वनाचारान्द्रष्टुं विस्मितमानसः ॥ ३३ ॥ तत्राऽपश्यज्जनान्घोरान्पापाचाररतान्खलान् ॥ पाखण्डिनो द्विजाः सर्वे शूद्राः प्रव्राजिनस्तथा ॥ ३४ ॥ भर्तारं द्वेष्टि भार्या च शिष्यो द्वेष्टि गुरुं तथा ॥ भृत्यश्च स्वामिहंता च पुत्रः पितृवधे रतः ॥ ३५ ॥

मधुरादिरसेषु रागद्वेषराहित्यम् ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ प्रव्रांजिनः संन्यासिनः ॥ ३४ ॥ ३५ ॥

शुभाः श्रुतिस्मृतिपुराणविहिताः क्रियाः कर्माणि क्रियासाम्याः लौकिकगमनागमनादिसदृशाः ॥ ३६ ॥ शिताः क्रूराः ॥ ३७ ॥ कूटसाक्ष्यं मत्साक्षिकमिदमिति
मिथ्याकथनम् ॥ ३८ ॥ एकम् अन्यत् । "एके मुख्यान्यकेवला" इत्यभिधानात् ॥ हैतुकी सहेतुका जीविकार्थं सकलं कर्मेति भावः ॥ ३९ ॥ ४० ॥ ४१ ॥

शूद्रप्राया द्विजाः सर्वे बस्तप्रायाश्च धेनवः ॥ गाथाप्रायास्तथा वेदाः क्रियासाम्याः शुभाः क्रियाः ॥ ३६ ॥ भूतप्रेतपिशाचाद्याः फलदास्तत्र
देवताः ॥ ता एव श्रद्धयाऽर्चंति जनाः पापरताः शिताः ॥ ३७ ॥ सर्वे व्यवायनिरतास्तदर्थे त्यक्तजीविताः ॥ कूटसाक्ष्यप्रवक्तारः सदा कैतवमानसाः
॥ ३८ ॥ मनस्येकं वचस्येकं कर्मण्येकं सदा कलौ ॥ सर्वेषां हैतुकी विद्या सा पूज्या नृपमंदिरे ॥ ३९ ॥ गीताद्याश्च कला विद्या नृपाणां
च प्रियावहाः ॥ हीनाश्च पूज्यतां यांति नोत्तमाश्च कलौ युगे ॥ ४० ॥ श्रोत्रियाश्च द्विजाः सर्वे दरिद्राः स्युः कलौ युगे ॥ विष्णुभक्तिर्नराणां तु
प्रायशो नैव वर्तते ॥४१॥ प्रायः पाखंडभूयिष्ठं पुण्यक्षेत्रं भविष्यति ॥ शूद्रा धर्मप्रवक्तारो जटिलास्तापसाः कलौ ॥४२॥ सर्वे चाल्पायुषो मर्त्या
दयाहीनाः शठा जनाः ॥ सर्वे धर्मप्रवक्तारः सर्वे च ग्रहणोत्सवाः ॥ ४३ ॥ स्वार्चनं चाऽपि हीच्छंति वृथा निन्दापरायणाः ॥ असूयानिरताः
सर्वे प्रभोः स्वगृहमागते ॥ ४४ ॥ भ्राता च भगिनीगंता पिता पुत्रीं च वै कलौ ॥ सर्वेऽपि शूद्रीनिरताः सर्वे वारांगनारताः ॥ ४५ ॥ साधूंन्नैव
विजानंति बहुपापांश्च मन्यते ॥ व्यक्तीकुर्वंति साधूनां दोषमेकं दुराग्रहाः ॥ ४६ ॥ पापानां दोषजातानि गुणत्वेन वदन्ति हि ॥ दोषमेव प्रगृह्णंति
कलौ तु विगुणा जनाः ॥४७॥ जलौका धर्मसंयुक्ता रक्तं पिबति नो पयः ॥ औषध्यः सत्त्वहीना हि ऋतूनां व्यत्ययास्तथा ॥ ४८ ॥ दुर्भिक्षं
सर्वराष्ट्रेषु कन्या काले न सूयते ॥ नटनर्तकविद्यासु प्रीतिमन्तो नराः कलौ ॥ ४९ ॥ वेदवेदांतविद्यासु निरता ये गुणाधिकाः ॥ भृत्यान्पश्यंति
तान्मूढास्ते भ्रष्टाश्चाखिला नृप ॥ ५० ॥ त्यक्तश्राद्धक्रियाः सर्वे त्यक्तवेदोदितक्रियाः ॥ जिह्वायां विष्णुनामानि न वर्तंते कदाचन ॥ श्रृंगाररस
निर्वाणास्तद्गीतान्येव ते जगुः ॥५१॥ न विष्णुसेवा न च शास्त्रवार्ता न यागदीक्षा न विचारलेशः ॥ न तीर्थयात्रा न च दानधर्माः कलौ जने
क्वाऽपि बभूव चित्रम् ॥ ५२ ॥ तान्दृष्ट्वा धर्मवर्णोऽपि सुभीतोऽत्यन्तविस्मितः ॥ वंशं पापात्क्षयं यांतं दृष्ट्वा द्वीपांतरं ययौ ॥ ५३ ॥ स चरन्सर्वद्वीपेषु
लोकेष्वेव तु सर्वशः ॥ पितृलोकं ययौ धीमान्कदाचित्कौतुकान्वितः ॥ ५४ ॥ तत्राऽपश्यन्महाघोराञ्च्छ्राम्यमाणांश्च कर्मभिः ॥५५॥

॥ ४२ ॥ ग्रहणं परद्रव्यादीनां तत्र उत्सवो हर्षो येषां तथाविधाः ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ काले प्रसवदशायां न सूयते बालैव प्रसूते इत्यर्थः
॥ ४९ ॥ ५० ॥ श्रृंगाररस एव निर्वाणो मुक्तिसदृशो येषां ते ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥

पतितान् आसन्नपतनान् ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ तेन वचसा ॥ ६२ ॥ ६३ ॥ ६४ ॥ निस्तंतूनां संततिरहितानाम् ॥ ६५ ॥ ६६ ॥

धावतो रुदमानांश्च पततः पतितानपि ॥ तत्रापश्यच्चान्धकूपे पतितान्स्वान्पितॄनधः ॥ ५६ ॥ दूर्वाग्रलंबिनो दीनान्दूर्वाच्छेदे हि शंकितान् ॥
तदा प्राप्तः कोऽपि चाखुर्दूर्वामूलं तदाश्रयम् ॥ ५७ ॥ तेन भागत्रयं चात्तमेको भागोवशेषितः ॥ तं दृष्ट्वा ते क्षीयमाणं मूलं दुःखेन कर्षिणः ॥
॥ ५८ ॥ अधो दृष्ट्वा चांऽधकूपं तटपातादिभीषणम् ॥ दुरुत्तारं महाघोरं कर्मणाप्तं सुदुःखिताः ॥ ५९ ॥ अग्रे चाऽपि दुरुत्तारमवलंबविवर्जि
तम् ॥ तान्दृष्ट्वा विस्मितो भूत्वा दयालुर्वाक्यमब्रवीत् ॥६०॥ के यूयं पतिता ह्यस्मिन्केन दुस्तरकर्मणा ॥ कस्य गोत्रे समुत्पन्नाः कथं वो मुक्ति
रूर्जिता ॥ ६१ ॥ एतद्यूयं वदध्वं मे शर्म वोऽथ भविष्यति ॥ इत्येवमुदितास्तेन पितरोऽथ सुदुःखिताः ॥ ६२ ॥ तमूचुः करुणां वाचं धर्मश्रुति
पुरःसराः ॥ ॥ पितर ऊचुः ॥ ॥ वयं श्रीवत्सगोत्रीया भुवि सन्तानवर्जिताः ॥ ६३ ॥ पिंडश्राद्धविहीनाश्च तेन पच्यामहे वयम् ॥ निःसन्ता
नोऽपि नो वंशो जातः पापैः कलौ युगे ॥६४॥ नाऽस्माकं पिंडदश्चास्ति वंशे पापात्क्षयं गते ॥ तेनांऽधकूपे पतनं निस्तंतूनां दुरात्मनाम् ॥६५॥
एको हि वर्तते वंशे धर्मवर्णो महायशाः ॥ स विरक्तश्चरन्नेको न गार्हस्थ्यमुपेयिवान् ॥ ६६ ॥ तंतुना तेन बिभ्रामो दूर्वानालावलंबिताः ॥ निस्तंतु
त्वाच्च तन्मूलमाखुः खादति प्रत्यहम् ॥ ६७ ॥ एकस्यैवाऽवशिष्टत्वात्किंचिन्नलोऽवशेषितः ॥ आखुना खाद्यमानश्च वर्तते सौम्य पश्यताम् ॥
॥ ६८ ॥ तस्य चाऽऽयुःक्षये तात शेषमाखुर्हरिष्यति ॥ पश्चात्कूपे पतिष्यामो दुरुत्तारेंऽधतामसे ॥ ६९ ॥ तस्मात्त्वं च भुवं गत्वा धर्मवर्णं प्रबो
धय ॥ अस्मद्वाक्यैर्दयापात्रैर्गार्हस्थ्ये विमुखं मुनिम् ॥ ७० ॥ पितरस्ते भृशाऽर्ता हि नरके पतिता मया ॥ अन्धकूपे दुरुत्तारे दृष्टा दूर्वावलं
बिताः ॥ ७१ ॥ सा दूर्वा वंशरूपा हि तन्मूलं सततं मुने ॥ कालाख्यो मूषकस्तस्य मूलं खादति प्रत्यहम् ॥ ७२ ॥ वंशनाशोऽनुक्रमत
एकस्त्वं त्ववशेषितः ॥ तेन मूलस्य दूर्वाया नष्टं भागत्रयं मुने ॥७३॥ एको भागोऽवशिष्टोऽत्र यतस्त्वं वर्तसे भुवि ॥ किंचित्खादति वै त्वाऽऽखु
स्तव चाऽऽयुःक्षयक्रमात् ॥ ७४ ॥ परेते त्वयि चाऽस्माकं तवाऽपि पतनं भवेत् ॥ कूप एवान्धतामिस्रे संतानेऽपि क्षयं गते ॥ ७५ ॥

॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥

॥ ७६ ॥ ७७ ॥ ७८ ॥ हरिवासरी एकादशीव्रतकर्ता ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ सूनृतैर्मधुरैः ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ जनकाः

तस्माद्गार्हस्थ्यमासाद्य कुरु संततिवर्धनम् ॥ तेनाऽस्माकं तवाऽपि स्याद्गतिरूर्ध्वा न संशयः ॥ ७६ ॥ एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां
व्रजेत् ॥ यजेत वाऽश्वमेधं च नीलं वा वृषमुत्सृजेत् ॥ ७७ ॥ यद्येकोऽपि च वैशाखे माघे वा कार्त्तिकेऽपि च ॥ अस्मानुद्दिश्य वै स्नानं
श्राद्धं दानं करिष्यति ॥ ७८ ॥ तेन चोर्ध्वगतिर्भूयान्नरकादुद्धृतिश्च नः ॥ एको वा विष्णुभक्तः स्यादेको वा हरिवासरी ॥ ७९ ॥ एको वा शृणु
याद्विष्णोः कथां पापविनाशनीम् ॥ तस्यातीतं कुलशतं भावि चाऽपि कुलं शतम् ॥ ८० ॥ अपि पापवृतं क्वाऽपि नरकं नैव पश्यति ॥ किम
न्यैर्बहुभिः पुत्रैर्दयाधर्मविवर्जितैः ॥ ८१ ॥ ये जाता नार्चयंत्यद्धा विष्णुं नारायणं कुले ॥ नाऽपुत्रस्य हि लोकोऽस्ति सर्वमेतज्जना विदुः ॥८२॥
तत्राऽपि च दयायुक्तं तत्संतानं च दुर्लभम् ॥ इति तं बोधयित्वा तु वाक्यैरेतैश्च सूनृतैः ॥ ८३ ॥ विरक्तस्योर्ध्वरेतस्य गार्हस्थ्ये त्वं मतिं
कुरु ॥ पितॄणां वचनं श्रुत्वा धर्मवर्णोऽतिविस्मितः ॥८४॥ प्रणम्य प्रांजलिः प्राह रुदन्वै जातवेपथुः ॥ नाम्नाहं धर्मवर्णश्च युष्मद्वंश्यो दुराग्रही ॥
॥ ८५ ॥ सत्रे श्रुत्वा तु वचनं नारदस्य महात्मनः ॥ जिह्वादाढर्यं गुह्यदार्ढ्यं न कस्याऽपि कलौ युगे ॥ ८६ ॥ दृष्ट्वा भुवि च पापिष्ठांस्ताञ्ज
नानपि शंकितः ॥ भीतो दुर्जनसंगत्या चरन्द्वीपांतरे वसन् ॥ ८७ ॥ पादास्त्रयो गता ह्यस्य कलेः पादेंऽत्यकेऽपि च ॥ गताः सार्द्धत्रयो भागा
इदानीं जनका इमे ॥ ८८ ॥ नाऽहं वेद्मि भवद्दुःखं वृथा जन्म गतं मम ॥ यस्मिन्कुले त्वहं जात ऋणं पित्रोर्न वै हृतम् ॥ ८९ ॥ किं तेन
जातमात्रेण भूभारेणाऽत्र शत्रुणा ॥ यो जातो नार्चयेद्विष्णुं पितॄन्देवानृषींस्तथा ॥ ९० ॥ युष्मदाज्ञां करिष्यामि मामाऽऽज्ञापयत क्षितौ ॥ यथा
न कलिबाधा स्यात्तत्र संसारतोऽपि वा ॥ ९१ ॥ कर्तव्यान्यपि कृत्यानि मया पुत्रेण भूतले ॥ इत्युक्तास्तेन वंश्येन धर्मवर्णेन धीमता ॥९२॥
किंचिदाश्वस्तमनस इदमूचुर्महीपते ॥ पुत्र पश्य दशामेतां पितॄणां ते महात्मनाम् ॥ ९३ ॥ संतत्यभावात्पततां दूर्वामात्रावलंबिनाम् ॥ त्वं
गार्हस्थ्यमुपालभ्य संतत्यास्मान्समुद्धर ॥ ९४ ॥ ये च विष्णुकथारक्ता ये स्मरंत्यनिशं हरिम् ॥ ये सदाचारनिरता न तान्वै बाधते कलिः ॥
॥ ९५ ॥ शालिग्रामशिला यस्य गृहे तिष्ठति मानद ॥ अथवा भारतं गेहे न तं वै बाधते कलिः ॥ ९६ ॥

पितरः ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥

॥ ९७ ॥ ९८ ॥ ९९ ॥ १०० ॥ १०१ ॥ २ ॥ ३ ॥ तत्तस्माच्छ्राद्धकरणात् ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ ११० ॥ ११ ॥ १२ ॥ १३ ॥

यश्च वैशाखनिरतो माघस्नानपरश्च यः ॥ कार्तिके दीपदाता यो न तं वै बाधते कलिः ॥९७॥ प्रत्यहं शृणुयाद्यस्तु कथां विष्णोर्महात्मनः ॥
पापघ्नीं मोक्षदां दिव्यां न तं वै बाधते कलिः ॥९८॥ यद्गृहे वैश्वदेवश्च यद्गृहे तुलसी शुभा ॥ यदंगणे शुभा गौश्च न तं वै बाधते कलिः॥९९॥
तस्मान्नो भीतिरस्तीह युगे पापात्मकेऽपि च ॥ शीघ्रं गच्छ भुवं पुत्र मासोऽयं माधवाह्वयः ॥ १०० ॥ सर्वेषामुपकाराय मेषसंस्थे दिवाकरे ॥
त्रिंशच्च तिथयः पुण्या मेषसंस्थे दिवाकरे ॥ १०१ ॥ एकैकस्यां कृतं पुण्यं कोटिकोटिगुणं भवेत् ॥ तत्राऽपि चैत्रबहुलो दर्शो नृणां च मुक्तिदः
॥ २ ॥ प्रियश्च पितृदेवानां सद्यो मुक्तिविधायकः ॥ ये वै पितॄन्समुद्दिश्य श्राद्धं कुर्वंति तद्दिने ॥३॥ सोदकुभं पिंडदानं तदक्षय्यफलं लभेत् ॥
ये च कुर्वंति वै श्राद्धममायां च मधौ सुत ॥ ४ ॥ तैः कृतं तु गयाक्षेत्रे श्राद्धं कोटिगुणं भवेत् ॥ यदि श्राद्धं मधौ दर्शे शाकेनाऽपि करोति च
॥ ५ ॥ कोटिश्राद्धं गयायां तु कृतं तेन न संशयः ॥ कुंभं च पानकैः पूर्णं कर्पूरागुरुवासितम् ॥ ६ ॥ यो न दद्यान्मधौ दर्शे स पितृघ्नो न
संशयः ॥ यो दद्याच्च मधौ दर्शे सपानीयं करीरकम् ॥ ७ ॥ श्राद्धं च भक्तिसंयुक्तः कुरुते च कुलोद्धृतिम् ॥ पितृणां च तथा लोके नदी चा
ऽमृतवर्षिणी ॥ ८ ॥ कुंभदानात्प्रसरति श्राद्धदानादिदायिनाम् ॥ अन्नसूपघृतापूपलेह्यपायसकर्दमान् ॥ ९ ॥ तस्माज्झटिति त्वं गच्छ यदा वा
ऽमा भविष्यति ॥ कुरु श्राद्धं पिंडदानं सोदकुम्भं महामते ॥११०॥ सर्वेषामुपकाराय गार्हस्थ्यं च समाश्रय ॥ धर्मार्थकामैः संतुष्टः प्राप्य संता
नमुत्तमम् ॥ ११ ॥ पुनश्च मुनिवृत्तिस्त्वं सुखं द्वीपे सुसंचर ॥ इत्यादिष्टः पितृभिश्च तूर्णं भूमिं ययौ मुनिः ॥ १२ ॥ चैत्रे मासे मेषसंस्थे
पुण्ये मासि दिवाकरे ॥ प्रातः स्नात्वा च संतर्प्य पितॄन्देवानृषींस्तथा ॥ १३ ॥ सोदकुंभं तथा श्राद्धं कृत्वा पापविनाशनम् ॥ तेन दत्त्वा
पितृणां च मुक्तिमावृत्तिवर्जिताम् ॥ १४ ॥ स्वयं विवाहमकरोत्संततिं प्राप्य वै सतीम् ॥ लोके प्रख्यापयामास तां तिथिं पापनाशनीम् ॥१५॥
स्वयं पुनर्मुदा भक्त्या गन्धमादनमाययौ ॥ १६ ॥ तस्मात्पुण्यतमा चैषा मधोर्दर्शाह्वयातिथिः॥ नानया सदृशी लोके तिथिर्दृष्टा श्रुताऽपि वा ॥
॥ ११७ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे कलिधर्मनि
रूपणे पितृमुक्तिर्नाम द्वाविंशोऽध्यायः ॥ २२ ॥ ॥ छ ॥

॥ १४ ॥ १५ ॥ १६ ॥ ११७ ॥ इति वैशाखमासमाहात्म्यटीकायां द्वाविंशोऽध्यायः ॥ २२ ॥ छ ॥

अथ अक्षय्यतृतीयामाहात्म्यं वर्णयति—अथेत्यादिना यावदध्यायसमाप्ति । माधवे वैशाखे सिते शुक्लपक्षे ॥ १ ॥ भगस्य रवेरुदये ॥ २ ॥ ३ ॥ ४ ॥ अक्षय्यम् अनश्वरम्
॥५॥६॥ त्रयाणां देवर्षिपितॄणाम् ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ रामां रमणीयाम् ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ चस्कंद गलितम् ॥ १६ ॥ मा माम् ।

॥ ॥ श्रुतदेव उवाच ॥ ॥ अथातः संप्रवक्ष्यामि माहात्म्यं पापनाशनम् ॥ अक्षय्यायास्तृतीयायाः सिते पक्षे च माधवे ॥ १ ॥ ये कुर्वंति
च तस्यां वै प्रातः स्नानं भगोदये ॥ ते सर्वे पापनिर्मुक्ता यांति विष्णोः परं पदम् ॥ २ ॥ देवान्पितॄन्मुनीन्यस्तु कुर्यादुद्दिश्य तर्पणम् ॥
तेनाऽधीतं च तेनेष्टं तेन श्राद्धशतं कृतम् ॥ ३ ॥ मधुसूदनमभ्यर्च्य कथां शृण्वंति ये नराः ॥ अक्षय्यायां तृतीयायां ते नरा मुक्तिभागिनः ॥
॥ ४ ॥ ये दानं तत्र कुर्वंति मधुद्विट्प्रीतये शुभम् ॥ तदक्षय्यं फलत्येव मधुशासनशासनात् ॥ ५ ॥ देवर्षिपितृदैवत्या तिथिरेषा महाशुभा ॥
त्रयाणां तृप्तिदात्री च कृते धर्मे सनातने ॥ ६ ॥ प्रख्यातिश्च तिथेरस्याः केन चास्ति तदप्यहम् ॥ वक्ष्यामि नृपशार्दूल सावधानमनाः शृणु ॥
॥ ७ ॥ पुरा पुरंदरस्याऽऽसीद्युद्धं च बलिना सह ॥ देवानां चैव दैत्यानां द्वंद्वयुद्धमभूत्ततः ॥ ८ ॥ स निर्जित्य बलिं दैत्यं पातालतलवासि
नम् ॥ पुनर्भुवं समासाद्य चोतथ्यस्याऽऽश्रमं ययौ ॥ ९ ॥ तत्रापश्यच्च तत्पत्नीं गुर्विणीं मंदगामिनीम् ॥ चलच्छ्रोणितटाबद्धकांचीदाम्ना सुमंडि
ताम् ॥ १० ॥ क्वणत्कंकणनिर्घोषजितमत्तालिकोकिलाम् ॥ वल्गुचित्रांबरां रामां मंजुवाचं शुचिस्मिताम् ॥ ११ ॥ लसत्कुंभस्थलाभ्यां च
कुचाभ्यामुपशोभिताम् ॥ हसत्पद्ममुखां दिव्यां नीलोत्पलसुलोचनाम् ॥ १२ ॥ केतक्युदरपांडुभ्यां गंडाभ्यां च मनोरमाम् ॥ श्रमोच्छ्वसंतीं
दीनाक्षीं पर्णशालामुखे स्थिताम् ॥ १३ ॥ स्वपतीं शयने क्वाऽपि तां दृष्ट्वा मोहमागतः ॥ बलात्कारेण बुभुजे गुर्विणीं पाकशासनः ॥ १४ ॥
गर्भस्थस्तु तदा पिंडः स्वस्य पातविशंकया ॥ छादयामास वै योनिं द्वारे पादेन दुःखितः ॥ १५ ॥ ततश्चस्कन्द वीर्यं तद्भूमावेव बलिद्विषः ॥
गर्भस्थाय चुकोपासौ भगवान्पाकशासनः ॥ १६ ॥ तं शशाप च गर्भस्थं रुषा ताम्रांतलोचनः ॥ जात्यन्धो भव दुर्बुद्धे माऽवमंस्था यतः
पदा ॥ १७ ॥ प्रच्छाद्य योनिद्वारं च ततो दीर्घतपाह्वयः ॥ पदा प्रस्कंदिताद्वीर्याज्जालतः समजायत ॥ १८ ॥ पश्चादिंद्रो ययौ शीघ्रमृषेः शाप
विशंकितः ॥ पलायंतं हरिं दृष्ट्वा जहसुर्बटवोऽखिलाः ॥ १९ ॥ ततस्तु व्रीडितो भूत्वा ययौ मेरोर्गुहां शुभाम् ॥ तत्र लीनश्चचाराऽसौ दुस्तरं वै
तपो महत् ॥ २० ॥ मेरौ विलीय वसति देवेन्द्रे लज्जयाऽन्विते ॥ गूढैर्विज्ञाय तां वार्तां दैतेया बलिपूर्वकाः ॥ २१ ॥

पादादावप्यार्षो मामित्यस्य स्थाने मादेशः ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ गूढैः चारैः ॥ २१ ॥

बलीयसः बलीयांसः ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ इति विचार्य तत्समीपं गत्वा च पृष्ट इत्यर्थः ॥ २६ ॥ रसातले पाताले ॥ २७ ॥ विभुरिंद्रः ॥ २८ ॥
॥ २९ ॥ ३० ॥ ३१ ॥ जहि नाशय ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ दिष्टं शुभं सुखमिति यावत्, प्राप्नोतीति शेषः ॥ ३६ ॥ ३७ ॥ ३८ ॥ बलमित्यादि

सुरानाक्रम्य बुभुजुर्बलींद्रश्चामरावतीम् ॥ दिक्पालानां विभूतीश्च शंबराद्या बलीयसः ॥ २२ ॥ बलाद्बुभुजिरे हीननाथे राष्ट्रे दिवौकसाम् ॥
रक्षितारमजानंतो देवाश्चाग्निपुरोगमाः ॥ २३ ॥ पप्रच्छुर्धिषणं देवं देवाचार्यमकल्मषम् ॥ पप्रच्छुरिंद्रवृत्तांतं क्वस्वित्तिष्ठति नः प्रभुः ॥ २४ ॥
दैत्याक्रांतमिदं राष्ट्रं हीननाथं दिवौकसाम् ॥ कुतो नाऽऽयाति देवोऽसौ भूयान्कालो गतो विभो ॥ २५ ॥ तं यामो यत्र धिषण प्रार्थयामश्च तं
विभुम् ॥ इति पृष्टस्तदा देवैर्धिषणस्तानुवाच ह ॥ २६ ॥ रसातले बलिं जित्वा चोतथ्यस्याऽऽश्रमं ययौ ॥ भुक्ता पत्नीं च दार्ढ्येन तच्छिष्यै
रेव निन्दितः ॥ २७ ॥ व्रीडितस्तु दिवं यातुं गुहां मेरोर्विवेश ह ॥ तत्रैवाऽऽस्ते शचीयुक्तः स्वकृतं चिन्तयन्विभुः ॥ २८ ॥ इति तस्य वचः
श्रुत्वा देवा अग्निपुरोगमाः ॥ गुहां मेरोर्ययुः शीघ्रं द्रष्टुं प्रार्थयितुं विभुम् ॥ २९ ॥ तत्र दृष्ट्वा गुहालीनं देवेन्द्रं पाकशासनम् ॥ तुष्टुवुर्विविधैः
स्तोत्रैस्तद्वीर्यैर्लोकविश्रुतैः ॥ ३० ॥ इंद्र तुभ्यं नमस्तेऽस्तु सर्वदेवाऽधिपाय ते ॥ वयं दैत्यैरर्दिताश्च त्वया हीना भृशार्दिताः ॥ ३१ ॥ स्थान
भ्रष्टाश्चरामोऽग नानादेशेषु दुःखिताः ॥ तस्मादागत्य देवेन्द्र जहि शत्रूनरिंदम ॥ ३२ ॥ इति स्तुतस्तदा देवैर्निश्चक्राम गुहामुखात् ॥ लज्जया
ऽवनतो भूत्वा पश्यन्भूमिं च चक्षुषा ॥ ३३ ॥ न किंचिदपि चोवाच दुःखाद्गद्गदभाषणः ॥ तऽऽज्ञात्वा धिषणः प्राह तं सुरेन्द्रं भयानकम् ॥ ३४ ॥
मा शंका ते सुरपते कर्माधीनमिदं जगत् ॥ मानामानौ सुखं दुःखं लाभालाभौ जयाजयौ ॥ ३५ ॥ पूर्वकर्मानुरोधेन भवंत्येते न संशयः ॥ जीवः
कर्मानुगो दुःखं दिष्टं दैवेन कालतः ॥ ३६ ॥ प्राज्ञाः प्रायो न शोचंति न प्रहृष्यंति वै सुखात् ॥ तस्मात्प्रारब्धतः प्राप्तं दुःखं चेदं तव प्रभो ॥
॥ ३७ ॥ तत्प्राप्य मघवन्दुःखं नैव शोचितुमर्हसि ॥ इत्युक्तो गुरुणा चाह मघवानमराधिपान् ॥ ३८ ॥ ॥ इन्द्र उवाच ॥ ॥ परस्त्रीसंगदोषे
ण बलं वीर्यं यशोऽमलम् ॥ मंत्रशक्तिः शास्त्रशक्तिर्विद्याशक्तिश्च मानद ॥ ३९ ॥ अभवन्नष्टवीर्यं मे तूष्णीं तेन वसाम्यहम् ॥ पाकशासनवाक्यं
तु श्रुत्वा स्वाचार्यसंयुताः ॥ ४० ॥ मंत्रयामासुरेकान्ते पुनस्तस्य बलाप्तये ॥ तदा गुरुश्च तान्प्राह करुणं च विदुत्तमः ॥ ४१ ॥ ॥ बृहस्पति
रुवाच ॥ ॥ मासो वैशाखनामाऽयं प्रियो वै मधुघातिनः ॥ सर्वाश्च तिथयः पुण्या मासेऽस्मिन्माधवप्रिये ॥ ४२ ॥

षट्पदेषु प्रतिपदं नाशं जगामेति पूरणीयम् ॥ ३९ ॥ स्वाचार्यो गुरुस्तेन संयुताः ॥ ४० ॥ तस्य शक्रस्य ॥ ४१ ॥ ४२ ॥

॥ ४३ ॥ ४४ ॥४५॥४६॥ समाहितः सहित इत्यर्थः ॥ ४७ ॥ ४८ ॥ उडुपश्चंद्रः ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ स्वाध्यायं लेभिरे इत्यन्वयः ॥ ५३ ॥
इति वैशाखमाससमाहात्म्यटीकायां त्रयोविंशोऽध्यायः ॥ २३ ॥ छ ॥ अथाऽस्मिन्नध्याये वैशाखशुक्लद्वादशीमाहात्म्यं वर्णयतियावदध्यायसंपूर्ति—तिथिष्वित्यादिना ।
सितपक्षिणी शुक्लपक्षसंबंधिनी, एतासु तिथिषु पुण्यासु इत्यनेन बहुवचनेन अमा, चैकादशी, तृतीया, सप्तमी, निर्दिष्टा तत्र त्रयाणां माहात्म्यमत्र प्रतिपादितं सप्तम्या
माहात्म्यमाहपाद्मे—“प्राप्तोऽयं माधवो मासो माधवस्याऽतिवल्लभः ॥ तस्याऽपि सप्तमी शुक्ला गंगायामतिदुर्लभा ॥ वैशाखशुक्लसप्तम्यां जाह्नवी जह्नुना पुरा ॥ क्रोधात्पीता

तत्राऽपि च सिते पक्षे मासेऽस्मिन्नक्षयाह्वया ॥ या तस्यां स्नानदानादि श्रद्धया च करोति वै ॥४३॥ तस्य पापसहस्राणि नश्यंत्येव न संशयः॥
अनवद्यं तथैश्वर्यं बलं धैर्य्यं भवंति च ॥४४॥ तस्मात्तस्यां तृतीयायां हरिणा बलविद्विषा ॥ स्नानदानादिसद्धर्मान्कारयामो हिताऽऽप्तये ॥४५॥
भविष्यति च सा शक्तिर्विद्याया मन्त्रशास्त्रयोः ॥ बलं धैर्यं यशश्चैव यथापूर्वं भविष्यति ॥ ४६ ॥ इत्येवं तु विचार्याऽथ गुरुर्देवैः समाहितः ॥
इन्द्रेण कारयामास धर्मानेतान्हरिप्रियान् ॥ ४७ ॥ अक्षय्यायां तृतीयायां भुक्तिमुक्तिफलप्रदान् ॥ तेन पूर्ववदेवाऽऽसीद्बलं धैर्यादिकं विभोः ॥
॥ ४८ ॥ परस्त्रीसंगदोषोऽपि सद्य एव व्यलीयत ॥ पश्चाद्धताशुभः शक्रो राहोर्मुक्त इवोडुपः ॥ ४९ ॥ देवतानां तथा मध्ये शुशुभे च हरि
र्यथा ॥ पश्चाद्देवैः समायुक्तो विनिर्जित्य तथाऽसुरान् ॥ ५० ॥ तृतीयायाश्च माहात्म्याद्भाग्ययुक्तोऽमरावतीम् ॥ विवेश विभवैः सार्द्धं शंखतूर्या
दिनिःस्वनैः ॥ ५१ ॥ अनुज्ञाताश्च शक्रेण स्वधामानि ययुः सुराः ॥ ततस्ते यज्ञभागांश्च लेभिरे च यथा पुरा ॥ ५२ ॥ पिंडभागांश्च पितरो
यथापूर्वं प्रपेदिरे ॥ स्वाध्याये मुनयस्तुष्टा दैत्यानां च पराजयः ॥ ५३ ॥ तदाप्रभृति लोकेऽस्मिंस्तृतीया चाऽक्षयाऽऽह्वया ॥ प्रख्याता सर्वलो
केषु देवर्षिपितृतुष्टिदा ॥५४॥ तस्मात्पुण्यतमा चैषा सर्वकर्मनिकृंतनी ॥ भुक्तिमुक्तिप्रदा नृणां तृतीया चाऽक्षयाऽऽह्वया ॥ ५५ ॥ इति श्रीस्कांदे
महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादेऽक्षय्यतृतीयायाः श्रेष्ठत्वकथनंनाम त्रयो
विंशोऽध्यायः ॥२३॥ ॥छ॥ ॥ श्रुतदेव उवाच ॥ ॥ तिथिष्वेतासु पुण्यासु द्वादशी सितपक्षिणी ॥ वैशाखमासे राजेंद्र सर्वाघौघविनाशिनी ॥१॥

पुनस्त्यक्ता कर्णरंध्रात्तु दक्षिणात् ॥ तस्यां समर्चयेद्देवीं गंगां गगनमेखलाम् ॥ स्नात्वा सम्यग्विधानेन स धन्यः सुकृती नरः ॥ तस्यां यस्तर्पयेद्देवान्पितॄन्मर्त्यान्यथाविधि ॥
साक्षात्पश्यति तं गंगा स्नातकं गतपातकम् ॥ न माधवसमो मासो न गंगासदृशी नदी ॥ दुर्लभः खलु योगोऽयं हरिभक्त्यैव लभ्यते ॥ दर्शनस्पर्शनस्नानकीर्तनध्यानसेवनैः॥
पुण्यादपुण्यपुरुषान्पावयंति सहस्रशः ॥” इति ॥ १ ॥

॥ ९९ ॥ ३ ॥ अर्हते योग्याय ॥ ४ ॥ ५ ॥ ६ ॥ तीर्थान्युत्प्लाव्य तीर्थेषु स्नात्वेत्यर्थः ॥ ७ ॥ ८ ॥ वैशाखे तुलसीपत्रपुष्पैः मधुसूदनं पूजयेत्, पत्रपुष्पाभावे
दत्तं द लिधान्यादिभिर्वा पूजयेत् । तथा अश्वत्थवृक्षस्याऽपि वैशाखे पूजनं कार्यमिति शेषः । अत्र विशेषः पाद्मे—"माधवं सकलं मासं तुलस्या योऽर्चयेद्धरिम् ॥
विमुच्य यं मधुहंतारं नास्ति तस्य पुनर्भवः ॥ अलाभे पत्रपुष्पाणामन्नाद्येनाऽपि पूजयेत् ॥ शालिगोधूमतंदूलयवैर्वाऽपि हरिं सदा ॥ योऽश्वत्थमर्चयेद्देवमुदकेन समंततः ॥

दिशो दानैः किं तपोभिश्च किमुपोष्यैर्व्रतैश्च किम् ॥ किमिष्टैश्चैव पूर्तैश्च द्वादशी यैर्न सेविता ॥ २ ॥ गंगायामुपरागे तु यो दद्याद्गोसहस्रकम् ॥
गना फलं समवाप्नोति प्रातः स्नात्वा हरेर्दिने ॥ ३ ॥ यद्दत्तं चाऽर्हते चाऽन्नं द्वादश्यां च सिते शुभे ॥ सिक्थे सिक्थे भवेत्तस्य कोटिब्राह्मणभोजनम्॥
यांि ४ ॥ यो दद्यात्तिलपात्रं तु द्वादश्यां मधुसंयुतम् ॥ निर्धूताऽखिलबंधस्तु विष्णुलोके महीयते ॥ ५ ॥ एकादश्यां सिते पक्षे कुर्य्याज्जागरणं
कोद्वरेः ॥ स जीवन्नेव मुक्तः स्यात्तुष्टाः स्युः सर्वदेवताः ॥ ६ ॥ कोटींदुसूर्यग्रहणे तीर्थान्युत्प्लाव्य यत्फलम् ॥ तत्फलं समवाप्नोति प्रातः स्नात्वा हरे
मभर्दने ॥ ७॥ तुलस्याः कोमलैः पत्रैर्द्वादश्यां विष्णुमर्चयेत् ॥ समस्तकुलमुद्धृत्य विष्णुलोकाऽधिपो भवेत् ॥८॥ (क्षेपकः—तुलसीपत्रपुष्पैश्च वैशा
खेऽश्वत्थपूजनम् ॥ पुष्पाद्यभावे धान्यैर्वा पूजयेन्मधुसूदनम् ॥१॥) यमं पितृन्गुरून्देवान्विष्णुमुद्दिश्य मानवः ॥ माधवे शुक्लद्वादश्यां सोदकुंभं
सदक्षिणम्॥ ९ ॥ दध्यन्नं चैव यो दद्यात्तस्य पुण्यफलं शृणु ॥ प्रयागे प्रत्यहं चैव कुर्याद्यः कोटिभोजनम् ॥ १० ॥ यावत्संवत्सरं पुण्यं षड्रसान्नैर्म
नोरमैः ॥ तत्फलं समवाप्नोति मधुशासनशासनात् ॥११॥ शालिग्रामशिलादानं यः कुर्याद्द्वादशीदिने ॥ वैशाखे शुक्लपक्षे तु सर्वपापैः प्रमुच्यते
॥१२॥ द्वादश्यां पयसा यस्तु स्नापयेन्मधुसूदनम् ॥ राजसूयाऽश्वमेधाभ्यां यत्फलं परिजायते ॥ १३ ॥ त्रयोदश्यां यजेद्विष्णुं पयोदधिविमिश्रि
तैः ॥ शर्करामधुभिर्द्रव्यैर्मधुसूदनप्रीतये ॥ १४ ॥ तत्फलं समवाप्नोति गंगायां नाऽत्र संशयः ॥ पंचामृतैश्च यो विष्णुं भक्त्या संस्नापयेद्विभुम् ॥
॥ १५ ॥ स सर्वकुलमुद्धृत्य विष्णुलोके महीयते ॥ यो दद्यात्पानकं ह्यस्यां सायाह्ने प्रीतये हरेः ॥ १६ ॥

कुलानामयुतं तेन तारितं स्यान्न संशयः ॥ अश्वत्थतर्पणात्तात सर्वदुःखं विनश्यति ॥ तर्पिताः पितरस्तेन तेन विष्णुः समर्चितः ॥ कृत्वा ह्यष्टांगयोगं तु स्नात्वा पिप्पलतर्पणम् ॥ कृत्वा गोविंदमभ्यर्च्य न स दुर्गतिमाप्नुयात् ॥ इति" ॥ (१) ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ राजसूयाश्वमेधाभ्यां यत्फलं जायते तदस्मादपि जायत इति भावः ॥ १३ ॥ यजेत् पूजयेत् ॥ १४ ॥ १५ ॥ १६ ॥

उर्वारुकं फूट इति प्रसिद्धं तत्पानकम् ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ अत्रेतिहासं कथयति—पुरेत्यादिना ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥२६॥ प्रत्ययः प्रत्यक्षज्ञानम् अनुभव इत्यर्थः । अवमानिनाम् अवमानिनीनाम् ॥ २७ ॥ २८ ॥ २९ ॥ तस्याः योगिन्याः ॥ ३० ॥ अयातयामिकां नवीनाम् ॥ ३१ ॥

जीर्णपापं जहात्याशु जीर्णां त्वचमिवोरगः ॥ सायाह्ने चैव यो दद्यादुर्वारुकरसायनम् ॥१७॥ भवेन्मुक्तः कर्मबंधाद्दुर्वारुकरसायनात् ॥ इक्षुदण्डं चूतफलं दद्याद्द्राक्षाफलानि च ॥१८॥ न विच्छित्तिः संततेः स्यात्तस्य वै शतपूरुषम् ॥ यो दद्याद्गंधलेपं तु सायाह्ने द्वादशीदिने ॥१९॥ बाह्यो पघातैः सकलैर्मुच्यते नाऽत्र संशयः ॥ यत्किंचित्कुरुते पुण्यं द्वादश्यां राजसत्तम॥२०॥माधवे तु सिते पक्षे तदक्षय्यफलं भवेत् ॥ प्रख्यातिमस्या वक्ष्यामि येन जातेति भूमिप ॥ २१ ॥ सर्वेषां सर्वपापघ्नीं सर्वमंगलदायिनीम् ॥ पुरा काश्मीरदेशे तु द्विजो देवव्रताऽऽह्वयः ॥ २२ ॥ तस्याऽऽसीन्मालिनीनाम तनया चारुरूपिणी ॥ ददौ तां सत्यशीलाय विप्रवर्याय धीमते ॥२३॥ तामुद्वाह्य ययौ धीमान्स्वदेशं यवनाऽऽह्वयम् ॥ रूपयौवनसंपन्ना तस्य नैव प्रियाऽभवत् ॥ २४ ॥ सदा विद्वेषसंयुक्तस्तस्यां तिष्ठति निष्ठुरः ॥ नाऽन्यस्य कस्यचिद्द्वेष्टि तां विना नृपते पतिः ॥ २५ ॥ तस्मिन्सा क्रोधसंयुक्ता वशीकरणलंपटा ॥ अपृच्छत्प्रमदा राजन्यास्त्यक्ताः पतिभिः पुरा ॥२६॥ ताभिरुक्ता तु सा भूप वश्यो भर्त्ता भविष्यति॥ अस्माकं प्रत्ययो जातो भर्तृत्यांगावमानिनाम् ॥२७॥ प्रयुज्य भेषजं वश्यं नीता हि पतयःपुरा ॥ योगिनीं त्वं तु गच्छाऽद्य दास्यते भेषजं शुभम् ॥ य॥२८॥ न विकल्पस्त्वया कार्यो भविता दासवत्पतिः ॥ योगिनीमंदिरे गत्वा तासां वाक्येन भूपते ॥ २९ ॥ प्रसादमतुलं तस्या लेभे दुश्चारिणी केती ॥ शतस्तंभसमायुक्तां कुटीं भेजे त्वरान्विता ॥३०॥ सुविस्तृतां सुवर्चस्कां तथैवाऽयातयामिकाम् ॥ प्रावृता दीर्घवस्त्रेण सन्निधिं तेन योगिनीम॥ ३१ ॥ दीर्घाभिश्च सटाभिस्तु प्रावृता दीप्तिसंयुता ॥ परिचारसमोपेता वीक्षमाणा शनैःशनैः ॥ ३२ ॥ अक्षसूत्रकरा सा तु जपंती प्रार्थिता विंश ॥ ददौ वश्यकरं मंत्रं क्षोभकं प्रत्ययात्मकम् ॥ ३३ ॥ ततः सा प्रणता भूत्वा दद्याद्द्रव्यांऽगुलीयकम् ॥ वज्रमाणिक्यसंयुक्तमतिरक्तप्रभान्वि पुनस्त्वे ॥३४॥ मृदुकांचनसंयुक्तं भानुरश्मिसमद्युति ॥ ततो दृष्ट्वा तु संतुष्टा पादस्थं चांगुलीयकम् ॥३५॥ हृदयं च तया ज्ञातं तत्पतेरवमानजम् ॥ साक्षात्क्ता हि तया भूप तापस्याहितयुक्तया ॥ ३६ ॥ चूर्णो रक्षान्वितो ह्येष सर्वभूतवशंकरः ॥ चूर्णं भर्तरि संयुज्य रक्षां ग्रीवाश्रयां कुरु ॥ ३७ ॥ पुण्यादपुयति पतिर्वश्यो नाऽन्यां यास्यति सुन्दरीम् ॥ नाऽप्रियं वदति क्वाऽपि दुश्चारिण्यास्तवाऽपि च ॥ ३८ ॥

॥ ३३ ॥ द्रव्यांगुलीयकं मूल्यवदंगुलीयकम् ॥ ३४ ॥ ३५ ॥ अहितयुक्तया वैरयुक्तया ॥ ३६ ॥ ३७ ॥ ३८ ॥

॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ अलंकारकृते अलंकारधारणार्थं पत्युर्जीवनेच्छुः पतिजीवनमिच्छति वस्तुतः न वै हिता नैव पत्युर्हितकारिणी

दत्तं रक्षां गृहीत्वा सा प्राप भर्तृगृहं पुनः ॥ प्रदोषे पयसा युक्तश्चूर्णो भर्तरि योजितः ॥ ३९ ॥ ग्रीवायां हि कृता रक्षा न विचारः कृतस्तया ॥
विमु[illegible]स पीतचूर्णस्तु भर्त्ता नृपवरोत्तम ॥ ४० ॥ तच्चूर्णात्क्षयरोगोऽभूत्पतिः क्षीणो दिनेदिने ॥ गुह्ये तु कृमयो जाता घोरा दुष्टव्रणोद्भवाः ॥
दिशे ४१ ॥ दिनैः कतिपयै राजन्पत्युर्नैव व्यवस्थितिः ॥ उवास स्वेच्छया साऽपि पुंश्चली दुष्टचारिणी ॥ ४२ ॥ हततेजास्ततो भर्ता तामुवाच्चा
गना[illegible]लेन्द्रियः ॥ क्रन्दमानो दिवारात्रौ दासोऽस्मि तव शोभने ॥ ४३ ॥ त्राहि मां शरणं प्राप्तं नेच्छेऽहमपरां स्त्रियम् ॥ तत्तस्य विदितं ज्ञात्वा
यांति[illegible]ा सा मेदिनीपते ॥ ४४ ॥ अलंकारकृते पत्युर्जीवनेच्छुर्न वै हिता ॥ योगिनीं च ययौ शीघ्रं तस्यै सर्वं न्यवेदयत् ॥ ४५ ॥ तया
को[illegible] भेषजं दत्तं द्वितीयं दाहशांतये ॥ दत्ते च भेषजे तस्मिन्स्वस्थोऽभूत्तत्क्षणात्पतिः ॥ ४६ ॥ तिष्ठत्युपपतिर्गेहे गृहकृत्याऽपदेशतः ॥ सर्व
म्वर्णसमुद्भूता जारास्तिष्ठंति वै गृहे ॥ ४७ ॥ न किंचिद्वचने शक्तिर्भर्तुर्जाता कथंचन ॥ ततस्तेनैव दोषेण सर्वांगेषु च जज्ञिरे ॥ ४८ ॥ कृम
यश्चास्थिभेत्तारः कालांतकयमोपमाः ॥ तैर्नासाजिह्वयोश्चाऽऽसीच्छेदः कर्णद्वयस्य च ॥४९॥ स्तनयोश्चांगुलीनां च पंगुत्वं चाऽपि चाऽऽगतम् ॥
तेन पंचत्वमापन्ना गता नरकयातनाः ॥ ५० ॥ ताम्रभांडे च सा दग्धाऽयुतानि दश पंच च ॥ श्वानयोनिषु संजाता शतवारं पुनःपुनः ॥
॥ ५१ ॥ छिन्ननासा छिन्नकर्णा कृमिमूर्द्धा निरंतरम् ॥ छिन्नपुच्छा भग्नपादा ताडिता च गृहेगृहे ॥ ५२ ॥ पश्चात्सौवीरदेशेषु पद्मबन्धोर्द्विजस्य
च ॥ दास्या गृहे शुनी जाता बहुदुःखसमाकुला ॥ ५३ ॥ छिन्नकर्णा छिन्ननासा छिन्नपुच्छांघ्रिरातुरा ॥ कृमिपूर्णशिरा नित्यं कृमियोनिश्च
तिष्ठति ॥ ५४ ॥ एवं त्रिंशद्गता वर्षा अस्मिञ्जन्मनि भूमिप ॥ दैवात्कर्मविपाकेन वैशाखे मेषगे रवौ ॥ ५५ ॥ शुक्लपक्षे तु द्वादश्यां पद्मबंधो
स्तनूद्भवः ॥ नद्यां स्नात्वा शुचिर्भूत्वा सार्द्रवस्त्रो गृहं ययौ ॥ ५६ ॥ तुलसीवेदिकां प्राप्य पादाववनिजे निजौ ॥ वेदिकायामधो देशे सा शुनी
स्वापमागता ॥ ५७ ॥ प्राक्सूर्योदयवेलायां पादोदकपरिप्लुता ॥ सद्यो ध्वस्ताऽशुभा जाता जातिस्मृतिरभूत्क्षणात् ॥ ५८ ॥

॥ ४५ ॥ ४६ ॥ उपपतिर्जारः ॥ ४७ ॥ ४८ ॥ ४९ ॥ स्तनयोः अंगुलीनां च छेद इति पूर्वेणाऽन्वयः ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥
॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥

॥ ५९ ॥ ६० ॥ ताम्रभाजने एतत्संज्ञके नरके ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ वैवस्वतो यमः तस्य

स्मृत्वा कर्म कृतं पूर्वं सा शुनी तापसं सदा ॥ चुक्रोश करुणा दीना मुने त्राहीति वै पुनः॥५९॥स्वकर्म च मुनींद्राय स्मृत्वाचख्यौ भयाऽऽकुला ॥
भर्तुर्विषप्रयोगं तु स्वस्य दुश्चरितं तथा ॥६०॥याऽन्यापि युवती ब्रह्मन्भर्तुर्वश्यं समाचरेत् ॥ वृथाधर्मा दुराचारा पच्यते ताम्रभाजने ॥६१॥ भर्ता
नाथो गुरुर्भर्ता भर्ता दैवतमुत्तमम् ॥ विक्रियां कृत्य साध्वी सा कथं सुखमवाप्नुयात् ॥६२॥ तिर्यग्योनिशतं याति कृमिकोटिशतानि च ॥ तस्मा
द्भूसुर कर्तव्यं स्त्रीभिर्भर्तुर्वचः सदा ॥ ६३ ॥ साऽहं पश्ये पुनर्योनिं कुत्सितां यातनान्विताम् ॥ यदि नोद्धरसे ब्रह्मन्नद्य त्वद्दृष्टिसंमुखाम् ॥६४॥
तस्मादुद्धर मां ब्रह्मन्दुष्कृतां पापचारिणीम् ॥ सुकृतस्य प्रदानेन वैशाखे शुक्लपक्षके ॥ ६५ ॥ या कृता तु त्वया ब्रह्मन्द्वादशी पुण्यवर्द्धिनी ॥
तस्यां त्वया कृतं पुण्यं स्नानदानान्नभोजनैः ॥ ६६ ॥ दुश्चारिण्या अपि ब्रह्मंस्तेन मुक्तिर्भविष्यति ॥ यस्यां तु भूसुरः स्नातः स्वगृहे मनुजः
किल ॥ ६७ ॥ सर्वतीर्थफलावाप्तिं लभते नाऽत्र संशयः ॥ तन्नं दत्तं हुतं यत्र कृतं देवार्चनादि यत् ॥६८॥ तदक्षय्यफलं ज्ञेयं यत्कृतं द्वादशीदि
ने ॥ एवंविधफलं यत्स्यात्तद्देहि सकलं मम ॥ ६९ ॥ द्वादश्यामुपवासेन त्रयोदश्यां तु पारणात् ॥ यत्फलं स्यात्तदप्यद्धा तेन मुक्तिर्भविष्यति ॥
॥ ७० ॥ दयां कुरु महाभाग दीनायां दीनवत्सल ॥ दीननाथो जगन्नाथो युष्मन्नाथो जनार्दनः ॥ ७१ ॥ तदीयास्तादृशा एव यथा राजा
तथा प्रजाः ॥ वैवस्वतपदध्वंसिन्परित्राहि सुदुःखिताम् ॥ ७२ ॥ त्वद्द्वारवासिनीं दीनां शुनीं मां दीनवत्सल ॥ ब्रह्महत्यासहस्रं वा गोहत्यानां
स्रकम् ॥ ७३ ॥ अगम्यानां च कोटीश्च दहत्येव शुभा तिथिः ॥ तस्यां कृतं महापुण्यं मह्यं दत्त्वा महामुने ॥ ७४ ॥ मामुद्धर समुद्विग्नां
ां नाथ समुद्धर ॥ अन्ते तुभ्यं द्विजेंद्राय नमउक्तिं वदाम्यहम् ॥ ७५ ॥ इति तस्या वचः श्रुत्वा शुनीमाह मुनेः सुतः ॥ स्वकृतं जंतवोश्नंति
स्वदुःखात्मकं शुनि ॥ ७६ ॥ तस्मात्किमु त्वया कार्यं क्षुद्रया पापशीलया ॥ यया भर्ता वशं नीतो रक्षाचूर्णादिभिर्द्विजः ॥ ७७ ॥ साधु
पुनस् यत्कृतं पापं स्वस्य दुःखकरं भवेत् ॥ साधुभ्यो यत्कृतं पुण्यं स्वस्य दुःखहरं भवेत् ॥ ७८ ॥ उभयं भ्रंशतामेति पापेभ्यो यत्कृतं भवेत् ॥
साक्ष रामिश्रितं क्षीरं काद्रवेयनिवेदितम् ॥ ७९ ॥

पुण्यास्थानं यमलोकस्थनरका इति यावत्, तेषां ध्वंसिन्नाशक ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥

॥ ९९ ॥ १०० ॥ १०१ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ १०६ ॥ इति वैशाखमासमाहात्म्यटीकायां चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ छ ॥ ॥ अथ वैशाखकृशु

दत्तं दत्तं महापुण्यं द्वादशीदिनसंभवम् ॥ शुनि गच्छ हरेर्धाम निर्धूताऽखिलकल्मषा ॥ ९९ ॥ तद्वाक्यात्सहसा भूप दिव्याऽऽभरणभूषिता ॥ विमुच्य देहं जीर्णं तु दिव्यरूपधरा शुभा ॥ १०० ॥ शताऽऽदित्यप्रभा जाता सावित्रीप्रतिमा यथा ॥ जगामाऽऽमंत्र्य तं विप्रं द्योतयन्ती दिशो दश ॥१॥ भुक्त्वा दिवि महाभोगान्पश्चाज्जाता महीतले ॥ नरनारायणाद्देवादुर्वशीनाम नामतः ॥ २ ॥ वैशाखशुद्धद्वादश्याः प्रभावेण वरांगना ॥ देवानां च प्रिया जाता अप्सरस्त्वं च सा ययौ ॥ ३ ॥ यद्योगिगम्यं हुतभुक्प्रकाशं वरं वरेण्यं परमार्थरूपम् ॥ यत्प्राप्य सन्तोऽपि हि यांति मोहं तत्प्राप रूपं च शुनी हि देवी ॥४॥ पश्चात्स पद्मबंधुर्हि तां तिथिं पुण्यवर्द्धिनीम् ॥ लोवेटीं ख्यापयामास मधुद्विट्प्राणवल्लभाम् ॥५॥ कोटींदुसूर्यग्रहणाधिका सा समस्तरूपाधिकपुण्यरूपा ॥ यज्ञैः समस्तैरतिरिच्यमाना द्विजेन ख्याता भुवनत्रये च ॥ १०६ ॥ इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे शुनीमोक्षप्राप्तिर्नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥छ॥ ॥ श्रुतदेव उवाच ॥ ॥ यास्तिस्रस्तिथयः पुण्या अंतिमाः शुक्लपक्षके ॥ वैशाखमासि राजेंद्र पूर्णिमांताः शुभा नः ॥ १ ॥ अन्त्याः पुष्करिणीसंज्ञाः सर्वपापक्षयावहाः ॥ माधवे मासि यः पूर्णं स्नानं कर्त्तुं न च क्षमः ॥ २ ॥ तिथिष्वेतासु स स्नायात्पूर्णं फलं लभेत् ॥ सर्वे देवास्त्रयोदश्यां स्थित्वा जंतून्पुनंति हि ॥ ३ ॥ पूर्णायाः पर्वतीर्थैश्च विष्णुना सह संस्थिताः ॥ चतुर्दश्यां सयज्ञाश्च देवा व पुनंति हि ॥ ४ ॥ ब्रह्मघ्नं वा सुरापं वा सर्वानेतान्पुनंति हि ॥ एकादश्यां पुरा जज्ञे वैशाख्याममृतं शुभम् ॥ ५ ॥ द्वादश्यां पालितं तच्च पिना प्रभविष्णुना ॥ त्रयोदश्यां सुधां देवान्पाययामास वै हरिः ॥ ६ ॥ जघान च चतुर्दश्यां दैत्यान्देवविरोधिनः ॥ पूर्णायां सर्वदेवानां प्रस्याऽऽप्तिर्बभूव ह ॥ ७ ॥ ततो देवाः सुसंतुष्टा एतासां च वरं ददुः ॥ तिसृणां च तिथीनां वै प्रीत्योत्फुल्लविलोचनाः ॥ ८ ॥ एता वैशाख पुम तिस्रश्च तिथयः शुभाः ॥ पुत्रपौत्रादिफलदा नराणां पापहानिदाः ॥ ९ ॥ योऽस्मिन्मासे च संपूर्णे न स्नातो मनुजाधमः ॥ तिथित्रये नर स्नात्वा पूर्णमेव फलं लभेत् ॥ १० ॥ तिथित्रयेप्यकुर्वाणः स्नानदानादिकं नरः ॥ चांडालीं योनिमासाद्य पश्चाद्रौरवमश्नुते ॥ ११ ॥

मंत्र इतिथित्रयस्य महिमानं वर्णयति—या इत्यादिना ॥ १ ॥ २ ॥ ३ ॥ यज्ञेन विष्णुना सहिताः सयज्ञाः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८॥९॥ १० ॥ ११ ॥

ब्रह्मत्वं श्र

॥ ५९ । ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ कर्तारं कुटुम्बपोषकम् ॥ ८६ ॥ जन्तुः कुटुम्बपोषकः सदैव द्रोग्धा नित्यद्रोहकर्ता, कीनाशलोकंयमलो

स्मृत्व्
भर्तुद्धिकरं दृष्टमेवं पापकरं भवेत् ॥ वदत्येवं मुनिसुते शुनी दुःखैकरूपिणी ॥ ८० ॥ पुनश्चुक्रोशोर्ध्वस्वरं तत्पित्रे बहुभाषिणी ॥ पद्मबन्धो
नाथोहि शुनीं त्वद्द्वारवासिनीम् ॥ ८१ ॥ त्वदुच्छिष्टाशिनीं नित्यं त्वं पाहीति पुनःपुनः ॥ स्वपोष्या ये हि वर्तंते गृहस्थस्य महात्मनः ॥
द्भूसुः ॥ तेषामुद्धरणं कार्यमिति वेदविदां मतम् ॥ चण्डाला वायसाश्चैव सारमेयाश्च नित्यशः ॥ ८३ ॥ गृहस्थानां दयापात्रं प्रत्यहंबलि
तस्[illegible]नः ॥ अशक्तं नोद्धरेत्पोष्यं रोगाद्युपहतं यदि ॥ ८४ ॥ सोऽधः पतेन्न संदेह इति वेदविदां मतम् ॥८५॥ कर्तारमेकं जगतां हि कर्ता कृत्वा
तस्[illegible]ा पाति समस्तजंतून् ॥ दारादिरूपव्यपदेशतो हरिस्तस्मात्तदाज्ञा खलु पोष्यरक्षा ॥ ८६ ॥ स्वपोष्यरक्षां परिहृत्य जंतुर्दैवेन कृत्या
कि वर्ततेऽन्यधीः ॥ स देवद्रोग्धा सकलस्य हंता कीनाशलोकाननु संप्रयाति ॥ ८७ ॥ कर्तव्यत्वाद्दयालुत्वादेतामुद्धर दुर्मतिम् ॥ इति
स्या वचः श्रुत्वा दुःखार्ताया गृहे सुतः ॥ निश्चक्राम गृहात्तूर्णं पद्मबंधुर्दयानिधिः ॥ ८८ ॥ किमेतदिति तां प्राह पुत्रः सर्वं न्यवेदयत् ॥ स तु
पुत्रवचः श्रुत्वा तमेवं प्राह विस्मितः ॥ ८९ ॥ ॥ पद्मबन्धुरुवाच ॥ ॥ ममात्मज कथं वाक्यमीदृशं व्याहृतं त्वया ॥ न साधूनामिदं
वाक्यं भवतीह वरानन ॥ ९० ॥ आत्मसौख्यकराः पापा भवंति परिभाविताः ॥ पश्य पुत्र जनाः सर्वे परोपकरणाय वै ॥ ९१ ॥ शशी
सूर्योऽथ पवनो रजनी हुतभुग्जलम् ॥ चंदनं पादपाः संतः परोपकरणे स्थिताः ॥ ९२ ॥ अस्थिदानं कृतं पुत्र कृपया हि दधीचिना ॥ देवा
नामुपकाराय ज्ञात्वा दैत्यान्महाबलान् ॥ ९३ ॥ कपोतार्थे स्वमांसानि शिबिना भूभुजा पुरा ॥ प्रदत्तानि महाभाग श्येनाय क्षुधितानि
वै ॥ ९४ ॥ जीमूतवाहनो राजा पुराऽऽसीत्क्षितिमंडले ॥ तेनाऽपि जीवितं दत्तं गरुडाय महात्मने ॥ ९५ ॥ तस्माद्दयालुना भाव्यं भूसुरेण
विपश्चिता ॥ शुद्धे वर्षति देवस्तु किमशुद्धे न वर्षति ॥ ९६ ॥ किन्न दीपयते चन्द्रश्चंडालानां गृहे सदा ॥ तस्मादहं शुनीमेतां याचंतीं च पुनः
पुनः ॥ ९७ ॥ उद्धरिष्ये निजैः पुण्यैः पंकमग्नां च गां यथा ॥ इति पुत्रं निराकृत्य प्रतिजज्ञे महामतिः ॥ ९८ ॥

कम् ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥

॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ स्वधामानि स्वस्थानानि ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ पूर्णायां पूर्णिमायाम्॥ २२ ॥ २३ ॥ २४ ॥

उष्णोदकेन यः स्नाति माधवे च तिथित्रये ॥ रौरवं नरकं याति यावदिंद्राश्चतुर्दश ॥१२॥ पितॄन्देवान्समुद्दिश्य दध्यन्नं न ददाति यः ॥ पैशाचीं
योनिमासाद्य तिष्ठत्याभूतसंप्लवम् ॥ १३ ॥ प्रवृत्तानां च कामानां माधवे नियमे कृते ॥ अवश्यं विष्णुसायुज्यं युज्यते नाऽत्र संशयः ॥ १४ ॥
आमासं नियमासक्तः कुर्याद्यदि दिनत्रये ॥ तेन पूर्णफलं प्राप्य मोदते विष्णुमंदिरे ॥ १५ ॥ यो वै देवान्पितॄन्विष्णुं गुरुमुद्दिश्य मानवः ॥
न स्नानादि करोत्यद्धाऽमुष्य शापप्रदा वयम् ॥ १६ ॥ निःसंतानो निरायुश्च निःश्रेयस्को भवेदिति ॥ इति देवा वरं दत्त्वा स्वधामानि ययुः
पुरा ॥ १७ ॥ तस्मात्तिथित्रयं पुण्यं सर्वाघौघविनाशनम् ॥ अंत्यं पुष्करिणीसंज्ञं पुत्रपौत्रविवर्द्धनम् ॥ १८ ॥ या नारी सुभगाऽऽपूपपायसं
पूर्णिमादिने ॥ ब्राह्मणाय सकृद्दद्यात्कीर्तिमंतं सुतं लभेत् ॥ १९ ॥ गीतापाठं तु यः कुर्यादंतिमे च दिनत्रये ॥ दिनेदिनेऽश्वमेधानां फलमेति
न संशयः ॥ २० ॥ सहस्रनामपठनं यः कुर्य्याच्च दिनत्रये ॥ तस्य पुण्यफलं वक्तुं कः शक्तो दिवि वा भुवि ॥ २१ ॥ सहस्रनामभिर्देवं पूर्णा
यां मधुसूदनम् ॥ पयसा स्नाप्य वै याति विष्णुलोकमकल्मषम् ॥ २२ ॥ समस्तविभवैर्यस्तु पूजयेन्मधुसूदनम् ॥ न तस्य लोकाः क्षीयन्ते युग
कल्पादिव्यत्यये ॥ २३ ॥ अस्नात्वा चाप्यदत्त्वा च वैशाखश्च गतो यदि ॥ स ब्रह्महा गुरुघ्नश्च पितॄणां घातकस्तथा॥ २४ ॥ श्लोकार्द्धं श्लोकपादं
वा नित्यं भागवतोद्भवम् ॥ वैशाखे च पठन्मर्त्यो ब्रह्मत्वं चोपपद्यते ॥ २५ ॥ यो वै भागवतं शास्त्रं शृणोत्येतद्दिनत्रये ॥ न पापैर्लिप्यते क्वाऽ
पि पद्मपत्रमिवांभसा ॥ २६ ॥ देवत्वं मनुजैः प्राप्तं कैश्चित्सिद्धत्वमेव च ॥ कैश्चित्प्राप्तो ब्रह्मभावो दिनत्रयनिषेवणात् ॥२७॥ ब्रह्मज्ञानेन वै मुक्तिः
प्रयागमरणेन वा ॥ अथवा मासि वैशाखे नियमेन जलाप्लुतेः ॥ २८ ॥ नीलं वृषं समुत्सृज्य वैशाख्यां च जलाप्लुतेः ॥ समस्तबंधनिर्मुक्तः
पुमान्याति परं पदम् ॥ २९ ॥ गां सवत्सां द्विजेंद्राय सीदते च कुटुम्बिने ॥ इहापमृत्युनिर्मुक्तः परत्र च परं व्रजेत् ॥ ३० ॥ स्नानदानविही
नस्तु वैशाखीं चैव यो नयेत् ॥ श्वानयोनिशतं प्राप्य विष्ठायां जायते कृमिः ॥ ३१ ॥ तिस्रः कोट्योऽर्धकोटिश्च तीर्थानि भुवनत्रये ॥ संभूय
मंत्रयांचक्रुः पापसंघातशंकिताः ॥ ३२ ॥ जना अस्मासु पापिष्ठा विसृजन्ति स्वकं मलम् ॥ तदस्माकं कथं गच्छेदिति चिंतासमन्विताः ॥३३॥

ब्रह्मत्वं ब्राह्मण्यम्, उपपद्यते प्राप्नोति, जन्मांतरेऽपि ब्राह्मणो भवतीत्यर्थः ॥ २५॥२६॥ ब्रह्मभावो मुक्तिः ॥२७॥२८॥२९॥पदमिति शेषः॥३०॥३१॥३२॥३३॥

॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ वैशाखान्ते इत्यत्र पूर्णिमांतमासो ग्राह्यः तस्यैव स्नानादौ विहितत्वात् ॥३८॥३९॥ ४० ॥ ४१ ॥ योगाद्योगशक्त्या ॥ ४२ ॥

तीर्थपादं हरिं जग्मुः शरण्यं शरणं विभुम् ॥ स्तुत्वा च बहुभिः स्तोत्रैः प्रार्थयामासुरंजसा ॥ ३४ ॥ देवदेव जगन्नाथ सर्वाघौघविनाशन ॥
जना अस्मासु पापिष्ठाः स्नात्वा पापानि सर्वशः ॥ ३५ ॥ विसृज्य त्वत्पदं यांति त्वदाज्ञाधारिणो भुवि ॥ अस्माकं चैव तत्पापं कथं गच्छे
ज्जनार्दन ॥ ३६ ॥ तदुपायं वदास्माकं त्वत्पादशरणैषिणाम् ॥ इति तीर्थैः प्रार्थितस्तु भगवान्भूतभावनः ॥ ३७ ॥ प्रहसन्प्राह तीर्थानि
मेघगम्भीरया गिरा ॥ ॥ श्रीभगवानुवाच ॥ ॥ सिते पक्षे मेषसूर्ये वैशाखान्ते दिनत्रये ॥ ३८ ॥ सर्वतीर्थमये पुण्ये ममाऽपि प्राणवल्लभे ॥
यूयं भगोदयात्पूर्वं बहिःसंस्थजलाप्लुताः ॥ ३९ ॥ विमुक्ताघाः पुण्यरूपा भवंत्वाशु सुनिर्मलाः ॥ भवद्भिश्च विमुक्ताघैर्ये न स्नाता दिनत्रये
॥ ४० ॥ तेषु तिष्ठंतु तत्पापं जनैर्युष्मद्भिरेचितम् ॥ इति तीर्थपदो विष्णुस्तीर्थानां च वरं ददौ ॥ ४१ ॥ अनुज्ञाप्य च तान्योगात्तत्रैवांतरधीय
त ॥ स्वधामानि पुनः प्राप्य तानि तीर्थानि नित्यशः ॥ ४२ ॥ प्रतिवर्षं तु वैशाखे तथैवांत्यदिनत्रये ॥ तेनाघौघं विमुच्यैव यांति निर्मलता
महो ॥ ४३ ॥ ये तु स्नानं न कुर्वंति वैशाखांतदिनत्रये ॥ ते भवन्तु समस्तानां जनानां पातकाऽऽश्रयाः ॥४४॥ इति शापं च तीर्थानि ह्यस्ना
तानां वदन्ति च ॥ न तेन सदृशः पापो यो न स्नातो दिनत्रये ॥ ४५ ॥ विचारितेषु शास्त्रेषु न दृष्टो न च वै श्रुतः ॥ तस्माद्दिनत्रये कार्यं स्नान
दानार्चनादिकम् ॥ ४६ ॥ अन्यथा नरकं याति यावदिंद्राश्चतुर्दश ॥ इत्येतत्सर्वमाख्यातं श्रुतकीर्ते महामते ॥ ४७ ॥ पृष्टं वैशाखमाहात्म्यं यथा
दृष्टं यथाश्रुतम् ॥ माहात्म्यस्य च लेखोऽयं माधवस्य च वर्णितः ॥ ४८ ॥ कार्त्स्न्याद्वक्तुं च ब्रह्माऽपि नालं वर्षशतैरपि ॥ पुरा कैलासशिखरे
पार्वत्यै शंकरः स्वयम् ॥४९॥ आह माधवमाहात्म्यं पृच्छंत्यै शतवत्सरम् ॥ तथापि नांतमगमदशक्तो विरराम ह ॥५०॥ को नु वर्णयितुं शक्तः
कार्त्स्न्यान्माहात्म्यमुत्तमम् ॥ विना विष्णुं जगन्नाथं नारायणमनामयम् ॥ ५१ ॥ पुरा सर्वेऽपि ऋषयो माहात्म्यं पापनाशनम् ॥ लेशस्य लेशं
व्याचख्युर्जनानां हितकाम्यया ॥ ५२ ॥ नांतः केनापि व्याख्यातो ह्यशक्तत्वान्महीपते ॥ त्वं च मासे तु वैशाखे कुरु दानादिसत्क्रियाः ॥५३॥
तेन भुक्तिं च मुक्तिं च संप्राप्नोषि न संशयः ॥ इति तं बोधयित्वा च मैथिलं जनकाह्वयम् ॥ ५४ ॥ श्रुतदेवस्तमामंत्र्य गन्तुं चक्रे मनस्ततः ॥
जाताह्लादः स राजर्षिर्गलद्बाष्पाकुलेक्षणः ॥ ५५ ॥

॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ लेखः पुस्तकम् ॥ ४८ ॥ ४९ ॥ अशक्तो माहात्म्यं वर्णयितुमित्यर्थः ॥ ५० ॥ ५१ ॥५२॥ ५३॥५४॥ ५५ ॥

उत्सवं कारयामास स्वाभिवृद्ध्यै मनोरमम् ॥ ग्रामं प्रदक्षिणीकृत्य शिबिकामधिरोप्य तम् ॥ ५६ ॥ चतुरंगबलैर्युक्तः स्वयं पृष्ठमथाऽन्वगात् ॥
पुनश्चांतःपुरं प्राप्य सकलैर्विभवैरपि ॥ ५७ ॥ वस्त्रैराभरणैश्चैव गोभूतिलहिरण्यकैः ॥ प्रणम्य च परिक्रम्य तस्थौ प्रांजलिरग्रतः ॥ ५८ ॥
ततः स तु महातेजाः श्रुतदेवो महायशाः ॥ सन्तुष्टः परमप्रीतो ययौ धाम स्वकं मुनिः ॥ ५९ ॥ त्रयोदश्यां चतुर्दश्यां पौर्णमास्यां च माधवे ॥
स्नानं दानं पूजनं च कथाश्रवणमेव च ॥ ६० ॥

॥५६॥५७॥५८॥५९॥ अथ वैशाखांऽतिमदिनत्रयस्य विशेषमाहात्म्यं कथयति–द्वाभ्याम् । यः माधवे वैशाखमासे, त्रयोदशीचतुर्दशीपूर्णिमासु तिथिषु स्नानादिकं करोति स निश्चयेन मोक्षं प्राप्नुयात् । यथा पुरा धनशर्मा ब्राह्मणः त्रयः प्रेताश्च मुक्तिं प्रापुरिति–अत्र प्रसिद्धा कथा, सप्तदशाध्यायात्मकपाद्मोक्तवैशाखमाहात्म्ये–“मध्यदेशे धनशर्मानाम ब्राह्मणः कुशाद्यानयनार्थं महावने गतस्तत्राऽकस्मात्त्रीन्दारुणान्प्रेतान्दृष्ट्वाऽतिभयभीतो विष्णुं स्मरन्यूयं के इति अपृच्छत् ॥ प्रेता ऊचुः॥ “दर्शनेनैव ते विप्र नाम श्रवणतो हरेः॥ भावमन्यमनुप्राप्ता वयं जाता दयालवः ॥ अयं कृतघ्ननामाऽस्ति द्वितीयोऽयं विदैवतः॥ अवैशाखस्तृतीयोऽयं त्रयाणामपि पापकृत् ॥ इति” अयं पूर्वजन्मनि सुदासनामा अनेन सदैव कृतघ्नता संपादिता, तेन नानानरकयातनामनुभूय, अंतिमामिमामवस्थां प्राप, तत्कर्मणाऽस्य कर्मजं कृतघ्नमिति नाम स्थापितम् । अयं द्वितीयः–दशसहस्रग्रामाऽधिपः हरवीरनामा नृपः, पूर्वजन्मनि देवब्राह्मणपूजारहितः दानशून्यः रोषाऽहंकारेण गुर्वाज्ञालंघनपरः विप्रनिंदकः महायज्ञानकृत्वैव भुक्तवान्, तेन पापकर्मणा नरकयातनामनुभूयाऽधुना विदैवतनाम्ना प्रेतो जातः । अहं तृतीयः–पूर्वजन्मनि मध्यदेशे गौतमनामा ब्राह्मणः, केवलशुष्कवैदिकः श्रौतमार्गनिष्ठः जन्मप्रभृतिवैशाखधर्मो नानुष्ठितः, एका वैशाखपूर्णिमाऽपि स्नानदानहोमपूजादिना न सेविता । “तेन मे वैदिकं कर्म जातं सर्वं च निष्फलम् ॥ ततोऽवैशाखनामाहं प्रेतो जातोऽस्मि सर्वतः ॥ एतत्ते सर्वमाख्यातं त्रयाणामपि कारणम् ॥ त्वन्नो भव समुद्धर्ता पापाद्विप्रोऽसि वै यतः ॥ अथवा मम पुत्रोऽस्ति धनशर्मेति विश्रुतः ॥ ” तं गत्वा अस्मदर्थे बोधय, एतत्प्रेतवाक्यमाकर्ण्याऽतिदुःखितो धनशर्मा जनकावस्थां दृष्ट्वा आह–भो जनक अहं तव सुतः निरर्थकः यतः यः पुत्रः पितुः निस्तारं न करोति स कुपुत्रः, अतोऽग्रे मया किं कर्तव्यं तात तवगतिश्च कथं भवेदिति चिंतातुरं प्रेत उवाच–हे पुत्र किंचित्प्राचीनपुण्यकर्मवशादस्मात्पञ्चमेऽहनि वैशाखीपूर्णिमा समागताऽस्ति अतः यमुनायां गत्वा वक्ष्यमाणव्रताद्याचरणं कुरु ॥ तदेवाह–त्रयोदश्यां चतुर्दश्यां पौर्णमास्यां स्त्री पुरुषो वा वैशाखनियमैर्युक्तः उषसि प्रातर्वा स्नानं करोति, स स्वर्गगामी भवति । यः त्रिरात्रमुषसि स्नात्वा गौरान्कृष्णान्वा तिलान् सक्षौद्रान्द्वादशविप्रेभ्यो ददाति यमप्रीतये स स्वर्गं गच्छति । यः दिनत्रयं पूर्णिमायां वा पायसेन दश ब्राह्मणान्पक्वान्नेन वा

यथाशक्ति भक्त्या भोजयेत्, सुवर्णतिलपात्राणि च दद्याद्वा“पानीयमप्यत्र तिलैर्विमिश्रं सहोदकुम्भान्पललानि भक्त्या। दद्यात्पितृभ्यो भवतीह दत्तं श्राद्धं मुदे तेन समाः सहस्रम् ॥ यस्तिलैर्यवसंमिश्रैः स्नाति सर्वांगतस्तदा ॥ तस्य ब्रह्मा च धर्मश्च ददाति वरमीप्सितम् ॥” किंचाऽऽश्चर्यं शृणु—पुरा विष्णुना त्रयोदश्यां हिरण्याक्षः, चतुर्दश्यां मधुश्च घातितः, पौर्णमास्यां भूम्युद्धारश्च कृतः, ततः प्रभृति तास्तिथयः पुण्या जाताः, ये पूर्णिमायां दश जलधेनूः प्रयच्छंति ते धन्याः। किञ्च शर्करातांबूलमुपानत्करपत्रिकाः ॥ “मणिकोदककुम्भांश्च पक्वान्नं हेमदक्षिणाम् ॥ प्रयच्छंति द्विजाग्र्येभ्यो धन्यास्ते चाऽत्र कीर्तिताः ॥ प्रीतये धर्मराजस्य यो दद्यादुदकुम्भकान् ॥ सदा सप्तकुलं

वैशाखधर्मनिरतः स वै मोक्षमवाप्नुयात् ॥ धनशर्मा ब्राह्मणश्च प्रेताश्चैव यथा पुरा ॥ ६१ ॥ ॥ नारद उवाच ॥ ॥ इत्येतत्परमाख्यानमंबरीष तवोदितम् ॥ श्रवणात्सर्वपापघ्नं सर्वसंपद्विधायकम् ॥ ६२ ॥ तेन भुक्तिं च मुक्तिं च ज्ञानं मोक्षं च विंदति ॥ इति तस्य वचः श्रुत्वा अंबरीषो महायशाः ॥ ६३ ॥ प्रहृष्टांतरवृत्तिश्च बाह्यव्यापारवर्जितः ॥ प्रणनाम तथा मूर्ध्ना दण्डवत्पतितो भुवि ॥ ६४ ॥ विभवैरखिलैश्चाऽपि पूजयामास तं पुनः ॥ संपूजितस्तमामंत्र्य नारदो भगवान्मुनिः ॥ ६५ ॥ लोकांतरं ययौ धीमाञ्च्छापान्नैकत्र संस्थितिः ॥ अम्बरीषोऽपि राजर्षिर्नारदोक्तानिमाञ्छुभान् ॥ ६६ ॥ धर्मान्कृत्वा विलीनोऽभूत्परे ब्रह्मणि निर्गुणे ॥ ॥ सूत उवाच ॥ ॥ य इदं परमाख्यानं पापघ्नं पुण्यवर्धनम् ॥ ६७ ॥ शृणुयाद्वा पठेद्वाऽपि स याति परमां गतिम् ॥ लिखितं पुस्तकं येषां गृहे तिष्ठति मानदाः ॥ ६८ ॥ तेषां मुक्तिः करस्था हि किमु तच्छ्रवणात्मनाम् ॥ ६९ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे वैशाखमासमाहात्म्ये नारदाम्बरीषसंवादे फलश्रुतिकथनंनाम पंचविंशोऽध्यायः ॥ २५ ॥ ॥ छ ॥ ॥ इति श्रीस्कान्दे महापुराणे द्वितीये वैष्णवखण्डे वैशाखमाससमाहात्म्यं संपूर्णम् ॥ (२–७) ॥ ॥ श्रीसीतारामचंद्रार्पणमस्तु ॥ ॥ छ ॥ ॥ छ ॥ ॥

तेन तारितं स्यान्न संशयः ॥ त्रयोदश्यां चतुर्दश्यां पूर्णायां भक्तितत्परः ॥ स्नात्वा जप्त्वा तथा दत्त्वा हुत्वा संपूज्य माधवम् ॥ यत्फलं जायते पुत्र तदस्माकं समर्पय ॥ नैतौ परिचितौ प्रेतौ हित्वा स्वर्गतिमाश्रये ॥ एतयोरपि पापस्य प्रांतोऽयं समुपस्थितः ॥” इति एवं प्रेतवचः श्रुत्वा गृहं गत्वा परमभक्त्या दिनत्रयं स्नानदानपूजनादिकं कृत्वा तेभ्यः पुण्यं ददौ ते च तत्क्षणादेव विमानस्था दिवं ययुः धनशर्मा ह्यचिरं भोगान्भुक्त्वा ब्रह्मलोकमगादिति ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ॥ ६६ ॥ ६७ ॥ ६८ ॥ श्रवणात्मनां श्रवणकर्तॄणाम् ॥ ६९ ॥ इति श्रीहरिकृष्णशास्त्रिविरचितायां वैशाखमासमाहात्म्यटीकायां पंचविंशोऽध्यायः ॥ २५ ॥

इत्युपासनास्तबके श्रीस्कान्दमहापुराणोक्तं वैशाखमासमाहात्म्यं सटीकं संपूर्णम्॥२॥

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणालये मुद्रितम्।
संवत् १९६६, शके १८३१.

योयदंशजःसतद्रूपमेवप्रापेत्यर्थः तदाह प्रभाकरमिति आदित्यजवीर्यवत्त्वात् आदित्यदेहजवीर्योत्पन्नत्वात् ॥ ६५ ॥ सांतनिकाख्येत्यत्रह्रस्वआर्षः ॥ ६६ ॥ रामदृष्टा भगवद्दृष्ट्याक्षीणसर्वपापाःविमुक्तसंगाभूत्वेतिशेषः ॥ ६७ ॥ अंजःशीघ्रम् ॥ ६८ ॥ अथरामायणपाठफलमाह यइति तथापापंकुर्वन्नेषरामायण श्लोकमपिपठन्विमुक्तसर्वपापःरामस्यसालोक्यंप्रयाति राघवचोदितेनअंतर्यामिविधयारघुनाथप्रेरितेन ॥ ६९ ॥ ७० ॥ आप्तोव्याप्तःसंबद्धोभविष्यदर्थोय

प्रपेदिरेप्राक्तनमेवरूपंयदंशजाऋक्षहरीश्वरास्ते ॥ प्रभाकरंप्रापहरिप्रवीरःसुग्रीवआदित्यजवीर्यवत्त्वात् ॥ ६५ ॥ ततो
विमग्नाःसरयूजलेषुनराःपरित्यज्यमनुष्यदेहम् ॥ आरुह्यदिव्याभरणाविमानंप्रापुश्चतेसांतनिकाख्यलोकान् ॥ ६६ ॥
तिर्यक्प्रजाताअपिरामदृष्टाजलंप्रविष्टादिवमेवयाताः ॥ दिदृक्षवोजानपदाश्चलोकारामंसमालोक्यविमुक्तसंगाः ॥
॥ ६७ ॥ स्मृत्वाहरिंलोकगुरुंपरेशंस्पृष्ट्वाजलंस्वर्गमवापुरंजः ॥ एतावदेवोत्तरमाहशंभुःश्रीरामचंद्रस्यकथावशेषम्
॥ ६८ ॥ यःपादमप्यत्रपठेत्सपापाद्विमुच्यतेजन्मसहस्रजातात् ॥ दिनेदिनेपापचयंप्रकुर्वन्पठेन्नरःश्लोकमपीहभक्त्या
॥ ६९ ॥ विमुक्तसर्वाघचयःप्रयातिरामेतिसालोक्यमनन्यलभ्यम् ॥ आख्यानमेतद्रघुनायकस्यकृतंपुराराघवचो
दितेन ॥ ७० ॥ महेश्वरेणाप्तभविष्यदर्थंश्रुत्वातुरामःपरितोषमेति ॥ रामायणंकाव्यमनंतपुण्यंश्रीशंकरेणाभिहितं
भवान्यै ॥ ७१ ॥ भक्त्यापठेद्यःशृणुयात्सपापैर्विमुच्यतेजन्मशतोद्भवैश्च ॥ अध्यात्मरामंपठतश्चनित्यंश्रोतुश्चभक्त्या
लिखितुश्चरामः ॥ ७२ ॥

त्रतदाख्यानंश्रुत्वारामःपरितोषमेति भगवंतंसर्वगतंरामंश्रावयामीतिबुद्ध्यायोवाचयतितद्वाचितंतत्सर्वगत्वात्श्रुत्वावाचकस्योपरितोषमेति तत्परितोषेचतस्यसर्वार्थसिद्धिरितिभावः अनंतपुण्यंवाचकश्रोत्रोरनंतपुण्यदमित्यर्थः ॥ ७१ ॥ अध्यात्मरामंतत्पदघटितमध्यात्मरामायणाख्यंपुराणमित्यर्थः श्रोतुःलिखितुश्चातिप्रसन्नःसन्सदासमीपेस्थितोभूत्वाश्रियमातनोतीत्यन्वयः ॥ ७२ ॥

नन्वेवंभगवतोविष्णुरूपप्राप्त्यावैकुंठवासइत्यायातम्   एवंचसभापर्वणिभारतेसर्वदिक्पालसभावर्णनेयमसभाप्रस्तावेदाशरथीरामोयमसभायांदृष्टइतिनारदेनोक्तंतद्विरुध्यतेइतिचेत् अत्रवदामः अवतारपरिग्रहस्यंहिप्रयोजनद्वयंदुष्टवधेनशिष्टपालनंस्वाचरणेनलोकानांधर्ममर्यादाबोधनंच एतदर्थमेवतेषांतत्तत्कर्मानुष्ठानेप्रवृत्तिरन्यथाअकामस्यभगवतःकिंयज्ञाद्यनुष्ठानेन   एवंचधर्मबोधनार्थंतदनुष्ठानवत्आजन्मेदृशधर्मानुष्ठानस्यामुकलोकवासःफलमितिबोधयितुंदाशरथिरामत्वंप्रत्यभिज्ञापकेनमायिकेनकेनचिच्छरीरेणतल्लोकेवासेनाक्षतेः रामायणेएतदर्थाकथनंतुइतिहासेषुउक्तत्वात्सर्वज्ञानांवाल्मीक्यादीनांभूतभाविसर्वार्थ

तदाहविष्णुर्द्रुहिणंमहात्माएतेहिभक्तामयिचानुरक्ताः॥यांतंदिवंमामनुयांतिसर्वेतिर्यक्शरीराअपिपुण्ययुक्ताः॥६१॥
वैकुंठसाम्यंपरमंप्रयांतुसमाविशस्वाशुममाज्ञयात्वम् ॥ श्रुत्वाहरेर्वाक्यमथाब्रवीत्कःसांतानिकान्यांतुविचित्रभोगा
न् ॥ ६२ ॥ लोकान्मदीयोपरिदीप्यमानांस्त्वद्भावयुक्ताःकृतपुण्यपुंजाः ॥ येचापितेरामपवित्रनामगृणंतिमर्त्यालय
कालएव ॥ ६३ ॥ अज्ञानतोवापिभजंतुलोकांस्तानेवयोगैरपिचाधिगम्यान् ॥ततोतिहृष्टाहरिराक्षसाद्याःस्पृष्ट्वाज
लंत्यक्तकलेवरास्ते ॥ ६४ ॥

ज्ञानवत्त्वादित्यन्यत्रविस्तरः तदेतितदातस्मिन्समयेविष्णुर्द्रुहिणंब्रह्माणमाह मदनुगमनादेवपुण्ययुक्तत्वानुमानम् ॥ ६१ ॥ वैकुंठसाम्यंवैकुंठसमानलोकम् स्वार्थेष्यञ्चातुर्वर्ण्यादित्वादार्षत्वाद्वा एतान्ममाज्ञयासमाविशस्वतादृशलोकंप्रवेशयस्व कोब्रह्मासांतानिकलोकविशेषाः ॥ ६२ ॥ तेषांलोकानामुत्तमत्वमाह मदीयोपरिदीप्यमानान्ब्रह्मलोकादूर्ध्वंदीप्यमानान् अपिचयेपिमनुष्यालयकालएवमरणकालएव नतुततःप्रागपिकदाचित् तत्राप्यज्ञानतोवाअज्ञानतएव वाशब्दएवार्थः येपवित्रनामरामेत्येतद्गृणंतिवदंतितेपितानेवलोकान्योगैःप्राप्यान्भजंतु अनेनाजन्माभ्यस्तयोगोंतकालेत्वन्नामस्मर्ताचसमइतिसूचितम् ॥
॥ ६३ ॥ ६४ ॥

नन्वेवंब्रह्मज्ञस्यब्रह्मरूपस्यकथंशरीरपरिग्रहोतआह तथापीति भक्तानुग्रहार्थंमाययासर्वमिदंकृतमितिभावः अतोवैष्णवंदेहंप्रविश्यदेवान्पाहिरक्ष ॥ ५४ ॥
यदीतियइत्यर्थः अथवायोपरोदेहस्तवरोचतेतंवाप्रविश्यपाहि एवंविष्णुरूपंत्वांमांविनाअन्येपुरुषानजानंति ॥ ५५ ॥ एवंविष्णुरूपंज्ञात्वाभक्त्याप्रणमति स

तथापिदासस्यममाखिलेशकृतंवचोभक्तपरोसिविद्वन् ॥ त्वंभ्रातृभिर्वैष्णवमेकमाद्यंप्रविश्यदेहंपरिपाहिदेवान् ॥५४॥
यद्वापरोवायदिरोचतेतंप्रविश्यदेहंपरिपाहिनस्त्वम् ॥ त्वमेवदेवाधिपतिश्चविष्णुर्जानंतिनत्वांपुरुषाविनामाम् ॥५५॥
सहस्रकृत्वस्तुनमोनमस्तेप्रसीददेवेशपुनर्नमस्ते ॥ पितामहप्रार्थनयासरामःपश्यत्सुदेवेषुमहाप्रकाशः ॥ ५६ ॥ मुष्णं
श्चचक्षूंषिदिवौकसांतदाबभूवचक्रादियुतश्चतुर्भुजः ॥ शेषोबभूवेश्वरतल्पभूतःसौमित्रिरत्यद्भुतभोगधारी ॥ ५७ ॥
बभूवतुश्चक्रदरौचदिव्यौकैकेयिसूनुर्लवणांतकश्च ॥ सीताचलक्ष्मीरभवत्पुरैवरामोहिविष्णुःपुरुषःपुराणः ॥ ५८ ॥
सहानुजःपूर्वशरीरकेणबभूवतेजोमयदिव्यमूर्तिः ॥ विष्णुंसमासाद्यसुरेंद्रमुख्यादेवाश्चसिद्धामुनयश्चयक्षाः ॥ ५९ ॥
पितामहाद्याःपरितःपरेशंस्तवैर्गृणंतःपरिपूजयंतः ॥ आनंदसंप्लावितपूर्णचित्ताबभूविरेप्राप्तमनोरथास्ते ॥ ६० ॥

हस्रेति ॥५६॥ चक्षूंषिमुष्णन्स्वप्रभयेतिशेषःरामदेहएवतथाभूतोजातः अनेनविष्णुदेहएवमाययाद्विभुजत्ववैशिष्ट्येनलोकदृग्गोचरआसीदितिसूचितम् भोगः
सर्पशरीरंपूर्वंगतोपिसतस्मिन्नवसरेतेनदेहेनसन्निहितः ॥ ५७ ॥ दरःशंखःलवणांतकःशत्रुघ्नःसीताचपुरैवलक्ष्मीरूपाभवत्सापितत्कालेलक्ष्मीरूपेणसन्निहिता
आसीदितिशेषःहियतोरामोविष्णुरित्यर्थः ॥ ५८ ॥ पूर्वशरीरकेणविष्णुदेहेन ॥ ५९ ॥ ६० ॥

नन्दम् ॥ ३ ॥ ॥ पार्वत्युवाच ॥ ॥ [illegible] डितद्ब्राह्माभ्यंत[illegible] ॥ वि[illegible]स्थान[illegible]रेणुतिभम् ॥
कृत्यः ॥ यत्परंनास्तिकृष्णस्याप्रियंस्थानंमनोरमम् ॥ तत्सर्वंश्रोतुमिच्छामिकथयस्वमहाप्रभो ॥ ५ ॥ ॥ ईश्वरउवाच ॥ ॥ गुह्याद्गुह्यतरंगुह्यं
परमानंदकारकम् ॥ अत्यद्भुतंरहःस्थान[2]मानंदंपरमंपरम् ॥ ६ ॥ दुर्लभानांचपरमंदुर्लभंमोहनंपरम् ॥ सर्वशक्तिमयंदेविसर्वस्थानेषुगोपितम् ॥ ७ ॥
सात्वतांस्थानमूर्द्धन्यंविष्णोरत्यंतदुर्लभम् ॥ नित्यंवृंदावनंनामब्रह्मांडोपरिसंस्थितम् ॥ ८ ॥ पूर्णब्रह्मसुखैश्वर्यंनित्यमानंदमव्ययम् ॥ वैकुंठा
दितदंशांशंस्वयंवृंदावनंभुवि ॥ ९ ॥ गोलोकैश्वर्ययत्किंचिद्गोकुलेतत्प्रतिष्ठितम् ॥ वैकुंठवैभवंयद्वैद्वारिकायांप्रतिष्ठितम् ॥ १० ॥ यद्ब्रह्म
परमैश्वर्यंनित्यंवृंदावनाश्रयम् ॥ कृष्णधामपरंतेषांवनमध्येविशेषतः ॥ ११ ॥ तस्मात्त्रैलोक्यमध्येतुपृथ्वीधन्येतिविश्रुता ॥ यस्मान्माथुरकंनाम
विष्णोरेकांतवल्लभम् ॥ १२ ॥ स्वस्थानमधिकंनामधेयंमाथुरमंडलम् ॥ निगूढंविविधंस्थानंपुर्यभ्यंतरसंस्थितम् ॥ १३ ॥ सहस्रपत्रकमलाकारंमाथुरमं
डलम् ॥ विष्णुचक्रपरिभ्रामाद्धामवैष्णवमद्भुतम् ॥ १४ ॥ कर्णिकापर्णविस्तारंरहस्यद्रुममीरितम् ॥ प्रधानंद्वादशारण्यंमाहात्म्यंकथितंक्रमात् ॥ १५ ॥
भद्रश्रीलोहभांडीरमहातालखदीरकाः ॥ बकुलंकुमुदंकाम्यंमधुवृंदावनंतथा ॥ १६ ॥ द्वादशैतावतीसंख्याकालिंद्याःसप्तपश्चिमे ॥ पूर्वेपंचवनंप्रोक्तं
तत्रास्तिगुह्यमुत्तमम् ॥ १७ ॥ महारण्यंगोकुलाख्यंमधुवृंदावनंतथा ॥ अन्यच्चोपवनंप्रोक्तंकृष्णक्रीडारसस्थलम् ॥ १८ ॥ कदंबखंडनंदवनं
नंदीश्वरंतथा ॥ नंदनंदनखंडंचपलाशाशोककेतकी ॥ १९ ॥ [3]सुगंधमानसंकैलममृतंभोजनस्थलम् ॥ सुखप्रसाधनंवत्सहरणंशेषशायिकम् ॥ २० ॥
श्यामपूर्वोदधिग्रामश्चक्रभानुपुरंतथा ॥ संकेतंद्विपदंचैवबालक्रीडनधूसरम् ॥ २१ ॥ [4]कामद्रुमंसुललितमुत्सुकंचापिकाननम् ॥ नानाविधरसक्रीडा
नानालीलारसस्थलम् ॥ २२ ॥ नागविस्तारविष्टंभंरहस्यद्रुममीरितम् ॥ सहस्रपत्रकमलंगोकुलाख्यंमहत्पदम् ॥ २३ ॥ कर्णिकातन्महद्धामगोविं
दस्थानमुत्तमम् ॥ तत्रोपरिस्वर्णपीठेमणिमंडपमंडितम् ॥ २४ ॥ कर्णिकायांक्रमाद्दिक्षुविदिक्षुदलमीरितम् ॥ यद्दलंदक्षिणेप्रोक्तंपरंगुह्योत्तमोत्तम
म् ॥ २५ ॥ तस्मिन्दलेमहापीठंनिगमागमदुर्गमम् ॥ योगींद्रैरपिदुःप्रापंसर्वात्मायच्चगोकुलम् ॥ २६ ॥ द्वितीयंदलमाग्नेय्यांतद्रहस्यंदलंतथा ॥

---

१ पुण्यम्--इ० पा०। २ रहस्यम्--इ० पा०। ३ गंधमादनकैलासमृतं भोजनकस्थलम्--इ० पा०। ४ केमद्रुमम्--इ०, कलिद्रुमम्--इ०, केलिद्रुमम्--इ० च पा०।

४७०८

४७०८

संकेतंद्विपदंचैवकुटीद्वौतत्कुलेस्थितौ ॥ २७ ॥ पूर्वंदलंतृतीयंचप्रधानस्थानमुत्तमम् ॥ गंगादिसर्वतीर्थानांस्पर्शाच्छतगुणंस्मृतम् ॥२८॥ चतुर्थंदलमै
शान्यांसिद्धपीठेपितत्पदम् ॥ [1]व्यायामनूतनागोपीतत्रकृष्णंपतिंलभेत् ॥ २९ ॥ वस्त्रालंकारहरणंतद्दलेसमुदाहृतम् ॥ उत्तरेपंचमंप्रोक्तंदलंसर्वदलोत्त
मम् ॥ ३० ॥ द्वादशादित्यमत्रैवदलंचकर्णिकासमम् ॥ वायव्यांतुदलंषष्ठंतत्रकालीह्रदःस्मृतः ॥ ३१ ॥ दलोत्तमोत्तमंचैवप्रधानंस्थानमुच्यते ॥
सर्वोत्तमदलंचैवपश्चिमेसप्तमंस्मृतम् ॥ ३२ ॥ यज्ञपत्नीगणानांचतदीप्सितवरप्रदम् ॥ अत्रासुरोपिनिर्वाणंप्रापत्रिदशदुर्लभम् ॥ ३३ ॥ ब्रह्ममोह
नमत्रैवदलंब्रह्म[2]ह्रदावहम् ॥ नैर्ऋत्यांतुदलंप्रोक्तमष्टमंव्योमघातनम् ॥ ३४ ॥ शंखचूडवधस्तत्रनानाकेलिरसस्थलम् ॥ श्रुतमष्टदलंप्रोक्तंवृंदारण्यांत
रस्थितम् ॥ ३५ ॥ श्रीमद्वृंदावनंरम्यंयमुनायाःप्रदक्षिणम् ॥ शिवलिंगमधिष्ठानंदृष्टंगोपीश्वराभिधम् ॥ ३६ ॥ तद्वाह्येषोडशदलंश्रियापूर्णतमीश्वर
म् ॥ सर्वासुदिक्षुयत्प्रोक्तंप्रादक्षिण्याद्यथाक्रमम् ॥ ३७ ॥ महत्पदंमहाद्धामस्व[3]धामाधावसंज्ञकम् ॥ प्रथमैकदलंश्रेष्ठंमाहात्म्यंकर्णिकासमम् ॥ ३८ ॥
तत्रगोवर्द्धनगिरौरम्येनित्यरसाश्रये ॥ कर्णिकायांमहालीलातल्लीलारसगह्वरौ ॥ ३९ ॥ यत्रकृष्णोनित्यवृंदाकाननस्यपतिर्भवेत् ॥ कृष्णोगोविंदतां
प्राप्तःकिमन्यैर्बहुभाषितैः ॥ ४० ॥ दलंतृतीयमाख्यातंसर्वश्रेष्ठोत्तमोत्तमम् ॥ चतुर्थंदलमाख्यातंमहाद्भुतरसस्थलम् ॥ ४१ ॥ नंदीश्वरवनंरम्यंतत्र
नंदालयःस्मृतः ॥ कर्णिकादलमाहात्म्यंपंचमंदलमुच्यते ॥ ४२ ॥ [4]अधिष्ठाताऽत्रगोपालोधेनुपालनतत्परः ॥ षष्ठंदलंयदाख्यातंतत्रनंदवनंस्मृत
म् ॥ ४३ ॥ [5]सप्तमंबकुलारण्यंदलंरम्यंप्रकीर्तितम् ॥ तत्राष्टमंतालवनंतत्रधेनुवधःस्मृतः ॥ ४४ ॥ नवमंकुमुदारण्यंदलंरम्यंप्रकीर्तितम् ॥
[6]कामारण्यंचदशमंप्रधानंसर्वकारणम् ॥ ४५ ॥ ब्रह्मप्रसाधनंतत्रविष्णुच्छद्मप्रदर्शनम् ॥ कृष्णक्रीडारसस्थानंप्रधानंदलमुच्यते ॥ ४६ ॥ दलमेकादशं
प्रोक्तंभक्तानुग्रहकारणम् ॥ निर्माणंसेतुबंधस्यनानावनमयस्थलम् ॥ ४७ ॥ भांडीरंद्वादशदलंवनंरम्यंमनोहरम् ॥ कृष्णःक्रीडारतस्तत्रश्रीदामा
दिभिरावृतः ॥ ४८ ॥ त्रयोदशंदलंश्रेष्ठंतत्रभद्रवनंस्मृतम् ॥ चतुर्दशदलंप्रोक्तंसर्वसिद्धिप्रदस्थलम् ॥ ४९ ॥ श्रीवनंतत्ररुचिरंसर्वैश्वर्यस्यकारणम् ॥
[illegible]क्रीडादलमयंश्रीकांतिकीर्तिवर्द्धनम् ॥ ५० ॥ दलंपंचदशंश्रेष्ठंतत्रलोहवनंस्मृतम् ॥ कथितंषोडशदलंमाहात्म्यंकर्णिकासमम् ॥ ५१ ॥ म
[illegible]त्तमम् ॥ बालक्रीडारतस्तत्रव[illegible]ैःसमावृतः ॥ ५२ ॥ पूतनादिवधस्तत्रयमलार्जुनभंजनम् ॥ अधिष्ठातातत्रबालगोपा

देवैःसुपूजितम् ॥ ब्रह्मादिवांछितंस्थानंसुरासिद्धादिसेवितम् ॥ ५८ ॥ [1]योगींद्राहिसदाभक्त्यातस्यध्यानैकतत्पराः ॥ अप्सरा
भिश्चगंधर्वैर्नृत्यगीतनिरंतरम् ॥ ५९ ॥ श्रीमद्वृंदावनंरम्यंपूर्णानंदरसाश्रयम् ॥ भूरिचिंतामणिस्तोयममृतंरसपूरितम् ॥ ६० ॥ वृक्षंगुरुद्रुमंतत्रसुरभी
वृंदसेवितम् ॥ स्त्रींलक्ष्मींपुरुषंविष्णुंतद्दशांशसमुद्भवम् ॥ ६१ ॥ तत्रकैशोरवयसंनित्यमानंदविग्रहम् ॥ गतिनाट्यंकलालापस्मितवक्रंनिरंतरम्॥६२॥
शुद्धसत्वैःप्रेमपूर्णैर्वैष्णवैस्तद्वनाश्रितम् ॥ पूर्णब्रह्मसुखेमग्नंस्फुरत्तन्मूर्तितन्मयम् ॥ ६३ ॥ मत्तकोकिलभृंगाद्यैःकूजत्कलमनोहरम् ॥ कपोलशुक
संगीतमुन्मत्तालिसहस्रकम् ॥ ६४ ॥ भुजंगशत्रुनृत्याढ्यंसकलामोदविभ्रमम् ॥ नानावर्णैश्चकुसुमैस्तद्रेणुपरिपूरितम् ॥ ६५ ॥ पूर्णेंदुनित्याभ्युदयंसूर्यमं
दांशुसेवितम् ॥ अदुःखंदुःखविच्छेदंजरामरणवर्जितम् ॥ ६६ ॥ अक्रोधंगतमात्सर्यमभिन्नमनहंकृतम् ॥ पूर्णानंदामृतरसंपूर्णप्रेमसुखार्णवम् ॥६७॥
गुणातीतंमहद्धामपूर्णप्रेमस्वरूपकम् ॥ वृक्षादिपुलकैर्यत्रप्रेमानंदाश्रुवर्षितम् ॥ ६८ ॥ किंपुनश्चेतनायुक्तैर्विष्णुभक्तैःकिमुच्यते ॥ गोविंदांघ्रिर
जःस्पर्शान्नित्यंवृंदावनंभुवि ॥ ६९ ॥ सहस्रदलपद्मस्यवृंदारण्यंवराटकम् ॥ यस्यस्पर्शनमात्रेणपृथ्वीधन्याजगत्रये ॥ ७० ॥ गुह्याद्गुह्यतरंरम्यं
मध्येवृंदावनंभुवि ॥ [2]अक्षरंपरमानंदंगोविंदस्थानमव्ययम् ॥ ७१ ॥ गोविंददेहतोऽभिन्नंपूर्णब्रह्मसुखाश्रयम् ॥ मुक्तिस्तत्ररजःस्पर्शात्तन्माहात्म्यंकिमु
च्यते ॥ ७२ ॥ तस्मात्सर्वात्मनादेविहृदिस्थंतद्वनंकुरु ॥ वृंदावनविहारेषुकृष्णंकैशोरविग्रहम् ॥ ७३ ॥ कालिंदीचाकरोद्यस्यकर्णिकायाः
प्रदक्षिणाम् ॥ लीलानिर्वाणगंभीरंजलंसौरभमोहनम् ॥ ७४ ॥ आनंदामृततन्मिश्रमकरंदघनालयम् ॥ पद्मोत्पलाद्यैःकुसुमैर्नानावर्णसमुज्ज्वल
म् ॥ ७५ ॥ चक्रवाकादिविहगैर्मंजुनानाकलस्वनैः ॥ शोभमानंजलंरम्यंतरंगातिमनोरमम् ॥ ७६ ॥ तस्योभयतटीरम्याशुद्धकांचननिर्मिता ॥
गंगाकोटिगुणाप्रोक्तायत्रस्पर्शवराटकः ॥ ७७ ॥ कर्णिकायांकोटिगुणोयत्रक्रीडारतोहरिः ॥ कालिंदीकर्णिकाकृष्णमभिन्नमेकविग्रहम् ॥ ७८ ॥ पार्व
त्युवाच ॥ ॥ गोविंदस्यकिमाश्चर्यंसौंदर्याकृतविग्रह ॥ तदहंश्रोतुमिच्छामिकथयस्वदयानिधे ॥७९॥ ॥ ईश्वरउवाच ॥ ॥ मध्येवृंदावनेरम्येमंजुमंजी

---

[1] योगींद्रादिमुनींद्रादिसदातद्ध्यानतत्परम्–इ० पा०। [2] अपरम्–इ० पा०।

रशोभिते ॥ योजनाश्रितसद्वृक्षशाखापल्लवमंडिते ॥ ८० ॥ तन्मध्येमंजुभवनेयोगपीठंसमुज्ज्वलम् ॥ तंदष्टकोणनिर्माणंनानादीप्तिमनोहरम् ॥ ८१ ॥
तस्योपरिचमाणिक्यरत्नसिंहासनंशुभम् ॥ तस्मिन्नष्टदलंपद्मंकर्णिकायांसुखाश्रयम् ॥ ८२ ॥ गोविंदस्यपरंस्थानंकिमस्यमहिमोच्यते ॥ श्रीम
द्गोविंदमंत्रस्थवल्लवीवृंदसेवितम् ॥ ८३ ॥ दिव्यव्रजवयोरूपंकृष्णंवृंदावनेश्वरम् ॥ व्रजेंद्रंसंततैश्वर्यंव्रजबालैकवल्लभम् ॥ ८४ ॥ यौवनोद्भिन्नकैशोरंवयसा
द्भुतविग्रहम् ॥ अनादिमादिंसर्वेषांनंदगोपप्रियात्मजम् ॥ ८५ ॥ श्रुतिमृग्यमजंनित्यंगोपीजनमनोहरम् ॥ परंधामपरंरूपंद्विभुजंगोकुलेश्वरम् ॥ ८६ ॥
वल्लवीनंदनंध्यायेन्निर्गुणस्यैककारणम् ॥ सुश्रीमंतंनवंस्वच्छंश्यामधाममनोहरम् ॥ ८७ ॥ नवीननीरदश्रेणीसुस्निग्धंमंजुकुंडलम् ॥ फुल्लेंदीवरसत्कांतिसु
खस्पर्शसुखावहम् ॥ ८८ ॥ दलितांजनपुंजाभचिक्कणंश्याममोहनम् ॥ सुस्निग्धनीलकुटिलाशेषसौरभकुंतलम् ॥८९॥ तदूर्ध्वंदक्षिणेकालेश्यामचूडाम
नोहरम् ॥ नानावर्णोज्ज्वलंराजच्छिखंडिदलमंडितम् ॥ ९० ॥ मंदारमंजुगोपुच्छाचूडंचारुविभूषणम् ॥ क्वचिद्बृहद्दलश्रेणीमुकुटेनाभिमंडितम् ॥९१॥
अनेकमणिमाणिक्यकिरीटभूषणंक्वचित् ॥ लोलालकवृतंराजत्कोटिचंद्रसमाननम् ॥ ९२ ॥ कस्तूरीतिलकंभ्राजन्मंजुगोरोचनान्वितम् ॥ नीलेंदीवरसु
स्निग्धसुदीर्घदललोचनम् ॥ ९३ ॥ आनृत्यद्भ्रूलताश्लेषस्मितंसाचिनिरीक्षणम् ॥ सुचारून्नतसौंदर्यंनासाग्रातिमनोहरम् ॥ ९४ ॥ नासाग्रगजमुक्तां
शुमुग्धीकृतजगत्त्रयम् ॥ सिंदूरारुणसुस्निग्धाधरौष्ठसुमनोहरम् ॥ ९५ ॥ नानावर्णोल्लसत्स्वर्णमकराकृतिकुंडलम् ॥ तद्रश्मिपुंजसद्गंडमुकुराभल
सद्द्युतिम् ॥ ९६ ॥ कर्णोत्पलसुमंदारमकरोत्तंसभूषितम् ॥ श्रीवत्सकौस्तुभोरस्कंमुक्ताहारस्फुरद्गलम् ॥ ९७ ॥ विलसद्दिव्यमाणिक्यंमंजुकांचनमिश्रि
तम् ॥ करेकंकणकेयूरंकिंकिणीकटिशोभितम् ॥ ९८ ॥ मंजुमंजीरसौंदर्यश्रीमदंघ्रिविराजितम् ॥ कर्पूरागुरुकस्तूरीविलसच्चंदनादिकम् ॥ ९९ ॥
गोरोचनादिसंमिश्रदिव्यांगरागचित्रितम् ॥ स्निग्धपीतपटीराजत्प्रपदांदोलितांजनम् ॥ १०० ॥ गंभीरनाभिकमलंरोमराजीनतस्रजम् ॥ सुवृत्तजानुयुग
लंपादपद्ममनोहरम् ॥ १०१ ॥ ध्वजवज्रांकुशांभोजकरांघ्रितलशोभितम् ॥ नखेंदुकिरणश्रेणीपूर्णब्रह्मैककारणम् ॥ १०२ ॥ केचिद्वदंतितस्यांशंब्रह्म
[illegible] ॥ तस्यांशंमहाविष्णुंप्रवदंतिमनीषिणः॥१०३॥योगींद्रैःसनकाद्यैश्चतदेवहृदिचिंत्यते ॥ त्रिभंगललिताशेषनिर्माणसारनिर्मितम् ॥१०४॥
[illegible] ॥ वामांसार्पितम[illegible] ॥१०५॥ सहापांगेक्षणस्मेरंकोटिम[illegible] ॥ कुंचिताधरवि

महेश्वराः ॥ सृष्टिस्थित्यादिनायुक्ता [illegible] ॥ तद्रूपकोटिकोटचंशाः [illegible] ॥ जगन्मोह
संस्थिताः ॥ ११२ ॥ तद्देहविलसत्कांतिकोटिकोटचंशकाविभुः ॥ तत्प्रकाशस्यकोटचंशरश्मयोरविविग्रहाः ॥ ११३ ॥ तस्यस्व
रसामृतैः ॥ परमामोद्चिद्रूपैर्निर्गुणस्यैककारणैः ॥ ११४ ॥ तदंशकोटिकोटचंशाजीवंतिकिरणात्मकाः ॥ तदंघ्रिपंकजद्वंद्वनखचं
१५ ॥ आहुःपूर्णब्रह्मणोपिकारणंवेददुर्गमम् ॥ तदंशसौरभानंतकोटचंशोविश्वमोहनः ॥ ११६ ॥ तत्स्पर्शपुष्पगंधादिनानासौरभसंभ
कृतिस्त्वाद्याराधिकाकृष्णवल्लभा ॥ ११७ ॥ तत्कलाकोटिकोटचंशादुर्गाद्यास्त्रिगुणात्मिकाः ॥ तस्याअंघ्रिरजःस्पर्शात्कोटिविष्णुः
८ ॥ ॥ इति श्रीपद्मपुराणेपातालखंडेवृंदावनमाहात्म्येकृष्णचरित्रेप्रथमोऽध्यायः ॥ १ ॥ ॥ पार्वत्युवाच ॥ यदाकर्णनमेतस्ययेवा
॥ तदहंश्रोतुमिच्छामिकथयस्वदयानिधे ॥१॥ ईश्वरउवाच ॥ राधयासहगोविंदंस्वर्णसिंहासनेस्थितम् ॥ पूर्वोक्तरूपलावण्यंदिव्यभूषांबर
त्रिभंगीमंजुसुस्निग्धंगोपीलोचनतारकम् ॥ तद्बाह्येयोगपीठेचस्वर्णसिंहासनावृते ॥ ३ ॥ प्रत्यंगरभसावेशाःप्रधानाःकृष्णवल्लभाः ॥ ललि
शामूलप्रकृतिराधिका ॥ ४ ॥ संमुखेललितादेवीश्यामलावायुकोणके ॥ उत्तरेश्रीमतीधन्याऐशान्यांश्रीहरिप्रिया ॥ ५ ॥ विशाखाचतथा
ाग्नौततःपरम् ॥ पश्चाचदक्षिणेपश्चान्नैर्ऋतेक्रमशःस्थिताः ॥ ६ ॥ योगपीठेकेसराग्रेचारुचंद्रावतीप्रिया ॥ अष्टौप्रकृतयःपुण्याःप्रधानाःकृष्णव
भाः ॥ ७ ॥ प्रधानप्रकृतिस्त्वाद्याराधाचंद्रावतीसमा ॥ चंद्रावलीचित्ररेखाचंद्रामदनसुंदरी ॥ ८ ॥ प्रियाचश्रीमधुमतीचंद्ररेखाहरिप्रिया ॥ षोडशाद्याः
प्रकृतयःप्रधानाःकृष्णवल्लभाः ॥ ९ ॥ वृंदावनेश्वरीराधातथाचंद्रावलीप्रिया ॥ अभिन्नगुणलावण्यसौंदर्याश्चारुलोचनाः ॥ १० ॥ मनोहरामुग्ध
वेषाःकिशोरीवयसोज्ज्वलाः ॥ अग्रेतनास्तथाचान्यागोपकन्याःसहस्रशः ॥ ११ ॥ शुद्धकांचनपुंजाभाःसुप्रसन्नाःसुलोचनाः ॥ तद्रूपहृदयारू
ढास्तदाश्लेषसमुत्सुकाः ॥ १२ ॥ श्यामामृतरसेमग्नाःस्फुरत्तद्भावमानसाः ॥ नेत्रोत्पलार्चितेकृष्णपादाब्जेर्पितचेतसः ॥ १३ ॥ श्रुतिकन्या
स्ततोदक्षेसहस्रायुतसंयुताः ॥ जगन्मुग्धीकृताकाराहृद्वर्तिकृष्णलालसाः ॥ १४ ॥ नानासत्वस्वरालापमुग्धीकृतजगत्रयाः ॥ तत्रगूढरहस्यानिगायं
त्यःप्रेमविह्वलाः ॥ १५ ॥ देवकन्यास्ततःसव्येदिव्यवेषारसोज्ज्वलाः ॥ नानावैदग्ध्यनिपुणादिव्यभावभरान्विताः ॥ १६ ॥ सौंदर्यातिशयेनाढ्याः

---

१ विद्यते–इ० पा० ।

कटाक्षातिमनोहराः ॥ निर्लज्जास्तत्रगोविंदेतदंगस्पर्शनोद्यताः ॥ १७ ॥ तद्भावमग्नमनसःस्मितसाचिनिरीक्षणाः ॥ मंदिरस्यततोबाह्येप्रिययाविश
दावृते ॥ १८ ॥ समानवेषवयसःसमानबलपौरुषाः ॥ समानगुणकर्माणःसमानाभरणप्रियाः ॥ १९ ॥ समानस्वरसंगीतवेणुवादनतत्पराः ॥ श्रीदा
मापश्चिमेद्वारेवसुदामातथोत्तरे ॥ २० ॥ सुदामाचतथापूर्वेकिंकिणीचापिदक्षिणे ॥ तद्बाह्येस्वर्णपीठेचसुवर्णमंदिरावृते ॥ २१ ॥ स्वर्णवेद्यंतरस्थेतुस्व
र्णाभरणभूषिते ॥ स्तोककृष्णंसुभद्राद्यैर्गोपालैरयुतायुतैः ॥ २२ ॥ शृंगवीणावेणुवेत्रवयोवेषाकृतिस्वरैः ॥ तद्गुणध्यानसंयुक्तैर्गायद्भिरपिविह्वलैः ॥ २३ ॥
चित्रार्पितैश्चित्ररूपैःसदानंदाश्रुवर्षिभिः ॥ पुलकाकुलसर्वांगैर्योगींद्रैरिवविस्मितैः ॥ २४ ॥ क्षरत्ययोभिर्गोविंदैरसंख्यातैरुपावृतम् ॥ तद्बाह्येस्वर्णप्रा
कारकोटिसूर्यसमुज्ज्वले ॥ २५ ॥ चतुर्दिक्षुमहोद्यानंमंजुसौरभमोहिते ॥ पश्चिमेसंमुखेश्रीमत्पारिजातद्रुमाश्रये ॥ २६ ॥ तदधस्तुस्वर्णपीठेस्वर्णमंडन
डिते ॥ तन्मध्येमणिमाणिक्यदिव्यसिंहासनोज्ज्वले ॥ २७ ॥ तत्रोपरिपरानंदंवासुदेवंजगत्प्रभुम् ॥ त्रिगुणातीतचिद्रूपंसर्वकारणकारणम् ॥ २८ ॥
श्यामंनीलकुंचितकुंतलम् ॥ पद्मपत्रविशालाक्षंमकराकृतिकुंडलम् ॥ २९ ॥ चतुर्भुजंतुचक्रासिगदाशंखांबुजायुधम् ॥ आद्यंतरहितंनित्यं
मम् ॥ ३० ॥ ज्योतीरूपंमहद्धामपुराणंवनमालिनम् ॥ पीतांबरधरंस्निग्धंदिव्यभूषणभूषितम् ॥ ३१ ॥ दिव्यानुलेपनंराजच्चित्रितांगम
मणीसत्यभामाचनाग्नजितीसुलक्षणा ॥ ३२ ॥ मित्रविंदानुविंदासुनंदाजांबवतीप्रिया ॥ सुशीलाचाष्टमहिलावासुदेवप्रियास्ततः ॥सा ॥
षदावृतयोर्भक्तितत्पराः ॥ उत्तरेसुमहोद्यानेहरिचंदनसंश्रये ॥ ३४ ॥ तत्राधस्तुस्वर्णपीठेमणिमंडपमंडिते ॥ तन्मध्येहेमनिर्माणद
ले ॥ ३५ ॥ तत्रैवसहरेवत्यासंकर्षणहलायुधम् ॥ ईश्वरस्यप्रियानंतमभिन्नगुणरूपिणम् ॥ ३६ ॥ शुद्धस्फटिकसंकाशंरक्तांबुजदले
धरंस्निग्धंदिव्यभूषास्रगंबरम् ॥ ३७ ॥ मधुपानेसदासक्तंमधुघूर्णितलोचनम् ॥ प्रवीरदक्षिणेभागेमंजुनाभ्यंतरास्थिते ॥ ३८ ॥ संतानवृ
मंडितम् ॥ तन्मध्येमणिमाणिक्यदिव्यसिंहासनोज्ज्वले ॥ ३९ ॥ प्रद्युम्नंचरतीदेवंतत्रोपरिसुखस्थितम् ॥ जगन्मोहनसौंदर्य
म् ॥ ४० ॥ असितांभोजपुंजाभमरविंददलेक्षणम् ॥ दि[illegible]लंकारभूषाभिर्दिव्यगंधानुलेपनम् ॥ ४१ ॥ जगन्मुग्धीकृताशेषसौंद
र्वोद्यानेमहारण्येसुरद्रुमसमाश्रये ॥ ४२ ॥ तत्राधस्तस्व[illegible]हेममंडपमंडिते ॥ तस्यमध्येस्थिरेराजद्दिव्यसिंहासनोज्ज्वले॥ ४३ ॥

ना
अनेक
स्निग्धसु
शुमुग्धी
द्युतिम्
तम् ॥ करे
गोरोचनादि
लंपादपद्मम्

रूपकम् ॥ ४
त्रिगुणातीतमव्यक्तंनित्यमक्षयमव्ययम् ॥ समेघंपुंजमाधुर्यसौंदर्यश्यामविग्रहम् ॥ ४९ ॥ नीलकुंचितसुस्निग्धकेशपाशातिसुंदरम् ॥ अरविंददलांस्न
ग्धसुदीर्घचारुलोचनम् ॥ ५० ॥ किरीटकुंडलोद्दंडशुद्धसत्वात्मभिर्वृतम् ॥ आत्मारामैश्चचिद्रूपैस्तन्मूर्तिध्यानतत्परैः ॥ ५१ ॥ हृदयारूढतद्ध्यानैर्ना
साग्रन्यस्तलोचनैः ॥ क्रियतेऽहैतुकीभक्तिःकायहृद्वृत्तिभाषितैः ॥ ५२ ॥ तत्सव्येयक्षगंधर्वसिद्धविद्याधरादिभिः ॥ सुकांतैरप्सरःसंघैर्नृत्यसंगीतत
त्परैः ॥ ५३ ॥ तदंगभजनंकामंवांछद्भिःकृष्णलालसैः ॥ तदग्रेवैष्णवैःसर्वैश्चांतरिक्षेसुखासने ॥ ५४ ॥ प्रह्लादनारदाद्यैश्चकुमारशुकवैष्णवैः ॥ ज
नकाद्यैर्लसद्भावैर्हृद्वाह्यस्फूर्तितत्परैः ॥ ५५ ॥ पुलकाकुलसर्वांगैःस्फुरत्प्रेमसमाकुलैः ॥ रहस्यामृतसंसिक्तैरर्द्धयुग्माक्षरोमनुः ॥ ५६ ॥ मंत्रचूडाम
णिः प्रोक्तःसर्वमंत्रैककारणम् ॥ सर्वदेवस्यमंत्राणांकैशोरंमंत्रहेतुकम् ॥ ५७ ॥ सर्वकैशोरमंत्राणांहेतुश्चूडामणिर्मनुः ॥ जपंकुर्वंतिमनसापूर्णप्रेमसु
खाश्रयाः ॥ ५८ ॥ वांछंतितत्पदांभोजेनिश्चलंप्रेमसाधनम् ॥ तद्वाह्ये[1]स्फाटिकाद्युच्चप्रावारेसुमनोहरे ॥ ५९ ॥ कुंकुमैःसितरक्ताद्यैश्चतुर्दिक्षुसमाकुलैः ॥ शु
क्लंचतुर्भुजंविष्णुंपश्चिमेद्वारपालकम् ॥ ६० ॥ शंखचक्रगदापद्मकिरीटादिविभूषितम् ॥ रक्तंचतुर्भुजंपद्मशंखचक्रगदायुधम् ॥ ६१ ॥ किरीटकुंडलो
द्दीप्तंद्वारपालकमुत्तरे ॥ गौरंचतुर्भुजंविष्णुंशंखचक्रगदायुधम् ॥ ६२ ॥ किरीटकुंडलाद्यैश्चशोभितंवनमालिनम् ॥ पूर्वद्वारेद्वारपालंगौरंविष्णुंप्रकीर्तित
म् ॥ ६३ ॥ कृष्णवर्णंचतुर्बाहुंशंखचक्रादिभूषणम् ॥ दक्षिणद्वारपालंतुश्रीविष्णुंकृष्णवर्णकम् ॥ ६४ ॥ श्रीकृष्णचरितंह्येतद्यःपठेत्प्रयतःशुचिः ॥
शृणुयाद्वापियोभक्त्यागोविंदेलभतेरतिम् ॥ ६५ ॥ ॥ इति श्रीपद्मपुराणेपातालखंडेश्रीकृष्णचरितेद्वितीयोऽध्यायः ॥ २ ॥ ॥ श्रीदेव्युवाच ॥
भगवन्सर्वभूतेशसर्वात्मन्सर्वसंभव ॥ देवेश्वर[1]महादेवसर्वज्ञकरुणाकर ॥ १ ॥ त्वयानुकंपितैवाहंभूयोप्याहानुकंपया ॥ त्रैलोक्यमोहनामंत्रास्त्वयामेकथि
ताःप्रभो ॥ २ ॥ तेनदेवेनगोपीभिर्महामोहनरूपिणा ॥ केनकेनविशेषेणचिक्रीडेतद्वदस्वमे ॥ ३ ॥ ॥ महादेवउवाच ॥ एकदावादयन्वीणांनारदो
मुनिपुंगवः ॥ कृष्णावतारमाज्ञायप्रययौनंदगोकुलम् ॥ ४ ॥ गत्वातत्रमहायोगमयेशंविभुमच्युतम् ॥ बालनाट्यधरंदेवदर्शनंनंदवेश्मनि ॥ ५ ॥
सुकोमलपटास्तीर्णहेमपर्यंकिकोपरि ॥ शयानंगोपकन्याभिःप्रेक्षमाणंसदामुदम् ॥ ६ ॥ अतीवसुकुमारांगंमुग्धंमुग्धविलोकनम् ॥ विस्रस्तनीलकुटि

---

[1] स्फटिकाद्युच्चप्राचीरे--इ० पा० । [1] देवदेव–इ० पा० ।

लकुंतलावनिमंडलम् ॥ ७ ॥ किंचित्स्मितांकुरव्यंजदेकद्विरदकुड्मलम् ॥ स्वप्रभाभिर्भासयंतंसमंताद्भवनोदरम् ॥ ८ ॥ दिग्वाससंसमालोक्यसोति
हर्षमवापह ॥ संभाष्यगोपतिंनंदमाहसर्वप्रभुप्रियः ॥ ९ ॥ नारायणपराणांतुजीवनंह्यतिदुर्लभम् ॥ अस्यप्रभावमतुलंनजानंतीहकेचन ॥ १० ॥ भव
ब्रह्मादयोप्यस्मिन्रतिंवांच्छातिशाश्वतीम् ॥ चरितंचास्यबालस्यसर्वेषामेवहर्षणम् ॥ ११ ॥ मुदागायंतिशृण्वंतिचाभिनंदंतितादृशाः ॥ अस्मिंस्तवसुतेऽ
चिंत्यप्रभावेस्निग्धमानसाः॥१२॥ नराःसंतिनतेषांवैभवबाधाभविष्यति ॥ मुंचेहपरलोकेच्छाःसर्वाबल्लवसत्तम ॥ १३ ॥ एकांतेनैकभावेनबालेस्मिन्प्रीति
माचर ॥ इत्युक्त्वानंदभवनान्निष्क्रांतोमुनिपुंगवः ॥१४॥ तेनार्चितोविष्णुबुद्ध्याप्रणम्यचविसर्जितः ॥ अथासौचिंतयामासमहाभागवतोमुनिः ॥ १५॥
अस्यकांताभगवतीलक्ष्मीर्नारायणेहरौ ॥ विधायगोपिकारूपंक्रीडार्थंशार्ङ्गधन्वनः ॥ १६ ॥ अवश्यमवतीर्णासाभविष्यतिनसंशयः ॥ तामहंविचिनोम्य
द्यगेहेगेहेव्रजौकसाम् ॥ १७ ॥ विमृश्यैवंमुनिवरोगेहानिव्रजवासिनाम् ॥ प्रविवेशातिथिर्भूत्वाविष्णुबुद्ध्यासुपूजितः ॥ १८ ॥ सर्वेषांबल्लवादीनांरतिंनंद
सुतेपराम् ॥ दृष्ट्वामुनिवरःसर्वान्मनसाप्रणनामह ॥ १९ ॥ गोपालानांगृहेबालांददर्शश्वेतरूपिणीम् ॥ सदृष्ट्वातर्कयामासरमाह्येषानसंशयः ॥ २० ॥ प्रविवेशत
तोधीमान्नंदसख्युर्महात्मनः॥ कस्यचिद्गोपवर्य्यस्यभानुनाम्नोगृहंमहत् ॥२१॥ अर्चितोविधिवत्तेनसोप्यपृच्छन्महामनाः ॥ साधोत्वमासिविख्यातोधर्मनि
ष्ठतयाभुवि ॥२२॥ तवाहंधनधान्यादिसमृद्धिंसंविभावये ॥ कच्चित्तेयोग्यःपुत्रोस्तिकन्यावाशुभलक्षणा ॥ २३ ॥ यतस्तेकीर्तिरखिलंलोकंव्याप्यभविष्य
ति ॥ इत्युक्तोमुनिवर्य्येणभानुरानीयपुत्रकम् ॥ २४ ॥ महातेजस्विनंदृप्तंनारदायाभ्यवादयत् ॥ दृष्ट्वामुनिवरस्तंतुरूपेणाप्रतिमंभुवि ॥ २५ ॥ पद्मपत्रविशा
लाक्षंसुग्रीवंसुंदरभ्रुवम् ॥ चारुदंतंचारुकर्णंसर्वावयवसुंदरम्॥२६॥तंसमाश्लिष्यबाहुभ्यांस्नेहाश्रूणिविमुच्यच॥ततःसगद्गदंप्राहप्रणयेनमहामुनिः॥२७॥नार
दउवाच॥अयंशिशुस्तेभवितासुसखारामकृष्णयोः॥विहरिष्यतिताभ्यांचरात्रिंदिवमतंद्रितः॥२८॥ततआभाष्यतंगोपप्रवरंमुनिपुंगवः ॥ यदागंतुंमनश्चक्रे
तत्रैवंभानुरब्रवीत् ॥ २९ ॥ एकास्तिपुत्रिकादेवदेवपत्न्युपमामम ॥ कनीयसीशिशोरस्यजडांधबधिराकृतिः ॥ ३० ॥ उत्साहाद्वृद्धयेयाचेत्वांवरंभगवत्त
म ॥ प्रसन्नदृष्टिमात्रेणसुस्थिरांकुरुबालिकाम् ॥ ३१ ॥ श्रुत्वैवंनारदोवाक्यंकौतुकाकृष्टमानसः ॥ अथप्रविश्यभवनंलुठंतींभूतलेसुताम् ॥ ३२ ॥ उ
त्थाप्यांकेनिधायातिस्नेहविह्वलमानसः ॥ भानुरभ्याययौभक्तिनम्रोमुनिवरांतिकम् ॥ ३३ ॥ अथभागवतश्रेष्ठःकृष्णस्यातिप्रियोमुनिः ॥ दृष्ट्वातस्याःपरं
[illegible] वद्यानन ॥ ३४ ॥ [illegible] पर्वममंमग्धोहरि [illegible] मानंदसिंधुमेक[illegible]यनम ॥ [illegible]

च्छंदचारिणा ॥

पिशोभाकोटयंशःकुत्राप्यस्याविलोकितः ॥ ३९ ॥ महामायाभगवतीदृष्टाऽऽह्लादनंदिनी ॥ यस्यारूपेणसकलंमुह्यतेसचराचरम् ॥ ४० ॥ साप्यस्याः सुकुमारांगीलक्ष्मींनाप्नोतिकर्हिचित् ॥ लक्ष्मीःसरस्वतीकांतिविद्याद्याश्चवरस्त्रियः ॥ ४१ ॥ छायामपिस्पृशंत्यस्याःकदाचिन्नैवदृश्यते ॥ विष्णोर्यन्मोहिनीरूपंहरोयेनविमोहितः ॥ ४२ ॥ मयादृष्टंचतदपिकुतोस्याःसदृशंभवेत् ॥ ततोऽस्यास्तत्वमाज्ञातुंनमेशक्तिःकथंचन ॥ ४३ ॥ अन्येचापिनजानंतिप्रायेणैनांहरेःप्रियाम् ॥ अस्याःसंदर्शनादेवगोविंदचरणांबुजे ॥ ४४ ॥ याप्रेमर्द्धिरभूत्सामेभूतपूर्वानकर्हिचित् ॥ एकांतेनौमिभवतींदर्शयित्वातिवैभवम् ॥ ४५ ॥ कृष्णस्यसंभवत्यस्यारूपंपरमतुष्टये ॥ विमृश्यैवंमुनिर्गोपप्रवरंप्रेष्यकुत्रचित् ॥ ४६ ॥ निभृतेपरितुष्टावबालिकांदिव्यरूपिणीम् ॥ अपिदेविमहायोगमायेश्वरिमहाप्रभे ॥ ४७ ॥ महामोहनदिव्यांगिमहामाधुर्यवर्षिणि ॥ महाद्भुतरसानंदशिथिलीकृतमानसे ॥ ४८ ॥ महाभाग्येनकेनापिगतासिममदृक्पथम् ॥ नित्य[1]मंतर्मुखादृष्टिस्तवदेविविभाव्यते ॥ ४९ ॥ अंतरेवमहानंदपरितृप्तैवलक्ष्यसे ॥ प्रसन्नंमधुरंसौम्यमिदंसुमुखमंडनम् ॥ ५० ॥ व्यनक्ति[2]परमाश्चर्यैकमप्यंतःसुखोदयम् ॥ रजःसंबंधिकलिकाशक्तिस्तत्वातिशोभने ॥ ५१ ॥ सृष्टिस्थितिसमाहाररूपिणत्वमधिष्ठिता ॥ तत्वंविशुद्धसत्वाशुशक्तिर्विद्यात्मिकापरा ॥ ५२ ॥ परमानंदसंदोहंदधतीवैष्णवंपरम् ॥ कौ[3]त्वयाश्चर्यविभवेब्रह्मरुद्रादिदुर्गमे ॥ ५३ ॥ योगींद्राणांध्यानपथंनत्वंस्पृशसिकर्हिचित् ॥ इच्छाशक्तिर्ज्ञानशक्तिःक्रियाशक्तिस्तवेशितुः ॥ ५४ ॥ तवांशमात्रमित्येवंमनीषामेप्रवर्त्तते ॥ मायाविभूतयोचिंत्यास्तन्मायार्भकमायिनः ॥ ५५ ॥ परेशस्यमहाविष्णोस्ताःसर्वास्तेकलाकलाः ॥ आनंदरूपिणीशक्तिस्त्वमीश्वरिनसंशयः ॥ ५६ ॥ त्वयाचक्रीडतेकृष्णोनूनंवृंदावनेवने ॥ कौमारेणैवरूपेणत्वंविश्वस्यचमोहिनी ॥ ५७ ॥ तारुण्यवयसा[4]स्पृष्टंकीदृक्तेरूपमद्भुतम् ॥ कीदृशंतवलावण्यंलीलाहासेक्षणान्वितम् ॥ ५८ ॥ हरिमानुषलोभेन[5]वपुराश्चर्यमंडितम् ॥ द्रष्टुंतदहमिच्छामिरूपंतेहरिवल्लभे ॥ ५९ ॥ येननंदसुतःकृष्णोमोहंसमुपयास्यति ॥ इदानींममकारुण्यान्निजंरूपंमहेश्वरि ॥ ६० ॥ प्रणतायप्रपन्नायप्रकाशयितुमर्हसि ॥ इत्युक्तामुनिवर्य्येणतदनुव्रतचेतसा ॥ ६१ ॥ महामाहेश्वरींनत्वामहानंदमयींपराम् ॥ महाप्रेमतरोत्कंठाव्याकुलांगींशुभेक्षणाम् ॥ ६२ ॥ ईक्षमाणेनगोविंदमेवंवर्णयतास्थितम् ॥ जयकृष्णम

---

[1] अंतःसुखा–इ० पा० । [2] परमानंदम्–इ० पा० । [3] कलयाश्चर्यविभवे–इ० पा० । [4] सृष्टम्–इ० पा० । [5] पराश्चर्यमयं भवेत्–इ० पा० ।

नोहारिञ्जयवृंदावनप्रिय ॥ ६३ ॥ जयभ्रूभंगललितजयवेणुरवाकुल ॥ जयबर्हकृतोत्तंसजयगोपीविमोहन ॥ ६४ ॥ जयकुंकुमलिप्तांगजयरत्न
विभूषण ॥ कदाहंत्वत्प्रसादेनअनयादिव्यरूपया ॥ ६५ ॥ सहितंनवतारुण्यमनोहारिवपुःश्रिया ॥ विलोकयिष्येकैशोरेमोहनंत्वांजग
त्पते ॥ ६६ ॥ एवंकीर्त्तयतस्तस्यतत्क्षणादेवसापुनः ॥ बभूवदधतीदिव्यंरूपमत्यंतमोहनम् ॥ ६७ ॥ चतुर्दशाब्दवयस्कां[1]संमितंललितंपरम् ॥ समा
नवयसश्चान्यास्तदैवव्रजबालिकाः ॥ ६८ ॥ आगत्यवेष्टयामासुर्दिव्यभूषांबरस्रजः ॥ मुनींद्रः[2]सतुनिश्चेष्टोबभूवाश्चर्यमोहितः ॥ ६९ ॥ [3]बालायास्तास्त
दासख्यश्चरणांबुकणैर्मुनिम् ॥ निषिच्यबोधयामासुरूचुश्चकृपयान्विताः ॥ ७० ॥ मुनिवर्यमहाभागमहायोगेश्वरेश्वर ॥ त्वयैवपरयाभक्त्याभ
गवान्हरिरीश्वरः ॥ ७१ ॥ नूनमाराधितोदेवोभक्तानांकामपूरकः ॥ यदियंब्रह्मरुद्राद्यैर्देवैःसिद्धमुनीश्वरैः ॥ ७२ ॥ महाभागवतैश्चान्यैर्दुर्दर्शादुर्गमापिच ॥
अत्यद्भुतवयोरूपमोहिनीहरिवल्लभा ॥ ७३ ॥ केनाप्यचिंत्यभाग्येनतवदृष्टिपथंगता ॥ उत्तिष्ठोत्तिष्ठविप्रर्षेधैर्यमालंब्यसत्वरम् ॥७४॥ एनांप्रदक्षिणीकृत्य
नमस्कुरुपुनःपुनः ॥ किंनपश्यसिचार्वंगीमत्यंतव्याकुलामिव ॥ ७५ ॥ अस्मिन्नेवक्षणेनूनमंतर्धानंगमिष्यति ॥ नानयासहसंलापःकथंचित्तेभवि
ष्यति ॥ ७६ ॥ दर्शनंचपुनर्नास्याःप्राप्स्यसिब्रह्मवित्तम ॥ किंतुवृंदावनेकापिभात्यशोकलताशुभा ॥ ७७ ॥ सर्वकालेपिपुष्याढ्यासर्वदिग्व्यापिसौ
रभा ॥ गोवर्द्धनाददूरेणकुसुमाख्यसरस्तटे ॥ ७८ ॥ तन्मूलेह्यर्द्धरात्रेचद्रक्ष्यस्यस्मानशेषतः ॥ श्रुत्वैवंवचनंतासांस्नेहविह्वलचेतसाम् ॥ ७९ ॥
यावत्प्रदक्षिणीकृत्यप्रणमेद्दंडवन्मुनिः ॥ मुहूर्त्तद्वितयंबालांनानानिर्माणशोभनाम् ॥ ८० ॥ आहूयभानुंप्रोवाचनारदःसर्वशोभनाम् ॥ एवंप्रभावाबा
लेयंनसाध्यादैवतैरपि ॥ ८१ ॥ किंतुयद्गृहमेतस्याःपदचिह्नविभूषितम् ॥ तत्रनारायणोदेवः[4]स्वयंवसतिमाधवः ॥ ८२ ॥ लक्ष्मीश्चवसतेनित्यंसर्वा
भिःसर्वसिद्धिभिः ॥ अद्यएनांवरारोहांसर्वाभरणभूषणाम् ॥ ८३ ॥ देवीमिवपरांगेहेरक्षयत्नेनसत्तम ॥ इत्युक्त्वामनसैवैनांमहाभागवतोत्तमः ॥ ८४ ॥
तद्रूपमेवसंस्मृत्यप्रविष्टोगहनंवनम् ॥ अशोकलतिकामूलमासाद्यमुनिसत्तमः ॥ ८५ ॥ प्रतीक्षमाणोदेवींतांतत्रैवागमनंनिशि ॥ स्थितोत्रप्रेमवि
कलश्चिंतयन्कृष्णवल्लभाम् ॥८६॥ अथमध्यनिशाभागेयुवत्यःपरमाद्भुताः ॥ पूर्वदृष्टास्तथान्याश्चविचित्राभरणस्रजः ॥ ८७ ॥ दृष्ट्वामनसिसंभ्रांतोदंडवत्प
तितोभुवि ॥ परिवार्यमुनिंसर्वास्तास्ताःप्रविविशुःशुभाः ॥ ८८ ॥ प्रष्टुकामोपिसमुनिःकिंचित्स्वाभिमतंप्रियम् ॥ नाशकत्प्रेमलावण्यप्रियभाषाप्रधर्षितः
॥ ८९ [illegible] भुंजांजलिमवस्थितम् ॥ भक्ति[illegible] मम ॥ ९० ॥ अविनीतनमं[illegible] ॥ अशोकमा
[illegible] मानंदास [illegible]

शुवाच ॥ ॥ अ[illegible]स्यांमहामुने ॥
॥ रक्तमाणिक्यकेयूरमुकुटादिविभूषिता ॥ ९३ ॥ एकदाप्रिययासार्द्धंविहरंत्योमधूत्सवे ॥ तत्रैवमिलितागो
पबालिकाश्चित्रवाससः ॥ ९४ ॥ अहंचाशोकमालाभिर्गोपवेषधरंहरिम् ॥ रमारूपाश्चताःसर्वाभक्त्यासम्यगपूजयम् ॥ ९५ ॥ ततःप्रभृतिचैतासांमध्ये
तिष्ठामिसर्वदा ॥ भूषाभिर्विविधाभिश्चतोषयित्वारमापतिम् ॥ ९६ ॥ परात्परमहंसर्वंविजानामीहसर्वतः ॥ गोगोपगोपिकादीनांरहस्यंचापिवेद्म्य
हम् ॥ ९७ ॥ तवजिज्ञासितंसर्वंहृदिप्रत्यभिभाषितम् ॥ तांदेवीमद्भुताकारामद्भुतानंददायिनीम् ॥ ९८ ॥ हरेःप्रियांहिरण्याभांहीरकोज्ज्वलमुद्रि
काम् ॥ कथंपश्यामिलोलाक्षींकथंवातत्पदांबुजम् ॥ ९९ ॥ आराध्यतेतिभक्त्येतित्वयाब्रह्मन्विमर्शितम् ॥ तत्रतेकथयिष्यामिवृत्तांतंसुमहात्म
नाम् ॥ १०० ॥ मानसेसरसिस्थित्वातपस्तीव्रमुपेयुषाम् ॥ जपतांसिद्धमंत्रांश्चध्यायतांहरिमीश्वरम् ॥ १०१ ॥ मुनीनांकांक्षतांनित्यंतस्याएवपदां
बुजम् ॥ एकसप्ततिसाहस्रंसंख्यातानांमहौजसाम् ॥ १०२ ॥ तत्तेहंकथयाम्यद्यतद्रहस्यंपरंवने ॥ १०३ ॥ ॥ इति श्रीपद्मपुराणेपातालखंडेश्रीराधाकृ
ष्णमाहात्म्येतृतियोध्यायः ॥ ३ ॥ ॥ ईश्वरउवाच ॥ ॥ तदेकाग्रमनाभूत्वाशृणुदेविवरानने ॥ आसीदुग्रतपानाममुनिरेकोदृढव्रतः ॥ १ ॥ साग्नि
कोह्यग्निभक्षश्चचारात्यद्भुतंतपः ॥ जजापपरमंजाप्यंमंत्रंपंचदशाक्षरम् ॥ २ ॥ काममंत्रेणपुटितंकामंकामवरप्रदात् ॥ कृष्णायेतिपदंस्वाहासहि
तंसिद्धिदंपरम् ॥ ३ ॥ दध्यौचश्यामलंकृष्णंरासोन्मत्तंवरोत्सुकम् ॥ पीतपट्टधरंवेणुंकरेणाधरमर्पितम् ॥ ४ ॥ नवयौवनसंपन्नंकर्षतंपाणिनाप्रि
याम् ॥ एवंध्यानपरःकल्पशतांतेदेहमुत्सृजन् ॥ ५ ॥ सुनंदनामगोपस्यकन्याभूत्समहामुनिः ॥ सुनंदेतिसमाख्यातायावीणांबिभ्रतीकरे ॥ ६ ॥
मुनिरन्यःसत्यतपाइतिख्यातोमहाव्रतः ॥ सं[1]शुष्कपत्रंभुंक्तेयःप्रजजापपरंमनुम् ॥ ७ ॥ रत्यंतंकामबीजेनपुटितंचदशाक्षरम् ॥ सप्रदध्यौमुनिवरश्चि
त्रवेषधरंहरिम् ॥ ८ ॥ धृत्वारमायादोर्वल्लीद्वितयंकंकणोज्ज्वलम् ॥ नृत्यंतमुन्मदंतंचसंश्लिष्यंतंमुहुर्मुहुः ॥ ९ ॥ हसंतमुच्चैरानंदतरंगंजठरांबरे ॥ द
धतंवेणुमाजानुवैजयंत्याविराजितम् ॥ १० ॥ स्वेदांभःकणसंसिक्तललाटवलिताननम् ॥ त्यक्त्वात्यक्त्वासवैदेहंतपसाचमहामुनिः ॥ ११ ॥ दश
कल्पांतरेजातोह्ययंनंदवनादिह ॥ सुभद्रनाम्नोगोपस्यकन्याभद्रेतिविश्रुता ॥ १२ ॥ यस्याःपृ[2]ष्ठतलेदिव्यंव्यजनंपरिदृश्यते ॥ हरिधामाभिधान
स्तुकाश्चिदासीन्महामुनिः ॥ १३ ॥ सोप्यतप्यत्तपःकृच्छ्रंनित्यं[3]पत्रैकभोजनम् ॥ आशुसिद्धिकरंमंत्रंविंशत्यर्णप्रजप्तवान् ॥ १४ ॥ अनंतरंकामबीजा

---

[1] सशुष्कपत्रभुक्तोये –इ० पा० । [2] पृष्ठांतरे–इ० पा० । [3] त्यक्त्वैव भोजनम्–इ० पा० ।

दध्यारूढंतदेवतु ॥ मायातत्पुरतोव्योमहंसासृग्द्युतिचंद्रकम् ॥ १५ ॥ ततोदशाक्षरंपश्चान्नमोयुक्तंस्मरादिकम् ॥ दध्यौवृंदावनेरम्येमाधवीमंडपेप्रभु
म् ॥ १६ ॥ उत्तानशायिनंचारुपल्लवास्तरणोपरि ॥ कयाचिदतिकामार्त्तबल्लव्यारक्तनेत्रया ॥ १७ ॥ वक्षोजयुगमाच्छाद्यविपुलोरःस्थलंमुहुः ॥
संचुंब्यमानगंडांतंतृप्यमानरदच्छदम् ॥ १८ ॥ कलयंतंप्रियांदोर्भ्यांसहासंसमुदाद्भुतम् ॥ समुनिश्चबहून्देहांस्त्यक्त्वाकल्पत्रयांतरे ॥ १९ ॥ सा
रंगनाम्नोगोपस्यकन्याभूच्छुभलक्षणा ॥ रंगवेणीतिविख्यातानिपुणाचित्रकर्मणि ॥ २० ॥ यस्यादंतेषुदृश्यंतेचित्रिताःशोणबिंदवः ॥ ब्रह्मवादीमु
निःकश्चिज्जाबालिरितिविश्रुतः ॥ २१ ॥ सतपःसुरतोयोगीविचरन्पृथिवीमिमाम् ॥ सएकस्मिन्महारण्येयोजनायुतविस्तृते ॥ २२ ॥ यदृच्छया
गतोपश्यदेकांवापींसुशोभनाम् ॥ सर्वतःस्फाटिकाबंधतटांस्वादुजलान्विताम् ॥ २३ ॥ ॥ विकासिकमलामोदवायुनापरिशीलिताम् ॥ तस्याःप
श्चिमदिग्भागेमूलेवटमहीरुहः ॥ २४ ॥ अपश्यत्तापसींकांचित्कुर्वतींदारुणंतपः ॥ तारुण्यवयसायुक्तांरूपेणातिमनोहराम् ॥ २५ ॥ चंद्रांशुसदृशा
भासांसर्वावयवशोभनाम् ॥ कृत्वाकटितटेवामपाणिंदक्षिणतस्तदा ॥ २६ ॥ ज्ञानमुद्रांचबिभ्राणामनिमेषविलोचनाम् ॥ त्यक्ताहारविहारांचमुनिश्च
लतयास्थिताम् ॥ २७ ॥ जिज्ञासुस्तांमुनिवरस्तस्थौतत्रशतंसमाः ॥ तदंतेतांसमुत्थाप्यचलितांविनयान्मुनिः ॥ २८ ॥ अपृच्छत्कात्वमाश्चर्ये
रूपेकिंवाचरिष्यसि ॥ यदियोग्यंभवेत्तर्हिकृपयावक्तुमर्हसि ॥ २९ ॥ अथाब्रवीच्छनैर्बालातपसातीवकर्शिता ॥ ब्रह्मविद्याहमतुलायोगींद्रैर्याविमृग्यते
॥ ३० ॥ साहंहरिपदाम्भोजकाम्ययासुचिरंतपः ॥ चराम्यस्मिन्वनेघोरेध्यायंतीपुरुषोत्तमम् ॥ ३१ ॥ ब्रह्मानंदेनपूर्णाहंतेनानंदेनतृप्तधीः ॥
तथापिशून्यमात्मानंमन्येकृष्णरतिंविना ॥ ३२ ॥ इदानीमतिनिर्विण्णादेहस्यास्यविसर्ज्जनम् ॥ कर्त्तुमिच्छामिपुण्यायांवापिकायामिहैवतु
॥ ३३ ॥ तच्छ्रुत्वावचनंतस्यामुनिरत्यंतविस्मितः ॥ पतित्वाचरणेतस्याःकृष्णोपासाविधिंशुभम् ॥ ३४ ॥ पप्रच्छपरमप्रीतस्त्यक्त्वाध्यात्म
विरोचनम् ॥ तयोक्तंमंत्रमाज्ञायजगाममानसंसरः ॥ ३५ ॥ ततोतिदुश्चरंचक्रेतपोविस्मयकारकम् ॥ एकपादस्थितःसूर्यंनिर्निमेषंविलोकयन् ॥
॥ ३६ ॥ मंत्रंजजापपरमंपंचविंशतिवर्णकम् ॥ दध्यौपरमभावेनकृष्णमानंदरूपिणम् ॥ ३७ ॥ चरंतंव्रजवीथीषुविचित्रगतिलीलया ॥ ल
लितैःपादविन्यासैःक्वणयंतंचनूपुरम् ॥ ३८ ॥ चित्रकंदर्पचेष्टाभिःसस्मितापांगवीक्षितैः ॥ संमोहनाख्ययावंश्यापंचमारुणचित्रया ॥ ३९ ॥ बिं
नैतंतांभुवि ॥ परिवार्यमुनैर्सिवोरस्सा ॥ हरंतंव्रजरामाणांमनांसिचवपूंषिच ॥ ४० ॥ श्लथन्नीवीभिरागत्यसहसालिंगितांगकम् ॥ दिव्यमाल्यांबरधरं
॥ ४१ ॥ [illegible] कृतांजलिमवस्थितम् [illegible] ॥ [illegible] जगत्पतिम् ॥ ४२ ॥ नवकल्पांतरेजातागोकुले

[illegible]यातियशस्विनः ॥ ४३ ॥ चित्रगंधेतिविख्याताकुमारीचशुभानना ॥ निजांगगंधैर्विविधैर्मोदयंतीदिशो
द[illegible]याणींवृंदशोमधुपायिनीम् ॥ अंगेषुस्वपतिंकृत्वारसावेशसमाकुलाम् ॥ ४५ ॥ अस्याःस्तनपरिष्वंगेहारैःसर्वैर्विह
न्यते ॥ वक्षःस्थलात्प्रच्यवद्भिश्चित्रगंधादिसौरभैः ॥ ४६ ॥ अपरेमुनिवर्यास्तुसततंपूतमानसाः ॥ वायुभक्षास्तपस्तेपुर्जपंतःपरमंमनुम् ॥ ४७ ॥
स्मरःकृष्णायकामार्ति[1]कलादिवृत्तिशालिने ॥ आग्नेयीसहितंकृत्वामंत्रंपंचदशाक्षरम् ॥ ४८ ॥ दध्युर्मुनिवराःकृष्णमूर्तिंदिव्याविभूषणाम् ॥ दिव्यचि
त्रदुकूलेनपूर्णपीनकटिस्थलाम् ॥ ४९ ॥ मयूरपिच्छकैःकृतचूडामुज्ज्वलकुंडलाम् ॥ सव्यजंघांतआदायदक्षिणंचरणांबुजम् ॥ ५० ॥ भ्रमंतींसंपुटीकृ
त्यचारुहस्तांबुजद्वयम् ॥ कक्षदेशविनिक्षिप्तवेणुंपरिचलत्पुटीम् ॥ ५१ ॥ आनंदयंतींगोपीनांनयनानिमनांसिच ॥ परमाश्चर्यरूपेणप्रविष्टांरंगमं
डपे ॥ ५२ ॥ प्रसूनवर्षैर्गोपीभिःपूर्यमाणांचसर्वतः ॥ अथकल्पांतरेदेहंत्यक्त्वाजाताइहाधुना ॥ ५३ ॥ यासांकर्णेषुदृश्यंतेताटंका[2]रश्मिदीपि
ताः ॥ रत्नमाल्यानिकंठेषुरत्नपुष्पाणिवेणिषु ॥ ५४ ॥ मुनिःशुचिश्रवानामसुवर्णोनामचापरः ॥ कुशध्वजस्यब्रह्मर्षेःपुत्रौतौवेदपारगौ ॥ ५५ ॥
ऊर्ध्वपादौतपोघोरंतेपतुस्त्र्यक्षरंमनुम् ॥ [3]ह्रींहंसइतिकृत्वैवजपंतौयतमानसौ ॥ ५६ ॥ ध्यायंतौगोकुलेकृष्णंबालकंदशवार्षिकम् ॥ कंदर्पसमरूपे
णतारुण्यललितेनच ॥ ५७ ॥ पश्यंतीर्व्रजबिंबोष्ठीर्मोहयंतमनारतम् ॥ तौकल्पांतेतनूत्यक्त्वालब्धवंतौजनिंव्रजे ॥ ५८ ॥ सुवीरनामगोपस्यसुते
परमशोभने ॥ ययोर्हस्तेप्रदृश्येतेसारिकेशुभराविणी ॥ ५९ ॥ जटिलोजंघपूतश्चघृताशीकर्बुरेवच ॥ चत्वारोमुनयोधन्याइहामुत्रचनिःस्पृहाः ॥ ६० ॥
केवलेनैकभावेनप्रपन्नाबल्लवीपतिम् ॥ तेपुस्तेसलिलेमग्नाजपंतो[4]र्मनुमेवच ॥ ६१ ॥ रमात्रयेणपुटितं[5]स्मराद्यंतदशाक्षरम् ॥ दध्युश्चगाढभावेनबल्लवी
भिर्वनेवने ॥ ६२ ॥ भ्रमंतंनृत्यगीताद्यैर्मानयंतंमनोहरम् ॥ चंदनालिप्तसर्वांगंजपापुष्पावतंसकम् ॥ ६३ ॥ कल्हारमालयावीतंनीलपीतपटावृत
म् ॥ कल्पत्रयांतेजातास्तेगोकुलेशुभलक्षणाः ॥ ६४ ॥ इमास्ताःपुरतोरम्याउपविष्टानतभ्रुवः ॥ [6]यासांभर्मकृतान्येववलयानिप्रकोष्ठके ॥ ६५ ॥
विचित्राणिचरत्नाद्यैर्दिव्यमुक्ताफलादिभिः ॥ मुनिर्दीर्घतपानामव्यासोभूत्पूर्वकल्पके ॥ ६६ ॥ तत्पुत्रःशुकइत्येवमुनिःख्यातोवरःसुधीः ॥ सोपि
बालोमहाप्राज्ञःसदैवानुस्मरन्पदम् ॥ ६७ ॥ विहायपितृमात्रादिकृष्णंध्यात्वावनंगतः ॥ सतत्रमानसैर्दिव्यैरुपचारैरहर्निशम् ॥ ६८ ॥ अनाहा
रोर्चयद्विष्णुंगोपरूपिणमीश्वरम् ॥ रमयापुटितंमंत्रंजपन्नष्टादशाक्षरम् ॥ ६९ ॥ दध्यौपरमभावेनहरिंहैमतरोरधः ॥ हैममंडपिकायांचहेमसिंहा

---

१ कलादिव्रतशालिने–इ०, कलादिवृक्षशालिने–इ० पा०। २ रत्ननिर्मिताः–इ० प्रा०। ३ ह्रींह्रूंस इति–इ० पा०। ४ मनुमुत्तमम्–इ० पा०। ५ स्मराद्यंतदशोत्तरम्–इ० पा०।
६ यासां धर्मकृतान्येव–इ० पा०।

सनोपरि ॥ ७० ॥ आसीनंहेमहस्ताग्रैर्दधानंहेमवंशिकाम् ॥ दक्षिणेनभ्रामयंतंपाणिनाहेमपंकजम् ॥ ७१ ॥ [1]हेमवर्णेष्टप्रिययापरिक्लृप्तांगचित्रकम् ॥ हसंतमतिहर्षेणपश्यंतंनिजमाश्रमम् ॥ ७२ ॥ हर्षाश्रुपूर्णःपुलकाचितांगःप्रसीदनाथेतिवदन्नथोच्चैः ॥ दंडप्रणामायपपातभूमौ संवेपमानस्त्रिजगद्विधातुः ॥ ७३ ॥ तंभक्तिकामंपतितंधरण्यामायासितोस्मीतिवदंतमुच्चैः ॥ दंडप्रणामस्यभुजौगृहीत्वापस्पर्शहर्षोपचितेक्षणेन ॥ ७४ ॥ उवाचचप्रियारूपंलब्धवंतंशुकंहरिः ॥ त्वंमेप्रियतमाभद्रेसदातिष्ठममांतिके ॥ ७५ ॥ मद्रूपंचिंतयंतीचप्रेमास्पदमुपागता ॥ द्वेचमुख्यतमेगोप्यौसमानवयसीशुभे ॥ ७६ ॥ एकव्रतेएकनिष्ठेएकनक्षत्रनामनी ॥ तप्तजांबूनदप्रख्यातत्रैवान्यातडित्प्रभा ॥ ७७ ॥ एकानिद्रायमाणाक्षीपरासौम्यायतेक्षणा ॥ सोर्चयत्परयाभक्त्यातेहरेःसव्यदक्षिणे ॥ ७८ ॥ सकल्पांतेतनुंत्यक्त्वागोकुलेभून्महात्मनः ॥ उपनंदस्यदुहितानीलोत्पलदलच्छविः ॥ ७९ ॥ सेयंश्रीकृष्णवनितापीतशाटीपरिच्छदा ॥ रक्तचोलिकयापूर्णाशातकुंभघटस्तनी ॥ ८० ॥ दधानारक्तसिंदूरंसर्वांगस्यावगुंठनम् ॥ स्वर्णकुंडलविभ्राजद्गंडदेशांसुशोभनाम् ॥ ८१ ॥ स्वर्णपंकजमालाढ्याकुंकुमालिप्तसुस्तनी ॥ यस्याहस्तेचर्वणीयंदृश्यतेहारिणार्पितम् ॥ ८२ ॥ वेणुवाद्यातिनिपुणा[2]केशवस्यनिषेवणी ॥ कृष्णेनपरितुष्टेनकदाचिद्गीतकर्मणि ॥ ८३ ॥ विन्यस्ताकंबुकंठेस्याभातिगुंजावलिःशुभा ॥ परोक्षेपिचकृष्णस्यकांतिभिश्चस्मरार्दिता ॥८४॥ सखीभिर्वादयंतीभिर्गायंतीसुस्वरंपरम् ॥ नर्त्तयेत्प्रियवेषेणवेषयित्वावधूमिमाम् ॥ ८५ ॥ वारंवारंचगोविंदंभावेनालिंग्यचुंबति ॥ प्रियासौसर्वगोपीनांकृष्णस्याप्यतिवल्लभा ॥ ८६ ॥ श्वेतकेतोःसुतःकश्चिद्वेदवेदांगपारगः ॥ सर्वमेवपरित्यज्यप्रचंडंतपआस्थितः ॥ ८७ ॥ मुरारेःसेवितपदांसुधामधुरनादिनीम् ॥ गोविंदस्यप्रियांशक्तिंब्रह्मरुद्रादिदुर्गमाम् ॥ ८८ ॥ भजंतीमेकभावेनश्रियमेवमनोहराम् ॥ ध्यायञ्जापसततंमंत्रमेकादशाक्षरम् ॥ ८९ ॥ हसितंसकलंकृत्वा[3]वृंतमायेषुयोजयन् ॥ कांत्यादिभिर्हसंतीभिर्वासयंत्यभितोजगत् ॥ ९० ॥ वसंतेवसतेत्येवंमंत्रार्थंचिंतयन्सदा ॥ सोपिकल्पद्वयेनैवसिद्धोऽत्रजनिमाप्तवान् ॥ ९१ ॥ सेयंबालायतेपुत्रीकृशांगीकुड्मलस्तनी ॥ मुक्तावलिलसत्कंठीशुद्धकौशेयवासिनी ॥ ९२ ॥ मुक्ताच्छुरितमंजीरकंकणांगदमुद्रिका ॥ बिभ्रतीकुंडलेदिव्येअमृतस्राविणीशुभे ॥ ९३ ॥ वृत्तकस्तूरिकावेणीमध्येसिंदूरबिंदुवत् ॥ दधानाचित्रकंभालेसार्द्धचंदनचित्रकैः ॥ ९४ ॥ यासैवदृश्यतेशांताजपंतीपरमंपदम् ॥ आसीच्चंद्रप्रभोनामराजर्षिःप्रियदर्शनः ॥ ९५ ॥ तस्यकृष्णप्रसादेनपुत्रोभून्मधुराकृतिः ॥
[illegible]वन्याम[illegible]वैष्णवः ॥ ९६ ॥ सराजासुसुतंसौम्यंसुस्थिरंद्वादशाब्दिकम् ॥ आदेशयद्विजान्मंत्रंपरमष्टादशाक्षरम् ॥ ९७ ॥
[illegible]तितामुवि ॥ परिवार्यमुनिसेवा[illegible]
॥ ८[illegible]शिजंकमांजलिमवे

[illegible]क्षिणी—इ० पा० । ३ वृक्षमायेषु—इ० वनमार्गेषु—इ० पा० ।

[illegible] तत्क्षणेभूपतिंप्रेम्णानत्वोदश्रुप्रकल्पितः ॥ ९८ ॥ तस्मिन्दिनेसवैबालःशुचिवस्त्रधरःशुचिः ॥ हार
[illegible] ९९ ॥ विभूषितोहरेर्भक्तिमुपस्पृश्यामलाशयः ॥ विष्णोरायतनंगत्वास्थित्वैकाकीव्यचिंतयत् ॥ १०० ॥ कथं
भजामितभक्तमाहनगोपयोषिताम् ॥ विक्रीडंतंसदाताभिःकालिंदीपुलिनेवने ॥ १०१ ॥ इत्थमत्याकुलमतिश्चिंतयन्नेवबालकः ॥ अथापपरमां
विद्यांस्वप्नंच[1]समवाप्यत ॥ १०२ ॥ [2]आसीत्कृष्णप्रातिकृतिःपुरतस्तस्यशोभना ॥ शिलामयीस्वर्णपीठेसर्वलक्षणलक्षिताम् ॥ १०३ ॥ साभूदिंदी
वरश्यामास्निग्धलावण्यशालिनी ॥ त्रिभंगललिताकारशिखंडीपिच्छभूषणा ॥ १०४ ॥ कूजयंतीमुदावेणुंकांचनीमधरेर्पिताम् ॥ दक्षसव्यगताभ्यां
चसुंदरीभ्यांनिषेविताम् ॥ १०५ ॥ वर्द्धयंतींतयोःकामंचुंबनाश्लेषणादिभिः ॥ दृष्ट्वाचित्रध्वजःकृष्णंतादृग्वेषाविलासिनम् ॥ १०६ ॥ अवनम्य
शिरस्तस्मैपुरोलज्जितमानसः ॥ अथोवाचहरिर्दक्षपार्श्वगांप्रेयसींहसन् ॥ १०७ ॥ सलज्जंपरमंचैनंस्वशरीरासनागतम् ॥ निर्मायात्मसमांदिव्यंयुवती
रूपमद्भुतम् ॥ १०८ ॥ चिंतयस्वशरीरेणह्यभेदंमृगलोचने ॥ अथोत्वदंगतेजोभिःस्पृष्टस्त्वद्रूपमाप्स्यति ॥ १०९ ॥ ततःसापद्मपत्राक्षीगत्वाचित्र
ध्वजांतिकम् ॥ निजांगकैस्तदंगानामभेदंध्यायतीस्थिता ॥ ११० ॥ अथास्यास्त्वंगतेजांसितदंगंपर्यपूरयन् ॥ स्तनयोर्ज्योतिषाजातौपीनौचारुपयो
धरौ ॥ १११ ॥ नितंबज्योतिषाजातंश्रोणिबिंबंमनोहरम् ॥ कुंतलज्योतिषाकेशपाशोभूत्करयोःकरौ ॥ ११२ ॥ सर्वमेवंसुसंपन्नंभूषावासःस्रगादिकम् ॥
कलासुकुशलाजातासौरभेनांतरात्मनि ॥ ११३ ॥ दीपाद्दीपमिवालोक्यसुभगांभुविकन्यकाम् ॥ चित्रध्वजांत्रपाभंगिस्मितशोभांमनोहराम् ॥ ११४ ॥
प्रेम्णागृहीत्वाकरयोःसातामपहरन्मुदा ॥ गोविंदवामपार्श्वस्थांप्रेयसींपरिरभ्यच ॥ ११५ ॥ उवाचतवदासीयंनामचास्याश्चकारय ॥ सेवांचास्यैवदप्री
त्यायथाभिरुचितांप्रियाम् ॥ ११६ ॥ अथचित्रकलेत्येत[3]न्नामचात्ममतेनसा ॥ चकारचाहसेवार्थंधृत्वाचापिविपंचिकाम् ॥ ११७ ॥ सदात्वंनिकटे
तिष्ठगायस्वाविविधैःस्वरैः ॥ गुणात्मन्प्राणनाथस्यतवायंविहितोविधिः ॥ ११८ ॥ अथचित्रकलात्वाज्ञांगृहीत्वानम्यमाधवम् ॥ तत्प्रेयस्याश्चचरणंगृही
त्वापादयोरजः ॥ ११९ ॥ जगौसुमधुरंगीतंतयोरानंदकारणम् ॥ अथप्रीत्योपगूढासाकृष्णेनानंदमूर्तिना ॥ १२० ॥ यावत्सुखांबुधौपूर्णातावदेवाप्यबुध्य
त ॥ चित्रध्वजोमहा[4]प्रेमविह्वलःस्मरतत्परः ॥ १२१ ॥ तमेवपरमानंदंमुक्तकंठोरुरोदह ॥ तदारभ्यरुदन्नेव[5]मुक्त्वाहरिविचारकम् ॥ १२२ ॥ आभाषितो

---

१ समपश्यत–इ० पा० । २ तस्मिन्नायतने आसीत्कृष्णप्रतिकृतिः शुभा–इ० पा० । ३ तन्नामात्ममतेनसा–इ० पा० । ४ प्रेमविकलःसंस्मरन्परम्-- इ० पा० ।
५ मुक्ताहारविहारकम्–इ० पा० ।

२

पिपित्राद्यैर्नैं[1]र्वावोचद्वचःक्वचित् ॥ मासमात्रंगृहेस्थित्वानिशीथेकृष्णसंश्रयः ॥ १२३ ॥ निर्गत्यारण्यमचरत्तपोवैमुनिदुष्करम् ॥ कल्पांतेदेहमुत्सृज्यतप
सैवमहामुनिः ॥ १२४ ॥ वीरं[2]गुप्ताभिधानस्यगोपस्यदुहिताशुभा ॥ जाताचित्रकलेत्येवयस्याःस्कंधेमनोहरा ॥ १२५ ॥ विपंचीदृश्यतेनित्यंसप्तस्वरावि
भूषिता ॥ उपतिष्ठतिवैवामेरत्नभृंगारमद्भुतम् ॥ १२६ ॥ दधानादक्षिणेहस्तेसावैरत्नपतद्ग्रहम् ॥ अयमासीत्पुरासर्वतापसैरभिवंदितः ॥ १२७ ॥ मुनिः
पुण्यश्रवानामकाश्यपःसर्वधर्मवित् ॥ पितातस्याभवच्छैवःशतरुद्रीयमन्वहम् ॥ १२८ ॥ प्रस्तुवन्देवदेवेशंविश्वेशंभक्तवत्सलम् ॥ प्रसन्नोभगवांस्तस्य
पार्वत्यासहशंकरः ॥ १२९ ॥ चतुर्दश्यामर्द्धरात्रेःप्रत्यक्षःप्रददौवरम् ॥ त्वत्पुत्रोभविताकृष्णेभक्तिमान्बालएवाहि ॥ १३० ॥ उपनीयाष्टमेवर्षेतस्मैसि
द्धमनुस्त्वयम् ॥ उपदिशैकविंशत्यायोमयातेनिगद्यते ॥ १३१ ॥ गोपालविद्यानामायंमंत्रोवाक्सिद्धिदायकः ॥ एतत्साधकजिव्हाग्रेलीलाचरितमद्भु
तम् ॥ १३२ ॥ अनंतमूर्तिरायातिस्वयमेववरप्रदः ॥ काममायारमाकंठसेंद्रादामोदरोज्ज्वलाः ॥ १३३ ॥ मध्येदशाक्षरींप्रोच्यपुनस्ताएवनिर्दिशेत् ॥
दशाक्षरोक्तऋष्यादिध्यानंचास्यब्रवीम्यहम् ॥ १३४ ॥ पूर्णामृतनिधेर्मध्येद्वीपंज्योतिर्मयंस्मरेत् ॥ कालिंद्यावेष्टितंतत्रध्यायेद्वृंदावनेवने ॥ १३५ ॥ सर्व
र्तुकुसुमस्राविद्रुमवल्लीभिरावृतम् ॥ नटन्मत्तशिखिस्वानंगायत्कोकिलषट्पदम् ॥ १३६ ॥ तस्यमध्येवसत्येकःपारिजाततरुर्महान् ॥ शाखोपशा
खाविस्तारैःशतयोजनमुं[3]च्छ्रितः ॥ १३७ ॥ तलेतस्याथविमलेपरितोधेनुमंडलम् ॥ तदंतर्मंडलंगोपबालानांवेणुशृंगिणाम् ॥ १३८ ॥ तदंतरे
तुरुचिरंमंडलंव्रजसुभ्रुवाम् ॥ नानोपायनपाणीनांमदविह्वलचेतसाम् ॥ १३९ ॥ कृतांजलिपुटानांचमंडलंशुक्लवाससाम् ॥ शुक्लाभरणभूषाणांप्रेम
विह्वलितात्मनाम् ॥ १४० ॥ चिंतयेच्छ्रुतिकन्यानांगृह्णतीनांवचःप्रियम् ॥ रत्नवेद्यांततोध्यायेद्दुकूलावरणंहरिम् ॥ १४१ ॥ ऊरौशयानंराधायाः
कदलीकांडकोपरि ॥ तद्वक्त्रंचंद्रसुस्मेरंवीक्षमाणंमनोहरम् ॥ १४२ ॥ किंचित्कुंचितवामांघ्रिंवेणुयुक्तेनपाणिना ॥ वामेनालिंग्यदयितांदक्षेण
चिबुकंस्पृशन् ॥ १४३ ॥ महामारकताभासंमौक्तिकच्छायमेवच ॥ पुंडरीकविशालाक्षंपीतनिर्मलवाससम् ॥ १४४ ॥ बर्हभारलसच्छीर्षं
मुक्ताहारमनोहरम् ॥ गंडप्रांतलसच्चारुमकराकृतिकुंडलम् ॥ १४५ ॥ आपादतुलसीमालंकंकणांगदभूषणम् ॥ नूपुरैर्मुद्रिकाभिश्चकांच्याचपरिमंडित
म् ॥ १४६ ॥ सुकुमारतरंध्यायेत्किशोरवयसान्वितम् ॥ पूजादशाक्षरोक्तैववेदलक्षंपुरस्क्रिया ॥ १४७ ॥ इत्युक्त्वांतर्दधेदेवोदेवीचगिरिजासती ॥ मुनि
[illegible] ॥ १४८ ॥ पुण्यश्रवास्तुतन्मंत्रग्रहणादेवकेशवम् ॥ वर्णयामासविविधैर्जित्वासर्वान्मुनीन्स्वयम् ॥ १४९ ॥ रूपलावण्य
[illegible]तितोभुवि ॥ परिवार्यमुनेर्सर्वा[illegible]
॥ [illegible]कृत्वांजलिम[illegible]

---

[2] [illegible]ताभिधानस्य–इ० पा० ।

[3] ऊर्ध्वतः--इ० पा० ।

लोनिर्गत्यस्वगृहात्ततः ॥ १६० ॥ वायुभक्षस्तपस्तेपेकल्पानामयुतत्रयम् ॥ तदंतेगोकुलेजातानंदभ्रातु
वगाऽतितन्नामकृष्णेंगितनिरीक्षणा ॥ यस्याहस्तेप्रहृश्येतमुखमार्जनयंत्रकम् ॥ १६२ ॥ इतितेकथिताःकाश्चित्प्रधानाःकृष्णव
ल्लभाः ॥ १६३ ॥ [1]हारिविविधरसाद्यैर्युक्तमध्यायमेतद्व्रजवरतनयाभिश्चारुहासेक्षणाभिः ॥ पठतियइहभक्त्यापाठयेद्वामनुष्योव्रजतिभगवतःश्रीवासुदेव
स्यधाम ॥ १६४ ॥ इति श्रीपद्मपुराणेपातालखंडेश्रीकृष्णमाहात्म्येचतुर्थोध्यायः ॥ ४ ॥ ॥ ईश्वरउवाच ॥ ॥ यत्त्वयापृष्टमाश्चर्यंतन्मया
भाषितंक्रमात् ॥ यत्रमुह्यंतिब्रह्माद्यास्तत्रकोवानमुह्यति ॥ १ ॥ तथापितेप्रवक्ष्यामियदुक्तंपरमर्षिणा ॥ महाराजमंबरीषंविष्णुभक्तंशिवान्वितम् ॥ २ ॥
बदर्याश्रममासाद्यसमासीनंजितेंद्रियम् ॥ राजाप्रणम्यतुष्टावविष्णुधर्मविवित्सया ॥३॥ वेदव्यासंमहाभागं[2]सर्वज्ञंपुरुषोत्तमम् ॥ मांत्वंसंसारदुष्पारेपरित्रातु
मिहार्हसि ॥ ४ ॥ विषयेषुविरक्तोस्मिनमस्तेभ्योनमोखिलम् ॥ यत्तत्पदमनुद्विग्नंसच्चिदानंदविग्रहम् ॥५॥ परंब्रह्मपराकाशमनाकाशमनामयम् ॥ यत्सा
क्षात्कृत्यमुनयोभवांभोधिंतरंतिहि ॥ ६ ॥ तत्राहंमनसोनित्यंकथंगतिमवाप्नुयाम् ॥ ॥ व्यासउवाच ॥ ॥ अतिगोप्यंत्वयापृष्टंयन्मयानशुकंप्रति॥ ७॥
गदितंस्वसुतं[3]किंतुत्वांवक्ष्यामिहरिप्रियम् ॥ आसीदिदंपरंविश्वंयद्रूपंयत्प्रतिष्ठितम् ॥ ८ ॥ अव्याकृतमव्यथितंतदीश्वरमयंशृणु ॥ मयाकृतंतपःपूर्वंबहु
वर्षसहस्रकम् ॥ ९ ॥ फलमूलपलाशांबुवाय्वाहारनिषेविना ॥ ततोमामाहभगवान्स्वध्यानंनिरतंहरिः ॥ १० ॥ कस्मिन्नर्थेचिकीर्षातेविवित्सावामहा
मते ॥ प्रसन्नोऽस्मिवृणुष्वत्वंवरंचवरदर्षभात् ॥ ११ ॥ मद्दर्शनांतःसंसारइतिसत्यंब्रवीमिते ॥ ततोऽहमब्रुवंकृष्णंपुलकोत्फुल्लविग्रहः ॥ १२ ॥ त्वामहं
द्रष्टुमिच्छामिचक्षुर्भ्यांमधुसूदन ॥ यत्तत्सत्यंपरंब्रह्मजगज्ज्योतिंजगत्पतिम् ॥ १३ ॥ वदंतिवेदशिरसश्चाक्षुषंनाथमद्भुतम् ॥ ॥ श्रीभगवानुवाच ॥
॥ ब्रह्मणैवंपुरापृष्टःप्रार्थितश्चयथापुरा ॥ १४ ॥ यदवोचमहंतस्मैतत्तुभ्यमपिकथ्यते ॥ मामेकेप्रकृतिंप्राहुःपुरुषंचतथेश्वरम् ॥ १५ ॥ धर्ममेकेधनंचैके
मोक्षमेकेऽकुतोभयम् ॥ शून्यमेकेभावमेकेशिवमेकेसदाशिवम् ॥ १६ ॥ अपरेवेदशिरसिस्थितमेकंसनातनम् ॥ सद्भावंविक्रियाहीनंसच्चिदानंदविग्र
हम् ॥ १७ ॥ पश्याद्यदर्शयिष्यामिस्वरूपंवेदगोपितम् ॥ ततोपश्यंभूपबालमहंकालांबुदप्रभम् ॥ १८ ॥ गोपकन्यावृतंगोपंहसंतंगोपबालकैः ॥ कदंब
मूलआसीनंपीतवाससमद्भुतम् ॥ १९ ॥ वनंवृंदावनंनामनवपल्लवमंडितम् ॥ कोकिलभ्रमरारा[4]वैर्मनोभवमनोहरम् ॥ २० ॥ नदीमपश्यंकालिंदी
मिंदीवरदलप्रभाम् ॥ गोवर्द्धनमथापश्यंकृष्णरामकरोद्धृतम् ॥ २१ ॥ महेंद्रदर्पनाशायगोगोपालसुखावहम् ॥ गोपालमबलासंगमुदितंवेणुवादि

---

१ हरिविधसरसाद्यैः--इ० पा० । २ सर्वंगम्--इ० पा० । ३ नित्यम्--इ० पा० । ४ शिखिरावमनोहरम्--इ० पा० ।

नम् ॥ २२ ॥ दृष्ट्वातिहृष्टोह्यभवंसर्वभूषणभूषणम् ॥ ततोमामाहभगवान्वृंदावनचरःस्वयम् ॥ २३ ॥ यदिदंमेत्वयादृष्टंरूपंदिव्यंसनातनम् ॥
निष्कलंनिःक्रियंशांतंसच्चिदानंदविग्रहम् ॥ २४ ॥ पूर्णपद्मपलाशाक्षंनातःपरतरंमम ॥ इदमेववदंत्येतेवेदाःकारणकारणम् ॥ २५ ॥ स
त्यंनित्यंपरानंदंचिद्घनंशाश्वतंशिवम् ॥ नित्यांमेमथुरांविद्धिवनंवृंदावनंतथा ॥ २६ ॥ यमुनांगोपकन्याश्चतथागोपालबालकाः ॥ ममावतारोनित्योय
मत्रमासंशयंकुथाः ॥ २७ ॥ ममेष्टाहिसदाराधासर्वज्ञोहंपरात्परः ॥ सर्वकामश्चसर्वेशःसर्वानंदःपरात्परः ॥ २८ ॥ मयिसर्वमिदंविश्वभातिमायावि
जृंभितम् ॥ ततोहमब्रुवंदेवंजगत्कारणकारणम् ॥ २९ ॥ काश्चगोप्यस्तुकेगोपा[1]वृक्षोयंकीदृशोमतः ॥ वनंकिंकोकिलाद्याश्चनदीकेयंगिरिश्चकः ॥ ३० ॥
कोऽसौवेणुर्महाभागोलोकानंदैकभाजनम् ॥ भगवानाहमांप्रीतःप्रसन्नवदनांबुजः ॥ ३१ ॥ गोप्यस्तुश्रुतयोज्ञेयाऋचोवैगोपकन्यकाः ॥ देवकन्याश्चरा
जेंद्रतपोयुक्तामुमुक्षवः ॥ ३२ ॥ गोपालामुनयःसर्वेवैकुंठानंदमूर्त्तयः ॥ कल्पवृक्षःकदंबोयंपरानंदैकभाजनम् ॥ ३३ ॥ वने[2]मानंदकाख्यंहिमहापातक
नाशनम् ॥ सिद्धाश्चसाध्यागंधर्वाःकोकिलाद्यानसंशयः ॥ ३४ ॥ केचिदानंदहृदयंसाक्षाद्यमुनयातनुम् ॥ अनादिर्हरिदासोऽयंभूधरोनात्रसंशयः ॥ ३५ ॥
वेणुर्यःशृणुतंविप्रंतवापिविदितंतथा ॥ द्विजआसीच्छांतमनास्तप[3]ःशांतिपरायणः ॥ ३६ ॥ नाम्नादेवव्रतोदांतःकर्मकांडविशारदः ॥ सवैष्णवजनव्रा
तमध्यवर्त्तीक्रियापरः ॥ ३७ ॥ सकदाचनशुश्रावयज्ञेशोऽस्तीतिभूपते ॥ तस्यगेहमथाभ्यागाद्द्विजोमद्[4]गतनिश्चयः ॥ ३८ ॥ समद्भक्तःक्वचित्पूजां
तुलसीदलवारिणा ॥ कृतवांस्तद्गृहेकिंचित्फलंमूलंन्यवेदयत् ॥ ३९ ॥ स्नानवारिफलंकिंचित्तस्मैमर्त्याददौसुधीः ॥ अश्रद्धयास्मितंकृत्वासोप्यगृह्णा
द्विजन्मनः ॥ ४० ॥ तेनपापेनसंजातंवेणुत्वमतिदारुणम् ॥ तेनपुण्येनतस्याथमदीयप्रियतांगतः ॥ ४१ ॥ अमुनासोपिराजेंद्रकेतुमानिवराजते ॥
युगांतेताद्विष्णुपरोभूत्वाब्रह्मसमाप्स्यति ॥ ४२ ॥ अहोनजानंतिनरादुराशयाःपुरींमदीयांपरमांसनातनीम् ॥ सुरेंद्रनागेंद्रमुनींद्रसंस्तुतांमनोरमांतां
मथुरांपुरातनीम् ॥ ४३ ॥ काश्यादयोयद्यपिसंतिपुर्यस्तासांतुमध्येमथुरैवधन्या ॥ यज्जन्ममौंजीव्रतमृत्युदाहैर्नृणांचतुर्द्धाविदधातिमुक्तिम् ॥ ४४ ॥
यदाविशुद्धास्तपआदिनाजनाःशुभाशयाध्यानधनानिरंतरम् ॥ तदैवपश्यंतिममोत्तमांपुरींनचान्यथाकल्पशतैर्द्विजोत्तमाः ॥ ४५ ॥ मथुरावासिनोध
न्यामान्याअपिदिवौकसाम् ॥ अगण्यमहिमानस्तेसर्वएवचतुर्भुजाः ॥ ४६ ॥ मथुरावासिनोयेतुदोषान्पश्यंतिमानवाः ॥ तेषुदोषंनपश्यंतिजन्मः
म[illegible]वन्यांप्रि[illegible]ण ॥ अधनाअपितेधन्यामथुरांयेस्मरंतिते ॥ यत्रभूतेश्वरोदेवोमोक्षदःपापिनामपि ॥ ४८ ॥ ममप्रियतमोनित्यंदेवोभूतेश्वर
तितोभुवि ॥ परिवार्यमुनिसर्व[illegible]
॥ [illegible]जलिम[illegible]

[illegible]इ० पा० । ३ तपःसत्यपरायणः–इ० पा० । ४ मंडननिश्चयः–इ०, तद्गतनिश्चयः–इ० च पा० । ५ प्रीत्या–इ० पा० ।

[illegible] ुरम् ॥ ४९ ॥ भूतेश्वरंयोननमेन्नपूजयेन्नवास्मरेद्दुश्चरितोमनुष्यः ॥ नैनांसपश्येन्मथुरांमदीयांस्वयंप्रकाशां
[illegible] ॥ नकथंमयिभक्तिंसलभतेपापपूरुषः ॥ योमदीयंपरंभक्तंशिवंसंपूजयेन्नहि ॥ ५१ ॥ मन्मायामोहितधियःप्रायस्तेमानवा
धमाः ॥ भूतेश्वरंननमातनस्मरंतिस्तुवंतिये ॥ ५२ ॥ बालकोपिध्रुवोयत्रममाराधनतत्परः ॥ प्रापस्थानंपरंशुद्धंयत्नयुक्तंपितामहैः ॥ ५३ ॥ तांपुरींप्राप्यम
थुरांमदीयांसुरदुर्लभाम् ॥ खंजोभूत्वांधकोवापिप्राणानेवपरित्यजेत् ॥ ५४ ॥ वेदव्यासमहाभागमाकृथाःसंशयंक्वचित् ॥ रहस्यंवेदशिरसांयन्मयातेप्रकाशि
तम् ॥ ५५ ॥ इमंभगवताप्रोक्तमध्यायंयःपठेच्छुचिः ॥ शृणुयाद्वापियोभक्त्यामुक्तिस्तस्यापिशाश्वती ॥ ५६ ॥ इतिश्रीपद्मपुराणेपातालखंडेवृंदावनादिमथुरामा
हात्म्यकथनंनामपंचमोऽध्यायः ॥ ५ ॥ ६९ ॥ ईश्वरउवाच ॥ ॥ एकदारहसिश्रीमानुद्धवोभगवत्प्रियः ॥ सनत्कुमारमेकांतेह्यपृच्छत्पार्षदःप्रभोः ॥ १ ॥
यत्रक्रीडतिगोविंदोनित्यंनित्यसुरास्पदे ॥ गोपांगनाभिर्यत्स्थानंकुत्रवाकीदृशंपरम् ॥ २ ॥ तत्तत्क्रीडनवृत्तांतमन्यद्यद्यत्तदद्भुतम् ॥ ज्ञातंचे
त्तवतत्कथ्यंस्नेहोमेयदिवर्त्तते ॥ ३ ॥ ॥ सनत्कुमारउवाच ॥ ॥ कदाचिद्यमुनाकूलेकस्यापिचतरोस्तले ॥ [1]सुवृत्तेनोपविष्टेनभगवत्पार्षदेनवै ॥ ४ ॥
[2]यद्रहोनुभवस्तस्यपार्थेनापिमहात्मना ॥ दृष्टंकृतंचयद्यत्तत्प्रसंगात्कथितंमयि ॥ ५ ॥ तत्तेहंकथयाम्येतच्छृणुष्वावहितःपरम् ॥ किंत्वेतद्यत्रकुत्रा
पिनप्रकाश्यंकदाचन ॥ ६ ॥ ॥ अर्जुनउवाच ॥ ॥ शंकराद्यैर्विरिंच्याद्यैरदृष्टमश्रुतंचयत् ॥ सर्वमेतत्कृपांभोधेकृपयाकथयप्रभो ॥ ७ ॥ किं
त्वयाकथितंपूर्वमाभीर्यस्तववल्लभाः ॥ तास्ताःकतिविधादेवकतिवासंख्ययापुनः ॥ ८ ॥ नामानिकतिवातासांकावाकुत्रव्यवस्थिताः ॥ तासांवा
कतिकर्माणिवयोवेषश्चकःप्रभो ॥ ९ ॥ काभिःसार्द्धंक्ववादेवविहरिष्यसिभोरहः ॥ नित्येनित्यसुखेनित्यविभवेचवनेवने ॥ १० ॥ तत्स्थानंकीदृशं
कुत्रशाश्वतंपरमंमहत् ॥ कृपाचेत्तादृशीतन्मेसर्वंवक्तुमिहार्हसि ॥ ११ ॥ यदपृष्टंमयाप्येवमज्ञातंयद्रहस्तव ॥ आर्तार्तिघ्नमहाभागसर्वंतत्कथयिष्य
सि ॥ १२ ॥ ॥ श्रीभगवानुवाच ॥ ॥ तत्स्थानंवल्लभास्तामेविहारस्तादृशोमम ॥ अपिप्राणसमानानांसत्यंपुंसामगोचरः ॥ १३ ॥ कथिते
दृष्टमुत्कंठातववत्सभविष्यति ॥ ब्रह्मादीनामदृश्यंयत्किंतदन्यजनस्यवै ॥ १४ ॥ तस्माद्विरमवत्सैतात्किंतुतेनविनातव ॥ एवंभगवतस्तस्यश्रुत्वावा
क्यंसुदारुणम् ॥ १५ ॥ दीनःपादांबुजद्वंद्वेदंडवत्पतितोर्जुनः ॥ ततोविहस्यभगवान्दोर्भ्यामुत्थाप्यतंविभुः ॥ १६ ॥ उवाचपरमप्रेम्णाभक्तायभ
क्तवत्सलः ॥ तत्किंतत्कथनेनात्रद्रष्टव्यंचेत्त्वयाहियत् ॥ १७ ॥ यस्थांसर्वंसमुत्पन्नंयस्यामद्यापितिष्ठति ॥ लयमेष्यतितांदेवींश्रीमात्रिपुरसुंदरीम् ॥ १८ ॥

---

[1] सुव्रतेन–इ० पा० । [2] य इहानुभवस्तस्य–इ० पा० ।

आराध्यपरयाभक्त्यातस्यैस्वंचनिवेदय ॥ तांविनैतत्पदंदातुंनशक्नोमिकदाचन ॥ १९ ॥ श्रुत्वैतद्गगद्वाक्यंपार्थोहर्षाकुलेक्षणः ॥ श्रीमत्यास्त्रिपुरा
देव्याययौश्रीपादुकातलम् ॥ २० ॥ तत्रगत्वाददर्शैनांश्रीचिंतामणिवेदिकाम् ॥ नानारत्नैर्विरचितैःसोपानैरतिशोभिताम् ॥ २१ ॥ तत्रकल्पतरुं
नानापुष्पैःफलभवैर्नतम् ॥ सर्वर्त्तुकोमलदलैःस्रवन्माध्वीकशीकरैः ॥ २२ ॥ वर्षद्भिर्वायुनालोलैःपल्लवैरुज्ज्वलीकृतम् ॥ शुकैश्चकोकिलगणैःसारिका
भिःकपोतकैः ॥ २३ ॥ लीलाचकोरकैरम्यैःपक्षिभिश्चनिनादितम् ॥ यत्रगुंजद्भृंगराजकोलाहलसमाकुलम् ॥ २४ ॥ मणिभिर्भास्वरैरुद्यद्दावानल
मनोहरम् ॥ श्रीरत्नमंदिरंदिव्यंतलेतस्यमहाद्भुतम् ॥ २५ ॥ रत्नसिंहासनंतत्रमहाहैमाभिमोहनम् ॥ तत्रबालार्कसंकाशांनानालंकारभूषिताम् ॥ २६ ॥
नवयौवनसंपन्नांसृणिपाशधनुःशरैः ॥ राजच्चतुर्भुजलतांसुप्रसन्नांमनोहराम् ॥ २७ ॥ ब्रह्मविष्णुमहेशादिकिरीटमणिरश्मिभिः ॥ विराजितपदांभोजा
मणिमादिभिरावृताम् ॥ २८ ॥ प्रसन्नवदनांदेवींवरदांभक्तवत्सलाम् ॥ अर्जुनोहमितिज्ञातःप्रणम्यचपुनःपुनः ॥ २९ ॥ विहितांजलिरेकांतेस्थितोभ
क्तिभरान्वितः ॥ सातस्योपासितंज्ञात्वाप्रसादंचकृपानिधिः ॥ ३० ॥ उवाचकृपयादेवीतस्यस्मरणविह्वला ॥ ॥ भगवत्युवाच ॥ ॥ किंवादा
नंत्वयावत्सकृतंपात्रायदुर्लभम् ॥ ३१ ॥ इष्टंयज्ञेनकेनात्रतपोवाकिमनुष्ठितम् ॥ भगवत्यमलाभक्तिःकावाप्राक्समुपार्ज्जिता ॥ ३२ ॥ किंवास्मिन्दु
र्लभंलोकेकिंवाकर्मशुभंमहत् ॥ प्रसादस्त्वयियेनायंप्रपन्नेचमुदाकिल॥३३॥गूढातिगूढश्चानन्यलभ्योभगवताकृतः ॥ नैताहृङ्मर्त्यलोकानांनचभूतलवासि
नाम्॥३४॥स्वर्गिणांदेवतादीनांतपस्वीश्वरयोगिनाम्॥भक्तानांनैवसर्वेषांनैवनैवचनैवच ॥३५॥प्रसादस्तुकृतोवत्सतवविश्वात्मनायथा॥तदेहिभजबुद्धेवकु
लकुंडंसरोमम ॥ ३६ ॥ सर्वकामप्रदादेवीत्वनयासहगम्यताम् ॥ तत्रैवविधिवत्स्नात्वाद्भुतमागम्यतामिह ॥ ३७ ॥ तदैवतत्रगत्वासस्नात्वापार्थस्तथा
गतः ॥ आगतंतंकृतस्नानंन्यासमुद्रार्पणादिकम् ॥ ३८ ॥ कारयित्वाततोदेव्यातस्यवैदक्षिणश्रुतौ ॥ सद्यःसिद्धिकरीबालाविद्यानिगदितापर
रा ॥ ३९ ॥ हकारार्द्धपरार्द्धीपाद्वितीयाविश्वभूषिता ॥ अनुष्ठानंचपूजांचजपं[2]पंचलक्षसंख्यकम् ॥ ४० ॥ कोरकैःकरवीराणांप्रयोगंचयथातथम् ॥
निर्वर्त्यंतमुवाचेदंकृपयापरमेश्वरी ॥ ४१ ॥ अनेनैवविधानेनक्रियतांमदुपासनम् ॥ ततोमयिप्रसन्नायांतवानुग्रहकारणात् ॥ ४२ ॥ [3]तंतस्तुतत्र
पर्य्यंतेष्वधिकारोभविष्यति ॥ इत्ययंनियमःपूर्वंस्वयंभगवताकृतः ॥ ४३ ॥ श्रुत्वैवमर्जुनस्ते[4]नवर्मणातांसमर्चयत् ॥ ततःपूजांजपंचैवकृत्वादेवी
प्रम[illegible] कृत्वाततःशुभंहोमंस्नानंचविधिनाततः ॥ कृतकृत्यमिवात्मानंप्राप्तप्रायमनोरथम् ॥ ४५ ॥ करस्थांसर्वसिद्धिंचसपार्थःस
तितोभुवि ॥ परिवार्यमुनि[illegible]
॥ [illegible] जलिम[illegible]

---

[1] मनोह[illegible] पा० । [2] पंचलक्षकसंख्यकम्–इ० पा० । [3] सद्यस्तु कृष्णलीलायामधिकारो भविष्यति–इ० पा० । [4] मनुना–इ० पा० ।

ातमागत्यास्मितानना ॥ ४६ ॥ उवाचगच्छवत्सत्वमधुनातद्गृहांतरे ॥ ततःससंभ्रमःपार्थःसमुत्थायमुदान्वितः ॥ ४७ ॥
अ तांननामह ॥ आज्ञप्तस्तुतयासार्द्धंदेवीवयस्ययार्जुनः ॥ ४८ ॥ गतोराधापतिस्थानंयत्सिद्धैरप्यगोचरम् ॥ ततश्चसउपा
दिष्टोगोलोकादुपरिस्थितम् ॥ ४९ ॥ स्थिरंवायुधृतंनित्यंसत्यंसर्वसुखास्पदम् ॥ नित्यंवृंदावनंनामनित्यरासमहोत्सवम् ॥ ५० ॥ अपश्यत्परमंगुह्यं
पूर्णप्रेमरसात्मकम् ॥ तस्याहिवचनादेवलोचनैर्वीक्ष्यतद्गृहः ॥ ५१ ॥ विवशःपतितस्तत्रविवृद्धप्रेमविह्वलः ॥ ततःकृच्छ्राल्लब्धसंज्ञोदोर्भ्यामुत्थापि
तस्तया ॥ ५२ ॥ सांत्वनावचनैस्तस्याःकथंचित्स्थैर्यमागतः ॥ ततस्तपःकिमन्यन्मेकर्त्तव्यंविद्यतेवद ॥ ५३ ॥ इतितद्दर्शनोत्कंठाभरेणतर
लोभवत् ॥ ततस्तयाकरेतस्यधृत्वातत्पददक्षिणे ॥ ५४ ॥ प्रतिपेदेसुदेशेनगत्वाचोक्तमिदंवचः ॥ स्नानायैतच्छुभंपार्थविशत्वंजलविस्तरम् ॥ ५५ ॥
सहस्रदलपद्मस्थसंस्थानंमध्यकोरकम् ॥ चतुःसरश्च[१]तुर्धारमाश्चर्यकुलसंकुलम् ॥ ५६ ॥ अस्यांतरेप्रविश्याथविशेषमिहपश्यसि ॥ एतस्यदक्षिणेदे
शएषचात्रसरोवरः ॥ ५७ ॥ मधुमाध्वीकपानंयन्नाम्नामलयनिर्झरः ॥ एतच्चफुल्लमुद्यानंवसंतेमदनोत्सवम् ॥ ५८ ॥ कुरुतेयत्रगोविंदोवसंतकुसु
मोचितम् ॥ यत्रावतारंकृष्णस्यस्तुवंत्येवदिवानिशम् ॥ ५९ ॥ भवेद्यत्स्मरणादेवमुनेःस्वांतेस्मरांकुरः ॥ ततोस्मिन्सरसिस्नात्वागत्वापूर्वसरस्त
टम् ॥ ६० ॥ उपस्पृश्यजलंतस्यसाधयस्वमनोरथम् ॥ ततस्तद्वचनंश्रुत्वातस्मिन्सरसितज्जले ॥ ६१ ॥ कल्हारकुमुदांभोजरक्तनीलोत्पलच्युतैः ॥
परागैरंजितेमंजुवासितेमधुबिंदुभिः ॥ ६२ ॥ तुंदिलेकलहंसादिनादैरांदोलितेततः ॥ रत्नाबद्धचतुस्तीरेमंदानिलतरंगिते ॥ ६३ ॥ मग्नेजलांतःपा
र्थेतुतत्रैवांतर्दधेथसा ॥ उत्थायपरितोवीक्ष्य[२]संभ्रांताचारुहासिनी ॥ ६४ ॥ सद्यःशुद्धस्वर्णरश्मिगौरकांततनूलताम् ॥ स्फुरत्किशोरवर्षीयांशारदेंदु
निभाननाम् ॥ ६५ ॥ [३]सुनीलकुटिलस्निग्धविलसद्रत्नकुंतलाम् ॥ सिंदूरबिंदुकिरणप्रोज्ज्वलालकपट्टिकाम् ॥ ६६ ॥ उन्मीलद्भ्रूलताभंगिजितस्मर
शरासनाम् ॥ घनश्यामलसल्लोलखेलल्लोचनखंजनाम् ॥६७॥ मणिकुंडलतेजोंशुविस्फुरद्गंडमण्डलाम् ॥ मृणालकोमलभ्राजदाश्चर्यभुजवल्लरीम् ॥ ६८ ॥
शरदंबुरुहांसर्वश्रीचौरपाणिपल्लवाम् ॥ विदग्धरचितस्वर्णकटिसूत्रकृतांतराम् ॥ ६९ ॥ कूजत्कांचीकलापांतविभ्राजज्जघनस्थलाम् ॥ भ्राजद्दुकूलसंवी
तनितंबोरुसुमंदिराम् ॥ ७० ॥ शिंजानमणिमंजीरसुचारुपदपंकजाम् ॥ स्फुरद्विविधकंदर्पकलाकौशलशालिनीम् ॥ ७१ ॥ सर्वलक्षणसंपन्नांसर्वाभर
णभूषिताम् ॥ आश्चर्यललनाश्रेष्ठामात्मानं[४]सव्यलोकयत् ॥७२॥ विसस्मारचयत्किंचित्पौर्वदेहिकमेवच ॥ माययागोपिकाप्राणनाथस्यतदनंतरम् ॥७३॥

---

[१] चतुर्द्वारम्–इ० पा० । [२] संभ्रांता चासहायिनीम्–इ० पा० । [३] सुनीलकुटिलस्निग्धविलसद्रत्नकुंडलाम्–इ० पा० । [४] च–इ० पा० ।

इतिकर्त्तव्यतामूढातस्थौतत्रसुविस्मिता ॥ अत्रांतरेंबरेधीरध्वनिराकस्मिकोभवत् ॥ ७४ ॥ अनेनैवयथासुभ्रुगच्छपूर्वसरोवरम् ॥ उपस्पृश्यजलंतस्यसाधयस्वमनोरथम् ॥ ७५ ॥ तत्रसंतिहिसख्यस्तेमासीद्वरवर्णिनि ॥ ताहिसंपादयिष्यंतितत्रैववरमीप्सितम् ॥ ७६ ॥ इतिदैवींगिरंश्रुत्वागत्वापूर्वसरोथसा ॥ नानापूर्वप्रवाहंचनानापक्षिसमाकुलम् ॥ ७७ ॥ स्फुरत्कैरवकह्लारकमलेंदीवरादिभिः ॥ भ्राजितंपद्मरागैश्चपद्मसोपानसत्तटम् ॥ ७८ ॥ विविधैःकुसुमोद्दामैर्मंजुकुंजलताद्रुमैः ॥ विराजितचतुस्तीरमुपस्पृश्यास्थिताक्षणम् ॥ ७९ ॥ तत्रांतरेक्वणत्कांचीमंजुमंजीररंजितम् ॥ किंकिणीनांझणत्कारंशुश्रावोत्कर्णसंपुटे ॥ ८० ॥ ततश्चप्रमदावृंदमाश्चर्ययुतयौवनम् ॥ आश्चर्यालंकृतिन्यासमाश्चर्याकृतिभाषितम् ॥ ८१ ॥ अद्भुतांगमपूर्वसापृथगाश्चर्यविभ्रमम् ॥ चित्रसंभाषणंचित्रहसितालोकनादिकम् ॥ ८२ ॥ मधुराद्भुतलावण्यंसर्वमाधुर्यसेवितम् ॥ चि[1]ह्लावण्यगतानंतमाश्चर्याकुलसुंदरम् ॥ ८३ ॥ आश्चर्यस्निग्धसौंदर्यमाश्चर्यानुग्रहादिकम् ॥ सर्वाश्चर्यसमुदयमाश्चर्यालोकनादिकम् ॥ ८४ ॥ दृष्ट्वातत्परमाश्चर्यंचिंतयंतीहृदाकियत् ॥ पादांगुष्ठेनालिखंतीभुवंनम्राननास्थिता ॥ ८५ ॥ ततस्तासांसंभ्रमोभूद्दृष्टीनांचपरस्परम् ॥ केयंमदीयजातीयाचिरे[2]णानस्तकौतुका ॥ ८६ ॥ इतिसर्वाःसमालोक्यज्ञातव्येयमितिक्षणम् ॥ आमंत्र्यमंत्रणाभिज्ञाःकौतुकाद्द्रष्टुमागताः ॥ ८७ ॥ आगत्यतासामेकाथनाम्नाप्रियमुदामता ॥ गिरामधुरयाप्रीत्यातामुवाचमनस्विनी ॥ ८८ ॥ ॥ प्रियमुदोवाच ॥ ॥ कासित्वंकस्यकन्यासिकस्यत्वंप्राणवल्लभा ॥ जाताकुत्रासिकेनास्मिन्नानीतावागतास्वयम् ॥ ८९ ॥ एतच्चसर्वमस्माकंकथ्यतांचिंतयाकिमु ॥ स्थानेस्मिन्परमानंदेकस्यापिदुःखमस्तिकिम् ॥ ९० ॥ इतिपृष्टातयासातुविनयावनतिंगता ॥ उवाचसुस्वरंतासांमोहयंतीमनांसिच ॥ ९१ ॥ ॥ अर्जुनउवाच ॥ ॥ कावास्मिकस्यकन्यावाप्रजाताकस्यवल्लभा ॥ आनीताकेनवाचात्रकिंवाथस्वयमागता ॥ ९२ ॥ एतत्किंचिन्नजानामिदेवीजानातुतत्पुनः ॥ कथितंश्रूयतांतन्मेमद्वाक्येप्रत्ययोयदि ॥ ९३ ॥ अस्यैवदक्षिणेपार्श्वेएकमस्तिसरोवरम् ॥ तत्राहंस्नातुमायाताजातातत्रैवसंस्थिता ॥९४॥ विषमोत्कंठितापश्चात्पश्यंतीपरितोदिशम् ॥ एकमाकाशसंभूतंध्वनिमश्रौषमद्भुतम् ॥ ९५ ॥ अनेनैवपथासुभ्रुगच्छपूर्वसरोवरम् ॥ उपस्पृश्यजलंतस्यसाधयस्वमनोरथम् ॥ ९६ ॥ तत्रसंतिहिसख्यस्तेमासीदवरवर्णिनि ॥ ताहिसंपादयिष्यंतितत्रतेवरमीप्सितम् ॥ ९७ ॥ इत्याकर्ण्यवचस्तस्यतस्मादत्रसमागता ॥ विषादहर्षपूर्णात्माचिंताकुलसमाकुला ॥ ९८ ॥ आ [illegible] नाविधशुभध्वनिम् ॥ अश्रौषंचततःपश्चादपश्यंभवतीःपराः ॥ ९९ ॥ एतन्मात्रंविजानामिकायेनमनसागिरा ॥ एतदे

---

[1] र्पं० ।
[2] चिरेणन्यस्तकौतुका-इ० पा० ।

॥ १०० ॥ कायूयंतनुजाःकेषांक्कजाताःकस्यवल्लभाः ॥ तच्छुत्वावचनंतस्याःसावैप्रियमुदाब्रवीत् ॥ १०१ ॥
स्यवचवयंशुभे ॥ वृंदावनकलानाथविहारदारिकाःसुखम् ॥ १०२ ॥ ताआत्ममुदितास्तेनव्रजबालाइहागताः ॥ एताः
श्रुतिगणाःख्याताएताश्चमुनयस्तथा ॥ १०३ ॥ वयंबल्लवबालाहिकथितास्तेस्वरूपतः ॥ अत्रराधापतेरंगात्पूर्वायाःप्रेयसीतमाः ॥ १०४ ॥
नित्यानित्यविहारिण्योनित्यकेलिभुवश्वराः ॥ एषापूर्णरसादेवीएषाचरसमंथरा ॥ १०५ ॥ एषारसालयानामएषाचरसवल्लरी ॥ रस
पीयूषधारेयमेषारसतरंगिणी ॥ १०६ ॥ रसकल्लोलिनीचैषाइयंचरसवापिका ॥ अनंगसेनाएषैवइयंचानंगमालिनी ॥ १०७ ॥ मदयंतीइयंबालाएषाच
रसविह्वला ॥ इयंचललितानामइयंललितयौवना ॥ १०८ ॥ अनंगकुसुमाचैषाइयंमदनमंजरी ॥ एषाकलावतीनामइयंरतिकलास्मृता ॥ १०९ ॥ इयं
कामकलानामइयंहिकामदायिनी ॥ रतिलोलाइयंबालाइयंबालारतोत्सुका ॥ ११० ॥ एषाचरतिसर्वस्वारतिचिंतामणिस्त्वसौ ॥ नित्यानंदाःकाश्चिदेता
नित्यप्रेमरसप्रदाः ॥ १११ ॥ अतःपरंश्रुतिगणास्तासांकाश्चिदिमाःशृणु ॥ उद्गीतैषासुगीतेयंकलगीतात्वियंप्रिया ॥ ११२ ॥ एषाकलसुराख्याताबालेयं
कलकंठिका ॥ विपंचीयंक्रमपदाएषाबहुहुतामता ॥ ११३ ॥ एषाबहुप्रयोगेयंख्याताबहुकलाबला ॥ इयंकलावतीख्यातामताचैषाक्रियावती ॥ ११४ ॥
अतःपरंमुनिगणास्तासांकतिपयाइह ॥ इयमुग्रतपानामएषाबहुगुणास्मृता ॥ ११५ ॥ एषाप्रियव्रतानामसुव्रताचइयंमता ॥ [1]सुरेखेयंमताबालासुपर्वे
यंबहुप्रदा ॥ ११६ ॥ रत्नरेखात्वियंख्यातामणिग्रीवात्वसौमता ॥ सुपर्णाचेयमाकल्पासुकल्पारत्नमालिका ॥ ११७ ॥ इयंसौदामिनीसुभ्रूरियंचकामदा
यिनी ॥ एषाचभोगदाख्याताइयंविश्वमतासती ॥ ११८ ॥ एषाचधारिणीधात्रीसुमेधाकांतिरप्यसौ ॥ अपर्णेयंसुपर्णैषामतैषाचसुलक्षणा ॥ ११९ ॥ सुदती
यंगुणवतीचैषासौकालिनीमता ॥ एषासुलोचनाख्याताइयंचसुमनाःस्मृता ॥ १२० ॥ अश्रुताचसुशीलाचरतिसुखप्रदायिनी ॥ अतःपरंगोपबालावयम
त्रागतास्तुयाः ॥ १२१ ॥ तासांचपरिचीयंतांकाश्चिदंबुरुहानने ॥ असौचंद्रावलीचैषाचंद्रिकेयंशुभामता ॥ १२२ ॥ एषाचंद्रावलीचंद्ररेखेयंचंद्रिकाप्य
सौ ॥ एषाख्याताचंद्रमालामताचंद्रालिकात्वियम् ॥ १२३ ॥ एषाचंद्रप्रभाचंद्रकलेयमबलास्मृता ॥ एषावर्णावलीवर्णमालेयं[2]मणिमालिका ॥ १२४ ॥
वर्णप्रभासमाख्यातासुप्रभेयंमणिप्रभा ॥ इयंहारावलीतारामालिनीयंशुभामता ॥ १२५ ॥ मालतीयामियंयूथीवासंतीनवमल्लिका ॥ मल्लीयंनवमल्लीयम
सौशेफालिकामता ॥ १२६ ॥ सौगंधिकेयंकस्तूरीपद्मिनीयंकुमुद्वती ॥ एषैवहिरसोल्लासाचित्रवृंदासमात्वियम् ॥ १२७ ॥ रंभेयमुर्वशीचैषासुरेखा

---

[1] सुरसेयम्–इ० पा० । [2] वनमालिका–इ० पा० ।

स्वर्णरेखिका ॥ एषाकांचनमालेयंसत्यसंततिकापरा ॥ १२८ ॥ एताःपरिकृताःसर्वाःपरिचेयाःपराअपि ॥ सहितास्माभिरेताभिर्विहरिष्यसिभामि
नि ॥ १२९ ॥ एहिपूर्वसरस्तीरेतत्रत्वांविधिवत्सखि ॥ स्नापयित्वाथदास्यामिमंत्रंसिद्धिप्रदायकम् ॥ १३० ॥ इतितांसहसानीत्वास्नापयित्वाविधा
नतः ॥ वृंदावनकलानाथप्रेयस्यामंत्रमुत्तमम् ॥ १३१ ॥ ग्राहयामाससंक्षेपाद्दीक्षाविधिपुरस्सरम् ॥ परंवरुणबीजस्यवह्निबीजपुरस्कृतम् ॥ १३२ ॥
चतुर्थस्वरसंयुक्तंनादबिंदुविभूषितम् ॥ पुटितंप्रणवाभ्यांचत्रैलोक्येचातिदुर्लभम् ॥ १३३ ॥ मंत्रग्रहणमात्रेणसिद्धिःसर्वाप्रजायते ॥ पुरश्चर्याविधिर्ध्यानं
होमसंख्याजपस्यच ॥ १३४ ॥ तप्तकांचनगौरांगींनानालंकारभूषिताम् ॥ आश्चर्यरूपलावण्यांसुप्रसन्नांवरप्रदाम् ॥ १३५ ॥ कल्हारैःकरवीराद्यैश्चंपकैः
सरसीरुहैः ॥ सुगंधकुसुमैरन्यैःसौगंधिकसमन्वितैः ॥ १३६ ॥ पाद्यार्घ्याचमनीयैश्चधूपदीपैर्मनोहरैः ॥ नैवेद्यैर्विविधैर्दिव्यैःसखीवृंदाहृतैर्मुदा ॥ १३७ ॥
संपूज्यविधिवद्देवींजप्त्वालक्षमनुंततः ॥ हुत्वाचविधिनास्तुत्वाप्रणम्यदंडवद्भुवि ॥ १३८ ॥ ततःसासंस्तुतादेवीनिमेषरहितांतरा ॥ परिकल्प्य
निजांछायां[1]माययात्मसमीहया ॥ १३९ ॥ पार्श्वेऽथप्रेयसींतत्रस्थापयित्वाबलादिव ॥ सखीभिरावृताहृष्टाशुद्धैःपूजाजपादिभिः ॥ १४० ॥
स्तवैर्भक्त्याप्रणामैश्चकृपयाविरभूत्तदा ॥ हेमचंपकवर्णाभाविचित्राभरणोज्ज्वला ॥ १४१ ॥ अंगप्रत्यंगलावण्यलालित्यमधुराकृतिः ॥ निष्कलंक
शरत्पूर्णकलानाथशुभानना ॥ १४२ ॥ स्निग्धमुग्धस्मितालोकजगत्त्रयमनोहरा ॥ निजयाप्रभयात्यंतंद्योतयंतीदिशोदश ॥ १४३ ॥ अब्रवीदथसा
देवीवरदाभक्तवत्सला ॥ ॥ देव्युवाच ॥ ॥ मत्सखीनांवचःसत्यंतेनत्वंमेप्रियासखी ॥ १४४ ॥ समुत्तिष्ठसमागच्छकामंतेसाधयाम्यहम् ॥ अर्जुनी
सावचोदेव्याःश्रुत्वाचात्ममनीषितम् ॥ १४५ ॥ [2]पुलकांकुरमुग्धांगीबाष्पाकुलविलोचना ॥ पपातचरणेदेव्याःपुनश्चप्रेमविह्वला ॥ १४६ ॥ ततःप्रियं
वदांदेवींसमुवाचसखीमिमाम् ॥ पाणौगृहीत्वामत्संगेसमाश्वास्यसमानय ॥ १४७ ॥ ततःप्रियंवदादेव्याआज्ञयाजातसंभ्रमा ॥ तांतथैवसमादायसंगेदे
व्याजगामह ॥ १४८ ॥ गत्वोत्तरसरस्तीरेस्नापयित्वाविधानतः ॥ संकल्पादिकपूर्वंतुपूजयित्वायथाविधि ॥ १४९ ॥ श्रीगोकुलकलानाथमंत्रंतच्च
सुसिद्धिदम् ॥ ग्राहयामासतांदेवीकृपयाहरिवल्लभा ॥ १५० ॥ व्रतंगोकुलनाथाख्यंपूर्वंमोहनभूषितम् ॥ सर्वसिद्धिप्रदंमंत्रंसर्वतंत्रेषुगोपितम् ॥ १५१ ॥
[3]गोविंदेरितविज्ञासौददौभक्तिमचंचलाम् ॥ ध्यानंचकथितंतस्यैमंत्रराजंचमोहनम् ॥ १५२ ॥ उक्तंचमोहनेतंत्रेस्मृतिरप्यस्यासिद्धिदा ॥ नीलोत्पलदल
[illegible] ॥ १५३ ॥ कोटिकंदर्पलावण्यंध्यायेद्रासरसाकुलम् ॥ प्रियंवदामुवाचेदंरहस्यंपावनेच्छया ॥ १५४ ॥ ॥ श्रीराधिकोवाच ॥

---

[2] पुलकाकुलमुग्धांगी--इ० पा० ।

[3] गोविंदगीताविज्ञासौ–इ० पा० ।

[illegible]ुत्तमम् ॥ तावद्विपालयैनांत्वंसावधानासहालिभिः ॥ १५५ ॥ इत्युक्त्वासाययौकृष्णपादांबुरुहसन्निधिम् ॥ छाया
भा[illegible]ानधायच ॥ १५६ ॥ तस्थौतत्रयथापूर्वंराधिकाकृष्णवल्लभा ॥ अत्रप्रियंवदादेशात्पद्ममष्टदलंशुभम् ॥ १५७ ॥ गो
रोचनाभिर्निर्मायकुंकुमेनापिचंदनैः ॥ एभिर्नानाविधैर्द्रव्यैःसंमिश्रैःसिद्धिदायकम् ॥ १५८ ॥ लिखित्वायंत्रराजंचशुद्धंमंत्रंतमद्भुतम् ॥ कृत्वान्यासा
दिकंपाद्यमर्घ्यंचापियथाविधि ॥ १५९ ॥ नानर्तुसंभवैःपुष्पैःकुंकुमैरपिचंदनैः ॥ धूपदीपैश्चनैवेद्यैस्तांबूलैर्मुखवासनैः ॥ १६० ॥ वासोलंकारमाल्यै
श्चसंपूज्यनंदनंदनम् ॥ परिवारैःसमंसर्वैःसायुधंचसवाहनम् ॥ १६१ ॥ स्तुत्वाप्रणम्यविधिवच्चेतसास्मरणंययौ ॥ ततोभक्तिवशोदेवोयशोदानंदनः
प्रभुः ॥ १६२ ॥ स्मितावलोकितापांगतरंगिततरेंगितम् ॥ उवाचराधिकांदेवींतामानयइहाशुच ॥ १६३ ॥ आज्ञप्ताचैवसादेवीप्रस्थाप्यशारदांसखीम् ॥
तामानिनायसहसापुरोवासुरसात्मनः ॥ १६४ ॥ श्रीकृष्णस्यपुरस्तात्सासमेत्यप्रेमविह्वला ॥ पपातकांचनींभूमौ[1]पश्यंतीसर्वमद्भुतम् ॥ १६५ ॥
कृच्छ्रात्कथंचिदुत्थायशनैरुन्मील्यलोचने ॥ स्वेदांभःपुलकोत्कंपभावभाराकुलासती ॥ १६६ ॥ ददर्शप्रथमंतत्रस्थलंचित्रंमनोरमम् ॥ ततःकल्प
तरुस्तत्रलसन्मरकतच्छदः ॥ १६७ ॥ प्रवालपल्लवैर्युक्तःकोमलोहेमदंडकः ॥ स्फटिकप्रवालमूलश्चकामदःकामसंपदाम् ॥ १६८ ॥ प्रार्थकाभीष्ट
फलदस्तस्याधो[2]रत्नमंदिरम् ॥ रत्नसिंहासनंतत्रतत्राष्टदलपद्मकम् ॥ १६९ ॥ शंखपद्मनिधीतत्रसव्यापसव्यसंस्थितौ ॥ चतुर्दिक्षुयथास्थानंसहिताःका
मधेनवः ॥ १७० ॥ परितोनंदनोद्यानंमलयानिलसेवितम् ॥ ऋतूनांचैवसर्वेषांकुसुमानांमनोहरैः ॥ १७१ ॥ आमोदैर्वासितंसर्वंकालागुरुपराजितम् ॥
मकरंदकणावृष्टिशीतलंसुमनोहरम् ॥ १७२ ॥ मकरंदरसास्वादमत्तानांभृंगयोषिताम् ॥ वृंदशोझंकृतैःशश्वच्चैवंमुखरितांतरम् ॥ १७३ ॥ कलकंठी
कपोतानांसारिकाशुकयोषिताम्॥अन्यासांपत्रिकांतानांकलनादैर्निनादितम्॥१७४॥नृत्यैर्मत्तमयूराणामाकुलंस्मरवर्द्धनम् ॥ रसांबुसेकसंसृष्टतमांजनत
नुद्युतिम् ॥ १७५ ॥ सुस्निग्धनीलकुटिलकषायावासिकुंतलम् ॥ मदमत्तमयूराद्यशिखंडाबद्धचूडकम् ॥ १७६ ॥ भृंगसेवितसव्योपक्रमपुष्पा
वतंसकम् ॥ लोलालकालिविलसत्कपोलादर्शकाशितम् ॥ १७७ ॥ विचित्रतिलकोद्दामभालशोभाविराजितम् ॥ तिलपुष्पपतंगेशचंचुमंजुलनासिक
म् ॥ १७८ ॥ चारुबिंबाधरंमंदस्मितदीपितमन्मथम् ॥ वन्यप्रसूनसंकाशग्रैवेयकमनोहरम् ॥ १७९ ॥ मदोन्मत्तभ्रमद्भृंगीसहस्रकृतसेवया ॥ सुर
द्रुमस्रजाराजन्मुग्धपीनांसकद्वयम् ॥ १८० ॥ मुक्ताहारस्फुरद्वक्षःस्थलकौस्तुभभूषितम् ॥ श्रीवत्सलक्षणंजानुलंबिबाहुमनोहरम् ॥ १८१ ॥ गंभीरनाभि

---

[1] भूत्वा--इ० पा० ।
[2] रतमंदिरम्--इ० पा० ।

पंचास्यमध्यमध्यातिसुंदरम् ॥ सुजातद्रुमसद्वृत्तामदूरजानुमंजुलम् ॥ १८२ ॥ कंकणांगदमञ्जीरैर्भूषितंभूषणैःपरैः ॥ पीतां[1]शुकलयाविष्टनितंबघट
नायकम् ॥ १८३ ॥ लावण्यैरपिसौंदर्यजितकोटिमनोभवम् ॥ वेणुप्रवर्त्तितैर्गीतरागैरपिमनोहरैः ॥ १८४ ॥ मोहयंतंसुखांभोधौमज्जयंतंजगत्रय
म् ॥ प्रत्यंगमदनावेशधरंरासरसालसम् ॥ १८५ ॥ चामरंव्यजनंमाल्यंगंधंचंदनमेवच ॥ तांबूलंदर्पणंपानपात्रंचर्वितपात्रकम् ॥ १८६ ॥ अन्यत्क्रीडाभ
वंयद्यत्तत्सर्वंचपृथकपृथक् ॥ रसालंविविधंयंत्रंकलयंतीभिरादरात् ॥ १८७ ॥ यथास्थाननियुक्ताभिःपश्यंतीभिस्तदिंगितम् ॥ तन्मुखांभोजदत्ता
क्षिचंचलाभिरनुक्रमात् ॥ १८८ ॥ श्रीमत्याराधिकादेव्यावामभागेससंभ्रमम् ॥ आराधयंत्यातांबूलमर्पयंत्याशुचिस्मितम् ॥ १८९ ॥ समालोक्या
र्जुनीयासौमदनावेशविह्वला ॥ ततस्तांचतथाज्ञात्वाहृषीकेशोपिसर्ववित् ॥ १९० ॥ तस्याःपाणिंगृहीत्वैवसर्वक्रीडावनांतरे ॥ यथाकामंरहोरेमेमहा
योगेश्वरोविभुः ॥ १९१ ॥ ततस्तस्याःस्कंधदेशेप्रदत्तभुजपल्लवः ॥ आगत्यशारदांप्राहपश्चिमेस्मिन्सरोवरे ॥ १९२ ॥ शीघ्रंस्नापयतन्वंगींक्रीडाश्रां
तांमृदुस्मिताम् ॥ ततस्तांशारदादेवीतस्मिन्क्रीडासरोवरे ॥ १९३ ॥ स्नानंकुर्वित्युवाचैनांसाचश्रांतातथाकरोत् ॥ जलाभ्यंतरमातासौपुनरर्जुन
तांगतः ॥ १९४ ॥ उत्तस्थौयत्रदेवेशःश्रीमद्वैकुंठनायकः ॥ दृष्ट्वातमर्जुनंकृष्णोविषण्णंभग्नमानसम् ॥ १९५ ॥ माययापाणिनास्पृष्ट्वाप्रकृतंविदधेपुनः ॥
श्रीकृष्णउवाच ॥ ॥ धनंजयत्वं[2]माशंसेभवान्प्रियसखोमम ॥ १९६ ॥ त्वत्समोनास्तिमेकोपिरहोवेत्ताजगत्रये ॥ यद्रहस्यंत्वयादृ[3]ष्टमनुभूतंचतत्पु
नः ॥ १९७ ॥ कथ्यतेयदितत्कस्मैशपसेमांतदार्जुन ॥ सनत्कुमारउवाच ॥ ॥ इतिप्रसादमासाद्यशपथैर्जातनिर्णयः ॥ १९८ ॥ ययौहृष्टमनास्त
स्मात्स्वधामाद्भुतसंस्मृतिः ॥ इतितेकथितंसर्वंरहोयद्गोचरंमम ॥ १९९ ॥ गोविंदस्यतथाचास्मैकथनेशपथस्तव ॥ ॥ ईश्वरउवाच ॥ ॥ इतिश्रुत्वावच
स्तस्यासिद्धिमौपगविर्गतः ॥ २०० ॥ नरनारायणावासेवृंदारण्यमुपाव्रजत् ॥ तत्रास्तेद्यापिकृष्णस्यानित्यलीलाविहारवित् ॥ २०१ ॥ नारदेनापिपृ
ष्टोऽहंनाब्रवंतद्रहस्यकम् ॥ प्राप्तंतथापितेनेदंप्रकृतित्वमुपेत्यच ॥ २०२ ॥ तुभ्यंयत्तुमयाप्रोक्तंरहस्यंस्नेहकारणात् ॥ तन्नकस्मैचिदाख्येयंत्वयाभद्रे
स्वयोनिवत् ॥ २०३ ॥ इमंश्रीभगवद्भक्तमहिमाध्यायमद्भुतम् ॥ यःपठेच्छृणुयाद्वापिसरतिंविंदतेहरौ ॥ २०४ ॥ इति श्रीपद्मपुराणेपातालखंडेअर्जु
न्यनुनयोननामषष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥ ॥ पार्वत्युवाच ॥ ॥ वृंदावनरहस्यंचबहुधाकथितंविभो ॥ केनपुण्यविशेषेणनारदःप्रकृतिंग
तः ॥ [illegible]वाच ॥ ॥ एकदाश्चर्यवृत्तांतंमयाजिज्ञासितंपुरा ॥ ब्रह्मणाकथितंगुह्यंश्रुतंकृष्णमुखांबुजात् ॥ २ ॥ नारदःपृष्टवान्मह्यंतदा

---

[1] नायकम्–इ० पा० । [2] त्वं माशंकीः–इ० पा० । [3] दृष्टम्–इ० पा० ।

हंप्राप्तवानिदम् ॥ अहंवक्तुंनशक्नोमितन्माहात्म्यंकथंचन ॥ ३ ॥ किंकुर्वेशपनंतस्यस्मृत्वासीदामिमानसे ॥ इतिश्रुत्वाममवचोदुर्मनाःसोऽभव
द्यदा ॥ ४ ॥ तदाब्रह्माणमाहूयअहमादिष्टवान्प्रिये ॥ त्वयायत्कथितंमह्यंनारदायवदस्वतत् ॥ ५ ॥ ब्रह्मातदाममवचोनिशम्यसहनारदः ॥ जगाम
कृष्णसविधंनत्वापृच्छत्तदेवतु ॥ ६ ॥ ॥ ब्रह्मोवाच ॥ ॥ किमिदंद्वात्रिंशद्वनंवृंदारण्यंविशांपते ॥ श्रोतुमिच्छामिभगवन्यदियोग्योऽस्मिमेवद ॥ ७ ॥
श्रीभगवानुवाच ॥ ॥ इदंवृंदावनंरम्यंममधामैवकेवलम् ॥ यत्रेमेपशवःसाक्षाद्वृक्षाःकीटानरामराः ॥ ८ ॥ येवसंतिममांत्येतेमृतायांतिममांतिकम् ॥
अत्रयागोपपत्न्यश्चनिवसंतिममालये ॥ ९ ॥ योगिन्यस्तास्तुएवंहिममदेवाःपरायणाः ॥ पंचयोजनमेवंहिवनंमेदेवरूपकम् ॥ १० ॥ कालिंदीयंसुषुम्ना
ख्यापरमामृतवाहिनी ॥ यत्रदेवाश्चभूतानिवर्त्ततेसूक्ष्मरूपतः ॥ ११ ॥ सर्वतोव्यापकश्चाहंनत्यक्ष्यामिवनंक्वचित् ॥ आविर्भावस्तिरोभावोभवेदत्रयुगे
युगे ॥ १२ ॥ तेजोमयमिदंस्थानमदृश्यंचर्मचक्षुषाम् ॥ रहस्यंमेप्रभावंचपश्यवृंदावनंयुगे ॥ १३ ॥ ब्रह्मादीनांदेवतानांनदृश्यंतत्कथंचन ॥ ॥ ईश्वर
उवाच ॥ ॥ तच्छ्रुत्वानारदोनत्वाकृष्णंब्रह्माणमेवच ॥ १४ ॥ आजगामहभूर्लोकेमिश्रकंनैमिषंवनम् ॥ तत्रासौसत्कृतश्चापिशौनकाद्यैर्मुनीश्व
रैः ॥ १५ ॥ पृष्टश्चाप्यागतोब्रह्मन्कुतस्त्वमधुनावद ॥ तच्छ्रुत्वानारदःप्राहगोलोकादागतोस्म्यहम् ॥ १६ ॥ श्रुत्वाकृष्णमुखांभोजा
द्वृंदावनरहस्यकम् ॥ ॥ नारदउवाच ॥ ॥ तत्रनानाविधाःप्रश्नाःकृताश्चैवपुनःपुनः ॥ १७ ॥ समस्तामनवस्तत्रयोगाश्चैवमयाश्रुताः ॥
तानेवकथयिष्यामियथाप्रश्नंचतत्वतः ॥ १८ ॥ ॥ शौनकादयऊचुः ॥ ॥ वृंदारण्यरहस्यंहियदुक्तंब्रह्मणात्वयि ॥ तदस्माकंसमाचक्ष्वयद्य
स्मासुकृपातव ॥ १९ ॥ ॥ नारदउवाच ॥ ॥ कदाचित्सरयूतीरेदृष्टोस्माभिश्चगौतमः ॥ मनस्वीचमहादुःखीचिंताकुलितचेत
नः ॥ २० ॥ मांदृष्ट्वागौतमोदेवःपपातधरणीतले ॥ उत्तिष्ठवत्सवत्सेतितमुवाचाहमेवहि ॥ २१ ॥ कथंभवान्मनस्वीतिप्रोच्यतांय
दिरोचते ॥ ॥ गौतमउवाच ॥ ॥ श्रुतंतवमुखादेवकृष्णतत्वंचतादृशम् ॥ २२ ॥ द्वारकाख्यंमाथुराख्यंरहस्यंबहुशोमया ॥ वृंदावनरहस्यंतुनश्रु
तंत्वन्मुखांबुजात् ॥ २३ ॥ यतोमेमनसःस्थैर्य्यंभविष्यतिचसद्गुरो ॥ ॥ नारदउवाच ॥ ॥ इदंतुपरमंगुह्यंरहस्यातिरहस्यकम् ॥ २४ ॥ पुरामेब्रह्म
णाप्रोक्तंतादृग्वृंदावनोद्भवम् ॥ रहस्यंवददेवेशवृंदारण्यस्यमेपितः ॥ २५ ॥ इतिजिज्ञासितंश्रुत्वाक्षणंमौनीसचाभवत् ॥ ततोमाहमहाविष्णुंगच्छव
[illegible]पितत्रगंतव्यंत्वयासहनसंशयः ॥ इत्युक्त्वामांगृहीत्वाचगतोविष्णोश्चधामनि ॥ २७ ॥ महाविष्णौचकथितंमयोक्तंयत्तदेव

पंचास्यमध्यमध्यातिसुंदरम् भुवमथादिशत् ॥ २८ ॥ त्वमेवादेशतोमह्यंनीत्वावैनारदंमुनिम् ॥ स्नानायविनियुंक्ष्वामुंसरस्यमृतसंज्ञके ॥ २९ ॥
न्नायकम् ॥ १८३ ॥ मींतथाकरोत् ॥ तत्रामृतसरश्चाहंप्रविश्यस्नानमाचरम् ॥ ३० ॥ तत्क्षणात्तत्सरःपारेयोषितांसविधेऽभवम् ॥ सर्वलक्षणस
पन्नायोषिद्रूपातावास्मता ॥ ३१ ॥ मांदृष्ट्वाताःसमायांतीमपृच्छंश्चमुहुर्मुहुः ॥ ॥ स्त्रियऊचुः ॥ ॥ कात्वंकुतःसमायाताकथमात्माविचेष्टितम् ॥ ३२ ॥
तासांप्रियकथांश्रुत्वामयोक्तंतन्निशामय ॥ कुतःकोहंसमायातःकथंवायोषिदाकृतिः ॥ ३३ ॥ स्वप्नवद्दृश्यतेसर्वंकिंवामुग्धोऽस्मिभूतले ॥ तच्छ्रुत्वा
मद्वचोदेवीप्रोवाचमधुरस्वनैः ॥ ३४ ॥ वृंदानाम्नीपुरीचेयंकृष्णचंद्रप्रियासदा ॥ अहंचललितादेवीतुर्यातीताचनिष्कला ॥ ३५ ॥ इत्युक्त्वाचमहादेवी
करुणासांद्रमानसा ॥ मांप्रत्याहपुनर्देवीसमागच्छमयासह ॥ ३६ ॥ अन्याश्चयोषितःसर्वाःकृष्णपादपरायणाः ॥ ताश्चमांप्रवदंत्येवंसमागच्छानया
सह ॥ ३७ ॥ ततोनुकृष्णचंद्रस्यचतुर्दशाक्षरोमनुः ॥ कृपयाकथितस्तस्यादेव्याश्चापिमहात्मनः ॥ ३८ ॥ तत्क्षणादेवतत्साम्यमलभंविविधोपमा[1] ॥
ताभिःसहगतास्तत्रयत्रकृष्णःसनातनः ॥ ३९ ॥ केवलंसच्चिदानंदःस्वयंयोषिन्मयःप्रभुः ॥ योषिदानंदहृदयोदृष्ट्वामांप्राब्रवीन्मुहुः ॥ ४० ॥ समागच्छप्रिये
कांतेभक्त्यामांपरिरंभय ॥ रेमेवर्षप्रमाणेनतत्रैवद्विजोत्तम ॥ ४१ ॥ तदोक्तंरमणेशेनतांदेवींराधिकांप्रति ॥ इयंमेप्रकृतिस्तत्रचासीन्नारदरूपधृक् ॥४२॥
नीत्वामृतसरोरम्यंस्नानार्थंसंनियोजय ॥ तयामेरमणस्यांतेगदितंप्रियभाषितम् ॥ ४३ ॥ अहंचललितादेवीराधिकायाचगीयते ॥ अहंचवासुदेवा
ख्योनित्यंकामकलात्मकः ॥ ४४ ॥ सत्यंयोषित्स्वरूपोहंयोषिच्चाहंसनातनी ॥ अहंचललितादेवीपुंरूपाकृष्णविग्रहा ॥ ४५ ॥ आवयोरंतरंनास्ति
सत्यंसत्यंहिनारद ॥ एवंयोवेत्तिमेतत्त्वंसमयंचतथामनुम् ॥ ४६ ॥ ससमाचारसंकेतंललितावत्समेप्रियः ॥ इदंवृंदावनंनामरहस्यंममवैगृहम् ॥ ४७ ॥
नप्रकाश्यंकदाकुत्रवक्तव्यंनपशौक्वचित् ॥ ततोनुराधिकादेवीमांनीत्वातत्सरोवरे ॥ ४८ ॥ स्थित्वासाकृष्णचंद्रस्यचरणांतेगतापुनः ॥ ततोनिमज्जना
देवनारदोहमुपागतः ॥ ४९ ॥ वीणाहस्तोगानपरस्तद्रहस्यंमुहुर्मुदा ॥ स्वयंभुवंनमस्कृत्यतत्रागांविष्णुपार्षदम् ॥ ५० ॥ स्वयंभुवातथादृष्टंनोक्तंकिं
चित्तदापुनः ॥ इतितेकथितंवत्ससुगोप्यंचमयात्वयि ॥५१॥ त्वयापिकृष्णचंद्रस्यकेवलंधामचित्कलम् ॥ गोपनीयंप्रयत्नेनमातुर्जारइवाप्रियम् ॥५२॥
यथाप्रोक्तंमयाशिष्येगौतमेसरहस्यकम् ॥ तथाभवत्सुकात्स्यैनंकथितंचातिगोपितम् ॥ ५३ ॥ यत्रकुत्रकदाचित्तुप्रकाश्यंमुनिपुंगवाः ॥ तदाशापोभवे
द्विप्राःकृष्णचंद्रस्यनिश्चितम् ॥ ५४ ॥ इमंकृष्णस्यलीलाभियुतमध्यायमुत्तमम् ॥ यःपठेच्छृणुयाद्वापिसयातिपरमंपदम् ॥ ५५ ॥ इति श्रीपद्म
पुराणेपातालखंडेवृंदावनमाहात्म्येनारदीयानुनयेसप्तमोऽध्यायः ॥ ७ ॥ ॥ ईश्वरउवाच ॥ ॥ अत्रशिशुपालंनिहतंश्रुत्वादंतवक्रःकृष्णेनयोद्धुं

---

[1] विबुधोपमा—इ० पा० ।

मथुरामाजगाम ॥ १ ॥ कृष्णस्तुतच्छ्रुत्वारथमारुह्यतेनसहमथुरामाययौ ॥ २ ॥ अथतंहत्वायमुनामुत्तीर्यनंदव्रजंगत्वापितरावभिवाद्याश्वास्यताभ्यामा
लिंगितः सकलगोपवृद्धान्परिष्वज्यतानाश्वास्यबहुवस्त्राभरणादिभिस्तत्रस्थान्सर्वान्संतर्पयामास ॥३ ॥ कालिंद्याःपुलिनेरम्येपुण्यवृक्षसमाकीर्णेगोपस्त्री
भिरहर्निशंक्रीडासुखेनत्रिरात्रंतत्रसमुवास ॥ ४ ॥ तत्रस्थलेनंदगोपादयःसर्वेजनाःपुत्रदारसहिताःपशुपक्षिमृगादयोपिवासुदेवप्रसादेनदिव्यरूपधराविमान
समारूढाःपरमंलोकंवैकुंठमवापुः ॥ ५ ॥ श्रीकृष्णस्तुनंदगोपव्रजौकसांसर्वेषांनिरामयंस्वपदंदत्वादेवगणैःस्तूयमानःश्रीमतींद्वारावतींविवेश ॥ ६ ॥
तत्रवसुदेवोग्रसेनसंकर्षणप्रद्युम्नानिरुद्धाक्रूरादिभिः प्रत्यहंसंपूजितःषोडशसहस्राष्टाधिकमहिषीभिश्चविश्वरूपधरोदिव्यरत्नमयलतागृहांतरेषुसुरतरुकुसुमा
चितश्लक्ष्णतरपर्यंकेषुरमयामास ॥ ७ ॥ एवंहितार्थायसर्वदेवानांसमस्तभू[1]भारविनाशाययदुवंशेवतीर्यसकलराक्षसविनाशंकृत्वामहांतमुर्वीभारंनाशं
यित्वानंदव्रजद्वारिकावासिनःस्थावरजंगमान्भवबंधनान्मोचयित्वापरमेशाश्वतेयोगिध्येयेरम्येधाम्निसंस्थाप्यनित्यंदिव्यमहिष्यादिभिःसंसेव्यमानोवासुदे
वोऽखिलेषूवात्र ॥ ८ ॥ असीद्व्याकृतंब्रह्मकरकाघृतयोरिव ॥ प्रकृतिस्थोगुणान्मुक्तोद्रवीभूत्वादिवंगतः ॥ ९ ॥ ॥ इति श्रीपद्मपुराणेपातालखंडेवृं
दावनमहात्म्येपार्वतीशिवसंवादेषट्सप्ततितमोऽध्यायः ॥ ७६ ॥ छ ॥ ॥ पार्वत्युवाच ॥ ॥ विस्तरेणसमाचक्ष्वनामा[2]र्थपदगौरवम् ॥ ईश्वरस्यस्वरू
पंचतत्स्थानानांविभूतयः ॥ १ ॥ तद्विष्णोःपरमंधामव्यूहभेदास्तथाहरेः ॥ निर्वाणाख्याहितत्वेनममसर्वसुरेश्वर ॥ २ ॥ ईश्वरउवाच ॥ सारेवृंदावनेकृ
ष्णंगोपीकोटिभिरावृतम् ॥ तत्रगंगापराशक्तिस्त[3]त्स्थमानंदकाननम् ॥ ३ ॥ नानासुकुसुमामोदसमीरसुरभीकृतम् ॥ कलिंदतनयादिव्यतरंगरागशीत
लम् ॥ ४ ॥ सनकाद्यैर्भागवतैःसंसृष्टंमुनिपुंगवैः ॥ आह्लादिमधुरारावैर्गोवृंदैराभिमंडितम् ॥ ५ ॥ रम्यस्रग्भूषणोपेतैर्नृत्यद्भिर्बालकैर्वृतम् ॥ तत्रश्रीमान्क
ल्पतरुर्जांबूनदपरिच्छदः ॥ ६ ॥ नानारत्नप्रवालाढ्योनानामणिफलोज्ज्वलः ॥ तस्यमूलेरत्नवेदीरत्नदीधितिदीपिता ॥ ७ ॥ तत्रत्रयीमयंरत्नसिंहासनमनुत्त
मम् ॥ तत्रासीनंजगन्नाथंत्रिगुणातीतमव्ययम् ॥ ८ ॥ कोटिचंद्रप्रतीकाशंकोटिभास्करभास्वरम् ॥ कोटिकंदर्पलावण्यंभासयन्तंदिशोदश ॥ ९ ॥
त्रिनेत्रंद्विभुजंगौरंतप्तजांबूनदप्रभम् ॥ श्लिष्यमाणमंगनाभिःसदामानंचसर्वशः ॥ १० ॥ ब्रह्माद्यैःसनकाद्यैश्चध्येयंभक्तवशीकृतम् ॥ सदाघूर्णितनेत्राभिर्नृ
त्यंतीभिर्महोत्सवैः ॥ ११ ॥ चुंबंतीभिर्हसंतीभिःश्लिष्यंतीभिर्मुहुर्मुहुः ॥ अवाप्तगोपीदेहाभिःश्रुतिभिःकोटिकोटिभिः ॥ १२ ॥ तत्पादांबुजमाध्वीकचि
त[illegible]ांतुमध्येयादेवीतप्तचामीकरप्रभा ॥ १३ ॥ द्योतमानादिशःसर्वाःकुर्वतीविद्युदुज्ज्वलाः ॥ प्रधानंयाभगवतीययासर्वमिदंतत

[illegible]ंत्रार्थपदगौरवम्–इ० पा० । ३ एकमानंदकाननम्–इ० पा० ।

पंचास्यमध्यमध्यातिसुंदरम् ॥ याविद्याविद्यात्रयीपरा ॥ स्वरूपाशक्तिरूपाचमायारूपाचचिन्मयी ॥ १५ ॥ ब्रह्मविष्णुशिवादीनांदेहकारणकार
कम् ॥ १८३ ॥ मायापरिरंभितम् ॥ १६ ॥ वृंदावनेश्वरीनाम्नाराधाधात्रानुकारणात् ॥ तामालिंग्यवसंतंतंमुदावृंदावनेश्वरम् ॥ १७ ॥ अन्यो
न्यचुंबनसुषमदावेशावघूर्णितम् ॥ [1]ध्यायेदेवंकृष्णदेवंसचसिद्धिमवाप्नुयात् ॥ १८ ॥ मंत्रराजमिमंगुह्यंतस्यमंत्रंचमंत्रवित् ॥ योजपेच्छृणुयाद्वापिसमहा
त्मासुदुर्ल्लभः ॥ १९ ॥ राधिका[2]चित्ररेखाचचंद्रामदनसुंदरी ॥ श्रीप्रियाश्रीमधुमतीशशिरेखाहरिप्रिया ॥ २० ॥ सुवर्णशोभासंमोहाप्रेमरोमांचराजिता ॥
वैवर्ण्यस्वेदसंयुक्ताभावासक्ताप्रियंवदा ॥ २१ ॥ सुवर्णमालिनीशांता[3]सुरासरसिकातथा ॥ सर्वस्त्रीजीवनादीनवत्सलाविमलाशया ॥ २२ ॥ निपीतनामपी
यूषासाराधापरिकीर्तिता ॥ सुदीर्घस्मितसंयुक्तातप्तचामीकरप्रभा ॥ २३ ॥ मूर्च्छंत्प्रेमनदीराधावरणालोचनांजना ॥ मायामात्सर्यसंयुक्तादानसाम्राज्य
जीवना ॥२४॥ सुरतोत्सवसंग्रामाचित्ररेखाप्रकीर्तिता ॥ गौरांगीनातिदीर्घाचसदावादनतत्परा ॥२५॥ दैन्यानुरागनटनामूर्च्छारोमांचविह्वला ॥ हरिदक्षि
णपार्श्वस्थासर्वमंत्रप्रियातथा ॥२६॥ अनंगलोभमाधुर्याचंद्रासापरिकीर्तिता ॥ सलीलमंथरगतिर्मंजुमुद्रितलोचना ॥२७॥ प्रेमधारोज्ज्वलाकीर्णादलितांज
नशोभना ॥ कृष्णानुरागरसिकारासध्वनिसमुत्सुका ॥२८॥ अहंकारसमायुक्तामुखनिंदितचंद्रमाः ॥ मधुरालापचतुराजितेंद्रियशिरोमणिः ॥२९॥ सुंदरस्मि
तसंयुक्तासावैमदनसुंदरी ॥ विविक्तरासरसिकाश्यामाश्याममनोहरा ॥३०॥ प्रेम्णाप्रेमकटाक्षेणहरेश्चित्तविमोहनी ॥ जितेंद्रियाजितक्रोधासाप्रियापरिकी
र्तिता ॥३१॥ सुतप्तस्वर्णगौरांगीलीलागमनसुंदरी ॥ स्मरोत्थप्रेमरोमांचवैचित्र्यमधुराकृतिः ॥३२॥ सुंदरस्मितसंयुक्तमुखनिंदितचंद्रमाः ॥ मधुरालापच
तुराजितेंद्रियशिरोमणिः ॥३३॥ कीर्तितासामधुमतीप्रेम[4]साधनतत्परा ॥ संमोहज्वररोमांचप्रेमधारासमन्विता ॥३४॥ दानधूलिविनोदाचरासध्वनिमहान
टी ॥ शशिरेखाचविज्ञेयागोपालप्रेयसीसदा ॥३५॥ कृष्णात्मासोत्तमाश्यामामधुपिंगललोचना ॥ तत्पादप्रेमसंमोहात्क्वचित्पुलकचुंबिता ॥३६॥ शिवकुं
डेशिवानंदानंदिनी[5]देहिकातटे ॥ रुक्मिणीद्वारवत्यांतुराधावृंदावनेवने ॥ ३७ ॥ देवकीमथुरायांतुजातामेपरमेश्वरी ॥ [6]चंद्रकूटेतथासीताविंध्येविंध्यनि
वासिनी ॥ ३८ ॥ वाराणस्यांविशालाक्षीविमलापुरुषोत्तमे ॥ वृंदावनाधिपत्यंचदत्तंतस्यैप्रसीदता ॥३९॥ कृष्णेनान्यत्रदेवीतुराधावृंदावनेवने ॥ नित्या
नंदतनुःशौरिर्योऽशरीरीतिभाष्यते ॥ ४० ॥ वाय्वग्निनाकभूमीनामंगाधिष्ठितदेवता ॥ निरूप्यतेब्रह्मणोपितथागोविंदविग्रहः ॥ ४१ ॥ सेंद्रियोपियथा
सूर्यस्तेजसानोपलक्ष्यते ॥ तथाकांतियुतःकृष्णःकालंमोहयतिध्रुवम् ॥ ४२ ॥ नतस्यप्राकृतीमूर्तिर्मे[7]दोमांसास्थिसंभवा ॥ योगीचैवेश्वरश्चान्यःसर्वा

---

[1] ध्यायेदेताद्विधं देवम्–इ०पा० । [2] चंद्ररेखा च–इ०पा० । [3] सरसा रसिका तथा–इ०पा० । [4] प्रेमरोदनतत्परा–इ०पा० । [5] देविकातटे–इ०पा० । [6] चित्रकूटे–इ०पा० । [7] प्रभुर्मता–इ० पा० ।

[illegible] काठिन्यंदैवयोगेनकरकाघृतयोरिव ॥ कृष्णस्यामिततत्वस्यपादपृष्ठंनदेवता ॥ ४४ ॥ वृंदावनरजोवृंदेतत्रस्युर्विष्णुको
टयः ॥ आ[illegible]गवृंदव्याप्तविश्वकलानिधिः ॥ ४५ ॥ गुणात्मतात्मनियथाजीवास्तत्किरणांगकाः ॥ भुजद्वयवृतःकृष्णोनकदाचिच्चतुर्भुजः ॥ ४६ ॥
गोप्यैकयावृतस्तत्रपरिक्रीडतिसर्वदा ॥ गोविंदएवपुरुषोब्रह्माद्याःस्त्रियएवच ॥ ४७ ॥ ततएवस्वभावोयंप्रकृतेर्भावईश्वरः ॥ पुरुषःप्रकृतिश्चाद्यौराधा
वृंदावनेश्वरौ ॥ ४८ ॥ प्रकृतेर्विकृतंसर्वंविनावृंदावनेश्वरम् ॥ ४९ ॥ समुद्भवेनैवसमुद्भवेदिदंभेदंगतंतस्य[1]विनाशतोहि ॥ स्वर्णस्यनाशोनहिविद्यतेतथा
मत्स्यादिनाशेपिनकृष्णविच्युतिः ॥ ५० ॥ त्रिगुणादिप्रपंचोयंवृंदावनविहारिणः ॥ ऊर्म्मीवाब्धेस्तरंगस्ययथाब्धिनैवजायते ॥ ५१ ॥ नराधिकासमा
नारीनकृष्णसदृशःपुमान् ॥ वयःपरंनकैशोरात्स्वभावःप्रकृतेःपरः ॥ ५२ ॥ ध्येयंकैशोरकंध्येयंवनंवृंदावनंवनम् ॥ श्याममेवपरंरूपमादिदेवंपरोरसः
॥ ५३ ॥ बाल्यंपंचमवर्षांतंपौगंडंदशमावधि ॥ अष्टपंचककैशोरंसीमापंचदशावधि ॥ ५४ ॥ यौवनोद्भिन्नकैशोरंनवयौवनमुच्यते ॥ तद्वयस्तस्य
सर्वस्वंप्रपंचमितरद्वयः ॥ ५५ ॥ बाल्यपौगंडकैशोरंवयोवंदेमनोहरम् ॥ बालगोपालगोपालंस्मरगोपालरूपिणम् ॥ ५६ ॥ वंदेमदनगोपालंकैशोराकारम
द्भुतम् ॥ यमाहुर्यौवनोद्भिन्नश्रीमन्मदनमोहनम् ॥ ५७ ॥ अखंडातुलपीयूषरसानंदमहार्णवम् ॥ जयतिश्रीपतिर्गूढंवपुःकैशोररूपिणः ॥ ५८ ॥ एक
मप्यव्ययंपूर्वंबल्लवीवृंदमध्यगम् ॥ ध्यानगम्यंप्रपश्यंतिरुचिभेदात्पृथग्धियः ॥ ५९ ॥ यन्नखेंदुरुचिर्ब्रह्मध्येयंब्रह्मादिभिःसुरैः ॥ गुणत्रयमतीतंतंवंदे
वृंदावनेश्वरम् ॥६०॥ वृंदावनपरित्यागोगोविंदस्यनविद्यते ॥ अन्यत्रयद्वपुस्तत्तुकृत्रिमंतन्नसंशयः॥६१॥सुलभंव्रजनारीणांदुर्ल्लभंतन्मुमुक्षुणाम् ॥ तंभजेनं
दसूनुंयन्नखतेजःपरंमनुः॥६२॥ ॥पार्वत्युवाच॥भुक्तिमुक्तिस्पृहायावत्पिशाचीहृदिवर्त्तते॥तावत्प्रेमसुखस्यात्रकथमभ्युदयोभवेत्॥६३॥ ॥ईश्वरउवाच॥
॥ साधुपृष्टंत्वयाभद्रेयन्मेमनसिवर्त्तते ॥ तत्सर्वंकथयिष्यामिसावधानानिशामय ॥६४॥ स्मृत्वागुणान्स्मरन्नामगानंवामनरंजनम् ॥ बोधयत्यात्मनात्मानं
सततंप्रेम्णिलीयते ॥६५॥ ॥ इति श्रीपद्मपुराणेपातालखंडेवृंदावनमाहात्म्येपार्वतीशिवसंवादेश्रीकृष्णरूपवर्णनंनामअष्टमोऽध्यायः ॥ ८ ॥ छ ॥
॥ पार्वत्युवाच ॥ ॥ वैष्णवानांचयद्धर्मंसर्वंतथ्यंचमेवद ॥ यत्कृत्वामानवाःसर्वेंभवांभोधितरंतिहि ॥१॥ ॥ ईश्वरउवाच ॥ ॥ अथद्वादशधाशुद्धिर्वैष्णवाना
मिहोच्यते ॥ गृहोपलेपनंचैवतथानुगमनंहरेः ॥ २ ॥ भक्त्याप्रदक्षिणाचैवपादयोःशोधनंपुनः ॥ पूजार्थंपत्रपुष्पाणां[1]भक्त्यैवोत्तोलनंहरेः ॥ ३ ॥ करयोः
सर्वशुद्धीनामियंशुद्धिर्विशिष्यते ॥ तन्नामकीर्तनंचैवगुणानामपिकीर्त्तनम् ॥ ४ ॥ भक्त्याश्रीकृष्णदेवस्यवचसःशुद्धिरिष्यते ॥ तत्कथाश्रवणंचैवत

---

१ विनाशनेहि–इ०, विनाशनं हि–इ० च पा० । १ भक्त्यैवोच्चयनं हरेः–इ० पा० ।

स्योत्सवनिरीक्षणम् ॥ ५ ॥ श्रोत्रयोर्नेत्रयोश्चैवशुद्धिःसम्यगिहोच्यते ॥ पादोदकंचनिर्माल्यंमालानामपिधारणम् ॥ ६ ॥ उच्यतेशिरसःशुद्धिःप्रणतस्यह
रेःपुरः ॥ आघ्राणंतस्यपुष्पादेर्निर्माल्यस्यतंथाप्रिये ॥ ७ ॥ विशुद्धिःस्यादंतरस्यघ्राणस्यापिविधीयते ॥ यत्रपुष्पादिकंयच्चकृष्णपादयुगार्पितम् ॥ ८ ॥
तदेकंपावनंलोकेतद्धिसर्वं[2]विशोधयेत् ॥ पूजाचपंचधाप्रोक्तातासांभेदंशृणुष्वमे ॥ ९ ॥ अभिगमनमुपादानंयोगःस्वाध्यायएवच ॥ इज्यापंचप्रकारार्चा
क्रमेणकथयामिते ॥ १० ॥ तत्वाभिगमनंनामदेवतास्थानमार्जनम् ॥ उपलेपंचनिर्माल्यदूरीकरणमेवच ॥ ११ ॥ उपादानंनामगंधपुष्पादिचयनंतथा॥
योगोनामस्वदेवस्यस्वात्मनैवात्मभावना ॥१२॥ स्वाध्यायोनाममंत्रार्थानुसंधापूर्वकोजपः ॥ सूक्तस्तोत्रादिपाठश्चहरेःसंकीर्त्तनंतथा ॥१३॥ तत्वादिशास्त्रा
भ्यासश्चस्वाध्यायःपरिकीर्तितः ॥ इज्यानामस्वदेवस्यपूजनंचयथार्थतः ॥ १४ ॥ इतिपंचप्रकारार्चाकथितातवसुव्रते ॥ सार्ष्टिसामीप्यसालोक्य
सायुज्यसारूप्यदाक्रमात् ॥ १५ ॥ प्रसंगात्कथयिष्यामिशालग्रामाशिलार्चनम् ॥ केशवादेश्चतुर्बाहोर्दक्षिणोर्ध्वकरक्रमात् ॥ १६ ॥ शंखचक्रगदापद्मी
केशवाख्योगदाधरः ॥ नारायणःपद्मगदाचक्रशंखायुधैःक्रमात् ॥ १७ ॥ माधवश्चक्रशंखाभ्यांपद्मेनगदयाभवेत् ॥ गदाब्जशंखचक्रीचगोविंदाख्योगदाध
रः ॥ १८ ॥ पद्मशंखारिगदिनेविष्णुरूपायतेनमः ॥ सशंखाब्जगदाचक्रमधुसूदनमूर्तये ॥ १९ ॥ नमोगदारिशंखाब्जयुक्तत्रिविक्रमायच ॥ [3]सारिकौमो
दकीपद्मशंखवामनमूर्त्तये ॥ २० ॥ चक्राब्जशंखगदिनेनमःश्रीधरमूर्त्तये ॥ हृषीकेशसारिगदाशंखपद्मिन्नमोस्तुते ॥ २१ ॥ साब्जशंखगदाचक्रपद्मनाभ
स्वमूर्त्तये ॥ दामोदरशंखगदाचक्रपद्मिन्नमोस्तुते ॥ २२ ॥ शंखाब्जचक्रगदिनेनमःसंकर्षणायच ॥ सारिशंखगदाब्जायवासुदेवनमोस्तुते ॥ २३ ॥
शंखचक्रगदाब्जायधृतप्रद्युम्नमूर्त्तये ॥ नमोनिरुद्धायगदाशंखाब्जारिविधारिणे ॥ २४ ॥ साब्जशंखगदाचक्रपुरुषोत्तममूर्त्तये ॥ नमोऽधोक्षजरूपायगदा
शंखारिपद्मिने ॥ २५ ॥ नृसिंहमूर्त्तयेपद्मगदाशंखारिधारिणे ॥ पद्मारिशंखगदिनेनमोस्त्वच्युतमूर्त्तये ॥ २६ ॥ सगदाब्जारिशंखायनमःश्रीकृष्णमूर्त्तये ॥
शालग्रामशिलाद्वारगतलग्नद्विचक्रधृक् ॥ २७ ॥ शुक्लाभरेखःशोभाढ्यःसदेवःश्रीगदाधरः ॥ लग्नद्विचक्रोरक्ताभःपूर्वभागस्तुपुष्कलः ॥ २८ ॥ संकर्षणो
थप्रद्युम्नःसूक्ष्मचक्रस्तुपीतकः ॥ सुदीर्घसुषिरच्छिद्रोह्यनिरुद्धस्तुवर्त्तुलः ॥२९॥ नीलोद्वारेत्रिरेखश्चअथनारायणोऽसितः ॥ मध्येगदाकृतीरेखानाभिपद्मं
महोन्नतम् ॥ ३० ॥ पृथुचक्रोनृसिंहोयः[4]कपिलोयास्त्रिबिंदुकः ॥ अथवापंचबिंदोस्तुपूजनंब्रह्मचारिणः ॥ ३१ ॥ वराहःसत्रिलिंगोयोविषमद्वय
चक्रकः ॥ नीलस्त्रिरेखःस्थूलोथकूर्ममूर्तिःसबिंदुकः ॥ ३२ ॥ कृष्णःसवर्तुलावर्त्तपांडुरोधृतपृष्ठकः ॥ श्रीधरःपंचरेखश्चवनमालीगदांकितः ॥ ३३ ॥

ध्यायेदेताद्विधं देवम्–इ०पा० ।
विलोकयेत्–इ० पा० ।
[3] सारिकौमोदकीपद्मशंखवादनमूर्तये–इ० पा० ।
[4] कपिलोऽन्यास्त्रिबिंदुकः–इ० पा० ।

[illegible]ःसनीलकः ॥ नानावर्णानेकमूर्तिर्नागभोगीत्वनंतकः ॥ ३४ ॥ स्थूलोदामोदरोनीलोमध्येचक्रःसनीलकः ॥
संकर्षणद्वारक[illegible]ादयब्रह्मासुलोहितः ॥ ३५ ॥ सुदीर्घरेखासुषिरएकचक्रांबुजःपृथुः ॥ पृथुचक्रःस्थूलछिद्रःकृष्णोविंदुश्चविंदुमान् ॥ ३६ ॥
हयग्रीवोंकुशाकारःपंचरेखःसकौस्तुभः ॥ वैकुंठो[1]मलवद्भातिएकचक्रमयोसितः ॥ ३७ ॥ मत्स्योदीर्घांबुजाकारो[2]दीर्घरेखश्चपांडुरः ॥ [3]रामचक्रोदक्ष
रेखोयःश्यामःसत्रिविक्रमः ॥ ३८ ॥ शालग्रामद्वारकायांस्थितायगदिनेनमः ॥ एकेनलक्षितोयोव्याद्गदाधारीसुदर्शनः ॥ ३९ ॥ लक्ष्मी
नारायणोद्वाभ्यांत्रिभिश्चैवत्रिविक्रमः ॥ चतुर्भिश्चचतुर्व्यूहोवासुदेवश्चपंचभिः ॥ ४० ॥ प्रद्युम्नःषड्भिरेवाव्यात्संकर्षणश्चसप्तभिः ॥ पुरुषोत्तमोष्टभि
श्चस्यान्नवव्यूहोनवोहितः ॥ ४१ ॥ दशावतारोदशभिरनिरुद्धोवतादथ ॥ द्वादशात्माद्वादशभिरतऊर्द्ध्वमनंतकः ॥ ४२ ॥ ब्रह्माचतुर्मुखोदंडी[4]कमंड
लुस्रगुन्नतः ॥ महेश्वरःपंचवक्रोदशबाहुर्वृषध्वजः ॥ ४३ ॥ [5]यथायुधस्तथागौरीचंडिकाचसरस्वती ॥ महालक्ष्मीर्मातरश्चपद्महस्तोदिवाकरः ॥ ४४ ॥
गजास्यश्चगजस्कंधःषण्मुखोनेकधागणाः ॥ एतेस्थिताःस्थापिताःस्युःप्रासादेवाथपूजिताः ॥ ४५ ॥ धर्मार्थकाममोक्षाहिप्राप्यंतेपुरुषेणच ॥ ४६ ॥
इति श्रीपद्मपुराणेपातालखंडेशालग्रामनिर्णयोनामनवमोऽध्यायः ॥ ९ ॥ छ ॥ ॥ईश्वरउवाच॥ ॥ शालग्रामेमणौयंत्रेमंडलेप्रतिमासुच ॥
नित्यंतुश्रीहरेःपूजाकेवलेभवनेनतु ॥ १ ॥ गंडक्यामेकदेशेतुशालग्रामस्थलंमहत् ॥ पाषाणंतद्भवंपातुशालग्राममितिस्थितम् ॥ २ ॥ शालग्रामशि
लास्पर्शात्कोटिजन्माघनाशनम् ॥ किंपुनःपूजनंतत्रहरेःसांनिध्यकारणम् ॥ ३ ॥ शालग्रामैकयजनाच्छतलिंगीफलंलभेत् ॥ बहुभिर्जन्मभिःपुण्यै
र्यदिकृष्णशिलांलभेत् ॥ ४ ॥ गोष्पदेनचचिह्नेनजनुस्तेनसमाप्यते ॥ आदौशिलांपरीक्षेतस्निग्धांश्रेष्ठांचमेचकाम् ॥ ५ ॥ आकृष्णामध्यमाप्रोक्तामिश्रा
मिश्रफलप्रदा ॥ सदाकाष्ठेस्थितोवह्निर्मथनेनप्रकाश्यते ॥ ६ ॥ यथातथाहरिर्व्यापीशालग्रामे[6]प्रतीयते ॥ प्रत्यहंद्वादशशिलाःशालग्रामस्ययोर्चयेत् ॥७॥
द्वारवत्याःशिलायुक्ताःसवैकुंठेमहीयते ॥ शालग्रामशिलायांतुगह्वरंलक्षतेनरः ॥ ८ ॥ पितरस्तस्यतिष्ठंतितृप्ताःकल्पांतकंदिवि ॥ वैकुंठभवनंतत्रयत्र
द्वारावतीशिला ॥ ९ ॥ मृतोविष्णुपुरंयातितत्तीर्थंयोजनत्रयम् ॥ जपःपूजाचहोमश्चसर्वंकोटिगुणंभवेत् ॥ १० ॥ मनस्कामसमाभीष्टंक्रोशमात्रंन
संशयः ॥ कीटकोपिमृतिंयातिवैकुंठभवनंयतः ॥ ११ ॥ शालिग्रामशिलायांयोमूल्यमुद्धाटयेन्नरः ॥ विक्रेताचानुमंताचयःपरीक्षानुमोदकः ॥ १२ ॥
सर्वेतेनरकंयांतियावत्सूर्यश्चसंप्लुवः ॥ अतस्तद्वर्जयेद्देविचक्रक्रयणविक्रयम् ॥ १३ ॥ शालग्रामोद्भवोदेवोयोदेवोद्वारकोद्भवः ॥ उभयोःसंगमोयत्रमु

---

[1] मल्लवद्भाति–इ०, बलवद्भाति–इ० पा० । [2] हाररेखश्च–इ० पा० । [3] रामचंद्रः–इ० पा० । [4] कमंडलुधृगुन्नतः–इ० पा० । [5] यथाशुद्धः–इ० पा० । [6] प्रकाशते–इ० पा० ।

क्तिस्तत्रनसंशयः ॥ १४ ॥ द्वारकोद्भवचक्राढ्योबहुचक्रेणचिह्नितः ॥ चक्रासनशिलाकाराचित्स्वरूपोनिरंजनः ॥ १५ ॥ नमोस्त्वोंकाररूपायसंदानंद
स्वरूपिणे ॥ शालग्राममहाभागभक्तस्यानुग्रहंकुरु ॥ १६ ॥ तवानुग्रहकामस्यऋणग्रस्तस्यमेप्रभो ॥ अतःपरंप्रवक्ष्यामितिलकस्यविधिंमुदा ॥ १७ ॥
यच्छ्रुत्वामानवाःसर्वेविष्णुसारूप्यमाप्नुयुः ॥ ललाटेकेशवंविंद्यात्कंठेश्रीपुरुषोत्तमम् ॥ १८ ॥ नाभौनारायणंदेववैकुंठंहृदयेतथा ॥ दामोदरंवामपा
श्वैंदक्षिणेचात्रिविक्रमम् ॥ १९ ॥ मूर्ध्निचैवहृषीकेशंपद्मनाभंचपृष्ठतः ॥ कर्णयोर्यमुनांगंगांबाह्वोःकृष्णंहरिंतथा ॥ २० ॥ यथास्थानेषुतुष्यंतिदेवता
द्वादशस्मृताः ॥ द्वादशैतानिनामानिकर्तव्येतिलकेपठेत् ॥ २१ ॥ सर्वपापविशुद्धात्माविष्णुलोकंसगच्छति ॥ ऊर्द्ध्वपुंड्रमूर्द्ध्वरेखंललाटेयस्यदृश्यते ॥
॥ २२ ॥ चंडालोपिसशुद्धात्मापूज्यएवनसंशयः ॥ यस्योर्द्ध्वपुंड्रंदृश्येतनललाटेनरस्यहि ॥ २३ ॥ तद्दर्शनंनकर्त्तव्यंदृष्ट्वासूर्यंनिरीक्षयेत् ॥ त्रिपुंड्रंय
स्यविप्रस्यऊर्द्ध्वपुंड्रंनदृश्यते ॥ २४ ॥ तंदृष्ट्वाप्यथवास्पृष्ट्वासचैलंस्नानमाचरेत् ॥ सांतरालंप्रकर्त्तव्यंपुंड्रंहरिपदाकृति ॥ २५ ॥ निरंतरालंयः
कुर्यादूर्द्ध्वपुंड्रंद्विजाधमः ॥ ललाटेतस्यसततंशुनःपादोनसंशयः ॥ २६ ॥ नासादिकेशपर्यंतमूर्द्ध्वपुंड्रंसुशोभनम् ॥ मध्येछिद्रसमायुक्तंतंविद्याद्धरिमंदिर
म् ॥ २७ ॥ वामभागेस्थितोब्रह्मादक्षिणेतुसदाशिवः ॥ मध्येविष्णुंविजानीयात्तस्मान्मध्यंनलेपयेत् ॥ २८ ॥ वीक्ष्यादर्शेजलेवापियोविदध्यात्प्रयत्नतः ॥
ऊर्द्ध्वपुंड्रंमहाभागःसयातिपरमांगतिम् ॥ २९ ॥ अग्निरापश्चवेदाश्चचंद्रादित्यौतथानिलः ॥ विप्राणांनित्यमेतेहिकर्णेतिष्ठंतिदक्षिणे ॥ ३० ॥ गंगाचदक्षिणे
श्रोत्रेनासिकायांहुताशनः ॥ उभयोरपिसंस्पर्शात्तत्क्षणादेवशुध्यति ॥ ३१ ॥ कृत्वाचैवोदकंशंखेवैष्णवानांमहात्मनाम् ॥ तुलसीमिश्रितंदद्यात्पिबेन्मूर्ध्ना
भिवंदयेत् ॥ ३२ ॥ प्राश्नीयात्प्रोक्षयेद्देहंपुत्रमित्रपरिग्रहम् ॥ विष्णोःपादोदकंपीतंकोटिजन्माघनाशनम् ॥ ३३ ॥ तदेवाष्टगुणंपापंभूमौबिंदुनिपा
तनात् ॥ जलशंखंकरेकृत्वास्तुत्वानत्वाप्रदक्षिणम् ॥ ३४ ॥ सततंधार्यतेवारितेनाप्तंजन्मनःफलम् ॥ शंखोयस्यगृहेनास्तिघंटावागरुडान्विता ॥ ३५ ॥
पुरतोवासुदेवस्यनसभागवतःकलौ ॥ यानैर्वापादुकाभिर्वापानंभगवतोगृहे ॥ ३६ ॥ देवोत्सवेष्वसेवाचअप्रणामस्तदग्रतः ॥ उच्छिष्टेचैवचाशौचेभगवद्वं
दनादिकम् ॥ ३७ ॥ एकहस्तप्रणामश्चतत्पुरस्तात्प्रदक्षिणम् ॥ पादप्रसारणंचाग्रेतथापर्यंकसेवनम् ॥ ३८ ॥ शयनंभक्षणंचापिमिथ्याभाषणमेवच ॥
उच्चैर्भाषामिथोजल्पोरोदनानिचविग्रहः ॥ ३९ ॥ निग्रहानुग्रहौचैवस्त्रीषुचक्रूरभाषणम् ॥ केवलावरणंचैवपरनिंदापरस्तुतिः ॥ ४० ॥ अश्लीलभाषणंचै
वअधोव [illegible] ॥ शक्तौगौणेपचारश्चअनिवेदितभक्षणम् ॥ ४१ ॥ तत्तत्कालोद्भवानांचफलादीनामनर्पणम् ॥ विनियुक्तावशिष्टस्यप्रदानंव्यं

[illegible] यदतादृधं देवम्–इ०पा० ।

[illegible] पा० ।

कृत्याशनंचैवपरनिंदापरस्तुतिः ॥ गुरौमौनंनिजस्तोत्रंदेवतानिंदनंतथा ॥ ४३ ॥ अपराधास्तथाविष्णोर्द्वात्रिंशत्परिकी
तिरा सहस्राणिक्रियंतेऽहर्निशंमया ॥ तवाहमितिमांमत्वाक्षमस्वमधुसूदन ॥ ४५ ॥ इतिमंत्रंसमुच्चार्यप्रणमेद्दंडवद्भुवि ॥ अप
राधसहस्राणिक्षमतेसर्वदाहरिः ॥ ४६ ॥ सायंप्रातर्द्विजातीनांश्रुत्युक्तमशनंतथा ॥ विष्णुभक्तावशिष्टस्यदिनपापात्प्रमुच्यते ॥ ४७ ॥ अन्नंब्रह्मार
सोविष्णुःखादयेन्मांसमुच्चरन् ॥ एवंज्ञात्वातुयोभुंक्तेसोन्नदोषैर्नलिप्यते ॥ ४८ ॥ अलाबुंवर्त्तुलाकारंमसूरंचसवल्कलम् ॥ तालंशुक्तंचवृंताकंनखादेद्वै
ष्णवोनरः ॥ ४९ ॥ वटाश्वत्थार्कपत्रेषुकुंभीतिंदुकपत्रयोः ॥ कोविदारेकदंबेचनखादेद्वैष्णवोनरः ॥ ५० ॥ श्रावणेवर्जयेच्छाकंदधिभाद्रपदेत्यजे
त् ॥ आश्विनेमासिदुग्धंचकार्त्तिकेचामिषंत्यजेत् ॥ ५१ ॥ दग्धमन्नंतुजंबीरंयद्विष्णोरनिवेदितम् ॥ बीजपूरंचशाकंचप्रत्यक्षलवणंतथा ॥ ५२ ॥ यदि
वैवाद्यभुंजीततदातन्नामसंस्मरेत् ॥ हैमंतिकंसितास्विन्नंधान्यं[2]मुद्गास्तिलायवाः ॥ ५३ ॥ कलापकंगुनीवाराःशाकंचहिलमोचिका ॥ कालशाकंच
वास्तूकंमूलकंरक्तकेतरत् ॥ ५४ ॥ लवणेसिंधुसामुद्रेगव्येचदधिसर्पिषी ॥ पयोनुद्धृतसारंचपनसाम्रहरीतकी ॥ ५५ ॥ पिप्पलीजीरकंचैवनागरंगक
तिंतिडी ॥ कदलीलवलीधात्रीफलान्यगुडमैक्षवम् ॥ ५६ ॥ अतैलपक्वंमुनयोहविष्यान्नंप्रचक्षते ॥ तुलसीपत्रपुष्पाद्यैर्माल्यंवहतियोनरः ॥ ५७ ॥
विष्णुंतमपिजानीयात्सत्यंसत्यंनसंशयः ॥ धात्रीवृक्षंसमारोप्यविष्णुतुल्योभवेन्नरः ॥ ५८ ॥ कुरुक्षेत्रंविजानीयात्सार्द्धहस्तशतत्रयम् ॥ तुलसीका
ष्ठघटितैरुद्राक्षाकारकारितैः ॥ ५९ ॥ निर्मितांमालिकांकंठेनिधायार्चनमारभेत् ॥ तथामलकमालांचसम्यक्पुष्करमालिकाम् ॥ ६० ॥
[3]कंठेमालांचयत्नेनधारयेद्विष्णुपूजकः ॥ निर्माल्यंतुलसीमालांशिरस्यपिचधारयेत् ॥ ६१ ॥ निर्माल्यचंदनेनांगम[4]र्कयेत्तस्यनामभिः ॥ लला
टेचगदाधार्यामूर्ध्निचापंशरस्तथा ॥ ६२ ॥ नंदकंचैवहृन्मध्येशंखंचक्रंभुजद्वये ॥ शंखचक्रान्वितोविप्रःश्मशानेम्रियतेयदि ॥ ६३ ॥
प्रयागेयागतिःप्रोक्तासागतिस्तस्यनिश्चिता ॥ योधृत्वातुलसीपत्रंशिरसाविष्णुतत्परः ॥ ६४ ॥ करोतिसर्वकार्याणिफलमाप्नोतिचाक्षयम् ॥
तुलसीकाष्ठमालाभिर्भूषितःकर्मआचरन् ॥ ६५ ॥ पितृणांदेवतानांचकृतंकोटिगुणंभवेत् ॥ निवेद्यकेशवेमालांतुलसीकाष्ठनिर्मिताम् ॥ ६६ ॥
देहंतेयानरोभक्त्यातस्यनश्यतिपातकम् ॥ पाद्यादिभिरथाभ्यर्च्यइमंमंत्रमुदीरयेत् ॥ ६७ ॥ यादृष्टानिखिलाघसंघशमनीस्पृष्टावपुःपावनीरो

---

[1] मां शिवमित्यर्थः–इह शिवस्य पार्वतीं प्रत्युक्तत्वात्–अन्यत्र स्मृत्यादौ च– ‘ अन्नं ब्रह्मा रसो विष्णुर्भोक्ता देवो महेश्वरः,–इत्युक्तत्वात्। [2] गुंद्राः–इ० पा०। [3] कदंबमालां यत्नेन–इ० पा०। [4] अर्चयेत्–इ०, चर्चयेत्–इ० च पा०।

गाणामभिवंदितानिरसनीसिक्तांतकत्रासिनी ॥ प्रत्यासत्तिविधायिनीभगवतःकृष्णस्यसंरोपितान्यस्तातच्चरणेविमुक्तिफलदातस्यैतुलस्यैनमः ॥६८॥इति
श्रीपद्मपुराणेपातालखंडेवृंदावनमाहात्म्येदेवीश्वरसंवादेतिलकादिनिर्णयोनामदशमोऽध्यायः ॥ १० ॥ ॥ पार्वत्युवाच ॥ ॥ घोरेकलियुगेप्राप्तेविषं[1]
यग्राहसंकुले ॥ पुत्रदारधनाद्यातौंतत्कथंधार्यतेविभो॥१॥ तदुपायंमहादेवकथयस्वकृपानिधे॥ईश्वरउवाच ॥ ॥ हरेर्नामहरेर्नामहरेर्नामैवकेवलम्॥२॥
हरेरामहरेकृष्णकृष्णकृष्णेतिमंगलम् ॥ एवंवदंतियेनित्यंनहितान्बाधतेकलिः ॥ ३ ॥ अंतरांतरकर्माणिकृत्वानामानिचस्मरेत् ॥ कृष्णकृष्णेतिकृष्णेति
कृष्णेत्याहपुनःपुनः ॥ ४ ॥ मन्नामचैवत्वन्नामयोजयित्वाव्यतिक्रमात् ॥ सोपिपापात्प्रमुच्येततूलराशेरिवानलः ॥ ५ ॥ जया[2]द्येतत्त्वयावाप्यथ
वाश्रीशब्दपूर्वकम् ॥ तच्चमेमंगलंनामजपन्यायात्प्रमुच्यते ॥ ६ ॥ दिवानिशिचसंध्यायांसर्वकालेषुसंस्मरेत् ॥ अहर्निशंस्मरन्नामंकृष्णंपश्यतिचक्षु
षा ॥ ७ ॥ अशुचिर्वाशुचिर्वापिसर्वकालेषुसर्वदा ॥ नामसंस्मरणादेवसंसारान्मुच्यतेक्षणात् ॥ ८ ॥ नानापराधयुक्तस्यनामापिचहरत्यघम् ॥ यज्ञ
व्रततपोदानंसांगंनैवकलौयुगे ॥ ९ ॥ गंगास्नानंहरेर्नामनिरपायमिदंद्वयम् ॥ १० ॥ हत्यायुतंपापसहस्रमुग्रंगुर्वंगनाकोटिनिषेवणंच ॥ स्ते
यान्यथान्यानिहरेःप्रियेणगोविंदनाम्नानचसंतिभद्रे ॥ ११ ॥ अपवित्रःपवित्रोवासर्वावस्थांगतोपिवा ॥ यःस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचिः ॥ १२ ॥
नामसंस्मरणादेवतथा[3]तस्यार्थचिंतनात् ॥ सौवर्णींराजतींवापितथापैष्टींस्रगाकृतिम् ॥ १३ ॥ पादयोश्चिह्नितांकृत्वापूजांचैवसमारभेत् ॥ दक्षिणस्यप
दांगुष्ठमूलेचक्रंबिभर्तियः ॥ १४ ॥ तत्रनम्रजनस्यापिसंसारच्छेदनायच ॥ मध्यमांगुलिमूलेतुधत्तेकमलमच्युतः ॥ १५ ॥ ध्यातृचित्तद्विरेफाणां
लोभनायातिशोभनम् ॥ पद्मस्याधोध्वजंधत्तेसर्वानर्थजयध्वजम् ॥ १६ ॥ कनिष्ठामूलतोवज्रंभक्तपापौघभेदनम् ॥ पार्श्वमध्येंकुशंभक्तचित्तेरभसका
रणम् ॥ १७ ॥ भोगसंपन्मयंधत्तेयवमंगुष्ठपर्वणि ॥ मूलेगदांचपापाद्रिभेदनींसर्वदेहिनाम् ॥ १८ ॥ सर्वविद्याप्रकाशायधत्तेसभगवानजः ॥ पद्मादीन्य
पिचिह्नानितत्रदक्षेणयत्पुनः ॥ १९ ॥ वामपादेवसेत्सोयंबिभर्त्तिकरुणानिधिः ॥ तस्माद्गोविंदमाहात्म्यमानंदरससुंदरम् ॥ २० ॥ शृणुयात्कीर्त्त
येन्नित्यंसनिर्मुक्तोनसंशयः ॥ मा[4]सकृत्यंप्रवक्ष्यामिविष्णोःप्रीतिकरंपरम् ॥ २१ ॥ ज्येष्ठेतुस्नापनंकुर्याच्छ्रीविष्णोर्यत्नतःशुचिः ॥ दैनंदिनंतुदुरितंपक्षमा
सर्त्तुवर्षजम् ॥ २२ ॥ ब्रह्महत्यासहस्राणिज्ञाताज्ञातकृतानिच ॥ स्वर्णस्तेयसुरापानगुरुतल्पायुतानिच ॥ २३ ॥ कोटिकोटिसहस्राणिह्युपपापानिया
यंतिपौर्णमास्यांतुवासरे ॥२४॥ आसिंचेदच्युतंमूर्ध्नितदैतत्कलशोदकम् ॥ पुरुषसूक्तेनमंत्रेणपावमानीभिरेवच ॥ २५ ॥ नालि

---

[2] जयशंकर–इति, गौरीहर–इति वा नामग्रहणमित्यर्थः । [3] तत्पादचिंतनात्–इ० पा० । [4] नमस्कृत्य–इ० पा० ।

ुना ॥ रक्तोदकेनगंधेनतथापुष्पोदकेनच ॥ २६ ॥ पंचोपचारैराराध्ययथाविभवविस्तरैः ॥ घंघंटायैनमइतिघंटावाद्यं
॥ पतितस्यमहाध्वानन्यस्तपातकसंचये. ॥ पाहिमांपापिनंघोरसंसारार्णवपातिनम् ॥ २८ ॥ यएवंकुरुतेविद्वा
न्ब्राह्मणःश्रोत्रियःशुचिः ॥ सर्वपापैःप्रमुच्येतविष्णुलोकंसगच्छति ॥ २९ ॥ आषाढशुक्लैकादश्यांकुर्यात्स्वापमहोत्सवम् ॥ आषाढे
चरथंकुर्याच्छ्रावणेश्रवणाविधिम्[1] ॥ ३० ॥ भाद्रेचजन्मदिवसउपवासपरोभवेत् ॥ प्रसुप्तस्यपरीवर्तमाश्विनेमासिकारयेत् ॥ ३१ ॥ उत्थानंश्रीहरेःकुर्या
दन्यथाविष्णुद्रोहकृत् ॥ शुभेचैवाश्विनेमासिमहामायांचपूजयेत् ॥ ३२ ॥ सौवर्णींराजतींवापिविष्णुरूपांबलिंविना ॥ हिंसाद्वेषौनकर्तव्यौधर्मात्माविष्णु
पूजकः ॥ ३३ ॥ कार्तिकेपुष्यमासेचकामतःपुण्यमाचरेत् ॥ दामोदरायदीपंचप्रांशुस्थानेप्रदापयेत् ॥ ३४ ॥ सप्तवर्तिप्रमाणेनदीपःस्याच्चतुरंगुलः ॥ प
क्षांतेचप्रकर्तव्यादीपमालावलिःशुभा ॥ ३५ ॥ मार्गशीर्षेसितेपक्षेषष्ठ्यांचसि[2]तवस्त्रकैः ॥ पूजयेज्जगदीशंचब्रह्माणंचविशेषतः ॥ ३६ ॥ पौषेपुष्पाभिषेकं
चवर्जयेच्चंदनंश्लथम् ॥ संक्रांत्यांमाघमासेचसाधिवासिततंडुलात् ॥ ३७ ॥ नैवेद्यंविष्णवेदद्यादिमंमंत्रमुदीरयेत् ॥ ब्राह्मणान्भोजयेद्भक्त्यादेवदेवपुरःस्थि
तान् ॥ ३८ ॥ अभ्यर्च्यभगवद्भक्तान्द्विजांश्चभगवद्धिया ॥ एकस्मिन्भोजितेभक्तेकोटिर्भवतिभोजिता ॥ ३९ ॥ विप्रभोजनमात्रेणव्यंगंसांगंध्रुवंभवेत् ॥
पंचम्यांशुक्लपक्षेतुस्नापयित्वाचकेशवम् ॥ ४० ॥ पूजयित्वाविधानेनचूत[3]पल्लवसंयुतैः ॥ फलचूर्णैश्चविविधैर्वासितैःपटसाधितैः ॥ ४१ ॥ काननंरमणी
यंचप्रदीप्तंदीपदीपितम् ॥ द्राक्षेक्षुरंभाजंबीरनागरंगंचपूगकम् ॥ ४२ ॥ नालिकेरंचधात्रींचपनसंचहरीतकीम् ॥ अन्यैश्चवृक्षखंडैश्चसर्वर्तुकुसुमान्वितैः
॥ ४३ ॥ अन्यैश्चविविधैश्चैवफलपुष्पसमन्वितैः ॥ वितानैःकुसुमोद्दामैर्वारिपूर्णघटैस्तथा ॥ ४४ ॥ चू[4]तशाखोपशाखाभिःशोभितंछत्रचामरैः ॥
जयकृष्णेतिसंस्मृत्यप्रदक्षिणपुरस्सरम् ॥ ४५ ॥ विशेषतःकलियुगेदोलोत्सवोविधीयते ॥ फाल्गुनेचचतुर्दश्यामष्टमेयामसंज्ञके ॥ ४६ ॥
अथवापौर्णमास्यांतुप्रतिपत्संधिसंज्ञके ॥ पूजयेद्विधिवद्भक्त्याफल्गुचूर्णैश्चतुर्विधैः ॥ ४७ ॥ सितरक्तैर्गौरपीतैःकर्पूरादिविमिश्रितैः ॥ हरिद्रारागयोगाच्च
रंगरूपैर्मनोहरैः ॥ ४८ ॥ अन्यैर्वारंगरूपैश्चप्रीणयेत्परमेश्वरम् ॥ एकादश्यांसमारभ्यपंचम्यांतंसमापयेत् ॥ ४९ ॥ पंचाहानित्र्यहानिवादोलोत्सवो
विधीयते ॥ दक्षिणाभिमुखंकृष्णंदोलमानंसकृन्नराः ॥ ५० ॥ दृष्ट्वापराधनिचयैर्मुक्तास्तेनात्रसंशयः ॥ निक्षिप्यजलपात्रेचमासिमाधवसंज्ञके ॥ ५१ ॥
सौवर्णपात्रेरौप्येवाताम्रेवाप्यथमृण्मये ॥ तोयस्थंयोर्चयेद्देवंशालग्रामसमुद्भवम् ॥ ५२ ॥ प्रतिमांवा[5]महाभागेतस्यपुण्यंनगण्यते ॥ दमनारोपणंकृत्वा

---

[1] निवेदयेत्–इ० पा० । [2] सितपत्रकैः–इ० पा० । [3] चतुःपल्लवसंयुतैः–इ० पा० । [4] चतुःशाखोपशाखाभिः–इ० पा० । [5] महागहे–इ० पा० ।

श्रीविष्णौचसमर्पयेत् ॥ ५३ ॥ वैशाखेश्रावणेभाद्रेकर्तव्यंवातदर्पणम् ॥ पूर्वैपूर्वैतुवातस्थेदमनादिषुकर्मसु ॥ ५४ ॥ प्रकर्तव्यंविधानेनअन्यथानिष्फ
लंभवेत् ॥ वैशाखेचतृतीयायांजलमध्येविशेषतः ॥ ५५ ॥ अथवामंडलेकुर्यान्मंडपेवाबृहद्वने ॥ सुगंधचंदनेनांगंसुपुष्टंचदिनेदिने ॥ ५६ ॥ यथाप्रयत्नतः
कुर्यात्कृशांगस्यैवपुष्टिदम् ॥ चंदनागुरुह्रीबेरकृष्णकुंकुमरोचना ॥ ५७ ॥ जटामांसीमुराचैवविष्णोर्गंधाष्टकंविदुः ॥ तैस्तैर्गंधयुतैश्चापिविष्णोरंगानिले
पयेत् ॥ ५८ ॥ धूपंचतुलसीकाष्ठंकर्पूरागुरुयोगतः ॥ अथवाकेसरैर्योज्यंहरिचंदनमुच्यते ॥ ५९ ॥ यात्राकालेचयेकृष्णंभक्त्यापश्यंतिमानवाः ॥ नते
षांपुनरावृत्तिःकल्पकोटिशतैरपि ॥६०॥सुगंधमिश्रितैस्तोयैर्देवदेवंगलंतिये॥अथवापुष्पमध्येतुस्थापयेज्जगदीश्वरम् ॥६१॥ वृंदावनंतत्रगत्वाउपस्कृत्यफ
लानिच॥विष्णुभक्तेनयोग्येनभोजयेत्तदशेषतः॥६२॥नालिकेरफलंबीजकोशंचोद्धृत्यदापयेत्॥घोंटाफलंचपनसंकोशमुद्धृत्यदापयेत्॥६३॥ दध्नाविमिश्रि
तंचान्नंघृतेनाप्लुत्यदापयेत् ॥ पाचितंपिष्टकंपूपमष्टादशघृतेनच ॥ ६४ ॥ तैलैश्चतिलसंमिश्रैःफलंपक्वंप्रदापयेत् ॥ यद्यदेवात्मनःप्रीतंतत्तदीशायदाप
येत् ॥ ६५ ॥ दत्वानैवेद्यवस्त्रादिनाददीतकथंचन ॥ त्यक्तंचविष्णुमुद्दिश्यतद्भक्तेभ्योविशेषतः ॥ ६६ ॥ इतितेकथितंकिंचित्समासेनमहेश्वरि ॥ गोप
नीयंप्रयत्नेनस्वयोनिरिवपार्वति ॥ ६७ ॥ श्रीकृष्णरूपगुणवर्णनशास्त्रवर्गबोधाधिकारइहचेदलमन्यपाठैः ॥ तत्प्रेमभावरसभक्तिविलासनामहारेषुचेत्ख
लुमनःकिमुकामिनीभिः ॥ ६८ ॥ तच्चेतसाप्रभजतांव्रजबालकेंद्रंवृंदावनाक्षितितलंयमुनाजलंच ॥ तल्लोकनाथपदपंकजधूलिमिश्रलिप्तंवपुःकिलवृथागरु
चंदनाद्यैः ॥ ६९ ॥ ॥ इति श्रीपद्मपुराणेपातालखंडेउमामहेश्वरसंवादेवृंदावनमाहात्म्येएकादशोऽध्यायः ॥ ११ ॥ ॥ ऋषयऊचुः ॥ ॥ सूतजीवचि
रंसाधोश्रीकृष्णचरितामृतम् ॥ त्वयाप्रकाशितंसर्वंभक्तानांभवतारणम् ॥ १ ॥ श्रीकृष्णलीलांनिखिलांब्रूहिदैनंदिनींप्रभो ॥ ययाकर्णितयासाधोकृ
ष्णेभक्तिर्विवर्द्धते ॥ २ ॥ गुरोःशिष्यस्यमंत्रस्यविधानंलक्षणंपृथक् ॥ वदास्माकंमहाभागत्वंहिनःपरमःसुहृत् ॥ ३ ॥ ॥ सूतउवाच ॥ ॥ एकदायमु
नातीरेसमासीनंजगद्गुरुम् ॥ नारदःप्रणिपत्याहदेवदेवंसदाशिवम् ॥ ४ ॥ ॥ नारदउवाच ॥ ॥ देवदेवमहादेवसर्वज्ञजगदीश्वर ॥ भगवद्धर्मतत्वज्ञकृष्ण
मंत्रविदांवर ॥ ५ ॥ कृष्णमंत्रामयालब्धास्त्वत्तोयेचपितुःपरे ॥ तेसर्वेसाधितास्ते[2]त्वान्मंत्रराजादयोमया ॥ ६ ॥ बहुवर्षसहस्रैस्तुशाकमूलफलाशिना ॥
शुष्कपर्णाम्बुवाय्वादिभोजिनाचनिराशिना ॥ ७ ॥ स्त्रीणांसंदर्शनालापवर्जिनाभूमिशायिना ॥ कामादिषड्गुणंजित्वाबाह्येंद्रियनियम्यता ॥ ८ ॥ एवंकृते
[illegible] र ॥ तद्ब्रूहियत्प्रसिध्येतसंस्काराद्यैर्विनाप्रभो ॥ ९ ॥ सकृदुच्चारणादे[3]वददातिफलमुत्तमम् ॥ यदियोग्योस्मिदेवेशतदामेकृपया

---

[2] यत्नात्–इ० पा० । [3] नृणाम्–इ० पा० ।

[illegible] ॥ ॥ साधुपृष्टंमहाभागत्वं[1]यालोकहितैषिणा ॥ सुगोप्यमपिवक्ष्यामिमंत्रचिंतामणिंतव ॥ ११ ॥ रहस्यानांरहस्यंयद्गुह्या
[illegible] कथितंदेव्यैनाग्रजेभ्यःपुरातव ॥ १२ ॥ वक्ष्यामियुगलंतुभ्यंकृष्णमंत्रमनुत्तमम् ॥ मंत्रचिंतामणिर्नामयुगलंद्वयमेवच ॥ १३ ॥
पर्यायाअस्यमंत्रस्यतथापंचपदीतिच ॥ गोपीजनपदंवल्लभांतंतुचरणानिति ॥ १४ ॥ शरणंचप्रपद्येचएषपंचपदात्मकः ॥ मंत्रचिंतामणिःप्रोक्तःषोड
शार्णोमहामनुः ॥ १५ ॥ नमोगोपीजनेत्युक्त्वावल्लभाभ्यांवदेत्ततः ॥ पदद्वयात्मकोमंत्रोदशार्णःखलुकथ्यते ॥ १६ ॥ एतांपंचपदींजप्त्वाश्रद्धयाश्र
द्धयासकृत् ॥ कृष्णप्रियाणांसांनिध्यंगच्छत्येवनसंशयः ॥ १७ ॥ नपुरश्चरणप्रेक्षानास्यन्यासविधिक्रमः ॥ नदेशकालनियमोनारिमित्रादिशोध
नम् ॥ १८ ॥ सर्वेधिकारिणश्चात्रचंडालांतामुनीश्वर ॥ स्त्रियःशूद्रादयश्चापिजडमूकादिपंगवः ॥ १९ ॥ अन्येहूणाःकिराताश्चपुलिंदाःपुष्कसास्तथा ॥
आभीरायवनाःकंकाःखसाद्याःपापयोनयः ॥ २० ॥ दंभाहंकारपरमाःपापाःपैशुन्यतत्पराः ॥ गोब्राह्मणादिहंतारोमहोपपातकान्विताः ॥ २१ ॥ ज्ञानवै
राग्यरहिताःश्रवणादिविवर्जिताः ॥ एतेचान्येचसर्वेस्युर्मनोरस्याधिकारिणः ॥ २२ ॥ यदिभक्तिर्भवेदेषांकृष्णेसर्वेश्वरेश्वरे ॥ तदाधिकारिणःसर्वेनान्य
थामुनिसत्तम ॥२३॥ याज्ञिकोदाननिरतःसर्वतंत्रोपसेवकः ॥ सत्यवादीयतिर्वापिवेदवेदांगपारगः ॥२४॥ ब्रह्मनिष्ठःकुलीनोवातपस्वीव्रततत्परः ॥ अत्राधि
कारीनभवेत्कृष्णभक्तिविवर्जितः ॥ २५ ॥ तस्माद[2]कृष्णभक्तायकृतघ्नायनमानिने ॥ नचश्रद्धाविहीनायवक्तव्यंनास्तिकायच ॥ २६ ॥ नचाशुश्रूषवेवा
च्यंनासंवत्सरसेविने ॥ श्रीकृष्णेऽनन्यभक्तायदंभलोभविवर्जिने ॥ २७ ॥ कामक्रोधविमुक्तायदेयमेतत्प्रयत्नतः ॥ ऋषिश्चैवाहमेतस्यगायत्रीछंदउच्य
ते ॥ २८ ॥ देवतावल्लवीकांतोमंत्रस्यपरिकीर्तितः ॥ सप्रियस्यहरेर्दास्येविनियोगउदाहृतः ॥ २९ ॥ आचक्राद्यैस्तथामंत्रैःपंचांगानिप्रकल्पयेत् ॥
अथवापिस्वबीजेनकरांगन्यासकौचरेत् ॥ ३० ॥ मंत्रस्यप्रथमोवर्णोबिंदुनामूर्ध्निभूषितः ॥ गमित्येवंभवेद्बीजंनमःशक्तिरिहोदिता ॥ ३१ ॥ [3]अंतिमार्णै
र्दशांगानितैरेवचतथार्चनम् ॥ गंधपुष्पादिभिस्तच्चजलैरेवाप्यसंभवे ॥ ३२ ॥ न्यासपूर्वविधानेनकर्तव्यंहरितुष्टये ॥ अतएवास्यमंत्रस्यन्यासाद्यन्येवदं
तिच ॥ ३३ ॥ सकृदुच्चारणादेवकृतकृत्यत्वदायिनः ॥ तथापिदशधानित्यंजपाद्यर्थंप्रविन्यसेत् ॥ ३४ ॥ अथध्यानंप्रवक्ष्यामिमंत्रस्यास्यद्विजोत्तम ॥
पीतांबरंघनश्यामंद्विभुजंवनमालिनम् ॥ ३५ ॥ [4]बर्हिबर्हकृतोत्तंसंशशिकोटिनिभाननम् ॥ घूर्णायमाननयनंकर्णिकारावतंसिनम् ॥ ३६ ॥ अभितश्चंदने
नाथमध्येकुंकुमबिंदुना ॥ रचितंतिलकंभालेबिभ्रतंमंडलाकृतिम् ॥ ३७ ॥ तरुणादित्यसंकाशकुंडलाभ्यांविराजितम् ॥ घर्माम्बुकणिकाराजद्दर्पणाभ

---

[1] सर्वलोकहितैषिणा--इ० पा० । [2] हरावभक्ताय--इ० पा० । [3] अंतिमार्णैरथांगानि--इ० पा० । [4] बर्हिबर्हकृतापीडम्--इ० पा० ।

४

कपोलकम् ॥ ३८ ॥ प्रियास्यन्यस्तनयनं[1]लीलापांगोन्नतभ्रुवम् ॥ अग्रभागन्यस्तमुक्ताविस्फुरत्प्रोच्चनासिकम् ॥ ३९ ॥ दशनज्योत्स्नयाराजत्पक्वबिंब
फलाधरम् ॥ केयूरांगदसद्रत्नमुद्रिकाभिर्लसत्करम् ॥ ४० ॥ बिभ्रतंमुरलींवामेपाणौपद्मंतथैवच ॥ कांचीदामस्फुरन्मध्यंनूपुराभ्यांलसत्पदम् ॥ ४१ ॥
रतिकेलिरसावेशचपलंचपलेक्षणम् ॥ हसंतंप्रिययासार्द्धंहासयंतंचतांमुहुः ॥ ४२ ॥ इत्थंकल्पतरोर्मूलेरत्नसिंहासनोपरि ॥ वृंदारण्येस्मरेत्[2]कृष्णंसंस्थितं
प्रिययासह ॥ ४३ ॥ वामपार्श्वेस्थितांतस्यराधिकांचस्मरेत्ततः ॥ नीलचोलकसंवीतांतप्तहेमसमप्रभाम् ॥ ४४ ॥ पट्टांचलेनावृतार्द्धसुस्मेराननपंकजा
म् ॥ कांतवक्त्रेन्यस्तनेत्रांचकोरीचंचलेक्षणाम् ॥ ४५ ॥ अंगुष्ठतर्जनीभ्यांचनिजकांतमुखांबुजे ॥ अर्पयंतींपूगफलंपर्णचूर्णसमन्वितम् ॥ ४६ ॥ मुक्ताहा
रस्फुरच्चारुपीनोन्नतपयोधराम् ॥ क्षीणमध्यांपृथुश्रोणींकिंकिणीजालमंडिताम् ॥ ४७ ॥ रत्नताटंककेयूरमुद्रावलयधारिणीम् ॥ रणत्कटकमंजीररत्नपादां
गुलीयकाम् ॥ ४८ ॥ लावण्यसारमुग्धांगींसर्वावयवसुंदरीम् ॥ आनंदरससंमग्नांप्रसन्नांनवयौवनाम् ॥ ४९ ॥ सख्यश्चतस्याविप्रेंद्रतत्समानवयोगुणाः ॥
तत्सेवनपराभाव्याश्चामरव्यजनादिभिः ॥ ५० ॥ अथतुभ्यंप्रवक्ष्यामिमंत्रार्थंशृणुनारद ॥ बहिरंगैःप्रपंचस्यस्वांशैर्मायादिशक्तिभिः ॥ ५१ ॥ अंतरंगै
स्तथानित्यविभूतैस्तैश्चिदादिभिः ॥ गोपनादुच्यतेगोपीराधिकाकृष्णवल्लभा ॥ देवीकृष्णमयीप्रोक्ताराधिकापरदेवता ॥ ५२ ॥ सर्वलक्ष्मीस्वरूपासाकृष्णाह्ला
दस्वरूपिणी ॥ ततःसाप्रोच्यतेविप्रह्लादिनीतिमनीषिभिः ॥ ५३ ॥ तत्कलाकोटिकोटयंशदुर्गाद्यास्त्रिगुणात्मिकाः ॥ सातुसाक्षान्महालक्ष्मीःकृष्णोनारायणः
प्रभुः ॥ ५४ ॥ नैतयोर्विद्यतेभेदःस्वल्पोपिमुनिसत्तम ॥ इयंदुर्गाहरीरुद्रःकृष्णःशक्रइयंशची ॥ ५५ ॥ सावित्रीयंहरिर्ब्रह्मा[3]धूमोर्णासौयमोहरिः ॥ बहुनाकिंमुनिश्रे
ष्ठविनाताभ्यांनकिंचन ॥ ५६ ॥ चिदचिल्लक्षणंसर्वंराधाकृष्णमयंजगत् ॥ इत्थंसर्वंतयोरेवविभूतिंविद्धिनारद ॥ ५७ ॥ नशक्यतेमयावक्तुंवर्षकोटिशतैरपि ॥
त्रैलोक्येपृथिवीमान्याजंबूद्वीपंततोवरम् ॥ ५८ ॥ तत्रापिभारतंवर्षंतत्रापिमथुरापुरी ॥ तत्रवृंदावनंनामतत्रगोपीकदंबकम् ॥ ५९ ॥ तत्रराधासखीवर्गस्त
त्रापिराधिकावरा ॥ सांनिध्याधिक्यतस्तस्याआधिक्यंस्याद्यथोत्तरम् ॥ ६० ॥ पृथिवीप्रभृतीनांतुनान्यत्किंचिदिहोदितम् ॥ सैषाहिराधिकागोपीजन
स्तस्याःसखीगणः ॥ ६१ ॥ तस्याःसखीसमूहस्यवल्लभौप्राणनायकौ ॥ राधाकृष्णौतयोःपादाःशरणंस्यादिहाश्रये ॥ ६२ ॥ प्रपद्येगतवानस्मिजीवोहं
भृशदुःखितः ॥ [illegible]यःशरणंप्राप्तोममतस्ययदास्तिच ॥ ६३ ॥ सर्वंताभ्यांतदर्थंहितद्भोग्यंनह्यहंमम ॥ इत्यसौकथितोविप्रमंत्रस्यार्थःसमासतः ॥ ६४ ॥

---

[1] [illegible]र्द्य पर्वम्–इ० पा० । [2] कामम्–इ० पा० । [3] धूर्मोर्चासौ–इ० पा० ।

[illegible] शरणागतिः ॥ आत्मार्पणमिमेपंचपर्यायास्तेमयोदिताः ॥ ६५ ॥ अयमेवार्चितनीयोदिवानक्तमतंद्रितैः ॥ ६६ ॥ इति
[illegible] वृंदावनमाहात्म्येद्वादशोऽध्यायः ॥ १२ ॥ . ॥ छ ॥ ॥ शिवउवाच ॥ ॥ अथदीक्षाविधिंवक्ष्येशृणुनारदतत्वतः ॥
श्रवणादेवमुच्यंतांविनातस्यविधानतः ॥ १ ॥ आविरंच्याज्जगत्सर्वंविज्ञायनश्वरंबुधः ॥ आध्यात्मिकादित्रिविधदुःखमेवानुभूयच ॥ २ ॥ अनित्यत्वा
च्चसर्वेषांसुखानांमुनिसत्तम ॥ दुःखपक्षेविनिक्षिप्यतानितेभ्योविवर्जितः ॥ ३ ॥ विरज्यसंसृतेर्हानौसाधनानिविर्चितयेत् ॥ अनुत्तमसुखस्यापिसंप्राप्तौ
भृशनिर्वृतः ॥ ४ ॥ [1]नराणांदुष्करत्वंहिविज्ञायचमहामतिः ॥ भृशमार्त्तस्ततोविप्रमांगुरुंशरणंव्रजेत् ॥ ५ ॥ शांतोविमत्सरःकृष्णेभक्तोऽनन्यप्रयो
जनः ॥ अनन्यसाधनःश्रीमान्[2]कामलोभविवर्जितः ॥ ६ ॥ श्रीकृष्णरसतत्वज्ञःकृष्णमंत्रविदांवरः ॥ कृष्णमंत्राश्रयोनित्यंमंत्रभक्तःसदाशुचिः ॥ ७ ॥
सद्धर्मशासकोनित्यंसदाचारनियोजकः ॥ संप्रदायीकृपापूर्णोविरागीगुरुरुच्यते ॥ ८ ॥ एवमादिगुणःप्रायःशुश्रूषुर्गुरुपादयोः ॥ गुरौनितांतभक्तश्चमु
मुक्षुःशिष्यउच्यते ॥ ९ ॥ यत्साक्षात्सेवनंतस्यप्रेम्णाभागवतोभवेत् ॥ समोक्षःप्रोच्यतेप्राज्ञैर्वेदवेदांगवेदिभिः ॥ १० ॥ आश्रित्यस्वगुरोःपादौनि
जवृत्तांनिवेदयेत् ॥ ससंदेहानपाकृत्यबोधयित्वापुनःपुनः ॥ ११ ॥ स्वपादप्रणतंशांतंशुश्रूषुंनि[3]जपादयोः ॥ अतिहृष्टमनाःशिष्यंमनुमध्यापये
त्परम् ॥ १२ ॥ चंदनेनमृदावापिविलिखेद्बाहुमूलयोः ॥ वामदक्षिणयोर्विप्रशंखचक्रेयथाक्रमम् ॥ १३ ॥ ऊर्द्धंपुंड्रंततःकुर्याद्भालादिषुविधानतः ॥
ततोमंत्रद्वयंतस्यदक्षकर्णोविनिर्दिशेत् ॥ १४ ॥ मंत्रार्थंचवदेत्तस्मैयथावदनुपूर्वशः ॥ दासशब्दयुतंनामधार्यंतस्यप्रयत्नतः ॥ १५ ॥ ततोतिभक्त्या
सस्नेहंवैष्णवान्भोजयेद्बुधः ॥ श्रीगुरुंपूजयेच्चापिवस्त्रालंकरणादिभिः ॥ १६ ॥ सर्वस्वंगुरवेदद्यात्तदर्द्धंवामहामुने ॥ स्वदेहमपिनिक्षिप्यगुरौस्थेयम
किंचनैः ॥ १७ ॥ यएतैःपंचभिर्विद्वान्संस्कारैःसंस्कृतोभवेत् ॥ दास्यभागीसकृष्णस्यनान्यथाकल्पकोटिभिः ॥ १८ ॥ अंकनंचोर्द्ध्वंपुंड्रश्चमंत्रो
नामविधारणम् ॥ पंचमोयागइत्युक्ताःसंस्काराःपूर्वसूरिभिः ॥ १९ ॥ अंकनंशंखचक्राद्यैःसच्छिद्रंपुंड्रमुच्यते ॥ दासशब्दयुतंनाममंत्रोयुगलसं
ज्ञकः ॥ २० ॥ गुरुवैष्णवयोःपूजायागइत्यभिधीयते ॥ एतेपरमसंस्कारामयातेपरिकीर्तिताः ॥ २१ ॥ अथतुभ्यंप्रपन्नानांधर्मान्वक्ष्यामिनारद ॥
यानास्थायगमिष्यंतिहरिधामनराःकलौ ॥ २२ ॥ इत्थंगुरोर्लब्धमंत्रोगुरुभक्तपरायणः ॥ सेवमानोगुरुंनित्यंतत्कृपांभावयेत्सुधीः ॥ २३ ॥ सतांधर्मा
स्ततःशिक्षेत्प्रपन्नानांविशेषतः ॥ [4]स्वेष्टदेवधियानित्यंवैष्णवान्परितोषयेत् ॥ २४ ॥ ताडनंभर्त्सनंकामिभोग्यत्वेनयथास्त्रियः ॥ गृह्णंति

---

१ सराणाम्--इ०, सुराणाम्--इ०, सर्वाणाम्--इ० च पा० । २ क्रोधलोभविवर्जितः--इ० पा० । ३ गुरुपादयोः--इ० पा० । ४ स्वेष्टप्रदधिया--इ० पा० ।

वैष्णवानांचतत्तद्ग्राह्यंतथाबुधैः ॥ २५ ॥ ऐहिक्यामुष्मिकीचिंतानैवकार्याकदाचन ॥ ऐहिकंतुसदाभाव्यंपूर्वाचरितकर्मणा ॥ २६ ॥ आमु
ष्मिकंतथाकृष्णः स्वयमेवकरिष्यति ॥ अतोहितत्कृतेत्याज्यःप्रयत्नःसर्वथानरैः ॥ २७ ॥ सर्वोपायपरित्यागःकृष्णीयात्मतयार्चनम् ॥
सुचिरंप्रोषितेकांतेयथापतिपरायणा ॥ २८ ॥ प्रियानुरागिणीदीनातस्यसंगैककांक्षिणी ॥ तद्गुणान्भावयेन्नित्यंगायत्यपिशृणोतिच ॥ २९ ॥ श्रीकृष्ण
गुणलीलादिस्मरणादितथाचरेत् ॥ नपुनःसाधनत्वेनकार्यंतत्तुकदाचन ॥ ३० ॥ चिरंप्रोष्यागतंकांतंप्राप्यकांताधियायथा ॥ चुंबंतीवाश्लिष्यंतीवने
त्रांतेनपिबंत्यपि ॥ ३१ ॥ ब्रह्मानंदगतेवाशुसेवंतेपरयामुदा ॥ श्रीमदर्चावतारेणतथापरिचरेद्धरिम् ॥ ३२ ॥ अनन्यशरणोनित्यंतथैवानन्यसा
धनः ॥ अनन्यसाधनार्थत्वात्स्यादनन्यप्रयोजनः ॥ ३३ ॥ नान्यंचपूजयेद्देवंननमेत्तंस्मरेन्नच ॥ नचपश्येन्नगायेच्चनचनिंदेत्कदाचन ॥ ३४ ॥ नान्यो
च्छिष्टंचभुंजीतनान्यशेषंचधारयेत् ॥ अवैष्णवानांसंभाषावंदनादिविवर्जयेत् ॥ ३५ ॥ ईशवैष्णवयोर्निंदांशृणुयान्नकदाचन ॥ कर्णौपिधायगंतव्यं
शक्तौदंडंसमाचरेत् ॥ ३६ ॥ आश्रित्यचातकींवृत्तिंदेहपातावधिद्विज ॥ द्वयस्यार्थंभावयित्वास्थेयमित्येवमेमतिः ॥ ३७ ॥ सरःसमुद्रनद्यादीन्विहा
यचातकोयथा ॥ तृषितोम्रियतेवापियाचतेवापयोधरम् ॥ ३८ ॥ एवमेवप्रयत्नेनसाधनानिविचिंतयेत् ॥ स्वेष्टदेवःसदायाच्योगतिस्त्वंमेभवेरिति ॥
॥ ३९ ॥ स्वेष्टदेवतदीयानांगुरोरपिविशेषतः ॥ आनुकूल्येसदास्थेयंप्रातिकूल्यंविवर्जयेत् ॥ ४० ॥ सकृत्प्रपन्नोवक्ष्यामिकल्याणगुणतांतयोः ॥ वि
चिंत्यविश्वसेदेतौमामिमावुद्धरिष्यतः ॥ ४१ ॥ संसारसागरान्नाथमित्रपुत्रगृहाकुलात् ॥ गोप्तारौमेयुवामेवप्रपन्नभयभंजनौ ॥ ४२ ॥ योहंम
मास्तियत्किंचिदिहलोकेपरत्रच ॥ तत्सर्वंभवतोरद्यचरणेषुसमर्पितम् ॥ ४३ ॥ अहमस्म्यपराधानामालयस्त्यक्तसाधनः ॥ अगतिश्चततो
नाथौभवंतावेवमेगतिः ॥ ४४ ॥ तवास्मिराधिकाकांतकर्मणामनसागिरा ॥ कृष्णकांतेतवैवास्मियुवामेवगतिर्मम ॥ ४५ ॥ शरणंवां
प्रपन्नोस्मिकरुणानिकराकरौ ॥ प्रसादंकुरुतंदास्यंमयिदुष्टेपराधिनि ॥ ४६ ॥ इत्येवंजपतानित्यंस्थातव्यंपद्यपंचकम्[1] ॥ अचिरादेवतद्दास्य
मिच्छतामुनिसत्तम ॥ ४७ ॥ बाह्यधर्मामयाह्येतेसंक्षेपेणोपवर्णिताः ॥ आंतरःपरमोधर्मःप्रपन्नानामथोच्यते ॥ ४८ ॥ कृष्णप्रियासखीभावंसमा
श्रित्यप्रयत्नतः ॥ तयोःसेवांप्रकुर्वीतदिवानक्तमतंद्रितः ॥ ४९ ॥ उक्तोमंत्रस्तदंगानितथातस्याधिकारिणः ॥ तद्धर्माश्चतथातेभ्यःफलंमंत्रस्यना
रद ॥ ५० ॥ [illegible]त्वमप्येतत्तयोर्दास्यमवाप्स्यसि ॥ स्वाधिकारक्षयेविप्रसंदेहोनात्रकश्चन ॥ ५१ ॥ सकृन्मात्रप्रपन्नायतवास्मीतिचयाचते ॥ नि

[illegible]र्थः । [1] पद्यपंकजम्–इति पाठः केषुचित्पुस्तकेषु दृश्यते–स तु शोधकानवधानकृत एव । प्रकृताचिरोक्तपद्यपंचकोक्तिस्वारस्येन प्रकृतमूलोक्तपाठ एव साधीयान् ।

[illegible]धारणा ॥ ५२ ॥ अत्रतेवर्णयिष्यामिरहस्यंपरमाद्भुतम् ॥ श्रुतपूर्वंमयाकृष्णात्साक्षाद्भगवतःपरम् ॥ ५३ ॥ एषतेक
[illegible]ाम ॥ गुह्यादेषगुह्यतमोगोपनीयःप्रयत्नतः ॥५४॥ मंत्ररत्नमहंपूर्वंजपन्कैलासमूर्द्धनि ॥ ध्यायन्नारायणंदेवमवसंगहनेवने ॥ ५५ ॥
ततस्तुभगवांस्तुष्टःप्रादुरासममाग्रतः ॥ व्रियतांवरइत्युक्तेमयाप्युद्घाटचलोचने ॥ ५६ ॥ दृष्टोदेवःप्रियासार्द्धंसंस्थितोगरुडोपरि ॥ प्रणिपत्यावोचमहंव
रदंकमलापतिम् ॥ ५७ ॥ यद्रूपंतेकृपासिंधोपरमानंददायकम् ॥ सर्वानंदाश्रयंनित्यंमूर्तिमत्सर्वतोधिकम् ॥ ५८ ॥ निर्गुणंनिष्क्रियंशांतंयद्ब्रह्मेतिविदु
र्बुधाः ॥ तदहंद्रष्टुमिच्छामिचक्षुर्भ्यांपरमेश्वर ॥ ५९ ॥ ततोमामाहभगवान्प्रपन्नंकमलापतिः ॥ तदद्यद्रक्ष्यसेरूपंयत्तेमनसिकांक्षितम् ॥ ६० ॥ यमुना
पश्चिमेतीरेगच्छवृंदावनंमम ॥ इत्युक्त्वांतर्दधेदेवःप्रियासार्द्धं[1]जगत्पतिः ॥ ६१ ॥ अहमप्यागतस्तर्हियमुनायास्तटंशुभम् ॥ तत्रकृष्णम
पश्यंचसर्वदेवेश्वरेश्वरम् ॥ ६२ ॥ गोपवेषधरंकांतंकिशोरवयसान्वितम् ॥ प्रियास्कंधेसुविन्यस्तवामहस्तंमनोहरम् ॥ ६३ ॥ हसंतंहासयतंतांमध्येगोपी
कदंबके ॥ स्निग्धमेघसमाभासंकल्याणगुणमंदिरम् ॥ ६४ ॥ प्रहस्यचततःकृष्णोमामाहामृतभाषणः ॥ अहंतेदर्शनंयातोज्ञात्वारुद्रतवेप्सितम् ॥ ६५ ॥
यदद्यमेत्वयादृष्टमिदंरूपमलौकिकम् ॥ घनीभूतामलप्रेमसच्चिदानंदविग्रहम् ॥ ६६ ॥ नीरूपंनिर्गुणंव्यापिक्रियाहीनंपरात्परम् ॥ वदंत्युपनिषत्संघाइद
मेवममानघम् ॥ ६७ ॥ प्रकृत्युत्थगुणाभावादनंतत्वात्तथेश्वरम् ॥ असिद्धत्वान्मद्गुणानांनिर्गुणंमांवदंतिहि ॥ ६८ ॥ अदृश्यत्वान्ममैतस्यरूपस्यचर्मच
क्षुषा ॥ अरूपंमांवदंत्येतेवेदाःसर्वेमहेश्वर ॥ ६९ ॥ व्यापकत्वाच्चिदंशेनब्रह्मेतिचविदुर्बुधाः ॥ अकर्तृत्वात्प्रपंचस्यनिष्क्रियंमांवदंतिहि ॥ ७० ॥ मायागुणै
र्यतोमेंशाःकुर्वंतिसर्जनादिकम् ॥ नकरोमिस्वयंकिंचित्सृष्ट्यादिकमहंशिव ॥ ७१ ॥ अहमासांमहादेवगोपीनांप्रेमविह्वलः ॥ क्रियांतरंनजानामिनात्मान
मपिनारद ॥ ७२ ॥ विहराम्यनयानित्यमस्याःप्रेमवशीकृतः ॥ इमांतुमत्प्रियांविद्धिराधिकांपरदेवताम् ॥ ७३ ॥ अस्याश्चपरितःपश्यसख्यःशतसहस्र
शः ॥ नित्याःसर्वाइमारुद्रयथाहंनित्यविग्रहः ॥ ७४ ॥ गोपा[2]गावोगोपिकाश्चसदावृंदावनंमम ॥ सर्वमेतन्नित्यमेवचिदानंदरसात्मकम् ॥ ७५ ॥ इदमानंद
कंदाख्यंविद्धिवृंदावनंमम ॥ यस्मिन्प्रवेशमात्रेणनपुनःसंसृतिंविशेत् ॥ ७६ ॥ मद्वनंप्राप्ययोमूढःपुनरन्यत्रगच्छति ॥ सआत्महाभवेद्देवसत्यंसत्यंमयो
दितम् ॥ ७७ ॥ वृंदावनंपरित्यज्यनैवगच्छाम्यहंक्वचित् ॥ निवसाम्यनयासार्द्धमहमत्रैवसर्वदा ॥ ७८ ॥ इत्येवंसर्वमाख्यातंयत्तेरुद्रहृदिस्थितम् ॥ कथयस्व
ममेदानींकिमन्यच्छ्रोतुमिच्छसि ॥ ७९ ॥ ततस्तमब्रवंदेवमहंचमुनिसत्तम ॥ ईदृशस्त्वंकथंलभ्यस्तमुपायंवदस्वमे ॥ ८० ॥ ततोमामाहभगवान्साधु

---

१ श्रिया सार्धम्--इ० पा० । २ सखायः परितो गोपा गावो वृंदावनं मम--इ० पा० ।

रुद्रतवोदितम् ॥ अतिगुह्यतमंह्येतद्गोपनीयंप्रयत्नतः ॥८१॥ सकृदावांप्रपन्नोयस्त्यक्तोपायउपासते ॥ गोपीभावेनदेवेशसमामेतिनचेतरः ॥८२॥ सकृदावां
प्रपन्नोवामात्प्रियामेकिकामुत॥सेवतेनन्यभावेनसमामेतिनसंशयः॥८३॥योमामेवप्रपन्नश्चमात्प्रियांनमहेश्वर॥नकदापिसचाप्नोतिमामेवंतेमयोदितम् ॥८४॥
सकृदेवप्रपन्नोयस्तवास्मीतिवदेदपि ॥ साधनेनविनाप्येवमामाप्नोतिनसंशयः ॥ ८५ ॥ तस्मात्सर्वप्रयत्नेनमात्प्रियांशरणंव्रजेत् ॥ आश्रित्यमत्प्रि
यांरुद्रमांवशीकर्त्तुमर्हसि ॥ ८६ ॥ इदंरहस्यंपरमंमयातेपरिकीर्तितम् ॥ त्वयाप्येतन्महादेवगोपनीयंप्रयत्नतः ॥ ८७ ॥ त्वमप्येनांसमाश्रित्यराधिकांमम
वल्लभाम् ॥ जपन्मेयुगलंमंत्रंसदातिष्ठमदालये ॥ ८८ ॥ ॥ शिवउवाच ॥ ॥ इत्युक्त्वादक्षिणेकर्णेममकृष्णोदयानिधिः ॥ उपदिश्यपरंमंत्रंसंस्कारांश्च
विधायहि ॥ ८९ ॥ सगणोऽतर्दधेविप्रतत्रैवममपश्यतः ॥ अहमप्यत्रतिष्ठामितदारभ्यनिरंतरम् ॥ ९० ॥ सर्वमेतन्मयातुभ्यंसांगमेवप्रकीर्त्तितम् ॥ अधुना
वदविप्रेंद्रकिंभूयःश्रोतुमिच्छसि ॥ ९१ ॥ ॥इति श्रीपद्मपुराणेपातालखंडेवृंदावनमाहात्म्येत्रयोदशोऽध्यायः ॥ १३ ॥ छ ॥नारदउवाच ॥ ॥ भग
वन्सर्वमाख्यातंयद्यत्पृष्टंमयागुरो ॥ अधुनाश्रोतुमिच्छामिभावमार्गमनुत्तमम् ॥ १ ॥ ॥ शिवउवाच ॥ ॥ साधुविप्रत्वयापृष्टंसर्वलोकहितैषिणा ॥ रह
स्यमपिवक्ष्यामितन्मेनिगदतःशृणु ॥ २ ॥ दास्यःसखायःपितरौप्रेयस्यश्चहरेरिह ॥ सर्वेनित्यामुनिश्रेष्ठवें[2]संतिगुणशालिनः ॥ ३ ॥ यथाप्रकटलीलायांपु
राणेषुप्रकीर्तिताः ॥ तथातेनित्यलीलायांसंतिवृंदावनेभुवि ॥ ४ ॥ गमनागमनेनित्यंकरोतिवनगोष्ठयोः ॥ गोचारणंवयस्यैश्चविनाऽसुरविघातनम् ॥ ५ ॥
करकीयाभिमानिन्यस्तथातस्यप्रियाजनाः ॥ प्रच्छन्नेनैवभावेनरमयंतिनिजप्रियम् ॥६॥आत्मानंचिंतयेत्तत्रतासांमध्येमनोरमाम् ॥ रूपयौवनसंपन्नांकिशो
रींप्रमदाकृतिम् ॥७॥नानाशिल्पकलाभिज्ञांकृष्णभोगानुरूपिणीम् ॥ प्रार्थितामपिकृष्णेनतत्रभोगपराङ्मुखीम् ॥८॥ राधिकानुचरींतत्रतत्सेवनपरायणा
म् ॥ कृष्णादप्यधिकंप्रेमराधिकायांप्रकुर्वतीम् ॥ ९ ॥ प्रीत्यानुदिवसंयत्नात्तयोःसंगमकारिणीम् ॥ तत्सेवनसुखाह्लादभावेनातिसुनिर्वृताम्॥१०॥इत्यात्मानं
विचिंत्यैवतत्रसेवांसमाचरेत् ॥ ब्राह्मंमुहूर्त्तमारभ्ययावत्स्यात्तुमहानिशा ॥ ११ ॥ ॥ नारदउवाच ॥ ॥ हरेर्दैनंदिनींलीलांश्रोतुमिच्छामितत्वतः ॥ लीला
मजानतासेव्योमनसातुकथंहरिः ॥ १२ ॥ ॥ शिवउवाच ॥ ॥ नाहंजानामितांलीलांहरेर्नारदतत्वतः ॥ वृंदादेवीमि[3]तोगच्छसातेलीलांप्रवक्ष्यति ॥ १३ ॥
अविदूरइतःस्थानात्केशीतीर्थसमीपतः ॥ सखीसंघवृतासास्तेगोविंदपरिचारिका ॥ १४ ॥ ॥ सूतउवाच ॥ इत्युक्तस्तंपरिक्रम्यहृष्टोनत्वापुनःपुनः ॥
[illegible] मुनिसत्तमः ॥ १५ ॥ वृंदापिनारदंदृष्ट्वाप्रणम्यचपुनःपुनः ॥ उवाचचमुनिश्रेष्ठकथमत्रागतिस्तव ॥ १६ ॥ ॥ नारदउवाच ॥ ॥

---

[2] तत्तुल्यागुणशालिनः--इ० पा० । [3] अतः--इ० पा० ।

कचरितंहरेः ॥ तदादितोमममब्रूहियदियोग्योऽस्मिशोभने ॥ १७॥ ॥ वृंदोवाच ॥ ॥ रहस्यमपिवक्ष्यामिकृष्णभक्तोसिनारद ॥
ाद्गुह्यतरंमहत् ॥ १८ ॥ मध्येवृंदावनेरम्येपंचाशत्कुंजमंडिते ॥ कल्पवृक्षनिकुंजेतुदिव्यरत्नमयेगृहे ॥ १९ ॥ निद्रितौतिष्ठतस्त
ल्पेनिबिडालिंगितौमिथः ॥ मदाज्ञाकारिभिःपश्चात्पक्षिभिर्बोधितावपि ॥ २० ॥ गाढालिंगनजानंदमाप्तौतद्भंगकातरौ ॥ नमनःकुरुतस्तल्पात्समुत्था
तुंमनागपि ॥ २१ ॥ ततश्चसारिकासंघैःशुकाद्यैःपरितोमुहुः ॥ बोधितौविविधैर्वाक्यैःस्वतल्पादुदतिष्ठताम् ॥ २२ ॥ उपविष्टौततोदृष्ट्वासख्यस्तल्पे
मुदान्वितौ ॥ प्रविश्यसेवांकुर्वंतितत्कालेह्युचितांतयोः ॥ २३ ॥ पुनश्चसारिकावाक्यैस्तावुत्थायस्वतल्पतः ॥ गच्छतःस्वस्वभवनंभीत्युत्कंठाकु
लौततः ॥ २४ ॥ प्रातश्चबोधितोमात्रातल्पादुत्थायसत्वरः ॥ कृत्वाकृष्णोदंतकाष्ठंबलदेवसमन्वितः ॥ २५ ॥ मात्रानुमोदितोयातिगोशालांसखिभि
र्वृतः ॥ राधापिबोधिताविप्रवयस्याभिःस्वतल्पतः ॥२६॥ उत्थायदंतकाष्ठादिकृत्वाभ्यंगंसमाचरेत् ॥ स्नानवेदींततोगत्वास्नापितासानिजालिभिः ॥२७॥
भूषागृहेव्रजेत्तत्रवयस्याभूषयंत्यपि ॥ भूषणैर्विविधैर्दिव्यैर्गंधमाल्यानुलेपनैः ॥ २८ ॥ ततःसखीजनैस्तस्याःश्वश्रूंसंप्रार्थ्ययत्नतः ॥ [2]केतुंमाहूयतेस्वन्नं
ससखीसायशोदया ॥२९॥ ॥ नारदउवाच ॥ ॥ कथमाहूयतेदेविपाकार्थंतुयशोदया ॥ सतीषुपाककर्त्रीषुरोहिणीप्रमुखास्वपि ॥३०॥ ॥ वृंदोवाच ॥ ॥
पूर्वंदुर्वाससादत्तोवरस्तस्यैमहामुने ॥ इतिकात्यायनीवक्राच्छ्रुतमासीन्मयापुरा ॥ ३१ ॥ त्वयायत्पच्यतेदेवितदन्नंमदनुग्रहात् ॥ मिष्टंस्यादमृतस्पर्द्धिभो
क्तुरायुष्करंतथा ॥३२॥ इत्याह्वयतितांनित्यंयशोदापुत्रवत्सला ॥ आयुष्मान्मेभवेत्पुत्रःस्वादुलोभात्तथासती ॥ ३३ ॥ श्वत्वानुमोदिताहृष्टासापिनंदालयं
व्रजेत् ॥ससखीप्रकरातत्रगत्वापाकंकरोतिच ॥३४॥ कृष्णोऽपिदुग्ध्वागाःकाश्चिद्दोहयित्वाजनैःपराः ॥ आगच्छतिपितुर्वाक्यात्स्वगृहंसखिभिर्वृतः ॥ ३५ ॥
अभ्यंगमर्दनंकृत्वादासैःसंस्नापितोमुदा ॥ धौतवस्त्रधरःस्रग्वीचंदनाक्तकलेवरः ॥ ३६ ॥ द्विफालबद्धचिकुरैर्ग्रीवाभालोपरिस्फुरन् ॥ चंद्राकारस्फुरद्भालति
लकालकरंजितः ॥ ३७ ॥ कंकणांगदकेयूररत्नमुद्रालसत्करः ॥ मुक्ताहारस्फुरद्वक्षामकराकृतिकुंडलः ॥ ३८ ॥ मुहुराकारितोमात्राप्रविशेद्भोजना
लयम् ॥ अवलंब्यकरंसख्युर्बलदेवमनुव्रतः ॥ ३९ ॥ भुंक्तेथविविधान्नानिभ्रात्राचसखिभिर्वृतः ॥ हासयन्विविधैर्हास्यैःसखींस्तैर्हसतिस्वयम् ॥ ४० ॥
इत्थंभुक्तातथाचम्यदिव्यखट्वोपरिक्षणम् ॥ विश्रम्यसेवकैर्दत्तंतांबूलंविभजन्नदन् ॥ ४१ ॥ गोपवेषधरःकृष्णोधेनुवृंदपुरस्सरः ॥ व्रजवासिजनैःप्रीत्यासर्वै
रनुगतःपथि ॥ ४२ ॥ पितरंमातरंनत्वानेत्रांतेनापितंगणम् ॥ यथायोग्यंतथाचान्यान्विनिवर्त्यवनंव्रजेत् ॥ ४३ ॥ वनंप्रविश्यसखिभिःक्रीडयित्वाक्षणं

---

१ अपि तौ--इ० पा० । २ पक्तुम्--इ० पा० ।

ततः ॥ विहारैर्विविधैस्तत्रवनेविक्रीडतेमुदा ॥ ४४ ॥ वंचयित्वाततःसर्वान्द्वित्रैःप्रियसखैर्वृतः ॥ संकेतकंव्रजेद्धर्षात्प्रियासंदर्शनोत्सुकः ॥ ४५ ॥
सापिकृष्णंवनंयातंदृष्ट्वास्वंगृहमागता ॥ सूर्यादिपूजाव्याजेनकुसुमाहृतयेतथा ॥ ४६ ॥ वंचयित्वागुरून्यातिप्रियसंगेच्छयावनम् ॥ इत्थंतौबहुय
तेनमिलित्वाकानने[1]ततः ॥ ४७ ॥ विहारैर्विविधैस्तत्रदिनंविक्रीडतोमुदा ॥ दोलायांचसमारूढौसखिभिर्दोलितौक्वचित् ॥ ४८ ॥ क्वापिवेणुंक
रस्त्रस्तंप्रिययापहृतंहरिः ॥ अन्वेषयन्नुपालब्धोविप्रलब्धप्रियागणैः ॥ ४९ ॥ हसितैर्बहुधाताभिर्हासितस्तत्रतिष्ठति ॥ वसंतवायुनाजुष्टंवनखण्डंमुदा
क्वचित् ॥ ५० ॥ प्रविश्यचंदनांभोभिःकुंकुमादिजलैरपि ॥ निषिंचतोयंत्रमुक्तैस्तत्पंकैर्लिंपतोमिथः ॥ ५१ ॥ सख्योऽप्येवंनिषिंचंतितांश्चतौसिं
चतःपुनः ॥ वसंतवायुजुष्टेषुवनषंडेषुसर्वतः ॥ ५२ ॥ तत्तत्कालोचितैर्नानाविहारैःसगणौद्विज ॥ श्रांतौक्वचिद्वृक्षमूलमासाद्यमुनिसत्तम ॥ ५३ ॥
उपविश्यासनेदिव्येमधुपानंप्रचक्रतुः ॥ ततोमधुमदोन्मत्तौनिद्रयामीलितेक्षणौ ॥ ५४ ॥ मिथःपाणीसमालंब्यकामबाणवशंगतौ ॥ रिरंसूविशतः
कुंजंस्खलद्वाङ्मनसौपथि ॥ ५५ ॥ क्रीडतश्चततस्तत्रकरिणीयूथपौयथा ॥ सख्योपिमधुभिर्मत्तानिद्रयापीडितेक्षणाः ॥ ५६ ॥ अभितोमंजुकुंजेषु
सर्वाएवापिशिश्यिरे ॥ पृथगेकेनवपुषाकृष्णोपियुगपद्विभुः ॥ ५७ ॥ सर्वासांसंनिधिंगच्छेत्प्रिययाप्रेरितोमुहुः ॥ रमयित्वाचताःसर्वाःकरिणीर्गज
राडिव ॥ ५८ ॥ प्रिययाचतथाताभिःक्रीडार्थंचसरोव्रजेत् ॥ जलसेकैर्मिथस्तत्रक्रीडतःसगणौततः ॥ ५९ ॥ वासःस्रक्चंदनैर्दिव्यैर्भूषणैरपिभूषि
तौ ॥ तत्रैवसरसस्तीरेदिव्यरत्नमयेगृहे ॥ ६० ॥ प्रागेवफलमूलानिकल्पितानिमयामुने ॥ हरिस्तुप्रथमंभुक्त्वाकांतयापरिवेष्टितः ॥ ६१ ॥
द्वित्राभिःसेवितोगच्छेच्छय्यांपुष्पविनिर्मिताम् ॥ तांबूलैर्व्यजनैस्तत्रपादसंवाहनादिभिः ॥ ६२ ॥ सेव्यमानोहसंस्ताभिर्मोदतेप्रेयसींस्मरन् ॥ राधि
कापिहरौसुप्तेसगणामुदितांतरा ॥ ६३ ॥ अपितत्र[2]गतप्राणातदुच्छिष्टंभुनक्तिच ॥ किंचिदेवततोभुक्त्वाव्रजेच्छय्यानिकेतनम् ॥ ६४ ॥ द्रष्टुंकांत
मुखांभोजंचकोरीवनिशाकरम् ॥ तांबूलचर्वितंतस्यतत्रत्याभिर्निवेदितम् ॥ ६५ ॥ तांबूलान्यपिचाश्नातिविभजंतीप्रियालिषु ॥ कृष्णोपितासां
शुश्रूषुःस्वच्छंदंभाषितंमिथः ॥ ६६ ॥ प्राप्तनिद्रइवाभातिविनिद्रोपिपटावृतः ॥ ताश्चक्ष्वेलीक्षणंकृत्वाकुतश्चिदनुमानतः ॥ ६७ ॥ विदश्यरसनांदद्भिःपश्यं
[illegible] ॥ विलीनाइवलज्जान्धौक्षणमूचुर्नकिंचन ॥ ६८ ॥ क्षणादेवततोवस्त्रंदूरीकृत्यतदंगतः ॥ साधुनिद्रांगतोसीतिहासयंत्योहसंति

---

[1] तु तान्सर्वान्विने विक्रीडतो मुदा--इ० पा० । [2] तत्र गतप्राणा–तत्र कृष्णे गताःप्राणा अंतःकरणवृत्तयो यस्याःसा–कृष्णैकमनस्केत्यर्थः ।

धैर्हास्यैरममाणौगणैःसह ॥ अनुभूयक्षणंनिद्रासुखंचमुनिसत्तम ॥ ७० ॥ उपविश्यासनेदिव्येसगणौविस्तृतेमुदा ॥
प [illegible] ल्पेषपरिच्छदान् ॥ ७१ ॥ अक्षैर्विक्रीडतःप्रेम्णानर्मालापपुरस्सरम् ॥ पराजितोऽपिप्रिययाजितोहमितिवैब्रुवन् ॥ ७२ ॥
हारादिग्रहणेतस्याःप्रवृत्तस्ताडयतेतया ॥ तयैवंताडितःकृष्णःकरेणास्यसरोरुहे ॥ ७३ ॥ विषण्णमानसोभूत्वागंतुंप्रकुरुतेमतिम् ॥
जितोऽस्मिचेत्त्वयादेविगृह्यतांयत्पणीकृतम् ॥ ७४ ॥ चुंबनादिमयादत्तमित्युक्त्वासातथाचरेत् ॥ कौटिल्यंतद्भ्रुवोर्द्रष्टुंश्रोतुंतद्भर्त्सनंवचः ॥ ७५ ॥
ततःसारीशुकानांचश्रुत्वावागाहवंमिथः ॥ निर्गच्छतस्ततःस्थानाद्गंतुकामौगृहंप्रति ॥ ७६ ॥ कृष्णःकांतामनुज्ञाप्यगवामाभिमुखंव्रजेत् ॥ सातुसूर्य
गृहंगच्छेत्सखीमंडलसंयुता ॥ ७७ ॥ कियद्दूरंततोगत्वापरावृत्यहरिंपुनः ॥ विप्रवेषंसमास्थाययातिसूर्यगृहंप्रति ॥ ७८ ॥ सूर्यंप्रपूजयेत्तत्रप्रार्थित
स्तत्सखीजनैः ॥ तदैवकल्पितैर्वेदैःपरिहासविगर्भितैः ॥ ७९ ॥ ततस्ताज्ञापितंकांतंपरिज्ञायविचक्षणाः ॥ आनंदसागरेमग्नानविदुःस्वंनचापरम् ॥ ८० ॥
विहारैर्विविधैरेवंसार्द्धंयामद्वयंमुने ॥ नीत्वागृहंव्रजेयुस्ताःसचकृष्णोगवांव्रजेत् ॥ ८१ ॥ संगम्यस्वसखीन्कृष्णोगृहीत्वागाःसमंततः ॥ आगच्छति
व्रजंहर्षान्नादयन्मुरलींमुने ॥ ८२ ॥ ततोनंदादयःसर्वेश्रुत्वावेणुरवंहरेः ॥ गोधूलिपटलव्याप्तंदृष्ट्वाचापिनभस्तलम् ॥ ८३ ॥ विसृज्यसर्वकर्माणि
स्त्रियोबालादयोपिच ॥ कृष्णस्याभिमुखंयांतितद्दर्शनसमुत्सुकाः ॥ ८४ ॥ राजमार्गेव्रजद्वारियत्रसर्वेव्रजौकसः ॥ कृष्णोपितान्समागम्ययथावदनु
पूर्वशः ॥ ८५ ॥ दर्शनस्पर्शनैर्वाचास्मितपूर्वावलोकनैः ॥ गोपवृद्धान्नमस्कारैःकायिकैर्वाचिकैरपि ॥ ८६ ॥ अष्टांगपातैःपितरौरोहिणीमपिनारद ॥
नेत्रांतसूचितेनैवाविनयेनाप्रियांतथा ॥ ८७ ॥ एवंतैस्तद्यथायोग्यंव्रजौकोभिःप्रपूजितः ॥ गवालयेतथागाश्चसंप्रवेश्यसमंततः ॥ ८८ ॥ पितृभ्याम
र्थितोयातिभ्रात्रासहनिजालयम् ॥ स्नात्वापीत्वातत्रकिंचिद्भुक्त्वामात्रानुमोदितः ॥ ८९ ॥ गवालयंपुनर्यातिदोग्धुकामोगवांपयः ॥ ताश्चदुग्ध्वादोह
यित्वापाययित्वाचकाश्चन ॥ ९० ॥ पित्रासार्द्धंगृहंयातितत्रभावशतानुगः ॥ तत्रपित्रापितृव्यैश्चतत्पुत्रैश्चबलेनच ॥ ९१ ॥ भुनक्तिविविधान्नानिच
र्व्यचोष्यादिकानिच ॥ तन्मातिःप्रार्थनात्पूर्वंराधिकाचतदैवह ॥ ९२ ॥ प्रस्थापयेत्सखीद्वारापक्वान्नानितदालयम् ॥ श्लाघयंश्चहरिस्तानिभुक्त्वापित्रा
दिभिःसह ॥ ९३ ॥ सभागृहंव्रजेत्तैश्चजुष्टंबंदिजनादिभिः ॥ पक्वान्नानिगृहीत्वायाःसख्यस्तत्रपुरागताः ॥ ९४ ॥ बहूनिचपुनस्तानिप्रदत्तानि
यशोदया ॥ सख्यस्तत्रतयादत्तंकृष्णोच्छिष्टंनयंतिच ॥ ९५ ॥ सर्वंताभिःसमानीयराधिकायैनिवेद्यते ॥ सापिभुक्त्वासखीवर्गयुतातदनुपूर्वशः ॥ ९६ ॥

सखीभिर्मंडितातिष्ठेदभिसर्तुंसमुद्यता ॥ प्रस्थाप्यतेमयाकाचिदितएवततःसखी ॥ ९७ ॥ तयाभिसारितासाथयमुनायाःसमीपतः ॥ कल्पवृक्षनिकुं
ज़ेस्मिन्दिव्यरत्नमयेगृहे ॥ ९८ ॥ सितकृष्णनिशायोग्यवेषायातिसखीवृता ॥ कृष्णोऽपिविविधंतत्रदृष्ट्वाकौतूहलंततः ॥ ९९ ॥
कात्यायन्यामनोज्ञानिश्रुत्वासंगीतकान्यपि ॥ धनधान्यादिभिस्ताश्चप्रीणयित्वाविधानतः ॥ १०० ॥ जनैराराधितोमात्रायातिसख्यानिकेत
नम् ॥ मातरिप्रस्थितायांचभोजयित्वाततोगृहम् ॥ १०१ ॥ संकेतकंकांतयात्रसमागच्छेदलक्षितः ॥ मिलित्वातावुभावत्रक्रीडतोवनराजि
षु ॥ १०२ ॥ विहारैर्विविधैरासलास्यहासपुरस्सरैः ॥ सार्द्धयामद्वयंनीत्वारात्रेरेवंविहारतः ॥ १०३ ॥ सुषुप्सूविशतःकुंजंपक्षिणीभिरल
क्षितौ ॥ एकांतकुसुमैःकॢप्तेकेलितल्पेमनोहरे ॥ १०४ ॥ सुप्तावातिष्ठतस्तत्रसेव्यमानौनिजालिभिः ॥ इतितेसर्वमाख्यातंनैत्यकंचरितं
हरेः ॥ १०५ ॥ पापिनोपिविमुच्यंतेश्रवणादस्यनारद ॥ ॥ नारदउवाच ॥ ॥ धन्योस्म्यनुगृहीतोस्मित्वयादेविनसंशयः ॥ १०६ ॥
हरेर्दैनंदिनीलीलायतोमेऽद्यप्रकाशिता ॥ ॥ सूतउवाच ॥ ॥ इत्युक्त्वातांपरिक्रम्यतयाचापिप्रपूजितः ॥ १०७ ॥ अंतर्धानंगतो[2]ब्रह्मन्नारदोमुनिस
त्तमः ॥ मयाप्येतच्चानुपूर्व्यात्सर्वमेवप्रकीर्तितम् ॥ १०८ ॥ जपेन्नित्यंप्रयत्नेनमंत्रयुग्ममनुत्तमम् ॥ कृष्णवक्त्रादिदंलब्धंपुरारुद्रेणयत्नतः ॥ १०९ ॥ ते
नोक्तंनारदायापिनारदेनममोदितम् ॥ संस्कारांश्चविधायैवमयाप्येतत्तवोदितम् ॥ ११० ॥ त्वयाप्येतद्गोपनीयंरहस्यंपरमाद्भुतम् ॥ ॥ शौनकउवाच ॥
॥ कृतकृत्योभवंसाक्षात्त्वत्प्रसादादहंगुरो ॥ १११ ॥ रहस्यानांरहस्यंयत्त्वयामह्यंप्रकाशितम् ॥ ॥ सूतउवाच ॥ ॥ धर्मानेतानुपातिष्ठञ्जल्पन्मंत्रम
हर्निशम्॥११२॥अचिरादेवतद्दास्यमवाप्स्यासिनसंशयः॥मयापिगम्यतेब्रह्मन्नित्यमायतनंविभोः॥११३॥ गुरोर्गुरोर्भानुजायाःकूले[3]गोपीश्वरस्यच ॥११४॥
इदंचरित्रंपरमंपवित्रंप्रोक्तंमहेशेनमहानुभावम् ॥ शृण्वंतियेभक्तियुतामनुष्यास्तेयांति[4]नित्यंपदमच्युतस्य ॥ ११५ ॥ धन्यंयशस्यमायुष्यमारोग्याभीष्ट
सिद्धिदम् ॥ स्वर्गापवर्गसंपत्तिकारणंपापनाशनम् ॥११६॥ भक्त्यापठंतियेनित्यंमानवाविष्णुतत्पराः ॥ नतेषांपुनरावृत्तिर्विष्णुलोकात्कथंचन॥११७॥
॥ इति श्रीपद्मपुराणेपातालखंडेश्रीवृंदावनमाहात्म्येचतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ समाप्तंवृंदावनमाहात्म्यम् ॥

[illegible] पा० । २ विप्र--इ० पा० । ३ वाणीश्वरस्य च--इ० पा० । ४ नूनम्--इ० पा० ।

इदं वृन्दावनमाहात्म्यं मुम्बय्या श्रीकृष्णदासात्मजेन
खेमराजेन स्वकीये "श्रीवेंकटेश्वर" यन्त्रालयेऽङ्कित्वा
प्रकाशितम्। संवत् १९५१ शके १८१६.

॥ * इति श्रीवृन्दावन माहात्म्यं समातम् * ॥

४८०८

॥ श्रीगणेशाय नमः ॥ सूत उवाच ॥ श्रियः पतिमथामंत्र्य गते देवर्षिसत्तमे ॥ हर्षोत्फुल्लानना सत्यातम् ॥ २३ ॥
ब्रवीत् ॥ १ ॥ सत्योवाच ॥ धन्यास्मि कृतकृत्यास्मि सफलं जीवितं मम ॥ मज्जन्मनो निदाने रैवतावासपितरौ
मम ॥ २ ॥ यौ मां त्रैलोक्यसुभगां जनयामासतुर्ध्रुवम् ॥ षोडशस्त्रीसहस्राणां वल्लभाहं यतस्तव ॥ ३
यस्मान्मयादिपुरुषः कल्पवृक्षसमन्वितः ॥ यथोक्तविधिना सम्यङ् नारदाय समर्पितः ॥ ४ ॥ यद्वार्त्तामपि
जानंति भूमौ संस्थानजंतवः ॥ सोऽयं कल्मद्रुमो गेहे मम तिष्ठति सांप्रतम् ॥ ५ ॥ त्रैलोक्याधिपतेश्चाहं श्रीपतेरतिवल्लभा
॥ अतोऽहं प्रष्टुमिच्छामि किंचित्त्वां मधुसूदन ॥ ६ ॥ यदि त्वं मत्प्रियकरः कथयस्वात्र विस्तरम्
॥ श्रुत्वा तच्च पुनश्चाहं करोमि हितमात्मनः ॥ ७ ॥ यथाकल्पं त्वया देव वियुक्ता स्यां न कर्हिचित् ॥ सूत
उवाच ॥ इति प्रियावचः श्रुत्वा स्मेरास्यः स बलानुजः ॥ ८ ॥ सत्याकरं करे धृत्वाऽगमत्कल्पतरोस्तलम् ॥
निषिध्यानुचरं लोकं सविलासः प्रियान्वितः ॥ ९ ॥ प्रहस्य सत्यामामंत्र्य प्रोवाच जगतां पतिः ॥ तत्प्रीतिपरितोषोत्थलसत्पुलकितांगकः
॥ १० ॥ श्रीकृष्ण उवाच ॥ न मे त्वत्तः प्रियतमा काचिदन्या नितंबिनी ॥ षोड-

शत्रीसहस्त्राणां प्रिया प्राणसमा ह्यसि ॥ ११ ॥ त्वदर्थं देवराजोऽपि विरुद्धो दैवतैः सह ॥ त्वया यत्प्रार्थितं कांते
शृणु तच्च महाद्भुतम् ॥ १२ ॥ सूत उवाच ॥ एकदा भगवान्कृष्णः सत्यायाः प्रियकाम्यया ॥ वैनतेयं समारूढ
इन्द्रलोकं तदागमत् ॥ १३ ॥ कल्पवृक्षं याचितवान्सोऽवदन्न ददाम्यहम् ॥ वैनतेयस्तदा क्रुद्धस्तदर्थं युयुधे
तदा ॥ १४ ॥ गोलोके गरुडो गोभिर्युद्धं चैव चकार सः ॥ गरुडस्य च तुंडेन पुच्छकर्णास्तदाऽपतन् ॥ १५ ॥
रुधिरोऽपि पपातोर्व्यां त्रीणि वस्तूनि चाभवन् ॥ कर्णेभ्यश्च तमालं च पुच्छाद्रोमी बभूव ह ॥ १६ ॥ रुधिरान्मेहदी
जाता मोक्षार्थी दूरतस्त्यजेत् ॥ तस्मादेतत्त्रयं चैव नहि सेव्यं नरैः प्रिये ॥ १७ ॥ गावस्ता गरुडं शृङ्गैः
प्रजह्नुः कुपितास्तदा ॥ गरुत्मतस्त्रयः पक्षाः पृथिव्यामपतन्प्रिये ॥ १८ ॥ पक्षात्प्राथमिकाज्जातो नीलकंठः शुभात्मकः
॥ द्वितीयाच्च मयूरो वै चक्रवाकस्तृतीयतः ॥ १९ ॥ दर्शनाद्वै त्रयाणां तु शुभं फलमवाप्नुयात् ॥ तस्मा
दिदमुपाख्यानं वर्णितं च मया प्रिये ॥ २० ॥ सुपर्णदर्शनाच्चैव यत्फलं लभते नरः ॥ तत्फलं प्राप्नुया
नाद्वै ममालयम् ॥ २१ ॥ अदेयमपि वाकार्यमकथ्यमपि यत्पुनः ॥ तत्करोमि कथं प्रश्नं कथयामि

तत्पृच्छ सर्वं कथये यत्ते मनसि वर्तते ॥ सत्योवाच ॥ दानं व्रतं तपो वापि किं न पूर्वं मया कृतम् ॥ २३ ॥
येनाहं मर्त्यजा मर्त्यभवानीताऽभवं किल ॥ तवांगार्द्धहरा नित्यं गरुडासनगामिनी ॥ २४ ॥ इन्द्रादिदेवतावास-
मगमं या त्वया सह ॥ अतस्त्वां प्रष्टुमिच्छामि किं कृतं तु मया शुभम् ॥ २५ ॥ भवांतरे च किंशीला का वाहं
कस्य कन्यका ॥ श्रीभगवानुवाच ॥ शृणुष्वैकमनाः कांते यत्कृतं पूर्वजन्मनि ॥ २६ ॥ पुण्यं व्रतं कृतवती
तत्सर्वं कथयामि ते ॥ यत्कर्म तु कृतं पूर्वं यस्य त्वं कन्यका प्रिये ॥ २७ ॥ आसीत्कृतयुगस्यांते मायापुर्य्यां
द्विजोत्तमः ॥ आत्रेयो देवशर्मेति वेदवेदांगपारगः ॥ २८ ॥ आतिथेयोऽग्निशुश्रूषी सौरव्रतपरायणः ॥ सूर्यमा-
राधयन्नित्यं साक्षात्सूर्य इवापरः ॥ २९ ॥ तस्यातिवयसश्चासीन्नाम्ना गुणवती सुता ॥ अपुत्रः स स्वशिष्याय
चंद्रनाम्ने ददौ सुताम् ॥ ३० ॥ तमेव पुत्रवन्मेने स च तं पितृवद्वशी ॥ तौ कदाचिद्वनं यातौ कुशेध्माहरणा-
र्थिनौ ॥ ३१ ॥ हिमाद्रिपादोपवने चेरतुस्तावितस्ततः ॥ तौ तस्मिन्राक्षसं घोरमायांतं संप्रपश्यतुः ॥ ३२ ॥ भय-
विह्वलसर्वांगावसमर्थौ पलायितुम् ॥ निहतौ रक्षसा तेन कृतांतसमरूपिणा ॥ ३३ ॥ तौ तत्क्षेत्रप्रभावेण धर्म-

शीलतया पुनः ॥ वैकुंठभवनं नीतौ मद्गणैर्मत्समीपगैः ॥ ३४ ॥ यावज्जीवं तु यत्ताभ्यां सूर्य्यंपूजादिकं कृतम् ॥
तेनाहं कर्मणा ताभ्यां सुप्रीतो ह्यभवं किल ॥ ३५ ॥ शैवाः सौराश्च गाणेशा वैष्णवाः शक्तिपूजकाः ॥ मामेव
प्राप्नुवंतीह वर्षांभः सागरं यथा ॥ ३६ ॥ एकोऽहं पंचधा जातः क्रियया नामभिः किल ॥ देवदत्तो यथाकश्चित्पुत्रभ्रात्रादिनामभिः ॥ ३७ ॥ ततस्तुतौ मद्भवनाभिवासिनौ विमानयानौ रविवर्चसावुभौ ॥ मत्तुल्यरूपौ मम
सन्निधानगौ दिव्यांगनाचंदनभोगभोगिनौ ॥ ३८ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये कृष्णसत्यासंवादे प्रथमोऽध्यायः ॥ १ ॥ श्रीकृष्ण उवाच ॥ ततो गुणवती श्रुत्वा रक्षसा निहतावुभौ ॥ पितृभर्तृजदुःखार्ता करुणं पर्यदेवयत् ॥१॥ गुणवत्युवाच ॥ हा नाथ हा पितस्त्यक्त्वा गच्छथः क्व मया विना ॥ बालाहं किं करोम्यद्य ह्यनाथा
भवतोर्विना ॥ २ ॥ को नु मामास्थितां गेहे भोजनाच्छादनादिभिः ॥ अकिंचित्कुशलां स्नेहात्पालयेत्पतिदूषिताम् ॥ ३ ॥ हतभाग्या हतसुखा हताशा हतजीविता ॥ शरणं कं व्रजाम्यद्य यो मे दुःखं प्रमार्जयेत् ॥ ४ ॥
क्व गच्छामि क्व तिष्ठामि किं करोमि यथाघृणम् ॥ विधात्रा हा हतास्म्यद्य कथं जीवामि बालिशा ॥ ५ ॥

श्रीकृष्ण उवाच ॥ एवं बहु विलप्याथ कुररीव भृशातुरा ॥ पपात भूमौ विकला रंभा वातहता यथा ॥ ६ ॥
चिरादाश्वस्य सा भूमौ विलप्य करुणं बहु ॥ निमग्ना शोकजलधौ दुःखार्ता समवर्तत ॥ ७ ॥ सा गृहोपस्करान्सर्वान्विक्रीय
शुभकर्म तत् ॥ तयोश्चक्रे यथाशक्ति पारलौक्यमतंद्रिता ॥ ८ ॥ तस्मिन्नेव पुरे चक्रे वासं प्रभृतिजीविनी
॥ विष्णुभक्तिरता शान्ता सत्यशौचा जितेंद्रिया ॥ ९ ॥ व्रतद्वयं तया सम्यगाजन्ममरणात्कृतम् ॥
एकादशीव्रतं सम्यक्सेवनं कार्तिकस्य च ॥ १० ॥ एतद्व्रतद्वयं कांते ममातीव प्रियंकरम् ॥ भुक्तिमुक्तिकरं
पुण्यं पुत्रसम्पत्तिदायकम् ॥ ११ ॥ कार्तिके मासि ये नित्यं तुलासंस्थे दिवाकरे ॥ प्रातः स्नास्यंति ते मुक्ता
महापातकिनोऽपि च ॥ १२ ॥ स्नानं जागरणं दीपं तुलसीवनपालनम् ॥ कार्तिके मासि कुर्वंति ते नरा विष्णुमूर्तयः
॥ १३ ॥ संमार्ज्जनं गृहे विष्णोः स्वस्तिकादिनिवेदनम् ॥ विष्णोः पूजां च ये कुर्युर्जीवन्मुक्तास्तु ते
नराः ॥ १४ ॥ इत्थं दिनत्रयमपि कार्तिके ये प्रकुर्वंते ॥ देवानामपि ते वंद्याः किं यैराजन्मतः कृतम् ॥ १५ ॥
इत्थं गुणवती सम्यक्प्रत्यब्दं व्रतिनी ह्यभूत् ॥ नित्यं विष्णोश्च पूजायां भक्त्या तत्परमानसा ॥ १६ ॥ कदा

चिज्जरसा साथ कृशांगी ज्वरपीडिता ॥ स्नातुं गंगां गता कांते कथंचिच्छनकैस्तदा ॥ १७ ॥ यावज्जलांतरगता कंपिता शीतपीडिता ॥ तावत्सा विह्वलापश्यद्विमानं यांतमंबरात् ॥ १८ ॥ शंखचक्रगदापद्मैरायुधैरुपलक्षिताः ॥ विष्णुरूपधराः सम्यग्वैनतेयध्वजांकितम् ॥ १९ ॥ आरोहयन्विमाने तामप्सरोगणसविताम् ॥ चामरैर्वीज्यमानां तां वैकुंठमनयन्गणाः ॥ २० ॥ अथ सा तद्विमानस्था ज्वलदग्निशिखोपमा ॥ कार्तिकव्रतपुण्येन मत्सांनिध्यं गताभवत् ॥ २१ ॥ अथ ब्रह्मादिदेवानां यदा प्रार्थनया भुवम् ॥ आगतोऽहं गणाः सर्वे यातास्तेऽपि मया सह ॥ २२ ॥ एते हि यादवाः सर्वे मद्गणा एव भामिनि ॥ पिता ते देवशर्माभूत्सत्राजिदभिधो ह्यथ ॥ २३ ॥ यश्चन्द्रशर्मा सोऽक्रूरस्त्वं सा गुणवती शुभे ॥ कार्त्तिकस्नानपुण्येन बहु मे प्रीतिदायिनी ॥ २४ ॥ मद्वारि यत्त्वया पूर्वं तुलसीवाटिका कृता ॥ तस्मादयं कल्पवृक्षस्तवांगणगतः शुभे ॥ २५ ॥ कार्तिके दीपदानं च त्वया च यत्कृतं पुरा ॥ त्वद्देहगेहसंस्थेयं तस्माल्लक्ष्मीः स्थिराभवत् ॥ २६ ॥ यच्च व्रतादिकं सर्वं विष्णवे भर्तृरूपिणे ॥ निवेदितवती तस्मान्मम भार्यात्वमागता ॥ २७ ॥ आजन्ममरणात्पूर्वं यत्कृतं कार्तिकव्रतम् ॥

कदाचिदपि तेन त्वं मद्वियोगं न यास्यसि ॥ २८ ॥ एवं ये कार्तिके मासे नरा व्रतपरायणाः ॥ मत्सान्निध्यं गतास्तेऽपि प्रीतिदा त्वं यथा मम ॥ २९ ॥ यज्ञदानव्रततपः कारिणो मानवाश्च ये ॥ कार्तिकव्रतपुण्यस्य नाप्नुवंति कलामपि ॥ ३० ॥ सूत उवाच ॥ इत्थं निशम्य भुवनाधिपतेस्तदानीं प्राग्जन्मपुण्यभववैभवजातहर्षा ॥ विश्वेश्वरं त्रिभुवनैकनिदानभूतं कृष्णं प्रणम्य वचनं निजगाद सत्या ॥ ३१ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये श्रीकृष्णसत्यासंवादे द्वितीयोऽध्यायः ॥ २ ॥ सत्यभामोवाच ॥ सर्वेऽपि कालावयवास्तव कालस्वरूपिणः ॥ समानास्तु कथं नाथ मासानां कार्तिको वरः ॥१॥ एकादशी तिथीनां च मासानां कार्तिकः प्रियः ॥ कथं ते देवदेवेश कारणं तत्र कथ्यताम् ॥ २ ॥ श्रीकृष्ण उवाच ॥ साधु पृष्टं त्वया कांते शृणुष्वैकाग्रमानसा ॥ पृथोर्वैन्यस्य संवादं महर्षेर्नारदस्य च ॥ ३ ॥ एवमेव पुरा पृष्टो नारदः पृथुना प्रिये ॥ उवाच कार्तिकाधिक्ये कारणं सर्वविन्मुनिः ॥ ४ ॥ नारद उवाच ॥ शंखनामाभवत्पूर्वमसुरः सागरात्मजः ॥ त्रिलोकीमथने शक्तो महाबलपराक्रमः ॥ ५ ॥ जित्वा देवांस्तिरस्कृत्य स्वर्लोकात्स महासुरः ॥ इंद्रादिलोकपालानामधिकारांस्तथाहरत् ॥ ६ ॥

तद्भयात्कंपिता देवाः सुवर्णाद्रिगुहां गताः ॥ न्यवसन्बहुवर्षाणि सावरोधाः सबांधवाः ॥ ७ ॥ सुवर्णाद्रिगुहादुर्गसंस्थितास्त्रिदशा
यदि ॥ बद्धासना बभूवुस्ते तदा दैत्यो व्यचारयत् ॥ ८ ॥ हृताधिकारास्त्रिदशा मया यद्यपि
निर्जिताः ॥ लक्ष्यंते बलयुक्तास्ते करणीयं मयात्र किम् ॥ ९ ॥ अद्य ज्ञातं मया देवा वेदमंत्रबलान्विताः ॥ तान्हरिष्ये
ततः सर्वे बलहीना भवंति वै ॥ १० ॥ नारद उवाच ॥ इति मत्वा ततो दैत्यो विष्णुमालक्ष्य निद्रितम् ॥
सत्यलोकाज्जहाराशु वेदानादिस्वयंभुवः ॥ ११ ॥ नीतास्तु तेन ते वेदास्तद्भयात्तु निराक्रमन् ॥ तोयानि विविशुर्यज्ञमंत्रबीजसमन्विताः
॥ १२ ॥ तान्मार्गमाणः शंखोऽपि समुद्रांतर्गतोऽभ्रमत् ॥ न ददर्श तदा दैत्यः क्वचिदेकत्र
संस्थितान् ॥ १३ ॥ अथ ब्रह्मा सुरैः सार्द्धं विष्णुं शरणमन्वगात् ॥ पूजोपहारमादाय वैकुंठभवनं
गतः ॥ १४ ॥ तत्र तस्य प्रबोधाय गीतवाद्यादिकाः क्रियाः ॥ चक्रुर्देवास्तदा गंधधूपदीपान्मुहुर्मुहुः ॥ १५ ॥
अथ प्रबुद्धो भगवांस्तद्भक्तिपरितोषितः ॥ ददृशुस्ते सुरास्तत्र सहस्रार्कसमद्युतिम् ॥ १६ ॥ उपचारैः षोडशभिः
संपूज्य त्रिदशास्तदा ॥ दंडवत्पतिता भूमौ तानुवाचाथ माधवः ॥ १७ ॥ विष्णुरुवाच ॥ वरदोऽहं सुरगणा गीत-

वाद्यादिमंगलैः ॥ मनोऽभिलषितान्कामान्सर्वानेव ददामि वः ॥ १८ ॥ इषस्य शुक्लैकादश्यां यावदुद्बोधिनी भवेत् ॥
निशातुर्यांशशेषे ये गीतवाद्यादि मंगलम् ॥ १९ ॥ कुर्वंति नित्यं मनुजा भवद्भिर्यद्यथाकृतम् ॥ ते मत्प्रीतिकरा
नित्यं मत्सांनिध्यं व्रजंति हि ॥ २० ॥ पाद्यार्घ्याचमनीयादि यद्भवद्भिरुपाहृतम् ॥ तदनंतगुणं यस्माज्जातं वः
सुखकारणम् ॥२१॥ वेदाः शंखाहृताः सर्वे तिष्ठंत्युदकसंस्थिताः ॥ तानानयाम्यहं देवा हत्वा सागरनंदनम्॥२२॥
अद्यप्रभृति वेदास्तु मंत्रबीजसमन्विताः ॥ प्रत्यब्दं कार्तिके मासि विश्रमंत्यप्सु सर्वदा ॥ २३ ॥ मत्स्यरूपोऽहमपि
च भवामि जलमध्यगः ॥ भवंतोऽपि मया सार्द्धमायांतु समुनीश्वराः ॥ २४ ॥ लोकेऽस्मिन्ये प्रकुर्वंति
प्रातःस्नानं नरोत्तमाः ॥ ते सर्वे यज्ञावभृथैः सुस्नाताः स्युर्न संशयः ॥ २५ ॥ ये कार्तिकव्रतं सम्यक्कुर्वंति मनुजाः
सदा ॥ ते देहांते त्वया शक्र प्राप्या मद्भवनं सदा ॥ २६ ॥ विघ्नेभ्यो रक्षणं तेषां सम्यक्कार्यं त्वया मम ॥ देया
त्वया च वरुण पुत्रपौत्रादिसंततिः ॥ २७ ॥ धनवृद्धिर्धनाध्यक्ष त्वया कार्या ममाज्ञया ॥ मम रूपधरः साक्षाज्जीवन्मुक्तो
भवेद्यतः ॥ २८ ॥ आजन्ममरणाद्येन कृतमेतद्व्रतोत्तमम् ॥ यथोक्तविधिना सम्यक्स मान्यो भव-

तामपि ॥ २९ ॥ एकादश्यां यतश्चाहं भवाद्भिः प्रतिबोधितः ॥ अतश्चैषा तिथिर्मान्या सातीव प्रीतिदा मम ॥ ३० ॥ व्रतद्वयं सम्यगिदं नरैः कृतं सान्निध्यकृन्मे न तथान्यदस्ति ॥ नान्यानि तीर्थानि तपांसि यज्ञाः स्वर्लोकदास्तेन यथा सुरोत्तमाः ॥ ३१ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये तृतीयोऽध्यायः ॥ ३ ॥ नारद उवाच ॥ इत्युक्त्वा भगवान्विष्णुः शफरीतुल्यरूपधृक् ॥ ययौ तदांजलौ विंध्यवासिनः कश्यपस्य सः ॥ १ ॥ स तं कमंडलौ क्षिप्रं कृपया क्षिप्तवान्मुनिः ॥ तावत्स न ममौ तत्र ततः कूपे न्यवेशयत् ॥ २ ॥ तत्रापि न ममौ तावत्कासारे प्रापयत्स तम् ॥ एवं स सागरे मत्स्यः क्षिप्तोऽसावभ्यवर्द्धत ॥ ३ ॥ ततोऽवधीत्स तं शंखं विष्णुर्मत्स्यस्वरूपधृक् ॥ अथ तं स्वकरे धृत्वा बदरीवनमभ्यगात् ॥ ४ ॥ तत्राहूय ऋषीन्सर्वानिदमाज्ञापयद्विभुः ॥ श्रीविष्णुरुवाच ॥ जलांतरं विशीर्णास्तु वेदास्तान्परिमार्गथ ॥ ५ ॥ आनयध्वं त्वरायुक्ताः सरहस्याञ्जलांतरात् ॥ तावत्प्रयागे तिष्ठामि देवतागणसंयुतः ॥६॥ नारद उवाच ॥ ततस्तैः सर्वमुनिभिस्तपोबलसमन्वितैः॥ उद्धृताश्च सबीजास्ते वेदा यज्ञसमन्विताः ॥७॥ तेषु यावन्मितं येन लब्धं तावद्धि तस्य तत् ॥ स स एव ऋषिर्जातस्तदाप्रभृति पार्थिव ॥ ८ ॥ अथ सर्वेऽपि संगम्य

प्रयागं मुनयो ययुः ॥ विष्णवे सविधात्रे ते लब्धान्वेदान्न्यवेदयन् ॥ ९ ॥ लब्ध्वा वेदान्समग्रांस्तु ब्रह्मा हर्षसमन्वितः ॥ अयजद्वाजिमेधेन देवर्षिगणसंयुतः ॥ १० ॥ यज्ञांते देवगंधर्वयक्षपन्नगगुह्यकाः ॥ निपत्य दंडवद्भूमौ विज्ञप्तिं चक्रुरंजसा ॥ ११ ॥ देवा ऊचुः ॥ ॥ देवदेव जगन्नाथ विज्ञप्तिं शृणु नः प्रभो ॥ हर्षकालोऽयमस्माकं तस्मात्त्वं वरदो भव ॥ १२ ॥ स्थानेऽस्मिन्द्रुहिणो वेदान्नष्टान्प्राप पुनस्त्वयम् ॥ यज्ञभागान्वयं प्राप्तास्त्वत्प्रसादाद्रमापते ॥ १३ ॥ स्थानमेतदतिश्रेष्ठं पृथिव्यां पुण्यवर्द्धनम् ॥ भुक्तिमुक्तिप्रदं चास्तु प्रसादाद्भवतः सदा ॥ १४ ॥ कालोऽप्ययं महापुण्यो ब्रह्मघ्नादिविशुद्धिकृत् ॥ दत्ताक्षयकरश्चास्तु वरमेवं ददस्व नः ॥ १५ ॥ श्रीविष्णुरुवाच ॥ ममाप्येतन्मतं देवा यद्भवद्भिरुदाहृतम् ॥ तथास्तु सुलभं त्वेतद् ब्रह्मक्षेत्रमतिप्रथम् ॥ १६ ॥ सूर्यवंशोद्भवो राजा गंगामत्रानयिष्यति ॥ सा सूर्यकन्यया चात्र कालिंद्या योगमेष्यति ॥ १७ ॥ यूयं च सर्वे ब्रह्माद्या निवसंतु मया सह ॥ तीर्थराजेति विख्यातं तीर्थमेतद्भविष्यति ॥ १८ ॥ दानं तपो व्रतं होमो जपपूजादिकाः क्रियाः ॥ अनंतफलदाः संतु मत्सान्निध्यकराः सदा ॥ १९ ॥ ब्रह्महत्त्यादिपापानि बहुजन्मकृतान्यपि ॥ दर्शनादस्य तीर्थस्य

विनाशं यांतु तत्क्षणात् ॥ २० ॥ देहत्यागं च ये धीराः कुर्वंति मम सन्निधौ ॥ मत्तनुं प्रविशंत्येते न पुनर्जन्मिनो नराः ॥ २१ ॥ पितॄनुद्दिश्य ये श्राद्धं कुर्वंत्यत्र समायुताः ॥ तेषां पितृगणाः सर्वे यांति मत्समरूपताम् ॥ २२ ॥ कालोऽप्येष महापुण्यफलदोऽस्तु सदा नृणाम् ॥ सूर्ये मकरगे प्राप्ते स्नायिनां पापनाशनम् ॥ २३ ॥ मकरस्थे रवौ माघे प्रातःस्नानं प्रकुर्वताम् ॥ दर्शनादेव पापानि यांति सूर्याद्यथा तमः ॥ २४ ॥ सलोकत्वं समीपत्वं सारूप्यं च त्रयं क्रमात् ॥ नृणां ददाम्यहं स्नानैर्माघे मकरगे रवौ ॥ २५ ॥ यूयं मुनीश्वराः सर्वे शृणुध्वं वचनं मम ॥ बदरीवनमध्येऽहं सदा तिष्ठामि सर्वगः ॥ २६ ॥ अन्यत्र च शतैर्वर्षैस्तपसा प्राप्यते फलम् ॥ तत्र तद्दिवसैकेन भवद्भिः प्राप्यते सदा ॥ २७ ॥ स्थानस्य दर्शनं तस्य ये कुर्वंति नरोत्तमाः ॥ जीवन्मुक्ताः सदा तेषु पापं नैवावतिष्ठते ॥ २८ ॥ सूत उवाच ॥ एवं देवान्देवदेवस्तदुक्त्वा तत्रैवांतर्द्धानमागात्सवेधाः ॥ देवाः सर्वेऽप्यंशकैस्तत्र तिष्ठँश्चांतर्द्धानं प्रापुरिंद्रादयस्ते ॥ २९ ॥ इमां कथां यः शृणुयान्नरोत्तमो यः श्रावयेद्वापि विशुद्धचेताः ॥ सतीर्थराजं बदरीवनं यद्गत्वा फलं तत्समवाप्नुयाच्च ॥ ३० ॥ इति श्रीपद्म॰ कार्तिकमा॰ चतुर्थोऽध्यायः ॥ ४ ॥

पृथुरुवाच ॥ महत्फलं त्वया प्रोक्तं मुने कार्तिकमाघयोः ॥ तयोः स्नानविधिं सम्यङ् नियमानपि नो वद ॥ १ ॥ उद्यापनविधिं चैव यथावद्वक्तुमर्हसि ॥ २ ॥ नारद उवाच ॥ त्वं विष्णोरंशसम्भूतो नाज्ञातं विद्यते तव ॥ तथापि वदतः सम्यङ् नियमानपि वै शृणु ॥ ३ ॥ आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत् ॥ कार्तिकस्य व्रतारंभं तस्यां कुर्यादतंद्रितः ॥ ४ ॥ रात्र्यां तुर्यांशशेषायामुत्तिष्ठेत्सर्वदा व्रती ॥ प्रागुदीचीं व्रजेद्ग्रामाद्बहिः सोदकभाजनः ॥ ५ ॥ दिवा संध्यासु कर्णस्थब्रह्मसूत्रः उदङ्मुखः ॥ अन्तर्द्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा ॥ ६ ॥ वक्त्रं नियम्य यत्नेन ष्ठीवनोच्छ्वासवर्जितः ॥ कुर्यान्मूत्रपुरीषे च रात्रौ चेद्दक्षिणामुखः ॥ ७ ॥ गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युक्षितैर्जलैः ॥ गंधलेपक्षयकरं शौचं कुर्यादतंद्रितः ॥ ८ ॥ एका लिंगे गुदे तिस्र उभयोर्मृद्द्वयं स्मृतम् ॥ पंचापाने दशैकस्मिन्नुभयोः सप्त मृत्तिकाः ॥ ९ ॥ एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः ॥ वानप्रस्थस्य त्रिगुणं यतीनां च चतुर्गुणम् ॥ यद्दिवा विहितं शौचं तदर्द्धं निशि कीर्तितम् ॥ १० ॥ तदर्द्धमातुरे प्रोक्तमातुरस्यार्द्धमध्वनि ॥ शौचकर्मविहीनस्य सकला निष्फलाः क्रियाः ॥ ११ ॥ मुखशुद्धिविही-

नस्य न मंत्राः फलदाः स्मृताः ॥ दंतजिह्वाविशुद्धिं च ततः कुर्यात्प्रयत्नतः ॥ १२ ॥ आयुर्बलं यशो वर्चः प्रजाः
पशुवसूनि च ॥ ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥ १३ ॥ इति मंत्रं समुच्चार्य द्वादशांगुलमानतः ॥
समिधा क्षीरवृक्षस्य क्षयाहोपोषणं विना ॥ १४ ॥ प्रतिपद्दर्शनवमीषष्ठीचार्कदिने तथा ॥ चंद्रसूर्योपरागे च न
कुर्याद्दंतधावनम् ॥ १५ ॥ कंटकीवृक्षकार्पासीनिर्गुंडीब्रह्मवृक्षकान् ॥ वटैरंडविगंधाद्यान्वर्जयेद्दंतधावने ॥ १६ ॥
ततो विष्णोः शिवस्यापि गृहं गच्छेत्प्रसन्नधीः ॥ पुष्पं गंधान्सतांबूलान्गृहीत्वा भक्तितत्परः ॥ १७ ॥ तत्र देवस्य
पाद्यादीनुपचारान्पृथक्पृथक् ॥ कृत्वा स्तुत्वा पुनर्नत्वा कुर्याद्गीतादिमंगलम् ॥ १८ ॥ तालवेणुमृदंगादिध्वनियुक्तान्सनर्तकान् ॥ पुष्पैर्गंधैः सतांबूलैर्गायकानपि चार्चयेत् ॥ १९ ॥ देवालये गानपरा यतस्ते विष्णुमूर्त्तयः ॥
तपांसि यज्ञदानानि कृतादिषु जगद्गुरोः ॥ २० ॥ तुष्टिदानि कलौ यस्माद्भक्त्या गानं प्रशस्यते ॥ क्व त्वं वससि
देवेश मया पृष्टस्तु पार्थिव ॥ २१ ॥ नाहं वसामि वैकुण्ठे योगिनां हृदये न च ॥ मद्भक्ता यत्र गायंति तत्र
तिष्ठामि नारद ॥ २२ ॥ तेषां पूजादिकं गंधपुष्पाद्यैः क्रियते नरैः ॥ तेन प्रीतिं परां यामि न तथा मत्प्रपूजनात्

॥ २३ ॥ मत्पुराणकथां श्रुत्वा मद्भक्तानां च गायनम् ॥ निंदंति ये नरा मूढास्ते मे द्वेष्या भवंति हि ॥ २४ ॥ शिरीषोन्मत्तागिरिजामल्लिकाशाल्मलीभवैः ॥ अर्कजैः कर्णिकारैश्च विष्णुर्नार्च्यस्तथाक्षतैः ॥ २५ ॥ जपाकुंदशिरीषैश्च यूथिकामालतीभवैः ॥ केतकीभवपुष्पैश्च नैवार्च्यः शंकरस्तथा ॥ २६ ॥ गणेशं तुलसीपत्रैर्न दुर्गां चैव दूर्वया ॥ मुनिपुष्पैस्तथा सूर्यं लक्ष्मीकामो न चार्चयेत् ॥ २७ ॥ येभ्यो यानि प्रशस्तानि पूजायां सर्वदैव तु ॥ एवं पूजाविधिं कृत्वा देवदेवं क्षमापयेत् ॥ २८ ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ॥ यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ २९ ॥ ततः प्रदक्षिणं कृत्वा दंडवत्प्रणिपत्य च ॥ पुनः क्षमाप्य देवेशं गायनाद्यं समापयेत् ॥ ३० ॥ विष्णोः शिवस्यापि च पूजनं ये कुर्वंति सम्यङ् निशि कार्तिकस्य ॥ निर्धूतपापाः सह पूर्वजैस्ते प्रयांति विष्णोर्भवनं मनुष्याः ॥ ३१ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये पंचमोऽध्यायः ॥ ५ ॥

नारद उवाच ॥ नाडीद्वयावशिष्टायां रात्र्यां गच्छेज्जलाशयम् ॥ तिलदर्भाक्षतैः पुष्पैर्गंधाद्यैः सहितः शुचिः ॥ १ ॥ मानुषे देवखाते च नद्यामथ च संगमे ॥ क्रमाद्दशगुणं स्नानं तीर्थे तद्द्विगुणं स्मृतम् ॥२॥ विष्णुं स्मृत्वा ततः कुर्यात्संकल्पं

सवनस्य तु ॥ तीर्थादिदेवताभ्यर्च्य क्रमादर्घ्यादि दापयेत् ॥ ३ ॥ अर्घ्यमंत्रः ॥ नमः कमलनाभाय नमस्ते जलशायिने ॥ नमस्तेऽस्तु हृषीकेश गृहाणार्घ्यं नमोऽस्तु ते ॥ ४ ॥ वैकुंठे च प्रयागे च तथा बदरिकाश्रमे ॥ यतो विष्णुर्विचक्रमे त्रेधा च निदधे पदम् ॥ ५ ॥ अतो देवा अवंतु नो यतो विष्णुर्विचक्रमे ॥ तैरेव सहितः सम्यङ्मुनिवेदमखान्वितैः ॥ ६ ॥ कार्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्दन ॥ प्रीत्यर्थं तव देवेश दामोदर यथाविधि ॥ ७ ॥ ध्यात्वा नत्वा च देवेशं जलेऽस्मिन्स्नातुमुद्यतः ॥ तव प्रसादात्पापं मे दामोदर विनश्यतु ॥ ८ ॥ अर्घ्यमंत्रः ॥ व्रतिनः कार्तिके मासि स्नातस्य विधिवन्मम ॥ गृहाणार्घ्यं मया दत्तं राधया सहितो हरे ॥ ९ ॥ नित्ये नैमित्तिके कृष्ण कार्तिके पापनाशने ॥ गृहाणार्घ्यं मया दत्तं दनुजेन्द्रनिषूदन ॥ १० ॥ स्मृत्वा भागीरथीं विष्णुं शिवं सूर्यं जले विशेत् ॥ नाभिमात्रे जले तिष्ठन्व्रती स्नायाद्यथाविधि ॥ ११ ॥ तिलामलकचूर्णेन गृही स्नानं समाचरेत् ॥ विधवास्त्रीयतीनां तु तुलसीमूलमृत्स्नया ॥ १२ ॥ सप्तमीदर्शनवमीद्वितीयादशमीषु च ॥ त्रयोदश्यां न च स्नायाद्धात्रीफलतिलैः सह ॥ १३ ॥ आदौ कुर्यान्मलस्नानं मंत्रस्नानं ततः परम् ॥ स्त्रीशूद्राणां

न वेदोक्तैर्मंत्रैस्तेषां पुराणजैः ॥ १४ ॥ स्नानमंत्रः ॥ त्रिधाभूद्देवकार्यार्थं यः पुरा भक्तभावनः ॥ स विष्णुः
सर्वपापघ्नः पुनातु कृपयात्र माम् ॥ १५ ॥ विष्णोराज्ञामनुप्राप्य कार्तिकव्रतकारकान् ॥ रक्षंति देवास्ते सर्वे मां
पुनंतु सवासवाः ॥ १६ ॥ वेदमंत्राः सबीजाश्च सरहस्या मखान्विताः ॥ कश्यपाद्याश्च मुनयो मां पुनंतु सदे-
वताः ॥ १७ ॥ गंगाद्याः सरितः सर्वास्तीर्थानि जलदा नदाः ॥ ससप्तसागराः सर्वे मां पुनंतु जलाशयाः ॥ १८ ॥
पतिव्रतास्त्वदित्याद्या यक्षाः सिद्धाः सपन्नगाः ॥ ओषध्यः पर्वताश्चापि मां पुनंतु त्रिलोकजाः ॥ १९ ॥ एभि-
र्मंत्रैर्व्रती स्नात्वा हस्तन्यस्तपवित्रकः ॥ देवर्षीन्मानवान्पितॄंस्तर्पयेच्च यथाविधि ॥ २० ॥ यावंतः कार्तिके मासि
वर्तन्ते पितृतर्पणे ॥ तिलास्तत्संख्यकाब्दानि पितरः स्वर्गवासिनः ॥ २१ ॥ ततो जलाद्विनिष्क्रम्य शुचिवस्त्रा-
वृतो व्रती ॥ प्रातःकालोदितं कर्म समाप्यार्च्यों हरिः पुनः ॥ २२ ॥ तीर्थानि देवान्संस्मृत्य पुनरर्घ्यं प्रदापयेत् ॥
गंधपुष्पफलैर्युक्तं भक्त्या तत्परमानसः ॥ २३ ॥ अर्घ्यमंत्रः ॥ व्रतिनः कार्तिके मासि स्नातस्य विधिवन्मम ॥
गृहाणार्घ्यं मया दत्तं राधया सहितो हरे ॥ २४ ॥ ततश्च ब्राह्मणान्भक्त्या पूजयेद्वेदपारगान् ॥ गंधैः पुष्पैः सतां-

बूलैः प्रणमेच्च पुनः पुनः ॥ २५ ॥ तीर्थानि दक्षिणे पादे वेदास्तन्मुखमाश्रिताः ॥ सर्वांगेष्वाश्रिता देवाः पूजितोऽस्मि तदर्चया ॥ २६ ॥ अव्यक्तरूपिणो विष्णोः स्वरूपं ब्राह्मणा भुवि ॥ नावमान्या नो विरोध्याः कदापि शुभमिच्छता ॥ २७ ॥ ततो हरिप्रियां देवीं तुलसीमर्चयेद्व्रती ॥ प्रदक्षिणां नमस्कारान्कुर्यादेकाग्रमानसः ॥ २८ ॥ देवैस्त्वं निर्मिता पूर्वमर्चितासि मुनीश्वरैः ॥ नमो नमस्ते तुलसि पापं हर हरिप्रिये ॥ २९ ॥ ततो हरिकथां श्रुत्वा पौराणीं स्थिरमानसः ॥ पुनस्तान्ब्राह्मणांश्चैव पूजयेद्भक्तिमान्व्रती ॥ ३० ॥ एवं सर्वविधिं सम्यकपूर्वोक्तं भक्तिमान्नरः ॥ करोति यः स लभते नारायणसलोकताम् ॥ ३१ ॥ रोगापहं पातकनाशकृत्परं सुबुद्धिदं पुत्रधनादिसाधकम् ॥ मुक्तेर्निदानं नहि कार्तिकव्रताद्विष्णुप्रियादन्यदिहास्ति शोभनम् ॥ ३२ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये षष्ठोऽध्यायः ॥ ६ ॥ नारद उवाच ॥ कार्तिकव्रतिनां पुसां नियमा ये प्रकीर्तिताः ताञ्छृणुष्व महाराज कथ्यमानान्समासतः ॥ १ ॥ सर्वामिषाणि मांसं च क्षौद्रं सौवीरकं तथा ॥ राजिकोन्मादकं चापि नैवाद्यात्कार्तिकव्रती ॥ २ ॥ परान्नं च परद्रोहं परदेशागमं तथा ॥ तीर्थं विना सदैवेह वर्जयेत्कार्तिकव्रती

॥ ३ ॥ देववेदद्विजातीनां गुरुगोव्रतिनां तथा॥ स्त्रीराजमहतां निन्दां वर्ज्जयेत्कार्त्तिकव्रती ॥ ४ ॥ द्विदलं च तिलं तैलं पक्वान्नं मूल्यदूषितम् ॥ भावदुष्टं शब्ददुष्टं वर्जयेत्कार्तिकव्रती ॥ ५ ॥ प्राण्यंगमामिषं चूर्णं फलं जंबीरमामिषम् ॥ धान्ये मसूरिकाः प्रोक्ता अन्नं पर्युषितं तथा ॥ ६ ॥ अजागोमहिषीक्षीरादन्यद्दुग्धाद्यमामिषम् ॥ द्विजक्रीता रसाः सर्वे लवणं भूमिजं तथा ॥ ७ ॥ ताम्रस्थितं पंचगव्यं जलं पल्वलसंस्थितम् ॥ आत्मार्थं पाचितं चान्नमामिषं तत्स्मृतं बुधैः ॥ ८ ॥ ब्रह्मचर्यमधःशय्या पत्रावल्यां च भोजनम् ॥ चतुर्थयामे भुंजानः कुर्यादेवं सदा व्रती ॥ ९ ॥ नरकस्य चतुर्दश्यां तैलाभ्यंगं च कारयेत् ॥ अन्यत्र कार्तिकस्नायी तैलाभ्यंगं विवर्जयेत् ॥ १० ॥ अलाबुं चापि वृंताकं कूष्मांडं बृहतीफलम् ॥ कलिंगं च कपित्थं च वर्जयेद्वैष्णवो व्रती ॥ ११ ॥ रजस्वलां त्यजेन्म्लेच्छपतितव्रतकैस्तथा ॥ द्विजाद्विड्वेदबाह्यैश्च न वदेत्कार्तिकव्रती ॥ १२ ॥ एभिर्दृष्टं च काकैश्च सूतकान्नं च यद्भवेत् ॥ द्विःपाचितं च दग्धान्नं नैवाद्यात्कार्तिकव्रती ॥ १३ ॥ एतानि वर्जयेन्नित्यं व्रती सर्वव्रतेष्वपि ॥ कृच्छ्रादींश्च प्रकुर्वीत स्वशक्त्या विष्णुतुष्टये ॥ १४ ॥ क्रमात्कूष्मांडबृहतीतरु-

णीमूलकं तथा ॥ श्रीफलं च कलिंगं च फलं धात्रीभवं तथा ॥ १५ ॥ नारिकेलमलाबुं च पटोलं बदरीफलम् ॥ चर्मवृंताकलवलीशाकं तुलसिजं तथा ॥ १६ ॥ शाकान्येतानि वर्ज्यानि क्रमात्प्रतिपदादिषु ॥ धात्रीफलं रवौ तद्वद्वर्जयेत्सर्वदा व्रती ॥ १७ ॥ एभ्योऽन्यद्वर्जयेत्किंचिद्विष्णुव्रतपरायणः ॥ तत्पुनर्ब्राह्मणे दत्त्वा भक्षयेत्सर्वदा व्रती ॥ १८ ॥ एवमेव हि माघे च कुर्य्यांच्च नियमान्व्रती ॥ हरेश्च जागरं तत्र प्रबोधोक्तं च कारयेत् ॥ १९ ॥ यथोक्तकारिणं दृष्ट्वा कार्तिकव्रतिनं नरम् ॥ यमदूताः पलायंते गजाः सिंहार्दिता इव ॥ २० ॥ वरं विष्णुव्रती ह्येको न यज्ञशतयाजकः ॥ यज्ञकृत्प्राप्नुयात्स्वर्गं वैकुंठं कार्तिकव्रती ॥ २१ ॥ भुक्तिमुक्तिप्रदानीह यानि क्षेत्राणि भूतले ॥ वसंति तानि तद्देहे कार्तिकव्रतकारिणः ॥ २२ ॥ कार्तिकव्रतिनः पुंसो विष्णुवाक्यप्रणोदिताः ॥ रक्षां कुर्वंति शक्राद्या राजानं किंकरा यथा ॥ २३ ॥ विष्णुव्रतकरो नित्यं यत्र तिष्ठति पूजितः ॥ ग्रहभूतपिशाचाद्या नैव तिष्ठंति तत्र वै ॥ २४ ॥ कार्तिकव्रतिनः पुण्यं यथोक्तव्रतकारिणः ॥ न समर्थो भवेद्वक्तुं ब्रह्मापि हि चतुर्मुखः ॥ २५ ॥ विष्णुव्रतं सकलकल्मषनाशनं च सत्पुत्रपौत्रधनधान्यविवृद्धिकारि ॥ ऊर्ज्जव्रतं

सनियमं कुरुते मनुष्यः किं तस्य तीर्थपरिशीलनसेवया च ॥ २६ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये सप्तमोऽध्यायः ॥ ७ ॥

नारद उवाच ॥ अथोर्ज्जव्रतिनः सम्यगुद्यापनविधिं नृप ॥ तं शृणुष्व मया ख्यातं सविधानं समासतः ॥ १ ॥ ऊर्ज्जशुक्लचतुर्दश्यां कुर्यादुद्यापनं व्रती ॥ व्रतपूर्तिफलार्थं च विष्णुप्रीत्यर्थमेव च ॥ २ ॥ तुलस्या उपरिष्टात्तु कुर्यान्मंडपिकां शुभाम् ॥ सतोरणां चतुर्द्वारां पुष्पचामरशोभिताम् ॥ ३ ॥ द्वारेषु द्वारपालांश्च पूजयेन्मृन्मयान्पृथक् ॥ पुण्यशीलं सुशीलं च जयं विजयमेव च ॥ ४ ॥ तुलसीमूलदेशे च सर्वतोभद्रमुत्तमम् ॥ चतुर्भिर्वर्णकैः सम्यक्छोभाढ्यं समलंकृतम् ॥ ५ ॥ तस्योपरिष्टात्कलशं पंचरत्नसमन्वितम् ॥ महाफलेन संयुक्तं शुभं तत्र निधाय च ॥ ६ ॥ पूजयेत्तत्र देवेशं शंखचक्रगदाधरम् ॥ कौशेयपीतवसनं युक्तं जलधिकन्यया ॥ ७ ॥ इन्द्रादिलोकपालांश्च मंडले पूजयेद्व्रती ॥ द्वादश्यां प्रतिबुद्धोऽसौ त्रयोदश्यां पुनः सुरैः ॥ ८ ॥ दृष्टोऽर्चितश्चतुर्दश्यां तस्मात्पूज्यास्तिथावसौ ॥ तस्यामुपवसेद्भक्त्या शांतः प्रयतमानसः ॥ ९ ॥ पूजयेद्देवदेवेशं सौवर्ण गुर्वनुज्ञया ॥ उपचारैः षोडशभिर्नानाभक्ष्यसमन्वितैः ॥ १० ॥ रात्रौ जागरणं कुर्याद्गीतवाद्यादिमंगलैः ॥ ततः प्रभाते विमले

कुर्यान्नित्यक्रियां नरः ॥ ११ ॥ होमं कुर्यात्ततो विप्रान्संतर्प्य प्रयतात्मवान् ॥ शक्त्या तु दक्षिणां दद्याद्वित्तशाठ्यविवर्जितः ॥ १२ ॥
एवं येन कृता राजन्वैकुंठाख्या चतुर्दशी ॥ यस्यामुपोषणेनैव वैकुंठं प्राप्नुयान्नरः ॥ १३ ॥
वैकुंठाख्यचतुर्दश्या माहात्म्यं नैव शक्यते ॥ वक्तुं वर्षशतैर्देवैः शेषेणापि विशेषतः ॥ १४ ॥ गानं कुर्वंति ये
भक्त्या जागरे चक्रपाणिनः ॥ जन्मांतरशतोद्भूतैस्ते मुक्ताः पापसंचयैः ॥ १५ ॥ नारायणाजिरे विष्णोर्गीतं
नृत्यं च कुर्वताम् ॥ गोसहस्रं च ददतां यत्फलं समुदाहृतम् ॥ १६ ॥ गीतनृत्यादिकं कुर्वन्दर्शयन्कौतुकानि
च ॥ पुरतो वासुदेवस्य रात्रौ यो जागरेद्धरेः ॥ १७ ॥ पठन्विष्णुचरित्राणि यो रंजयति वैष्णवान् ॥ तस्य पुण्यफलं
विष्णुस्सालोक्यं च प्रदास्यति ॥ १८ ॥ मुखेन कुरुते वाद्यं स्वेच्छालापांश्च वर्जयेत् ॥ भावैरेतैर्नरो यस्तु
कुरुते हरिजागरम् ॥ दिने दिने तस्य पुण्यं कोटितीर्थसमं स्मृतम् ॥ १९ ॥ ततस्तु पौर्णमास्यां वै सपत्नीकान्द्विजोत्तमान् ॥
त्रिंशन्मितानथैकं वा स्वशक्त्या च निमंत्रयेत् ॥ २० ॥ वरान्दत्त्वा यतो विष्णुर्मत्स्यरूपो
भवत्ततः ॥ अस्यां दत्तं हुतं जप्तं तदक्षय्यफलं स्मृतम् ॥ २१ ॥ अतस्तान्भोजयेद्विप्रान्पायसान्नादिना व्रती ॥

अतो देवा इति द्वाभ्यां जुहुयात्तिलपायसम् ॥ २२ ॥ प्रीत्यर्थं देवदेवस्य देवानां च पृथक्पृथक् ॥ दक्षिणां च यथाशक्ति प्रदद्यात्प्रणमेच्च तान् ॥ २३ ॥ पुनर्देवं समभ्यर्च्य देवांश्च तुलसीं तथा ॥ ततो गां कपिलां तत्र पूजयेद्विधिना व्रती ॥ २४ ॥ गुरुं व्रतोपदेष्टारं वस्त्रालंकरणादिभिः ॥ सपत्नीकं समभ्यर्च्य तांश्च विप्रान्क्षमापयेत् ॥ २५ ॥ प्रार्थनामंत्रः ॥ युष्मत्प्रसादाद्देवेशः प्रसन्नोऽस्तु सदा मम ॥ व्रतादस्माच्च यत्पापं सप्तजन्मकृतं मया ॥ २६ ॥ तत्सर्वं नाशमायातु स्थिरा मे चास्तु संततिः ॥ मनोरथाश्च सफलाः संतु नित्यं ममार्चया ॥ २७ ॥ देहांते वैष्णवं स्थानं प्राप्नुयामतिदुर्लभम् ॥ २८ ॥ इति क्षमाप्य तान्विप्रान्प्रसाद्य च विसर्जयेत् ॥ तामर्चां गुरवे दद्याद्वा युक्तां तदा व्रती ॥ २९ ॥ ततः सुहृद्गणयुतः स्वयं भुंजीत भक्तिमान् ॥ कार्तिके वाथ तपसि विधिरेवंविधः स्मृतः ॥ ३० ॥ एवं यः कुरुते सम्यक्कार्तिकस्य व्रतं नरः ॥ विपाप्मा सर्वकामाढ्यो विष्णुसान्निध्यगो भवेत् ॥ ३१ ॥ सर्वव्रतैः सर्वतीर्थैः सर्वदानैश्च यत्फलम् ॥ तत्कोटिगुणितं ज्ञेयं सम्यगस्य विधानतः ॥ ३२ ॥ ते धन्यास्ते सदा पूज्यास्तेषां च सफलो भवः ॥ विष्णुभक्तिरता ये स्युः कार्तिकव्रतकारिणः ॥ ३३ ॥ देहे स्थितानि पा-

पानि कंपं यांति च तद्भयात् ॥ क्व यास्यामो भवत्येष यद्यूर्ज्जव्रतकृन्नरः ॥ ३४ ॥ इत्यूर्जव्रतनियमाञ्च्छृणोति
भक्त्या यो वै तान्कथयति वैष्णवाग्रतोऽपि ॥ तौ सम्यग्व्रतनियमात्फलं भवेद्यत्तत्सर्वं कलुषविनाशनं लभेते
॥ ३५ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्येऽष्टमोऽध्यायः ॥ ८ ॥ पृथुरुवाच ॥ यत्त्वया कथितं ब्रह्मन्व्रतमूर्ज्जस्य
विस्तरात् ॥ तत्र या तुलसीमूले विष्णोः पूजा त्वयोदिता ॥ १ ॥ तेनाहं प्रष्टुमिच्छामि माहात्म्यं तुलसीभवम्
॥ कथं सातिप्रिया जाता देवदेवस्य शार्ङ्गिणः ॥ २ ॥ कथमेषा समुत्पन्ना कस्मिन्स्थाने च नारद ॥ तद् ब्रूहि
मे समासेन सर्वज्ञोऽसि मतो मम ॥ ३ ॥ नारद उवाच ॥ पुरा शक्रः शिवं द्रष्टुमगात्कैलासपर्वतम् ॥ सर्वदेवैः
परिवृतो ह्यप्सरोगणसेवितः ॥ ४ ॥ यावद्गतः शिवगृहं तावत्तत्र स दृष्टवान् ॥ पुरुषं भीमकर्माणं दंष्ट्रानयनभीषणम्
॥ ५ ॥ स पृष्टस्तेन कस्त्वं भोः क्व गतो जगदीश्वरः ॥ एवं पुनः पुनः पृष्टः स यदा नोचिवान्नृप ॥६॥ ततः
क्रुद्धो वज्रपाणिस्तं निर्भर्त्स्य वचोऽब्रवीत् ॥ इंद्र उवाच ॥ यन्मया पृच्छ्यमानोऽपि नोत्तरं दत्तवानसि ॥ ७ ॥
अतस्त्वां हन्मि वज्रेण कस्ते त्रातास्ति दुर्मते ॥ इत्युदीर्य ततो वज्री वज्रेणाभ्यहनद्दृढम् ॥ ८ ॥ तेनास्य कंठे

नीलत्वमगाद्वज्रं च भस्मताम् ॥ ततो रुद्रः प्रजज्वाल तेजसा प्रदहन्निव ॥ ९ ॥ दृष्ट्वा बृहस्पतिस्तूर्णं कृताञ्जलिपुटोऽभवत् ॥
इंद्रं च दंडवद्भूमौ कृत्वा स्तोतुं प्रचक्रमे ॥ १० ॥ बृहस्पतिरुवाच ॥ नमो देवाधिदेवाय त्र्यंबकाय
कपर्दिने ॥ त्रिपुरघ्नाय शर्वाय नमोंऽधकनिषूदिने ॥ ११ ॥ विरूपायातिरूपाय बहुरूपाय शंभवे ॥ यज्ञविध्वंसकर्त्रे
च यज्ञानां फलदायिने ॥ १२ ॥ कालांतकाय कालाय कालभोगिधराय च ॥ नमो ब्रह्मशिरोहन्त्रे ब्रह्मण्याय
नमो नमः ॥ १३ ॥ नारद उवाच ॥ एवं स्तुतस्तदा शंभुर्धिषणेन जगाद तम् ॥ संहरन्नयनज्वालां त्रिलोकीदहनक्षमाम् ॥ १४ ॥
वरं वरय भो ब्रह्मन्प्रतिस्तुत्याऽनया तव ॥ इंद्रस्य जीवदानेन जीवेति त्वं प्रथां व्रज ॥ १५ ॥ बृहस्पतिरुवाच ॥
यदि तुष्टोऽसि देव त्वं पाहींद्रं शरणागतम् ॥ अग्निरेष शमं यातु भालनेत्रसमुद्भवः ॥ १६ ॥ रुद्र
उवाच ॥ पुनः प्रवेशमायाति भालनेत्रे कथं शिखी ॥ एतत्क्षिपाम्यहं दूरे यथेंद्रं नैव पीडयेत् ॥ १७ ॥ नारद उवाच ॥
इत्युक्त्वा तं करे धृत्वा प्राक्षिपल्लवणार्णवे ॥ सोऽपतत्सिंधुगंगायाः सागरस्य च संगमे ॥ १८ ॥ तावत्स बालरूपत्वमगात्तत्र रुरोद च ॥
रुदतस्तस्य शब्देन प्राकंपद्धरणी मुहुः ॥ १९ ॥ स्वर्गादिसत्यलोकांतास्तत्स्वनाद्ध-

धिराः कृताः ॥ श्रुत्वा ब्रह्मा ययौ तत्र किमेतदिति विस्मितः ॥ २० ॥ तावत्समुद्रस्योत्संगे तं तु बालं ददर्श ह ॥
ततो ब्रह्माब्रवीद्वाक्यं कस्यायं शिशुरद्भुतः ॥ २१ ॥ निशम्येति वचो धातुर्वाक्यं सिंधुरथाब्रवीत् ॥ दृष्ट्वा ब्रह्माण-
मायातं समुद्रोऽपि कृतांजलिः ॥ २२ ॥ प्रणम्य शिरसा बालं तस्योत्संगे न्यवेशयत् ॥ भो ब्रह्मन्सिंधुगंगायां
जातोऽयं मम पुत्रकः ॥ २३ ॥ जातकर्मादिसंस्कारान्कुरुष्वास्य जगद्गुरो ॥ नारद उवाच ॥ इत्थं वदति पाथोधौ
स बालः सागरात्मजः ॥ २४ ॥ ब्रह्माणमग्रहीत्कूर्चे विधुन्वँस्तं मुहुर्मुहुः ॥ धुन्वतस्तस्य कूर्चे तन्नेत्राभ्यामग-
मज्जलम् ॥ २५ ॥ कथंचिन्मुक्तकूर्चोऽयं ब्रह्मा प्रोवाच सागरम् ॥ ब्रह्मोवाच ॥ नेत्राभ्यामुद्धृतं यस्मादनेनैतज्जलं
मम ॥ २६ ॥ तस्माज्जलंधर इति ख्यातो नाम्ना भविष्यति ॥ २७ ॥ अधुनैवैष तरुणः सर्वशास्त्रार्थपारगः ॥
अवध्यः सर्वभूतानां विना रुद्रं भविष्यति ॥ २८ ॥ नारद उवाच ॥ इत्युक्त्वा शुक्रमाहूय राज्ये तं चाभ्यषेच-
यत् ॥ २९ ॥ आमंत्र्य सरितां नाथं ब्रह्मांतर्द्धानमागमत् ॥ अथ तद्दर्शनोत्फुल्लनयनः सागरस्तदा ॥ कालनेमि-
सुतां वृंदां तद्भार्यार्थमयाचत ॥ ३० ॥ ते कालनेमिप्रमुखास्ततोऽसुरास्तस्मै सुतां तां प्रददुः प्रहर्षिताः ॥ स चापि तां

प्राप्य सुहृद्वरां वशां शशास गां शुक्रसहायवान्बली ॥३१॥ इति पद्मपुराणे कार्तिकमाहात्म्ये नवमोऽध्यायः ॥९॥
नारद उवाच ॥ ये देवैर्निर्जिताः पूर्वं दैत्याः पातालसंस्थिताः ॥ तेऽपि भूमंडले जाता निर्भयास्तमुपाश्रिताः
॥ १ ॥ कदाचिच्छिन्नशिरसं दृष्ट्वा राहुं स दैत्यराट् ॥ पप्रच्छ भार्गवं तस्य शिरसश्छेदकारणम् ॥ २ ॥ स शशंस
समुद्रस्य मथनं देवकारितम् ॥ रत्नापहरणं चैव दैत्यानां च पराभवम् ॥ ३ ॥ स श्रुत्वा क्रोधरक्ताक्षः स्वपितुर्म-
थनं तदा ॥ दूतं संप्रेषयामास घस्मरं शक्रसन्निधौ ॥ ४ ॥ दूतस्त्रिविष्टपं गत्वा सुधर्मां प्राविशत्त्वरा ॥ जगादाखर्व-
मौलिस्तु देवेंद्रं वाक्यमद्भुतम् ॥ ५ ॥ घस्मर उवाच ॥ जलंधरोऽब्धितनयः सर्वदैत्यजनेश्वरः ॥ दूतोऽहं प्रेषि-
तस्तेन स यदाह शृणुष्व तत् ॥ ६ ॥ कस्मात्त्वया मम पिता मथितः सागरोऽद्रिणा ॥ नीतानि सर्वरत्नानि तानि
शीघ्रं प्रयच्छ मे ॥७॥ इति दूतवचः श्रुत्वा विस्मितस्त्रिदशाधिपः ॥ उवाच घस्मरं रौद्रं भयरोषसमन्वितः ॥ ८ ॥
इन्द्र उवाच ॥ शृणु दूत मया पूर्वं मथितः सागरो यथा ॥ अद्रयो मद्भयाद्भीताः स्वकुक्षिस्थाः कृतास्तथा ॥ ९ ॥
अन्येऽपि मद्द्विषस्तेन रक्षिता दितिजाः पुरा ॥ तस्मात्तद्रत्नजातं तु मयाप्यपहृतं किल ॥ १० ॥ शंखोऽप्येवं

पुरा देवानद्विषत्सागरात्मजः ॥ ममानुजेन निहतः प्रविष्टः सागरोदरे ॥ ११ ॥ तद्गच्छ कथयस्वास्य सर्वं मथन-
कारणम् ॥ नारद उवाच ॥ इत्थं विसर्जितो दूतस्तदेंद्रेणागमद्ध्रुवम् ॥ १२ ॥ तदिदं वचनं सर्वं दैत्यायाकथ-
यत्तदा ॥ तन्निशम्य तदा दैत्यो रोषात्प्रस्फुरिताधरः ॥ १३ ॥ उद्योगमकरोत्तूर्णं सर्वदेवजिगीषया ॥ तदोद्योगेऽ-
सुरेन्द्रस्य दिग्भ्यः पातालतस्तदा ॥ १४ ॥ दितिजाः प्रत्यपद्यंत कोटिशः कोटिशस्तदा ॥ अथ शुंभनिशुंभाद्यै-
र्बलाधिपतिकोटिभिः ॥ १५ ॥ गत्वा त्रिविष्टपं दैत्यो नंदनाधिष्ठितोऽभवत् ॥ निर्ययुश्चामरावत्या देवा युद्धाय
दंशिताः ॥ १६ ॥ पुरमावृत्त्य तिष्ठंतं दृष्ट्वा दैत्यबलं महत् ॥ ततः सममभवद्युद्धं देवदानवसेनयोः ॥ १७ ॥ मुशलैः
परिघैर्बाणैर्गदाशक्तिपरश्वधैः॥ तेऽन्योन्य समधावेतां जघ्नतुश्च परस्परम् ॥ १८ ॥ क्षीणे चाभवतां सैन्ये रुधिरौघ-
प्रवर्तिनी ॥ पतितैः पात्यमानैश्च गजाश्वरथपत्तिभिः ॥ १९॥ व्यराजत रणे भूमिः संध्याभ्रपटलैरिव ॥ ततो युद्धे
हतान्दैत्यान्भार्गवः समजीवयत् ॥ २० ॥ विद्यया मृतजीविन्या मंत्रितैस्तोयबिंदुभिः ॥ देवानपि तथा युद्धे
तत्राजीवयदंगिराः ॥ २१ ॥ दिव्यौषधीः समानीय द्रोणाद्रेः स पुनः पुनः ॥ दृष्ट्वा देवांस्तथा युद्धे पुनरेव समु-

त्थितान् ॥ २२ ॥ जलंधरः क्रोधवशो भार्गवं वाक्यमब्रवीत् ॥ जलंधर उवाच ॥ मया देवा हता युद्धे उत्तिष्ठंति कथं पुनः ॥ २३ ॥ तवेयं जीविनी विद्या नैवान्यत्रेति विश्रुतम् ॥ शुक्र उवाच ॥ दिव्यौषधीः समानीय द्रोणाद्रेरंगिराः सुरान् ॥ जीवयत्येष तच्छीघ्रं द्रोणाद्रिं त्वमपाहर ॥ २४ ॥ नारद उवाच ॥ इत्युक्त्वा स तु दैत्येंद्रो नीत्वा द्रोणाचलं तदा ॥ प्राक्षिपत्सागरे तूर्णं पुनरागान्महाहवम् ॥ २५ ॥ अथ देवान्हतान्दृष्ट्वा द्रोणाद्रिमगमद्गुरुः ॥ तावत्तत्र गिरींद्रं तु न ददर्श सुरार्चितः ॥ २६ ॥ ज्ञात्वा दैत्यहृतं द्रोणं धिषणो भयविह्वलः ॥ आगत्य दूरात्प्रोवाच श्वासाकुलितविग्रहः ॥ २७ ॥ गुरुरुवाच ॥ पलायध्वं महादैत्यो नायं जेतुं यतः क्षमः ॥ रुद्राशसंभवो ह्येष स्मरध्वं शक्रचेष्टितम् ॥ २८ ॥ श्रुत्वा तद्वचनं देवा भयविह्वलितास्तदा ॥ दैत्येन वध्यमानास्ते पलायंते दिशो दश ॥ २९ ॥ स देवान्विद्रुतान्दृष्ट्वा दैत्यः सागरनंदनः ॥ शंखभेरीजयरवैः प्रविवेशामरावतीम् ॥ ३० ॥ प्रविष्टे नगरीं दैत्ये देवाः शक्रपुरोगमाः ॥ सुवर्णाद्रिगुहां प्राप्ता न्यवसन्दैत्यतापिताः ॥ ३१ ॥ एवं देवान्विनिर्जित्य तत्र राज्यं चकार सः ॥ ३२ ॥ ततस्तु सर्वेष्वसुरोऽधिकारेष्विंद्रादिकानां विनिवेशयत्तदा ॥ शुंभादि-

कान्दैत्यंवरान्पृथक्पृथक्स्वयं सुवर्णाद्रिगुहामगात्पुनः ॥ ३३ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये दशमोऽध्यायः ॥ १० ॥ नारद उवाच ॥ पुनर्दैत्यं समायांतं दृष्ट्वा देवाः सवासवाः ॥ भयप्रकंपिताः सर्वे विष्णुं स्तोतुं
प्रचक्रमुः ॥ १ ॥ ॥ देवा ऊचुः ॥ नमो मत्स्यकूर्मादिनानास्वरूपैः सदा भक्तकार्योद्यतायार्तिहंत्रे ॥ विधात्रादिसर्गस्थितिध्वंसकर्त्रे गदाशंखपद्मासिहस्ताय तेऽस्तु ॥ २ ॥ रमावल्लभायासुराणां निहंत्रे भुजंगारियानाय
पीताम्बराय ॥ मखादिक्रियापाककर्त्रे विकर्त्रे शरण्याय तस्मै नताः स्मो नताः स्मः ॥ ३ ॥ नमो दैत्यसंतापिताऽमर्त्यदुःखाचलध्वंसदंभोलये विष्णवे ते ॥ भुजंगेशतल्पेशयानार्कचन्द्रद्विनेत्राय तस्मै नताः स्मो नताः स्मः
॥ ४ ॥ नारद उवाच ॥ संकष्टनाशनं स्तोत्रमेतद्यस्तु पठेन्नरः ॥ स कदाचिन्न संकष्टैः पीड्यते कृपया हरेः ॥ ५ ॥
इति देवाः स्तुतिं यावत्कुर्वंति दनुजद्विषः ॥ तावत्सुराणामापत्तिर्विज्ञाता विष्णुना तदा ॥ ६ ॥ सहसोत्थाय
दैत्यारिः सक्रोधः खिन्नमानसः ॥ आरूढो गरुडं वेगाल्लक्ष्मीं वचनमब्रवीत् ॥ ७ ॥ श्रीभगवानुवाच ॥ जलंधरेण
ते भ्रात्रा देवानां कदनं कृतम् ॥ तैराहूतो गमिष्यामि युद्धायाद्य त्वरान्वितः ॥ ८ ॥ लक्ष्मीरुवाच ॥ अहं ते

वल्लभा नाथ भक्ता च यदि सर्वदा ॥ तत्कथं ते मम भ्राता युद्धे वध्यः कृपानिधे ॥ ९ ॥ श्रीभगवानुवाच ॥ रुद्रांशसंभवत्वाच्च ब्रह्मणो वरदानतः ॥ प्रीत्या च तव नैवायं मम वध्यो जलंधरः ॥१० ॥ नारद उवाच ॥ इत्युक्त्वा गरुडारूढः शंखचक्रगदासिभृत् ॥ विष्णुर्वेगाद्ययौ युद्धं यत्र देवाः स्तुवंति ते ॥ ११ ॥ अथारुणानुजात्युग्रपक्षवातप्रपीडिताः ॥ वात्या वितर्जिता दैत्या बभ्रमुः खे यथा घनाः ॥ १२ ॥ ततो जलंधरो दृष्ट्वा दैत्यान्वातप्रपीडितान् ॥ क्रोधादुत्प्लुत्य गगने ततो विष्णुं समभ्ययात् ॥ १३ ॥ ततः समभवद्युद्धं विष्णुदैत्येंद्रयोर्महत् ॥ आकाशं कुर्वतोर्बाणैस्तदा निरवकाशवत् ॥ १४ ॥ विष्णुर्दैत्यस्य बाणौघैर्ध्वजं छत्रं धनुर्हयान् ॥ चिच्छेद तं च हृदये बाणेनैकेन चाहनत् ॥ १५ ॥ ततो दैत्यः समुत्पत्य गदापाणिस्त्वरान्वितः ॥ आहत्य गरुडं मूर्ध्नि पातयामास भूतले ॥ १६ ॥ विष्णुर्गदां स्वखड्गेन चिच्छेद प्रहसन्निव ॥ तावत्सहृदये विष्णुं जघान दृढमुष्टिना ॥ १७ ॥ ततस्तौ बाहुयुद्धेन युयुधाते महाबलौ ॥ बाहुभिर्मुष्टिभिश्चैव जानुभिर्नादयन्महीम् ॥ १८ ॥ एवं तौ रुचिरं युद्धं कृत्वा विष्णुः प्रतापवान् ॥ उवाच दैत्यराजानं मेघगंभीरनिःस्वनः ॥ १९ ॥ विष्णुरुवाच ॥

वरं वरय दैत्येंद्र प्रीतोऽस्मि तव विक्रमात् ॥ अदेयमपि ते दद्मि यत्ते मनासि वर्तंते ॥ २० ॥ जलंधर उवाच ॥ यदि भावुक तुष्टोऽसि वरमेकं ददस्व मे ॥ मद्भगिन्या सहाद्य त्वं मद्गृहे सगणो वस ॥ २१ ॥ नारद उवाच ॥ तथेत्युक्त्वा स भगवान्सर्वदेवगणैः सह ॥ तदा जलंधरपुरमगमद्रमया सह ॥ २२ ॥ जलंधरस्तु देवानामाधिकारेषु दानवान् ॥ स्थापयित्वा महाबाहुः पुनरागान्महीतलम् ॥ २३ ॥ देवगंधर्वसिद्धेषु यत्किंचिद्रत्नसंज्ञितम् ॥ तदात्मवशगं कृत्वातिष्ठत्सागरनंदनः ॥ २४ ॥ देवगंधर्वसिद्धाद्यान्सर्पराक्षसमानुषान् ॥ स्वपुरे नागरान्कृत्वा शशास भुवनत्रयम् ॥ २५ ॥ एवं जलंधरः कृत्वा देवान्स्ववशवर्तिनः ॥ धर्मेण पालयामास प्रजाः पुत्रानिवौरसान् ॥ २६ ॥ न कश्चिद्व्याधितो नैव दुःखितो न कृशस्तथा ॥ न दीनो दृश्यते तस्मिन्धर्माद्राज्यं प्रशासति ॥ २७ ॥ एवं महीं शासति दानवेन्द्रे धर्मेण सम्यक्च दिदृक्षयाहम् ॥ कदाचिदागामथ तस्य लक्ष्मीं विलोकितुं श्रीरमणं च सेवितुम् ॥ २८ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये एकादशोऽध्यायः ॥ ११ ॥ नारद उवाच ॥ ॥ स मां संपूज्य विधिवद्दानवेंद्रोऽतिभक्तिमान् ॥ संप्रहस्य तदा वाक्यं जगाद भुवनेश्वरः ॥ १ ॥

कुत आगम्यते ब्रह्मन् किंचिद्दृष्टं त्वया प्रभो ॥ यदर्थमिह चायातस्तदाज्ञापय मां मुने ॥ २ ॥ नारद उवाच ॥
गतः कैलासशिखरे दैत्येंद्राहं यदृच्छया ॥ तत्रोमया सहासीनं दृष्टवानस्मि शंकरम् ॥ ३ ॥ योजनायुतविस्तीर्णें
कल्पवृक्षमहावने ॥ कामधेनुशताकीर्णें चिन्तामणिसुदीपिते ॥ ४ ॥ तद्दृष्ट्वा महदाश्चर्यं वितर्कों मेऽभवत्तदा ॥
क्वापीदृशी भवेदृद्धिस्त्रिलोक्यां वा न वेति च ॥ ५ ॥ तदा तवापि दैत्येंद्र समृद्धिः संस्मृता मया ॥ तद्विलोकनकामोऽहं
त्वत्सान्निध्यमिहागतः ॥ ६ ॥ त्वत्समृद्धिमिमां पश्यन्स्त्रीरत्नरहितां ध्रुवम् ॥ तर्कयामि शिवादन्यत्रिलोक्यां
न समृद्धिमान् ॥ ७ ॥ अप्सरो नागकन्याद्या यद्यपि त्वद्गृहे स्थिताः ॥ तथापि ता न पार्वत्या रूपेण
सदृशा ध्रुवम् ॥ ८ ॥ यस्या लावण्यजलधौ निमग्नश्चतुराननः ॥ स्ववीर्यममुचत्पूर्वं तया कान्योपमीयते ॥ ९ ॥
वीतरागोऽपि च यथा मदनारिः स्वलीलया ॥ सौंदर्य्यगहनेऽभ्रामि शफरीरूपया पुरा ॥ १० ॥ यस्याः पुनः
पुना रूपं पश्यन्धातापि सर्जने ॥ ससर्जाप्सरसस्तासां तत्समैकापि नाभवत् ॥ ११ ॥ अतः स्त्रीरत्नसंभोक्तुः
समृद्धिस्तस्य सा वरा ॥ तथा न तव दैत्येन्द्र सर्वरत्नाधिपस्य च ॥ १२ ॥ एवमुक्त्वा तमामंत्र्य गते मयि स

दैत्यराट् ॥ तद्रूपश्रवणादासीदनंगज्वरपीडितः ॥ १३ ॥ अथ संप्रेषयामास दूतं तु सिंहिकासुतम् ॥ त्र्यंबकाय
तदा किंचिद्विष्णुमायाविमोहितः ॥ १४ ॥ कैलासमगमद्राहुः कुर्वञ्छुक्लेंदुवर्चसम् ॥ कार्ष्ण्येन कृष्णपक्षेंदुवर्चसं
स्वांगजेन तम् ॥ १५ ॥ निवेदितस्तु देवाय नंदिना प्रविवेश सः ॥ त्र्यंबकभ्रूलतासंज्ञाप्रेरितो वाक्यमब्रवीत्
॥ १६ ॥ राहुरुवाच ॥ देवपन्नगसेव्यस्य त्रैलोक्याधिपतेस्तथा ॥ सर्वरत्नेश्वरस्य त्वमाज्ञां शृणु वृषध्वज ॥ १७ ॥
श्मशानवासिनो नित्यमस्थिभारवहस्य च ॥ दिगंबरस्य ते भार्या कथं हैमवती शुभा ॥ १८ ॥ अहं रत्नाधिनाथोऽस्मि
सा च स्त्रीरत्नसंज्ञिका ॥ तस्मान्ममैव सा योग्या नैव भिक्षाशिनस्तव ॥ १९ ॥ नारद उवाच ॥
वदत्येवं तदा राहौ भ्रूमध्याच्छूलपाणिनः ॥ अभवत्पुरुषो रौद्रस्तीव्राशनिसमस्वनः ॥ २० ॥ सिंहास्यः प्रचलज्जिह्वः
सज्वालनयनो महान् ॥ ऊर्ध्वकेशः शुष्कतनुर्नृसिंह इव चापरः ॥ २१ ॥ स तं खादितुमायांतं दृष्ट्वा
राहुर्भयातुरः ॥ पलायन्नतिवेगेन बहिः स च दधार तम् ॥ २२ ॥ धृत्वा खादितुमारब्धस्तावद्रुद्रेण वारितः ॥
नैवासौ वध्यतामेति दूतोऽयं परवान्यतः ॥ २३ ॥ मुंचेति पुरुषः श्रुत्वा राहुं तत्याज सोंऽबरे ॥ राहुं त्यक्त्वा स

पुरुषस्तदा रुद्रं व्यजिज्ञपत् ॥ २४ ॥ पुरुष उवाच ॥ क्षुधा मां बाधतेऽत्यन्तं क्षुत्क्षामश्चास्मि सर्वथा ॥ किं भक्षयामि देवेश तदाज्ञापय मां प्रभो ॥ २५ ॥ ईश्वर उवाच ॥ भक्षय स्वात्मनः शीघ्रं मांसं त्वं हस्तपादयोः ॥ नारद उवाच ॥ स शिवेनैवमाज्ञतश्चखाद पुरुषः स्वकम् ॥ हस्तपादोद्भवं मांसं शिरः शेषं यथाभवत् ॥ २६ ॥ दृष्ट्वा शिरोऽवशेषं तं सुप्रसन्नस्तदा शिवः ॥ उवाच भीमकर्माणं पुरुषं जातविस्मयः ॥ २७ ॥ ईश्वर उवाच ॥ त्वं कीर्तिमुखसंज्ञो हि भव मे द्वारगः सदा ॥ नारद उवाच ॥ तदाप्रभृति देवस्य द्वारि कीर्तिमुखः स्थितः ॥ २८ ॥ नार्चयंतीह ये पूर्वं तेषामर्चा वृथा भवेत् ॥ २९ ॥ राहुर्विमुक्तो यस्तेन सोऽपतद्बर्बरस्थले ॥ अतः स बर्बरो भूत इति भूमौ प्रथां गतः ॥ ३० ॥ ततः स राहुः पुनरेव जातमात्मानमस्मिन्निति मन्यमानः ॥ समेत्य सर्वं कथयांबभूव जलंधरायैव विचेष्टितं तत् ॥ ३१ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये जलंधरोपाख्याने दूतसंवादे द्वादशोऽध्यायः ॥ १२ ॥ नारद उवाच ॥ जलंधरस्तु तच्छ्रुत्वा कोपाकुलितविग्रहः ॥ निर्जगामाशु दैत्यानां कोटिभिः परिवारितः ॥ १ ॥ गच्छतोऽस्याग्रतः शुक्रो राहुर्दृष्टिपथेऽभवत् ॥ मुकुटश्चापतद्भूमौ वेगात्प्रस्खलित-

स्तदा ॥ २ ॥ दैत्यसैन्यावृतैस्तस्य विमानानां शतैस्तदा ॥ व्यराजत नभः पूर्णप्रावृषीव यथा घनैः ॥ ३ ॥
तस्योद्योगं तदा दृष्ट्वा देवाः शक्रपुरोगमाः ॥ अलक्षितास्तदा जग्मुः शूलिनं तं विजिज्ञपुः ॥ ४ ॥ देवा ऊचुः ॥
न जानासि कथं स्वामिन्देवापत्तिमिमां प्रभो ॥ तदस्मद्रक्षणार्थाय जहि सागरनंदनम् ॥ ५ ॥ इति देववचःश्रुत्वा
प्रहस्य वृषभध्वजः ॥ महाविष्णुं समाहूय वचनं चेदमब्रवीत् ॥ ६ ॥ ईश्वर उवाच ॥ जलंधरः कथं विष्णो न हतः
संगरे त्वया ॥ तद्गृहं चापि यातोसि त्यक्त्वा वैकुंठमात्मनः ॥ ७ ॥ विष्णुरुवाच ॥ तवांशसंभवत्वाच्च भ्रातृत्वाच्च
तथा श्रियः ॥ न मया निहतः संख्ये त्वमेव जहि दानवम् ॥ ८ ॥ ईश्वर उवाच ॥ नायमेभिर्महातेजाः शस्त्रास्त्रैर्वध्यते
मया ॥ देवैः सह स्वतेजोंऽशं शस्त्रार्थं दीयतां मम ॥ ९ ॥ नारद उवाच ॥ अथ विष्णुमुखा देवाः स्वतेजांसि
ददुस्तदा ॥ तान्यैक्यसगमन्नीशो दृष्ट्वा स्वं चामुचन्महः ॥ १० ॥ तेनाकरोन्महादेवो महसां शस्त्रमुत्तमम् ॥ चक्रं
सुदर्शनं नाम ज्वालामालातिभीषणम् ॥ ११ ॥ तेजःशेषेण च तदा वज्रं च कृतवान्हरिः ॥ तावज्जलंधरो दृष्टः
कैलासतलभूमिषु ॥ हस्त्यश्वरथपत्तीनां कोटिभिः परिवारितः ॥ १२ ॥ तं दृष्ट्वालक्षिता जग्मुर्देवाः सर्वे यथागताः ॥

गणाः समरमायाता युद्धायातित्वरान्विताः ॥ १३ ॥ नंदीभवक्त्रसेनानीमुखाः सर्वे शिवाज्ञया ॥ अवतेरुर्गणा
वेगात्कैलासाद्युद्धदुर्मदाः ॥ १४ ॥ ततः समभवद्युद्धं कैलासोपत्यकाभुवि ॥ प्रमथाधिपदैत्यानां घोरं शस्त्रास्त्रसंकुलम्
॥ १५ ॥ भेरीमृदंगशंखौघनिःस्वनैर्वीरहर्षणैः ॥ गजाश्वरथशब्दैश्च नादिता भूर्व्यकंपत ॥ १६ ॥ शक्तितोमरबाणौघमुसलप्रासपट्टिशैः
॥ व्यराजत नभः पूर्णमुल्काभिरिव संवृतम् ॥ १७ ॥ निहतैरथनागाश्वैस्तदा
भूमिर्व्यराजत ॥ वज्राहताचलशिरःशकलैरिव संवृता ॥ १८ ॥ प्रमथाहतदैत्यौघान्भार्गवः समजीवयत् ॥ युद्धे
पुनः पुनस्तत्र मृतसंजीविनीबलात् ॥ १९ ॥ तं दृष्ट्वा व्याकुलीभूता गणाः सर्वे भयान्विताः ॥ शशंसुर्देवदेवाय
तत्सर्वं शुक्रचेष्टितम् ॥ २० ॥ अथ रुद्रमुखात्कृत्या बभूवातीव भीषणा ॥ तालजंघा दरीवक्त्रा स्तनापीडितभूरुहा
॥ २१ ॥ सा युद्धभूमिमासाद्य भक्षयंती महासुरान् ॥ भार्गवं स्वभगे धृत्वा जगामांतर्हिता नभः ॥२२॥
विधतं भार्गवं दृष्ट्वा दैत्यसैन्यं गणास्तदा ॥ अम्लानवदना हर्षान्निजघ्नुर्युद्धदुर्मदाः ॥२३॥ अथाभज्यत दैत्यानां
सेना गणभयार्दिता ॥ वायुवेगेनाहतेव प्रकीर्णा तृणसंहतिः ॥ २४ ॥ भग्नां गणभयात्सेनां दृष्ट्वा मर्षयुता ययुः ॥

निशुंभशुंभसेनान्यौ कालनेमिश्च वीर्यवान् ॥ २९ ॥ त्रयस्ते वारयामासुर्गणसेनां महाबलाः ॥ मुंचंतः शरवर्षाणि
प्रावृषीव बलाहकाः ॥ २६ ॥ ततो दैत्यशरौघास्ते शलभानामिव व्रजाः ॥ रुरुधुः खं दिशः सर्वा
गणसेनां प्रकंपयन् ॥ २७ ॥ गणाः शरशतैर्भिन्ना रुधिरासारवर्षिणः ॥ वसंते किंशुकाभासा न प्राज्ञायंत
किंचन ॥ २८ ॥ पतिताः पात्यमानाश्च भिन्नाश्छिन्नास्तदा गणाः ॥ त्यक्त्वा संग्रामभूमिं ते सर्वेऽपि विमुखाभवन्
॥ २९ ॥ ततश्च भग्नं स्वबलं विलोक्य शैलादिलम्बोदरकार्तिकेयाः ॥ त्वरान्विता दैत्यवरान्प्रसह्य निवारयामासुरमर्षिणस्ते
॥ ३० ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये त्रयोदशोऽध्यायः ॥ १३ ॥ नारद उवाच ॥
ते गणाधिपती दृष्ट्वा नंदीभमुखषण्मुखान् ॥ अमर्षादभ्यधावंत द्वंद्वयुद्धाय दानवाः ॥ १ ॥ नंदिनं कालनेमिश्च
शुंभो लंबोदरं तथा निशुंभः षण्मुखं वेगादभ्यधावत दंशितः ॥ २ ॥ निशुंभः कार्तिकेयस्य मयूरं पंचभिः शरैः ॥
हृदि विव्याध वेगेन मूर्छितः स पपात ह ॥ ३ ॥ ततः शक्तिधरः शक्तिं यावज्जग्राह रोषितः ॥ तावन्निशुंभो
वेगेन स्वशक्त्या तमपातयत् ॥ ४ ॥ ततो नंदीशरव्रातैः कालनेमिमविध्यत ॥ सप्तभिश्च हयान्केतुं

धनुस्सारथिमच्छिनत् ॥ ५ ॥ कालनेमिस्तु संक्रुद्धो धनुश्चिच्छेद नंदिनः ॥ तदपास्य स शूलेन तं वक्षस्यहनद्बली
॥ ६ ॥ स शूलभिन्नहृदयो हताश्वो हतसारथिः ॥ अद्रेः शिखरमामुच्य शैलादिं सोऽप्यपातयत् ॥ ७ ॥
अथ शुंभो गणेशश्च रथमूषकवाहनौ ॥ युध्यमानौ शरव्रातैः परस्परमविध्यताम् ॥ ८ ॥ गणेशस्तु तदा शुंभं
हृदि विव्याध पत्रिणा ॥ सारथिं च त्रिभिर्बाणैः पातयामास भूतले ॥ ९ ॥ ततोऽतिक्रुद्धः शुंभोऽपि बाणवृष्ट्या
गणाधिपम् ॥ मूषकं च त्रिभिर्विद्ध्वा ननाद जलदस्वनः ॥ १० ॥ मूषकः शरभिन्नांगश्चलितुं न शशाक ह ॥
लंबोदरः समुत्तीर्य पदातिरभवन्नृप ॥ ११ ॥ ततो लंबोदरः शुंभं हत्वा परशुना हृदि ॥ अपातयत्तदा भूमौ
मूषकं चारुहत्पुनः ॥ १२ ॥ कालनेमिर्निशुंभश्चाप्युभौ लंबोदरं शरैः ॥ युगपज्जघ्नतुः क्रोधात्तोत्रैरिव महाद्विपम्
॥ १३ ॥ तं पीडयमानमालोक्य वीरभद्रो महाबलः ॥ अभ्यधावत वेगेन भूतकोटियुतस्तदा ॥ १४ ॥
कूष्मांडा भैरवाश्चापि वैताला योगिनीगणाः ॥ पिशाचा योगिनीसंघा गणाश्चापि तमन्वयुः ॥ १५ ॥ ततः
किलकिलाशब्दैः सिंहनादैः सुघर्घरैः ॥ निनादैर्भरिता सर्वा पृथिवी समकंपत ॥ १६ ॥ ततो भूतान्यधावंत

भक्षयंति स्म दानवान् ॥ उत्पतंत्यापतंति स्म ननृतुश्च रणागणे ॥ १७ ॥ नंदी च कार्तिकेयश्च समाश्वस्तौ त्वरान्वितौ ॥ निजघ्नतू रणे दैत्यान्निरंतरश्शरव्रजैः ॥ १८ ॥ छिन्नभिन्नाहतैर्दैत्यैः पतितैर्भक्षितैस्तदा ॥ व्याकुला साऽभवत्सेना विषण्णवदना तदा ॥ १९ ॥ प्रविध्वस्तां तदा सेनां दृष्ट्वा सागरनंदनः ॥ रथेनातिपताकेन गणानभिययौ बली ॥ २० ॥ हस्त्यश्वरथसंह्रादाः शंखभेरीरवास्तथा ॥ अभवत्सिंहनादश्च सेनयोरुभयोस्तदा ॥ २१ ॥ जलंधरशरव्रातैर्नीहारस्य तलैरिव ॥ द्यावापृथिव्योराच्छन्नमंतरं समपद्यत ॥ २२ ॥ गणेशं पंचभिर्विद्ध्वा शैलादिं नवभिः शरैः ॥ वीरभद्रं च विंशत्या ननाद जलदस्वनः ॥ २३ ॥ कार्तिकेयस्तदा दैत्यं शक्त्या विव्याध सत्वरः ॥ जुघूर्ण शक्तिनिर्भिन्नः किंचिद्व्याकुलमानसः ॥ २४ ॥ ततः क्रोधपरीतांगः कार्तिकेयं जलंधरः ॥ गदया ताडयामास स च भूमितलेऽपतत् ॥ २५ ॥ तथैव नंदिनं वेगादपातयत भूतले ॥ ततो गणेश्वरः क्रुद्धो गदां परशुनाच्छिनत् ॥ २६ ॥ वीरभद्रस्त्रिभिर्बाणैर्हृदि विव्याध दानवम् ॥ सप्तभिश्च हयान्केतुं धनुश्छत्रं च चिच्छिदे ॥२७॥ ततोऽतिक्रुद्धो दैत्येन्द्रः शक्तिमुद्यम्य दारुणाम् ॥ गणेशं पातयामास रथमन्यं समारुहत् ॥ २८ ॥ अभ्ययादथ

वेगेन वीरभद्रं रुषान्वितः ॥ ततस्तौ सूर्यसंकाशौ युयुधाते परस्परम् ॥२९॥ वीरभद्रस्ततस्तस्य हयान्बाणैरपातयत् ॥
धनुश्चिच्छेद दैत्येंद्रः पुप्लुवे परिघायुधः ॥३०॥ नारद उवाच ॥ स वीरभद्रं त्वरयाभिगम्य जघान दैत्यः
परिघेण मूर्द्धनि ॥ स चापि वीरः प्रविभिन्नमूर्धा पपात भूमौ रुधिरं समुद्गिरन् ॥३१॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये
चतुर्दशोऽध्यायः ॥ १४ ॥ नारद उवाच ॥ पतितं वीरभद्रं तु दृष्ट्वा रुद्रगणा भयात् ॥ अगमँस्ते रणं हित्वा
क्रोशमाना महेश्वरम् ॥ १ ॥ अथ कोलाहलं श्रुत्वा गणानां चंद्रशेखरः ॥ अभ्ययाद्वृषमारूढः संग्राम प्रहसन्निव
॥ २ ॥ रुद्रमायांतमालोक्य सिंहनादैर्गणाः पुनः ॥ निवृत्ताः संगरे दैत्यान्निजघ्नुः शरवृष्टिभिः ॥ ३ ॥ दैत्याश्च
भीषणं दृष्ट्वा सर्वे चैव विदुद्रुवुः ॥ कार्तिकव्रतिनं दृष्ट्वा पातकानीव तद्भयात् ॥ ४ ॥ अथ जलंधरो दैत्यान्विद्रुतान्प्रेक्ष्य
संगरे ॥ रोषादधावच्चंडीशं मुंचन्बाणान्सहस्रशः ॥ ५ ॥ शुंभो निशुंभो श्वमुखः कालनेमिर्बलाहकः ॥
खड्गरोमा प्रचंडश्च घस्मराद्याः शिवं ययुः ॥ ६ ॥ बाणांधकारसंछन्नं दृष्ट्वा गणबलं शिवः ॥ बाणजालमवच्छिद्य
स्वबाणैरावृतं नभः ॥ ७ ॥ दैत्यांश्च बाणवात्याभिः पीडितानकरोत्तदा ॥ प्रचंडबाणजालौघैरपातयत भूतले

॥ ८ ॥खड्गरोम्णः शिरः कोपात्तदा परशुनाच्छिनत् ॥ बलाहकस्य च शिरः खट्वांगेनाकरोद्द्विधा ॥ ९ ॥ बद्ध्वा
च घस्मरं दैत्यं पाशेनाभ्यहनद्भुवि ॥ वृषशृंगहताः केचित्केचिद्बाणैर्निपातिताः ॥ न शेकुरसुराः स्थातुं गजाः
सिंहार्दिता इव ॥ १० ॥ ततः कोपपरीतात्मा वेगाद्रुद्रं जलंधरः ॥ आह्वयामास समरे तीव्राशनिसमस्वनः ॥११॥
जलंधर उवाच ॥ युध्यस्वाद्य मया सार्धं किमेभिर्निहतैस्तव ॥ यच्च किंचिद्बलं तेऽस्ति तद्दर्शय जटाधर ॥ १२॥
नारद उवाच ॥ इत्युक्त्वा दशभिर्बाणैर्जघान वृषभध्वजम् ॥ स तान्प्राप्तांश्छितैर्बाणैश्चिच्छेद प्रहसञ्छिवः ॥१३॥
ततो हयान्ध्वजं छत्रं धनुश्चिच्छेद सप्तभिः ॥ १४ ॥ स च्छिन्नधन्वा विरथो गदामुद्यम्य वेगवान् ॥ अभ्यधाव-
च्छिवस्तावद्गदां बाणैर्द्विधाकरोत् ॥ १५ ॥ तथापि मुष्टिमुद्यम्य ययौ रुद्रं जिघांसया ॥ तावच्छिवेन बाणौघैः
क्रोशमात्रमपाकृतः ॥ १६ ॥ ततो जलंधरो दैत्यो मत्वा रुद्रं बलाधिकम् ॥ ससर्ज मायां गांधर्वीमद्भुतां रुद्र-
मोहिनीम् ॥ १७ ॥ ततो जगुश्च ननृतुर्गंधर्वाप्सरसां गणाः ॥ तालवेणुमृदंगाद्यान्वादयंति स्म चापरे ॥ १८ ॥
तद्दृष्ट्वा महदाश्चर्यं रुद्रो नादविमोहितः ॥ पतितान्यपि शस्त्राणि करेभ्यो न विवेद सः ॥१९॥ एकाग्रीभूतमालोक्य

रुद्रं दैत्यो जलंधरः ॥ कामार्त्तः स जगामाशु यत्र गौरी स्थिताभवत् ॥ २० ॥ युद्धे शुंभनिशुंभाख्यौ स्थापयित्वा
महाबलौ ॥ दशदोर्दंडपंचास्यस्त्रिनेत्रश्च जटाधरः ॥ २१ ॥ महावृषभमारूढः स बभूव जलंधरः ॥ अथो रुद्रं
समायांतमालोक्य भववल्लभा ॥ अभ्याययौ सखीमध्यात्तद्दर्शनपथे भवत् ॥ २२ ॥ यावद्ददर्श चार्वंगीं पार्वतीं
दनुजेश्वरः ॥ तावत्स वीर्यं मुमुचे जडांगश्चाभवत्तदा ॥ २३ ॥ अथ ज्ञात्वा तदा गौरी दानवं भयविह्वला ॥ जगा-
मांतर्हिता वेगात्सा तदोत्तरमानसे ॥ २४ ॥ तामदृष्ट्वा ततो दैत्यः क्षणाद्विद्युल्लतामिव ॥ जवेनागात्पुनर्युद्धे यत्र
देवो वृषध्वजः ॥ २५ ॥ पार्वत्यपि भयाद्विष्णुं सस्मार मनसा तदा ॥ तावद्ददर्श तं देवं सूपविष्टं समीपगम् ॥ २६ ॥
पार्वत्युवाच ॥ विष्णो जलंधरो दैत्यः कृतवान्परमाद्भुतम् ॥ तत्किं न विदितं तेऽस्ति चेष्टितं तस्य दुर्मतेः ॥ २७ ॥
श्रीभगवानुवाच ॥ तेनैव दर्शितः पंथा वयमप्यन्वयामहे ॥ नान्यथासौ भवेद्वध्यः पातिव्रत्यसुरक्षितः ॥ २८ ॥
नारद उवाच ॥ जगाम विष्णुरित्युक्त्वा पुनर्जालंधरं पुरम् ॥ अथ रुद्रश्च गंधर्वानुगतः संगरे स्थितः ॥ २९ ॥
अंतर्धानगतां मायां दृष्ट्वा स बुबुधे तदा ॥ ३० ॥ ततो भवो विस्मितमानसः पुनर्जगाम युद्धाय जलंधरं रुषा ॥

स चापि दैत्यः पुनरागतं शिवं दृष्ट्वा शरौघैः समवाकिरद्रणे ॥ ३१ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये शिवजलंधरसंग्रामो नाम पंचदशोऽध्यायः ॥ १५ ॥ नारद उवाच ॥ विष्णुर्जालंधरं गत्वा तद्दैत्यपुटभेदनम् ॥ पातिव्रत्यस्य भंगाय वृंदायाश्चाकरोन्मतिम् ॥ १ ॥ अथ वृंदारकादेवी स्वप्नमध्ये ददर्श ह ॥ भर्तारं महिषारूढं तैलाभ्यक्तं दिगंबरम् ॥ २ ॥ कृष्णप्रसूनभूषाढ्यं क्रव्यादगणसेवितम् ॥ दक्षिणाशागतं मुंडं तमसाप्यावृतं तदा ॥ ३ ॥ स्वपुरं सागरे मग्नं सहसैवात्मना सह ॥ प्रबुद्धा सा तदा बाला दुःस्वप्नं प्रविचिन्वती ॥ ४ ॥ ददर्शोदितमादित्यं सच्छिद्रं निष्प्रभं मुहुः ॥ तदनिष्टमिति ज्ञात्वा रुदंती भयविह्वला ॥ ५ ॥ कुत्रचिन्नालभच्छर्म गोपुराट्टालभूमिषु ॥ ततः सखीद्वययुता नगरोद्यानमागमत् ॥ ६ ॥ संत्रस्ता साभ्रमद्बाला नालभत्कुत्रचित्सुखम् ॥ वनाद्वनांतरं याता नैव वेदात्मनः सुखम् ॥ ७ ॥ ततः सा भ्रमती बाला ददर्शातीव भीषणौ ॥ राक्षसौ सिंहवदनौ दंष्ट्रानयनभीषणौ ॥ ८ ॥ तौ दृष्ट्वा विह्वलातीव पलायनपराऽभवत् ॥ ददर्श तापसं शांतं सशिष्यं मौनमास्थितम् ॥ ९ ॥ ततस्तत्कंठमावृत्य निजबाहुलतां भयात् ॥ मुने मां रक्ष शरणमागतास्मीत्यभाषत

॥ १० ॥ मुनिस्तां विह्वलां दृष्ट्वा राक्षसानुगतां तदा ॥ हुंकारेणैव तौ घोरौ चकार विमुखौ तदा ॥ ११ ॥ तौ हुंकारभयत्रस्तौ दृष्ट्वा तौ विमुखौ गतौ ॥ प्रणम्य दंडवद्भूमौ वृन्दा वचनमब्रवीत् ॥ १२ ॥ वृन्दोवाच ॥ रक्षिताहं त्वया घोराद्भयादस्मात्कृपानिधे ॥ किंचिद्विज्ञप्तुमिच्छामि कृपया तन्निशम्यताम् ॥ १३ ॥ जलंधरो हि मे भर्त्ता रुद्रं योद्धुं गतः प्रभो ॥ स तत्रास्ते कथं युद्धे तन्मे कथय सुव्रत ॥ १४ ॥ नारद उवाच ॥ मुनिस्तद्वाक्यमाकर्ण्य कृपयोर्ध्वमवैक्षत ॥ तावत्कपी समायातौ तं प्रणम्याग्रतः स्थितौ ॥ १५ ॥ ततस्तद्भ्रूलतासंज्ञानियुक्तौ गगनं गतौ ॥ गत्वा क्षणार्द्धादागत्य वानरावग्रतः स्थितौ ॥ १६ ॥ शिरःकबंधहस्तौ च दृष्ट्वाब्धितनयस्य सा ॥ पपात मूर्छिता भूमौ भर्तृव्यसनदुःखिता ॥ १७ ॥ कमंडलुजलं सिक्त्वा मुनिनाश्वासिता तदा ॥ स्वभर्तृभाले सा भालं कृत्वा दीना रुरोद ह ॥ १८ ॥ वृन्दोवाच ॥ यः पुरा सुखसंवादे विनोदयसि मां प्रभो ॥ स कथं न वदस्यद्य वल्लभां मामनागसम् ॥ १९ ॥ येन देवाः सगंधर्वा निर्जिता विष्णुना सह ॥ स कथं तापसेनाद्य त्रैलोक्यविजयी हतः ॥ २० ॥ नारद उवाच ॥ रुदित्वेति तदा वृन्दा तं मुनिं वाक्यमब्रवीत् ॥ वृन्दोवाच ॥ कृपानिधे मुनिश्रेष्ठ

जीवयैनं मम प्रियम् ॥ त्वमेवास्य मुने शक्तो जीवनाय मतो मम ॥ २१ ॥ नारद उवाच ॥ इति तद्वाक्यमाकर्ण्य प्रहसन्मुनिरब्रवीत् ॥ मुनिरुवाच ॥ नायं जीवयितुं शक्तो रुद्रेण निहतो युधि ॥ २२ ॥ तथापि त्वत्कृपाविष्ट एनं संजीवयाम्यहम् ॥ नारद उवाच ॥ इत्युक्त्वांतर्दधे विप्रस्तावत्सागरनंदनः ॥ २३ ॥ वृंदामालिंग्य तद्वक्त्रं चुचुंबे प्रीतमानसः ॥ अथ वृंदापि भर्त्तारं दृष्ट्वा हर्षितमानसा ॥ २४ ॥ रेमे तद्वनमध्यस्था तद्युक्ता बहुवासरम् ॥ नारद उवाच ॥ कदाचित्सुरतस्यांते दृष्ट्वा विष्णुं तमेव हि ॥ २५ ॥ निर्भर्त्स्य क्रोधसंयुक्ता वृन्दा वचनमब्रवीत् ॥ वृन्दोवाच ॥ धिक्त्वदीयं हरे शीलं परदाराभिगामिनः ॥ २६ ॥ ज्ञातोऽसि त्वं मया सम्यङ् मायी प्रत्यक्षतापसः ॥ यौ त्वया मायया द्वाःस्थौ स्वकीयौ दर्शितौ मम ॥ २७ ॥ तावेव राक्षसौ भूत्वा भार्यां तव हरिष्यतः ॥ त्वं चापि भार्यादुःखार्तो वने कपिसहायवान् ॥ २८ ॥ भ्रम सर्वेश्वरैणोऽयं यस्ते शिष्यत्वमागतः ॥ इत्युक्त्वा सा तदा वृन्दा प्राविशद्धव्यवाहनम् ॥ २९ ॥ विष्णुना वार्यमाणापि तस्यामासक्तचेतसा ॥ ३० ॥ ततो हरिस्तामनुसंस्मरन्मुहुर्वृंदां चिताभस्मरजोवगुंठितः ॥ तत्रैव तस्थौ मुनिसिद्धसंघैः प्रबोध्यमानोऽपि ययौ न शांतिम् ॥ ३१ ॥ इति

श्रीपद्मपुराणे कार्तिकमाहात्म्ये वृन्दोपाख्याने विष्णुसाक्षात्कारो नाम षोडशोऽध्यायः ॥ १६ ॥ नारद उवाच ॥
ततो जलंधरो दृष्ट्वा रुद्रमद्भुतविक्रमम् ॥ चकार मायया गौरीं त्र्यंबकं मोहयन्निव ॥ १ ॥ रथोपरि च तां बध्वा
रुदंतीं पार्वतीं शिवः ॥ निशुंभप्रमुखाद्यैश्च वध्यमानां ददर्श सः ॥ २ ॥ गौरीं तथाविधां दृष्ट्वा शिवोऽप्युद्विग्नमानसः ॥
अवाङ्मुखः स्थितस्तूष्णीं विस्मृत्य स्वपराक्रमम् ॥ ३ ॥ ततो जलंधरो वेगात्त्रिभिर्विव्याध सायकैः ॥
आपुंखमग्नैस्तं रुद्रं शिरस्युरसि चोदरे ॥ ४ ॥ ततो जज्ञे स तां मायां विष्णुना संप्रबोधितः ॥ रौद्ररूपधरो
जातो ज्वालामालातिभीषणः ॥ ५ ॥ तस्यातीव महारौद्रं रूपं दृष्ट्वा महासुराः ॥ न शेकुः संमुखे स्थातुं भेजिरे
ते दिशो दश ॥ ६ ॥ ततः शापं ददौ रुद्रस्तयोः शुंभनिशुंभयोः ॥ मम युद्धादपाक्रांतौ गौर्य्या वध्यौ भविष्यथः
॥ ७ ॥ पुनर्जलंधरो वेगाद्ववर्ष निशितैः शरैः ॥ बाणांधकारसंछन्नं तदा भूमितलं महत् ॥ ८ ॥ यावद्रुद्रश्च चिच्छेद
तस्य बाणचयं जवात् ॥ तावत्स परिघेणाशु जघान वृषभं बली ॥ ९ ॥ वृषस्तेन प्रहारेण परावृत्तो रणांगणात् ॥
रुद्रेणाकृष्यमाणोऽपि न तस्थौ रणभूमिषु ॥ १० ॥ ततः परमसंक्रुद्धो रुद्रो रौद्रवपुर्धरः ॥ चक्रं सुदर्शनं वेगाच्चि-

क्षेपादित्यवर्च्चसम् ॥ ११ ॥ प्रदहन्रोदसी वेगात्पपात वसुधातले ॥ जहार तच्छिरः कायान्महदायतलोचनम् ॥ १२ ॥ रथात्कायः पपातास्य नादयन्वसुधातलम् ॥ तेजश्च निर्गतं देहात्तद्रुद्रे लयमागतम् ॥ १३ ॥ वृन्दादेहोद्भवं तेजस्तद्गौर्य्यां लयमागतम् ॥ अथ ब्रह्मादयो देवा हर्षेणोत्फुल्ललोचनाः ॥ १४ ॥ प्रणम्य शिरसा देवं शशंसुर्विष्णुचेष्टितम् ॥ देवा ऊचुः ॥ महादेव त्वया देवा रक्षिताः शत्रुजाद्भयात् ॥ १५ ॥ किंचिदन्यत्समुद्भूतं तत्र किं करवामहे ॥ वृन्दालावण्यसंभ्रांतो विष्णुस्तिष्ठति मोहितः ॥ १६ ॥ रुद्र उवाच ॥ गच्छध्वं शरणं देवा विष्णोर्मोहापनुत्तये ॥ शरण्यां मोहिनीं मायां सा वः कार्य्यं करिष्यति ॥ १७ ॥ नारद उवाच ॥ इत्युक्त्वांतर्दधे देवः सह भूतगणैस्तदा ॥ देवाश्च तुष्टुवुर्मूलप्रकृतिं भक्तवत्सलाम् ॥ १८ ॥ देवा ऊचुः ॥ यदुद्भवाः सत्वरजस्तमोगुणाः सर्गस्थितिध्वंसनिदानकारिणः ॥ यदिच्छया विश्वमिदं भवाभवौ तनोति मूलप्रकृतिं नताः स्म बाम् ॥ १९ ॥ या हि त्रयोर्विंशतिभेदशब्दिता जगत्यशेषे समाधिष्ठिता परा ॥ यद्रूपकर्माणि जडास्त्रयोऽपि देवास्तु मूलप्रकृतिं नताः स्म ताम् ॥ २० ॥ यद्भक्तियुक्ताः पुरुषास्तु नित्यं दारिद्र्यभीमोहपराभवादीन् ॥ न प्राप्नुवन्त्येव हि भक्त-

वत्सलां सदैव मूलप्रकृतिं नताः स्म ताम् ॥ २१ ॥ नारद उवाच ॥ स्तवमेतत्त्रिसंध्यं यः पठेदेकाग्रमानसः ॥ दारिद्र्यमोहदुःखानि न कदाचित्स्पृशन्ति तम् ॥ २२ ॥ इत्थं स्तुवंतस्ते देवास्तेजोमंडलमास्थितम् ॥ ददृशुर्गगने तत्र ज्वालाव्याप्तदिगंतरम् ॥ २३ ॥ तन्मध्याद्भारतीं सर्वे शुश्रुवुर्व्योमचारिणीम् ॥ शक्तिरुवाच ॥ अहमेव त्रिधा भिन्ना तिष्ठामि त्रिविधैर्गुणैः ॥ २४ ॥ गौरीलक्ष्मीस्वराज्योती रजःसत्वतमोगुणैः ॥ तत्र गच्छत ताः कार्यं विधास्यंति च वः सुराः ॥ २५ ॥ नारद उवाच ॥ शृण्वतामिति तां वाचमंतर्धानमगान्महः ॥ देवानां विस्मयोत्फुल्लनेत्राणां तत्तदा नृप ॥ २६ ॥ ततः सर्वेऽपि ते देवा गत्वा तद्वाक्यनोदिताः ॥ गौरीं लक्ष्मीं स्वरां चैव प्रणेमुर्भक्तितत्पराः ॥ २७ ॥ ततस्तास्तान्सुरान्दृष्ट्वा प्रणतान्भक्तवत्सलाः ॥ बीजानि प्रददुस्तेभ्यो वाक्यान्यूचुस्तदा च ताः ॥ २८ ॥ देव्य ऊचुः ॥ इमानि तत्र बीजानि विष्णुर्यत्रावतिष्ठति ॥ निवपध्वं ततः कार्यं भवतां सिद्धिमेष्यति ॥ २९ ॥ नारद उवाच ॥ ततस्तु हृष्टाः सुरसिद्धसंघाः प्रगृह्य बीजानि विचिक्षिपुस्ते ॥ वृंदान्वितो भूमितले स यत्र विष्णुः सदा तिष्ठति सौख्यहीनः ॥ ३० ॥ इत्येतत्सत्यवाक्यस्य माहात्म्यं समुदाहृतम् ॥ यः पठे-

च्छृणुयाद्वापि स्वर्गलोकं स गच्छति ॥ ३१ ॥ शृणुयादेकचित्तेन अविघ्नेनापि युज्यते ॥ सुतैर्विमुक्ता या नारी नरश्चापि पठेत्सदा ॥ ३२ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये जलंधरवधो नाम सप्तदशोऽध्यायः ॥ १७ ॥

नारद उवाच ॥ ॥ क्षितेभ्यस्तत्र बीजेभ्यो वनस्पत्यस्त्रयोऽभवन् ॥ धात्री च मालती चैव तुलसी च नृपोत्तम ॥ १ ॥ धात्र्युद्भवा स्मृता धात्री माभवा मालती स्मृता ॥ गौरीभवा च तुलसी रजःसत्वतमोगुणाः ॥ २ ॥ स्त्रीरूपिण्यो वनस्पत्यो दृष्ट्वा विष्णुस्तदा नृप ॥ उत्तस्थौ संभ्रमाद्वृन्दारूपातिशयविभ्रमः ॥ ३ ॥ दृष्ट्वाशु तेन ता रागात्कामासक्तेन चेतसा ॥ ते चापि तुलसीधात्र्यौ विष्णुमेवावलोकताम् ॥ ४ ॥ यच्च लक्ष्म्या पुरा बीजमीर्ष्ययैव समर्पितम् ॥ तस्मात्तदुद्भवा नारी तस्मिन्नीर्ष्यापराभवत् ॥ ५ ॥ अतः सा बर्बरीत्याख्यामवापातीव गर्हिता ॥ धात्रीतुलस्यौ तद्रागात्तस्य प्रीतिप्रदे सदा ॥ ६ ॥ ततो विस्मृतदुःखोऽसौ विष्णुस्ताभ्यां सहैव तु ॥ वैकुंठमगमद्धृष्टः सर्वदेवनमस्कृतः ॥ ७ ॥ कार्तिकोद्यापने विष्णोस्तस्मात्पूजा विधीयते ॥ तुलसीमूलदेशे तु प्रीतिदा सा ततः स्मृता ॥ ८ ॥ तुलसीकाननं राजन्गृहे यस्यावतिष्ठते ॥ तद्गृहं तीर्थरूपं तु नायांति यमकिंकराः ॥ ९ ॥

सर्वपापहरं पुण्यं कामदं तुलसीवनम् ॥ रोपयंति नरश्रेष्ठास्ते न पश्यंति भास्करिम् ॥ १० ॥ दर्शनं नर्मदायास्तु गंगास्नानं तथैव च ॥ तुलसीवनसंसर्गः सममेतत्त्रयं स्मृतम् ॥ ११ ॥ रोपणात्पालनात्सेकाद्दर्शनात्स्पर्शनान्नृणाम् ॥ तुलसी दहते पापं वाङ्मनःकायसंचितम् ॥ १२ ॥ तुलसीमंजरीभिर्यः कुर्याद्धरिहरार्चनम् ॥ न स गर्भगृहं याति मुक्तिभागी न संशयः ॥ १३ ॥ पुष्करादीनि तीर्थानि गंगाद्याः सरितस्तथा ॥ वासुदेवादयो देवास्तिष्ठंति तुलसीदले ॥ १४ ॥ तुलसीमृत्तिकालिप्तो यस्तु प्राणान्विमुंचति ॥ यमोऽपि नेक्षितुं शक्तो युक्तं पापशतैरपि ॥ विष्णोः सायुज्यमाप्नोति सत्यं सत्यं नृपोत्तम ॥ १५ ॥ तुलसीकाष्ठजं यस्तु चंदनं धारयेन्नरः ॥ तद्देहं न स्पृशेत्पापं क्रियमाणमपीह यत् ॥ १६ ॥ तुलसीविपिनच्छाया यत्र यत्र भवेन्नृप ॥ तत्र श्राद्धं प्रकर्त्तव्यं पितॄणां दत्तमक्षयम् ॥ १७ ॥ धात्रीच्छायासु यः कुर्यात्पिंडदानं नृपोत्तम ॥ तृप्तिं प्रयांति पितरस्तस्य ये नरके स्थिताः ॥ १८ ॥ मूर्ध्नि पाणौ मुखे चैव देहे च नृपसत्तम ॥ धत्ते धात्रीफलं यस्तु स विज्ञेयो हरिः स्वयम् ॥ १९ ॥ धात्रीफलं च तुलसी मृत्तिका द्वारकोद्भवा ॥ यस्य देहे स्थिता नित्यं स जीवन्मुक्त उच्यते ॥ २० ॥ धात्रीफलविमि-

श्चैस्तु तुलसीदलमिश्रितैः ॥ जलैः स्नाति नरस्तस्य गंगास्नानफलं स्मृतम् ॥ २१ ॥ देवार्चनं नरः कुर्याद्धात्रीपत्रैः
फलैरपि ॥ सुवर्णमणिमुक्तौघैरर्चनस्याप्नुयात्फलम् ॥ २२ ॥ तीर्थानि मुनयो देवा यज्ञाः सर्वेऽपि कार्त्तिके ॥
नित्यं धात्रीं समाश्रित्य तिष्ठंत्यर्के तुलाश्रिते ॥ २३ ॥ द्वादश्यां तुलसीपत्रं धात्रीपत्रं तु कार्तिके ॥ लुनाति स
नरो गच्छेन्निरयानतिगर्हितान् ॥ २४ ॥ धात्रीच्छायां समाश्रित्य कार्तिकेऽन्नं भुनक्ति यः ॥ अन्नसंसर्गजं पाप-
मावर्षं तस्य नश्यति ॥ २५ ॥ धात्रीमूले तु यो विष्णुं कार्तिके पूजयेन्नरः ॥ विष्णुक्षेत्रेषु सर्वेषु पूजितस्तेन
सर्वदा ॥ २६ ॥ धात्रीतुलस्योर्माहात्म्यमपि देवश्चतुर्मुखः ॥ न समर्थो भवेद्वक्तुं यथा देवस्य शार्ङ्गिणः ॥ २७ ॥
धात्रीतुलस्युद्भवकारणं यः शृणोति यः श्रावयते च भक्त्या ॥ विधूतपाप्मा सह पूर्वजैः स्वैः स्वर्गं व्रजत्यग्र्य-
विमानसंस्थः ॥ २८ ॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये धात्रीतुलस्योर्माहात्म्यकथनं नामाष्टादशोऽध्यायः
॥ १८ ॥ पृथुरुवाच ॥ सेतिहासमिदं ब्रह्मन्माहात्म्यं कथितं मम ॥ अत्याश्चर्यकरं सम्यक्तुलस्यास्तच्छ्रुतं मया
॥ १ ॥ यदूर्जव्रतिनः पुंसः फलं महदुदाहृतम् ॥ तत्पुनर्ब्रूहि माहात्म्यं केन चीर्णमिदं कथम् ॥ २ ॥ नारद

उवाच ॥ आसीत्सह्याद्रिविषये करवीरपुरे पुरा ॥ ब्राह्मणो धर्मवित्कश्चिद्धर्मदत्तेति विश्रुतः ॥ ३ ॥ विष्णुव्रतकरः शश्वद्विष्णुपूजारतः सदा ॥ द्वादशाक्षरविद्यायां जपनिष्ठोऽतिथिप्रियः ॥ ४ ॥ कदाचित्कार्त्तिके मासि हरिजागरणाय सः ॥ रात्र्यां तुर्य्यांशशेषायां जगाम हरिमंदिरम् ॥ ५ ॥ हरिपूजोपकरणान्प्रगृह्य व्रजता तदा ॥ तेन दृष्टा समायाता राक्षसी भीमदर्शना ॥ ६ ॥ वक्रदंष्ट्रा ललज्जिह्वा निमग्ना रक्तलोचना ॥ दिगंबरा शुष्कमांसा लंबोष्ठी घर्घरस्वना ॥ ७ ॥ तां दृष्ट्वा भयवित्रस्तः कंपितावयवस्तदा ॥ पूजोपकरणैः सर्वैः पयोभिश्चाहनद्भयात् ॥ ८ ॥ संस्मृत्य यद्धरेर्नाम तुलसीयुक्तवारिणा ॥ सोहनत्पातकं तस्यास्तस्मात्सर्वमगाल्लयम् ॥ ९ ॥ अथ संस्मृत्य सा पूर्वजन्मकर्मविपाकजाम् ॥ स्वां दशामब्रवीद्विप्रं दंडवच्च प्रणम्य सा ॥ १० ॥ कलहोवाच ॥ पूर्वकर्मविपाकेन दशामेतां गतास्म्यहम् ॥ तत्कथं तु पुनर्विप्र प्राप्नुयामुत्तमां गतिम् ॥ ११ ॥ नारद उवाच ॥ तां दृष्ट्वा प्रणतां सम्यग्वदमानां स्वकर्म तत् ॥ अतीव विस्मितो विप्रस्तदा वचनमब्रवीत् ॥ १२ ॥ धर्मदत्त उवाच ॥ केन कर्मविपाकेन त्वं दशामीदृशीं गता ॥ कुतस्त्या का च किंशीला तत्सर्वं कथयस्व मे ॥ १३ ॥ कलहोवाच ॥

सौराष्ट्रनगरे ब्रह्मन्भिक्षुर्नामाभवद्द्विजः ॥ तस्याहं गृहिणी पूर्वं कलहाख्याऽतिनिष्ठुरा ॥ १४ ॥ न कदाचिन्मया भर्तुर्वचसापि शुभं कृतम् ॥ नार्पितं तस्य मिष्टान्नं भर्तुर्वचनशीलया ॥ १५ ॥ कलहप्रियया नित्यं भयोद्विग्नमना यदा ॥ परिणेतुं तदान्यां तु पतिश्चक्रे मतिं मम ॥ १६ ॥ ततो गरं समादाय प्राणांस्त्यक्त्वा मृतिं गता ॥ अथ बद्ध्वा बध्यमानां मां निन्युर्यमकिंकराः ॥ १७ ॥ यमश्च मां तदा दृष्ट्वा चित्रगुप्तमपृच्छत ॥ यम उवाच ॥ अनया किं कृतं कर्म चित्रगुप्त विलोकय ॥ १८॥ प्राप्नोत्वेषा कर्मफलं शुभं वा यदि वाऽशुभम् ॥ कलहोवाच ॥ चित्रगुप्तस्तदा वाक्यं भर्त्सयन्मामुवाच सः ॥ १९ ॥ चित्रगुप्त उवाच ॥ अनया तु शुभं कर्म कृतं किंचिन्न विद्यते ॥ मिष्टान्नं भुंजमानेयं न भर्तारि तदर्पितम् ॥ २० ॥ अतश्च वल्गुनीयोन्यां स्वविष्ठादी च तिष्ठतु ॥ भर्तुर्द्वेषकरी ह्येषा नित्यं कलहकारिणी ॥ २१ ॥ विष्ठादा शूकरीयोनौ तस्मात्तिष्ठत्वियं हरे ॥ पाकभांडे सदा भुंक्ते भुंक्ते चैका यतस्ततः ॥२२॥ तस्मादेषा बिडाली तु स्वजातापत्यभक्षिणी ॥ भर्त्तारमपि चोद्दिश्य ह्यात्मघातः कृतोऽनया ॥२३॥ तस्मात्प्रेतशरीरेऽपि तिष्ठत्वेषातिनिंदिता ॥ अतश्चैव मरौ देशे प्रापितव्या भटैस्तव ॥ २४ ॥ तत्र प्रेतशरीरस्था

चिरं तिष्ठत्वियं ततः ॥ ऊर्ध्वं योनित्रयं चैषा भुनक्त्वशुभकारिणी ॥ २५ ॥ कलहोवाच ॥ साहं पंचशताब्दानि
प्रेतदेहे स्थिता किल ॥ क्षुत्तृड्भ्यां पीडिता नित्यं दुःखिता स्वेन कर्मणा ॥ २६ ॥ क्षुत्तृड्भ्यां पीडिताविश्य शरीरं
वणिजां त्वहम् ॥ आयाता दक्षिणं देशं कृष्णावेण्योश्च संगमम् ॥ २७ ॥ तत्तीरं संश्रिता यावत्तावत्तस्य शरीरतः ॥
शिवविष्णुगणैर्दूरमपकृष्टा बलादहम् ॥ २८ ॥ ततः क्षुत्क्षामया हि त्वं गच्छन्दृष्टो द्विजोत्तम ॥ त्वद्धस्ततुलसीनीरसंसर्गगतपापया
॥ २९ ॥ तत्कृपां कुरु विप्रेन्द्र कथं मुक्तिमवाप्नुयाम् ॥ योनित्रयादग्रभवादस्माच्च प्रेतदेहतः
॥ ३० ॥ इत्थं निशम्य कलहावचनं द्विजाग्र्यस्तत्कर्मपाकभवविस्मयदुःखयुक्तः ॥ तद्ग्लानिदर्शनकृपाचलचित्तवृत्तिर्ध्यात्वा
चिरं स वचनं निजगाद दुःखात् ॥३१॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये एकोनविंशोऽध्यायः
॥१९॥ धर्मदत्त उवाच ॥ विलयं यांति पापानि तीर्थदानव्रतादिभिः ॥ प्रेतदेहस्थितायास्ते तेषु नैवाधिकारिता
॥ १ ॥ त्वद्ग्लानिदर्शनादस्मात्खिन्नं च मम मानसम् ॥ नैव निर्वृतिमायाति त्वामनुद्धृत्य दुःखिताम् ॥ २ ॥
पातकं च तवात्युग्रं योनित्रयविपाकदम् ॥ नैवाल्पैः क्षीयते पुण्यैः प्रेतत्वं चातिगर्हितम् ॥३॥ तस्मादाजन्मजनितं

यन्मया कार्तिकव्रतम् ॥ तत्पुण्यस्यार्द्धभागेन सद्गतिं त्वमवाप्नुहि ॥ ४ ॥ कार्तिकव्रतपुण्येन न साम्यं यांति सर्वथा ॥ यज्ञदानानि तीर्थानि दत्तान्यपि यतो ध्रुवम् ॥ ५ ॥ नारद उवाच ॥ इत्युक्त्वा धर्मदत्तोऽसौ यावत्तामभ्यषेचयत् ॥ तुलसीमिश्रतोयेन श्रावयन्द्वादशाक्षरम् ॥ ६ ॥ तावत्प्रेतत्वनिर्मुक्ता ज्वलदग्निशिखोपमा ॥ दिव्यरूपधरा जाता लावण्येन यथेंदिरा ॥ ७ ॥ ततः सा दंडवद्भूमौ प्रणनामाथ तं द्विजम् ॥ उवाच सा तदा वाक्यं हर्षगद्गदभाषिणी ॥८॥ कलहोवाच ॥ त्वत्प्रसादाद्विजश्रेष्ठ निर्मुक्ता निरयादहम्॥ पापौघमज्जमानायास्त्वं नौर्भूतोऽसि मे ध्रुवम् ॥ ९ ॥ ॥ नारद उवाच ॥ इत्थं सा वदती विप्रं ददर्शायांतमंबरात् ॥ विमानं भास्वरं युक्तं विष्णुरूपधरैर्गणैः ॥ १० ॥ अथ सा तद्विमानाग्र्यं द्वाःस्थाभ्यामधिरोपिता ॥ पुण्यशीलसुशीलाभ्यामप्सरोगणसेविता ॥ ११ ॥ तद्विमानं तदापश्यद्धर्मदत्तः सविस्मयम् ॥ पपात दंडवद्भूमौ दृष्ट्वा तौ विष्णुरूपिणौ ॥ १२ ॥ पुण्यशीलसुशीलौ च तमुत्थाप्यानतं द्विजम् ॥ समभ्यनंदयन्वाक्यमूचतुर्धर्मसंयुतम् ॥ १३ ॥ गणावचतुः ॥ साधु साधु द्विजश्रेष्ठ यत्त्वं विष्णुरतः सदा ॥ दीनानुकंपी धर्मज्ञो विष्णुव्रतपरायणः ॥ १४ ॥ आबालत्वाच्छुभं त्वेत-

द्यत्त्वया कार्तिकव्रतम् ॥ कृतं तस्यार्द्धदानेन यदस्याः पूर्वकर्मजम् ॥ १५ ॥ जन्मांतरशतोद्भूतं पापं तद्विलयं
गतम् ॥ स्नानादेव गतं पापं यदस्याः पूर्वकर्मजम् ॥ १६ ॥ हरिजागरणाद्यैश्च विमानमिदमास्थितम् ॥ वैकुंठं
नीयते साधो नानाभोगयुता त्वियम् ॥ १७ ॥ दीपदानभवैः पुण्यैस्तेजसां रूपमास्थिता ॥ तुलसीपूजनाद्यैश्च
कार्तिकव्रतकैः शुभैः ॥ १८ ॥ विष्णोः संनिधिगा जाता त्वया दत्ते कृपानिधे ॥ त्वमप्यस्य भवस्यांते भार्याभ्यां
सह यास्यासि ॥ १९ ॥ वैकुंठभवनं विष्णोः सांनिध्यं च सरूपताम् ॥ ते धन्याः कृतकृत्यास्ते तेषां च सफलो
भवः ॥ २० ॥ यैर्भक्त्याराधितो विष्णुर्धर्मदत्त त्वया यथा ॥ सम्यगाराधितो विष्णुः किन्न यच्छति देहिनाम्
॥ २१ ॥ औत्तानचरणिर्येन ध्रुवत्वे स्थापितः पुरा ॥ यन्नामस्मरणादेव देहिनो यांति सद्गतिम् ॥ २२ ॥ ग्राहगृहीतो नागेन्द्रो यन्नामस्मरणात्पुरा ॥ विमुक्तः सन्निधिं प्राप्तो जातोऽयं जयसंज्ञकः ॥ २३ ॥ यतस्त्वयार्चितो
विष्णुस्तत्सांनिध्यं प्रयास्यासि ॥ बहून्यब्दसहस्राणि भार्याद्वययुतस्य ते ॥ २४ ॥ ततः पुण्यक्षये जाते यदा
यास्यसि भूतले ॥ सूर्यवंशोद्भवो राजा विख्यातस्त्वं भविष्यासि ॥ २५ ॥ नाम्ना दशरथस्तत्र भार्याद्वययुतः

पुनः ॥ तृतीययानया चापि या ते पुण्यार्द्धभागिनी ॥ २६ ॥ तत्रापि तव सान्निध्यं विष्णुर्यास्यति भूतले ॥
आत्मानं तव पुत्रत्वे प्रकल्प्यामरकार्यकृत् ॥ २७ ॥ तवोर्जस्य व्रतादस्मादिष्णुसंतुष्टिकारकात् ॥ न यज्ञा न
च दानानि न तीर्थान्यधिकानि वै ॥ २८ ॥ धन्योऽसि विप्रेन्द्र यतस्त्वयैतद्व्रतं कृतं तुष्टिकरं जगद्गुरोः ॥ यदर्ध-
भागाप्तफला मुरारेः प्रणीयतेऽस्माभिरियं सलोकताम् ॥ २९ ॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये विंशति-
तमोऽध्यायः ॥ २० ॥ नारद उवाच ॥ इत्थं तद्वचनं श्रुत्वा धर्मदत्तः सविस्मयः ॥ प्रणम्य दंडवद्भूमौ वाक्यमे-
तदुवाच ह ॥ १ ॥ धर्मदत्त उवाच ॥ आराधयंति सर्वेऽपि विष्णुं भक्तार्तिनाशनम् ॥ यज्ञैर्दानैर्व्रतैस्तीर्थैस्तपोभिश्च
यथाविधि ॥ २ ॥ विष्णुप्रीतिकरं तेषां किंचित्सांनिध्यकारकम् ॥ यत्कृत्वा तानि चीर्णानि सर्वाण्यपि भवंति हि
॥ ३ ॥ गणा ऊचुः ॥ साधु पृष्टं त्वया विप्र शृणुष्वैकाग्रमानसः ॥ सेतिहासं पुरावृत्तं कथ्यमानं मयाऽनघ ॥ ४ ॥
कांचीपुर्यां पुरा चोलश्चक्रवर्ती नृपोऽभवत् ॥ यस्याख्ययैव ते देशाश्चोला इति प्रथां गताः ॥ ५ ॥ यस्मिञ्छा-
सति भूचक्रं दरिद्रो वापि दुःखितः ॥ पापबुद्धिः सरुग्वापि नैव कश्चिदभून्नरः ॥ ६ ॥ यस्याप्यनंतयज्ञस्य ताम्र-

पण्यास्तटावुभौ ॥ सुवर्णयूपैश्शोभाढ्यावास्तां चैत्ररथोपमौ ॥ ७ ॥ स कदाचिदयाद्राजा ह्यनंतशयनं द्विज ॥
यत्रासौ जगतां नाथो योगनिद्रामुपाश्रितः ॥ ८ ॥ तत्र श्रीरमणं देवं संपूज्य विधिवन्नृपः ॥ मणिमुक्ताफलैर्दिव्यैः
स्वर्णपुष्पैश्च शोभनैः ॥ ९ ॥ प्रणम्य दंडवद्भूमावुपविष्टः स तत्र वै ॥ तावद्ब्राह्मणमायांतमपश्यद्देवसन्निधौ ॥१०॥
देवार्चनार्थं पाणौ तु तुलस्युदकधारिणम् ॥ स्वपुरीवासिनं तत्र विष्णुदासाह्वयं द्विजम् ॥ ११ ॥ स तत्राभ्येत्य
विप्रर्षिर्देवदेवमपूजयत् ॥ विष्णुसूक्तेन संस्नाप्य तुलसीमंजरीदलैः ॥ १२ ॥ तुलसीपूजया तस्य रत्नपूजां पुरा
कृताम् ॥ आच्छादितां समालोक्य राजा क्रुद्धोऽब्रवीद्वचः ॥ १३ ॥ चोल उवाच ॥ माणिक्यस्वर्णपूजात्र
शोभाढ्या या कृता मया ॥ विष्णुदास कथं सेयमाच्छन्ना तुलसीदलैः ॥ १४ ॥ विष्णुभक्तिं न जानासि वराकोऽसि
मतिर्मम ॥ यस्त्वमामतिशोभाढ्यां पूजामाच्छादयस्यहो ॥ १५ ॥ इति तद्वचनं श्रुत्वा सक्रोधः स
द्विजोत्तमः ॥ राज्ञो गौरवमुल्लंघ्य जगाद वचनं तदा ॥१६॥ विष्णुदास उवाच ॥ राजन् भक्तिं न जानासि गर्वितोऽसि
नृपश्रिया ॥ कियद्विष्णुव्रतं पूर्वं त्वया चीर्णं वदस्व तत् ॥ १७ ॥ गणावूचतुः ॥ तद्ब्राह्मणवचः श्रुत्वा

प्रहस्य स नृपोत्तमः ॥ विष्णुदासं तदा गर्वादुवाच वचनं द्विजम् ॥ १८ ॥ राजोवाच ॥ इत्थं वदासि चेद्विप्र विष्णुभक्त्यातिगर्वितः ॥ भक्तिस्ते कियती विप्र दरिद्रस्याधनस्य च ॥ १९ ॥ यज्ञदानादिकं नैव विष्णोस्तुष्टिकरं कृतम् ॥ नापि देवालयं पूर्वं कृतं विप्र त्वया क्वचित् ॥ २० ॥ ईदृशस्यापि ते गर्व एष तिष्ठति भक्तितः ॥ तच्छृण्वंतु वचो मेऽद्य सर्वेऽप्येते द्विजोत्तमाः ॥ २१ ॥ साक्षात्कारमहं विष्णोरेष वाद्यगमिष्यति ॥ पश्यंतु सर्वेऽपि ततो भक्तिं ज्ञास्यंति चावयोः ॥ २२ ॥ गणावूचतुः ॥ इत्युक्त्वा स नृपोऽगच्छन्निजराजगृहं तदा ॥ आरंभे वैष्णवं सत्रं कृत्वाचार्यं स मुद्गलम् ॥ २३ ॥ ऋषिसंघसमाजुष्टं बह्वन्नं बहुदक्षिणम् ॥ यद्धतं च कृतं पूर्वं गयाक्षेत्रे समृद्धिमत् ॥ २४ ॥ विष्णुदासोऽपि तत्रैव तस्थौ देवालये व्रती ॥ यथोक्तनियमान्कुर्वन्विष्णोस्तुष्टिकरान्सदा ॥ २५ ॥ माघोर्ज्जयोर्व्रतं सम्यक्तुलसीवनपालनम् ॥ एकादश्यां हरेर्जाप्यं द्वादशाक्षरविद्यया ॥ २६ ॥ उपचारैः षोडशभिर्गीतनृत्यादिमंगलैः॥ नित्यं विष्णोस्तदा पूजां व्रतान्येतानि सोऽकरोत् ॥२७॥ नित्यं संस्मरणं विष्णोर्गच्छन्भुंजन्स्वपङ्छ्वसन् ॥ सर्वभूतास्थितं विष्णुमपश्यत्समदर्शनः ॥ २८ ॥ माघकार्त्तिकयोर्नित्यं विशेषनियमानपि ॥

अकरोद्विष्णुतुष्ट्यर्थं सोद्यापनविधिं तथा ॥ २९ ॥ एवं समाराधयतोः श्रियः पतिं तयोस्तु चोलेश्वरविष्णुदासयोः ॥
आराधयन्कालबहून्व्रतस्थयोस्तन्निष्ठसर्वेंद्रियकर्मणोस्तदा ॥ ३० ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये
एकविंशोऽध्यायः ॥२१॥ गणावूचतुः ॥ कदाचिद्विष्णुदासोऽथ कृत्वा नित्यविधिं द्विजः ॥ सूपकर्मांकरोत्तावदहरत्कोऽप्यलक्षितः ॥ १ ॥ तमदृष्ट्वाप्यसौ पाकं पुनर्नैवाकरोत्तदा ॥ सायंकालार्चनस्यासौ व्रतभंगभयाद्द्विजः ॥ २ ॥
द्वितीयेऽह्नि पुनः पाकं कृत्वा यावत्स विष्णवे॥ उपहारार्पणं कर्तुं तावत्कोऽप्यहरत्पुनः॥३॥ एवं सप्तदिनं तस्य पाकं
कोऽप्यहरन्नृप ॥ ततः स विस्मयः सोऽथ मनस्येवं विचार्य च ॥ ४ ॥ अहो नित्यं समभ्येत्य कः पाकं हरते मम ॥
क्षेत्रं संन्यासिनः स्थानं न त्याज्यं मम सर्वथा ॥ ५ ॥ पुनः पाकं विधायात्र भुज्यते यदि चेन्मया ॥ सायंकालार्चनं
चैतत्परित्याज्यं कथं भवेत् ॥ ६ ॥ यदि पाकं विधायैव भोक्तव्यं वै मया न तत् ॥ अनिवेद्य हरेः सर्वं वैष्णवैर्नैव
भुज्यते ॥ ७ ॥ उपोषितोऽहं सप्ताहं तिष्ठाम्यत्र व्रतस्थितः ॥ अद्य संरक्षणं सम्यकपाकस्यास्य करोम्यहम् ॥ ८ ॥
इति पाकं विधायासौ तत्रैवालक्षितः स्थितः ॥ तावद्ददर्श चांडालं पाकान्नहरणे स्थितम् ॥ ९ ॥ क्षुत्क्षामं दीनवदनम-

स्थिचर्मावशेषितम् ॥ तमालोक्य द्विजाग्र्योऽभूत्कृपया खिन्नमानसः ॥ १० ॥ विलोक्यान्नहरं विप्रस्तिष्ठ तिष्ठेत्यधावत ॥ कथमश्नासि तद्रूक्षं घृतमेतद्गृहाण भोः ॥ ११ ॥ इत्थं ब्रुवंतं विप्राग्र्यमायांतं स विलोक्य च ॥ वेगादधावत्तद्भीत्या मूर्च्छितश्च पपात ह ॥ १२ ॥ भीतं संमूर्च्छितं दृष्ट्वा चांडालं स द्विजोत्तमः ॥ वेगादभ्येत्य कृपया स्ववस्त्रांतैरवीजयत् ॥ १३ ॥ अथोत्थितं तमेवासौ विष्णुदासो व्यलोकयत् ॥ साक्षान्नारायणं देवं शंखचक्रगदाधरम् ॥ १४ ॥ पीताम्बरं चतुर्बाहुं श्रीवत्सांकं किरीटिनम् ॥ अतसीपुष्पसंकाशं कौस्तुभोरस्थलं विभुम्॥१५॥ तं दृष्ट्वा सात्विकैर्भावैरावृतो द्विजसत्तमः ॥ स्तोतुं चापि नमस्कर्तुं तदा नालं बभूव सः ॥१६॥ अथ शक्रादयो देवास्तत्रैवाभ्याययुस्तदा ॥ गंधर्वाप्सरसश्चापि जगुश्च ननृतुर्मुदा ॥ १७ ॥ विमानशतसंकीर्णं देवर्षिगणसंकुलम् ॥ गीतवादित्रनिर्घोषं तत्स्थानमभवत्तदा ॥ १८ ॥ ततो विष्णुःसमालिंग्य स्वभक्तं सात्विकव्रतम् ॥ सारूप्यमात्मनो दत्त्वा नयद्वैकुंठमंदिरम् ॥ १९ ॥ विमानवरसंस्थं तं गच्छंतं विष्णुसन्निधिम् ॥ दीक्षितश्चोलनृपतिर्विष्णुदासं ददर्श सः ॥ २० ॥ वैकुंठभवनं यांतं विष्णुदासं विलोक्य सः ॥ स्वगुरुं मुद्गलं वेगा-

दाहूयत्थं वचोऽब्रवीत् ॥ २१ ॥ चोल उवाच ॥ यत्स्पर्द्धया मयाचैतद्यज्ञदानादिकं कृतम् ॥ स विष्णुरूपधृग्विप्रो
याति वैकुंठमंदिरम् ॥ २२ ॥ दीक्षितेन मया सम्यक्क्षेत्रेऽस्मिन्वैष्णवे मया ॥ हुतमग्नौ कृता विप्रा दानाद्यैः
पूर्णमानसाः ॥ २३ ॥ नैवाद्यापि स मे विष्णुः प्रसन्नो जायते ध्रुवम् ॥ विष्णुदासस्य भक्त्यैव साक्षात्कारं
ददौ हरिः ॥ २४॥ तस्माद्दानैश्च यज्ञैश्च नैव विष्णुः प्रसीदति ॥ भक्तिरेव परं तस्य निदानं दर्शने विभोः ॥ २५ ॥
गणावूचतुः ॥ इत्युक्त्वा भागिनेयं स्वमभ्यषिंचन्नृपासने ॥ आबाल्याद्दीक्षितो यज्ञे ह्यपुत्रत्वमगाद्यतः ॥ २६ ॥
तस्मादद्यापि तद्देशे सदा राज्यांशभागिनः ॥ स्वस्रेया एव जायंते तत्कृतावधिवर्त्तिनः ॥ २७ ॥ यज्ञवाटं ततोऽभ्येत्य
वह्निकुंडाग्रतः स्थितः ॥ त्रिरुच्चैर्व्याजहाराशु विष्णुं संबोधयंस्तदा ॥ २८ ॥ विष्णो भक्तिं स्थिरां देहि
मनोवाक्कायकर्मभिः ॥ इत्युक्त्वा सोऽपतद्वह्नौ सर्वेषामेव पश्यताम् ॥ २९ ॥ मुद्गलस्तु ततः क्रोधाच्छिखामुत्पाटयत्स्वकाम्
॥ ततस्त्वद्यापि तद्गोत्रेमुद्गला विशिखाभवन् ॥ ३० ॥ तावदाविरभूद्विष्णुः कुंडाग्नौ भक्तवत्सलः ॥
तमालिंग्य विमानाग्र्यं समारोहयदच्युतः ॥३१॥ तमालिंग्यात्मसारूप्यं दत्त्वा वैकुंठमंदिरम् ॥ तेनैव सह देवेशो

जगाम त्रिदशैर्वृतः ॥ ३२ ॥ यो विष्णुदासः स तु पुण्यशीलो यश्चोलभूपः स सुशीलनामा ॥ एतावुभौ तत्सम-
रूपभाजौ द्वास्थौ कृतौ तेन रमाप्रियेण ॥ ३३ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये द्वाविंशोऽध्यायः ॥ २२ ॥
धर्मदत्त उवाच ॥ जयश्च विजयश्चैव विष्णोर्द्वास्थौ श्रुतौ मया ॥ किं नु ताभ्यां पुरा चीर्णं यस्मात्तद्रूपधारिणौ
॥१॥ गणावूचतुः ॥ तृणबिंदोस्तु कन्यायां देवहूत्यां पुरा द्विज ॥ कर्दमस्य तु दृष्टेस्तु पुत्रौ द्वौ संबभूवतुः ॥ २ ॥
ज्येष्ठो जयः कनिष्ठोऽभूद्विजयश्चेति नामतः ॥ तस्यामेवाभवत्पश्चात्कपिलो योगकर्मवित् ॥ ३ ॥ जयश्च
विजयश्चैव विष्णुभक्तिरतौ सदा ॥ तस्मिन्निष्ठेंद्रियग्रामौ धर्मशीलौ बभूवतुः ॥ ४ ॥ नित्यमष्टाक्षरीजाप्यौ
विष्णुव्रतकरावुभौ ॥ साक्षात्कारं ददौ विष्णुस्तयोर्नित्यार्चने सदा ॥ ५ ॥ मरुतेन कदाचिद्वावाहूतौ यज्ञकर्मणि ॥
जग्मतुर्यज्ञकुशलौ देवर्षिगणपूजितौ ॥ ६ ॥ जयस्तत्राभवद्ब्रह्मा याजको विजयोऽभवत् ॥ ततो यज्ञविधिं कृत्स्नं
परिपूर्णं च चक्रतुः ॥ ७ ॥ मरुतोऽवभृथस्नातस्ताभ्यां वित्तं ददौ बहु ॥ ततसमादाय तौ वित्तं जग्मतुः स्वाश्रमं
[illegible] ॥ ८ ॥ यजनाय पृथग्विष्णोस्तुष्ट्यर्थं तौ [illegible]दा मुनी ॥ तद्धनं विभजंतौ तु पस्पर्द्धाते परस्परम् ॥ ९ ॥

जयोऽब्रवीत्समो भागः क्रियतामिति तत्र सः ॥ विजयश्चाब्रवीन्नैतद्यल्लब्धं येन तस्य तत् ॥ १० ॥ ततोऽशपज्जयः
क्रोधाद्विजयं क्षुब्धमानसः ॥ गृहीत्वा न ददास्येतत्तस्माद्ग्राहो भवेति तम् ॥११॥ विजयस्तस्य तं शापं श्रुत्वा सोऽ
प्यशपच्च तम् ॥ मदभ्रांतोऽशपस्त्वं मां तस्मान्मातंगतां व्रज ॥१२॥ तत्तदाचर्षंतुर्विष्णुं दृष्ट्वा नित्यार्चने विभुम् ॥
शापयोश्च निवृत्तिं तौ ययाचाते रमापतिम् ॥१३॥ जयविजयावूचतुः ॥ भक्तावावां कथं देव ग्राहमातंगयोनिगौ ॥
भविष्यावः कृपासिंधो तच्छापो विनिवर्त्त्यताम् ॥ १४ ॥ श्रीभगवानुवाच ॥ मद्भक्तयोर्वचोऽसत्यं न कदाचि-
द्भविष्यति ॥ मयापि नान्यथा कर्तुं शक्यते तत्कदाचन ॥ १५ ॥ प्रह्लादवचसा स्तम्भे ह्याविर्भूतो ह्यहं पुरा ॥
तथांबरीषवाक्येन जातोहं दशधा किल ॥ १६ ॥ तस्माद्युवामिमौ शापावनुभूय स्वयंकृतौ ॥ लभेतां मत्पदं
नित्यमित्युक्त्वांतर्दधे हरिः ॥ १७ ॥ गणावूचतुः ॥ ततस्तौ ग्राहमातंगावभूतां गंडकीतटे ॥ जातिस्मरौ च
तद्योन्यामपि विष्णुव्रते स्थितौ ॥ १८ ॥ कदाचित्स गजः स्नातुं कार्तिक्यां गंडकीं गतः ॥ तावज्जग्राह तं
ग्राहः संस्मरञ्छापकारणम् ॥ १९ ॥ ग्राहग्रस्तो ह्यसौ नागः सस्मार श्रीपतिं तदा ॥ तावदाविर्भवद्विष्णुः शंखचक्र

गदाधरः ॥ २० ॥ ततस्तौ ग्राहमातंगौ चक्रं क्षिप्त्वा समुद्धृतौ ॥ दत्त्वा च निजसारूप्यं वैकुंठमनयद्विभुः ॥ २१ ॥ ततः प्रभृति तत्स्थानं हरिक्षेत्रमिति स्मृतम् ॥ चक्रसंघर्षणाद्यस्मिन्ग्रावाणोपिहिलांछिताः ॥ २२ ॥ ताविमौ विश्रुतौ लोके जयश्च विजयस्तथा ॥ नित्यं विष्णुप्रियौ द्वास्थौ पृष्टौ यौ हि त्वया द्विज ॥ २३ ॥ अतस्त्वमपि धर्मज्ञ नित्यं विष्णुव्रते स्थितः ॥ त्यक्त्वा मात्सर्यदंभौ हि भवस्व समदर्शनः ॥ २४ ॥ तुलामकरमेषेषु प्रातःस्नायी सदा भव ॥ एकादशीव्रते निष्ठस्तुलसीवनपालकः ॥ २५ ॥ ब्राह्मणानपि गाश्चैव वैष्णवांश्च सदा भज ॥ मसूरिकामारनालंवृंताकान्यपि वै त्यज ॥ २६ ॥ एवं त्वमपि देहांते तद्विष्णोः परमं पदम् ॥ प्राप्नोषि धर्मदत्त त्वं तद्भक्त्यैव यथा वयम् ॥ २७ ॥ तवाजन्मव्रतादस्माद्विष्णुसंतुष्टिकारकात् ॥ न यज्ञा न च दानानि न तीर्थान्यधिकानि वै ॥२८॥ धन्योऽसि विप्राग्र्य यतस्त्वयैतद्व्रतं कृतं तुष्टिकरं जगद्गुरोः ॥ यदर्द्धभागात्तफला मुरारेः प्रणीयतेऽस्माभिरियं सलोकताम् ॥ २९ ॥ नारद उवाच ॥ इत्थं तौ धर्मदत्तं तमुपवेश्य विमानगौ ॥ तया कलहया सार्द्धं वैकुंठभवनं गतौ ॥ ३० ॥ धर्मदत्तोऽप्यसो तात प्रत्ययस्तद्व्रते स्थितः ॥ देहांते तद्विभोः

स्थानं भार्याभ्यां संयुतोऽभ्यगात् ॥ ३१ ॥ इतिहासमिमं पुराभवं शृणुते श्रावयते च यः पुमान् ॥ हरिसन्निधिकारिणीं मतिं लभते स कृपया जगद्गुरोः ॥ ३२ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये त्रयोविंशोऽध्यायः ॥ २३ ॥

पृथुरुवाच ॥ कृष्णावेण्योस्तटात्तस्माच्छिववविष्णुगणैः पुरा ॥ वणिक्छरीरात्कलहा निरस्ता कथिता त्वया ॥ १ ॥ प्रभावोऽयं तयोर्नद्योः किंवा क्षेत्रस्य तस्य च ॥ तन्मे कथय धर्मज्ञ विस्मयोऽत्र महान्मम ॥ २ ॥ नारद उवाच ॥ कृष्णा कृष्णतनुः साक्षाद्वेण्या देवो महेश्वरः ॥ तत्संगमप्रभावं तु नालं वक्तुं चतुर्मुखः ॥ ३ ॥ तथापि तत्समुत्पत्तिं कीर्त्तयिष्यामि तां शृणु ॥ चाक्षुषेऽप्यंतरे पूर्वं मनोर्देवः पितामहः ॥ ४ ॥ सह्याद्रिशिखरे रम्ये प्रजनायोद्यतोऽभवत् ॥ स कृत्वा यज्ञसंभारान्सर्वदेवगणैः सह ॥ ५ ॥ युक्तो हरिहराभ्यां च तद्गिरेः शिखरं ययौ ॥ भृग्वादयो मुनिगणा मुहूर्तं ब्रह्मदैवते ॥ ६ ॥ तस्य दीक्षाविधानाय समाजं चक्रुरादृताः ॥ अथ ज्येष्ठां स्वरां पत्नीमाहूयांचक्रुरंजसा ॥ ७ ॥ सा शनैरायययौ तावद्भृगुर्विष्णुमुवाच ह ॥ भृगुरुवाच ॥ विष्णो स्वरा त्वयाहूताप्यायाता न कथंचन ॥ ८ ॥ मुहूर्त्तातिक्रमश्चैव कार्या दीक्षाविधिः कथम् ॥ श्रीकृष्ण उवाच ॥ नायाति चेत्स्वरा शीघ्रं

गायत्र्यत्र विधीयताम् ॥ ९ ॥ एषापि न भवेत्तस्य भार्या किं पुण्यकर्मणि ॥ नारद उवाच ॥ एवमेव हि रुद्रोऽपि
विष्णोर्वाक्यममन्यत ॥ १० ॥ तच्छ्रुत्वा च भृगोर्वाक्यं गायत्रीं ब्रह्मणस्तदा ॥ निवेश्य दक्षिणे भागे दीक्षाविधि-
मथाकरोत् ॥ ११ ॥ यावद्दीक्षाविधिं तस्य विधेश्चक्रुर्मुनीश्वराः ॥ तावदभ्याययौ तत्र स्वरा यज्ञस्थले नृप ॥१२॥
ततस्तां दीक्षितां दृष्ट्वा गायत्रीं ब्रह्मणा सह ॥ सापत्न्येर्ष्यापरा क्रोधात्स्वरा वचनमब्रवीत् ॥ १३ ॥ स्वरोवाच ॥
अपूज्या यत्र पूज्यन्ते पूज्यानां च व्यतिक्रमः ॥ त्रीणि तत्र भविष्यंति दुर्भिक्षं मरणं भयम् ॥ १४ ॥ येयं च
दक्षिणे भागे उपविष्टा मदासने ॥ तस्माल्लोकैः सदाऽदृश्या गुप्तरूपा तु निम्नगा ॥ १५ ॥ मदासने कनिष्ठेयं भवद्भिः
सन्निवेशिता ॥ तस्मात्सर्वे जडीभूता नदीरूपा भविष्यथ ॥ १६ ॥ ततस्तच्छापमाकर्ण्य गायत्री कंपिताधरा ॥
समुत्थायाशपद्देवैर्वार्यमाणापि तां स्वराम् ॥ १७ ॥ गायत्र्युवाच ॥ तव भर्ता यथा ब्रह्मा ममाप्येष तथा खलु ॥
वृथा शापस्त्वया दत्तो भव त्वमपि निम्नगा ॥ १८ ॥ नारद उवाच ॥ ततो हाहाकृताः सर्वे शिवविष्णुमुखाः सुराः ॥
प्रणम्य दंडवद्भूमौ स्वरां तत्र विजिज्ञपुः ॥ १९ ॥ देवा ऊचुः ॥ देवि सर्वे वयं शप्ता ब्रह्माद्या यत्त्वयाऽधुना ॥

यदि सर्वे जडीभूता भविष्यामोऽत्र निम्नगाः ॥ २० ॥ तदा लोकत्रयं ह्येतद्विनश्यति हि निश्चितम् ॥ अविवेक
कृतस्तस्माच्छापोऽयं विनिवर्त्यताम् ॥ २१ ॥ स्वरोवाच ॥ नार्चितो हि गणाध्यक्षो यज्ञादौ यत्सुरोत्तमाः ॥
तस्माद्विघ्नं समुत्पन्नं मत्क्रोधजमिदं खलु ॥ २२ ॥ नापि मद्वचनं ह्येतदसत्यं खलु जायते ॥ तस्मात्स्वांशैर्जडी-
भूता यूयं भवत निम्नगाः ॥ २३ ॥ आवामपि सपत्न्यौ च स्वांशाभ्यामपि निम्नगे ॥ भविष्यावोऽत्र भो देवाः
पश्चिमाभिमुखावहे ॥ २४ ॥ नारद उवाच ॥ इति तद्वचनं श्रुत्वा ब्रह्मविष्णुमहेश्वराः ॥ जडीभूताभवन्नद्यः स्वांशैः
सर्वे तदा नृप ॥ २५ ॥ तत्र विष्णुरभूत्कृष्णा वेण्या देवो महेश्वरः ॥ ब्रह्मा ककुद्मिनी चापि पृथगेवाभवन्नृप ॥२६॥
देवाः स्वानपि तानंशाञ्जडीकृत्वा विचिक्षिपुः ॥ सह्याद्रिशिखरेभ्यस्ते पृथगासंस्तु निम्नगाः ॥ २७ ॥ देवाद्यैः
पूर्ववाहिन्यो बभूवुः पश्चिमावहाः ॥ तत्पत्न्यंशैः पृथक्तत्र शतशोऽथ सहस्रशः ॥ २८ ॥ गायत्री च स्वरा चैव
पश्चिमाभिमुखे तदा ॥ योगेनाभवतान्नद्यौ सावित्रीति प्रथां गते ॥ २९ ॥ ब्रह्मणा स्थापितौ तत्र यज्ञे हरिहरावुभौ ॥
महाबलातिबलिनौ नाम्ना देवौ बभूवतुः ॥ ३० ॥ कृष्णोद्भवं पापहरं पुमान्यः शृणोति यः श्रावयते च भक्त्या ॥

स्यात्तस्य पुंसः सकलं फलं यत्तद्दर्शनस्नानगमोद्भवं स्मृतम् ॥ ३१ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये चतुर्विंशोऽध्यायः ॥ २४ ॥ श्रीकृष्ण उवाच ॥ इति तद्वचनं श्रुत्वा पृथुर्विस्मितमानसः ॥ संपूज्य नारदं सम्यग्विससर्ज तदा प्रिये ॥ १ ॥ तस्माद्व्रतत्रयं ह्येतन्ममातीव प्रियंकरम् ॥ माघकार्तिकयोस्तद्वत्तथैवैकादशीव्रतम् ॥ २ ॥ वनस्पतीनां तुलसी मासानां कार्तिकः प्रियः ॥ एकादशी तिथीनां च क्षेत्राणां द्वारका मम ॥ ३ ॥ एतेषां सेवनं यस्तु करोति नियतेंद्रियः ॥ स मे वल्लभतां याति न तथा यजनादिभिः ॥ ४ ॥ पापेभ्यो न भयं तेन कर्त्तव्यं नियमादपि ॥ एतेषां सेवनं कान्ते कुर्वतां मत्प्रसादतः ॥ ५ ॥ सत्यभामोवाच ॥ विस्मापनीयं तन्नाथ यत्त्वया कथितं मम ॥ परदत्तन पुण्येन कलहा मुक्तिमागता ॥ ६ ॥ इत्थंप्रभावोऽयं मासः कार्तिकस्ते प्रियंकरः ॥ स्वामिद्रोहादिपापानि स्नानपुण्यैर्गतानि यत् ॥ ७ ॥ दत्तं च लभ्यते पुण्यं यत्परेण कृतं किल ॥ अदत्तं केन मार्गेण लभ्यते वा न वेति च ॥ ८ ॥ श्रीकृष्ण उवाच ॥ अदत्तान्यपि पुण्यानि पापान्यपि तथा नरैः ॥ प्राप्यंते कर्मणा येन तद्यथावन्निशामय ॥ ९ ॥ देशग्रामकुलानि स्युर्भागभांजि कृतादिषु ॥ कलौ तु केवलं कर्त्ता फल-

भुक्पुण्यपापयोः ॥ १० ॥ अकृतेऽपि हि संसर्गे व्यवस्थेयमुदाहृता ॥ संसर्गात्पुण्यपापानि यथा यांति तथा
शृणु ॥११॥ एकास्यामैथुनाद्योनेरेकपात्रस्थभोजनात् ॥ फलार्द्धं प्राप्नुयान्मर्त्यो यथावत्पुण्यपापयोः ॥ १२ ॥
अध्यापनाद्याजनाद्वाप्येकपंक्त्यशनादपि ॥ तुर्य्यांशं पुण्यपापानां परोक्षं लभते नरः ॥ १३ ॥ दर्शनश्रवणाभ्यां
च मनोध्यानात्तथैव च ॥ परस्य पुण्यपापानां शतांशं प्राप्नुयान्नरः ॥ १४ ॥ परस्य निंदां पैशुन्यं धिक्कारं च
करोति यः ॥ तत्कृतं पातकं प्राप्य स्वपुण्यं प्रददाति सः ॥ १५ ॥ कुर्वंतः पुण्यपापानि सेवां यः कुरुते परः ॥
पत्नीभृतकशिष्येभ्यो यदन्यः कोऽपि मानवः ॥ १६ ॥ तस्य सेवानुरूपं च द्रव्यं किंचिन्न दीयते ॥ सोऽपि
सेवानुरूपेण तत्पुण्यफलभाग्भवेत् ॥ १७ ॥ एकपंक्त्यश्नतां यस्तु लंघेत परिवेषणम् ॥ तत्पुण्यस्य षडंशं तु
लभेद्यस्तु विलंघितः ॥ १८ ॥ स्नानसंध्याविकं कुर्वन्यः स्पृशेद्वाथ भाषते ॥ तत्पुण्यकर्मषष्ठांशं दद्यात्तस्मै सुनिश्चितम्
॥ १९ ॥ धर्मोद्देशेन यद्द्रव्यमपरं याचते नरः ॥ तत्कर्मजं यस्य धनं तस्य दत्त्वाप्नुयात्फलम् ॥ २० ॥
अपहृत्य परद्रव्यं पुण्यकर्म करोति यः ॥ कर्मकृत्पापभाक्तत्र धनिनस्तद्भवं फलम् ॥ २१ ॥ नापकृत्य ऋणं

यस्तु परस्य म्रियते नरः ॥ धनी तत्पुण्यमादत्ते तद्धनस्यानुरूपतः ॥ २२ ॥ बुद्धिदातानुमंता च यश्चोपकरणप्रदः ॥ प्रेरकश्चापि षष्ठांशं प्राप्नुयात्पुण्यपापयोः ॥ २३ ॥ प्रजाभ्यः पुण्यपापानां राजा षष्ठांशमुद्धरेत् ॥ शिष्याद्गुरुः स्त्रिया भर्त्ता पिता पुत्रात्तथैव च ॥ २४ ॥ स्वपत्युरपि पुण्यस्य योषिदर्द्धमवाप्नुयात् ॥ चेत्तस्यानुव्रता सा स्याद्भर्तुः संतुष्टिकारिणी ॥ २५ ॥ परहस्तेन दानानि कुर्वतः पुण्यकर्मणः ॥ विना भृतकपुत्राभ्यां कर्ता षष्ठांशमुद्धरेत् ॥ २६ ॥ वृत्तिदो वृत्तिसंभोक्तुः पुण्यं षष्ठांशमुद्धरेत् ॥ आत्मनो वा परस्यापि यदि सेवां न कारयेत् ॥ २७ ॥ इत्थं ह्यदत्तान्यपि पुण्यपापान्यायांति नित्यं परसंचितानि ॥ कलौ त्वयं वै नियमो न कार्यः कर्तैव भोक्ता खलु पुण्यपापयोः ॥ २८ ॥ शृणुष्व चास्मिन्नितिहासमुग्रं पुराभवं पुण्यमतिप्रदं च ॥ २९ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये पंचविंशोऽध्यायः ॥ २५ ॥ श्रीकृष्ण उवाच ॥ पुरावंतीपुरे कश्चिद्विप्र आसीद्धनेश्वरः ॥ ब्रह्मकर्मपरिभ्रष्टः पापकर्मा सुदुर्मतिः ॥ १ ॥ रसकंबलचर्माद्यैः सोऽसत्यानृतवृत्तिकः ॥ स्तेयवेश्यासुरापानयुक्तः संततमानसः ॥ २ ॥ देशाद्देशान्तरं गच्छन्क्रयविक्रयकारणात् ॥ माहिष्मतीं पुरीमागात्कदाचित्स

धनेश्वरः ॥ ३ ॥ महिषेण कृता पूर्वं तस्मान्माहिष्मतीति सा ॥ यस्या वप्रगता भाति नर्मदा पापनाशिनी ॥ ४ ॥ कार्तिकव्रतिनस्तत्र नानाग्रामागतान्नरान् ॥ स दृष्ट्वा विक्रयं कुर्वन्मासमेकमुवास ह ॥ ५ ॥ स नित्यं नर्मदातीरे भ्रमन्विक्रयकारणात् ॥ ददर्श ब्राह्मणान्स्नाताञ्जपदेवार्चने स्थितान् ॥ ६ ॥ कांश्चित्पुराणं पठतः कांश्चिच्च श्रवणे रतान् ॥ नृत्यगायनवादित्रविष्णुश्रवणतत्परान् ॥ ७ ॥ विष्णुमुद्रांकितान्कांश्चिन्मालातुलसिधारिणः ॥ ददर्श कौतुकाविष्टस्तत्र तत्र धनेश्वरः ॥ ८ ॥ नित्यं परिभ्रमंस्तत्र दर्शनस्पर्शभाषणात् ॥ वैष्णवानां तथा विष्णोर्नामसंस्मरणं लभन् ॥ ९ ॥ एवं मासं स्थितः सोऽथ कार्तिकोद्यापने विधिम् ॥ क्रियमाणं ददर्शासौ भक्त्या जागरणं हरेः ॥ १० ॥ पौर्णमास्यां ततोऽपश्यद्विप्रगोपूजनादिकम् ॥ दक्षिणाभोजनाद्यं च दीयमानं व्रतस्थितैः ॥ ११ ॥ ततोऽर्कास्तमये चैव दीपोत्सवविधिं तदा ॥ क्रियमाणं ददर्शासौ प्रीत्यर्थं त्रिपुरद्विषः ॥ १२ ॥ त्रिपुराणां कृतो दाहो यतस्तस्यां शिवेन तु ॥ अतस्तु क्रियते तस्यां तिथौ भक्तैर्महोत्सवः ॥ १३ ॥ मम रुद्रस्य यः कश्चिदन्तरं परिकल्पयेत् ॥ तस्य पुण्यक्रियाः सर्वा निष्फलाः स्युर्न संशयः ॥ १४ ॥ ततः पूजादिकं पश्यन्बभ्राम स धने-

श्वरः ॥ तावत्कृष्णाहिना दष्टो विह्वलः स पपात ह ॥ १५ ॥ जनास्तं पतितं वीक्ष्य परिवव्रुः कृपान्विताः ॥ तुलसीमिश्रितं तोयं तन्मुखे सिषिचुस्तदा ॥ १६ ॥ अथ देहं परित्यक्तं तं बद्ध्वा यमकिङ्कराः ॥ ताड्यमानाः कशाघातैर्निन्युः संयमनीं रुषा ॥ १७ ॥ चित्रगुप्तस्तु तं दृष्ट्वा यमायावेदयत्तदा ॥ आबालत्वात्तेन पुरा कर्म यद्दुष्कृतं कृतम् ॥ १८ ॥ चित्रगुप्त उवाच ॥ न वास्य दृश्यते किंचिदाबाल्यात्सुकृतं क्वचित् ॥ दुष्कृतं शक्यते वक्तुं वर्षेणापि न भास्करे ॥ १९ ॥ पापमूर्तिरयं दुष्टः केवलं दृश्यते विभो ॥ तस्मादाकल्पमर्यादं निरये परिपच्यताम् ॥ २० ॥ श्रीकृष्ण उवाच ॥ वज्रतुल्यं वचः क्रोधाद्यमः प्राह स्वकिंकरान् ॥ दर्शयन्नात्मनो रूपं तच्च कालाग्निसंनिभम् ॥ २१ ॥ यम उवाच ॥ भोः प्रेतपतयस्त्वेनं वध्यमानं स्वमुद्गरैः ॥ कुंभीपाके क्षिपेध्वासौ दुष्टः कल्मषदर्शनः ॥ २२ ॥ ततो मुद्गरनिर्भिन्नमूर्द्धानं प्रेतपोऽनयत् ॥ कुंभीपाके च तं क्षिप्त्वा तैलक्वथनशब्दिते ॥ २३ ॥ यावत्क्षिप्तश्च तत्रासौ तावच्छीतलतां ययौ ॥ कुंभीपाके यथा वह्निः प्रह्लादक्षेपणात्पुरा ॥ २४ ॥ तद्दृष्ट्वा महदाश्चर्यं प्रेतपा विस्मयान्विताः ॥ वेगादागत्य तत्सर्व यमायावेदयंस्तदा ॥ २५ ॥ यमस्तु कौतुकं दृष्ट्वा प्रेतपैश्च निवे-

दितम् ॥ आः किमेतदिति प्रोच्य तमानीय विचारयत् ॥ २६ ॥ तावदभ्यागतस्तत्र नारदः प्राह सत्वरम् ॥ यमेन पूजितः सम्यक्तं दृष्ट्वा वाक्यमब्रवीत् ॥ २७ ॥ नारद उवाच ॥ नैवायं निरयान्भोक्तुमर्हो ह्यरुणनंदन ॥ यस्मादंतेऽस्य संजातं कर्म यन्निरयापहम् ॥ २८ ॥ यः पुण्यकर्मिणां कुर्याद्दर्शनस्पर्शभाषणम् ॥ ततः षडंशमाप्नोति पुण्यस्य नियतं नरः ॥ २९ ॥ संख्यातीतैस्तु संसर्गं कृतवान्वै धनेश्वरः ॥ कार्तिकव्रतिभिर्मासं तेषां पुण्यांशभागयम् ॥ ३० ॥ परिचर्याकरस्तेषां संपूर्णव्रतभागयम् ॥ अत ऊर्ज्जव्रतोद्भूतपुण्यसंख्या न विद्यते ॥ ३१ ॥ कार्तिकव्रतिनां पुंसां पातकानि महांत्यपि ॥ प्रदहन्नात्ममहसा विष्णुः सद्भक्तवत्सलः ॥ ३२ ॥ अंते च नर्मदातोयैस्तुलसीमिश्रितैस्त्वयम् ॥ वैष्णवैः स्नापितो विष्णोर्नाम संश्रावितोऽपि च ॥ ३३ ॥ तस्मान्निर्गतपापोऽयं सद्गतिं प्राप्तुमर्हति ॥ वैष्णवानुग्रही यस्मान्निरये नैव पच्यताम् ॥ ३४ ॥ आर्द्रशुष्कैर्यथा पापैर्निरये भोगसन्निधिः ॥ प्राप्यते सुकृतैस्तद्वत्स्वर्गस्य सन्निधिस्तथा ॥ ३५ ॥ तस्मादँनार्द्रपुण्यो हि यक्षयोनिस्थितस्त्वयम् ॥ विलोक्य निरयान्सर्वान्पापभोगप्रदर्शकान् ॥ ३६ ॥ श्रीकृष्ण उवाच ॥ इत्युक्त्वा गतवति नारदे स सौरिस्तद्वाक्यश्रवण-

विधुद्धतत्सुकर्मा ॥ तं विप्रं पुनरनयत्स्वकिंकरेण तान्सर्वान्निरयगणान्प्रदर्शयिष्यन् ॥ ३७ ॥ इति श्रीपद्मपुराणे
कार्तिकमाहात्म्ये धनेश्वरोपाख्याने षड्विंशोऽध्यायः ॥ २६ ॥ श्रीकृष्ण उवाच ॥ ततो धनेश्वरं नीत्वा निरयान्प्रेतपोऽब्रवीत्
॥ दर्शयिष्यंस्तु तान्सर्वान्यमानुज्ञाकरस्तदा ॥ १ ॥ प्रेतप उवाच ॥ पश्येमान्निरयान्घोरान्धनेश्वर
महाभयान् ॥ येषु पापकरा नित्यं पच्यंते यमकिंकरैः ॥२॥ तप्तवालुकनामायं निरयो घोरदर्शनः ॥ यस्मिन्नन्ते
दग्धदेहाः क्रंदंते पापकारिणः ॥ ३ ॥ अतिथीन्वैश्वदेवान्ते क्षुत्क्षामानागतांश्च ये ॥ न पूजयंति ते ह्येते पच्यंते
स्वेन कर्मणा ॥ ४ ॥ गुर्वग्नीन्ब्राह्मणान्गाश्च वेदान्मूर्द्धाभिषिक्तकान् ॥ ताडयंति पदा ये वै ते निर्दग्धांघ्रयस्त्विमे
॥५॥ षड्भेदस्त्वेष निरयो नानापापैः प्रपद्यते ॥ तथैवांधतमिस्रोऽयं द्वितीयो निरयो महान् ॥६॥ पश्य सूचीमुखैर्देहा
भिद्यंते पापकर्मणाम् ॥ कृमिभिर्घोरक्त्रैश्च तमोतक्यादिभिर्द्विज ॥ ७ ॥ असावपि स्थितः षोढा श्वगृध्रपक्षिभिस्तथा
॥ परमर्मभिदो मर्त्याः पच्यंते तेषु पापिनः ॥ ८ ॥ तृतीयः क्रकचो ह्येष निरयो घोरदर्शनः ॥
यत्रेमे क्रकचैर्मर्त्याः पच्यंते पापकारिणः ॥ ९ ॥ असिपत्रवनाद्यैश्च षट्प्रकारोऽप्ययं स्थितः ॥ पत्नीपुत्रादिभिर्ये

वै वियोगं प्रापयंति हि ॥ १० ॥ इष्टैरन्यैरपि नरान्पच्यंते त इमे नराः ॥ असिपत्रैश्छिद्यमाना वृकभीत्या पलायिताः ॥ ११ ॥ पच्यंते पापिनः पश्य क्रंदमाना इतस्ततः ॥ अर्गलाख्यो महारौद्रश्चतुर्थो निरयो ह्ययम् ॥ १२ ॥ पश्य नानाविधैः पाशैराबध्य यमकिंकरैः ॥ असावपि च षड्भेदो वधभेदादिभिः स्मृतः ॥ १३ ॥ कूटशाल्मलिनामानं निरयं पश्य पंचमम् ॥ यत्रांगारानिभा ह्येताः शाल्मलीलोमसन्निभाः ॥ १४ ॥ यत्र षोढाभिपच्यंते यातनाभिरिमे जनाः ॥ परदारपरद्रोहपरद्रव्यरताश्च ये ॥ १५ ॥ रक्तपूयमिमं पश्य षष्ठं निरयमुल्बणम् ॥ अधोमुखा विपच्यंते यत्र पापकृतो नराः ॥ १६ ॥ अभक्ष्यभक्षका निन्दापैशुन्याभिरता इमे ॥ भज्यमाना वध्यमानाः क्रंदंते भैरवान् रवान् ॥ १७ ॥ षट्प्रकारो विगंधाद्यैरसावपि हि संस्थितः ॥ कुंभीपाकः सप्तमोऽयं निरयो घोरदर्शनः ॥ १८ ॥ षोढा तैलादिभिर्द्रव्यैर्धनेश्वर विलोकय ॥ महापातकिनो यत्र पीड्यन्ते यमकिंकरैः ॥ १९ ॥ बहून्यब्दसहस्राणि भुंजते यमयातनाः ॥ चत्वारिंशन्मितानेतान्द्व्यधिकान्पश्य रौरवान् ॥ २० ॥ अकामात्पातकं शुष्कं कामादार्द्रमुदाहृतम् ॥ आर्द्रशुष्कादिभिः पापैर्द्विप्रकारानवस्थितान्

॥ २१ ॥ चतुराशीतिसंख्याकैः पृथग्भेदानवस्थितान् ॥ अप्रकीर्णं तु पांक्तेयं मलिनीकरणं तथा ॥ २२ ॥ जातिभ्रंशकरं तद्वदुपपातकसंज्ञकम् ॥ अतिपापं महापापं सप्तधा पातकं स्मृतम् ॥ २३ ॥ एभिः सप्तसु पच्यंते निरयेषु यथाक्रमम् ॥ कार्तिकव्रतिभिः पुंभिर्यत्संसर्गोऽभवत्तव ॥ २४ ॥ तत्पुण्योपचयात्तत्र निर्हता निरयाः खलु ॥ २५ ॥ श्रीकृष्ण उवाच ॥ दर्शयित्वेति निरयान्प्रेतपस्तमथाहरत् ॥ धनेश्वरं यक्षलोके यक्षेशोऽभूत्स तत्र ह ॥ २६ ॥ धनदस्यानुगः सोऽयं धनयक्षेति विश्रुतः ॥ यदाख्ययाकरोत्तीर्थमयोध्यायां तु गाधिजः ॥ २७ ॥ एवंप्रभावः खलु कार्तिकेयो मुक्तिप्रदो भुक्तिकरश्च यस्मात् ॥ यो हंत्यनेकार्ज्जितपातकानि कर्तुश्च संदर्शनतोऽपि मुक्तिम् ॥ २८ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये सप्तविंशोऽध्यायः ॥ २७ ॥ सूत उवाच ॥ इत्युक्त्वा वासुदेवोऽसौ सत्यभामामतिप्रियाम् ॥ सायंसंध्याविधिं कर्तुं जगाम च निजं गृहम् ॥ १ ॥ एवंप्रभावः प्रोक्तोऽयं कार्तिकः पापनाशनः ॥ विष्णुप्रियकरोऽत्यन्तं भुक्तिमुक्तिफलप्रदः ॥ २ ॥ हरिजागरणं प्रातःस्नानं तुलसिसेवनम् ॥ उद्यापनं दीपदानं व्रतान्येतानि कार्तिके ॥३॥ पंचकैर्व्रतकैरेभिः संपूर्णं कार्तिकव्रतम् ॥ फलमाप्नो-

ति तत्प्रोक्तं भुक्तिमुक्तिफलप्रदम् ॥४॥ ऋषय ऊचुः ॥ विष्णुप्रियोऽतिफलदः प्रोक्तोऽयं रोमहर्षणः ॥ कार्तिकप्रभ-
वः सम्यकसेतिहासोऽतिविस्मितः ॥५॥ अवश्यं च तथा कार्यः पापदुःखनिवृत्तये ॥ मोक्षार्थिभिर्नरैः सम्यग्भोग-
कामैरथापि वा ॥ ६ ॥एवं स्थितो यदा काश्चिद्व्रतस्थः संकटे स्थितः ॥ दुर्गारण्यस्थितो वापि व्याधिभिः परिपीडि-
तः ॥ ७ ॥ कथं तेन प्रकर्त्तव्यं कार्तिकव्रतकं शुभम् ॥ इदमत्यंतफलदं न त्याज्यं सर्वथा नरैः ॥८॥ सूत उवाच ॥
एवमापद्गतो यस्तु नरो नित्यं दृढव्रतः ॥ विष्णोः शिवस्य वा कुर्यादालये हरिजागरम् ॥ ९ ॥ शिवविष्णुगृहा-
भावे सर्वदेवालयेष्वपि ॥ दुर्गाटव्यां स्थितो यस्तु यदि वापद्गतो भवेत् ॥ १० ॥ कुर्यादश्वत्थमूले तु तुलसीनां
वनेष्वपि ॥ ११ ॥ विष्णुनामप्रबंधानां गायनं विष्णुसंनिधौ ॥ गोसहस्रप्रदाने तत्फलमाप्नोति मानवः ॥ १२ ॥
वाद्यकृत्पुरुषश्चापि वाजपेयफलं लभेत् ॥ सर्वतीर्थावगाहोत्थं नर्त्तकः फलमाप्नुयात् ॥ १३ ॥ आपद्गतो यदा-
प्यंभो न लभेत्कुत्राचिन्नरः ॥ व्याधितो वा यथा कुर्याद्विष्णोर्नाम्नापि मार्जनम् ॥ १४ ॥ उद्यापनविधिं कर्तुमश-
क्तो यो व्रते स्थितः ॥ ब्राह्मणान्भोजयेत्पश्चाद्व्रतसम्पूर्तिहेतवे ॥ १५ ॥ अव्यक्तरूपिणो विष्णोः स्वरूपो ब्राह्मणो

भुवि ॥ तत्संतुष्टया तु संतुष्टः सर्वदा स्यान्न संशयः ॥ १६ ॥ अशक्तो दीपदानाय परदीपं प्रबोधयेत् ॥ तस्य
वा रक्षणं कुर्याद्वात्यादिभ्यः प्रयत्नतः ॥ १७ ॥ अभावे तुलसीनां च वैष्णवं पूजयेद्द्विजम् ॥ तस्मात्सन्निहितो
विष्णुः स्वभक्तेष्वेव सर्वदा ॥ १८ ॥ सर्वाभावे व्रती कुर्याद्ब्राह्मणानां गवामपि ॥ सेवामश्वत्थवटयोर्व्रतपूरणहेतवे
॥ १९ ॥ ऋषय ऊचुः ॥ कथं त्वयाश्वत्थवटौ गोब्राह्मणसमौ कृतौ ॥ सर्वेभ्यस्तु तरुभ्यस्तौ कस्मात्पूज्यतरौ
स्मृतौ ॥ २० ॥ सूत उवाच ॥ अश्वत्थरूपी भगवान्विष्णुरेव न संशयः ॥ रुद्ररूपी वटस्तद्वत्पालाशो ब्रह्मरूपधृक्
॥ २१ ॥ ऋषय ऊचुः ॥ कथं वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः ॥ एतत्कथय धर्मज्ञ संशयोऽत्र महान्हि
नः ॥ २२ ॥ सूत उवाच ॥ पार्वतीशिवयोर्देवाः सुरतं कुर्वतोः किल ॥ अग्निर्ब्राह्मणरूपेण गतश्च विघ्नकृत्पुरा
॥ २३ ॥ ततश्च पार्वती क्रुद्धा शशाप त्रिदिवौकसः ॥ रतोत्सवसुखभ्रंशात्कंपमाना रुषा तदा ॥ २४ ॥ पार्वत्युवाच
॥ कृमिकीटादयोऽप्येते जानंति सुरते सुखम् ॥ तद्विघ्नकारिणो देवा ह्युद्भिदत्वमवाप्स्यथ ॥ २५ ॥ सूत
उवाच ॥ एवं सा पार्वती देवांश्छशाप क्रुद्धमानसा ॥ तस्माद्वृक्षत्वमापन्नाः सर्वे देवगणाः किल ॥२६॥ तस्मा-

दिमौ विष्णुमहेश्वरावुभौ बभूवतुर्बोधिवटौ मुनीश्वराः ॥ बोधिस्त्वगादार्किदिनं विनैवाऽसंस्पृश्यतामर्कजदृष्टियोगात् ॥ २७ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये कृष्णसत्यभामासंवादे अष्टाविंशतितमोऽध्यायः ॥ २८॥

ऋषय ऊचुः ॥ अस्पृश्यत्वं कथं प्राप्तः सूत बोधितरुस्त्वयम् ॥ स्पृश्यत्वं हि कथं यातस्तथायं शनिवासरे ॥१॥ सूत उवाच ॥ समुद्रमथनाद्यानिरत्नान्यापुः सुरोत्तमाः ॥ श्रियं च कौस्तुभं तेषां विष्णवे प्रददुः सुराः ॥२॥ यावदंगीचकारासौ लक्ष्मीं भार्यार्थमात्मनः ॥ तावद्विज्ञापयामास लक्ष्मीस्तं चक्रपाणिनम् ॥ ३ ॥ लक्ष्मीरुवाच ॥ असंस्कृत्य कथं ज्येष्ठां कनिष्ठा परिणीयते ॥ तस्मान्ममाग्रजामेतामलक्ष्मीं मधुसूदन ॥४॥ विवाह्य नय मां पश्चादेष धर्मः सनातनः ॥ सूत उवाच ॥ इति तद्वचनं श्रुत्वा स विष्णुर्लोकभावनः ॥५॥ उद्दालकाय मुनये सुदीर्घतपसे तदा ॥ आत्मवाक्यानुरोधेन तामलक्ष्मीं ददौ किल ॥६॥ स्थूलास्यां शुभ्रदशनां जरठीं बिभ्रतीं तनुम् ॥ विततारक्तनयनां रूक्षगात्राशिरोरुहाम् ॥७॥ स मुनिर्विष्णुवाक्यात्तामंगीकृत्य स्वमाश्रमम् ॥ वेदध्वनिसमायुक्तमानयामास धर्मवित् ॥ ८ ॥ होमधूमसुगंधाढ्यं वेदघोषनिनादितम् ॥ आश्रमं तं समालोक्य व्यथिता साब्रवीदि-

दम् ॥ ९ ॥ ज्येष्ठोवाच ॥ नहि वासोऽनुरूपोऽयं वेदध्वनियुतो मम ॥ न चागमिष्ये भो ब्रह्मन्नयस्वान्यत्र मां ध्रुवम्
॥ १० ॥ उद्दालक उवाच ॥ कथं नायासि कान्ते वै वर्तते संमतं तव ॥ तव योग्या च वसतिः का भवेच्च वदस्व
तत् ॥ ११ ॥ ज्येष्ठोवाच ॥ वेदध्वनिर्भवेद्योऽस्मिन्नतिथीनां च पूजनम् ॥ यज्ञदानादिकं वापि नैव तत्र वसाम्यहम्
॥ १२ ॥ परस्परानुरागेण दांपत्यं यत्र वर्तते ॥ पितृदेवार्चनं यत्र तत्र नैव वसाम्यहम् ॥ १३ ॥ उद्यमी नीति-
कुशलो धर्मयुक्तः प्रियंवदः ॥ गुरुपूजारतो यत्र तस्मिन्नैव वसाम्यहम् ॥ १४ ॥ रात्रौ दिवा गृहे यस्मिन्दंपत्योः
कलहो भवेत् ॥ निराशा यांत्यतिथयस्तस्मिन्स्थाने रतिर्मम ॥ १५ ॥ वृद्धसज्जनमित्राणां यत्र स्यादपमाननम्॥
निष्ठुरं भाषणं यत्र तत्र नित्यं वसाम्यहम् ॥ १६ ॥ दुराचाररता यत्र परद्रव्यापहारिणः ॥ परदाररताश्चापि
तस्मिन्स्थाने रतिर्मम ॥ १७ ॥ गोवधो मद्यपानं च यत्र संजायतेऽनिशम् ॥ ब्रह्महत्यादिपापानि तस्मिन्स्थाने रतिर्मम ॥ १८ ॥ सूत उवाच ॥ इति तद्वचनं श्रुत्वा विषण्णवदनोऽभवत् ॥ उद्दालकस्ततो वाक्यं तामलक्ष्मीमुवाच ह ॥ १९ ॥ उद्दालक उवाच ॥ अश्वत्थवृक्षमूलेऽस्मिन्नलक्ष्मीस्त्वं स्थिरा भव ॥ आवासस्थानमालोक्य

यावत्त्वायाम्यहं पुनः ॥ २० ॥ सूत उवाच ॥ इति तां तत्र संस्थाप्य जगामोद्दालकस्तदा ॥ प्रतीक्षंती चिरं तत्र यावत्तं न ददर्श सा ॥ २१ ॥ तदा रुरोद करुणं भर्तुस्त्यागेन दुःखिता ॥ तत्तस्या रुदितं लक्ष्मीर्वैकुंठभवनेऽशृणोत् ॥ २२ ॥ तदा विज्ञापयामास विष्णुमुद्विग्नमानसा ॥ लक्ष्मीरुवाच ॥ स्वामिन्मद्भगिनी ज्येष्ठा भर्तुस्त्यागेनं दुःखिता ॥ २३ ॥ तामाश्वासयितुं याहि कृपालो यद्यहं प्रिया ॥ सूत उवाच ॥ लक्ष्म्या सह ततो विष्णुस्तत्रागच्छन्कृपानिधिः ॥ २४ ॥ आश्वासयन्नलक्ष्मीं तामिदं वचनमब्रवीत् ॥ विष्णुरुवाच ॥ अश्वत्थमूलमाश्रित्य सदाऽलक्ष्मि स्थिरा भव ॥ २५ ॥ ममांशसंभवो ह्येष आवासस्ते मया कृतः ॥ प्रत्यब्दं येऽर्चयिष्यंति त्वां ज्येष्ठां गृहधर्मिणः ॥ २६ ॥ तेष्वेव श्रीः कनिष्ठा ते सदा तिष्ठत्वनामया ॥ अंगनाभिः सदा पूज्या विविधैर्बलिभिस्तदा ॥ २७ ॥ पुष्पधूपादिभिश्चैव तेषां लक्ष्मीः प्रसीदति ॥ सूत उवाच ॥ कृष्णसत्योश्च संवादं नारदस्य पृथोस्तथा ॥ २८ ॥ अन्यत्किं प्रष्टुकामा स्थ वदामि च सुविस्तरम् ॥ इति तद्वचनादेव ऋषयः सस्मितास्तदा ॥ २९ ॥ नोचुः परस्परं किंचित्तूष्णीमेवावतस्थिरे ॥ जग्मुश्च बदरीं द्रष्टुं सर्वे वै शांतमानसाः ॥ ३० ॥ य

इदं शृणुयाद्वापि श्रावयेद्वा नरोत्तमान् ॥ सर्वपापैः प्रमुच्येत विष्णुसायुज्यमाप्नुयात् ॥ ३१ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये कृष्णसत्यासंवादे एकोनत्रिंशत्तमोऽध्यायः ॥ २९ ॥ ॥ कार्तिकमाहात्म्यं समाप्तम् ॥

इदं पुस्तकं कल्याणनगर्यां श्रीकृष्णदासात्मज गंगाविष्णोः
“ लक्ष्मीवेंकटेश्वर ” मुद्रणयन्त्रालये
रामचंद्र राघो इत्यनेन स्वाम्यर्थं
मुद्रितम् प्रकाशितं च । शके १८३५ संवत् १९७०.

पुस्तक मिलनेका ठिकाना–गंगाविष्णु श्रीकृष्णदास,
“ लक्ष्मीवेंकटेश्वर ” छापाखाना, कल्याण–मुंबई.

पुस्तक मिलनेका ठिकाना–

☞ गङ्गाविष्णु श्रीकृष्णदास,
'लक्ष्मीवेङ्कटेश्वर' छापाखाना,
कल्याण-मुंबई.

इदं शृणुयाद्वापि श्रावयेद्वा नरोत्तमान् ॥ सर्वपापैः प्रमुच्येत विष्णुसायुज्यमाप्नुयात् ॥ ३१ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये कृष्णसत्यासंवादे एकोनत्रिंशत्तमोऽध्यायः ॥ २९ ॥ ॥ कार्तिकमाहात्म्यं समाप्तम् ॥

इदं पुस्तकं कल्याणनगर्यां श्रीकृष्णदासात्मज गंगाविष्णोः
"लक्ष्मीवेंकटेश्वर" मुद्रणयन्त्रालये
रामचंद्र राघो इत्यनेन स्वाम्यर्थं
मुद्रितम् प्रकाशितं च । शके १८३५ संवत् १९७०.

पुस्तक मिलनेका ठिकाना–गंगाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेंकटेश्वर" छापाखाना, कल्याण–मुंबई.

४७०८

इति पद्मपुराणोक्तं कार्तिकमासमाहात्म्यं समाप्तम् ।

~~२५२~~
४१०७

॥ अथ श्रीमदध्यात्मरामायणे बालकांडः प्रारभ्यते ॥

४१०७

बालकांड १.


ब्र॰
शिव
पा॰
नारद
ऋ॰
ब्र॰
ना॰
ल॰
राजा
ऋषि
यज्ञ
द॰
ऋ॰
वि॰
रा॰
ल॰
अहल्या
रा॰
ल॰
वि॰
रा॰
सीता
रा॰
ऋ॰

श्रीगणेशायनमः ॥ श्रीरामचंद्रायनमः ॥ बिसेनवंशजलधौपूर्णःशीतकरोपरः ॥ प्रजाह्लादकरोविष्णु[1]भूषणःकौस्तुभोपरः ॥ १ ॥ नाम्नाहिम्मतिवर्माभूद्धैर्येणहिमवानिव ॥ रूपेणजितकंदर्पःक्षमायांक्ष्म[2]यासमः ॥ २ ॥ पराक्रमेऽर्जुनःसाक्षात्तेजसाभानुमानिव ॥ भूपानांभ्रष्टराज्यानांपुनाराज्यप्रदायकः ॥ ३ ॥ यंदृष्ट्वार्थिसमूहस्यजातेयंनिश्चितामतिः ॥ हित्वापशुत्वंस्त्रीत्वंचकामधुग्भूमिमागता ॥ ४ ॥ तस्माज्जातोरामदत्तश्चंद्राच्चंद्रइवापरः ॥ मित्राणांचरिपूणांचमानं[3]दःप्रथितःप्रभुः ॥ ५ ॥ आसमुद्रंक्ष्मादेवीयत्कीर्त्याधवलीकृता ॥ हिमाचलेनसमतांनीताःसप्तापिचाचलाः ॥ ६ ॥ यद्दानांबुप्रवाहेणमेघोदस्यानपेक्षकाः ॥ कृषीवलाःप्रतिदिशंप्रहृष्यंतिदिनेदिने ॥ ७ ॥ तेनश्रीरामभक्तेनसर्वविद्याप्रजानता ॥ शृंगवेरपुरेशेनरिपुकक्षदवाग्निना ॥ ८ ॥ अर्थिनांकल्पवृक्षेणविद्वज्जनसभासदा ॥ भट्टनागेशशिष्येणबद्ध्यतेरामवर्मणा ॥ ९ ॥ प्रणम्यजानकीजा[4]निंरामंकामातिसुंदरम् ॥ चापबाणधरंदेवंमायामानुषविग्रहम् ॥ १० ॥ सेतुःपरोपकृतयेऽध्यात्मरामायणांबुधौ ॥ सुशब्दमणिभिःश्लक्ष्णैःप्रीयतांतेनराघवः ॥ ११ ॥

अप्रमेयत्रयातीतनिर्मलज्ञानमूर्तये ॥ मनोगिरांविदूरायदक्षिणामूर्तयेनमः ॥ १ ॥

श्रीमतावाल्मीकिनालोकोद्धारायकृतेरामचरित्रवर्णनरूपेरामायणाख्यकाव्ये भगवतोलीलावतारस्यरावणादीनांदृढमनुष्यत्वबुद्धयेनटवदात्मस्वरूपगोपनेनव्यवहरतःस्वरूपंवाल्मीकिनागुप्तमेवतत्रतत्रनिरूपितम् । तदेतत्परमदयालुर्भगवान्साक्षाद्वेदव्यासोलोकानांस्फुटंबोधयितुंनारदब्रह्मसंवादरूपेणब्रह्मांडपुराणेऽध्यात्मरामायणसंहितांचक्रे । तस्याश्चवाल्मीकिसूचितार्थज्ञापकत्वंबोधयितुंवाल्मीकिरामायणवदेवकांडसर्गोपेतांकृतवान् । तांयथामतिस्वमतिदोषशुद्धयेव्याचक्ष्महे । तामेतांसंहितांनैमिषेऽरण्येनैमिषीयानृषीन्श्रावयतिस्मसूतइत्याह अप्रमेयेति । अप्रमेयत्रयंमायाजीवेश्वररूपंतदतीतस्ततोऽधिकश्चासौनिर्मलंयज्ज्ञानंतन्मूर्तिस्तत्स्वरूपस्तस्मैनमः मनइति वाङ्मनसामगोचरायेत्यर्थः ॥ १ ॥

---

[1] अत्रविष्णुभूषणत्वेनपरमभक्ततयासदाभगवद्धृदयारूढताऽस्यध्वनिता । [2] पृथ्व्या । [3] मानदोयथायथंमानदातामानखंडकश्च । [4] जानकीजायायस्यतंजायाशब्दस्य जायायानिङित्यनेननिङादेशः ।

कदाचिदिति योगीयोगपक्ककषायतयाविदितवेदितव्यः तादृशस्यपर्यटनंविफलंतत्राह परेति परेषांतत्तल्लोकवासिनांधर्मज्ञानाद्युपदेशेनयोऽनुग्र
हस्तदिच्छयेत्यर्थः सत्यलोकंब्रह्मलोकम् ॥ २ ॥ तत्रसत्यलोके मुनिपुंगवोनारदउच्यमानगुणंचतुर्मुखंदृष्ट्वातुष्टावेतिअग्रिमतृतीयश्लोकस्थेनसंबंधः ।
मूर्तिमद्भिर्गृहीतविग्रहैः छंदोभिर्वेदैः परितोवेष्टितम् तत्तद्वेदाध्येतृमुखसंमुखेतत्तद्वेदमूर्त्यवस्थानादितिभावः बालार्कप्रभयाबालार्कसदृश्यास्वप्रभया ॥ ३॥
सर्वार्थगोचरज्ञानंअतीतानागतवर्तमानरूपायेसर्वेऽर्थास्तद्विषयज्ञानयुक्तम् बहुव्रीहिसमासः अतएवतत्तज्ज्ञानरूपयासरस्वत्याख्यशक्त्यायुक्तम् ॥ ४ ॥

सूतउवाच ॥ कदाचिन्नारदोयोगीपरानुग्रहवांछया ॥ पर्यटन्सकलाँल्लोकान्सत्यलोकमुपागमत् ॥ २ ॥ तत्रदृष्ट्वामू
र्तिमद्भिश्छंदोभिःपरिवेष्टितम्॥ बालार्कप्रभयासम्यग्भासयंतंसभागृहम्॥ ३ ॥ मार्कंडेयादिमुनिभिःस्तूयमानंमुहुर्मु
हुः॥ सर्वार्थगोचरज्ञानंसरस्वत्यासमन्वितम्॥ ४॥ चतुर्मुखंजगन्नाथंभक्ताभीष्टफलप्रदम्॥ प्रणम्यदंडवद्भक्त्यातुष्टाव
मुनिपुंगवः॥ ५॥ संतुष्टस्तंमुनिंप्राहस्वयंभूर्वैष्णवोत्तमम्॥ किंप्रष्टुकामस्त्वमसितद्वदिष्यामितेमुने॥ ६॥ इत्याकर्ण्यवच
स्तस्यमुनिर्ब्रह्माणमब्रवीत्॥ त्वत्तःश्रुतंमयासर्वंपूर्वमेवशुभाशुभम् ॥ ७ ॥ इदानीमेकमेवास्तिश्रोतव्यंसुरसत्तम ॥ त
द्रहस्यमपिब्रूहियदितेऽनुग्रहोमयि ॥ ८ ॥ प्राप्तेकलियुगेघोरेनराःपुण्यविवर्जिताः ॥ दुराचाररताःसर्वेसत्यवार्तापरा
ङ्मुखाः ॥ ९ ॥

जगन्नाथंजगत्स्रष्टारम् भक्ताभीष्टफलप्रदत्वेनप्रश्नयोग्यतासूचनम् ॥ ५ ॥ स्वयंभूरित्यनेनानावृतज्ञानत्वंसूचितम् वैष्णवोत्तमम् सर्वभूतेषुयःपश्येद्भ
गवद्भावमात्मनः । भूतानिभगवत्यात्मन्येषभागवतोत्तमइत्युक्तलक्षणम् । तत्पृष्टंवस्त्वित्यर्थः ॥ ६ ॥ शुभंविहितम् अशुभंनिषिद्धम् ॥ ७ ॥ एकमे
वपुण्यहीनानांपरलोकप्राप्त्युपायरूपम् तद्रहस्यमपिमत्पृष्टंब्रूहि अनुग्रहःपरोपकारकरणजपुण्येनायंपूज्यतामित्येवंरूपादयायदिमयीत्यर्थः ॥ ८ ॥ दुरा
चाररताःनिषिद्धकर्मनिरताः तस्यैवप्रपंचः सत्यवार्तेति नानृतंवदेदितिनिषिद्धानृतभाषणशीलाइतियावत् ॥ ९ ॥

॥ १० ॥ सर्वपापस्यमूलकारणमाह देहात्मदृष्टयइति देहेएवात्मदृष्टिर्येषांतेइत्यर्थः एवंचदेहनाशेनात्मनाशात्पापपुण्यफलभोक्तुरभावात्तथादृष्टीनांविहिताकरणनिषिद्धकरणयोःप्रवृत्तिरितिभावः स्थूलोऽहंगौरोऽहमितिप्रतीतिस्तुशुक्तौरजतप्रतीतिवद्भ्रमइतितत्त्वम् देहस्यपरिणामित्वंतुप्रतिक्षणोपचयापचयाभ्यांप्रत्यक्षसिद्धमात्मनोऽविनाशित्वंतुअविनाशीवारेयमात्मेतिश्रुतिसिद्धम् अतएवनास्तिकानास्तिपरलोकइतिबुद्धिमंतः पशुबुद्धयःआहारविहारमात्रपरा विधिनिषेधानभिज्ञाश्चेत्यर्थः स्त्रीदे[1]वाःस्त्रीजिताइत्यर्थः तेषामन्नस्याभोज्यत्वंचस्मृतिषूक्तम् कामकिंकराःकाम्यकर्ममात्रपराः ॥ ११ ॥ लोभरूपग्रहेण भूतादि

परापवादनिरताःपरद्रव्याभिलाषिणः ॥ परस्त्रीसक्तमनसःपराहिंसापरायणाः ॥ १० ॥ देहात्मदृष्टयोमूढानास्तिकाःपशुबुद्धयः ॥ मातापितृकृतद्वेषाःस्त्रीदेवाःकामकिंकराः ॥ ११ ॥ विप्रालोभग्रहग्रस्तावेदविक्रयजीविनः ॥ धनार्जनार्थमभ्यस्तविद्यामदविमोहिताः ॥ १२ ॥ त्यक्तस्वजातिकर्माणःप्रायशःपरवंचकाः ॥ क्षत्रियाश्चतथावैश्याःस्वधर्मत्यागशीलिनः ॥ १३ ॥ तद्वच्छूद्राश्चयेकेचिद्ब्राह्मणाचारतत्पराः ॥ स्त्रियश्चप्रायशोभ्रष्टाभर्त्रवज्ञाननिर्भयाः ॥ १४ ॥ श्वशुर[2]द्रोहकारिण्योभविष्यंतिनसंशयः ॥ एतेषांनष्टबुद्धीनांपरलोकःकथंभवेत् ॥ १५ ॥ इतिचिंताकुलंचित्तंजायतेममसंततम् ॥ लघूपायेनयेनैषांपरलोकगतिर्भवेत् ॥ १६ ॥

नायस्ताः वेदविक्रयजीविनःभृतकाध्यापकाः धनार्जनफलकतयाभ्यस्तायाविद्यातन्मदेनतद्गर्वेणविमोहिताः इतरावज्ञाशीलाः ॥ १२ ॥ त्यक्तेति अत्रविप्राइत्यनुवर्तते त्यक्तंस्वजातिकर्मब्राह्मणजात्युचितंकर्माध्ययनादियैरतःपरवंचकाः परवंचनायैवधर्मानुष्ठानवंतः क्षत्रियादयोऽप्येवमेवेत्याह क्षत्रियाइति स्वधर्मत्यागरूपंशीलंयेषांनतुकदाचिदपिधर्मशीलाइत्यर्थः ॥ १३ ॥ ब्राह्मणाचारतत्पराइत्यनेनधर्मसंकरोदर्शितः स्त्रियश्चेत्यनेनवर्णसंकरोदर्शितः भर्तुरवज्ञानेनिर्भयानिःशंकाः भर्तृवज्ञानेतिपाठेवष्टिभागुरिरित्यनेनावस्यादेरकारस्यलोपः ॥ १४ ॥ १५ ॥ परलोकगतिःभूर्लोकगतिः भूर्लोकोर्ध्वंभुवर्लोकांतगमनम् तच्चदुराचारादिनानर्थनिवृत्तिंविनाचित्तशोधकसकलधर्मंविनाचदुष्प्रापमितिभावः ॥ १६ ॥

---

[1] स्त्रियोदेवायेषांते स्त्रियश्च श्वशुरद्रोहकारिण्यइति मातापित्रोर्द्वेषकरणेतयोरज्यपूर्वेचहेतुरुपपादितः । [2] श्वशुरःश्वश्र्वेतिश्वशुरशेषत्वात्श्वश्रूश्वशुरयोरित्यर्थः।

नन्वीदृशोपायज्ञानंममकथंस्यादितिचेत्तत्राह सर्ववेत्तीति यतोभवान्सर्वज्ञइतिभाव. ऋषेर्नारदस्यवाक्यमाकर्ण्यांबुजासनोब्रह्माप्रत्युवाचेति ॥ १७ ॥ साधु सर्वजनहितंयतःपृष्टमतःसादरंवक्ष्ये तदुत्तरमितिशेषः तच्छृणु तदेवाह पुरेति त्रिपुरहंतारंशिवम् भक्तवत्सलेत्यनेनपार्वतीप्रश्नोऽपिस्वभक्तसकलजनकरुणयातदुद्धारार्थमितिसूचितम् ॥ १८ ॥ गूढंस्वातिरिक्ताज्ञातंवक्ष्यमाणंवस्तुव्याख्यातवान् कथितवानित्यर्थः ॥ १९ ॥ तत्किंतत्राह पुराणोत्तममिति पुराणमनादित्वतदुत्तमंच श्रवणेनसर्वधर्मजनकत्वाच्चित्तशुद्धिद्वारातत्त्वज्ञानकरत्वाच्चेतिभावः अध्यात्मरामायणमित्यन्वर्थंग्रंथनाम आत्मनीत्यध्यात्मं[1]आत्मनिचित्ते

तमुपायमुपाख्याहिसर्ववेत्तियतोभवान्॥ इत्यृषेर्वाक्यमाकर्ण्यप्रत्युवाचांबुजासनः॥ १७॥साधुपृष्टंत्वयासाधोवक्ष्ये
तच्छृणुसादरम्॥पुरात्रिपुरहंतारंपार्वतीभक्तवत्सला॥ १८ ॥श्रीरामतत्त्वंजिज्ञासुःपप्रच्छविनयान्विता॥ प्रियायैगि
रिशस्तस्यैगूढंव्याख्यातवान्स्वयम्॥ १९॥पुराणोत्तममध्यात्मरामायणमितिस्मृतम्॥ तत्पार्वतीजगद्धात्रीपूजयित्वा
दिवानिशम्॥ २०॥आलोचयंतीस्वानंदमग्नातिष्ठतिसांप्रतम्॥ प्रचरिष्यतितल्लोकेप्राण्यदृष्टवशाद्यदा॥ २१॥तस्या
ध्ययनमात्रेणजनायास्यंतिसद्गतिम्॥ तावद्विजृंभतेपापंब्रह्महत्यापुरःसरम्॥ २२ ॥ यावज्जगतिनाध्यात्मरामायणमु
देष्यति॥ तावत्कलिमहोत्साहोनिःशंकंसंप्रवर्तते॥ २३॥

ऽतर्यामितयावर्तमानोयोरामोरमंतेयोगिनोऽत्रेतिव्युत्पत्त्यांतर्यामीतस्यायनंचित्तशुद्धिद्वाराप्रापकंतत्प्रतिपादकत्वादितितदध्यात्मरामायणम् उत्तरश्लोकस्थेआलोचनेइदमेवकर्म ॥ २० ॥ स्वानंदमग्नास्वस्वरूपानंदमग्नातिष्ठतीतियत्तत्सांप्रतंयुक्तंएतदालोचनेनस्वस्वरूपानंदस्यजगदंतर्यामिरूपस्यसम्यग्भानादितिभावः ॥ २१ ॥ २२ ॥ अध्यात्मकेतिष्ठतियःपरात्मारामोऽयते यत्रहितत्वविज्ञैः । अतोऽभिधानंकथितंभवान्यैअध्यात्मरामायणमस्यमेन । मेनभवेन मःशिवश्चंद्रमा वेधाइत्यभिधानात् संप्रवर्ततेजनेष्वितिशेषः ॥ २३ ॥

---

१ अव्ययंविभक्तीत्यनेनसप्तम्यर्थद्योतकाधिशब्देनात्मशब्देनचसमासः। २ अध्यात्मरामायणम्।

निर्भयाःसंचरिष्यंति सर्वेषांपापयस्तत्वात्कलावितिभावः ॥ २४ ॥ शास्त्राणिन्यायादीनिविवदंतेविवादंकुर्वंते आत्मविषयेइत्यर्थः कर्ताभोक्ताज्ञानाश्रयआत्मापरस्परंभिन्नइतिकाणादागौतमाश्च षोडशादिपदार्थानांपरस्परमात्मनिभेदज्ञानान्मुक्तिरित्यादिच ज्ञानस्वरूपाअनेकेजीवास्तेषांप्रकृत्यादिभ्योभेदज्ञानान्मोक्षइतिसांख्यादयः एकएवचेतनउपाधिभेदान्नानात्वंप्राप्तस्तत्त्वमस्यादिवाक्यजश्रवणमनननिदिध्यासनैर्ब्रह्मैवाहमितिज्ञानादुपाधिविलयेस्वस्वरूपेणावस्था

यावज्जगतिनाध्यात्मरामायणमुदेष्यति ॥ तावद्यमभटाःशूराःसंचरिष्यंतिनिर्भयाः ॥ २४ ॥ यावज्जगतिनाध्यात्मरामायणमुदेष्यति ॥ तावत्सर्वाणिशास्त्राणिविवदंतेपरस्परम् ॥ २५ ॥ तावत्स्वरूपंरामस्यदुर्बोधंमहतामपि ॥ यावज्जगतिनाध्यात्मरामायणमुदेष्यति ॥ २६ ॥ अध्यात्मरामायणसंकीर्तनश्रवणादिजम् ॥ फलंवक्तुंनशक्नोमिकार्त्स्न्येनमुनिसत्तम ॥ २७ ॥ तथाऽपितस्यमाहात्म्यंवक्ष्येकिंचित्तवानघ ॥ शृणुचित्तंसमाधायशिवेनोक्तंपुरामम ॥ २८ ॥ अध्यात्मरामायणतःश्लोकंश्लोकार्धमेववा ॥ यःपठेद्भक्तिसंयुक्तःसपापान्मुच्यतेक्षणात् ॥ २९ ॥ यस्तुप्रत्यहमध्यात्मरामायणमनन्यधीः ॥ यथाशक्तिवदेद्भक्त्यासजीवन्मुक्तउच्यते ॥ ३० ॥ योभक्त्याऽर्चयतेऽध्यात्मरामायणमतंद्रितः ॥ दिनेदिनेऽश्वमेधस्यफलंतस्यभवेन्मुने ॥ ३१ ॥

नमेवमोक्षइत्युपनिषत्सिद्धांतोऽध्यात्मरामायणोदयेस्फुटोभविष्यतीतितत्तच्छास्त्रवासनाजन्योवादोलयमेष्यतीतिभावः ॥ २५ ॥ रामस्यस्वरूपंसच्चिदानंदाद्वयब्रह्मस्वरूपंमहतामपिशास्त्रज्ञानामपिदुर्बोधंभवतीतिशेषः ॥ २६ ॥ २७ ॥ २८ ॥ अध्यात्मरामायणतः सार्वविभक्तिकःषष्ठ्यंतात्तसिः ॥ २९ ॥ जीवन्मुक्तइति तल्लक्षणंच दुःखेष्वनुद्विग्नमनाःसुखेषुविगतस्पृहः । वीतरागभयक्रोधःस्थितधीर्मुनिरुच्यतेइत्यादिनागीतायाम् उक्तंचवासिष्ठेऽपि निद्रादौजागरस्यांतेयोभावउपजायते । तंभावंभावयन्रामजीवन्मुक्तःसदाभवेत् ॥ ३० ॥ ३१ ॥

अनादरात्यदृच्छयापि नतुपुराणश्रवणविध्युक्तनियमेनेत्यर्थः ॥ ३२ ॥ ३३ ॥ ३४ ॥ अधीतेष्विति सांगवेदाध्ययनेशास्त्रार्थाध्ययनेचयत्पुण्यंदुर्लभंतत्फलंतस्याध्यात्मरामायणपुस्तकदातुर्भवेदित्यर्थः ॥ ३५ ॥ ३६ ॥ ३७ ॥ जागरितःकृतजागरणः ॥ ३८ ॥ आत्मतुल्यंधनंअतिप्रियंवस्त्वित्यर्थःसर्वतोमुखेज

यदृच्छयाऽपियोध्यात्मरामायणमनादरात् ॥ अन्यतःशृणुयान्मर्त्यःसोऽपिमुच्येतपातकात् ॥३२॥ नमस्करोतियो
ऽध्यात्मरामायणमदूरतः ॥ सर्वदेवार्चनफलंसप्राप्नोतिनसंशयः॥ ३३ ॥ लिखित्वापुस्तकेऽध्यात्मरामायणमशेषतः॥
योदद्याद्रामभक्तेभ्यस्तस्यपुण्यफलंशृणु ॥ ३४ ॥ अधीतेषुचवेदेषुशास्त्रेषुव्याकृतेषुच[1] ॥ यत्फलंदुर्लभंलोकेतत्फलंत
स्यसंभवेत् ॥ ३५ ॥ एकादशीदिनेऽध्यात्मरामायणमुपोषितः ॥ योरामभक्तःसदसिव्याकरोतिनरोत्तमः ॥ तस्यपुण्य
फलंवक्ष्येशृणुवैष्णवसत्तम ॥ ३६ ॥ प्रत्यक्षरंतुगायत्रीपुरश्चर्याफलंभवेत् ॥ उपवासव्रतंकृत्वाश्रीरामनवमीदिने
॥ ३७ ॥ रात्रौजागरितोऽध्यात्मरामायणमनन्यधीः ॥ यःपठेच्छृणुयाद्वाऽपितस्यपुण्यंवदाम्यहम् ॥ ३८ ॥ कुरुक्षेत्रा
दिनिखिलपुण्यतीर्थेष्वनेकशः ॥ आत्मतुल्यंधनंसूर्यग्रहणेसर्वतोमुखे ॥ ३९ ॥ विप्रेभ्योव्यासतुल्येभ्योदत्त्वायत्फल
मश्नुते ॥ तत्फलंसंभवेत्तस्यसत्यंसत्यंनसंशयः ॥ ४० ॥ योगायतेमुदाऽध्यात्मरामायणमहर्निशम् ॥ आज्ञांतस्यप्र
तीक्षंतेदेवाइंद्रपुरोगमाः ॥४१॥ पठन्प्रत्यहमध्यात्मरामायणमनुव्रतः ॥ यद्यत्करोतितत्कर्मततःकोटिगुणंभवेत्॥४२॥

लेस्थितइतिशेषः पुष्करंसर्वतोमुखमितिजलपर्यायेष्वभिधानात् ॥ ३९ ॥ व्यासतुल्येभ्यइत्यनेनदेशप्रदेयवस्तुकालसंप्रदानविशेषाणांपुण्यातिशयजनकत्वंसूचितम् ॥ ४० ॥ गायतेइतिपाठेतङार्षः योगायतिमुदेतिपाठस्तुयुक्तएव ॥ ४१ ॥ अनुव्रतःतत्परः ततःस्वभावक्रियमाणकर्मणः ॥ ४२ ॥

---

[1] बहुवचनपरकत्वादाद्यर्थावगतिर्व्याकृतादिषुव्याकरणादिषुशास्त्रेष्वधीतेषुचतदेवव्याख्यातंटीकायांसांमेति ।

तत्राध्यात्मरामायणमध्ये सुसमाहितःस्थिरचित्तः ॥ ४३ ॥ प्रतिमांतिकेप्रतिमासमीपे ॥ ४४ ॥ यस्तुलस्यादिसन्निधौरामहृदयंपठन्प्रकुर्वीतप्रदक्षिणादीतिशेषः सप्रत्यक्षरंप्रत्यक्षरोच्चारणंब्रह्महत्यांतज्जन्यंपापंनिवर्तयेत् आत्मनःश्रोतुश्चेतिशेषः ॥ ४५ ॥ अहंब्रह्मा ॥ ४६ ॥ यद्रामगीतामाहात्म्यम् ॥ ४७ ॥ रामगीता

तत्रश्रीरामहृदयंयःपठेत्सुसमाहितः ॥ सब्रह्मघ्नोऽपिपूतात्मात्रिभिरेवदिनैर्भवेत् ॥ ४३ ॥ श्रीरामहृदयंयस्तुहनूमत्प्रतिमांतिके ॥ त्रिःपठेत्प्रत्यहंमौनीससर्वेप्सितभाग्भवेत् ॥ ४४॥ पठन्श्रीरामहृदयंतुलस्यश्वत्थयोर्यदि ॥ प्रत्यक्षरंप्रकुर्वीतब्रह्महत्यांनिवर्तयेत् ॥ ४५॥ श्रीरामगीतामाहात्म्यंकृत्स्नंजानातिशंकरः ॥ तदर्धंगिरिजावेत्तितदर्धंवेद्म्यहंमुने ॥४६॥ तत्तेकिंचित्प्रवक्ष्यामिकृत्स्नंवक्तुंनशक्यते ॥ यज्ज्ञात्वातत्क्षणाल्लोकश्चित्तशुद्धिमवाप्नुयात् ॥ ४७॥ श्रीरामगीतायत्पापंननाशयतिनारद ॥ तन्ननश्यतितीर्थादौलोकेक्वापिकदाचन ॥ तन्नपश्याम्यहंलोकेमार्गमाणोऽपिसर्वदा ॥ ४८ ॥ रामेणोपनिषत्सिंधुमुन्मथ्योत्पादितांमुदा ॥ लक्ष्मणायार्पितांगीतासुधांपीत्वाऽमरोभवेत् ॥ ४९ ॥ जमदग्निसुतःपूर्वंकार्तवीर्यवधेच्छया ॥ धनुर्विद्यामभ्यसितुंमहेशस्यांतिकेवसन् ॥ ५० ॥ अधीयमानांपार्वत्यारामगीतांप्रयत्नतः ॥ श्रुत्वागृहीत्वाऽऽशुपठन्नारायणकलामगात् ॥ ५१ ॥ ब्रह्महत्यादिपापानांनिष्कृतिंयदिवांछति ॥ रामगीतांमासमात्रंपठित्वामुच्यतेनरः ॥५२ ॥

पठ्यमानाइतिशेषः कदाचन रविग्रहादिकालेऽपि स्नानादिनेतिशेषः मार्गमाणःअन्वेषयन्नपितद्रामगीतातुल्यतयापापनाशकंवस्तुरामगीतातिरिक्तंनपश्यामीत्यर्थः ॥ ४८ ॥ गीतासुधामितिरूपकम् अमृतरूपांगीतामित्यर्थः अमरस्तत्तुल्यः ॥ ४९ ॥ कार्तवीर्यः सहस्रबाहुरर्जुनः ॥ ५० ॥ श्रवणोत्तरंग्रहणम् नारायणकलांनारायणरूपत्वम् ॥ ५१ ॥ ५२ ॥

दुष्प्रतिग्रहेति दुष्प्रतिग्रहाःतिलधेनुर्गजोवाजीप्रेतान्नमजिनंमणिः । सुरभिःसूयमानाचघोराःसप्तप्रतिग्रहाइत्यादिस्मृत्युक्ताः मणिःशालग्रामः सूयमानासुरभिः उभयतोमुखी दुर्भोज्यंनिषिद्धभक्षणम् दुरालापोऽनृतभाषणादिः ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ तद्दानादिअनंतफलंलभेत् अनंतफलंदानादिफलं

दुष्प्रतिग्रहदुर्भोज्यदुरालापादिसंभवम् ॥ पापंयत्तत्कीर्तनेनरामगीताविनाशयेत् ॥ ५३ ॥ शालग्रामशिलाग्रेचतुलस्यश्वत्थसन्निधौ ॥ यतीनांपुरतस्तद्वद्रामगीतांपठेत्तुयः ॥ ५४ ॥ सतत्फलमवाप्नोतियद्वाचोऽपिनगो[1]चरम् ॥ रामगीतांपठन्भक्त्यायःश्राद्धेभोजयेद्द्विजान् ॥ ५५ ॥ तस्यतेपितरःसर्वेयांतिविष्णोःपरंपदम्[2] ॥ एकादश्यांनिराहारोनियतोद्वादशीदिने ॥ ५६ ॥ स्थित्वागस्त्यतरोर्मूलेरामगीतांपठेत्तुयः ॥ सएवराघवःसाक्षात्सर्वदेवैश्चपूज्यते ॥ ५७ ॥ विनादानंविनाध्यानंविनातीर्थावगाहनम् ॥ रामगीतांनरोधीत्यतदनंतफलंभवेत् ॥ ५८ ॥ बहुनाकिमिहोक्तेनशृणुनारदतत्त्वतः ॥ श्रुति[3]स्मृतिपुराणेतिहासागमशतानिच ॥ अर्हंतिनाल्पामध्यात्मरामायणकलामपि ॥ ५९ ॥ अध्यात्मरामचरितस्यमुनीश्वरायमाहात्म्यमेतदुदितंकमलासनेन ॥ यःश्रद्धयापठतिवाशृणुयात्समर्त्यः ॥ प्राप्नोतिविष्णुपदवींसुरपूज्यमानः ॥ ६० ॥

इ० ब्रह्मांडपु० उत्तरखंडेअध्या० बालकांडेप्रथमःसर्गः ॥ १ ॥

तदध्ययनमात्रेणभवेदित्यर्थः ॥ ५८ ॥ श्रुतिर्वेदः स्मृतिर्मन्वादिप्रणीता पुराणानिपाद्मादीन्यष्टादश इतिहासोभारतादिः आगमाः पंचरात्रादयः अध्यात्मरामायणस्यतदध्ययनस्यकलांषोडशांशमपिनार्हंति तदध्ययनानीत्यर्थः सर्वाध्ययनफलत्वादस्येतिभावः ॥ ५९ ॥ पठतीत्यत्रउक्तमाहात्म्याध्यायःकर्म ॥ ६० ॥

इतिश्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिबिरुदावलीविराजमानस्यहिम्मतिवर्मणःपुत्रस्यश्रीरामवर्मणःकृतौअध्यात्मरामायणसेतौबालकांडेप्रथमःसर्गः ॥ १ ॥

---

[1] विषयः । [2] स्थानं । [3] अभ्यर्हितत्वात्पूर्वपूर्वनिपातः ।

शिवपार्वतीसंवादरूपमध्यात्मरामायणंवक्तुंभगवान्व्यासोनिर्विघ्नार्थंभगवत्स्मरणरूपंमंगलमाचरति यइति पृथ्व्यायोदुष्टराक्षसादिजनितोभरोभारस्तस्यवारणायेत्यर्थः परित्राणायसाधूनांविनाशायचदुष्कृताम् । धर्मसंस्थापनार्थायसंभवामि[1]युगेयुगेइतिभगवदुक्तेः । दिविजैर्देवैःरावणपीडितैःसंप्रार्थितःसन्चिन्मयोऽपिचिद्रूपोऽपिअव्ययोऽपिपृथिवीतलेरविकुलेमायामनुष्यःसंजातः तत्रदेवप्रार्थनयाऽयमवतारइत्यर्थोवाल्मीकीयेबालकांडेपंचदशषोडशसर्गयोःस्पष्टएव अ

यःपृथ्वीभरवारणायदिविजैःसंप्रार्थितश्चिन्मयःसंजातःपृथिवीतलेरविकुलेमायामनुष्योऽव्ययः॥
निश्चक्रंहतराक्षसःपुनरगाद्ब्रह्मत्वमाद्यंस्थिरांकीर्त्तिपापहरांविधायजगतांतंजानकीशंभजे ॥ १ ॥

व्ययस्यचिन्मयस्यचकथंजन्मजातस्यचकथमव्ययत्वमुत्पन्नभावस्यनाशावश्यंभावादतउक्तंमायेति मायानामसत्वासत्वाभ्यामनिर्वाच्यासत्वरजस्तमोगुणाऽघटितघटनासामर्थ्यवतीकाचिदीश्वरशक्तिः देवात्मशक्तिंस्वगुणैर्निगूढामितिश्रुतेः दैवीह्येषागुणमयीममभायादुरत्ययेतिगीतोक्तेश्च एवंचिन्मयस्याघटितोऽपिमनुष्यभावोजन्मव्यवहारश्चमायाकृतइतिभावः तदुक्तंरामतापनीयोपनिषदि चिन्मयस्याद्वितीयस्यनिष्कलस्याशरीरिणः । उपासकानांकार्यार्थंब्रह्मणोरूपकल्पनेति निश्चक्रंनिरवशेषंयथातथाहतराक्षसः जगतांपापहरांस्थिरांकीर्तिंविधायलोकेस्थापयित्वापुनराद्यंब्रह्मत्वंनिरुपाधिब्रह्मरूपमगात् ॥ १ ॥

---

[1] नित्यवीप्सयोरित्यनेनद्वित्वंप्रतियुगमित्यर्थः ।

रामस्योक्तंब्रह्मत्वंलक्षणैर्द्रढयति विश्वेति विश्वस्यसंसारस्योत्पत्तिलयादिषुएकंहेतुम् यतोवाइमानिभूतानिजायंते येनजातानिजीवंति यत्प्रयंत्यभिसंविशं तीतिश्रुतेः प्रयंतियत्रलीनानिभवंतीत्यर्थः अनेननिमित्तकारणत्वसमानाधिकरणंजगदुपादानकारणत्वंब्रह्मलक्षणंसूचितम् एकमित्यसहायार्थकम् तेननिमित्तकारणाभेदःसूचितः ननुमिथ्याभूतकार्यनिरूपितकारणस्यापिमिथ्यात्वाद्ब्रह्मणासंबंधाभावात्कथमस्यलक्षणत्वमतआह मायाश्रयमिति मायाश्रयत्वात्तत्कृतमिदमस्यकारणत्वमित्यर्थः मायिकेनकारणत्वेनमायिकएवब्रह्मणःसंबंधइतिभावः तदुक्तंश्रुतौ मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरमिति ननु मायाश्रयत्वेजीवंप्रतिस्वस्वरूपमिवस्वंप्रत्यपिएनंमायाआवृणुयात्तत्राह विगतमायमिति विगतामायाआवरणशक्तिरूपायस्मात्तंएनंप्रतिस्वस्वरूपावरणशक्ति

विश्वोद्भवस्थितिलयादिषुहेतुमेकंमायाश्रयंविगतमायमचिंत्यमूर्तिम् ॥ आनंदसांद्रममलंनिजबोधरूपंसीतापतिंविदिततत्त्वमहंनमामि॥ २ ॥ पठंतियेनित्यमनन्यचेतसःशृण्वंतिचाध्यात्मिकसंज्ञितंशुभम् ॥ रामायणंसर्वपुराणसंमतंनिर्धूतपापाहरिमेवयांतिते ॥ ३ ॥ अध्यात्मरामायणमेवनित्यंपठेद्यदीच्छेद्भवबंधमुक्तिम् ॥ गवांसहस्रायुतकोटिदानात्फलंलभेद्यःशृणुयात्सनित्यम् ॥ ४ ॥

रहितासतीत्यर्थः अचिंत्यमूर्तिम् यतोवाचोनिवर्तंते अप्राप्यमनसासहेतिश्रुतेः। एवंजगदुत्पत्त्यादिकारणत्वरूपंतटस्थलक्षणमुक्तम् तेनरूपेणाज्ञेयत्वात् अथस्वरूपलक्षणमाह अमलंनिजबोधरूपमिति सत्यंज्ञानमनंतंब्रह्मेतिश्रुतेः इदमेवज्ञेयंरूपममलंउपाधिकृतदोषरहितम् जीवस्तूपाधिकृतकर्तृत्वाद्यभिमानवान्नतथानेश्वरइतिभावः निजंस्वाभाविकंबोधरूपमेवयस्यतम् अनेनरूपांतरंसर्वंमायिकमितिसूचितम् विदितंतत्त्वंज्ञानंस्वस्यबोधस्वरूपत्वंयेनतम् तेनरामावतारेशोकक्रोधादिनटवन्नटनमात्रमितिसूचितम् ॥ २ ॥ हरिमेव हरिसायुज्यमेव ॥ ३ ॥ यःशृणुयात्ससहस्रगुणितायुततद्गुणितकोटिसंख्यगोदानादधिकफलंलभेदित्यन्वयः ॥ ४ ॥

पुरारिगिरीतिरामार्णवेतिचरूपके अध्यात्मरामगंगेति अध्यात्मरामशब्दःअध्यात्मरामायणपरस्तदेवगंगेति अनेनरूपकेणसर्वमहापातकादीनामपिनाशइ
तिसूचितम् गंगायास्तन्नाशकत्वस्यसर्वश्रुतिस्मृतिसिद्धत्वात् ॥ ५ ॥ सकलमलहरंवस्तुविषयत्वाद्वाक्यस्यसकलमलहरत्वम् आनंदकंदमितीशविशेषणम् ।
एतस्यैवानंदस्यमात्रामुपजीवंतीतिश्रुतेरस्यसर्वानंदमूलत्वेनानंदकंदत्वम् ॥ ६ ॥ देवोद्योतनात् जगन्निवसत्यस्मिन्जगतिनिवसतीतिवाजगन्निवासस्तत्संबु
द्धिः तेतुभ्यंनमःअस्तु यतस्त्वंसर्वात्मदृक्सर्वस्वरूपआत्मासर्वात्माब्रह्म सर्वंखल्विदंब्रह्मेतिश्रुतेः तमनिशमात्मरूपतयापश्यतीतिसर्वात्मदृक्अतएवपरमेश्वरो

पुरारिगिरिसंभूताश्रीरामार्णवसंगता ॥ अध्यात्मरामगंगेयंपुनातिभुवनत्रयम् ॥ ५ ॥ कैलासाग्रेकदाचिद्रविशत
विमलेमंदिरेरत्नपीठेसंविष्टंध्याननिष्ठंत्रिनयनमभयंसेवितंसिद्धसंघैः ॥ देवीवामांकसंस्थागिरिवरतनयापार्वतीभक्ति
नम्राप्राहेदंदेवमीशंसकलमलहरंवाक्यमानंदकंदम् ॥ ६ ॥ पार्वत्युवाच ॥ नमोस्तुतेदेवजगन्निवाससर्वात्मदृक्
त्वंपरमेश्वरोऽसि ॥ पृच्छामितत्त्वंपुरुषोत्तमस्यसनातनंत्वंचसनातनोऽसि ॥ ७ ॥ गोप्यंयदत्यंतमनन्यवाच्यंवदंतिभ
क्तेषुमहानुभावाः ॥ तदप्यहो[1]ऽहंतवदेवभक्ताप्रियोऽसिमेत्वंवदयत्तुपृष्टम् ॥ ८ ॥

ऽसि अतःपुरुषोत्तमस्यसर्वेभ्यःपुरुषेभ्यउत्तमस्यतस्यैवब्रह्मणःसनातनंउपाधिरहितम् सोपाधेरूपस्यज्ञानोत्तरंनाशान्नसनातनत्वम् तत्त्वंपृच्छामि नन्वस
नातनेनमयाकथंतद्वक्तुंशक्यमतआह त्वंचसनातनोऽसि त्वमपिसएवासीतित्वदज्ञातंनकिंचिदितिभावः ॥ ७ ॥ अत्यंतगोप्यम् इदंतुतेगुह्यतममितिगीतो
क्तेः अनन्यवाच्यंभक्तान्येषुवक्तुमयोग्यम् अहोतदपिभक्तेषुवदंतिअतोमेपृष्टंयत्तत्तुनिश्चयेनवद हेदेव यतोऽहंतवभक्ता ननुमद्भक्तात्वंकुतस्तत्राह
यतस्त्वंमेप्रियोऽसि ॥ ८ ॥

---

[1] अहोहमितिसंधिरार्षः । अंवासुदेवंजिहीते जानातीति केक्विपिवा अहोहाःअनेनशंकरवाच्युशब्देनचसमासेसंबुद्धौसाधुर्वा ।

ज्ञानमिति येनज्ञानेनजनास्तरंतिपुनर्जन्मादिसंसारंनप्राप्नुवंतितत्सविज्ञानंज्ञानंब्रूहि विज्ञानंनिदिध्यासनपरिपाकजमपरोक्षज्ञानंतत्सहितंतत्फलकमितियावत् ज्ञानंश्रवणमननजंपरोक्षंब्रह्मैवसर्वं ब्रह्मैवाहमितिच तरतिशोकमात्मविदितिश्रुतेः तद्ब्रूहितज्जनकवाक्यंब्रूहीत्यर्थः तज्ज्ञानंनचवैराग्यंविनावैराग्यंचनभक्तिं विनेत्यतआह अनुभक्तिवैराग्ययुक्तंचेति भक्तेःपश्चादनुभक्तिजायमानंयद्वैराग्यंतद्युक्तम् तदुपायबोधकवाक्ययुक्तंचेत्यर्थः तथाचपातंजलसूत्रम् दृष्टानुश्रविकविषयवितृष्णस्यवशीकारसंज्ञावैराग्यमिति अनुश्रवोवेदस्तद्बोधितः स्वर्गादिरानुश्रविकः भक्तिरीश्वरानुरागः तथामितंमितशब्दवत् विभास्वत्विशेषेणभास्वत् श्रुतिमात्रेणझटित्यर्थप्रत्यायकशब्दबोधजनकवाक्यंयुक्तियुतंब्रूहि यथायोषिदप्यहंत्वदुक्तंजानामि ॥ ९ ॥ अग्रेप्रथमतःदृढाभक्तिः

ज्ञानंसविज्ञानमथानुभक्तिवैराग्ययुक्तंचमितंविभास्वत् ॥ जानाम्यहंयोषिदपित्वदुक्तंयथातथाब्रूहितरंतियेन ॥ ९ ॥
पृच्छामिचान्यच्चपरंरहस्यंतदेवचाग्रेवदवारिजाक्ष ॥ श्रीरामचंद्रेखिललोकसारेभक्तिर्दृढानौर्भवतिप्रसिद्धा ॥ १० ॥
भक्तिःप्रसिद्धाभवमोक्षणायनान्यत्ततःसाधनमस्तिकिंचित् ॥ तथाऽपिहृत्संशयबंधनंमेविभेत्तुमर्हस्यमलोक्तिभिस्त्वम् ॥ ११ ॥ वदंतिरामंपरमेकमाद्यंनिरस्तमायागुणसंप्रवाहम् ॥ भजंतिचाहर्निशमप्रमत्ताःपरंपदंयांतितथैवसिद्धाः ॥ १२ ॥

प्रसिद्धानौर्भवति भवसागरतरणायेतिशेषः ॥ १० ॥ तदेवाह भक्तिरिति ततोऽन्यत्साधनंनास्ति अन्यद्धर्मादितत्साधनंभवमोक्षजनकतत्त्वज्ञानसाधनंनास्तीत्यर्थः सामुख्येतरापेक्षितत्वात् सापरानुरक्तिरीश्वरइतिभक्तिमीमांसाकृच्छांडिल्यसूत्राभ्यांइतरेणज्ञानेनस्वसाधनतयाऽपेक्षितत्वात्साभक्तिर्मुख्येत्याद्यसूत्रार्थः भक्तिलक्षणपरंचद्वितीयंसूत्रम् हृत्संशयबंधनंहृद्गतसंशयविषयंरामस्यअनीश्वरत्वम् ॥ ११ ॥ निरस्तस्त्यक्तोमायागुणकृतोरागद्वेषादिसंप्रवाहो येनतम् अप्रमत्ताः प्रमादोऽज्ञानंतद्रहिताःप्रमादंवैमृत्युमहंब्रवीमीतिसनत्सुजातीयोक्तेः तत्रहिमृत्युर्वैतमइतिश्रुतेर्मृत्युपदेनाज्ञानमितिबोध्यम् तथैवतेनप्रकारेणभजनेनैवसिद्धास्तत्त्वज्ञाःसंतःपरंपदंमोक्षंयांतीत्यर्थः ॥ १२ ॥

परमोऽपिरामः स्वाविद्ययामाययासंवृतमावृतमात्मसंज्ञंब्रह्मसंज्ञंआत्मानंस्वस्वरूपंनजानाति अतःपरेणब्रह्मणासंबोधितः परात्माईश्वरस्तद्रूपंस्वंतत्त्वंवेदजानातीतिकेचिद्वदंति तथाचवाल्मीकीयेरावणवधानंतरंब्रह्मवाक्यम् तमुवाचततोदेवःस्वयंभूरमितद्युतिः । प्रगृह्यरुचिरंबाहुंस्मारयन्पूर्वदैहिकम् । भवान्नारायणःसाक्षाद्देवश्चक्रायुद्धःप्रभुरित्यादि उपदेशसाहस्र्यांभगवत्पादैरप्युक्तम् ब्रह्मादाशरथेर्यद्वदुक्त्यैवापानुदत्तमः। तस्यविष्णुत्वसंबोधेनयत्नांतरमास्थितइति ॥ १३॥ सीताकृतेसीतानिमित्तंविलापः सचारण्यककांडकिष्किंधादौवाल्मीकीयेस्पष्टएव केनसेव्यः अज्ञस्यजीववत्सेव्यत्वाभावादित्यर्थः ॥ १४ ॥ १५ ॥ परात्मनोब्रह्मणः ॥ १६ ॥ एवंपार्वत्यापृष्टःशिवोरामस्वरूपमाह रामइति रामःपरात्माब्रह्मैवेत्यर्थः प्रकृतेरित्यस्यान्यइतिअसंसर्गीतिचशेषः प्रकृतितत्कार्येभ्योऽन्यत्वात्तैरसंसर्गाच्चरामःपरमेश्वरएवेत्यर्थः जीवस्तुतैरुपाधिभिःसंसृष्टतद्धर्मकर्तृत्वाद्यभिमानवानितिभावः अतएवानादिरेकआनंदः कार्यानंदव्यावृत्तयेअनादिरिति एवंचानंदंब्रह्मएकमेवाद्वितीयंब्रह्मेतिश्रुतिसिद्धंब्रह्मेत्यर्थः अतएवपुरुषोत्तमःपुरुषेभ्योजीवेभ्यउत्तमः हिप्रसिद्धमेतदित्यर्थः ॥ १७॥

वदंतिकेचित्पर[1]मोऽपिरामःस्वाविद्ययासंवृतमात्मसंज्ञम्॥जानातिनात्मानमतःपरेणसंबोधितोवेदपरात्मतत्त्वम्॥ १३॥
यदिस्मजानातिकुतोविलापःसीताकृतेऽनेनकृतःपरेण ॥ जानातिनैवंयदिकेनसेव्यःसमोहिसर्वैरपिजीवजातैः ॥ १४॥
अत्रोत्तरंकिंविदितंभवद्भिस्तद्ब्रूतमेसंशयभेदिवाक्यम् ॥ १५ ॥ श्रीमहादेवउवाच ॥ धन्याऽसिभक्ताऽसिपरात्मनस्त्वं
यज्ज्ञातुमिच्छातवरामतत्त्वम् ॥ पुरानकेनाप्यभिचोदितोऽहंवक्तुंरहस्यंपरमंनिगूढम् ॥ १६ ॥ त्वयाऽद्यभक्त्यापरि
नोदितोऽहंवक्ष्येनमस्कृत्यरघूत्तमंते ॥ रामःपरात्माप्रकृतेरनादिरानंदएकःपुरुषोत्तमोहि ॥ १७॥

---

[1] परा मा माया यस्मात्सः मायातिरिक्तइत्यर्थः ।

नन्वीदृशस्यमनुष्यादिदेहधारणंकथमतआह स्वमाययेति अघटितघटनाशक्तिरूपामाया मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरमितिश्रुतिसिद्धा तयाइदंकृत्स्नंदृश्यंसृष्ट्वांऽतर्बहिरास्थितोयः तत्सृष्ट्वातदेवानुप्राविशदितिश्रुतेः तादृशस्यमनुष्यशरीरपरिग्रहोनाश्चर्याय तदुक्तंगीताभाष्ये भूतानामीश्वरोनित्यशुद्धबुद्धस्वभावोऽपिस्वमाययादेहवानिवजातइवचलोकानुग्रहंकुर्वन्नूलक्ष्यते स्वप्रयोजनाभावेऽपिभूतानुजिघृक्षयेति नन्वेवंसर्वगतत्वेसर्वज्ञेयःकिंनेत्यतआह सर्वांतरस्थोऽपिनिगूढआत्मेति यःपृथिव्यांतिष्ठन्पृथिव्याआंतरइत्यादिश्रुत्यासर्वांतरस्थत्वेनोक्तोऽपिनिगूढः एषसर्वेषुभूतेषुगूढो[1]त्मानप्रकाशते। दृश्यतेत्वग्र्ययाबुद्ध्यासूक्ष्मयासूक्ष्मदर्शिभिरितिश्रुतेः तादृशस्यसत्त्वेव्यवहारकालिकमपिमानमाह स्वमाययेति स्वाज्ञानकल्पितयामाययेत्यर्थः अयंभावः नित्यशुद्धादिरूपेश्वर

स्वमाययाकृत्स्नमिदंहिसृष्ट्वानभोवदंतर्बहिरास्थितोयः॥
सर्वांतरस्थोपिनिगूढआत्मास्वमाययासृष्टमिदंविचष्टे ॥ १८ ॥

स्वरूपाज्ञानेनतस्याघटितघटनासामर्थ्यापरपर्यायामायाख्यात्रिगुणाशक्तिरुपाधिकल्पितावच्छेदैस्तत्स्वरूपैर्जीवैःकल्पिता साचस्वसजातीयमेवसंसारमुच्चावचंप्रसूते अतएवतत्स्वरूपज्ञानेसकार्यायास्तस्यानाशः रज्जुज्ञानेनेवरज्जुकल्पितभुजंगस्यभयकंपादिकार्यसहितस्य नचर्जीवैस्तत्कल्पनात्सृष्टोपाधिभिश्चजीवतेत्यन्योन्याश्रयः अनादित्वेनापिपरिहारात् नन्वेकस्यतत्त्वज्ञानेनतन्नाशेसंसारोच्छेदापत्तिः एकरज्जौयुगपद्दशानांसर्पभ्रमेएकस्यरज्जुज्ञानेनतस्यसर्पभ्रमकार्यैभयकंपादौनिवृत्तेऽपिअन्येषांतद्दर्शनेनतदनिवृत्तिवदुपपत्तेरिति तयासृष्टमिदंविचष्टेपश्यति एवंचद्रष्टृत्वेनतत्सिद्धिः नान्योतोऽस्तिद्रष्टेतिश्रुतेः एकेनैवाकाशेनोपाधिभेदाद्घटाकाशादिव्यवहारवत् एकेनैवचेतनेनोपाधिभेदादनेकजीवव्यवहारोपपत्तौचेतनानेकत्वेमानाभावाद्द्रष्टृत्वेनतत्सिद्धिरितिभावःनचतत्तदज्ञानरूपोपाधिविशिष्टस्यैवजीवत्वेजीवस्याज्ञानमितिव्यवहारानापत्तिः भार्याविशिष्टस्यैवगृहस्थत्वेऽपिगृहस्थस्यभार्येतिवदुपपत्तेरितिदिक् ॥ १८ ॥

---

[1] गूढ आत्मायस्यसः पृषोदरादित्वात्साधुः

चेतनस्वीकारेमानांतरमाह जगंतीति जगंतिजगदंतःकरणानियत्सन्निधौनित्यंपरितोभ्रमंतिस्वस्वचेष्टांकुर्वंति अन्यथासर्वस्यजडत्वाच्चेतनाभावेजगदांध्यप्रसंगइतिभावः ननुनिष्कलंनिष्क्रियंशांतमितिश्रुतेस्तस्यनिष्क्रियतयाकथंतेनान्येषांव्यापारसंपादनमतआह चुंबकलोहवद्धीति यथानिष्क्रियोऽपिचुंबकमणिर्लोहंशक्तिविशेषात्सन्निधिमात्रेणचालयति तथाचेतनोनिष्क्रियोऽपिस्वमायावैचित्र्याद्देवतानिसन्निधिमात्राद्व्यापारयतीत्यर्थः तदुक्तमाचार्यैः अनापन्नविकारःसन्नयस्कांतवदेवयः। बुद्ध्यादींश्चालयेत्प्रत्यक्सोऽहमित्यवधारयेदिति एतन्मायागुणास्पृष्टत्वादिरूपंरामस्वरूपंयेजीवानजानंति अज्ञानेहेतुर्विमूढचेतसः विमूढचेतस्त्वेहेतुःस्वाविद्ययासंवृतमानसाइति स्वोपाधिभूतयाअविद्ययाविद्याविरोधिभावदार्ढ्यरूपयासंवृतांतःकरणाः ॥ १९ ॥ अतस्तेजीवाःशुद्धबुद्धे शुद्ध

जगंतिनित्यंपरितोभ्रमंतियत्सन्निधौचुंबकलोहवद्धि॥ एतन्नजानंतिविमूढचित्ताःस्वाविद्ययासंवृतमानसाये॥ १९॥
स्वाज्ञानमप्यात्मनिशुद्धबुद्धेस्वारोपयंतीहनिरस्तमाये॥ संसारमेवानुसरंतितेवैपुत्रादिसक्ताःपुरुकर्मयुक्ताः॥ २०॥
जानंतिनैवंहृदयेस्थितंवैचामीकरंकंठगतंयथाऽज्ञाः॥ यथाऽप्रकाशोनतुविद्यतेरवौज्योतिःस्वभावेपरमेश्वरेतथा॥ वि
शुद्धविज्ञानघनेरघूत्तमेविद्याकथंस्यात्परतःपरात्मनि॥ २१॥

त्वंमायादोषानाक्रांतत्वेन बुद्धेज्ञानस्वरूपेनिरस्तमायेस्वज्ञानवतांनिरस्तामायायेनतादृशे मामेवयेप्रपद्यंतेमायामेतांतरंतितेइतिगीतोक्तेः ईदृशेरामेस्वाज्ञानंसुतरामारोपयंति स्वस्याज्ञत्वाद्राममज्ञमितिजानंतीत्याशयः तेषांदुष्टफलमाहसंसारमिति तेपुत्रादिसक्ताःपुरुकर्मयुक्ताःभूरियज्ञादिकर्मयुक्ताःसंसारमेवानुसरंति ॥ २० ॥ यतस्तेयथाऽज्ञाःकंठगतंचामीकरंस्वर्णालंकारंनजानंतिएवंहृदयेस्थितंरामंतेनजानंति अतःसंसारमेवानुसरंतीत्यर्थःकिंचपरात्मन्यज्ञानासंभवइतिदृष्टांतेनाह यथेति अप्रकाशस्तमोयथारवौज्योतिःस्वभावेज्योतिःस्वरूपेनविद्यतेतथाविशुद्धविज्ञानेननिर्विशेषापरोक्षज्ञानेनघनेनिबिडेपरतःपरमात्मनिउत्कृष्टेभ्योप्युत्कृष्टेरामेअविद्याकथंस्यात् तादृशेवस्तुन्यविद्यानवकाशादितिभावः तदुक्तमाचार्यैः अप्रकाशोयथादित्येनास्तिज्योतिःस्वभावतः नित्यबोधस्वरूपत्वान्नाज्ञानंतद्वदात्मनीति ॥ २१ ॥

ननुस्वाज्ञानेनराममज्ञंव्यवहरतिजनइत्युक्तमसंगतम् अन्यगतस्यान्यत्रारोपासंभवादित्याशंक्यसदृष्टांततयामोहंजीवउपपादयति यथेति यथाविनष्टदृष्टेर्दोषयुक्तदृष्टेःपुरुषस्यभ्रमताक्ष्णागृहादिकंभ्रमतीव उत्प्रेक्षेयम् भ्रमतीवेतिगृह्यते तेनैवनष्टदृष्टिनापुरुषेणेतिशेषः तथैवदेहेंद्रियावच्छिन्नस्यकर्तुरात्मनोंतःकरणस्याहंकाराख्यस्यकृतंपरेसर्वधर्मालिप्तेतदनवच्छिन्नेचेतनेऽध्यस्यजनोजीवोमुह्यतिअहंकर्तेतिमोहंप्राप्नोति एवंचयथाक्षिगतभ्रमणस्यगृहादावारोपःयथाचांतःकरणधर्मस्यकर्तृत्वादेरात्मन्यारोपस्तथास्वाज्ञानस्यरामेआरोपइत्याशयः ॥ २२ ॥ भगवतिरामेस्वतोज्ञानमज्ञानंवानसंभवतीतिपुनरपिदार्ढ्यायोक्तंयुक्तमेवाहनाहइति सूर्यंप्रतिरात्रिदिवसविभागाभावेहेतुः प्रकाशरूपाव्यभिचारतः क्वचित् क्वापीत्यर्थः ज्ञानाज्ञानयोर्भगवत्यनवस्थितौहेतुःशुद्धचिद्घनत्वम् ॥२३॥ उप

यथाहिचाक्ष्णाभ्रमतागृहादिकंविनष्टदृष्टेर्भ्रमतीवदृश्यते ॥ तथैवदेहेंद्रियकर्तुरात्मनःकृतंपरेध्यस्यजनोविमुह्यति
॥ २२ ॥ नाहोनरात्रिःसवितुर्यथाभवेत्प्रकाशरूपाव्यभिचारतःक्वचित् ॥ ज्ञानंतथाऽज्ञानमिदंद्वयंहरौरामेकथंस्थास्यति
शुद्धचिद्घने ॥ २३ ॥ तस्मात्परानंदमयेरघूत्तमेविज्ञानरूपेहिनविद्यतेतमः ॥ अज्ञानसाक्षिण्यरविंदलोचनेमायाश्रय
त्वान्नहिमोहकारणम् ॥ २४ ॥

संहरति तस्मादिति परानंदमये सर्वभूतैरेतदानंदमात्रायाउपजीवनात् विज्ञानरूपेनिर्विकल्पकज्ञानरूपेतमोऽज्ञानरूपम् तमसोसंबंधेहेतुद्वयंअज्ञानसाक्षित्वंमायाधिष्ठातृत्वरूपंमायाश्रयत्वंच मोहकारणंतमोऽज्ञानम् योयन्मायाधिष्ठातासतद्विषयाज्ञानहीनइतिलोकेदर्शनादितिभावः नन्वेवंसतिब्रह्मादाशरथेर्यद्वदुक्त्यैवापानुदत्तमइत्याद्याचार्याद्युक्तेःकागतिरितिचेच्छृणु रावणवधार्थंमनुष्यत्वनाटनायभगवतासंकल्पपूर्वंकृतस्यस्वमाहात्म्याच्छादनस्यतत्रतमःशब्देनोक्तेरदोषात् उक्तंहिसंक्षेपशारीरके संकल्पपूर्वकमभूद्रघुनंदनस्यनाहंविदानइतिकिंचनकालमेतत् । ब्रह्मोपदेशमुपलभ्यनिमित्तमात्रंतच्चोत्ससर्जसकृतेसतिदेवकार्येइति भागवतेऽप्युक्तम् स्त्रीसंगिनांगतिरितिप्रथयंश्चचारेति ॥ २४ ॥

---

१ उत्वमार्षं।

मरुत्सूनुर्वायुपुत्रोहनूमान् ॥ २५ ॥ रामायणेरामायणप्रवर्तकेरामावतारकालेइत्यर्थः देवकंटकंदेवद्रोहिणम् ॥२६॥२७ ॥ परिवृतःसीतादिभिरितिशेषः ॥२८॥ पुरतःस्थितंअग्रेस्थितम् अनेनगुरूपसदनंदर्शितम् निराकांक्षंज्ञानेतरधनादिनिरपेक्षम् ॥ २९ ॥ तत्त्वंमत्स्वरूपतत्त्वंनिष्कल्मषोऽयमित्यनेनज्ञानाधिकारित्वंसूचि

अत्रतेकथयिष्यामिरहस्यमतिदुर्लभम् ॥ सीता[1]राममरुत्सूनुसंवादंमोक्षसाधनम् ॥ २५॥ पुरारामायणेरामोरावणं देवकंट[2]कम् ॥ हत्वारणेरणश्लाघीसपुत्रबलवाहनम् ॥ २६ ॥ सीतयासहसु[3]ग्रीवलक्ष्मणाभ्यांसमन्वितः ॥ अयोध्याम गमद्रामोहनूमत्प्रमुखैर्वृतः ॥ २७॥ अभिषिक्तःपरिवृतोवसिष्ठाद्यैर्महात्मभिः ॥ सिंहासनेसमासीनःकोटिसूर्यसमप्रभः ॥ २८ ॥ दृष्ट्वातदाहनूमंतंप्रांजलिंपुरतःस्थितम् ॥ कृतकार्यंनिराकांक्षंज्ञानापेक्षंमहामतिम् ॥ २९ ॥ रामःसीतामुवाचे दंब्रूहितत्त्वंहनूमते ॥ निष्कल्मषोऽयंज्ञानस्यपात्रंनौनित्यभक्तिमान् ॥ ३० ॥ तथेतिजानकीप्राहतत्त्वंरामस्यनिश्चित म् ॥ हनूमतेप्रपन्नायसीतालोकविमोहिनी ॥ ३१ ॥

तम् नौआवयोः ॥ ३० ॥ रामस्यतत्त्वंश्रोतुर्निश्चितंयथाभवतितथाप्राह लोकविमोहिनीत्यनेनबंधनकर्तुरेवबंधमोक्षेसामर्थ्यमितिदर्शितम् राजाज्ञयाबद्धोहित दाज्ञयैवमुच्यतइतिलोकेप्रसिद्धम् एवंचभगवतीकृपैवमुख्यंमोक्षकारणमितिदर्शितम् ॥ २१ ॥

---

[1] सीतयासहितो राम इति उत्तरपदलोपीसमासः । [2] कंटकवदतिदुःखदत्त्वेनदेवद्रोहिणिकंटकत्वारोपः । [3] इदमुपलक्षणंविभीषणादीनां ।

सीतोवाच ॥ रामंविद्धिपरंब्रह्मसच्चिदानंदमद्वयम् ॥ सर्वोपाधिविनिर्मुक्तंसत्तामात्रमगोचरम् ॥ ३२ ॥
आनंदंनिर्मलंशांतंनिर्विकारंनिरंजनम् ॥ सर्वव्यापिनमात्मानंस्वप्रकाशमकल्मषम् ॥ ३३ ॥

जानकीप्राहेत्युक्तंतदाह राममिति रामंपरंब्रह्मविद्धि रमंतेयोगिनोऽनंतेनित्यानंदेचिदात्मनि इतिरामपदेनेदंपरंब्रह्माभिधीयतेइतितापनीयेपाद्मेचोक्तेः सद्बाधहीनम् सत्यत्वंबाधराहित्यंजगद्बाधैकसाक्षिणः। बाधःकिंसाक्षिकोब्रूहिनत्वसाक्षिकइष्यतइत्युक्तेः चिज्ज्ञानस्वरूपम् आनंदंतद्रूपम् अद्वयम् एकमेवाद्वितीयंब्रह्मेति श्रुतेः सर्वोपाधिविनिर्मुक्तंस्थूलसूक्ष्मसकलोपाधिनिर्मुक्तम् विराट्हिरण्यगर्भश्चकारणंचेत्युपाधयः ईशस्ययत्रिभिर्हीनंतुरीयंतत्पदंविदुरितिवार्तिकम् किंच सर्वोपाधिभिर्धर्मैर्विमुक्तमस्पृष्टमित्यर्थः सत्तामात्रंवस्तुमात्रेसदितिव्यवहारनियामकमित्यर्थः एतत्संबंधादेवसर्वत्रसदितिव्यवहारइतिभावः अगोचरंमनोवचसोरप्यविषयमित्यर्थः यतोवाचोनिवर्तंते अप्राप्यमनसासहेतिश्रुतेः ॥२२॥ आनंदंतत्त्वेनविपुलत्वमुपलक्ष्यते योवैभूमातत्सुखंनाल्पेसुखमस्तीतिश्रुतेः निर्मलंरजोहीनम् शांतंप्रपंचोपशमत्वात् प्रपंचोपशमंशिवंशांतमितिश्रुतेः निर्विकारंजायतेऽस्तिवर्धतेविपरिणमतेऽपक्षीयतेनश्यतीतिषड्भावविकारहीनम् नजायतेम्रियतेवेतिगीतोक्तेः अनेनापरिणामित्वंसूचितम् निरंजनंअविद्यातत्कार्यरूपतमोहीनम् आदित्यवर्णंतमसःपरस्तादित्युक्तेः सर्वव्यापित्वादेवात्मानम् अततिव्याप्नोतीत्यात्मा सर्वव्यापीसर्वभूतांतरात्मेतिश्रुतेः स्वप्रकाशम् अत्रायंपुरुषःस्वयंज्योतिरिति यस्यभासासर्वमिदंविभातीतिश्रुतेः अकल्मषम् आत्मापहतपाप्मेतिश्रुतेः सदादिशब्दानांकल्पितप्रवृत्तिनिमित्तभेदादिहपर्यायत्वेनसहप्रयोगःयानित्वभावमुखेनबोधकानितेषुनकाप्यनुपपत्तिः एवंचापाततःकल्पितप्रवृत्तिनिमित्तप्रकारकबोधेवृत्तेशुद्धचित्तस्यश्रुतौसर्वधर्मरहितत्वेनब्रह्मोक्त्याधर्मांशेकल्पितत्वग्रहेशुद्धनिर्धर्मकब्रह्मबोधःसर्वैःपदैर्भवतीतिबोध्यम् तत्रदुर्बोधस्यात्मतत्त्वस्यबोधार्थंपुनःपुनःशब्दतोऽर्थतश्चपरमकरुणावतीभगवतीसीताहनूमतेबोधयामासेतिद्रष्टव्यम् ॥ ३३ ॥

नन्वेवंविधोरामश्चेज्जगत्कारणत्वाद्यसंभवस्तस्मिन्नितिकुतोजगदुत्पत्त्यादीत्यतआह मामिति मूलप्रकृतिंसर्वजगदुपादानकारणमित्यर्थः प्रकृतिशब्दस्योपादानकारणेप्रसिद्धेः तत्तदुपादानकारणानांमहदादीनामप्युपादानकारणत्वान्मूलप्रकृतित्वमस्याः मांमायांतुप्रकृतिंविद्यादितिश्रुतिप्रसिद्धांब्रह्मण्यध्यस्तांततोभेदाभेदाभ्यांसत्त्वासत्त्वाभ्यांचअनिर्वचनीयामनादिमैश्वरींमायांऐश्वरीत्वंचास्याईश्वरस्वरूपाज्ञानरूपत्वेनेतिबोध्यम् एषाचजीवाश्रितैवेश्वरसन्निधानात्तद्रूपेणविवर्ततेइतिबोध्यम् मूलप्रकृतित्वमेवस्फुटयतिसर्गस्थित्यंतकारिणीमिति उत्पत्तिस्थितिप्रलयकर्त्रीं नन्वेवंतदैक्षतबहुस्यांप्रजायेयेतिश्रुतेर्यतोवाइमानिभू

मांविद्धिमूलप्रकृतिंसर्गस्थित्यंतकारिणीम्॥ तस्यसन्निधिमात्रेणसृजामीदमतंद्रिता॥ ३४॥

तानिजायंतेयेनजातानिजीवंतियत्प्रयंत्यभिसंविशंतीति ब्रह्मप्रकरणस्थश्रुतेश्चब्रह्मणोजगत्कारणत्वंलभ्यतेतद्विरुद्धोतेत्यत्राह तस्यसन्निधीति यथेंद्रजालिकमायाशक्तेस्तत्तन्मंत्रनिष्ठायाऐंद्रजालिकंविनानस्वकार्यसामर्थ्यंतथास्याःशक्तेस्तत्सन्निधानेनैवजगत्स्रष्टृत्वमितितत्रतदुपचारः यथागृहिणीवैशिष्ट्येनैवसिद्धस्वरूपस्यगृहस्थस्यस्वसंबंधजसंकल्पवशवर्तिनीगृहिणीतथामायावैशिष्ट्येनैवसिद्धस्येश्वरस्यस्वसंगजतत्संकल्पवशवर्तिन्यहमित्याह अतंद्रितातत्संकल्पितेऽर्थे निरालस्येस्यर्थः तदुक्तंवाल्मीकीयेरामंप्रतिकालवचनेन संक्षिप्येहपरान्लोकानेकस्त्वंमाययासह। भार्ययाशुभयादेव्यामांत्वंपूर्वमजीजनइति एवंचमद्गतजगत्स्रष्टृत्वादेस्तत्रारोपइतिभावः॥ ३४॥

यद्यपिमायाशबलेईश्वरेएवजगदुपादानत्वंनिमित्तत्वंच जगतस्तदुपादानंमायामादायतामसीम् । निमित्तंशुद्धसत्वांतामुच्यतेब्रह्मतद्गिरेत्यभियुक्तोक्तेस्तथाऽपि विशिष्टस्यविशेषणविशेष्योभयानतिरेकेणमायागतस्यतस्यभगवत्यारोपेणैवतथाव्यवहारइत्याह तदिति यतस्तत्सान्निध्यान्मयासृष्टमतस्तत्स्रष्टृत्वादिअबुधैस्तत्स्वरूपानभिज्ञैस्तत्रारोप्यतेरज्जौसर्पइवेतिभावः एतदेवद्रढयितुंकानिचित्स्वकृतानितत्रारोप्याणिदर्शयति अयोध्येत्यादि ॥ ३५ ॥ ३६ ॥ ३७ ॥ मायामारीचमरणंमायागृहीतमृगरूपमारीचमरणमित्यर्थः मायासीताहृतिरिति तदुक्तंकूर्मपुराणेउत्तरखंडेचतुस्त्रिंशेऽध्यायेरामस्यसुभगांभार्यांरावणोराक्षसेश्वरः। सी

तत्सान्निध्यान्मयासृष्टंतस्मिन्नारोप्यतेऽबुधैः॥ अयोध्यानगरेजन्मरघुवंशेऽतिनिर्मले ॥३५॥ विश्वामित्रसहायत्वंमखसंरक्षणंततः॥ अहल्याशापशमनंचापभंगोमहेशितुः॥ ३६ ॥ मत्पाणिग्रहणंपश्चाद्भार्गवस्यमदक्षयः॥ अयोध्यानगरेवासोमयाद्वादशवार्षिकः॥३७॥ दंडकारण्यगमनंविराधवधएवच॥ मायामारीचमरणंमायासीताहृतिस्तथा॥३८॥

तांविशालनयनांचकमेकालनोदितः। गृहीत्वामाययावेषंचरंतींविजनेवने। समाहर्तुंमनश्चक्रेतापसःकिलकामिनीं । विज्ञायसाचतद्भावंस्मृत्वादाशरथिंपतिम् जगामशरणंवह्निमावसथ्यंशुचिस्मिता । प्रपद्येपावकंदेवंसाक्षिणंविश्वतोमुखम् आत्मानंदीप्तवपुषंसर्वभूतहृदिस्थितम् । इत्याद्यष्टश्लोकानुक्त्वा इतिवह्न्यष्टकंजप्त्वारामपत्नीयशस्विनी । ध्यायंतीमनसातस्थौराममुन्मीलितेक्षणा।अथावसथ्याद्भगवान्हव्यवाहोमहेश्वरः। आविरासीत्सुदीप्तात्मातेजसानिर्दहन्निव।सृष्ट्वामायामयींसीतांसरावणवधेच्छया।सीतामादायरामेष्टांपावकोऽतरधीयत । कृत्वातुरावणवधंरामोलक्ष्मणसंयुतः । समादायाभवत्सीतांशंकाकुलितमानसः।साप्रत्ययायभूतानांसीतामायामयीपुनः। विवेशपावकंदीप्तंददाहज्वलनोपिताम्।दग्ध्वामायामयींसीतांभगवानुग्रदीधितिः।रामायादर्शयत्सीतांपावकोसौसुरप्रियः।एतत्पति

व्रतानांवैमाहात्म्यंकथितंमया । स्त्रीणांसर्वाघशमनंप्रायश्चित्तंपरंस्मृतमिति अनेनस्त्रीणामेवंविधोग्निप्रवेशोनदोषायविपरीतंसर्वपापहरश्चेतिसूचितम् वाल्मीकीयेऽपिमारीचवधार्थंगतेरामेरामहतेनतेनरामशब्दसदृशशब्दैराक्रोशेकृतेलक्ष्मणस्यरामसहायार्थंगमनप्रेरणावसरेअरण्यकांडे अपित्वासहरामेणपश्येयंपुनरागतः। लक्ष्मणेनैवमुक्तातुरुदतीजनकात्मजा ।प्रत्युवाचततोवाक्यंतीव्रबाष्पपरिप्लुता। गोदावरींप्रवेक्ष्यामिहीनारामेणलक्ष्मण । आबंधिष्येऽथवात्यक्ष्येविषमेदेहमात्मनः। विषमेभृग्वादौस्थित्वाततःप्रपातेनेत्यर्थः पिबामिवाविषंतीक्ष्णंप्रवेक्ष्यामिहुताशनम्। नत्वहंराघवादन्यंकदाऽपिपुरुषंस्पृशेइतिसीतोक्त्यासूचितोऽयमर्थः अन्यथैवं

जटायुषोमोक्षलाभःकबंधस्यतथैवच ॥ शबर्याःपूजनंपश्चात्सुग्रीवेणसमागमः॥ ३९ ॥ वालिनश्चवधःपश्चात्सीतान्वेषणमेवच ॥
सेतुबंधश्चजलधौलंकायाश्चनिरोधनम् ॥ ४० ॥ रावणस्यवधोयुद्धेसपुत्रस्यदुरात्मनः ॥ बिभीषणे
राज्यदानंपुष्पकेणमयासह ॥ ४१ ॥ अयोध्यागमनंपश्चाद्राज्येरामाभिषेचनम् ॥ एवमादीनिकर्माणिमयैवाचरितान्यपि ॥
आरोपयंतिरामेऽस्मिन्निर्विकारेऽखिलात्मनि ॥ ४२ ॥

प्रतिज्ञायरावणशरीरस्पर्शेजगन्मातुःप्रतिज्ञाहानिःस्यात् तस्मात्प्रवेक्ष्यामिहुताशनमित्यनेनस्वकर्तव्यार्थएवोक्तइतिमंतव्यम् एतत्प्रवेशादेवहनुमत्पुच्छसंबद्धाग्निनालंकादाहोपपत्तिः अन्यथारावणवशीकृतेनलोकपालाग्निनाकथंतन्नगरदाहःस्यात् एतच्छक्तिप्रवेशेतुतस्यस्वातंत्र्यहान्यातदुपपत्तिरित्यलम् ॥ ३८ ॥ ॥ ३९ ॥ ४० ॥ ४१ ॥ एवमादीनिब्राह्मणेभ्योदानादीन्यादिशब्दाद्ब्राह्माणि निर्विकारेजन्मादिरहितेआरोपयंति एवंजगत्कर्तृत्वादिकमपिमन्निष्ठमेवरामेआरोपयंतीत्यर्थः ॥ ४२ ॥

निर्विकारत्वमेवरामस्योपपादयति रामइति निष्कलनिष्क्रियंशांतमित्यादिश्रुतेः आनंदमूर्तिरानंदस्वरूपः अचलःकूटस्थोऽतएवपरिणामहीनः मायागुणान्माययास्पृष्टपदार्थाननुगतस्तदधिष्ठानत्वेनस्थितस्तथाविभातिसृष्टिरूपोभाति यथारज्ज्ववच्छेदेनसर्पाकारोंतःकरणपरिणामइतिरज्जुःसर्पात्मनाभाति एतदेवविवर्तोपादानत्वमित्याहुः सचसर्पाकारोंऽतःकरणपरिणामःसत्त्वासत्त्वाभ्यामनिर्वचनीयइत्युच्यते एवंप्रपंचोऽप्यनिर्वचनीयइतिदिक् ॥ ४३ ॥ उपस्थितमात्मनोऽद्वितीयत्वेजीवेश्वरादिव्यवस्थाकथमितिजिज्ञासयोपपन्नम् आत्माईश्वरः अनात्माचिदाभासोजीवः परात्माशुद्धचैतन्यम् ॥ ४४ ॥ तेषांतत्त्वमेवसदृष्टांतमाह आकाशस्येति एकस्याकाशस्यत्रिविधोभेदः महाकाशोजलाशयावच्छिन्नआकाशःप्रतिबिंबाकाशश्चेतिभेदात् तदेवाह महानिति महाकाशइत्यर्थः सएवमहा

रामोनगच्छतिनतिष्ठतिनानुशोचत्याकांक्षतेत्यजतिनोनकरोतिकिंचित् ॥ आनंदमूर्तिरचलःपरिणामहीनोमायागुणाननुगतोहितथाविभाति ॥ ४३ ॥ श्रीमहादेवउवाच ॥ ततोरामःस्वयंप्राहहनूमंतमुपस्थितम् ॥ श्रृणुतत्त्वंप्रवक्ष्यामित्यात्मानात्मपरात्मनाम् ॥ ४४ ॥ आकाशस्ययथाभेदस्त्रिविधोदृश्यतेमहान् ॥ जलाशयेमहाकाशस्तदवच्छिन्नएवहि ॥ प्रतिबिंबाख्यमपरंदृश्यतेत्रिविधंनभः ॥ ४५ ॥ बुद्ध्यवच्छिन्नचैतन्यमेकंपूर्णमथापरम् ॥ आभासस्त्वपरंबिंबभूतमेवंत्रिधाचितिः ॥ ४६ ॥

काशोजलाशयेतदवच्छिन्नएवभवति तत्रैवजलाशयेपरंप्रतिबिंबाख्यंदृश्यते एवंनभस्त्रिविधमित्यर्थः ॥ ४५ ॥ एवंदृष्टांतमुपपाद्यदार्ष्टांतिकमाह बुद्धीति सर्वबुद्धिसाक्षितयाबुद्ध्युपहितंचैतन्यम् पूर्णमुपाधिमंडलस्यविभुत्वाद्विभु सकलबुद्धिसमष्टिरेवमायेति तदवच्छिन्नचैतन्यमीश्वरइत्यर्थः अथापरमाभासस्तत्तद्बुद्धिप्रतिबिंबभूतोजीवइत्यर्थः अपरंबिंबभूतम् एवंचितिस्त्रिधाइत्यर्थः आभासस्त्वपरंविश्वभूतमितिपाठेबुद्ध्यावच्छिन्नंचैतन्यमेकमित्यंतेनेश्वरः पूर्णमथापरमित्यनेनशुद्धमाभासस्त्वपरमितिजीवः जीवत्वमेवस्फुटयतिविश्वभूतमिति विश्वशब्देनजाग्रदवस्थाभिमानी विशतिदेहेंद्रियादिष्वितिव्युत्पत्तेः एतत्प्रतिबिंबाकाशस्थानीयमितित्रिधाचितिरित्यर्थइत्याहुः तत्रद्वौमिथ्याभूतौ उपाध्योर्मिथ्यात्वात् ॥ ४६ ॥

---

१ ज्ञानाधिकरणं । २ चैतन्यं ।

साभासबुद्धेःकर्तृत्वमविच्छिन्नेऽविकारिणि ॥ साक्षिण्यारोप्यतेभ्रांत्याजीवत्वंचतथाऽबुधैः ॥ ४७ ॥
आभासस्तुमृषाबुद्धिरविद्या[1]कार्यमुच्यते ॥ अविच्छिन्नंतुतद्ब्रह्मविच्छेदस्तुविकल्पतः ॥ ४८ ॥

नन्वेवंशुद्धचैतन्येसाक्षीतिव्यवहारानुपपत्तिः साक्षाद्द्रष्टाहिसाक्षी नचशुद्धचैतन्येद्रष्टृत्वमित्यतआह साभासेति आभासेनचेतनप्रतिबिंबेनसहितायाबुद्धेरंतःकरणस्येत्यर्थः तद्गतंकर्तृत्वमबुधैःसाक्षिणिआरोप्यते तेनायंसाक्षिपदवाच्यइत्यर्थः अयमाशयः जानातीत्यादावंतःकरणवृत्तिविशेषरूपाक्रियाज्ञाधातुवाच्या आभासविशिष्टश्चतिङर्थआश्रयः परस्पराध्यासेनाभासबुद्ध्योर्विवेकाग्रहात् तदुक्तमाचार्यैः आत्माभासस्तुतिङ्वाच्योधात्वर्थश्चधियःक्रिया । उभयंचाविवेकेनजानातीत्युच्यतेमृषा । बुद्धेःकर्तृत्वमध्यस्यजानातीतिज्ञउच्यते । तथाचैतन्यमध्यस्यज्ञत्वंबुद्धेरिहोच्यतइति । आत्माभासइतिबहुव्रीहिः धियोऽतःकरणस्य तदेवाह उभयंचेतिमृषेति आभासबुद्धितक्रियाणांमिथ्यात्वादयंव्यवहारोऽपिमिथ्येत्यर्थः एवंचसाभासबुद्धिगतद्रष्टृत्वस्याविच्छिन्नेऽपरिच्छिन्नेऽविकारिणिसाक्षिणिबुद्धितादात्म्यापन्नाभासतादात्म्याध्यासेनारोपः तथाजीवोनित्यःसत्यइत्यादिव्यवहाराज्जीवत्वमपितत्रारोप्यतइत्यर्थः ॥ ४७॥

आत्माभासमादायनूनंतथाव्यवहारसंभवइत्याह आभासस्त्विति तस्यमृषात्वादविद्याकार्यत्वाच्चतथाव्यवहारस्यतमादायनोपपत्तिरित्यर्थः नदर्पणेमुखमस्ति मिथ्यैवात्रदर्पणेमुखमभादित्येवंसर्वसिद्धबाधानुभवात् अतएवासावविद्याकार्यं ग्रीवास्थमुखेआदर्शस्थत्वंत्वाध्यासिकंनतुवास्तवमितिबोध्यं आभासासत्यत्वंचाकरेप्रपंचितं विस्तरभयान्नेहोच्यते ननूक्तंत्रैविध्यंकिंचितेर्वास्तवंनेत्याह अविच्छिन्नंविच्छेदोभेदस्तद्रहितं नन्वेवंत्रिधाचितिरित्यसंगतंतत्राह विच्छेदइति भेदइत्यर्थः विकल्पतः उपाध्यध्यासकृतइत्यर्थः एवंजीवानांपरस्परंभेदोऽप्यध्यासकृतएवेतिबोध्यम् ॥ ४८ ॥

---

[1] माया ।

कल्पितभेदसत्त्वेप्रमाणमाह अवच्छिन्नस्येति अवच्छेदोभेदस्तद्वतःआध्यासिकभेदवतः साभासस्याहमस्तत्त्वमस्यादिवाक्यैःपूर्णेनेश्वरेणएकत्वंप्रतिपाद्यते तथासतिकल्पितभेदेसतिउपपद्यतइतिशेषः सर्वथाभेदाभावेतदानर्थक्यंवास्तवेऽपिभेदेतदानर्थक्यं वास्तवस्यवचनशतेनाप्यनिवृत्तिरितिभावः अत्रावच्छिन्नस्य साभासस्याहमइत्यनेनत्वंपदार्थोदर्शितः पूर्णेनेत्यनेनतत्पदार्थोदर्शितः ॥ ४९ ॥ एतदेवध्वनयंस्तदुपदेशफलमाह ऐक्येति आत्मनोजीवेश्वरयोरैक्यज्ञानमहंब्रह्मेतिज्ञानं यदेति कर्मानुष्ठानात्पापक्षयेसमुत्पन्ने कषायेकर्मभिःपक्केततोज्ञानंप्रवर्ततइतिस्मृतेः अयंभावः जीवेश्वरयोरुपाधिभिन्नयोरैक्यंश्रुत्योच्यमानं बाधितंसत्तत्त्वंपदयोरुपाधिरहितेलक्षणयाबिंबभूतंशुद्धब्रह्मैक्यपरतयापर्यवस्यतीतिबोध्यं एतच्चाकरेविस्तरेणप्रपंचितं ब्रह्मैक्यज्ञानफलमाह तदेति तादृ

अवच्छिन्नस्यपूर्णेनएकत्वंप्रतिपाद्यते ॥ तत्त्वमस्यादिवाक्यैश्चसाभासस्याहमस्तथा ॥ ४९ ॥
ऐक्यज्ञानंयदोत्पन्नंमहावाक्येनचात्मनोः ॥ तदाऽविद्यास्वकार्यैश्चनश्यत्येवनसंशयः ॥ ५० ॥

शज्ञानेसतिनिर्धर्मकत्वेनचिन्मात्रतयातत्स्वरूपज्ञानात्तत्स्वरूपाज्ञानरूपाऽविद्यास्वकार्यैःप्रपंचैःसहनश्यत्येवनसंशयः एतेनभृष्टबीजवत्कार्यजननासामर्थ्यमेव तस्याज्ञानेनक्रियतइतिपक्षोऽपास्तः तदुक्तमाचार्यैः सोऽयमित्यादिवाक्येषुविरोधात्तदिदंतयोः । त्यागेनभागयोरेकआश्रयोलक्ष्यतेयथा । मायाविद्येविहायैवमुपाधीपरजीवयोः । अखंडंसच्चिदानंदंपरंब्रह्मैवलक्ष्यते । यथासोऽयंदेवदत्तइत्यादौपूर्वानुभूतत्वरूपतत्तायाइदानीमनुभूयमानत्वरूपेदंतायाश्चत्यागेनदेवदत्तस्वरूपमात्रंलक्ष्यते मायाबुद्धिसमष्टिरविद्याव्यष्टिरूपेतिबोध्यं अपरोक्षज्ञानंमननादिसंस्कृतांतःकरणादेव दृश्यतेत्वग्र्ययाबुद्ध्येतिस्मृतेः अग्र्ययामननादिसंस्कृतया शास्त्राचार्योपदेशशमदमादिसंस्कृतंमनआत्मदर्शनेकारणमितिगीताभाष्योक्तेश्चेतिदिक् उक्तंचनारदीये तत्त्वमस्यादिवाक्योत्थज्ञानंमोक्षस्यसाधनमिति । श्रुतिरपि तमेवविदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेये[1]नायेति ॥ ५० ॥

---

[1] मोक्षाय ।

ईदृशज्ञानस्यमुख्यंसाधनमाह एतदिति मद्भक्तइतिहेतुगर्भंविशेषणम् मद्भावोमत्सायुज्यम् भक्तेःकारणत्वदार्ढ्यायभक्तिव्यतिरेकेकार्यव्यतिरेकमाहमद्भक्तीति शास्त्रगर्तेषुशास्त्रबोधितक्रियाकलापरूपगर्तेषु ॥ ५१ ॥ ममात्मनःमद्रूपस्यचेतनस्य ॥ ५२ ॥ ५३ ॥ सर्ववेदांतसंग्रहंसर्ववेदांतप्रतिपाद्यार्थसारसंग्रहरूप

एतद्विज्ञायमद्भक्तोमद्भावायोपपद्यते ॥ मद्भक्तिविमुखानांहिशास्त्रगर्तेषुमुह्यताम् ॥ नज्ञानंनचमोक्षःस्यात्तेषांजन्मशतैरपि ॥५१॥ इदंरहस्यंहृदयंममात्मनोमयैवसाक्षात्कथितंतवानघ ॥ मद्भक्तिहीनायशठायनत्वयादातव्यमैंद्रादपिराज्यतोऽधिकम् ॥ ५२ ॥ श्रीमहादेवउवाच ॥ एतत्तेऽभिहितंदेविश्रीरामहृदयंमया ॥ अतिगुह्यतमंहृद्यंपवित्रंपापशोधनम् ॥ ५३ ॥ साक्षाद्रामेणकथितंसर्ववेदांतसंग्रहम् ॥ यःपठेत्सततंभक्त्यासमुक्तोनात्रसंशयः ॥ ५४ ॥ ब्रह्महत्यादिपापानिबहुजन्मार्जितान्यपि ॥ नश्यंत्येवनसंदेहोरामस्यवचनंयथा ॥ ५५ ॥ योऽतिभ्रष्टोऽतिपापीपरधनपरदारेषुनित्योद्यतोवास्तेयीब्रह्मघ्नमातापितृवधनिरतोयोगिवृंदापकारी ॥ यःसंपूज्याभिरामंपठतिचहृदयंरामचंद्रस्यभक्त्यायोगींद्रैरप्यलभ्यंपदमिहलभतेसर्वदेवैःसपूज्यम् ॥ ५६ ॥ ॥ इत्यध्यात्मरामायणेउमामहेश्वरसंवादेबालकांडेश्रीरामहृदयंनामप्रथमःसर्गः ॥ १ ॥ ॥ ७ ॥ ॥ पार्वत्युवाच ॥ धन्याऽस्म्यनुगृहीताऽस्मिकृतार्थाऽस्मिजगत्प्रभो ॥ विच्छिन्नोमेऽतिसंदेहग्रंथिर्भवदनुग्रहात् ॥ १ ॥

म् ॥ ५४ ॥ ५५ ॥ अतिभ्रष्टत्वोपपादकमतिपापीत्यादि सर्वदेवैःपूज्यंपदंब्रह्मलोकंसलभतइत्यन्वयः ॥ ५६ ॥ ॥ इतिश्रीमत्सकलराजविपदुद्धरणसमर्थे० अध्यात्मरामायणेसेतौबालकांडेप्रथमःसर्गः ॥ १ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ अथपार्वतीशिवोक्तमभिनंदति धन्याऽस्मीति अतिसंदेहग्रंथिःयदिरामःपरंब्रह्मतर्हिकथंतस्यशोकादियदिशोकादिमत्त्वाज्जीवःकथंतदोपास्यत्वमित्याकारोमहान्संदेहरूपोग्रंथिः विच्छिन्नःनिवृत्तः ॥ १ ॥

भवःसंसारस्तमपहंतिनाशयतितादृशंरामतत्त्वामृतरसायनंरामतत्त्वरूपममृतजनकंरसायनंपिबंत्यामेमनोनतृप्यति ॥ २ ॥ पुनर्विस्तरेणरामकथांपृच्छति श्रीरामस्येति स्फुटाक्षरमितिक्रियाविशेषणम् ॥ ३ ॥ अथमहादेवस्तांकथांविवक्षुस्तत्रश्रोतृप्रवृत्तयेतत्प्रशंसामाह शृण्विति आत्मसुइत्यध्यात्मंसर्वात्मसुअंतर्यामितयास्थितस्यरामस्यचरितंतद्वर्णनरूपंकाव्यम् ॥ ४ ॥ तापत्रयंआध्यात्मिकाधिभौतिकाधिदैविकाख्यंदुःखत्रयम् तत्राद्यंरोगादिजंकामक्रोधादिजंच द्वितीयंचोरादिनिमित्तम् तृतीयंग्रहाद्यावेशनिमित्तम् ॥५॥ कथांप्रस्तौति भूमिरिति रक्षोगणानांभारेणमग्नास्वाधारजलेइतिशेषः गोरूपंधृत्वादेवादिभिःसहाब्जासनस्यब्रह्मणोलोकंगत्वाब्रह्मणेउपगतंस्वयंप्राप्तंसर्वंव्यसनंप्राह सचमुहूर्तंध्यात्वासकलंदुःखकारणंतन्निवृत्तिकारणंचहृदाअवेत्अजानात् तत्रहेतुः अशेषात्मकत्वात् सर्वस्वसृज्यसमष्टिरूपत्वादित्यर्थः ॥ ६ ॥

त्वन्मुखाद्गलितंरामतत्त्वामृतरसायनम्॥ पिबंत्यामेमनोदेवनतृप्यतिभवापहम्॥ २॥ श्रीरामस्यकथात्वत्तःश्रुतासंक्षेपतोमया॥ इदानींश्रोतुमिच्छामिविस्तरेणस्फुटाक्षरम्॥ ३॥ श्रीमहादेवउवाच॥ शृणुदेविप्रवक्ष्यामिगुह्याद्गुह्यतरंमहत्॥ अध्यात्मरामचरितंरामेणोक्तंपुरामम॥ ४॥ तदद्यकथयिष्यामिशृणुतापत्रयापहम्॥ यच्छ्रुत्वामुच्यतेजंतुरज्ञानोत्थमहाभयात्॥ प्राप्नोतिपरमामृद्धिंदीर्घायुःपुत्रसंततिम्॥ ५॥ भूमिर्भारेणमग्ना[1]दशवदनमुखाशेषरक्षोगणानांधृत्वागोरूपमादौदिविजमुनिजनैःसाकमब्जासनस्य॥ गत्वालोकंरुदंतीव्यसनमुपगतंब्रह्मणेप्राहसर्वंब्रह्माध्यात्वामुहूर्तंसकलमपिहृदाऽवेदशेषात्मकत्वात्॥ ६॥

---

[1] रावणादिसकलराक्षसानां।

तस्मादिति अनंतरमितिशेषः तदनंतरंध्यानानंतरमित्यर्थः देव्याचभूम्याचसहितइतिशेषः अखिललोकहृत्स्थंसर्वांतर्यामिणमित्यर्थः सवाएषआत्माहृदीतिश्रुतेः अजरं एषमहानात्माअजरइतिश्रुतेः सर्वज्ञम् यःसर्वज्ञःससर्वविदितिश्रुतेः ईशम् एषसर्वेश्वरइतिश्रुतेः हरिम् हराम्यघंहिस्मर्तॄणांहविर्भागं[1]क्रतौतथा । वर्णश्चमेहरि[2]र्यस्मात्तस्माद्धरिरहंस्मृतइतिश्रुतेः श्रुतिसिद्धनिर्मलहरिविष्णुप्रभृतिपदयुक्तैःपुराणोद्भवैःस्तोत्रैरित्यर्थः भक्तिमूलिकैवचगद्गदवाणीभक्तिजत्वादेवानंदबाष्पाणांविमलत्वम् ॥ ७ ॥ सहस्रांशुसहस्रंसूर्यसहस्रम् ॥ ८ ॥ अकृतात्मनांज्ञानहीनानाम् तेजोराशित्वात्कथंचिद्दर्शनम् ॥ ९ ॥ १० ॥ पार्षदाःपार्षदगणाः ॥ ११ ॥

तस्मात्क्षीरसमुद्रतीरमगमद्ब्रह्माथदेवैर्वृतोदेव्याचाखिललोकहृत्स्थमजरंसर्वज्ञमीशंहरिम् ॥ अस्तौषीच्छ्रुतिसिद्धनिर्मलपदैःस्तोत्रैःपुराणोद्भवैर्भक्त्यागद्गदयागिरातिविमलैरानंदबाष्पैर्वृतः ॥ ७ ॥ ततःस्फुरत्सहस्रांशुसहस्रसदृशप्रभः ॥ आविरासीद्धरिःप्राच्यांदिशांव्यपनयंस्तमः ॥ ८ ॥ कथंचिद्दृष्टवान्ब्रह्मादुर्दर्शमकृतात्मनाम् ॥ इंद्रनीलप्रतीकाशंस्मितास्यंपद्मलोचनम् ॥ ९ ॥ किरीटहारकेयूरकुंडलैःकटकादिभिः ॥ विभ्राजमानंश्रीवत्सकौस्तुभप्रभयान्वितम् ॥ १० ॥ स्तुवद्भिःसनकाद्यैश्चपार्षदैःपरिवेष्टितम् ॥ शंखचक्रगदापद्मवनमालाविराजितम् ॥ ११ ॥ स्वर्णयज्ञोपवीतेनस्वर्णवर्णांबरेणच ॥ १२ ॥ श्रियाभूम्याचसहितंगरुडोपरिसंस्थितम् ॥ हर्षगद्गदयावाचास्तोतुंसमुपचक्रमे ॥ १३ ॥ ब्रह्मोवाच ॥ नतोस्मितेपदंदेवप्राणबुद्धींद्रियात्मभिः ॥ यच्चिंत्यतेकर्मपाशाद्धृदिनित्यंमुमुक्षुभिः ॥ १४ ॥ माययागुणमय्यात्वंसृजस्यवसिलुंपसि ॥ जगत्तेननतेलेपआनंदानुभवात्मनः ॥ १५ ॥

स्वर्णवर्णांबरंपीतांबरम् ॥ १२ ॥ १३ ॥ प्राणःक्रियाशक्तिप्रधानोंऽशः तेनकर्मेंद्रियसंग्रहः बुद्धींद्रियाणिश्रोत्रादीनिआत्मामनस्तैःकारणभूतैर्नतोऽस्मि कर्मपाशान्मुमुक्षुभिर्यत्पदंहृदिचिंत्यतेइत्यन्वयः ॥ १४ ॥ गुणमय्यासत्त्वरजस्तमोगुणयुक्तयामाययासचिवयाजगत्सृजसि तेनस्रष्टृत्वादिनातेलेपोहंस्रष्टेत्याद्यभिमानोन तत्रहेतुगर्भंविशेषणम् आनंदानुभवात्मनःआनंदाभिन्नानुभवरूपआत्मायस्यतस्य एवंचस्वस्वरूपापरोक्षेणसर्वत्रमिथ्यादृष्ट्यातदभिमानरहितइतिभावः ॥ १५ ॥

---

[1] हविर्भागदृष्टांतेनाघहरणेत्यावश्यकतासूचिता । [2] श्वेतः ।

दुष्टानांमलिनांतःकरणानाम् शुद्धात्मताशुद्धांतःकरणता तेयशसितवगुणकीर्तने ॥ १६ ॥ सात्त्वतैर्भक्तैःवृतोंऽतर्हृदयेसद्योदृष्टस्तवांघ्रिर्मेचित्तदोषापनुत्तयेऽस्त्वितिशेषः ॥ १७ ॥ स्वार्थसिद्ध्यर्थंस्वकर्तव्यसृष्ट्यादिसिद्ध्यर्थं ज्ञानिभिःज्ञानेच्छुभिः ॥ १८ ॥ सपत्निवत् आर्षोंह्रस्वः सपत्नीवदित्यर्थः ॥ १९ ॥ यतःस्वचरणभक्तेषुतवलक्ष्मीतोऽप्यधिकाभक्तिःप्रीतिःअतःसारवेदिनस्त्वद्भक्तास्त्वच्चरणयोर्भक्तिमेववांछंति ॥ २० ॥ अतइति यतस्तेभक्तिरेवसंसाररोगभेषजंमतइत्यन्वयः

तथाशुद्धिर्नदुष्टानांदानाध्ययनकर्मभिः ॥ शुद्धात्मतातेयशसिसदाभक्तिमतांयथा ॥ १६ ॥ अतस्तवांघ्रिर्मेदृष्टश्चित्तदोषापनुत्तये ॥ सद्योंऽतर्हृदयेनित्यंमुनिभिःसात्त्वतैर्वृतः ॥ १७ ॥ ब्रह्माद्यैःस्वार्थसिद्ध्यर्थमस्माभिःपूर्वसेवितः ॥ अपरोक्षानुभूत्यर्थंज्ञानिभिर्हृदिभावितः ॥१८॥ तवांघ्रिपूजानिर्माल्यतुलसीमालयाविभो ॥ स्पर्धतेवक्षसिपदंलब्ध्वापिश्रीः सपत्निवत् ॥ १९ ॥ अतस्त्वत्पादभक्तेषुतवभक्तिःश्रियोऽधिका ॥ भक्तिमेवाभिवांछंतित्वद्भक्ताःसारवेदिनः ॥ २० ॥ अतस्त्वत्पादकमलेभक्तिरेवसदाऽस्तुमे ॥ संसारामयतप्तानांभेषजंभक्तिरेवते ॥ २१ ॥ इतिब्रुवंतंब्रह्माणंबभाषेभगवान्हरिः ॥ किंकरोमीतितंवेधाःप्रत्युवाचातिहर्षितः ॥ २२ ॥ भगवन्रावणोनामपौलस्त्य[1]तनयोमहान् ॥ राक्षसानामधिपतिर्मद्दत्तवरदर्पितः ॥ २३ ॥ त्रिलोकींलोकपालांश्चबाधतेविश्वबाधकः ॥ मानुषेणमृतिस्तस्यमयाकल्याणकल्पिता ॥२४॥ अतस्त्वंमानुषोभूत्वाजहिदेवरिपुंप्रभो ॥ श्रीभगवानुवाच ॥ कश्यपस्यवरोदत्तस्तपसातोषितेनमे ॥२५॥

॥ २१ ॥ ब्रह्माणंहरिःकिंकरोमीतिबभाषे अथतंहरिंवेधाः प्रत्युवाचेतिसंबंधः ॥ २२ ॥ रावणइति रावयां[2]मासलोकान्यस्तस्माद्रावणउच्यतेइतिभारतोक्तेः मयाब्रह्मणादत्तेनवरेणदर्पितोऽहंकृतः वरश्चमनुष्यातिरिक्तावध्यत्वरूपः ॥ २३ ॥ तदेवाह मानुषेणेति ॥ २४ ॥ कश्यपस्यतपसातोषितेनमेमयातस्मैवरोदत्तः यत्त्वंयाचिष्यसितत्तुभ्यंदास्यामीतिकृतवरदानप्रतिज्ञइत्यर्थः ॥ २५ ॥

---

१ विश्रवसः । २ इदमन्वर्थंनाम विश्रवसोपत्यमित्यर्थेणि विश्रवसोभियुक्तोक्तरवणादेशेरावणइत्यपत्यप्रत्ययांतमपि ।

ततस्तेनाहंपुत्रभावाययाचितोमयाचतत्तथेत्यंगीकृतमित्यर्थः ॥ २६ ॥ अहंतस्यपुत्रतामेत्यपुत्रतांप्राप्स्यामीतिसंकल्प्य कौसल्यायामितरयोःसुमित्राकैके
य्योरहमेवात्मानंचतुर्धाचतुःप्रकारावयवसंस्थानैरामलक्ष्मणभरतशत्रुघ्नेतिचतुःप्रकारनामभिश्चसृजामिस्रक्ष्यामि वर्तमानसामीप्येलट् ॥ २७ ॥ योगमायेति

याचितःपुत्रभावायतथेत्यंगीकृतंमया ॥ सइदानींदशरथोभूत्वातिष्ठतिभूतले ॥ २६ ॥ तस्याहंपुत्रतामेत्यकौसल्यायां
शुभेदिने ॥ चतुर्धात्मानमेवाहंसृजामीतरयोःपृथक् ॥ २७ ॥ योगमायाऽपिसीतेतिजनकस्यगृहेतदा ॥ उत्पत्स्यतेतया
सार्धंसर्वंसंपादयाम्यहम् ॥ २८ ॥ इत्युक्त्वांऽतर्दधेविष्णुर्ब्रह्मादेवानथाब्रवीत् ॥ ब्रह्मोवाच ॥ विष्णुर्मानुषरूपेणभविष्य
तिरघोःकुले ॥ २९ ॥ यूयंसृजध्वंसर्वेऽपिवानरेष्वंशसंभवान् ॥ विष्णोःसहायंकुरुतयावत्स्थास्यतिभूतले ॥ ३० ॥ इतिदे
वान्समादिश्यसमाश्वास्यचमेदिनीम् ॥ ययौब्रह्मास्वभवनंविज्वरःसुखमास्थितः ॥ ३१ ॥ देवाश्चसर्वेहरिरूपधारिणः
स्थिताःसहायार्थमितस्ततोहरेः ॥ महाबलाःपर्वतवृक्षयोधिनःप्रतीक्षमाणाभगवंतमीश्वरम् ॥ ३२ ॥ ॥ इतिश्रीमदध्या
त्मरामायणेउमामहेश्वरसंवादेबालकांडेद्वितीयःसर्गः ॥ २ ॥ ॥ ७ ॥ ॥ श्रीरामचंद्रार्पणमस्तु ॥ श्रीमहादेवउवाच ॥
अथराजादशरथःश्रीमान्सत्यपरायणः ॥ अयोध्याधिपतिर्वीरःसर्वलोकेषुविश्रुतः ॥ १ ॥

योगोमत्संकल्पस्तद्वशवर्तिनीमायेत्यर्थः नाहंप्रकाशःसर्वस्ययोगमायासमावृतइतिगीतोक्तेः तयासार्धंतांसहकारिणींप्राप्य ॥ २८ ॥ २९ ॥ अंशसंभवान्स्व
स्वांशसंभवान्वानरानित्यर्थः ॥ ३० ॥ ३१ ॥ इतस्ततःपर्वतवनेषु ॥ ३२ ॥ इतिश्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिबि० श्रीरामवर्मणःकृतौअध्यात्मरा
मायणेसेतौबालकांडेद्वितीयःसर्गः ॥ २ ॥ ॥ ७ ॥ ॥ अथरामजन्माह अथेति ॥ १ ॥

॥ २ ॥ सर्वंदुःखायेति मनुष्यलोकःपुत्रेणैवजय्योनान्येनकर्मणेतिश्रुतेः ॥ ३ ॥ ४ ॥ शांताभर्तारंशांतालोमपाददशरथस्यांगपतेरेतद्दशरथमित्रस्यकन्यानेनरा
ज्ञाततोलब्धास्वदुहितृत्वेनकल्पितेत्याख्यायिका पुत्रकामस्यकर्तव्येष्टिःपुत्रकामेष्टिः ॥ ५ ॥ मुनिंऋष्यशृंगं मुनिभिर्वसिष्ठाद्यैः ॥ ६ ॥ तप्तजांबूनदंकृतमला

सोऽनपत्यत्वदुःखेनपीडितोगुरुमेकदा ॥ वसिष्ठंस्वकुलाचार्यमभिवाद्येदमब्रवीत् ॥ २ ॥ स्वामिन्पुत्राःकथंमेस्युःसर्वल
क्षणलक्षिताः ॥ पुत्रहीनस्यमेराज्यंसर्वंदुःखायकल्पते ॥ ३ ॥ ततोऽब्रवीद्वसिष्ठस्तंभविष्यंतिसुतास्तव ॥ चत्वारःसत्त्वसंप
न्नालोकपालाइवापराः ॥ ४ ॥ शांताभर्तारमानीयऋष्यशृंगंतपोधनम् ॥ अस्माभिःसहितःपुत्रकामेष्टिंशीघ्रमाचर
॥ ५ ॥ तथेतिमुनिमानीयमंत्रिभिःसहितःशुचिः ॥ यज्ञकर्मसमारेभेमुनिभिर्वीतकल्मषैः ॥ ६ ॥ श्रद्धयाहूयमानेऽग्नौतप्त
जांबूनदप्रभः ॥ पायसंस्वर्णपात्रस्थंगृहीत्वोवाचहव्यवाट् ॥ ७ ॥ गृहाणपायसंदिव्यंपुत्रीयंदेवनिर्मितम् ॥ लप्स्यसेपर
मात्मानंपुत्रत्वेननसंशयः ॥ ८ ॥ इत्युक्त्वापायसंदत्त्वाराज्ञेसोऽतर्दधेऽनलः ॥ ववंदेमुनिशार्दूलौराजालब्धमनोरथः
॥ ९ ॥ वसिष्ठऋष्यशृंगाभ्यामनुज्ञातोददौहविः ॥ कौसल्यायैसकैकेय्यैअर्धमर्धंप्रयत्नतः ॥ १० ॥

प्रहरणंस्वर्णंतद्वत्कांतिः हव्यवाडग्निः अयमेवप्राजापत्यंनरंविद्धिमामिहाभ्यागतंनृपेतिवाल्मीकीयेप्राजापत्यशब्देनोक्तः ॥ ७ ॥ पुत्रीयंपुत्रायहितम् ॥ ८ ॥ मु
निशार्दूलौवसिष्ठऋष्यशृंगौ ॥ ९ ॥ १० ॥

जगृध्नुःभृशंतदिच्छावती गृधुअभिकांक्षायामित्यतोयङ्लुगंतादागमशास्त्रानित्यत्वेनरुगभावेत्रसिगृधिधृषिक्षिपेःक्नुरितिक्नौरूपम् पौत्रिकंचरुमितिषष्ठ्यभाव आर्षः पुत्रःप्रयोजनंयस्यतादृशंचरुमित्यर्थः स्वभागार्धंस्वशब्दआत्मीयवाची स्वीयस्यभागःस्वभागस्तदर्धंस्वदत्तस्यचतुर्थांशमित्यर्थः एवमग्रेऽपि वाल्मीकीयेऽपि कौसल्यायैनरपतिःपायसार्धंददौतदा । अर्धादर्धंददौचापिसुमित्रायैनराधिपः । कैकेय्यैचावशिष्टार्धंददौपुत्रार्थकारणात् । प्रददौचावशिष्टार्धंपायसस्यामृतोपमम् । अनुचिंत्यसुमित्रायैपुनरेवमहीपतिरितिश्लोकयोःकौसल्यायैदत्तार्धस्यार्धादर्धंचतुर्थांशरूपंसुमित्रायैददौ कौसल्ययादापितवानित्यर्थःकार्यः अर्धादित्यत्रकस्यार्धादित्याकांक्षायामुपस्थितकौसल्यादत्तपायसार्धान्वयस्यैवौचित्यात् अंतर्भावितण्यर्थत्वेमानंचैतदेकवाक्यतैव एवंकैकेय्यैकौसल्यादत्तार्धादवशिष्टमर्धंददौ ततःकौसल्यादत्तावशिष्टस्यकैकेय्यैदत्तस्ययदर्धंतदर्धंविचार्यपुनरपिसुमित्रायैददौप्रापयामासेत्यर्थः अत्रचार्धपदावृत्तिर्बोध्या एवंहिएतद्ग्रंथेनतस्यैकवाक्यताभवति तत्तद्दत्तभागजन्यस्यतत्तत्पुत्राधीनतौचित्येनैवमेवोचितंसेव्यसेवकभावलाभार्थम् ततस्ततोन्यूनांशत्वस्यलक्ष्मणशत्रुघ्नयोरौ

ततःसुमित्रासंप्राप्ताजगृध्नुःपौत्रिकंचरुम् ॥ कौसल्यातुस्वभागार्धंददौतस्यैमुदान्विता ॥ ११ ॥

चित्याच्चात्रत्यस्वभागार्धमितियथाश्रुतंनव्याख्यातम् कालिदासोऽपि सतेजोवैष्णवंपत्न्योर्विभेजेचरुसंज्ञितम् । द्यावापृथिव्योःप्रत्यग्रमहर्पतिरिवातपम् । अर्चिंतातस्यकौसल्याप्रियाकेकयवंशजा । अतःसंभावितांताभ्यांसुमित्रामैच्छदीश्वरः । तेबहुज्ञस्यचित्तज्ञेपत्न्यौपत्युर्महीक्षितः । चरोरर्धार्धभागाभ्यांतामयोजयतामुभे । साहिप्रणयवत्यासीत्सपत्न्योरुभयोरपीत्याह चरोरर्धार्धभागाभ्यामित्यस्यस्वस्वलब्धचरुभागाभ्यामित्यर्थः एवंचरामभरतौत्रित्र्यंशौ लक्ष्मणशत्रुघ्नावष्टमांशावितिसिद्धम् वाल्मीकीयव्याख्यातारौकतकाचार्यश्रीरामाचार्यावप्येवमेवोचतुः अन्येतुतद्व्याख्यातारःकौसल्यायैसंपूर्णपायसार्धंददौ ततःपात्रस्थादर्धादर्धंसर्वपायसचतुर्थांशंसुमित्रायैदत्तवान्स्वयमेवततःपात्रेऽवशिष्टस्यचतुर्थांशस्यार्धमष्टमांशंकैकेय्यैदत्तवान् ततःपुनरवशिष्टमर्धमष्टमांशरूपंपुनरपिसुमित्रायैदत्तवानितियथाश्रुतग्राहिणोव्याचक्षतेतेषामेतद्विरोधोरामलक्ष्मणयोरेवभरतशत्रुघ्नयोरेवैकवाक्यतायाबीजालाभश्चावशिष्टार्धपदेक्वचित्षष्ठीतत्पुरुषः क्वचित्कर्मधारयइतिवैषम्यंच ॥ ११ ॥

स्वभागार्धमितिप्राग्वत् ॥ १२ ॥ १३ ॥ मधुमासेचैत्रे सितेशुक्ले कर्कटेकर्कलग्ने पुनर्वस्वृक्षसहितेपुनर्वसुनक्षत्रसहितेइतिकर्कलग्नविशेषणम् ग्रहपं
चकेचंद्रबुधव्यतिरिक्तेरविभौमगुरुभृगुशनिरूपे तदुच्चस्थानानिचक्रमेणमेषमकरकर्कमीनतुलाख्यानि ॥ १४ ॥ सर्वग्रहास्तोदयस्यर व्यधीनत्वात्तदुच्च
स्थानंस्फुटयति मेषमिति तेनसर्वेषामनस्तगत्वंसूचितम् पुष्पवृष्टिसमाकुलेकालेइत्यर्थः ॥ १५ ॥ तत्रकौसल्यानुग्रहायप्रथमंयेनरूपेणप्रादुर्भूतस्तद्रूप

कैकेयीचस्वभागार्धददौप्रीतिसमन्विता ॥ उपभुज्यचरुंसर्वाःस्त्रियोगर्भसमन्विताः ॥ १२ ॥ देवताइवरेजुस्ताःस्वभा
साराजमंदिरे ॥ दशमेमासिकौसल्यासुषुवेपुत्रमद्भुतम् ॥ १३ ॥ मधुमासेसितेपक्षेनवम्यांकर्कटेशुभे ॥ पुनर्वस्वृक्ष
सहितेउच्चस्थेग्रहपंचके ॥ १४ ॥ मेषंपूषणिसंप्राप्तेपुष्पवृष्टिसमाकुले ॥ आविरासीज्जगन्नाथःपरमात्मासनातनः
॥ १५ ॥ नीलोत्पलदलश्यामःपीतवासाश्चतुर्भुजः ॥ जलजारुणनेत्रांतःस्फुरत्कुंडलमंडितः ॥ १६ ॥ सहस्रार्कप्रतीका
शःकिरीटीकुंचितालकः ॥ शंखचक्रगदापद्मवनमालाविराजितः ॥ १७ ॥ अनुग्रहाख्यहृत्स्थेंदुसूचकस्मितचंद्रिकः ॥
करुणारससंपूर्णविशालोत्पललोचनः ॥ श्रीवत्सहारकेयूरनूपुरादिविभूषणः ॥ १८ ॥ दृष्ट्वातंपरमात्मानंकौसल्यावि
स्मयाकुला ॥ हर्षाश्रुपूर्णनयनानत्वाप्रांजलिरब्रवीत् ॥ १९ ॥ कौसल्योवाच ॥ देवदेवनमस्तेऽस्तुशंखचक्रगदाधर ॥
परमात्माऽच्युतोऽनंतःपूर्णस्त्वंपुरुषोत्तमः ॥ २० ॥

माह नीलोत्पलेति ॥ १६ ॥ १७ ॥ अनुग्रहाख्येति भक्तानुग्रहाख्योयोहृदयस्थइंदुस्तस्यसूचिकास्मितरूपाचंद्रिकायस्यसः स्मितंच ईषद्विकसि
तैर्गल्लैःकटाक्षैःसौष्ठवान्वितैः अलक्षितद्विजंधीरमुत्तमानांस्मितंभवेदितिलक्षणम् ॥ १८ ॥ १९ ॥ परमात्माशुद्धबुद्धमुक्तस्वभावः अच्युतःस्वस्वरूपा
त्कदाऽपिनच्युतः शाश्वतंशिवमच्युतमितिश्रुतेः अनंतःअनंतगुणःनित्यत्वादंतरहितइति पूर्णः देशकालापरिच्छेद्यः पुरुषेभ्यउत्तमः सर्वाधिष्ठानत्वात् ॥ २० ॥

---

१ वक्रकेशः .

वाचांबुद्ध्यादीनामिंद्रियाणांचागोचरंवदंति यतोवाचोनिवर्तंतेअप्राप्यमनसासहेत्यादिश्रुतयः वागादिसर्वद्रष्टृत्वाच्चनतासांविषयः नहिघटादिप्रकाशकोदीपोघटादिविषयोभवति अतएवत्वामतींद्रियंवेदवादिनोवेदज्ञावदंति तेत्वांसत्तामात्रंसर्वत्रस्वसंबंधात्सदितिव्यवहारोपपादकं सर्वाःप्रजाःसदायतनाइतिश्रुतेः ज्ञानैकविग्रहंसत्यंज्ञानमितिश्रुतेर्वदंति ॥ २१ ॥ त्वमिति त्वमेवमाययासत्त्वादिगुणसंयुक्तस्तत्तद्गुणसंयुक्तब्रह्मविष्णुरुद्रात्मकःसन्सृष्ट्यादिकरोषि तत्ररजःप्रधानोब्रह्मा सत्त्वप्रधानोविष्णुः तमःप्रधानोरुद्रः विष्णोर्दैत्यादिहंतृत्वमपिपालनार्थमेव दुष्टनिग्रहंविनाशिष्टपालनायोगात् परमार्थतस्तुनिर्गुणएवत्वमित्याह तुर्यएवेति तत्तद्गुणसंयुक्तोक्तमूर्तित्रयापेक्षयाचतुर्थइत्यर्थः यद्वा जाग्रत्स्वप्नसुषुप्त्यवस्थासुविश्वतैजसप्राज्ञेभ्यस्तुर्यइत्यर्थः नबहिःप्रज्ञंनांतःप्रज्ञंनोभयतःप्रज्ञमितिश्रुतेः इयंहि

वदंत्यगोचरंवाचांबुद्ध्यादीनामतींद्रियम् ॥ त्वांवेदवादिनःसत्तामात्रंज्ञानैकविग्रहम्[1] ॥ २१ ॥ त्वमेवमाययाविश्वंसृजस्यवसिहंसिच ॥ सत्त्वादिगुणसंयुक्तस्तुर्य[2]एवामलःसदा ॥ २२ ॥ करोषीवनकर्तात्वंगच्छसीवनगच्छसि ॥ नशृणोषिशृणोषीवपश्यसीवनपश्यसि ॥ २३ ॥ अप्राणोह्यमनाःशुद्धइत्यादिश्रुतिरब्रवीत् ॥ समःसर्वेषुभूतेषुतिष्ठन्नपिनलक्ष्यसे ॥ २४ ॥

क्रमेणजाग्रत्स्वप्नसुषुप्त्यवस्थानिषेधति अतएवसदाऽमलःमायागुणास्पृष्टत्वादित्यर्थः ॥ २२ ॥ अमलत्वंसूचितंनिर्विकारत्वमेवस्फुटयति करोषीवेति मायागतकृतिगत्यादिभिस्तद्वानिवभासि वस्तुतोविकारहीनत्वान्नकर्तेत्यादि अकुर्वन्सर्वकृच्छुद्धस्तिष्ठन्नत्येतिधावतः। माययासर्वशक्तित्वादजःसबहुधामतइत्यभियुक्तोक्तेः ॥ २३ ॥ निर्विकारत्वेहेतुःश्रुतिदर्शितइत्याह अप्राणइति दिव्योह्यमूर्तःपुरुषःसबाह्याभ्यंतरोह्यजः । अप्राणोह्यमनाःशुद्धोक्षरात्परतरःपरइतिमुंडकश्रुतिः प्राणाद्युपाधिरहितः अतएवकृतिगत्यादिरहितइतिभावः अक्षरमत्रमायाततःपरतरःतद्गुणास्पृष्टःसर्वतःपरउत्कृष्टइतिश्रुत्यर्थः सर्वभूतेषुसमःसन्घटइत्यादिप्रतीतेःसर्वत्रानुस्यूतत्वात् अतःसर्वत्रतिष्ठन्नपि ॥ २४ ॥

---

१ शरीरं . २ सत्वादिगुणत्रयातीतश्चतुर्थः .

अज्ञानध्वांतचित्तानां अज्ञानरूपांधकारवच्चित्तैः शेषेषष्ठी तैर्नलक्ष्यसे सुमेधसांतत्त्वज्ञानांव्यक्तएव दृश्यतेत्वग्र्ययाबुद्ध्यासूक्ष्मयासूक्ष्मदर्शिभिरितिश्रुतेः यस्य तवजठरेब्रह्मांडाःपरमाणवइवदृश्यंते ॥ २५ ॥ सत्वंममोदरसंभूतइतिलोकान्मममाहात्म्यंविडंबसेख्यापयसि एतत्सर्वंभक्तपारवश्यादित्याह भक्तेष्विति ॥ २६ ॥ यद्यपितेमाययाऽपत्यादिषुमग्नातद्विषयोत्कटेच्छावतीसंसारसागरेभ्रमामितथाऽप्यद्यतेपादमूलमागतातरिष्यामीतिमन्येइतिशेषः ॥ २७ ॥ एतत्त्वद्रूपंशंखचक्र

अज्ञानध्वांतचित्तानांव्यक्तएवसुमेधसाम्[1] ॥ जठरेतवदृश्यंतेब्रह्मांडाःपरमाणवः ॥ २५ ॥ त्वंममोदरसंभूतइतिलोकान्वि
डंबसे ॥ भक्तेषुपारवश्यंतेदृष्टंमेऽद्यरघूत्तम ॥ २६ ॥ संसारसागरेमग्नापतिपुत्रधनादिषु ॥ भ्रमामिमाययातेऽद्यपादमूलमु
पागता ॥ २७ ॥ देवत्वद्रूपमेतन्मेसदातिष्ठतुमानसे ॥ आवृणोतुनमांमायातवविश्वविमोहिनी ॥ २८ ॥ उपसंहरविश्वा
त्मन्नदोरूपमलौकिकम् ॥ दर्शयस्वमहानंदबालभावंसुकोमलम् ॥ २९ ॥ ललितालिंगनालापैस्तरिष्याम्युत्कटंतमः ॥
श्रीभगवानुवाच ॥ यद्यदिष्टंतवास्त्यंबतत्तद्भवतुनान्यथा ॥ ३० ॥ अहंतुब्रह्मणापूर्वंभूमेर्भारापनुत्तये ॥ प्रार्थितोराव
णंहंतुंमानुषत्वमुपागतः ॥ ३१ ॥ त्वयादशरथेनाहंतपसाऽऽराधितःपुरा ॥ मत्पुत्रत्वाभिकांक्षिण्यातथाकृतमनिंदिते ॥ ३२ ॥

गदाधरत्वविशिष्टं आशास्यांतरमाह आवृणोत्विति ॥ २८ ॥ उपसंहारेहेतुरलौकिकमिति सर्वलोकैर्द्रष्टुमशक्यंतेजोमयत्वादित्यर्थः ॥ २९ ॥ ननुत्वत्तारणार्थमेवंरूपपरिग्रहइतिचेत्तत्राह ललितेति तमःअज्ञानमूलंसंसारम् ॥ ३० ॥ त्वदिष्टरूपभवनेहेतुमाह अहंत्विति मानुषत्वमुपागतःमानुषत्वंप्राप्तुंकृतमतिः ॥ ३१ ॥ तर्हिप्रथममेवकिंतथारूपंनकृतमतआह त्वयेति अहंपुत्रोयस्यास्तद्भावोमत्पुत्रत्वमतस्तत्प्रकटीकर्तुंतथाकृतमित्यर्थः ॥ ३२ ॥

---

[1] नित्यमसिच्प्रजामेधयोरित्यनेनासिचिरूपं.

प्राक्तनतपसःफलभूतमेतद्रूपंत्वयादृष्टम् ननुत्वद्दर्शनमात्रंनपुरुषार्थोऽतआह मदिति एवंरूपस्यममदर्शनमन्यैस्तपोहीनैर्दुर्लभंविमोक्षायकल्पते चित्तशुद्धिद्वारातत्त्वमस्यादिवाक्यज्ञानसंपादकत्वेनेतिभावः ॥ ३३ ॥ ३४ ॥ भक्तानुग्रहार्थंतद्ध्येयंमायिकंभगवतोरूपमाह बालत्वेऽपीति ॥ ३५ ॥ लालिताखिललोकपःस्वावतरणेनलालितास्तोषिताअखिललोकपाइंद्रादयोयेनसः पुत्रोद्भवःपुत्रोत्पत्तिस्तद्रूपमुत्सवम् ॥ ३६ ॥ राजीवंकमलम् गुरुणेतिकरणेतृतीया जातकर्मा

रूपमेतत्त्वयादृष्टंप्राक्तनंतपसःफलम् ॥ मद्दर्शनंविमोक्षायकल्पतेत्यन्यदुर्लभम् ॥ ३३ ॥ संवादमावयोर्यस्तुपठेद्वाशृणुयादपि ॥ सयातिममसारूप्यंमरणेमत्स्मृतिंलभेत् ॥ ३४ ॥ इत्युक्त्वामातरंरामोबालोभूत्वारुरोदह ॥ बालत्वेऽपींद्रनीलाभोविशालाक्षोतिसुंदरः ॥ ३५ ॥ बालारुणप्रतीकाशोलालिताखिललोकपः ॥ अथराजादशरथःश्रुत्वापुत्रोद्भवोत्सवम् ॥ आनंदार्णवमग्नोऽसावाययौगुरुणासह ॥ ३६ ॥ रामंराजीवपत्राक्षंदृष्ट्वाहर्षाश्रुसंप्लुतः ॥ गुरुणाजातकर्माणिकर्तव्यानिचकारसः ॥ ३७ ॥ कैकेयीचाथभरतमसूतकमलेक्षणा ॥ सुमित्रायांयमौजातौपूर्णेंदुसदृशाननौ ॥ ३८ ॥ तदाग्रामसहस्राणिब्राह्मणेभ्योमुदाददौ ॥ सुवर्णानिचरत्नानिवासांसिसुरभीःशुभाः ॥ ३९ ॥ यस्मिन्रमंतेमुनयोविद्ययाऽज्ञानविप्लवे ॥ तंगुरुःप्राहरामेतिरमणाद्रामइत्यपि ॥ ४० ॥ भरणाद्भरतोनामलक्ष्मणंलक्षणान्वितम् ॥ शत्रुघ्नंशत्रुहंतारमेवंगुरुरभाषत ॥ ४१ ॥

णि बहुवचनेननामकरणपर्यंतकर्तव्यषष्ठीपूजादिसंग्रहः ॥ ३७ ॥ ३८ ॥ सुरभीर्गाः ॥ ३९ ॥ अथनामकरणेनाम्नामन्वर्थत्वंदर्शयति यस्मिन्निति विद्ययातत्त्वज्ञानेनअज्ञानविप्लवेअज्ञाननाशेतन्निमित्तंयस्मिन्योगिनोरमंतेइत्येकः योगांतरमाह रमणाद्भक्तानांवपुःसौंदर्येणरमणाद्रामइत्यपियोगइतिशेषः रमणंरामःभावेघञ् तंकरोतिरामयति तत्करोतीतिणिच् रामयतीतिरामः णिजंतादच् तथाचभक्तान्रमयतीतिफलितोर्थः ॥ ४० ॥ ४१ ॥

---

१ युग्मौ . २ लक्षेरट्च चान्मुट् इत्यनेन लक्षदर्शनांकनयोरित्यस्मान्नप्रत्ययेसाधु . लक्ष्म्याअच्चेतिपामादित्वान्नप्रत्ययेवासाधु .

पायसांशानुसारतःकौसल्यापायसांशत्वाल्लक्ष्मणोरामानुचरः कैकेयीपायसांशत्वाच्छत्रुघ्नोभरतानुचरइत्यर्थः ॥ ४२ ॥ ४३ ॥ स्वर्णमयाश्वत्थपर्णस्यप्रांतेसंयुक्तानियानिमुक्ताफलानितैःप्रभाशोभायस्यतम् रत्नमणीनांव्रातःसमूहस्तन्मध्येवर्तमानंयद्द्वीपिनखंव्याघ्रनखंतेनांचितंमंडितम् यत्तुव्याघ्रव्यालगजान्सिंहानश्वोष्ट्रमहीषानृषभम्। भूषणेषुत्यजेदष्टौयदीच्छेच्चिरजीवितमिति तत्तुभूषणेषुव्याघ्राद्याकारचित्रनिषेधपरंनतुमुख्यव्याघ्राद्यवयवनिषेधकमित्याहुः ॥ ४४ ॥

लक्ष्मणोरामचंद्रेणशत्रुघ्नोभरतेनच ॥ द्वंद्वीभूयचरंतौतौपायसांशानुसारतः ॥ ४२ ॥ रामस्तुलक्ष्मणेनाथविचरन्बाललीलया ॥ रमयामासपितरौचेष्टितैर्मुग्ध[1]भाषितैः ॥ ४३ ॥ भालेस्वर्णमया[2]श्वत्थपर्णमुक्ताफलप्रभम् ॥ कंठेरत्नमणिव्रातमध्यद्वीपिनखांचितम् ॥ ४४ ॥ कर्णयोःस्वर्णसंपन्नरत्नार्जुनसटालुकम् ॥ सिंजानमणिमंजीरकटिसूत्रांगदैर्वृतम् ॥ ४५ ॥ स्मितवक्त्राल्पदशनमिंद्रनीलमणिप्रभम् ॥ अंगणेरिंगमाणंतंतर्णकाननुसर्वतः ॥ ४६ ॥ दृष्ट्वादशरथोराजाकौसल्यामुमुदेतदा ॥ भोक्ष्यमाणोदशरथोराममेहीतिचासकृत् ॥ ४७ ॥ आह्वयत्यतिहर्षेणप्रेम्णानायातिलीलया ॥ आनयेतिचकौसल्यामाहसास्मितासुतम् ॥ ४८ ॥ धावत्यपिनशक्नोतिस्प्रष्टुंयोगिमनोगतिम् ॥ प्रहसन्स्वयमायातिकर्दमांकितपाणिना ॥ ४९ ॥

स्वर्णैसंपन्नानिघटितानिरत्नानियस्मिंस्तत्अर्जुनवृक्षस्यसटालुकमपक्कफलंतदाकारंभूषणंयस्य रत्नार्जुनशलाटुकमितिपाठांतरम् अर्थस्तुल्यः सिंजानाःशब्दयुक्तायेमणयस्तद्युक्तैःमंजीरकटिसूत्रांगदैर्वृतम् मंजीरःपाद[3]भूषणम् अंगदोबाहुभूषणम् ॥ ४५ ॥ स्मितंस्मितयुक्तंवक्त्रंयस्यसचासावल्पदशनश्चतम् तर्णकानूगोवत्साननुतत्पुच्छप्रांतधरणपूर्वंसर्वतोरिंगमाणंपरितोबालगत्याखेलंतम् ॥ ४६ ॥ दृष्ट्वेति तादृशंतक्रीडामित्यर्थः ॥ ४७ ॥ प्रेम्णाआहूतोपीतिशेषः लीलयाक्रीडासक्त्यानायातीत्यर्थः ॥ ४८ ॥ योगिमनोगतिंयोगिमनोविषयम् कर्दमांकितपाणिनोपलक्षितइतिशेषः ॥ ४९ ॥

---

[1] सुंदरभाषणैः . [2] पिंपळपान इतिभाषायां . [3] नूपुरमित्यर्थः .

॥ ५० ॥ पुत्रादिकल्याणमुद्दिश्यसधवाभ्योदीयमानभक्ष्यविशेषवायनानिप्रकुर्वतीबभूवेतिशेषः कर्णशष्कुलीकर्णपूरादयोभक्ष्यविशेषाः वर्षवृद्धिर्वर्षारं
भदिनकर्तव्यंकर्म ॥ ५१ ॥ गृहकृत्यत्यागकारणंचापल्यमेवदर्शयति एकदेति मातरमंतिकेमातुःसमीपेइत्यर्थः द्वितीयाछांदसी ॥ ५२ ॥ अहनत्

किंचिद्गृहीत्वाकवलंपुनरेवपलायते॥ कौसल्याजननीतस्यमासिमासिप्रकुर्वती॥५०॥ वायनानिविचित्राणिसमलंकृ
त्यराघवम्॥ अपूपान्मोदकान्कृत्वाकर्णशष्कुलिकास्तथा॥ कर्णपूराश्चविविधान्वर्षवृद्धौचवायनम्॥५१॥ गृहकृत्यं
तयात्यक्तंतस्यचापल्यकारणात्॥ एकदारघुनाथोऽसौगतोमातरमंतिके॥५२॥ भोजनंदेहिमेमातर्नश्रुतंकार्यसक्तया॥
ततःक्रोधेनभांडानिलगुडेनाहनत्तदा॥५३॥ शिक्यस्थंपातयामासगव्यंचनवनीतकम्॥ लक्ष्मणायददौरामोभरताय
यथाक्रमम्॥५४॥ शत्रुघ्नायददौपश्चाद्दधिदुग्धंतथैवच॥ सूदेनकथितेमात्रेहास्यंकृत्वाप्रधावति॥५५॥ आगतांतां
विलोक्याथततःसर्वैःपलायितम्॥ कौसल्याधावमानाऽपिप्रस्खलंतीपदेपदे॥५६॥ रघुनाथंकरेधृत्वाकिंचिन्नोवाचभा
मिनी॥ बालभावंसमाश्रित्यमंदंमंदंरुरोदह॥५७॥ तेसर्वेलालितामात्रागाढमालिंग्ययत्नतः॥ एवमानंदसंदोहजगदा
नंदकारकः॥५८॥ मायाबालवपुर्धृत्वारमयामासदंपती॥ अथकालेनतेसर्वेकौमारंप्रतिपेदिरे॥५९॥ उपनीतावसिष्ठेन
सर्वविद्याविशारदाः॥ धनुर्वेदेचनिरताःसर्वशास्त्रार्थवेदिनः॥६०॥ बभूवुर्जगतांनाथालीलयानररूपिणः॥ लक्ष्मणस्तुस
दाराममनुगच्छतिसादरम्॥६१॥ सेव्यसेवकभावेनशत्रुघ्नोभरतंतथा॥ रामश्चापधरोनित्यंतूणीबाणान्वितःप्रभुः॥६२॥

अहन्नित्यर्थः गणंकार्यस्यानित्यत्वान्नशब्लुक् ॥ ५३ ॥ गव्यंदधिदुग्धम् ॥ ५४ ॥ सूदःसूपकारः मात्रेकौसल्यायै ॥ ५५ ॥ ५६ ॥ ५७ ॥
॥ ५८ ॥ दंपतीकौसल्यादशरथौ कौमारंपंचवर्षाधिकत्वम् ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥

---

१ इदंप्राचामनुरोधेन वस्तुत आर्षोयं प्रयोगइतिभावः

॥ ६३ ॥ ६४ ॥ ६५ ॥ नकरोतीत्यत्रहेतुरविकारीपरिणामहीनइति अविकारीत्यस्यैवव्याख्यानंपरिणामहीनइति ॥ ६६ ॥ ॥ इतिश्रीमत्स०
बालकांडेतृतीयःसर्गः ॥ ३ ॥ ॥ ४ ॥ ॥ अथरामंनेतुंविश्वामित्रागमनमाह कदाचिदिति रामंस्वमाययाजातंज्ञात्वातंद्रष्टुमभ्यागादि

अश्वारूढोवनंयातिमृगयायै[1]सलक्ष्मणः॥हत्वादुष्टमृगान्सर्वान्पित्रेसर्वंन्यवेदयत् ॥ ६३ ॥ प्रातरुत्थायसुस्नातःपितराव
भिवाद्यच॥पौरकार्याणिसर्वाणिकरोतिविनयान्वितः॥ ६४ ॥ बंधुभिःसहितोनित्यंभुक्त्वामुनिभिरन्वहम्॥ धर्मशास्त्र
रहस्यानिशृणोतिव्याकरोतिच॥ ६५ ॥ एवंपरात्मामनुजावतारोमनुष्यलोकाननुसृत्यसर्वम्॥ चक्रेऽविकारीपरिणाम
हीनोविचार्यमाणेनकरोतिकिंचित्॥ ६६ ॥ इतिश्रीमद० बा० तृतीयःसर्गः॥ ३ ॥ श्रीमहादेवउवाच॥ कदाचित्कौशिकोऽ
भ्यागादयोध्यांत्वनलप्रभः॥द्रष्टुंरामंपरात्मानंजातंज्ञात्वास्वमायया॥ १ ॥दृष्ट्वादशरथोराजाप्रत्युत्थायाचिरेणतु॥वसि
ष्ठेनसमागम्यपूजयित्वायथाविधि॥ २ ॥अभिवाद्यमुनिंराजाप्रांजलिर्भक्तिनम्रधीः॥ कृतार्थोऽस्मिमुनींद्राहंत्वदागम
नकारणात्॥ ३ ॥त्वद्विधायद्गृहंयांतितत्रैवायांतिसंपदः॥यदर्थमागतोऽसित्वंब्रूहिसत्यंकरोमितत्॥ ४ ॥विश्वामित्रोऽपितं
प्रीतःप्रत्युवाचमहामतिः॥अहंपर्वणिसंप्राप्तेदृष्ट्वायष्टुंसुरान्पितॄन्॥ ५ ॥यदारभेतदादैत्याविघ्नंकुर्वंतिनित्यशः॥मारीचश्च
सुबाहुश्चपरेचानुचरास्तयोः॥ ६ ॥अतस्तयोर्वधार्थायज्येष्ठंरामंप्रयच्छमे॥लक्ष्मणेनसह[2]भ्रात्रातवश्रेयोभविष्यति॥ ७ ॥

त्यन्वयः ॥ १ ॥ अचिरेणशीघ्रंदर्शनाव्यवहितोत्तरकालेप्रत्युत्थायवसिष्ठेनसमागम्यसहितोभूत्वेतियावत् पूजनेमुनिःकर्म ॥ २ ॥ नम्रशरीरत्वेननम्र
धीत्वानुमानम् त्वदागमनरूपात्कारणादित्यर्थः ॥ ३ ॥ तत्रैवतद्गृहएव भवदाद्यागमनस्यसकलसंपत्प्रतिबंधकदुरितनाशकत्वादितिभावः तत्करोमीति
सत्यंब्रवीमीतिशेषः ॥ ४ ॥ दृष्ट्वापर्वप्राप्तिंज्ञात्वासुरादीन्यष्टुम् ॥ ५ ॥ यदारभेतदेत्यन्वयः ॥ ६ ॥ तवेति तदैवतवश्रेयइत्यर्थः ॥ ७ ॥

---

१ तादर्थ्येचतुर्थी . २ वाल्मीकीयेतु केवलं रामस्यैव याचनं अतएव सलक्ष्मणंराममाजुहावेतिप्रतीकमुपादाय तयोरविनाभावज्ञानादितिव्याख्यातं .

पप्रच्छेत्यस्यविश्वामित्रवचोनंतरमित्यादिः ॥ ८ ॥ ९ ॥ इतःमत्सन्निधानात् ॥ १० ॥ प्रत्याख्यातोयदीति भविष्यतीतिशेषः श्रेयोरामवियोगकृतमरणाभावरूपम् असत्यंमुनिप्रत्याख्यानजंपापंतन्मूलंशापंच ॥ ११ ॥ शृण्विति रामःपूर्वमपिमानुषएवेदानींपुनरपिमानुषोजातइतिन किंतुसनातनोनिर्विकारत्वात्सदैक

वसिष्ठेनसहामंत्र्यदीयतांयदिरोचते ॥ पप्रच्छगुरुमेकांतेराजाचिंतापरायणः ॥८॥ किंकरोमिगुरोरामंत्यक्तुंनोत्सहते मनः ॥ बहुवर्षसहस्रांतेकष्टेनोत्पादिताःसुताः ॥९॥ चत्वारोऽमरतुल्यास्तेतेषांरामोऽतिवल्लभः ॥ रामस्त्वितोगच्छतिचेन्न जीवामिकथंचन ॥१०॥ प्रत्याख्यातोयदिमुनिःशापंदास्यत्यसंशयः ॥ कथंश्रेयोभवेन्मह्यमसत्यंचापिनस्पृशेत् ॥११॥ वसिष्ठउवाच ॥ शृणुराजन्देवगुह्यंगोपनीयंप्रयत्नतः ॥ रामोनमानुषोजातःपरमात्मासनातनः ॥१२॥ भूमेर्भारावतारायब्रह्मणाप्रार्थितःपुरा ॥ सएवजातोभवनेकौसल्यायांतवानघ ॥ १३॥ त्वंतुप्रजापतिःपूर्वंकश्यपोब्रह्मणःसुतः ॥ कौसल्याचादितिर्देवमातापूर्वंयशस्विनी ॥ भवंतौतपउग्रंवैतेपाथेबहुवत्सरम् ॥ १४ ॥ अग्राम्यविषयौविष्णुपूजाध्यानैकतत्परौ ॥ तदाप्रसन्नोभगवान्वरदोभक्तवत्सलः ॥ १५ ॥ वृणीष्ववरमित्युक्तेत्वंमेपुत्रोभवामल ॥ इतित्वयायाचितोसौ भगवान्भूतभावनः ॥१६॥ तथेत्युक्त्वाऽद्यपुत्रस्तेजातोरामःसएवहि ॥ शेषस्तुलक्ष्मणोराजन्राममेवान्वपद्यत ॥१७॥ जातौभरतशत्रुघ्नौशंखचक्रगदाभृतः ॥ योगमायाऽपिसीतेतिजाताजनकनंदिनी ॥ १८ ॥

रूपोयःपरमात्मासएवब्रह्मणापुराप्रार्थितःसन्तवभवनेजातइत्यन्वयः ॥ १२ ॥ १३ ॥ भगवदवतारयोग्यतामाह त्वंत्विति भवंतौतेपाथेतपःकृतवंतौ ॥ १४ ॥ अग्राम्यविषयौग्राम्यविषयानासक्तौ तेनब्रह्मचर्यंसूचितम् ॥ १५ ॥ १६ ॥ शेषोलक्ष्मणःशेषांशोलक्ष्मणइत्यर्थः ॥ १७ ॥ शंखचक्रगदाभृतःसंबंधिनौचक्र[2]गैरुडावितिशेषः तौभरतशत्रुघ्नौजाताविन्यर्थः ॥ १८ ॥

---

१ दूरीकर्तुं। २ इदंकस्यचिन्मतेनान्यथावाल्मीकीयकतकव्याख्याप्रत्याख्यानावसरे भरतशत्रुघ्नौशंखचक्रांशाविति पाद्मोक्तं गरुडस्यस्वरूपेणैवरामसविधेआगमनंयुद्धकांडेतेनविरुद्धंस्यात्.

॥ १९ ॥ २० ॥ प्रमुदितांतरःहृष्टचित्तः ॥ २१ ॥ मूर्ध्न्यवघ्रायेति प्रजापतेस्त्वांहिंकारेणावजिघ्रामिसहस्रायुषोऽसौजीवशरदःशतमित्यवघ्राणमंत्रलिंगेनतस्यपुत्रायायुर्वृद्धिकरत्वात्तत्करणमितिबोध्यम् ॥ २२ ॥ आगतौस्वसमीपंप्राप्तौरामलक्ष्मणौ ॥ २३ ॥ गृहीत्वाययौ जगामेत्यर्थः ॥ २४ ॥ बलामिति बलावि

विश्वामित्रोपिरामायतांयोजयितुमागतः ॥ एतद्गुह्यतमंराजन्नवक्तव्यंकदाचन ॥ १९ ॥ अतःप्रीतेनमनसापूजयित्वाऽथकौशिकम् ॥ प्रेषयस्वरमानाथंराघवंसहलक्ष्मणम्[1] ॥ २० ॥ वसिष्ठेनैवमुक्तस्तुराजादशरथस्तदा ॥ कृतकृत्यमिवात्मानंमेनेप्रमुदितांतरः॥ २१ ॥ आहूयरामराम[2]ेतिलक्ष्मणेतिचसादरम् ॥ आलिंग्यमूर्ध्न्यवघ्रायकौशिकायसमार्पयत्[3] ॥ २२ ॥ ततोतिहृष्टोभगवान्विश्वामित्रःप्रतापवान् ॥ आशीर्भिरभिनंद्याथआगतौरामलक्ष्मणौ ॥ २३ ॥ गृहीत्वाचापतूणीरबाणखड्गधरौययौ ॥ किंचिद्देशमतिक्रम्यराममाहूयभक्तितः ॥ २४ ॥ ददौबलांचातिबलांविद्येद्वेदेवनिर्मिते ॥ ययोर्ग्रहणमात्रेणक्षुत्क्षामादिनजायते ॥ २५ ॥ ततउत्तीर्यगंगांतेताटकावनमागमन् ॥ विश्वामित्रस्तदाप्राहरामंसत्यपराक्रमम् ॥ २६ ॥ अत्रास्तिताटकानामराक्षसीकामरूपिणी ॥ बाधतेलोकमखिलंजहितामविचारयन् ॥ २७ ॥ तथेतिधनुरादायसगुणंरघुनंदनः ॥ टंकारमकरोत्तेनशब्देनापूरयद्वनम् ॥ २८ ॥ तच्छ्रुत्वाऽसहमानासाताटकाघोररूपिणी ॥ क्रोधसंमूर्च्छितारामममभिदुद्रावमेघवत् ॥ २९ ॥ तामेकेनशरेणाशुताडयामासवक्षसि ॥ पपातविपिनेघोरावमंतीरुधिरंबहु ॥ ३० ॥

द्याशरीरसामर्थ्यसंपादनद्वारेष्टसाधिका बलंधेहितनूषुनइतिमंत्रलिंगात् अतिबलातुसंकल्पमात्रादिष्टजनिकेत्याहुः ॥ २५ ॥ २६ ॥ अविचारयन्स्त्रियाअवध्यत्वमविचारयन्नित्यर्थः ॥ २७ ॥ सगुणंआरूढज्यं तेनशब्देनधनुःशब्देन ॥ २८ ॥ असहमानेतिच्छेदः क्रोधसंमूर्च्छिताअतिक्रुद्धा ॥ २९ ॥ ३० ॥

---

[1] वोपसर्जनस्येतिपाक्षिकत्वात्सहस्यसादेशाभावः . [2] नित्यवीप्सयोरितित्वरायांद्वित्वं . [3] लङोरूपमिदम्

॥ ३१ ॥ ३२ ॥ ततस्ताटकावधकर्मवशादतिहृष्टोविश्वामित्रःकिंचिद्विचिंत्य रामगुरुत्वेनस्वस्यांतकालेमुक्तिपदप्राप्तियोग्यतालाभंविचार्येत्यर्थः अभिरामायरामायसरहस्यमंत्रमस्त्रजालंददावित्यन्वयः ॥ ३३ ॥ ॥ इतिश्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिवि० अध्यात्मरामायणेसेतौबालकांडे

ततोऽतिसुंदरीयक्षीसर्वाभरणभूषिता ॥ शापात्पिशाचतांप्राप्तामुक्तारामप्रसादतः ॥ ३१ ॥ नत्वारामंपरिक्रम्यगता रामाज्ञयादिवम् ॥ ३२ ॥ ततोऽतिहृष्टःपरिरभ्यराममूर्धन्यवघ्रायविचिंत्यकिंचित् ॥ सर्वास्त्रजालंसरहस्यमंत्रंप्रीत्याऽभिरामायददौमुनींद्रः ॥ ३३ ॥ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेबालकांडेचतुर्थःसर्गः ॥ ४ ॥ श्रीमहादेवउवाच ॥ तत्रकामाश्रमेरम्येकाननेमुनिसंकुले ॥ उषित्वारजनीमेकांप्रभातेप्रस्थिताःशनैः ॥ १ ॥ सिद्धाश्रमंगताःसर्वेसिद्धचारणसेवितम् ॥ विश्वामित्रेणसंदिष्टामुनयस्तन्निवासिनः ॥ २ ॥ पूजांचमहतींचक्रूरामलक्ष्मणयोर्द्रुतम् ॥ श्रीरामःकौशिकंप्राहमुनेदीक्षांप्रविश्यताम् ॥ ३ ॥ दर्शयस्वमहाभागकुतस्तौराक्षसाधमौ ॥ तथेत्युक्त्वामुनिर्यष्टुमारेभेमुनिभिःसह ॥ ४ ॥ मध्याह्नेददृशातेतौराक्षसौकामरूपिणौ ॥ मारीचश्चसुबाहुश्चवर्षंतौरुधिरास्थिनी ॥ ५ ॥ रामोऽपिधनुरादायद्वौबाणौसंदधेसुधीः ॥ आकर्णांतंसमाकृष्यविससर्जतयोःपृथक् ॥ ६ ॥

चतुर्थःसर्गः ॥ ४ ॥ ॥ ७ ॥ ॥ तत्रकामाश्रमेताटकावधस्थानभूतेकामाश्रमाख्येकामस्यरुद्रेणानंगतासंपादकेवनेताटकाभयादेवमुनिसंकुले ॥ १ ॥ सिद्धाश्रमंविश्वामित्रवासस्थानंवामनाश्रमाख्यं तन्निवासिनःसिद्धाश्रमवासिनः ॥ २ ॥ ३ ॥ कुतःआगच्छतःकस्मिन्कालेइतिशेषः ॥ ४ ॥ ददृशातेदृष्टौ ॥ ५ ॥ द्वौबाणौसंदधे ईषत्कालांतरत्वेऽपियुगपदिव ॥ ६ ॥

---

१ कर्णपर्यंतं .

जलधौतत्समीपेसंपूर्णशतयोजनं क्षिप्तःसागररोधसीतिवाल्मीक्युक्तेः ॥ ७ ॥ अग्निमयआग्नेयास्त्रयुक्तः अजयत्हतवानितियावत् ॥ ८ ॥ ९ ॥
॥ १० ॥ ११ ॥ १२ ॥ न्यस्तंतन्नगराधिपेराज्ञिकस्मिंश्चित्न्यासत्वेनस्थापितम् ॥ १३ ॥ महासत्त्वमतिदृढं गंगासमीपगमितिगौतमाश्रमविशेषणम्

तयोरेकस्तुमारीचंभ्रामयन्शतयोजनम् ॥ पातयामासजलधौतदद्भुतमिवाभवत् ॥ ७ ॥ द्वितीयोऽग्निमयोबाणः
सुबाहुमजयत्क्षणात् ॥ अपरेलक्ष्मणेनाशुहतास्तदनुयायिनः ॥ ८ ॥ पुष्पौघैराकिरन्देवाराघवंसहलक्ष्मणम् ॥ देव
दुंदुभयोनेदुस्तुष्टुवुःसिद्धचारणाः ॥ ९ ॥ विश्वामित्रस्तुसंपूज्यपूजार्हंरघुनंदनम् ॥ अंकेनिवेश्यचालिंग्यभक्त्यावा
ष्पाकुलेक्षणः ॥ १० ॥ भोजयित्वासहभ्रात्रारामंपक्वफलादिभिः ॥ पुराणवाक्यैर्मधुरैर्निनायदिवसत्रयम् ॥ ११ ॥
चतुर्थेहनिसंप्राप्तेकौशिकोराममब्रवीत् ॥ रामराममहायज्ञंद्रष्टुंगच्छामहेवयम् ॥ १२ ॥ विदेहराजनगरेजनकस्यमहा
त्मनः ॥ तत्रमाहेश्वरंचापमस्तिन्यस्तंपिनाकिना ॥ १३ ॥ द्रक्ष्यसित्वंमहासत्त्वंपूज्यसेजनकेनच ॥ इत्युक्त्वामुनिभिस्ता
भ्यांययौगंगासमीपगम् ॥ १४ ॥ गौतमस्याश्रमंपुण्यंयत्राहल्यास्थितातपः ॥ दिव्यपुण्यफलोपेतपादपैःपरिवेष्टितम्
॥ १५ ॥ मृगपक्षिगणैर्हीनंनानाजंतुविवर्जितम् ॥ दृष्ट्वोवाचमुनिंश्रीमान्रामोराजीवलोचनः ॥ १६ ॥ कस्यैतदाश्रमप
दंभातिभास्वच्छुभंमहत् ॥ पत्रपुष्पफलैर्युक्तंजंतुभिःपरिवर्जितम् ॥ १७ ॥ आह्लादयतिमेचेतोभगवन्ब्रूहितत्त्वतः
॥ १८ ॥ विश्वामित्रउवाच ॥ शृणुरामपुरावृत्तंगौतमोलोकविश्रुतः ॥ सर्वधर्मभृतांश्रेष्ठस्तपसाराधयन्हरिम् ॥ १९ ॥

॥ १४ ॥ यत्राहल्यातपआस्थितेत्यन्वयः ॥ १५ ॥ नानाजंतुभिःनानाप्रकारैः क्षुद्रप्राणिभिरपिहीनं गौतमशापादितिभावः ॥ १६ ॥ १७ ॥ १८ ॥
तपसाहरिमाराधयन्स्थितइतिशेषः ॥ १९ ॥

तस्मैब्रह्माददौकन्यामहल्यांलोकसुंदरीम्॥ ब्रह्मचर्येणसंतुष्टःशुश्रूषणपरायणाम्॥२०॥तयासार्धमिहावात्सीद्गौतमस्तपतांवरः॥ शक्रस्तुतांधर्षयितुमंतरंप्रेप्सुरन्वहम्॥२१॥ कदाचिन्मुनिवेषेणगौतमेनिर्गतेगृहात्॥ धर्षयित्वाऽथनिरगात्त्वरितंमुनिरप्यगात्॥ २२॥ दृष्ट्वायांतंस्वरूपेणमुनिःपरमकोपनः॥ पप्रच्छकस्त्वंदुष्टात्मन्ममरूपधरोऽधमः॥२३॥ सत्यंब्रूहिनचेद्भस्मकरिष्यामिनसंशयः॥ सोऽब्रवीद्देवराजोऽहंपाहिमांकामकिंकरम्॥ २४॥ कृतंजुगुप्सितंकर्ममयाकुत्सितचेतसा॥ गौतमःक्रोधताम्राक्षःशशापदिविजाधिपम्॥२५॥ योनिलंपटदुष्टात्मन्सहस्रभगवान्भव॥ शप्त्वातंदेवराजानंप्रविश्यस्वाश्रमंद्रुतम्॥२६॥दृष्ट्वाहल्यांवेपमानांप्रांजलिंगौतमोऽब्रवीत्॥ दुष्टेत्वंतिष्ठदुर्वृत्तेशिला[1]यामाश्रमेमम॥२७॥ निराहारादिवारात्रंतपःपरममास्थिता॥ आतपानिलवर्षादिसहिष्णुःपरमेश्वरम्॥ २८॥ ध्यायंतीराममेकाग्रमनसाहृदिसंस्थितम्॥ नानाजंतुविहीनोऽयमाश्रमोमेभविष्यति॥२९॥एवंवर्षसहस्रेषुत्वनेकेषुगतेषुच॥ रामोदाशरथिःश्रीमानागमिष्यतिसानुजः॥३०॥ यदात्वदाश्रयशिलांपादाभ्यामाक्रमिष्यति॥ तदैवधूतपापात्वंरामंसंपूज्यभक्तितः॥३१॥

॥ २० ॥ अवात्सीत्वासंकृतवान् तामहल्यांधर्षयितुमुपभोक्तुमंतरंमुन्यसान्निध्यरूपंप्रेप्सुरासीदितिशेषः ॥ २१ ॥ गौतमेगृहान्निर्गतेसतिमुनिवेषेणतद्गृहंप्रविश्यतामहल्यांधर्षयित्वोपभुज्यनिरगात् मुनिरपिस्वगृहमगात् ॥ २२ ॥ स्वरूपेणस्वस्यात्मनोगौतमस्यरूपेण दुष्टात्मत्वेहेतुर्मद्रूपधरत्वं ॥ २३ ॥ कामकिंकरंकामपरवशतयाऽयुक्तकर्मकरमित्यर्थः ॥ २४ ॥ २५ ॥ २६ ॥ शिलायामिति लीनाभूत्वेतिशेषः ॥ २७ ॥ २८ ॥ २९ ॥ दययास्वयमेवशापांतमाह एवमिति ॥ ३० ॥ त्वदाश्रयशिलांत्वह्लुयाश्रयशिलाम् ॥ ३१ ॥

---

[1] शिलाप्रतिमारूपेणेत्यर्थः पाद्मेपि शापदग्धापुराभर्त्रारामशक्रापराधतः। अहल्याख्याशिलाजज्ञेशतलिंगःकृतःस्वराडिति शतशब्दोनंतवाची। वाल्मीकीये विफलस्त्वंभविष्यसीति इंद्रायगौतमदत्तशापस्तुकल्पांतरीणइतिनविरोधः।

॥ ३२ ॥ तदादितःप्रभृति शुभेस्वाश्रमेअदृष्टाआस्तेइतिशेषः ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ चतुर्भुजमिति स्वस्यभगवदवतारत्वख्यापनायमध्येम

परिक्रम्यनमस्कृत्यस्तुत्वाशापाद्विमोक्ष्यसे ॥ पूर्ववन्ममशुश्रूषांकरिष्यसियथासुखम् ॥ ३२ ॥ इत्युक्त्वागौतमःप्रागाद्धिमवंतंनगोत्तमम् ॥ तदाद्यहल्याभूतानामदृश्यास्वाश्रमेशुभे ॥ ३३ ॥ तवपादरजःस्पर्शंकांक्षतेपवनाशना ॥ आस्तेऽद्यापिरघुश्रेष्ठतपोदुष्करमास्थिता ॥ ३४ ॥ पावयस्वमुनेर्भार्यामहल्यांब्रह्मणःसुताम् ॥ इत्युक्त्वाराघवंहस्तेगृहीत्वामुनिपुंगवः ॥ ३५ ॥ दर्शयामासचाहल्यामुग्रेणतपसास्थिताम् ॥ रामःशिलां[1]पदास्पृष्ट्वातांचापश्यत्तपोधनाम् ॥ ३६ ॥ ननामराघवोऽहल्यांरामोहमितिचाब्रवीत् ॥ ततोदृष्ट्वारघुश्रेष्ठंपीतकौशेयवाससम् ॥ ३७ ॥ चतुर्भुजंशंखचक्रगदापंकजधारिणम् ॥ धनुर्बाणधरंरामंलक्ष्मणेनसमन्वितम् ॥ ३८ ॥ स्मितवक्त्रंपद्मनेत्रंश्रीवत्सांकितवक्षसम् ॥ नीलमाणिक्यसंकाशंद्योतयंतंदिशोदश ॥ ३९ ॥ दृष्ट्वारामंरमानाथंहर्षविस्फारितेक्षणा ॥ गौतमस्यवचःस्मृत्वाज्ञात्वानारायणंपरम् ॥ ४० ॥ संपूज्यविधिवद्राममर्घ्यादिभिरनिंदिता ॥ हर्षाश्रुजलनेत्रांतादंडवत्प्रणिपत्यसा ॥ ४१ ॥ उत्थायचपुनर्दृष्ट्वारामंराजीवलोचनम् ॥ पुलकांकित[2]सर्वांगागिरागद्गदयैलत ॥ ४२ ॥

ध्येचतुर्भुजरूपंकौसल्यामिवदर्शयित्वापुनर्द्विभुजरूपेणैवस्थितइत्याह धनुरिति ॥ ३८ ॥ ३९ ॥ ४० ॥ हर्षजन्यंयदश्रुरूपंजलंतद्युक्तेनेत्रांतेयस्याःसा ॥ ४१ ॥ ऐलतअस्तौषीत् ईडस्तुतावित्यस्माल्लुङिव्यत्ययेनशपोलुगभावः डलयोरेकश्रुतित्वाल्लुकारोच्चारणम् ॥ ४२ ॥

---

[1] शिलाप्रतिमां । [2] रोमांचितशरीरा ।

अहोइतितेतवपादाब्जसँल्लग्नरजःकणात्तत्संबंधादहंकृतार्थाऽस्मिमुक्तशापाऽस्मि अहोइत्याश्चर्यं अपरंस्वस्यकृतार्थत्वेहेतुमाह यत्तेपादपद्मंपद्मजशंकरादिभिस्त
दलाभात्रंधितमानसैःपीडितमानसैःसदास्प्रष्टुंविमृग्यतेतदहंस्पृशामिचअतःकृतार्थाऽस्मि ॥ ४३ ॥ अहोइतिआश्चर्यं विचित्रंवास्तवस्वरूपाननुगुणंतवचेष्टितं
यतःअपाणिपादोजवनोग्रहीतेतिश्रुतेर्वस्तुतश्चरणादिवर्जितोऽपिसन्संपूर्णःसर्वव्याप्तोऽपिसन्आनंदमयःतत्स्वरूपोऽपिसन्जगत्आत्मनिमनुष्यबुध्युत्पादनेनविमो

अहल्योवाच ॥ अहोकृतार्थाऽस्मिजगन्निवासतेपादाब्जसँल्लग्नरजःकणादहम् ॥ स्पृशामियत्पद्मजशंकरादिभिर्विमृग्य
तेरंधितमानसैःसदा ॥ ४३ ॥ अहोविचित्रंतवरामचेष्टितंमनुष्यभावेनविमोहितंजगत् ॥ चलस्यजस्रंचरणादिवर्जितः
संपूर्णआनंदमयोऽतिमायिकः ॥ ४४ ॥ यत्पादपंकजपरागपवित्रगात्राभागीरथीभवविरिंचिमुखान्पुनाति ॥ साक्षा
त्सएवममदृग्विषयोयदास्तेकिंवर्ण्यतेममपुराकृतभागधेयम् ॥ ४५ ॥ मर्त्यावतारेमनुजाकृतिंहरिंरामाभिधेयंरमणी
यदेहिनम् ॥ धनुर्धरंपद्मविशाललोचनंभजामिनित्यंनपरान्भजिष्ये ॥ ४६ ॥

हयन्मनुष्यभावेनचलसि क्रियामात्रोपलक्षणमिदं विरोधाभासोऽत्र औपाधिकत्वेनतत्परिहारात् नन्वीदृशस्यमनुष्यभावःकथंतत्राह अतिमायिकइति सक
लमायावज्ञोऽत्युकृष्टःसकलजगद्रूपेणपरिणमनसमर्थोमहामायावानित्यर्थः एवंचशुद्धमायिकमेवेदंतवशरीरंचलनादिकंचनेतरवदितिभावः ॥ ४४ ॥ यत्पादे
ति विष्णोःपादप्रसूतेतिपुराणोक्तेः ॥ ४५ ॥ रमणीयदेहिनमित्यार्षम् ॥ ४६ ॥

यस्यपादोविश्वं पादोस्यविश्वाभूतानीतिश्रुतेः तदेवपंकजंतस्यरजःरजइवसारांशः यथाकमलेसौगंध्यसंपादकतयांऽतर्विद्यमानंरजएवसारंएवंविश्वस्यसत्ताभानसंपादकतयाब्रह्मैवसारांशत्वाद्रजस्तच्छ्रुतिभिर्विमृग्यं श्रुतिशिरोरूपोपनिषद्गम्यत्वात्तस्येतिभावः यन्नाम्नांमध्येसारंनामरामेतितस्यरसिकस्तद्विषयप्रीतिमान्भगवान्ऐश्वर्यधर्मयशोलक्ष्मीज्ञानवैराग्यवान् षण्णामेषां ऐश्वर्यस्यसमग्रस्यधर्मस्ययशसःश्रियः ज्ञानवैराग्ययोश्चैवषण्णांभगइतींगनेतिभगसंज्ञकत्वोक्तेः उत्पत्तिं प्रलयंचैवभूतानामागतिंगतिं वेत्तिविद्यामविद्यांचसवाच्योभगवानित्युक्तोवा ॥४ ७॥ विरिंचिलोकेब्रह्मलोकेनारदमुखाऋषयोभवपद्मजाद्यादेवाश्चत्वच्चरितस्मरणजानंदाश्रुभिःसिक्तेकुचाग्रेचूचुकेतथासीमेतत्प्रांतभागेचययासावागीश्वरीसरस्वतीचगायतीतिविपरिणामेनान्वयः ॥ ४८ ॥ सोऽयंरामःपरात्मापरःसर्वजीवे

यत्पादपंकजरजःश्रुतिभिर्विमृग्यंयन्नाभिपंकजभवःकमलासनश्च ॥ यन्नामसाररसिकोभगवान्पुरारिस्तंरामचंद्रमनिशंहृदिभावयामि ॥ ४७ ॥ यस्यावतारचरितानिविरिंचिलोकेगायंतिनारदमुखाभवपद्मजाद्याः ॥ आनंदजाश्रुपरिषिक्तकुचाग्रसीमावागीश्वरीचतमहंशरणंप्रपद्ये ॥ ४८ ॥ सोऽयंपरात्मापुरुषःपुराणएषस्वयंज्योतिरनंतआद्यः ॥ मायातनुंलोकविमोहनीयांधत्तेपरानुग्रहएषरामः ॥४९॥ अयंहिविश्वोद्भवसंयमानामेकःस्वमायागुणबिंबितोयः ॥ विरिंचिविष्णवीश्वरनामभेदान्धत्तेस्वतंत्रःपरिपूर्णआत्मा ॥ ५० ॥

भ्यःप्रकृतेश्चअधिकआत्मापुरुषःपुंरि[1]शयनात्पुरुषःपुराणः[2]सर्वदाविद्यमानइत्यर्थःएषःस्वयंज्योतिःस्वप्रकाशः अनंतोऽविनाशी आद्यःसर्वकारणं यःपरानुग्रहेपरेषांमादृशजनानामनुग्रहेकर्तव्यतयाबुद्धिस्थेसतिपरमसुंदरत्वादिगुणैर्लोकविमोहनीयांमायातनुंनत्वितरजनवत्पांचभौतिकींधत्ते सएवएषरामः उपासकानांकामार्थंब्रह्मणोरूपकल्पनेतिश्रुतेः ॥ ४९ ॥ अयंहीति विश्वस्यजगतउद्भवउत्पत्तिःसंयमोनाशः ताभ्यांपालनमप्युपलक्ष्यते तेषांस्वतंत्रःकर्ता स्वतंत्रःकर्तेतिपाणिन्युक्तेः यएकएवपरिपूर्णोव्यापकआत्मास्वमायागुणेषुरजःसत्त्वतमःसुबिंबितःप्रतिबिंबितःसन्विरिंच्यादिनामभेदान्धत्ते रजोगुणोपहितचैतन्यमेवब्रह्मा सत्त्वगुणोपहितंविष्णुः तमोगुणयुक्तंरुद्रइतिभावः ॥ ५० ॥

---

[1] अंतः अंतर्यामीतियावत् . [2] पुरातनः पृषोदरादित्वात्साधुः .

हेराम यत्तवांघ्रिपंकजंप्रियात्प्रियत्वाच्छ्रियावक्षसिधृतंलालितंच येनैकेनजगत्त्रयमाक्रांतम् इदंविष्णुर्विचक्रमेत्रेधानिदधेपदमितिश्रुतेः यच्चत्यक्ताभिमानैर्मुनिभिर्ध्येयम् तद्विष्णोःपरमंपदंसदापश्यंतिसूरयइतिश्रुतेः तस्मैनमोऽस्त्वित्यर्थः ॥ ५१ ॥ जगतामिति आदिभूतःकारणत्वादितिभावः जगत्त्वंजगदनुवादेन त्वंपदोपात्तब्रह्मात्मत्वंविधीयते सर्वंखल्विदंब्रह्मेतिवत् तत्रजगतोमिथ्याभूतत्वेनब्रह्मसामानाधिकरण्यानुपपत्तावपितस्याध्यस्तत्वेनजगद्बाधफलकत्वान्नदोषः एवंचजगदारोपाधिष्ठानंत्वमित्यर्थः तदेवाह जगदाश्रयइति इमाःप्रजाःसदायतनाःसत्प्रतिष्ठाइतिश्रुतेः वास्तवआश्रयाश्रयिभावोनास्त्येवेत्याह सर्वभूतेष्वसंयुक्तइति एवंचश्रुत्युक्तंतदधिष्ठानत्वमध्यारोपितमेवेतिभावः अतएवभवानेकोद्वितीयोभातिप्रकाशते[1] ॥ ५२ ॥ ओंकारवाच्यस्त्वम् तस्यवाचकःप्रणवइतिपातं

नमोऽस्तुतेरामतवांघ्रिपंकजंश्रियाधृतंवक्षसिलालितंप्रियात् ॥ आक्रांतमेकेनजगत्त्रयंपुराध्येयंमुनींद्रैरभिमानवर्जितैः ॥ ५१ ॥
जगतामादिभूतस्त्वंजगत्त्वंजगदाश्रयः ॥ सर्वभूतेष्वसंयुक्तएकोभातिभवान्परः ॥ ५२ ॥
ओंकारवाच्यस्त्वंरामवाचामविषयःपुमान् ॥ वाच्यवाचकभेदेनभवानेवजगन्मयः ॥ ५३ ॥

जलसूत्रात् अवतीत्योमितिनिरुपाधिकरक्षकत्वगुणेनसतद्वाच्यः यद्वा अश्चउश्चमश्चओमितिब्रह्मविष्णुशिवात्मत्वेनसतद्वाच्यः तुर्येणनादाख्यध्वनिनाचशुद्धंब्रह्मस्वरूपतएवतत्रनिबद्धंपक्षद्वयेऽपि यद्वाऽपिसोऽहमितिशब्देसकारार्णं[2]हकारार्णंलोपयित्वाततःपरम् ॥ संधिंकुर्यात्पूर्वरूपंततोऽसौप्रणवोभवेदितिरीत्याप्रणवसाधनंतदाऽपिअहमनुवादेनसत्ताविशिष्टांतर्याम्यभेदप्रतिपादनात्सगुणएवतदर्थः यद्वा सकारहकारलोपेनतत्[3]त्वाहंत्वयोस्त्यागाच्छुद्धमेवब्रह्मतदर्थः अत्रशक्तिग्रहादिप्रकारोऽन्यत्रविस्तरेणप्रपंचितः तर्हिकिंसगुणएवाहंनेत्याह वाचामविषयइतिनिर्धर्मकत्वाच्छक्त्याद्यसंभवेनस्वरूपतस्तज्जन्यबोधाविषयइत्यर्थः नन्वेवं तस्यवाचकःप्रणवइतिपातंजलसूत्रासंगतिस्तत्राह वाच्येति वाच्यवाचकभेदेनतत्कल्पनयाभवानेवमाययाजगन्मयइतिकल्पितभेदेनकल्पितगुणैश्चतववाच्यत्वंगृहीत्वापारमर्षसूत्रोपपत्तिरितिभावः ॥ ५३ ॥

---

[1] युष्मच्छब्दसामानाधिकरण्याभावात्प्रथमः . [2] सकारावयवंहकारावयवमित्यर्थः अर्णस्शब्दोवयववाची तस्यचसांतत्वाददंतत्वंअभियुक्तोक्तेः . [3] तद्भावाहंभावयोः

उक्तंजगन्मयत्वंमायिकमित्याह कार्येत्यादि कार्यंमहत्तत्त्वादि कारणंमायारूपामूलप्रकृतिः कर्तृत्वंतत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम् फ
लंस्वर्गनरकादि साधनंक्रत्वादिवेदादि एतद्भेदतः एकोऽपित्वंबहुरूपयामाययाउक्तभेदैर्युक्तइवभासि उक्तंचविष्णुपुराणे सएवमूलप्रकृतिर्व्यक्तरूपीजगच्च
सः तस्मिन्नेवलयंसर्वंयातितत्रचतिष्ठति कर्ताक्रियाणांसचइज्यतेक्रतुःसएवतत्कर्मफलंचतस्ययत् स्रगादियत्साधनमप्यशेषतोहरेर्नकिंचिद्व्यतिरिक्तमस्तीति
॥ ५४ ॥ नन्वीदृशोयद्यहंतर्हिलोकोमांतथाकिमितिनजानातीत्यत्राह त्वन्मायेति त्वद्विषययामाययेत्यर्थः तदुक्तंविष्णुपुराणे सोऽहंसत्त्वंजगच्चेदंसदेवासुरमा
नुषम् अविद्यामोहितात्मानःपुरुषाभिन्नदर्शिनइति ॥ ५५ ॥ ननुतर्हितादृशएवाहंनेत्याह आकाशवदितिअचलोऽक्रियः बुद्धोज्ञानरूपःसत्सत्तारूपः नित्य

कार्यकारणकर्तृत्वफलसाधनभेदतः॥ एकोविभासिरामत्वंमाययाबहुरूपया ॥ ५४ ॥ त्वन्मायामोहितधियस्त्वांनजा
नंतितत्त्वतः॥ मानुषंत्वाभिमन्यंतेमायिनंपरमेश्वरम्॥ ५५॥ आकाशवत्त्वंसर्वत्रबहिरंतर्गतोऽमलः॥ असंगोह्यचलो
नित्यःशुद्धोबुद्धःसदव्ययः॥ ५६॥ योषिन्मूढाऽहमज्ञातेतत्त्वंजानेकथंविभो ॥ तस्मात्तेशतशोरामनमस्कुर्यामनन्यधीः
॥ ५७॥ देवमेयत्रकुत्रापिस्थितायाअपिसर्वदा ॥ त्वत्पादकमलेसक्ताभक्तिरेवसदाऽस्तुमे ॥ ५८॥ नमस्तेपुरुषाध्यक्ष
नमस्तेभक्तवत्सल॥ नमस्तेस्तुहृषीकेशनारायणनमोऽस्तुते ॥ ५९॥

त्वमनादित्वम् अव्ययत्वमनंतत्वम् ॥ ५६ ॥ मूढातमोगुणप्रधाना अतएवाऽज्ञा नमस्कुर्याम् त्वद्रूपज्ञानायेतिभावः ॥ ५७ ॥ सक्तानिरंतरा ॥ ५८ ॥ पुरुषा
ध्यक्षसकलपुरुषसाक्षिन् हृषीकेशहृषीकाणा[1]मिंद्रियाणामधिष्ठातः हृष्यंतिविषयैरितिहृषीकाणींद्रियाणि हृषीकेशंभयेषुचेतिविष्णुधर्मोक्तेर्भीतयाऽहल्ययैत
न्नामस्मृतम् नारं[2]जीवसमूहोऽयनंस्थानंयस्यांतर्यामित्वात्तत्रस्थितत्त्वान्नारायणः नयतीतिनरःप्रोक्तःपरमात्मासनातनः नराज्जातानितत्त्वानिनाराणीतिततोवि
दुः तान्येवचायनंतस्यतेननारायणःस्मृतइतितुमनुः आपोनारास्तत्स्थितत्वाद्वानारायणः अस्यमंत्रस्यसंसारभयनाशकत्वात्स्मरणम् तदुक्तंनृसिंहपुराणे
नारायणायनमइत्ययमेवसत्यःसंसारघोरविषसंहरणायमंत्रइति ॥ ५९ ॥

---

१ ज्ञानेंद्रियाणां । २ नराणांसमूहइत्यर्थेसमूहेण् ।

तदेवाह भवभयेति भवं[१]भयंसंसारभयम् कालमेघोनीलमेघः ॥ ६० ॥ साऽहल्या पतिंगौतमम् ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ मातृभ्रात्रित्यत्रानङ्भावआर्षः भोगैकबद्धःआतुरइतिच्छेदः संधिरार्षः ॥ ६५ ॥ इतिश्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिबिरुदावलीविराजमानस्यहिम्मतिवर्म

भवभयहरमेकंभानुकोटिप्रकाशंकरधृतशरचापंकालमेघावभासम् ॥ कनकरुचिरवस्त्रंरत्नवत्कुंडलाढ्यंकमलविशदनेत्रंसानुजंराममीडे ॥ ६० ॥ स्तुत्वैवंपुरुषंसाक्षाद्राघवंपुरतःस्थितम् ॥ परिक्रम्यप्रणम्याशुसानुज्ञाताययौपतिम् ॥ ६१ ॥ अहल्ययाकृतंस्तोत्रंयःपठेद्भक्तिसंयुतः ॥ समुच्यतेऽखिलैःपापैःपरं[२]ब्रह्माधिगच्छति ॥ ६२ ॥ पुत्राद्यर्थेपठेद्भक्त्यारामंहृदिनिधायच ॥ संवत्सरेणलभतेवंध्याअपिसुपुत्रकम् ॥ ६३ ॥ सर्वान्कामानवाप्नोतिरामचंद्रप्रसादतः ॥ ६४ ॥ ब्रह्मघ्नोगुरुतल्पगोऽपिपुरुषःस्तेयीसुरापोऽपिवामातृभ्रातृविहिंसकोऽपिसततंभोगैकबद्धातुरः ॥ नित्यंस्तोत्रमिदंजपं[३]न्रघुपतिंभक्त्याहृदिस्थंस्मरन्ध्यायन्मुक्तिमुपैतिकिंपुनरसौस्वाचारयुक्तोनरः ॥ ६५ ॥ इतिश्रीम०उमामहेश्वरसंवादेबालकांडेअहल्योद्धरणंनामपंचमःसर्गः ॥ ५ ॥ ॥ ७ ॥ ॥ सूतउवाच ॥ विश्वामित्रोऽथतंप्राहराघवंसहलक्ष्मणम् ॥ गच्छामोवत्समिथिलांजनकेनाभिपालिताम् ॥ १ ॥ दृष्ट्वाक्रतुवरंपश्चादयोध्यांगंतुमर्हसि ॥ इत्युक्त्वाप्रययौगंगामुत्तर्तुंसहराघवः ॥ तस्मिन्कालेनाविकेननिषिद्धोरघुनंदनः ॥ २ ॥

णःपुत्रस्यश्रीरामवर्मणःकृतावध्यात्मरामायणसेतौबालकांडेपंचमःसर्गः ॥ ५ ॥ ॥ ७ ॥ ॥ विश्वामित्रइति वयंगच्छामइतिप्राहेत्यन्वयः बहुवचनादेवरामलक्ष्मणयोरपिगमनकर्तृत्वम् ॥ १ ॥ उत्तर्तुमित्यागमशासनानित्यत्वादिडभावः नाविकेननौतारकेण ॥ २ ॥

---

१ अथवा भवस्यशंकरस्यभयंकंठगतहलाहलकृतदुःसहदाहरूपं . २ परमित्यनेनहिरण्यगर्भब्रह्मणोनिवृत्तिः . ३ अत्रसर्वत्रहेतौशता ।

दारुदृषदोःकाष्ठपाषाणयोः मानुषीकरणचूर्णमिति शिलारूपाऽहल्यायाःपादस्पर्शमात्रेणमानुषदेहसंपादनात् ॥ ३ ॥ ४ ॥ ५ ॥ प्रातर्विदेहस्यपुरंगत्वेतिशेषः ऋ

नाविकउवाच ॥ क्षालयामितवपादपंकजंनाथदारुदृषदोःकिमंतरम्[1] ॥ मानुषीकरणचूर्णमस्तितेपादयोरितिकथाप्रथीयसी[2] ॥ ३ ॥ पादांबुजंतेविमलंहिकृत्वापश्चात्परंतीरमहंनयामि ॥ नोचेत्तरीसद्युवतीमलेन[3]स्याच्चेद्विभोविद्धिकुटुंबहा[4]निः ॥ ४ ॥ इत्युक्त्वाक्षालितौपादौपरंतीरंततोगताः ॥ कौशिकोरघुनाथेनसहितोमिथिलांययौ ॥ ५ ॥ विदेहस्यपुरंप्रातर्ऋषिवाटंसमाविशत् ॥ प्राप्तंकौशिकमाकर्ण्यजनकोऽतिमुदान्वितः ॥ ६ ॥ पूजाद्रव्याणिसंगृह्यसोपाध्यायःसमाययौ ॥ दंडवत्प्रणिपत्याथपूजयामासकौशिकम् ॥ ७ ॥ पप्रच्छराघवौदृष्ट्वासर्वलक्षणसंयुतौ ॥ द्योतयंतौदिशःसर्वाश्चंद्रसूर्याविवापरौ ॥ ८ ॥ कस्यैतौनरशार्दूलौपुत्रौदेवसुतोपमौ ॥ मनःप्रीतिकरौमेऽद्यनरनारायणाविव ॥ ९ ॥ प्रत्युवाचमुनिःप्रीतोहर्षयन्जनकंतदा ॥ पुत्रौदशरथस्यैतौभ्रातरौरामलक्ष्मणौ ॥ १० ॥ मखसंरक्षणार्थायमयानीतौपितुःपुरात् ॥ आगच्छन्राघवोमार्गेताटकांविश्वघातिनीम् ॥ ११ ॥ शरेणैकेनहतवान्नोदितोमेऽतिविक्रमः ॥ ततोममाश्रमंगत्वाममयज्ञविहिंसकान् ॥ १२ ॥ सुबाहुप्रमुखान्हत्वामारीचंसागरेऽक्षिपत् ॥ ततोगंगातटेपुण्येगौतमस्याश्रमेशुभे ॥ १३ ॥ गत्वातत्रशिलारूपागौतमस्यवधूःस्थिता ॥ पादपंकजसंस्पर्शात्कृतामानुषरूपिणी ॥ १४ ॥ दृष्ट्वाऽहल्यांनमस्कृत्यतयासम्यक्प्रपूजितः ॥ इदानींद्रष्टुकामस्तेगृहेमाहेश्वरंधनुः ॥ १५ ॥

षिवाटं ऋषिवासस्थानमार्गम् ॥ ६ ॥ सोपाध्यायःगौतमपुत्रशतानंदसहितः ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ मेनोदितःमया[5]प्रेरितइत्यर्थः ॥ १२ ॥ १३ ॥ ॥ १४ ॥ तेगृहेपूजितंधनुर्द्रष्टुकामइदानीमागतइत्यन्वयः तच्चसर्वैराजभिर्दृष्टमेवनत्वारूढज्यंकृतमित्यनुशुश्रुवेअनेनश्रुतमित्यर्थः ॥ १५ ॥

---

[1] पृथिव्याविषयत्वाद्द्वयोःकोभेदः . [2] लोकप्रख्याता . [3] पादस्पृष्टरजसा. [4] वृत्तिसाधनत्वाभावादितिभावः . [5] शेषत्वेनविवक्षायांषष्ठी

दृष्ट्वेत्यस्यधनुःकर्मयतःपितरंद्रष्टुमिच्छत्यतोऽयोध्यांजिगमिषुरित्यन्वयः ॥ १६ ॥ १७ ॥ मंत्रिणंसुदामाख्यम् ॥ १८ ॥ १९ ॥ कौशिकोऽपितथेत्युक्त्वात्र

पूजितंराजभिःसर्वैर्दृष्टमित्यनुशुश्रुवे ॥ अतोदर्शयराजेंद्रशैवंचापमनुत्तमम् ॥ दृष्ट्वायोध्यांजिगमिषुःपितरंद्रष्टुमिच्छति ॥ १६ ॥ इत्युक्तोमुनिनाराजापूजार्हावितिपूजया ॥ पूजयामासधर्मज्ञोविधिदृष्टेनकर्मणा ॥ १७ ॥ ततःसंप्रेषयामासमंत्रिणंबुद्धिमत्तरम् ॥ जनकउवाच ॥ शीघ्रमानयविश्वेशचापंरामायदर्शय ॥ १८ ॥ तनोगतेमंत्रिवरेराजाकौशिकमब्रवीत् ॥ यदिरामोधनुर्धृत्वाकोट्यामारोपयेद्गुणम् ॥ १९ ॥ तदामयाऽत्मजासीतादीयतेराघवायहि ॥ तथेतिकौशिकोप्याहरामंसंवीक्ष्यसस्मितम् ॥ २० ॥ शीघ्रंदर्शयचापाग्र्यं[1]रामायामिततेजसे ॥ एवंब्रुवतिमौनीशआगताश्चापवाहकाः ॥ २१ ॥ चापंगृहीत्वाबलिनःपंचसाहस्रसंख्यकाः ॥ घंटाशतसमायुक्तंमणिवज्रादिभूषितम् ॥ २२ ॥ दर्शयामासरामायमंत्रीमंत्रवतांवरः ॥ दृष्ट्वारामःप्रहृष्टात्माबद्ध्वापरिकरंदृढम् ॥ २३ ॥ गृहीत्वावामहस्तेनलीलयातोलयन्धनुः ॥ आरोपयामासगुणंपश्यत्स्वखिलराजसु ॥ २४ ॥ ईषदाकर्षयामासपाणिनादक्षिणेनसः ॥ बभंजाखिलहृत्सारोदिशःशब्देनपूरयन् ॥ २५ ॥ दिशश्चविदिशश्चैवस्वर्गंमर्त्यंरसातलम् ॥ तदद्भुतमभूत्तत्रदेवानांदिविपश्यताम् ॥ २६ ॥ आच्छादयंतःकुसुमैर्देवाःस्तुतिभिरीडिरे ॥ देवदुंदुभयोनेदुर्[2]ननृतुश्चाप्सरोगणाः ॥ २७ ॥

क्ष्यमाणमाहेत्यन्वयः ॥ २० ॥ मौनीशेऋषिश्रेष्ठे ॥ २१ ॥ २२ ॥ परिकरंकटिवस्त्रबंधम् ॥ २३ ॥ गुणंज्याम् ॥ २४ ॥ अखिलहृत्सारःअखिलप्राणिनांहिरण्यगर्भादीनांसकलब्रह्मांडस्थानांहृत्सारोबलंयस्यसः ॥ २५ ॥ मर्त्यंमनुष्यलोकम् ॥ २६ ॥ २७ ॥

---

[1] धनुःश्रेष्ठं. [2] नादितवंतः ।

रघूद्वहमालिंग्यराजाऽतिहृष्टोजातइतिशेषः सीतामातरोजनकपत्न्यःअंतःपुराजिरेतदंगणेआगताः किमिदमितिविस्मयवशादितिभावः विस्मयमद्भुतरसंलेभिरेप्रापुः ॥ २८ ॥ स्मितवक्त्रा स्मितपदेअर्शआद्यच् स्मितयुक्तंवक्त्रंयस्याःसा ॥ २९ ॥ कर्णपत्रैः कर्णभूषणैःउपलक्षितेतिशेषः चरणेनचलितेनक्वणन्नूपुरंयस्याःसा आर्षःसमासः ॥ ३० ॥ निक्षिप्येत्यस्यमालाकर्म स्वलंकृतंलोकविमोहनंरामंदृष्ट्वामुमुदिरेइत्यन्वयः ॥ ३१ ॥ ३२ ॥ पत्रंसंदेशप्रापकलेखवत्पत्रसहितं

द्विधाभग्नंधनुर्दृष्ट्वाराजालिंग्यरघूद्वहम् ॥ विस्मयंलेभिरेसीतामातरोंऽतःपुराजिरे ॥२८॥ सीतास्वर्णमयींमालांगृहीत्वा दक्षिणेकरे ॥ स्मितवक्त्रास्वर्णवर्णासर्वाभरणभूषिता ॥२९॥ मुक्ताहारैःकर्णपत्रैःक्वणच्चरणनूपुरा ॥ दुकूलपरिसंवीता वस्त्रांतर्व्यंजितस्तनी ॥ ३० ॥ रामस्योपरिनिक्षिप्यस्मयमानामुदंययौ ॥ ततोमुमुदिरेसर्वैराजदाराःस्वलंकृतम् ॥३१॥ गवाक्षजालरंध्रेभ्योदृष्ट्वालोकविमोहनम् ॥ ततोऽब्रवीन्मुनिंराजासर्वशास्त्रविशारदः ॥ ३२ ॥ भोकौशिकमुनिश्रेष्ठपत्रंप्रेषयसत्वरम् ॥ राजादशरथःशीघ्रमागच्छतुसपुत्रकः ॥ ३३ ॥ विवाहार्थंकुमाराणांसदारःसहमंत्रिभिः ॥ तथेतिप्रेषयामासदूतांस्त्वरितविक्रमान् ॥ ३४ ॥ तेगत्वाराजशार्दूलंरामश्रेयोन्यवेदयन् ॥ श्रुत्वारामकृतंराजाहर्षेणमहताप्लुतः ॥ ३५ ॥ मिथिलागमनार्थायत्वरयामाससमंत्रिणः ॥ गच्छंतुमिथिलांसर्वेगजाश्वरथपत्तयः ॥ ३६ ॥ रथमानयमे शीघ्रंगच्छाम्यद्यैवमाचिरम् ॥ वसिष्ठस्त्वग्रतोयातुसदारःसहितोऽग्निभिः ॥ ३७ ॥

दूतमित्यर्थः यथागच्छतितथापत्रंप्रेषयेत्यन्वयः सपुत्रकःभरतादिसहितः ॥ ३३ ॥ ३४ ॥ राजशार्दूलंदशरथं रामश्रेयःविवाहरूपं रामकृतंधनुर्भंगम् ॥ ३५ ॥ गजाश्वरथपत्तयइतिमध्यमपदलोपीसमासः द्वंद्वश्चेतिसूत्रेसेनांगशब्देनरथिकादीनामेवग्रहणंनरथादीनामतोवाऽत्रनदोषः अतएवसंग्रामंहस्त्यश्वरथपदातिभिरितिअल्पाच्तरसूत्रस्थभाष्यप्रयोगःसंगच्छतइत्यन्ये ॥ ३६ ॥ ३७ ॥

---

[1] मीमांसकनयेबहुवचनस्यत्रित्वपर्यवसायित्वादग्निभिस्त्रिभिर्दक्षिणगार्हपत्याहवनीयैरेवातएवकालिदासीयेरघुकाव्येपंचमसर्गे त्वंप्रशस्तेमहितेमदीयेवसंश्चतुर्थोऽग्निरिवाग्न्यगारे इति कौत्संप्रतिरघुवाक्यमुक्तं ।

राममातृःकौसल्याद्याःप्रस्थाप्यनगराद्बहिःसंप्रेष्यरथमारुह्यतयैवसेनयासार्धंययावित्यन्वयः ॥ ३८ ॥ ३९ ॥ शतानंदपुरोधसासहितइतिशेषःयथोक्तपूजयायथाशास्त्रोक्तपूजया ॥ ४० ॥ ४१ ॥ फुल्लांबुजोपमंविकसितकमलसदृशम् ॥ ४२ ॥ ब्रह्मानंदंगतःप्राप्तः समाधावितिशेषः ॥ ४३ ॥ ४४ ॥ ४५ ॥ वितानंवासःकृतमंगणाच्छादनम् मंडपोऽत्रविवाहशाला ॥ ४६ ॥ सुसंबाधेसंकीर्णे सुवासिन्योजीवद्भर्तृकाः पतकोरुचकोरुक्मोनिष्कंवक्षोविभूषणेइतिकोशाद्वक्षोविभूषणंनिष्कंतत्कंठेयासांताभिः ॥ ४७ ॥ भेरीदुंदुभीवाद्यविशेषौ वितस्तित्रितयदीर्घाताम्रनिर्मिताचर्मच्छन्नाचतुर्विंशत्यंगुलवदनद्वयाभेरी वर्तुलश्चर्मबद्धैकाननोदुंदुभिरितिवदंति रत्नांचितेरत्नघटिते ॥ ४८ ॥

राममातॄःसमादायमुनिर्मैभगवान्गुरुः ॥ एवंप्रस्थाप्यसकलंराजर्षिर्विपुलंरथम् ॥ ३८ ॥ महत्यासेनयासार्धमारुह्यत्वरितोययौ ॥ आगतंराघवंश्रुत्वाराजाहर्षसमाकुलः ॥ ३९ ॥ प्रत्युज्जगामजनकःशतानंदपुरोधसा ॥ यथोक्तपूजयापूज्यंपूजयामाससत्कृतम् ॥४०॥ रामस्तुलक्ष्मणेनाशुववंदेचरणौपितुः ॥ ततोहृष्टोदशरथोरामंवचनमब्रवीत् ॥४१॥ दिष्ट्यापश्यामितेराममुखंफुल्लांबुजोपमम् ॥ मुनेरनुग्रहात्सर्वंसंपन्नंममशोभनम् ॥ ४२ ॥ इत्युक्त्वाघ्रायमूर्धानमालिंग्यचपुनःपुनः ॥ हर्षेणमहताविष्टोब्रह्मानंदंगतोयथा ॥ ४३ ॥ ततोजनकराजेनमंदिरेसन्निवेशितः ॥ शोभनेसर्वभोगाढ्येसदारःससुतःसुखी ॥ ४४ ॥ ततःशुभेदिनेलग्नेसुमुहूर्तैरघूत्तमम् ॥ आनयामासधर्मज्ञोरामंसभ्रातृकंतदा ॥ ४५ ॥ रत्नस्तंभसुविस्तारेसुवितानेसुतोरणे ॥ मंडपेसर्वशोभाढ्येमुक्तापुष्पफलान्विते ॥ ४६ ॥ वेदविद्भिः[1]सुसंबाधेब्राह्मणैःस्वर्ण[2]भूषितैः ॥ सुवासिनीभिःपरितोनिष्ककंठीभिरावृते ॥ ४७ ॥ भेरीदुंदुभिनिर्घोषैर्गीतनृत्यैःसमाकुले ॥ दिव्यरत्नांचितेस्वर्णपीठेरामंन्यवेशयत् ॥ ४८ ॥

---

[1] वेदज्ञापितार्थप्रतिपादकसूत्रस्मृतिपुराणेतिहासतत्तत्कालिकव्यवहारज्ञैः [2] स्वर्णमयानि भूषितानिभूषणानिकुंडलादीनियेषांतैः ।

रामस्योभयपार्श्वयोःस्थितंवसिष्ठंकौशिकंचयथाक्रमंपूर्ववसिष्ठंततःकौशिकमितिक्रमेणपूजयित्वेत्यन्वयः ॥ ४९ ॥ सीतामानीयअग्रेकृत्वा ॥ ५० ॥ सभार्योजनकोरामंप्रतिप्रायादित्यन्वयः ॥ ५१ ॥ याःगंगारूपाः ॥ ५२ ॥ ५३ ॥ सीतानाम्नीमेसुतातुभ्यंदीयतेप्रीतोभवेति अनेननिष्कामतयाभगवत्प्रीतये

वसिष्ठंकौशिकंचैवशतानंदःपुरोहितः॥ यथाक्रमंपूजयित्वारामस्योभयपार्श्वयोः॥ ४९॥ स्थापयित्वासतत्राग्निंज्वालयित्वायथाविधि॥ सीतामानीयशोभाढ्यांनानारत्नविभूषिताम्॥ ५० ॥ सभार्योजनकःप्रायाद्रामंराजीवलोचनम्॥ पादौप्रक्षाल्यविधिवत्तदपोमूर्ध्न्यधारयत्॥ ५१॥ याधृतामूर्ध्निशर्वेणब्रह्मणामुनिभिःसदा॥ ततःसीतांकरेधृत्वासाक्षतोदकपूर्वकम्॥ ५२॥ रामायप्रददौप्रीत्यापाणिग्रहविधानतः॥ सीताकमलपत्राक्षीस्वर्णमुक्तादिभूषिता॥ ५३ ॥ दीयतेमेसुतातुभ्यंप्रीतोभवरघूत्तम॥ इतिप्रीतेनमनसासीतांरामकरेऽर्पयन्॥ ५४ ॥ मुमोदजनकोलक्ष्मींक्षीराब्धिरिवविष्णवे॥ ऊर्मिलांचौरसींकन्यांलक्ष्मणायददौमुदा॥ ५५॥ तथैवश्रुतकीर्तिंचमांडवींभ्रातृकन्यके॥ भरतायददावेकांशत्रुघ्नायापरांददौ॥ ५६ ॥ चत्वारोदारसंपन्नाभ्रातरःशुभलक्षणाः॥ विरेजुःप्रभयासर्वेलोकपालाइवापरे॥ ५७॥ ततोऽब्रवीद्वसिष्ठायविश्वामित्रायमैथिलः॥ जनकःस्वसुतोदंतं[1]नारदेनाभिभाषितम्॥ ५८॥ यज्ञभूमिविशुद्ध्यर्थंकर्षतोलांगलेनमे॥ सीतामुखात्समुत्पन्नाकन्यकाशुभलक्षणा॥ ५९॥ तामद्राक्षमहंप्रीत्यापुत्रिकाभावभाविताम्॥ अर्पिताप्रियभार्यायैशरच्चंद्रनिभानना॥ ६० ॥

दानंकृतवानितिसूच्यते ॥ ५४ ॥ रामकरेसीतामर्पयन्जनकोलक्ष्मींविष्णवेऽर्पयन्समुद्रइवमुमोद ॥ ५५ ॥ भ्रातृकन्यकेकुशध्वजकन्यके ॥ ५६ ॥ ५७ ॥ ॥ ५८ ॥ सीतामुखात्लांगलाग्रकृतभूविवरात् ॥ ५९ ॥ पुत्रिकाभावेनभावितांध्याताम् ॥ ६० ॥

---

[1] सीताविर्भाववृत्तांतं।

महतींमहतीसंज्ञां विश्वावसोस्तुबृहतीतुंबुरोस्तुकलावती महतीनारदस्यस्यात्सरस्वत्यास्तुकच्छपीत्युक्तेः ॥ ६१ ॥ ६२ ॥ ६३ ॥ चतुर्धारामलक्ष्मणभरतशत्रुघ्न

एकदानारदोभ्यागाद्विविक्तेमयिसंस्थिते ॥ रणयन्महतींवीणांगायन्नारायणंविभुम् ॥ ६१ ॥ पूजितःसुखमासीनो
मामुवाचसुखान्वितः ॥ शृणुष्ववचनंगुह्यंतवाभ्युदयकारणम् ॥ ६२ ॥ परमात्माहृषीकेशोभक्तानुग्रहकाम्यया ॥
देवकार्यार्थसिद्ध्यर्थंरावणस्यवधायच ॥ ६३ ॥ जातोरामइतिख्यातोमायामानुषवेषधृक् ॥ आस्तेदाशरथिर्भूत्वाचतुर्धापरमेश्वरः ॥ ६४ ॥ योगमायाऽपिसीतेतिजातावैतववेश्मनि ॥ अतस्त्वंराघवायैवदेहिसीतांप्रयत्नतः ॥ ६५ ॥
ना[1]न्येभ्यःपूर्वभार्यैषारामस्यपरमात्मनः ॥ इत्युक्त्वाप्रययौदेवगतिंदेवमुनिस्तदा ॥ ६६ ॥ तदारभ्यमयासीताविष्णोर्लक्ष्मीर्विभाव्यते ॥ कथंमयाराघवायदीयतेजानकीशुभा ॥ ६७ ॥ इतिचिंतासमाविष्टःकार्यमेकमचिंतयम् ॥ मत्पितामहगेहेतुन्या[2]सभूतमिदंधनुः ॥ ६८ ॥ ईश्वरेणपुराक्षिप्तंपुरदाहादनंतरम् ॥ धनुरेतत्पणंकार्यमितिचिंत्यकृतंतथा
॥ ६९ ॥ सीतापाणिग्रहार्थायसर्वेषांमाननाशनम् ॥ त्वत्प्रसादान्मुनिश्रेष्ठरामोराजीवलोचनः ॥ ७० ॥ आगतोऽत्र
धनुर्द्रष्टुंफलितोमेमनोरथः ॥ अद्यमेसफलंजन्मरामत्वांसहसीतया ॥ ७१ ॥

रूपेण ॥ ६४ ॥ ६५ ॥ पूर्वभार्याअनादिशक्तिःसैवविराड्रूपभरणादस्यभार्या देवगतिंदेवलोकमार्गम् ॥ ६६ ॥ ६७ ॥ पितामहशब्देनतदादयोवंश्याः ॥ ६८ ॥ इतिचिंत्येत्येकंपदमितिल्यपोनानुपपत्तिः इतिविचार्यतथाकृतंपणभूतं तत्कृतमित्यर्थः ॥ ६९ ॥ ७० ॥ यत्पश्यामितन्मेजन्मसफलमित्यन्वयः ॥ ७१ ॥

---

[1] देहीत्यनुकर्षः . [2] नितरामास्तेदेवतायत्रेतिव्युत्पत्यान्यासोदेवपूजास्थानंन्यासभूतंपूजास्थानभूतंतत्पूजार्थंशत्रुवधार्थंचदेवराताय क्षिप्तंदत्तमित्यर्थः निक्षेपपरतयाव्याख्यानेतुनिक्षेपस्यशुल्कीकरणमनुचितंभगवतातद्भंगेचनिक्षेपारक्षणप्रयुक्तदोषभागिताचजनकस्यस्यादितिउपरितनव्याख्यैवजायसीतिसुधियः.

त्वत्पादांबुगंगारूपम् ॥ ७२ ॥ ७३ ॥ अधिरक्षिता अधिकोरक्षितेत्यर्थः ॥ ७४ ॥ यस्यरामस्यपादपंकजपरागेषुसुतरांरागोयेषांतैर्योगिवृंदैर्भवभयंसंसारभयंजितं देवाःयन्नामकीर्तनपराजितदुःखशोकाःजाताइतिशेषः ॥ ७५ ॥ दीनाराणामिति दीनारोरूपकैरष्टाविंशत्यापरिकीर्तितः सुवर्णसप्ततितमोभागोरूपकइष्यतइतिविष्णुगुप्तोक्तेः कात्यायनस्तु कार्षापणैश्चतुर्भिस्तुविज्ञेयोधान्यकोबुधैः तेद्वादशसुवर्णस्तुदीनारस्तुत्रिकःस्मृतइति कार्षापणोदक्षिणस्यांदिशिरौप्यःप्रवर्तते प

एकासनस्थंपश्यामिभ्राजमानंरविंयथा ॥ त्वत्पादांबुधरोब्रह्मासृष्टिचक्रप्रवर्तकः ॥ ७२ ॥ बलिस्त्वत्पादसलिलंधृत्वा
ऽभूद्दिविजाधिपः ॥ त्वत्पादपांसुसंस्पर्शादहल्याभर्तृशापतः ॥ ७३ ॥ सद्यएवविनिर्मुक्ताकोन्यस्त्वत्तोऽधिरक्षिता
॥ ७४ ॥ यत्पादपंकजपरागसुरागयोगिवृंदैर्जितंभवभयंजितकालचक्रैः ॥ यन्नामकीर्तनपराजितदुःखशोकादेवा
स्तमेवशरणंसततंप्रपद्ये ॥ ७५ ॥ इतिस्तुत्वानृपःप्रादाद्राघवायमहात्मने ॥ दीनाराणांकोटिशतंरथानामयुतंतदा
॥ ७६ ॥ अश्वानांनियुतंप्रादाद्गजानांषट्शतंतथा ॥ [1]पत्तीनांलक्षमेकंतुदासीनांत्रिशतंददौ ॥ ७७ ॥ दिव्यांबराणि
हारांश्चमुक्तारत्नमयोज्ज्वलान् ॥ सीतायैजनकःप्रादात्प्रीत्यादुहितृवत्सलः ॥ ७८ ॥ वसिष्ठादीन्सुसंपूज्यभरतंलक्ष्मणंत
था ॥ पूजयित्वायथान्यायंतथादशरथंनृपम् ॥ ७९ ॥ प्रस्थापयामासनृपोराजानंरघुसत्तमम् ॥ सीतामालिंग्यरुदतीं
मातरःसाश्रुलोचनाः ॥ ८० ॥ श्वश्रूशुश्रूषणपरानित्यंराममनुव्रता ॥ पातिव्रत्यमुपालंब्यतिष्ठवत्सेयथासुखम् ॥ ८१ ॥

णैर्निबद्धःपूर्वस्यांषोडशैवपणाःस्त्विति षोडशपणरूप्यंदक्षिणस्थःकार्षापणइत्यर्थः अयुतंदशसहस्रम् ॥ ७६ ॥ नियुतंदशलक्षम् ॥ ७७ ॥ मुक्तारत्नमयोज्ज्वलान्हारानित्यन्वयः ॥ ७८ ॥ पूजयित्वायथोचितधनदानैरित्यर्थः ॥ ७९ ॥ ८० ॥ पातिव्रत्यंपुराणाद्युक्तपतिव्रताधर्मंभर्त्रादिवाक्यानुल्लंघनादिरूपं वत्सेतिष्ठेत्येवंशिक्षयामासुरित्यर्थः ॥ ८१ ॥

---

[1] पदातीनां .

आनकोदुंदुभिःतत्प्रभृतितूर्यसंबंधिघोषःस्वर्वासिभेर्यादिशब्दैःसंमूर्च्छितोमिश्रितःसन्प्राणिनांभयंकरोऽभूत् घनंकांस्यतालादि ॥ ८२ ॥ इतिश्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिबि० अध्यात्मरामायणसेतौबालकांडेषष्ठःसर्गः ॥ ६ ॥ ॥ ७ ॥ ॥ मैथिलात्मैथिलपुरात् घोराणिनिमित्तानिअशुभसू

प्रयाणकालेरघुनंदनस्यभेरीमृदंगानकतूर्यघोषः ॥ स्वर्वासिभेरीघनतूर्यशब्दैःसंमूर्च्छितोभूतभयंकरोऽभूत् ॥ ८२ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेबालकांडेषष्ठःसर्गः ॥ ६ ॥ ॥ ७ ॥ ॥ सूतउवाच ॥ अथगच्छति श्रीरामेमैथिलाद्योजनत्रयम् ॥ निमित्तान्यतिघोराणिददर्शनृपसत्तमः ॥ १ ॥ नत्वावसिष्ठंपप्रच्छकिमिदंमुनिपुंगव ॥ निमित्तानीहदृश्यंतेविषमाणि[1]समंततः ॥ २ ॥ वसिष्ठस्तमथप्राहभयमागामिसूच्यते ॥ पुनरप्यभयंतेऽद्यशीघ्रमेवभविष्यति ॥ ३ ॥ मृगाःप्रदक्षिणंयांतिपश्यत्वां[2]शुभसूचकाः ॥ इत्येवंवदतस्तस्यववौघोरतरोऽनिलः ॥ ४ ॥ मुष्णंश्चक्षूंषिसर्वेषांपांसुवृष्टिभिरर्दयन् ॥ ततोव्रजन्ददर्शाग्रेतेजोराशिमुपस्थितम् ॥ ५ ॥ कोटिसूर्यप्रतीकाशंविद्युत्पुंजसमप्रभम् ॥ तेजोराशिंददर्शाथजामदग्न्यंप्रतापवान् ॥ ६ ॥ नीलमेघनिभंप्रांशुंजटामंडलमंडितम् ॥ धनुःपरशुपाणिंचसाक्षात्कालमिवांतकम् ॥ ७ ॥ कार्तवीर्यांतकंरामंदृप्त[3]क्षत्रियमर्दनम् ॥ प्राप्तंदशरथस्याग्रेकालमृत्युमिवापरम् ॥ ८ ॥ तंदृष्ट्वाभयसंत्रस्तोराजादशरथस्तदा ॥ अर्घ्यादिपूजांविस्मृत्यत्राहित्राहीतिचाब्रवीत् ॥ ९ ॥ दंडवत्प्रणिपत्याहपुत्रप्राणंप्रयच्छमे ॥ इतिब्रुवंतंराजानमनादृत्यरघूत्तमम् ॥ १० ॥

चकाउत्पाताः ॥ १ ॥ २ ॥ ३ ॥ मृगास्त्वांप्रदक्षिणंयांतिपश्येत्यन्वयः ॥ ४ ॥ मुष्णन्दर्शनशक्तिरहितानिकुर्वन् ॥ ५ ॥ ६ ॥ ७ ॥ अंतकंअंतकर्तारंकालमिव ॥ ८ ॥ ९ ॥ १० ॥

---

[1] अनिष्टसूचकानि . [2] प्रतीतिशेषः . [3] द्वयोराद्ययोःकर्मधारयोंत्येनतत्पुरुषः .

राजानमनादृत्यरघूत्तममुवाचेत्यन्वयः मेनाम्नामदीयनाम्नाप्रसिद्धःसन्पृथ्वींचरसि अतोमन्नामहारकत्वान्मच्छत्रुरसि एवमपिक्षत्रियत्वाभिमानश्चेद्द्वंद्वयुद्धंप्रयच्छ ॥ ११ ॥ १२ ॥ त्वयियुद्धायोद्यतेऽपितावन्नयोत्स्ये यावत्तेपरीक्षांनप्राप्स्ये वैष्णवचापारोपणेनतुत्वद्बलंविज्ञाय[1]त्वयायोत्स्यामीत्याह तदायुद्धमिति तत्र[2]तवासामर्थ्येतुत्वदीयसकलवधःप्रशस्तइतिभावः ॥ १३ ॥ १४ ॥ सर्वेषामपिचक्षुषांसर्वसंबंधिचक्षुषामित्यर्थः ॥ १५ ॥ १६ ॥ लक्ष्यंभेद्यम् ॥ १७ ॥

उवाचनिष्ठुरंवाक्यंक्रोधात्प्रचलितेंद्रियः ॥ त्वंरामइतिनाम्नामेचरसिक्षत्रियाधम ॥११॥ द्वंद्वयुद्धंप्रयच्छाशुयदित्वंक्षत्रियोऽसिवै ॥ पुराणंजर्जरंचापंभंक्त्वात्वंकत्थसेमुधा ॥ १२ ॥ अस्मिंस्तुवैष्णवेचापेआरोपयसिचेद्गुणम् ॥ तदायुद्धंत्वयासार्धंकरोमिरघुवंशज ॥ १३ ॥ नोचेत्सर्वान्हनिष्यामिक्षत्रियांतकरोह्यहम् ॥ इतिब्रुवतिवैतस्मिंश्चचालवसुधाभृशम् ॥ १४ ॥ अंधकारोबभूवाथसर्वेषामपिचक्षुषाम् ॥ रामोदाशरथिर्वीरोवीक्ष्यतंभार्गवंरुषा ॥१५॥ धनुराच्छिद्यतद्धस्तादारोप्यगुणमंजसा ॥ तूणीराद्बाणमादायसंधायाकृष्यवीर्यवान् ॥ १६ ॥ उवाचभार्गवंरामंशृणुब्रह्मन्वचोमम ॥ लक्ष्यंदर्शयबाणस्यह्यमोघोममसायकः ॥ १७ ॥ लोकान्पादयुगंवापिवदशीघ्रंममाज्ञया ॥ अयंलोकःपरोवाथत्वयागंतुंनशक्यते ॥ १८ ॥ एवंत्वांहिप्रकर्तव्यंवदशीघ्रंममाज्ञया ॥ एवंवदतिश्रीरामेभार्गवोविकृताननः ॥ १९ ॥ संस्मरन्पूर्ववृत्तांतमिदंवचनमब्रवीत् ॥ रामरामहाबाहोजानेत्वांपरमेश्वरम् ॥ २० ॥

लोकान्तपोर्जितान् परलोकगतिमितियावत् पादयुगंचरणयुगलम् इहलोकेतीर्थादिगतिमितियावत् ममाज्ञयेत्यनेनस्वस्यस्वरूपाविर्भावंसूचयति उक्तमेवार्थं स्फुटमाह अयमिति यथात्वयाअथैतदनंतरमयंलोकःपरोवागंतुंनशक्यते एवंतथात्वांप्रतिकर्तव्यंममवर्ततेतच्छीघ्रंवदेत्यर्थः ॥१८॥ विकृताननःप्राप्तपराभवत्वादितिशेषः ॥ १९ ॥ २० ॥

---

[1] वैष्णवधनुषिज्यारोपणेविष्णोरेवसामर्थ्यं, ज्यारोपणेचनिःसंशयंविष्णुत्वज्ञानाद्विष्णुनाममयुद्धसामर्थ्याभावाद्युद्धाभावः . [2] युद्धविषये .

पुराणपुरुषम् अनादित्वात् नवद्वारासुसर्वपूर्षुशयनाच्च विष्णुंव्यापकम् अंतर्बहिश्चसर्वत्रप्रविष्टंवा जगत्सर्गलयोद्भवंजगतःसृष्टिसंहारस्थितयोयस्मात्तम् ॥२१॥ ॥ २२ ॥ २३ ॥ फलितंफलसमर्थंजातम् मच्चिदंशेनमद्रूपचिदाश्रयशक्त्यंशेन ॥ २४ ॥ कार्तवीर्यंपितृहणमिति तपसःश्रमःतपोरूपश्रमः राहोःशिरइतिवत्

पुराणपुरुषंविष्णुंजगत्सर्गलयोद्भवम् ॥ बाल्येऽहंतपसाविष्णुमाराधयितुमंजसा ॥ २१ ॥ चक्रतीर्थंशुभंगत्वातपसाविष्णुमन्वहम् ॥ अतोषयंमहात्मानंनारायणमनन्यधीः ॥ २२ ॥ ततःप्रसन्नोदेवेशःशंखचक्रगदाधरः ॥ उवाचमांरघुश्रेष्ठ प्रसन्नमुखपंकजः ॥ २३ ॥ ॥श्रीभगवानुवाच॥ ॥ उत्तिष्ठतपसोब्रह्मन्फलितंतेतपोमहत् ॥ मच्चिदंशेनयुक्तस्त्वंजहि हैहयपुंगवम् ॥ २४ ॥ कार्तवीर्यंपितृहणंयदर्थंतपसःश्रमः ॥ ततस्त्रिःसप्तकृत्वस्त्वंहत्वाक्षत्रियमंडलम् ॥ २५ ॥ कृत्स्नांभूमिंकश्यपायदत्त्वाशांतिमुपावह ॥ त्रेतामुखेदाशरथिर्भूत्वारामोऽहमव्ययः ॥ २६ ॥ उत्पत्स्येपरयाशक्त्यातदाद्रक्ष्यसिमां ततः ॥ मत्तेजःपुनरादास्येत्वयिदत्तंमयापुरा ॥ २७ ॥ तदातपश्चरँल्लोकेतिष्ठत्वंब्रह्मणोदिनम् ॥ इत्युक्त्वांतर्दधेदेवस्तथासर्वंकृतंमया ॥ २८ ॥ सएवविष्णुस्त्वंरामजातोऽसिब्रह्मणार्थितः ॥ मयिस्थितंतुत्वत्तेजस्त्वयैवपुनराहृतम् ॥ २९ ॥ अद्यमेसफलंजन्मप्रतीतोऽसिममप्रभो ॥ ब्रह्मादिभिरलभ्यस्त्वंप्रकृतेःपारगोमतः ॥ ३० ॥

॥ २५ ॥ २६ ॥ परयाशक्त्यात्वयिविद्यमानशक्त्यंशादधिकयाशक्त्या ततोदर्शनानंतरंमयात्वयिदत्तंमत्तेजःपुरायदापुनरादास्येतदेत्यन्वयः ॥ २७ ॥ ब्रह्मणोदिनंचतुर्युगसहस्राख्यम् ॥ २८ ॥ सएवपुराममवरदएव ॥ २९ ॥ ममप्रतीतोऽसि मयाप्रत्यभिज्ञातोसीत्यर्थः ननुमत्प्रत्यभिज्ञायाःकिमेवंदौर्लभ्यंयेनैवंसंभ्रमस्तत्राह ब्रह्मादिभिरिति तदलभ्यत्वेहेतुःप्रकृतेःपारगइति ॥ ३० ॥

---

१ आविर्भविष्ये .

त्वयिजन्मादिषड्भावानसंत्यज्ञानसंभवाः ॥ निर्विकारोऽसिपूर्णस्त्वंगमनादिविवर्जितः ॥ ३१ ॥ यथाजलेफेनजालंधूमोवह्नौतथात्वयि ॥ त्वदाधारात्वद्विषयामायाकार्यंसृजत्यहो ॥ ३२ ॥ यावन्मायावृतालोकास्तावत्त्वांनविजानते ॥ अविचारितसिद्धैषाऽविद्याविद्याविरोधिनी ॥ ३३ ॥ अविद्याकृतदेहादिसंघातेप्रतिबिंबिता ॥ चिच्छक्तिर्जीवलोकेऽस्मिन्जीवइत्यभिधीयते ॥ ३४ ॥ यावद्देहमनःप्राणबुद्ध्यादिष्वभिमानवान् ॥ तावत्कर्तृत्वभोक्तृत्वसुखदुःखादिभाग्भवेत् ॥ ३५ ॥

जन्मादिषड्भावाः जायतेऽस्तिवर्धतेविपरिणमतेऽपक्षीयतेनश्यतीत्येवंरूपाःषड्भावविकारास्तेयतस्त्वंपूर्णोंज्ञानेनातोऽज्ञानसंभवास्तेत्वयिनसंतिअतस्त्वंनिर्विकारोगमनादिविवर्जितश्चासि ॥ ३१ ॥ ननुतेजोहरणादिक्रियायाइदानीमेवोक्तेःकथंनिष्क्रियत्वमतआह यथेति यथाशुद्धेएवजलादौफेनजलादिऔपाधिकंतथात्वयिक्रियौपाधिकीत्यर्थः उपाधिमेवाह त्वदाधारेति अन्यान्प्रतित्वामावृणोतीतित्वद्विषयाअस्वतंत्रतयात्वदधीनत्वात्त्वदाधाराचसेतिभावः ॥ ३२ ॥ उक्तंत्वद्विषयत्वमेवदर्शयति यावदिति साकुतस्तत्राह अविचारितसिद्धेति अनादिसिद्धाविचारेणैवसिद्धेतिअनादिःसेतिभावः सैवमायाविद्याब्रह्मज्ञानंतद्विरोधिनीतस्मिन्सतिनश्यतितदुत्पत्तिंप्रतिबध्नातिच अतोविद्यापदेनोच्यतइत्यर्थः विद्याविद्येश्रुतिप्रोक्तेएकत्वान्यधियौहितेइतिअभियुक्तोक्तेः ॥ ३३ ॥ कार्यंसृजत्यहोइत्युक्तंतत्कार्यंदर्शयति अविद्येति देहादिसंघातेआदिनेंद्रियादितत्संघातावच्छिन्नेंऽतःकरणेप्रतिबिंबिताअनिर्वाच्यसंबंधेनसंबद्धाचिच्छक्तिःप्राणादिप्रेरकत्वेनप्राणधारकतयाजीवइत्युच्यते जीवप्राणधारणइतिधातोः ॥ ३४ ॥ ननुचिच्छक्तेरक्रियत्वेनजीवेकर्तृत्वादिव्यवहारःकथमतआह यावदिति अभिमानोऽहमितिबुद्धिः यावद्विवेकाभावमूलकोदेहादिसंघातेऽहमितिअभिमानस्तावत्कर्तृत्वाद्यारोपेणतद्वानिवेत्यर्थः ॥ ३५ ॥

विशिष्टेएवकर्तृत्वादीत्युक्तमर्थंप्रत्येकंतन्निषेधेनद्रढयति आत्मनइति संसृतिःकर्तृत्वभोक्तृत्वाद्यभिमानकृतःसंसारोनास्तिअपरिणामित्वादितिभावः एवंबुद्धेर्ज्ञानंनजडत्वादितिभावः तस्मात्तद्द्वयंयुंक्त्वाऽहमितिबुद्ध्यागृहीत्वा तत्रहेतुरविवेकःसंसारीजीवइति अहंकर्ताभोक्तेत्यादिरूपेणप्रवर्ततेव्यवहरति तदुक्तं नबुद्धेरवबोधोऽस्तिनात्मनोविद्यतेक्रिया अतोनान्यतरस्यापिजानातीतितुयुज्यतेइति ॥ ३६ ॥ नन्वेवंबुद्धेश्चितीसंज्ञानइतिधातुनिष्पन्नचित्तव्यवहारानुपपत्तिरतआह जडस्येति नन्वेवमहमज्ञइतिव्यवहारानुपपत्तिरतआह तथाचितेर्जडसंयोगाज्जडत्वं संमेलनेमिथोऽन्योन्यधर्मतिरोभावेदृष्टांतमाह जलाग्न्योर्मेघविद्युज्जलयोरित्यर्थः विद्युतःप्रकाशंजातमपिजलंआवृणोति जलस्वरूपंजडमपिअग्निसंयोगाद्विद्युद्रूपेणप्रकाशरूपतांप्राप्नोतीत्यर्थः ॥ ३७ ॥ नन्वेवंयदिसंसृतस्तर्हिक

आत्मनःसंसृतिर्नास्तिबुद्धेर्ज्ञानंनजात्विति॥ अविवेकाद्द्वयंयुंक्त्वासंसारीतिप्रवर्तते ॥ ३६ ॥ जडस्यचित्समायोगाच्चित्त्वंभूयाच्चितेस्तथा॥ जडसंगाज्जडत्वंहिजलाग्न्योर्मेलनंयथा ॥ ३७ ॥ यावत्त्वत्पादभक्तानांसंगसौख्यंनविंदति॥ तावत्संसारदुःखौघान्ननिवर्तेन्नरःसदा॥ ३८ ॥ सत्संगलब्धयाभक्त्यायदात्वांसमुपासते॥ तदामायाशनैर्यातितानवंप्रतिपद्यते॥ ३९ ॥ ततस्त्वज्ज्ञानसंपन्नःसद्गुरुस्तेनलभ्यते॥ वाक्यज्ञानंगुरोर्लब्ध्वात्वत्प्रसादाद्विमुच्यते॥ ४० ॥ तस्मात्त्वद्भक्तिहीनानांकल्पकोटिशतैरपि॥ नमुक्तिशंकाविज्ञानशंकानैवसुखंतथा॥ ४१ ॥

थंमुच्यतेतत्राह यावदिति संगसौख्यंसंगाज्जायमानंसुखंनविंदति[1]नप्राप्नोतितावदित्यर्थः ॥ सौख्यमितिस्वार्थेष्यञ् निवर्तेदितिपरस्मैपदमार्षम् ॥ ३८ ॥ सतांसंगेनलब्धयाभक्त्यात्वांयदाजनाःसमुपासतेतदातेभ्यःमायाशनैर्मंदंयातिअपसरति विक्षेपशक्तिंत्यजतीत्यर्थः अतएवसातानवंप्रतिपद्यते ॥ ३९ ॥ तवज्ञानमभेदेनयत्तत्संयुक्तःसद्गुरुस्त्वद्भक्तियोगात्तेनलभ्यते तदनंतरंतादृशगुरोःसकाशाद्वाक्यज्ञानंतत्त्वमसीतिवाक्यार्थाखंडार्थज्ञानंत्वत्प्रसादाल्लब्ध्वाविमुच्यते आचार्यवान्पुरुषोवेदेतिश्रुतेः उपदेक्ष्यंतितेज्ञानंज्ञानिनस्तत्त्वदर्शिनइतिस्मृतेश्च ॥ ४० ॥ मुक्तिशंकामुक्तिप्राप्तिसंभावनापिन तथासुखंनैवेत्यर्थः ॥ ४१ ॥

---

[1] विद्लृलाभे एतस्माल्लुटितिशौ .

भक्तिकारणंभक्तिमत्संगः याभ्यांभक्तिमत्संगतज्जन्यभक्तिभ्यांविद्यासाक्षात्परंपरयाचमिलित्वानश्यति ॥ ४२ ॥ त्वद्धर्मस्तत्त्वज्ञानंतद्रूपामृतवर्षणशीलास्तदुपदेष्टारस्तेनतेषांतत्त्वमर्थसिद्धम् ॥ ४३ ॥ कारुणिकेतिसंबोधनंप्रकृतोपयोगाय ॥ ४४ ॥ तवबाणायभूयात् त्वद्बाणनाश्यंभूयादित्यर्थः अनेनसर्वकर्मक्षयेण मुक्तिंदेहीतिव्यंग्यम् ॥ ४५ ॥ तद्व्यंग्यंबुद्ध्वातद्दानंभगवान्प्रतिजानीते ततइत्यादि ॥ ४६ ॥ अत्रत्वत्कामदाने ॥ ४७ ॥ सोऽपिमुक्तिकारणसंपदंप्रार्थयते यदी

अतस्त्वत्पादयुगलेभक्तिर्मेजन्मजन्मनि॥ स्यात्त्वद्भक्तिमतांसंगोविद्यायाभ्यांविनश्यति ॥ ४२ ॥ लोकेत्वद्भक्तिनिरता
स्त्वद्धर्मामृतवर्षिणः॥ पुनंतिलोकमखिलंकिंपुनःस्वकुलोद्भवान्॥ ४३ ॥ नमोऽस्तुजगतांनाथनमस्तेभक्तिभावन॥ न
मःकारुणिकानंतरामचंद्रनमोऽस्तुते ॥ ४४ ॥ देवयद्यत्कृतंपुण्यंमयालोकजिगीषया॥ तत्सर्वंतवबाणायभूयाद्रामन
मोस्तुते॥ ४५॥ ततःप्रसन्नोभगवान्श्रीरामःकरुणामयः ॥ प्रसन्नोऽस्मितवब्रह्मन्यत्तेमनसिवर्तते ॥ ४६ ॥ दास्येतद
खिलंकामंमाकुरुष्वात्रसंशयम्॥ ततःप्रीतेनमनसाभार्गवोराममब्रवीत्॥ ४७ ॥ यदिमेनुग्रहोरामतवास्तिमधुसूदन
॥ त्वद्भक्तसंगस्त्वत्पादेदृढाभक्तिःसदास्तुते[1] ॥ ४८ ॥ स्तोत्रमेतत्पठेद्यस्तुभक्तिहीनोऽपिसर्वदा॥ त्वद्भक्तिस्तस्यविज्ञानंभू
यादंतेस्मृतिस्तव॥ ४९ ॥ तथेतिराघवेणोक्तःपरिक्रम्यप्रणम्यतम्[2]॥ [3]पूजितस्तदनुज्ञातोमहेंद्राचलमन्वगात्॥ ५० ॥ रा
जादशरथोहृष्टोरामंमृतमिवागतम्॥ आलिंग्यालिंग्यहर्षेणनेत्राभ्यांजलमुत्सृजत्॥ ५१ ॥

ति मधुसूदनेत्यनेनमोक्षप्रतिबंधकमत्कर्मनाशनेत्वंसमर्थइतिव्यज्यते ॥ ४८ ॥ विज्ञानंत्वदभेदसाक्षात्कारः ॥ इदंभक्तिफलं यदिकदाचिदिदंनस्यात्तर्हिअंतेमरणकालेतवस्मृतिरवश्यंभूयादितिलोकोपकारायप्रार्थयते अंतेयामतिःसागतिरितिन्यायात्तत्स्मृतौतल्लाभोऽवश्यंभावीतिभावः ॥ ४९ ॥ ५० ॥ मृतमिवागतंक्षत्रियकुलांतकात्परावर्तनेनतथासंभावना उत्सृजत्उदसृजदित्यर्थः अडभावआर्षः ॥ ५१ ॥

---

१ उत्तरश्लोकस्थस्तोत्रशब्दान्वयी । २ दाशरथिं । ३ ब्राह्मणत्वाद्रामेणपूजितोरामेणानुज्ञातश्च ।

देवसंमिताःदेवतुल्याः ॥ ५२ ॥ ५३ ॥ ५४ ॥ युधाजितंसंपूज्यभरतंशत्रुघ्नंचापिप्रेषयामासेत्यन्वयः ॥ ५५ ॥ पौलोम्यापुलोमापत्यभूतयाशच्याशक्रेणच
देवमातेत्यर्थः ॥ ५६ ॥ साकेतेअयोध्यायां लोकनाथेषुप्रथिताःप्रसिद्धगुणगणायस्यसः लोकैःसम्यग्गीताकीर्तिर्यस्य सकलजनसमूहस्यानंदसमूहरूपामूर्ति

ततःप्रीतेनमनसास्वस्थचित्तःपुरंययौ ॥ रामलक्ष्मणशत्रुघ्नभरतादेवसंमिताः ॥ ५२ ॥ स्वांस्वांभार्यामुपादायरेमिरेस्व
स्वमंदिरे[1] ॥ मातापितृभ्यांसंहृष्टोरामःसीतासमन्वितः ॥ ५३ ॥ रेमेवैकुंठभवनेश्रियासहयथाहरिः ॥ युधाजिन्नामकै
केयीभ्राताभरतमातुलः ॥ ५४ ॥ भरतंनेतुमागच्छत्[2]स्वराज्यंप्रीतिसंयुतः ॥ प्रेषयामासभरतंराजास्नेहसमन्वितः ॥ श
त्रुघ्नंचापिसंपूज्ययुधाजितमरिंदमः ॥ ५५ ॥ कौसल्याशुशुभेदेवीरामेणसहसीतया ॥ देवमातेवपौलोम्याशच्याशक्रेणशो
भना ॥ ५६ ॥ साकेते[3]लोकनाथप्रथितगुणगणोलोकसंगीतकीर्तिःश्रीरामःसीतयास्तेऽखिलजननिकरानंदसंदोहमूर्तिः ॥
नित्यश्रीर्निर्विकारोनिरवधिविभवोनित्यमायानिरासोमायाकार्यानुसारीमनुजइवसदाभातिदेवोऽखिलेशः ॥ ५७ ॥
इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेबालकांडेसप्तमःसर्गः ॥ ७ ॥ ॥ छ ॥ अध्यात्मबालकांडेचसर्गाः
सप्तैवशंभुना ॥ दिष्टाःषष्ट्युत्तरत्रिंशच्छ्लोका[4]मोक्षप्रदानृणाम् ॥ ३६० ॥ अयंकांडःसमाप्तः ॥ ॥ छ ॥

र्यस्यशतगुणानंदत्वात्तस्येतिभावः नित्यंश्रीःपराशक्तिर्यस्य अतएवनिरवधिविभवः नित्यंमायायाआवरणशक्तिरूपायानिरासोयस्मात् मायासर्वथायंप्रत्यना
वरिकेतिभावः मायाकार्यंसर्वमनुसरतिसत्तास्फूर्तिभ्यांव्याप्नोतितादृशःदेवोऽपिअखिलेशोऽपिमाययैवयोमनुजइवभाति ॥ ५७ ॥ ॥ इतिश्रीमत्सकलरा
ज० अध्यात्मरामायणसेतौबालकांडेसप्तमःसर्गः ॥ ७ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

---

१ स्वभावोक्तिः । २ प्राप्तः । ३ अयोध्यायां । ४ त्रिशतवाचीत्रिंशच्छब्दोत्रार्थादवगंतव्यः ।

॥ इति श्रीमदध्यात्मरामायणे बालकांडः समाप्तः ॥

॥ अथ श्रीमद्ध्यात्मरामायणे अयोध्याकांडः प्रारभ्यते ॥

अयोध्याकांड २.


पार्वती
शंकर
मं०
कै०
दश०
राम०
ल०
सी०
रा०
ल० सी०
व०
रा०
ल० सी०

श्रीगणेशायनमः ॥ प्रथमेत्वथसर्गेऽत्ररामोनारदसंस्तुतः प्रतिज्ञांरावणवधेकृतवानितिवर्ण्यते ॥ १ ॥ अथकांडेद्वितीयेनारदमुखेनरावणवधप्रवृत्तिरित्याह भगवान्शिवः एकदेति ॥ १ ॥ कौस्तुभेनामुक्तायुक्ताभूषितावाकंधरायस्यतम् कौस्तुभशब्देनात्रतन्नामकस्तदाकारोभूषणविशेषः ॥ २ ॥ तांबूलचर्वणादिभिर्विनोदयंतंक्रीडयंतंसीतामितिशेषः द्रष्टुमर्थाद्राघवम् यत्रराघवस्तत्रदेशेंऽबरात्आकाशादवरत्अवातरदित्यर्थः ॥ ३ ॥ ४ ॥ ५ ॥ संसारिणामेवदुर्लभम् तत्रापिवि

श्रीमहादेवउवाच ॥ एकदासुखमासीनंरामंस्वांतःपुराजिरे ॥ सर्वाभरणसंपन्नंरत्नसिंहासनेस्थितम् ॥ १ ॥ नीलोत्पलदलश्यामंकौस्तुभामुक्तकंधरम् ॥ सीतयारत्नदंडेनचामरेणाथवीजितम् ॥ २ ॥ विनोदयंतंतांबूलचर्वणादिभिरादरात् ॥ नारदोऽवतरद्द्रष्टुमंबराद्यत्रराघवः ॥ ३ ॥ शुद्धस्फटिकसंकाशःशरच्चंद्रइवामलः ॥ [1]अतर्कितमुपायातोनारदोदिव्यदर्शनः ॥ ४ ॥ तंदृष्ट्वासहसोत्थायरामःप्रीत्याकृतांजलिः ॥ ननामशिरसाभूमौसीतयासहभक्तिमान् ॥ ५ ॥ उवाचनारदंरामःप्रीत्यापरमयायुतः ॥ संसारिणांमुनिश्रेष्ठदुर्लभंतवदर्शनम् ॥ अस्माकंविषयासक्तचेतसांनितरांमुने ॥ ६ ॥ अवाप्तंमेपूर्वजन्मकृतपुण्यमहोदयैः ॥ संसारिणाऽपिहिमुनेलभ्यतेसत्समागमः ॥ ७ ॥ अतस्त्वद्दर्शनादेवकृतार्थोऽस्मिमुनीश्वर ॥ किंकार्यंतेमयाकार्यंब्रूहितत्करवाणिभो ॥ ८ ॥ अथतंनारदोऽप्याहराघवंभक्तवत्सलम् ॥ किंमोहयसिमांरामवाक्यैर्लोकानुसारिभिः ॥ ९ ॥ संसार्यहमितिप्रोक्तंसत्यमेतत्त्वयाविभो ॥ जगतामादिभूतायासामायागृहिणीतव ॥ १० ॥

षयासक्तचेतसांनितरामित्यर्थः ॥ ६ ॥ तादृशमपितवदर्शनंपूर्वजन्मकृतानियानिपुण्यानिपुण्यकर्माणितज्जन्यमहोदयैः शुभादृष्टैरवाप्तमित्यर्थः महतःफलस्योदयोयेभ्यस्तैरितिवाच्योर्थः ननुसंसारिणांदुर्लभंवस्तुकथंत्वयालब्धंतत्राह संसारिणेति काक[2]तालीयन्यायेनेतिभावः ॥ ७ ॥ ८ ॥ ९ ॥ आदिभूतामूलप्रकृतिः मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरमितिश्रुतेः ॥ १० ॥

---

१ सहसा . २ समासाच्चतद्विषयात् इतिसूत्रेणछप्रत्ययः इहकाकतालसमागमसदृशंमुनेरागमनमितिसमासार्थः तत्प्रयुक्तः काकमरणसदृशोमुनिरामयोः समागमस्तुप्रत्ययार्थः अतर्कितोपनतइतिफलितोर्थः.

त्वत्सन्निकर्षादिति अचेतनत्वेनतस्याश्चेतनसन्निकर्षापेक्षत्वादितिभावः अतएवसात्वदाश्रयेति त्वत्सन्निकर्षेणतस्याःस्रष्टृत्वात्सात्वदाश्रयेत्यर्थः त्रिगुणात्मिका
सुखदुःखमोहस्वभावा सत्वरजस्तमोरूपगुणत्रयात्मिका ॥ ११ ॥ अतएवसगुणानुरूपास्तथागुणाःप्रजाःसूतेतादृश्यागृहिण्यायुक्तःलोकत्रयरूपगेहेगृहस्थ
स्त्वमित्युदाहृतः ॥ १२ ॥ इदानींसर्वस्त्रीरूपंसीतैवसर्वंपुंरूपंत्वमेवेतिसार्वात्म्येनस्तुवंस्त्वमेवगृहस्थइत्यर्थमुपपादयति त्वमित्यादिना ॥ १३ ॥ पौलोमीशची

त्वत्सन्निकर्षाज्जायंतेतस्यांब्रह्मादयःप्रजाः ॥ त्वदाश्रयासदाभातिमायायात्रिगुणात्मिका ॥ ११ ॥ सूतेऽजस्रंशुक्लकृ
ष्णलोहिताःसर्वदाप्रजाः ॥ लोकत्रयमहागेहेगृहस्थस्त्वमुदाहृतः ॥ १२ ॥ त्वंविष्णुर्जानकीलक्ष्मीःशिवस्त्वंजानकीशि
वा ॥ ब्रह्मात्वंजानकीवाणीसूर्यस्त्वंजानकीप्रभा ॥ १३ ॥ भवान्शशांकःसीतातुरोहिणीशुभलक्षणा ॥ शक्रस्त्वमेवपौ
लोमीसीतास्वाहानलोभवान् ॥ १४ ॥ यमस्त्वंकालरूपश्चसीतासंयमिनीप्रभो ॥ निर्ऋतिस्त्वंजगन्नाथतामसीजानकी
शुभा ॥ १५ ॥ रामत्वमेववरुणोभार्गवीजानकीशुभा ॥ वायुस्त्वंरामसीतातुसदागतिरितीरिता ॥ १६ ॥ कुबेरस्त्वंरामसी
तासर्वसंपत्प्रकीर्तिता ॥ रुद्राणीजानकीप्रोक्तारुद्रस्त्वंलोकनाशकृत् ॥ १७ ॥ लोकेस्त्रीवाचकंयावत्तत्सर्वंजानकीशुभा ॥
पुन्नामवाचकंयावत्तत्सर्वंत्वंहिराघव ॥ १८ ॥ तस्माल्लोकत्रयेदेवयुवाभ्यांनास्तिकिंचन ॥ १९ ॥ त्वदाभासोदिताज्ञा
नमव्याकृतमितीर्यते ॥ तस्मान्महांस्ततःसूत्रंलिंगंसर्वात्मकंततः ॥ २० ॥

अनलोऽग्निः ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ विशिष्यकिंचिदुक्त्वासामान्येनोपसंहरति ॥ लोकेइति ॥ १८ ॥ लोकत्रयगृहस्थत्वमुपसंहरति तस्मादिति
युवाभ्यामन्यदितिशेषः तत्सृष्ट्वातदेवानुप्राविशदितिश्रुत्यासर्वत्रेश्वरचैतन्येनैवचेतनत्वमितिभावः ॥ १९ ॥ तदेवोपपादयति त्वदिति त्वदाभासेनत्वत्संबंधेनो
दितंसृष्ट्युन्मुखत्वंप्राप्तमीदृशमज्ञानंमायैवाव्याकृतपदेनोच्यते महान्बुद्धितत्त्वंततःसूत्रमहंकारःततःसर्वात्मकंसर्वकार्यात्मकंलिंगंलिंगदेहः ॥ २० ॥

सर्वात्मकत्वमाह अहंकारश्चबुद्धिश्चेत्यादि पंचेत्यस्यसूक्ष्मभूतानीतिशेषः प्राणेंद्रियाणिपंचप्राणाःपंचेंद्रियाणि मनस्त्वहंकारेणैवसंगृहीतं तत्राहंकारोऽहमित्य[1]
कारोवृत्तिविशेषः बुद्धिरध्यवसायात्मकंमहत्तत्त्वम् कर्मेंद्रियाणिभूतेष्वंतर्भूतानि तल्लिंगंलिंगदेहएवप्राज्ञैर्जन्ममृत्युसुखादिमदुच्यतेइत्यर्थः ॥ २१ ॥ सएवालिंग
देहाभिमान्येवेत्यर्थः जगन्मयोहिरण्यगर्भः तत्समष्टिरूपत्वात्तस्येत्यर्थः अवाच्यासत्त्वासत्त्वाभ्यामनिर्वाच्याऽनादिरुत्पत्तिरहिता कारणोपाधिः संसारकारणरूप
कूटस्थस्यब्रह्मणउपाधिः ॥ २२ ॥ स्थूलंस्थूलदेहस्तत्समष्ट्यु[2]पाधिर्विराट् सूक्ष्मंलिंगदेहस्तत्समष्ट्युपाधिर्हिरण्यगर्भः कारणोपाधिरीश्वरः एतैर्विशिष्टोजीवः अं
तर्यामितयाईशस्यापितत्रांतर्भावात् उपाधित्रयविमुक्तोयःसपरमेश्वरः तुरीयइत्यर्थः विराट्हिरण्यगर्भश्चकारणंचेत्युपाधयः ईशस्ययत्रिभिर्हीनंतुरीयंतत्पदंविदु

अहंकारश्चबुद्धिश्चपंचप्राणेंद्रियाणिच ॥ लिंगमित्युच्यतेप्राज्ञैर्जन्ममृत्युसुखादिमत् ॥ २१ ॥ सएवजीवसंज्ञश्चलोकेभा
तिजगन्मयः ॥ अवाच्यानाद्यविद्यैवकारणोपाधिरुच्यते ॥ २२ ॥ स्थूलंसूक्ष्मंकारणाख्यमुपाधित्रितयंचि[3]तैः ॥ एतैर्विशि
ष्टोजीवःस्याद्वियुक्तःपरमेश्वरः ॥ २३ ॥ जाग्रत्स्वप्नसुषुप्त्याख्यासंसृतिर्याप्रवर्तते ॥ तस्याविलक्षणःसाक्षीचिन्मात्रस्त्वंर
घूत्तम ॥ २४ ॥ त्वत्तएवजगज्जातंत्वयिसर्वंप्रतिष्ठितम् ॥ त्वय्येवलीयतेकृत्स्नंतस्मात्त्वंसर्वकारणम् ॥ २५ ॥ रज्जावहिमि
वात्मानंजीवंज्ञात्वाभयंभवेत् ॥ परात्माऽहमितिज्ञात्वाभयदुःखैर्विमुच्यते ॥ २६ ॥ रितिवार्तिकोक्तेः ॥ २३ ॥ तत्रस्थूलसूक्ष्मोपाधि

भ्यांकारणोपाधेःसाक्षिणोभेदकमाह जाग्रदिति इंद्रियादिवृत्तिमतीजाग्रदवस्थाविश्वसाक्षिणी इंद्रियवृत्त्यभावकालिकीअंतःकरणवासनानिमित्तार्थोपलंभ
रूपातैजससाक्षिणीस्वप्नावस्था प्राज्ञसाक्षिणीनिद्रावृत्त्यतिरिक्तसर्ववृत्त्यभावरूपासुषुप्त्यवस्था एतत्त्रयात्मिकायाःसंसृतेरविद्यात्मकत्वात्ततोविलक्षणश्चिन्मा
त्ररूपःसाक्षीकारणोपाधिस्त्वमित्यर्थः ॥ २४ ॥ जगज्जन्मादिकारणमपित्वमेवेत्याह त्वत्तइति कृत्स्नमविद्यासहितम् ॥ २५ ॥ रज्जाविति रज्जोरहित्वेनज्ञानाद्य
थाभयंतथात्मानंजीवत्वेनजानतोभयंसंसाररूपं तस्याएवरज्जोरज्जुत्वेनज्ञानाद्यथाभयनिवृत्तिःतथास्वस्यपरमात्मत्वेनज्ञानात्तन्निवृत्तिरित्यर्थः ॥ २६ ॥

---

[1] नामैकदेशेनामग्रहणमितिन्यायेनाकारैकदेशस्यकारइतिग्रहणंसत्याभामाभीमसेनेत्यादिवन्निर्देशः विनापिप्रत्ययंपूर्वोत्तरपदयोर्लोपइतिवार्तिकस्य
जागरूकत्वाच्च. [2] व्यापकः. [3] चेतनस्य.

चिन्मात्रज्योतीरूपेणभवतासर्वदेहेषुवर्तमानाःसर्वाबुद्धयोंऽतःकरणानियस्मात्प्रकाश्यंतेतत्तद्वृत्तिमंतिसंपाद्यंतेअतोभवान्सर्वस्यात्मांऽतर्यामीत्यर्थः ॥ २७ ॥ अ
ज्ञानात्त्वत्स्वरूपाज्ञानात्त्वयिइदंसर्वंजगत्न्यस्यतेआरोप्यते जगद्रूपेणत्वंगृह्यसइत्यर्थः यथाचरज्जुतत्त्वाज्ञानाद्भासमानस्यभुजंगस्यरज्जुज्ञानाल्लयःएवंत्वत्स्वरूप
ज्ञानाज्जगतोलयः अतस्तज्ज्ञानंसदाऽभ्यसेत् तच्चिंतनंतत्कथनमन्योन्यंतत्प्रबोधनम्एकांतेतत्परत्वंचतदभ्यासंविदुर्बुधाइत्युक्तमभ्यासंकुर्यात् ॥ २८ ॥ त्वत्पा

चिन्मात्रज्योतिषासर्वाःसर्वदेहेषुबुद्धयः ॥ त्वयायस्मात्प्रकाश्यंतेसर्वस्यात्माततोभवान् ॥ २७ ॥ अज्ञानान्न्यस्यतेस
र्वंत्वयिरज्जौभुजंगवत् ॥ त्वज्ज्ञानाल्लीयतेसर्वंतस्माज्ज्ञानंसदाभ्यसेत् ॥ २८ ॥ त्वत्पादभक्तियुक्तानांविज्ञानंभवतिक्र
मात् ॥ तस्मात्त्वद्भक्तियुक्तायेमुक्तिभाजस्तएवहि ॥ २९ ॥ अहंत्वद्भक्तभक्तानांतद्भक्तानांचकिंकरः ॥ अतोमामनुगृह्णी
ष्वमोहयस्वनमांप्रभो ॥ ३० ॥ त्वन्नाभिकमलोत्पन्नोब्रह्मामेजनकःप्रभो ॥ अतस्तवाहंपौत्रोऽस्मिभक्तंमांपाहिराघव
॥ ३१ ॥ इत्युक्त्वाबहुशोनत्वास्वानंदाश्रुपरिप्लुतः ॥ उवाचवचनंरामब्रह्मणानोदितोऽस्म्यहम् ॥ ३२ ॥ रावणस्यवधा
र्थायजातोऽसिरघुसत्तम ॥ इदानींराज्यरक्षार्थंपितात्वामभिषेक्ष्यति ॥ ३३ ॥ यदिराज्याभिसंसक्तोरावणंनहनिष्यसि
॥ प्रतिज्ञातेकृतारामभूभारहरणायवै ॥ ३४ ॥ तत्सत्यंकुरुराजेंद्रसत्यसंधस्त्वमेवहि ॥ श्रुत्वैतद्गदितंरामोनारदंप्राहस
स्मितम् ॥ ३५ ॥

दभक्तियुक्तानां श्रवणंकीर्तनंविष्णोःस्मरणंपादसेवनम् अर्चनंवंदनंदास्यंसख्यमात्मनिवेदनम् इत्येवंनवविधभक्तियुक्तानांक्रमाद्वैराग्यश्रवणादिक्रमेणविज्ञानम
परोक्षसाक्षात्कारोभवत्यतस्तएवमुक्तिभाजइत्यर्थः ॥ २९ ॥ नमोहयस्व स्वमाययेत्यर्थः ॥ ३० ॥ ३१ ॥ नोदितोऽस्मित्वन्निकटेसंदेशंवक्तुंप्रेरितोऽस्मि ॥ ३२ ॥
॥ ३३ ॥ भूभारहरणायकृतातेप्रतिज्ञाव्यर्थास्यादितिशेषः ॥ ३४ ॥ तस्मात्तत्प्रतिज्ञातंवचःसत्यंकुरु यतस्त्वमेवसत्यसंधः सत्यप्रतिज्ञः ॥ ३५ ॥

अविदितमितिच्छेदः विद्यतेइत्यत्रकाकुः क्वचिद्देशेकालेवाकिंचिद्वस्तुमेऽविदितंविद्यतेअपितुनेत्यर्थः सर्वंविदितमेवास्तेइत्यर्थः ॥ ३६ ॥ कालानुरोधेनेतिकालस्यमुख्यतायामयैवस्थापितत्वादितिभावः असुरमंडलंरक्षोमंडलरूपंभूभारम् ॥ ३७ ॥ ३८ ॥ ३९ ॥ देवगतिंदेवलोकमार्गम् ॥ ४० ॥ कैवल्यंविमोक्षंब्रह्मैकत्वल

श्रृणुनारदमेकिंचिद्विद्यतेऽविदितंक्वचित् ॥ प्रतिज्ञातंचयत्पूर्वंकरिष्येतन्नसंशयः ॥ ३६ ॥ किंतुकालानुरोधेनतत्तत्प्रारब्धसंक्षयात् ॥ हरिष्येसर्वभूभारंक्रमेणासुरमंडलम् ॥ ३७ ॥ रावणस्यविनाशार्थंश्वोगंता[1]दंडकावनम् ॥ चतुर्दशसमास्तत्रह्युषित्वामुनिवेषधृक् ॥ ३८ ॥ सीतामिषेणतंदुष्टंसकुलंनाशयाम्यहम् ॥ एवंरामेप्रतिज्ञातेनारदःप्रमुमोदह ॥ ३९ ॥ प्रदक्षिणत्रयंकृत्वादंडवत्प्रणिपत्यतम् ॥ अनुज्ञातश्चरामेणययौदेवगतिंमुनिः ॥ ४० ॥ संवादंपठतिश्रृणोतिसंस्मरेद्वायोनित्यंमुनिवररामयोःसभक्त्या ॥ संप्राप्नोत्यमरसुदुर्लभंविमोक्षंकैवल्यंविरतिपुरःसरंक्रमेण ॥ ४१ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेअयोध्याकांडेप्रथमःसर्गः ॥ १ ॥ ॥ ७ ॥ ॥ श्रीमहादेवउवाच ॥ अथराजादशरथःकदाचिद्रहसिस्थितः ॥ वसिष्ठंस्वकुलाचार्यमाहूयेदमभाषत ॥ १ ॥ भगवन्राममखिलाःप्रशंसंतिमुहुर्मुहुः ॥ पौराश्चनैगमावृद्धामंत्रिणश्चविशेषतः ॥ २ ॥ ततःसर्वगुणोपेतंरामंराजीवलोचनम् ॥ ज्येष्ठंराज्येऽभिषेक्ष्यामिवृद्धोऽहंमुनिपुंगव ॥ ३ ॥

क्षणंमोक्षम् विरतिर्वैराग्यम् ॥ ४१ ॥ ॥ इतिश्री० कृतौअध्या० सेतौअयोध्याकांडेप्रथमःसर्गः ॥ १ ॥ ॥ द्वितीयेराज्ञिरामस्याभिषेकंकर्तुमुद्यते मंथरामोहिताराज्ञीविघ्नंचक्रइतीर्यते ॥ १ ॥ अथराजेति रहसिएकांते ॥ १ ॥ नैगमाःनिगमेवणिक्पथेभवाः यद्वा निगमंवेदंतदर्थंवाविदंतितेनैगमाः ॥ २ ॥ ततःसर्वप्रजानुरागात् ॥ ३ ॥

---

[1] तृजंतमेतत् ।

भरतोमातुलमिति अनेनकैकेयीप्रतिबंधशंकां[1]निरासः भरतागमनपर्यंतमेनमभिषेक्ष्येतदागमनोत्तरमुभयोर्विभागंकरिष्यामीत्येवंतांसमाधास्यइतिभावः ॥ ४ ॥
संभारोऽभिषेकसामग्री मंत्रयेति अधिवासनार्थमितिशेषः उच्छ्रीयंतामुत्थाप्यंतामित्यर्थः ॥ ५ ॥ तोरणानिउच्छ्रीयंतामित्यनुकर्षः ॥ ६ ॥ ७ ॥ ८ ॥ मध्यक
क्षेमध्यद्वारे षोडशेतिकन्यकान्वयि वाल्मीकिनाऽपिकन्यानामष्टसंख्याद्विरुक्ता अष्टौकन्याश्चरुचिरामत्तश्चवरवारणः अष्टौकन्याश्चमांगल्याःसर्वाभरण

भरतोमातुलंद्रष्टुंगतःशत्रुघ्नसंयुतः ॥ अभिषेक्ष्येश्वएवाशुभवांस्तच्चानुमोदताम् ॥ ४ ॥ संभाराःसंभ्रियंतांचगच्छमंत्रय
राघवम् ॥ उच्छ्रीयंतांपताकाश्चनानावर्णाःसमंततः ॥ ५ ॥ तोरणानिविचित्राणिस्वर्णमुक्तामयानिवै ॥ आहूयमंत्रि
णंराजासुमंत्रंमंत्रिसत्तमम् ॥ ६ ॥ आज्ञापयतियद्यत्त्वांमुनिस्तत्तत्समानय ॥ यौवराज्येभिषेक्ष्यामिश्वोभूतेरघुनंदन
म् ॥ ७॥ तथेतिहर्षात्समुनिंकिंकरोमीत्यभाषत ॥ तमुवाचमहातेजावसिष्ठोज्ञानिनांवरः ॥ ८ ॥ श्वःप्रभातेमध्यकक्षेक
न्यकाःस्वर्णभूषिताः ॥ तिष्ठंतषोडशगजःस्वर्णरत्नादिभूषितः ॥ ९॥ चतुर्दंतःसमायातुऐरावतकुलोद्भवः ॥ नानातीर्थोदकैः
पूर्णाःस्वर्णकुंभाःसहस्रशः ॥ १० ॥ स्थाप्यंतांनववैयाघ्रचर्माणित्रीणिचानय ॥ श्वेतच्छत्रंरत्नदंडंमुक्तामणिविराजितम्
॥ ११ ॥ दिव्यमाल्यानिवस्त्राणिदिव्यान्याभरणानिच ॥ मुनयःसत्कृतास्तत्रतिष्ठंतुकुशपाणयः ॥ १२ ॥ नर्तक्योवारमु
ख्याश्चगायकावेणुकास्तथा ॥ नानावादित्रकुशलावादयंतुनृपांगणे ॥ १३ ॥ हस्त्यश्वरथपादाताबहिस्तिष्ठंतुसायुधाः ॥
नगरेयानितिष्ठंतिदेवतायतनानिच ॥ १४ ॥ भूषिताइति गजइत्युत्तरान्वयि ॥ ९ ॥ नानातीर्थोदकैःप्रयागादितीर्थोदकैः ॥ १० ॥ व्याघ्रच
र्माणिनववात्रीणिवा भद्रपीठास्तरणार्थमित्यर्थः ॥ ११ ॥ दिव्यान्याभरणानिचेत्यत्रस्थाप्यंतामित्यनुकर्षः ॥ १२ ॥ वारमुख्याःवारःसंकेतदिनमेवमुख्यंभर्तृ
नियमेयासांताःवेश्याइत्यर्थःवेणुकाःवेणुवादनशीलाः ॥ १३ ॥ हस्त्याश्वरथपादाताइत्युपपत्तिरुक्ता ॥ १४ ॥

---

[1] भरतस्यापि यद्यपिभरतेएषाशंकानयुक्तातथापिवाल्मीकीये कामंखलुसतांवृत्ते भ्राताते भरतस्थितः ज्येष्ठानुवर्तीधर्मात्मासानुक्रोशोजितेंद्रियः किंनु चित्तंमनुष्याणामनित्यमितिमेमतमितिदशरथवाक्ये शंकासमाधानंकृतंतत्रकाममितिकिंचिदितिच यद्यप्यर्थेतथाप्यर्थेच.

नानाबलिभिःपूजोपकरणैः ॥ १५ ॥ १६ ॥ १७ ॥ आचार्यत्वादतिवृद्धत्वाच्चद्वारपालैरवारितोभवनंप्रविश्यांतःअंतःपुरंप्रविष्टइतिशेषः ॥ १८ ॥ पानीयमानिनाय अर्घ्यपाद्यार्थमितिभावः ॥ १९ ॥ तदपःतत्पादप्रक्षालनजलम् ॥ २० ॥ अब्रवीत्वसिष्ठमितिशेषः ॥ २१ ॥ त्वत्पादसलिलंगंगारूपंजलम् ॥ २२ ॥

तेषुप्रवर्ततांपूजानानाबलिभिरावृता ॥ राजानःशीघ्रमायांतुनानोपायनपाणयः॥ १५॥ इत्यादिश्यमुनिःश्रीमान्सुमं
त्रंनृपमंत्रिणम् ॥ स्वयंजगामभवनंराघवस्यातिशोभनम् ॥ १६॥ रथमारुह्यभगवान्वसिष्ठोमुनिसत्तमः ॥ त्रीणिक
क्षाण्यतिक्रम्यरथात्क्षितिमवातरत् ॥ १७॥ अंतःप्रविश्यभवनंस्वाचार्यत्वादवारितः ॥ गुरुमागतमाज्ञायरामस्तूर्णंकृ
तांजलिः ॥ १८॥ प्रत्युद्गम्यनमस्कृत्यदंडवद्भक्तिसंयुतः ॥ स्वर्णपात्रेणपानीयमानिनायाशुजानकी ॥ १९ ॥ रत्नासने
समावेश्यपादौप्रक्षाल्यभक्तितः ॥ तदपःशिरसाधृत्वासीतयासहराघवः ॥ २० ॥ धन्योऽस्मीत्यब्रवीद्रामस्तवपादांबुधा
रणात् ॥ श्रीरामेणैवमुक्तस्तुप्रहसन्मुनिरब्रवीत् ॥ २१ ॥ त्वत्पादसलिलंधृत्वाधन्योऽभूद्गिरिजापतिः॥ ब्रह्माऽपिमत्पि
तातेहिपादतीर्थहताशुभः ॥ २२ ॥ इदानींभाषसेयत्त्वंलोकानामुपदेशकृत् ॥ जानामित्वांपरात्मानंलक्ष्म्यासंजातमी
श्वरम् ॥ २३ ॥ देवकार्यार्थसिद्ध्यर्थंभक्तानांभक्तिसिद्धये ॥ रावणस्यवधार्थायजातंजानामिराघव ॥ २४ ॥ तथाऽ
पिदेवकार्यार्थंगुह्यंनोद्घाटयाम्यहम्[1] ॥ यथात्वंमाययासर्वंकरोषिरघुनंदन ॥ २५ ॥

उपदेशकृद्ब्राह्मणेष्वेवंभक्तिःकार्येतिलोकानुपदिशन्नित्यर्थः ॥ २३ ॥ भक्तिसिद्धयेइत्यनेनसर्वेतरस्वरूपापेक्षयारामस्वरूपभक्तिरेवसर्वेष्टसाधनमितिसूचितम् ॥ २४ ॥ त्वंमाययेति माययाच्छादितस्वस्वरूपोयथाव्यवहरसितथैवत्वयिशिष्यत्वेनगुरुर्भूत्वाहंव्यवहरिष्यामीत्यर्थः ॥ २५ ॥

---

[1] यदिचप्रकटीकुर्यांतदायंप्रभुरीश्वरइतिराज्याभिषेचनेप्रतिबंधाभावात् सुस्थएवसीतारामयोर्गृहेवासःसिद्धः तथा रावणस्य सकलसुरर्षिगंधर्वयक्षादिदुःखदस्यरावणकृतसीताहरणाभावात् सीतामिषेणतंदुष्टंसकुलंनाशयाम्यहमितिपूर्वप्रतिज्ञासत्वात् निमित्तंविनावधासंभवाद्देवकार्यविघटनापत्तिरित्याशयः.

वास्तवमर्थमाह गुरुरिति गुरूणामस्मद्गुरूणांब्रह्मादीनाम् ॥ २६ ॥ तत्रैवहेतुमाह अंतर्यामीति अंतःस्थित्वासर्वनियामकः अगोचरःवाङ्मनसयोरप्यविषयः स्वाधीनसंभवत्वंमायाधिष्ठातृत्वात् ॥ २७ ॥ दूष्यजीवनंदुष्टजीविकारूपं पौरोहित्यंराजपुरोहितत्वम् ॥ २८ ॥ २९ ॥ त्वत्संबंधाकांक्षारूपाशा संबंधमाह

तथैवानुविधास्येऽहंशिष्यस्त्वंगुरुरप्यहम् ॥ गुरुर्गुरूणांत्वंदेवपितृणांत्वंपितामहः ॥ २६ ॥ अंतर्यामीजगद्यात्रावाहकस्त्वमगोचरः ॥ शुद्धसत्वमयंदेहंधृत्वास्वाधीनसंभवम् ॥ २७ ॥ मनुष्यइवलोकेस्मिन्भासित्वंयोगमायया ॥ पौरोहित्यमहंजानेविगर्ह्यंदूष्यजीवनम् ॥ २८ ॥ इक्ष्वाकूणांकुलेरामःपरमात्माजनिष्यते ॥ इतिज्ञातंमयापूर्वंब्रह्मणाकथितंपुरा ॥ २९ ॥ ततोऽहमाशयारामतवसंबंधकांक्षया ॥ अकार्षंगर्हितमपितवाचार्यत्वसिद्धये ॥ ३० ॥ ततोमनोरथोमेऽद्यफलितोरघुनंदन ॥ त्वदधीनामहामायासर्वलोकैकमोहिनी ॥ ३१ ॥ मांयथामोहयेन्नैवतथाकुरुरघूद्वह ॥ गुरुनिष्कृतिकामस्त्वंयदिदेह्येतदेवमे ॥ ३२ ॥ प्रसंगात्सर्वमप्युक्तंनवाच्यंकुत्रचिन्मया ॥ राज्ञादशरथेनाहंप्रेषितोऽस्मिरघूद्वह ॥ ३३ ॥ त्वामामंत्रयितुंराज्येश्वोऽभिषेक्ष्यतिराघव ॥ अद्यत्वंसीतयासार्धमुपवासंयथाविधि ॥ ३४ ॥ कृत्वाशुचिर्भूमिशायीभवरामजितेंद्रियः ॥ गच्छामिराजसान्निध्यंत्वंतुप्रातर्गमिष्यसि ॥ ३५ ॥ इत्युक्त्वारथमारुह्यययौराजगुरुर्द्रुतम् ॥ रामोऽपिलक्ष्मणंदृष्ट्वाप्रहसन्निदमब्रवीत् ॥ ३६ ॥ सौमित्रेयौवराज्येमेश्वोऽभिषेकोभविष्यति ॥ निमित्तमात्रमेवाहंकर्ताभोक्तात्वमेवहि ॥ ३७ ॥

आचार्यत्वसिद्धयइति ॥ ३० ॥ लब्धाचार्यकत्वाद्गुरुदक्षिणांयाचते त्वदधीनेत्यादि ॥ ३१ ॥ गुरुनिष्कृतिकामःगुरौप्रत्युपकारकरणेच्छुः ॥ ३२ ॥ एवमयंमत्स्वरूपमन्यत्रापिप्रकटयिष्यतीतिशंकामुन्नीयाह प्रसंगादिति ॥ ३३ ॥ आमंत्रयितुंबोधयितुम् ॥ ३४ ॥ प्रातर्गमिष्यसि राजसान्निध्यंवनंचेतिभावः ॥ ३५ ॥ ३६ ॥ एतद्राज्यप्राप्तिफलंतवैवेत्याह निमित्तमात्रमितिकर्ताराज्यकर्ता भोक्ताराज्यसुखभोक्ता अनेनस्वस्यकर्तृत्वादिराहित्यमपिध्वनितम् ॥ ३७ ॥

ममत्वंहिबहिःप्राणइति अनेनशेषांशरूपत्वात्तस्यप्राणधारकत्वरूपंजीवत्वंदर्शितम् ॥ ३८ ॥ पुरःअग्रे ॥ ३९ ॥ नगरेविद्यमानःकश्चित्पुमान्राममात्रेसुमित्रायैचन्यवेदयत् ॥ ४० ॥ तस्मैतद्वार्ताहराय ॥ ४१ ॥ प्रतिश्रुतंप्रतिज्ञातम् ॥ ४२ ॥ दुर्गांदेवींसकलदुःखहरणक्षमत्वादितिभावः ॥ ४३ ॥ दैवींकुंभकर्णस्यनि

ममत्वंहिबहिःप्राणोनात्रकार्याविचारणा ॥ ततोवसिष्ठेनयथाभाषितंतत्तथाऽकरोत् ॥ ३८ ॥ वसिष्ठोऽपिनृपंगत्वाकृतं सर्वंन्यवेदयत् ॥ वसिष्ठस्यपुरोराज्ञात्युक्तंरामाभिषेचनम् ॥ ३९ ॥ यदातदैवनगरेश्रुत्वाकश्चित्पुमान्जगौ ॥ कौसल्यायै राममात्रेसुमित्रायैतथैवच ॥ ४० ॥ श्रुत्वातेहर्षसंपूर्णेददतुर्हारमुत्तमम् ॥ तस्मैततःप्रीतमनाःकौसल्यापुत्रवत्सला ॥ ४१ ॥ लक्ष्मींपर्यचरद्देवींरामस्यार्थप्रसिद्धये ॥ सत्यवादीदशरथःकरोत्येवप्रतिश्रुतम् ॥ ४२ ॥ कैकेयीवशगःकिंतुकामुकःकिंकरिष्यति ॥ इतिव्याकुलचित्तासादुर्गांदेवीमपूजयत् ॥ ४३ ॥ एतस्मिन्नंतरेदेवादैवींवाणीमचोदयन् ॥ गच्छदेविभुवोलोकमयोध्यायांप्रयत्नतः ॥ ४४ ॥ रामाभिषेकविघ्नार्थंयतस्वब्रह्मवाक्यतः ॥ मंथरांप्रविशस्वादौकैकेयींचततःपरम् ॥ ४५ ॥ ततोविघ्नेसमुत्पन्नेपुनरेहिदिवंशुभे ॥ तथेत्युक्त्वातथाचक्रेप्रविवेशाथमंथराम् ॥ ४६ ॥ साऽपिकुब्जात्रिवक्रातुप्रासादाग्रमथारुहत् ॥ नगरंपरितोदृष्ट्वासर्वतःसमलंकृतम् ॥ ४७ ॥ नानातोरणसंबाधंपताकाभिरलंकृतम् ॥ सर्वोत्सवसमायुक्तंविस्मितापुनरागमत् ॥ ४८ ॥ धात्रींपप्रच्छमातःकिंनगरंसमलंकृतम् ॥ नानोत्सवसमायुक्ताकौसल्याचातिहर्षिता ॥ ४९ ॥

द्रावरव्याहारादिनादेवानामुपकर्त्रींमयोध्यायामयोध्याप्रदेशावच्छिन्नंभुवोलोकंगच्छेत्यन्वयः ॥ ४४ ॥ आदौमंथरांप्रविशस्वकैकेयीप्रेरणार्थं आर्षस्तङ् ततःपरंराजप्रेरणार्थंकैकेयींप्रविश ॥ ४५ ॥ विघ्नेअभिषेकविघ्ने तथाचक्रेअयोध्यागमनंचक्रे दैवीवाणीतिशेषः ॥ ४६ ॥ सावाण्याविष्टा त्रिषुकटावुरसिकंठेच वक्रा ॥ ४७ ॥ ४८ ॥ किंकेनहेतुनानगरमलंकृतं केनचहेतुनाकौसल्योत्सवयुक्तादददाति ॥ ४९ ॥

---

१ रामस्येतिशेषः अतएववाल्मीकीयेहर्षोत्फुल्लनयनामित्यादिव्यशेषि .

॥ ५० ॥ ५१ ॥ पुत्रस्यराज्याप्राप्त्यादुर्भगेतार्चिंताराहित्याच्चमूढे ॥ ५२ ॥ ५३ ॥ राज्ञोऽनुग्रहाद्रामस्याभिषेकोभविष्यतीत्यन्वयः ॥ ५४ ॥ ५५ ॥

॥ ५६ ॥ कारणेनवाणीप्रवेशरूपेणवैरिणीवैरमापन्ना अकारणवैरिणीतिच्छेदइतिकश्चित् ॥ ५७ ॥ यथार्थंसत्यमेवमयोच्यते तेमहद्भयमागतमिति ॥५८॥

ददातिविप्रमुख्येभ्योवस्त्राणिविविधानिच॥तामुवाचतदाधात्रीरामचंद्राभिषेचनम्॥५०॥श्वोभविष्यतितेनाद्यसर्व
तोऽलंकृतंपुरम्॥तच्छ्रुत्वात्वरितंगत्वाकैकेयींवाक्यमब्रवीत्॥५१॥पर्यंकस्थांविशालाक्षीमेकांतेपर्यवस्थिताम्॥किं
शेषेदुर्भगेमूढेमहद्भयमुपस्थितम्॥५२॥नजानीषेऽतिसौंदर्यमानिनीमत्तगामिनी॥५३॥रामस्यानुग्रहाद्राज्ञःश्वो
ऽभिषेकोभविष्यति॥ तच्छ्रुत्वासहसोत्थायकैकेयीप्रियवादिनी॥५४॥ तस्यैदिव्यंददौस्वर्णनूपुरंरत्नभूषितम्॥हर्ष
स्थानेकिमितिमेकथ्यतेभयमागतम्॥५५॥ भरतादधिकोरामःप्रियकृन्मेप्रियंवदः॥ कौसल्यांमांसमंपश्यन्सदाशु
श्रूषतेहिमाम्॥५६॥रामाद्भयंकिमापन्नंतवमूढेवदस्वमे॥तच्छ्रुत्वाविषसादाथकुब्जाकारणवैरिणी॥५७॥शृणुमद्व
चनंदेवियथार्थंतेमहद्भयम्॥ त्वांतोषयन्सदाराजाप्रियवाक्यानिभाषते॥५८॥कामुकोऽतथ्यवादीचत्वांवाचापरि
तोषयन्॥कार्यंकरोतितस्यावैराममातुःसुपुष्कलम्॥५९॥मनस्येतन्निधायैवप्रेषयामासतेसुतम्॥भरतंमातुलकुले
प्रेषयामाससानुजम्॥६०॥ सुमित्रायाःसमीचीनंभविष्यतिनसंशयः॥लक्ष्मणोराममन्वेतिराज्यंसोऽनुभविष्यति
॥६१॥भरतोराघवस्याग्रेकिंकरोवाभविष्यति॥विवास्यतेवानगरात्प्राणैर्वाहाप्यतेऽचिरात्॥६२॥त्वंतुदासीवकौस
ल्यांनित्यंपरिचरिष्यसि॥ततोऽपिमरणंश्रेयोयत्सपत्न्याःपराभवः॥६३॥

अतथ्यवादीतिच्छेदः त्वमेवमेप्रियेत्यादिवाक्यंमिथ्याप्रलापएवतस्येत्यर्थः कार्यंहितम् ॥ ५९ ॥ अतिदुःखावेशात्प्रेषयामासेतिपुनरुक्तिर्नदोषाय ॥ ६० ॥
॥ ६१ ॥ प्राणैर्वाहाप्यतेत्याज्यते वधोभविष्यतीत्यर्थः ॥ ६२ ॥ सपत्न्याःसकाशाद्यत्पराभवस्तत्सेवादिरूपस्ततोमरणंश्रेयइत्यर्थः ॥ ६३ ॥

अभिषेचनेइतिविषयसप्तमी नवपंचचतुर्दश ॥ ६४ ॥ हेराज्ञिअभयेऽभयस्थानेभयरहितेतवपुत्रोरूढोराज्येदृढोभविष्यतीत्यर्थः ननुवयसासर्वगुणैश्चज्येष्ठेवि
द्यमानेकथंकनीयसोमेपुत्रस्यराज्यमतआह ॥ ६५ ॥ इंद्रेणस्वयंयाचितइत्यन्वयः ॥ ६६ ॥ ६७ ॥ अक्षकीलः रथाक्षकीलइत्यर्थः तस्यच्छिन्नोन्यपतत्सदश

अतःशीघ्रंयतस्वाद्यभरतस्याभिषेचने ॥ रामस्यवनवासार्थंवर्षाणिनवपंचच ॥ ६४ ॥ ततोरूढोऽभयेपुत्रस्तवराज्ञिभ
विष्यति ॥ उपायंतेप्रवक्ष्यामिपूर्वमेवसुनिश्चितम् ॥ ६५ ॥ पुरादेवासुरेयुद्धेराजादशरथःस्वयम् ॥ इंद्रेणंयाचितोध
न्वीसहायार्थंमहारथः ॥ ६६ ॥ जगामसेनयासार्धंत्वयासहशुभानने ॥ युद्धंप्रकुर्वतस्तस्यराक्षसैःसहधन्विनः ॥ ६७ ॥
तदाक्षकीलोन्यपतच्छिन्नस्तस्यनवेदसः ॥ त्वंतुहस्तंसमावेश्यकीलरंध्रेऽतिधैर्यतः ॥ ६८ ॥ स्थितवत्यसितापांगीपति
प्राणपरीप्सया ॥ ततोहत्वाऽसुरान्सर्वान्ददर्शत्वामरिंदमः ॥ ६९ ॥ आश्चर्यंपरमंलेभेत्वामालिंग्यमुदान्वितः ॥ वृणी
ष्वयत्तेमनसिवांछितंवरदोऽस्म्यहम् ॥ ७० ॥ वरद्वयंवृणीष्वत्वमेवंराजाऽवदत्स्वयम् ॥ त्वयोक्तोवरदोराजन्यदिदत्तं
वरद्वयम् ॥ ७१ ॥ त्वय्येवतिष्ठतुचिरंन्यासभूतंममानघ ॥ यदामेऽवसरोभूयात्तदादेहिवरद्वयम् ॥ ७२ ॥ तथेत्युक्त्वास्व
यंराजामंदिरंव्रजसुव्रते ॥ त्वत्तःश्रुतंमयापूर्वमिदानींस्मृतिमागतम् ॥ ७३ ॥ अतःशीघ्रंप्रविश्याद्यक्रोधागारंरुषान्वि
ता ॥ विमुच्यसर्वाभरणंसर्वतोविनिकीर्यच ॥ भूमावेवशयानात्वंतूष्णीमातिष्ठभामिनी ॥ ७४ ॥

रथोनवेद तत्कीलरंध्रेकीलस्थानेस्वहस्तंदत्त्वात्वंस्थितवतीत्यन्वयः ॥ ६८ ॥ ६९ ॥ ७० ॥ राजाअवदत् ततोवरदोराजात्वयोक्तः किमुक्तस्तदाह राजन्नित्यादि
॥ ७१ ॥ ममेति वरद्वयमितिशेषः त्वयामह्यंदत्तंवरद्वयमित्यर्थः ॥ ७२ ॥ तथेत्युक्त्वाहेसुव्रतेमंदिरंव्रजयुद्धभूमेःशिबिरंव्रजेतिस्वयमुक्तवानितिशेषः एतत्सर्वंत्व
त्तएवश्रुतम् ॥ ७३ ॥ तूष्णीमातिष्ठमौनंकुरु शतशःप्रार्थिताऽपित्वदुक्तंकरिष्यामीतिप्रतिज्ञापर्यंतंराज्ञासहमावदेत्यर्थः ॥ ७४ ॥

---

१ देवसंघरहितेंद्रेणदंडकजनपदस्थवैजयंतपुराधिपतितिमिध्वजापरपर्यायशंबरेणसमं युद्धार्थं. २ यत्तुवाल्मीकीये संग्रामादपवाह्यमूर्च्छितस्तेपति
स्त्वयारक्षितस्तत्रापिदूरपातिभिरसुरीयैःशस्त्रैर्विक्षतस्ततोप्यन्यत्रापवाह्यरक्षितः एवंद्विःप्राणरक्षणतोषेणवरद्वयदानंतत्कल्पांतरीणं. ३ निक्षेपभूतं.

तदेवाह यावदिति सत्यंतत्पूर्वकंशपथपूर्वकमितियावत्तथाप्रतिज्ञायराजातेऽभीष्टंयावत्करोतितावन्मौनंकुर्वित्यर्थः ॥ ७५ ॥ दुःसंगेनजातविभ्रमाअहितेऽपिहि
तबुद्धिमती दुष्टादुष्टभावा ॥ ७६ ॥ वक्राऽपिमद्धितत्वान्ममसुंदरीतत्संबोधनंवक्रसुंदरि ॥ ७७ ॥ ७८ ॥ समंततःपरिकीर्यइतस्ततःप्रक्षिप्य मलिनभूमिलुंठ
नान्मलिनगात्रा ॥ ७९ ॥ यावद्रामगमनंतावदेवंशयनमेवसर्वथातद्गमनेतुप्राणांस्त्यक्ष्येइत्यर्थः ॥ ८० ॥ निश्चयमुक्तार्थविषयम् ॥ ८१ ॥ अथकैकेय्याः

यावत्सत्यंप्रतिज्ञायराजाऽभीष्टंकरोतिते ॥ श्रुत्वात्रिवक्रयोक्तंतत्तदाकेकयनंदिनी ॥ ७५ ॥ तथ्यमेवाखिलंमेनेदुःसंगा
हितविभ्रमा ॥ तामाहकैकयीदुष्टाकुतस्तेबुद्धिरीदृशी ॥ ७६ ॥ एवंत्वांबुद्धिसंपन्नांनजानेवक्रसुंदरि ॥ भरतोयदिराजा
मेभविष्यतिसुतःप्रियः ॥ ७७ ॥ ग्रामान्शतंप्रदास्यामिममत्वंप्राणवल्लभा ॥ इत्युक्त्वाकोपभवनंप्रविश्यसहसारुषा ॥
॥ ७८ ॥ विमुच्यसर्वाभरणंपरिकीर्यसमंततः ॥ भूमौशयानामलिनामलिनांबरधारिणी ॥ ७९ ॥ प्रोवाचशृणुमेकु
ब्जेयावद्रामोवनंव्रजेत् ॥ प्राणांस्त्यक्ष्येऽथवावक्रेशयिष्येतावदेवहि ॥ ८० ॥ निश्चयंकुरुकल्याणिकल्याणंतेभविष्य
ति ॥ इत्युक्ताप्रययौकुब्जागृहंसाऽपितथाऽकरोत् ॥ ८१ ॥ धीरोऽत्यंतदयान्वितोऽपिसुगुणाचारान्वितोवाऽथवानीति
ज्ञोविधिवाददेशिकपरोविद्याविवेकोऽथवा ॥ दुष्टानामतिपापभावितधियांसंगंसदाचेद्व्रजेत्तद्बुद्ध्यापरिभावितोव्रज
तितत्साम्यंक्रमेणस्फुटम् ॥ ८२ ॥

कुब्जासंगादिदमविचार्यकारित्वमित्यर्थविशेषंसामान्यरूपेणार्थांतरन्यासेनदर्शयति धीरइति महामनाइत्यर्थः सुगुणश्चासावाचारान्वितइत्यर्थः वाशब्दश्चार्थे
विधिंवदतितादृशोयोदेशिकोगुरुःतत्परस्तत्सेवापरः गुरुसेवयासकलविधेयनिषेध्यार्थज्ञइत्यर्थः विद्यावस्तुतत्त्वज्ञानंतेनविवेकःकर्तव्याकर्तव्यविचारोय
स्यसः ॥ ८२ ॥

॥ ८३ ॥ ॥ इतिश्रीमत्स०सेतौअयोध्याकांडेद्वितीयःसर्गः ॥ २ ॥ ॥ ६४ ॥ ॥ ततइति मंत्रिणःसुमंत्रादयःप्रकृतयोमुख्यपौराः ॥ १ ॥ तस्याःकैकेय्यामंदिरंप्रविष्टेमयिकैकेयीहसंतीमामुपायातिसाऽद्यकिंनदृश्यतेएतत्किमित्यन्वयः ॥ २ ॥ ३ ॥ वःयुष्माकम् ॥ ४ ॥ ५ ॥ ६ ॥ मांकिंखेदयसेतत्रहेतुर्यतइति

अतःसंगःपरित्याज्योदुष्टानांसर्वदैवहि ॥ दुःसंगीच्यवतेस्वार्थाद्यथेयंराजकन्यका॥८३॥ ॥इतिश्रीमदध्यात्मरामायणे उमामहेश्वरसंवादेअयोध्याकांडेद्वितीयःसर्गः॥ २ ॥ ॥६४॥ ॥ श्रीमहादेवउवाच ॥ ततोदशरथोराजारामाभ्युदयकारणात् ॥ आदिश्यमंत्रिप्रकृतीःसानंदोगृहमाविशत् ॥ १ ॥ तत्रादृष्ट्वाप्रियांराजाकिमेतदितिविह्वलः ॥ यापुरामंदिरंतस्याःप्रविष्टेमयिशोभना ॥ २ ॥ हसंतीमामुपायातिसाकिंनैवाद्यदृश्यते ॥ इत्यात्मन्येवसंचिंत्यमनसाऽतिविदूयता ॥ ३॥ पप्रच्छदासीनिकरंकुतोवःस्वामिनीशुभा ॥ नायातिमांयथापूर्वंमत्प्रियाप्रियदर्शना ॥४॥ ताऊचुःक्रोधभवनंप्रविष्टानैवविद्महे ॥ कारणंतत्रदेवत्वंगत्वानिश्चेतुमर्हसि ॥५॥ इत्युक्तोभयसंत्रस्तोराजातस्याःसमीपगः ॥ उपविश्यशनैर्देहंस्पृशन्वैपाणिनाऽब्रवीत् ॥ ६ ॥ किंशेषेवसुधापृष्ठेपर्यंकादीन्विहायच ॥ मांत्वंखेदयसेभीरुयतोमांनावभाषसे ॥७॥ अलंकारंपरित्यज्यभूमौमलिनवाससा ॥ किमर्थंब्रूहिसकलंविधास्येतववांछितम् ॥८॥ कोवातवाहितंकर्तानारीवापुरुषोपिवा ॥ समेदंड्यश्चवध्यश्चभविष्यतिनसंशयः ॥ ९ ॥ ब्रूहिदेवियथाप्रीतिस्तदवश्यंममाग्रतः॥ तदिदानींसाधयिष्येसुदुर्लभमपिक्षणात् ॥ १० ॥ जानासित्वंममस्वांतंप्रियंमांस्ववशेस्थितम् ॥ तथाऽपिमांखेदयसेवृथातवपरिश्रमः ॥ ११ ॥

॥ ७ ॥ किमर्थंतिष्ठसीतिशेषः ॥ ८ ॥ वांछितविधानप्रकारमेवाह कोवेति ॥ ९ ॥ यथायेनप्रकारेणदंडनेनवधेनवातदवश्यंब्रूहि ॥ १० ॥ ममस्वांतंजानासित्वदुःखासहिष्णुत्वेनेतिशेषः प्रियंमांस्वाधीनंजानासि एवंपरिश्रमंविनाऽपित्वदुक्तार्थानुष्ठानंमयाकर्तव्यमेवेतिवृथाऽयंपरिश्रमइतिभावः ॥ ११ ॥

---

१ समाजं.

तेप्रियंकरंधनिनंकुर्याम् अप्रियंकरंचदरिद्रंकुर्याम् धनिनंकुबेरतुल्यधनवंतमपिक्षणेनत्वदहितंनिर्धनंकरिष्यामीतिशेषः ॥ १२ ॥ कंब्रह्मतुल्यमपिवधिष्यामि वधार्हश्चोरादिरपित्वत्प्रियोविमोक्ष्यतेमयेतिशेषः ॥ १३ ॥ यत्तवहितंतत्करोमीतिशपे रामशपथपूर्वकंप्रतिजानेइत्यर्थः ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥

ब्रूहिकंधनिनंकुर्यांदरिद्रंतेप्रियंकरम् ॥ धनिनंक्षणमात्रेणनिर्धनंचतवाहितम् ॥ १२ ॥ ब्रूहिकंत्वावधिष्यामिवधार्होवा विमोक्ष्यते ॥ किमत्रबहुनोक्तेनप्राणान्दास्यामितेप्रिये ॥ १३ ॥ ममप्राणात्[1]प्रियतरोरामोराजीवलोचनः ॥ तस्योपरि शपेब्रूहित्वद्धितंतत्करोम्यहम् ॥ १४ ॥ इतिब्रुवाणंराजानंशपंतंराघवोपरि ॥ शनैर्विमृज्यनेत्रेसाराजानंप्रत्यभाषत ॥ १५ ॥ यदिसत्यप्रतिज्ञोसिशपथंकुरुषेयदि ॥ याञ्चांमेसफलांकर्तुंशीघ्रमेवत्वमर्हसि ॥ १६ ॥ पूर्वंदेवासुरेयुद्धेमयात्वं परिरक्षितः ॥ तदावरद्वयंदत्तंत्वयामेतुष्टचेतसा ॥ १७ ॥ तद्द्वयंन्यासभूतंमेस्थापितंत्वयिसुव्रत ॥ तत्रैकेनवरेणाशुभरतं मेप्रियंसुतम् ॥ १८ ॥ एभिःसंभृतसंभारैर्यौवराज्येऽभिषेचय ॥ अपरेणवरेणाशुरामोगच्छतुदंडकान् ॥ १९ ॥ मुनिवेष धरःश्रीमान्जटावल्कलभूषणः ॥ चतुर्दशसमास्तत्रकंदमूलफलाशनः ॥ २० ॥ पुनरायातुतस्यांतेवनेवातिष्ठतुस्वयम् ॥ प्रभातेगच्छतुवनंरामोराजीवलोचनः ॥ २१ ॥ यदिकिंचिद्विलंबेतप्राणांस्त्यक्ष्येतवाग्रतः ॥ भवसत्यप्रतिज्ञस्त्वमेतदेव ममप्रियम् ॥ २२ ॥ श्रुत्वैतद्दारुणंवाक्यंकैकेय्यारोमहर्षणम् ॥ निपपातमहीपालोवज्राहतइवाचलः ॥ २३ ॥

॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ किंचिद्विलंबेतप्रातःकालोत्तरंक्षणमपिविलंबेमयाप्राणत्यागःकर्तव्यइत्यर्थः ॥ २२ ॥ रोमहर्षणंश्रृण्वतांरोमांचोत्पादकमतिक्रूरत्वात् ॥ २३ ॥

---

[1] भाव्यर्थंसूचयन् परमप्रियत्वमेवदर्शयति ममप्राणात्प्रियतरइति अनेनतद्विषयकदुष्टप्रार्थनानकार्येतिसूचयति.

परयाउत्कृष्टयाकैकेयीभियानेत्रेविमृज्याश्रुरहितेकृत्वा साश्रुनेत्रत्वंदृष्ट्वाऽतिक्रोधेनरामवधंप्रार्थयेदितिअधिकाभीः निवृत्त्येतिपाठेपतनवेलायांपराङ्मुखपत
नादुक्तरीत्याभियैवझटितितत्संमुखीभूयेत्यर्थः पुनर्मनुष्यदेहधरायामद्भार्यायाएवंक्रौर्यासंभवंपर्यालोच्यदुःस्वप्नइतितर्कः जाग्रतःस्वप्नानुभवासंभवादाह अथ
वाममैवचित्तस्यविभ्रमःअन्यार्थकस्यान्यार्थकत्वग्रहः ॥ २४ ॥ इतिविचार्यैतिशेषः पुरःस्थितांव्याघ्रीमिवपुरःपत्नींकैकेयीमालोक्यदृष्ट्वातद्वस्तुतत्त्वनिर्णया
यतामाहेतिशेषः किमाहेत्यत्राह किमिदमिति ममप्राणहरमित्यनेनस्ववैधव्यसंपादकत्वेनात्यंतंस्वानिष्टंकथंभाषसइत्यर्थः ॥ २५ ॥ ननुरामकृतातिदुःसहापरा

शनैरुन्मील्यनयनेविमृज्यपरयाभिया ॥ दुःस्वप्नोवामयादृष्टोह्यथवाचित्तविभ्रमः ॥ २४ ॥ इत्यालोक्यपुरःपत्नींव्याघ्री
मिवपुरःस्थिताम् ॥ किमिदंभाषसेभद्रेममप्राणहरंवचः ॥ २५ ॥ रामःकमपराधंतेकृतवान्कमलेक्षणः ॥ ममाग्रेराघ
वगुणान्वर्णयस्यनिशंशुभान् ॥ २६ ॥ कौसल्यांमांसमंपश्यन्शुश्रूषांकुरुतेसदा ॥ इतिब्रुवंतीत्वंपूर्वमिदानींभाषसेऽन्य
था ॥ २७ ॥ राज्यंगृहाणपुत्रायरामस्तिष्ठतुमंदिरे ॥ अनुगृह्णीष्वमांवामेरामान्नास्तिभयंतव ॥ २८ ॥ इत्युक्त्वाऽश्रुप
रीताक्षःपादयोर्निपपातह ॥ कैकेयीप्रत्युवाचेदंसाऽपिरक्तांतलोचना ॥ २९ ॥ राजेंद्रकिंत्वंभ्रांतोऽसिउक्तंतद्भाषसेऽन्य
था ॥ मिथ्याकरोषिचेत्स्वीयंभाषितंनरकोभवेत् ॥ ३० ॥ वनंनगच्छेद्यदिरामचंद्रःप्रभातकालेऽजिनचीरयुक्तः ॥ उद्बंध
नंवाविषभक्षणंवाकृत्वामरिष्येपुरतस्तवाहम् ॥ ३१ ॥

धवशात्स्वानिष्टेमेप्रवृत्तिस्तत्राह रामइति अपराधाकरणंप्रागुक्तत्वद्वाक्येनैवनिर्णीतमित्याह ममेति ॥ २६ ॥ इदानीमन्यथाभाषसे अतःपूर्वापरविरोधादिदंत्वद्व
चोऽश्रद्धेयमित्यर्थः ॥२७॥ यदिराज्यलोभस्तेतत्राह राज्यमिति रामस्येहस्थितावपिनतेभयमित्यर्थः वामेमद्विरुद्धाचरणशीले ॥ २८ ॥ साऽपिपूर्वतादृशभा
षणशीलाऽतिमृदुरपिकैकेयीदेववाण्यावेशवशाद्रक्तांतलोचनासतीराजानंप्रत्युवाच ॥ २९ ॥ उक्तंप्रतिज्ञापूर्वमुक्तम् ॥ ३० ॥ मिथ्याभाषणजन्योनरको
ऽस्येवपुनःपापांतरजंनरकमपिदर्शयति वनमितिअजिनमेवचीरंऋषिवस्त्रंतेनयुक्तः ॥ ३१ ॥

विडंबसेश्लाघसे रामोपरीत्यनेनभगवच्छपथोमिथ्यात्वयाकृतइतिध्वनयति ॥ ३२ ॥ ३३ ॥ ३४ ॥ तान्बंद्यादीनूगणान्निवर्त्य रोषंरोषातिशयंआस्थितात्राप्ता

सत्यप्रतिज्ञोऽहमितीहलोकेविडंबसेसर्वसभांतरेषु॥ रामोपरित्वंशपथंचकृत्वामिथ्याप्रतिज्ञोनरकंप्रयाहि ॥ ३२ ॥ इ
त्युक्तःप्रिययादीनोमग्नोदुःखार्णवेनृपः ॥ मूर्छितःपतितोभूमौविसंज्ञोमृतकोयथा ॥ ३३ ॥ एवंरात्रिर्गतातस्यदुःखा
त्संवत्सरोपमा॥ अरुणोदयकालेतुबंदिनोगायकाजगुः ॥ ३४ ॥ निवारयित्वातान्सर्वान्कैकेयीरोषमास्थिता॥ ततः
प्रभातसमयेमध्यकक्षमुपस्थिताः ॥ ३५ ॥ ब्राह्मणाःक्षत्रियावैश्याऋषयःकन्यकास्तथा ॥ छत्रंचचामरंदिव्यंगजोवा
जीतथैवच ॥ ३६ ॥ अन्याश्ववारमुख्यायाःपौरजानपदास्तथा ॥ वसिष्ठेनयथाऽऽज्ञप्तंतत्सर्वंतत्रसंस्थितम् ॥ ३७ ॥
स्त्रियोबालाश्ववृद्धाश्चरात्रौनिद्रांनलेभिरे ॥ कदाद्रक्ष्यामहेरामंपीतकौशेयवाससम् ॥ ३८ ॥ सर्वाभरणसंपन्नंकिरी
टकटकोज्ज्वलम्॥ कौस्तुभाभरणंश्यामंकंदर्पशतसुंदरम् ॥ ३९ ॥ अभिषिक्तंसमायातंगजारूढंस्मिताननम् ॥ श्वेत
च्छत्रधरंतत्रलक्ष्मणंलक्षणान्वितम् ॥ ४० ॥ रामंकदावाद्रक्ष्यामःप्रभातंवाकदाभवेत् ॥ इत्युत्सुकधियःसर्वेबभूवुःपु
रवासिनः ॥ ४१ ॥ नेदानीमुत्थितोराजाकिमर्थंचेतिचिंतयन्॥ सुमंत्रःशनकैःप्रायाद्यत्रराजाऽवतिष्ठते॥ ४२ ॥ वर्ध
यन्जयशब्देनप्रणमन्शिरसानृपम्॥ अतिखिन्नंनृपंदृष्ट्वाकैकेयींसमपृच्छत ॥ ४३ ॥ देविकैकेयिवर्धस्वकिंराजादृश्य
तेऽन्यथा॥ तमाहकैकयीराजारात्रौनिद्रांनलब्धवान् ॥ ४४ ॥

प्रातःसमयेजातेऽपिराममाकार्यवनायनप्रेषयतीत्यधिकोरोष. ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ किरीटकटकानिउज्ज्वलानिशोभावंतियस्संबंधात्तम् ॥ ३९ ॥
॥ ४० ॥ ४१ ॥ सुमंत्रःइतिप्रजानांतादृशींचिंतांज्ञात्वास्वयमपिचिंतयन्नित्यर्थः ॥ ४२ ॥ ४३ ॥ अन्यथाशोकवान्अस्वस्थश्च ॥ ४४ ॥

॥ ४५ ॥ भामिनिकोपनेइत्यर्थः कोपनासैवभामिनीतिनिघंटुः ॥ ४६ ॥ ४७ ॥ अतिवृद्धत्वात्प्रियत्वाच्चद्वारपालैरवारितः ॥ ४८ ॥ ४९ ॥ पश्यन्नेवपितृद
र्शनत्वरयादर्शनमात्रेणचक्षुषैवतेषांशिष्टाचारंकुर्वन्नित्यर्थः ॥ ५० ॥ ससंभ्रमःसादरः ॥ ५१ ॥ दुःखात्आविरामविरहदुःखात् ॥ ५२ ॥ समाविशत्प्राविशत्

रामरामेतिरामेतिराममेवानुचिंतयन् ॥ प्रजागरेणवैराजाह्यस्वस्थइवलक्ष्यते ॥ राममानयशीघ्रंत्वंराजाद्रष्टुमिहेच्छ
ति ॥ ४५ ॥ सुमंत्रउवाच ॥ अश्रुत्वाराजवचनंकथंगच्छामिभामिनि ॥ तच्छ्रुत्वामंत्रिणोवाक्यंराजामंत्रिणमब्रवी
त् ॥ ४६ ॥ सुमंत्ररामंद्रक्ष्यामिशीघ्रमानयसुंदरम् ॥ इत्युक्तस्त्वरितंगत्वासुमंत्रोराममंदिरम् ॥ ४७॥ अवारितःप्र
विष्टोऽयंत्वरितंराममब्रवीत् ॥ शीघ्रमागच्छभद्रंतेरामराजीवलोचन ॥ ४८ ॥ पितुर्गेहंमयासार्धंराजात्वांद्रष्टुमिच्छ
ति ॥ इत्युक्तोरथमारुह्यसंभ्रमात्त्वरितोययौ ॥ ४९ ॥ रामःसारथिनासार्धंलक्ष्मणेनसमन्वितः ॥ मध्यकक्षेवसिष्ठा
दीन्पश्यन्नेवत्वरान्वितः ॥ ५० ॥ पितुःसमीपंसंगम्यननामचरणौपितुः ॥ राममालिंगितुंराजासमुत्थायससंभ्रमः
॥ ५१ ॥ बाहूप्रसार्यरामेतिदुःखान्मध्येपपातह ॥ हाहेतिरामस्तंशीघ्रमालिंग्यांकेन्यवेशयत् ॥ ५२ ॥ राजानंमूर्छि
तंदृष्ट्वाचुक्रुशुःसर्वयोषितः ॥ किमर्थंरोदनमितिवसिष्ठोपिसमाविशत् ॥ ५३ ॥ रामःपप्रच्छकिमिदंराज्ञोदुःखस्यका
रणम् ॥ एवंपृच्छतिरामेसाकैकेयीराममब्रवीत् ॥ ५४ ॥ त्वमेवकारणंह्यत्रराज्ञोदुःखोपशांतये ॥ किंचित्कार्यंत्व
यारामकर्तव्यंनृपतेर्हितम् ॥ ५५॥ कुरुसत्यप्रतिज्ञस्त्वंराजानंसत्यवादिनम्॥ राज्ञावरद्वयंदत्तंममसंतुष्टचेतसा ॥५६॥
त्वदधीनंतुतत्सर्वंवक्तुंत्वांलज्जतेनृपः ॥ सत्यपाशेनसंबद्धंपितरंत्रातुमर्हसि ॥ ५७॥

राजगृहमितिशेषः ॥ ५३ ॥ ५४ ॥ राजदुःखोपशांतयेतदर्थंत्वमेवकारणम् तदेवकारणत्वंसमर्थयति किंचिदिति ॥ ५५ ॥ कार्यमेवाह सत्यप्रतिज्ञइति त्वंदंड
कागमनविषयेसत्यप्रतिज्ञोभूत्वाइत्यर्थः ॥ ५६ ॥ तत्सर्वंतद्वरद्वयानुष्ठानंत्वदधीनम् अतःसत्यपाशेनेति ॥ ५७ ॥

पुत्रशब्देनैतदुच्यते तदेवदर्शयति पुंनाम्नोनरकात्पितात्रायतेयेनसपुत्रइत्यर्थः ॥ ५८ ॥ पिबेयंविषम् पित्राज्ञप्तइतिशेषः ॥ ५९ ॥ यःकुरुतेसउत्तमइत्यर्थः ॥ ६० ॥ मलोमलसदृशः ॥ ६१ ॥ ६२ ॥ ६३ ॥ तैर्भरतोऽवश्यमभिषेच्यएवेत्यन्वयः ॥ ६४ ॥ समाःवर्षाणि ॥ ६५ ॥ ६६ ॥ राजाकिंकेनकारणेनेहवि

पुत्रशब्देनचैतद्धिनरकात्त्रायतेपिता ॥ रामस्तयोदितंश्रुत्वाशूलेनाभिहतोयथा ॥ ५८ ॥ व्यथितःकैकेयींप्राहकिंमामे
वंप्रभाषसे ॥ पित्रर्थंजीवितंदास्येपिबेयंविषमुल्बणम्[१] ॥ ५९ ॥ सीतांत्यक्ष्येऽथकौसल्यांराज्यंचापित्यजाम्यहम् ॥
अनाज्ञप्तोऽपिकुरुतेपितुःकार्यंसउत्तमः ॥ ६० ॥ उक्तःकरोतियःपुत्रःसमध्यमउदाहृतः ॥ उक्तोऽपिकुरुतेनैवसपुत्रोमल
उच्यते ॥ ६१ ॥ अतःकरोमितत्सर्वंयन्मामाहपितामम ॥ सत्यंसत्यंकरोम्येवरामोद्विर्नाभिभाषते ॥ ६२ ॥ इतिरामप्रति
ज्ञांसाश्रुत्वावक्तुंप्रचक्रमे ॥ रामत्वदभिषेकार्थंसंभाराःसंभृताश्चये ॥ ६३ ॥ तैरेवभरतोऽवश्यमभिषेच्यःप्रियोमम ॥
अपरेणवरेणाशुचीरवासाजटाधरः ॥ ६४ ॥ वनंप्रयाहिशीघ्रंत्वमद्यैवपितुराज्ञया ॥ चतुर्दशसमास्तत्रवसमुन्यन्न
भोजनः ॥ ६५ ॥ एतदेवपितुस्तेद्यकार्यंत्वंकर्तुमर्हसि ॥ राजातुलज्जतेवक्तुंत्वामेवंरघुनंदन ॥ ६६ ॥ श्रीरामउवाच ॥
भरतस्यैवराज्यंस्यादहंगच्छामिदंडकान् ॥ किंतुराजानवक्तीहमांनजानेऽत्रकारणम् ॥ ६७ ॥ श्रुत्वैतद्रामवचनंदृष्ट्वा
रामंपुरःस्थितम् ॥ प्राहराजादशरथोदुःखितोदुःखितंवचः ॥ ६८ ॥ स्त्रीजितंभ्रांतहृदयमुन्मार्गपरिवर्तिनम् ॥ निगृह्य
मांगृहाणेदंराज्यंपापंनतद्भवेत् ॥ ६९ ॥

षयेमांनवक्तितत्कारणंनजाने अकर्तव्यतासंभावनायामप्यभावादितिभावः दुःखितंराज्ञोऽवचनेनेतिशेषः ॥ ६८ ॥ ज्येष्ठादाच्छिद्यकनिष्ठायराज्यदानरूपेउन्मार्गेवर्तमानमतएवभ्रांतहृदयंस्त्रीजितंच पापंनतद्भवेदिति गुरोरप्यवलिप्तस्यकार्याकार्यमजानतः उत्पथप्रतिपन्नस्यदंडएवविधीयतेइतिनीत्युक्तेः ॥ ६९ ॥

---

[१] अतितीव्रवेदनं.

त्वयाबलात्कारेणग्रहणान्ममाप्येतद्वरदानानृतकृतोनदोषइत्याह एवंचेदिति ॥ ७० ॥ यद्यपितवजगन्नाथत्वाद्राज्यविपिनयोःसममेवतथाऽपित्वद्वियोगेममप्राणास्त्वद्वल्लभत्वात्त्वयासहगमिष्यंतीत्याह ममप्राणवल्लभेति ॥ ७१ ॥ विमृज्यनिरस्ताश्रुकेकृत्वा ॥ ७२ ॥ शासत्वित्यार्षम् मदनुजेनापिराज्यकरणेतस्यापि त्वत्पुत्रत्वात्त्वद्भक्तत्वाच्चात्रदुःखंवृथेतिभावः ॥ ७३ ॥ ७४ ममसुखंतुविशिष्टम् हेदेवत्वत्सत्यपालनरूपंकार्यंचभविष्यतीत्यधिकोलाभःविशेषेणदेवानांका

एवंचेदनृतंनैवमांस्पृशेद्रघुनंदन ॥ इत्युक्त्वादुःखसंतप्तोविललापनृपस्तदा ॥ ७० ॥ हारामहाजगन्नाथहाममप्राणवल्लभ॥ मांविसृज्यकथंघोरंविपिनंगंतुमर्हसि ॥ ७१ ॥ इतिरामंसमालिंग्यमुक्तकंठोरुरोदह ॥ विमृज्यनयनेरामःपितुःसजलपाणिना ॥ ७२ ॥ आश्वासयामासनृपंशनैःसनयकोविदः ॥ किमत्रदुःखेनविभोराज्यंशासतुमेऽनुजः ॥ ७३ ॥ अहंप्रतिज्ञांनिस्तीर्यपुनर्यास्यामितेपुरम् ॥ राज्यात्कोटिगुणंसौख्यंममराजन्वनेसतः ॥ ७४ ॥ त्वत्सत्यपालनंदेवकार्यंचापिभविष्यति ॥ कैकेय्याश्चप्रियोराजन्वनवासोमहागुणः ॥ ७५ ॥ इदानींगंतुमिच्छामिव्येतुमातुश्चहृज्ज्वरः ॥ संभाराश्चोपह्रीयंतामभिषेकार्थमागताः ॥ ७६ ॥ मातरंचसमाश्वास्यअनुनीयचजानकीम् ॥ आगत्यपादौवंदित्वातवयास्येसुखंवनम् ॥ ७७ ॥ इत्युक्त्वातुपरिक्रम्यमातरंद्रष्टुमाययौ ॥ कौसल्याऽपिहरेःपूजांकुरुतेरामकारणात् ॥ ७८ ॥ होमंचकारयामासब्राह्मणेभ्योददौधनम् ॥ ध्यायतेविष्णुमेकाग्रमनसामौनमास्थिता ॥ ७९ ॥

र्यंचरक्षोनाशरूपंभविष्यतीतिध्वनितम् कैकेय्याश्चप्रियोऽतोमहागुणःबहुगुणइत्यर्थः ॥ ७५ ॥ इदानीमेवेत्यर्थःउपह्रीयंतांदूरीक्रियंताम् ॥ ७६ ॥ सुखमित्यनेनममवनगमनेदुःखलेशोऽपिनास्तीतिध्वनितम् ॥ ७७ ॥ रामकारणात्रामाभिषेकविघ्ननिवृत्तिनिमित्तम् ॥ ॥ ७८ ॥ एकाग्रमनसोक्तफलार्थमेवविष्णुंध्यायते च आर्षमात्मनेपदम् ॥ ७९ ॥

अंतस्थमंतर्यामितयाहृदयेस्थितम् ध्येयंरूपमाह घनेत्यादि निरस्तेत्यादिनानिर्विकल्पकसमाधिस्थेत्युक्तम् सकलविशेषरहितध्यानस्यैवनिर्विकल्पकत्वात् निरस्तानिसर्वाणिअतिशयस्वरूपाणिभेदकस्वरूपाणियेनेत्यक्षरार्थः ॥८०॥ ॥इतिश्रीम०सेतौ अ०तृतीयःसर्गः ॥३॥ ॥छ॥ चतुर्थेलक्ष्मणंक्रुद्धंसांत्वयित्वोपदेशतः

अंतस्थमेकंघनचित्प्रकाशंनिरस्तसर्वातिशयस्वरूपम् ॥ विष्णुंसदानंदमयंहृदब्जेसाभावयंतीनददर्शरामम् ॥ ८० ॥
इतिश्रीमद्० अयोध्याकांडेतृतीयःसर्गः॥ ३॥ ॥छ॥ ॥ततःसुमित्राहृष्ट्वैनंरामंराज्ञींससंभ्रमा ॥कौसल्यांबोध
यामासरामोऽयंसमुपास्थितः ॥ १ ॥ श्रुत्वैवरामनामैषाबहिर्दृष्टिप्रवाहिता ॥ रामंदृष्ट्वाविशालाक्षमालिंग्यांकेन्यवेश
यत् ॥ २ ॥ मूर्ध्न्यवघ्रायपस्पर्शगात्रंनीलोत्पलच्छवि ॥ भुंक्ष्वपुत्रेतिचप्राहमिष्टमन्नंक्षुधार्दितः ॥ ३ ॥ रामःप्राहनमे
मातर्भोजनावसरःकृतः ॥ दंडकागमनेशीघ्रंममकालोऽद्यनिश्चितः ॥ ४ ॥ कैकेयीवरदानेनसत्यसंधःपितामम ॥ भर
तायददौराज्यंममाप्यारण्यमुत्तमम् ॥ ५ ॥ चतुर्दशसमास्तत्रह्युषित्वामुनिवेषधृक् ॥ आगमिष्येपुनःशीघ्रंनचिंतांकर्तु
मर्हसि ॥ ६ ॥ तच्छ्रुत्वासहसोद्विग्नामूर्च्छितापुनरुत्थिता ॥ आहरामंसुदुःखार्तादुःखसागरसंप्लुता ॥ ७ ॥ यदिराम
वनंसत्यंयासिचेन्नयमामपि ॥ त्वद्विहीनाक्षणार्धंवाजीवितंधारयेकथम् ॥ ८ ॥ यथागौर्बालकंवत्संत्यक्त्वातिष्ठेन्नकु
त्रचित् ॥ तथैवत्वांनशक्नोमित्यक्तुंप्राणास्प्रियंसुतम् ॥ ९ ॥

सीतयासहितोऽगच्छद्दंडकंचेतिवर्ण्यते ॥ १ ॥ ससंभ्रमासादरासुमित्राराज्ञींकौसल्यांबोधयामासेत्यन्वयः ॥ १ ॥ बहिर्दृष्टिप्रवाहिता त्यक्तसमाधिरित्यर्थः ॥ २ ॥ भुंक्ष्वपुत्रेतिअप्लुतवद्भावात्संधिः ॥ ३ ॥ भोजनावसरोनकृतःपित्रेतिशेषःनिश्चितःकृतःपित्रेतिशेषः ॥ ४ ॥ ५ ॥ मुनिवेषःचीरवासस्त्वादिकम् चिंतांमद्विषयांकर्तुंनार्हसि ॥ ६ ॥ संप्लुतामग्ना ॥ ७ ॥ क्षणार्धंवाक्षणार्धमपि ॥ ८ ॥ बालकमत्यंतबालम् वत्सशब्दोहिगवापत्येरूढः ॥ ९ ॥

राजाराज्यंप्रयच्छतु तस्यात्यंतमिच्छाविषयत्वात् किमर्थमिति नहितेनकिंचिद्भरतेष्टमितिभावः ॥ १० ॥ त्वयाकिमपराद्धम् यत्त्वांवनायप्रस्थापयतीतिशेषः
॥ ११ ॥ यथापितागुरुस्तथाऽहमपितवगुरुः यद्वा ततोऽधिका पितुर्दशगुणंमातागौरवेणातिरिच्यतइतिस्मृतेः एवंचमदाज्ञयावनागमनमेवोचितमितिभावः
॥ १२ ॥ तदाप्राणानिति एवंचमातृवधदोषोवनगमनेऽधिकइतिभावः ॥ १३ ॥ रुषादहन्निवेत्यन्वयः ॥ १४ ॥ भ्रांतमनसंराज्यलोभेन अतएवकैकेयीवश

भरतायप्रसन्नश्चेद्राज्यंराजाप्रयच्छतु ॥ किमर्थंवनवासायत्वामाज्ञापयतिप्रियम् ॥ १० ॥ कैकेय्यावरदोराजासर्वस्वं
वाप्रयच्छतु ॥ त्वयाकिमपराद्धंहिकैकेय्यावानृपस्यवा ॥ ११ ॥ पितागुरुर्यथारामतवाहमधिकाततः ॥ पित्राज्ञप्तोव
नंगंतुंवारयेयमहंसुतम् ॥ १२ ॥ यद्विगच्छसिमद्वाक्यमुल्लंघ्यनृपवाक्यतः ॥ तदाप्राणान्परित्यज्यगच्छामियमसादनम्
॥ १३ ॥ लक्ष्मणोऽपिततःश्रुत्वाकौसल्यावचनंरुषा ॥ उवाचराघवंवीक्ष्यदहन्निवजगत्त्रयम् ॥ १४ ॥ उन्मत्तंभ्रांतम
नसंकैकेयीवशवर्तिनम् ॥ बद्धानिहन्मिभरतंतद्बंधून्मातुलानपि ॥ १५ ॥ अद्यपश्यंतुमेशौर्यंलोकान्प्रदहतःपुरा ॥ राम
त्वमभिषेकायकुरुयत्नमरिंदम ॥ १६ ॥ धनुष्पाणिरहंतत्रनिहन्यांविघ्नकारिणः ॥ इतिब्रुवंतंसौमित्रिमालिंग्यरघुनंदनः
॥ १७ ॥ शूरोऽसिरघुशार्दूलममात्यंतहितेरतः ॥ जानामिसर्वंतेसत्यंकिंतुतत्समयोनहि ॥ १८ ॥ यदिदंदृश्यतेसर्वंराज्यं
देहादिकंचयत् ॥ यदिसत्यंभवेत्तत्रआयासःसफलश्चते ॥ १९ ॥

वर्तिनम् ॥ १५ ॥ पुरालोकान्प्रदहतःकालाग्निरुद्रस्येवेत्यर्थः अनेनतदवतारत्वंस्वस्यसूचितम् ॥ १६ ॥ तत्राभिषेकेविघ्नकारिणोनिहन्यामित्यर्थः ॥ १७ ॥
तेसर्वंकालाग्निरुद्रतुल्यत्वंतद्रूपत्वंचसत्यमेवजानामिकिंतुतस्यपराक्रमस्यसमयइदानींनकिंतुचतुर्दशेवर्षेइतिव्यंग्यम् ॥ १८ ॥ अथतत्रत्यजनप्रतारणायसंसारा
नित्यत्वप्रदर्शनेनरोषान्निवर्तयति यदिदमिति सर्वंजगत्राज्यमंततःस्वदेहेंद्रियादिकंचनसत्यम् तथाचकिंकस्यार्थेउपादेयंयेनैवंरोषःकार्यइतिभावः यदिसत्यंभवे
त्तदातेआयासःसफलोभवेदित्यन्वयः ॥ १९ ॥

मेघवितानंमेघसमूहः एवंचभोग्यभोक्त्रोरुभयोरप्यस्थिरत्वात्सर्वंव्यर्थमितिभावः ॥ २० ॥ यथेति यथासर्पगलवर्तीभेकस्तद्गलवर्तिकोमलमांसभोगायासन्नमपिस्वमृत्युमजानंस्तद्गलमांसदंशनमपेक्षतेइच्छतितथाकालाहियस्तोलोकोभोगानिच्छतीत्यर्थः ॥ २१ ॥ कर्मतंत्रंधनार्जनादिव्यापारंकाम्यंवैदिकंकर्मच नन्वत्रकस्यभोगःशरीरस्यउतात्मनः नाद्यइत्याह देहस्त्विति पुरुषाद्भेदवतस्तस्यात्यंतजडत्वात्सुखादिसाक्षात्काररूपभोगस्यतत्रासंभवइतिभावः नांत्यइत्याह

भोगामेघवितानस्थविद्युल्लेखेवचंचलाः ॥ आयुरप्यग्निसंतप्तलोहस्थजलबिंदुवत् ॥ २० ॥ यथाव्यालगलस्थोऽपिभेकोदंशानपेक्षते॥ तथाकालाहिनाग्रस्तोलोकोभोगानशाश्वतान् ॥ २१ ॥ करोतिदुःखेनहिकर्मतंत्रंशरीरभोगार्थमहर्निशंनरः॥देहस्तुभिन्नःपुरुषात्समीक्ष्यतेकोवात्रभोगःपुरुषेणभुज्यते ॥ २२ ॥ पितृमातृसुतभ्रातृदारबंध्वादिसंगमः॥ प्रपायामिवजंतूनांनद्यांकाष्ठौघवच्चलः ॥ २३ ॥ छायेवलक्ष्मीश्चपलाप्रतीतातारुण्यमंबूर्मिवदध्रुवंच ॥ स्वप्नोपमंस्त्रीसुखमायुरल्पंतथाऽपिजंतोरभिमानएषः ॥ २४ ॥ संसृतिःस्वप्नसदृशीसदारोगादिसंकुला ॥ गंधर्वनगरप्रख्यामूढस्तामनुवर्तते ॥ २५ ॥ आयुष्यंक्षीयतेयस्मादादित्यस्यगतागतैः[1]॥ दृष्ट्वाऽन्येषांजरामृत्यूकथंचिन्नैवबुध्यते॥ २६ ॥

कोवात्रेति तस्यशुद्धस्वभावत्वेनापरिणामित्वात्तस्यभोगासंभवइतिभावः अत्रदेहशब्देनचित्तमप्युपलक्ष्यते यद्यपितयोःपरस्परंविवेकाग्रहाच्चित्तस्यभोगस्तथाऽपिसभ्रांतिमूलकइतिहेयएवेतितात्पर्यम् ॥ २२ ॥ एवंभोगस्यापारमार्थिकत्वमुक्त्वेदानींवैराग्यायपुत्रादिसंगस्यास्थिरत्वमाह पित्रिति प्रपापानीयशाला काष्ठौघयोरिवकाष्ठौघवत् ॥ २३ ॥ प्रतीतानिश्चिता एषःअभिमानःममधनादिअनेनचममचिरंभोगइत्यादिः ॥ २४ ॥ संसृतिःसंसारस्थितिःस्वप्नसदृशीअल्पकालअनुवर्तते तामुपादेयत्वेनमनुतइत्यर्थः ॥ २५ ॥ कथंचिदिति कथमपीत्यर्थः नबुध्यतेममापिजरामृत्यूस्तइतिकथमपिनबुध्यतइत्यर्थः ॥ २६ ॥

---

[1] अहोरात्रैरितिपर्यवसितोर्थः

पूर्वपूर्वभुक्तदिनरात्र्यपेक्षयोत्तरोत्तरस्यविशेषमपश्यन्अतोमूढमतिःकालवेगंपूर्वपूर्वावस्थापहारकंनपश्यति अतोभोगाननुपततितेष्वासज्जते ॥ २७ ॥ आमघटः अपक्वघटःसपत्नाःशत्रवः ॥२८॥ आगतप्रायाहंकिंमूढोऽसीतितर्जयंती मृत्युःसमयंप्रहर्तुंसंप्रतीक्षते सहतिष्ठन्नपि ॥ २९॥ देहेउपचयादिविशिष्टेकृमिविड्भस्मसंज्ञिते भूस्थेआद्यासंज्ञा जंतुभिर्भक्षितेमध्यासंज्ञा दग्धेअंत्या तादृशेदेहेऽहंभावप्राप्तोहंराजेतिअस्मिन्लोकेमनुते ॥३०॥ अथदेहस्यात्मत्वंखंडयति त्वगिति त्वगादिसंयुतत्वाद्विकारीरसादिधातुविकारवान् परीणामीबाल्याद्यवस्थापरिणामवान् आत्मात्वविकारीअपरिणामीचेतिविपरीतःश्रुत्यादिभिरुक्तइतिभावः

सएवदिवसःसैवरात्रिरित्येवमूढधीः॥ भोगाननुपतत्येवकालवेगंनपश्यति ॥ २७॥ प्रतिक्षणंक्षरत्येतदायुरामघटांबुवत्॥ सपत्नाइवरोगौघाःशरीरंप्रहरंत्यहो॥ २८ ॥ जराव्याघ्रीवपुरतस्तर्जयंत्यवतिष्ठते॥ मृत्युःसहैवयात्येषसमयंसंप्रतीक्षते ॥ २९ ॥ देहेऽहंभावमापन्नोराजाऽहंलोकविश्रुतः॥ इत्यस्मिन्मनुतेजंतुःकृमिविड्भस्मसंज्ञिते ॥ ३० ॥ त्वगस्थिमांसविण्मूत्ररेतोरक्तादिसंयुतः॥ विकारीपरिणामीचदेहआत्माकथंवद॥ ३१ ॥ यमास्थायभवाँल्लोकंदग्धुमिच्छति लक्ष्मण॥ देहाभिमानिनःसर्वेदोषाःप्रादुर्भवंतिहि ॥ ३२ ॥ देहोऽहमितियाबुद्धिरविद्यासाप्रकीर्तिता॥ नाहंदेहश्चिदात्मेतिबुद्धिर्विद्येतिभण्यते ॥ ३३ ॥ अविद्यासंसृतेर्हेतुर्विद्यातस्यानिवर्तिका ॥ तस्माद्यत्नःसदाकार्योविद्याभ्यासेमुमुक्षुभिः॥ कामक्रोधादयस्तत्रशत्रवःशत्रुसूदन ॥ ३४ ॥

॥ ३१ ॥ यंरागादिदोषसमूहम् तेदोषादेहाभिमानिनःप्रादुर्भवंति तस्मात्तंत्यजेतिभावः ॥ ३२ ॥ देहाभिमानिनोऽस्यरागादिदोषप्रादुर्भावकत्वंतत्कारणाविद्यारूपत्वात्तस्येत्याह देहोऽहमिति देहइत्युपलक्षणमंतःकरणादेरपि तदाह चिदात्मेति ॥ ३३ ॥ संसृतेःसंसारमूलस्यरागादिदोषस्य शत्रवइति स्वजननाविद्योच्छेदकत्वाद्विद्याभ्यासेकामादयःशात्रवंकुर्वंतीत्यर्थः ॥ ३४ ॥

प्रकृतोपयोगितयाक्रोधस्यैवमुक्तिविघातेप्राधान्यमाह तत्रापीति पित्रादिवधेनपातित्यंप्राप्तोनश्रवणादावधिकारीतिभावः ॥ ३५ ॥ मनस्तापःतज्जनकंहनना द्युपायान्वेषणमित्यर्थः ॥ ३६ ॥ महान्शत्रुःपरिणामेस्वप्राणापहारकत्वात् क्रोधएवयमःसाक्षादितिपाठांतरम् वैतरणीनदीदुस्तरत्वात् विषयलाभैःकथमप्यन पगमादितिभावः नजातुकामःकामानामुपभोगेनशाम्यति इंधनैःकृष्णवर्त्मेवभूयएवाभिवर्धतइत्युक्तेः नंदनवनमानंदजनकत्वात् ॥ ३७ ॥ एवंशांतिसेवने ॥ ३८ ॥ तेभ्योवैलक्षण्यमेवाह अविकारीनिराकृतिःदेहादिस्तुसाकारइतिभावः ॥ ३९ ॥ तावदिति अहंममेत्यभिमानसत्वादितिभावः भिन्नंबुद्ध्यादिभ्यइत्यर्थः

तत्रापिक्रोधएवालंमोक्षविघ्नायसर्वदा ॥ येनाविष्टःपुमान्हंतिपितृभ्रातृसुहृत्सखीन् ॥ ३५ ॥ क्रोधमूलोमनस्तापःक्रो
धःसंसारबंधनम् ॥ धर्मक्षयकरःक्रोधस्तस्मात्क्रोधंपरित्यज ॥ ३६ ॥ क्रोधएषमहान्शत्रुस्तृष्णावैतरणीनदी ॥ संतोषो
नंदनवनंशांतिरेवहिकामधुक् ॥ ३७ ॥ तस्मात्क्षांतिंभजस्वाद्यशत्रुरेवंभवेन्नते ॥ देहेंद्रियमनःप्राणबुद्ध्यादिभ्योविलक्ष
णः ॥ ३८ ॥ आत्माशुद्धःस्वयंज्योतिरविकारीनिराकृतिः ॥ यावद्देहेंद्रियप्राणैर्भिन्नत्वंनात्मनोविदुः ॥ ३९ ॥ तावत्संसार
दुःखौघैःपीड्यंतेमृत्युसंयुताः ॥ तस्मात्त्वंसर्वदाभिन्नमात्मानंहृदिभावय ॥ ४० ॥ बुद्ध्यादिभ्योबहिःसर्वमनुवर्तस्वमाखिदः
॥ भुंजन्प्रारब्धमखिलंसुखंवादुःखमेववा ॥ ४१ ॥ प्रवाहपतितःकार्यंकुर्वन्नपिनलिप्यसे ॥ बाह्येसर्वत्रकर्तृत्वमावहन्नपि
राघव ॥ ४२ ॥ अंतःशुद्धस्वभावस्त्वंलिप्यसेनचकर्मभिः ॥ एतन्मयोदितंकृत्स्नंहृदिभावयसर्वदा ॥ ४३ ॥

॥ ४० ॥ बुद्ध्यादिभ्यःल्यब्लोपेपंचमी तदतिरिक्तोऽहमितिअंतर्जानन्नेवतानालंब्यबहिर्लौकव्यवहारेसर्वंलोकव्यवहारंलोकवदेवानुवर्तस्वकुरुपरंतुतत्रमाखिदः खेदंनकुरु ननुलोकवत्कार्यकरणेतद्वत्खेदोऽवश्यंभाव्येवेत्यतआह भुंजन्निति अखिलंसुखंदुःखंवाप्रारब्धमित्येवंभुंजंस्तथाभावयन् ॥ ४१ ॥ प्रवाहपतितो ऽपिसंसारप्रवाहस्थोऽपिकार्यंव्यवहारंकुर्वन्नपितज्जन्यपापपुण्याभ्यांनलिप्यतेपृथग्जनोऽपि एवंचतवतथाभावयतःसर्वथातदलेपइत्याह बाह्येति ॥ ४२ ॥ तदेवाह एतदिति ॥ ४३ ॥

॥ ४४ ॥ समागमंमेपुनरागमं एवंभावयंतीप्रतीक्षस्वेत्यर्थः ॥ ४५ ॥ यथासरितांप्रवाहेपतितप्लवानांनसदैकत्रसंवासःकिंतुक्षणमात्रंतथाकर्ममार्गेसंसारेवर्तमाना
नांपितृपुत्रादीनामपीत्यर्थः एवंभावनायांचतुर्दशसमानांसंख्यादिवसगणनाक्षणार्धवत्अत्यल्पकालेनैवसमाप्ताभविष्यतीत्यर्थः ॥ ४६ ॥ एवंचेत्त्वदनुमत्यागमनं
चेत्तदाममवनेसुखजनकःसंवासोभविष्यतीत्यर्थः ॥ ४७ ॥ चिरंयावदनुमतिपर्यंतं अभिनंदयत् अभ्यनंदयत्अडभावआर्षः ॥ ४८ ॥ तदेवाह सर्वइति सदेत्य

संसारदुःखैरखिलैर्बाध्यसेनकदाचन ॥ त्वमप्येवंमयादिष्टंहृदिभावयनित्यदा ॥ ४४ ॥ समागमंप्रतीक्षस्वनदुःखैःपी
ड्यसेचिरम् ॥ नसदैकत्रसंवासः[1]कर्ममार्गानुवर्तिनाम् ॥ ४५ ॥ यथाप्रवाहपतितप्लुवानांसरितांतथा ॥ चतुर्दशसमासं
ख्याक्षणार्धमिवजायते ॥ ४६ ॥ अनुमन्यस्वमामंबदुःखंसंत्यज्यदूरतः ॥ एवंचेत्सुखसंवासोभविष्यतिवनेमम ॥ ४७ ॥
इत्युक्त्वादंडवन्मातुःपादयोरपतच्चिरम् ॥ उत्थाप्यांकेसमावेश्यआशीर्भिरभिनंदयत् ॥ ४८ ॥ सर्वेदेवाःसगंधर्वाब्रह्म
विष्णुशिवादयः ॥ रक्षंतुत्वांसदायांतंतिष्ठंतंनिद्रयायुतम् ॥ ४९ ॥ इतिप्रस्थापयामाससमालिंग्यपुनःपुनः ॥ लक्ष्मणोऽ
पितदारामंनत्वाहर्षाश्रुगद्गदः ॥ ५० ॥ आहराममसमांतस्थःसंशयोयंत्वयाहृतः ॥ यास्यामिपृष्ठतोरामसेवांकर्तुंतदा
दिश ॥ ५१ ॥ अनुगृह्णीष्वमांरामनोचेत्प्राणांस्त्यजाम्यहम् ॥ तथेतिराघवोऽप्याहलक्ष्मणंयाहिमाचिरम् ॥ ५२ ॥ प्र
तस्थेतांसमाधातुंगतःसीतापतिर्विभुः ॥ आगतंपतिमालोक्यसीतासुस्मितभाषिणी ॥ ५३ ॥ स्वर्णपात्रस्थसलिलैः
पादौप्रक्षाल्यभक्तितः ॥ पप्रच्छपतिमालोक्यदेवार्किंसेनयाविना ॥ ५४ ॥

स्यविवरणंयांतमित्यादि ॥ ४९ ॥ ५० ॥ रामेतिपुनरुक्तिर्हर्षातिशयात् ॥ ५१ ॥ ५२ ॥ एवंलक्ष्मणमुक्त्वाप्रतस्थेमातृगृहादितिशेषः ततस्तामतिप्रियांसी
तांसमाधातुंविभुर्जगतःपतिर्गतः स्वगृहमितिशेषः ॥ ५३ ॥ ५४ ॥

---

[1] चित्रकर्ममार्गानुवर्तिनामित्यर्थः तथाहि भागवतेदशमे नैकत्रप्रियसंवासःसुहृदांचित्रकर्मणामितिनंदंप्रतिवसुदेवोक्तिः.

सेनयाविनाकुत्रगतआगतोऽसीत्यन्वयः कुतः कुतोहेतोर्नदृश्यतइत्यर्थः वादित्राणिनवाद्यंतेकुतइत्यनुकर्षःएवमग्रेऽपि ॥ ५५ ॥ सामंतराजेतिएकाकीकिमित्यागत इत्यर्थः पर्यायोक्तमलंकारः ॥ ५६ ॥ ५७ ॥ अद्यैवयास्यामीति नोपहासोऽयमित्याह नमिथ्येति ॥ ५८ ॥ ५९ ॥ वरस्वरूपमाहभरतायेति ॥ ६० ॥ तया

सामंतराजसहितःसंभ्र
आगतोऽसिगतःकुत्रश्वेतच्छत्रंचतेकुतः ॥ वादित्राणिनवाद्यंतेकिरीटादिविवर्जितः ॥ ५५ ॥
मान्नागतोऽसिकिम् ॥ इतिस्मसीतयापृष्टोरामःसस्मितमब्रवीत् ॥ ५६ ॥ राज्ञामेदंडकारण्येराज्यंदत्तंशुभेऽखिलम् ॥
अतस्तत्पालनार्थायशीघ्रंयास्यामिभामिनि ॥ ५७ ॥ अद्यैवयास्यामिवनंत्वंतुश्वश्रूसमीपगा ॥ शुश्रूषांकुरुमेमातुर्न
मिथ्यावादिनोवयम् ॥ ५८ ॥ इतिब्रुवंतंश्रीरामंसीताभीताऽब्रवीद्वचः ॥ किमर्थंवनराज्यंतेपित्रादत्तंमहात्मना ॥ ५९ ॥
तामाहरामःकैकेय्यैराजाप्रीतोवरंददौ ॥ भरतायददौराज्यंवनवासंममानघे ॥ ६० ॥ चतुर्दशसमास्तत्रवासोमेकिल
याचितः ॥ तयादेव्याददौराजासत्यवादीदयापरः ॥ ६१ ॥ अतःशीघ्रंगमिष्यामिमाविघ्नंकुरुभामिनि ॥ श्रुत्वातद्राम
वचनंजानकीप्रीतिसंयुता ॥ ६२ ॥ अहमग्रेगमिष्यामिवनंपश्चात्त्वमेष्यसि ॥ इत्याहमांविनागंतुंतवराघवनोचितम्
॥ ६३ ॥ तामाहराघवःप्रीतःस्वप्रियांप्रियवादिनीम् ॥ कथंवनंत्वांनेष्येऽहंबहुव्याघ्रमृगाकुलम् ॥ ६४ ॥ राक्षसाघोर
रूपाश्चसंतिमानुषभोजिनः ॥ सिंहव्याघ्रवराहाश्चसंचरंतिसमंततः ॥ ६५ ॥ कट्वम्लफलमूलानिभोजनार्थंसुमध्यमे ॥
अपूपानिव्यंजनानिविद्यंतेनकदाचन ॥ ६६ ॥

देव्यायाचितोऽतो मयिदयापरोऽपिराजासत्यवादीअवश्यंत्वदुक्तंदास्यामीतिप्रतिज्ञावाक्यस्यसत्यत्वंकर्तुमेवनवासंददौ ॥ ६१ ॥ ६२ ॥ नोचितंशुद्धस्यतवम याविनाकार्याक्षमत्वात्विवाहकालेनातिचरिष्यामीतिप्रतिज्ञातत्वाच्च ॥ ६३ ॥ वननयनाभावेहेतुर्गर्भविशेषणंबहुव्याघ्रेत्यादि ॥ ६४ ॥ ६५ ॥ ६६ ॥

फलादिकमपिसमयेदुर्लभमित्याह कालेइत्यादि नदृश्यतेवनेषुतृणाद्याच्छादनात्जनसंचाराभावाच्च यत्रापिदृश्यतेतत्रापिशर्कराद्यन्वितः ॥ ६७ ॥ वासस्थानमप्यतिदुःखजनकमित्याह गुहेत्यादि सम्यक्बाध्यंतेरिपवोयत्रेतिसंबाधंदुर्गवासस्थानंगुहागह्वररूपम् तद्यद्यपिरिपुपीडारहितंतथाऽपिझिल्लीदंशादियुतत्वात्तत्रस्थातुमशक्यमितिभावः ॥ ६८ ॥ तत्रापिपद्भ्यांगमनमतिदुःखमित्याह पादेति ॥ ६९ ॥ ७० ॥ स्फुरद्वक्त्राअंतर्गतक्रोधवशात्तत्स्फुरणम् तदेवाह किंचित्को

कालेकालेफलंवाऽपिविद्यतेकुत्रसुंदरि ॥ मार्गोनदृश्यतेक्वापिशर्कराकंटकान्वितः ॥ ६७ ॥ गुहागह्वरसंबाधंझिल्लीदंशादिभिर्युतम् ॥ एवंबहुविधंदोषंवनंदंडकसंज्ञितम् ॥ ६८ ॥ पादचारेणगंतव्यंशीतवातातपादिमत् ॥ राक्षसादीन्वनेदृष्ट्वाजीवितंहास्यसेचिरात् ॥ ६९ ॥ तस्माद्भद्रेगृहेतिष्ठशीघ्रंद्रक्ष्यसिमांपुनः ॥ रामस्यवचनंश्रुत्वासीतादुःखसमन्विता ॥ ७० ॥ प्रत्युवाचस्फुरद्वक्त्राकिंचित्कोपसमन्विता ॥ कथंमामिच्छसेत्यक्तुंधर्मपत्नींपतिव्रताम् ॥ ७१ ॥ त्वदनन्यामदोषांमांधर्मज्ञोऽसिदयापरः ॥ त्वत्समीपेस्थितांरामकोवामांधर्षयेद्वने ॥ ७२ ॥ फलमूलादिकंयद्यत्तवभुक्तावशेषितम् ॥ तदेवामृततुल्यंमेतेनतुष्टारमाम्यहम् ॥ ७३ ॥ त्वयासहचरंत्यामेकुशाःकाशाश्चकंटकाः ॥ पुष्पास्तरणतुल्यामेभविष्यंतिनसंशयः ॥ ७४ ॥

पेति अत्यागेहेतवोधर्मपत्नीमित्यादयः ॥ ७१ ॥ पतिव्रतात्वमेवोपपादयति त्वदनन्यामिति त्वत्तोऽन्यःपुरुषोनविद्यतेयस्यास्तां यद्वा त्वत्तोभेदरहितांशक्तिशक्तिमतोरभेदात् अतएवादोषाम् यापिरक्षोधर्षणादिबिभीषिकासाऽपिमिथ्येत्याह त्वत्ससीपइति यन्नामस्मरणेनरक्षांसिपलायंतेतस्यतवेत्यर्थः ॥ ७२ ॥ यदपिफलादीनांकटुत्वाद्युक्तंतत्परिहरति फलेति त्वद्भुक्तावशिष्टंविघसत्वादमृततुल्यमित्यर्थः रमामीत्यार्षंपरस्मैपदम् ॥ ७३ ॥ चरंत्याःगच्छंत्याः अत्रत्वत्संगएवहेतुरितिभावः ॥ ७४ ॥

कार्यसाधिनीरक्षोवधादिकार्यसाधिकेतिव्यंग्यम् वनगमनंचमेऽवश्यंभावीतिइतिहासकथनेनद्रढयति बाल्यइति ॥ ७५ ॥ ७६ ॥ ७७ ॥ त्वत्सहायिनीसृष्ट्यादिसर्वकार्येष्वहमेवतेसहायेतिव्यंग्यम् ॥ ७८ ॥ ७९ ॥ गच्छगमनंकुरु तत्रवनेतपस्विवेषेणहारादीनांक्वचित्स्थापनमावश्यकम् तत्रसर्वस्थलेषुअपायसंभावना

अहंत्वांक्लेशयेनैवभवेयंकार्यसाधिनी ॥ बाल्येमांवीक्ष्यकश्चिद्वैज्योतिःशास्त्रविशारदः ॥ ७५ ॥ प्राहतेविपिनेवासःपत्यासहभविष्यति ॥ सत्यवादीद्विजोभूयाद्गमिष्यामित्वयासह ॥ ७६ ॥ अन्यात्किंचित्प्रवक्ष्यामिश्रुत्वामांनयकाननम् ॥ रामायणानिबहुशःश्रुतानिबहुभिर्द्विजैः ॥ ७७ ॥ सीतांविनावनंरामोगतःकिंकुत्रचिद्वद ॥ अतस्त्वयागमिष्यामिसर्वथात्वत्सहायिनी ॥ ७८ ॥ यदिगच्छसिमांत्यक्त्वाप्राणांस्त्यक्ष्यामितेऽग्रतः ॥ इतितंनिश्चयंज्ञात्वासीतायारघुनंदनः ॥ ७९ ॥ अब्रवीद्देविगच्छत्वंवनंशीघ्रंमयासह ॥ अरुंधत्यैप्रयच्छाशुहारानाभरणानिच ॥ ८० ॥ ब्राह्मणेभ्योधनंसर्वंदत्त्वागच्छामहेवनम् ॥ इत्युक्त्वालक्ष्मणेनाशुद्विजानाहूयभक्तितः ॥ ८१ ॥ ददौगवांदशशतंधनानिवस्त्राणिदिव्यानिविभूषणानि ॥ कुटुंबवद्भ्यःश्रुतशीलवद्भ्योमुदाद्विजेभ्योरघुवंशकेतुः ॥ ८२ ॥ अरुंधत्यैददौसीतामुख्यान्याभरणानिच ॥ रामोमातुःसेवकेभ्योददौधनमनेकधा ॥ ८३ ॥ स्वकांतःपुरवासिभ्यःसेवकेभ्यस्तथैवच ॥ पौरजानपदेभ्यश्चब्राह्मणेभ्यःसहस्रशः ॥ ८४ ॥ लक्ष्मणोऽपिसुमित्रांतुकौसल्यायैसमर्पयत् ॥ धनुष्पाणिःसमागत्यरामस्याग्रेव्यवस्थितः ॥ ८५ ॥

सत्वान्निरपायस्थानंब्राह्मणेषुदानमित्याहारुंधत्यैइति वसिष्ठपत्न्यै यत्रस्थापितमेतद्देहापायेऽपिलभ्यमितिभावः ॥ ८० ॥ वयमपितथैवकुर्मइत्याह ब्राह्मणेभ्यइति ॥ ८१ ॥ श्रुतंवेदाध्ययनम् कुटुंबवत्त्वमिदंदानपात्रतासंपादकंविशेषणम् ॥ ८२ ॥ मातृसेवकेभ्योदानंमातृस्नेहेन ॥ ८३ ॥ ८४ ॥ समर्पयत् ततइत्यध्याहारः समागत्यरामस्यअग्रेस्थितइत्यन्वयः ॥ ८५ ॥

ततःरामइति ॥ ८६ ॥ नृपपथेराजमार्गेकुतूहलेनपश्यंतितान्कुतूहलदृशःपौरान्सानंदंपश्यन् तेनतेषांदुःखनिरासः पितुस्तत्कैकेय्याधिष्ठितमालयंगृहंप्राप ॥ ८७ ॥ इतिश्रीमदध्यात्मरामायणेअयोध्याकांडेसेतौचतुर्थःसर्गः ॥ ४ ॥ ॥ ६५ ॥ सजानकिंजानक्याःसहितं लक्ष्मणेनसममायांतमित्यन्वयःतादृशं दृष्ट्वापरस्परंवीक्ष्योचुःपरस्परमित्येव ॥ १ ॥ सत्यसंधंसत्यप्रतिज्ञम् ॥ २ ॥ अत्यजत्वनवासमाज्ञापितवान् सत्यवतासत्यवत्ता वर्णलोपआर्षःकैकेयीवापूर्वमत्यं

रामःसीतालक्ष्मणश्चजग्मुःसर्वेंनृपालयम् ॥ ८६ ॥ श्रीरामःसहसीतयानृपपथेगच्छन्शनैःसानुजःपौरान्जानपदान्कुतूहलदृशःसानंदमुद्वीक्षयन् ॥ श्यामःकामसहस्रसुंदरवपुःकांत्यादिशोभासयन्पादन्यासपवित्रिताऽखिलजगत्प्रापालयंतत्पितुः ॥ ८७ ॥ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेअयोध्याकांडेचतुर्थःसर्गः ॥ ४ ॥ ॥६५॥

श्रीमहादेवउवाच ॥ आयांतंनागरादृष्ट्वामार्गेरामंसजानकिम् ॥ लक्ष्मणेनसमंवीक्ष्यऊचुःसर्वेपरस्परम् ॥ १ ॥ कैकेय्यावरदानादिश्रुत्वादुःखसमावृताः ॥ बतराजादशरथःसत्यसंधंप्रियंसुतम् ॥ २ ॥ स्त्रीहेतोरत्यजत्कामीतस्यसत्यवताकुतः ॥ कैकेयीवाकथंदुष्टारामंसत्यंप्रियंकरम् ॥ ३ ॥ विवासयामाकथंक्रूरकर्माऽतिमूढधीः ॥ हेजनानात्रवस्तव्यंगच्छामोऽद्यैवकाननम् ॥ ४ ॥ यत्ररामःसभार्यश्चसानुजोगंतुमिच्छति ॥ पश्यंतुजानकींसर्वेपादचारेणगच्छतीम् ॥ ५ ॥

तंरामेप्रीतिमतीकथंदुष्टाजातेतिशेषः यद्भरतस्यराज्यंरामस्यवनवासंचवृतवतीतिभावः याचतांवालोभाद्भरतस्यराज्यंराममुच्यमानगुणंकथंकुतोहेतोर्विवासयामास अत्रेहेतुंनपश्यामः अतोनिष्प्रयोजनदुष्टत्ववज्जनवत्यस्मिन्देशेनवस्तव्यमित्याहुः हेजनाइति ॥ ४ ॥ यत्रकानने पश्यंत्विति तेनसर्वथादैवप्राबल्यंजानंत्वितिव्यंग्यम् ॥ ५ ॥

तदेवोपपादयति पुंभिरिति गच्छंतीत्यस्यदृश्यतामितिशेषः ॥ ६ ॥ द्रक्ष्यथ अस्याप्युक्तव्यंग्येएवतात्पर्यम् ॥ ७ ॥ राक्षसीति यत्कृत्यारामस्यस्ववनवासादि कृतदुःखाभावेऽपिसीतायाःपादगमनकृतंदुःखंतस्यापिभवेदित्यन्वयः ॥ ८ ॥ उपसंहरति बलवानिति पर्यायोक्तमत्रालंकारः साधूनांवृंदेसमूहे ॥ ९ ॥ तत्त्वतः तेषांतत्त्वंवच्मीत्यर्थः ॥ १० ॥ परोजडेभ्यः विष्णुर्व्यापकःवैकुंठनिलयोवा आदिमन्नारंजीवसमूहस्तद्रूपोहिरण्यगर्भस्तस्याप्ययनःपरायणःवेदलाभद्वारास्त

पुंभिःकदाचिद्दृष्टावाजानकीलोकसुंदरी ॥ साऽपिपादेनगच्छंतीजनसंघेष्वनावृता ॥ ६ ॥ रामोऽपिपादचारेणगजाश्वादिविवर्जितः ॥ गच्छतिद्रक्ष्यथविभुंसर्वलोकैकसुंदरम् ॥ ७ ॥ राक्षसीकैकयीनाम्नीजातासर्वविनाशिनी ॥ रामस्यापिभवेद्दुःखंसीतायाःपादयानतः ॥ ८॥ बलवान्विधिरेवात्रपुंप्रयत्नोहिदुर्बलः ॥ इतिदुःखाकुलेवृंदेसाधूनांमुनिपुंगवः ॥ ९ ॥ अब्रवीद्वामदेवोऽथसाधूनांसंघमध्यगः ॥ मानुशोचथरामंवासीतांवावाच्मितत्त्वतः ॥ १० ॥ एषरामःपरोविष्णुरादिनारायणःस्मृतः ॥ एषासाजानकीलक्ष्मीयोगमायेतिविश्रुता ॥ ११ ॥ असौशेषस्तमन्वेतिलक्ष्मणाख्यश्चसांप्रतम् ॥ एषमायागुणैर्युक्तस्तत्तदाकारवानिव ॥ १२॥ एषएवरजोयुक्तोब्रह्माऽभूद्विश्वभावनः ॥ सत्त्वाविष्टस्तथाविष्णुस्त्रिजगत्प्रतिपालकः ॥ १३ ॥ एषरुद्रस्तामसोंऽतेजगत्प्रलयकारणम् ॥ एषमत्स्यःपुराभूत्वाभक्तंवैवस्वतंमनुम् ॥ १४ ॥ नाव्यारोप्यलयस्यांतंपालयामासराघवः ॥ समुद्रमथनेपूर्वंमंदरेसुतलंगते ॥ १५ ॥ अधारयत्स्वपृष्ठेद्रिंकूर्मरूपीरघूत्तमः ॥ महीरसातलंयाताप्रलयेसूकरोऽभवत् ॥ १६ ॥

ष्ट्यादिसामर्थ्यदः योगमायायोगेनस्वसंबंधेनापरिच्छिन्नमपिमातिपरिच्छिनत्तिसा ॥ ११ ॥ एषमायागुणैरिति एतेनमायिकएवायमाकारोनतुपांचभौतिकइत्युक्तम् ॥ १२ ॥ मायागुणैस्तत्तदाकारवत्त्वमेवविवृणोति एषएवेति विश्वभावनोविश्वस्रष्टा ॥ १३ ॥ १४ ॥ लयस्यांतंलयस्यदैनंदिनप्रलयस्यआंतंसमाप्तिपर्यंतम् ॥ १५ ॥ अद्रिंमंदरं यातायदेत्यादि प्रलयेसूकरस्तदेत्यादि ॥ १६ ॥

॥ १७ ॥ तद्रक्षःप्रह्लादपीडकंरक्षःपुत्रराज्यमिंद्रराज्यं हृतंबलिना ॥ १८ ॥ याञ्चयाबलेःसकाशाद्भिक्षाव्याजेनाहरत्परावर्तितवान् ॥ १९ ॥ २० ॥ तस्यरावणस्य नन्वेवंदशरथगृहेएवावतारकरणेकिंबीजंतत्राह राज्ञेति ॥ २१ ॥ पुत्रत्वाकांक्षयाविष्णोरिति विष्णुर्मेपुत्रोभवत्वितीच्छयेत्यर्थः ॥ २२ ॥ २३ ॥ नारदः

तोलयामासदंष्ट्राग्रेतांक्षोणींरघुनंदनः ॥ नारसिंहंवपुःकृत्वाप्रह्लादवरदःपुरा ॥ १७ ॥ त्रिलोककंटकंरक्षःपाटयामासतन्नखैः ॥ पुत्रराज्यंहृतंदृष्ट्वाह्यदित्यायाचितःपुरा ॥ १८ ॥ वामनत्वमुपागम्ययाञ्चयाचाहरत्पुनः ॥ दुष्टक्षत्रियभूभारनिवृत्त्यैभार्गवोऽभवत् ॥ १९ ॥ सएवजगतांनाथइदानींरामतांगतः ॥ रावणादीनिरक्षांसिकोटिशोनिहनिष्यति ॥ २० ॥ मानुषेणैवमरणंतस्यदृष्टंदुरात्मनः ॥ राज्ञादशरथेनापितपसाराधितोहरिः ॥ २१ ॥ पुत्रत्वाकांक्षयाविष्णोस्तदापुत्रोऽभवद्धरिः ॥ सएवविष्णुःश्रीरामोरावणादिवधायहि ॥ २२ ॥ गंताऽद्यैववनंरामोलक्ष्मणेनसहायवान् ॥ एषासीताहरेर्मायासृष्टिस्थित्यंतकारिणी ॥ २३ राजावाकैकयीवाऽपिनात्रकारणमण्वपि ॥ पूर्वेद्युर्नारदःप्राहभूभारहरणायच ॥ २४ ॥ रामोऽप्याहस्वयंसाक्षाच्छ्वोगमिष्याम्यहंवनम् ॥ अतोरामंसमुद्दिश्यचिंतांत्यजतबालिशाः ॥ २५ ॥ रामरामेतियेनित्यंजपंतिमनुजाभुवि ॥ तेषांमृत्युभयादीनिनभवंतिकदाचन ॥ २६ ॥ कापुनस्तस्यरामस्यदुःखशंकामहात्मनः ॥ रामनाम्नैवमुक्तिःस्यात्कलौनान्येनकेनचित् ॥ २७ ॥

प्राह भूभारहरणोद्देश्यकंब्रह्मणःसंदेशवचइत्यर्थः ॥ २४ ॥ २५ ॥ रामोदुःखितोभविष्यतीत्यपिवृथाशंकैवेत्याहरामेति मृत्युभयाभावेइतरभयाभावःकैमुतिकन्यायसिद्धः तन्नामजपकर्तुस्तत्त्वज्ञानोदयादितिभावः ॥ २६ ॥ तस्यदुःखशंकाकेत्यन्वयः कलौतुनाम्नैवनामाभिलापेनैवमुक्तिस्तज्जनकंतत्त्वज्ञानंनान्येनयोगादिनेत्यर्थः ॥ २७ ॥

ईदृशस्यकिमर्थोदेहपरिग्रहस्तत्राह मायेति विडंबयतिस्वीयाचारेणसदाचारंलोकान्शिक्षयतिमातापितरौपुत्रानिव फलांतरमप्याह भक्तानामिति ॥ २८ ॥ राज्ञोऽभीष्टंविष्णोःस्वपुत्रत्वम् ॥ २९ ॥ हृत्संशयग्रंथिंहृदिविद्यमानंरामेमनुष्यत्वादिविषयंसंशयग्रंथिम् ॥ ३० ॥ ३१ ॥ गोपनीयं पृथग्जनेष्वितिशेषः ॥ ३२ ॥ अवारितःपुत्रत्वात् द्वारपालैरितिशेषः गत्वाकैकेयीसमीपमितिशेषः ॥ ३३ ॥ तेसंमतंवनंदंडकारण्यंगंतुंकृतधियोनिश्चिताइत्यन्वयः आज्ञापयतुपितेत्यनेनतदाज्ञां

मायामानुषरूपेणविडंबयतिलोककृत् ॥ भक्तानांभजनार्थायरावणस्यवधायच ॥ २८ ॥ राज्ञश्चाभीष्टसिद्ध्यर्थंमानुषं
वपुराश्रितः ॥ इत्युक्त्वाविररामाथवामदेवोमहामुनिः ॥ २९ ॥ श्रुत्वातेऽपिद्विजाःसर्वेरामंज्ञात्वाहरिंविभुम् ॥ जहुर्हृत्सं
शयग्रंथिंराममेवान्वचिंतयन् ॥ ३० ॥ यइदंचिंतयेन्नित्यंरहस्यंरामसीतयोः ॥ तस्यरामेदृढाभक्तिर्भवेद्विज्ञानपूर्विका
॥ ३१ ॥ रहस्यंगोपनीयंवोयूयंवैराघवप्रियाः ॥ इत्युक्त्वाप्रययौविप्रस्तेऽपिरामंपरंविदुः ॥ ३२ ॥ ततोरामःसमाविश्यपि
तृगेहमवारितः ॥ सानुजःसीतयागत्वाकैकेयीमिदमब्रवीत् ॥ ३३ ॥ आगताःस्मोवयंमातस्त्रयस्तेसंमतंवनम् ॥ गंतुंकृत
धियःशीघ्रमाज्ञापयतुनःपिता ॥ ३४ ॥ इत्युक्त्वासहसोत्थायचीराणिप्रददौस्वयम् ॥ रामायलक्ष्मणायाथसीतायैचपृ
थक्पृथक् ॥ ३५ ॥ रामस्तुवस्त्राण्युत्सृज्यवन्यचीराणिपर्यधात् ॥ लक्ष्मणोऽपितथाचक्रेसीतातन्नविजानती ॥ ३६ ॥ ह
स्तेगृहीत्वारामस्यलज्जयामुखमैक्षत ॥ रामोगृहीत्वातच्चीरमंशुकेपर्यवेष्टयत् ॥ ३७ ॥ तद्दृष्ट्वारुरुदुःसर्वैराजदाराःसमंत
तः ॥ वसिष्ठस्तुतदाकर्ण्यरुदितंभर्त्सयन्रुषा ॥ ३८ ॥

विनागमनेतस्यदुःखादौअहंदोषभाक्स्यामितिसूचितम् ॥ ३४ ॥ इत्युक्तारामेणकैकेयीसहसाझटितिउत्थायरामायेत्यन्वयः चीराणिवन्यपरिधेयानिवल्कलादीनि जीर्णवासांसिवा ॥ ३५ ॥ तत्चीरपरिधानप्रकारस्वरूपम् ॥ ३६ ॥ हस्तेगृहीत्वाचीरमितिशेषः तच्चीरंकैकेयीदत्तंचीरम् ॥ ३७ ॥ भर्त्सयन्कैकेयीमितिशेषः ॥ ३८ ॥

किंप्रयच्छसि चीरमितिशेषः ॥ ३९ ॥ यदीति त्वद्दुराविषयभूताऽपियदिस्वेच्छयासमन्वेतिसम्यक्ग्लानिरहितमनुपश्चाद्गच्छतीत्यर्थः ॥ ४० ॥ वनदुःखंवनवासजंदुःखम् ॥ ४१ ॥ वनचरामुनयःप्रियायेषांते ॥ ४२ ॥ सीताशीघ्रमारुरोहेत्यनेनतस्याःकार्यसाधकउत्साहःसूचितः ॥ ४३ ॥ ४४ ॥ ४५ ॥ रथमचोदयत्

कैकेयींप्राहदुर्वृत्तेरामएवत्वयावृतः ॥ वनवासायदुष्टेत्वंसीतायैकिंप्रयच्छसि ॥ ३९ ॥ यदिरामंसमन्वेतिसीताभक्त्यापतिव्रता ॥ दिव्यांबरधरानित्यंसर्वाभरणभूषिता ॥ ४० ॥ रमयत्वनिशंरामंवनदुःखनिवारिणी ॥ राजादशरथोप्याहसुमंत्रंरथमानय ॥ ४१ ॥ रथमारुह्यगच्छंतुवनंवनचरप्रियाः ॥ इत्युक्त्वाराममालोक्यसीतांचैवसलक्ष्मणम् ॥ ४२ ॥ दुःखान्निपतितोभूमौरुरोदाश्रुपरिप्लुतः ॥ आरुरोहरथंसीताशीघ्रंरामस्यपश्यतः ॥ ४३ ॥ रामःप्रदक्षिणंकृत्वापितरंरथमारुहत् ॥ लक्ष्मणःखड्गयुगलंधनुस्तूणीयुगंतथा ॥ ४४ ॥ गृहीत्वारथमारुह्यनोदयामाससारथिम् ॥ तिष्ठतिष्ठसुमंत्रेतिराजादशरथोऽब्रवीत् ॥ ४५ ॥ गच्छगच्छेतिरामेणनोदितोऽचोदयद्रथम् ॥ रामेदूरंगतेराजामूर्च्छितःप्रापतद्भुवि ॥ ४६ ॥ पौरास्तुबालवृद्धाश्चवृद्धाब्राह्मणसत्तमाः ॥ तिष्ठतिष्ठेतिरामेतिक्रोशंतोरथमन्वयुः ॥ ४७ ॥ राजारुदित्वासुचिरंमांनयंतुगृहंप्रति ॥ कौसल्यायाराममातुरित्याहपरिचारकान् ॥ ४८ ॥ किंचित्कालंभवेत्तत्रजीवनंदुःखितस्यमे ॥ अतऊर्ध्वंनजीवामिचिरंरामंविनाकृतः ॥ ४९ ॥

राज्ञारामाधीनकृतत्वाद्राजाज्ञापेक्षयातदाज्ञैवप्रबलेतिमत्वेतिव्यंग्यम् दूरंगतेदृष्टिपथमतिक्रांते ॥ ४६ ॥ वृद्धाइत्यस्यज्ञानवृद्धाइत्यर्थः ॥ ४७ ॥ राममातुरित्यादरसूचकंविशेषणम् ॥ ४८ ॥ दुःखितस्यमेयदिकिंचित्कालंजीवनंभवेत्तदातत्रराममातृगृहेएवान्यत्रतुक्षणमात्रमपितन्नसंभाव्यते राममातृगृहेऽपिचिरंनैवतदित्याह अतइति विनाकृतःदैवेनेतिशेषः अनेनदैवसंपादितंमरणंदुर्वारमितिध्वनितम् ॥ ४९ ॥

तूष्णीमेवस्वकृतापराधेनलज्जयेतिभावः ॥ ५० ॥ सीतयासहास्वपदित्यन्वयः पालयामासजाग्रद्रामंररक्षेत्यर्थः ॥ ५२ ॥ रामंपुरंनेतुंयदिशक्तास्तदापरावृत्त्यनेष्यामोनोचेद्वनमेवगमिष्यामइतिनिश्चयमित्यर्थः ॥ ५३ ॥ क्लेशभागिनोवनगमनादितिभावः ॥ ५४ ॥ ५५ ॥ इत्याज्ञप्तःसुमंत्रोरथंवाहैरयोजयत् ॥ ५६ ॥

ततोगृहंप्रविश्यैवकौसल्यायाःपपातह ॥ मूर्च्छितश्चचिराद्बुद्ध्वातूष्णीमेवावतस्थिवान् ॥ ५० ॥ रामस्तुतमसातीरंगत्वातत्रावसत्सुखी ॥ जलंप्राश्यनिराहारोवृक्षमूलेऽस्वपद्विभुः ॥ ५१ ॥ सीतयासहधर्मात्माधनुष्पाणिस्तुलक्ष्मणः ॥ पालयामासधर्मज्ञःसुमंत्रेणसमन्वितः ॥ ५२ ॥ पौराःसर्वेसमागत्यस्थितास्तस्याविदूरतः ॥ शक्तारामंपुरंनेतुंनोचेद्गच्छामहेवनम् ॥ ५३ ॥ इतिनिश्चयमाज्ञायतेषांरामोऽतिविस्मितः ॥ नाहंगच्छामिनगरमेतेवैक्लेशभागिनः ॥ ५४ ॥ भविष्यंतीतिनिश्चित्यसुमंत्रमिदमब्रवीत् ॥ इदानीमेवगच्छामःसुमंत्ररथमानय ॥ ५५ ॥ इत्याज्ञप्तःसुमंत्रोऽपिरथंवाहैरयोजयत् ॥ आरुह्यरामःसीताचलक्ष्मणोऽपिययुर्द्रुतम् ॥ ५६ ॥ अयोध्याभिमुखंगत्वाकिंचिद्दूरंततोययुः ॥ तेऽपिराममदृष्ट्वैवप्रातरुत्थायदुःखिताः ॥ ५७ ॥ रथनेमिगतंमार्गंपश्यंतस्तेपुरंययुः ॥ हृदिरामंससीतंतेध्यायंतस्तस्थुरन्वहम् ॥ ५८ ॥ सुमंत्रोऽपिरथंशीघ्रंनोदयामाससादरम् ॥ स्फीतान्जनपदान्पश्यन्रामःसीतासमन्वितः ॥ ५९ ॥ गंगातीरंसमागच्छच्छृंगवेराविदूरतः ॥ गंगांदृष्ट्वानमस्कृत्यस्नात्वासानंदमानसः ॥ ६० ॥ शिंशपावृक्षमूलेसनिषसादरघूत्तमः ॥ ततोगुहोजनैःश्रुत्वारामागममहोत्सवम् ॥ ६१ ॥

अयोध्याभिमुखमिति तेषांप्रतारणायेदम् ॥ ५७ ॥ तदेवाह रथनेमीति ॥ ५८ ॥ ५९ ॥ शृंगवेरंशृंगऋष्याश्रमस्तदविदूरतस्तत्पूर्वभागे ॥ ६० ॥ जनैः जनमुखैः ॥ ६१ ॥

अयंसखासमानख्यातिस्तत्समानज्ञानः अनेनगुहस्यधर्मव्याधादिवत्तत्त्वज्ञत्वंसूचितम् अथापिसत्यपिभेदापगमेनाथतवाहंनमामकीनस्त्वमितिन्यायात्स्वामिनं द्रष्टुमिति ॥ ६२ ॥ ६३ ॥ नैषादमपिमेजन्मधन्यम् त्वदंगस्पर्शादितिभावः ॥ ६४ ॥ तदेवाह बभूवेति एतत्तेकिंकरस्यनैषादराज्यंयत्त्वदधीनमतोऽत्रवसन्अस्मान्पालय अत्रनतेपितुःस्वाम्यमित्यत्रवासेदोषाभावइतिभावः ॥ ६५ ॥ ६६ ॥ दासइत्यनेनभोज्याहारतासूचिता ६७ ॥ नवेक्ष्यामिनप्रवेक्ष्यामिइतिमेप्रतिज्ञेतिशेषः ॥ ६८ ॥ एतत्तेसर्वंराज्यंममैवत्वंचमेसखैवतत्त्वज्ञत्वात्तथाऽपिप्रतिज्ञारक्षणायतेग्रामंनप्रविशामीतिभावः ॥ ६९ ॥ समानाय्यगुहेनेतिशेषः अथ आनयनानंतरंवार्तानंतरंवा ॥ ७० ॥ हिःपादपूरणे लक्ष्मणेनयदास्तृतम् तत्रोवासेत्यन्वयः स्थितइत्यर्थः ॥ ७१ ॥ ततोनिद्रासमयेसुष्वापेत्यर्थः ॥ ७२ ॥

सखायंस्वामिनंद्रष्टुंहर्षात्तूर्णंसमापतत् ॥ फलानिमधुपुष्पादिगृहीत्वाभक्तिसंयुतः ॥ ६२ ॥ रामस्याग्रेविनिक्षिप्यदंडव
त्प्रापतद्भुवि ॥ गुहमुत्थाप्यतंतूर्णंराघवःपरिषस्वजे ॥ ६३ ॥ संपृष्टकुशलोरामंगुहःप्रांजलिरब्रवीत् ॥ धन्योऽहमद्यमेज
न्मनैषादंलोकपावन ॥ ६४ ॥ बभूवपरमानंदःस्पृष्ट्वातेऽगंरघूत्तम ॥ नैषादराज्यमेतत्तेकिंकरस्यरघूत्तम ॥ ६५ ॥ त्वद
धीनंवसन्नत्रपालयास्मान्रघूद्वह ॥ आगच्छयामोनगरंपावनंकुरुमेगृहम् ॥ ६६ ॥ गृहाणफलमूलानित्वदर्थंसंचिता
निमे ॥ अनुगृह्णीष्वभगवन्दासस्तेऽहंसुरोत्तम ॥ ६७ ॥ रामस्तमाहसुप्रीतोवचनंशृणुमेसखे ॥ नवेक्ष्यामिगृहंग्रामंन
ववर्षाणिपंचच ॥ ६८ ॥ दत्तमन्येननोभुंजेफलमूलादिकिंचन ॥ राज्यंममैतत्तेसर्वंत्वंसखामेऽतिवल्लभः ॥ ६९ ॥ वट
क्षीरंसमानाय्यजटामुकुटमादरात् ॥ बबंधलक्ष्मणेनाथसहितोरघुनंदनः ॥ ७० ॥ जलमात्रंतुसंप्राश्यसीतयासहरा
घवः ॥ आस्तृतंकुशपर्णाद्यैःशयनंलक्ष्मणेनहि ॥ ७१ ॥ उवासतत्रनगरप्रासादाग्रेयथापुरा ॥ सुष्वापतत्रवैदेह्यापर्यंक
इवसंस्कृते ॥ ७२ ॥

परितोविपश्यन् दुष्टजंतूनितिशेषः ॥ ७३ ॥ ॥ इतिश्रीमत्सकलराजवि० अध्यात्मरामायणेसेतौअयोध्याकांडेपंचमःसर्गः ॥ ५ ॥ ॥ ७ ॥ षष्ठेगत्वाऽथ वाल्मीकेराश्रमंतेनसंस्तुतः मुनींद्रैःसहितस्तत्रावसत्सुखमितीर्यते ॥ १ ॥ सुप्तमिति ॥ १ ॥ कुशपत्रसमूहनिर्मितेसंस्तरे आस्तरणेइत्यर्थःशोभनैरांकवादिभिरास्तीर्णे ॥ २ ॥ ३ ॥ कोहेतुः अन्योनकोपीत्यर्थः ॥ ४ ॥ कस्तर्हिहेतुस्तत्राह स्वपूर्वेति ॥ ५ ॥ तदेवोपपादयति सुखस्येतिस्वयमर्पितस्यनसंपादकइत्याह अहमि

ततोविदूरेपरिगृह्यचापंसबाणतूणीरधनुःसलक्ष्मणः ॥ ररक्षरामंपरितोविपश्यन्गुहेनसार्धंसशरासनेन ॥ ७३ ॥ इति श्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेअयोध्याकांडेपंचमःसर्गः ॥ ५ ॥ ॥ ७ ॥ ॥ सुप्तंरामंसमालोक्यगुहःसोऽश्रुपरिप्लुतः ॥ लक्ष्मणंप्राहविनयाद्भ्रातःपश्यसिराघवम् ॥ १ ॥ शयानंकुशपत्रौघसंस्तरेसीतयासह ॥ यःशेतेस्वर्णपर्यंकेस्वास्तीर्णेभवनोत्तमे ॥ २ ॥ कैकेयीरामदुःखस्यकारणंविधिनाकृता ॥ मंथराबुद्धिमास्थायकैकेयीपापमाचरत् ॥ ३ ॥ तच्छ्रुत्वालक्ष्मणःप्राहसखेशृणुवचोमम ॥ कःकस्यहेतुर्दुःखस्यकश्चहेतुःसुखस्यवा ॥ ४ ॥ स्वपूर्वार्जितकर्मैवकारणंसुखदुःखयोः ॥ ५ ॥ सुखस्यदुःखस्यनकोऽपिदातापरोददातीतिकुबुद्धिरेषा ॥ अहंकरोमीतिवृथाऽभिमानःस्वकर्मसूत्रग्रथितोहिलोकः ॥ ६ ॥ सुहृन्मित्रार्युदासीनद्वेष्यमध्यस्थबांधवाः ॥ स्वयमेवाचरन्कर्मतथातत्रविभाव्यते ॥ ७ ॥

ति अहंसुखादिजनकक्रियांकरोमीत्यपिवृथाभिमानः अस्वातंत्र्यादितिभावः तदेवाह स्वकर्मसूत्रेणग्रथितईश्वरेणेतिशेषः यथासूत्रयुक्तांकाष्ठपुत्तलींसूत्रधारोनानाप्रकारसूत्रचालनेनानेकविधक्रियावतींकरोतिएवंभगवान्कर्मरूपसूत्रचालनेनतथातथाकारयतीतिभावः ॥ ६ ॥ सुहृन्मित्रेसोपाधिनिरुपाधिभेदाद्भिन्ने एवमरिद्वेष्यौ एतेकर्मसुहृत्त्वादिप्रयोजकंकर्मस्वयमेवाचरन्येनसुहृत्त्वादिभावोभवति एवंतत्रसुखदुःखादिविषयेऽपिविभाव्यते ज्ञायतइत्यर्थः ॥ ७ ॥

स्वकर्मवशगोनरः यद्यत्सुखंवादुःखंवायथागतंयथाप्राप्तंभवतितत्तद्भुक्त्वास्वस्थमनाःरागद्वेषहीनोभवेत् ॥ ८ ॥ भोगागमेसुखभोगप्राप्तौ भोगविवर्जनेदुःखभोगाप्राप्तौ वांछामेवाभिनयति आगच्छत्विति सुखमितिशेषः मागच्छतुदुःखमितिशेषः अतएवाहंभोगवशगोनभवे अइतिनिषेधार्थकमव्ययंपृथक्पदं यथैवाहंतथैवशमोऽपीतिनकिंचिदस्माकमेतत्कृतंदुःखमितिभावः ॥ ९ ॥ यस्मादिति प्राप्यफलमितिशेषः तत्तत्रेत्युपलक्षणंतस्मात्तेनेत्यपिबोध्यम् ॥ १० ॥ यद्यद्विधात्राविहितंतदलंघ्यमितिनिश्चित्यतत्तत्फलोदयेहर्षविषादाभ्यामलं एवंचास्मत्कृतेत्वयाविषादोनकार्यइतिभावः ॥ ११ ॥ आवश्यकश्चशरीरिणांतत्संबंधइत्याह

सुखंवायदिवादुःखंस्वकर्मवशगोनरः ॥ यद्यद्यथागतंतत्तद्भुक्त्वास्वस्थमनाभवेत् ॥८॥ नमेभोगागमेवांछानमेभोगविवर्जने ॥ आगच्छत्वथमागच्छत्वभोगवशगोभवे ॥ ९ ॥ यस्मिन्देशेचकालेचयस्माद्वायेनकेनवा ॥ कृतंशुभाशुभंकर्मभोज्यंतत्तत्रनान्यथा ॥ १० अलंहर्षविषादाभ्यांशुभाशुभफलोदये ॥ विधात्राविहितंयद्यत्तदलंघ्यंसुरासुरैः ॥ ११ ॥ सर्वदासुखदुःखाभ्यांनरःप्रत्यवरुध्यते ॥ शरीरंपुण्यपापाभ्यामुत्पन्नंसुखदुःखवत् ॥ १२ ॥ सुखस्यानंतरंदुःखंदुःखस्यानंतरंसुखम् ॥ द्वयमेतद्धिजंतूनामलंघ्यंदिनरात्रिवत् ॥ १३ ॥ सुखमध्येस्थितंदुःखंदुःखमध्येस्थितंसुखम् ॥ द्वयमन्योन्यसंयुक्तंप्रोच्यतेजलपंकवत् ॥ १४ ॥ तस्माद्धैर्येणविद्वांसइष्टानिष्टोपपत्तिषु ॥ नहृष्यंतिनमुह्यंतिसर्वंमायेतिभावनात् ॥ १५ ॥

सर्वदेति पुण्यपापजत्वाच्छरीरस्यतदवच्छेदेनसुखदुःखवत्त्वावश्यकत्वादयंनरःसदाताभ्यांप्रत्यवरुध्यतेसंबध्यते ॥१२॥ संबंधप्रकारमाह सुखस्यानंतरमिति एवंचपुनः सुखमपिभाव्येवेतिभावः ॥ १३॥ इदानींपदार्थमात्रस्यत्रिगुणात्मकत्वेनसुखस्यापिदुःखात्मकत्वाद्धेयत्वमित्याह सुखमध्यइति तेनोभयमपिहेयमेवेति तदुक्तंपतंजलिना सर्वमेवदुःखंविवेकिनइति ॥ १४ ॥ उपसंहरति तस्मादिति इष्टप्राप्तौनहृष्यंति अनिष्टप्राप्तौनमुह्यंतीत्यन्वयः तत्रहेतुः सर्वंमायेतिभावनात् नह्यैंद्रजालिकमायाकृतेष्टानिष्टप्राप्तौहर्षमोहौतद्वदितिभावः ॥ १५ ॥

सलिलंस्पृष्ट्वेतिप्रातःकालिकसकलक्रियोपलक्षणम् ॥ १६ ॥ मेअवतारणायेतिशेषः ॥ १७ ॥ नौकारुह्यतामित्यन्वयः ॥ १८ ॥ वाहयेइति नौकामितिशेषः
॥ १९ ॥ २० ॥ वाहयामासअरित्रादिभिश्चालयामास परंपारंप्रापयितुमित्यर्थः गंगामध्येगताजानकीगंगांप्रार्थयामासेत्यन्वयः ॥२१॥२२॥ आदृतासतीपूज

॥ १९ ॥ गुहलक्ष्मणयोरेवंभाषतोर्विमलंनभः॥ बभूवरामःसलिलंस्पृष्ट्वाप्रातःसमाहितः॥१६॥ उवाचशीघ्रंसुदृढांनावमानयमे
सखे॥ श्रुत्वारामस्यवचनंनिषादाधिपतिर्गुहः॥१७॥ स्वयमेवदृढांनावमानिनायसुलक्षणाम्॥ स्वामिन्नारुह्यतांनौका
सीतयालक्ष्मणेनच ॥१८॥ वाहयेज्ञातिभिःसार्धमहमेवसमाहितः॥ तथेतिराघवःसीतामारोप्यशुभलक्षणाम्॥१९॥
गुहस्यहस्तावालंब्यस्वयंचारुहदच्युतः॥ आयुधादीन्समारोप्यलक्ष्मणोऽप्यारुरोहच॥ २०॥ गुहस्तान्वाहयामासज्ञा
तिभिःसहितःस्वयम्॥ गंगामध्येगतागंगांप्रार्थयामासजानकी॥२१॥ देविगंगेनमस्तुभ्यंनिवृत्तावनवासतः॥ रामेणस
हिताऽहंत्वांलक्ष्मणेनचपूचये ॥ २२ ॥ सुरामांसोपहारैश्चनानाबलिभिरादृता ॥ इत्युक्त्वापरकूलंतौशनैरुत्तीर्यजग्म
तुः॥ २३ ॥ गुहोऽपिराघवंप्राहगमिष्यामित्वयासह॥ अनुज्ञांदेहिराजेंद्रनोचेत्प्राणांस्त्यजाम्यहम्॥२४॥ श्रुत्वानैषादिव
चनंश्रीरामस्तमथाब्रवीत्॥ चतुर्दशसमाःस्थित्वादंडकेपुनरप्यहम्॥२५॥ आयास्याम्युदितंसत्यंनासत्यंरामभाषितम्
॥ इत्युक्त्वालिंग्यतंभक्तंसमाश्वास्यपुनःपुनः॥ २६ ॥ निवर्तयामासगुहंसोऽपिकृच्छ्राद्ययौगृहम्॥ तत्रमेध्यंमृगंहत्वाप
क्त्वाहुत्वाचतेत्रयः॥२७॥ भुक्त्वावृक्षदलेसुप्त्वासुखमासततांनिशाम्॥ततोरामस्तुवैदेह्यालक्ष्मणेनसमन्वितः॥२८॥ ॥ १९ ॥

ये अनेनश्रद्धासूचिता ॥ २३ ॥ अनुज्ञांत्वसहगमनविषयाम् ॥२४॥ नैषादिर्गुहः ॥२५॥ नासत्यमपितुसत्यमेवेत्यर्थः तेनान्यथानसंभावनीयमितिभावः ॥२६॥
कृच्छ्रात्कृच्छ्रमत्रातिदुःखं तत्रगंगापरकूले मेध्यंमृगंभक्ष्यंमृगंहत्वा हुत्वावैश्वदेवदेवताभ्यः ॥ २७ ॥ २८ ॥

बहिराश्रमद्वारि ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ रामसामीप्यम् स्वार्थेष्यञ् रामसमीपमित्यर्थः ॥ ३३ ॥ मेपर्णशालामागच्छेत्यन्वयः ॥ ३४॥ आनीयप्रापय्य ॥ ३५ ॥ तपसःपारंपूर्णतांगतोऽस्मिप्राप्तोऽस्मि प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत् तद्विष्णोःस्मरणादेवसंपूर्णंस्यादितिश्रुतिरिति स्मृतेर्यस्यनामस्मरणेनापिसर्व

भरद्वाजाश्रमपदंगत्वाबहिरुपस्थितः॥ तत्रैकंबटुकंदृष्ट्वारामःप्राहचहेबटो॥ २९ ॥रामोदाशरथिःसीतालक्ष्मणाभ्यांसमन्वितः॥ आस्तेबहिर्वनस्येतिह्युच्यतांमुनिसन्निधौ॥ ३० ॥तच्छ्रुत्वासहसागत्वापादयोःपतितोमुनेः॥स्वामिन्रामःसमागत्यवनाद्बहिरवस्थितः॥ ३१ ॥सभार्यःसानुजःश्रीमानाहमांदेवसन्निभः॥ भरद्वाजायमुनयेज्ञापस्वयथोचितम्॥ ३२॥तच्छ्रुत्वासहसोत्थायभरद्वाजोमुनीश्वरः॥गृहीत्वार्घ्यंचपाद्यंचरामसामीप्यमाययौ॥ ३३॥दृष्ट्वारामंयथान्यायंपूजयित्वासलक्ष्मणम्॥ आहमेपर्णशालांभोरामराजीवलोचन॥ ३४॥ आगच्छपादरजसापुनीहिरघुनंदन॥ इत्युक्त्वोटजमानीयसीतयासहराघवौ॥ ३५॥ भक्त्यापुनःपूजयित्वाचकारातिथ्यमुत्तमम्॥ अद्याहंतपसःपारंगतोऽस्मितवसंगमात्॥ ३६॥ ज्ञातंरामतवोदंतंभूतंचागामिकंचयत्॥ जानामित्वांपरात्मानंमाययाकार्यमानुषम्॥ ३७॥ यदर्थमवतीर्णोऽसिप्रार्थितोब्रह्मणापुरा॥ यदर्थंवनवासस्तेयत्करिष्यसिवैपुरः॥ ३८॥ जानामिज्ञानदृष्ट्याऽहंजातयात्वदुपासनात्॥ इतःपरंत्वांकिंवक्ष्येकृतार्थोऽहंरघूत्तम॥ ३९॥ यस्त्वांपश्यामिकाकुत्स्थंपुरुषंप्रकृतेःपरम्॥ रामस्तमभिवाद्याहसीतालक्ष्मणसंयुतः॥ ४०॥

कर्मपूर्णतातस्यसाक्षाद्दर्शनेकिंवक्तव्यमित्यर्थः यद्वा तपसःपारंफलंसर्वतपःफलमेतत्यत्तवदर्शनमित्यर्थः ॥ ३६ ॥ भूतंभाविचतवोदंतंवृत्तांतोज्ञातः तत्रभूतवृत्तांतज्ज्ञानमभिनयति जानामीत्यादि ॥ ३७ ॥ यदर्थमिति सर्वत्रयच्छब्दोरक्षोवधपरः ॥ ३८ ॥ ३९ ॥ प्रकृतेःपरंप्रकृतिगुणास्पृष्टमीश्वरम् ॥ ४० ॥

तेसीतारामलक्ष्मणभरद्वाजाः अन्योऽन्यंप्रागुक्तंसंभाष्यततोरामोमुनिसन्निधावुषित्वा ॥ ४१ ॥ यमुनायांकृताप्लवेनकृतस्नानेनमुनिनादृष्टमार्गेणदर्शितमार्गेणराघवोमार्गदर्शकैर्मुनिदारकैःसहयमुनामुत्तीर्य ॥ ४२ ॥ चित्रकूटाद्रिंप्रययौ यत्रवाल्मीकेराश्रमइत्यनेनतस्यप्राशस्त्यम् ॥ ४३ ॥ द्विजाःपक्षिणोब्राह्मणाश्च ॥ ४४ ॥

अनुग्राह्यास्त्वयाब्रह्मन्वयंक्षत्रियबांधवाः ॥ इतिसंभाष्यतेऽन्योन्यमुषित्वामुनिसन्निधौ ॥ ४१ ॥ प्रातरुत्थाययमुनामुत्तीर्यमुनिदारकैः ॥ कृताप्लवेनमुनिनादृष्टमार्गेणराघवः ॥ ४२ ॥ प्रययौचित्रकूटाद्रिंवाल्मीकेर्यत्रचाश्रमः ॥ गत्वारामोऽथवाल्मीकेराश्रमंऋषिसंकुलम् ॥ ४३ ॥ नानामृगद्विजाकीर्णंनित्यपुष्पफलाकुलम् ॥ तत्रदृष्ट्वासमासीनंवाल्मीकिंमुनिसत्तमम् ॥ ४४ ॥ ननामशिरसारामोलक्ष्मणेनचसीतया ॥ दृष्ट्वारामंरमानाथंवाल्मीकिर्लोकसुंदरम् ॥ ४५ ॥ जानकीलक्ष्मणोपेतंजटामुकुटमंडितम् ॥ कंदर्पसदृशाकारंकमनीयांबुजेक्षणम् ॥ ४६ ॥ दृष्ट्वैवसहसोत्तस्थौविस्मयानिमिषेक्षणः ॥ आलिंग्यपरमानंदंरामंहर्षाश्रुलोचनः ॥ ४७ ॥ पूजयित्वाजगत्पूज्यंभक्त्याऽर्घ्यादिभिरादृतः ॥ फलमूलैःसमधुरैर्भोजयित्वाचलालितः ॥ ४८ ॥ राघवःप्रांजलिःप्राहवाल्मीकिंविनयान्वितः ॥ पितुराज्ञांपुरस्कृत्यदंडकानागतावयम् ॥ ४९ ॥ भवंतोयदिजानंतिकिंवक्ष्यामोऽत्रकारणम् ॥ यत्रमेसुखवासायभवेत्स्थानंवदस्वतत् ॥ ५० ॥ सीतयासहितःकालंकिंचित्तत्रनयाम्यहम् ॥ इत्युक्तोराघवेणासौमुनिःसस्मितमब्रवीत् ॥ ५१ ॥

रमानाथंविष्ण्ववतारम् ॥ ४५ ॥ कमनीयपद्मसदृशनेत्रम् ॥ ४६ ॥ विस्मयेनानिमिषेईक्षणेनेत्रेयस्यसः हर्षजाश्रुभिःपूर्णेलोचनेयस्यसः क्रमेणैवंभावः ॥ ४७ ॥ लालितःइदंमधुरमिदंमधुरमिदंभुंक्ष्वेत्येवंप्रीत्याबोधितः ॥ ४८ ॥ ४९ ॥ यदिजानंतीत्यसंदिग्धेसंदिग्धवचनंवेदाश्चेत्प्रमाणंस्युरितिवत् सर्वथाजानंत्येवातोऽत्रकारणकथनंविफलमितिभावः ॥ ५० ॥ तत्रयत्रत्वंवदिष्यसितत्रेत्यर्थः ॥ ५१ ॥

त्वमेवेति त्वद्विवर्तत्वाज्जगतइतिभावः तवापीति अंतर्यामितयासर्वत्रतववासादितिभावः॥५२॥५३॥नियतमंदिरंसर्वदावासस्थानम् समदृष्टीनांमित्रोदासीनशत्रु
ष्वितिशेषः अतएवअद्वेष्टॄणांतेषांहृदयंतेऽधिकंसर्वोत्कृष्टंमंदिरमित्यर्थः सर्वदातत्रवासादेवेतिभावः॥५४॥धर्माधर्मान्विहितनिषिद्धसकलकर्माणित्यक्त्वायस्त्वामे
वभजतेतस्यहृद्धृदयंसीतयासहवस्तुंहेरामतेतवसुखमंदिरंसुखजनकंगृहम्॥ ५५॥ निर्द्वंद्वोऽहंममेतिद्वंद्वरहितोऽतएवनिस्पृहः ॥ ५६ ॥ नानाविधप्रकारेणतत्त्वज्ञ

त्वमेवसर्वलोकानांनिवासस्थानमुत्तमम् ॥ तवापिसर्वभूतानिनिवाससदनानिहि ॥ ५२ ॥ एवंसाधारणंस्थानमुक्तं
तेरघुनंदन॥सीतयासहितस्येतिविशेषंपृच्छतस्तव ॥ ५३ ॥ तद्वक्ष्यामिरघुश्रेष्ठयत्तेनियतमंदिरम् ॥ शांतानांसमदृष्टी
नामद्वेष्टॄणांचजंतुषु ॥ त्वामेवभजतांनित्यंहृदयंतेऽधिमंदिरम् ॥ ५४ ॥ धर्माधर्मान्परित्यज्यत्वामेवभजतोऽनिशम्॥
सीतयासहतेरामतस्यहृत्सुखमंदिरम् ॥ ५५ ॥ त्वन्मंत्रजापकोयस्तुत्वामेवशरणंगतः॥ निर्द्वंद्वोनिःस्पृहस्तस्यहृदयंते
सुमंदिरम् ॥ ५६ ॥ निरहंकारिणःशांतायेरागद्वेषवर्जिताः ॥ समलोष्टाश्मकनकास्तेषांतेहृदयंगृहम् ॥ ५७ ॥ त्वयिद
त्तमनोबुद्धिर्यःसंतुष्टःसदाभवेत् ॥ त्वयिसंत्यक्तकर्मायस्तन्मनस्तेशुभंगृहम् ॥ ५८ ॥ योनद्वेष्ट्यप्रियंप्राप्यप्रियंप्राप्य
नहृष्यति॥सर्वंमायेतिनिश्चित्यत्वांभजेत्तन्मनोगृहम्॥५९॥

लक्षणान्याह निरहंकारिणइति शांताःशमशीलाः लोष्टंमृत्पिंडः अश्मानःपद्मरागादयःकनकंचेदंसममनुपादेयत्वेनयेषांते॥५७॥ मनःसंकल्पविकल्पात्मकम्
बुद्धिर्निश्चयात्मिका द्वयमपियेनत्वय्येवदत्तंत्वद्विषयमेवयस्यसंकल्पादिकमितियावत् संतुष्टःकथंचिदशनाच्छादनलाभात्संतुष्टः त्वयिसंत्यक्तकर्मात्वदर्पणबु
ध्याकृतकर्मा त्यक्तकाम्यकर्मेतियावत्॥ ५८ ॥अप्रियंदुःखम् द्वेषहर्षाभावयोर्हेतुःसर्वत्रमायामयत्वनिश्चयः ॥ ५९ ॥

भावादिविकारानिति भावोऽत्रजन्मतेनजन्मसत्ताविपरिणामवृद्ध्यपक्षयविनाशरूपान्विकारान्योदेहेपश्यतिनात्मनितंनित्यंवृद्धिक्षयरहितंअविनाशिनंपश्यतीत्यर्थः क्षुत्तृड्भयंप्राणस्य सुखादिबुद्धेरितिविवेकः ॥ ६० ॥ संसारधर्मैस्तत्प्रयोजकैर्धर्मैःपुण्यपापैः ॥ ६१ ॥ सर्वागुहाःअन्नमयप्राणमयमनोमयविज्ञानमयानंदमयरूपास्तद्रूपोयआशयःस्थानंतत्स्थंचिद्घनंचैतन्यरूपंसर्वगतमप्यलेपकंनभवतिलेपकंतत्सर्वंपश्यंति तत्रस्थितोऽपितद्गुणास्पृष्टइत्यर्थः ॥ ६२ ॥ निरंतरंध्यानाभ्या

षड्भावादिविकारान्योदेहेपश्यतिनात्मनि ॥ क्षुत्तृट्सुखंभयंदुःखंप्राणबुद्ध्योर्निरीक्षते ॥ ६० ॥ संसारधर्मैर्निर्मुक्तस्तस्यते
मानसंगृहम् ॥ ६१ ॥ पश्यंतियेसर्वगुहाशयस्थंत्वांचिद्घनंसत्यमनंतमेकम् ॥ अलेपकंसर्वगतंवरेण्यंतेषांहृदब्जेसहसीत
यावस ॥ ६२ ॥ निरंतराभ्यासदृढीकृतात्मनांत्वत्पादसेवापरिनिष्ठितानाम् ॥ त्वन्नामकीर्त्याहतकल्मषाणांसीतास
मेतस्यगृहंहृदब्जे ॥ ६३ ॥ रामत्वन्नाममहिमावर्ण्यतेकेनवाकथम् ॥ यत्प्रभावादहंरामब्रह्मर्षित्वमवाप्तवान् ॥ ६४ ॥
अहंपुराकिरातेषुकिरातैःसहवर्धितः ॥ जन्ममात्रद्विजत्वंमेशूद्राचाररतःसदा ॥ ६५ ॥ शूद्रायांबहवःपुत्राउत्पन्नामेऽजि
तात्मनः ॥ ततश्चोरैश्चसंगम्यचोरोऽहमभवंपुरा ॥ ६६ ॥ धनुर्बाणधरोनित्यंजीवानामंतकोपमः ॥ एकदामुनयःसप्तदृ
ष्टामहतिकानने ॥ ६७ ॥ साक्षान्मयाप्रकाशंतोज्वलनार्कसमप्रभाः ॥ तानन्वधावंलोभेनतेषांसर्वपरिच्छदान् ॥ ६८ ॥

सेनत्वय्येवदृढीकृतस्त्वदेकविषयीकृतआत्माचित्तंयेषाम् त्वत्पादसेवायांपरिनिष्ठितानांतत्पराणाम् ॥ ६३ ॥ त्वन्नाममहिमवर्णनस्यप्रकारःकर्ताचदुर्लभइत्याह रामेति ॥ ६४ ॥ अत्रैवार्थेस्वविषयमितिहासमाह अहमिति किरातेषुतद्वसतिदेशेषु जन्ममात्रद्विजत्वंजन्ममात्रेणद्विजत्वमित्यर्थः तत्रैवोपपत्तिमाहशूद्राचाररत इति ॥ ६५ ॥ अजितात्मनइतिच्छेदः ॥ ६६ ॥ जीवानामंतकोपमोऽभवमित्यन्वयः ॥ ६७ ॥ ६८ ॥

अब्रुवंतानितिशेषः ॥ ६९ ॥ ७० ॥ ७१ ॥ पृथक्पृथक्पुत्रभार्यादिष्वेकैकंपृच्छेत्यर्थः ॥७२॥ यावदागमिष्यसितावद्वयंस्थास्यामहइतिनिश्चयइत्यर्थः ॥७३॥
फलभागिनस्तल्लब्धधनादिभोगभाजः ॥७४ ॥ जातनिर्वेदःतादृशकर्मकृतिस्वात्मनिजातापमानबुद्धिः विचार्यएतेपुत्रादयोनकुत्राप्युपकर्तारइतिविचार्यऋषिस

ग्रहीतुकामस्तत्राहंतिष्ठतिष्ठेतिचाब्रुवम् ॥ दृष्ट्वामांमुनयोऽपृच्छन्किमायासिद्विजाधम ॥ ६९ ॥ अहंतानब्रुवंकिंचिदा
दातुंमुनिसत्तमाः ॥ पुत्रदारादयःसंतिबहवोमेबुभुक्षिताः ॥ ७० ॥ तेषांसंरक्षणार्थायचरामिगिरिकानने ॥ ततोमामू
चुरव्यग्राःपृच्छगत्वाकुटुंबकम् ॥ ७१ ॥ योयोमयाप्रतिदिनंक्रियतेपापसंचयः ॥ यूयंतद्भागिनःकिंवानेतिवेतिपृथक्
पृथक् ॥ ७२ ॥ वयंस्थास्यामहेतावदागमिष्यसिनिश्चयः ॥ तथेत्युक्त्वागृहंगत्वामुनिभिर्यदुदीरितम् ॥ ७३ ॥ आपृ
च्छंपुत्रदारादींस्तैरुक्तोऽहंरघूत्तम ॥ पापंतवैवतत्सर्वंवयंतुफलभागिनः ॥ ७४ ॥ तच्छ्रुत्वाजातनिर्वेदोविचार्यपुनराग
मम् ॥ मुनयोयत्रतिष्ठंतिकरुणापूर्णमानसाः ॥ ७५ ॥ मुनीनांदर्शनादेवशुद्धांतःकरणोऽभवम् ॥ धनुरादीन्परित्यज्यदं
डवत्पतितोस्म्यहम् ॥ ७६ ॥ रक्षध्वंमांमुनिश्रेष्ठागच्छंतंनिरयार्णवम् ॥ इत्यग्रेपतितंदृष्ट्वामामूचुर्मुनिसत्तमाः ॥ ७७ ॥
उत्तिष्ठोत्तिष्ठभद्रंतेसफलःसत्समागमः ॥ उपदेक्ष्यामहेतुभ्यंकिंचित्तेनैवमोक्ष्यसे ॥ परस्परंसमालोच्यदुर्वृत्तोऽयंद्विजा
धमः ॥ ७८ ॥ उपेक्ष्यएवसद्वृत्तैस्तथाऽपिशरणंगतः ॥ रक्षणीयःप्रयत्नेनमोक्षमार्गोपदेशतः ॥ ७९ ॥ इत्युक्त्वारामते
नामव्यत्यस्ताक्षरपूर्वकम् ॥ एकाग्रमनसाऽत्रैवमरेतिजपसर्वदा ॥ ८० ॥

न्निधिंपुनरागमंआगतः ॥ ७५ ॥ शुद्धांतःकरणःमलिनवृत्तिरहितः ॥ ७६ ॥७७॥ सतांसाधूनांसमागमः सफलःमोक्षरूपफलजनकःतदेवाहयदुपदेक्ष्यामहेतेनैव
मोक्ष्यसे संसारदुःखादितिशेषः यद्यपिदुर्वृत्तस्तथाऽपिरक्षणीयइत्युत्तरेणान्वयः ॥७८॥ ७९ ॥ व्यत्यस्तानिविपरीतपौर्वापर्याण्यक्षराणियस्मिन्तादृशंरूपंयस्य
तत् तेनामजपेत्यन्वयः तद्वाकारोमरेति एकाग्रमनसेतिजपइतिकर्तव्यतोपदेशः अत्रमनसएकाग्रतावर्णविषयैव ॥ ८० ॥

॥ ८१॥ अल्पकालजपमात्रस्यैवफलमाह बाह्यंविस्मृतवानिति अनेनतच्छब्दस्यापिस्मरणपूर्वकंतदर्थभूतांतर्यामिणंविषयतयालब्धवन्मेचित्तमितिसूचितम्॥ निश्चलरूपिणोनिष्क्रियशरीरस्य ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५॥ यस्मात्तेइदानींवल्मीकात्संभवोऽतइदंतेद्वितीयंजन्मवल्मीकादभवत् अतस्त्वंवाल्मीकिरितिपूर्वेणान्वयः ॥ ८६ ॥ ईदृशःत्वत्सत्कार्यःलक्ष्मणेनेत्यस्यसहितमितिशेषः ॥ ८७ ॥ एवंभूतंरामंयत्त्वांप्रपश्यामितत्सर्वथामुक्तोभविष्यामिअत्रनसंशयः अयंचप्रचे

आगच्छामःपुनर्यावत्तावदुक्तंसदाजप ॥ इत्युक्त्वाप्रययुःसर्वेमुनयोदिव्यदर्शनाः॥८१॥ अहंयथोपदिष्टंतैस्तथाऽकरवमंजसा ॥ जपन्नेकाग्रमनसाबाह्यंविस्मृतवानहम् ॥ ८२ ॥ एवंबहुतिथेकालेगतेनिश्चलरूपिणः ॥ सर्वसंगविहीनस्यवल्मीकोऽभून्ममोपरि ॥ ८३ ॥ ततोयुगसहस्रांतेऋषयःपुनरागमन् ॥ मामूचुर्निष्क्रमस्वेतितच्छ्रुत्वातूर्णमुत्थितः ॥ ८४ ॥ वल्मीकान्निर्गतश्चाहंनीहारादिवभास्करः ॥ मामप्याहुर्मुनिगणावाल्मीकिस्त्वंमुनीश्वर ॥ ८५ ॥ वल्मीकात्संभवोयस्माद्द्वितीयंजन्मतेऽभवत् ॥ इत्युक्त्वातेययुर्दिव्यगतिंरघुकुलोत्तम ॥ ८६ ॥ अहंतेरामनाम्नश्चप्रभावादीदृशोऽभवम् ॥ अद्यसाक्षात्प्रपश्यामिससीतंलक्ष्मणेनच ॥ ८७ ॥ रामंराजीवपत्राक्षंत्वांमुक्तोनात्रसंशयः ॥ आगच्छरामभद्रंतेस्थलंवैदर्शयाम्यहम् ॥ ८८ ॥ एवमुक्त्वामुनिःश्रीमाँल्लक्ष्मणेनसमन्वितः ॥ शिष्यैःपरिवृतोगत्वामध्येपर्वतगंगयोः ॥ ८९ ॥ तत्रशालांसुविस्तीर्णांकारयामासवासभूः ॥ प्राक्पश्चिमंदक्षिणोदक्शोभनंमंदिरद्वयम् ॥ ९० ॥ जानक्यासहितोरामोलक्ष्मणेनसमन्वितः ॥ तत्रतेदेवसदृशाह्यवसन्भवनोत्तमे ॥ ९१ ॥

तोवंशजोरामायणकर्तृवाल्मीकेरन्यएवेतिबहवः ॥ ८८ ॥ मध्येपर्वतगंगयोरिति स्थलंदर्शयामासेतिशेषः ॥ ८९ ॥ तत्रऋषिदर्शितस्थाने शालांमंदिरद्वयंचलक्ष्मणेनसमन्वितोरामःकारयामास तत्पर्वतवासिभिर्भिल्लैरितिशेषः वासभूरितिरामविशेषणम् संसारस्यवासस्थानमपिस्ववासायस्थानंकारितवानित्याश्चर्योक्तिः ॥ ९० ॥ ९१ ॥

सप्रसिद्धोदेवपतिःशच्यादेवैश्चसहितोयथास्वर्गेंआस्तेतथाससीतोमुनींद्रैःसहितोरामस्तत्रास्तइत्यर्थः ॥ १२ ॥ ॥ इतिश्रीमत्सकलराज०सेतौअयोध्याकांडे
षष्ठःसर्गः ॥ ६ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ सप्तमेत्वथराजावैस्वशापोदंतमादितः संप्रोच्योपरतःपश्चाद्भरतागमईर्यते ॥ १ ॥

वाल्मीकिनातत्रसुपूजितोऽयंरामःससीतःसहलक्ष्मणेन॥देवैर्मुनींद्रैःसहितोमुदाऽस्तेस्वर्गेयथादेवपतिःसशच्या॥१२॥
॥इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेअयोध्याकांडेषष्ठःसर्गः ॥ ६ ॥ ॥ छ ॥ ॥ सुमंत्रोऽपितदा
योध्यांदिनांतेप्रविवेशह॥वस्त्रेणमुखमाच्छाद्यबाष्पाकुलितलोचनः ॥ १ ॥ बहिरेवरथंस्थाप्यराजानंद्रष्टुमाययौ ॥ ज
यशब्देनराजानंस्तुत्वातंप्रणनामह ॥२ ॥ ततोराजानमंतंतंसुमंत्रंविह्वलोऽब्रवीत्॥ सुमंत्ररामःकुत्रास्तेसीतयालक्ष्मणे
नच॥ ३ ॥ कुत्रत्यक्तस्त्वयारामःकिंमांपापिनमब्रवीत् ॥ सीतावालक्ष्मणोवाऽपिनिर्दयंमांकिमब्रवीत्॥ ४॥ हारामहा
गुणनिधेहासीतेप्रियवादिनि ॥ दुःखार्णवेनिमग्नंमांम्रियमाणंनपश्यसि ॥५॥ विलप्यैवंचिरंराजानिमग्नोदुःखसागरे
॥ एवंमंत्रीरुदंतंतंप्रांजलिर्वाक्यमब्रवीत् ॥ ६॥ रामःसीताचसौमित्रिर्मयानीतारथेनते ॥ शृंगवेरपुराभ्याशेगंगाकूले
व्यवस्थिताः॥ ७॥ गुहेनकिंचिदानीतंफलमूलादिकंचयत् ॥ स्पृष्ट्वाहस्तेनसंप्रीत्यानाग्रहीद्विससर्जतत्॥ ८॥

सुमंत्रोऽपीति रामंविनाकृतागमनाल्लज्जयावस्त्रेणमुखमाच्छाद्यप्रविवेश ॥ १ ॥ २ ॥ विह्वलःरामवियोगेनविह्वलचित्तः ॥ ३ ॥ ४ ॥ दुःखार्णवेत्व
द्वियोगदुःखार्णवेमग्नमतएवम्रियमाणंनपश्यसिकिं पश्यसीत्यर्थः ॥ ५ ॥ एवंविलप्यदुःखसागरेनिमग्नोरुदन्स्थितइतिशेषः एवंरुदंतंतंमंत्रीअब्रवीत् ॥ ६ ॥
॥ ७ ॥ प्रीत्यागुहप्रीत्याहस्तेनस्पृष्ट्वानाग्रहीत् संभावितकैकेयीपुत्रराज्येनाहारंकरिष्यामीतिप्रतिज्ञावशादितिभावः ॥ ८ ॥

॥ ९ ॥ राजानंब्रूहिवक्ष्यमाणंवंदनंचेतिशेषः साकेतमयोध्या अधिकंसौख्यंत्वत्कृतशुभध्यानादितिशेषः तच्चशोकत्यागेएवसंभवतीतिसर्वथाशोकस्त्याज्यइतिभावः ॥ १० ॥ भवतीशोकंत्यजतु राजानमाश्वासयतुभवतीइतिचब्रूहीत्यन्वयः ॥ ११ ॥ अश्रुपरीताक्षीअश्रुव्याप्तनयना ॥ १२ ॥ श्वश्र्वोःश्व

वटक्षीरंसमानाय्यगुहेनरघुनंदनः ॥ जटामुकुटमाबद्धमामाहनृपतेस्वयम् ॥ ९ ॥ सुमंत्रब्रूहिराजानंशोकस्तेऽस्तुनमत्कृते ॥ साकेतादधिकंसौख्यंविपिनेनोभविष्यति ॥ १० ॥ मातुर्मेवंदनंब्रूहिशोकंत्यजतुमत्कृते ॥ आश्वासयतुराजानंवृद्धंशोकपरिप्लुतम् ॥ ११ ॥ सीताचाश्रुपरीताक्षीमामाहनृपसत्तम ॥ दुःखगद्गदयावाचारामंकिंचिदवेक्षती ॥ १२ ॥ साष्टांगंप्रणिपातंमेब्रूहिश्वश्र्वोःपदांबुजे ॥ इतिप्ररुदतीसीतागताकिंचिदवाङ्मुखी ॥ १३ ॥ ततस्तेऽश्रुपरीताक्षानावमारुरुहुस्तदा ॥ यावद्गंगांसमुत्तीर्यगतास्तावदहंस्थितः ॥ १४ ॥ ततोदुःखेनमहतापुनरेवाहमागतः ॥ ततोरुदंतीकौसल्याराजानमिदमब्रवीत् ॥ १५ ॥ कैकेय्यैप्रियभार्यायैप्रसन्नोदत्तवान्वरम् ॥ त्वंराज्यंदेहितस्यैवमत्पुत्रःकिंविवासितः ॥ १६ ॥ कृत्वात्वमेवतत्सर्वमिदानींकिंनुरोदिषि ॥ कौसल्यावचनंश्रुत्वाक्षतेस्पृष्टइवाग्निना ॥ १७ ॥ पुनःशोकाश्रुपूर्णाक्षःकौसल्यामिदमब्रवीत् ॥ दुःखेनम्रियमाणंमांकिंपुनर्दुःखयस्यलम् ॥ १८ ॥ इदानीमेवमेप्राणाउत्क्रमिष्यंतिनिश्चयः ॥ शप्तोऽहंबाल्यभावेनकेनचिन्मुनिनापुरा ॥ १९ ॥ पुराहंयौवनेदृप्तश्चापबाणधरोनिशि ॥ अचरंमृगयासक्तोनद्यास्तीरेमहावने ॥ २० ॥

श्रूश्वशुरयोः आर्षस्त्वेकशेषः गताचलितेत्यर्थः ॥ १३ ॥ तेसीतारामलक्ष्मणाः तावदहंस्थितः उदक्कूलेइतिशेषः ॥ १४ ॥ १५ ॥ यदित्वंकैकेय्यैवरंदत्तवान्तर्हितस्यैवतत्पुत्रस्यैवराज्यंदेहि राज्यस्योपादेयत्वात् मत्पुत्रविवासनेतुनकारणमितिभावः ॥ १६ ॥ तत्सर्वंकृत्वानिर्निमित्तमविचारितंतत्कृत्वेत्यर्थः अग्निनाक्षतेस्पृष्टइव तेनातिदुःखितइत्यर्थः ॥ १७ ॥ अलमतिशयेन ॥ १८ ॥ बाल्यभावेननिषिद्धाचरणरूपबालकर्मणा ॥ १९ ॥२० ॥

॥ २१ ॥ अक्षिपमहमितिशेषः ॥ २२ ॥ मानुषसूचकःमानुषत्वसूचकःकेनहतः अहमितिशेषः ॥ २३ ॥ अहंतत्पौरुषंवचःश्रुत्वा भयसंत्रस्तस्ततस्तत्पार्श्वंश
नैर्गत्वाऽऽब्रुवमितिशेषः ॥ २४ ॥ २५ ॥ २६ ॥ नस्पृशेत् नस्प्रक्ष्यतीत्यर्थः ॥ २७ ॥ यदिकुप्यतीत्यनेनतस्यकोपएवनास्तिअतिशांतत्वात् तथाऽप्यशीघ्रगमने

तत्रार्धरात्रसमयेमुनिःकश्चित्तृषार्दितः ॥ पिपासार्दितयोःपित्रोर्जलमानेतुमुद्यतः ॥ अपूरयज्जलेकुंभंतदाशब्दोऽभवन्म
हान् ॥ २१ ॥ गजःपिबतिपानीयमितिमत्वामहानिशि ॥ बाणंधनुषिसंधायशब्दवेधिनमक्षिपम् ॥ २२ ॥ हाहतोऽस्मीतितत्रा
भूच्छब्दोमानुषसूचकः ॥ कस्यापिनकृतोदोषोमयाकेनहतोविधे ॥ २३ ॥ प्रतीक्षतेमांमाताचपिताचजलकांक्षया ॥ तच्छ्रु
त्वाभयसंत्रस्तस्ततोऽहंपौरुषंवचः ॥ २४ ॥ शनैर्गत्वाऽथतत्पार्श्वंस्वामिन्दशरथोस्म्यहम् ॥ अजानतामयाविद्धस्त्रातुमर्हसि
मांमुने ॥ २५ ॥ इत्युक्त्वापादयोस्तस्यपतितोगद्गदाक्षरः ॥ तदामामाहसमुनिर्माभैषीर्नृपसत्तम ॥ २६ ॥ ब्रह्महत्यास्पृशे
न्नत्वांवैश्योऽहंतपसिस्थितः ॥ पितरौमांप्रतीक्षेतेक्षुत्तृड्भ्यांपरिपीडितौ ॥ २७ ॥ तयोस्त्वमुदकंदेहिशीघ्रमेवाविचारय
न् ॥ नचेत्त्वांभस्मसात्कुर्यात्पितामेयदिकुप्यति ॥ २८ ॥ जलंदत्त्वातुतौनत्वाकृतंसर्वंनिवेदय ॥ शल्यमुद्धरमेदेहात्प्राणां
स्त्यक्ष्यामिपीडितः ॥ २९ ॥ इत्युक्तोमुनिनाशीघ्रंबाणमुत्पाट्यदेहतः ॥ सजलंकलशंधृत्वागतोऽहंयत्रदंपती ॥ ३० ॥ अ
तिवृद्धावंधदृशौक्षुत्पिपासार्दितौनिशि ॥ नायातिसलिलंगृह्यपुत्रःकिंवाऽत्रकारणम् ॥ ३१ ॥ अनन्यगतिकौवृद्धौ
शोच्यौतृट्परिपीडितौ ॥ आवामुपेक्षतेकिंवाभक्तिमानावयोःसुतः ॥ ३२ ॥

नतृट्पीडितोयदिकदाचित्कुप्यतीत्यर्थः ॥ २८ ॥ कृतंमद्वधं ॥ २९ ॥ धृत्वागृहीत्वांदपती तन्मातापितरौ ॥ ३० ॥ ३१ ॥ किमुपेक्षते उपेक्षाऽनुचितेतिभावः अनौ
चित्येहेतुर्भक्तिमानिति ॥ ३२ ॥

इतिचिंताव्याकुलौतावासाते तत्रतयोर्मध्येतत्पितामत्पदन्यासजंशब्दंश्रुत्वापुत्रकिंविलंबइत्यादिप्राह ॥ ३३ ॥ एवंलपतोरित्यनेनमाताप्येवमेवाहेतिसूचितं ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ आगतोयुष्मत्सन्निधावितिशेषः ॥ ४० ॥ पतितौभूम्यां ततोमामूचतुरितिशेषः किमूचतुस्तदाह नौसुतइति आव

इतिचिंताव्याकुलौतौमत्पदन्यासजंध्वनिम् ॥ श्रुत्वाप्राहपितापुत्रकिंविलंबःकृतस्त्वया ॥ ३३ ॥ देह्यावयोःसुपानीयं
पिबत्वमपिपुत्रक ॥ इत्येवंलपतोर्भीत्यासकाशमगमंशनैः ॥ ३४ ॥ पादयोःप्रणिपत्याहमब्रुवंविनयान्वितः ॥ नाहं
पुत्रस्त्वयोध्यायाराजादशरथोऽस्म्यहम् ॥ ३५ ॥ पापोऽहंमृगयासक्तोरात्रौमृगविहिंसकः ॥ जलावताराद्दूरेऽहं
स्थित्वाजलगतंध्वनिं ॥ ३६ ॥ श्रुत्वाऽहंशब्दवेधित्वादेकंबाणमथात्यजम् ॥ हतोऽस्मीतिध्वनिंश्रुत्वाभयात्तत्राहमा
गतः ॥ ३७ ॥ जटाविकीर्यपतितंदृष्ट्वाऽहंमुनिदारकम् ॥ भीतोगृहीत्वातत्पादौरक्षरक्षेतिचाब्रुवम् ॥ ३८ ॥ माभैषी
रितिमांप्राहब्रह्महत्याभयंनते ॥ मत्पित्रोः सलिलंदत्त्वानत्वाप्रार्थयजीवितम् ॥ ३९ ॥ इत्युक्तोमुनिनातेनत्वागतोमु
निहिंसकः ॥ रक्षेतांमांदयायुक्तौयुवांहिशरणागतम् ॥ ४० ॥ इतिश्रुत्वातुदुःखार्तौविलप्यबहुशोच्यतम् ॥ पतितौनौ
सुतोयत्रनयतत्राविलंबयन् ॥ ४१ ॥ ततोनीतौसुतोयत्रमयातौवृद्धदंपती ॥ स्पृष्ट्वासुतंतौहस्ताभ्यांबहुशोऽथविलेपतुः
॥ ४२ ॥ हाहेतिक्रंदमानौतौपुत्रपुत्रेत्यवोचताम् ॥ जलंदेहीतिपुत्रेतिकिमर्थंनददास्यलम् ॥ ४३ ॥ ततोमामूचतुःशीघ्रंचि
तिंरचयभूपते ॥ मयातदैवरचिताचितिस्तत्रनिवेशिताः ॥ त्रयस्तत्राग्निरुत्सृष्टोदग्धास्तेत्रिदिवंययुः ॥ ४४ ॥ तत्रवृद्धःपि
ताआहत्वमप्येवंभविष्यसि ॥ पुत्रशोकेनमरणंप्राप्स्यसेवचनान्मम ॥ ४५ ॥

योःसुतोयत्रतत्रावांनयेत्यर्थः ॥ ४१ ॥ ४२ ॥ ४३ ॥ चितिंचितां तत्रचितौ त्रयःपुत्रोमातापितरौचतस्य तत्रतदाज्ञयाऽग्निरुत्सृष्टोदत्तः ॥ ४४ ॥ पिताश्रावणस्येतिशेषः ॥ ४५ ॥

अनिवारितःअशक्यनिवारणः भावेक्तः ॥ ४६ ॥ प्रत्येकविवक्षयात्वद्वियोगादित्येकवचनं ॥ ४७ ॥ ४८ ॥ ४९ ॥ साश्वाः अश्वारूढाः ॥ ५० ॥

सइदानींममप्राप्तःशापकालोऽनिवारितः॥ इत्युक्त्वाविललापाथराजाशोकसमाकुलः ॥ ४६ ॥ हारामपुत्रहासीतेहा
लक्ष्मणगुणाकर॥ त्वद्वियोगादहंप्राप्तोमृत्युंकैकेयिसंभवम् ॥ ४७ ॥ वदन्नेवंदशरथःप्राणांस्त्यक्त्वादिवंगतः ॥ कौस
ल्याचसुमित्राचतथाऽन्याराजयोषितः ॥ ४८ ॥ चुक्रुशुश्चविलेपुश्चउरस्ताडनपूर्वकम् ॥ वसिष्ठःप्रययौतत्रप्रातर्मंत्रि
भिरावृतः ॥ ४९ ॥ तैलद्रोण्यांदशरथंक्षिप्त्वादूतानथाब्रवीत् ॥ गच्छतत्वरितंसाश्वायुधाजिन्नगरंप्रति ॥ ५० ॥ तत्रा
स्तेभरतःश्रीमाञ्छत्रुघ्नसहितःप्रभुः ॥ उच्यतांभरतःशीघ्रमागच्छेतिममाज्ञया ॥ ५१ ॥ अयोध्यांप्रतिराजानंकैकेयीं
चापिपश्यतु ॥ इत्युक्तास्त्वरितंदूतागत्वाभरतमातुलम् ॥ ५२ ॥ युधाजितंप्रणम्योचुर्भरतंसानुजंप्रति ॥ वसिष्ठस्त्वाऽ
ब्रवीद्राजन्भरतःसानुजःप्रभुः ॥ ५३ ॥ शीघ्रमागच्छतुपुरीमयोध्यामविचारयन् ॥ इत्याज्ञप्तोऽथभरतस्त्वरितंभयवि
ह्वलः ॥ ५४ ॥ आययौगुरुणादिष्टःसहदूतैस्तुसानुजः ॥ राज्ञोवाराघवस्यापिदुःखंकिंचिदुपस्थितम् ॥ ५५ ॥ इतिचिं
तापरोमार्गेचिंतयन्नगरंययौ ॥ नगरंभ्रष्टलक्ष्मीकंजनसंबाधवर्जितम् ॥ ५६ ॥ उत्सवैश्चपरित्यक्तंदृष्ट्वाचिंतापरोऽ
भवत् ॥ प्रविश्यराजभवनंराजलक्ष्मीविवर्जितम् ॥ ५७ ॥ अपश्यत्कैकयींतत्रएकामेवासनेस्थिताम् ॥ ननामशिर
सापादौमातुर्भक्तिसमन्वितः ॥ ५८ ॥

ममाज्ञयाभरतसमीपंगत्वाशीघ्रमागच्छेतिभरतउच्यतां ॥ ५१ ॥ अयोध्यांप्रतिआगत्यकैकेयींराजानंचभवान्पश्यत्विितिचोच्यतां ॥ ५२ ॥ त्वात्वांयु
धाजितं सानुजंभरतंप्रतितद्विषये ॥ ५३ ॥ ५४ ॥ ५५ ॥ जनसंबाधोजनसंमर्दः ॥ ५६ ॥ ५७ ॥ एकामेवनतुराजसहितां ॥ ५८ ॥

॥ ५९ ॥ स्वकुलस्यस्वपितृकुलस्य ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ तांगतिमुत्तमलोकं ॥६५॥ वृजिनार्णवेदुःखार्णवे ॥ ६६ ॥ रामायराज्ञेमामसम

आगतंभरतंदृष्ट्वाकैकेयीप्रेमसंभ्रमात् ॥ उत्थायालिंग्यरभसास्वांकमारोप्यसंस्थिता ॥ ५९ ॥ मूर्ध्न्यवघ्रायपप्रच्छकु
शलंस्वकुलस्यसा ॥ पितामेकुशलीभ्रातामाताचशुभलक्षणा ॥ ६० ॥ दिष्ट्यात्वमद्यकुशलीमयादृष्टोऽसिपुत्रक ॥
इतिपृष्टःसभरतोमात्राचिंताकुलेंद्रियः ॥ ६१ ॥ दूयमानेनमनसामातरंसमपृच्छत ॥ मातःपितामेकुत्रास्तेएकात्वमि
हसंस्थिता ॥ ६२ ॥ त्वयाविनानमेतातःकदाचिद्रहसिस्थितः ॥ इदानींदृश्यतेनैवकुत्रतिष्ठतिमेवद ॥ ६३ ॥ अदृष्ट्वा
पितरंमेद्यभयंदुःखंचजायते ॥ अथाहकैकयीपुत्रंकिंदुःखेनतवानघ ॥ ६४ ॥ यागतिर्धर्मशीलानामश्वमेधादियाजि
नाम् ॥ तांगतिंगतवानद्यपितातेपितृवत्सल ॥ ६५ ॥ तच्छ्रुत्वानिपपातोर्व्यांभरतःशोकविह्वलः ॥ हाताततक्कगतोऽसित्वं
त्यक्त्वामांवृजिनार्णवे ॥ ६६ ॥ असमर्प्यैवरामायराज्ञेमांक्कगतोऽसिभो ॥ इतिविलपितंपुत्रंपतितंमुक्तमूर्धजम् ॥ ६७ ॥
उत्थाप्यामृज्यनयनेकैकेयीपुत्रमब्रवीत् ॥ समाश्वसिहिभद्रंतेसर्वंसंपादितंमया ॥ ६८ ॥ तामाहभरतस्तातोम्रियमा
णःकिमब्रवीत् ॥ तमाहकैकयीदेवीभरतंभयवर्जिता ॥ ६९ ॥ हारामरामसीतेतिलक्ष्मणेतिपुनःपुनः ॥ विलपन्नेवसु
चिरंदेहंत्यक्त्वादिवंययौ ॥ ७० ॥ तामाहभरतोहेंबरामःसन्निहितोनकिम् ॥ तदानींलक्ष्मणोवाऽपिसीतावाकुत्रतेग
ताः ॥ ७१ ॥ ॥ कैकेय्युवाच ॥ ॥ रामस्ययौवराज्यार्थंपित्रातेसंभ्रमःकृतः ॥ तवराज्यप्रदानायतदाऽहं
विघ्नमाचरम् ॥ ७२ ॥

र्प्यअयंमद्दत्त्वयाऽपिपालनीयइत्यनुक्त्वैव पतितंभूमौ ॥ ६७ ॥ आमृज्यमार्जिताश्रुकेकृत्वा ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ संभ्रमःआदरपूर्वक
उपक्रमः राज्यप्रदानायतवराज्यंप्रदापयितुम् अंतर्भावितण्यर्थोंददातिः विघ्नमाचरंरामयौवराज्याभिषेकस्येतिशेषः ॥ ७२ ॥

तदुपपत्तिमाह राज्ञेति ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ तंदृष्ट्वानिःसंज्ञंभरतंदृष्ट्वा अनेनभर्तृशोकादपिपुत्रशोकोगरीयानितिदर्शितम् ॥ ७८ ॥ चक्षुषा
प्रदहन्निवपश्यन्नाहेतिशेषः असंभाष्यत्वेहेतुर्भर्तृघातिनीत्वम् ॥ ७९ ॥ पापेइति त्वद्गर्भजातत्वात्पापवानहमस्मीतिसांप्रतंनिर्णीतमितिशेषअतोऽहमित्यादि ॥ ८० ॥

राज्ञादत्तंहिमेपूर्वंवरदेनवरद्वयम् ॥ याचितंतदिदानींमेतयोरेकेनतेऽखिलम् ॥ ७३ ॥ राज्यंरामस्यचैकेनवनवासोमुनि
व्रतम् ॥ ततःसत्यपरोराजाराज्यंदत्त्वातवैवहि ॥ ७४ ॥ रामंसंप्रेषयामासवनमेवपितातव ॥ सीताऽप्यनुगतारामंपाति
व्रत्यमुपाश्रिता ॥ ७५ ॥ सौभ्रात्रंदर्शयन्राममनुयातोऽपिलक्ष्मणः ॥ वनंगतेषुसर्वेषुराजातानेवचिंतयन् ॥ ७६ ॥ प्रल
पन्रामरामेतिममारनृपसत्तमः ॥ इतिमातुर्वचःश्रुत्वावज्राहतइवद्रुमः ॥ ७७ ॥ पपातभूमौनिःसंज्ञस्तंदृष्ट्वादुःखितात
दा ॥ कैकेयीपुनरप्याहवत्सशोकेनकिंतव ॥ ७८ ॥ राज्येमहतिसंप्राप्तेदुःखस्यावसरःकुतः ॥ इतिब्रुवंतीमालोक्यमातरं
प्रदहन्निव ॥ ७९ ॥ असंभाष्याऽसिपापेमेघोरेत्वंभर्तृघातिनी ॥ पापेत्वद्गर्भजातोऽहंपापवानस्मिसांप्रतम् ॥ अहमग्निं
प्रवेक्ष्यामिविषंवाभक्षयाम्यहम् ॥ ८० ॥ खड्गेनवाऽथचात्मानंहत्वायामियमक्षयम् ॥ भर्तृघातिनिदुष्टेत्वंकुंभीपाकंग
मिष्यसि ॥ ८१ ॥ इतिनिर्भर्त्स्यकैकेयींकौसल्याभवनंययौ ॥ साऽपितंभरतंदृष्ट्वामुक्तकंठारुरोदह ॥ ८२ ॥ पादयोःपति
तस्तस्याभरतोऽपितदारुदत् ॥ आलिंग्यभरतंसाध्वीराममातायशस्विनी ॥ ८३ ॥ कृशाऽतिदीनवदनासाश्रुनेत्रेदमब्र
वीत् ॥ पुत्रत्वयिगतेदूरमेवंसर्वमभूदिदम् ॥ उक्तंमात्राश्रुतंसर्वंत्वयातेमातृचेष्टितम् ॥ ८४ ॥

गमिष्यसिदेहत्यागोत्तरमितिशेषः ॥ ८१ ॥ तंस्वपुत्रवियोगकारणम् ॥ ८२ ॥ ८३ ॥ इदंसर्वंगृहवृत्तमेवमभूत्राज्ञोमरणंरामस्यवनगमनंचेत्यर्थः एतत्सर्वंतेमातृ
चेष्टितम् तच्चतवमात्रोक्तमेवभविष्यति त्वयाचश्रुतमेवभविष्यतीत्यध्याहारेणान्वयः ॥ ८४ ॥

रघुरामचंद्रःरघुकुलजातोरामचंद्रइत्यर्थः ॥८५॥ परतः सर्वस्यपरतःसर्वतोऽधिकइतियावत् परमात्मामेपुत्रोजातोऽसियद्यपितथाऽपिमांदुःखंनजहाति अतोविधिर्बलवानितिमेमनीषाबुद्धिःदुःखनिवर्त्तकसामग्र्यांसत्यामपिदुःखानिवृत्तिर्विधिबलीयस्त्वकृतैवेतिभावः ॥ ८६ ॥ एवंविलपंतींवीक्ष्येत्यन्वयः ॥ ८७ ॥ राम

पुत्रःसभार्योवनमेवयातःसलक्ष्मणोमेरघुरामचंद्रः ॥ चीरांबरोबद्धजटाकलापःसंत्यज्यमांदुःखसमुद्रमग्नाम् ॥ ८५ ॥
हारामहामेरघुवंशनाथजातोऽसिमेत्वंपरतःपरात्मा ॥ तथाऽपिदुःखंनजहातिमांवैविधिर्बलीयानितिमेमनीषा ॥८६॥
सएवंभरतोवीक्ष्यविलपंतींभृशंशुचा ॥ पादौगृहीत्वाप्राहेदंशृणुमातर्वचोमम ॥८७॥ कैकेय्यायत्कृतंकर्मरामराज्या
भिषेचने ॥ अन्यद्वायद्विजानामिसामयानोदितायदि ॥ ८८ ॥ पापंमेऽस्तुतदामातर्ब्रह्महत्याशतोद्भवम् ॥ हत्वावसि
ष्ठंखड्गेनअरुंधत्यासमन्वितम् ॥ ८९ ॥ भूयात्तत्पापमखिलंममजानामियद्यहम् ॥ इत्येवंशपथंकृत्वारुरोदभरतस्तदा
॥ ९० ॥ कौसल्यातमथालिंग्यपुत्रजानामिमाशुचः ॥ एतस्मिन्नंतरेश्रुत्वाभरतस्यसमागमम् ॥ ९१ ॥ वसिष्ठोमंत्रि
भिःसार्धंप्रययौराजमंदिरम् ॥ रुदंतंभरतंदृष्ट्वावसिष्ठःप्राहसादरम् ॥ ९२ ॥ वृद्धोराजादशरथोज्ञानीसत्यपराक्रमः ॥
भुक्त्वामर्त्यसुखंसर्वमिष्ट्वाविपुलदक्षिणैः ॥ ९३ ॥ अश्वमेधादिभिर्यज्ञैर्लब्ध्वारामंसुतंहरिम् ॥ अंतेजगामत्रिदिवंदेवें
द्रार्धासनंप्रभुः ॥ ९४ ॥

राज्यस्याभिषेचनेयत्कृतंतद्वाअन्यद्वामद्राज्ययाचनारूपंयदिजानामियदिवासाएतदर्थंमयानोदिताप्रेरितातदेत्यन्वयः ॥ ८८ ॥ ८९ ॥ यद्यहमिमंवृत्तांतंजानामितदातदखिलंपापंममभूयादित्यन्वयः ॥ ९० ॥ जानामित्वद्धृदयमितिशेषःसमागममागमनम् ॥ ९१ ॥ ९२ ॥ ९३ ॥ त्रिदिवंगत्वेतिशेषः देवेंद्रार्धासनंजगामप्राप ॥ ९४ ॥

अशोच्यत्वेहेतुगर्भंविशेषणम् मोक्षभाजनमिति प्रकारांतरेणाप्यशोच्यत्वमाह आत्मेति नित्योऽव्ययइत्यस्यैवजन्मनाशादिवर्जितइतिविवरणम् ॥ १५ ॥ शरीरस्यजडत्वान्नश्वरत्वादेवअशोच्यताइत्याह शरीरमिति ॥ १६ ॥ स्वात्मताडनपूर्वकम् स्वशरीरताडनपूर्वकमित्यर्थः ॥ १७ ॥ ज्ञानिनांसंसारमसारत्वेनजानतांयदाकेनचिद्वियोगोभवतितदासवैराग्यहेतुःभवेत् भवतीत्यर्थः शांत्यादिकर्त्ताच ॥ १८ ॥ अथजातस्यध्रुवोमृत्युरित्याह जन्मवानिति अन्वगात् अनुग

तंशोचसिवृथैवत्वमशोच्यंमोक्षभाजनम् ॥ आत्मानित्योऽव्ययःशुद्धोजन्मनाशादिवर्जितः॥ १५॥शरीरंजडमत्यर्थमपवित्रंविनश्वरम्॥ विचार्यमाणेशोकस्यनावकाशःकथंचन॥१६॥ पितावातनयोवाऽपियदिमृत्युवशंगतः ॥ मूढास्तमनुशोचंतिस्वात्मताडनपूर्वकम्॥ १७॥ निःसारेखलुसंसारेवियोगोज्ञानिनांयदा ॥ भवेद्वैराग्यहेतुःसशांतिसौख्यंतनोतिच॥१८॥ जन्मवान्यदिलोकेऽस्मिंस्तर्हितंमृत्युरन्वगात्॥ तस्मादपरिहार्योऽयंमृत्युर्जन्मवतांसदा ॥ १९ ॥ स्वकर्मवशतःसर्वजंतूनांप्रभवाप्ययौ॥विजानन्नप्यविद्वान्यःकथंशोचतिबांधवान्॥१००॥ ब्रह्मांडकोटयोनष्टाःसृष्टयोबहुशोगताः॥शुष्यंतिसागराःसर्वेकैवास्थाक्षणजीविते॥ १ ॥ चलपत्रांतलग्नांबुबिंदुवत्क्षणभंगुरम्॥ आयुस्त्यजत्यवेलायांकस्तत्रप्रत्ययस्तव॥ २ ॥देहीप्राक्तनदेहोत्थकर्मणादेहवान्पुनः॥ तद्देहोत्थेनचपुनरेवंदेहःसदात्मनः ॥ ३ ॥

च्छत्येवेत्यर्थः॥ १९ ॥ यःअविद्वानपिअतत्त्वज्ञोऽपिसउत्पत्तिप्रलययोःसर्वजंतूनांकर्माधीनत्वंविजानन्कथंबांधवान्शोचति किंपुनस्तत्त्वज्ञइतिभावः ॥१००॥ शुष्यंति वर्त्तमानसामीप्येलट् क्षणजीवितेक्षणभंगुरेजीवितइत्यर्थ ॥ १ ॥ चलंचंचलंयत्पत्रंतदंतेलग्नोयोंऽबुबिंदुस्तद्वत्क्षणभंगुरं अवेलायांबाल्येऽपि प्रत्ययोविश्वासः ॥ २ ॥ देहीजीवःप्राक्तनदेहसंपादितकर्मणाऽयंदेहएतद्देहसंपादितकर्मणाचपुनर्देहइतिदेहवियोगोनकदाचिदात्मनइतिदेहशोकोवृथेतिभावः॥ ३ ॥

पुनर्देहप्राप्तौदृष्टांतमाह यथेति नवंभजत्येवेत्युत्तरेणान्वयः ॥ ४ ॥ आत्मनस्तुनमरणादीत्याह आत्मानेति ॥ ५ ॥ आदिमध्यांतभावविकाराभावेनसर्वभाव
विकारराहित्यमित्याह षड्भावरहितः अनंतःदेशतःपरिच्छेदरहितः प्रज्ञानंनिर्विषयज्ञानंतदेवविग्रहःशरीरंयस्यसः बुद्ध्यादिसाक्षीनिश्चयादिरूपसकलांतःकरण

यथात्यजतिवैजीर्णंवासोगृह्णातिनूतनम् ॥ तथाजीर्णंपरित्यज्यदेहीदेहंपुनर्नवम् ॥ ४॥ भजत्येवसदातत्रशोकस्यावस
रःकुतः॥आत्मानम्रियतेजातुजायतेनचवर्धते॥५॥ षड्भावरहितोऽनंतःसत्यप्रज्ञानविग्रहः॥ आनंदरूपोबुद्ध्यादिसाक्षील
यविवर्जितः ॥ ६ ॥ एकएवपरोह्यात्माह्यद्वितीयःसमस्थितः ॥ इत्यात्मानंदृढंज्ञात्वात्यक्त्वाशोकंकुरुक्रियाम् ॥ ७॥ तै
लद्रोण्याःपितुर्देहमुद्धृत्यसचिवैःसह ॥ कृत्यंकुरुयथान्यायमस्माभिःकुलनंदन ॥८॥इतिसंबोधितःसाक्षाद्गुरुणाभरतस्त
दा॥ विसृज्याज्ञानजंशोकंचक्रेसविधिवत्क्रियाम् ॥ ९ ॥ गुरुणोक्तप्रकारेणआहिताग्नेर्यथाविधि ॥ संस्कृत्यसपितुर्देहं
विधिदृष्टेनकर्मणा ॥ १० ॥ एकादशेऽहनिप्राप्तेब्राह्मणान्वेदपारगान् ॥ भोजयामासविधिवच्छतशोऽथसहस्रशः
॥ ११ ॥ उद्दिश्यपितरंतत्रब्राह्मणेभ्योधनंबहु ॥ ददौगवांसहस्राणिग्रामान्रत्नांबराणिच ॥ १२ ॥ अवसत्स्वगृहेतत्ररा
ममेवानुचिंतयन् ॥ वसिष्ठेनसहभ्रात्रामंत्रिभिःपरिवारितः ॥ १३ ॥

वृत्तेःसाक्षी लयोनाशस्तद्रहितः ॥ ६ ॥ समस्थितःसर्वत्रसमतयास्थितः सएवाहमित्यात्मानंज्ञात्वाशोकंत्यक्त्वाक्रियांकुरु ॥ ७ ॥ तैलद्रोणीतैलपूर्णाकाष्ठां
बुवाहिनी ॥ ८ ॥ ९ ॥ गुरुणावसिष्ठेन ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

अनुचिंतनप्रकारमेवाह रामेइति सुघोरमरण्यंप्रयातेइत्यन्वयः मेमाताराक्षसीवदर्शनाद्धृदयंप्रदहति अतआरण्यंअरण्यवंतंदेशंरामवासभूतगच्छामीत्यन्वयः ॥ ॥ ११४ ॥ ॥ इतिश्रीमत्सकलराजविपदुद्धरणसम०अध्यात्मरामायणेसेतौअयोध्याकांडेसप्तमःसर्गः ॥७॥ ॥छ॥ ॥ अष्टमेतुवसिष्ठेनप्रोक्तोऽपिभरतः

रामेऽरण्यंप्रयातेसहजनकसुतालक्ष्मणाभ्यांसुघोरंमातामेराक्षसीवप्रदहतिहृदयंदर्शनादेवसद्यः ॥ गच्छाम्यारण्यमद्यस्थिरमतिरखिलंदूरतोऽपास्यराज्यंरामंसीतासमेतंस्मितरुचिरमुखंनित्यमेवानुसेवे ॥ ११४ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेअयोध्याकांडेसप्तमःसर्गः ॥ ७ ॥ ॥ छ ॥ ॥ श्रीमहादेवउवाच ॥ वसिष्ठोमुनिभिःसार्धंमंत्रिभिःपरिवारितः ॥ राज्ञःसभांदेवसभासन्निभामविशद्विभुः ॥ १ ॥ तत्रासनेसमासीनश्चतुर्मुखइवापरः ॥ आनीयभरतंतत्रउपवेश्यसहानुजम् ॥ २ ॥ अब्रवीद्वचनंदेशकालोचितमरिंदमम् ॥ वत्सराज्येऽभिषेक्ष्यामस्त्वामद्यपितृशासनात् ॥ ३ ॥ कैकेय्यायाचितंराज्यंत्वदर्थेपुरुषर्षभ ॥ सत्यसंधोदशरथःप्रतिज्ञायददौकिल ॥ ४ ॥ अभिषेकोभवत्वद्यमुनिभिर्मंत्रपूर्वकम् ॥ तच्छ्रुत्वाभरतोऽप्याहममराज्येनकिंमुने ॥ ५ ॥ रामोराजाधिराजश्चवयंतस्यैवकिंकराः ॥ श्वःप्रभातेगमिष्यामोराममानेतुमंजसा ॥ ६ ॥ अहंयूयंमातरश्चकैकेयींराक्षसींविना ॥ हनिष्याम्यधुनैवाहंकैकेयींमातृगंधिनीम् ॥ ७ ॥ किंतुमांनोरघुश्रेष्ठःस्त्रीहंतारंसहिष्यते ॥ तच्छ्वोभूतेगमिष्यामिपादचारेणदंडकान् ॥ ८ ॥

किल अनादृत्याधिराज्यंचजगामभ्रातृसन्निधौ ॥ १ ॥ देवसभासन्निभांतत्सदृशीं ॥ १ ॥ चतुर्मुखोब्रह्मा ॥ २॥३ ॥ प्रतिज्ञाय अस्मान्सर्वान्प्रतिज्ञापयित्वा ददौ ॥ ४ ॥ मुनिभिःक्रियमाणोऽभिषेकोऽद्यभवत्वित्यन्वयः ॥ ५ ॥ अंजसाशीघ्रम् ॥ ६ ॥ हनिष्यामीति तादृशवधस्यैवौचित्यादितिभावः मातृगंधिनींतादृशीमपिमातृत्वसंबंधवतीमपीत्यर्थः ॥ ७ ॥ नोइतिप्रतिषेधे नोसहिष्यतइत्यन्वयः पादचारेणनतुवाहनेनेत्यर्थः ॥ ८ ॥

यावद्रामोनिवर्ततेतावदेवंतत्समानव्रतोभविष्यामीत्यर्थः ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ पृष्ठतःपार्श्वतोऽग्रतोययुरितिशेषः ॥ १३ ॥ १४ ॥ शंकितमानसःकि
मयंवनेस्थितस्यापिरामस्यवधार्थंयातीतिशंका तदेवाह महत्येति ॥ १५ ॥ अविदितात्मनःअविदितैतद्वृत्तांतस्यरामस्यपापंकर्तुंयातिनवायातीतिशंकितमानसइ

शत्रुघ्नसहितस्तूर्णंयूयमायांतुवानवा ॥ रामोयथावनेयातस्तथाऽहंवल्कलांबरः ॥ ९ ॥ फलमूलकृताहारःशत्रुघ्नसहितो
मुने ॥ भूमिशायीजटाधारीयावद्रामोनिवर्त्तते ॥ १० ॥ इतिनिश्चित्यभरतस्तूष्णीमेवावतस्थिवान् ॥ साधुसाध्विति
तंसर्वेप्रशशंसुर्मुदान्विताः ॥ ११ ॥ ततःप्रभातेभरतंगच्छंतंसर्वसैनिकाः ॥ अनुजग्मुःसुमंत्रेणनोदिताःसाश्वकुंजराः
॥ १२ ॥ कौसल्याद्याराजदारावसिष्ठप्रमुखाद्विजाः ॥ छादयंतोभुवंसर्वेपृष्ठतःपार्श्वतोऽग्रतः ॥ १३ ॥ शृंगवेरपुरंगत्वा
गंगाकूलेसमंततः ॥ उवासमहतीसेनाशत्रुघ्नपरिचोदिता ॥ १४ ॥ आगतंभरतंश्रुत्वागुहःशंकितमानसः ॥ महत्यासेन
यासार्धमागतोभरतःकिल ॥ १५ ॥ पापंकर्तुंनवायातिरामस्याविदितात्मनः ॥ गत्वातद्धृदयंज्ञेयंयदिशुद्धस्तरिष्यति
॥ १६ ॥ गंगांनोचेत्समाकृष्यनावस्तिष्ठंतुसायुधाः ॥ ज्ञातयोमेसमायत्ताःपश्यंतःसर्वतोदिशम् ॥ १७ ॥ इतिसर्वान्स
मादिश्यगुहोभरतमागतः ॥ उपायनानिसंगृह्यविविधानिबहून्यपि ॥ १८ ॥ प्रययौज्ञातिभिःसार्द्धंबहुभिर्विविधायु
धैः ॥ निवेद्योपायनान्यग्रेभरतस्यसमंततः ॥ १९ ॥ दृष्ट्वाभरतमासीनंसानुजंसहमंत्रिभिः ॥ चीरांबरंघनश्यामंजटा
मुकुटधारिणम् ॥ २० ॥

त्यर्थः यदिशुद्धःतदातरिष्यतिगंगामित्यन्वयः ॥ १६ ॥ नोचेत्यद्यशुद्धस्तदामेज्ञातयोनावआकृष्यसर्वतोदिशंपश्यंतःसमायत्ताःसावधानास्तिष्ठंतु तदुत्तरणप्रति
बंधायेतिशेषः ॥ १७ ॥ १८ ॥ उपायनानिराजयोग्यानिभक्ष्यादीनिस्वदेशस्थानिभरतस्याग्रेनिवेद्यसमंततोदृष्ट्वेतिशेषः सैनिकेषुविकारिविकारपरीक्षणाय
समंततोनिरीक्षणं ॥ १९ ॥ २० ॥

॥ २१ ॥ अनामयमारोग्यम् ॥ २२ ॥ यतोरामेणालिंगितोऽतोधन्योऽसि ॥ २३ ॥ २४ ॥ २५ ॥ यतोरामस्यप्रियतमोऽतोभाग्यवान् ॥ २६ ॥ २७ ॥ सीताभरणघर्षणेनसँल्लग्नायेस्वर्णबिंदवःतदाकारचिह्नानितैरंचितंयुक्तंशयनस्थलंदृष्ट्वापर्यदेवयत् शुशोचेत्यर्थः ॥ २८ ॥ २९ ॥ साकथंममदोषतःकुशविष्टरे

राममेवानुशोचंतंरामरामेतिवादिनम् ॥ ननामशिरसाभूमौगुहोऽहमितिचाब्रवीत् ॥ २१ ॥ शीघ्रमुत्थाप्यभरतोगाढमालिंग्यसादरम् ॥ पृष्ट्वाऽनामयमव्यग्रःसखायमिदमब्रवीत् ॥ २२ ॥ भ्रातस्त्वंराघवेणात्रसमेतःसमवस्थितः ॥ रामेणालिंगितःसार्द्रनयनेनामलात्मना ॥ २३ ॥ धन्योऽसिकृतकृत्योऽसियत्त्वयापरिभाषितः ॥ रामोराजीवपत्राक्षो लक्ष्मणेनचसीतया ॥ २४ ॥ यत्ररामस्त्वयादृष्टस्तत्रमांनयसुव्रत ॥ सीतयासहितोयत्रसुप्तस्तद्दर्शयस्वमे ॥ २५ ॥ त्वं रामस्यप्रियतमोभक्तिमानसिभाग्यवान् ॥ इतिसंस्मृत्यसंस्मृत्यरामंसाश्रुविलोचनः ॥ २६ ॥ गुहेनसहितस्तत्रयत्ररामःस्थितोनिशि ॥ ययौददर्शशयनस्थलंकुशसमास्तृतम् ॥ २७ ॥ सीताभरणसँल्लग्नस्वर्णबिंदुभिरंचितम् ॥ दुःखसंतप्तहृदयोभरतःपर्यदेवयत् ॥ २८ ॥ अहोऽतिसुकुमारीयासीताजनकनंदिनी ॥ प्रासादेरत्नपर्यंकेकोमलास्तरणेशुभे ॥ २९ ॥ रामेणसहिताशेतेसाकथंकुशविष्टरे ॥ सीतारामेणसहितादुःखेनममदोषतः ॥ ३० ॥ धिङ्मांजातोऽस्मिकैकेय्यांपापराशिसमानतः ॥ मन्निमित्तमिदंक्लेशंरामस्यपरमात्मनः ॥ ३१ ॥ अहोतिसफलंजन्मलक्ष्मणस्यमहात्मनः ॥ राममेवसदाऽन्वेतिवनस्थमपिहृष्टधीः ॥ ३२ ॥ अहंरामस्यदासायेतेषांदासस्यकिंकरः ॥ यदिस्यांसफलंजन्ममभूयान्नसंशयः ॥ ३३ ॥

शेते रामेणसहितेतिपुनरुक्तिःशोकमेवपुष्णाति ॥ ३० ॥ पापराशिसमानत.पापराशिसमानायाम् सार्वविभक्तिकस्तसिः तादृश्यांकैकेय्यांयज्जातोऽस्मितस्मान्मांधिक् इदंक्लेशम् क्लेशशब्दोर्धर्चादिः ॥ ३१ ॥ हृष्टधीःहृष्टचित्तः ॥ ३२ ॥ आत्मानंनिंदन्रामंस्तौति अहमिति ॥ ३३ ॥

॥ ३४ ॥ ३५ ॥ मंदाकिन्याअविदूरतइतिच्छेदः आर्षोदीर्घःसमीपइत्यर्थः चित्रकूटमंदाकिन्योर्मध्येइतियावत् ॥ ३६ ॥ नंदात्समृद्धेः फलमूलादिसमृद्धेरितियावत् टुनदिसमृद्धावितिधात्वनुसारात् ॥ ३७ ॥ पंचशतानिसमानयदित्यन्वयः हेतिपादपूरणे ॥ ३८ ॥ ससैन्यस्यभरतस्यतर्तुंतरणार्थंअत्यादरप्रदर्शनायभ

भ्रातर्जानासियदितत्कथयस्वममाखिलम् ॥ यत्रतिष्ठतितत्राहंगच्छाम्यानेतुमंजसा ॥ ३४ ॥ गुहस्तंशुद्धहृदयंज्ञात्वा
सस्नेहमब्रवीत् ॥ देवत्वमेवधन्योऽसियस्यतेभक्तिरीदृशी ॥ ३५ ॥ रामेराजीवपत्राक्षेसीतायांलक्ष्मणेतथा ॥ चित्रकू
टाद्रिनिकटेमंदाकिन्याविदूरतः ॥ ३६ ॥ मुनीनामाश्रमपदेरामस्तिष्ठतिसानुजः ॥ जानक्यासहितोनंदात्सुखमास्तेकि
लप्रभुः ॥ ३७ ॥ तत्रगच्छामहेशीघ्रंगंगांतर्तुमिहार्हसि ॥ इत्युक्त्वात्वरितंगत्वानावःपंचशतानिह ॥ ३८ ॥ समानयत्स
सैन्यस्यतर्तुंगंगांमहानदीम् ॥ स्वयमेवानिनायैकांराजनावंगुहस्तदा ॥ ३९ ॥ आरोप्यभरतंतत्रशत्रुघ्नंराममातरम् ॥
वसिष्ठंचतथाऽन्यत्रकैकेयींचान्ययोषितः ॥ ४० ॥ तीर्त्वागंगांययौशीघ्रंभरद्वाजाश्रमंप्रति ॥ दूरेस्थाप्यमहासैन्यंभर
तःसानुजोययौ ॥ ४१ ॥ आश्रमेमुनिमासीनंज्वलंतमिवपावकम् ॥ दृष्ट्वाननामभरतःसाष्टांगमतिभक्तितः ॥ ४२ ॥
ज्ञात्वादाशरथिंप्रीत्यापूजयामासमौनिराट् ॥ पप्रच्छकुशलंदृष्ट्वाजटावल्कधारिणम् ॥ ४३ ॥ राज्यंप्रशासतस्तेऽद्य
किमेतद्वल्कलादिकम् ॥ आगतोऽसिकिमर्थंत्वंविपिनंमुनिसेवितम् ॥ ४४ ॥

रतोत्तरणायराजनावंराजयोग्यांनावंस्वयमेवानिनाय ॥ ३९ ॥ तथाकैकेयीमन्ययोषितश्चान्यत्रान्यराजनावीत्यर्थः रामेदुष्टत्वाचरणप्रयुक्तोऽयंकैकेय्याअनादरः अत्रातारयदितिशेषः ॥ ४० ॥ भरद्वाजाश्रमपर्यंतंसेनयासहगत्वाततःसेनयाश्रमोपरोधोमाभूदितिकिंचिद्दूरेसंस्थाप्यस्वयंसानुजोययौ भरद्वाजाश्रमद्वारंप्रतीतिशेषः ॥ ४१ ॥ ४२ ॥ जटादिधारिणंदृष्ट्वावक्ष्यमाणंपप्रच्छ ॥ ४३ ॥ ४४ ॥

सर्वंभूताशयस्थितःसर्वभूताशयस्थेनांतर्यामिणातत्त्वज्ञतयाऽभेदादितिभावः ॥ ४५ ॥ ४६ ॥ नजानामीत्यर्थंशपथेनप्रत्याययति भवत्पादेति ॥ ४७ ॥ ज्ञातुम
र्हसीति इत्याहेतिशेषः ॥४८॥ शाश्वतः किंकरइत्यनेनस्वस्यचक्रावतारत्वंसूचितं ॥४९॥ ५० ॥ दासोऽहमतिनीचवत्अतिनम्रः सन्सेवे सेविष्येइत्यर्थः वर्तमा

भरद्वाजवचःश्रुत्वाभरतःसाश्रुलोचनः॥ सर्वंजानासिभगवन्सर्वभूताशयस्थितः॥४५॥तथाऽपिपृच्छसेकिंचित्तदनुग्र
हएवमे॥ कैकेय्यायत्कृतंकर्मरामराज्यविघातनम्॥४६॥ वनवासादिकंवापिनहिजानामिकिंचन॥ भवत्पादयुगंमेऽद्य
प्रमाणंमुनिसत्तम॥४७॥ इत्युक्त्वापादयुगलंमुनेःस्पृष्ट्वाऽर्तमानसः॥ ज्ञातुमर्हसिमांदेवशुद्धोवाऽशुद्धएववा॥४८॥ म
मराज्येनकिंस्वामिन्रामेतिष्ठतिराजनि॥ किंकरोहंमुनिश्रेष्ठरामचंद्रस्यशाश्वतः॥४९॥ अतोगत्वामुनिश्रेष्ठरामस्यच
रणांतिके॥पतित्वाराज्यसंभारान्समर्प्यात्रैवराघवम्॥ ५०॥ अभिषेक्ष्येवसिष्ठाद्यैः पौरजानपदैःसह॥ नेष्येऽयोध्यांर
मानाथंदासःसेवेतिनीचवत्॥५१॥ इत्युदीरितमाकर्ण्यभरतस्यवचोमुनिः॥ आलिंग्यमूर्ध्न्यवघ्रायप्रशशंससविस्मयः
॥५२॥ वत्सज्ञातंपुरैवैतद्भविष्यंज्ञानचक्षुषा॥ माशुचस्त्वंपरोभक्तःश्रीरामेलक्ष्मणादपि॥५३॥ आतिथ्यंकर्तुमिच्छा
मिससैन्यस्यतवानघ॥ अद्यभुक्त्वाससैन्यस्त्वंश्वोगंतारामसन्निधिम्॥ ५४॥ यथाज्ञापयतिभवांस्तथेतिभरतोऽब्रवी
त्॥ भरद्वाजस्त्वपःस्पृष्ट्वामौनीहोमगृहेस्थितः॥ ५५॥ दध्यौकामदुघांकामवर्षिणींकामदोमुनिः॥ असृजत्कामधुक्
सर्वंयथाकाममलौकिकम्॥ ५६॥

नसामीप्येलट् ॥५१॥ भरतस्येत्युदीरितंवचइत्यन्वयः शेषेषष्ठी ॥ ५२ ॥ लक्ष्मणादपिपरोऽधिकइत्यर्थः रामेइतिविषयसप्तमी ॥५३॥ ५४ ॥ यथाज्ञापयतीति
च्छंदोभंगआर्षः ॥ ५५ ॥ यस्ययन्मनोरथविषयमिष्टंतत्सर्वमलौकिकंलौकिकसामग्रीजन्यविलक्षणमसृजत ॥ ५६॥

॥५७॥५८॥५९॥ प्रययौभरतःरामाश्रमद्वारंप्रतीतिशेषः ॥ ६० ॥ शत्रुघ्नादिभिःसहसर्वंतपस्विमंडलंतपस्विनामाश्रममंडलंविचिन्वानोरामाश्रमममलब्ध्वान्यवर्ततनिवृत्तव्यापारएवासीत् ॥ ६१ ॥ तत्रऋषिमंडलमपृच्छत् ॥ ६२ ॥ विविक्तमेकांतदेशवर्ति ॥ ६३ ॥ कदलीखंडःकदलीसमूहः ॥ ६४ ॥ एवंमुनिभिर्दर्शि

भरतस्यससैन्यस्ययथेष्टंचमनोरथम् ॥ तथाववर्षसकलंतृप्तास्तेसर्वसैनिकाः ॥ ५७ ॥ वसिष्ठंपूजयित्वाऽग्रेशास्त्रदृष्टेनकर्मणा ॥ पश्चात्ससैन्यंभरतंतर्पयामासयोगिराट् ॥ ५८ ॥ उषित्वादिनमेकंतुआश्रमेस्वर्गसन्निभे ॥ अभिवाद्यपुनःप्रातर्भरद्वाजंसहानुजः ॥ भरतस्तुकृतानुज्ञःप्रययौरामसन्निधिम् ॥ ५९ ॥ चित्रकूटमनुप्राप्यदूरेसंस्थाप्यसैनिकान् ॥ रामसंदर्शनाकांक्षीप्रययौभरतःस्वयम् ॥ ६० ॥ शत्रुघ्नेनसुमंत्रेणगुहेनचपरंतपः ॥ तपस्विमंडलंसर्वंविचिन्वानोन्यवर्तत ॥ ६१ ॥ अदृष्ट्वारामभवनमपृच्छदृषिमंडलम् ॥ कुत्रास्तेसीतयासार्धंलक्ष्मणेनरघूत्तमः ॥ ६२ ॥ ऊचुरग्रेगिरेःपश्चाद्गंगायाउत्तरेतटे ॥ विविक्तंरामसदनंरम्यकाननमंडितम् ॥ ६३ ॥ सफलैराम्रपनसैःकदलीखंडसंवृतम् ॥ चंपकैःकोविदारैश्चपुन्नागैर्विपुलैस्तथा ॥ ६४ ॥ एवंदर्शितमालोक्यमुनिभिर्भरतोऽग्रतः ॥ हर्षाद्ययौरघुश्रेष्ठभवनंमंत्रिणासह ॥ ६५ ॥ ददर्शदूरादतिभास्वरंशुभंरामस्यगेहंमुनिवृंदसेवितम् ॥ वृक्षाग्रसँल्लग्नसुवल्कलाजिनंरामाभिरामंभरतःसहानुजः ॥ ६६ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेअयोध्याकांडेअष्टमःसर्गः ॥ ८ ॥ ॥छ॥ ॥ अथगत्वाश्रमपदसमीपंभरतोमुदा ॥ सीतारामपदैर्युक्तंपवित्रमतिशोभनम् ॥ १ ॥

तंरघुश्रेष्ठभवनंअग्रतोभरतःसमालोक्यमंत्रिणासहहर्षाद्ययाविति संबंधः ॥ ६५ ॥ रामाभिरामंरामेणरामवासेनाभिरामम् ॥ ६६ ॥ इतिश्रीमत्सकलराजविपदु० अयोध्याकांडेसेतौअष्टमःसर्गः ॥८॥ ॥छ॥ ॥ नवमेभरतोगत्वाश्रीरामस्यैवसन्निधौ तेनसार्धंगंतुमनानागमद्गुरुबोधितः ॥ १ ॥ सीतारामपदयुक्तत्वादिविशिष्टंआश्रमपदसमीपंआश्रमस्थानसमीपदेशंगत्वा ॥ १ ॥

तत्रवज्रांकुशकमलपूजितध्वजादिचिह्नयुतानिपदानिददर्श ध्वजेपूजितत्वंस्पष्टरेखत्वम् दृष्ट्वाचतत्पादचिह्नितदेशरजःसुअचेष्टयत्लुलुठे ॥ २ ॥ यत्पादरज
इत्यादिव्याख्यातंप्राक् ॥ ३ ॥ अद्भुतोयःप्रेमरसःप्रीतिरसस्तेनाप्लुतोव्याप्तआशयोंऽतःकरणंयस्य रघुनाथभावनेविगाढचेताःतत्परचित्तइत्यर्थः ॥ ४ ॥ ५ ॥

सतत्रवज्रांकुशवारिजांचितध्वजादिचिह्नानिपदानिसर्वतः ॥ ददर्शरामस्यभुवोऽतिमंगलान्यचेष्टयत्पादरजःसुसानु
जः ॥ २ ॥ अहोसुधन्योऽहममूनिरामपादारविंदांकितभूतलानि ॥ पश्यामियत्पादरजोविमृग्यंब्रह्मादिदेवैःश्रुतिभिश्च
नित्यम् ॥ ३ ॥ इत्यद्भुतप्रेमरसाप्लुताशयोविगाढचेतारघुनाथभावने ॥ आनंदजाश्रुस्नपितस्तनांतरःशनैरवापाश्रमस
न्निधिंहरेः ॥ ४ ॥ सतत्रदृष्ट्वारघुनाथमास्थितंदूर्वादलश्यामलमायतेक्षणम् ॥ जटाकिरीटंनववल्कलांबरंप्रसन्नवक्त्रंत
रुणारुणद्युतिम् ॥ ५ ॥ विलोकयंतंजनकात्मजांशुभांसौमित्रिणासेवितपादपंकजम् ॥ तदाऽभिदुद्रावरघूत्तमंशुचाह
र्षाच्चतत्पादयुगंत्वराऽग्रहीत् ॥ ६ ॥ रामस्तमाकृष्यसुदीर्घबाहुर्दोर्भ्यांपरिष्वज्यसिषिंचनेत्रजैः ॥ जलैरथांकोपरिसंन्यवे
शयत्पुनःपुनःसंपरिषस्वजेविभुः ॥ ७ ॥ अथतामातरःसर्वाःसमाजग्मुस्त्वरान्विताः ॥ राघवंद्रष्टुकामास्तास्तृषार्तागौ
र्यथाजलम् ॥ ८ ॥ रामःस्वमातरंवीक्ष्यद्रुतमुत्थायपादयोः ॥ ववंदेसाश्रुसापुत्रमालिंग्यातीवदुःखिता ॥ ९ ॥ इतराश्च
तथानत्वाजननीरघुनंदनः ॥ ततःसमागतंदृष्ट्वावसिष्ठंमुनिपुंगवम् ॥ १० ॥ साष्टांगंप्रणिपत्याहधन्योऽस्मीतिपुनःपुनः ॥
यथाऽर्हमुपवेश्याहसर्वानेवरघूद्वहः ॥ ११ ॥

त्वरात्वरयेत्यर्थः ॥ ६ ॥ ७ ॥ तृषार्तागौर्यथाजलंप्रतिगच्छतिएवंमातरोराघवंप्रतिजग्मुः ॥ ८ ॥ साश्रुयथातथाववंदे साचपुत्रमालिंग्यभर्तृवियोगस्मरणेना
तीवदुःखिताआसीदितिशेषः ॥ ९ ॥ इतराश्चजननीस्तथासाश्रुनत्वास्थितइतिशेषः ॥ १० ॥ धन्योऽस्मित्वद्दर्शनादितिभावः यथार्हंयथायोग्यम् ॥ ११ ॥

पितामेकुशलीतिप्रश्नः स्ववियोगेकुशलमसंभाव्यमित्याशयेनाह किंवेति तथैवसंभावनयाहातिदुःखितःप्राणवियोगजनकपीडयापीडितःकिमाह ॥ १२ ॥ रामरामेतीत्यादेर्वदन्नितिशेषः ॥ १३ ॥ कर्णशूलाभंकर्णयोःशूलरोगतुल्यम् ॥ १४ ॥ घृणाकरदयासमुद्र ॥ १५ ॥ अतोभृशंरामविलापादप्यधिकमि

पितामेकुशलीकिंवामांकिमाहातिदुःखितः ॥ वसिष्ठस्तमुवाचेदंपितातेरघुनंदन ॥ १२ ॥ त्वद्वियोगाभितप्तात्मात्वामे
वपरिचिंतयन् ॥ रामरामेतिसीतेतिलक्ष्मणेतिममारह ॥ १३ ॥ श्रुत्वातत्कर्णशूलाभंगुरोर्वचनमंजसा ॥ हाहतोऽस्मी
तिपतितोरुदन्रामःसलक्ष्मणः ॥ १४ ॥ ततोनुरुरुदुःसर्वामातरश्चतथाऽपरे ॥ हातातमांपरित्यज्यक्वगतोऽसिघृणाकर
॥ १५ ॥ अनाथोऽस्मिमहाबाहोमांकोवालालयेदितः ॥ सीताचलक्ष्मणश्चैवविलेपतुरतोभृशम् ॥ १६ ॥ वसिष्ठःशां
तवचनैःशमयामासतांशुचम् ॥ ततोमंदाकिनींगत्वास्नात्वातेवीतकल्मषाः ॥ १७ ॥ राज्ञेददुर्जलंतत्रसर्वेतेजलकांक्षि
णे ॥ पिंडान्निर्वापयामासरामोलक्ष्मणसंयुतः ॥ १८ ॥ इंगुदीफलपिण्याकरचितान्मधुसंप्लुतान् ॥ वयंयदन्नाःपितरस्त
दन्नाःस्मृतिनोदिताः ॥ १९ ॥ इतिदुःखाश्रुपूर्णाक्षःपुनःस्नात्वागृहंययौ ॥ सर्वेरुदित्वासुचिरंस्नात्वाजग्मुस्तथाश्रमम्
॥ २० ॥ तस्मिंस्तुदिवसेसर्वेउपवासंप्रचक्रिरे ॥ ततःपरेद्युर्विमलेस्नात्वामंदाकिनीजले ॥ २१ ॥ उपविष्टंसमागम्यभर
तोराममब्रवीत् ॥ रामराममहाभागस्वात्मानमभिषेचय ॥ २२ ॥ राज्यंपालयपित्र्यंतेज्येष्ठस्त्वंमेपितातथा ॥ क्षत्रिया
णामयंधर्मोयत्प्रजापरिपालनम् ॥ २३ ॥

त्यर्थः ॥ १६ ॥ शांतवचनैःपूर्वराजवियोगचरितैःसंसारानित्यताप्रतिपादकैर्वचनैस्तत्त्वज्ञानोपदेशैश्च ॥ १७ ॥ जलकांक्षिणे रामादित्यादिः ॥ १८ ॥ इंगुदीतापसतरुः ननुराजायोग्यमेतत्तत्राह वयमिति ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ पित्र्यंपितुरागतम् यथापिताज्येष्ठस्त्वंमेतथापितृसदृशः एवंचपितरिजीवतियथाराज्यानधिकारस्तथात्वयिजीवत्यपीतिभावः किंचतवाप्ययमेवधर्मइत्याह क्षत्रियाणामिति ॥ २३ ॥

तस्मादिष्ट्वेति तंतवेवंशाविच्छेदाय ॥ २४ ॥ यन्मेमातुःकिंचिद्दुष्कृतंतत्स्मर्तुंनार्हसीतिसंबंधः ॥ २५॥२६ ॥ अतिभक्तितःभरतस्यातिभक्तिंदृष्ट्वेत्यर्थः ॥ २७ ॥ त्वदुक्तंतथैवसत्यमेवतथाऽपिपित्राज्ञापालनंमेआवश्यकमित्याह किंत्विति नवपंचचतुर्दश ॥ २८ ॥ अखिलंदत्तमित्यब्रवीदित्यन्वयः ॥ २९ ॥ ३० ॥ अति

इष्ट्वायज्ञैर्बहुविधैःपुत्रानुत्पाद्यतंतवे ॥ राज्येपुत्रंसमारोप्यगमिष्यसिततोवनम् ॥ २४ ॥ इदानींवनवासस्यकालोनैव प्रसीदमे ॥ मातुर्मेदुष्कृतंकिंचित्स्मर्तुंनार्हसिपाहिनः ॥ २५ ॥ इत्युक्त्वाचरणौभ्रातुःशिरस्याधायभक्तितः ॥ रामस्यपुरतःसाक्षाद्दंडवत्पतितोभुवि ॥ २६ ॥ उत्थाप्यराघवःशीघ्रमारोप्यांकेतिभक्तितः ॥ उवाचभरतंरामःस्नेहार्द्रनयनःशनैः ॥ २७ ॥ शृणुवत्सप्रवक्ष्यामित्वयोक्तंयत्तथैवतत् ॥ किंतुमामब्रवीत्तातोनववर्षाणिपंचच ॥ २८ ॥ उषित्वादंडकारण्येपुरंपश्चात्समाविश ॥ इदानींभरतायेदंराज्यंदत्तंमयाऽखिलम् ॥ २९ ॥ ततःपित्रैवसुव्यक्तंराज्यंदत्तंतवैवहि ॥ दंडकारण्यराज्यंमेदत्तंपित्रातथैवच ॥ ३० ॥ अतःपितुर्वचःकार्यमावाभ्यामतियत्नतः ॥ पितुर्वचनमुल्लंघ्यस्वतंत्रोयस्तुवर्तते ॥ ३१ ॥ सजीवन्नेवमृतकोदेहांतेनिरयंव्रजेत् ॥ तस्माद्राज्यंप्रशाधित्वंवयंदंडकपालकाः ॥ ३२ ॥ भरतस्त्वब्रवीद्रामंकामुकोमूढधीःपिता ॥ स्त्रीजितोभ्रांतहृदयउन्मत्तोयदिवक्ष्यति ॥ तत्सत्यमितिनग्राह्यंभ्रांतवाक्यंयथासुधीः ॥ ३३ ॥ रामउवाच ॥ नस्त्रीजितःपिताब्रूयान्नकामीनैवमूढधीः ॥ पूर्वंप्रतिश्रुतंतस्यैसत्यवादीददौभयात् ॥ ३४ ॥

यत्नतःपितृवचनकर्त्तव्यत्वेहेतुमाह पितुरिति स्वतंत्रःस्वेच्छाचारी ॥ ३१ ॥ ३२ ॥ कामुकत्वादेवमूढधीःयदिवक्ष्यतियद्वक्ष्यतीत्यर्थःसुधीःपुरुषोयथाभ्रांतवाक्यंसत्यमितिनगृह्णातितथात्वयोक्तविशिष्टपितृवाक्यंनग्राह्यमित्यर्थः ॥ ३३ ॥ ब्रूयात् उक्तवानित्यर्थः नञ्त्रयमेकैकमपितत्रासंभविकिंपुनःसमुदितमितिबोधयितुं प्रतिश्रुतंप्रतिज्ञातम् भयात्प्रतिज्ञाभंगभयात् ॥ ३४ ॥

यतोमहतांनरकादप्यधिकाऽसत्याद्भीतिः तेषांफलतोऽप्युपायेतिभयमित्यर्थः अहमपिराघवएवसनृतस्यैकैकेय्यैसत्यंकरोमिवनवासादिकमित्येतत्प्रतिश्रुतंवाक्यं
कथमसत्यंकुर्यामित्यर्थः ॥ ३५ ॥ ३६ ॥ तथैवत्वत्प्रतिनिधितयात्वद्वद्देवेत्यर्थः ॥ ३७ ॥ व्यत्ययंराज्यवनवासयोरित्यर्थः ॥ ३८ ॥ आगमिष्यामिवनमिति

असत्याद्भीतिरधिकामहतांनरकादपि ॥ करोमीत्यहमप्येतत्सत्यंतस्यैप्रतिश्रुतम् ॥ ३५ ॥ कथंवाक्यमहंकुर्यामसत्यंरा
घवोहिसन् ॥ इत्युदीरितमाकर्ण्यरामस्यभरतोऽब्रवीत् ॥ ३६ ॥ तथैवचीरवसनोवनेवत्स्यामिसुव्रत ॥ चतुर्दशासमा
स्त्वंतुराज्यंकुरुयथासुखम् ॥ ३७ ॥ रामउवाच ॥ पित्रादत्तंतवैवैतद्राज्यंमह्यंवनंददौ ॥ व्यत्ययंयद्यहंकुर्यामसत्यंपूर्व
वत्स्थितम् ॥ ३८ ॥ भरतउवाच ॥ अहमप्यागमिष्यामिसेवेत्वांलक्ष्मणोयथा ॥ नोचेत्प्रायोपवेशेनत्यजाम्येतत्कले
वरम् ॥ ३९ ॥ इत्येवंनिश्चयंकृत्वादर्भानास्तीर्यचातपे ॥ मनसापिविनिश्चित्यप्राङ्मुखोपविवेशसः ॥ ४० ॥ भरतस्या
पिनिर्बंधंदृष्ट्वारामोऽतिविस्मितः ॥ नेत्रांतसंज्ञांगुरवेचकारघुनंदनः ॥ ४१ ॥ एकांतेभरतंप्राहवसिष्ठोज्ञानिनांवरः ॥ व
त्सगुह्यंशृणुष्वेदंममवाक्यात्सुनिश्चितम् ॥ ४२ ॥ रामोनारायणःसाक्षाद्ब्रह्मणायाचितःपुरा ॥ रावणस्यवधार्थायजा
तोदशरथात्मजः ॥ ४३ ॥ योगमायाऽपिसीतेतिजाताजनकनंदिनी ॥ शेषोऽपिलक्ष्मणोजातोराममन्वेतिसर्वदा
॥ ४४ ॥ रावणंहंतुकामास्तेगमिष्यंतिनसंशयः ॥ कैकेय्यावरदानादियद्यन्निष्ठुरभाषणम् ॥ ४५ ॥ सर्वंदेवकृतंनोचेदे
वंसाभाषयेत्कथम् ॥ तस्मात्त्यजाग्रहंतातरामस्यविनिवर्तने ॥ ४६ ॥

शेषः ॥ ३९ ॥ निश्चयंकृत्वोवाचेतिशेषः आतपेइत्यनेनसर्वथाजीविताशापरित्यागः प्राङ्मुखउपविवेश संधिरार्षः ॥ ४० ॥ नेत्रांतसंज्ञांनेत्रांतेनास्योत्थापनंकुर्वीति
सूचनाम् ॥ ४१ ॥ ४२ ॥ साक्षात्नारायणःसर्वांतर्यामीत्यर्थः ॥ ४३ ॥ योगमायातच्छक्तिरूपा ॥ ४४ ॥ ४५ ॥ सादशरथस्त्रीअत्यंतंरामेप्रीतिमतीच ॥ ४६ ॥

॥ ४७ ॥ ४८ ॥ राज्यायराज्यपालनसामर्थ्यलाभाय ॥ ४९ ॥ ५० ॥ ५१ ॥ नवपंचसमांतेचतुर्दशवर्षांते ॥ ५२ ॥ ५३ ॥ ५४ ॥ स्रवन्नेत्रजलासतीआकुलाकृतापराधत्वा दतिव्याकुलेत्यर्थः राज्यविघातनंराज्यविघातः ॥ ५५ ॥ मायामोहितचेतसेत्यनेनवस्तुतोममापराधएवनेतिसूचितमंगीकृत्यापिस्वापराधमाह क्षमस्वेति क्षमैवसारःसर्वगुणप्रधानंयेषामित्यर्थः ॥ ५६ ॥ संप्रतिमायापगमंध्वनयति त्वमिति नन्वहंमनुष्योनपरमात्मेतिचेत्तत्राह मायेति एषातेमायैवेतिभावः त्वयैवेति तस्मादंतर्याम्येवत्वमितिभावः एवंचत्वत्प्रेरणयैवतथाकृतवत्यामेनापराधइतिध्वनिः ॥ ५७ ॥ तदेवोपपादयति त्वदितिस्वतोऽस्वतंत्रंत्वत्प्रेरणां विनाकिंकरोति नकिमपिकरोतीतिभावः कुहकोविस्मापकःगुप्ततयातत्सूत्रचालनेनतन्नर्तनाद्विस्मयोत्पादकइतियावत् ॥ ५८ ॥

निवर्तस्वमहासैन्यैर्भ्रातृभिःसहितःपुरम् ॥ रावणंसकुलंहत्वाशीघ्रमेवागमिष्यति ॥ ४७ ॥ इतिश्रुत्वागुरोर्वाक्यंभरतोविस्मयान्वितः॥ गत्वासमीपंरामस्यविस्मयोत्फुल्ललोचनः ॥ ४८ ॥ पादुकेदेहिराजेंद्रराज्यायतवपूजिते ॥ तयोःसेवांकरोम्येवयावदागमनंतव ॥ ४९ ॥ इत्युक्त्वापादुकेदिव्येयोजयामासपादयोः ॥ रामस्यतेददौरामोभरतायातिभक्तितः ॥ ५० ॥ गृहीत्वापादुकेदिव्येभरतोरत्नभूषिते ॥ रामंपुनःपरिक्रम्यप्रणनामपुनःपुनः ॥ ५१ ॥ भरतःपुनराहेदंभक्त्यागद्गदयागिरा ॥ नवपंचसमांतेतुप्रथमेदिवसेयदि ॥ ५२ ॥ नागमिष्यसिचेद्रामप्रविशामिमहानलम् ॥ बाढमित्येवतं रामोभरतंसंन्यवर्तयत् ॥ ५३ ॥ ससैन्यःसवसिष्ठश्चशत्रुघ्नसहितःसुधीः ॥ मातृभिर्मंत्रिभिःसार्धंगमनायोपचक्रमे ॥ ५४ ॥ कैकेयीराममेकांतेस्रवन्नेत्रजलाकुला ॥ प्रांजलिःप्राहहेरामतवराज्यविघातनम् ॥ ५५ ॥ कृतंमयादुष्टधियामायामोहितचेतसा ॥ क्षमस्वममदौरात्म्यंक्षमासाराहिसाधवः ॥ ५६ ॥ त्वंसाक्षाद्विष्णुरव्यक्तःपरमात्मासनातनः॥ मायामानुषरूपेणमोहयस्यखिलंजगत् ॥ त्वयैवप्रेरितोलोकःकुरुतेसाध्वसाधुवा ॥ ५७ ॥ त्वदधीनमिदंविश्वमस्वतंत्रंकरोतिकिम् ॥ यथाकृत्रिमनर्तक्योनृत्यंतिकुहकेच्छया ॥ ५८ ॥

त्वदधीनेति अनेनमायायास्तत्कार्यस्यातिजडत्वंसूचितम् नन्वेवंस्वदुःखफलकंत्वत्प्रेरणंमयाकथंकर्तव्यंतत्राह देवकार्यंकरिष्यतेति ॥ ५९ ॥ मममया शेषे षष्ठी प्रतीतोऽसिवास्तवस्वरूपेणज्ञातोऽसि इदमपित्वत्प्रसादादेवेतिभावः अन्यथादेवानामप्यविषयस्यकथमज्ञानविषयतास्यादितिभावः ॥ ६० ॥ अतःप्रार्थयते पाहीति पुत्रवित्तादिविषयस्नेहरूपंपाशमित्यर्थः ॥ ६१ ॥ त्वज्ज्ञानामलखड्गेनेतिपूर्वान्वयि ॥ ६२ ॥ ६३ ॥ देवकार्यरूपार्थस्यसिद्ध्यर्थमित्यर्थः

त्वदधीनातथामायानर्तकीबहुरूपिणी ॥ त्वयैवप्रेरिताऽहंचदेवकार्यंकरिष्यता ॥ ५९ ॥ पापिष्ठंपापमनसाकर्माचरमरिंदम ॥ अद्यप्रतीतोऽसिममदेवानामप्यगोचरः ॥ ६० ॥ पाहिविश्वेश्वरानंतजगन्नाथनमोऽस्तुते ॥ छिंधिस्नेहमयंपाशंपुत्रवित्तादिगोचरम् ॥ ६१ ॥ त्वज्ज्ञानामलखड्गेनत्वामहंशरणंगता ॥ कैकेय्यावचनंश्रुत्वारामःसस्मितमब्रवीत् ॥ ६२ ॥ यदाहमांमहाभागेनानृतंसत्यमेवतत् ॥ मयैवप्रेरितावाणीतववक्त्राद्विनिर्गता ॥ ६३ ॥ देवकार्यार्थसिद्ध्यर्थमत्रदोषःकुतस्तव ॥ गच्छत्वंहृदिमांनित्यंभावयंतीदिवानिशम् ॥ ६४ ॥ सर्वत्रविगतस्नेहामद्भक्त्यामोक्ष्यसेऽचिरात् ॥ अहंसर्वत्रसमदृक्द्वेष्योवाप्रियएववा ॥ ६५ ॥ नास्तिमेकल्पकस्येवभजतोऽनुभजाम्यहम् ॥ मन्मायामोहितधियोमामंबमनुजाकृतिम् ॥ ६६ ॥ सुखदुःखाद्यनुगतंजानंतिनतुतत्त्वतः ॥ दिष्ट्यामद्गोचरंज्ञानमुत्पन्नंतेभवापहम् ॥ ६७ ॥

॥ ६४ ॥ मद्भक्त्यासर्वविषयेषुस्नेहत्यागपूर्वकमहर्निशंमद्भावनमेवमद्भक्तिस्तया ममरागद्वेषाभावान्मत्तोभयंमास्त्वित्याह अहमिति ममद्वेष्योवाप्रियोवानास्ति कल्पकस्येवमायाविनोयथास्वमायाकल्पितपदार्थेषुद्वेषप्रीतिराहित्यम् स्वकल्पितत्वेनमिथ्यात्वनिश्चयात् तथाममापिसर्वत्रमिथ्यात्वनिश्चयात्नद्वेषरागावितिनमत्तस्तेभयमितिभावः तथाऽप्ययंमेस्वभावइत्याह भजतोन्विति अतोनवैषम्यनैर्घृण्ये ॥ ६५ ॥ ६६ ॥ नतुतत्त्वतःअहंतादृशइतिशेषः भवापहमित्यनेनभयांतरस्यावकाशएवनेतिसूचितम् ॥ ६७ ॥

मांस्मरंतीतिष्ठमांजगत्प्रेरकत्वेनस्मरंतीतिष्ठ एवंचस्वस्मिन्स्वतंत्रत्वाभिमानापगमान्नकर्मभिर्लिप्यसे सोऽभिमानएवकर्मलेपकइतिभावः ॥ ६८ ॥ ६९ ॥ ७० ॥ स्थाप्यस्थापयित्वा आर्षोल्यप् ॥ ७१ ॥ राजोपचारैःराजयोग्यैःपुष्पादिभिःश्रीराममिवतेपूजयित्वेत्यर्थः ॥ ७२ ॥ भरतस्यापिरामसमव्रतत्वमाह फलेति दांतो

स्मरंतीतिष्ठभवनेलिप्यसेनचकर्मभिः॥ इत्युक्त्वासापरिक्रम्यरामंसानंदविस्मया ॥६८॥ प्रणम्यशतशोभूमौययौगेहंमुदान्विता ॥ भरतस्तुसहामात्यैर्मातृभिर्गुरुणासह ॥ ६९ ॥ अयोध्यामगमच्छीघ्रंराममेवानुचिंतयन् ॥ पौरजानपदान्सर्वानयोध्यायामुदारधीः ॥ ७० ॥ स्थापयित्वायथान्यायंनंदिग्रामंययौस्वयम् ॥ तत्रसिंहासनेनित्यंपादुकेस्थाप्यभक्तितः ॥ ७१ ॥ पूजयित्वायथारामंगंधपुष्पाक्षतादिभिः॥ राजोपचारैरखिलैःप्रत्यहंनियतव्रतः ॥७२॥ फलमूलाशनोदांतोजटावल्कलधारकः॥ अधःशायीब्रह्मचारीशत्रुघ्नसहितस्तदा ॥ ७३ ॥ राजकार्याणिसर्वाणियावंतिपृथिवीतले ॥ तानिपादुकयोःसम्यङ्निवेदयतिराघवः॥ ७४ ॥ गणयन्दिवसान्येवरामागमनकांक्षया॥ स्थितोरामार्पितमनाःसाक्षाद्ब्रह्ममुनिर्यथा ॥ ७५॥ रामस्तुचित्रकूटाद्रौवसन्मुनिभिरावृतः॥ सीतयालक्ष्मणेनापिकिंचित्कालमुपावसत् ॥ ७६ ॥ नागराश्चसदायांतिरामदर्शनलालसाः ॥ चित्रकूटस्थितंज्ञात्वासीतयालक्ष्मणेनच॥ ७७॥ दृष्ट्वातज्जनसंबाधंरामस्त्याजतंगिरिम्॥ दंडकारण्यगमनेकार्यमप्यनुचिंतयन्॥ ७८ ॥ अन्वगात्सीतयाभ्रात्रात्र्यत्रेराश्रममुत्तमम् ॥ सर्वत्रसुखसंवासंजनसंबाधवर्जितम् ॥ ७९ ॥

जितेंद्रियः ॥ ७३ ॥ ७४ ॥ ब्रह्ममुनिःब्रह्मर्षिः ॥ ७५ ॥ रामःचित्रकूटाद्रौमुनिभिःसीतयालक्ष्मणेनावृतोवसन्नपिकिंचित्कालमेवोपावसदित्यन्वयः एवेत्यस्याध्याहारः नबहुकालमित्यर्थः ॥ ७६ ॥ तत्रहेतुमाह नागराश्चेति लक्ष्मणेनचेति सहेतिशेषः ॥ ७७ ॥ कार्यंरावणवधरूपम् ॥ ७८ ॥ जनसंबाधवर्जितंनागरजनसंबाधहीनम् ॥ ७९ ॥

गत्वाअत्र्याश्रममितिशेषः अत्रिंदंडवत्प्रणम्यरामोऽहमभिवादयेइत्याहेत्यन्वयः ॥ ८० ॥ प्रसंगादागत्यापित्वद्दर्शनेनाहंधन्यःकिंवक्तव्यंत्वद्दर्शनोद्देशेनैवागतोध
न्यइति ॥ ८१ ॥ परंहरिमंतर्यामिरूपम् उपासनाभिस्तत्सारूप्यंयेगतास्तद्व्यवच्छेदायपरमिति ॥ ८२ ॥ लक्ष्मणंचैवेति दृष्ट्वेतिशेषः वाक्यमब्रवीत् राममिति

गत्वामुनिमुपासीनंभासयंतंतपोवनम् ॥दंडवत्प्रणिपत्याहरामोहमभिवादये ॥८०॥ पितुराज्ञांपुरस्कृत्यदंडकानहमाग
तः॥ वनवासमिषेणापिधन्योऽहंदर्शनात्तव ॥८१॥ श्रुत्वारामस्यवचनंरामंज्ञात्वाहरिंपरम्॥ पूजयामासविधिवद्भक्त्या
परमयामुनिः॥८२ ॥ वन्यैःफलैःकृतातिथ्यमुपविष्टंरघूत्तमम्॥ सीतांचलक्ष्मणंचैवसंतुष्टोवाक्यमब्रवीत्॥८३॥ भार्या
मेतीवसंवृद्धाह्यनसूयेतिविश्रुता॥ तपश्चरंतीसुचिरंधर्मज्ञाधर्मवत्सला ॥८४॥ अंतस्तिष्ठतितांसीतापश्यत्वरिनिषूदन
॥ तथेतिजानकींप्राहरामोराजीवलोचनः॥ ८५ ॥ गच्छदेवींनमस्कृत्यशीघ्रमेहिपुनःशुभे ॥ तथेतिरामवचनंसीताचा
पितथाऽकरोत् ॥८६॥ दंडवत्पतितामग्रेसीतांदृष्ट्वाऽतिहृष्टधीः॥ अनसूयासमालिंग्यवत्सेसीतेतिसादरम्॥८७॥ दि
व्येददौकुंडलेद्वेनिर्मितेविश्वकर्मणा ॥ दुकूलेद्वेददौतस्यैनिर्मलेभक्तिसंयुता॥८८॥ अंगरागंचसीतायैददौदिव्यंशुभान
ना॥ नत्यक्ष्यतेंगरागेणशोभात्वांकमलानने॥८९॥ पातिव्रत्यंपुरस्कृत्यराममन्वेहिजानकि॥ कुशलीराघवोयातुत्वया
सहपुनर्गृहम्॥ ९० ॥ भोजयित्वायथान्यायंरामंसीतासमन्वितम् ॥ लक्ष्मणंचतदारामंपुनःप्राहकृतांजलिः ॥ ९१ ॥

शेषः ॥ ८३ ॥ अतीवसंवृद्धाअत्यंतवृद्धतरा धर्मवत्सलाधर्मप्रिया ॥ ८४ ॥ ८५ ॥ सीतारामवचनंतथाअवश्यमित्यंगीकृत्यतथाऽकरोत्तत्समीपगमनमकरोत्
॥ ८६ ॥ सीतेइतिच्छेदः संधिरार्षः ॥ ८७ ॥ भक्तिसंयुतासाक्षादीश्वरीयमितिभक्तिमती ॥ ८८ ॥ नत्यक्ष्यतेकदाचिदपीतिशेषः ॥८९॥ अथशिक्षयति पा
तिव्रत्यमिति अथाशिषमाह कुशलीति ॥ ९० ॥ ९१ ॥

सुरदेहोवामनादिः मानुषोदेहोरामादिः तिर्यग्देहोमत्स्यादिः नचदेहेति मायिकत्वादितिभावः त्वत्तोबिभेतीति त्वज्ज्ञाननाश्यत्वादितिभावः ॥ ९२ ॥ इतिश्रीमत्स

रामत्वमेवभुवनानिविधायतेषांसंरक्षणायसुरमानुषतिर्यगादीन् ॥ देहान्बिभर्षिनचदेहगुणैर्विलिप्तस्त्वत्तोबिभेत्यखिलमोहकरीचमाया ॥ ९२ ॥ ॥इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेअयोध्याकांडेनवमःसर्गः ॥ ९ ॥

॥छ॥ ॥छ॥ ॥अयोध्यकांडेनवानांसर्गाणांसप्तशतानिश्लोकाः ॥ ७०० ॥

कलराजविपदुद्धरणसमर्थेत्यादिबिरुदावलीविराजमानस्यहिम्मतिवर्मणःकृतावध्यात्मरामायणसेतौअयोध्याकांडेनवमःसर्गः ॥९॥ अयंकांडोद्वितीयःसमाप्तः ॥

॥ इति श्रीमदध्यात्मरामायणे अयोध्याकांडः समाप्तः ॥

॥ अथ श्रीमदध्यात्मरामायणे अरण्यकांडः प्रारभ्यते ॥


अरण्यकांड ३
क० मृग
राम
लक्ष्मण
सीता
रावण

श्रीगणेशायनमः ॥ ॥ अथेति दिनंदिनशेषम् ॥ १ ॥ यत्रदंडकंविपिनंमुनिमंडलमंडितंतत्रगच्छामहे त्वमाज्ञातुंतत्राज्ञांकर्तुम् ॥ २ ॥ ३ ॥ मार्गद्रष्टामार्गदर्शयिता लोकानुसारिणःलोकवदज्ञत्वंनाटयतः ॥ ४ ॥ वारितःनिवर्तध्वमितिप्रार्थितः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ रामाभिनंदिताःरामेणानंदपूर्वकंगच्छतेतिदत्तानु

श्रीमहादेवउवाच ॥ ॥ अथतत्रदिनंस्थित्वाप्रभातेरघुनंदनः ॥ स्नात्वामुनिंसमामंत्र्यप्रयाणायोपचक्रमे ॥ १ ॥ मुनेगच्छामहेसर्वैर्मुनिमंडलमंडितम् ॥ विपिनंदंडकंयत्रत्वमाज्ञातुमिहार्हसि ॥ २ ॥ मार्गप्रदर्शनार्थायशिष्यानाज्ञप्तुमर्हसि ॥ श्रुत्वारामस्यवचनंप्रहस्यात्रिर्महायशाः ॥ प्राहतत्ररघुश्रेष्ठंरामरामसुराश्रय ॥ ३ ॥ सर्वस्यमार्गद्रष्टात्वंतवकोमार्गदर्शकः ॥ तथापिदर्शयिष्यंतितवलोकानुसारिणः ॥ ४ ॥ इतिशिष्यान्समादिश्यस्वयंकिंचित्तमन्वगात् ॥ रामेणवारितःप्रीत्याअत्रिःस्वभवनंययौ ॥ ५ ॥ क्रोशमात्रंततोगत्वाददर्शमहतींनदीम् ॥ अत्रेःशिष्यानुवाचेदंरामोराजीवलोचनः ॥ ६ ॥ नद्याःसंतरणेकश्चिदुपायोविद्यतेनवा ॥ ऊचुस्तेविद्यतेनौकासुदृढारघुनंदन ॥ ७ ॥ तारयिष्यामहेयुष्मान्वयमेवक्षणादिह ॥ ततोनाविसमारोप्यसीतांराघवलक्ष्मणौ ॥ ८ ॥ क्षणात्संतारयामासुर्नदींमुनिकुमारकाः ॥ रामाभिनंदिताःसर्वेजग्मुरत्रेरथाश्रमम् ॥ ९ ॥ तावेत्यविपिनंघोरंझिल्लीझंकारनादितम् ॥ नानामृगगणाकीर्णंसिंहव्याघ्रादिभीषणम् ॥ १० ॥ राक्षसैर्घोररूपैश्चसेवितंरोमहर्षणम् ॥ प्रविश्यविपिनंघोरंरामोलक्ष्मणमब्रवीत् ॥ ११ ॥ इतःपरंप्रयत्नेनगंतव्यंसहितेनमे ॥ धनुर्गुणेनसंयोज्यशरानपिकरेदधत् ॥ १२ ॥ अग्रेयास्याम्यहंपश्चात्त्वमन्वेहिधनुर्धरः ॥ आवयोर्मध्यगासीतामायेवात्मपरात्मनोः ॥ १३ ॥

मतयः ॥ ९ ॥ झिल्लीझंकारोझिल्लीशब्दः ॥ १० ॥ ११ ॥ सहितेनयुवाभ्यांमिलितेनगंतव्यमित्युक्तमितिशेषः दधत्आदधदित्यर्थः॥ १२॥ साहित्यङ्कारमेवाह अयइति आत्मपरात्मनोर्जीवेशयोर्मध्यगाआश्रयत्वविषयत्वाभ्यांसंबद्धामायेवेत्यर्थः ॥ १३ ॥

दृष्टमपशकुनैःसूचितम् ॥ ननुशकुनादिषुकोविश्वासस्तत्राह श्रुतपूर्वमिति दंडकारण्येपूर्वमृषीणांमुखात्श्रुतंरक्षोभयंविद्यतेशकुनैश्चतन्निश्चितमित्यर्थः ॥१४॥ कह्लारशीतोदकादियुक्तापुष्करिणीतत्रास्ते ॥ १५ ॥ साशोभमानातैर्व्यदृश्यतेत्यर्थः ॥ १६ ॥ महासत्त्वंमहाशरीरंप्राणिनम् ॥ १७ ॥ करालदंष्ट्रायुतंवदनंयस्य

चक्षुश्चारयसर्वत्रदृष्टंरक्षोभयंमहत् ॥ विद्यतेदंडकारण्येश्रुतपूर्वमरिंदम ॥ १४ ॥ इत्येवंभाषमाणौतौजग्मतुःसार्धयोजनम् ॥ तत्रैकापुष्करिण्यास्तेकह्लारकुमुदोत्पलैः ॥ १५ ॥ अंबुजैःशीतलोदेनशोभमानाव्यदृश्यत ॥ तत्समीपमथोगत्वापीत्वातत्सलिलंशुभम् ॥ १६ ॥ ऊषुस्तेसलिलाभ्याशेक्षणंछायामुपाश्रिताः ॥ ततोददृशुरायांतंमहासत्त्वंभयानकम् ॥ १७ ॥ करालदंष्ट्रवदनंभीषयंतंस्वगर्जितैः ॥ वामांसेन्यस्तशूलाग्रग्रथितानेकमानुषम् ॥ १८ ॥ भक्षयंतंगजव्याघ्रमहिषंवनगोचरम् ॥ ज्यारोपितंधनुर्धृत्वारामोलक्ष्मणमब्रवीत् ॥ १९ ॥ पश्यभ्रातर्महाकायोराक्षसोऽयमुपागतः ॥ आयात्यभिमुखंनोऽग्रेभीरूणांभयमावहन् ॥ २० ॥ सज्जीकुरुधनुस्तिष्ठमाभैर्जनकनंदिनि ॥ उत्युक्त्वाबाणमादायस्थितोरामइवाचलः ॥ २१ ॥ सतुदृष्ट्वारमानाथंलक्ष्मणंजानकींतदा ॥ अट्टहासंततःकृत्वाभीषयन्निदमब्रवीत् ॥ २२ ॥ कौयुवांबाणतूणीरजटावल्कलधारिणौ ॥ मुनिवेषधरौबालौस्त्रीसहायौसुदुर्मदौ ॥ २३ ॥ सुंदरौबतमेवक्त्रप्रविष्टकवलोपमौ ॥ किमर्थमागतौघोरंवनंव्यालनिषेवितम् ॥ २४ ॥

तत् वामांसेवामस्कंधेन्यस्तशूलाग्रेग्रथिताअनेकमानुषायेनतत् ॥ १८ ॥ गजव्याघ्रमहिषमितिसमाहारद्वंद्वः ज्याआरोपितायस्मिन्तत् ॥ १९ ॥ अग्रेसंमुखदेशेवर्तमानोऽस्मदभिमुखमायाति भीरूणांभयमावहन्नित्यनेननास्माकंभयमितिध्वनितम् ॥ २० ॥ अचलइवरामःस्थितइत्यन्वयः ॥ २१ ॥ २२ ॥ २३ ॥ वक्त्रप्रविष्टकवलोपमावित्यनेनसुकरवधत्वंध्वनयति व्यालादुष्टाहिंस्रजीवाः ॥ २४ ॥

॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ जीवितुमिच्छास्तियुवयोरितिशेषः शीघ्रंपलायतं नोचेद्भक्षयामीत्यन्वयः ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ सर्पइवेति उर

श्रुत्वारक्षोवचोरामःस्मयमानउवाचतम् ॥ अहंरामस्त्वयंभ्रातालक्ष्मणोममसंमतः ॥ २५ ॥ एषासीताममप्राणवल्लभावयमागताः ॥ पितृवाक्यंपुरस्कृत्यशिक्षणार्थंभवादृशाम् ॥ २६ ॥ श्रुत्वातद्रामवचनमट्टहासमथाकरोत् ॥ व्यादायवक्त्रंबाहुभ्यांशूलमादायसत्वरः ॥ २७ ॥ मांनजानासिरामत्वंविराधंलोकविश्रुतम् ॥ मद्भयान्मुनयःसर्वेत्यक्त्वावनमितोगताः ॥ २८ ॥ यदिजीवितुमिच्छास्तित्यक्त्वासीतांनिरायुधौ ॥ पलायतंनचेच्छीघ्रंभक्षयामियुवामहम् ॥ २९ ॥ इत्युक्त्वाराक्षसःसीतामादातुमभिदुद्रुवे ॥ रामश्चिच्छेदतद्बाहूशरेणप्रहसन्निव ॥ ३० ॥ ततःक्रोधपरीतात्माव्यादायविकटंमुखम् ॥ राममभ्यद्रवद्रामश्चिच्छेदपरिधावतः ॥ ३१ ॥ पदद्वयंविराधस्यतदद्भुतमिवाभवत् ॥ ३२ ॥ ततःसर्पइवास्येनग्रसितुंराममापतत् ॥ ततोऽर्धचंद्राकारेणबाणेनास्यमहच्छिरः ॥ ३३ ॥ चिच्छेदरुधिरौघेणपपातधरणीतले ॥ ततःसीतासमालिंग्यप्रशशंसरघूत्तमम् ॥ ३४ ॥ ततोदुंदुभयोनेदुर्दिविदेवगणेरिताः ॥ ननृतुश्चाप्सराहृष्टाजगुर्गंधर्वकिन्नरा. ॥ ३५ ॥ विराधकायादतिसुंदराकृतिर्विभ्राजमानोविमलांबरावृतः ॥ प्रतप्तचामीकरचारुभूषणोव्यदृश्यताग्रेगगनेरविर्यथा ॥ ३६ ॥ प्रणम्यरामंप्रणतार्तिहारिणंभवप्रवाहोपरमंघृणाकरम् ॥ प्रणम्यभूयःप्रणनामदंडवत्प्रपन्नसर्वार्तिहरंप्रसन्नधीः ॥ ३७ ॥

सैवेतिभावः ॥ ३३ ॥ रुधिरौघेणसहतच्छिरोभूतलेपपातेत्यन्वयः ॥ ३४ ॥ ३५ ॥ विराधकायान्निःसृतइतिशेषः विमलांबरंनिर्मलवस्त्रंतेनावृतः चामीकरंसुवर्णं ॥ ३६ ॥ भवप्रवाहस्यसंसारप्रवाहस्योपरमोनाशोयस्मात्तं घृणायाःदयायाःआकरमुत्पत्तिस्थानं प्रपन्नानांशरणागतानांसर्वपीडानाशकं ॥ ३७ ॥

राजीवंकमलं अकारणकोपमूर्तिनानिर्निमित्तकोप मूर्तिना ॥ ३८ ॥ मेकर्णपुटंत्वदीयंकथामृतंपात्वित्यन्वयः पिबतुसादरंश्टणोत्वित्यर्थः पिबादेशाभावआर्षः
॥ ३९ ॥ एवंमदंगजा तंसर्वंभवदीयमेवास्तु भवत्सेवापरमेवास्त्वित्यर्थः ॥ ४० ॥ आत्मनिस्वस्वरूपेआरमतेतस्मैसर्वदातदनुसंधानवतेइत्यर्थः ॥ ४१ ॥ इदानीं

विराधउवाच ॥ श्रीरामराजीवदलायताक्षविद्याधरोऽहंविमलप्रकाशः ॥ दुर्वाससाऽकारणकोपमूर्तिनाशप्तःपुरासोऽ
घविमोचितस्त्वया ॥ ३८ ॥ इतःपरंत्वच्चरणारविंदयोःस्मृतिःसदामेऽस्तुभवोपशांतये ॥ त्वन्नामसंकीर्तनमेववाणीक
रोतुमेकर्णपुटंत्वदीयम् ॥ ३९ ॥ कथामृतंपातुकरद्वयंतेपादारविंदार्चनमेवकुर्यात् ॥ शिरश्चतेपादयुगप्रणामंकरोतुनि
त्यंभवदीयमेवम् ॥ ४० ॥ नमस्तुभ्यंभगवतेविशुद्धज्ञानमूर्तये ॥ आत्मारामायरामायसीतारामायवेधसे ॥ ४१ ॥ प्रप
न्नंपाहिमांरामयास्यामित्वदनुज्ञया ॥ देवलोकंरघुश्रेष्ठमायामांमावृणोतुते ॥ ४२ ॥ इतिविज्ञापितस्तेनप्रसन्नोरघुनं
दनः ॥ ददौवरंतदाप्रीतोविराधायमहामतिः ॥ ४३ ॥ गच्छविद्याधराशेषमायादोषगुणाजिताः ॥ त्वयामद्दर्शनात्सद्योमुक्तो
ज्ञानवतांवरः ॥ ४४ ॥ मद्भक्तिर्दुर्लभालोकेजाताचेन्मुक्तिदायतः ॥ अतस्त्वंभक्तिसपन्नःपरंयाहिममाज्ञया ॥ ४५ ॥
रामेणरक्षोनिधनंसुघोरंशापाद्विमुक्तिर्वरदानमेवम् ॥ विद्याधरत्वंपुनरेवलब्धंरामंगृणन्नेतिनरोऽखिलार्थान् ॥ ४६ ॥
इतिश्री० राम० उ० अरण्यकांडेप्रथमःसर्गः ॥ १ ॥ ॥ छ ॥ ॥ छ ॥

प्रार्थयते मायेत्यादि ॥ ४२ ॥ ४३ ॥ अशेषामायादोषरूपालोकेगुणास्तत्त्वेनलोकेप्रसिद्धास्त्वयामद्दर्शनाज्जिताःअथत्वंज्ञानवतांवरोभूत्वामुक्तोभविष्यसीति
शेषः ॥ ४४ ॥ परंमोक्षंयाहिप्राप्नुहि ॥ ४५ ॥ रामेणरक्षोनिधनंकृतंतेननिधनेनतस्यरक्षसःशापाद्विमुक्तिःकृता तस्यैवंवरदानंचकृतं यतस्तेनपुनरेवविद्याधरत्वं
लब्धं अतोरामंगृणन्नरोऽखिलार्थानेतिप्राप्नोति ॥ ४६ ॥ ॥ इतिश्रीमत्सकलराजवि०अ०सेतौअरण्यकांडेप्रथमःसर्गः ॥ १ ॥ ॥ ॥ छ ॥

विराधेइति ॥ १ ॥ आयातमागतम् ॥ २ ॥ अभिगम्यसंमुखागमनपूर्वकंतमानीयउपवेशयत् अडभावआर्षः ॥ ३ ॥ आसंस्थितः तपसेतपःकर्तुंकृतनिश्च
यः ॥ ४ ॥ तवसंदर्शनाकांक्षीइहैवासमितिपूर्वेणान्वयः यतस्त्वंपरमेश्वरः मोक्षदः ॥ ५ ॥ विरक्तःसन्शोभनंपुण्यंहिंसारहितत्वात्तपस्तत्फलंरामस्यसमर्प्य

विराधेस्वर्गतेरामोलक्ष्मणेनचसीतया ॥ जगामशरभंगस्यवनंसर्वसुखावहम् ॥ १ ॥ शरभंगस्ततोदृष्ट्वारामंसौमित्रि
णासह ॥ आयातंसीतयासार्धंसंभ्रमादुत्थितःसुधीः ॥ २ ॥ अभिगम्यसुसंपूज्यविष्टरेषूपवेशयत् ॥ आतिथ्यमकरो
त्तेषांकंदमूलफलादिभिः ॥ ३ ॥ प्रीत्याहशरभंगोपिरामंभक्तपरायणम् ॥ बहुकालमिहैवासंतपसेकृतनिश्चयः ॥ ४ ॥
तवसंदर्शनाकांक्षीरामत्वंपरमेश्वरः ॥ अद्यमत्तपसासिद्धंयत्पुण्यंबहुविद्यते ॥ तत्सर्वंतवदास्यामिततोमुक्तिंव्रजाम्यह
म् ॥ ५ ॥ समर्प्यरामस्यमहत्सुपुण्यफलंविरक्तःशरभंगयोगी ॥ चितिंसमारोहयदप्रमेयंरामंससीतंसहसाप्रणम्य ॥ ६ ॥
ध्यायंश्चिरंराममशेषहृत्स्थंदूर्वादलश्यामलमंबुजाक्षम् ॥ चीरांबरंस्निग्धजटाकलापंसीतासहायंसहलक्ष्मणंतम् ॥ ७ ॥
कोवादयालुःस्मृतकामधेनुरन्योजगत्यांरघुनायकादहो ॥ स्मृतोमयानित्यमनन्यभाजाज्ञात्वास्मृतिंमेस्वयमेवयातः
॥ ८ ॥ पश्यत्विदानींदेवेशोरामोदाशरथिःप्रभुः ॥ दग्ध्वास्वदेहंगच्छामिब्रह्मलोकमकल्मषः ॥ ९ ॥ अयोध्याधिपतिर्मे
ऽस्तुहृदयेराघवःसदा ॥ यद्वामांकेस्थितासीतामेघस्येवतडिल्लता ॥ १० ॥ इतिरामंचिरंध्यात्वादृष्ट्वाचपुरतःस्थितम् ॥ प्र
ज्वाल्यसहसावह्निंदग्ध्वापंचात्मकंवपुः ॥ ११ ॥

दत्वासहसातत्क्षणमेवचितिंसमारोहयत्समारुहत् निवृत्तप्रेषणाण्णिच् ॥ ६ ॥ अशेषहृत्स्थंसर्वांतर्यामिणम् सहलक्ष्मणम् समस्तत्वेऽपिवोपसर्जनस्येतिसादे
शाभावः ॥ ७ ॥ स्मृतकामधेनुःस्मृतःसन्कामधेनुस्तत्तुल्यः सर्वमनोरथपूरकत्वात् यातः आगतः ॥ ८ ॥ ब्रह्मलोकंउपासकत्वान्मोक्षद्वारभूतम् ॥ ९ ॥ १० ॥
पुरतःस्थितंदृष्ट्वातादृशमेवहृदयेध्यात्वाच ॥ ११ ॥

लोकपतेःकार्यब्रह्मणःहिरण्यगर्भस्य शरभंगनिवेशनंतदाश्रममाजग्मुरित्यन्वयः ॥ १२ ॥ भूमौदंडवत्पतिताःप्रणेमुः ॥ १३ ॥ १४ ॥ लक्ष्मणंशेषांशमित्यन्व
यः ॥ १५ ॥ अतःभूमिदुःखहरणार्थमवतीर्णत्वात्आदौखरादिवधेनास्मद्दुःखंमोक्तुमर्हसि ॥ १६ ॥ सुमित्रासुतजानकीभ्यांसहवनानिद्रष्टुमागच्छ तदातद्द

दिव्यदेहधरःसाक्षाद्ययौलोकपतेःपदम् ॥ ततोमुनिगणाःसर्वेदंडकारण्यवासिनः ॥ आजग्मूराघवंद्रष्टुंशरभंगनिवेश
नम्॥ १२॥ दृष्ट्वामुनिसमूहंतंजानकीरामलक्ष्मणाः॥प्रणेमुःसहसाभूमौमायामानुषरूपिणः॥ १३॥ आशीर्भिरभि
नंद्याथरामंसर्वहृदिस्थितम्॥ ऊचुःप्रांजलयःसर्वेधनुर्बाणधरंहरिम्॥ १४॥ भूमेर्भारावतारायजातोऽसिब्रह्मणाऽर्थि
तः॥ जानीमस्त्वांहरिंलक्ष्मींजानकींलक्ष्मणंतथा॥ १५॥ शेषांशंशंखचक्रेद्वेभरतंसानुजंतथा॥ अतश्चादौऋषीणां
त्वंदुःखंमोक्तुमिहार्हसि ॥ १६॥ आगच्छयामोमुनिसेवितानिवनानिसर्वाणिरघूत्तमक्रमात्॥ द्रष्टुंसुमित्रासुतजा
नकीभ्यांतदादयास्मासुदृढाभविष्यति ॥ १७॥इतिविज्ञापितोरामःकृतांजलिपुटैर्विभुः॥ जगाममुनिभिःसार्धंद्रष्टुंमु
निवनानिसः॥ १८॥ ददर्शतत्रपतितान्यनेकानिशिरांसिसः॥ अस्थिभूतानिसर्वत्ररामोवचनमब्रवीत्॥ १९॥ अ
स्थीनिकेषामेतानिकिमर्थंपतितानिवै॥तमूचुर्मुनयोरामऋषीणांमस्तकानिहि॥ २०॥ राक्षसैर्भक्षितानीशप्रमत्तानां
समाधितः॥ अंतरायंमुनीनांतेपश्यंतोऽनुचरंतिहि॥ २१॥ श्रुत्वावाक्यंमुनीनांसभयदैन्यसमन्वितम्॥ प्रतिज्ञामकरो
द्रामोवधायाशेषरक्षसाम्॥ २२॥

र्शनेसति ॥ १७ ॥ १८ ॥ अस्थिभूतानिअतिशुष्काणि ॥ १९ ॥ २० ॥ समाधितःसमाधिना प्रमत्तानांतद्दर्शनेपलायनाद्यसमर्थानाम् अंतरायंसमाधि
रूपम् अप्रायत्यमितिपाठे समाधितःप्रमत्तानांहीनानांत्यक्तसमाधीनामित्यर्थः अप्रायत्यंसमाधित्यागरूपम् समाधौहिभगवदेकरूपत्वाद्रक्षांसिनास्कंदंतीति
भावः ॥ २१ ॥ २२ ॥

॥ २३ ॥ २४ ॥ सर्वैर्ऋतुगुणैःसंपन्नत्वादेवसर्वकालेसुखजनकम् ॥२५॥ भक्त्याप्रेम्णाउत्कंठितेरामस्यपुनःपुनर्दर्शनेच्छावतीलोचनेयस्यसः ॥२६॥ हेऽभिराम परमसुंदररामत्वन्मंत्रजापीअहंसततंतवदासदासोभूयामितिशेषः अप्रमेयदेशकालापरिच्छेद्य शिवब्रह्मसमाश्रितचरण संसारसमुद्रतरणेऽमलपोतरूपौपादौयस्य

यमानःसदातत्रमुनिभिर्वनवासिभिः॥ जानक्यासहितोरामोलक्ष्मणेनसमन्वितः ॥ २३ ॥ उवासकतिचित्तत्रवर्षाणिरघुनंदनः॥ एवंक्रमेणसंपश्यन्नृषीणामाश्रमान्विभुः॥ २४ ॥ सुतीक्ष्णस्याश्रमंप्रागात्प्रख्यातमृषिसंकुलम्॥ सर्वर्तुगुणसंपन्नंसर्वकालसुखावहम्॥ २५ ॥ राममागतमाकर्ण्यसुतीक्ष्णःस्वयमागतः॥ अगस्त्यशिष्योरामस्यमंत्रोपासनतत्परः॥ विधिवत्पूजयामासभक्त्युत्कंठितलोचनः॥ २६ ॥ सुतीक्ष्णउवाच॥ त्वन्मंत्रजाप्यहमनंतगुणाप्रमेयसीतापतेशिवविरिंचिसमाश्रितांघ्रे॥ संसारसिंधुतरणामलपोतपादरामाभिरामसततंतवदासदासः॥ २७॥ मामद्यसर्वजगतामविगोचरस्त्वंत्वन्माययासुतकलत्रगृहांधकूपे ॥ मग्नंनिरीक्ष्यमलपुद्गलपिंडमोहपाशानुबद्धहृदयंस्वयमागतोऽसि॥ २८ ॥ त्वंसर्वभूतहृदयेषुकृतालयोऽपित्वन्मंत्रजाप्यविमुखेषुतनोषिमायाम्॥ त्वन्मंत्रसाधनपरेष्वपयातिमायासेवानुरूपफलदोऽसियथामहीपः॥ २९॥

त्वच्चरणाश्रितानांसंसारसागरोत्तरणमकिंचित्करमेवेतिभावः ॥ २७ ॥ सर्वजगतामगोचरोऽपित्वंमलभूतोयःपुद्गलपिंडःशरीरंतत्रयोमोहः अहंगौरइत्याद्यहंताबुद्धिस्तद्रूपपाशेनानुबद्धंचित्तंयस्यतंमांअद्यत्वन्माययासुतकलत्रगृहरूपेंऽधकूपेनिमग्नंनिरीक्ष्यस्वयमागतोऽसिइत्याश्चर्यम् तेनकरुणावत्त्वमित्याशयः ॥ २८ ॥ जाप्यंजपस्तद्विमुखेषु यथामहीपोराजासेवानुरूपफलदस्तथात्वमसीत्यर्थः ॥ २९ ॥

विश्वसृष्ट्यादिहेतुस्त्वमेकएव त्रिगुणयामाययोपाधिभूतयात्वमेवविधिरितिईशःशिवइतिविष्णुरितिभासीत्यन्वयः विविधाकृतिस्त्वम् तत्तद्ध्यानादौप्रसिद्धमेवतेषांतथात्वम् तच्चेदमनेकत्वंतवमिथ्यैवेत्याह यद्वदिति ॥ ३० ॥ तमसःपरतःतद्धीनेशुद्धसत्त्वप्रधानेचित्तेस्थितस्येत्यर्थः ॥ दृग्रूपतःदृग्रूपस्यदृष्टेरित्यर्थःसार्वविभक्तिकस्तसिः प्रसन्नःदृग्विषयोभवसीतिशेषः ॥ ३१ ॥ अरूपिणःअरूपस्यापि छांदसइनिः मायाविडंबनेनमायाव्यवहारेणकृतम् स्पष्टमन्यत् ॥ ३२ ॥ निय

विश्वस्यसृष्टिलयसंस्थितिहेतुरेकस्त्वंमाययात्रिगुणयाविधिरीशविष्णू ॥ भासीशमोहितधियांविविधाकृतिस्त्वंयद्वद्रविःसलिलपात्रगतोह्यनेकः॥ ३० ॥ प्रत्यक्षतोऽद्यभवतश्चरणारविंदंपश्यामिरामतमसःपरतःस्थितस्य ॥ दृग्रूपतस्त्वमसतामविगोचरोऽपित्वन्मंत्रपूतहृदयेषुसदाप्रसन्नः॥ ३१ ॥ पश्यामिरामतवरूपमरूपिणोऽपिमायाविडंबनकृतंसुमनुष्यवेषम् ॥ कंदर्पकोटिसुभगंकमनीयचापबाणंदयार्द्रहृदयंस्मितचारुवक्त्रम् ॥ ३२ ॥ सीतासमेतमजिनांबरमप्रधृष्यंसौमित्रिणानियतसेवितपादपद्मम् ॥ नीलोत्पलद्युतिमनंतगुणंप्रशांतंतद्भागधेयमनिशंप्रणमामिरामम् ॥ ३३ ॥ जानंतुरामतवरूपमशेषदेशकालाद्युपाधिरहितंघनचित्प्रकाशम् ॥ प्रत्यक्षतोऽद्यममगोचरमेतदेवरूपंविभातुहृदयेनपरंविकांक्षे॥ ३४॥ इत्येवंस्तुबतस्तस्यरामःसस्मितमब्रवीत् ॥ मुनेजानामितेचित्तंनिर्मलंमदुपासनात् ॥ ३५ ॥ अतोऽहमागतोद्रष्टुंमदृतेनान्यसाधनम् ॥ मन्मंत्रोपासकालोकेमामेवशरणंगताः॥ ३६ ॥ निरपेक्षानान्यगतास्तेषांदृश्योऽहमन्वहम् ॥ स्तोत्रमेतत्पठेद्यस्तुत्वत्कृतंमत्प्रियंसदा ॥ ३७ ॥

तसेवितेति नियमेनसेवितेत्यर्थः मद्भागधेयंमददृष्टारब्धंशरीरमितियावत् अनेनशरीराणांपरादृष्टमात्रजन्यत्वंसूचितम् ॥ ३३ ॥ जानंतुअन्येऽपियोगिनइतिशेषः देशेत्यादि देशकालाद्यपरिच्छिन्नमित्यर्थः घनेति चैतन्यमात्ररूपमित्यर्थःप्रत्यक्षतइति ॥ ममतुपरिदृश्यमानेत्रैवप्रीतिर्नतुपरेवाङ्मनसागोचरेइत्यर्थः ॥३४॥ ॥ ३५ ॥ मदृतेमद्भक्तिंविनेत्यर्थःतलोपश्छांदसः अन्यत्साधनम् तदेवाह मन्मंत्रेत्यादिना ॥ ३६ ॥ ३७ ॥

तस्यमेमयिसद्भक्तिःसतीभक्तिर्भवेत् ॥ ३८ ॥ ३९ ॥ चिराद्दृष्टोमयापीतिशेषः ॥ ४० ॥ अगस्त्यसंभाषणेलोलमत्युत्कटेच्छावन्मानसंयस्यइत्यर्थः ॥ ४१ ॥
॥ इतिश्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिबिरुदावलीविराजमानस्यहिम्मतिवर्मणःपुत्रस्यश्रीरामवर्मणःकृतौअध्यात्मरामायणसेतौअरण्यकांडेद्वितीयःस

सद्भक्तिर्मेभवेत्तस्यज्ञानंचविमलंभवेत्॥त्वंममोपासनादेवविमुक्तोऽसीहसर्वतः॥ ३८ ॥ देहांतेममसायुज्यंलप्स्यसे
नात्रसंशयः॥गुरुंतेद्रष्टुमिच्छामित्यगस्त्यंमुनिनायकम्॥ किंचित्कालंतत्रवस्तुंमनोमेत्वरयत्यलम्॥३९॥ सुतीक्ष्णोऽ
पितथेत्याहश्वोगमिष्यसिराघव॥ अहमप्यागमिष्यामिचिराद्दृष्टोमहामुनिः॥ ४० ॥ अथप्रभातेमुनिनासमेतोरामःस
सीतःसहलक्ष्मणेन॥अगस्त्यसंभाषणलोलमानसःशनैरगस्त्यानुजमंदिरंययौ॥४१॥इतिश्रीमदध्यात्मरामायणेउमा
महेश्वरसंवादेअरण्यकांडेद्वितीयःसर्गः॥ २ ॥ ॥छ॥ ॥अथरामःसुतीक्ष्णेनजानक्यालक्ष्मणेनच॥ अगस्त्यस्यानु
जस्थानंमध्याह्नेसमपद्यत॥ १ ॥तेनसंपूजितःसम्यग्भुक्त्वामूलफलादिकम्॥ परेद्युःप्रातरुत्थायजग्मुस्तेऽगस्त्यमंडलम्
॥२॥ सर्वर्तुफलपुष्पाढ्यंनानामृगगणैर्युतम्॥ पक्षिसंघैश्चविविधैर्नादितंनंदनोपमम्॥३॥ ब्रह्मर्षिभिर्देवर्षिभिःसेवितंमु
निमंदिरैः॥ सर्वतोऽलंकृतंसाक्षाद्ब्रह्मलोकमिवापरम्॥ ४ ॥ बहिरेवाश्रमस्याथस्थित्वारामोऽब्रवीन्मुनिम्॥ सुतीक्ष्णग
च्छत्वंशीघ्रमागतंमांनिवेदय॥५॥ अगस्त्यमुनिवर्यायसीतयालक्ष्मणेनच॥ महाप्रसादइत्युक्त्वासुतीक्ष्णःप्रययौगुरोः
॥६॥ आश्रमंत्वरयातत्रऋषिसंघसमावृतम्॥ उपविष्टंरामभक्तैर्विशेषेणसमायुतम्॥७॥

र्गः ॥ २ ॥ ॥ छ ॥ ॥ अथेति अगस्त्यानुजोऽग्निजिह्वनामाऋषिः ॥ १ ॥ अगस्त्यमंडलंतदाश्रमम् ॥ २ ॥ ३ ॥ देवर्षिभिरितिच्छंदोभंगआर्षः मुनिमंदिरैःसर्व
तोलंकृतमित्यन्वयः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

व्याख्यातोराममंत्रार्थोयेनतम् प्रययौ मुनेःसमीपमितिशेषः ॥ ८ ॥ ९ ॥ कांक्षमाणःतमेवेत्यनुकर्षः ॥ १० ॥ ११ ॥ १२ ॥ सीतयेत्यादेःसहेतिशेषः॥ १३ ॥

व्याख्यातराममंत्रार्थंशिष्येभ्यश्चातिभक्तितः॥ दृष्ट्वागस्त्यंमुनिश्रेष्ठंसुतीक्ष्णःप्रययौमुनेः ॥ ८ ॥ दंडवत्प्रणिपत्याहविन
यावनतःसुधीः॥ रामोदाशरथिर्ब्रह्मन्सितयालक्ष्मणेनच॥ ९ ॥ आगतोदर्शनार्थंतेबहिस्तिष्ठतिसांजलिः ॥ अगस्त्यउ
वाच॥ शीघ्रमानयभद्रंतेरामंममहृदिस्थितम्॥ तमेवध्यायमानोऽहंकांक्षमाणोऽत्रसंस्थितः॥ १० ॥ इत्युक्त्वास्वयमु
त्थायमुनिभिःसहितोद्रुतम्॥ अभ्ययात्परयाभक्त्यागत्वाराममथाब्रवीत्॥ ११॥आगच्छरामभद्रंतेदिष्ट्यातेऽद्यसमाग
मः॥ प्रियातिथिर्ममप्राप्तोस्यद्यमेसफलंदिनम्॥ १२ ॥ रामोऽपिमुनिमायांतंदृष्ट्वाहर्षसमाकुलः॥ सीतयालक्ष्मणेनापि
दंडवत्पतितोभुवि॥ १३॥ द्रुतमुत्थाप्यमुनिराड्राममालिंग्यभक्तितः॥ तद्गात्रस्पर्शजाह्लादस्रवन्नेत्रजलाकुलः॥ १४॥
गृहीत्वाकरमेकेनकरेणरघुनंदनम् ॥ जगामस्वाश्रमंहृष्टोमनसामुनिपुंगवः॥ १५॥ सुखोपविष्टंसंपूज्यपूजयाबहुवि
स्तरम्॥भोजयित्वायथान्यायंभोज्यैर्वन्यैरनेकधा॥ १६॥ सुखोपविष्टमेकांतेरामंशशिनिभाननम् ॥ कृतांजलिरुवा
चेदमगस्त्योभगवानृषिः ॥ १७ ॥ त्वदागमनमेवाहंप्रतीक्षन्समवस्थितः ॥ यदाक्षीरसमुद्रांतेब्रह्मणाप्रार्थितःपुरा
॥१८॥ भूमेर्भारापनुत्त्यर्थंरावणस्यवधायच॥ तदादिदर्शनाकांक्षीतवरामतपश्चरन्॥ वसामिमुनिभिःसार्धंत्वामेव
परिचिंतयन्॥ १९ ॥

तद्गात्रस्पर्शजाह्लादेनस्रवद्यन्नेत्रजलंतेनाकुलः ॥ १४ ॥ रघुनंदनंरघुनंदनस्येत्यर्थः ॥ १५ ॥ वन्यैर्भोज्यैर्भोजयित्वेत्यन्वयः ॥ १६ ॥ १७ ॥ १८ ॥ हेरामत
वदर्शनाकांक्षीतपश्चरन् तदादितःकालमारभ्यवसामीत्यन्वयः ॥ १९ ॥

स्रष्टेःप्रागेकएवासीर्निर्विकल्पोऽनुपाधिकः ॥ त्वदाश्रयात्वद्विषयामायातेशक्तिरुच्यते ॥ २० ॥ त्वामेवनिर्गुणंशक्तिरावृणोतियदातदा ॥ अव्याकृतमितिप्राहुर्वेदांतपरिनिष्ठिताः ॥ २१ ॥ मूलप्रकृतिरित्येकेप्राहुर्मायेतिकेचन ॥ अविद्यासंस्मृतिर्बंधइत्यादिबहुधोच्यते ॥ २२ ॥ त्वयासंक्षोभ्यमाणासामहत्तत्त्वंप्रसूयते ॥ महत्तत्त्वादहंकारस्त्वयासंचोदिताद्भूत् ॥ २३ ॥ अहंकारोमहत्तत्त्वसंवृतस्त्रिविधोभवत् ॥ सात्त्विकोराजसश्चैवतामसश्चेतिभण्यते ॥ २४ ॥

अथभगवत्स्वरूपंशिष्यान्बोधयितुमन्यथात्वशंकावारणायभगवदग्रएवाह स्रष्टेःप्रागिति त्वमेकएवासीः निर्विकल्पःविकल्परूपसकलप्रपंचहीनःतत्रहेतुः अनुपाधिकइति उपाध्यसंबद्धइत्यर्थः ननुकिंसर्वथोपाधिर्नास्त्येवेतिनेत्याह त्वदिति अस्त्येवसापरंतुस्वकल्पितत्वत्संबंधहीनासा अतस्त्वमनुपाधिकइत्याशयः ॥ २० ॥ अथस्रष्टिमुपक्रमते त्वामिति त्वांनिर्गुणमेवसंतंयदासाशक्तिःस्वकल्पितसंबंधेनत्वामावृणोतित्वत्संबंधामात्मानंमनुते नतुकदाचिदपित्वंतत्संबंधमात्मानंमनुषेअतोनिर्गुणमेवेत्युक्तम् तदातांमायामव्याकृतमित्याहुः ॥ २१ ॥ तस्यास्तदवस्थायांनामांतराण्यप्याह मूलप्रकृतिरित्यादि तदुक्तंकपिलेन मूलप्रकृतिरविकृतिरित्यादिना ॥ २२ ॥ सात्वत्संबंधामात्मानंमन्वानाअतएवत्वयासंक्षोभ्यमाणा संक्षोभश्चात्रतत्कल्पितसंबंधएवेतिबोध्यम् महत्तत्त्वमिति सविकारात्प्रधानात्तुमहत्तत्त्वमजायत महानितियतःख्यातिर्लोकानांजायतेसदेतिस्मृतेः निश्चयोऽस्यसाधारणीवृत्तिः एतदभिमानिनिहिरण्यगर्भेऽपिमहानितिशब्दः सर्वेषांस्वस्वबुद्धिरूपाः प्रतिनियतोपाधयश्चास्यैवमहत्तत्त्वस्यांशा अस्यानेकबुद्धिमंडलरूपत्वादितिबोध्यम् त्वयासंचोदितात्प्रेरितान्महतत्त्वादहंकारोऽभूत् सचाहंममेत्यभिमानवृत्तिकमंतःकरणद्रव्यम् अहंकारोऽभिमानश्चकर्तामंताचसस्मृतइतिकौर्मोक्तेः अभिमानोऽभिमानवृत्तिकइत्यर्थः ॥ २३ ॥ महत्तत्वसंवृतस्तदुपादानकत्वात् यथाघटोमृदा सत्वाद्युपाधिकत्वेनत्रैविध्यम् मूलप्रकृतेस्त्रिगुणत्वेनतत्कार्यत्वान्महत्तत्त्वस्यत्रिगुणत्वं सात्त्विकोराजसश्चैवतामसश्चत्रिधामहानितिस्मृतेः तत्कार्यत्वाच्चाहंकारस्यत्रैविध्यम् एवमग्रेऽपिबोध्यम् ॥ २४ ॥

सूक्ष्मतन्मात्राणिशब्दस्पर्शरूपरसगंधतन्मात्राणि अतःसूक्ष्मतन्मात्रेभ्यःस्थूलानिभूतानि तत्र शब्दतन्मात्रादाकाशम् स्पर्शतन्मात्रात्पूर्वसहिताद्वायुः ताभ्यांसहिताद्रूपतन्मात्रात्तेजः तैःसहिताद्रसतन्मात्राज्जलम् एतैःसहिताद्गंधतन्मात्रात्पृथिवीत्याद्यस्मद्गुरुकृतसांख्यतंत्रवृत्तौविस्तरः तदेवाह क्रमोत्तरगुणानीति क्रमेणाधिकगुणानि आकाशंशब्दमात्रगुणम् वायुःशब्दस्पर्शगुणः तेजःशब्दस्पर्शरूपगुणम् जलंशब्दस्पर्शरूपरसगुणम् भूःशब्दस्पर्शरूपरसगंधगुणेति ॥ २५ ॥ राजसादहंकारादिंद्रियाणिराजसाहंकारोपादानकानीत्यर्थः तानिचवाक्पाणिपादपायूपस्थरूपाणिकर्मेंद्रियाणिपंच चक्षुःश्रोत्रत्वग्रसनघ्राणाख्यानिज्ञानेंद्रियाणिपंचेत्येवंदश वचनादानविहरणानंदोत्सर्गाश्चकर्मेंद्रियाणांवृत्तयः ज्ञानेंद्रियाणांचसविकल्पकनिर्विकल्पकोभयरूपज्ञानरूपावृत्तिः तत्रनिर्विकल्पकंकिंचिदिदमितिज्ञानम् देवतामनश्चसात्त्विकाःसात्त्विकाहंकारोपादानाइत्यर्थः देवताइंद्रियदेवताः ताश्चचक्षुषोरविः श्रोत्रस्यदिक् त्वचोवायुः रसनस्यवरुणः घ्राणस्याश्विनौ वाचोग्निः पाण्योरिंद्रः पादयोरुपेंद्रः पायोर्मित्रः उपस्थस्यकोब्रह्मेति मनइंद्रियमपिअवांतरत्वात्पृथगुक्तम् सूत्ररूपंप्राणादि क्रियाशक्तेःप्राणादेरेवसूत्रव्यवहारात् तदात्मकंहिरण्यगर्भरूपंलिंगंसर्वकार्यकर्तृत्वात्सर्वसूक्ष्मसमष्टिरूपमभवदित्यर्थः ॥ २६ ॥ ततोविराट् स्थूलसमष्टिरयम् तदाह स्थूलाद्भूतकदंबकादिति इदमिंद्रियादेरप्युपलक्षणम् तस्मादेवविराजःपुरुषात्सर्वंस्थावरंजंगमंचाभिव्यक्तमित्यर्थः ॥ २७ ॥ तत्रजंगममाह देवेत्यादि कालकर्मक्रमेण कालक्रमेणयथा हेमंतेव्रीहयोवसंतेयवादि कर्मक्रमेणकालसहकृतेनतिर्यन्मनुष्यदेवत्वप्राप्ति उपाधिभेदेनब्रह्मादिरूपोऽपित्वमेवेत्याह रजोगुणतःतद्रूपोपाधेः जगतः सर्वकारणंसर्वस्यजगतःकारणमित्यर्थः आर्षत्वात्समासः ॥ २८ ॥

तामसात्सूक्ष्मतन्मात्राण्यासन्भूतान्यतःपरम्॥ स्थूलानिक्रमशोरामक्रमोत्तरगुणानिह॥ २५ ॥ राजसानींद्रियाण्येवसात्त्विकादेवतामनः॥ तेभ्योऽभवत्सूत्ररूपंलिंगंसर्वगतंमहत्॥ २६॥ ततोविराट्समुत्पन्नःस्थूलाद्भूतकदंबकात्॥ विराजःपुरुषात्सर्वंजगत्स्थावरजंगमम् ॥ २७ ॥ देवतिर्यङ्मनुष्याश्चकालकर्मक्रमेणतु ॥ त्वंरजोगुणतोब्रह्माजगतःसर्वकारणम्॥ २८ ॥

अस्यलयेनाशनिमित्तंत्वमेवरुद्रस्तमउपाधिकइत्यर्थः एवंत्वन्मायायागुणभेदैःसत्त्वरजस्तमोभिरेवतत्तत्प्राधान्येनबुद्धेर्जाग्रदादयोवृत्तयइत्यर्थः त्वंत्वेतदवस्थात्रयरहितइत्याह तासामिति स्वप्नसुषुप्त्योरभावात्तत्प्रतिद्वंद्विजाग्रदवस्थायाअप्यभावइतिभावः ॥२९॥ ३०॥ सृष्टिलीलामित्युपलक्षणंस्थित्यादेरपि यदाईहसेइच्छसितदामायामंगीकरोषितत्कल्पितंतत्कृतसंबंधंमन्यसे तदावस्तुतोऽगुणोऽपिगुणवानिवाभासीतिशेषः॥ ३१ ॥तवमायैवसंसारस्यमोक्षस्यचदानेसमर्थेत्या

सत्वाद्विष्णुस्त्वमेवास्यपालकःसद्भिरुच्यते ॥ लयेरुद्रस्त्वमेवास्यत्वन्मायागुणभेदतः ॥ २९ ॥ जाग्रत्स्वप्नसुषुप्त्याख्या
वृत्तयोबुद्धिजैर्गुणैः॥ तासांविलक्षणोरामस्त्वंसाक्षीचिन्मयोऽव्ययः ॥ ३० ॥ सृष्टिलीलांयदाकर्तुमीहसेरघुनंदन॥ अं
गीकरोषिमायांत्वंतदावैगुणवानिव ॥ ३१ ॥ राममायाद्विधाभातिविद्याविद्येतितेसदा॥ प्रवृत्तिमार्गनिरताअविद्याव
शवर्तिनः॥ निवृत्तिमार्गनिरतावेदांतार्थविचारकाः ॥ ३२ ॥ त्वद्भक्तिनिरतायेचतेवैविद्यामयाःस्मृताः ॥ अविद्यावश
गायेतुनित्यंसंसारिणश्चते ॥ विद्याभ्यासरतायेतुनित्यमुक्तास्तएवहि ॥ ३३॥ लोकेत्वद्भक्तिनिरतास्त्वन्मंत्रोपासकाश्च
ये ॥ विद्याप्रादुर्भवेत्तेषांनेतरेषांकदाचन ॥ ३४ ॥ अतस्त्वद्भक्तिसंपन्नामुक्ताएवनसंशयः ॥ त्वद्भक्त्यमृतहीनानांमो
क्षःस्वप्नेऽपिनोभवेत् ॥ ३५ ॥ किंरामबहुनोक्तेनसारंकिंचिद्ब्रवीमिते ॥ साधुसंगतिरेवात्रमोक्षहेतुरुदाहृता॥ ३६॥

ह रामेति विद्यातत्त्वज्ञानम् अविद्यासंसारस्थूलकारणम् तदुक्तंमार्कंडेयेन साविद्यापरमामुक्तेर्हेतुभूतासनातनी संसारबंधहेतुश्चसैवसर्वेश्वरेश्वरीति ॥ ३२ ॥ विद्यामयाःतत्त्वज्ञानप्रधानाःसंतोऽपिप्रारब्धकर्मणोविक्षेपेणपुनःपुनस्तदनुसंधानवंतइत्यर्थः ॥ ३३ ॥ विद्याप्राप्तावसाधारणंहेतुमाह लोकइति॥ ३४ ॥ मुक्ताएव तेषांतत्त्वज्ञानस्यावश्यंभावित्वादितिभावः व्यतिरेकमप्याह त्वद्भक्तीति ॥ ३५ ॥ भक्तिरेवकथमितिचेत्तस्याअपिकिंचिद्धुमंकारणमस्तीत्याह किंरामेतितेइत्यस्यायतइतिशेषः स्वशिष्यविश्वासार्थंभवदयतएतदुक्तिः ॥ ३६ ॥

साधुस्वरूपज्ञानेएवतत्संगतिःशक्येत्यतस्तल्लक्षणमाह साधवइति समचित्ताःशत्रुमित्रयोरागद्वेषहीनचित्ताः अतएवनिःस्पृहाःरागद्वेषकारणीभूतस्पृहाहीनाः विगतैषिणः त्यक्तपुत्रवित्तादीच्छाः दांताबहिरिंद्रियनिग्रहवंतः शांताअंतरिंद्रियांतःकरणनिग्रहवंतः विगतैषिणइत्यस्यैवव्याख्यानंनिवृत्ताखिलकामनाइति ॥३७ इष्टेति समाःहर्षविषादरहिताःसंगवर्जिताःदुःसंगरहिताःसंन्यस्तेत्यादि त्यक्तकाम्यनित्यसकलकर्माणः तदेवाहसर्वदाब्रह्मतत्पराः ॥ ३८ ॥ यमादयोयमनियमास

साधवःसमचित्तायेनिस्पृहाविगतैषिणः ॥ दांताःप्रशांतास्त्वद्भक्तानिवृत्ताखिलकामनाः ॥ ३७ ॥ इष्टप्राप्तिविपत्त्योश्च समाःसंगविवर्जिताः ॥ संन्यस्ताखिलकर्माणःसर्वदाब्रह्मतत्पराः ॥ ३८ ॥ यमादिगुणसंपन्नाःसंतुष्टायेनकेनचित् ॥ सत्संगमोभवेद्यर्हित्वत्कथाश्रवणेरतिः ॥ ३९ ॥ समुदेतिततोभक्तिस्त्वयिरामसनातने ॥ त्वद्भक्तावुपपन्नायांविज्ञानं विपुलंस्फुटम् ॥ ४० ॥ उदेतिमुक्तिमार्गोऽयमाद्यश्चतुरसेवितः ॥ तस्माद्राघवसद्भक्तिस्त्वयिमेप्रेमलक्षणा ॥ ४१ ॥ सदाभूयाद्धरेसंगस्त्वद्भक्तेषुविशेषतः ॥ अद्यमेसफलंजन्मभवत्संदर्शनादभूत् ॥ ४२ ॥ अद्यमेक्रतवःसर्वेबभूवुःसफलाःप्रभो ॥ दीर्घकालंमयातप्तमनन्यमतिनातपः ॥ तस्येहतपसोरामफलंतवयदर्चनम् ॥ ४३ ॥ सदामेसीतयासार्धंहृदयेवसराघव ॥ गच्छतस्तिष्ठतोवाऽपिस्मृतिःस्यान्मेसदात्वयि ॥ ४४ ॥

नप्राणायामप्रत्याहारध्यानधारणासमाधयोयोगशास्त्रोक्ताः यर्हियदातेषांसत्संगमोभवेत्तदात्वत्कथाश्रवणेरतिःसमुदेतीत्यन्वयः ॥ ३९ ॥ ततोभक्तिरवश्यंममभूयात् लब्धाचमानश्यत्वित्याकारश्चित्तवृत्तिविशेषःप्रेमाख्यस्तथाप्रेमवतस्त्वज्ज्ञानंस्फुटमेवोदेतीत्यन्वयः ॥४०॥ अयमाद्योमुख्यश्चतुरैःकुशलैःसेवितोमुक्तेर्मार्गः तस्मात्हेराघवत्वयिप्रेमलक्षणासद्भक्तिर्मेसदाभूयात् ॥ ४१ ॥ हेहरेत्वद्भक्तेषुविशेषतःसंगोभूयादित्यनुषंगः ॥ ४२ ॥ क्रतवःसफलाबभूवुः त्वत्प्रीतिरेवक्रतूनांमुख्यंफलंसाचमदाश्रमेआगमनात्त्वयाव्यक्तीकृताउक्तमेवार्थंभग्यंतरेणाह दीर्घेति ॥ ४३ ॥ अथस्वेष्टंप्रार्थयते सदेति ॥ ४४ ॥

॥ ४५ ॥ बाणतूणीरौ बाणपूर्णौतूणीरौ ॥ ४६ ॥ ४७ ॥ ४८ ॥ अशेषविदपिमानुष्यंनाटयनूप्रदर्शितंमार्गंययौ ॥ ४९ ॥ ॥ इतिश्रीमत्स०अध्यात्म

इतिस्तुत्वारमानाथमगस्त्योमुनिसत्तमः ॥ ददौचापंमहेंद्रेणरामार्थेस्थापितंपुरा ॥ ४५ ॥ अक्षय्यौबाणतूणीरौखड्गोरत्न विभूषितः ॥ जहिराघवभूभारभूतंराक्षसमंडलम् ॥ ४६ ॥ यदर्थमवतीर्णोऽसिमाययामनुजाकृतिः ॥ इतोयोजनयुग्मे तुपुण्यकाननमंडितः ॥ ४७॥ अस्तिपंचवटीनाम्नाआश्रमोगौतमीतटे ॥ नेतव्यस्तत्रतेकालःशेषोरघुकुलोद्वह ॥ ४८ ॥ तत्रैवबहुकार्याणिदेवानांकुरुसत्पते ॥ ४९ ॥ श्रुत्वातदागस्त्यसुभाषितंवचःस्तोत्रंचतत्त्वार्थसमन्वितंविभुः ॥ मुनिंस माभाष्यमुदान्वितोययौप्रदर्शितंमार्गमशेषविद्धरिः ॥ ५० ॥ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेअर ण्यकांडेतृतीयःसर्गः ॥ ३ ॥ ॥ छ ॥ ॥ मार्गेव्रजन्ददर्शाथशैलशृंगमिवास्थितम् ॥ वृद्धंजटायुषंरा मःकिमेतदितिविस्मितः ॥ १ ॥ धनुरानयसौमित्रेराक्षसोऽयंपुरःस्थितः ॥ इत्याहलक्ष्मणंरामोहनिष्याम्यृषिभक्षकम् ॥ २ ॥ तच्छ्रुत्वारामवचनंगृध्रराड्भयपीडितः ॥ वधार्होऽहंनतेरामपितुस्तेहंप्रियःसखा ॥ ३ ॥ जटायुर्नामभद्रंतेगृध्रोऽहं प्रियकृत्तव ॥ ४ ॥ पंचवट्यामहंवत्स्येतवैवप्रियकाम्यया ॥ मृगयायांकदाचित्तुप्रयातेलक्ष्मणेऽपिच ॥ ५ ॥ सीताजनक कन्यामेरक्षितव्याप्रयत्नतः ॥ श्रुत्वातद्गृध्रवचनंरामःसस्नेहमब्रवीत् ॥ ६ ॥

रा०सेतौअरण्यकांडेतृतीयःसर्गः ॥ ३ ॥ ॥ छ ॥ ॥छ॥ ॥ मार्गेइति ददर्श दृष्ट्वाचकिमेतदितिविस्मितः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ वत्स्ये वसामीत्यर्थः आर्षःप्रयोगः ॥ ५ ॥ ६ ॥

गृध्रमहाराजेतिषष्ठीतत्पुरुषः अत्रैववनेवसन्मेप्रियंकुर्विंतिसंबंधः ॥ ७ ॥ आमंत्रितंसम्यक्बोधितंगृध्रमालिंग्येत्यर्थः ॥८ ॥ तेगौतमीतीरंगोदावरीतीरंगत्वापंचवट्यांपंचवटसमीपेस्थिताः ततस्तत्ररामोलक्ष्मणेनसुविस्तरंमंदिरंकारयामास ॥ ९ ॥ गंगायाः गंगात्रगौतम्येव ॥ १० ॥ जनसंबाधोजनसमूहः निष्क्रांतारुजा

साधुगृध्रमहाराजतथैवकुरुमेप्रियम्॥ अत्रैवमेसमीपस्थोनातिदूरेवनेवसन्॥ ७॥ इत्यामंत्रितमालिंग्यययौपंचवटीं प्रभुः॥ लक्ष्मणेनसहभ्रात्रासीतयारघुनंदनः॥ ८॥ गत्वातेगौतमीतीरंपंचवट्यांसुविस्तरम्॥ मंदिरंकारयामासलक्ष्मणेनसुबुद्धिना॥ ९॥ तत्रतेन्यवसन्सर्वेगंगायाउत्तरेतटे॥ कदंबपनसाम्रादिफलवृक्षसमाकुले॥ १०॥ विविक्तेजनसंबाधवर्जितेनीरुजस्थले॥ विनोदयन्जनकजांलक्ष्मणेनविपश्चिता॥ ११॥ अध्युवाससुखंरामोदेवलोकइवामरः॥ कंदमूलफलादीनिलक्ष्मणोनुदिनंतयोः॥ १२॥ आनीयप्रददौरामसेवातत्परमानसः॥ धनुर्बाणधरोनित्यंरात्रौजागर्तिसर्वतः॥ १३॥ स्नानंकुर्वंत्यनुदिनंत्रयस्तेगौतमीजले॥ उभयोर्मध्यगासीताकुरुतेचगमागमौ॥ १४॥ आनीयसलिलंनित्यंलक्ष्मणःप्रीतमानसः॥ सेवतेऽहरहःप्रीत्याएवमासन्सुखंत्रयः॥ १५॥ एकदालक्ष्मणोराममेकांतेसमुपस्थितम्॥ विनयावनतोभूत्वापप्रच्छपरमेश्वरम्॥ १६॥ भगवन्श्रोतुमिच्छामिमोक्षस्यैकांतिकींगतिम्॥ त्वत्तःकमलपत्राक्षसंक्षेपाद्वक्तुमर्हसि॥ १७॥ ज्ञानंविज्ञानसहितंभक्तिवैराग्यबृंहितम्॥ आचक्ष्वमेरघुश्रेष्ठवक्तानान्योऽस्तिभूतले॥ १८॥

पीडायस्मात्तादृशस्थलेलक्ष्मणेनसहअध्युवासेतिसंबंधः ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ एकांतिकींगतिंअव्यभिचारिकारणमित्यर्थः ॥ १७ ॥ ननुमोक्षकारणंज्ञानमितिप्रसिद्धमेवेतिचेत्तत्स्वरूपमेवप्रश्नविषयइत्याह ज्ञानमिति ज्ञानंश्रवणमननजन्यंविज्ञानंनिदिध्यासनजम् भक्तिर्ज्ञानविषयेप्रेमउक्तस्वरूपम् वैराग्यंतदतिरिक्तेप्रेमाभावरूपम् ॥ १८ ॥

वैकल्पिकंभ्रमंविकल्पमेववैकल्पिकम् विनयादित्वाठक् शब्दज्ञानानुपातीवस्तुशून्योविकल्पइतियोगसूत्रोक्तविकल्परूपंभ्रमम् यथाशशशृंगादि यद्यपितदलीकमेवतथाऽपिशशशृंगादिशब्दप्रयोगस्ततोबोधश्चभवत्येवतद्वदेवसर्वोऽपिव्यवहारः संसाररूपस्तंयज्ज्ञानेनजह्यात्तद्गुह्यंवक्ष्यामीत्यन्वयः ॥ १९ ॥ तदुपयोगितयावक्ष्यमाणान्यन्यानिनाममात्रेणक्रमतउद्दिशति आदाविति ॥ २० ॥ तत्रमायास्वरूपमाह अनात्मनीति आत्मबुद्धिःअहमितिबुद्धिः ॥ २१ ॥ परिकल्प्य

श्रीरामउवाच ॥ शृणुवक्ष्यामितेवत्सगुह्याद्गुह्यतरंपरम् ॥ यद्विज्ञायनरोजह्यात्सद्योवैकल्पिकंभ्रमम् ॥ १९ ॥ आदौमा
यास्वरूपंतेवक्ष्यामितदनंतरम् ॥ ज्ञानस्यसाधनंपश्चाज्ज्ञानंविज्ञानसंयुतम् ॥ २० ॥ ज्ञेयंचपरमात्मानंयज्ज्ञात्वामुच्य
तेभयात् ॥ अनात्मनिशरीरादावात्मबुद्धिस्तुयाभवेत् ॥ २१ ॥ सैवमायातयैवासौसंसारःपरिकल्प्यते ॥ रूपेद्वेनिश्चितेपू
र्वंमायायाःकुलनंदन ॥ २२ ॥ विक्षेपावरणेतत्रप्रथमंकल्पयेज्जगत् ॥ लिंगाद्यब्रह्मपर्यंतंस्थूलसूक्ष्मविभेदतः ॥ २३ ॥
अपरंत्वखिलंज्ञानरूपमावृत्यतिष्ठति ॥ माययाकल्पितंविश्वंपरमात्मनिकेवले ॥ २४ ॥ रज्जौभुजंगवद्भ्रांत्याविचारेना
स्तिकिंचन ॥ श्रूयतेदृश्यतेयद्यत्स्मर्यतेवानरैःसदा ॥ २५ ॥

तेअवस्तुभूतएवदृश्यते अथतादृशशक्तिमत्त्वंमायायादर्शयति रूपेइति पूर्वमित्यनेनतयोरूपयोरनादित्वंदर्शयति॥२२॥ केतेरूपेतत्राह विक्षेपावरणेइति विक्षेपशक्तिरावरणशक्तिश्चेत्यर्थः प्रथमंविक्षेपरूपंलिंगंमहत्तत्त्वमाद्यंयस्यतच्चतत्ब्रह्मपर्यंतम् चतुर्मुखब्रह्मांतमित्यर्थः ॥२३ ॥ अपरमावरणरूपम् तस्यान्वर्थत्वमाह अखिलमिति सर्वज्ञानरूपावरकत्वात्आवरणव्यवहारस्तत्रेतिभावः ननुमायाकुत्राधिष्ठानेइदंजगत्कल्पितवतीतत्राह परमात्मनीति तद्रूपंचैतन्यमाच्छाद्यजगद्रूपंदर्शितमित्यर्थः ॥ २४ ॥ तत्रदृष्टांतमाह रज्जाविति रज्ज्वज्ञानंयथारज्जुमाच्छाद्यभुजंगंकल्पयतितद्वत् विचारेविचारणेऽधिष्ठानतत्त्वज्ञाने ॥ २५ ॥

सर्वस्यमिथ्यात्वेदृष्टांतौस्वप्नेति यथा स्वप्नेश्रुतंदृष्टंस्मृतंचसर्वंमिथ्याजागरेऽननुभवात्तद्वत् देहएवेति तस्यैवसर्वसंसारकारणकर्मोत्पादकत्वादितिभावः॥२६॥तदाह तन्मूलइति अन्यथादेहाभावेतेपुत्रादयआत्मनःकिंभवंति नकिमपीत्यर्थः॥२७॥ तत्रसूक्ष्मस्थूलदेहावेकीकृत्याह देहइति स्थूलभूतपंचकंस्थूलदेहः अहंकारबुद्धिदशेंद्रियाणिमनःपंचतन्मात्राणिचइत्येतावानष्टादशात्मकोलिंगदेहःसूक्ष्मः॥२८॥ चिदाभासइतितस्यविशेषणम् चिदाभासतेअहमितिबुद्ध्याविषयीक्रियतइ

असदेवहितत्सर्वंयथास्वप्नमनोरथौ ॥ देहएवहिसंसारवृक्षमूलंदृढंस्मृतम् ॥ २६ ॥ तन्मूलःपुत्रदारादिबंधःकिंतेऽन्यथा
त्मनः ॥ २७ ॥ देहस्तुस्थूलभूतानांपंचतन्मात्रपंचकम् ॥ अहंकारश्चबुद्धिश्चइंद्रियाणितथादश ॥ २८॥ चिदाभासोम
नश्चैवमूलप्रकृतिरेवच ॥ एतत्क्षेत्रमितिज्ञेयंदेहइत्यभिधीयते ॥ २९ ॥ एतैर्विलक्षणोजीवःपरमात्मानिरामयः ॥ तस्य
जीवस्यविज्ञानेसाधनान्यपिमेशृणु ॥ ३० ॥ जीवश्चपरमात्माचपर्यायोनात्रभेदधीः ॥ मानाभावस्तथादंभहिंसादि
परिवर्जनम् ॥ ३१ ॥ पराक्षेपादिसहनंसर्वत्रावक्रतातथा ॥ मनोवाक्कायसद्भक्त्यासद्गुरोःपरिसेवनम् ॥ ३२ ॥ बाह्या
भ्यंतरसंशुद्धिःस्थिरतासत्क्रियादिषु ॥ मनोवाक्कायदडंश्चविषयेषुनिरीहता ॥ ३३ ॥ निरहंकारताजन्मजराद्यालोच
नंतथा ॥ असक्तिःस्नेहशून्यत्वंपुत्रदारधनादिषु ॥ ३४ ॥

त्यर्थः मूलप्रकृतिस्त्वैश्वरोदेहः एतत्संघस्यजडत्वाद्देहक्षेत्रादिसंज्ञा ॥ २९ ॥ जीवःसएवपरमात्मा ॥ ३० ॥ अत्रजीवेपरमात्मनिच तथाऽत्रमानाभावःदेशतःकालतश्चपरिच्छेदाभावःअथतद्विज्ञानसाधनान्याह दंभेत्यादि ॥३१॥ परेति परकृताक्षेपादिनिंदादितत्सहनम् मनोवाक्कायकृतसद्भक्त्याप्रेम्णासद्गुरुसेवनम् ॥३२ ॥ बाह्याभ्यंतरसंशुद्धिःउक्तरूपैव सत्क्रियादिषुस्थिरताअवश्यकर्तव्यताबुद्धिःपरानिष्टाचिंतनंमनोदंडः पराक्षेपाकरणंवाग्दंडः पराहिंसाकायदंडः निरीहताइच्छाराहित्यम् ॥ ३३ ॥ जन्मजराद्यालोचनंपरेषांतदालोचनमूलकंवैराग्यंपुत्रादिष्वसक्तिःतस्यैवव्याख्यानंस्नेहशून्यत्वम् ॥ ३४ ॥

चित्तस्यसमताहर्षविषादराहित्यम् अनन्यविषयातन्मात्रविषया ॥ ३५॥ जनसंबाधोजनसमूहः प्राकृतैःसांसारिकैः अरतिःअप्रीतिः ॥ ३६ ॥ आत्मज्ञानेतत्साधनेश्रवणादावुद्योगआदरपूर्वकोयत्नः वेदांतार्थस्यावलोकनंश्रवणंविचारश्च विपर्ययःसंसारः ॥ ३७ ॥ बुद्ध्यादिभ्योविलक्षणइत्यादिनिश्चयम् ॥ ३८ ॥ येनज्ञानेनययाशब्दादिजवृत्त्यासंवित्तेलभतेतज्ज्ञानमितिमेनिश्चितंनिश्चयः तदैवैतत्यदासाक्षादनुभवेत् निदिध्यासनपरिपाकेअपरोक्षमनुभवेत्तदाविज्ञानमित्युच्यते ॥ ३९ ॥ अथात्मनउक्तंबुद्ध्यादिभ्योवैलक्षण्यंदर्शयति आत्मेति चिदेवानंदस्तदात्मकः यद्वा चित्आनंदसमृद्धिस्तदात्मकःबुद्ध्याद्युपाधिभिस्तद्धर्मैरागा

इष्टानिष्टागमेनित्यंचित्तस्यसमतातथा॥मयिसर्वात्मगेरामेत्व्यनन्यविषयामतिः॥ ३५ ॥ जनसंबाधरहितशुद्धदेशनिषेवणम् ॥ प्राकृतैर्जनसंघैश्चत्व्यरतिःसर्वदाभवेत्॥३६॥ आत्मज्ञानेसदोद्योगोवेदांतार्थावलोकनम्॥उक्तैरेतैर्भवेज्ज्ञानंविपरीतैर्विपर्ययः ॥ ३७॥ बुद्धिप्राणमनोदेहाऽहंकृतिभ्योविलक्षणः ॥ चिदात्माऽहंनित्यशुद्धोबुद्धएवेतिनिश्चयम् ॥ ३८ ॥ येनज्ञानेनसंवित्तेतज्ज्ञानंनिश्चितंचमे ॥ विज्ञानंचतदैवैतत्साक्षादनुभवेद्यदा ॥ ३९॥ आत्मासर्वत्रपूर्णःस्याच्चिदानंदात्मकोऽव्ययः॥ बुद्ध्याद्युपाधिरहितःपरिणामादिवर्जितः ॥४० ॥ स्वप्रकाशेनदेहादीन्भासयन्ननपावृतः॥ एकएवाद्वितीयश्चसत्यज्ञानादिलक्षणः ॥ ४१ ॥ असंगःस्वप्रभोद्रष्टाविज्ञानेनावगम्यते ॥ आचार्यशास्त्रोपदेशादैक्यज्ञानंयदाभवेत् ॥४२ ॥

दिभीरहितःहीनः परिणामोरूपांतरापत्तिस्तद्वर्जितःआदिपदेनजडत्वाभास्यत्वादि ॥ ४० ॥ सएवसर्वभासकइत्याह स्वप्रकाशेनेति सत्यज्ञानादीति सत्यंज्ञानमनंतंब्रह्मेत्यादिश्रुत्युक्तलक्षणः ॥ ४१ ॥ स्वप्रभःस्वभासनेइतरभासकानपेक्षःद्रष्टासर्वसाक्षी विज्ञानेनप्रागुक्तेनावगम्यतेविषयीक्रियते तस्यज्ञानस्यमुख्यं कारणमाह आचार्येति आचार्यकृततत्त्वमस्यादिशास्त्रोपदेशात्जीवपरयोरात्मनोर्यदैक्यज्ञानंतदपरोक्षानुभवोभवेत्तदैवमूलाविद्याकार्यंस्थूलंकरणमिंद्रियं तैः सहपरात्मनिलीयते ॥ ४२ ॥

॥ ४३ ॥ सैवावस्थामुक्तिर्मूलाविद्यालयएवमुक्तिरित्यर्थः ॥ ४४ ॥ आत्मनःशुद्धस्यसर्वथाऽविद्याऽस्पृष्टस्यभेदरहितस्यऐक्यज्ञानमविद्यालयइत्यपिव्यव
हारःकंठचामीकरन्यायेनगौणइत्यर्थः यथाकंठस्थंचामीकरमन्यत्रान्विष्यतिनष्टंतदितिबुद्ध्या अरेकंठेएवास्तेइतिकेनचिदुक्तेलब्धंतदितिव्यवहरतितद्वत् एवं
ज्ञानादिसहितंमेपरात्मनोमोक्षस्वरूपंतेकथितम् यामोक्षावस्थोक्तातदेवमेस्वरूपमित्यर्थः मद्भक्तिविमुखात्मनांमत्प्रेमहीनानाम् ॥ ४५ ॥ यथासनेत्राणामपिरा

आत्मनोर्जीवपरयोर्मूलाविद्यातदैवहि ॥ लीयतेकार्यकरणैःसहैवपरमात्मनि ॥ ४३ ॥ सावस्थामुक्तिरित्युक्तात्युपचा
रोऽयमात्मनि ॥ इदंमोक्षस्वरूपंतेकथितंरघुनंदन ॥ ४४ ॥ ज्ञानविज्ञानवैराग्यसहितंमेपरात्मनः ॥ किंत्वेतद्दुर्लभंमन्ये
मद्भक्तिविमुखात्मनाम् ॥ ४५ ॥ चक्षुष्मतामपियथारात्रौसम्यङ्नदृश्यते ॥ पदंदीपसमेतानांदृश्यतेसम्यगेवहि ॥ ४६ ॥
एवंमद्भक्तियुक्तानामात्मासम्यक्प्रकाशते ॥ मद्भक्तेःकारणंकिंचिद्वक्ष्यामिशृणुतत्त्वतः ॥ ४७ ॥ मद्भक्तसंगोमत्सेवाम
द्भक्तानांनिरंतरम् ॥ एकादश्युपवासादिममपर्वानुमोदनम् ॥ ४८ ॥ मत्कथाश्रवणेपाठेव्याख्यानेसर्वदारतिः ॥ मत्पूजा
परिनिष्ठाचममनामानुकीर्तनम् ॥ ४९ ॥ एवंसततयुक्तानांभक्तिरव्यभिचारिणी ॥ मयिसंजायतेनित्यंततःकिमवशि
ष्यते ॥ ५० ॥ अतोमद्भक्तियुक्तस्यज्ञानंविज्ञानमेवच ॥ वैराग्यंचभवेच्छीघ्रंततोमुक्तिमवाप्नुयात् ॥ ५१ ॥ कथितं
सर्वमेतत्तेतवप्रश्नानुसारतः ॥ अस्मिन्मनःसमाधाययस्तिष्ठेत्सतुमुक्तिभाक् ॥ ५२ ॥

त्रौपदंचोरादिपदंनदृश्यतेनदृग्विषयोभवति दीपसमेतानांतुतेषांतद्दृग्विषयोभवति ॥ ४६ ॥ एवंभक्तियुक्तानांसम्यक्मत्प्रकाशोभवति ॥ ४७ ॥ अथप्रतिज्ञा
तानिभक्तिकारणान्याह मद्भक्तेति मद्भक्तानांनिरंतरमित्यत्रसेवेत्यनुषज्यते एकादश्युपवासादितदनुष्ठानमित्यर्थः ममयानिपर्वाणिउत्सवदिनानिरामनवम्यादी
नितेषामनुमोदनंतेषूत्सवकरणम् ॥ ४८ ॥ परिनिष्ठातत्परता ॥ ४९ ॥ ततोमद्भक्तेरधिकंज्ञानसाधनंकिमवशिष्यते नकिमप्यस्तीत्यर्थः ॥ ५० ॥ तदेवस्फुटमा
ह अतइति ॥ ५१ ॥ ५२ ॥

॥ ५३ ॥ अज्ञानपटलकृतंध्वांतमित्यर्थः ॥ ५४ ॥ ममभक्तानामतएवयोगिनांमद्भक्तियोगवताम् सुविमलंस्वांतंहृदयंयेषांतेचतेऽतिशांतात्मानश्चातिशांतचि
त्ताश्चतेषाम् मत्सेवायामभिरतःप्रीतियुतआत्माचित्तंयेषांविमलज्ञानरूपआत्मायेषांज्ञानविषयस्तेषाम् उद्यताज्ञानविषयेउद्यमशालिनीमतिर्यस्यसः सतांसेव
नेऽनन्यधीस्तत्परइत्यर्थः तस्यानिशमहंदृश्योभवे आत्मनेपदमार्षम् नान्यथातादृशसंगंविनानमद्दर्शनंनापिमोक्षइत्यर्थः ॥ ५५ ॥ इत्यध्यात्मरामायणेसेतौ

नवक्तव्यमिदंयत्नान्मद्भक्तिविमुखायहि ॥ मद्भक्तायप्रदातव्यमाहूयापिप्रयत्नतः॥ ५३ ॥यइदंतुपठेन्नित्यंश्रद्धाभक्तिस
मन्वितः॥ अज्ञानपटलध्वांतंविधूयपरिमुच्यते॥ ५४ ॥ भक्तानांममयोगिनांसुविमलस्वांतातिशांतात्मनांमत्सेवाभिर
तात्मनांचविमलज्ञानात्मनांसर्वदा॥ संगंयःकुरुतेसदोद्यतमतिःसत्सेवनानन्यधीर्मोक्षस्तस्यकरस्थितोऽहमनिशंदृश्यो
भवेनान्यथा॥ ५५॥ ॥इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेअरण्यकांडेचतुर्थःसर्गः॥ ४॥ ॥छ॥ ॥
तस्मिन्कालेमहारण्येराक्षसीकामरूपिणी ॥ विचचारमहासत्त्वाजनस्थाननिवासिनी॥ १ ॥ एकदागौतमीतीरेपंचव
ट्याःसमीपतः॥ पद्मवज्रांकुशांकानिपदानिजगतीपतेः॥ २ ॥ दृष्ट्वाकामपरीतात्मापादसौंदर्यमोहिता॥ पश्यंतीसाशनै
रायाद्राघवस्यनिवेशनम्॥ ३ ॥ तत्रसातंरमानाथंसीतयासहसंस्थितम्॥ कंदर्पसदृशंरामंदृष्ट्वाकामविमोहिता॥ ४॥
राक्षसीराघवंप्राहकस्त्वंकःकिमाश्रमे॥ युक्तोजटावल्कलाद्यैःसाध्यंकिंतेऽत्रमेवद॥ ५॥

अ॰ चतुर्थःसर्गः ॥ ४ ॥ ॥छ॥ ॥ तस्मिन्निति महासत्त्वामहाबला ॥ १ ॥ पद्मेत्यादितच्चिह्ननितद्युक्तानीत्यर्थः ॥ २ ॥ कामपरीतात्माका
मव्याप्तचित्ता पश्यंतीतत्पदानीत्यर्थः तेनैवचिह्नेनराघवाश्रममायात् ॥ ३ ॥ ४ ॥ कःकिंनामा जटावल्कलाद्यैर्युक्तःआश्रमेकिंवससीतिशेषः अत्रवासेन
किंसाध्यंतत्त्ववद ॥ ५ ॥

अथतत्प्रश्नंविनैवतज्जिज्ञासांसंभाव्यस्वस्योत्तमकुलत्वादिचबोधयितुंस्वस्वरूपमाह अहमिति ॥ ६ ॥ खरेणभ्रात्रासहितेत्यन्वयः सर्वंवनमितिशेषः ॥ ७ ॥ ॥ ८ ॥ ९ ॥ तेकिंकृत्यंमयाकार्यंकरणीयंतद्ब्रूहीत्यन्वयः ॥ १० ॥ गिरिकानने समाहारद्वंद्वः गिरिषुकाननेषुचेत्यर्थः ॥ ११ ॥ अनपायिनीसर्वथात्यक्तुमशक्याक्षणमप्यविभक्ताच ॥ १२ ॥ तदेवाह त्वंत्विति ॥ १३ ॥ तेनैवसहसंचर गिरिकाननेष्वितिशेषः ॥ १४ ॥ संगच्छावःमिथुनीभावंप्राप्नुवः ॥ १५ ॥ १६॥ ॥ १७ ॥ क्रोधात्अवददितिशेषः किमवदत्तदाह रामेत्यादि अनवस्थितःसत्येवचसीतिशेषः यस्त्रीत्यामामेवंभ्रामयसितामित्यर्थः ॥ १८ ॥

अहंशूर्पणखानामराक्षसीकामरूपिणी॥ भगिनीराक्षसेंद्रस्यरावणस्यमहात्मनः ॥ ६ ॥ खरेणसहिताभ्रात्रावसाम्यत्रैवकानने॥ राज्ञादत्तंचमेसर्वंमुनिभक्षावसाम्यहम् ॥ ७॥ त्वांतुवेदितुमिच्छामिवदमेवदतांवर॥ तामाहरामनामाहमयोध्याधिपतेःसुतः॥ ८॥ एषामेसुंदरीभार्यासीताजनकनंदिनी॥ सतुभ्राताकनीयान्मेलक्ष्मणोऽतीवसुंदरः॥ ९॥ किंकृत्यंतेमयाब्रूहिकार्यंभुवनसुंदरि॥ इतिरामवचःश्रुत्वाकामार्तासाऽब्रवीदिदम् ॥ १० ॥ एहिराममयासार्धंरमस्वगिरिकानने॥ कामार्ताऽहंनशक्नोमित्यक्तुंत्वांकमलेक्षणम् ॥ ११ ॥ रामःसीतांकटाक्षेणपश्यन्सस्मितमब्रवीत्॥ भार्याममैषाकल्याणीविद्यतेह्यनपायिनी ॥ १२ ॥ त्वंतुसापत्न्यदुःखेनकथंस्थास्यसिसुंदरि॥ बहिरास्तेममभ्रातालक्ष्मणोतीवसुंदरः॥ १३ ॥ तवानुरूपोभवितापतिस्तेनैवसंचर ॥इत्युक्तालक्ष्मणंप्राहपतिर्मेभवसुंदर॥ १४ ॥ भ्रातुराज्ञांपुरस्कृत्यसंगच्छावोऽद्यमाचिरम्॥ इत्याहराक्षसीघोरालक्ष्मणंकाममोहिता॥ १५ ॥तामाहलक्ष्मणःसाध्विदासोऽहंतस्यधीमतः॥ दासीभविष्यसित्वंतुततोदुःखतरंनुकिम्॥ १६ ॥ तमेवगच्छभद्रंतेसतुराजाऽखिलेश्वरः॥ तच्छ्रुत्वापुनरप्यागाद्राघवंदुष्टमानसा॥ १७॥ क्रोधाद्रामकिमर्थंमांभ्रामयस्यनवस्थितः॥ इदानीमेवतांसीतांभक्षयामितवाग्रतः॥॥ १८ ॥

तांपरिगृह्यधृत्वा ॥ १९ ॥ २० ॥ परुषाक्षराखरधिक्कृतिबोधककठोरवाक् ॥ २१ ॥ एवंनासाकर्णविहीना तन्मेवद तमहंवधिष्यामीत्यन्वयः ॥ २२ ॥ २३॥

इत्युक्त्वाविकटाकाराजानकीमनुधावती ॥ ततोरामाज्ञयाखड्गमादायपरिगृह्यताम् ॥ १९ ॥ चिच्छेदनासांकर्णौचल
क्ष्मणोऽलघुविक्रमः ॥ ततोघोरध्वनिंकृत्वारुधिराक्तवपुर्द्रुतम् ॥ २० ॥ क्रंदमानापपाताग्रेखरस्यपरुषाक्षरा ॥ किमेत
दितितामाहखरःखरतराक्षरः ॥ २१ ॥ केनैवंकारिताऽसित्वंमृत्योर्वक्त्रानुवर्तिना ॥ वदमेतंवधिष्यामिकालकल्पमपिक्ष
णात् ॥ २२ ॥ तमाहराक्षसीरामःसीतालक्ष्मणसंयुतः ॥ दंडकंनिर्भयंकुर्वन्नास्तेगोदावरीतटे ॥ २३ ॥ मामेवंकृतवां
स्तस्यभ्रातातेनैवचोदितः ॥ यदित्वंकुलजातोऽसिवीरोसिजहितौरिपू ॥ २४ ॥ तयोस्तुरुधिरंपास्येभक्षयैतौसुदुर्मदौ ॥
नोचेत्प्राणान्परित्यज्ययास्यामियमसादनम् ॥ २५ ॥ तच्छ्रुत्वात्वरितंप्रागात्खरःक्रोधेनमूर्च्छितः ॥ चतुर्दशसहस्राणि
रक्षसांभीमकर्मणाम् ॥ २६ ॥ चोदयामासरामस्यसमीपंवधकांक्षया ॥ खरश्चत्रिशिराश्चैवदूषणश्चैवराक्षसः ॥ २७॥
सर्वेरामंययुःशीघ्रंनानाप्रहरणोद्यताः ॥ श्रुत्वाकोलाहलंतेषांरामःसौमित्रिमब्रवीत् ॥ २८ ॥ श्रूयतेविपुलःशब्दोनूनमा
यांतिराक्षसाः ॥ भविष्यतिमहद्युद्धंनूनमद्यमयासह ॥ २९ ॥ सीतांनीत्वागुहांगत्वातत्रतिष्ठमहाबल ॥ हंतुमिच्छाम्यहं
सर्वान्राक्षसान्घोररूपिणः ॥ ३० ॥ अत्रकिंचिन्नवक्तव्यंशापितोऽसिममोपरि ॥ तथेतिसीतामादायलक्ष्मणोगह्वरं
ययौ ॥ ३१ ॥

तेनरामेणचोदितःप्रेरितः ॥ २४ ॥ २५ ॥ प्रागात्प्रस्थितः ॥ २६॥ रामस्यसमीपंगंतुंचोदयामास वधकांक्षयेत्यस्यरामस्यवधकांक्षयेत्यर्थः स्ववधेच्छयेतितत्त्वा
र्थः ॥ २७ ॥ २८ ॥ २९ ॥ सीतांनीत्वागृहीत्वेत्यर्थः ॥ ३० ॥ शापितोऽसिममोपरिमदीयःशपथइत्यर्थः ॥ ३१ ॥

यत्तःसन्नद्धः ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ शस्त्रव्रणानिमार्जितरुधिराणिपूर्णगर्तानिसत्यसंकल्पत्वाच्चकारेत्यर्थः ॥ ३७ ॥ रावणस्यपादसन्निधावु

रामःपरिकरंबद्ध्वाधनुरादायनिष्ठुरम्॥ तूणीरावक्षयशरौबद्ध्वायत्तोऽभवत्प्रभुः॥ ३२ ॥ ततआगत्यरक्षांसिरामस्योपरिचिक्षिपुः॥ आयुधानिविचित्राणिपाषाणान्पादपानपि ॥ ३३ ॥ तानिचिच्छेदरामोऽपिलीलयातिलशःक्षणात्॥ ततोबाणसहस्रेणहत्वातान्सर्वराक्षसान् ॥३४॥ खरंत्रिशिरसंचैवदूषणंचैवराक्षसम्॥ जघानप्रहरार्धेनसर्वानेवरघूत्तमः ॥ ३५ ॥ लक्ष्मणोऽपिगुहामध्यात्सीतामादायराघवे॥ समर्प्यराक्षसान्दृष्ट्वाहतान्विस्मयमाययौ ॥ ३६ ॥ सीतारामंसमालिंग्यप्रसन्नमुखपंकजा॥ शस्त्रव्रणानिचांगेषुममार्जजनकात्मजा ॥ ३७॥ साऽपिदुद्रावदृष्ट्वातान्हतान्राक्षसपुंगवान्॥ लंकांगत्वासभामध्येक्रोशंतीपादसन्निधौ॥३८॥ रावणस्यपपातोर्व्यांभगिनीतस्यरक्षसः॥दृष्ट्वातांरावणःप्राहभगिनींभयविह्वलाम्॥ ३९ ॥ उत्तिष्ठोत्तिष्ठवत्सेत्वंविरूपकरणंतव॥ कृतंशक्रेणवाभद्रेयमेनवरुणेनवा॥ ४० ॥ कुबेरेणाथवाब्रूहिभस्मीकुर्यांक्षणेनतम्॥ राक्षसीतमुवाचेदंत्वंप्रमत्तोविमूढधीः॥ ४१ ॥ पानासक्तःस्त्रीविजितःषंढःसर्वत्रलक्ष्यसे॥ चारचक्षुर्विहीनस्त्वंकथंराजाभविष्यसि॥ ४२ ॥ खरश्चनिहतःसंख्येदूषणस्त्रिशिरास्तथा॥ चतुर्दशसहस्राणिराक्षसानांमहात्मनाम् ॥ ४३ ॥ निहतानिक्षणेनैवरामेणासुरशत्रुणा॥ जनस्थानमशेषेणमुनीनांनिर्भयंकृतम्॥ नजानासिविमूढस्त्वमतएवमयोच्यते॥ ४४ ॥ रावणउवाच॥ कोवारामःकिमर्थंवाकथंतेनासुराहताः॥ सम्यक्कथयमेतेषांमूलघातंकरोम्यहम्॥ ४५॥

र्व्यांपपातेत्यन्वयः ॥ ३८ ॥ ३९ ॥ विरूपकरणंवैरूप्यमितियावत् ॥ ४० ॥ अथवाकुबेरेणकृतंतद्ब्रूहीत्यन्वयः ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ किमर्थंकस्मैप्रयोजनायकथंकेनप्रकारेणासुराःखरादयोहताःतेषांरामादीनाम् ॥ ४५ ॥

पंचवटीनामआश्रमइतिशेषः ॥ ४६ ॥ ४७ ॥ ४८ ॥ द्योतयंतीशोभयंती ॥ ४९ ॥ ५० ॥ ५१ ॥ राक्षसयूथपैःसहयुद्धमकरोदितिशेषः ॥ ५२ ॥ विनष्टाः

शूर्पणखोवाच ॥ जनस्थानादहंयाताकदाचिद्गौतमीतटे ॥ तत्रपंचवटीनामपुरामुनिजनाश्रया ॥ ४६ ॥ तत्राश्रमेमयादृष्टोरामोराजीवलोचनः ॥ धनुर्बाणधरःश्रीमान्जटावल्कलमंडितः ॥ ४७ ॥ कनीयाननुजस्तस्यलक्ष्मणोऽपितथाविधः ॥ तस्यभार्याविशालाक्षीरूपिणीश्रीरिवापरा ॥ ४८ ॥ देवगंधर्वनागानांमनुष्याणांतथाविधा ॥ नदृष्टानश्रुताराजन्द्योतयंतीवनंशुभा ॥ ४९ ॥ आनेतुमहमुद्युक्तातांभार्यार्थंतवानघ ॥ लक्ष्मणोनामतद्भ्राताच्छिच्छेदममनासिकाम् ॥ ५० ॥ कर्णौचनोदितस्तेनरामेणसमहाबलः ॥ ततोऽहमतिदुःखेनरुदतीखरमन्वगाम् ॥ ५१ ॥ सोऽपिरामंसमासाद्ययुद्धराक्षसयूथपैः ॥ ततःक्षणेनरामेणतेनैवबलशालिना ॥ ५२ ॥ सर्वेतेनविनष्टावैराक्षसाभीमविक्रमाः ॥ यदिरामोमनःकुर्यात्त्रैलोक्यंनिमिषार्धतः ॥ ५३ ॥ भस्मीकुर्यान्नसंदेहइतिभातिममप्रभो ॥ यदिसातवभार्यास्यात्सफलंतवजीवितम् ॥ ५४ ॥ अतोयतस्वराजेंद्रयथातेवल्लभाभवेत् ॥ सीताराजीवपत्राक्षीसर्वलोकैकसुंदरी ॥ ५५ ॥ साक्षाद्रामस्यपुरतःस्थातुंत्वंनक्षमःप्रभो ॥ माययामोहयित्वातुप्राप्स्यसेतांरघूत्तमम् ॥ ५६ ॥ श्रुत्वातत्सूक्तवाक्यैश्चदानमानादिभिस्तथा ॥ आश्वास्यभगिनींराजाप्रविवेशस्वकंगृहम् ॥ तत्रचिंतापरोभूत्वानिद्रांरात्रौनलब्धवान् ॥ ५७ ॥ एकेनरामेणकथंमनुष्यमात्रेणनष्टःसबलःखरोमे ॥ भ्राताकथंमेबलवीर्यदर्पयुतोविनष्टोबतराघवेण ॥ ५८ ॥

विनाशिताइत्यर्थः अंतर्भावितण्यर्थः ॥ ५३ ॥ ५४ ॥ ५५ ॥ रघूत्तमंमाययामोहयित्वातांप्राप्स्यसेइत्यन्वयः ॥ ५६ ॥ तत्शूर्पणखावाक्यम् सूक्तैर्वाक्यैर्दानादिभिर्भगिनीमाश्वास्यस्वगृहंप्रविवेशेत्यन्वयः ॥ ५७ ॥ नष्टःनाशितः शोकावेशादुक्तमेवपुनराह भ्रातेति बलंशारीरम् वीर्यमांतरंबलम्दर्पोऽहंकारः ॥ ५८ ॥

परेशःपरमात्मा बलौघैर्वानरसमूहैः द्रुहिणेनब्रह्मणा ॥ ५९ ॥ अतःअल्पराज्यहान्यामहत्तरराज्यप्राप्तेः ॥ ६० ॥ भक्त्याद्रुतमल्पकालकृतयाशीघ्रंनप्रसीदेत्
एतद्राज्यत्याजनपूर्वंमहद्राज्यंनप्रापयेत् ॥ ६१ ॥ इतिश्रीमत्सकलरा०अरण्यकांडेसेतौपंचमःसर्गः ॥ ५ ॥ ॥ छ ॥ ॥ छ ॥ एकंकार्यंसीता

यद्वानरामोमनुजःपरेशोमांहंतुकामःसबलंबलौघैः॥ संप्रार्थितोऽयंद्रुहिणेनपूर्वंमनुष्यरूपोऽघ्ररघोःकुलेभूत् ॥ ५९ ॥ व
ध्योयदिस्यांपरमात्मनाऽहंवैकुंठराज्यंपरिपालयेऽहम् ॥ नोचेदिदंराक्षसराज्यमेवभोक्ष्येचिरंराममतोव्रजामि ॥ ६० ॥
इत्थंविचिंत्याखिलराक्षसेंद्रोरामंविदित्वापरमेश्वरंहरिम् ॥ विरोधबुद्ध्यैवहरिंप्रयामिद्रुतंनभक्त्याभगवान्प्रसीदेत्॥ ६१॥
॥ इतिश्रीम०रा०उमामहेश्वरसंवादेअरण्यकांडेपंचमःसर्गः॥ ५ ॥ ॥ छ ॥ ॥ विचिंत्यैवंनिशायांसप्रभा
तेरथमास्थितः॥ रावणोमनसाकार्यमेकंनिश्चित्यबुद्धिमान्॥ १ ॥ ययौमारीचसदनंपरंपारमुदन्वतः॥ मारीचस्तत्रमु
निवज्जटावल्कलधारकः ॥ २ ॥ ध्यायन्हृदिपरात्मानंनिर्गुणंगुणभासकम् ॥ समाधिविरमेपश्यद्रावणंगृहमागतम्
॥ ३ ॥ द्रुतमुत्थायचालिंग्यपूजयित्वायथाविधि ॥ कृतातिथ्यंसुखासीनंमारीचोवाक्यमब्रवीत् ॥४ ॥ समागमनमे
तत्तेरथेनैकेनरावण ॥ चिंतापरइवाभासिहृदिकार्यंविचिंतयन् ॥ ५॥ ब्रूहिमेनहिगोप्यंचेत्करवाणितवप्रियम् ॥ न्या
य्यंचेद्ब्रूहिराजेंद्रवृजिनंमांस्पृशेन्नहि ॥ ६ ॥ रावणउवाच ॥ अस्तिराजादशरथःसाकेताधिपतिःकिल॥ रामनामासुत
स्तस्यज्येष्ठःसत्यपराक्रमः ॥ ७ ॥

हरणेनरामतोमृत्युरूपम् ॥ १ ॥ २ ॥ गुणाःप्रकृतिस्तत्कार्याणितद्भासकम् ॥ ३ ॥ ४ ॥ एतदेकेनरथेनसमागमनंकिमर्थंतद्ब्रूहीतिशेषः हृदिकिंचित्कार्यंविचिंत
यन्चिंतापरइवाभासि तत्कार्यंकिमितिब्रूहीत्यन्वयः ॥ ५ ॥ न्याय्यंधर्म्यम् हियतोयत्कार्यकरणेमांवृजिनंपापंनस्पृशेत् ॥ ६ ॥ साकेतंअयोध्या ॥ ७ ॥

वनविशेषणंवनजनप्रियमिति ॥ ८ ॥ ९ ॥ १० ॥ कर्णौचिच्छेदतथाऽपिनिर्भयइत्यन्वयः ॥ ११ ॥ १२ ॥ मायामृगःमाययाविचित्रमृगरूपधरः ॥ १३ ॥ सहायंसहायत्वम् ॥ १४ ॥ इदंवचःसीतोत्तमास्त्रीसाहर्तव्येत्येवंरूपम् योगुरुपदेशेनत्वन्नाशंप्रतीक्षतेद्रष्टुमिच्छतिसएवशत्रुर्नरामःसएववध्यश्चेत्यर्थः ॥ १५ ॥

विवासयामाससुतंवनंवनजनप्रियम् ॥ भार्ययासहितंभ्रात्रालक्ष्मणेनसमन्वितम् ॥ ८ ॥ सआस्तेविपिनेघोरेपंचवट्याश्रमेशुभे ॥ तस्यभार्याविशालाक्षीसीतालोकविमोहिनी ॥ ९ ॥ रामोनिरपराधान्मेराक्षसान्भीमविक्रमान् ॥ खरंचहत्वाविपिनेसुखमास्तेऽतिनिर्भयः ॥ १० ॥ भगिन्यामेशूर्पणख्यानिर्दोषायाश्चनासिकाम् ॥ कर्णौचिच्छेदतुष्टात्मावनेतिष्ठतिनिर्भयः ॥ ११ ॥ अतस्त्वयासहायेनगत्वातत्प्राणवल्लभाम् ॥ आनयिष्यामिविपिनेरहितेराघवेणताम् ॥ १२ ॥ त्वंतुमायामृगोभूत्वाह्याश्रमादपनेष्यसि ॥ रामंचलक्ष्मणंचैवतदासीतांहराम्यहम् ॥ १३ ॥ त्वंतुतावत्सहायंमेकृत्वास्थास्यसिपूर्ववत् ॥ इत्येवंभाषमाणंतंरावणंवीक्ष्यविस्मितः ॥ १४ ॥ केनेदमुपदिष्टंतेमूलघातकरंवचः ॥ सएवशत्रुर्वध्यश्चयस्त्वन्नाशंप्रतीक्षते ॥ १५ ॥ रामस्यपौरुषंस्मृत्वाचित्तमद्यापिरावण ॥ बालोऽपिमांकौशिकस्ययज्ञसंरक्षणायसः ॥ १६ ॥ आगतस्त्विषुणैकेनपातयामाससागरे ॥ योजनानांशतंरामस्तदादिभयविह्वलः ॥ १७ ॥ स्मृत्वास्मृत्वातदेवाहंरामंपश्यामिसर्वतः ॥ १८ ॥ दंडकेऽपिपुनरप्यहंवनेपूर्ववैरमनुचिंतयन्हृदि ॥ तीक्ष्णशृंगमृगरूपमेकदामादृशैर्बहुभिरावृतोऽभ्ययाम् ॥ १९ ॥

रामस्यपौरुषंस्मृत्वाऽद्यापिमेचित्तंविकलमितिशेषः स्मर्यमाणंपौरुषंकिंचिदेवनिदर्शनायाह बालोऽपीति कौशिकस्ययज्ञरक्षणायागतोबालोऽपिरामस्त्वेकेनेषुणाऽनेकयोजनशतमुल्लंघ्यमांसागरेपातयामास तदेवरामकर्माहंस्मृत्वारामंसर्वतःसर्वत्रपश्यामि ॥ १६ ॥ १७ ॥ १८ ॥ तीक्ष्णशृंगमृगरूपधृत्वातिशेषः ॥ १९ ॥

॥ २० ॥ तेनशरेण ऊर्जितंरामागमनानिश्चयेननिर्भयम् ॥ २१ ॥ यद्वस्तुभोगसमूहसाधनंततोपिभीतभीतःअत्यंतंभीतइवराममेवभावये तदेवोपपादयति
राजेति रेफवत्त्वेनभोगसाधनानामप्येषांश्रवणंरामस्मारकतयाभयजनकमितिभावः ॥ २२ ॥ रामागमनशंकयाबाह्यकार्यंपरित्यज्यनिद्राणोऽपिराममेवाचिंत
यन्स्वपेइतिपरस्मैपदमार्षम् ॥ २३ ॥ तदास्वप्नदृष्टिगतराघवस्यामज्ञानविषयंराघवंपश्यन्नेवबोधितोविगतनिद्रआस्थितआसनेभवेयमितिशेषः राघवंप्रत्याग्रहं

राघवंजनकजासमन्वितंलक्ष्मणेनसहितंत्वरान्वितः ॥ आगतोऽहमथहंतुमुद्यतोमांविलोक्यशरमेकमक्षिपत् ॥ २० ॥
तेनविद्धहृदयोऽहमुद्भ्रमन्राक्षसेंद्रपतितोऽस्मिसागरे ॥ तत्प्रभृत्यहमिदंसमाश्रितःस्थानमूर्जितमिदंभयार्दितः ॥ २१ ॥
राममेवसततंविभावयेभीतभीतइवभोगराशितः ॥ राजरत्नरमणीरथादिकंश्रोत्रयोर्यदिगतंभयंभवेत् ॥ २२ ॥ राम
आगतइहेतिशंकयाबाह्यकार्यमपिसर्वमत्यजम् ॥ निद्रयापरिवृतोयदास्वपेराममेवमनसाऽनुचिंतयन् ॥ २३ ॥ स्वप्न
दृष्टिगतराघवंतदाबोधितोविगतनिद्रआस्थितः ॥ तद्भवानपिविमुच्यचाग्रहंराघवंप्रतिगृहंप्रयाहिभो ॥ रक्षराक्षसकुलं
चिरागतंतत्स्मृतौसकलमेवनश्यति ॥ २४ ॥ तवहितंवदतोममभाषितंपरिगृहाणपरात्मनिराघवे ॥ त्यजविरोधमतिंभ
जभक्तितःपरमकारुणिकोरघुनंदनः ॥ २५ ॥ अहमशेषमिदंमुनिवाक्यतोऽशृणवमादियुगेपरमेश्वरः ॥ ब्रह्मणाऽर्थित
उवाचतंहरिःकिंतवेप्सितमहंकरवाणितत् ॥ २६ ॥ ब्रह्मणोक्तमरविंदलोचनत्वंप्रयाहिभुविमानुषंवपुः ॥ दशरथात्मज
भावमंजसाजहिरिपुंदशकंधरंहरे ॥ २७ ॥

विमुच्येत्यन्वयः चिरागतंचिरेणवृद्धिंप्राप्तंराक्षसकुलंरक्ष एवंविरोधेनतत्स्मृतौसकलमेवरक्षःकुलंनश्यति ॥ २४ ॥ राघवेतद्विषये विरोधमतिंविरोधसंपा
दिकांमतिम् ॥ २५ ॥ पुनरपितद्विरोधान्निवृत्तयेइतिहासांतरमाह अहमिति मुनिरत्रनारदः आदियुगेसत्ययुगे ततवदेतिशेषः ॥ २६ ॥ मानुषंवपुर्धृत्वेतिशेषः
दशरथात्मजभावंदशरथपुत्रत्वंप्राप्यांजसाशीघ्रमेव ॥ २७ ॥

॥ २८ ॥ २९ ॥ ३० ॥ ॥ सत्यःसंकल्पइच्छायस्यसः राघवात्राघवंवंचयित्वेत्यर्थः ॥ ३१ ॥ मयारामाद्वधेप्राप्तेसतिहेवीराहंपरमंपदंप्राप्स्यामि ॥ ३२ ॥ अ

अतोनमानुषोरामःसाक्षान्नारायणोऽव्ययः॥ मायामानुषवेषेणवनंयातोऽतिनिर्भयः॥ २८॥ भूभारहरणार्थायगच्छ
तातगृहंसुखम्॥ श्रुत्वामारीचवचनंरावणःप्रत्यभाषत॥२९॥ परमात्मायदारामःप्रार्थितोब्रह्मणाकिल॥ मांहंतुंमानुषो
भूत्वायत्नादिहसमागतः ॥३०॥ करिष्यत्यचिरादेवसत्यसंकल्पईश्वरः ॥ अतोऽहंयत्नतःसीतामानेष्याम्येवराघवात्
॥३१॥ वधेप्राप्तेरणेवीरप्राप्स्यामिपरमंपदम्॥ यद्वारामंरणेहत्वासीतांप्राप्स्यामिनिर्भयः ॥ ३२॥ अतोत्तिष्ठमहाभा
गविचित्रमृगरूपधृक्॥ रामंसलक्ष्मणंशीघ्रमाश्रमादतिदूरतः॥ ३३॥ आक्रम्यगच्छत्वंशीघ्रंसुखंतिष्ठयथापुरा ॥ अ
तःपरंचेद्यत्किंचिद्भाषसेमद्विभीषणम्॥ ३४॥ हनिष्याम्यसिनाऽनेनत्वामत्रैवनसंशयः॥ मारीचस्तद्वचःश्रुत्वास्वात्मन्ये
वानुचिंतयत्॥ ३५॥ यदिमांराघवोहन्यात्तदामुक्तोभवार्णवात् ॥ मांहन्याद्यदिचेद्दुष्टस्तदामेनिरयोध्रुवम्॥ ३६ ॥इति
निश्चित्यमरणंरामादुत्थायवेगतः॥ अब्रवीद्रावणंराजन्करोम्याज्ञांतवप्रभो॥३७॥ इत्युक्त्वारथमास्थायगतौरामाश्र
मंप्रति॥ शुद्धजांबूनदप्रख्योमृगोऽभूद्रौप्यबिंदुकः॥ ३८॥ रत्नशृंगोमणिखुरोनीलरत्नविलोचनः॥ विद्युत्प्रभोविमुग्धा
स्योविचचारवनांतरे॥ ३९॥ रामाश्रमपदस्यांतेसीतादृष्टिपथेचरन्॥ ४०॥

तोत्तिष्ठअतउत्तिष्ठ संधिरार्षः॥ ३३ ॥ यथापुरायथापूर्वम् आश्रमेसुखंतिष्ठइत्यन्वयः॥ ३४ ॥ ३५ ॥ भवार्णवान्मुक्तोभविष्यामीतिशेषः ध्रुवंनिरयोभवेदि
तिशेषः ॥ ३६ ॥ रामान्मरणमेवसम्यगितिनिश्चित्य ॥ ३७ ॥ गतौमारीचरावणौ जांबूनदंसुवर्णम् ॥ ३८ ॥ विमुग्धंसुंदरमास्यंयस्यसः॥ ३९ ॥ ४० ॥

पुनर्भयाद्वतःपलायते ॥ ४१ ॥ ॥ इतिश्रीमत्सक०सेतौअरण्यकांडेषष्ठःसर्गः ॥ ६ ॥ ॥ छ ॥ ॥ छ ॥ अथेति ॥ १ ॥ त्वदाकारांतवाकारइवाकारोय

क्षणंचधावत्यवतिष्ठतेक्षणंसमीपमागत्यपुनर्भयाद्वृतः ॥ एवंसमायाम्मृगवेषरूपधृक्चचारसीतांपरिमोहयन्खलः ॥ ४१ ॥ ॥ इतिश्रीमद०रामायणेउमामहेश्वरसंवादेअरण्यकांडेषष्ठःसर्गः ॥ ६ ॥ ॥ छ ॥ ॥ अथरामोऽपितत्सर्वंज्ञात्वारावणचेष्टितम् ॥ उवाचसीतामेकांतेशृणुजानकिमेवचः ॥ १ ॥ रावणोभिक्षुरूपेणआगमिष्यतितेंतिकम् ॥ त्वंतुच्छायांत्वदाकारांस्थापयित्वोटजेविश ॥ २ ॥ अग्नावदृश्यरूपेणवर्षंतिष्ठममाज्ञया ॥ रावणस्यवधांतेमांपूर्ववत्प्राप्स्यसेशुभे ॥ ३ ॥ श्रुत्वारामोदितंवाक्यंसाऽपितत्रतथाकरोत् ॥ मायासीतांबहिःस्थाप्यस्वयमंतर्दधेऽनले ॥ ४ ॥ मायासीतातदापश्यन्मृगंमायाविनिर्मितम् ॥ हसंतीराममभ्येत्यप्रोवाचविनयान्विता ॥ ५ ॥ पश्यराममृगंचित्रंकानकंरत्नभूषितम् ॥ विचित्रबिंदुभिर्युक्तंचरंतमकुतोभयम् ॥ ६ ॥ बद्धादेहिममक्रीडामृगोभवतुसुंदरः ॥ तथेतिधनुरादायगच्छन्लक्ष्मणमब्रवीत् ॥ ७ ॥ रक्षत्वमतियत्नेनसीतांमत्प्राणवल्लभाम् ॥ मायिनःसंतिविपिनेराक्षसाघोरदर्शनाः ॥ ८ ॥ अतोऽत्रावहितःसाध्वींरक्षसीतामनिंदिताम् ॥ लक्ष्मणोराममाहेदंदेवायंमृगरूपधृक् ॥ मारीचोऽत्रनसंदेहएवंभूतोमृगःकुतः ॥ ९ ॥ ॥ श्रीरामउवाच ॥ यदिमारीचएवायंतदाहन्मिनसंशयः ॥ मृगश्चेदानयिष्यामिसीताविश्रामहेतवे ॥ १० ॥

स्यास्तांस्थापयित्वा बहिरितिशेषः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ अयंसुंदरःक्रीडार्थोमृगःक्रीडामृगोभवत्वित्यन्वयः ॥ ७ ॥ मायिनःछलकर्तारः ॥ ८ ॥ अवहितःसावधानः मृगरूपधरोयंमारीचएवनमृगोऽत्रनसंदेहोऽतएतदुद्देशेनमागाः एवंभूतोमृगःकुतोनकुत्रापीत्यर्थः ॥ ९ ॥ १० ॥

कुतोनअतोऽहमित्यादिर्गमिष्यामीत्यादेः ॥ ११ ॥ जगदाकृतिःजगद्रूपेणपरिणम्यमाना ॥ १२ ॥ हरीरामइतिस्वभक्तवचःसत्यंकर्तुंमारीचंजानन्नपिसीताप्रि
यार्थायसीताप्रियरूपमर्थमुद्दिश्यमृगंययौ अनुययावित्यर्थः अत्रमारीचस्यरामान्मरणंश्रेयइतिजानतःस्वस्मिन्प्रेमवत्तयास्वभक्तत्वंनिर्णीयतस्यतं मनोरथंपूर

गमिष्यामिमृगंबद्ध्वाह्यानयिष्यामिसत्वरः॥ त्वंप्रयत्नेनसंतिष्ठसीतासंरक्षणोद्यतः॥ ११ ॥ इत्युक्त्वाप्रययौरामोमाया
मृगमनुद्रुतः॥ मायायदाश्रयालोकमोहिनीजगदाकृतिः ॥ १२ ॥ निर्विकारश्चिदात्माऽपिपूर्णोऽपिमृगमन्वगात्॥ भक्ता
नुकंपीभगवानितिसत्यंवचोहरिः॥ १३ ॥ कर्तुंसीताप्रियार्थायजानन्नपिमृगंययौ॥ अन्यथापूर्णकामस्यरामस्यविदि
तात्मनः॥ १४ ॥ मृगेणवास्त्रियावाऽपिकिंकार्यंपरमात्मनः॥ कदाचिद्दृश्यतेभ्याशेक्षणंधावतिलीयते ॥ १५ ॥ दृश्यतेच
ततोदूरादेवंराममपाहरत्॥ ततोरामोऽपिविज्ञायराक्षसोऽयमितिस्फुटम् ॥ १६ ॥ विव्याधशरमादायराक्षसंमृगरूपि
णम् ॥ पपातरुधिराक्तास्योमारीचःपूर्वरूपधृक् ॥ १७ ॥ हाहतोऽस्मिमहाबाहोत्राहिलक्ष्मणमांद्रुतम्॥ इत्युक्त्वाराम
वद्वाचापपातरुधिराशनः॥ १८ ॥ यन्नामाज्ञोपिमरणेस्मृत्वातत्साम्यमाप्नुयात्॥ किमुताग्रेहरिंपश्यंस्तेनैवनिहतोऽसुरः
॥ १९ ॥ तद्देहादुत्थितंतेजःसर्वलोकस्यपश्यतः॥ राममेवाविशद्देवाविस्मयंपरमंययुः॥ २० ॥ किंकर्मकृत्वाकिंप्राप्तः
पातकीमुनिहिंसकः॥ अथवाराघवस्यायंमहिमानात्रसंशयः॥ २१ ॥

यितुंरावणस्यपूर्वविचारेणनिर्णीतभक्तस्यमनोरथंपूरयितुंचतदनुकंपयागतइतितात्पर्यम् ॥ १३ ॥ १४ ॥ अभ्याशेसमीपे ॥ १५ ॥ १६ ॥ १७ ॥ रामवद्वा
चारामवाक्तुल्यवाचा ॥ १८ ॥ सचभगवत्सायुज्यंप्राप्तइत्याह यदिति तंपश्यंस्तेनहतोऽसुरःसायुज्यंप्राप्तइतिकिमुवक्तव्यमिति ॥ १९ ॥ तदेवस्पष्टमाह तद्दे
हादिति तस्यरामप्रवेशंदृष्ट्वादेवाःपरमंविस्मयंययुः राममहिमविषयेइतिशेषः ॥ २० ॥ तदेवाह किमिति किंप्राप्तःकिंफलंप्राप्तः ॥ २१ ॥

रामभयादेवसर्वंगृहादिकंपरित्यज्यपूर्वमपिरामंस्मरन्स्थितइतिशेषः ॥ २२ ॥ तादृशःसतत्स्मृतिदूरीकृताशेषपापोंतेरामेणनिहतोरामंपश्यन्राममेवप्रापअत्रभगव
द्भयमेववैराग्यादिज्ञानांतसकलमुक्तिसाधनसंपादकंजातमितिसूचितम् मुख्यतयैतदेवसर्वसाधनमितिमंतव्यम् ॥ २३ ॥ २४ ॥ २५ ॥ किंममारएवंकिमर्थंम्रि

रामबाणेनसंविद्धःपूर्वंराममनुस्मरन् ॥ भयात्सर्वंपरित्यज्यगृहवित्तादिकंचयत् ॥ २२ ॥ हृदिरामंसदाध्यात्वानिर्धूता
शेषकल्मषः॥ अंतेरामेणनिहतःपश्यन्राममवापसः ॥ २३ ॥ द्विजोवाराक्षसोवापिपापीवाऽधार्मिकोऽपिवा ॥ त्यज
न्कलेवरंरामंस्मृत्वायातिपरंपदम् ॥ २४ ॥ इतितेऽन्योन्यमाभाष्यततोदेवादिवंययुः॥ रामस्तच्चिंतयामासम्रियमाणो
सुराधमः ॥ २५ ॥ हालक्ष्मणेतिमद्वाक्यमनुकुर्वन्ममारकिम् ॥ श्रुत्वामद्वाक्यसदृशंवाक्यंसीताऽपिकिंभवेत् ॥ २६ ॥
इतिचिंतापरीतात्मारामोदूरान्न्यवर्तत ॥ सीतातद्भाषितंश्रुत्वामारीचस्यदुरात्मनः ॥ २७ ॥ भीताऽतिदुःखसंविग्नाल
क्ष्मणंत्विदमब्रवीत् ॥ गच्छलक्ष्मणवेगेनभ्राताातेऽसुरपीडितः ॥ २८ ॥ हालक्ष्मणेतिवचनंभ्रातुस्तेनशृणोषिकिम् ॥
तामाहलक्ष्मणोदेविरामवाक्यंनतद्भवेत् ॥ २९ ॥ यःकश्चिद्राक्षसोदेविम्रियमाणोऽब्रवीद्वचः ॥ रामस्त्रैलोक्यमपियः
क्रुद्धोनाशयतिक्षणात् ॥ ३० ॥ सकथंदीनवचनंभाषतेऽमरपूजितः ॥ क्रुद्धालक्ष्मणमालोक्यसीताबाष्पविलोचना
॥ ३१ ॥ प्राहलक्ष्मणदुर्बुद्धेभ्रातुर्व्यसनमिच्छसि॥ प्रेषितोभरतेनैवरामनाशाभिकांक्षिणा ॥ ३२ ॥ मांनेतुमागतोऽ
सित्वंरामनाशउपस्थिते॥ नप्राप्स्यसेत्वंमामद्यपश्यप्राणांस्त्यजाम्यहम् ॥ ३३ ॥

तः किंभवेत्किमवस्थाभवेत् ॥ २६ ॥ २७ ॥ तदेवस्पष्टमाह भीताभीतेवेत्यर्थः यद्वा अस्यामायासीतात्वात्तन्माययैववास्तवीभीतिः ॥ २८ ॥ ततूरामवा
क्यंन तस्यभयलेशाभावात् ॥ २९ ॥ किंतुम्रियमाणस्यराक्षसस्येदंवचः तदेवाह रामइति ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥

॥३४॥ स्वबाहुभ्यामात्मानंवध्यमानाताड्यमानारुरोद कर्णौपिधायईदृशंपापमेषावदतीतितस्यश्रवणायोग्यत्वात्कर्णपिधानम् ॥ ३५ ॥ नाशमदर्शनम् ॥३६॥

नजानातीदृशंरामस्त्वांभार्याहरणोद्यतम् ॥ रामादन्यंनस्पृशामित्वांवाभरतमेववा ॥ ३४ ॥ इत्युक्त्वावध्यमानासा
स्वबाहुभ्यांरुरोदह ॥ तच्छ्रुत्वालक्ष्मणःकर्णौपिधायातीवदुःखितः ॥ ३५ ॥ मामेवंभाषसेचंडिधिक्त्वांनाशमुपैष्यसि ॥
इत्युक्त्वावनदेवीभ्यःसमर्प्यजनकात्मजाम् ॥ ३६ ॥ ययौदुःखातिसंविग्नोराममेवशनैःशनैः ॥ ततोंतरंसमालोक्यरा
वणोभिक्षुवेषधृक् ॥ ३७ ॥ सीतासमीपमगमत्स्फुरद्दंडकमंडलुः ॥ सीतातमवलोक्याशुनत्वासंपूज्यभक्तितः ॥ ३८ ॥
कंदमूलफलादीनिदत्त्वास्वागतमब्रवीत् ॥ मुनेभुंक्ष्वफलादीनिविश्रमस्वयथासुखम् ॥ ३९ ॥ इदानीमेवभर्तामेत्याग
मिष्यतितेप्रियम् ॥ करिष्यतिविशेषेणतिष्ठत्वंयदिरोचते ॥ ४० ॥ भिक्षुरुवाच ॥ कात्वंकमलपत्राक्षिकोवाभर्तातवा
नघे ॥ किमर्थमत्रतेवासोवनेराक्षससेविते ॥ ब्रूहिभद्रेततःसर्वंस्ववृत्तांतंनिवेदये ॥ ४१ ॥ सीतोवाच ॥ अयोध्याधिप
तिःश्रीमान्राजादशरथोमहान् ॥ तस्यज्येष्ठःसुतोरामःसर्वलक्षणलक्षितः ॥ ४२ ॥ तस्याहंधर्मतःपत्नीसीताजनकनं
दिनी ॥ तस्यभ्राताकनीयांश्चलक्ष्मणोभ्रातृवत्सलः ॥ ४३ ॥ पितुराज्ञांपुरस्कृत्यदंडकेवस्तुमागतः ॥ चतुर्दशसमास्त्वां
तुज्ञातुमिच्छामिमेवद ॥ ४४ ॥ भिक्षुरुवाच ॥ पौलस्त्यतनयोऽहंतुरावणोराक्षसाधिपः ॥ त्वत्कामपरितप्तोऽहंत्वांनेतुं
पुरमागतः ॥ ४५ ॥ मुनिवेषेणरामेणकिंकरिष्यसिमांभज ॥ भुंक्ष्वभोगान्मयासार्धंत्यजदुःखंवनोद्भवम् ॥ ४६ ॥

॥ ३७ ॥ ३८ ॥ ३९ तेप्रियंत्वद्योग्यातिथ्यकरणेनेतिशेषः ॥ ४० ॥ ततःत्वद्वृत्तांतश्रवणानंतरम् ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ त्वांपुरंस्वनगरंलंकाख्यंने
तुमागतइत्यन्वयः ॥ ४५ ॥ ४६ ॥

यत्‌यस्मात्‌एवंभाषसेततोराघवान्नाशमेष्यसि ॥ ४७ ॥ सहानुजोरामःआगमिष्यतीत्यन्वयः हरेःसिंहस्य शशकःक्षुद्रमृगः ॥ ४८ ॥ ४९ ॥ ५० ॥ तत्‌राव
णस्वरूपम् नखैर्धरणींविदार्यभूसंबद्धायाश्चालयितुमशक्यत्वात् बाहुभिस्तामुद्धृत्यभुवःसकाशात्‌उपरिकृत्वा ॥ ५१ ॥ तोलयित्वाबाहुभ्यांभारमनुमीय

श्रुत्वातद्वचनंसीताभीताकिंचिदुवाचतम् ॥ यदेवंभाषसेमांत्वंनाशमेष्यसिराघवात् ॥ ४७ ॥ आगमिष्यतिरामोऽपि
क्षणंतिष्ठसहानुजः ॥ मांकोधर्षयितुंशक्तोहरेर्भार्यांशशोयथा ॥ ४८ ॥ रामबाणैर्विभिन्नस्त्वंपतिष्यसिमहीतले ॥ इति
सीतावचःश्रुत्वारावणःक्रोधमूर्छितः ॥ ४९ ॥ स्वरूपंदर्शयामासमहापर्वतसन्निभम् ॥ दशास्यंविंशतिभुजंकालमेघ
समद्युति ॥ ५० ॥ तद्दृष्ट्वावनदेव्यश्चभूतानिचवितत्रसुः ॥ ततोविदार्यधरणींनखैरुद्धृत्यबाहुभिः ॥ ५१ ॥ तोलयित्वा
रथेक्षिप्त्वाययौक्षिप्रंविहायसा ॥ हारामहालक्ष्मणेतिरुदंतीजनकात्मजा ॥ ५२ ॥ भयोद्विग्नमनादीनापश्यंतीभुवमेव
सा ॥ श्रुत्वातत्क्रंदितंदीनंसीतायाःपक्षिसत्तमः ॥ ५३ ॥ जटायुरुत्थितःशीघ्रंनगाग्रात्तीक्ष्णतुंडकः ॥ तिष्ठतिष्ठेतितंप्राहको
गच्छतिममाग्रतः ॥ ५४ ॥ मुषित्वालोकनाथस्यभार्यांशून्याद्वनालयात् ॥ शुनकोमंत्रपूतंत्वंपुरोडाशमिवाध्वरे ॥ ५५ ॥
इत्युक्त्वातीक्ष्णतुंडेनचूर्णयामासतद्रथम् ॥ वाहान्बिभेदपादाभ्यांचूर्णयामासतद्धनुः ॥ ५६ ॥ ततःसीतांपरित्यज्यरा
वणःखड्गमाददे ॥ चिच्छेदपक्षौसामर्षःपक्षिराजस्यधीमतः ॥ ५७ ॥ पपातकिंचिच्छेषेणप्राणेनभुविपक्षिराट् ॥ पुन
रन्यरथेनाशुसीतामादायरावणः ॥ ५८ ॥ क्रोशंतीरामरामेतित्रातारंनाधिगच्छती ॥ हारामहाजगन्नाथमांनपश्य
सिदुःखिताम् ॥ ५९ ॥

॥ ५२ ॥ पश्यंतीआसीदितिशेषः ॥ ५३ ॥ ५४ ॥ मंत्रपूतंपुरोडाशंमुषित्वाशुनकइवलोकनाथस्यरामस्यभार्यांहृत्वाममाग्रतः कोगच्छतीत्यन्वयः ॥ ५५ ॥ ५६ ॥
॥ ५७ ॥ अन्यरथेनमायाकल्पितेनसीतामादायागच्छदितिशेषः ॥ ५८ ॥ क्रोशंतीसीता मांनपश्यसिमांकिंनपश्यसीत्यर्थः एवंविललापेतिशेषः ॥ ५९ ॥

॥ ६० ॥ ६१ ॥ जगामरावणइतिशेषः ॥ ६२ ॥ आभरणादिकंविमुच्यउत्तरीयार्धखंडेनबद्धारामायकथयंत्वितिपर्वतेचिक्षेप अनेनस्त्रीचरित्रस्याशक्यव
क्तव्यतासूचिता ॥ ६३ ॥ ६४ ॥ रहसिएकांतेगुप्तदेशे अनुपालयत् अन्वपालयदित्यर्थः अडभावआर्षः ॥ ६५ ॥ परिकर्मशरीरसंस्कारादि ॥ ६६ ॥ ॥ इ

रक्षसानीयमानांस्वांभार्यांमोचयराघव ॥ हालक्ष्मणमहाभागत्राहिमामपराधिनीम् ॥ ६० ॥ वाक्शरेणहतस्त्वंमेक्षं
तुमर्हसिदेवर ॥ इत्येवंक्रोशमानांतांरामागमनशंकया ॥६१॥ जगामवायुवेगेनसीतामादायसत्वरः ॥ विहायसानी
यमानासीतापश्यदधोमुखी ॥ ६२ ॥ पर्वताग्रस्थितान्पंचवानरान्वारिजानना ॥ उत्तरीयार्धखंडेनविमुच्याभरणादि
कम् ॥ ६३ ॥ बद्धाचिक्षेपरामायकथयंत्वितिपर्वते ॥ ततःसमुद्रमुल्लंघ्यलंकांगत्वासरावणः ॥६४ ॥ स्वांतःपुरेरहस्येताम
शोकविपिनेऽक्षिपत् ॥ राक्षसीभिःपरिवृतांमातृबुद्ध्याऽनुपालयत् ॥ ६५ ॥ कृशाऽतिदीनापरिकर्मवर्जितादुःखेनशुष्यद्व
दनाऽतिविह्वला ॥ हारामरामेतिविलप्यमानासीतास्थिताराक्षसवृंदमध्ये ॥ ६६ ॥ इतिश्रीमदध्यात्मरामायणेउमा
महेश्वरसंवादेअरण्यकांडेसप्तमःसर्गः ॥ ७ ॥ ॥ छ ॥ ॥ छ ॥ ॥ रामोमायाविनंहत्वाराक्षसंकामरूपि
णम् ॥ प्रतस्थेस्वाश्रमंगंतुंततोदूराद्ददर्शतम् ॥ १ ॥ आयातंलक्ष्मणंदीनंमुखेनपरिशुष्यता ॥ राघवश्चिंतयामासस्वा
त्मन्येवमहामतिः ॥ २ ॥ लक्ष्मणस्तन्नजानातिमायासीतांमयाकृतां ॥ ज्ञात्वाप्येनंवंचयित्वाशोचामिप्राकृतोय
था ॥ ३ ॥

तिश्रीमत्सक०सेतौअरण्यकांडेसप्तमःसर्गः ॥ ७ ॥ ॥ छ ॥ ॥ रामइति तंसीतारक्षकत्वेनस्वयंस्थापितंलक्ष्मणमित्यर्थः ॥ १ ॥ स्वात्मनिस्वचित्ते
॥ २ ॥ ननुलक्ष्मणोयद्यपिनजानातितथाऽपित्वंजानास्येवतत्राह ज्ञात्वाऽपीति ॥ ३ ॥

तादृशशोकफलमाह यद्यहमिति ॥ ४ ॥ असुरालयंलंकाम् ॥ ५ ॥ नीत्वाप्राप्यअयोध्यांयातागंता एतत्किमर्थंज्ञानगोपनंतत्राह ब्रह्मणाप्रार्थितोऽहंमनु
ष्यभावेनजातोऽस्मि एवंचतद्भावसंरक्षणायैतदितिभावः ॥ ६ ॥ ननुरावणवधोत्तरंपुनरयोध्यागमनेनतत्रस्थानेनवानफलंतत्राह मनुष्यभावमिति भक्तमुक्तिरे

यद्यहंविरतोभूत्वातूष्णींस्थास्यामिमंदिरे ॥ तदाराक्षसकोटीनांवधोपायःकथंभवेत् ॥ ४ ॥ यदिशोचामितांदुःखसंत
प्तःकामुकोयथा ॥ तदाक्रमेणानुचिन्वसीतांयास्येऽसुरालयम् ॥ रावणंसकुलंहत्वासीतामग्नौस्थितांपुनः ॥ ५ ॥ मयै
वस्थापितांनीत्वायाताऽयोध्यामतंद्रितः ॥ अहंमनुष्यभावेनजातोऽस्मिब्रह्मणाऽर्थितः ॥ ६ ॥ मनुष्यभावमापन्नःकिं
चित्कालंवसामिकौ ॥ ततोमायामनुष्यस्यचरितंमेऽनुश्रृण्वताम् ॥ ७ ॥ मुक्तिःस्यादप्रयासेनभक्तिमार्गानुवर्तिनाम् ॥
निश्चित्यैवंतदादृष्ट्वालक्ष्मणंवाक्यमब्रवीत् ॥ ८ ॥ किमर्थमागतोऽसित्वंसीतांत्यक्त्वाममप्रियाम् ॥ नीतावाभक्षितावाऽ
पिराक्षसैर्जनकात्मजा ॥ ९ ॥ लक्ष्मणःप्रांजलिःप्राहसीतायादुर्वचोरुदन् ॥ हालक्ष्मणेतिवचनंराक्षसोक्तंश्रुतंतया ॥ १० ॥
त्वद्वाक्यसदृशंश्रुत्वामांगच्छेतित्वराब्रवीत् ॥ रुदतीसामयाप्रोक्तादेविराक्षसभाषितम् ॥ नेदंरामस्यवचनंस्वस्थाभवशु
चिस्मिते ॥ ११ ॥ इत्येवंसांत्वितासाध्वीमयाप्रोवाचमांपुनः ॥ यदुक्तंदुर्वचोरामनवाच्यंपुरतस्तव ॥ १२ ॥ कर्णौपिधा
यनिर्गत्ययातोऽहंत्वांसमीक्षितुम् ॥ रामस्तुलक्ष्मणंप्राहतथाऽप्यनुचितंकृतम् ॥ १३ ॥ त्वयास्त्रीभाषितंसत्यंकृत्वात्य
क्त्वाशुभाननाम् ॥ नीतावाभक्षितावाऽपिराक्षसैर्नात्रसंशयः ॥ १४ ॥

वतत्फलमितिभावः ॥ ७ ॥ ८ ॥ नीतावेति आवयोरसान्निध्येऽवश्यमेवमवस्थाप्राप्तेतिभावः ॥ ९ ॥ १० ॥ ११ ॥ मयासांत्वितामांप्रोवाचेत्यन्वयः यदुक्तं
सीतयेतिशेषः ॥ १२ ॥ तथाऽपिस्त्रीस्वभावादेवंतदुक्तावपि ॥ १३ ॥ सत्यंकृत्वासत्यंमत्वेत्यर्थः यत्शुभाननांत्यक्त्वाआगतंतदनुचितंकृतमित्यन्वयः ॥ १४ ॥

॥ १५ ॥ मद्विमोहार्थंममभोहार्थंक्कक्कचित्विलीयसेकिमित्यर्थः ॥ १६ ॥ आचिन्वन्अन्वेषयन् कुतःकुत्रेत्यर्थः क्कचित्कुत्रेत्येवपाठः ॥ १७ ॥ मृगाइत्यादि
संबोधनानि नकुत्रचिद्ददर्शेतिशेषः ॥ १८ ॥ सर्वथासर्वप्रकारेणपश्यन्नपिक्कापिदेशेनापश्यत् यद्वानंदस्तन्मयःसर्वशक्तिसमृद्धोवातामन्वशोचत्यदचलोप्यनु

इतिचिंतापरोरामःस्वाश्रमंत्वरितोययौ ॥ तत्रादृष्ट्वाजनकजांविललापातिदुःखितः॥ १५॥ हाप्रियेक्कगताऽसित्वंनासिपू
र्वंवदाश्रमे ॥ अथवामद्विमोहार्थंलीलयाक्कविलीयसे॥ १६ ॥इत्याचिन्वन्वनंसर्वंनापश्यज्जानकींतदा ॥ वनदेव्यःकुतः
सीतांब्रुवंतुममवल्लभाम् ॥ १७ ॥ मृगाश्चपक्षिणोवृक्षादर्शयंतुममप्रियाम् ॥ इत्येवंविलपन्नेवरामःसीतांनकुत्रचित्
॥ १८॥ सर्वज्ञःसर्वथाक्कापिनापश्यद्रघुनंदनः॥ आनंदोऽप्यन्वशोचत्तामचलोऽप्यनुधावति ॥ १९ ॥ निर्ममोनिरहंका
रोऽप्यखंडानंदरूपवान्॥ ममजायेतिसीतेतिविललापातिदुःखितः॥२०॥ एवंमायामनुचरन्नसक्तोऽपिरघूत्तमः॥ आ
सक्तइवमूढानांभातितत्त्वविदांनहि॥ २१ ॥एवंविचिन्वन्सकलंवनंरामःसलक्ष्मणः॥ भग्नंरथंछत्रचापंकूबरंपतितंभुवि
॥ २२ ॥दृष्ट्वालक्ष्मणमाहेदंपश्यलक्ष्मणकेनचित्॥ नीयमानांजनकजांतंजित्वान्योजहारताम्॥ २३॥ ततःकंचिद्भुवो
भागंगत्वापर्वतसन्निभम् ॥ रुधिराक्तवपुर्दृष्ट्वारामोवाक्यमथाब्रवीत्॥ २४ ॥एषवैभक्षयित्वातांजानकींशुभदर्शनाम्
॥ शेतेविविक्तेऽतितृप्तःपश्यहन्मिनिशाचरम् ॥ २५ ॥

धावति तत्कर्तृकःशोकोऽचलकर्तृकंधावनंतदेतदाश्चर्यमितिभावः ॥ १९ ॥ निर्ममत्वादिगुणोऽपिममजायेतिविललाप मायागृहीतमनुष्यत्वस्यलोकान्सत्यत्वे
नप्रत्याययितुमितिभावः अतिदुःखितःसइव ॥ २० ॥ तदेवाह एवमिति असक्तोऽपिआसक्तिरहितोऽपि ॥ २१ ॥ छत्रचापमित्यत्रभग्नमित्यनुकर्षः ॥ २२ ॥
नीयमानांजनकजांदृष्ट्वाऽन्यस्तंजित्वातांजहारतच्चिह्नमिदंपश्येत्यन्वयः ॥२३॥ पर्वतसन्निभंतत्सदृशंरुधिराक्तवपुरितिकर्मधारयः ॥२४॥ विविक्तेएकांते॥२५॥

॥ २६ ॥ २७ ॥ रावणमितिपूर्वान्वयि छित्वास्थितोऽहमित्यन्वयः ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ म्रियमाणेनमेमयेत्यर्थः ॥ ३४ ॥ पुनः

चापमानयशीघ्रंमेबाणंचरघुनंदन ॥ तच्छ्रुत्वारामवचनंजटायुःप्राहभीतवत् ॥ २६ ॥ मांनमारयभद्रंतेम्रियमाणंस्व
कर्मणा ॥ अहंजटायुस्तेभार्याहारिणंसमनुद्रुतः ॥ २७ ॥ रावणंतत्रयुद्धंमेबभूवारिविमर्दन ॥ तस्यवाहान्रथंचापंछि
त्वाऽहंतेनघातितः ॥ २८ ॥ पतितोऽस्मिजगन्नाथप्राणांस्त्यक्ष्यामिपश्यमाम् ॥ तच्छ्रुत्वाराघवोदीनंकंठप्राणंददर्शह
॥ २९ ॥ हस्ताभ्यांसंस्पृशन्रामोदुःखाश्रुवृतलोचनः ॥ ३० ॥ जटायोब्रूहिमेभार्याकेननीताशुभानना ॥ मत्कार्यार्थंह
तोऽसित्वमतोमेप्रियबांधवः ॥ ३१ ॥जटायुःसन्नयावाचावक्त्राद्रक्तंसमुद्वमन् ॥ उवाचरावणोरामराक्षसोभीमविक्र
मः ॥ ३२ ॥ आदायमैथिलींसीतांदक्षिणाभिमुखोययौ ॥ इतोवक्तुंनमेशक्तिःप्राणांस्त्यक्ष्यामितेऽग्रतः ॥ ३३ ॥ दिष्ट्या
दृष्टोऽसिरामत्वंम्रियमाणेनमेऽनघ ॥ परमात्माऽसिविष्णुस्त्वंमायामनुजरूपधृक् ॥ ३४ ॥ अंतकालेऽपिदृष्ट्वात्वांमु
क्तोऽहंरघुसत्तम ॥ हस्ताभ्यांस्पृशमांरामपुनर्यास्यामितेपदम् ॥ ३५ ॥ तथेतिरामःपस्पर्शतदंगंपाणिनास्मयन् ॥ ततः
प्राणान्परित्यज्यजटायुःपतितोभुवि ॥ ३६ ॥रामस्तमनुशोचित्वाबंधुवत्साश्रुलोचनः ॥ लक्ष्मणेनसमानाय्यकाष्ठानि
प्रददाहतम् ॥ ३७ ॥ स्नात्वादुःखेनरामोऽपिलक्ष्मणेनसमन्वितः ॥ हत्वावनेमृगंतत्रमांसखंडान्समंततः ॥ ३८ ॥ शा
द्वलेप्राक्षिपद्रामःपृथक्पृथगनेकधा ॥ भक्षंतुपक्षिणःसर्वेतृप्तोभवतुपक्षिराट् ॥ ३९ ॥ इत्युक्त्वाराघवःप्राहजटायो
गच्छमत्पदम् ॥ मत्सारूप्यंभजस्वाद्यसर्वलोकस्यपश्यतः ॥ ४० ॥

स्पृशेत्यन्वयःयेनस्पर्शेनतेपदंयास्यामीत्यन्वयः ॥ ३५ ॥ स्मयन्पक्षिणोप्येवंपराक्रमएवंज्ञानमित्याश्चर्यवान् ॥ ३६ ॥ बंधुवदनुशोचित्वाअनेनतिरश्चामपिप्री
त्यादाहौचित्यमितिदर्शितम् ॥ ३७ ॥ ३८ ॥ भक्षंतुभक्षयंतु ॥ ३९ ॥ इत्युक्त्वाइतिसंकल्प्य ॥ ४० ॥

॥ ४१ ॥ द्योतयन् आकाशमितिशेषः ॥ ४२ ॥ राममाभाष्यरामंसंबोध्य ॥४३॥ अगणितगुणंअनंतशक्तित्वात् अप्रमेयंदेशकालपरिच्छेद्यंसंयमोनाशः आदिनाजन्मउपरमःशांतिरेवपरमाशोभायस्मिन्तम् ॥ ४४ ॥ निरवधिसुखम्तदतिरिक्तेषुब्रह्मांतेषुसुखंसावधिकमितिभावः इंदिरालक्ष्मीस्तत्कटाक्षायस्मिंस्तम् क्ष

ततोऽनंतरमेवासौदिव्यरूपधरःशुभः॥ विमानवरमारुह्यभास्वरंभानुसन्निभम् ॥ ४१ ॥ शंखचक्रगदापद्मकिरीटवरभूषणैः॥ द्योतयन्स्वप्रकाशेनपीतांबरधरोमलः॥ ४२ ॥ चतुर्भिःपार्षदैर्विष्णोस्तादृशैरभिपूजितः॥ स्तूयमानोयोगिगणैराममाभाष्यसत्वरः॥ कृतांजलिपुटोभूत्वातुष्टावरघुनंदनम् ॥ ४३ ॥ जटायुरुवाच ॥ अगणितगुणमप्रमेयमाद्यंसकलजगत्स्थितिसंयमादिहेतुम्॥ उपरमपरमंपरात्मभूतंसततमहंप्रणतोऽस्मिरामचंद्रम्॥ ४४॥ निरवधिसुखमिंदिराकटाक्षंक्षपितसुरेंद्रचतुर्मुखादिदुःखम्॥ नरवरमनिशंनतोऽस्मिरामंवरदमहंवरचापबाणहस्तम् ॥ ४५ ॥ त्रिभुवनकमनीयरूपमीड्यंरविशतभासुरमीहितप्रदानम्॥ शरणदमनिशंसुरागमूलेकृतनिलयंरघुनंदनंप्रपद्ये॥ ४६ ॥ भवविपिनदवाग्निनामधेयंभवमुखदैवतदैवतंदयालुम्॥ दनुजपतिसहस्रकोटिनाशंरवितनयासदृशंहरिंप्रपद्ये ॥ ४७ ॥ अविरतभवभावनातिदूरंभवविमुखैर्मुनिभिःसदैवदृश्यम्॥ भवजलधिसुतारणांघ्रिपोतंशरणमहंरघुनंदनंप्रपद्ये॥ ४८ ॥

पितेति सुरेंद्रादिसेवाप्रीतेनयेनतदीयदुःखंक्षपितमित्यर्थः ॥ ४५ ॥ ईहितप्रदानंभक्तेहितप्रदानस्वभावम् सुरागमूलेशोभनोरागः प्रीतिस्तस्यमूलमाश्रयश्चित्तंतत्रकृतस्थानम् ॥ ४६ ॥ भवविपिनस्यदवाग्निभूतंनामधेयंयस्यतम् रवितनयायमुनातत्सदृशंतद्वर्णम् ॥ ४७ ॥ अविरतंभवस्यसंसारस्यभावनायेषांतेषामतिदूरः भवसमुद्रस्यसुतारणेऽघ्रिरूपःपोतोयस्यतम् ॥ ४८ ॥

गिरिशःशिवःगिरिसुतापार्वतीतयोर्मनसिनिवासोयस्यतम् गिरिवरधारिणम् अयमेवकृष्णोभावीतिभावः ईहितैश्चेष्टितैरभिराममभिरामचेष्टितमितियावत् सुरा
णांवरदम् ॥ ४९ ॥ परगुणादिषुतुष्टमीर्ष्यारहितंमानसंयेषाम् ॥ ५० ॥ स्मितेनेषद्धासेनरुचिरंविकासितमाननाब्जंयस्य सुरराजनीलइंद्रनीलमणिःईशगुरोर्ब्र

गिरिशगिरिसुतामनोनिवासंगिरिवरधारिणमीहिताभिरामम् ॥ सुरवरदनुजेंद्रसेवितांघ्रिंसुरवरदंरघुनायकंप्रपद्ये
॥ ४९ ॥ परधनपरदारवर्जितानांपरगुणभूतिषुतुष्टमानसानाम् ॥ परहितनिरतात्मनांसुसेव्यंरघुवरमंबुजलोचनंप्रपद्ये
॥ ५० ॥ स्मितरुचिरविकासिताननाब्जमतिसुलभंसुरराजनीलनीलम् ॥ सितजलरुहचारुनेत्रशोभंरघुपतिमीशगुरो
र्गुरुंप्रपद्ये ॥ ५१ ॥ हरिकमलजशंभुरूपभेदात्त्वमिहविभासिगुणत्रयानुवृत्तः ॥ रविरिवजलपूरितोदपात्रेष्वमरपति
स्तुतिपात्रमीशमीडे ॥ ५२ ॥ रतिपतिशतकोटिसुंदरांगंशतपथगोचरभावनाविदूरम् ॥ यतिपतिहृदयेसदाविभातंरघु
पतिमार्तिहरंप्रभुंप्रपद्ये ॥ ५३ ॥ इत्येवंस्तुवतस्तस्यप्रसन्नोऽभूद्रघूत्तमः ॥ उवाचगच्छभद्रंतेममविष्णोःपरंपदम् ॥ ५४ ॥
शृणोतियइदंस्तोत्रंलिखेद्वानियतःपठेत् ॥ सयातिममसारूप्यंमरणेमत्स्मृतिंलभेत् ॥ ५५ ॥ इतिराघवभाषितंतदाश्रुत
वान्हर्षसमाकुलोद्विजः ॥ रघुनंदनसाम्यमास्थितःप्रययौब्रह्मसुपूजितंपदम् ॥ ५६ ॥ इतिश्रीमदध्यात्मरामायणेउमाम
हेश्वरसंवादेअरण्यकांडेअष्टमःसर्गः ॥ ८ ॥

ह्मणः ॥ ५१ ॥ यथैकोऽपिरविरुदपात्रेष्वनेकइव एवमेकोऽपित्वंगुणभेदाद्धर्यादिसंज्ञकः अमरपतिरिंद्रस्तस्यस्तुतिपात्रंतत्कृतस्तुतिविषयमित्यर्थःरतिपतिःकामः
ततोऽपिशतकोटिगुणंसुंदरमंगंयस्य शतपथोमाध्यंदिनानांब्राह्मणंतद्गोचरयातत्रोक्तप्रकारयाभावनयाऽविदूरंलभ्यमितियावत् तदेवाह यतिपतीत्यादि ॥ ५२ ॥
॥ ५३ ॥ ५४ ॥ ५५ ॥ ब्रह्मसुपूजितंपदंवैकुंठम् ॥ ५६ ॥ इतिश्रीम०सेतौअरण्यकांडेअष्टमःसर्गः ॥ ८ ॥

विपिनांतरमन्यद्वनम् दुःखंसमाश्रित्याभिनीय ॥ १ ॥ अद्भुतसमाकारःआश्चर्याकृतिः महद्वक्त्रंयस्यसः ॥ २ ॥ व्यापृतौव्यापारवंतौ ॥ ३ ॥ ४ ॥ ५ ॥ संक
लितौप्राप्तौ ॥ ६ ॥ नौआवाम् ॥ ७ ॥ छिंद्यांछिंद्यावइत्यर्थः आर्षमेकवचनम् ॥ ८ ॥ ९ ॥ मद्बाहुच्छेदसमर्थौलोकेभूर्लोकेकुतः असंभावितावेव तथादिवि

ततोरामोलक्ष्मणेनजगामविपिनांतरम् ॥ पुनर्दुःखंसमाश्रित्यसीतान्वेषणतत्परः॥ १ ॥ तत्राद्भुतसमाकारोराक्षसःप्र
त्यदृश्यत॥ वक्षस्येवमहावक्त्रश्चक्षुरादिविवर्जितः ॥२॥ बाहूयोजनमात्रेणव्यापृतौतस्यरक्षसः॥ कबंधोनामदैत्येंद्रःस
र्वसत्त्वविहिंसकः ॥ ३ ॥ तद्बाह्वोर्मध्यदेशेतौचरंतौरामलक्ष्मणौ ॥ ददर्शतुर्महासत्त्वंतद्बाहुपरिवेष्टितौ ॥ ४ ॥ रामःप्रो
वाचविहसन्पश्यलक्ष्मणराक्षसम्॥ शिरःपादविहीनोऽयंयस्यवक्षसिचाननम् ॥ ५ ॥ बाहुभ्यांलभ्यतेयद्यत्तत्तद्भक्षन्
स्थितोध्रुवम् ॥ आवामप्येतयोर्बाह्वोर्मध्येसंकलितौध्रुवम्॥ ६ ॥ गंतुमन्यत्रमार्गोनदृश्यतेरघुनंदन ॥ किंकर्तव्यमितो
ऽस्माभिरिदानींभक्षयेत्सनौ॥७॥लक्ष्मणस्तमुवाचेदंकिंविचारेणराघव॥ आवामेकैकमव्यग्रौछिंद्यांरक्षोभूजौध्रुवम्
॥८॥ तथेतिरामःखड्गेनभूजंदक्षिणमच्छिनत् ॥ तथैवलक्ष्मणोवामंचिच्छेदभुजमंजसा॥९॥ ततोऽतिविस्मितोदैत्यः
कौयुवांसुरपुंगवौ ॥ मद्बाहुच्छेदकौलोकेदिविदेवेषुवाकुतः॥१०॥ ततोऽब्रवीद्धसन्नेवरामोराजीवलोचनः॥ अयोध्या
धिपतिःश्रीमान्राजादशरथोमहान् ॥ ११ ॥ रामोऽहंतस्यपुत्रोऽसौभ्रातामेलक्ष्मणःसुधीः ॥ ममभार्याजनकजासी
तात्रैलोक्यसुंदरी॥१२॥आवांमृगययायातौतदाकेनापिरक्षसा॥नीतांसीतांविचिन्वंतौचागतौघोरकानने॥१३॥

विद्यमानेषुदेवेष्वपिअसंभावितौ तद्युवांकावित्याश्चर्येणप्रश्नः ॥ १० ॥ ११ ॥ अहंरामस्तस्यपुत्रइत्यन्वयः ॥ १२ ॥ मृगययामृगयासक्त्यायातौदूरंयातावि
त्यर्थः रक्षसानीतांसीतांविचिन्वंतावित्यन्वयः ॥ १३ ॥

अत्रतवबाहुभ्यांवेष्टितौजातौ प्राणरिरक्षयातवभुजौछिन्नौ स्ववृत्तांतमुक्त्वातद्वृत्तांतंपृच्छति त्वंचकइति ॥ १४ ॥ १५ ॥ वरनार्यःउत्तमस्त्रियः अवध्यत्वंलब्धंमयेतिशेषः ॥ १६ ॥ १७ ॥ १८ ॥ तेनयदातेबाहूच्छिद्येतेतदाशापाद्विनिर्मुक्तोभविष्यसीतिसंबंधः ॥ १९ ॥ २० ॥ कदाचिदिति राक्षसतनुप्राप्त्यनंतरमि

बाहुभ्यांवेष्टितावत्रतवप्राणरिरक्षया ॥ छिन्नौतवभूजौत्वंचकोवाविकटरूपधृक् ॥ १४ ॥ कबंधउवाच ॥ धन्योऽहंयदिरामस्त्वमागतोऽसिममांतिकम् ॥ पुरागंधर्वराजोऽहंरूपयौवनदर्पितः ॥१५॥ विचरँल्लोकमखिलंवरनारीमनोहरः ॥ तपसाब्रह्मणोलब्धमवध्यत्वंरघूत्तम ॥ १६ ॥ अष्टावक्रमुनिंदृष्ट्वाकदाचिदहसंपुरा ॥ क्रुद्धोऽसावाहदुष्टत्वंराक्षसोभवदुर्मते ॥ १७ ॥ अष्टावक्रःपुनःप्राहवंदितोमेदयापरः ॥ शापस्यांतंचमेप्राहतपसाद्योतितप्रभः ॥ १८ ॥ त्रेतायुगेदाशरथिर्भूत्वानारायणःस्वयम् ॥ आगमिष्यतितेबाहूछिद्येतेयोजनायतौ ॥ १९ ॥ तेनशापाद्विनिर्मुक्तोभविष्यसियथापुरा ॥ इतिशप्तोऽहमद्राक्षंराक्षसींतनुमात्मनः ॥२०॥ कदाचिद्देवराजानमभ्यद्रवमहंरुषा ॥ सोऽपिवज्रेणमांरामशिरोदेशेऽभ्यताडयत् ॥ २१ ॥ तदाशिरोगतंकुक्षिंपादौचरघुनंदन ॥ ब्रह्मदत्तवरान्मृत्युर्नाभून्मेवज्रताडनात् ॥ २२ ॥ मुखाभावेकथंजीवेदयमित्यमराधिपम् ॥ ऊचुःसर्वेदयाविष्टामांविलोक्यास्यवर्जितम् ॥२३॥ ततोमांप्राहमघवाजठरेतेमुखंभवेत् ॥ बाहूतेयोजनायामौभविष्यतइतोव्रज ॥ २४ ॥ इत्युक्तोऽत्रवसन्नित्यंबाहुभ्यांवनगोचरान् ॥ भक्षयाम्यधुनाबाहूखंडितौमेत्वयाऽनघ ॥ २५ ॥ इतःपरंमांश्वभ्रास्येनिक्षिपाग्नींधनावृते ॥ अग्निनादह्यमानोऽहंत्वयारघुकुलोत्तम ॥ २६ ॥

तिशेषः ॥ २१ ॥ तदावज्रेणताडनेशिरःकुक्षिंगतम् पादौचगतौनष्टावित्यनुकर्षः ॥ २२ ॥ २३ ॥ इतोव्रजेति ऊरुभ्यामेवरिंगन्नितिशेषः ॥ २४ ॥ बाहुभ्यांगृहीत्वेतिशेषः ॥ २५ ॥ श्वभ्रास्येगर्तोपरिभागे अग्नींधनावृतेअग्नियुक्तेंधनावृते ॥ २६ ॥

भार्यामार्गंभार्यालाभोपायम् ॥ २७ ॥ ततोदेहात् दह्यमानदेहादित्यर्थः कंदर्पसदृशःपुरुषउत्थितइत्यर्थः ॥ २८ ॥ २९ ॥ अतिसंभ्रमात्अत्यादरात्अनंतंदेशापरिच्छेद्यम् अनाद्यंतंआद्यंतरहितम् तेनकालापरिच्छेद्यत्वमुक्तम् मनोवाचामिति यतोवाचोनिवर्तंतेअप्राप्यमनसासहइतिश्रुतेः ॥ ३० ॥ देहद्वयंहिरण्यगर्भविराड्रूपंस्थूलंसूक्ष्मंच ततोविलक्षणंदृग्रूपंकेवलज्ञानरूपंतेसूक्ष्मंरूपंतदव्यक्तंसर्वथायोगिभिर्दुर्ज्ञेयम् इतरत्सर्वंजडम् यतोजगज्जडंदृश्यत्वादित्यनुमानमनेनसूचितम् विस्तरस्त्वस्मद्गुरुभिर्व्याससूत्रवृत्तौप्रपंचितः व्यतिरिक्तंजडत्वात्त्वत्तोभिन्नंमनस्त्वांकथंजानीयादित्यर्थः ॥ ३१ ॥ बुद्धिश्चित्तंतत्रात्माभास

पूर्वरूपमनुप्राप्यभार्यामार्गंवदामिते ॥ इत्युक्तेलक्ष्मणेनाशुश्वभ्रंनिर्मायतत्रतम् ॥ २७ ॥ निक्षिप्यप्रादहत्काष्ठैस्ततो देहात्समुत्थितः ॥ कंदर्पसदृशाकारःसर्वाभरणभूषितः ॥ २८ ॥ रामंप्रदक्षिणंकृत्वासाष्टांगंप्रणिपत्यच ॥ कृतांजलिरुवाचेदंभक्तिगद्गदयागिरा ॥ २९ ॥ गंधर्वउवाच ॥ स्तोतुमुत्सहतेमेऽद्यमनोरामातिसंभ्रमात् ॥ त्वामनंतमनाद्यंतंमनोवाचामगोचरम् ॥ ३० ॥ सूक्ष्मंतेरूपमव्यक्तंदेहद्वयविलक्षणम् ॥ दृग्रूपमितरत्सर्वंदृश्यंजडमनात्मकम् ॥ तत्कथंत्वांविजानीयाद्व्यतिरिक्तंमनःप्रभो ॥ ३१ ॥ बुद्ध्यात्माभासयोरैक्यंजीवइत्यभिधीयते ॥ बुद्ध्यादिसाक्षीब्रह्मैवतस्मिन्निर्विषयेऽखिलम् ॥ ३२ ॥ आरोप्यतेज्ञानवशान्निर्विकारेऽखिलात्मनि ॥ हिरण्यगर्भस्तेसूक्ष्मंदेहंस्थूलंविराट्स्मृतम् ॥ ३३ ॥ भावनाविषयोरामसूक्ष्मंतेध्यातृमंगलम् ॥ भूतंभव्यंभविष्यच्चयत्रेदंदृश्यतेजगत् ॥ ३४ ॥

आत्मप्रतिबिंबस्तयोरैक्यंभेदानवभासस्तद्विषयोजीवः बुद्ध्यादीनांजडानांसाक्षीअंतर्यामीब्रह्मैवशुद्धंचैतन्यम् यतोनिर्विषयेवाङ्मनसयोरगोचरेतस्मिन्निदमखिलंजगत्अज्ञानवशान्निर्विकारेत्वयिआरोप्यते हिरण्यगर्भःसूक्ष्मंदेहम् सकललिंगदेहसमष्टिरूपत्वात्तस्येतिभावः ॥ सकलस्थूलसमष्टिर्विराडितिभावः ॥ ३२ ॥ ॥ ३३ ॥ ध्यातॄणांमंगलंस्वपदप्रदत्वात् अतस्तेसूक्ष्मंभावनाविषयः हृदयपुंडरीकादौध्येयमितियावत् यद्विषयभावनायांसिद्धायांभूतभविष्यवर्तमानसर्वपदार्थज्ञानंसंभवतीत्याह भूतमित्यादिभव्यंवर्तमानम् ॥ ३४ ॥

अंडकोशरूपोभगवतोविराड्देहस्तत्रमहदादिभिरावृतेइति अत्रेयंपौराणिकसांख्यसंमताप्रक्रिया स्वव्याप्याहंकारावरणाद्दशगुणितंमहत्तत्त्वंबाह्यमावरणम् तन्मध्येऽहंकारावरणम् तदपिस्वव्याप्यंव्योमावरणाद्दशगुणितम् तन्मध्येव्योमावरणम् तस्यदशगुणितस्यमध्येवाय्वावरणम् तस्यापिदशगुणितस्यमध्येतेजआवरणम् तेजसोदशगुणितस्यमध्येजलावरणम् जलस्यदशगुणितस्यमध्येपृथिव्यावरणम् तस्यादशगुणायाममध्येपृथिवीतेजउद्भूतमंडम् तस्यापिदशगुणस्यांडस्यमध्येचतुर्दशभुवनात्मकंस्वयंभुवःस्थूलंशरीरम् स्वयंभूसंकल्पादेवजायतेइति तदाह सप्तभिरुत्तरगुणैरिति उत्तरदशगुणैःस्वस्वांतर्गतापेक्षयेत्यर्थः सधारणाश्रयः भू

स्थूलेंऽडकोशेदेहेतेमहदादिभिरावृते ॥ सप्तभिरुत्तरगुणैर्वैराजोधारणाश्रयः ॥ ३५ ॥ त्वमेवसर्वकैवल्यंलोकास्तेऽवय
वाःस्मृताः ॥ पातालंतेपादमूलंपार्ष्णिस्तवमहातलम् ॥ ३६ ॥ रसातलंतेगुल्फौतुतलातलमितीर्यते ॥ जानुनीसुत
लंरामऊरूतेवितलंतथा ॥ ३७ ॥ अतलंचमहीरामजघनंनाभिगंनभः ॥ उरःस्थलंतेज्योतींषिग्रीवातेमहउच्यते
॥ ३८ ॥ वदनंजनलोकस्तेतपस्तेशंखदेशगम् ॥ सत्यलोकोरघुश्रेष्ठशीर्षण्यास्तेसदाप्रभो ॥ ३९ ॥ इंद्रादयोलोकपा
लावाहवस्तेदिशःश्रुती ॥ अश्विनौनासिकेरामवक्त्रंतेऽग्निरुदाहृतः ॥ ४० ॥ चक्षुस्तेसवितारामम नश्चंद्रउदाहृतः ॥ भ्रू
भंगएवकालस्तेबुद्धिस्तेवाक्पतिर्भवेत् ॥ ४१ ॥ रुद्रोऽहंकाररूपस्तेवाचश्छंदांसितेऽव्यय ॥ यमस्तेदंष्ट्रदेशस्थोनक्षत्रा
णिद्विजालयः ॥ ४२ ॥

मध्यदेशेषुभावनाश्रयइत्यर्थः ॥ ३५ ॥ तदेवविराड्रूपंध्यानयोग्यंदर्शयति त्वमेवेति सर्वं कैवल्यमंतेप्राप्यंवस्त्वित्यर्थः लोकास्तेवयवाइतिसामान्यतउक्त्वातदेवविशेषेणाहपातालमित्यादि पातालंसप्तमोऽधोलोकः ॥३६॥ तलातलमितीर्यतइत्यस्यगुल्फोर्ध्वंजान्वधोभागइतिशेषः ॥३७॥ अतलंचेत्यस्योर्वोरूर्ध्वंजघनाधोभागइतिशेषः नाभेरधोभागगंजघनंतन्महीपृथ्वीत्यर्थः नभोभुवर्लोकोऽत्रज्योतींषिस्वर्गलोकोऽत्र महर्महर्लोकः ॥३८॥ तपस्तपोलोकः ॥३९ ॥ श्रुती श्रोत्रे ॥४०॥ कालोनिमेषादिर्द्विपरार्धांतः वाक्पतिर्बृहस्पतिः ॥ ४१ ॥ अहंकारश्चित्तम् छंदांसिवेदास्तेवाचः वागित्यर्थः दंष्ट्रदेशस्थोदंष्ट्रादेशस्थइत्यर्थः ह्रस्व आर्षः द्विजालयोदंतपंक्तयः ॥ ४२ ॥

मोहकरीसकलजनमोहकरी ॥ ४३ ॥ निमिषोरात्रिरुन्मेषणंदिवा सप्तसमुद्राःकुक्षिस्तव नद्यस्तवनाड्यः ॥ ४४ ॥ दृष्टिस्तवरेतः ज्ञानशक्तिस्तवमहिमासर्वत
आधिक्यम् त्वत्तुल्याज्ञानशक्तिर्नान्यत्रेतिभावः ॥ ४५ ॥ अतआधिक्यमन्यत्किंचनन हिकिमपिनेत्यर्थः ॥ ४६ ॥ सरोमपुलकइत्यनेनप्रेमरसलक्षणमुक्तम्
येनगात्रेसरोमपुलकतासप्रेमरसः इदंमेभूयाल्लब्धंचमानश्यत्वितीच्छाप्रेमेत्याहुः ॥ ४७ ॥ अयंजीवोयदातेस्थूलरूपभावकोभवतितदैवतस्यमुक्तिःस्याद्भवेदित्य

हासोमोहकरीमायास्तृष्टिस्तेपांगमोक्षणम् ॥ धर्मःपुरस्तेऽधर्मश्चपृष्ठभागउदीरितः ॥ ४३ ॥ निमिषोन्मेषणेरात्रिर्दिवा
चैवरघूत्तम ॥ समुद्राःसप्ततेकुक्षिर्नाड्योनद्यस्तवप्रभो ॥ ४४ ॥ रोमाणिवृक्षौषधयोरेतोवृष्टिस्तवप्रभो ॥ महिमाज्ञान
शक्तिस्तेएवंस्थूलंवपुस्तव ॥ ४५ ॥ यदस्मिन्स्थूलरूपेतेमनःसंधार्यतेनरैः ॥ अनायासेनमुक्तिःस्यादतोऽन्यन्नहिकिंचन
॥ ४६ ॥ अतोऽहंरामरूपंतेस्थूलमेवानुभावये ॥ यस्मिन्ध्यातेप्रेमरसःसरोमपुलकोभवेत् ॥ ४७ ॥ तदैवमुक्तिःस्या
द्रामयदातेस्थूलभावकः ॥ तदप्यास्तांतवैवाहमेतद्रूपंविचिंतये ॥ ४८ ॥ धनुर्बाणधरंश्यामंजटावल्कलभूषितम् ॥
अपीच्यवयसंसीतांविचिन्वंतंसलक्ष्मणम् ॥ ४९ ॥ इदमेवसदामेस्यान्मानसेरघुनंदन ॥ सर्वज्ञःशंकरःसाक्षात्पार्वत्या
सहितःसदा ॥ ५० ॥ त्वद्रूपमेवंसततंध्यायन्नास्तेरघूत्तम ॥ मुमूर्षूणांसदाकाश्यांतारकंब्रह्मवाचकम् ॥ ५१ ॥ राम
रामेत्युपदिशन्सदासंतुष्टमानसः ॥ अतस्त्वंजानकीनाथपरमात्मासुनिश्चितः ॥ ५२ ॥

र्थः तत्स्थूलभावनमप्यास्तांयद्यशक्यंतदातिष्ठतु तवैतद्रूपमेवाहंविचिंतयिष्यामि ॥ ४८ ॥ तद्रूपमाह धनुरिति अपीच्यवयसंतारुण्यवयस्कम् ॥ ४९ ॥ एतद्रू
पध्यानप्रार्थनेहेतुमाह सर्वज्ञइत्यादि एवंत्वद्रूपंअनुपदोक्तंधनुरित्यादि एवंचशंकरध्येयत्वादेतद्रूपध्यानप्रार्थनमितिभावः ॥ ५० ॥ ननुमनुष्यस्यममकिमेतत्प्रा
र्थ्यतेइत्याशंकायांतस्यपरमात्मत्वंयुक्त्यासाधयति मुमूर्षूणामिति तारकंब्रह्मतत्त्वमस्यादिप्रतिपाद्यंतस्यवाचकंप्रतिपादकम् ॥ ५१ ॥ रमंतेयोगिनोऽत्रेति
व्युत्पत्त्येतिभावः ॥ ५२ ॥

त्वांनजानंतिपरमात्मत्वेनेत्यर्थः ॥ ५३ ॥ ५४ ॥ योगिभिरनेनैवदेहेनयोगबलाद्गम्यंस्वर्लोकम् ॥ ५५ ॥ नित्यानुभवानुमेयंनित्यंयोऽनुभवोज्ञानंतत्तद्वस्तुविषयं तेनानुमेयम् तदुक्तंभगवद्गीतायाम् सर्वस्यचाहंहृदिसन्निविष्टोमत्तःस्मृतिर्ज्ञानमपोहनंचेति ॥ ५६ ॥ ॥ इतिश्रीमत्स०सेतौअरण्यकांडेनवमःसर्गः ॥ ९ ॥

सर्वेतेमाययामूढास्त्वांनजानंतितत्त्वतः॥ नमस्तेरामभद्रायवेधसेपरमात्मने ॥ ५३ ॥ अयोध्याधिपतेतुभ्यंनमःसौमित्रिसेवित॥ त्राहित्राहिजगन्नाथमांमायानावृणोतुते॥ ५४ ॥ रामउवाच॥ तुष्टोऽहंदेवगंधर्वभक्त्यास्तुत्याचतेऽनघ॥ याहिमेपरमंस्थानंयोगिगम्यंसनातनम् ॥ ५५ ॥ जपंतियेनित्यमनन्यबुद्ध्याभक्त्यात्वदुक्तंस्तवमागमोक्तम्॥ तेऽज्ञानसंभूतभवंविहायमांयांतिनित्यानुभवानुमेयम् ॥ ५६ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेअरण्यकांडेनवमःसर्गः ॥ ९ ॥ ॥ छ ॥ ॥ लब्ध्वावरंसगंधर्वःप्रयास्यन्राममब्रवीत्॥ शबर्यास्तेपुरोभागेआश्रमेरघुनंदन ॥ १ ॥ भक्त्यात्वत्पादकमलेभक्तिमार्गविशारदा ॥ तांप्रयाहिमहाभागसर्वंतेकथयिष्यति ॥ २ ॥ इत्युक्त्वाप्रययौसोऽपिविमानेनार्कवर्चसा॥ विष्णोःपदंरामनामस्मरणेफलमीदृशम् ॥ ३ ॥ त्यक्त्वातद्विपिनंघोरंसिंहव्याघ्रादिदूषितम्॥शनैरथाश्रमपदंशबर्यारघुनंदनः॥ ४ ॥ शबरीराममालोक्यलक्ष्मणेनसमन्वितम्॥ आयांतमाराद्धर्षेणप्रत्युत्थायाचिरेणसा॥ ५॥पतित्वापादयोरग्रेहर्षपूर्णाश्रुलोचना॥ स्वागतेनाभिनंद्याथस्वासनेसन्न्यवेशयत् ॥ ६॥

॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ प्रयास्यन्स्वस्थानमितिशेषः पुरोभागेदृश्यमानेआश्रमेत्वच्चरणभक्तिमार्गविशारदाशबरीआस्ते ॥ १ ॥ सातेसर्वंसीतावस्थितिस्थानंतत्प्राप्त्युपायंचेत्यर्थः ॥ २ ॥ विष्णोःपदंस्वर्लोकं ॥ ३ ॥ ४ ॥ अचिरेणशीघ्रम् ॥ ५ ॥ पादयोरग्रेतदंत्यभागे स्वासने शोभनेआसने ॥ ६ ॥

आदृताअर्घ्यादिभिस्तद्रूपयासपर्ययापूजासामग्र्यारामंसंपूज्यरामार्थंसंगृहीतानिदिव्यानिफलानिरामायददावित्यन्वयः तदुक्तंपाद्मेशबरींप्रस्तुत्यप्रत्युद्गम्यप्रणम्याथनिवेश्यकुशविष्टरे पादप्रक्षालनंकृत्वातत्तोयंपापनाशनम् शिरसाधार्यपीत्वाचवन्यैःपुष्पैरथार्चयत् फलानिचसुपक्वानिमूलानिमधुराणिच स्वयमास्वाद्यमाधुर्यंपरीक्ष्यपरिभक्ष्यच पश्चान्निवेदयामासराघवाभ्यांदृढव्रता फलान्यास्वाद्यकाकुत्स्थस्तस्यैमुक्तिंपरांददाविति ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ तेषांशुश्रूष

रामलक्ष्मणयोःसम्यक्पादौप्रक्षाल्यभक्तितः ॥ तज्जलेनाभिषिच्यांगमथार्घ्यादिभिरादृता ॥ ७ ॥ संपूज्यविधिवद्रामंससौमित्रिंसपर्यया ॥ संगृहीतानिदिव्यानिरामार्थंशबरीमुदा ॥ ८ ॥ फलान्यमृतकल्पानिददौरामायभक्तितः ॥ पादौसंपूज्यकुसुमैःसुगंधैःसानुलेपनैः ॥ ९ ॥ कृतातिथ्यंरघुश्रेष्ठमुपविष्टंसहानुजम् ॥ शबरीभक्तिसंपन्नाप्रांजलिर्वाक्यमब्रवीत् ॥ १० ॥ अत्राश्रमेरघुश्रेष्ठगुरवोमेमहर्षयः ॥ स्थिताःशुश्रूषणंतेषांकुर्वतीसमुपस्थिता ॥ ११ ॥ बहुवर्षसहस्राणिगतास्तेब्रह्मणःपदम् ॥ गमिष्यंतोऽब्रुवन्मांत्वंवसात्रैवसमाहिता ॥ १२ ॥ रामोदाशरथिर्जातःपरमात्मासनातनः ॥ राक्षसानांवधार्थायऋषीणांरक्षणायच ॥ १३ ॥ आगमिष्यतिचैकाग्रध्याननिष्ठास्थिराभव ॥ इदानींचित्रकूटाद्रावाश्रमेवसतिप्रभुः ॥ १४ ॥ यावदागमनंतस्यतावद्रक्षकलेवरम् ॥ दृष्ट्वैवराघवंदग्ध्वादेहंयास्यसितत्पदम् ॥ १५ ॥ तथैवाकरवंरामत्वद्ध्यानैकपरायणा ॥ प्रतीक्ष्यागमनंतेऽद्यसफलंगुरुभाषितम् ॥ १६ ॥

णंकुर्वतीअहंसम्यक्उपतेषांसमीपेस्थिता ॥ ११ ॥ बहुवर्षसहस्राणीतिपूर्वान्वयि गतास्तेइत्यस्येदानीमित्यादिःगमिष्यंतस्तेत्वमत्रैवसमाहितावसेतिमामब्रुवन् ॥ १२ ॥ १३ ॥ आगमिष्यतिअत्राश्रमेइतिशेषः अतएकाग्रंयथाभवतितथा विषयांतरसंचाररहितमितियावत् तद्ध्याननिष्ठाअत्रस्थिराभवेत्यर्थः तेषांगमनकालमाह इदानीमिति इत्युक्त्वातेगताइत्यर्थः ॥ १४ ॥ १५ ॥ तेआगमनंप्रतीक्ष्यस्थिताऽहंतथैवयथागुरुभिरुक्तंतथाऽकरवम् तच्चमेगुरुभाषितंरामोऽत्रायास्यतीत्येतत् अद्यसफलंजातम् ॥ १६ ॥

हेरामतवैतद्रूपस्यदर्शनंमेगुरूणामपिनजातम् हेअप्रमेयात्मन् अहंयोषित् अनेनसर्वधर्मानर्हत्वम् तत्रापिहीनजात्युद्भवा ॥ १७ ॥ तवदासःतद्दासइत्येवंक्रमेणशतसंख्यातउत्तरस्यापिदासीत्वेनाधिकारः साक्षात्तवदास्येतुसुतरामनधिकारः ॥ १८ ॥ इतिहेतोःयोगिनामपिमनोवागगोचरस्त्वंमेमयाकथंदृष्टइतिप्रश्नः स्तोतुमित्यादिर्विनयः ॥ १९ ॥ पुंस्त्वस्त्रीत्वकृतोविशेषोवाजातिनामाश्रमादयस्तत्कृताविशेषावानमद्भजनेकारणंकिंतुभक्तिरेवनतुपुंसोब्राह्मणस्यैवाधिकारइत्यर्थः

तवसंदर्शनंरामगुरूणामपिमेनहि॥ योषिन्मूढाऽप्रमेयात्मन्हीनजातिसमुद्भवा॥ १७॥ तवदासस्यदासानांशतसंख्योत्तरस्यवा ॥ दासीत्वेनाधिकारोऽस्तिकुतःसाक्षात्तवैवहि ॥ १८ ॥ कथंरामाद्यमेदृष्टस्त्वंमनोवागगोचरः॥ स्तोतुंनजानेदेवेशकिंकरोमिप्रसीदमे ॥ १९॥ श्रीरामउवाच॥ पुंस्त्वेस्त्रीत्वेविशेषोवाजातिनामाश्रमादयः॥ नकारणंयद्भजनेभक्तिरेवहिकारणम्॥ २०॥ यज्ञदानतपोभिर्वावेदाध्ययनकर्मभिः॥ नैवद्रष्टुमहंशक्योमद्भक्तिविमुखैःसदा॥ २१॥ तस्माद्भामिनिसंक्षेपाद्वक्ष्येऽहंभक्तिसाधनम्॥ सतांसंगतिरेवात्रसाधनंप्रथमंस्मृतम्॥ २२॥ द्वितीयंमत्कथालापस्तृतीयंमद्गुणेरणम्॥ व्याख्यातृत्वंमद्वचसांचतुर्थंसाधनंभवेत्॥ २३॥ आचार्योपासनंभद्रेमद्बुद्ध्याऽमाययासदा॥ पंचमंपुण्यशीलत्वंयमादिनियमादिच॥ २४॥

॥ २० ॥ तदेवोपपादयति यज्ञेत्यादि वेदाध्ययनकर्मभिःवेदाध्ययनेनवेदोक्तकर्मानुष्ठानैश्चेत्यर्थः ॥ २१ ॥ सत्संगएवप्रथमंमुख्यंसाधनमित्यर्थः ॥ २२ ॥ मत्कथालापःमच्चरितनिबंधालापइत्यर्थः मद्गुणेरणंमद्गुणकीर्तनम् मद्वचसांमत्प्रतिपादकवचसामुपनिषद्रूपाणांव्याख्यातृत्वम् ॥ २३॥ अमाययाऽच्छलेन मद्बुद्ध्याईश्वरबुद्ध्यागुरुसेवा पुण्यशीलत्वंपुण्यविषयेस्वारसिकीप्रवृत्तिः यमादि अहिंसाऽस्तेयब्रह्मचर्यापरिग्रहायमाः आदिनाआसनप्राणायामप्रत्याहाराः नियमादि शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानिनियमाः आदिनाधारणाध्यानसमाधयः ॥ २४ ॥

मत्पूजनेनिष्ठातत्परता ममयेमंत्रास्तदुपासकत्वंतदुपासनंतच्चसांगंतत्तन्मंत्रकल्पोक्तांगसहितम् ॥ २५ ॥ अधिकामत्तोऽप्यधिकेत्यर्थः पुत्रादरस्यपितुरिवतदादर
स्यममाधिकसंतोषदत्वादितिभावः मन्मतिःसर्वांतर्यामीभगवानितिसर्वंभगवतिवर्ततेइतिवामतिः विरागित्वंवैराग्यं शमोंऽतरिंद्रियनिग्रहः आदिनाबाह्येंद्रियनि
ग्रहरूपोदमः ॥ २६ ॥ ममतत्त्वविचारः त्वस्यतत्त्वंशुद्धंब्रह्मतद्विचारस्तत्त्वमस्यादिवाक्यतः ॥२७॥ यस्यकस्यवेत्यस्यैवप्रपंचः स्त्रियइति यस्यतन्नवविधंसा

निष्ठामत्पूजनेनित्यंषष्ठंसाधनमीरितम् ॥ ममंमंत्रोपासकत्वंसांगंसप्तममुच्यते ॥ २५ ॥ मद्भक्तेष्वधिकापूजासर्वभू
तेषुमन्मतिः ॥ बाह्यार्थेषुविरागित्वंशमादिसहितंतथा ॥२६॥ अष्टमंनवमंतत्त्वविचारोममभामिनि ॥ एवंनवविधा
भक्तिःसाधनंयस्यकस्यवा ॥ २७ ॥ स्त्रियोवापुरुषस्यापितिर्यग्योनिगतस्यवा ॥ भक्तिःसंजायतेप्रेमलक्षणाशुभलक्ष
णे ॥ २८ ॥ भक्तौसंजातमात्रायांमत्तत्त्वानुभवस्तदा ॥ ममानुभवसिद्धस्यमुक्तिस्तत्रैवजन्मनि ॥ २९ ॥ स्यात्तस्मात्का
रणंभक्तिर्मोक्षस्येतिसुनिश्चितम् ॥ प्रथमंसाधनंयस्यभवेत्तस्यक्रमेणतु ॥ ३० ॥ भवेत्सर्वंततोभक्तिर्मुक्तिरेवसुनिश्चि
तम् ॥ यस्मान्मद्भक्तियुक्तात्वंततोऽहंत्वामुपस्थितः ॥३१॥ इतोमद्दर्शनान्मुक्तिस्तवनास्त्यत्रसंशयः ॥ यदिजानासिमे
ब्रूहिसीताकमललोचना ॥ ३२ ॥ कुत्रास्तेकेनवानीताप्रियामेप्रियदर्शना ॥ ३३ ॥ शबर्युवाच ॥ देवजानासिसर्व
ज्ञसर्वंत्वंविश्वभावन ॥ तथाऽपिपृच्छसेयन्मांलोकाननुसृतःप्रभो ॥ ३४ ॥

धनंजायतेतस्यप्रेमलक्षणाभक्तिःसंजायते ममेयंभूयात्भूत्वाचमानश्यत्वित्येवमिच्छाप्रेम ॥ २८ ॥ मत्तत्त्वंब्रह्म अनुभवसिद्धस्येतितृतीयासमासःमुक्तिःस्या
दित्यन्वयः ॥ २९ ॥ ३० ॥ सर्वंनवविधंसाधनं ततोभक्तिस्ततोमुक्तिरित्यन्वयः ॥ ३१ ॥ इतोमद्दर्शनादस्मादेवमद्दर्शनादित्यर्थः ॥३२ ॥ ३३ ॥ सर्वंजानासी
त्यत्रहेतुगर्भंविशेषणंसर्वज्ञेति यत्पृच्छसेतल्लोकाननुसृतोऽसीतिजानेइतिशेषः ॥ ३४ ॥

यतस्त्वंलोकाननुस्मृतस्ततइत्यर्थः ॥ ३५ ॥ तत्राप्युपायमप्याह इतइति ॥ ३६ ॥ भीतभीतःभीतेभ्योऽपिभीतःअतिभीतइत्यर्थः ॥ ३७ ॥ कस्यभयादेवंभीतस्तत्राह वालिनइति भ्रातुर्वालिनोभयादित्यर्थः ननुतत्रवासेनकथमभयमतआह तद्वालिनोऽगम्यं एषचार्थोवाल्मीकिनासविस्तरंदर्शितः अग्रेचात्रापिदर्शयि

ततोऽहमभिधास्यामिसीतायत्राधुनास्थिता ॥ रावणेनहृतासीतालंकायांवर्ततेऽधुना ॥ ३५ ॥ इतःसमीपेरामास्तेपंपानामसरोवरम् ॥ ऋष्यमूकगिरिर्नामतत्समीपेमहानगः ॥ ३६ ॥ चतुर्भिर्मंत्रिभिःसार्धंसुग्रीवोवानराधिपः ॥ भीतभीतःसदातत्रतिष्ठत्यतुलविक्रमः ॥ ३७ ॥ वालिनश्चभयाद्भ्रातुस्तदगम्यमृषेर्भयात् ॥ वालिनस्तत्रगच्छत्वंतेनसख्यंकुरुप्रभो ॥ ३८ ॥ सुग्रीवेणससर्वंतेकार्यंसंपादयिष्यति ॥ अहमग्निंप्रवेक्ष्यामितवाग्रेरघुनंदन ॥ ३९ ॥ मुहूर्तंतिष्ठराजेंद्रयावद्दग्ध्वाकलेवरम् ॥ यास्यामिभगवन्रामतवविष्णोःपरंपदम् ॥ ४० ॥ इतिरामंसमामंत्र्यप्रविवेशहुताशनम् ॥ क्षणान्निर्धूयसकलमविद्याकृतबंधनम् ॥ रामप्रसादाच्छबरीमोक्षंप्रापातिदुर्लभम् ॥ ४१ ॥ किंदुर्लभंजगन्नाथेश्रीरामेभक्तवत्सले ॥ प्रसन्नेऽधमजन्मापिशबरीमुक्तिमापसा ॥ ४२ ॥ किंपुनर्ब्राह्मणामुख्याःपुण्याःश्रीरामचिंतकाः ॥ मुक्तिंयांतीतितद्भक्तिर्मुक्तिरेवनसंशयः ॥ ४३ ॥

ष्यति तेनसुग्रीवेणसख्यंकुरु तस्यापिविपद्ग्रस्तत्वात्तेनसख्यंसुलभंनतुवालिनेतिभावः ॥ ३८ ॥ ३९ ॥ विष्णोस्तवपरंपदंब्रह्मलोकम् ॥ ४० ॥ अविद्याकृतबंधनंसंसारः ॥ ४१ ॥ विशेषेसामान्यमर्थांतरंन्यस्यति किमिति श्रीरामेप्रसन्नेकिंदुर्लभं तमेवविशेषंसामान्योपपादकत्वेनाह यदधमजन्माशबर्यपिरामेप्रसन्नेमुक्तिमाप ॥ ४२ ॥ मुक्तिंयांतीतिकिंपुनर्वक्तव्यमित्यन्वयः यतस्त्वद्भक्तिर्मुक्तिरेव अनेनरूपकेणसर्वथातस्यामुक्तिजनकत्वंसूचितम् ॥ ४३ ॥

यतोरामचंद्रस्यभक्तिर्मुक्तिदाअतोरामस्यकामदुघंचरणपद्मयुगलंसेवध्वं तद्विषयेऽत्युत्सुकाअत्युत्कटेच्छावंतःसंतःनानाप्रकारामज्ञानविशेषभूतांअज्ञानस्यैव

भक्तिर्मुक्तिविधायिनीभगवतःश्रीरामचंद्रस्यहेलोकाःकामदुघांघ्रिपद्मयुगलंसेवध्वमत्युत्सुकाः॥ नानाज्ञानविशेषमंत्रविततिंत्यक्त्वासुदूरेभृशंरामंश्यामतनुंस्मरारिहृदयेभांतंभजध्वंबुधाः॥ ४४ ॥ ॥ इतिश्रीमद्ध्यात्मरामायणेउमामहेश्वरसंवादेअरण्यकांडेदशमःसर्गः॥ १० ॥ ॥ छ ॥ समाप्तमरण्यकांडम् ॥ छ ॥

तन्मूलसंसारस्यैवजवनिकांमंत्रविततिंमंत्रसमूहंत्यक्त्वाभृशमतिशयेनरामंभजंतु तत्रहेतुगर्भंविशेषणं स्मरारिहृदयेभांतं स्मरारिःशिवः ॥ ४४ ॥ ॥ इतिश्रीमत्सकलराजवि०श्रीरामवर्मणःकृतावध्यात्मरामायणेसेतौअरण्यकांडेदशमःसर्गः ॥ १० ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ इति श्रीमदध्यात्मरामायणे अरण्यकांडः समाप्तः ॥

॥ अथ श्रीमद्ध्यात्मरामायणे किष्किंधाकांडः प्रारभ्यते ॥


किष्किंधाकांड ४.
लक्ष्मण
अंगद
मा०
तारा
सु·
रूमा·

श्रीगणेशायनमः ॥ श्रीसीतारामचंद्रायनमः ॥ ततइति सरसांश्रेष्ठंपंपासरः ॥ १ ॥ विस्मयहेतूनाह क्रोशमात्रमिति अगाधामलशंबरम् नीरक्षीरांबुशंबरमित्यमरः अंबुजंपद्मंकह्लारस्तद्विशेषः एवमुत्पलपदेनकुमुदविशेषोत्र ॥ २ ॥ हंसादयःपक्षिविशेषाःक्रौंचनादैरुपनादितंप्रतिध्वनिमत् ॥३॥ सतांमनोवत्स्वच्छजलम्

श्रीमहादेवउवाच ॥ ततःसलक्ष्मणोरामःशनैःपंपासरस्तटम् ॥ आगत्यसरसांश्रेष्ठंदृष्ट्वाविस्मयमाययौ ॥ १ ॥ क्रोशमात्रंसुविस्तीर्णमगाधामलशंबरम् ॥ उत्फुल्लांबुजकह्लारकुमुदोत्पलमंडितम् ॥२॥ हंसकारंडवाकीर्णंचक्रवाकादिशोभितम् ॥ जलकुक्कुटकोयष्टिक्रौंचनादोपनादितम् ॥ ३ ॥ नानापुष्पलताकीर्णंनानाफलसमावृतम् ॥ सतांमनःस्वच्छजलंपद्मकिंजल्कवासितम् ॥ ४ ॥ तत्रोपस्पृश्यसलिलंपीत्वाश्रमहरंविभुः ॥ सानुजःसरसस्तीरेशीतलेनपथाययौ ॥५॥ ऋष्यमूकगिरेःपार्श्वेगच्छंतौरामलक्ष्मणौ ॥ धनुर्बाणकरौदांतौजटावल्कलमंडितौ ॥ पश्यंतौविविधान्वृक्षान्गिरेःशोभांसुविक्रमौ ॥ ६ ॥ सुग्रीवस्तुगिरेर्मूर्ध्निचतुर्भिःसहवानरैः ॥ स्थित्वाददर्शतौयांतावारुरोहगिरेःशिरः ॥ ७ ॥ भयादाह हनूमंतंकौतौवीरवरौसखे ॥ गच्छजानीहिभद्रंतेबटुर्भूत्वाद्विजाकृतिः ॥ ८ ॥ वालिनाप्रेषितौकिंवामांहंतुंसमुपागतौ ॥ ताभ्यांसंभाषणंकृत्वाजानीहिहृदयंतयोः ॥ ९ ॥ यदितौदुष्टहृदयौसंज्ञांकुरुकराग्रतः ॥ विनयावनतोभूत्वाएवंजानीहिनिश्चयम् ॥ १० ॥ तथेतिबटुरूपेणहनुमान्समुपागतः ॥ विनयावनतोभूत्वारामंनत्वेदमब्रवीत् ॥ ११ ॥

॥ ४ ॥ उपस्पृश्यस्नात्वा ॥ ५ ॥ दांतौनिगृहीतेंद्रियौ विविधान्वृक्षान्गिरेःशोभांचपश्यंतौ ॥ ६ ॥ तौददर्शदृष्ट्वाचभयाद्गिरेःशिरआरुरोहेत्यन्वयः ॥ ७ ॥ भद्रंतेइतिप्रेरणानिमित्तंआशीर्वादः ॥ ८॥ किंवालिनाप्रेषितौमांहंतुमागतौ वापक्षांतरे उतान्यथेतितयोर्हृदयंसंभाषणंकृत्वाजानीहि अंतःकरणानुरूपत्वाद्वाचःसंभाषणेनतन्निर्णयः ॥ ९ ॥ संज्ञांकुरु पलायनार्थमितिशेषः एवंसंकेतस्यनिश्चयंजानीहीत्यर्थः ॥ १० ॥ ११ ॥

॥ १२ ॥ भातिजानाति प्रधानपुरुषौमुख्यपुरुषौनरनारायणावित्यर्थः मुख्यत्वमेवाह जगद्धेतूइत्यादिना ॥ १३ ॥ लीलयाचरंताविवगच्छंताविव वस्तुतोविभुत्वाद्गतिहीनावेव ॥ १४ ॥ स्थितिलयौसर्गंचलीलयाकर्तुमुद्यतौ रक्षसांलयस्तदितरजगतःसर्गस्थिती ॥ १५ ॥ प्रेरकौअंतर्यामितयेत्यर्थः तदेवाह सर्वहृदय

कौयुवांपुरुषव्याघ्रौयुवानौवीरसंमतौ ॥ द्योतयंतौदिशःसर्वाःप्रभयाभास्कराविव ॥ १२ ॥ युवांत्रैलोक्यकर्तारावितिभातिमनोमम ॥ युवांप्रधानपुरुषौजगद्धेतूजगन्मयौ ॥ १३ ॥ माययामानुषाकारौचरंताविवलीलया ॥ भूभारहरणार्थायभक्तानांपालनायच ॥ १४ ॥ अवतीर्णाविहपरौचरंतौक्षत्रियाकृती ॥ जगत्स्थितिलयौसर्गंलीलयाकर्तुमुद्यतौ ॥ १५ ॥ स्वतंत्रौप्रेरकौसर्वहृदयस्थाविहेश्वरौ ॥ नरनारायणौलोकेचरंताविितिमेमतिः ॥ १६ ॥ श्रीरामोलक्ष्मणंप्राहपश्यैनंबटुरूपिणम् ॥ शब्दशास्त्रमशेषेणश्रुतंनूनमनेकधा ॥ १७ ॥ अनेनभाषितंकृत्स्नंनकिंचिदपशब्दितम् ॥ ततःप्राहहनूमंतंराघवोज्ञानविग्रहः ॥ १८ ॥ अहंदाशरथीरामस्त्वयंमेलक्ष्मणोऽनुजः ॥ सीतयाभार्ययासार्धंपितुर्वचनगौरवात् ॥ १९ ॥ आगतस्तत्रविपिनेस्थितोहंदंडकेद्विज ॥ तत्रभार्याहृतासीतारक्षसाकेनचिन्मम ॥ २० ॥ तामन्वेष्टुमिहायातौत्वंकोवाकस्यवावद ॥ बटुरुवाच ॥ सुग्रीवोनामराजायोवानराणांमहामतिः ॥ चतुर्भिर्मंत्रिभिःसार्धंगिरिमूर्धनितिष्ठति ॥ २१ ॥ भ्राताकनीयान्सुग्रीवोवालिनःपापचेतसः ॥ तेननिष्कासितोभार्याहृतातस्येहवालिना ॥ २२ ॥

स्थाविति इहलोकेचरंतौइत्यन्वयः ॥ १६ ॥ शब्दशास्त्रंव्याकरणम् ॥ १७ ॥ कृत्स्नंबह्वित्यर्थः ज्ञानविग्रहइत्यनेनचिदानंदएवमाययाएवंशरीररूपेणभातीति सूचितम् ॥ १८ ॥ १९ ॥ २० ॥ यःसुग्रीवोनामतेननाम्नाप्रसिद्धोवानराणांराजासगिरिमूर्धनितिष्ठतीत्यन्वयः ॥ २१ ॥ तत्रावस्थानेहेतुमाह भ्रातेति निष्कासितःहीनराज्यःकृतः भार्याचहृता ॥ २२ ॥

॥ २३ ॥ तेनसख्यंतुयुक्तंसमदुःखत्वात् नतुवालिनेतिभावः ॥ २४ ॥ २५ ॥ तस्यापियत्कार्यंवालिवधरूपम् ॥ २६ ॥ पर्वतोपरिगमनेश्रमातिशयात्स्वस्कं

तद्भयादृष्यमूकाख्यंगिरिमाश्रित्यसंस्थितः ॥ अहंसुग्रीवसचिवोवायुपुत्रोमहामते ॥ २३ ॥ हनूमान्नामविख्यातोञ्
जनीगर्भसंभवः॥ तेनसख्यंत्वयायुक्तंसुग्रीवेणरघूत्तम ॥ २४ ॥ भार्यापहारिणंहंतुंसहायस्तेभविष्यति ॥ इदानीमेव
गच्छामआगच्छयदिरोचते ॥ २५ ॥ श्रीरामउवाच ॥ अहमप्यागतस्तेनसख्यंकर्तुंकपीश्वर ॥ सख्युस्तस्यापियत्का
र्यंतत्करिष्याम्यसंशयम् ॥ २६ ॥ हनूमान्स्वस्वरूपेणस्थितोराममथाब्रवीत् ॥ आरोहतांममस्कंधौगच्छामःपर्वतो
परि ॥ २७ ॥ यत्रतिष्ठतिसुग्रीवोमंत्रिभिर्वालिनोभयात् ॥ तथेतितस्यारुरोहस्कंधंरामोथलक्ष्मणः॥ २८ ॥ उत्पपात
गिरेर्मूर्ध्निक्षणादेवमहाकपिः॥ वृक्षच्छायांसमाश्रित्यस्थितौतौरामलक्ष्मणौ ॥ २९ ॥ हनूमानपिसुग्रीवमुपगम्यकृतां
जलिः॥ व्येतुतेभयमायातौराजन्श्रीरामलक्ष्मणौ ॥ ३० ॥ शीघ्रमुत्तिष्ठरामेणसख्यंतेयोजितंमया ॥ अग्निंसाक्षिण
मारोप्यतेनसख्यंद्रुतंकुरु ॥ ३१ ॥ ततोतिहर्षात्सुग्रीवःसमागम्यरघूत्तमम् ॥ वृक्षशाखांस्वयंछित्वाविष्टरायददौमुदा
॥ ३२ ॥ हनूमाल्लक्ष्मणायादात्सुग्रीवायचलक्ष्मणः ॥ हर्षेणमहताविष्टाःसर्वएवावतस्थिरे ॥ ३३ ॥ लक्ष्मणस्त्वब्र
वीत्सर्वंरामवृत्तांतमादितः॥ वनवासाभिगमनंसीताहरणमेवच ॥ ३४ ॥ लक्ष्मणोक्तंवचःश्रुत्वासुग्रीवोराममब्रवीत् ॥
अहंकरिष्येराजेंद्रसीतायाःपरिमार्गणम् ॥ ३५ ॥

धारोहणप्रेरणा ॥ २७ ॥ मंत्रिभिःसहेतिशेषः तथेति उक्त्वेतिशेषः ॥ २८ ॥ उत्पपातउत्पत्यजगामेत्यर्थः स्थितौस्थापितावित्यर्थः ॥ २९ ॥ व्येतुभयंवालि
प्रेरितावितिशंकाकृतम् ॥ ३० ॥ योजितंताभ्यामंगीकारंकारितम् आरोप्यकृत्वा ॥ ३१ ॥ विष्टरायआसनार्थम् ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥

शत्रुघातिनस्तेशत्रुवधेसाहाय्यमपिकरिष्येइत्यन्वयः ॥ ३६ ॥ विहायसानीयमानांप्रमदोत्तमामपश्यमितिशेषः ॥ ३७ ॥ साचरामरामेतिक्रोशंतीअस्मानूपर्व
तोपरिदृष्ट्वास्वोत्तरीयेणतदेकदेशेनाभरणानिआमुच्यबद्ध्वापुनरस्मान्निरीक्ष्यतान्यप्यधःपरित्यज्यक्रोशंतीतेननीता क्रोशनक्रिययासमानकर्तृकःक्त्वा अहंच

साहाय्यमपितेरामकरिष्येशत्रुघातिनः ॥ शृणुराममयादृष्टंकिंचित्तेकथयाम्यहम् ॥ ३६ ॥ एकदामंत्रिभिःसार्धंस्थितो
हंगिरिमूर्धनि ॥ विहायसानीयमानांकेनचित्प्रमदोत्तमाम् ॥ ३७ ॥ क्रोशंतीरामरामेतिदृष्ट्वास्मान्पर्वतोपरि ॥ आमु
च्याभरणान्याशुस्वोत्तरीयेणभामिनी ॥ ३८ ॥ निरीक्ष्याधःपरित्यज्यक्रोशंतीतेनरक्षसा ॥ नीताहंभूषणान्याशुगुहा
यामक्षिपंप्रभो ॥ ३९ ॥ इदानीमपिपश्यत्वंजानीहितववानवा ॥ इत्युक्त्वानीयरामायदर्शयामासवानरः ॥ ४० ॥
विमुच्यरामस्तद्दृष्ट्वाहासीतेतिमुहुर्मुहुः ॥ हृदिनिक्षिप्यतत्सर्वंरुरोदप्राकृतोयथा ॥ ४१ ॥ आश्वास्यराघवंभ्रातालक्ष्म
णोवाक्यमब्रवीत् ॥ अचिरेणैवतेरामप्राप्यतेजानकीशुभा ॥ वानरेंद्रसहायेनहत्वारावणमाहवे ॥ ४२ ॥ सुग्रीवोप्या
हहेरामप्रतिज्ञांकरवाणिते ॥ समरेरावणंहत्वातवदास्यामिजानकीम् ॥ ४३ ॥ ततोहनूमान्प्रज्वाल्यतयोरग्निंसमी
पतः ॥ तावुभौरामसुग्रीवावग्नौसाक्षिणितिष्ठति ॥ ४४ ॥ बाहूप्रसार्यचालिंग्यपरस्परमकल्मषौ ॥ समीपेरघुनाथस्य
सुग्रीवःसमुपाविशत् ॥ ४५ ॥

तानिगुहायामक्षिपम् ॥ ३८ ॥ ३९ ॥ इदानींत्वमपिपश्यतवभार्यायाभवंतिवानभवंतिचेतिजानीहिनिश्चयंकुरु ॥ ४० ॥ तत्भूषणयुक्तंवासःखंडंविमुच्यदृ
ष्ट्वाभूषणानीतिशेषः तत्सर्वंभूषणजातम् ॥ ४१ ॥ तेत्वया ॥ ४२ ॥ ४३ ॥ तयोःसमीपतोग्निंप्रज्वाल्यसख्यंकुरुतामित्युवाचेतिशेषः ॥ ४४ ॥ आलिंग्यपर
स्परंसखेइत्यवदतामितिशेषः सखित्वकरणफलंदर्शयति समीपेइति ॥ ४५ ॥

वालिनायदुदंतंमद्विषयेकृतंतच्छृणु ॥ ४६ ॥ नाम्नामायावीत्यन्वयः समुपाह्वयत्युद्धायेतिशेषः ॥ ४७ ॥ तदाह्वानममर्षणोऽसहमानः ॥ ४८ ॥ तेनमुष्टिघाते
नसंविग्नःपीडितः तंमायाविनंमायावंतंस्वगुहांप्रविष्टमालोक्येत्यन्वयः ॥ ४९ ॥ ५० ॥ मृतोवालीतिनिश्चयेनेतिशेषः ॥५१ ॥ रक्षसाहतोवालीमृतइतिस्वज्ञाती

स्वोदंतंकथयामासप्रणयाद्रघुनायके ॥ सखेशृणुममोदंतंवालिनायत्कृतंपुरा ॥ ४६॥ मयपुत्रोथमायावीनाम्नापरम
दुर्मदः ॥ किष्किंधांसमुपागत्यवालिनंसमुपाह्वयत् ॥ ४७ ॥ सिंहनादेनमहतावालीतुतदमर्षणः ॥ निर्ययौक्रोधताम्रा
क्षोजघानदृढमुष्टिना ॥ ४८ ॥ दुद्रावतेनसंविग्नोजगामस्वगुहांप्रति ॥ अनुदुद्रावतंवालीमायाविनमहंतथा ॥ ततःप्रवि
ष्टमालोक्यगुहांमायाविनंरुषा ॥ ४९ ॥ वालीमामाहतिष्ठत्वंबहिर्गच्छाम्यहंगुहाम् ॥ इत्युक्त्वाविश्यसगुहांमासमेकंन
निर्ययौ ॥ ५० ॥ मासादूर्ध्वंगुहाद्वारान्निर्गतंरुधिरंबहु ॥ तदृष्ट्वापरितप्तांगोमृतोवालीतिदुःखितः ॥ ५१ ॥ गुहाद्वारिशि
लामेकांनिधायगृहमागतः ॥ ततोऽब्रुवंमृतोवालीगुहायांरक्षसाहतः ॥ ५२ ॥ तच्छ्रुत्वादुःखिताःसर्वेमामनिच्छंतमप्यु
त ॥ राज्येऽभिषेचनंचक्रुःसर्वेवानरमंत्रिणः ॥ ५३ ॥ शिष्टंतदामयाराज्यंकिंचित्कालमरिंदम ॥ ततःसमागतोवाली
मामाहपरुषंरुषा ॥ ५४ ॥ बहुधाभर्त्सयित्वामांनिजघानचमुष्टिभिः ॥ ततोनिर्गत्यनगरादधावंपरयाभिया ॥ ५५ ॥
लोकान्सर्वान्परिक्रम्यऋष्यमूकंसमाश्रितः ॥ ऋषेःशापभयात्सोपिनायातीमंगिरिंप्रभो ॥ ५६ ॥ तदादिममभार्यांस
स्वयंभुंक्तेविमूढधीः ॥ अतोदुःखेनसंतप्तोहृतदारोहृताश्रयः ॥ ५७ ॥ वसाम्यद्यभवत्पादसंस्पर्शात्सुखितोस्म्यहम् ॥
मित्रदुःखेनसंतप्तोरामोराजीवलोचनः ॥ ५८ ॥

नब्रुवम् ॥ ५२ ॥ अनिच्छंतंराज्याभिषेकमितिशेषः ॥ ५३ ॥ शिष्टंपालितम् परुषंभ्रातृद्वेषिन्नित्यादिवाक्यम् ॥५४॥ परयाभियावालिजया ॥५५॥ ऋष्यमू
कंतदाख्यमिमंपर्वतम् ऋषेःशापभयात् तच्चानुपदमेवस्फुटंभविष्यति ॥ ५६ ॥ हृताश्रयःहृतगृहः ॥ ५७ ॥ सुखितोस्मिअद्यत्वादृशमित्रलाभेनेतिशेषः ॥५८॥

॥ ५९ ॥ बलवतांबलीसर्वेभ्योबलवद्भ्योप्यधिकबलवानित्यर्थः दुरासदंवालिनमितिशेषः ॥ ६० ॥ तद्बलंवालिनोबलम् ॥ ६१ ॥ ६२ ॥ असहमानइतिच्छे
दः ॥ ६३ ॥ अस्यशिरोहस्ताभ्यांभ्रामयन्ग्रीवातश्चालयन्छित्वाग्रीवारूपादाधारादुत्पाट्यहस्ताभ्यांतोलयित्वाएतावद्भारकमितिज्ञात्वाभुविअक्षिपत्॥ ६४ ॥

हनिष्यामितवद्वेष्यंशीघ्रंभार्यापहारिणम् ॥ इतिप्रतिज्ञामकरोत्सुग्रीवस्यपुरस्तदा ॥ ५९ ॥ सुग्रीवोप्याहराजेंद्रवालीब
लवतांबली ॥ कथंहनिष्यतिभवान्देवैरपिदुरासदम् ॥ ६० ॥ शृणुतेकथयिष्यामितद्बलंबलिनांवर ॥ कदाचिद्दुंदुभिर्ना
ममहाकायोमहाबलः ॥ ६१ ॥ किष्किंधामगमद्रामममहामहिषरूपधृक् ॥ युद्धायवालिनंरात्रौसमाह्वयतभीषणः ॥ ६२ ॥
तच्छ्रुत्वाऽसहमानोसौवालीपरमकोपनः ॥ महिषंशृंगयोर्धृत्वापातयामासभूतले ॥ ६३ ॥ पादेनैकेनतत्कायमाक्रम्या
स्यशिरोमहत् ॥ हस्ताभ्यांभ्रामयंश्छित्वातोलयित्वाक्षिपद्भुवि ॥ ६४॥ पपाततच्छिरोराममातंगाश्रमसन्निधौ ॥ यो
जनात्पतितंतस्मान्मुनेराश्रममंडले ॥ ६५ ॥ रक्तवृष्टिःपपातोच्चैर्दृष्ट्वातांक्रोधमूर्च्छितः ॥ मातंगोवालिनंप्राहयद्यागंता
सिमेगिरिम् ॥ ६६ ॥ इतःपरंभग्नशिरामरिष्यसिनसंशयः ॥ एवंशप्तस्तदारभ्यऋष्यमूकंनयात्यसौ ॥ ६७ ॥ एतज्ज्ञा
त्वाहमप्यत्रवसामिभयवर्जितः ॥ रामपश्यशिरस्तस्यदुंदुभेःपर्वतोपमम् ॥ ६८ ॥ तत्क्षेपणेयदाशक्तःशक्तस्त्वंवालि
नोवधे ॥ इत्युक्त्वादर्शयामासशिरस्तद्गिरिसन्निभम् ॥ ६९ ॥ दृष्ट्वारामःस्मितंकृत्वापादांगुष्ठेनचाक्षिपत् ॥ दशयोजन
पर्यंतंतदद्भुतमिवाभवत् ॥ ७० ॥

क्षेपवेगेनभुवऊर्ध्वंयोजनमात्रंगत्वाततोमातंगाश्रमेपपात यस्माच्चयोजनात्तन्मितादूर्ध्वदेशात्पतितंअतस्तदाश्रमेशिरसोगलितारक्तवृष्टिःपपात ततःक्रुद्धःसवालि
नंप्राह ॥ ६५ ॥ ६६ ॥ ६७ ॥ एतत्ज्ञात्वातदगमनंज्ञात्वा ॥ ६८ ॥ यदायदितस्यबाणेनदूरंक्षेपणेत्वंशक्तस्तर्हित्वंवालिवधेशक्तः ॥ ६९ ॥ ७० ॥

साधुसाध्वितिसंप्राहसुग्रीवोमंत्रिभिःसह ॥ पुनरप्याहसुग्रीवोरामंभक्तपरायणम्॥ ७१ ॥ एतेतालामहासाराःसप्तपश्यरघूत्तम ॥ एकैकंचालयित्वासौनिष्पत्रान्कुरुतेंजसा ॥ ७२ ॥ यदित्वमेकबाणेनविद्धाछिद्रंकरोषिचेत् ॥ हतस्त्वयातदावालीविश्वासोमेप्रजायते ॥ तथेतिधनुरादायसायकंतत्रसंदधे ॥ ७३ ॥ बिभेदचतदारामःसप्ततालान्महाबलः ॥ तालान्सप्तविनिर्भिद्यगिरिंभूमिंचसायकः ॥ ७४ ॥ पुनरागत्यरामस्यतूणीरेपूर्ववत्स्थितः ॥ ततोतिहर्षात्सुग्रीवोराममाहातिविस्मितः ॥ ७५ ॥ देवत्वंजगतांनाथःपरमात्मानसंशयः ॥ मत्पूर्वकृतपुण्यौघैःसंगतोद्यमयासह ॥ ७६ ॥ त्वांभजंतिमहात्मानःसंसारविनिवृत्तये ॥ त्वांप्राप्यमोक्षसचिवंप्रार्थयेहंकथंभवम् ॥ ७७ ॥ दाराःपुत्राधनंराज्यंसर्वंत्वन्माययाकृतम् ॥ अतोहंदेवदेवेशनाकांक्षेन्यत्प्रसीदमे ॥ ७८ ॥ आनंदानुभवंत्वाद्यप्राप्तोहंभाग्यगौरवात् ॥ मृदर्थंयतमानेननिधानमिवसत्पते ॥ ७९ ॥ अनाद्यविद्यासंसिद्धंबंधनंछिन्नमद्यनः ॥ यज्ञदानतपःकर्मपूर्तेष्टादिभिरप्यसौ ॥ ८० ॥ नजीर्यतेपुनर्दार्ढ्यंभजतेसंसृतिःप्रभो ॥ त्वत्पाददर्शनात्सद्योनाशमेतिनसंशयः ॥ ८१ ॥

॥ ७१ ॥ चालयित्वामूलतोबाहुभ्यांकंपनेन अंजसाअनायासेन ॥ ७२ ॥ छिद्रंकरोषिसप्तस्वपीतिशेषः ॥ ७३ ॥ ७४ ॥ ७५ ॥ एवमाश्चर्यकर्मणारामंपरमात्मानंज्ञात्वास्तौति देवेति संगतिंमैत्रींप्राप्तः ॥ ७६ ॥ मोक्षसचिवंमोक्षप्रदत्वात्तत्सचिवम् भवंसंसारम् ॥ ७७ ॥ अन्यद्दारपुत्रादिकंत्वन्मायाकृतत्वेनमायिकत्वान्नाकांक्षेऽतोमांनिवर्तयेत्यर्थः ॥ ७८ ॥ मृदर्थंभूमिंखनतायथानिधानंधनराशिःप्राप्तोभवतिएवमहमानंदानुभवंतद्रूपंत्वांप्राप्तः ॥ ७९ ॥ अनाद्यविद्ययासंसिद्धंनिष्पन्नंविषयवासनारूपंबंधनंसंसारप्रवर्तकंनश्छिन्नंनष्टम् अन्येभ्योभगवद्दर्शनस्याधिक्यमाह यज्ञेत्यादि यज्ञादिभिरप्यसौसंसृतिस्तत्कारणंविषयवासनारूपंबंधनंनजीर्यतिअपितुदार्ढ्यमेवभजते त्वच्चरणदर्शनात्तुसद्यस्तन्नाशमेति ॥ ८० ॥ ८१ ॥

यच्चित्तंयस्यचित्तं तस्यानर्थानांनानासंसृतिरूपाणांमूलमज्ञानंनश्यतीत्यन्वयः ॥ ८२ ॥ मेमनःसदात्वयितिष्ठतु ॥ ८३ ॥ यस्यवाणीत्वन्नामगायतिसमुच्यते
॥ ८४ ॥ बंधस्यसंसारकारणस्यमोचनीम् ॥ ८५ ॥ त्वन्माययाकृतःसंसारोयस्यसः त्वदंशः त्वत्प्रतिबिंबरूपत्वात् अतःस्वपादयोर्भक्तिमादिश्यदत्त्वात्राहि
॥ ८६ ॥ त्वन्मायावृतचेतसइतःपूर्वंमित्रादयआसन् अद्यतुत्वत्पाददर्शनान्मेसर्वंब्रह्मैवेतिभातीत्यन्वयः ॥ ८७ ॥ गुणविशेषतासत्वादिगुणविशेषवत्तेत्यर्थः

क्षणार्धमपियच्चित्तंत्वयितिष्ठत्यचंचलम् ॥ तस्याज्ञानमनर्थानांमूलंनश्यतितत्क्षणात् ॥ ८२ ॥ तत्तिष्ठतुमनोरामत्व
यिनान्यत्रमेसदा ॥ ८३ ॥ रामरामेतियद्वाणीमधुरंगायतिक्षणम् ॥ सब्रह्महासुरापोवामुच्यतेसर्वपातकैः ॥ ८४ ॥ न
कांक्षेरिजयंरामनचदारसुखादिकम् ॥ भक्तिमेवसदाकांक्षेत्वयिबंधविमोचनीम् ॥ ८५ ॥ त्वन्मायाकृतसंसारस्त्वदं
शोहंरघूत्तम ॥ स्वपादभक्तिमादिश्यत्राहिमांभवसंकटात् ॥ ८६ ॥ पूर्वंमित्राद्युदासीनास्त्वन्मायावृतचेतसः ॥ आस
न्मेद्यभवत्पाददर्शनादेवराघव ॥ ८७ ॥ सर्वंब्रह्मैवमेभातिक्कमित्रंक्कचमेरिपुः ॥ यावत्त्वन्माययाबद्धस्तावद्गुणविशेष
ता ॥ ८८ ॥ सायावदस्तिनानात्वंतावद्भवतिनान्यथा ॥ यावन्नानात्वमज्ञानात्तावत्कालकृतंभयम् ॥ ८९ ॥ अतोऽ
विद्यामुपास्तेयःसोंऽधेतमसिमज्जति ॥ मायामूलमिदंसर्वंपुत्रदारादिबंधनम् ॥ अतोत्सारयमायांत्वंदासींतवरघूत्तम
॥ ९० ॥ त्वत्पादपद्मार्पितचित्तवृत्तिस्त्वन्नामसंगीतकथासुवाणी ॥ त्वद्भक्तसेवातिरतौकरौमे त्वदंगसंगंलभतांमदं
गम् ॥ ९१ ॥

॥ ८८ ॥ सागुणविशेषता नानात्वंसुहृन्मित्रार्युदासीनत्वरूपोभेदः कालकृतंमृत्युकृतम् ॥ ८९ ॥ अतःअविद्यामितिच्छेदः अतउत्सारयेतिच्छेदः संधिरार्षः
॥ ९० ॥ त्वत्पादपद्मयोरर्पिताचित्तवृत्तिर्येनसः ईदृशोहंभूयासमितिशेषः त्वन्नामविषयसंगीतकथासुवाणीनिरतानिष्ठत्वित्यन्वयः त्वद्भक्तानांसेवायांनि
रतौतत्परौ ॥ ९१ ॥

त्वन्मूर्तिभक्तान्त्वन्मूर्तयश्चतद्भक्ताश्चतान् सकर्णःत्वज्जन्मानिमायिकानितत्रत्यकर्माणिचशृणोत्वित्यन्वयः ॥ १२ ॥ अहिशत्रुकेतोगरुडध्वजमेशिरस्त्वदीयंशिवंब्रह्माद्यैःसेवितंपदंनमतु ॥ १३ ॥ ॥ इतिश्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिबिरुदावलीविराजमानस्यहिम्मतिवर्मणःपुत्रस्य ० सेतौकिष्किंधाकांडेप्रथमःसर्गः ॥ १ ॥ ॥ छ ॥ ॥ स्वात्मपरिष्वंगःस्वशरीरालिंगनंतेनदूरीकृताशेषपापम् सस्मितमितिमायायाभगवद्धासरूपत्वेनस्मितद्वारामाययातदा

त्वन्मूर्तिभक्तान्स्वगुरुंचचक्षुःपश्यत्वजस्रंसशृणोतुकर्णः ॥ त्वज्जन्मकर्माणिचपादयुग्मंव्रजत्वजस्रंतवमंदिराणि ॥ १२ ॥ अंगानितेपादरजोविमिश्रतीर्थानिबिभ्रत्वहिशत्रुकेतो ॥ शिरस्त्वदीयंभवपद्मजाद्यैर्जुष्टंपदंरामनमत्वजस्रम् ॥ १३ ॥ ॥ इतिश्रीमदध्यात्मरामायणेकिष्किंधाकांडेउमामहेश्वरसंवादेप्रथमःसर्गः ॥ १ ॥ ॥ ॥ छ ॥ ॥ इत्थंस्वात्मपरिष्वंगनिर्धूताशेषकल्मषम् ॥ रामःसुग्रीवमालोक्यसस्मितंवाक्यमब्रवीत् ॥ १ ॥ मायांमोहकरींतस्मिन्वितन्वन्कार्यसिद्धये ॥ सखेत्वदुक्तंयत्तन्मांसत्यमेवनसंशयः ॥ २ ॥ किंतुलोकावदिष्यंतिमामेवंरघुनंदनः ॥ कृतवान्किंकपींद्रायसत्यंकृत्वाग्निसाक्षिकम् ॥ ३ ॥ इतिलोकापवादोमेभविष्यतिनसंशयः ॥ तस्मादाह्वयभद्रंतेगत्वायुद्धायवालिनम् ॥ ४ ॥ बाणेनैकेनतंहत्वाराज्येत्वामभिषेचये ॥ तथेतिगत्वासुग्रीवःकिष्किंधोपवनंद्रुतम् ॥ ५ ॥ कृत्वाशब्दंमहानादंतमाह्वयतवालिनम् ॥ तच्छ्रुत्वाभ्रातृनिनदंरोषताम्रविलोचनः ॥ ६ ॥

वरणम् ॥ १ ॥ कार्यंरावणवधः यन्मांप्रतित्वदुक्तंत्वयोक्तंतत्सत्यमेव ॥ २ ॥ रघुनंदनःअग्निसाक्षिकंसख्यंकृत्वाकपींद्रायतदुपकारकंकिंकृतवानित्येवंलोकामांवदिष्यंतिअतस्त्वदुपकारोमेवश्यंकर्तव्यइतिशेषः ॥ ३ ॥ उक्तमेवदाढर्यायपुनराह इतीति भद्रंतेइत्यनेनमदाज्ञाकरणेएवतेभद्रंनान्यथेतिसूचितम् ॥ ४ ॥ तथेतीत्यर्थंप्रतिज्ञायेतिशेषः ॥ ५ ॥ महानादंमहाप्रतिध्वनिजनकम् आह्वयतस्पर्धयाशब्दितवान् ॥ ६ ॥

॥ ७ ॥ ८ ॥ एकरूपौसमानाकारौ अतएवरामोबाणंनमुमोच ॥ ९ ॥ १० ॥ जहिशस्त्रेणेतिशेषः ॥ ११ ॥ प्रत्ययंकृत्वाविश्वासमुत्पाद्य सत्यवादिन्नित्यादिरा
क्षेपः ॥ १२ ॥ युवांसमानाकारौदृष्ट्वामित्रघातशंकयाऽहंसायकंनमुक्तवानित्यन्वयः ॥ १३ ॥ भ्रमशांतये भ्रमशांतिफलकम् ॥ १४ ॥ अहंरामइत्यने

॥ ५ ॥ निर्जगामगृहाच्छीघ्रंसुग्रीवोयत्रवानरः ॥ तमापतंतंसुग्रीवःशीघ्रंवक्षस्यताडयत् ॥ ७ ॥ सुग्रीवमपिमुष्टिभ्यांजघान
क्रोधमूर्च्छितः ॥ वालीतमपिसुग्रीवएवंक्रुद्धौपरस्परम् ॥ ८ ॥ अयुध्येतामेकरूपौदृष्ट्वारामोतिविस्मितः ॥ नमुमोच
तदाबाणंसुग्रीववधशंकया ॥ ९ ॥ ततोदुद्रावसुग्रीवोवमन्रक्तंभयाकुलः ॥ वालीस्वभवनंयातःसुग्रीवोराममब्रवी
त् ॥ १० ॥ किंमांघातयसेरामशत्रुणाभ्रातृरूपिणा ॥ यदिमद्धननेवांछात्वमेवजहिमांविभो ॥ ११ ॥ एवंमेप्रत्ययंकृ
त्वासत्यवादिन्रघूत्तम ॥ उपेक्षसेकिमर्थंमांशरणागतवत्सल ॥ १२ ॥ श्रुत्वासुग्रीववचनंरामःसाश्रुविलोचनः ॥ आ
लिंग्यमास्मभैषीस्त्वंदृष्ट्वावामेकरूपिणौ ॥ १३ ॥ मित्रघातित्वमाशंक्यमुक्तवान्सायकंनहि ॥ इदानीमेवतेचिह्नंकरि
ष्येभ्रमशांतये ॥ १४ ॥ गत्वाह्वयपुनःशत्रुंहतंद्रक्ष्यसिवालिनम् ॥ रामोहंत्वांशपेभ्रातर्हनिष्यामिरिपुंक्षणात् ॥ १५ ॥
इत्याश्वास्यससुग्रीवंरामोलक्ष्मणब्रवीत् ॥ सुग्रीवस्यगलेपुष्पमालामामुच्यपुष्पिताम् ॥ १६ ॥ प्रेषयस्वमहाभागसुग्री
वंवालिनंप्रति ॥ लक्ष्मणस्तुतदाबद्ध्वागच्छगच्छेतिसादरम् ॥ १७ ॥ प्रेषयामाससुग्रीवंसोपिगत्वातथाकरोत् ॥ पुनर
प्यद्भुतंशब्दंकृत्वावालिनमाह्वयत् ॥ १८ ॥ तच्छ्रुत्वाविस्मितोवालीक्रोधेनमहतावृतः ॥ बद्ध्वापरिकरंसम्यग्गमनायोप ॥ ५ ॥
चक्रमे ॥ १९ ॥

नत्वस्यामिथ्याभाषित्वंसूचितम् त्वांशपेयदिनहनिष्यामितर्हिमित्रस्यतवैवशपथइत्यर्थः ॥ १५ ॥ पुष्पितांमालांआमुच्यसंबद्ध्वाप्रेष्यतामित्यन्वयः ॥ १६ ॥
॥ १७ ॥ १८ ॥ परिकरंकच्छबंधादिरूपम् ॥ १९ ॥

॥ २० ॥ तेत्वत्तोभग्नःपुनरायातिगर्जन्युद्धार्थमाह्वयति ॥ २१ ॥ तद्गतासुग्रीवसहायविषया करंपरित्यज्यगच्छ अंतःपुरमितिशेषःमत्तोरक्षितुंजीवितार्थी कस्तस्यसहायोभवेदित्यन्वयः ॥ २२ ॥ २३ ॥ आह्वयमानंरिपुंज्ञात्वापिशूरःकथंगृहेतिष्ठेत् अतस्तंहत्वात्रायास्यामिइतिच्छेदः ॥ २४ ॥ यन्मामंगदोमृगया

गच्छंतंवालिनंताराग्रृहीत्वानिषिषेधतम् ॥ नगंतव्यंत्वयेदानींशंकामेतीवजायते ॥ २० ॥ इदानीमेवतेभग्नःपुनरायातिसत्वरः ॥ सहायोबलवांस्तस्यकश्चिन्नूनंसमागतः ॥ २१ ॥ वालीतामाहहेसुभ्रुशंकातेव्येतुतद्गता ॥ प्रियेकरंपरित्यज्यगच्छगच्छामितंरिपुम् ॥ २२ ॥ हत्वाशीघ्रंसमायास्येसहायस्तस्यकोभवेत् ॥ सहायीयदिसुग्रीवस्ततोहत्वोभयंक्षणात् ॥ २३ ॥ आयास्येमाशुचःशूरःकथंतिष्ठेद्गृहेरिपुम् ॥ ज्ञात्वाप्याह्वयमानंहिहत्वायास्यामिसुंदरि ॥ २४ ॥ तारोवाच ॥ मत्तोन्यच्छृणुराजेंद्रश्रुत्वाकुरुयथोचितम् ॥ आहमामंगदःपुत्रोमृगयायांश्रुतंवचः ॥ २५ ॥ अयोध्याधिपतिःश्रीमान्रामोदाशरथिःकिल ॥ लक्ष्मणेनसहभ्रात्रासीतयाभार्ययासह ॥ २६ ॥ आगतोदंडकारण्यंतत्रसीताहृताकिल ॥ रावणेनसहभ्रात्रामार्गमाणोथजानकीम् ॥ २६ ॥ आगतोऋष्यमूकाद्रिंसुग्रीवेणसमागतः ॥ चकारतेनसुग्रीवःसख्यंचानलसाक्षिकम् ॥ २८ ॥ प्रतिज्ञांकृतवान्रामःसुग्रीवायसलक्ष्मणः ॥ वालिनंसमरेहत्वाराजानंत्वांकरोम्यहम् ॥ २९ ॥ इतिनिश्चित्यतौयातौनिश्चितंशृणुमद्वचः ॥ इदानीमेवतेभग्नःकथंपुनरुपागतः ॥ ३० ॥ अतस्त्वंसर्वथावैरंत्यक्त्वासुग्रीवमानय ॥ यौवराज्येभिषिंचाशुरामंत्वंशरणंव्रज ॥ ३१ ॥

यांश्रुतंवचआहतच्छुत्वायथोचितंकुरु ॥ २५ ॥ २६ ॥ रावणेनसीताहृतातांसहभ्रात्रामार्गमाणोऋष्यमूकाद्रिमागतः ॥ २७ ॥ समागतःसंमिलितःसख्यंच तेनचकार ॥ २८ ॥ २९ ॥ इतिनिश्चित्यपरस्परसाहाय्यंप्रतिज्ञाययातौस्ववासस्थानमितिशेषः तस्मान्निश्चितंनिश्चितार्थकंमेवचःशृणु इदानीमेवेत्यादेरन्यथेत्यादिः ॥ ३० ॥ ३१ ॥

कुलंवानरकुलम् ॥ ३२ ॥ ३३ ॥ ३४ ॥ स्नेहोभविष्यतिसुग्रीवतोपिममरामकार्येसमर्थत्वादितिभावः ॥ ३५ ॥ स्वपक्षपरपक्षाभावेहेतुगर्भंविशेषणंपरात्मनइति तेनसर्वत्रसमःसइतिध्वनितम् ॥ ३६ ॥ भजतःभक्तानित्यर्थः ॥ ३७ ॥ यदिस्वयमिति असहायइत्यर्थः ॥ ३८ ॥ कथंतदभिषेचनंकुर्यामितिशेषः

पाहिमामंगदंराज्यंकुलंचहरिपुंगव ॥ इत्युक्त्वाश्रुमुखीतारापादयोःप्रणिपत्यतम् ॥ ३२ ॥ हस्ताभ्यांचरणौधृत्वारुरो
दभयविह्वला ॥ तामालिंग्यतदावालीसस्नेहमिदमब्रवीत् ॥ ३३ ॥ स्त्रीस्वभावाद्बिभेषित्वंप्रियेनास्तिभयंमम ॥ रामोय
दिसमायातोलक्ष्मणेनसमंप्रभुः ॥ ३४ ॥ तदारामेणमेस्नेहोभविष्यतिनसंशयः ॥ रामोनारायणःसाक्षादवतीर्णोखिल
प्रभुः ॥ ३५ ॥ भूभारहरणार्थायश्रुतंपूर्वंमयानघे ॥ स्वपक्षःपरपक्षोवानास्तितस्यपरात्मनः ॥ ३६ ॥ आनेष्यामिगृहं
साध्विनत्वातच्चरणांबुजम् ॥ भजतोनुभजत्येषभक्तिगम्यःसुरेश्वरः ॥ ३७ ॥ यदिस्वयंसमायातिसुग्रीवोहन्मितंक्ष
णात् ॥ यदुक्तंयौवराज्यायसुग्रीवस्याभिषेचनम् ॥ ३८ ॥ ॥ कथमाहूयमानोहंयुद्धायरिपुणाप्रिये ॥ शूरोहंसर्वलोका
नांसंमतःशुभलक्षणे ॥ ३९ ॥ भीतभीतमिदंवाक्यंकथंवालीवदेत्प्रिये ॥ तस्माच्छोकंपरित्यज्यतिष्ठसुंदरिवेश्मनि
॥ ४० ॥ एवमाश्वास्यतारांतांशोचंतीमश्रुलोचनाम् ॥ गतोवालीसमुद्युक्तःसुग्रीवस्यवधायसः ॥ ४१ ॥ दृष्ट्वावालि
नमायांतंसुग्रीवोभीमविक्रमः ॥ उत्पपातगलेबद्धपुष्पमालःपतंगवत् ॥ ४२ ॥ मुष्टिभ्यांताडयामासवालिनंसोपितं
तथा ॥ अहन्वालीचसुग्रीवंसुग्रीवोवालिनंतथा ॥ ४३ ॥ रामंविलोकयन्नेवसुग्रीवोयुयुधेयुधि ॥ इत्येवंयुद्ध्यमानौतौ
दृष्ट्वारामःप्रतापवान् ॥ ४४ ॥

यतोहंसर्वलोकानांसंमतःशूरः ॥ ३९ ॥ वालीभीतभीतंअत्यंतभयसूचकमिदंवाक्यंकथंवदेत् ॥ ४० ॥ ४१ ॥ उत्पपातयुद्धायतत्संमुखमितिशेषः ॥ ४२ ॥
अहन् हतवान् ॥ ४३ ॥ रामंविलोकयन् शीघ्रमेतंजहीतिदृष्ट्यासूचयन् ॥ ४४ ॥

ऐंद्रेधनुषिअगस्त्यदत्ते ऐंद्रमितिपाठेऐंद्रास्त्राभिमंत्रितमित्यर्थः वृक्षखंडगःवृक्षसमूहगः ॥ ४५ ॥ तद्धृदयंलक्ष्यंकृत्वेतिशेषः ॥ ४६ ॥ महींकंपयन्सशरोरामध
नुःसकाशात्महाशब्दंमुंचन्उत्पपातआकाशेइतिशेषः ततःसनिपपातवालिवक्षसिततस्तद्विभेद ॥ ४७ ॥ तदावक्षोभेदकाले चेतनंचैतन्यंवामेनधनुरन्येनसाय
कमन्यमालंब्यस्थितमितिशेषः ॥ ४८ ॥ वक्षसिवनमाला कंठमारभ्याजानुमालावनमाला तयाविभूषितम् ॥ ४९ ॥ ५० ॥ विगर्हयन्कुत्सयन् ॥ ५१ ॥

बाणमादायतूणीरादैंद्रेधनुषिसंदधे ॥ आकृष्यकर्णपर्यंतमदृश्योवृक्षखंडगः ॥ ४५ ॥ निरीक्ष्यवालिनंसम्यग्लक्ष्यंतद्धृ
दयंहरिः ॥ उत्ससर्जाशनिसमंमहावेगंमहाबलः ॥ ४६ ॥ बिभेदसशरोवक्षोवालिनःकंपयन्महीम् ॥ उत्पपातमहाशब्दं
मुंचन्सनिपपातह ॥ ४७ ॥ तदामुहूर्तंनिःसंज्ञोभूत्वाचेतनमापसः ॥ ततोवालीददर्शाग्रेरामंराजीवलोचनम् ॥ धनुरा
लंब्यवामेनहस्तेनान्येनसायकम् ॥ ४८ ॥ बिभ्राणंचीरवसनंजटामुकुटधारिणम् ॥ विशालवक्षसंभ्राजद्वनमालावि
भूषितम् ॥ ४९ ॥ ॥ पीनचार्वायतभुजंनवदूर्वादलच्छविम् ॥ सुग्रीवलक्ष्मणाभ्यांचपार्श्वयोःपरिसेवितम् ॥ ५० ॥ वि
लोक्यशनकैःप्राहवालीरामंविगर्हयन् ॥ किंमयापकृतंरामतवयेनहतोस्म्यहम् ॥ ५१ ॥ राजधर्ममविज्ञायगर्हितंकर्म
तेकृतम् ॥ वृक्षखंडेतिरोभूत्वात्यजतामयिसायकम् ॥ ५२ ॥ यशःकिंलप्स्यसेरामचोरवत्कृतसंगरः ॥ यदिक्षत्रिय
दायादोमनोर्वंशसमुद्भवः ॥ ५३ ॥ युद्धंकृत्वासमक्षंमेप्राप्स्यसेतत्फलंतदा ॥ सुग्रीवेणकृतंकिंतेमयावानकृतंकिमु
॥ ५४ ॥ रावणेनहृताभार्यातवराममहावने ॥ सुग्रीवंशरणंयातस्तदर्थमितिशुश्रुम ॥ ५५ ॥

राजधर्ममिति तिरोभूयान्येनयुद्धंकुर्वतिबाणपातश्छलत्वान्नराजधर्मइतिभावः ल्यबभावआर्षः ॥ ५२ ॥ चोरवत्कृतसंगरस्त्वंमांहत्वायशोलप्स्यसेकिं अपि
त्वयशएवेतिभावः यदितेक्षत्रियदायादत्वाद्यभिमानस्तदामेमयासमक्षंयुद्धंकृत्वातत्फलंयशोमरणंवाप्राप्स्यसेप्राप्तोभवेः अन्यार्थेन्यशब्दप्रयोगेणासन्नमरणता
सूच्यते ॥ ५३ ॥ कृतंउपकृतमित्यर्थः ॥ ५४ ॥ ५५ ॥

॥ ५६ ॥ ५७ ॥ कंधर्मंकांधर्मंकृतांकीर्तिम् ऐहिकमपिनमह्यंधेइत्याह अभक्ष्यमिति ॥ ५८ ॥ इत्येवंबहुभाषंतंअसंबद्धंप्रलपंतमित्यर्थः ॥ ५९ ॥ अधर्मेति
सद्धर्मरक्षणांगत्वादधर्मकारिवधस्यनदोषत्वमितिभावः अधर्मकारित्वंवालिनःसमर्थयते दुहितेत्यादि भ्रातुःकनिष्ठस्येतिशेषः ॥ ६० ॥ एताःसर्वाःसमास्तुल्या
स्तासांमध्येयोविमूढधीरपिएकांरमतेसपातकीज्ञेयः विमूढधीरपीत्यनेनाज्ञानान्नदोषइतिपरिहृतम् ईदृशार्थस्याज्ञानात्करणेपिमहानेवदोषः अतएवतस्यवधप
र्यंतोदंडइत्याह सवध्यइति ॥ ६१ ॥ ननुमनुष्याधिकारिकंशास्त्रंनतुतिर्यगादिविषयमतस्तिरश्चामस्माकंकोत्रदोषइतिचेच्छृणु तिरश्चामनधिकारोहिअज्ञानकृ

बतरामनजानीषेमह्यलंलोकविश्रुतम् ॥ रावणंसकुलंबद्ध्वाससीतंलंकयासह ॥ ५६ ॥ आनयामिमुहूर्तार्धाद्यदिचे
च्छामिराघव ॥ धर्मिष्ठइतिलोकेस्मिन्कथ्यसेरघुनंदन ॥ ५७॥ वानरंव्याधवद्धत्वाधर्मंकंलप्स्यसेवद ॥ अभक्ष्यंवा
नरंमांसंहत्वामांकिंकरिष्यसि ॥ ५८ ॥ इत्येवंबहुभाषंतंवालिनंराघवोब्रवीत् ॥ धर्मस्यगोप्तालोकेस्मिंश्चरामिसशरा
सनः ॥ ५९ ॥ अधर्मकारिणंहत्वासद्धर्मंपालयाम्यहम् ॥ दुहिताभगिनीभ्रातुर्भार्याचैवतथास्नुषा ॥ ६० ॥ समायो
रमतेतासामेकामपिविमूढधीः ॥ पातकीसतुविज्ञेयःसवध्योराजभिःसदा ॥ ६१ ॥ त्वंतुभ्रातुःकनिष्ठस्यभार्यायां
रमसेबलात् ॥ अतोमयाधर्मविदाहतोसिवनगोचर ॥ ६२ ॥ त्वंकपित्वान्नजानीषेमहांतोविचरंतियत्॥ लोकंपुना
नाःसंचारैरतस्तान्नातिभाषयेत् ॥ ६३ ॥

तःतच्चाज्ञानंनतवबाल्यादिषुस्वयंप्रतिभातवेदत्वात्देवांशत्वाच्च एवंचकर्तव्याकर्तव्यज्ञानवतामकर्तव्यकरणेदोषोभवत्येवातएवेंद्रादीनामहल्याद्यतिक्रमणादौदो
षश्रुतिःसंगच्छते देवानांयज्ञाद्यनधिकारस्तुयजनीयदेवतांतराभावात् अतएवब्रह्मविद्यायामिंद्रादीनामप्यधिकारःश्रुतिषुश्रूयतेइत्येषोत्रभगवतोभिप्रायः ॥६२॥
किंचमन्निंदयादोषांतरभागपित्वंजायसेइत्याह त्वंकपित्वादिति संचारैर्लोकंपुनानामहांतोविचरंतियत्यतोऽतस्तान्नातिभाषयेत्ननिंदेत् त्वंतुएवंसंचरंतीतिन
जानीषेइत्यन्वयः विचरंतिहीतिपाठांतरम् एवंचत्वादृशपवित्रीकरणार्थएवायंममसंचारइतिध्वनितम् ॥ ६३ ॥

॥ ६४ ॥ अजानतात्वदीयंपरमेश्वरत्वमजानतेत्यर्थः ॥ ६५ ॥ तवाग्रतइति त्वत्स्वरूपज्ञानपूर्वकंतवाग्रतइत्यर्थः तवदर्शनंत्वत्स्वरूपज्ञानंमहायोगिनामपिदुर्ल
भम् ॥ ६६ ॥ विवशःपुत्रादिममताक्रांतोऽपि साक्षात्त्वांपश्यतोम्रियमाणस्यपरमपदप्राप्तिरितिकिंवक्तव्यमित्यर्थः ॥ ६७ ॥ ६८ ॥ ६९ ॥ अमरेंद्रोभवत् तदं

तच्छ्रुत्वाभयसंत्रस्तोज्ञात्वारामंरमापतिम् ॥ वालीप्रणम्यरभसाद्रामंवचनमब्रवीत् ॥ ६४ ॥ रामराममहाभागजाने
त्वांपरमेश्वरम् ॥ अजानतामयाकिंचिदुक्तंतत्क्षंतुमर्हसि ॥ ६५ ॥ साक्षात्त्वच्छरघातेनविशेषेणतवाग्रतः ॥ त्यजाम्यसू
न्महायोगिदुर्लभंतवदर्शनम् ॥ ६६ ॥ यन्नामविवशोगृह्णन्म्रियमाणःपरंपदम् ॥ यातिसाक्षात्सएवाद्यमुमूर्षोर्मेपुरः
स्थितः ॥ ६७ ॥ देवजानामिपुरुषंत्वांश्रियंजानकींशुभाम् ॥ रावणस्यवधार्थायजातंत्वांब्रह्मणार्थितम् ॥ ६८ ॥ अनुजा
नीहिमांराममयांतंत्वत्पदमुत्तमम् ॥ ममतुल्यबलेबालेअंगदेत्वंदयांकुरु ॥ ६९ ॥ विशल्यंकुरुमेरामहृदयंपाणिनास्पृश
न् ॥ तथेतिबाणमुद्धृत्यरामःपस्पर्शपाणिना ॥ त्यक्त्वातद्वानरंदेहममरेंद्रोभवत्क्षणात् ॥ ७० ॥ वालीरघूत्तमशराभिह
तोविमृष्टोरामेणशीतलकरेणसुखाकरेण ॥ सद्योविमुच्यकपिदेहमनन्यलभ्यंप्राप्तःपरंपरमहंसगणैर्दुरापम् ॥ ७१ ॥ ॥ इ
तिश्री० कि० द्वितीयःसर्गः ॥ २ ॥ ॥ ७ ॥ निहतेवालिनिरणेरामेणपरमात्मना ॥ दुद्रुवुर्वानराःसर्वेकिष्किंधांभयविह्व
लाः ॥ १ ॥ तारामूचुर्महाभागेहतोवालीरणाजिरे ॥ अंगदंपरिरक्षाद्यमंत्रिणःपरिनोदय ॥ २ ॥

शत्वात्तत्रैवलयमापेत्यर्थः ॥ ७० ॥ विमृष्टःस्पृष्टइतियावत् परंपरमंपदमैंद्रंपदम् अधिकारांतेमुक्तिदत्वात्तस्यापिपरमपदत्वेनव्यवहारः ॥ ७१ ॥ ॥ इतिश्रीम
त्सकलराजविपदुद्धरणसमर्थेत्यादिबिरुदावलीविराजमानस्यहिम्मतिवर्मणःपुत्रस्यश्रीरामवर्मणःकृतावध्यात्मरामायणसेतौकिष्किंधाकांडेद्वितीयःसर्गः ॥ २ ॥
॥ निहतेति ॥ १ ॥ परिनोदयनगरादिरक्षार्थमितिशेषः ॥ २ ॥

चतुर्द्वारकपाटादीनिति आदिनासूक्ष्मानेकद्वारकपाटपरिखादिसंग्रहः ॥ ३ ॥४॥ निधनंयास्यामि वह्निप्रवेशेनेतिशेषः॥ ५ ॥ ६ ॥ ७ ॥ येनेति येनबाणेनवालीहतस्तेनबाणेनमांजहि वालिशरीरस्पृष्टतयातत्स्पर्शस्यमत्सुखावहत्वादितिभावः ॥ ८ ॥ ९ ॥ पत्नीदानफलमिति तेनधर्मेणतवापिपत्नीलाभोभविष्यतीति

चतुर्द्वारकपाटादीन्बद्धारक्षामहेपुरीम् ॥ वानराणांतुराजानमंगदंकुरुभामिनि ॥ ३ ॥ निहतंवालिनंश्रुत्वाताराशोकविमूर्छिता ॥ अताडयत्स्वपाणिभ्यांशिरोवक्षश्चभूरिशः ॥ ४ ॥ किमंगदेनराज्येननगरेणधनेनवा ॥ इदानीमेवनिधनंयास्यामिपतिनासह ॥ ५ ॥ इत्युक्त्वात्वरितातत्ररुदतीमुक्तमूर्धजा ॥ ययौतारातिशोकार्तायत्रभर्तृकलेवरम् ॥ ६ ॥ पतितंवालिनंदृष्ट्वारक्तैःपांसुभिरावृतम् ॥ रुदतीनाथनाथेतिपतितातस्यपादयोः ॥ ७ ॥ करुणंविलपंतीसाददर्शरघुनंदनम् ॥ राममांजहिबाणेनयेनवालीहतस्त्वया ॥ ८ ॥ गच्छामिपतिसालोक्यंपतिर्मामभिकांक्षते ॥ स्वर्गेपिनसुखंतस्यमांविनारघुनंदन ॥ ९ ॥ पत्नीवियोगजंदुःखमनुभूतंत्वयानघ ॥ वालिनेमांप्रयच्छाशुपत्नीदानफलंभवेत् ॥ १० ॥ सुग्रीवत्वंसुखंराज्यंदापितंवालिघातिना ॥ रामेणरुमयासार्धंभुंक्ष्वसापत्नवर्जितम् ॥ ११ ॥ इत्येवंविलपंतींतांतारांरामोमहामनाः ॥ सांत्वयामासदययातत्त्वज्ञानोपदेशतः ॥ १२ ॥ किंभीरुशोचसिव्यर्थंशोकस्याविषयंपतिम् ॥ पतिस्तवायंदेहोवाजीवोवावदतत्त्वतः ॥ १३ ॥ पंचात्मकोजडोदेहस्त्वङ्मांसरुधिरास्थिमान् ॥ कालकर्मगुणोत्पन्नःसोप्यास्तेद्यापितेपुरः ॥ १४ ॥

भावः ॥ १० ॥ वालिघातिनारामेणदापितंवालिनेतिशेषः वालिनोदातृत्वंचमरणेनस्वत्वत्यागमात्रेणेतिबोध्यम् ॥११॥ १२ ॥ १३ ॥ देहजीवयोःपतित्वंविकल्प्यनाद्यइत्याह पंचात्मकइति पंचभूतात्मकइत्यर्थः इदंजडत्वोपपादकम् त्वङ्मांसेत्यादिनात्यंतबीभत्सत्वंदर्शितम् कालेनकर्मभिर्गुणैःसत्वादिभिश्चोत्पन्नइत्यनेननश्वरत्वमेवंचतत्रात्यंतंप्रीत्ययोग्येकातेपतिबुद्धिरित्यर्थः अथाप्येवंबुद्धिरेवतेतर्हिंसोस्त्येवेतिव्यर्थःशोकइत्यर्थः ॥ १४ ॥

नांत्यइत्याह मन्यसेइति निरामयःनाशादिरहितः तदाह नजायतेइत्यादि ॥ १५ ॥ सर्वगतश्चेतनोजीवएकएव अद्वितीयइति द्वितीयसंबंधरहितः तदेवाहा काशवदलेपकइति अलिप्तइत्यर्थः मायागुणैरितिशेषः सकथमिति अविनाशित्वादितिभावः ॥ १६ ॥ देहःकाष्ठवदचित्अचेतनइत्यर्थः जीवश्चिदात्मकोज्ञानस्वरूपएवनतुसुखादिपरिणामवान् एवंसतिसुखादिसंबंधःकस्यस्यात् अचेतनत्वान्नस्थूलस्यसूक्ष्मस्यनाप्यपरिणामित्वादात्मनइत्यर्थः ॥ १७ ॥ उत्तरयति अहंकारादीति देहेंद्रियैःसहतेषुइत्यर्थः अहंकारादिसंबंधःअहंममेत्येवंबुद्धिविषयताइत्यर्थः प्रायःस्थूलसूक्ष्मदेहयोरुभयोरप्यहंबुद्धिरेव केषांचित्तुस्थूलदेहेपुत्रादौचममताबुद्धिःसूक्ष्मेतुसर्वेषामहंबुद्धिरेवेतिविवेकः तावदेवाविवेकिनोंतःकरणादिभ्यःस्वस्मिन्विवेकाग्रहवतआत्मनःसंसारःस्यादित्यर्थः ॥ १८ ॥ एवंशुद्धस्यात्मनोन्याविवेकादारोपितःसंसारःस्वतएवनविनिवर्ततेयथास्वप्नस्यमिथ्यागमःस्वाप्नमिथ्यापदार्थदर्शनंनस्वतोनिवर्ततेकिंतुजाग्रदवस्थयैवतद्वदितिभावः ॥ १९ ॥ तत्रस्वप्नस्यविषयध्यानवत्संसारस्यमूलकारणमाह अनादीति अविद्याअनात्मन्यात्मबुद्धिर्मायावा अयथार्थकःअत्यंतमिथ्याभूतः ॥ २० ॥

मन्यसेजीवमात्मानंजीवस्तर्हिनिरामयः॥ नजायतेनम्रियतेनतिष्ठतिनगच्छति ॥ १५ ॥ नस्त्रीपुमान्वाषंढोवाजीवःसर्वगतोव्ययः ॥ एकएवाद्वितीयोयमाकाशवदलेपकः ॥ नित्योज्ञानमयःशुद्धःसकथंशोकमर्हति ॥ १६ ॥ तारोवाच ॥ देहोऽचित्काष्ठवद्रामजीवोनित्यश्चिदात्मकः ॥ सुखदुःखादिसंबंधःकस्यस्याद्राममेवद ॥ १७ ॥ श्रीरामउवाच ॥ अहंकारादिसंबंधोयावद्देहेंद्रियैःसह ॥ संसारस्तावदेवस्यादात्मनस्त्वविवेकिनः ॥ १८ ॥ मिथ्यारोपितसंसारोनस्वयंविनिवर्तते ॥ विषयान्ध्यायमानस्यस्वप्नेमिथ्यागमोयथा ॥ १९ ॥ अनाद्यविद्यासंबंधात्तत्कार्याहंकृतेस्तथा ॥ संसारोऽपार्थकोपिस्याद्रागद्वेषादिसंकुलः॥ २० ॥

मनएवेति मनोऽत्रांतःकरणम् संसारस्तन्मूलकारणमित्यर्थः बंधःसुखादिभोगस्तद्वत्मनएव मनसासमानत्वंआत्ममनसोरैक्यम् तद्गतबंधभाक्तद्गतबंधयुक्तो भवतीत्यर्थः ॥ २१ ॥ २२ ॥ बुद्धीति यथालक्तकादिसामीप्यात्स्फटिकस्यरक्तत्वादिव्यवहारःएवंसंसारधर्मकबुद्धींद्रियादिसामीप्यादात्मनोबलादवशतः संसारव्यवहारोलोकैःक्रियतइत्यर्थः ॥ तदेवाहात्मेति मनसोजडत्वेनज्ञानादिजनकत्वासंभवात्चेतनस्यात्मनोलिंगमनुमापकंमनोंतःकरणंपरिगृह्यतेनाविवेकं प्राप्यतदुद्भवान्ततोजातान्कामान्विषयान्जुषन्गुणैस्तदीयैरागद्वेषादिभिर्बद्धइवावशःसंसारेवर्तते विषयाणांमनउद्भवत्वंदर्शयति आदाविति गुणान्रागद्वेषादीन्

मनएवहिसंसारोबंधश्चैवमनःशुभे ॥ आत्मामनःसमानत्वमेत्यतद्गतबंधभाक् ॥ २१ ॥ यथाविशुद्धःस्फटिकोऽलक्तकादिसमीपगः॥ तत्तद्वर्णयुगाभातिवस्तुतोनास्तिरंजनम् ॥ २२ ॥ बुद्धींद्रियादिसामीप्यादात्मनःसंसृतिर्बलात् ॥ आत्मास्वलिंगंतुमनःपरिगृह्यतदुद्भवान् ॥ २३ ॥ कामान्जुषन्गुणैर्बद्धःसंसारेवर्ततेवशः ॥ आदौमनोगुणान्सृष्ट्वाततः कर्माण्यनेकधा ॥ २४ ॥ शुक्ललोहितकृष्णानिगतयस्तत्समानतः ॥ एवंकर्मवशाज्जीवोभ्रमत्याभूतसंप्लवम् ॥ २५ ॥ सर्वोपसंहृतौजीवोवासनाभिःस्वकर्मभिः॥ अनाद्यविद्यावशगस्तिष्ठत्यभिनिवेशतः ॥ २६ ॥

ततोरागद्वेषादितः कर्माणिसृष्ट्विवदितिशेषः ॥ २३ ॥ २४ ॥ तत्रकर्मभेदानाह शुक्लेत्यादि शुक्लकर्माणिहिंसादिरहितजपध्यानादिरूपाणि लोहितानिहिंसामिश्रयागादीनि कृष्णानिपापकर्माणि तत्समानतःकर्मस्वरूपतुल्यागतयोगतीः सृष्टिवदितिशेषः गतयइतिद्वितीयार्थेआर्षम् तत्रशुक्लकर्मणःशुक्लाब्रह्मलोकप्राप्तिरूपोत्तमागतिः लोहितकर्मणोमध्यमास्वर्गगतिः कृष्णकर्मणोऽधमानरकगतिरित्यर्थः भूतसंप्लवःप्रलयस्तावत्पर्यंतंकर्मवशाद्भ्रमति ॥ २५ ॥ सर्वोपसंहृतौप्रलयेवासनाभिःकर्मभिश्चसहाभिनिवेशतः अंतःकरणादितादात्म्याध्यासात्अंतःकरणादिप्रकृतिभूतानाद्यविद्यावशगस्तल्लीनःसन्तिष्ठति ॥ २६ ॥

वासनाश्चमानसानिकर्माणिचतैःसहतद्युक्तएवजायतेवर्षाकालेमंडूकवत्प्रादुर्भवति एवंसृष्टिप्रलययोर्घटीयंत्रमिवावर्तमानस्तिष्ठति॥ २७॥ नन्वेवमस्यमुक्तिप्रत्याशैवनकिंनेत्याह यदेति मद्विषयामतिःईश्वरोमहानित्येवंबुद्धिर्जायतेइतिशेषः॥ २८॥ ततःईश्वरविषयबुद्ध्यनंतरम् ततःस्वरूपविज्ञानंस्वरूपंविज्ञायतेऽनेन ततःविषयेषुअनित्याशुचिदुःखरूपंवैराग्यंनित्यानित्यविवेकादिचजायतेइत्यर्थः॥ २९॥ तदातादृशवैराग्यादौजातेआचार्यप्रसादेनतत्त्वमस्यादिवा-

सृष्टिकालेपुनःपूर्ववासनामानसैःसह॥ जायतेपुनरप्येवंघटीयंत्रमिवावशः॥ २७॥ यदापुण्यविशेषेणलभतेसंगतिंसताम्॥ मद्भक्तानांसुशांतानांतदामद्विषयामतिः॥ २८॥ मत्कथाश्रवणेश्रद्धादुर्लभाजायतेततः॥ ततःस्वरूपविज्ञानमनायासेनजायते॥ २९॥ तदाचार्यप्रसादेनवाक्यार्थज्ञानतःक्षणात्॥ देहेंद्रियमनःप्राणाहंकृतिभ्यःपृथक्स्थितम्॥ ३०॥ स्वात्मानुभवतःसत्यमानंदात्मानमद्वयम्॥ ज्ञात्वासद्योभवेन्मुक्तःसत्यमेवमयोदितम्॥ ३१॥ एवंमयोदितंसम्यगालोचयतियोनिशम्॥ तस्यसंसारदुःखानिनस्पृशंतिकदाचन॥ ३२॥ त्वमप्येतन्मयाप्रोक्तमालोचयविशुद्धधीः॥ नस्पृश्यसेदुःखजालैःकर्मबंधाद्विमोक्ष्यसे॥ ३३॥ पूर्वजन्मनितेसुभ्रुकृतामद्भक्तिरुत्तमा॥ अतस्तवविमोक्षायरूपंमेदर्शितंशुभे॥ ३४॥

क्यार्थज्ञानतःश्रवणमननरूपात्क्षणात्उत्सवात्श्रवणादिविषयोत्साहात्पुनःपुनरनुष्ठानादितियावत् देहादिभ्यःपृथक्स्थितंसत्यमानंदरूपमद्वितीयमात्मानंस्वात्मानुभवतःस्वात्मविषयादीदृशंब्रह्माहमेवेत्येवंरूपान्निदिध्यासनात्ज्ञात्वाअपरोक्षीकृत्यसद्यस्तत्कालमेवसंसारान्मुक्तोभवेदित्यर्थः॥ ३०॥ ३१॥ आलोचयतियुक्त्यानिर्णयति तस्यक्रमेणज्ञानप्राप्त्यासंसारदुःखास्पर्शः॥ ३२॥ कर्मबंधात्कर्मकृताद्बंधात्संसाररूपादित्यर्थः॥ ३३॥ मेमयारूपंदर्शितम् स्वरूपंदर्शितमित्यर्थः अत्रतारायैभगवताविश्वरूपदर्शनंकारितमितिध्वनयति यद्वादर्शितमित्थंबोधितमित्यर्थः॥ ३४॥

मद्रूपंपरिदृश्यमानंरूपंदर्शितंविश्वरूपंचआलोचयविचारय प्रवाहपतितंसंसारप्रवाहपतितंकार्यंसांसारिकंकार्यंकुर्वत्यपितद्दोषैर्नलिप्यसेइत्यर्थः ॥ ३५ ॥ देहाभिमानजंदेहेअहंममइत्याकारकाभिमानाज्जातम् ॥ ३६ ॥ जीवन्मुक्तातदवस्था परमात्मनारामेणसद्गुरुत्वात्क्षणसंगमेनैव ॥ ३७ ॥ सापितिर्यग्योनिरपिताराअनादिंबंधंसंसाररूपंनिर्धूयतिरस्कृत्यविकल्मषानिष्पापाकृतामुक्ताजीवन्मुक्ताचकृता ॥ ३८ ॥ ३९ ॥ सुग्रीवंकिमाहेत्यत्राह भ्रातुरिति ज्येष्ठस्यभ्रातुर्य

ध्यात्वामद्रूपमनिशमालोचयमयोदितम् ॥ प्रवाहपतितंकार्यंकुर्वत्यपिनलिप्यसे ॥ ३५ ॥ श्रीरामेणोदितंसर्वंश्रुत्वातारातिविस्मिता ॥ देहाभिमानजंशोकंत्यक्त्वानत्वारघूत्तमम् ॥ ३६ ॥ आत्मानुभवसंतुष्टाजीवन्मुक्ताबभूवह ॥ क्षणसंगममात्रेणरामेणपरमात्मना ॥ ३७ ॥ अनादिबंधंनिर्धूयमुक्तासापिविकल्मषा ॥ सुग्रीवोऽपिचतच्छ्रुत्वारामवक्त्रात्समीरितम् ॥ ३८ ॥ जहावज्ञानमखिलंस्वस्थचित्तोभवत्तदा ॥ ततःसुग्रीवमाहेदंरामोवानरपुंगवम् ॥ ३९ ॥ भ्रातुर्ज्येष्ठस्यपुत्रेणयद्युक्तंसांपरायिकम् ॥ कुरुसर्वंयथान्यायंसंस्कारादिममाज्ञया ॥ ४० ॥ तथेतिबलिभिर्मुख्यैर्वानरैःपरिणीयतम् ॥ वालिनंपुष्पकेक्षिप्त्वासर्वराजोपचारकैः ॥ ४१ ॥ भेरीदुंदुभिनिर्घोषैर्ब्राह्मणैर्मंत्रिभिःसह ॥ यूथपैर्वानरैःपौरैस्तारयाचांगदेनच ॥ ४२ ॥ गत्वाचकारतत्सर्वंयथाशास्त्रंप्रयत्नतः ॥ स्नात्वाजगामरामस्यसमीपंमंत्रिभिःसह ॥ ४३ ॥ नत्वारामस्यचरणौसुग्रीवःप्राहहृष्टधीः ॥ राज्यंप्रशाधिराजेंद्रवानराणांसमृद्धिमत् ॥ ४४ ॥ दासोहंतेपादपद्मंसेवेलक्ष्मणवच्चिरम् ॥ इत्युक्तोराघवःप्राहसुग्रीवंसस्मितंवचः ॥ ४५ ॥

त्सांपरायिकंपारलौकिकंयुक्तंतत्पुत्रेणांगदेनकुरुकारयेत्यर्थः ननुभवच्छत्रोःकथमस्माभिःसंस्कारादिकार्यंतत्राह ममाज्ञयेति ॥ ४० ॥ तथेतीत्यस्यांगीकृत्येतिशेषः परिणीयउत्थाप्यपुष्पकेपुष्पकविमानतुल्येवाहने सर्वराजोपचारकैर्युक्तंवालिनंक्षिप्त्वा ॥ ४१ ॥ ४२ ॥ तन्मृतोचितसंस्कारादि ॥ ४३ ॥ वानराणांराज्यंप्रशाधीत्यन्वयः ॥ ४४ ॥ ४५ ॥

त्वमेवाहम् अनेनत्वयाक्रियमाणराज्यभोगएवममभोगइतिसूचितम् किंचानासक्तोराज्यंभुंक्ष्वईश्वरप्रेरितोहंराज्यंकुर्वेइतिमत्याचतादृश्याबुद्ध्याक्रियमाणया क्रिययाभगवांस्तुष्यत्येवेतिध्वनितम् पुरराज्याधिपत्येकिष्किंधापुरराज्याधिपत्ये ॥ ४६ ॥ तर्हिमदभिषेककालेतत्रसन्निधानंकुर्वितिचेत्तत्राहनगरमिति पत्तनं नगरम् ॥ ४७ ॥ अहंचनगरस्यसमीपेपर्वतस्यशिखरेवत्स्यामीत्यन्वयः ॥ ४८ ॥ वर्षदिवसान्वर्षाकालम् ततःराज्याभिषेकानंतरंकिंचित्कालंवर्षासमयंस्वपुरे

त्वमेवाहंनसंदेहःशीघ्रंगच्छममाज्ञया ॥ पुरराज्याधिपत्येत्वंस्वात्मानमभिषेचय ॥ ४६ ॥ नगरंनप्रवेक्ष्यामिचतुर्दशसमाःसखे ॥ आगमिष्यतिमेभ्रातालक्ष्मणःपत्तनंतव ॥ ४७ ॥ अंगदंयौवराज्येत्वमभिषेचयसादरम् ॥ अहंसमीपेशिखरेपर्वतस्यसहानुजः ॥ ४८ ॥ वत्स्यामिवर्षदिवसांस्ततस्त्वंयत्नवान्भव ॥ किंचित्कालंपुरेस्थित्वासीतायाःपरिमार्गणे ॥ ४९ ॥ साष्टांगंप्रणिपत्याहसुग्रीवोरामपादयोः ॥ यदाज्ञापयसेदेवतत्तथैवकरोम्यहम् ॥ ५० ॥ अनुज्ञातस्तुरामेणसुग्रीवस्तुसलक्ष्मणः ॥ गत्वापुरंतथाचक्रेयथारामेणचोदितः ॥ ५१ ॥ सुग्रीवेणयथान्यायंपूजितोलक्ष्मणस्तदा ॥ आगत्यराघवंशीघ्रंप्रणिपत्योपतस्थिवान् ॥ ५२ ॥ ततोरामोजगामाशुलक्ष्मणेनसमन्वितः ॥ प्रवर्षणगिरेरूर्ध्वंशिखरंभूरिविस्तरम् ॥ ५३ ॥ तत्रैकंगह्वरंदृष्ट्वास्फाटिकंदीप्तिमच्छुभम् ॥ वर्षवातातपसहंफलमूलसमीपगम् ॥ वासायरोचयामासतत्ररामःसलक्ष्मणः ॥ ५४ ॥ दिव्यमूलफलपुष्पसंयुतेमौक्तिकोपमजलौघपल्वले ॥ चित्रवर्णमृगपक्षिशोभितेपर्वतेरघुकुलोत्तमोऽवसत् ॥ ५५ ॥ इतिश्रीमद०रामायणेउमामहेश्वरसंवादेकिष्किंधाकांडेतृतीयःसर्गः ॥ ३ ॥

स्थित्वासीतायाःपरिमार्गणेऽन्वेषणेयत्नवान्भवेत्यन्वयः ॥ ४९ ॥ ५० ॥ चोदितःप्रेरितः ॥ ५१ ॥ ५२ ॥ ५३ ॥ गह्वरंगुहाम् फलमूलानिसमीपगानियस्यतत् ॥ ५४ ॥ मौक्तिकोपमःजलौघोजलसमूहोयेषुतादृशानिपल्वलानियस्मिंस्तादृशेपर्वतेइत्यर्थः नानावर्णैर्मृगैःपक्षिभिश्चशोभिते ॥ ५५ ॥ ॥ इतिश्री अध्यात्मरामायणेसेतौकिष्किंधाकांडेतृतीयःसर्गः ॥ ३ ॥

तत्रपर्वतेइत्यर्थः वार्षिकदिनानिव्याप्येतिशेषः अवसदित्यन्वयः ॥१॥ वातप्रेरितजलपूर्णमेघान् अंतरेमध्येस्तनितयुक्तंवैद्युतंविद्युत्समुहोगर्भेयेषांतान् आहितसु
कांचन्यःकक्षाःपृष्ठास्तरणानियेषांतादृशान्गजयूथान्यद्भुतानिववीक्ष्यविस्मयमगात् अत्रगजाबृंहितयुक्ताबोध्याः अतएवस्तनितेनाधिक्यम् ॥ २॥ नवघासं
नवतृणम् विस्फारितेक्षणाभगवत्सौंदर्यदर्शनायेतिभावः ॥ ३ ॥ तादृशाःसंतोध्याननिष्ठामुनीश्वराइवनचलंति राममित्याद्युत्तरान्वयि तत्रैतेचरंतोमृगपक्षिगणा

तत्रवार्षिकदिनानिराघवोलीलयामणिगुहासुसंचरन् ॥ पक्कमूलफलभोगतोषितोलक्ष्णेनसहितोऽवसत्सुखम् ॥ १ ॥
वातनुन्नजलपूरितमेघानंतरस्तनितवैद्युतगर्भान् ॥ वीक्ष्यविस्मयमगाद्गजयूथान्यद्वदाहितसुकांचनकक्षान् ॥ २ ॥ न
वघासंसमास्वाद्यहृष्टपुष्टमृगद्विजाः ॥ धावंतःपरितोरामंवीक्ष्यविस्फारितेक्षणाः ॥ ३ ॥ नचलंतिसदाध्याननिष्ठाइव
मुनीश्वराः ॥ रामंमानुषरूपेणगिरिकाननभूमिषु ॥ ४ ॥ चरंतंपरमात्मानंज्ञात्वासिद्धगणाभुवि ॥ मृगपक्षिगणाभू
त्वाराममेवानुसेविरे ॥ ५ ॥ सौमित्रिरेकदाराममेकांतेध्यानतत्परम् ॥ समाधिविरमेभक्त्याप्रणयाद्विनयान्वितः ॥ ६ ॥
अब्रवीद्देवतेवाक्यात्पूर्वोक्ताद्विगतोमम ॥ अनाद्यविद्यासंभूतःसंशयोहृदिसंस्थितः ॥ ७ ॥ इदानींश्रोतुमिच्छामिक्रि
यामार्गेणराघव ॥ भवदाराधनंलोकेयथाकुर्वंतियोगिनः ॥ ८ ॥ इदमेवसदाप्राहुर्योगिनोमुक्तिसाधनम् ॥ नारदोपि
तथाव्यासोब्रह्माकमलसंभवः ॥ ९ ॥ ब्रह्मक्षत्रादिवर्णानामाश्रमाणांचमोक्षदम् ॥ स्त्रीशूद्राणांचराजेंद्रसुलभंमुक्ति
साधनम् ॥ तवभक्तायमेभ्रात्रेब्रूहिलोकोपकारकम् ॥ १० ॥

नकिंतुसिद्धगणाइत्यपह्नुतिर्व्यंग्या ॥ ४ ॥ ५ ॥ ६ ॥ अनादिभूतयाऽविद्ययासंभूतोजातःसंशयोविगतइत्यन्वः ॥ ७ ॥ क्रियामार्गेणलौकिकपुष्पादिभिःपू
जारूपेण यथातत्प्रकारविशिष्टेनपूजामार्गेणयोगिनोभवदाराधनंकुर्वंतितच्छ्रोतुमिच्छामीत्यन्वयः ॥ ८ ॥ इदमेवक्रियामार्गेणाराधनमेव योगिनएवाह नारद
इत्यादि ॥ ९ ॥ मेमह्यम् ॥ १० ॥

॥ ११ ॥ द्विजत्वंउपनयनसंस्कारंप्राप्य क्त्वांतयोरव्यययोःप्राप्यलब्ध्वाएतयोराराधयेदित्यनेनान्वयः ॥ १२ ॥ पूजास्थानान्याह हृदयइत्यादि स्वहृदयदेश इत्यर्थः इदंचमूर्धादीनामपिस्मृत्युक्तानामुपलक्षणम् अनलेवह्नौ प्रतिमादौप्रतिमास्वर्णरूप्यादिमयीआदिनाब्राह्मणे विभावसौसूर्यमंडलेअर्चेत्पूजयेत् ॥ १३ ॥ प्रातःस्नानमितिसकलप्रातःकृत्योपलक्षणम् ॥ १४ ॥ वेदेति द्विजोवेदोदितैःशूद्रादिस्तंत्रोदितैः मृल्लेपनंसकलस्नानविधेरुपलक्षणम् तेनस्नानंकुर्वन्नित्यन्वयः संध्यादि आदिनाहोमतर्पणादि ॥ १५ ॥ ममपूजकोमद्बुद्ध्याभक्त्यास्वगुरुंपूजयेदित्यन्वयः अत्रगुर्वसान्निध्येपिध्यानेनजलादौगुरुंपूजयेदितिसंप्रदायः ॥ १६॥

श्रीरामउवाच॥ ममपूजाविधानस्यनांतोस्तिरघुनंदन॥ तथाऽपिवक्ष्येसंक्षेपाद्यथावदनुपूर्वशः॥ ११ ॥ स्वगृह्योक्तप्रकारेणद्विजत्वंप्राप्यमानवः॥ सकाशात्सद्गुरोर्मंत्रंलब्ध्वामद्भक्तिसंयुतः॥ १२ ॥ तेनसंदर्शितविधिर्मामेवाराधयेत्सुधीः॥ हृदयेवाऽनलेवार्चेत्प्रतिमादौविभावसौ ॥ १३ ॥ शालग्रामशिलायांवापूजयेन्मामतंद्रितः॥ प्रातःस्नानंप्रकुर्वीत प्रथमंदेहशुद्धये ॥ १४ ॥ वेदतंत्रोदितैर्मंत्रैर्मृल्लेपनविधानतः॥ संध्यादिकर्मयन्नित्यंतत्कुर्याद्विधिनाबुधः॥ १५ ॥ संकल्पमादौकुर्वीतसिद्ध्यर्थंकर्मणांसुधीः॥ स्वगुरुंपूजयेद्भक्त्यामद्बुद्ध्यापूजकोमम ॥ १६ ॥ शिलायांस्नपनंकुर्यात्प्रतिमासुप्रमार्जनम्॥ प्रसिद्धैर्गंधपुष्पाद्यैर्मत्पूजासिद्धिदायिका ॥ १७॥ अमायिकोऽनुवृत्त्यामांपूजयेन्नियतव्रतः॥ प्रतिमादिष्वलंकारःप्रियोमेकुलनंदन ॥ १८ ॥

शिलायांशिलानिर्मितप्रतिमायाम् प्रतिमासुमृद्वस्त्रादिनिर्मितास्वित्यर्थः प्रसिद्धैःस्मृतिप्रसिद्धैः तेनतन्निषिद्धपुष्पादिपूजानर्हमितिसूचितम् तेचनिषेधानिबंधेषुद्रष्टव्याविस्तरभयान्नेहलिखिताः ॥ १७ ॥ अमायिकःमायादंभादिरूपातद्रहितः अनुवृत्त्यागुरूपदिष्टमार्गानुवर्तनेन प्रतिमादिषुप्रतिमाश्चतेआदयश्चप्रतिमादयःतेषुप्रतिमादिषुप्रतिमारूपेषुआदिषुआश्रयेषुपूजाधिकरणेष्वित्यर्थः तत्पुरुषःसमानाधिकरणःकर्मधारयः प्रतिमारूपेष्वाश्रयेषु आदिशब्दआश्रयवाची भीष्मादिश्चसुयोधनइत्यादौप्रसिद्धः अलंकारःपुष्पादिरूपः ॥ १८ ॥

आधारांतरेपूजाविशेषमाहाग्नाविति अग्नौतत्तद्देवतामंत्रेणहोमएवतत्तद्देवतापूजयेत्यर्थः भास्करेस्थंडिलेयजेदिति भास्करेयजेदितियत्तत्तदाकारेस्थंडिले इत्यर्थः भक्तेनश्रद्धयोपहृतंवार्यपिममप्रीत्यैभवतीतिशेष अनेनभक्तेरेवमुख्यत्वंदर्शितम् ॥ १९ ॥ भक्ष्यादिकमुपहृतंप्रीत्यैइतिकिंपुनर्वक्तव्यमित्यर्थः समारभेतूपूजामितिशेषः ॥ २ ॥ तत्रपूजाप्रकारमाह चैलेति अधःकुशासनंतदुपर्यजिनंतदुपरिचैलमितिक्रमः तत्रोपविश्यपद्मासनाद्यन्यतमासनेनेत्यर्थः देवस्यसंमुखेइत्यनेनस्थिरासुप्रतिमासुपश्चिमाद्यभिमुखतयाऽपिपूजाभवतीतिसूचितम ॥ २१ ॥ मातृकाअकारादिपंचाशद्वर्णात्मिका तन्यासप्रकारश्चतंत्रेस्फुटः बहि

अग्नौयजेतहविषाभास्करेस्थंडिलेयजेत् ॥ भक्तेनोपहृतंप्रीत्यैश्रद्धयाममवार्यपि ॥ १९ ॥ किंपुनर्भक्ष्यभोज्यादिगंधपुष्पाक्षतादिकम् ॥ पूजाद्रव्याणिसर्वाणिसंपाद्यैवंसमारभेत् ॥ २० ॥ चैलाजिनकुशैःसम्यगासनंपरिकल्पयेत् ॥ तत्रोपविश्यदेवस्यसंमुखेशुद्धमानसः ॥ २१ ॥ ततोन्यासंप्रकुर्वीतमातृकाबहिरांतरम् ॥ केशवादिततःकुर्यात्तत्त्वन्यासंततःपरम् ॥ २२ ॥ मन्मूर्तिपंजरन्यासंमंत्रन्यासंततोन्यसेत् ॥ प्रतिमादावपितथाकुर्यान्नित्यमतंद्रितः ॥ २३ ॥ कलशंस्वपुरोवामेक्षिपेत्पुष्पादिदक्षिणे ॥ अर्घ्यपाद्यप्रदानार्थंमधुपर्कार्थमेवच ॥ २४ ॥

रिति बहिर्न्यासमांतरंन्यासंचेत्यर्थः केशवादिचतुर्विंशतिनामभिरित्यर्थः सचनारदपंचरात्रादौस्पष्टः तत्त्वन्यासोपितत्रैवोक्तः ॥ २२ ॥ मन्मूर्तिपंजरन्यासोविष्णुपंजरस्तोत्रोक्तोमहान्यासइतिसंप्रदायः मंत्रन्यासंमंत्रवर्णैस्तत्तत्कल्पोक्तंषडंगादिन्यासम् प्रतिमादावपीति यथात्मनितथादेवइत्युक्तेः ॥ २३ ॥ ईषद्वामभागावच्छिन्नपुरोभागेकलशंजलपूर्णंस्थापयेदितिशेषः पुष्पादिदक्षिणेक्षिपेत्स्थापयेदित्यर्थः अर्घ्यादिपात्रस्थापनदेशःस्मृतौउक्तः अर्घ्यपात्रंतुवायव्येनैर्ऋत्यांपाद्यपात्रकम् मध्येतुमधुपर्कस्यादैशेत्वाचमनीयकमिति ॥ २४ ॥

जीवसंज्ञितांमत्कलामित्यनेनचेतनःसर्वत्रैकएवेतिबोधितं युक्तंचैतत् व्यापकेनैकेनैवचेतनोपपत्तावनेकतत्कल्पनायांमानाभावात् प्रतिकर्मव्यवस्थात्वंतःकरणभेदेनैवोपपन्नेति हृत्पद्मेतांध्यायेत् ॥ २५ ॥ तयाव्याप्तमखिलंस्वदेहंभावयेत् तथाभावयित्वातामेवमत्कलांप्रतिमादिष्वावाहयेत् तदावाहनेनतामपिचेतनत्वेनध्यात्वा ॥ २६ ॥ यावच्छक्त्यैरुपचारैर्वाषोडशभिःपंचभिर्वा तुःपादपूरणार्थः अमाययाअदंभादिनामांपूजयेत् ॥ २७ ॥ विभवेसतिकर्पूरादिभिःसुगंध

तथैवाचमनार्थंतुन्यसेत्पात्रचतुष्टयम् ॥ हृत्पद्मेभानुविमलेमत्कलांजीवसंज्ञिताम् ॥ २५ ॥ ध्यायेत्स्वदेहमखिलंतया
व्याप्तमरिंदम ॥ तामेवावाहयेन्नित्यंप्रतिमादिषुमत्कलाम् ॥ २६ ॥ पाद्यार्घ्याचमनीयाद्यैःस्नानवस्त्रविभूषणैः ॥ यावच्छ
क्त्योपचारैर्वात्वर्चयेन्माममायया ॥ २७ ॥ विभवेसतिकर्पूरकुंकुमागुरुचंदनैः ॥ अर्चयेन्मंत्रवन्नित्यंसुगंधकुसुमैःशुभैः
॥ २८ ॥ दशावरणपूजांवैह्यागमोक्तांप्रकारयेत् ॥ नीराजनैर्धूपदीपैर्नैवेद्यैर्बहुविस्तरैः ॥ २९ ॥ श्रद्धयोपहरेन्नित्यंश्रद्धा
भुगहमीश्वरः ॥ होमंकुर्यात्प्रयत्नेनविधिनामंत्रकोविदः ॥ ३० ॥ अगस्त्येनोक्तमार्गेणकुंडेनागमवित्तमः ॥ जुहुयान्मू
लमंत्रेणपुंसूक्तेनाथवाबुधः ॥ ३१ ॥ अथवौपासनाग्नौवाचरुणाहविषातथा ॥ तप्तजांबूनदप्रख्यंदिव्याभरणभूषितम्
॥ ३२ ॥ ध्यायेदनलमध्यस्थंहोमकालेसदाबुधः ॥ पार्षदेभ्योबलिंदत्त्वाहोमशेषंसमापयेत् ॥ ३३ ॥

पुष्पैश्चमंत्रवदर्चयेत् ॥ २८ ॥ आगमोक्तांअगस्त्यसंहितोक्तां प्रकारयेत्प्रकुर्वीतेत्यर्थः नीराजनैरितिपाठक्रमादर्थक्रमस्यबलवत्त्वाद्धूपदीपनैवेद्यनीराजनानीतिक्रमः नीराजनंपंचारार्तिकादिभिः ॥ २९ ॥ तद्धूपादिश्रद्धयोपहरेद्दद्यात् यतोहंश्रद्धाभुक्श्रद्धादत्तभोक्ता ॥ ३० ॥ अगस्त्येनेतिअगस्त्यसंहितोक्तमार्गेणकृतंयत्कुंडंतेनतस्मिन्नित्यर्थः अधिकरणस्यकरणत्वविवक्षयातृतीया मूलमंत्रेणागमोक्तेन पुंसूक्तेनपुरुषसूक्तेनएतद्ब्राह्मणविषयम् ॥ ३१ ॥ तद्विषयेएवाहाथवौपासनाग्नाविति चरुणाहविषाहवीरूपेणचरुणा ॥ ३२ ॥ ध्यायेन्मामितिशेषः पार्षदेभ्यस्तंत्रोक्तहनूमदादिभ्यः ॥ ३३ ॥

मांध्यायन् स्मरन्नित्यस्यमनुवर्णानितिशेषः तदेवाह यतवागिति अनेनप्रशस्ततरोमानसोजपउक्तः मुखवासंतद्रूपकर्पूरादियुक्तंतांबूलंदत्त्वेत्यर्थः ॥ ३४ ॥ मदर्थंमत्प्रीतयेइत्यर्थः कारयेत्कुर्वीतेत्यर्थः निवृत्तप्रेषणाण्णिच् दंडवदित्यनेनाष्टांगप्रणामउक्तः ॥ ३५ ॥ भावनामयंमद्दत्तंप्रसादंशिरसिआधायस्थापयित्वा अनेनमत्संप्रसादंपुष्पादिरूपंभगवान्ददातीतिभावनयाप्रसादंगृह्णीयादितिसूचितम् तंगृहीत्वाशिरसिस्थापयित्वाभावनाभावितेमत्पदेपाणिभ्यांस्वमूर्ध्निगृहीत्वाधृत्वा

ततोजपंप्रकुर्वीतध्यायन्मांयतवाक्स्मरन् ॥ मुखवासंचतांबूलंदत्त्वाप्रीतिसमन्वितः ॥ ३४ ॥ मदर्थेनृत्यगीतादिस्तुतिपाठादिकारयेत् ॥ प्रणमेद्दंडवद्भूमौहृदयेमांनिधायच ॥ ३५ ॥ शिरस्याधायमद्दत्तंप्रसादंभावनामयम् ॥ पाणिभ्यांमत्पदेमूर्ध्निगृहीत्वाभक्तिसंयुतः ॥ ३६ ॥ रक्षमांघोरसंसारादित्युक्त्वाप्रणमेत्सुधीः ॥ उद्वासयेद्यथापूर्वंप्रत्यग्ज्योतिषिसंस्मरन् ॥ ३७ ॥ एवमुक्तप्रकारेणपूजयेद्विधिवद्यदि ॥ इहामुत्रचसंसिद्धिंप्राप्नोतिमदनुग्रहात् ॥ ३८ ॥ मद्भक्तोयदिमामेवंपूजांचैवदिनेदिने ॥ करोतिममसारूप्यंप्राप्नोत्येवनसंशयः ॥ ३९ ॥ इदंरहस्यंपरमंचपावनंमयैवसाक्षात्कथितंसनातनम् ॥ पठत्यजस्रंयदिवाशृणोतियःससर्वपूजाफलभाङ्नसंशयः ॥ ४० ॥ एवंपरात्माश्रीरामःक्रियायोगमनुत्तमम् ॥ पृष्टःप्राहस्वभक्तायशेषांशायमहात्मने ॥ ४१ ॥

॥ ३६ ॥ इत्युक्त्वाप्रणमेदित्यन्वयः प्रत्यग्ज्योतिषिस्वहृदयस्थे यतएवध्याताजीवकलाप्रतिमायामावाहितापूर्वंतत्रैवोद्वासयेत्तत्रैवप्रविष्टांध्यायेत् एतदेवविसर्जनम् ॥ ३७ ॥ इहामुत्रचऐहलौकिकींपारलौकिकींचेत्यर्थः ॥ ३८ ॥ मद्भक्तोयदिमामेवंध्यात्वाआवाह्यचदिनेदिनेप्रतिदिनंममपूजांकरोतितदाममसारूप्यंप्राप्नोति ॥ ३९ ॥ सनातनंपूर्वपूर्वैरप्येवमेवानुष्ठितम् ॥ ४० ॥ शेषांशायलक्ष्मणाय ॥ ४१ ॥

पुनःप्राकृतवद्रामोमायामालंब्यदुःखितः॥ हासीतेतिवदन्नैवनिद्रांलेभेकथंचन॥ ४२॥ एतस्मिन्नंतरेतत्रकिष्किंधायां
सुबुद्धिमान्॥ हनुमान्प्राहसुग्रीवमेकांतेकपिनायकम्॥ ४३॥ शृणुराजन्प्रवक्ष्यामितवैवहितमुत्तमम्॥ रामेणतेकृतः
पूर्वमुपकारोह्यनुत्तमः॥ ४४॥ कृतघ्नवत्त्वयानूनंविस्मृतःप्रतिभातिमे॥ त्वत्कृतेनिहतोवालीवीरस्त्रैलोक्यसंमतः॥ ४५॥
राज्येप्रतिष्ठितोसित्वंतारांप्राप्तोसिदुर्लभाम्॥ सरामःपर्वतस्याग्रेभ्रात्रासहवसन्सुधीः॥४६॥ त्वदागमनमेकाग्रमीक्षते
कार्यगौरवात्॥ त्वंतुवानरभावेनस्त्रीसक्तोनावबुध्यसे॥ ४७॥ करोमीतिप्रतिज्ञायसीतायाःपरिमार्गणम्॥ नकरोषिकृ
तघ्नस्त्वंहन्यसेवालिवद्द्रुतम्॥ ४८॥हनूमद्वचनंश्रुत्वासुग्रीवोभयविह्वलः॥प्रत्युवाचहनूमंतंसत्यमेवत्वयोदितम्॥ ४९॥
शीघ्रंकुरुमदाज्ञांत्वंवानराणांतरस्विनाम्॥ सहस्राणिदशेदानींप्रेषयाशुदिशोदश॥ ५०॥ सप्तद्वीपगतान्सर्वान्वानराना
नयंतुते॥ पक्षमध्येसमायांतुसर्वेवानरपुंगवाः॥ ५१॥ येपक्षमतिवर्तंतेतेवध्यामेनसंशयः॥ इत्याज्ञाप्यहनूमंतंसुग्रीवो
गृहमाविशत्॥ ५२॥ सुग्रीवाज्ञांपुरस्कृत्यहनूमान्मंत्रिसत्तमः॥ तत्क्षणेप्रेषयामाससहरीन्दशदिशःसुधीः॥ ५३॥

प्राकृतवत्प्रकृतिकार्यः मनुष्यवत् मायामालंब्यदुःखितइत्यनेनस्वतस्तस्यदुःखलेशोपिनेतिसूचितम् ॥ ४२ ॥ एकांतेइति मंत्रत्वादेकांतेकथनम् ॥ ४३ ॥ अनुत्तमःनविद्यतेउत्तमंयस्मादित्यर्थः ॥ ४४ ॥ उपकारमेवाह त्वत्कृतेइति ॥ ४५ ॥ दुर्लभांतारामिति वालिपरिग्रहात्त्वयासर्वथाकामिभावेनद्रष्टुमप्यशक्यामित्यर्थः ॥ ४६ ॥ एकाग्रंतन्मात्रचित्तत्वंयथाभवतितथाईक्षतेप्रतीक्षते कार्यस्यसीतान्वेषणरूपस्य गौरवात्त्वदेकसाध्यत्वादित्यर्थः ॥ ४७ ॥ कृतघ्नस्त्वंयदिनकरोषितदावालिवत्हन्यसेरामेणेतिशेषः अतःसर्वथान्वेषणमुचितमितिव्यंग्यम् ॥ ४८ ॥ ४९ ॥ वानराणांमदाज्ञांकुरुबोधय ॥ ५० ॥ आज्ञामाह सप्तेति ॥ ५१ ॥ इत्याज्ञाप्यएवंवानरेषुकर्तव्यामाज्ञांबोधयित्वा ॥ ५२ ॥ ५३ ॥

अगणितागुणाःसत्वंपराक्रमश्चयेषांतान् पर्वताकारसदृशंरूपमाकारोयेषांतान् पवनस्यवायोर्हितोतिप्रियःकुमारोहनूमान् दानमानादितृप्तानित्यनेनावश्यंकार्यसिद्धिकारित्वंदर्शितम् ॥ ५४ ॥ ॥ इतिश्री०सेतौकिष्किंधाकांडेचतुर्थःसर्गः ॥ ४ ॥ ॥ छ ॥ ॥ रामस्त्विति पर्वताग्रेस्थितोमणियुक्तसानौशिखरे ॥ १ ॥ नजानेनशक्नोमीत्यर्थः धातूनामनेकार्थत्वात् ॥ २ ॥ यःकश्चिदपिजीवतीतिब्रूयात्समेप्रियकृत् यत्रकुत्रवायत्रकुत्रापीत्यर्थः ॥ ३ ॥ ४ ॥

अगणितगुणसत्वान्वायुवेगप्रचारान्वनचरगणमुख्यान्पर्वताकाररूपान्॥ पवनहितकुमारःप्रेषयामासदूतानतिरभस
तरात्मादानमानादितृप्तान्॥ ५४ ॥इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेकिष्किंधाकांडेचतुर्थःसर्गः॥ ४ ॥छ॥
॥रामस्तुपर्वतस्याग्रेमणिसानौनिशामुखे॥ सीताविरहजंशोकमसहन्निदमब्रवीत्॥ १ ॥ पश्यलक्ष्मणमेसीताराक्षसे
नहृतावलात्॥ मृताऽमृतावानिश्चेतुंनजानेद्यापिभामिनीम्॥ २ ॥ जीवतीतिममब्रूयात्कश्चिद्वाप्रियकृत्समे॥ यदिजा
नामितांसाध्वींजीवंतींयत्रकुत्रवा॥ ३ ॥ हठादेवाहरिष्यामिसुधामिवपयोनिधेः॥ प्रतिज्ञांशृणुमेभ्रातर्येनमेजनकात्म
जा॥ ४ ॥ नीतातंभस्मसात्कुर्यांसपुत्रबलवाहनम्॥हेसीतेचंद्रवदनेवसंतीराक्षसालये॥ ५॥ दुःखार्तांमामपश्यंतीकथं
प्राणान्धरिष्यसि ॥ चंद्रोपिभानुवद्भातिममचंद्राननांविना ॥ ६ ॥ चंद्रत्वंजानकींस्पृष्ट्वाकरैर्मांस्पृशशीतलैः॥ सुग्री
वोऽपिदयाहीनोदुःखितंमांनपश्यति ॥ ७॥ राज्यंनिष्कंटकंप्राप्यस्त्रीभिःपरिवृतोरहः॥ कृतघ्नोदृश्यतेव्यक्तंपानासक्तोऽ
तिकामुकः॥ ८ ॥

वसंतीत्वंकथंप्राणान्धरिष्यसीत्यन्वयः ॥ ५ ॥ विरहदुःखमभिनयति चंद्रोपीति भानुवत्दाहकत्वात् ॥ ६ ॥ चंद्रत्वमिति कर्पूरतोप्यतिशीतलस्यममकामदुःखशामकस्यतद्गात्रस्यस्पर्शैतवकराअपितथागुणशैत्ययुक्ताभूत्वामांसुखयिष्यंतीतिभावः विरहवेदनासहत्वादेवसुग्रीवंनिंदतिसुग्रीवोपीति ॥ ७ ॥ यन्मांनपश्यतितत्कृतघ्नःसइवदृश्यते ॥ ८ ॥

कृतघ्नत्वमुपपादयति नायातीति ॥ ९ ॥ एवंयथासीताहर्तारंहंतुमिच्छामिएवमित्यर्थः अद्ययथामेमयावालीहतस्तथासुग्रीवोपिभवेदित्यर्थः ॥ १० ॥ रुष्टंक्रोध
वंतम् ॥ ११ ॥ इदानीमेवेत्याद्युक्त्वाराजाज्ञांविनेदृशकार्यकरणमनुचितमितिप्रतिसंधायाह मामाज्ञापयेति ईदृशेस्थलेप्रथमतोऽप्रतिसंधानंतुरामरोषेणलक्ष्म
णस्यापिरोषाविष्टत्वात्अतोगर्भितंनदोषः ॥ १२ ॥ १३ ॥ वालिवन्नहनिष्यसेइत्युक्त्वाभीषयेत्यन्वयः नञिकाकुः ततःसुग्रीवप्रतिभाषितंतद्दत्तोत्तरंआदाय

नायातिशरदंपश्यन्नपिमार्गयितुंप्रियाम् ॥ पूर्वोपकारिणंदुष्टःकृतघ्नोविस्मृतोहिमाम् ॥ ९ ॥ हन्मिसुग्रीवमप्येवंसपुरंस
हबांधवम् ॥ वालीयथाहतोमेऽद्यसुग्रीवोपितथाभवेत् ॥ १० ॥ इतिरुष्टंसमालोक्यराघवंलक्ष्मणोऽब्रवीत् ॥ इदानीमे
वगत्वाहंसुग्रीवंदुष्टमानसम् ॥ ११ ॥ मामाज्ञापयहत्वातमायास्येरामतेंतिकम् ॥ इत्युक्त्वाधनुरादायखड्गंतूणीरमे
वच ॥ १२ ॥ गंतुमभ्युद्यतंवीक्ष्यरामोलक्ष्मणमब्रवीत् ॥ नहंतव्यस्त्वयावत्ससुग्रीवोमेप्रियःसखा ॥ १३ ॥ किंतुभी
षयसुग्रीवंवालिवन्नहनिष्यसे ॥ इत्युक्त्वाशीघ्रमादायसुग्रीवप्रतिभाषितम् ॥ १४ ॥ आगत्यपश्चाद्यत्कार्यंतत्करिष्या
म्यसंशयम् ॥ तथेतिलक्ष्मणोऽगच्छत्त्वरितोभीमविक्रमः ॥ १५ ॥ किष्किंधांप्रतिकोपेननिर्दहन्निववानरान् ॥ सर्व
ज्ञोनित्यलक्ष्मीकोविज्ञानात्मापिराघवः ॥ १६ ॥ सीतामनुशुशोचार्तःप्राकृतःप्राकृतामिव ॥ बुद्ध्यादिसाक्षिणस्तस्य
मायाकार्यातिवर्तिनः ॥ १७ ॥ रागादिरहितस्यास्यतत्कार्यंकथमुद्भवेत् ॥ ब्रह्मणोक्तमृतंकर्तुंराज्ञोदशरथस्यहि ॥ १८ ॥

॥ १४ ॥ अत्रागत्यमांश्रावयेतिशेषः तच्छ्रुत्वापश्चाद्यत्कार्यंकर्तुंयोग्यंतत्करिष्यामि अगच्छदितिच्छेदः ॥ १५ ॥ किष्किंधांप्रत्यगच्छदितिपूर्वेणान्वयः नित्य
लक्ष्मीकःअविभक्ततन्नामकमायाशक्तिः तत्संबंधादेवसर्वज्ञः स्वतस्तुविज्ञानात्मानिर्विषयज्ञानस्वरूपोपि ॥ १६ ॥ सीतामनुशुशोचेतिविरोधः प्राकृतोऽज्ञोज
नः प्राकृतांसंयोगवियोगशालिनीं तत्रशंकते बुद्ध्येत्यादिनाकथमुद्भवेदित्यंतेन मायाकार्यातिवर्तिनःतदस्पृष्टस्य ॥ १७ ॥ अतएवरागादिरहितस्य समाधत्ते ब्र
ह्मणेति ब्रह्मप्रार्थितंरावणवधफलकावतरणंकृतंसत्यंकर्तुंजातः फलांतरमप्याहराज्ञस्तपःफलदानायच ॥ १८ ॥

मानुषवेषधृक्जातः एवंचतद्वेषनिर्वाहायैवैवंचेष्टाकरणमितिभावः फलांतरमपितथाव्यवहरणस्याह माययेति मायामोहितत्वादेवाज्ञानसंयुताः ॥ १९ ॥ प्रथ
यितुंविस्तारयितुम्॥ २० ॥ मानुषचेष्टकःमनुष्यसदृशचेष्टाकर्ता लोकानांक्रोधादिकालिकस्यव्यवहारस्यसिद्धयेज्ञानायार्थस्यतत्फलस्यचसिद्धये ॥ २१ ॥
तत्तत्कालोचितंव्यवहारंगृह्णन्व्यवहरन्प्रजाःमोहयतिरामोप्येवंव्यवहृतवान्तस्मादेवंव्यवहारोयुक्तइतिबोधयतिमोहकत्वंचास्यनिवृत्तिमार्गविपरीतत्वेन गुणव
र्जितोऽपिअशेषगुणेषुशत्रुवधकांतानुरागादिषुअनुरक्तइवतत्तद्व्यवहरन् अतएवमोहयति ॥ २२ ॥ कामाद्यलिप्तत्वमेवहेतुपूर्वंनिरूपयति विज्ञानेति स्वयंविज्ञा

तपसःफलदानायजातोमानुषवेषधृक् ॥ माययामोहिताःसर्वेजनाअज्ञानसंयुताः॥ १९॥ कथमेषांभवेन्मोक्षइतिवि
ष्णुर्विचिंतयन्॥कथांप्रथयितुंलोकेसर्वलोकमलापहाम्॥२०॥रामायणाभिधांरामोभूत्वामानुषचेष्टकः॥ क्रोधंमो
हंचकामंचव्यवहारार्थसिद्धये॥ २१॥तत्तत्कालोचितंगृह्णन्मोहयत्यवशाःप्रजाः॥ अनुरक्तइवाशेषगुणेषुगुणवर्जितः
॥२२॥विज्ञानमूर्तिर्विज्ञानशक्तिःसाक्ष्यगुणान्वितः॥ अतःकामादिभिर्नित्यमविलिप्तोयथानभः॥ २३॥ विंदंतिमुन
यःकेचिज्जानंतिसनकादयः॥तद्भक्तानिर्मलात्मानःसम्यग्जानंतिनित्यदा॥ २४ ॥भक्तचित्तानुसारेणजायतेभगवा
नजः॥ लक्ष्मणोऽपितदागत्वाकिष्किंधानगरांतिकम्॥ २५॥

नमूर्तिस्तद्घनःतथाविज्ञानरूपैवशक्तिर्यस्य तेनशक्तिसंसर्गकृतोऽन्यथाभावोवारितः अतएवसर्वप्राणिनांशुभाशुभसाक्षीविशिष्टज्ञानशक्तित्वात् अगुणान्वितःगु
णान्वितभिन्नःनिर्गुणइतियावत् अतइतिस्पष्टं यथानभआकाशःपवनानीतमलेनालिप्तस्तद्वत् ॥ २३ ॥ नन्वेवंभूतोस्माभिर्नगृह्यतेकिंतत्राह विंदंतीति केचिदे
वसनकादयोमुनयोजानंतिश्रुतिवाक्यैर्विंदंतिलभंते अपरोक्षतयापिसाक्षात्कुर्वंतीतियावत् तत्किमन्येनजानंत्येवसर्वथानेत्याह तद्भक्ताइति ईदृशाःसम्यक्जानं
त्येवेतिभावः ॥ २४ ॥ तत्रहेतुमाह भक्तेति जायतेज्ञानविषयोजायतइत्यर्थः ॥ २५ ॥

वप्रंप्राकारः ॥ २६ ॥ किलकिलाशब्दोवानराणांक्रोधभयादिकालिकःशब्दः ॥ २७ ॥ समापत्यगृहाच्चलित्वा ॥२८॥ लक्ष्मणसामीप्यंगत्वाप्राप्य ॥२९॥ प्रियवर्धनःप्रियाणांवृद्धिकरणशीलः ॥ ३० ॥ रौद्रमूर्तिनावालिवधकालिकमूर्तिना ॥ ३१ ॥ लक्ष्मणोबहिःस्थितइतिन्यवेदयदित्यन्वयः ॥ ३२ ॥ लक्ष्मणं

ज्याघोषमकरोत्तीव्रंभीषयन्सर्ववानरान् ॥ तंदृष्ट्वाप्राकृतास्तत्रवानरावप्रमूर्धनि ॥ २६ ॥ चक्रुःकिलकिलाशब्दंधृतपाषाणपादपाः ॥ तान्दृष्ट्वाक्रोधताम्राक्षोवानरान्लक्ष्मणस्तदा ॥ २७ ॥ निर्मूलान्कर्तुमुद्युक्तोधनुरानम्यवीर्यवान् ॥ ततःशीघ्रंसमापत्यज्ञात्वालक्ष्मणमागतम् ॥ २८ ॥ निवार्यवानरान्सर्वानंगदोमंत्रिसत्तमः ॥ गत्वालक्ष्मणसामीप्यंप्रणनामसदंडवत् ॥ २९ ॥ ततोंगदंपरिष्वज्यलक्ष्मणःप्रियवर्धनः ॥ उवाचवत्सगच्छत्वंपितृव्यायनिवेदय ॥ ३० ॥ मामागतंराघवेणचोदितंरौद्रमूर्तिना ॥ तथेतित्वरितंगत्वासुग्रीवायन्यवेदयत् ॥ ३१ ॥ लक्ष्मणःक्रोधताम्राक्षःपुरद्वारिबहिःस्थितः ॥ तच्छ्रुत्वातीवसंत्रस्तःसुग्रीवोवानरेश्वरः ॥ ३२ ॥ आहूयमंत्रिणांश्रेष्ठंहनूमंतमथाऽब्रवीत् ॥ गच्छत्वमंगदेनाशुलक्ष्मणंविनयान्वितः ॥ ३३ ॥ सांत्वयन्कोपितंवीरंशनैरानयमंदिरम् ॥ प्रेषयित्वाहनूमंतंतारामाहकपीश्वरः ॥ ३४ ॥ त्वंगच्छसांत्वयंतीतंलक्ष्मणंमृदुभाषितैः ॥ शांतमंतःपुरंनीत्वापश्चाद्दर्शयमेनघे ॥ ३५ ॥ भवत्वितिततस्तारामध्यकक्षंसमाविशत् ॥ हनूमानंगदेनैवसहितोलक्ष्मणांतिकम् ॥ ३६ ॥ गत्वाननामशिरसाभक्त्यास्वागतमब्रवीत् ॥ एहिवीरमहाभागभवद्गृहमशंकितम् ॥ ३७ ॥

तन्निकटम् ॥ ३३ ॥ कोपितंसंजातकोपंसांत्वयन्क्षमावंतंकुर्वन्मंदिरमानयप्रापय ॥ ३४ ॥ मृदुभाषितैःसांत्वयंतीलक्ष्मणंप्रतिगच्छ ततःशांतंशांतकोपंकृत्वा ततोंऽतःपुरंनीत्वा अनेनात्यंतमित्रताप्रदर्शनम् मेमांदर्शय ॥ ३५ ॥ मध्यकक्षंस्त्रीणांसंचारमर्यादास्थलं ॥ ३६ ॥ अशंकितमेहियतइदंभवद्गृहम् ॥ ३७ ॥

राजदारादीन्दृष्ट्वेत्यनेनसेवकदारदर्शनेयथाराज्ञोनसंकोचस्तथाऽस्मद्राजदारदर्शनेतवसंकोचोनोचितइतिभावः ॥ ३८ ॥ गृह्येत्यार्षं ॥ ३९ ॥ यूथपानांमहासौ
धान्गृहानित्यर्थः ॥ ४० ॥ ताराधिपाननाचंद्रमुखी ॥ ४१ ॥ आदौस्वस्यसेवकत्वाल्लक्ष्मणस्यभगवदवतारत्वाच्चनत्वापश्चान्मित्रभावेनदेवरेत्युक्तिः त्वंसाधुर्भ

प्रविश्यराजदारादीन्दृष्ट्वासुग्रीवमेवच ॥ यदाज्ञापयसेपश्चात्तत्सर्वंकरवाणिभो ॥ ३८ ॥ इत्युक्त्वालक्ष्मणंभक्त्याक
रेगृह्यसमारुतिः ॥ आनयामासनगरमध्याद्राजगृहंप्रति ॥ ३९ ॥ पश्यंस्तत्रमहासौधान्यूथपानांसमंततः ॥ जगाम
भवनंराज्ञःसुरेंद्रभवनोपमम् ॥ ४० ॥ मध्यकक्षेगतातत्रताराताराधिपानना ॥ सर्वाभरणसंपन्नामदरक्तांतलोचना
॥ ४१ ॥ उवाचलक्ष्मणंनत्वास्मितपूर्वाभिभाषिणी ॥ याहिदेवरभद्रंतेसाधुस्त्वंभक्तवत्सलः ॥ ४२ ॥ किमर्थंकोपमा
कार्षीर्भक्तेभृत्येकपीश्वरे ॥ बहुकालमनाश्वासंदुःखमेवानुभूतवान् ॥ ४३ ॥ इदानींबहुदुःखौघाद्भवद्भिरभिरक्षितः ॥
भवत्प्रसादात्सुग्रीवःप्राप्तसौख्योमहामतिः ॥ ४४ ॥ कामासक्तोरघुपतेःसेवार्थंनागतोहरिः ॥ आगमिष्यंतिहरयोना
नादेशगताःप्रभो ॥ ४५ ॥ प्रेषितादशसाहस्राहरयोरघुसत्तम॥ आनेतुंवानरान्दिग्भ्योमहापर्वतसन्निभान् ॥ ४६ ॥
सुग्रीवःस्वयमागत्यसर्ववानरयूथपैः ॥ वधयिष्यतिदैत्यौघान्रावणंचहनिष्यति ॥ ४७ ॥ त्वयैवसहितोऽद्यैवगंतावा
नरपुंगवः ॥ पश्यांतर्भवनंतत्रपुत्रदारसुहृद्वृतम् ॥ ४८ ॥

क्तवत्सलोऽतोभक्तेष्वीदृशःकोपोऽनुचितइतिभावः ॥ ४२ ॥ आकार्षीःअतिशयेनकृतवान् अनाश्वासंनिरंतरमित्यर्थः ॥ ४३ ॥ बहुदुःखौघात्वालितःप्राप्य
माणात् ॥ ४४ ॥ यतःप्राप्तसौख्योऽतःकामासक्तोपिसेवार्थंनागतइतिनअपित्वागतएव काकुरत्र कथमागतस्तत्राह आगमिष्यंतीति ॥ ४५ ॥ एवंचैवमुद्यमकर
णात्सेवांकृतवानेवेतिभावः ॥ ४६ ॥ ४७ ॥ रामभ्रातृत्वात्त्वयैवसहितोवानरपुंगवोऽद्यैवगंतारामसमीपमितिशेषः अंतर्भवनस्यमध्ये ॥ ४८ ॥

तेसहैवनय स्वैनैवसहनयेत्यर्थः तारावचनेनातिमधुरेणललितेनकृशक्रोधः ॥ ४९ ॥ यत्रसुग्रीवःस्थितस्तदंतःपुरंजगाम ॥ ५० ॥ अत्यर्थंअतिशयेनातिभीतवदुत्पपातपर्यंकादितिशेषः मदविह्वलितेक्षणंमदविकलनेत्रम् ॥ ५१ ॥ प्रतीक्षतेत्वांहंतुमितिशेषः ॥ ५२ ॥ ५३ ॥ ५४ ॥ जागर्तिउद्यमवान्भवति अस्मिन्ने

दृष्ट्वासुग्रीवमभयंदत्त्वानयसहैवते ॥ तारायावचनंश्रुत्वाकृशक्रोधोऽथलक्ष्मणः ॥ ४९ ॥ जगामांतःपुरंयत्रसुग्रीवोवानरेश्वरः॥ रुमामालिंग्यसुग्रीवःपर्यंकेपर्यवस्थितः ॥ ५० ॥ दृष्ट्वालक्ष्मणमत्यर्थमुत्पपातातिभीतवत्॥ तंदृष्ट्वालक्ष्मणःक्रुद्धोमदविह्वलितेक्षणम् ॥ ५१ ॥ सुग्रीवंप्राहदुर्वृत्तविस्मृतोसिरघूत्तमम् ॥ वालीयेनहतोवीरःसबाणोऽद्यप्रतीक्षते ॥ ५२ ॥ त्वमेववालिनोमार्गंगमिष्यसिमयाहतः ॥ एवमत्यंतपरुषंवदंतंलक्ष्मणंतदा ॥५३॥ उवाचहनुमान्वीरःकथमेवंप्रभाषसे ॥ त्वत्तोधिकतरोरामेभक्तोयंवानराधिपः ॥५४॥ रामकार्यार्थमनिशंजागर्तिनतुविस्मृतः ॥ आगताःपरितःपश्यवानराःकोटिशःप्रभो ॥ ५५ ॥ गमिष्यंत्यचिरेणैवसीतायाःपरिमार्गणम् ॥ साधयिष्यतिसुग्रीवोरामकार्यमशेषतः॥ ५६ ॥श्रुत्वाहनूमतोवाक्यंसौमित्रिर्लज्जितोभवत्॥सुग्रीवोप्यर्घ्यपाद्याद्यैर्लक्ष्मणंसंप्रपूजयत्॥५७॥ आलिंग्यप्राहरामस्यदासोहंतेनरक्षितः ॥ रामस्वतेजसालोकान्क्षणार्धेनैवजेष्यति ॥ ५८ ॥ सहायमात्रमेवाहंवानरैःसहितःप्रभो ॥ सौमित्रिरपिसुग्रीवंप्राहकिंचिन्मयोदितम् ॥ ५९ ॥ तत्क्षमस्वमहाभागप्रणयाद्भाषितंमया ॥गच्छामोद्यैवसुग्रीवरामस्तिष्ठतिकानने॥६०॥ एकएवातिदुःखार्तोजानकीविरहात्प्रभुः॥ तथेतिरथमारुह्यलक्ष्मणेनसमन्वितः ॥ ६१ ॥ वानरैःसहितोराजाराममेवान्वपद्यत ॥ ६२ ॥

वसमयेआकारणार्थंगतावानराःसेनांकर्षंतआगताइत्याह आगताइति ॥ ५५ ॥ परिमार्गणंकर्तुमितिशेषः ॥ ५६ ॥ ५७ ॥ ५८ ॥ यत्किंचिन्मयोदितंतत्क्षमस्वेत्यन्वयः ॥ ५९ ॥ प्रणयात्प्रणयकोपात् ॥ ६० ॥ ६१ ॥ ६२ ॥

॥ ६३ ॥ ॥ इतिश्रीमत्सकल०सेतौकिष्किंधाकांडेपंचमःसर्गः ॥ ५ ॥ ॥ छ ॥ ॥ छ ॥ ॥ दृष्ट्वेति चैलंचजीर्णवासोऽजिनंच ॥ १ ॥

भेरीमृदंगैर्बहुऋक्षवानरैःश्वेतातपत्रैर्व्यजनैश्चशोभितः ॥ नीलांगदाद्यैर्हनुमत्प्रधानैःसमावृतोराघवमभ्यगाद्धरिः ॥ ६३ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेकिष्किं०पंचमःसर्गः॥ ५॥ ॥छ॥ दृष्ट्वारामंसमासीनं गुहाद्वारिशिलातले ॥ चैलाजिनधरंश्यामंजटामौलिविराजितम् ॥ १ ॥ विशालनयनंशांतंस्मितचारुमुखांबुजम् ॥ सीताविरहसंतप्तंपश्यंतंमृगपक्षिणः॥ २ ॥ रथाद्दूरात्समुत्पत्त्यवेगात्सुग्रीवलक्ष्मणौ ॥रामस्यपादयोरग्रेपेततुर्भक्तिसंयुतौ॥ ३ ॥ रामःसुग्रीवमालिंग्यपृष्ट्वानामयमंतिके ॥ स्थापयित्वायथान्यायंपूजयामासधर्मवित् ॥ ४ ॥ततोऽब्रवीद्रघुश्रेष्ठंसुग्रीवोभक्तिनम्रधीः॥देवपश्यसमायांतींवानराणांमहाचमूम् ॥ ५॥ कुलाचलाद्रिसंभूतामेरुमंदरसन्निभाः॥ नानाद्वीपसरिच्छैलवासिनःपर्वतोपमाः ॥ ६ ॥ असंख्याताःसमायांतिहरयःकामरूपिणः ॥ सर्वेदेवांशसंभूताःसर्वेयुद्धविशारदाः॥ ७॥ अत्रकेचिद्गजबलाःकेचिद्दशगजोपमाः॥ गजायुतबलाःकेचिदन्येऽमितबलाःप्रभो ॥ ८ ॥ केचिदंजनकूटाभाःकेचित्कनकसन्निभाः ॥ केचिद्रक्तांतवदनादीर्घवालास्तथापरे ॥ ९ ॥ शुद्धस्फटिकसंकाशाःकेचिद्राक्षससन्निभाः॥ गर्जंतःपरितोयांतिवानरायुद्धकांक्षिणः॥ १०॥ त्वदाज्ञाकारिणःसर्वेफलमूलाशनाःप्रभो ॥ ऋक्षाणामधिपोवीरोजांबवान्नामबुद्धिमान्॥ ११ ॥ एषमेमंत्रिणांश्रेष्ठःकोटिभल्लुकवृंदपः ॥ हनुमानेषविख्यातोमहासत्त्वपराक्रमः॥ १२ ॥

स्मितेनचारुसुंदरंमुखांबुजंयस्यतम् ॥ २ ॥ ३ ॥ अनामयमारोग्यं अंतिकेस्वसमीपे ॥ ४ ॥ ५ ॥ कुलाचलाहिमालयादयःसप्तपर्वताः ॥ ६ ॥ ७ ॥ अमितबलाइतिच्छेदः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ कोटिभल्लुकवृंदपःकोटीतिवृंदविशेषणम् ॥ १२ ॥

॥ १३ ॥ १४ ॥ १५ ॥ प्रत्येकतः सार्वविभक्तिकस्तसिः एकैकइत्यर्थः ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ कार्यगौरवंजानासि अतोयस्यांदिशियेयोग्यास्तांस्तत्रनियुंक्ष्वेत्यर्थः ॥ २० ॥ २१ ॥ २२ ॥ अत्यर्थमतिशयेनमहाबलान्ज्ञात्वाप्रयत्नेनतानेवप्रेषयामासेत्यन्वयः तानेवाह युवराजमिति ॥ २३ ॥ २४ ॥ म

वायुपुत्रोऽतितेजस्वीमंत्रीबुद्धिमतांवरः॥ नलोनीलश्चगवयोगवाक्षोगंधमादनः॥ १३ ॥ शरभोमैंदवश्चैवगजःपनसएवच॥ वलीमुखोदधिमुखःसुषेणस्तारएवच ॥ १४ ॥ केसरीचमहासत्त्वःपिताहनुमतोबली॥ एतेमेयूथपारामप्राधान्येनमयोदिताः॥ १५ ॥ महात्मानोमहावीर्याःशक्रतुल्यपराक्रमाः॥ एतेप्रत्येकतःकोटिकोटिवानरयूथपाः॥ १६॥ तवाज्ञाकारिणःसर्वेसर्वेदेवांशसंभवाः॥ एषवालिसुतःश्रीमानंगदोनामविश्रुतः ॥ १७ ॥ वालितुल्यबलोवीरोराक्षसानांबलांतकः॥ एतेचान्येचबहवस्त्वदर्थेत्यक्तजीविताः॥ १८॥ योद्धारःपर्वताग्रैश्चनिपुणाःशत्रुघातने ॥ आज्ञापयरघुश्रेष्ठसर्वेतेवशवर्तिनः ॥ १९ ॥ रामःसुग्रीवमालिंग्यहर्षपूर्णाश्रुलोचनः ॥ प्राहसुग्रीवजानासिसर्वंत्वंकार्यगौरवम्॥ २० ॥ मार्गणार्थंहिजानक्यानियुंक्ष्वयदिरोचते॥ श्रुत्वारामस्यवचनंसुग्रीवःप्रीतमानसः॥ २१ ॥ प्रेषयामासबलिनोवानरान्वानरर्षभः॥ दिक्षुसर्वासुविविधान्वानरान्प्रेष्यसत्वरम्॥ २२ ॥ दक्षिणांदिशमत्यर्थंप्रयत्नेनमहाबलान्॥ युवराजंजांबवंतंहनूमंतंमहाबलम् ॥ २३॥ नलंसुषेणंशरभंमैंदंद्विविदमेवच ॥ प्रेषयामाससुग्रीवोवचनंचेदमब्रवीत्॥ २४॥ विचिन्वंतुप्रयत्नेनभवंतोजानकींशुभाम्॥ मासादर्वाङ्निवर्तध्वंमच्छासनपुरःसराः॥२५॥ सीतामदृष्ट्वायदिवोमासादूर्ध्वंदिनंभवेत्॥ तदाप्राणांतिकंदंडंमत्तःप्राप्स्यथवानराः॥ २६॥

च्छासनपुरःसराः मच्छासनंपुरःसरमग्रेयेषांतादृशाः अनेनमच्छासनंनविस्मर्तव्यमितिसूचितम् ॥ २५ ॥ प्राणांतिकंप्राणांतसंबंधिनंतत्संपादकमितियावत् अध्यात्मादित्वाट्ठञ् ॥ २६ ॥

श्रीरामंनत्वातत्पार्श्वैंउपविवेशेत्यन्वयः ॥ २७ ॥ मेममांगुलीयकंगृहाणेतिशेषः हिःपादपूरणे ॥ २८ ॥ ननुअंगदादीन्विहायमह्ममेवकिमर्थंदीयतेतत्राह अस्मिन्निति सत्त्वंबलंबुद्धिंच ॥ २९ ॥ परिमार्गणेतन्निमित्तमित्यर्थः ॥ ३० ॥ ३१ ॥ किलकिलाशब्दंमुंचंतोमुष्टिभिःक्षणाज्जघ्नुःराक्षसमितिशेषः ॥ ३२ ॥

इतिप्रस्थाप्यसुग्रीवोवानरान्भीमविक्रमान्॥रामस्यपार्श्वैश्रीरामंनत्वाचोपविवेशसः॥ २७॥गच्छंतंमारुतिंदृष्ट्वारामोवचनमब्रवीत्॥अभिज्ञानार्थमेतन्मेह्यंगुलीयकमुत्तमम्॥ २८॥मन्नामाक्षरसंयुक्तंसीतायैदीयतांरहः॥अस्मिन्कार्यैप्रमाणंहित्वमेवकपिसत्तम॥जानामिसत्त्वंतेसर्वंगच्छपंथाःशुभस्तव॥ २९ ॥एवंकपीनांराज्ञातेविसृष्टाःपरिमार्गणे॥ सीतायाअंगदमुखाबभ्रमुस्तत्रतत्रह॥ ३० ॥भ्रमंतोविंध्यगहनेददृशुःपर्वतोपमम्॥ राक्षसंभीषणाकारंभक्षयंतंमृगान्गजान् ॥ ३१ ॥ रावणोयमितिज्ञात्वाकेचिद्वानरपुंगवाः ॥ जघ्नुःकिलकिलाशब्दंमुंचंतोमुष्टिभिःक्षणात् ॥ ३२ ॥ नायंरावणइत्युक्त्वाययुरन्यन्महद्वनम्॥तृषार्ताःसलिलंतत्रनाविंदन्हरिपुंगवाः॥ ३३॥ विभ्रमंतोमहारण्ये शुष्ककंठोष्ठतालुकाः॥ददृशुर्गह्वरंतत्रतृणगुल्मावृतंमहत् ॥ ३४॥ आर्द्रपक्षान्क्रौंचहंसान्निःसृतान्ददृशुस्ततः॥ अत्रास्तेसलिलंनूनंप्रविशामोमहागुहाम्॥ ३५ ॥ इत्युक्त्वाहनुमानग्रेप्रविवेशतमन्वयुः ॥ सर्वेपरस्परंधृत्वाबाहून्बाहुभिरुत्सुकाः ॥ ३६ ॥ अंधकारेमहद्दूरंगत्वाऽपश्यन्कपीश्वराः ॥ जलाशयान्मणिनिभतोयान्कल्पद्रुमोपमान्॥ ३७ ॥

नायमितिसुकरवधत्वादितिभावः ॥ ३३ ॥ शुष्कंकंठोष्ठतालुकंयेषांते ॥ ३४ ॥ ततःगह्वरात् ॥ ३५ ॥ उत्सुकाजलविषयोत्कंठावंतइत्यर्थः परस्परंबाहुभिर्बाहून्धृत्वासर्वेहनूमंतमन्वयुः अत्यंधकारादेवंकरणम् ॥ ३६ ॥ महद्दूरंबहुदूरमित्यर्थः मणिनिभतोयान्मणितुल्यनिर्मलजलान् कल्पद्रुमोपमानितिउत्तरान्वयि ॥ ३७ ॥

मधुद्रोणसमन्वितान्द्रोणपरिमितमधुयुतान् गृहान्गृहाणि अर्धचर्चादिः ॥ ३८ ॥ अतएवविस्मितालब्धाश्चर्याः ॥ ३९ ॥ योगमास्थितांचित्तवृत्तिनिरोधज

वृक्षान्पक्कफलैर्नम्रान्मधुद्रोणसमन्वितान् ॥ गृहान्सर्वगुणोपेतान्मणिवस्त्रादिपूरितान् ॥ ३८ ॥ दिव्यभक्ष्यान्नसहितान्मानुषैःपरिवर्जितान् ॥ विस्मितास्तत्रभवनेदिव्येकनकविष्टरे ॥ ३९ ॥ प्रभयादीप्यमानांतुददृशुःस्त्रियमेकलाम् ॥ ध्यायंतींचीरवसनांयोगिनींयोगमास्थिताम् ॥ ४० ॥ प्रणेमुस्तांमहाभागांभक्त्याभीत्याचवानराः ॥ दृष्ट्वातान्वानरान्देवीप्राहयूयंकिमागताः ॥ ४१ ॥ कुतोवाकस्यदूतावामत्स्थानंकिंप्रधर्षथ ॥ तच्छ्रुत्वाहनुमानाहशृणुवक्ष्यामिदेविते ॥ ४२ ॥ अयोध्याधिपतिःश्रीमान्राजादशरथःप्रभुः ॥ तस्यपुत्रोमहाभागोज्येष्ठोरामइतिश्रुतः ॥ ४३ ॥ पितुराज्ञांपुरस्कृत्यसभार्यःसानुजोवनम् ॥ गतस्तत्रहृताभार्यातस्यसाध्वीदुरात्मना ॥ ४४ ॥ रावणेनततोरामःसुग्रीवंसानुजोययौ ॥ सुग्रीवोमित्रभावेनरामस्यप्रियवल्लभाम् ॥ ४५ ॥ मृगयध्वमितिप्राहततोवयमुपागताः ॥ ततोवनंविचिन्वंतोजानकींजलकांक्षिणः ॥४६॥ प्रविष्टागह्वरंघोरंदैवादत्रसमागताः ॥ त्वंवाकिमर्थमत्रासिकावात्वंवदनःशुभे ॥४७॥ योगिनीचतथादृष्ट्वावानरान्प्राहहृष्टधीः ॥ यथेष्टंफलमूलानिजग्ध्वापीत्वामृतंपयः ॥ ४८ ॥ आगच्छततोवक्ष्येममवृत्तांतमादितः ॥ तथेतिभुक्त्वापीत्वाचहृष्टास्तेसर्ववानराः ॥ ४९ ॥ देव्याःसमीपंगत्वातेबद्धांजलिपुटाःस्थिताः ॥ ततःप्राहहनूमंतंयोगिनीदिव्यदर्शना ॥ ५० ॥ हेमानामपुरादिव्यरूपिणीविश्वकर्मणः ॥ पुत्रीमहेशंनृत्येनतोषयामासभामिनी ॥ ५१ ॥

सिद्धिंप्राप्ताम् ॥ ४० ॥ भक्तिर्भीतिर्योगिनीविषये किंकिमर्थमागताः ॥ ४१ ॥ कुतआगताइतिशेषः मत्स्थानंकिंप्रधर्षथकिमितिबलात्प्रविष्टाः ॥ ४२ ॥ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ तथादृष्ट्वाक्षुत्तृड्युतान्दृष्ट्वा ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥

प्रददौहेमायाइतिशेषः ॥ ५२ ॥ दिव्यगंधर्वौदिव्याख्योगंधर्वस्तस्यकन्या ॥ ५३ ॥ साहेमा ॥ ५४ ॥ ५५ ॥ तान्वानरान् रामंगत्वातत्समीपंगत्वास्तुत्वाथार्द्रा ममेव ॥ ५६ ॥ यातासि लुटिरूपम् इतःपूर्वोक्तहेमानियोगात्अस्माद्देशाच्च ॥ ५७ ॥ वेगात्वेगादिवक्षणेनैवेत्यर्थः पूर्वस्थितंवनंगताः ॥ ५८ ॥ ५९ ॥ रोमां

तुष्टोमहेशःप्रददाविदंदिव्यपुरंमहत् ॥ अत्रस्थितासासुदतीवर्षाणामयुतायुतम् ॥ ५२ ॥ तस्याअहंसखीविष्णुतत्परा मोक्षकांक्षिणी ॥ नाम्नास्वयंप्रभादिव्यगंधर्वतनयापुरा ॥५३॥ गच्छंतीब्रह्मलोकंसामामाहेदंतपश्चर ॥ अत्रैवनिवसंतीत्वंसर्वप्राणिविवर्जिते ॥ ५४ ॥ त्रेतायुगेदाशरथिर्भूत्वानारायणोव्ययः ॥ भूभारहरणार्थायविचरिष्यतिकानने ॥ ५५ ॥ मार्गंतोवानरास्तस्यभार्यामायांतितेगुहाम् ॥ पूजयित्वाथतान्गत्वारामंस्तुत्वाप्रयत्नतः ॥ ५६ ॥ यातासिभवनंविष्णोर्योगिगम्यंसनातनम् ॥ इतोहंगंतुमिच्छामिरामंद्रष्टुंत्वरान्विता ॥ ५७ ॥ यूयंपिदध्वमक्षीणिगमिष्यथबहिर्गुहाम् ॥ तथैवचक्रुस्तेवेगाद्गताःपूर्वस्थितंवनम् ॥५८॥ सापित्यक्त्वागुहांशीघ्रंययौराघवसन्निधिम् ॥ तत्ररामंससुग्रीवंलक्ष्मणंचददर्शह ॥५९॥ कृत्वाप्रदक्षिणंरामंप्रणम्यबहुशःसुधीः ॥ आहगद्गदयावाचारोमांचिततनूरुहा ॥ ६० ॥ दासीतवाहंराजेंद्रदर्शनार्थमिहागता ॥ बहुवर्षसहस्राणितप्तंमेदुश्चरंतपः ॥६१॥ गुहायांदर्शनार्थंतेफलितंमेद्यतत्तपः॥ अद्यहित्वांनमस्यामिमायायाःपरतःस्थितम् ॥ ६२ ॥ सर्वभूतेषुचालक्ष्यंबहिरंतरवस्थितम् ॥ योगमायाजवनिकाच्छन्नोमानुषविग्रहः ॥ ६३ ॥

चिततनूरुहाजातरोमांचतनूरुहा ॥ ६० ॥ ६१ ॥ मायायाःपरतःस्थितंतदनधीनम् ॥ ६२ ॥ विवर्तौपादानतयांतर्यामितयाचसर्वभूतानांबहिरंतरवस्थितमपि तैरलक्ष्यम् जवनिकानटानांवेषग्रहणस्थानावरणंपटनिर्मितम् नटाश्चतत्रप्रविष्टास्तयाच्छन्नाभवंतितद्वद्योगमाययात्वंछन्नोगुप्तः कृतःसन् ॥ ६३ ॥

अज्ञानदृशांतैरित्यर्थः नलक्ष्यसे रूपधृक्तत्तद्रामादिरूपधृक्शैलुषोनटइव सयदारामादिवेषंकृत्वारामाद्यनुकरणंकरोतितदारामइत्येवगृह्यतेनतुपूर्वदृष्टोऽपि तद्रूपेणतद्वत् ॥ ६४ ॥ भागवतानांभगवद्भक्तीच्छावताम् एवंभूतेरूपेभक्तिरूपोयोगस्तद्वांछयात्वमवतीर्णोऽसि तादृशंत्वांस्त्रीशरीरत्वात्तामसीअहंकथंजानामि अथयोग्यतासत्त्वेपितज्ज्ञानापेक्षामेनास्तीत्याह लोकेइति तवतत्त्वंचिदानंदादिरूपम् ॥ ६५ ॥ स्वापेक्ष्यमर्थमाह ममैतदिति मोक्षदर्शनंमोक्षोपायदर्शकं पादयुगलंतेत्वयादर्शितंअतोऽन्याकांक्षामेनास्तीत्यर्थः ॥ ६६ ॥ तदेवविशिनष्टि अदर्शनमिति भवार्णानांभवार्णवानामित्यर्थः वर्णलोपआर्षः स

नलक्ष्यसेऽज्ञानदृशांशैलूषइवरूपधृक् ॥ महाभागवतानांत्वंभक्तियोगविधित्सया ॥ ६४ ॥ अवतीर्णोंसिभगवन्कथं जानामितामसी ॥ लोकेजानातुयःकश्चित्तवतत्त्वंरघूत्तम ॥ ६५ ॥ ममैतद्देवरूपंतेसदाभातुहृदालये ॥ रामतेपादयुगलं दर्शितंमोक्षदर्शनम् ॥ ६६ ॥ अदर्शनंभवार्णानांसन्मार्गपरिदर्शनम् ॥ धनपुत्रकलत्रादिविभूतिपरिदर्पितः ॥ अकिंचनधनंत्वाद्यनाभिधातुंजनोर्हति ॥ ६७ ॥ निवृत्तगुणमार्गायनिष्किंचनधनायते ॥ ६८ ॥ नमःस्वात्माभिरामायनिर्गुणायगुणात्मने ॥ कालरूपिणमीशानमादिमध्यांतवर्जितम् ॥ ६९ ॥

न्मार्गस्तत्त्वज्ञानोपायः धनादिगर्वगर्वितोजनःअकिंचनानांत्यक्तसर्वविषयाणांधनभूतंदरिद्रस्यधनमिवेच्छाविषयंत्वांअभिधातुंवार्तालापंकर्तुंचनार्हतितथापिस्तौमीतिशेषः ॥ ६७ ॥ निवृत्तोगुणमार्गःप्रवृत्तिमार्गरूपःसंसारःस्वतएवयस्मात्तस्मै ॥ ६८ ॥ स्वात्मन्येवचिदानंदरूपेऽभिरमतेतस्मैअतएवनिर्गुणाय गुणानांविषयाणामपिविवर्तोपादानत्वात्तदात्मने कालरूपिणंतेनसर्वसंहर्तृत्वम् ईशानत्वेनजगत्स्रष्टृत्वतत्पालकत्वेउक्ते सर्वस्रष्टृत्वादेवतस्यादिमध्यांतवर्जितत्वम् मध्यस्याद्यंतसापेक्षत्वात्तस्याप्यभावः ॥ ६९ ॥

समंचरंतंअंतर्यामितयेत्यर्थः नृविडंबनंमनुष्यव्यवहारानुकरणरूपंअनुकरणमेतदितिकश्चिन्नवेद ॥ ७० ॥ समत्वादेवाह नतेइत्यादि परोभिन्नःसर्वरूपत्वात्त्वेतिभावः यद्वा दयितद्वेष्याभ्यांपरउदासीनः तथाविधंशत्रुमित्रोदासीनवंतम् यथारावणःशत्रुर्विभीषणोमित्रंअन्येउदासीनाइति ॥ ७१ ॥ अजस्यसर्वकारणत्वात्स्वकारणहीनस्य अकर्तुःकर्तृत्वादिधर्महीनस्य अपरिणामित्वादितिभावः ईशस्यसन्निधानमात्रेणसर्वनियंतुः तिर्यङ्नरादिषुतिर्यंचोमत्स्यादयस्तेषुमनुष्येषुचयज्जन्मकर्मादितदत्यंतविडंबनंअनुकरणंतत्तज्जातेरितिशेषः नतुवास्तवमितिभावः ॥ ७२ ॥ तत्रप्रकृतावतारप्रयोजनमाह त्वामिति अक्षरमपिलोकानां

समंचरंतंसर्वत्रमन्येत्वांपुरुषंपरम् ॥ देवतेचेष्टितंकश्चिन्नवेदनृविडंबनम् ॥ ७० ॥ नतेस्तिकश्चिद्दयितोद्वेष्योवापरएवच ॥ त्वन्मायापिहितात्मानस्त्वांपश्यंतितथाविधम् ॥ ७१ ॥ अजस्याकर्तुरीशस्यदेवतिर्यङ्नरादिषु ॥ जन्मकर्मादिकंयद्यत्तदत्यंतविडंबनम् ॥ ७२ ॥ त्वामाहुरक्षरंजातंकथाश्रवणसिद्धये ॥ केचित्कोसलराजस्यतपसःफलसिद्धये ॥ ७३ ॥ कौसल्ययाप्रार्थ्यमानंजातमाहुःपरेजनाः ॥ दुष्टराक्षसभूभारहरणायार्थितोविभुः ॥ ७४ ॥ ब्रह्मणानररूपेणजातोऽयमितिकेचन ॥ शृण्वंतिगायंतिचयेकथास्तेरघुनंदन ॥ ७५ ॥ पश्यंतितवपादाब्जंभवार्णवसुतारणम् ॥ त्वन्मायागुणबद्धाहंव्यतिरिक्तंगुणाश्रयम् ॥ ७६ ॥

स्वकथाश्रवणजसिद्धिप्राप्तयेजातमाहुःकेचित्कोसलराजस्य ॥ ७३ ॥ ७४ ॥ ब्रह्मणाप्रार्थितोनररूपेणजातइत्यन्वयः आद्यप्रयोजनस्यैवमुख्यत्वंप्रतिपादयितुंतच्छ्रवणादिजांसिद्धिमाह शृण्वंतीत्यादिना ॥ ७५ ॥ पश्यंतीति तेत्वत्पादाब्जंपश्यंतीत्यन्वयः त्वत्पादाब्जदर्शनमेवत्वच्छ्रवणजामुख्यासिद्धिरित्यर्थः त्वत्पादाब्जशब्देनमुख्यंचिदानंदात्मकंत्वत्स्वरूपमेवविवक्षितमित्याह त्वन्मायेति त्वन्मायागुणैःसत्त्वरजस्तमोभिर्बद्धायेऽहमःअहंकारविशिष्टास्तेभ्योव्यतिरिक्तंतद्दोषास्पृष्टम् गुणानामाश्रयंप्रवर्त्तकंयद्रूपंतद्दर्शनमेवतज्जन्यासिद्धिरित्यर्थः ॥ ७६ ॥

अविषयंवाङ्मनोऽविषयंत्वांस्तोतुंचकथंजानीयांप्रवृत्ताभवेयम् तज्ज्ञानंदुर्लभमेवस्तोतुमपिनसामर्थ्यमितिभावः एवंचस्तुतेरशक्यत्वात्केवलंप्रणाममेवकरोमीत्याह नमस्यामीति ॥ ७७ ॥ प्रसन्नःसन्प्रणतानामघस्यपापस्यहर्ता ॥ ७८ ॥ निलश्चांभक्तिंदेहीत्यन्वयः ॥ ७९ ॥ प्राकृतेषुत्वद्भक्तिहीनेषु संसारसक्तेष्वि

कथंत्वांदेवजानीयांस्तोतुंवाऽविषयंविभुम् ॥ नमस्यामिरघुश्रेष्ठंबाणासनशरान्वितम् ॥ लक्ष्मणेनसहभ्रात्रासुग्रीवादिभिरन्वितम् ॥ ७७ ॥ एवंस्तुतोरघुश्रेष्ठःप्रसन्नःप्रणताघहृत् ॥ उवाचयोगिनींभक्तांकिंतेमनसिकांक्षितम् ॥ ७८ ॥ साप्राहराघवंभक्त्याभक्तिंतेभक्तवत्सल ॥ यत्रकुत्रापिजातायानिश्चलांदेहिमेप्रभो ॥ ७९ ॥ त्वद्भक्तेषुसदासंगोभूयान्मेप्राकृतेषुन ॥ जिह्वामेरामरामेतिभक्त्यावदतुसर्वदा ॥ ८० ॥ मानसंश्यामलंरूपंसीतालक्ष्मणसंयुतम् ॥ धनुर्बाणधरंपीतवाससंमुकुटोज्ज्वलम् ॥ ८१ ॥ अंगदैर्नूपुरैर्मुक्ताहारैःकौस्तुभकुंडलैः ॥ भ्रांतंस्मरतुमेरामवरंनान्यंवृणेप्रभो ॥ ८२ ॥ ॥ श्रीरामउवाच ॥ ॥ भवत्वेवंमहाभागेगच्छत्वंबदरीवनम् ॥ तत्रैवमांस्मरंतीत्वंत्यक्त्वेदंभूतपंचकम् ॥ मामेवपरमात्मानमचिरात्प्रतिपद्यसे ॥ ८३ ॥ श्रुत्वारघूत्तमवचोमृतसारकल्पंगत्वातदैवबदरीतरुखंडजुष्टम् ॥ तीर्थंतदारघुपतिंमनसास्मरंतीत्यक्त्वाकलेवरमवापपरंपदंसा ॥ ८४ ॥ ॥ इतिश्रीमदध्यात्मरामायणेकिष्किंधाकांडेषष्ठःसर्गः ॥ ६ ॥

तियावत् ॥ ८० ॥ मेमानसंवक्ष्यमाणगुणविशिष्टरूपंस्मरतु पीतवाससंभ्रांतमितिपुंस्त्वमार्षम् ॥ ८१ ॥ ८२ ॥ बदरीवनंबदरिकाश्रमम् इदंभूतपंचकंभूतपंचात्मकमिदंदेहमित्यर्थः ॥ ८३ ॥ परमात्मानंमांप्रतिपद्यसे वर्तमानसामीप्येलट् अनेनस्वसायुज्यरूपामुक्तिस्तपःपूर्वकंतत्रदेहत्यागेनदर्शिता तरुखंडंतरुसमूहः ॥ ८४ ॥ ॥ इतिश्रीमत्सकल०सेतौकिष्किंधाकांडेषष्ठःसर्गः ॥ ६ ॥

अथतत्रेति विमुह्यंतः सीतालाभाभावादितिशेषः सीतामार्गणेनतत्रप्राप्तक्लेशेनकर्शिताःकृशत्वंप्राप्ताः ॥ १ ॥ मासोगतःसुग्रीवाज्ञप्तकालादधिककालोगत इत्यर्थः ॥ २ ॥ राजशासनंमासांतःसीतान्वेषणरूपम् ॥ ३ ॥ मिषात्रामकार्याकरणरूपात् ॥ ४ ॥ तदेवाह इदानीमिति ॥ ५ ॥ नन्वेवमकृत्यंत्वद्वधरूपंसु

अथतत्रसमासीनावृक्षखंडेषुवानराः ॥ चिंतयंतोविमुह्यंतःसीतामार्गणकर्शिताः ॥ १ ॥ तत्रोवाचांगदःकांश्चिद्वान
रान्वानरर्षभः ॥ भ्रमतांगह्वरेऽस्माकंमासोनूनंगतोऽभवत् ॥ २ ॥ सीतानाधिगतास्माभिर्नकृतंराजशासनम् ॥ य
दिगच्छामकिष्किंधांसुग्रीवोऽस्मान्हनिष्यति ॥ ३ ॥ विशेषतःशत्रुसुतंमांमिषान्निहनिष्यति ॥ मयितस्यकुतःप्रीतिर
हंरामेणरक्षितः ॥ ४ ॥ इदानींरामकार्यंमेनकृतंतन्मिषंभवेत् ॥ तस्यमद्धननेनूनंसुग्रीवस्यदुरात्मनः ॥ ५ ॥ मातृक
ल्पांभ्रातृभार्यांपापात्मानुभवत्यसौ ॥ नगच्छेयमतःपार्श्वंतस्यवानरपुंगवाः ॥ ६ ॥ त्यक्ष्यामिजीवितंचात्रयेनकेना
पिमृत्युना ॥ इत्यश्रुनयनंकेचिद्दृष्ट्वावानरपुंगवाः ॥ ७ ॥ व्यथिताःसाश्रुनयनायुवराजमथाब्रुवन् ॥ ८ ॥ किमर्थंत
वशोकोत्रवयंतेप्राणरक्षकाः ॥ भवामोनिवसामोऽत्रगुहायांभयवर्जिताः ॥ ९ ॥ सर्वसौभाग्यसहितंपुरंदेवपुरोपमम् ॥
शनैःपरस्परंवाक्यंवदतांमारुतात्मजः ॥ १० ॥ श्रुत्वांगदंसमालिंग्यप्रोवाचनयकोविदः ॥ विचार्यंतेकिमर्थंतेदुर्वि
चारोनयुज्यते ॥ ११ ॥

ग्रीवःकथंकुर्यात्तत्राह मातृकल्पामिति ज्येष्ठभ्रातृपत्नीत्वात्तस्यकार्यविचारोनेतिभावः एषोक्तिर्बालभावेन मृतेभर्तरित्रैवर्णिकव्यतिरिक्तस्त्रियाअन्योपगमस्या दूषणात् ॥ ६ ॥ येनकेनापिउद्बंधनादिप्रकारेण ॥ ७ ॥ ८ ॥ वयंतेप्राणरक्षकाभवामः तदुपायमाहुः अत्रगुहायांवसामइति ॥ ९ ॥ शनैःपरस्परमेवंवदतांवाक्यंश्रुत्वाइत्यन्वयः ॥ १० ॥ किमर्थंविचार्यंतेसुग्रीवतोवधादिकमितिशेषः अयमितरवानरोक्तोदुर्विचारोगुहावासरूपस्तुसर्वथानयुज्यते ॥ ११ ॥

तत्रसुग्रीवतोभयंवारयति राज्ञइति तारापुत्रइत्यनेनतारायामतिप्रीतेस्त्वयिनतथाव्यवहारसंभावनापीतिभावः रामादपिनभयमित्याह रामस्येति ॥ १२ ॥ सीतालाभोऽपिभाव्येवेत्याह अहमिति अतोहेवत्सान्यंविचारंनविचारय ॥ १३ ॥ वानरीयांगुहावासोक्तिंदूषयति गुहेति निर्भेद्योऽभेद्यःतदेतदयुक्तमितिशेषः

राज्ञोऽत्यंतप्रियस्त्वंहितारापुत्रोतिवल्लभः ॥ रामस्यलक्ष्मणात्प्रीतिस्त्वयिनित्यंप्रवर्धते ॥ १२ ॥ अतोनराघवाद्भीतिस्तव राज्ञोविशेषतः ॥ अहंतवहितेसक्तोवत्सनान्यंविचारय ॥ १३ ॥ गुहावासश्चनिर्भेद्यइत्युक्तंवानरैस्तुयत् ॥ तदेतद्रामबाणानामभेद्यंकिंजगत्त्रये ॥ १४ ॥ येत्वांदुर्बोधयंत्येतेवानरावानरर्षभ ॥ पुत्रदारादिकंत्यक्त्वाकथंस्थास्यंतितेत्वया ॥ १५ ॥ अन्यद्गुह्यतमंवक्ष्येरहस्यंशृणुमेसुत ॥ रामोनमानुषोदेवःसाक्षान्नारायणोव्ययः ॥ १६ ॥ सीताभगवतीमायाजनसंमोहकारिणी ॥ लक्ष्मणोभुवनाधारःसाक्षाच्छेषःफणीश्वरः ॥ १७ ॥ ब्रह्मणाप्रार्थिताःसर्वेरक्षोगणविनाशने ॥ मायामानुषभावेनजातालोकैकरक्षकाः ॥ १८ ॥ वयंचपार्षदाःसर्वेविष्णोर्वैकुंठवासिनः ॥ मनुष्यभावमापन्नेस्वेच्छयापरमात्मनि ॥ १९ ॥ वयंवानररूपेणजातास्तस्यैवमायया ॥ वयंतुतपसापूर्वमाराध्यजगतांपतिम् ॥ २० ॥ तेनैवानुगृहीताःस्मःपार्षदत्वमुपागताः ॥ इदानीमपितस्यैवसेवांकृत्वैवमायया ॥ २१ ॥ पुनर्वैकुंठमासाद्यसुखंस्थास्यामहेवयम् ॥ इत्यंगदमथाश्वास्यगताविंध्यंमहाचलम् ॥ २२ ॥

यतोजगत्त्रयेरामबाणानामभेद्यंकिंनकिमपीत्यर्थः तेनात्रवासेमहद्रामभयमितिभावः ॥ १४ ॥ यदेतैर्वानरैरुक्तंवयंतेप्राणरक्षकाइतितदपिमिथ्येत्याह येत्वामिति ॥ १५ ॥ १६ ॥ १७ ॥ रक्षोगणविनाशनेतन्निमित्तंप्रार्थिताइत्यन्वयः मायामानुषभावेनेति नतेषांवास्तवंमनुष्यत्वंकिंतुमाययैवेतिभावः ॥ १८ ॥ १९ ॥ नन्वेवंवानररूपमस्माकंकिमर्थंतत्राह तस्यैवमाययेति ॥ २० ॥ २१ ॥ २२ ॥

दक्षिणांबुधेस्तीरेमहेंद्राख्यगिरेःपादंप्रत्यंतपर्वतमाययुरित्यन्वयः ॥ २३ ॥ भयवर्धनंदर्शनमात्रेणभयवृद्धिकरम् किंकुर्मइतिवादिनःवदनशीलाःसंतःउदधेस्तीरेनिषेदुरथमंत्रयामासुरित्यन्वयः ॥ २४ ॥ २५ ॥ गुहांतरेगुहामध्ये वाशब्दावप्यर्थौ ॥ २६ ॥ सुग्रीववधतःसुग्रीवात्प्राप्स्यमानवधतःप्रायोपवेशनंतत्प्राप्त्युपा

विचिन्वंतोथशनकैर्जानकींदक्षिणांबुधेः ॥ तीरेमहेंद्राख्यगिरेःपवित्रंपादमाययुः ॥ २३ ॥ दृष्ट्वासमुद्रंदुष्पारमगाधंभयवर्धनम् ॥ वानराभयसंत्रस्ताःकिंकुर्मइतिवादिनः ॥ २४ ॥ निषेदुरुदधेस्तीरेसर्वेचिंतासमन्विताः ॥ मंत्रयामासुरन्योन्यमंगदाद्यामहाबलाः ॥ २५ ॥ भ्रमतामेवनोमासोगतोत्रैवगुहांतरे ॥ नदृष्टोरावणोवाद्यसीतावाजनकात्मजा ॥ २६ ॥ सुग्रीवस्तीक्ष्णदंडोस्मान्निहंत्येवनसंशयः ॥ सुग्रीववधतोऽस्माकंश्रेयःप्रायोपवेशनम् ॥ २७ ॥ इतिनिश्चित्यतत्रैवदर्भानास्तीर्यसर्वतः ॥ उपाविवेशुस्तेसर्वेमरणेकृतनिश्चयाः ॥ २८ ॥ एतस्मिन्नंतरेतत्रमहेंद्राद्रिगुहांतरात् ॥ निर्गत्यशनकैरागाद्गृध्रःपर्वतसन्निभः ॥ २९ ॥ दृष्ट्वाप्रायोपवेशेनास्थितान्वानरपुंगवान् ॥ उवाचशनकैर्गृध्रःप्राप्तोभक्ष्योद्यमेबहुः ॥ ३० ॥ एकैकशःक्रमात्सर्वान्भक्षयामिदिनेदिने ॥ श्रुत्वातद्गृध्रवचनंवानराभीतमानसाः ॥ ३१ ॥ भक्षयिष्यतिनःसर्वानसौगृध्रोनसंशयः ॥ रामकार्यंचनास्माभिःकृतंकिंचिद्धरीश्वराः ॥ ३२ ॥ सुग्रीवस्यापिचहितंनकृतंस्वात्मनामपि ॥ वृथानेनवधंप्राप्तागच्छामोयमसादनम् ॥ ३३ ॥

याभावेऽनशनेनमरणसंकल्पः ॥ २७ ॥ उपाविवेशुरित्यत्रगुणआर्षः ॥ २८ ॥ २९ ॥ बहुःविपुलोबहुसंख्यश्च ॥ ३० ॥ ३१ ॥ किंचित्किंचिदपीत्यर्थः हरीश्वराइत्यंगदहनूमदादीन्संबोध्येतरवानरवाक्यम् ॥ ३२ ॥ सुग्रीवहितंजानकीसमाचारोक्त्या रामसंतोषरूपं आत्मनोहितंतथासुग्रीवतोषरूपम् अनेनगृध्रेणवृथावधंनाशंप्राप्ताःप्रापिताः यमसादनंयमगृहंगच्छामः वर्तमानसामीप्येलट् ॥ ३३ ॥

योगिनामपिदुरावापमित्यन्वयः दुराङ्वपूर्वादाप्नोतेःखल् षष्ठ्यार्षीशेषेवा ॥ ३४ ॥ कर्णपीयूषसन्निभंकर्णयोरमृततुल्यमित्यर्थः जटायुरितिनामेत्यनेनान्वयः ॥ ३५ ॥ यूयंकेतदुच्यतामित्यर्थः ॥ ३६ ॥ ३७ ॥ ३८ ॥ लक्ष्मणेचनिर्गतइत्यनुकर्षः रामरामेतिक्रोशंतीहृतेत्यन्वयः श्रुत्वातत्क्रोशनंश्रुत्वेत्यर्थः

अहोजटायुर्धर्मात्मारामस्यार्थेमृतःसुधीः ॥ मोक्षंप्रापदुरावापंयोगिनामप्यरिंदमः ॥ ३४ ॥ संपातिस्तुतदावाक्यंश्रुत्वावानरभाषितम् ॥ केवायूयंममभ्रातुःकर्णपीयूषसंनिभम् ॥ ३५ ॥ जटायुरितिनामाद्यव्याहरंतःपरस्परम् ॥ उच्यतांवोभयंमाभून्मत्तःप्लवगसत्तमाः ॥ ३६ ॥ तमुवाचांगदःश्रीमानुत्थितोगृध्रसन्निधौ ॥ रामोदाशरथिःश्रीमान्लक्ष्मणेनसमन्वितः ॥ ३७ ॥ सीतयाभार्ययासार्धंविचचारमहावने ॥ तस्यसीताहृतासाध्वीरावणेनदुरात्मना ॥ ३८ ॥ मृगयांनिर्गतेरामेलक्ष्मणेचहृताबलात् ॥ रामरामेतिक्रोशंतीश्रुत्वागृध्रःप्रतापवान् ॥ ३९ ॥ जटायुर्नामपक्षींद्रोयुद्धंकृत्वासुदारुणम् ॥ रावणेनहतोवीरोराघवार्थंमहाबलः ॥ ४० ॥ रामेणदग्धोरामस्यसायुज्यमगमत्क्षणात् ॥ रामःसुग्रीवमासाद्यसख्यंकृत्वाग्निसाक्षिकम् ॥ ४१ ॥ सुग्रीवचोदितोहत्वावालिनंसुदुरासदम् ॥ राज्यंददौवानराणांसुग्रीवायमहाबलः ॥ ४२ ॥ सुग्रीवःप्रेषयामाससीतायाःपरिमार्गणे ॥ अस्मान्वानरवृंदान्वैमहासत्वान्महाबलः ॥ ४३ ॥ मासादर्वाङ्निवर्तध्वंनोचेत्प्राणान्हरामिवः ॥ इत्याज्ञयाभ्रमंतोस्मिन्वनेगह्वरमध्यगाः ॥ ४४ ॥ गतोमासोनजानीमःसीतांवारावणंचवा ॥ मर्तुंप्रायोपविष्टाःस्मस्तीरेलवणवारिधेः ॥ ४५ ॥ यदिजानासिहेपक्षिन्सीतांकथयनःशुभाम् ॥ अंगदस्यवचःश्रुत्वासंपातिर्हृष्टमानसः ॥ ४६ ॥

॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ परिमार्गणेतन्निमित्तम् विषयसप्तमीयम् वानरवृंदान्तद्युक्तानस्मान् हनूमदाद्यपेक्षयाबहुवचनम् ॥ ४३ ॥ गह्वरंगुहा भ्रमंतइत्यस्यस्थिताइतिशेषः ॥ ४४ ॥ गतोमासइत्यस्यैवंभ्रमतामित्यादिः ॥ ४५ ॥ ४६ ॥

॥ ४७ ॥ नयध्वंमांजलांतिकमित्युक्त्यामृगपक्ष्यादीनामपियथाज्ञानंधर्माधिकारोस्तीतिसूचयति ॥ ४८ ॥ तत्सलिलेसमुद्रस्यजले ॥ ४९ ॥ हरीश्वरैर्नीतः स्वस्थानंप्रापितइत्यर्थः ॥ ५० ॥ सुरक्षितास्तीतिशेषः ॥ ५१ ॥ समुद्रमध्येइत्यनेनचतुर्दिक्षुसमुद्रपरिखमेवतद्द्वीपमितिसूचितम् लंकामेमयादृश्यतेसीताचदृ

उवाचमत्प्रियोभ्राताजटायुःप्लवगेश्वराः॥ बहुवर्षसहस्रांतेभ्रातृवार्ताश्रुतामया ॥ ४७ ॥ वाक्साहाय्यंकरिष्येहंभवतांप्लवगेश्वराः॥ भ्रातुःसलिलदानायनयध्वंमांजलांतिकम् ॥ ४८ ॥ पश्चात्सर्वंशुभंवक्ष्येभवतांकार्यसिद्धये ॥ तथेतिनिन्युस्तेतीरंसमुद्रस्यविहंगमम् ॥ सोपितत्सलिलेस्नात्वाभ्रातुर्दत्त्वाजलांजलिम् ॥ ४९ ॥ पुनःस्वस्थानमासाद्यस्थितोनीतोहरीश्वरैः ॥ संपातिःकथयामासवानरान्परिहर्षयन् ॥ ५० ॥ लंकानामनगर्यास्तेत्रिकूटगिरिमूर्धनि ॥ तत्राशोकवनेसीताराक्षसीभिःसुरक्षिता ॥ ५१ ॥ समुद्रमध्येसालंकाशतयोजनदूरतः ॥ दृश्यतेमेनसंदेहःसीताचपरिदृश्यते ॥ ५२ ॥ गृध्रत्वाद्दूरदृष्टिर्मेनात्रसंशयितुंक्षमम् ॥ शतयोजनविस्तीर्णंसमुद्रंयस्तुलंघयेत् ॥ ५३ ॥ सएवजानकींदृष्ट्वापुनरायास्यतिध्रुवम् ॥ अहमेवदुरात्मानंरावणंहंतुमुत्सहे ॥ ५४ ॥ भ्रातृहंतारमेकाकीकिंतुपक्षविवर्जितः ॥ यतध्वमतियत्नेनलंघितुंसरितांपतिम् ॥ ततोहंतारघुश्रेष्ठोरावणंराक्षसाधिपम् ॥ ५५ ॥ उल्लंघ्यसिंधुंशतयोजनायतंलंकांप्रविश्याथविदेहकन्यकाम् ॥ दृष्ट्वासमाभाष्यचवारिधिंपुनस्तर्तुंसमर्थःकतमोविचार्यताम् ॥ ५६ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेकिष्किंधाकांडेसप्तमःसर्गः ॥ ७ ॥ ॥ ७ ॥ ॥ अथतेकौतुकाविष्टाःसंपातिंसर्ववानराः ॥ पप्रच्छुर्भगवन्ब्रूहिस्वमुदंतंत्वमादितः ॥ १ ॥

श्यते ॥ ५२ ॥ तत्रहेतुमाह गृध्रत्वादिति नात्रसंशयितुंक्षमम् अत्रसंशयोनकार्यइत्यर्थः ॥ ५३ ॥ ५४ ॥ पक्षविवर्जितइत्यनेनबलातिशयेपिगमनशक्तिहीनत्वंसूचितम् ॥ ५५ ॥ ५६ ॥ ॥ इतिश्रीमत्सकलराज० किष्किंधाकांडेसेतौसप्तमःसर्गः ॥ ७ ॥ ॥ ७ ॥ ॥ १ ॥

पक्षहीनत्वमस्यकुतइतिवानराणांजिज्ञासांज्ञात्वातदुत्तरमाह संपातिरिति पुराकृतंस्ववृत्तांतम् स्वशब्दआत्मात्मीयोभयवाची स्वस्यस्वभ्रातुश्चवृत्तांतम् तमेवाह अहमित्यादि रूढयौवनौयौवनमध्यंप्राप्तौ ॥ २ ॥ अतएवबलदर्पितौ ॥ ३ ॥ जटायुःप्रतापितः कनिष्ठत्वात्तन्मोहतस्तंपरित्रातुंपक्षैराच्छाद्यस्थितोऽहं

संपातिःकथयामासस्ववृत्तांतंपुराकृतम् ॥ अहंपुराजटायुश्चभ्रातरौरूढयौवनौ ॥ २ ॥ बलेनदर्पितावावांबलजिज्ञासयाखगौ ॥ सूर्यमंडलपर्यंतंगंतुमुत्पतितौमदात् ॥ ३ ॥ बहुयोजनसाहस्रंगतौतत्रप्रतापितः ॥ जटायुस्तंपरित्रातुंपक्षैराच्छाद्यमोहतः ॥ ४ ॥ स्थितोऽहंरश्मिभिर्दग्धपक्षोऽस्मिन्विंध्यमूर्धनि ॥ पतितोदूरपतनान्मूर्च्छितोऽहंकपीश्वराः ॥ ५ ॥ दिनत्रयात्पुनःप्राणसहितोदग्धपक्षकः ॥ देशंवागिरिकूटान्वानजानेभ्रांतमानसः ॥ ६ ॥ शनैरुन्मील्यनयनेदृष्ट्वातत्राश्रमंशुभम् ॥ शनैःशनैराश्रमस्यसमीपंगतवानहम् ॥ ७ ॥ चंद्रमानाममुनिराट्दृष्ट्वामांविस्मितोऽवदत् ॥ संपातेकिमिदंतेद्यविरूपंकेनवाकृतम् ॥ ८ ॥ जानामित्वामहंपूर्वमत्यंतंबलवानसि ॥ दग्धौकिमर्थंतेपक्षौकथ्यतांयदिमन्यसे ॥ ९ ॥ ततःस्वचेष्टितंसर्वंकथयित्वातिदुःखितः ॥ अब्रुवंमुनिशार्दूलंदग्धोऽहंदाववह्निना ॥ १० ॥ कथंधारयितुंशक्तोविपक्षोजीवितंप्रभो ॥ इत्युक्तोथमुनिर्वीक्ष्यमांदयार्द्रविलोचनः ॥ ११ ॥ शृणुवत्सवचोमेऽद्यश्रुत्वाकुरुयथेप्सितम् ॥ देहमूलमिदंदुःखंदेहःकर्मसमुद्भवः ॥ १२ ॥

सूर्यरश्मिभिर्दग्धपक्षोऽत्रपतितोदूरपतनान्मूर्च्छितआसमितिशेषः ॥ ४ ॥ ५ ॥ दिनत्रयात्तदुत्तरंपुनःप्राणसहितोदग्धपक्षकोयतोऽतोभ्रांतमानसोदेशादीन्नजाने ॥ ६ ॥ ७ ॥ अद्यतेइदंरूपंकिंकेनवापूर्वंदृष्टंतदुत्तमंरूपंविरूपंकृतम् ॥ ८ ॥ पूर्वंबलवानसीतिवर्तमानसामीप्येलट् ॥ ९ ॥ दाववह्निना तत्तुल्यचिंतयेत्यर्थः ॥ १० ॥ चिंतामभिनयति कथमिति ॥ ११ ॥ तत्रदेहस्यतन्मूलस्यचतत्त्वज्ञानंविनाछेत्तुमशक्यतयाभोगैकनाश्यंदुःखमितिवक्तुमुपक्रमते देहेति ॥ १२ ॥

ननुकोसावहंपदार्थोयद्बुद्धिर्देहेतत्राह अहंकारइति अविद्यायाजडत्वात्तत्संभवोसावपिजडइतिभावः अविद्यासंभवत्वेऽपिसंभवकालापरिच्छेदादनादिरित्युक्तः ॥ १३ ॥ तप्तायःपिंडोयथावह्निनायुक्तस्ततःपृथक्कर्तुमशक्यश्चतथाऽयमहंकारश्चितइत्यर्थः तेनचित्तादात्म्यापन्नाहंकारेणचेतनवान्चैतन्यवानिव ॥ १४ ॥ एवमात्मनश्चेतनस्यअहंकृतेर्बलात्तत्संबंधबलात्अहंदेहइतिबुद्धिः तत्कृतएषसंसारःसुखादिसाधकःकर्मद्वारेतिबोध्यम् ॥ १५ ॥ एवंनिर्विकारस्यापिअ

कर्मप्रवर्ततेदेहेऽहंबुद्ध्यापुरुषस्यहि ॥ अहंकारस्त्वनादिःस्यादविद्यासंभवोजडः॥ १३॥ चिच्छाययासदायुक्तस्तप्तायःपिंडवत्सदा ॥तेनदेहस्यतादात्म्याद्देहश्चेतनवान्भवेत्॥ १४ ॥ देहोऽहमितिबुद्धिःस्यादात्मनोऽहंकृतेर्बलात् ॥ तन्मूलएषसंसारःसुखदुःखादिसाधकः॥ १५॥ आत्मनोनिर्विकारस्यमिथ्यातादात्म्यतःसदा ॥ देहोऽहंकर्मकर्ताहमितिसंकल्प्यसर्वदा ॥ १६ ॥ जीवःकरोतिकर्माणितत्फलैर्बद्ध्यतेऽवशः॥ ऊर्ध्वाधोभ्रमतेनित्यंपापपुण्यात्मकःस्वयम्॥ १७॥ कृतंमयाधिकंपुण्यंयज्ञदानादिनिश्चितम्॥ स्वर्गंगत्वासुखंभोक्ष्येइतिसंकल्पवान्भवेत् ॥१८॥तथैवाध्यासतस्तत्रचिरंभुक्त्वासुखंमहत् ॥ क्षीणपुण्यःपतत्यर्वागनिच्छन्कर्मचोदितः ॥ १९ ॥

त्मनोऽहंकारादिभिर्मिथ्यातादात्म्याद्देहोहम् यद्वाततोऽतिरिक्तोऽपिकर्मकर्ताहमितिसंकल्पपूर्वकंप्रायोदेहोऽहमितिबुद्धिरेवसर्वस्य कस्यचित्प्राग्भवपुण्यवशात्तद्बुद्धिविलयेऽपिकर्मकर्तेतिबुद्धिरस्त्येवेतिभावः ॥ १६ ॥ कर्माणिकरोति अहंकरोमीतिसंकल्पादेवावशस्तत्फलैःसुखादिभिर्बद्ध्यते अनेनयोनाहंकर्तेतिभावयतितस्यनैवबंधइतिसूचितम् तद्बंधप्रकारमाह ऊर्ध्वेति पुण्येनोर्ध्वंपापेनाधोभ्रमतेइत्यर्थः ॥ १७ ॥ तदेवविवृणोति कृतमिति इतिसंकल्पवान्भवेत् स्वर्गतः सुखभोगीचेतिशेषः ॥ १८ ॥ तथैवाध्यासतःअहंबहुपुण्यकर्तेत्यध्यासेन तत्रस्वर्गेअनिच्छन्नपिपततीतिअवशइत्युक्तस्यविवरणम् ॥ १९ ॥

ततःपातपूर्वकंयेनप्रकारेणगर्भवासस्तदुपपादयति पतित्वेति इंदोर्मंडले पतित्वाततोनीहारैस्तत्किरणद्वाराभूसंबद्धैरेवसंबद्धोभूत्वाभूमौपतति ततोव्रीह्यादौअनुशयित्वेनस्थित्वाचतुर्विधंभोज्यंभक्ष्यभोज्यलेह्यचोष्यरूपं तदन्यतमद्भूत्वापुरुषैर्भुज्यते ततोभोजनानंतरंरेतोभूत्वास्थितइतिशेषः ततस्तेनपुंसास्त्रीयोनौऋतुकालेसिंचितःसिक्तः आर्षत्वात्साधुः ॥ २० ॥ २१ ॥ सिक्तःसजीवएकेनदिनेनजरायुपरिवेष्टितंयोनिरक्तेनसंयुक्तंकललंकललाख्यपरिणामवद्भूत्वारूढत्वंदार्ढ्यमाप्नुयात्

पतित्वामंडलेचैंदोस्ततोनीहारसंयुतः ॥ भूमौपतित्वाव्रीह्यादौतत्रस्थित्वाचिरंपुनः ॥ २० ॥ भूत्वाचतुर्विधंभोज्यंपुरुषैर्भुंज्यतेततः ॥ रेतोभूत्वापुनस्तेनऋतोस्त्रीयोनिसिंचितः ॥ २१ ॥ योनिरक्तेनसंयुक्तंजरायुपरिवेष्टितम् ॥ दिनेनैकेनकललंभूत्वारूढत्वमाप्नुयात् ॥ २२ ॥ तत्पुनःपंचरात्रेणबुद्बुदाकारतामियात् ॥ सप्तरात्रेणतदपिमांसपेशित्वमाप्नुयात् ॥ २३ ॥ पक्षमात्रेणसापेशीरुधिरेणपरिप्लुता ॥ तस्याएवांकुरोत्पत्तिःपंचविंशतिरात्रिषु ॥ २४ ॥ ग्रीवाशिरश्चस्कंधश्चपृष्ठवंशस्तथोदरम् ॥ पंचधांगानिचैकैकंजायंतेमासतःक्रमात् ॥ २५ ॥ पाणिपादौतथापार्श्वःकटिर्जानुतथैवच ॥ मासद्वयात्प्रजायंतेक्रमेणैवनचान्यथा ॥ २६ ॥ त्रिभिर्मासैःप्रजायंतेअंगानांसंधयःक्रमात् ॥ सर्वांगुल्यःप्रजायंतेक्रमान्मासचतुष्टये ॥ २७ ॥ नासाकर्णौचनेत्रेचजायंतेपंचमासतः ॥ दंतपंक्तिर्नखागुह्यंपंचमेजायतेतथा ॥ २८ ॥ अर्वाक्षण्मासतश्छिद्रंकर्णयोर्भवतिस्फुटम् ॥ पायुर्मेढ्रमुपस्थंचनाभिश्चापिभवेन्नृणाम् ॥ २९ ॥

जरायुर्गर्भवेष्टनम् ॥ २२ ॥ बुद्बुदाकारतांतदाकारपरिणामविशेषं एवमग्रेऽपि ॥ २३ ॥ रुधिरेणपरिप्लुताभवतीतिशेषः तस्याएवपेशीरूपपरिणामस्यैव पंचविंशतिरात्रिषुगतास्वितिशेषः समासांताभावोनित्यत्वात् ॥ २४ ॥ अंकुरानेवाह ग्रीवेत्यादि पंचधांगानिपंचधांगांकुराः मासतःमासेनेत्यर्थः क्रमात् प्रथमंग्रीवेत्यादिक्रमेण ॥ २५ ॥ पाणीत्याद्यप्येवमेव ॥ २६ ॥ २७ ॥ पंचमासतःपंचमेमासि दंताद्यपिपंचमेएवमासि ॥ २८ ॥ २९ ॥

विभक्तावयवत्वंपृथक्ज्ञानविषयावयवत्वं एतद्वक्ष्यमाणंचगर्भोपनिषदिवैद्यकसंहितासुशारीरकेचस्फुटं विस्तरभयात्तन्नेहलिख्यते ॥ ३० ॥ एवंएवंरीत्या
वर्धतइत्यन्वयः चैतन्यंप्राप्नोतितदभिव्यक्तिंप्राप्नोतीत्यर्थः ॥ ३१ ॥ नाभीति नाभिसूत्रंनालाख्यंमातूरसनाड्यासंबद्धंतदीयाल्परंध्रेणगर्भजठरंप्राप्तान्मातृभु
क्तान्नसारतोगर्भगःपिंडोवर्धते अल्परंध्रप्राप्ताल्पाहारत्वेपिस्वकर्मतोनम्रियेतनम्रियतइत्यर्थः ॥ ३२ ॥ सर्वाणिजन्मानितत्कृतानिकर्माणिचस्मृत्वाजठरानल

सप्तमेमासिरोमाणिशिरःकेशास्तथैवच ॥ विभक्तावयवत्वंचसर्वंसंपद्यतेऽष्टमे ॥ ३० ॥ जठरेवर्धतेगर्भःस्त्रियाएवंविहं
गम ॥ पंचमेमासिचैतन्यंजीवःप्राप्नोतिसर्वशः ॥ ३१ ॥ नाभिसूत्राल्परंध्रेणमातृभुक्तान्नसारतः ॥ वर्धतेगर्भगःपिंडो
नम्रियेतस्वकर्मतः ॥ ३२ ॥ स्मृत्वासर्वाणिजन्मानिपूर्वकर्माणिसर्वशः ॥ जठरानलतप्तोऽयमिदंवचनमब्रवीत् ॥ ३३ ॥
नानायोनिसहस्रेषुजायमानोऽनुभूतवान् ॥ पुत्रदारादिसंबंधंकोटिशःपशुबांधवान् ॥ ३४ ॥ कुटुंबभरणासक्त्यान्या
यान्यायैर्धनार्जनम् ॥ कृतंनाकरवंविष्णुचिंतांस्वप्नेऽपिदुर्भगः ॥ ३५ ॥ इदानींतत्फलंभुंजेगर्भदुःखंमहत्तरम् ॥ अशाश्व
तेशाश्वतवद्देहेतृष्णासमन्वितः ॥ ३६ ॥ अकार्याण्येवकृतवान्नकृतंहितमात्मनः ॥ इत्येवंबहुधादुःखमनुभूयस्वकर्म
तः ॥ ३७ ॥ कदानिष्क्रमणंमेस्याद्गर्भान्निरयसन्निभात् ॥ इतऊर्ध्वंनित्यमहंविष्णुमेवानुपूजये ॥ ३८ ॥ इत्यादिचिंतय
न्जीवोयोनियंत्रप्रपीडितः ॥ जायमानोऽतिदुःखेननरकात्पातकीयथा ॥ ३९ ॥

योगादतिसंतप्तोवचनमाह ॥ ३३ ॥ नानेति पुत्रादिसंबंधमनुभूतवानितिसंबंधः ॥ ३४ ॥ तथाकुटुंबभरणासक्त्यातन्मात्रासक्त्यानतुधर्मासक्त्या न्यायान्या
यैर्धर्म्याधर्म्यैरुपायैर्धनार्जनंकृतंमयेतिशेषः तथाविष्णुचिंतांस्वप्नेपिनाकरवमहंनकृतवानित्यर्थः ॥ ३५ ॥ तत्फलभूतंगर्भदुःखंभुंजेइत्यन्वयः अशाश्वतेतप्तायः
पतितजलबिंदुवन्नश्वरेदेहेशाश्वतवस्तुनीवममेदंस्यादितीच्छायुक्तः ॥ ३६ ॥ नकृतमित्यस्यमयेतिशेषः अनुभूयेत्यस्यइदानींगर्भदुःखंभुंजेइत्यनेनान्वयः
॥ ३७ ॥ ३८ ॥ योनियंत्रप्रपीडितःजन्मकाले अतएवातिदुःखेनजायमानः बहिःपततीतिशेषः नरकात्पातकीत्येकोदृष्टांतः ॥ ३९ ॥

तथापूतिव्रणाद्दुर्गंधिव्रणान्निपतितोऽपरःकृमिरिवएषः पततीतिशेषः ततोबाल्यादिदुःखानिभुनक्ति एवंसर्वैंजंतवोविभुंजतेनकश्चिदेवेत्यर्थः ॥ ४० ॥ यानि सर्वाणिविदितानितानिमयावर्णितानियानितुयौवनादिषुदुःखानिसर्वतःसर्वैःप्राप्याणिसर्वत्रसर्वेषुजंतुषुविदितानिसर्वैर्ज्ञातानित्वयाचानुभूतानीतिसर्वविदितत्वादेव मयानवर्णितानि ॥ ४१ ॥ एवमिति इत्यस्मादित्याकारादभ्यासाज्जातादभिनिवेशतःअहंकर्त्तेत्याद्याकारात् निरयस्वर्गादिकंगर्भवासादिदुःखानिचभवंतीत्य

पूतिव्रणान्निपतितःकृमिरेषइवापरः ॥ ततोबाल्यादिदुःखानिसर्वैंएवंविभुंजते ॥ ४० ॥ त्वयाचैवानुभूतानिसर्वत्रविदितानिच ॥ नवर्णितानिमेगृध्रयौवनादिषुसर्वतः ॥ ४१ ॥ एवंदेहोऽहमित्यस्मादभ्यासान्निरयादिकम् ॥ गर्भवासादिदुःखानिभवंत्यभिनिवेशतः ॥ ४२ ॥ तस्माद्देहद्वयादन्यमात्मानंप्रकृतेःपरम् ॥ ज्ञात्वादेहादिममतांत्यक्त्वात्मज्ञानवान्भवेत् ॥ ४३ ॥ जाग्रदादिविनिर्मुक्तंसत्यज्ञानादिलक्षणम् ॥ शुद्धंबुद्धंसदाशांतमात्मानमवधारयेत् ॥ ४४ ॥ चिदात्मनिपरिज्ञातेनष्टेमोहेऽज्ञसंभवे ॥ देहःपततुवारब्धकर्मवेगेनतिष्ठतु ॥ ४५ ॥ योगिनोनहिदुःखंवासुखंवाज्ञानसंभवम् ॥ तस्माद्देहेनसहितोयावत्प्रारब्धसंक्षयः ॥ ४६ ॥ तावत्तिष्ठसुखेनत्वंधृतकंचुकसर्पवत् ॥ अन्यद्वक्ष्यामितेपक्षिन्शृणुमेपरमंहितम् ॥ ४७ ॥

न्वय· ॥ ४२ ॥ देहद्वयात्स्थूलसूक्ष्मरूपात्प्रागुक्तादन्यम् तर्हिप्रकृतिरेवसानेत्याह प्रकृतेःपरंज्ञात्वादेहादिषुममतांअहंममेतिबुद्धिविषयतांत्यक्त्वाआत्मज्ञानवान् आत्मैवेदंसर्वमितिज्ञानवान्भवेत् ॥ ४३ ॥ ध्येयात्मस्वरूपमाह जाग्रदादीति जाग्रत्स्वप्नसुषुप्त्याख्यावस्थात्रयरहितम् शुद्धंमायादोषालिप्तम् बुद्धंबोधस्वरूपम् ॥ ४४ ॥ अज्ञमविद्यातज्जन्येमोहेदेहादिष्वहंममताख्येनष्टेनाशंप्राप्तेदेहस्थितौनाशेवा ॥ ४५ ॥ योगिनआत्मज्ञस्याज्ञानजेसुखदुःखेनभवतः यावत्प्रारब्धक्षयोभवतितावद्देहेनसहितःसुखंतिष्ठ यथाकंचुकवान्सर्पोयावत्तत्त्यागकालंतद्वत्तेऽनंतरंत्यजतितद्वत् ॥ ४६ ॥ ४७ ॥

॥ ४८ ॥ ४९ ॥ परिमार्गणेतन्निमित्तम् ॥ ५० ॥ तीरमागमिष्यंतितैःसहकारणवशात् फलमिहकारणम् पक्षोत्पत्तिरूपफलायतैःसमागमोभविष्यति ॥ ५१ ॥ तदेवाह तदैवेति तवपक्षौद्वौनिश्चयमुत्पत्स्येतेइत्यर्थः ॥ ५२ ॥ ५३॥ निश्चयंद्रक्ष्यथ तन्मुन्युक्तपक्षभवनिश्चयेनतदुक्तरावणवधोप्यवश्यंभावी सच नसीतादर्शनंविनेतितदप्यवश्यंभविष्यतीतिनिश्चयः ॥ ५४ ॥ यन्नामस्मरणमात्रात्यःकश्चिद्दुर्जनोऽपिइयानितिपरिच्छेदरहितंसंसारसमुद्रंतीर्त्वाविष्णोःपदं

त्रेतायुगेदाशरथिर्भूत्वानारायणोऽव्ययः॥रावणस्यवधार्थायदंडकानागमिष्यति ॥ ४८ ॥ सीतयाभार्ययासार्धंलक्ष्मणेनसमन्वितः॥ तत्राश्रमेजनकजांभ्रातृभ्यांरहितेवने ॥ ४९ ॥ रावणश्चोरवन्नीत्वालंकायांस्थापयिष्यति ॥ तस्याः सुग्रीवनिर्देशाद्वानराःपरिमार्गणे ॥ ५० ॥ आगमिष्यंतिजलधेस्तीरंतत्रसमागमः॥ त्वयातैःकारणवशाद्भविष्यतिन संशयः ॥ ५१ ॥ तदासीतास्थितिंतेभ्यःकथयस्वयथार्थतः ॥ तदैवतवपक्षौद्वावुत्पत्स्येतेपुनर्नवौ ॥ ५२ ॥ संपातिरुवाच॥ बोधयामासमांचंद्रनामामुनिकुलेश्वरः॥ पश्यंतुपक्षौमेजातौनूतनावतिकोमलौ॥ ५३ ॥ स्वस्तिवोस्तुगमिष्यामिसीतांद्रक्ष्यथनिश्चयम् ॥ यत्नंकुरुध्वंदुर्लंघ्यसमुद्रस्यविलंघने ॥ ५४ ॥ यन्नामस्मृतिमात्रतोऽपरिमितंसंसारवारांनिधिंतीर्त्वागच्छतिदुर्जनोऽपिपरमंविष्णोःपदंशाश्वतम् ॥ तस्यैवास्थितिकारिणस्त्रिजगतांरामस्यभक्ताःप्रियायूयंकिंनसमुद्रमात्रतरणेशक्ताःकथंवानराः ॥ ५५ ॥ ॥ इतिश्रीम० कि० अष्टमःसर्गः ॥ ८ ॥ ॥ ६ ॥ ॥ गतेविहायसागृध्रराजेवानरपुंगवाः॥ हर्षेणमहताविष्टाःसीतादर्शनलालसाः ॥ १ ॥

गच्छति एवंदृश्यमानप्रकारेणत्रिजगतांस्थितिकारिणःसर्वजगदुत्पत्तिस्थितिलयकर्तुः स्थितिपदेनेतरदप्युपलक्ष्यते रामस्यभक्ताःप्रियाश्चयूयंशतयोजनपरिच्छिन्नस्यसमुद्रमात्रस्यतरणेकिंकुतोनशक्ताः कथंचनशक्ताइतिव्यतिरेकालंकारः ॥ ५५ ॥ इतिश्रीमत्सकल० अ० कि० अष्टमःसर्गः ॥ ८ ॥ ॥ ६ ॥ ॥ गतेइति पक्षलाभादितिभावः हर्षेणेति महदरिष्टंगतमितितत्पक्षदर्शनप्रत्ययेनसीतादर्शनमवश्यंभावीतिहर्षेणच ॥ १ ॥

नक्रचक्रंनक्रसमूहःतरंगादिभिःतरंगाअल्पाआदिनामहत्योलहर्यः दुर्ग्रहंदुःस्पर्शंआकाशस्यस्पर्शत्वंअस्यतुग्राहादियुक्तत्वात् ॥ २ ॥ कथमेनंतरामहइतिप
रस्परमवोचन्इत्यन्वयः ॥ ३ ॥ कृतविक्रमाःपूर्वंबहुशःकृतपराक्रमाः कोराजकार्यंकरिष्यतितद्वदंत्वितिशेषः ॥ ४ ॥ यस्तद्वदिष्यतिअहंकर्तेतिसएषांप्राणदाता
अतःयोमहाबलःसशीघ्रमुत्तिष्ठतु अतोत्तिष्ठत्वित्यार्षःसंधिः ॥ ५ ॥ भूयाद्भवेदित्यर्थेआर्षम् ॥ ६ ॥ ७ ॥ सर्वैर्युष्माभिर्वैनिश्चयेनप्रत्येकंस्वस्वबलंउच्यताम्

ऊचुःसमुद्रंपश्यंतोनक्रचक्रभयंकरम् ॥ तरंगादिभिरुन्नद्धमाकाशमिवदुर्ग्रहम् ॥ २ ॥ परस्परमवोचन्वैकथमेनंतरा
महे॥ उवाचचांगदस्तत्रश्शृणुध्वंवानरोत्तमाः ॥ ३ ॥ भवंतोत्यंतबलिनःशूराश्चकृतविक्रमाः॥ कोवाऽत्रवारिधिंतीर्त्वा
राजकार्यंकरिष्यति ॥ ४ ॥ एतेषांवानराणांसप्राणदातानसंशयः॥ अतोत्तिष्ठतुमेशीघ्रंपुरतोयोमहाबलः ॥ ५ ॥ वान
राणांचसर्वेषांरामसुग्रीवयोरपि ॥ सएवपालकोभूयान्नात्रकार्याविचारणा ॥ ६ ॥ इत्युक्तेयुवराजेनतूष्णींवानरसै
निकाः॥ आसन्नोचुःकिंचिदपिपरस्परविलोकिनः ॥ ७ ॥ ॥ अंगदउवाच ॥ ॥ उच्यतांवैबलंसर्वैःप्रत्येकंकार्य
सिद्धये॥ केनवासाध्यतेकार्यंजानीमस्तदनंतरम् ॥ ८ ॥ अंगदस्यवचःश्रुत्वाप्रोचुर्वीराबलंपृथक् ॥ योजनानांदशार
भ्यदशोत्तरगुणंजगुः॥ ९ ॥ शतादर्वाग्जांबवांस्तुप्राहमध्येवनौकसाम्॥ पुरात्रिविक्रमेदेवेपादंभूमानलक्षणम्॥ १०॥
त्रिःसप्तकृत्वोऽहमगांप्रदक्षिणविधानतः ॥ इदानींवार्धकग्रस्तोनशक्नोमिविलंघितुम् ॥ ११ ॥ अंगदोऽप्याहमेगंतुंश
क्यंपारंमहोदधेः॥ पुनर्लंघनसामर्थ्यंनजानाम्यस्तिवानवा ॥ १२ ॥

ततःकार्यसाधकंनिश्चेष्यामइत्यर्थः ॥ ८ ॥ दशोत्तरगुणम् दशसंख्योत्तरोगुणोयस्यतत् एकोदशपरोविंशतिःपरस्त्रिंशदित्येवंक्रमेण ॥ ९ ॥ जांबवांस्तुनवतियों
जनानीत्याहेत्यर्थः पुरात्रिविक्रमेदेवेऽवतीर्णेसतितदीयंभूमानंभूपरिच्छेदलक्षणकार्यंयस्यतादृशंभूपरिच्छेदकंपादम् ॥ १० ॥ एकविंशतिवारंप्रदक्षिणविधाने
नाहमगांतत्परितइतिशेषः ॥ ११ ॥ १२ ॥

त्वन्नोनियामकोस्माकमाज्ञाकर्ताराजात्वंयद्यपिसमर्थोसितथापित्वामाज्ञप्तुंमेनयुक्तम् ॥ १३ ॥ कार्यंकेनापिनकृतंजीवितुंचनशक्यतेराजभयादतोमरणनि
श्चयेनस्वप्स्यामइत्यर्थः ॥ १४ ॥ कार्यसिद्धिर्भविष्यतिअचिरेणचभविष्यतितितंदर्शयिष्यामि ॥ १५ ॥ कार्यगौरवेगुरुतरकार्येप्राप्तेऽज्ञेनेवभवताकिंतूष्णींस्थी

तमाहजांबवान्वीरस्त्वंराजानोनियामकः॥ नयुक्तंत्वांनियोक्तुंमेत्वंसमर्थोऽसियद्यपि ॥ १३॥ ॥ अंगदउवाच॥ एवं
चेत्पूर्ववत्सर्वेस्वप्स्यामोदर्भविष्टरे॥ केनापिनकृतंकार्यंजीवितुंचनशक्यते ॥ १४ ॥ तमाहजांबवान्वीरोदर्शयिष्यामि
तेसुत॥ येनास्माकंकार्यसिद्धिर्भविष्यत्यचिरेणच॥ १५॥ इत्युक्त्वाजांबवान्प्राहहनूमंतमवस्थितम्॥ हनूमन्किंरहस्तू
ष्णींस्थीयतेकार्यगौरवे॥१६॥ प्राप्तेऽज्ञेनेवसामर्थ्यंदर्शयाद्यमहाबल॥ त्वंसाक्षाद्वायुतनयोवायुतुल्यपराक्रमः॥ १७॥
रामकार्यार्थमेवत्वंजनितोसिमहात्मना॥ जातमात्रेणतेपूर्वंदृष्ट्वोद्यंतंविभावसुम्॥ १८॥ पक्वंफलंजिघृक्षामीत्युत्प्लुतं
बालचेष्टया॥ योजनानांपंचशतंपतितोसिततोभुवि ॥ १९ ॥ अतस्त्वद्बलमाहात्म्यंकोवाशक्नोतिवर्णितुम्॥ उत्तिष्ठकु
रुरामस्यकार्यंनःपाहिसुव्रत ॥ २० ॥ श्रुत्वाजांबवतोवाक्यंहनूमानतिहर्षितः॥ चकारनादंसिंहस्यब्रह्मांडंस्फोटयन्निव
॥ २१ ॥ बभूवपर्वताकारस्त्रिविक्रमइवापरः॥ लंघयित्वाजलनिधिंकृत्वालंकांचभस्मसात्॥ २२ ॥ रावणंसकुलंह
त्वानेष्येजनकनंदिनीम्॥ यद्वाबध्वागलेरज्ज्वारावणंवामपाणिना॥ २३॥

यतइत्यन्वयः ॥ १६ ॥ अतःसामर्थ्यंदर्शय ननुसामर्थ्याभावेकिंदर्शनीयमितिचेन्नेत्याह त्वमिति ॥ १७॥ जनितोसिउत्पादितोसि विभावसुंसूर्यम् ॥ १८ ॥
जिघृक्षामीतिग्रहीष्यामीत्यर्थेआर्षम् योजनानाम् पंचशतमुत्प्लुतंततोभुविपतितः ॥ १९ ॥ नोस्मान्पाहिरक्ष ॥ २० ॥ सिंहस्यनादंतस्येवनादमित्यर्थ ॥ २१ ॥
॥ २२ ॥ आनेष्यइतिच्छेदः रावणंगलेबद्ध्वाएकहस्तेगृहीत्वावामपाणिनासपर्वतांलंकांधृत्वारामाग्रेक्षिपामि ॥ २३ ॥

यद्वेति सीतायाआनयनेरामाज्ञाभावादितिभावः दृष्ट्वैवेति नतुतांगृहीत्वानापिरावणादीन्गृहीत्वेत्यर्थः ॥ २४ ॥ २५ ॥ भवतात्आशिषिलोट् ॥ २६ ॥ वायु

लंकांसपर्वतांधृत्वारामस्याग्रेक्षिपाम्यहम् ॥ यद्वादृष्ट्वैवयास्यामिजानकींशुभलक्षणाम् ॥ २४ ॥ श्रुत्वाहनूमतोवाक्यं जांबवानिदमब्रवीत् ॥ दृष्ट्वैवागच्छभद्रंतेजीवंतींजानकींशुभाम् ॥ २५ ॥ पश्चाद्रामेणसहितोदर्शयिष्यसिपौरुषम् ॥ कल्याणंभवताद्भद्रगच्छतस्तेविहायसा ॥ २६ ॥ गच्छंतंरामकार्यार्थंवायुस्त्वामनुगच्छतु ॥ इत्याशीर्भिःसमामंत्र्यविसृष्टःप्लवगाधिपैः ॥ २७ ॥ महेंद्राद्रिशिरोगत्वाबभूवाद्भुतदर्शनः ॥ २८ ॥ महानगेंद्रप्रतिमोमहात्मासुवर्णवर्णोऽरुणचारुवक्त्रः ॥ महाफणींद्राभसुदीर्घबाहुर्वातात्मजोऽदृश्यतसर्वभूतैः ॥ २९ ॥ ॥ इतिश्रीमद० उमामहेश्वरसं० किष्किंधाकांडेनवमःसर्गः ॥ ९ ॥ ॥ छ ॥ ॥ समाप्तमिदंकिष्किंधाकांडम् ॥ ॥ छ ॥

स्त्वामनुगच्छत्विति शकुनप्रार्थनं समामंत्र्ययोजयित्वा ॥ २७ ॥ अद्भुतदर्शनःअतिमहाशरीरत्वात् ॥ २८ ॥ तदेवाह महानगेंद्रेति ॥ २९ ॥ ॥ इतिश्रीमत्सकल० किष्किंधाकांडेनवमः सर्गः ॥ ९ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ इति श्रीमदध्यात्मरामायणे किष्किंधाकांडः समाप्तः ॥

॥ इति श्रीमदध्यात्मरामायणे किष्किंधाकांडः समाप्तः ॥

देवराज्यादित्यस्यअपीतिशेषः प्राप्तजयस्यरामस्यसर्वतोप्यधिकंनिरवधिफलदातृत्वादितिभावः ॥ ६२ ॥ सौम्याःसोमवत्चंद्रवत्प्रियदर्शनाःशोभमानाइति यावत् सौम्यसोमवत्प्रियदर्शन ॥ ६३ ॥ ६४ ॥ कर्मणांयुद्धादीनांफलोदयरूपांतांदेवीमित्यन्वयः ॥ ६५ ॥ ६६ ॥ अनलेअग्नौस्थितांजानकीमादातुंमन

रत्नौघाद्विविधाद्वापिदेवराज्याद्विशिष्यते॥ हतशत्रुंविजयिनंरामंपश्यामिसुस्थिरम्॥ ६२ ॥ तस्यतद्वचनंश्रुत्वामैथिली प्राहमारुतिम्॥सर्वेसौम्यगुणाःसौम्यत्वय्येवपरिनिष्ठिताः ॥ ६३ ॥ रामंद्रक्ष्यामिशीघ्रंमामाज्ञापयतुराघवः॥तथेति तांनमस्कृत्यययौद्रष्टुंरघूत्तमम् ॥ ६४ ॥ जानक्याभाषितंसर्वंरामस्याग्रेन्यवेदयत् ॥ यन्निमित्तोयमारंभःकर्मणांचफलोदयः ॥ ६५ ॥ तांदेवींशोकसंतप्तांद्रष्टुमर्हसिमैथिलीम्॥एवमुक्तोहनुमतारामोज्ञानवतांवरः॥ ६६ ॥मायासीतां परित्यक्तुंजानकीमनलेस्थिताम् ॥ आदातुंमनसाध्यात्वारामःप्राहविभीषणम् ॥ ६७ ॥ गच्छराजन्जनकजामानयाशुममांतिकम्॥स्नातांविरजवस्त्राढ्यांसर्वाभरणभूषिताम् ॥ ६८॥ विभीषणोऽपितच्छ्रुत्वाजगामसहमारुतिः॥ राक्षसीभिःसुवृद्धाभिःस्नापयित्वातुमैथिलीम् ॥ ६९ ॥ सर्वाभरणसंपन्नामारोप्यशिबिकोत्तमे ॥ याष्टीकैर्बहुभिर्गुप्तांकंचुकोष्णीषिभिःशुभाम्॥७०॥ तांद्रष्टुमागताःसर्वेवानराजनकात्मजाम्॥तान्वारयंतोबहवःसर्वतोवेत्रपाणयः॥७१॥ कोलाहलंप्रकुर्वंतोरामपार्श्वमुपाययुः॥ दृष्ट्वातांशिबिकारूढांदूरादथरघूत्तमः॥ ७२ ॥ विभीषणकिमर्थंतेवानरान्वारयंतिहि॥पश्यंतुवानराःसर्वेमैथिलींमातरंयथा॥ ७३ ॥

साध्यात्वानिश्चित्यप्राहेत्यन्वयः ॥६७॥ विरजवस्त्राणिनिर्मलवस्त्राणितदाढ्यांतैःशोभिताम् ॥ ६८ ॥ सहमारुतिः समासेपिवैकल्पिकत्वात्सत्वाभावः ॥ ६९ ॥ शिबिकोत्तमेसर्वशिबिकाभ्यउत्तमेशिबिकारूपेवाहने याष्टीकैःआचारवशाद्यष्टिहस्तैरक्षकैःषंढैर्बहुभिर्गुप्ताम्॥७०॥७१॥कोलाहलंप्रकुर्वंतःदूरेतिष्ठतेतिवदंतः ॥ ७२ ॥ तेयाष्टीकाः ॥ ७३ ॥

सायासूर्यचंद्रादिभिरपितत्त्वतोऽज्ञातातादृशींवानराःसुखेनपश्यंत्वित्याशयः शिबिकान्छिबिकायाः लिंगव्यत्ययआर्षः ॥ ७४ ॥ ७५ ॥ अवाच्यवादाम्
वक्तुमनर्हवचनानिपरपुरुषगृहेस्थितासिधिक्त्वामित्यादीनि ॥ ७६ ॥ प्रत्ययायविश्वासाय ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ सर्वतःपातुशीतोभव

पादचारेणसायातुजानकीममसन्निधिम् ॥ श्रुत्वातद्रामवचनंशिबिकादवरुह्यसा ॥ ७४ ॥ पादचारेणशनकैरागता
रामसन्निधिम् ॥ रामोपिदृष्ट्वातांमायासीतांकार्यार्थनिर्मिताम् ॥ ७५ ॥ अवाच्यवादान्बहुशःप्राहतांरघुनंदनः ॥ अ
मृष्यमाणासासीतावचनंराघवोदितम् ॥ ७६ ॥ लक्ष्मणंप्राहमेशीघ्रंप्रज्वालयहुताशनम् ॥ विश्वासार्थंहिरामस्यलो
कानांप्रत्ययायच ॥ ७७ ॥ राघवस्यमतंज्ञात्वालक्ष्मणोपितदैवहि ॥ महाकाष्ठचयंकृत्वाज्वालयित्वाहुताशनम् ॥ ७८ ॥
रामपार्श्वमुपागम्यतस्थौतूष्णीमरिंदमः ॥ ततःसीतापरिक्रम्यराघवंभक्तिसंयुता ॥ ७९ ॥ पश्यतांसर्वलोकानांदेवरा
क्षसयोषिताम् ॥ प्रणम्यदेवताभ्यश्चब्राह्मणेभ्यश्चमैथिली ॥ ८० ॥ बद्धांजलिपुटाचेदमुवाचाग्निसमीपगा ॥ यथामे
हृदयंनित्यंनापसर्पतिराघवात् ॥ ८१ ॥ तथालोकस्यसाक्षीमांसर्वतःपातुपावकः ॥ एवमुक्त्वातदासीतापरिक्रम्यहु
ताशनम् ॥ ८२ ॥ विवेशज्वलनंदीप्तंनिर्भयेनहृदासती ॥ ८३ ॥ दृष्ट्वाततोभूतगणाःससिद्धाःसीतांमहावह्निगतांभृ
शार्ताः ॥ परस्परंप्राहुरहोससीतांरामःश्रियंस्वांकथमत्यजज्ज्ञः ॥ ८४ ॥ ॥ इतिश्रीमदध्यात्मरामायणेउमामहे
श्वरसंवादेयुद्धकांडेद्वादशःसर्गः ॥ १२ ॥ ॥ छ ॥ ॥ ततःशक्रःसहस्राक्षोयमश्चवरुणस्तथा ॥ कुबेरश्चम
हातेजाःपिनाकीवृषवाहनः ॥ १ ॥

त्वित्यर्थः ॥ ८२ ॥ ८३ ॥ ज्ञःसर्वज्ञोपिसरामःकथंसीतामत्यजत्वह्निप्रवेशमनुज्ञातवानितिप्राहुः ॥ ८४ ॥ ॥ इतिश्रीमत्सकल०युद्धकांडे
द्वादशःसर्गः ॥ १२ ॥ ॥ छ ॥ ॥ ततइति ॥ १ ॥

॥ २ ॥ ३ ॥ साक्षीअंतर्यामितयासर्वद्रष्टा अथसार्वात्म्यमाह वसूनामित्यादि ॥ ४ ॥ आदिकर्तास्त्रष्टेःप्रथमकर्ता विराड्रूपमाहाश्विनावित्यादि इदंपुराणांतरोक्तस्यसर्वस्योपलक्षणम् ॥५॥ आदिरुत्पत्तिकृत् अंतोनाशकृत् सदोदितःरात्रिदिनव्यवहारहीनः शुद्धःमायागुणास्पृष्टःअतएवसदाबुद्धःज्ञानस्वरूपः अत

ब्रह्माब्रह्मविदांश्रेष्ठोमुनिभिःसिद्धचारणैः ॥ पितरोऋषयःसाध्यागंधर्वाप्सरसोरगाः ॥ २ ॥ एतेचान्येविमानाग्र्यैराजग्मुर्यत्रराघवः ॥ अब्रुवन्परमात्मानंरामंप्रांजलयश्चते ॥ ३ ॥ कर्तात्वंसर्वलोकानांसाक्षीविज्ञानविग्रहः ॥ वसूनामष्टमोसित्वंरुद्राणांशंकरोभवान् ॥ ४ ॥ आदिकर्तासिलोकानांब्रह्मात्वंचतुराननः ॥ अश्विनौघ्राणभूतौतेचक्षुषीचंद्रभास्करौ ॥ ५ ॥ लोकानामादिरंतोसिनित्यएकःसदोदितः ॥ सदाशुद्धःसदाबुद्धःसदामुक्तोऽगुणोऽद्वयः ॥ ६ ॥ त्वन्मायासंवृतानांत्वंभासिमानुषविग्रहः ॥ त्वन्नामस्मरतांरामसदाभासिचिदात्मकः ॥ ७ ॥ रावणेनहृतंस्थानमस्माकंतेजसासह ॥ त्वयाद्यनिहतोदुष्टःपुनःप्राप्तंपदंस्वकम् ॥ ८ ॥ एवंस्तुवत्सुदेवेषुब्रह्मासाक्षात्पितामहः ॥ अब्रवीत्प्रणतोभूत्वारामंसत्यपथेस्थितम् ॥ ९ ॥ ब्रह्मोवाच ॥ वंदेदेवंविष्णुमशेषस्थितिहेतुंत्वामध्यात्मज्ञानिभिरंतर्हृदिभाव्यम् ॥ हेयाहेयद्वंद्वविहीनंपरमेकंसत्तामात्रंसर्वहृदिस्थंदृशिरूपम् ॥ १० ॥

एवमुक्तोऽसंसारी अगुणःअद्वयइतिच्छेदः ॥ ६ ॥ त्वन्माययासंवृतानांसंवृतज्ञानानां चिदात्मकःशुद्धज्ञानस्वरूपः ॥ ७ ॥ तेजसासहस्थानंहृतंतेजोऽपिहृतं स्थानंचेत्यर्थः ॥ ८ ॥ ९ ॥ अशेषस्यस्थितिकारणं अध्यात्मज्ञानिनआत्मविषयतत्त्वज्ञानवंतःहेयाहेयेदुःखसुखतत्साधनेतद्रूपद्वंद्वविहीनं कूटस्थत्वात्सत्तामात्रं सर्वस्यहृदितिष्ठतीतिव्यवहारनियामकं दृशिर्ज्ञानं इक्कृष्यादिभ्यइतिइक्प्रत्ययः ॥ १० ॥

निश्चयबुद्ध्याहठयोगेनावश्यंभगवंतंज्ञास्यामीत्येवंरूपेणकुंभकेनहृदिप्राणापानौरुद्धासंचारहीनौकृत्वातत्रप्राणऊर्ध्वसंचारीअपानोधश्चारीश्रवणादिभिरीश्वरविषयंसंशयबंधंईश्वरोस्तिनवाज्ञानरूपोवाशरीरीवेत्यादिसंशयरूपंबंधनं एवंसंशयस्यैवसंसारमूलकारणत्वात् विषयौघांश्चछित्त्वाततोंऽतःकरणंविमुखंकृत्वा तत्रेश्वरविषयसंदेहस्यश्रवणादिनाच्छेदः विषयाणांचानित्याशुचित्वप्रतिसंधानेनत्यागः गतमोहास्त्यक्ततमसःयंपश्यंतितंरामंवंदेइत्यन्वयः ॥ ११ ॥ मायातीतंतद्गुणास्पृष्टं आद्यमित्यस्यैवविवरणंजगदादिमिति मानातीतंदेशकालकृतपरिच्छेदशून्यं मोहविनाशंसेवकानांमोहनाशकं योगविधानंयोगविधातारंयोग

प्राणापानौनिश्चयबुद्ध्याहृदिरुद्धाछित्त्वासर्वंसंशयबंधंविषयौघान् ॥ पश्यंतीशंयंगतमोहायतयस्तंवंदेरामंरत्नकिरीटं रविभासम् ॥११॥ मायातीतंमाधवमाद्यंजगदादिंमानातीतंमोहविनाशंमुनिवंद्यम् ॥ योगिध्येयंयोगविधानंपरिपूर्णंवंदेरामंरंजितलोकंरमणीयम् ॥ १२ ॥ भावाभावप्रत्ययहीनंभवमुख्यैर्भोगासक्तैरर्चितपादांबुजयुग्मम् ॥ नित्यंशुद्धंबुद्धमनंतंप्रणवाख्यंवंदेरामंवीतमशेषासुरदावम् ॥ १३ ॥

मार्गप्रवर्तकम् ॥ १२ ॥ भावाभावप्रत्ययहीनंसंसारेमिथ्यात्वान्नतस्यभावप्रत्ययोनाप्यभावप्रत्ययोदृश्यत्वात्तेनानिर्वचनीयत्वज्ञानविषयस्तस्यसइतिसूचितं यद्वाऽज्ञानाभावाभावप्रत्ययाविषयं शास्त्रतःसत्त्वात्प्रत्यक्षेणानुपलंभाच्चतत्त्वं यद्वा भावोदृश्यमभावस्तुच्छंतद्विषयज्ञानाविषयंअदृश्यत्वादतुच्छत्वाच्च भोगासक्तैर्भोगेष्वसक्तैस्त्यक्तभोगैर्भवमुख्यैः शिवादिभिःपूजितचरणकमलंनित्यंकालत्रयाबाध्यं शुद्धंमायादोषास्पृष्टं बुद्धंज्ञानस्वरूपं अनंतंदेशाद्यपरिच्छेद्यं प्रणवआख्यानामयस्यतंप्रणवाख्यं तस्यवाचकःप्रणवइतिपातंजलसूत्रात् अशेषासुरदावंसर्वदैत्यनाशकमित्यर्थः ॥ १३ ॥

मेब्रह्मणस्त्वंनाथः नाथत्वमेवोपपादयति नाथितकार्याखिलकारीप्रार्थितसकलकार्यकर्ता अखिलशब्दस्यपरनिपातआर्षः मानातीतःदेशतःकालतोरूपतश्चे
त्येवंत्रिविधपरिच्छेदशून्यः मालक्ष्मीस्तस्याःधवःपतिः भक्त्यानन्यशरणत्वरूपयागम्यःप्राप्यः भावितरूपःसन्भवस्यसंसारस्यहारीहर्तायोगाभ्यासैर्भावितं
विहीनदोषंतथाशुद्धंयच्चेतोंतःकरणंतत्रसहचारीतद्वृत्तिविषयइत्यर्थः दृश्यतेत्वग्र्ययाबुद्ध्येतिश्रुतेः ॥ १४॥ लोकततीनांपरंपराणांआद्यंतंसृष्टिनाशहेतुम् लोका
नांपरमीशंपालनहेतुम् लौकिकैःप्रमाणैर्नअधिगम्यम् अज्ञेयंशास्त्रैकगम्यमित्यर्थः भक्तिःपरमेश्वरेतत्पूजादौप्रीतिःश्रद्धाततःफलावश्यंभावनिश्चयःतद्रूपैर्भा

त्वंमेनाथोनाथितकार्याखिलकारीमानातीतोमाधवरूपोखिलधारी॥भक्त्यागम्योभावितरूपोभवहारीयोगाभ्यासैर्भा
वितचेतःसहचारी॥१४॥त्वामाद्यंतंलोकततीनांपरमीशंलोकानांनोलौकिकमानैरधिगम्यम्॥भक्तिश्रद्धाभावसमेतै
र्भजनीयंवंदेरामंसुंदरमिंदीवरनीलम्॥ १५॥ कोवाज्ञातुंत्वामतिमानंगतमानंमानासक्तोमाधवशक्तोमुनिमान्यम्॥
वृंदारण्येवंदितवृंदारकवृंदंवंदेरामंभवमुखवंद्यंसुखकंदम्॥ १६॥ नानाशास्त्रैर्वेदकदंबैःप्रतिपाद्यंनित्यानंदंनिर्विषय
ज्ञानमनादिम्॥ मत्सेवार्थंमानुषभावंप्रतिपन्नंवंदेरामंमरकतवर्णंमथुरेशम्॥ १७॥ श्रद्धायुक्तोयःपठतीमंस्तवमा
द्यंब्राह्मंब्रह्मज्ञानविधानंभुविमर्त्यः॥ रामंश्यामंकामितकामप्रदमीशंध्यात्वाध्यातापातकजालैर्विगतःस्यात्॥१८॥

वैश्चित्तधर्मैर्युक्तैः पुरुषैःसेव्यम् ॥ १५ ॥ हेमाधवअतिमानंसर्वतोऽपिव्यापकंगतमानंस्वगतेयत्तयाऽपरिच्छेद्यंईदृशंत्वांज्ञातुंमानासक्तःमानेषुप्रमाणेषुइंद्रिये
ष्वसक्तःकोवाशक्तःसमर्थः कृष्णावतारेवृंदारण्येस्थित्वामाययावंदितंनमस्कृतंवृंदारकाणांदेवानांवृंदंयेन भवमुखैःशिवादिभिर्वंद्यंसुखकंदंसुखजनकंत्वांवंदे
॥ १६ ॥ नानाशास्त्रैःनिर्णीतार्थायेवेदकदंबावेदसमूहास्तैःप्रतिपाद्यम् निर्विषयज्ञानंनिर्विकल्पकज्ञानविषयम् बाह्यविषयाविषयकज्ञानविषयमित्यर्थः मत्से
वार्थंरावणादिवधेनेतिशेषः मथुरेशंअग्रेशत्रुघ्नायमथुराराज्यदानात्तत्त्वम् कृष्णावताराभिप्रायेणच ॥ १७ ॥ ब्राह्मंब्रह्मकृतंब्रह्मज्ञानविधानंतज्जनकम् कामि
तकामप्रदंअभीष्टवस्तुदातारम् तादृशंध्यात्वायःपठतिसध्यातापुरुषःपातकजालैर्विगतःहीनःस्यात् ॥ १८ ॥

विभावसुरग्निःदिव्यविभूषणान्वितांतद्युक्ताम् ॥ १९ ॥ जगतांसाक्षीतत्पुण्यपापद्रष्टा मय्यवरोपितांस्थापिताम् ॥ २० ॥ मायाजनकात्मजांमायारूपांतां जनकात्मजासदृशींमाययाविधायनिर्माय्येतियावत् पुरामय्यवरोपितामितिपूर्वेणान्वयः इदानींतन्निर्माणकृत्यस्यजातत्वान्मायानिर्मितामयिलीनेत्याह हतइति अनेनदशास्यवधेन ॥ २१ ॥ प्रतिबिंबरूपिणीसीताप्रतिबिंबरूपायदर्थंसाकृतानिर्मितातद्विषयतःकृतकृत्यतांगतातस्तिरोहितालीना ॥ २२ ॥ सुरनाय

श्रुत्वास्तुतिंलोकगुरोर्विभावसुःस्वांकेसमादायविदेहपुत्रिकाम् ॥ विभ्राजमानांविमलारुणद्युतिंरक्तांबरांदिव्यविभूषणान्विताम् ॥ १९ ॥ प्रोवाचसाक्षीजगतांरघूत्तमंप्रपन्नसर्वार्तिहरंहुताशनः ॥ गृहाणदेवींरघुनाथजानकींपुरात्वयामय्यवरोपितांवने ॥ २० ॥ विधायमायाजनकात्मजांहरेदशाननप्राणविनाशनायच ॥ हतोदशास्यःसहपुत्रबांधवैर्निराकृतोनेनभरोभवःप्रभो ॥ २१ ॥ तिरोहितासाप्रतिबिंबरूपिणीकृतायदर्थंकृतकृत्यतांगता ॥ ततोतिहृष्टःपरिगृह्यजानकींरामःप्रहृष्टःप्रतिपूज्यपावकम् ॥ २२ ॥ स्वांकेसमावेश्यसदानपायिनींश्रियंत्रिलोकीजननींश्रियःपतिः ॥ दृष्ट्वाथरामंजनकात्मजायुतंश्रियास्फुरंतंसुरनायकोमुदा ॥ २३ ॥ भक्त्यागिरागद्गदयासमेत्यकृतांजलिःस्तोतुमथोपचक्रमे ॥इंद्रउवाच ॥ भजेहंसदाराममिंदीवराभंभवारण्यदावानलाभाभिधानम् ॥ भवानीहृदाभावितानंदरूपंभवाभावहेतुंभवादिप्रपन्नम् ॥ २४ ॥ सुरानीकदुःखौघनाशैकहेतुंनराकारदेहंनिराकारमीड्यम् ॥ परेशंपरानंदरूपंवरेण्यंहरिंराममीशंभजेभारनाशम् ॥ २५ ॥

कइंद्रः ॥ २३ ॥ भक्त्यासमेत्यभक्तियुक्तोभूत्वा इंदीवरंनीलोत्पलंतदाभंतत्कांतिम् भवारण्यस्यसंसारारण्यस्यदावानलाभंतत्तुल्यंतन्नाशकत्वादभिधानंनाम यस्यतं भवानीहृदापार्वतीहृदयेनभावितंध्यातमानंदरूपंयस्यतम् भवाभावहेतुंसंसारनिराकरणम् भवादिभिःप्रपन्नंसेवितम् ॥ २४ ॥ सुरसमूहस्ययोदुःखौघोदुःखसमूहस्तन्नाशस्यमुख्यकारणम् नराकारदेहंमाययेतिशेषः वस्तुतोनिराकारंईड्यंस्तुत्यम् परेषांब्रह्मादीनामपीशंवरेण्यंश्रेष्ठंभारनाशंभूभारनाशकम् ॥ २५ ॥

प्रपन्नाखिलानंददोहंप्रपन्नंप्रपन्नार्तिनिःशेषनाशाभिधानम् ॥ तपोयोगयोगीशभावाभिभाव्यंकपीशादिमित्रंभजे
राममित्रम् ॥ २६ ॥ सदाभोगभाजांसुदूरेविभांतंसदायोगभाजामदूरेविभांतम् ॥ चिदानंदकंदंसदाराघवेशंवि
देहात्मजानंदरूपंप्रपद्ये ॥ २७ ॥ महायोगमायाविशेषानुयुक्तोविभासीशलीलानराकारवृत्तिः ॥ त्वदानंदलीलाकथा
पूर्णकर्णाःसदानंदरूपाभवंतीहलोके ॥ २८ ॥ अहंमानपानाभिमत्तप्रमत्तोनवेदाखिलेशाभिमानाभिमानः ॥ इदा
नींभवत्पादपद्मप्रसादात्रिलोकाधिपत्याभिमानोविनष्टः ॥ २९ ॥ स्फुरद्रत्नकेयूरहाराभिरामंधराभारभूतासुरानीक
दावम् ॥ शरच्चंद्रवक्त्रंलसत्पद्मनेत्रंदुरावारपारंभजेराघवेशम् ॥ ३० ॥

प्रपन्नेति शरणागतानामखिलानंददातारं प्रपन्नंभक्तैरितिशेषः प्रपन्नानामार्तीनांनिःशेषंयथाभवतितथानाशंनाशकृत्अभिधानंनामयस्यतपसाशमदमादिनायोगोयेषांतादृशैर्योगीशैर्भावेनसत्तयातद्रूपेणाभिभाव्यंध्येयं कपीशःसुग्रीवःआदिनाविभीषणस्तन्मित्रंराममित्रंरामरूपंसूर्यम् ॥ २६ ॥ भोगभाजांभोगिनांसंसारिणांसुदूरेविभांतंतज्ज्ञानाविषयमितियावत् योगिनांसदादूरेविभांतंतेषांसर्वदाआत्मत्वेनज्ञानविषयमित्यर्थः चिदानंदकंदंचितश्चैतन्यस्यानंदस्यकंदंसर्वचेतनानांसर्वानंदानांतन्मूलकत्वात् अस्यैवानंदस्यसर्वेमात्रामुपजीवंतीतिश्रुतेः राघवेशंरघुवंशस्वामिनं विदेहात्मजानंदरूपंजानक्याआनंदरूपंसर्वानंदप्रदम् ॥ २७ ॥ महेति महतीयोगमायातद्विशेषैःसत्त्वादिभिरनुयुक्तःयथाजपाकुसुमयुक्तःस्फटिकोरक्तोभातितथातदनुयोगाल्लीलयानराकारावृत्तिश्चेष्टायस्यतादृशोविभासि तवयाआनंदेनलीलास्तत्कथाभिःपूर्णाःकर्णायेषांतेसदाआनंदरूपाइहलोकेभवंति ॥ २८ ॥ अहंमानोहंकारस्तद्रूपंपानंसुरादिकर्मत्युडंतस्तेनाभितोमत्तोतएवप्रकर्षेणमत्तः अखिलायेईशाभूम्यादेस्तदभिमानेनतुल्योभिमानोयस्यतादृशोहंत्वांनवेदनजानामि त्रिलोकेयदाधिपत्यंतत्प्रयुक्तोभिमानोविनष्टःगतः ॥ २९ ॥ स्फुरद्रत्नकेयूरहारैरभिरामंजनमनोहरं धरायाःपृथ्व्याभारभूतायेअसुरादैत्यास्तदनीकस्यदावाग्नितुल्यं दुरापःदुःखेनप्राप्यःअवारपारोयस्यतं पृषोदरादित्वाद्वर्णलोपः ॥ ३० ॥

सुराधीशनीलइंद्रनीलमणिरभ्रंचतद्वन्नीलाअंगकांतिर्यस्यतंलोकशांतिंलोकानांशांतिःसुखंयस्मात्तं किरीटादिभिःशोभायस्यतं पुरारातेर्लाभभूतंयत्नप्राप्यनिध्यादिसदृशम् ॥ ३१ ॥ लसच्चंद्रकोटिप्रकाशादियत्रतादृशेपीठेउक्तविशेषणांसीतामंकेसमाधायगृहीत्वासमासीनं निवृत्तेआर्तितंद्रेदुःखालस्येयस्मात्तंसदा

सुराधीशनीलाभ्रनीलांगकांतिंविराधादिरक्षोवधाल्लोकशांतिम् ॥ किरीटादिशोभंपुरारातिलाभंभजेरामचंद्रंरघूणामधीशम् ॥ ३१ ॥ लसच्चंद्रकोटिप्रकाशादिपीठेसमासीनमंकेसमाधायसीताम् ॥ स्फुरद्धेमवर्णांतडित्पुंजभासांभजेरामचंद्रंनिवृत्तार्तितंद्रम् ॥३२॥ ततःप्रोवाचभगवान्भवान्यासहितोभवः ॥ रामंकमलपत्राक्षंविमानस्थोनभःस्थले ॥ ३३ ॥ आगमिष्याम्ययोध्यायांद्रष्टुंत्वांराज्यसत्कृतम् ॥ इदानींपश्यपितरमस्यदेहस्यराघव ॥ ३४॥ ततोपश्यद्विमानस्थंरामोदशरथंपुरः॥ ननामशिरसापादौमुदाभक्त्यासहानुजः॥ ३५॥ आलिंग्यमूर्ध्न्यवघ्रायरामंदशरथोब्रवीत्॥ तारितोस्मित्वयावत्ससंसाराद्दुःखसागरात् ॥ ३६ ॥ इत्युक्त्वापुनरालिंग्यययौरामेणपूजितः ॥ रामोपिदेवराजंतंदृष्ट्वाप्राहकृतांजलिम् ॥ ३७ ॥ मत्कृतेनिहतान्संख्येवानरान्पतितान्भुवि ॥ जीवयाशुसुधावृष्ट्यासहस्राक्षममाज्ञया ॥ ३८ ॥ तथेत्यमृतवृष्ट्यातान्जीवयामासवानरान् ॥ येयेमृतामृधेपूर्वंतेतेसुप्तोत्थिताइव ॥ पूर्ववद्बलिनोहृष्टारामपार्श्वमुपाययुः ॥३९ ॥

प्रकाशरूपमित्यर्थः ॥ ३२ ॥ भवःशिवःनभःस्थलेआकाशेविमानेस्थितःसन्प्रोवाचेत्यन्वयः ॥ ३३ ॥ अस्यतवदेहस्यपितरंजनयितारम् ॥ ३४ ॥ सहानुजःसलक्ष्मणः पादौस्पृष्ट्वाशिरसाननामेत्यन्वयः ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

पूर्ववदिति राक्षसानांतुनोत्थानम् सत्यसंकल्पस्यभगवतःशरैर्दग्धानामुत्थापनेमृतस्यापिसामर्थ्याभावाच्छरपातकालेपुनर्जीवनस्यैवभगवताअसंकल्पनात् केचित्तुरक्षसांगणनार्थंरावणेनसमुद्रेप्रक्षेपान्नोत्थानम् यद्वारावणदाहकालेसर्वेषांरक्षसांतत्संबंधिभिर्दाहकरणेनभस्मनश्चसमुद्रेप्रक्षेपेणनोत्थानमित्याहुः ॥ ४० ॥

नोत्थिताराक्षसास्तत्रपीयूषस्पर्शनादपि ॥ विभीषणस्तुसाष्टांगंप्रणिपत्याब्रवीद्वचः ॥ ४० ॥ देवमामनुगृह्णीष्वमयिभक्तिर्यदातव ॥ मंगलस्नानमद्यत्वंकुरुसीतासमन्वितः ॥ ४१ ॥ अलंकृत्यसहभ्रात्राश्वोगमिष्यामहेवयम् ॥ विभीषणवचःश्रुत्वाप्रत्युवाचरघूत्तमः ॥ ४२ ॥ सुकुमारोतिभक्तोमेभरतोमामवेक्षते ॥ जटावल्कलधारीसशब्दब्रह्मसमाहितः ॥ ४३ ॥ कथंतेनविनास्नानमलंकारादिकंमम ॥ अतःसुग्रीवमुख्यांस्त्वंपूजयाशुविशेषतः ॥ ४४ ॥ पूजितेषुकपींद्रेषुपूजितोहंनसंशयः ॥ इत्युक्तोराघवेणाशुस्वर्णरत्नांबराणिच ॥ ४५ ॥ ववर्षराक्षसश्रेष्ठोयथाकामंयथारुचि ॥ ततस्तान्पूजितान्दृष्ट्वारामोरत्नैश्चयूथपान् ॥ ४६ ॥ अभिनंद्ययथान्यायंविससर्जहरीश्वरान् ॥ विभीषणसमानीतंपुष्पकंसूर्यवर्चसम् ॥ ४७ ॥ आरुरोहततोरामस्तद्विमानमनुत्तमम् ॥ अंकेनिधायवैदेहींलज्जमानांयशस्विनीम् ॥ ४८ ॥ लक्ष्मणेनसहभ्रात्राविक्रांतेनधनुष्मता ॥ अब्रवीच्चविमानस्थःश्रीरामःसर्ववानरान् ॥ ४९ ॥ सुग्रीवंहरिराजंचअंगदंचविभीषणम् ॥ मित्रकार्यंकृतंसर्वंभवद्भिःसहवानरैः ॥ ५० ॥

यदेतियदीत्यर्थे ॥ ४१ ॥ गमिष्यामहे अयोध्यायामितिशेषः ॥ ४२ ॥ शब्दब्रह्मप्रणवस्तत्रसमाहितःशब्दतोर्थतश्चतद्ध्यानवान् ॥ ४३ ॥ सुग्रीवोमुख्योयेषांतान्कपींद्रानितिशेषः ॥ ४४ ॥ ४५ ॥ ४६ ॥ अनुत्तमंनविद्यतेउत्तमंयस्मात्तत् ॥ ४७ ॥ लज्जमानांतामिवजनाग्रेभर्तृसमीपस्थानात्तदभिनयः विक्रांतेनपराक्रमशालिना ॥ ४८ ॥ ४९ ॥ स्वयंविमानमारुह्यभूमिष्ठान्सर्ववानरादीनाह मित्रकार्यमितिवानरैःसहभवद्भिःसर्वंकार्यंकृतमित्यन्वयः ॥ ५० ॥

॥ ५१ ॥ हेविभीषणममभक्तःसन्स्वराज्येलंकायांवसेत्यन्वयः ननुपूर्वविरोधेनदेवामांपीडयिष्यंतितत्कथमत्रावस्थितिरतआह नत्वामिति ॥ ५२ ॥ ५३ ॥
॥ ५४ ॥ वृणीमहेसंभजिष्यामइत्यर्थः रामस्तथेत्युक्त्वाहेसुग्रीवसविभीषणःसहनूमान्वानरैःसहशीघ्रमारोह ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ चतुर्मुखइवत

अनुज्ञातामयासर्वेयथेष्टंगंतुमर्हथ ॥ सुग्रीवप्रतियाह्याशुकिष्किंधांसर्वसैनिकैः ॥ ५१ ॥ स्वराज्येवसलंकायांममभ
क्तोविभीषण ॥ नत्वांधर्षयितुंशक्ताःसेंद्राअपिदिवौकसः ॥ ५२ ॥ अयोध्यांगंतुमिच्छामिराजधानींपितुर्मम ॥ एवमु
क्तास्तुरामेणवानरास्तेमहाबलाः ॥ ५३ ॥ ऊचुःप्रांजलयःसर्वेराक्षसश्चविभीषणः॥ अयोध्यांगंतुमिच्छामस्त्वयासह
रघूत्तम ॥ ५४ ॥ दृष्ट्वात्वामभिषिक्तंतुकौसल्यामभिवाद्यच ॥ पश्चाद्वृणीमहेराज्यमनुज्ञांदेहिनःप्रभो ॥ ५५ ॥ राम
स्तथेतिसुग्रीववानरैःसविभीषणः॥ पुष्पकंसहनूमांश्चशीघ्रमारोहसांप्रतम् ॥ ५६ ॥ ततस्तुपुष्पकंदिव्यंसुग्रीवःसहसेन
या॥ विभीषणश्चसामात्यःसर्वेचारुरुहुर्द्रुतम् ॥ ५७ ॥ तेष्वारूढेषुसर्वेषुकौबेरंपरमासनम् ॥ राघवेणाभ्यनुज्ञातमुत्प
पातविहायसा ॥ ५८ ॥ बभौतेनविमानेनहंसयुक्तेनभास्वता ॥ प्रहृष्टश्चतदारामश्चतुर्मुखइवापरः ॥ ५९ ॥ ततोब
भौभास्करबिंबतुल्यंकुबेरयानंतपसानुलब्धम् ॥ रामेणशोभांनितरांप्रपेदेसीतासमेतेनसहानुजेन ॥ ६० ॥ इतिश्री
मदध्यात्मरामायणेउमामहेश्वरसंवादेयुद्ध०त्रयोदशःसर्गः ॥ १३ ॥ ॥ ७१ ॥ ॥ ७१ ॥ पातयित्वाततश्चक्षुः
सर्वतोरघुनंदनः॥ अब्रवीन्मैथिलींसीतांरामःशशिनिभाननाम् ॥ १ ॥ त्रिकूटशिखराग्रस्थांपश्यलंकांमहाप्रभाम् ॥
एतांरणभुवंपश्यमांसकर्दमपंकिलाम् ॥ २ ॥

स्यहंसवाहनत्वात् ॥ ५९ ॥ ६० ॥ ॥ इतिश्रीमत्सकलराजविपदुद्धरण०युद्धकांडेत्रयोदशःसर्गः ॥ १३ ॥ ॥ पातयित्वेति ॥ १ ॥ कर्दमोत्यं
तार्द्रद्रव्यम् पंकईषदार्द्रइतिभेदः ॥ २ ॥

वैशसनंकदनम् महायुद्धमितियावत् मेमयात्वत्प्रियेण ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ रामाज्ञया ताराप्रमुखाःसर्वाअयोध्यायामायांत्वितिरामाज्ञा ॥ ८ ॥ प्रा

असुराणांप्लवंगानामत्रवैशसनंमहत् ॥ अत्रमेनिहतःशेतेरावणोराक्षसेश्वरः ॥ ३ ॥ कुंभकर्णेंद्रजिन्मुख्याःसर्वेचात्र
निपातिताः॥ एषसेतुर्मयाबद्धःसागरेसलिलाशये ॥ ४ ॥ एतच्चदृश्यतेतीर्थंसागरस्यमहात्मनः॥ सेतुबंधमितिख्यातं
त्रैलोक्येनचपूजितम् ॥ ५ ॥ एतत्पवित्रंपरमंदर्शनात्पातकापहम् ॥ अत्ररामेश्वरोदेवोमयाशंभुःप्रतिष्ठितः ॥ ६ ॥ अ
त्रमांशरणंप्राप्तोमंत्रिभिश्चविभीषणः॥ एषासुग्रीवनगरीकिष्किंधाचित्रकानना ॥ ७ ॥ तत्ररामाज्ञयाताराप्रमुखाह
रियोषितः॥ आनयामाससुग्रीवःसीतायाःप्रियकाम्यया ॥ ८ ॥ ताभिःसहोत्थितंशीघ्रंविमानंप्रेक्ष्यराघवः ॥ प्राहचा
द्रिमृष्यमूकंपश्यवाल्यत्रमेहतः ॥ ९ ॥ एषापंचवटीनामराक्षसायत्रमेहताः॥ अगस्त्यस्यसुतीक्ष्णस्यपश्याश्रमपदेशुभे
॥ १० ॥ एतेतेतापसाःसर्वेदृश्यंतेवरवर्णिनि ॥ असौशैलवरोदेविचित्रकूटःप्रकाशते ॥ ११ ॥ अत्रमांकैकयीपुत्रःप्र
सादयितुमागतः॥ भरद्वाजाश्रमंपश्यदृश्यतेयमुनातटे ॥ १२ ॥ एषाभागीरथीगंगादृश्यतेलोकपावनी ॥ एषासादृश्य
तेसीतेसरयूर्यूपमालिनी ॥ १३ ॥ एषासादृश्यतेयोध्याप्रणामंकुरुभामिनि ॥ एवंक्रमेणसंप्राप्तोभरद्वाजाश्रमंहरिः
॥ १४ ॥ पूर्णेचतुर्दशेवर्षेपंचम्यांरघुनंदनः॥ भरद्वाजंमुनिंदृष्ट्वाववंदेसानुजःप्रभुः॥ १५ ॥ पप्रच्छमुनिमासीनंविन
येनरघूत्तमः॥ शृणोषिकच्चिद्भरतःकुशल्यास्तेसहानुजः॥ १६ ॥

हसीतामितिशेषः ऋष्यमूकमद्रिंपश्यअत्रमेवालीहतस्तत्स्थानंपश्य अत्रमेइत्यादिषष्ठीछांदसी ॥ ९ ॥ आश्रमपदेआश्रमस्थाने ॥ १० ॥ ११ ॥ दृश्यतेभर
द्वाजाश्रमइतिशेषः ॥ १२ ॥ सरयूरिति अत्युच्चदेशस्थत्वाद्विमानस्ययुगपत्सर्वदर्शनम् ॥ १३ ॥ एवंवदन्नितिशेषः ॥ १४ ॥ १५ ॥कच्चिदितिप्रश्ने ॥ १६ ॥

चहीपादपूरणे प्रहृष्टधीःप्रहृष्टचित्तः ॥ १७ ॥ १८ ॥ पादुकेपादुकयोः ॥ १९ ॥ सीताहरणपूर्वकंराक्षसानांविनाशकंकर्म ॥ २० ॥ यदादिमध्यांतवर्जितंब्र
ह्मतत्त्वमेव आपोनाराइतिप्रोक्ताआपोवैनरसूनवः अयनंतस्यताःपूर्वंतेननारायणःस्मृतइतिव्युत्पत्तिंनारायणपदस्यदर्शयति त्वमिति ॥ २१ ॥ नारंजीवसमूह

सुभिक्षावर्ततेयोध्याजीवंतिचहिमातरः ॥ श्रुत्वारामस्यवचनंभरद्वाजःप्रहृष्टधीः ॥ १७ ॥ प्राहसर्वेकुशलिनोभरतस्तु
महामनाः ॥ फलमूलकृताहारोजटावल्कलधारकः ॥ १८ ॥ पादुकेसकलंन्यस्यराज्यंत्वांसुप्रतीक्षते ॥ यद्यत्कृतंत्वया
कर्मदंडकेरघुनंदन ॥ १९ ॥ राक्षसानांविनाशंचसीताहरणपूर्वकम् ॥ सर्वंज्ञातंमयारामतपसातेप्रसादतः ॥ २० ॥
त्वंब्रह्मपरमंसाक्षादादिमध्यांतवर्जितः ॥ त्वमग्रेसलिलंसृष्ट्वातत्रसुप्तोसिभूतकृत् ॥ २१ ॥ नारायणोसिविश्वात्मन्न
राणामंतरात्मकः ॥ त्वन्नाभिकमलोत्पन्नोब्रह्मालोकपितामहः ॥ २२ ॥ अतस्त्वंजगतामीशःसर्वलोकनमस्कृतः ॥ त्वं
विष्णुर्जानकीलक्ष्मीःशेषोयंलक्ष्मणाभिधः ॥ २३ ॥ आत्मनासृजसीदंत्वमात्मन्येवात्ममायया ॥ नसज्जसेनभोवत्त्वं
चिच्छक्त्यासर्वसाक्षिकः ॥ २४ ॥ बहिरंतश्चभूतानांत्वमेवरघुनंदन ॥ पूर्णोपिमूढदृष्टीनांविच्छिन्नइवलक्ष्यसे ॥ २५ ॥
जगत्त्वंजगदाधारस्त्वमेवपरिपालकः ॥ त्वमेवसर्वभूतानांभोक्ताभोज्यंजगत्पते ॥ २६ ॥ दृश्यतेश्रूयतेयद्यत्स्मर्यतेवार
घूत्तम ॥ त्वमेवसर्वमखिलंत्वद्विनान्यन्नकिंचन ॥ २७ ॥

स्तत्स्थानकत्वात्नारायणइतिव्युत्पत्त्यंतरमाह नराणामिति ॥२२॥ २३ ॥ त्वमात्मनाइदंसृजसि आत्मनिअधिष्ठानेएवंसर्वंसृष्ट्वातत्रत्वंनसज्जसेआसक्तोनभव
सिइतरजनवत् असंगेदृष्टांतः नभोवत् चिच्छक्त्यासर्वस्यसाक्षिकःस्वार्थेकः ॥ २४ ॥ तदेवोपपादयति बहिरिति विच्छिन्नइव ॥ २५ ॥ इदानींभगवतो
रामस्यसार्वात्म्यमाह जगदिति जगत्त्वम् त्वद्विवर्तत्वाज्जगतइतिभावः भोक्ताभोज्यंअत्ताअन्नमुभयमपित्वमेवेतिभावः ॥ २६ ॥ २७ ॥

ननुतत्किंस्रष्टृत्वादिकमपिमयिवास्तवंनेत्याह मायेति अहमादयोऽहंकारादयः त्वच्छक्त्यात्वद्दृष्ट्यास्रष्टृप्रेरकत्वेनत्वयिस्रष्टृत्ववद्व्यवहारइतिभावः ॥ २८ ॥ तदेवाह यथेति अयःलोहम् ॥ २९ ॥ देहद्वयंस्थूलंसूक्ष्मंच सूत्रंहिरण्यगर्भः ॥ ३० ॥ विराजएवावतारकर्तृत्वमाह विराजइति यतःसंभवस्तत्रैवलयइतिभावः

मायास्रृजतिलोकांश्चस्वगुणैरहमादिभिः ॥ त्वच्छक्तिप्रेरितारामतस्मात्त्वय्युपचर्यते ॥ २८ ॥ यथाचुंबकसान्निध्याच्चलंत्येवायआदयः ॥ जडातथात्वयादृष्टामायास्रृजतिवैजगत् ॥ २९ ॥ देहद्वयमदेहस्यतवविश्वंरिरक्षिषोः ॥ विराट्स्थूलंशरीरंतेसूत्रंसूक्ष्ममुदाहृतम् ॥ ३० ॥ विराजःसंभवंत्येतेअवताराःसहस्रशः ॥ कार्यांतेप्रविशंत्येवविराजंरघुनंदन ॥ ३१ ॥ अवतारकथांलोकेयेगायंतिगृणंतिच ॥ अनन्यमनसोमुक्तिस्तेषामेवरघूत्तम ॥ ३२ ॥ त्वंब्रह्मणापुराभूमेर्भारहारायराघव ॥ प्रार्थितस्तपसातुष्टस्त्वंजातोसिरघोःकुले ॥ ३३ ॥ देवकार्यमशेषेणकृतंतेरामदुष्करम् ॥ बहुवर्षसहस्राणिमानुषंदेहमाश्रितः ॥ ३४ ॥ कुर्वन्दुष्करकर्माणिलोकद्वयहितायच ॥ पापहारीणिभुवनंयशसापूरयिष्यसि ॥ ३५ ॥ प्रार्थयामिजगन्नाथपवित्रंकुरुमेगृहम् ॥ स्थित्वाद्यभुक्त्वासबलःश्वोगमिष्यसिपत्तनम् ॥ ३६ ॥ तथेतिराघवोऽतिष्ठत्तस्मिन्नाश्रमउत्तमे ॥ ससैन्यःपूजितस्तेनसीतयालक्ष्मणेनच ॥ ३७ ॥ ततोरामश्चिंतयित्वामुहूर्तंप्राह मारुतिम् ॥ इतोगच्छहनूमंस्त्वमयोध्यांप्रतिसत्वरः ॥ ३८ ॥ जानीहिकुशलीकच्चिज्जनोनृपतिमंदिरे ॥ शृंगवेरपुरंगत्वाब्रूहिमित्रंगुहंमम ॥ ३९ ॥

॥ ३१ ॥ गृणंतिकथयंतीत्यर्थः ॥ ३२ ॥ तपसातुष्टःब्रह्मणस्तपसातुष्टइत्यर्थः ॥ ३३ ॥ ३४ ॥ जनानांपापहारीणिअतएवतेषांलोकद्वयेइहलोकेपरलोकेचहितायान्यैर्दुष्कराणिकर्माणिकुर्वन्भुवनंचतुर्दशसंख्याकंयशसापूरयिष्यसि ॥ ३५ ॥ पत्तनमयोध्यानगरम् ॥ ३६ ॥ तथेत्युक्त्वातत्राश्रमेतिष्ठन्सीतयेत्यादेःसहितइतिशेषः ॥ ३७ ॥ ३८ ॥ नृपतिमंदिरेअयोध्यायाम् ॥ ३९ ॥

॥ ४० ॥ ४१ ॥ तत्ररणे ॥ ४२ ॥ ४३ ॥ ४४ ॥ भुजगोत्तमंजिघृक्षन्गरुडइववेगेनययौ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ संप्रहृष्टतनूरुहंगुहमितिशेषः

जानकीलक्ष्मणोपेतमागतंमांनिवेदय ॥ नंदिग्रामंततोगत्वाभ्रातरंभरतंमम ॥ ४० ॥ दृष्ट्वाब्रूहिसभार्यस्यसभ्रातुः
कुशलंमम॥सीतापहरणादीनिरावणस्यवधादिकम् ॥ ४१ ॥ ब्रूहिक्रमेणमेभ्रातुःसर्वंतत्रविचेष्टितम् ॥ हत्वाशत्रुग
णान्सर्वान्सभार्यःसहलक्ष्मणः॥ ४२ ॥उपयातिसमृद्धार्थःसहऋक्षहरीश्वरैः॥ इत्युक्त्वातत्रवृत्तांतंभरतस्यविचेष्टितम्
॥ ४३ ॥ सर्वंज्ञात्वापुनःशीघ्रमागच्छममसन्निधिम् ॥ तथेतिहनुमांस्तत्रमानुषंवपुरास्थितः ॥ ४४ ॥ नंदिग्रामंय
यौतूर्णंवायुवेगेनमारुतिः ॥ गरुत्मानिववेगेनजिघृक्षन्भुजगोत्तमम् ॥ ४५ ॥ शृंगवेरपुरंप्राप्यगुहमासाद्यमारुतिः॥
उवाचमधुरंवाक्यंप्रहृष्टेनांतरात्मना ॥ ४६ ॥ रामोदाशरथिःश्रीमान्सखातेसहसीतया ॥ सलक्ष्मणस्त्वांधर्मात्माक्षे
मीकुशलमब्रवीत् ॥ ४७॥ अनुज्ञातोद्यमुनिनाभरद्वाजेनराघवः॥ आगमिष्यतितंदेवंद्रक्ष्यसित्वंरघूत्तमम् ॥ ४८ ॥ए
वमुक्त्वामहातेजाःसंप्रहृष्टतनूरुहम् ॥ उत्पपातमहावेगोवायुवेगेनमारुतिः ॥ ४९ ॥ सोपश्यद्रामतीर्थंचसरयूंचमहा
नदीम्॥ तामतिक्रम्यहनुमान्नंदिग्रामंययौमुदा ॥ ५० ॥ क्रोशमात्रेत्वयोध्यायाश्चीरकृष्णाजिनांबरम् ॥ददर्शभरतं
दीनंकृशमाश्रमवासिनम् ॥ ५१ ॥ मलपंकविदिग्धांगंजटिलंवल्कलांबरम् ॥ फलमूलकृताहारंरामचिंतापरायणम्
॥ ५२ ॥पादुकेतेपुरस्कृत्यशासयंतंवसुंधराम् ॥ मंत्रिभिःपौरमुख्यैश्चकाषायांबरधारिभिः ॥ ५३ ॥ वृतदेहंमूर्तिमंतं
साक्षाद्धर्ममिवस्थितम् ॥ उवाचप्रांजलिर्वाक्यंहनूमान्मारुतात्मजः ॥ ५४ ॥

॥ ४९ ॥ ५० ॥ ५१ ॥ विदिग्धांगंलिप्तांगम् ॥ ५२ ॥ तेचित्रकूटेभगवतारामेणदत्ते काषायांबरधारिभिःप्रभुसमानशीलत्वस्यान्येषामौचित्येनमंत्र्यादीनां
तत्त्वम् ॥ ५३ ॥ तादृशैर्मंत्रिभिःवृतःपरिवृतोदेहोयस्यतम् ॥ ५४ ॥

यंरामंत्वंचिंतयसेऽनुशोचसिचसकाकुत्स्थस्त्वांकुशलमब्रवीत् ॥ ५५ ॥ रामेणसहसंगतोभविष्यसीतिशेषः ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ सौम्यसोमवत्प्रि
यदर्शन प्रियंब्रुवतस्तेप्रियाख्यानस्यप्रतिप्रियंददामीतिशेषः ॥ ६० ॥ मुग्धाःसुंदर्यः ॥ ६१ ॥ ६२ ॥ कल्याणीसत्येत्यर्थः ॥ ६३ ॥ ६४ ॥ तत्त्वमाख्या

यंत्वंचिंतयसेरामंतापसंदंडकेस्थितम् ॥ अनुशोचसिकाकुत्स्थःसत्वांकुशलमब्रवीत् ॥ ५५ ॥ प्रियमाख्यामितेदेव
शोकंत्यजसुदारुणम् ॥ अस्मिन्मुहूर्तेभ्रात्रात्वंरामेणसहसंगतः ॥ ५६ ॥ समरेरावणंहत्वारामःसीतामवाप्यच ॥ उप
यातिसमृद्धार्थःससीतःसहलक्ष्मणः ॥५७॥ एवमुक्तोमहातेजाभरतोहर्षमूर्च्छितः ॥ पपातभुविचास्वस्थःकैकेयीप्रिय
नंदनः ॥ ५८ ॥ आलिंग्यभरतःशीघ्रंमारुतिंप्रियवादिनम् ॥ आनंदजैरश्रुजलैःसिषेचभरतःकपिम् ॥ ५९ ॥ देवोवा
मानुषोवात्वमनुक्रोशादिहागतः ॥ प्रियाख्यानस्यतेसौम्यददामिब्रुवतःप्रियम् ॥ ६० ॥ गवांशतसहस्रंचग्रामाणांच
शतंवरम् ॥ सर्वाभरणसंपन्नामुग्धाःकन्यास्तुषोडश ॥ ६१ ॥ एवमुक्त्वापुनःप्राहभरतोमारुतात्मजम् ॥ बहूनीमानिव
र्षाणिगतस्यसुमहद्वनम् ॥ ६२ ॥ शृणोम्यहंप्रीतिकरंममनाथस्यकीर्तनम् ॥ कल्याणीबतगाथेयंलौकिकीप्रतिभाति
मे ॥ ६३ ॥ एतिजीवंतमानंदोनरंवर्षशतादपि ॥ राघवस्यहरीणांचकथमासीत्समागमः ॥ ६४ ॥ तत्त्वमाख्याहिभ
द्रंतेविश्वसेयंवचस्तव ॥ एवमुक्तोथहनुमान्भरतेनमहात्मना ॥ ६५ ॥ आचचक्षेथरामस्यचरितंकृत्स्नशःक्रमात् ॥
श्रुत्वातुपरमानंदंभरतोमारुतात्मजात् ॥ ६६ ॥ आज्ञापयच्छत्रुहणंमुदायुक्तंमुदान्वितः ॥ दैवतानिचयावंतिनगरेर
घुनंदन ॥ ६७ ॥

हियेनतेवचोविश्वसेयम् ॥ ६५ ॥ परमानंदंप्रापेतिशेषः ॥ ६६ ॥ शत्रुहणंशत्रुघ्नंरामकुशलश्रवणेनमुदायुक्तंतेनैवचस्वयंमुदान्वितः किमाज्ञापयत्तदाह
दैवतानिचेति ॥ ६७ ॥

उपहाराःगंधधूपनैवेद्याद्याः ॥ ६८ ॥ वारमुख्यावेश्याः हस्त्यश्वपत्तिरूपाःसेनाइत्यर्थः ॥ ६९ ॥ शशिनिभाननंशशिसदृशमुखमित्यर्थः ॥ ७० ॥ मुक्तार
त्नमयोज्वलैरितितोरणविशेषणम् ॥ ७१ ॥ अलंकुर्वंतिशत्रुघ्नप्रेरिताजनाइतिशेषः ॥ ७२ ॥ वृंदशःसंघशः ॥ ७३ ॥ पारमेष्ठीनि ईश्वरार्हाणि ॥ ७४ ॥

नानोपहारबलिभिःपूजयंतुमहाधियः ॥ सूतावैतालिकाश्चैवबंदिनःस्तुतिपाठकाः ॥ ६८ ॥ वारमुख्याश्चशतशोनिर्यां
त्वद्यैवसंघशः ॥ राजदारास्तथामात्याःसेनाहस्त्यश्वपत्तयः ॥ ६९ ॥ ब्राह्मणाश्चतथापौराराजानोयेसमागताः ॥ नि
र्यांतुराघवस्याद्यद्रष्टुंशशिनिभाननम् ॥ ७० ॥ भरतस्यवचःश्रुत्वाशत्रुघ्नपरिचोदिताः ॥ अलंचक्रुश्चनगरींमुक्तारत्न
मयोज्ज्वलैः ॥ ७१ ॥ तोरणैश्चपताकाभिर्विचित्राभिरनेकधा ॥ अलंकुर्वंतिवेश्मानिनानाबलिविचक्षणाः ॥ ७२ ॥
निर्यांतिवृंदशःसर्वेरामदर्शनलालसाः ॥ हयानांशतसाहस्रंगजानामयुतंतथा ॥ ७३ ॥ रथानांदशसाहस्रंस्वर्णसूत्रवि
भूषितम् ॥ पारमेष्ठीन्युपादायद्रव्याण्युच्चावचानिच ॥ ७४ ॥ ततस्तुशिबिकारूढानिर्ययूराजयोषितः ॥ भरतःपादुके
न्यस्यशिरस्येवकृतांजलिः ॥ ७५ ॥ शत्रुघ्नसहितोरामंपादचारेणनिर्ययौ ॥ तदैवदृश्यतेदूराद्विमानंचंद्रसन्निभम् ॥ ७६ ॥
पुष्पकंसूर्यसंकाशंमनसाब्रह्मनिर्मितम् ॥ एतस्मिन्भ्रातरौवीरौवैदेह्यारामलक्ष्मणौ ॥ ७७ ॥ सुग्रीवश्चकपिश्रेष्ठोमं
त्रिभिश्चविभीषणः ॥ दृश्यतेपश्यतजनाइत्याहपवनात्मजः ॥ ७८ ॥ ततोहर्षसमुद्भूतोनिःस्वनोदिवमस्पृशत् ॥ स्त्रीबाल
युववृद्धानांरामोयमितिकीर्तनात् ॥ ७९ ॥ रथकुंजरवाजिस्थाअवतीर्यमहींगताः ॥ ददृशुस्तेविमानस्थंजनाःसोम
मिवांबरे ॥ ८० ॥

॥ ७५ ॥ राममवलोकयितुमितिशेषः तदैवतस्मिन्नेवकालेभरतयात्राकालेइत्याह पवनात्मजइत्यनेनान्वयः यदुक्तंवाचातदाह दृश्यतेइत्यादि ॥ ७६ ॥
॥ ७७ ॥ ७८ ॥ अयंरामोयंरामइतिनिःस्वनोदिवमस्पृशत् ॥ ७९ ॥ अंबरेसोममिवरामंददृशुः ॥ ८० ॥

अत्यानंदवतोभरतस्यवर्णनेकवेरपितन्मयभावेनानंदमग्नतयाभरतपदपौनरुक्त्यंनदोषाय ॥ ८१ ॥ अत्यूर्ध्वदेशस्थविमानस्यगत्यारामस्यमेरुस्थभास्करोपमा ॥ ८२ ॥ ८३ ॥ ८४ ॥ ततोलक्ष्मणमासाद्याभ्यवादयतेत्यन्वयः अनयोःशास्त्रोक्तविधिनानामगोत्रोच्चारणपूर्वकमभिवादनंवैदेह्यास्तुस्त्रीत्वात्स्वनाममात्रकीर्तनपूर्वकमभिवादनमित्याह नामकीर्तयन्निति भरतोहमभिवादयेमैथिलीति रामस्यतुभरतवर्माअमुकगोत्रोहंत्वामभिवादयेइत्येवमितिशेषः यद्यपिलक्ष्म

प्रांजलिर्भरतोभूत्वाप्रहृष्टोराघवोन्मुखः ॥ ततोविमानाग्रगतंभरतोराघवंमुदा ॥ ८१ ॥ ववंदेप्रणतोरामंमेरुस्थमिवभास्करम् ॥ ततोरामाभ्यनुज्ञातंविमानमपतद्भुवि ॥ ८२ ॥ आरोपितोविमानंतद्भरतःसानुजस्तदा ॥ राममासाद्यमुदितःपुनरेवाभ्यवादयत् ॥ ८३ ॥ समुत्थाप्यचिराद्दृष्टंभरतंरघुनंदनः ॥ भ्रातरंस्वांकमारोप्यमुदातंपरिषस्वजे ॥ ८४ ॥ ततोलक्ष्मणमासाद्यवैदेहींनामकीर्तयन् ॥ अभ्यवादयतप्रीतोभरतःप्रेमविह्वलः ॥ ८५ ॥ सुग्रीवंजांबवंतंचयुवराजंतथांगदम् ॥ मैंदद्विविदनीलांश्चऋषभंचैवसस्वजे ॥८६॥ सुषेणंचनलंचैवगवाक्षंगंधमादनम् ॥ शरभंपनसंचैवभरतःपरिषस्वजे ॥ ८७ ॥ सर्वेतेमानुषंरूपंकृत्वाभरतमादृताः ॥ पप्रच्छुःकुशलंसौम्याःप्रहृष्टाश्चप्लवंगमाः ॥ ८८ ॥ ततःसुग्रीवमालिंग्यभरतःप्राहभक्तितः ॥ त्वत्सहायेनरामस्यजयोभूद्रावणाहतः ॥ ८९ ॥ त्वमस्माकंचतुर्णांतुभ्रातासुग्रीवपंचमः ॥ शत्रुघ्नश्चतदाराममभिवाद्यसलक्ष्मणम् ॥ ९० ॥

णोभरतात्कनिष्ठोवयसा स्पष्टंचेदंजन्मप्रकरणे तथापिज्येष्ठानुवर्तनेनस्वापेक्षयाधिकगुणत्वेनस्वव्यवहारेणज्येष्ठानुवृत्तिरेवंकर्तव्येतिभरतंप्रत्युपदेशदानेनचगुरुत्वबुद्ध्यातस्यनतिरुचितैव किंच कौसल्यायैप्रथमंदत्तपायसांशत्वाल्लक्ष्मणस्यज्येष्ठत्वंततोहिकैकेय्यैपायसार्धदानंतदंशजश्चशत्रुघ्नइतिसएवभरतात्कनिष्ठः अतएववैदेहींचेतिचकारस्वरसःसंगच्छते अतएवचशत्रुघ्नकृतोलक्ष्मणनमस्कारउपपद्यतेतयोर्युगपदुत्पन्नत्वादित्याहुः ॥ ८५ ॥ सस्वजेमित्रवात् ॥ ८६ ॥ ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥

॥ ९१ ॥ प्रसादयन् प्रसन्नंकुर्वन् ॥ ९२ ॥ ९३ ॥ निर्यातितंप्रतिदत्तम् ॥ ९४ ॥ कोष्ठागारंअन्नादिस्थापनगृहं कोशंधनगृहम् ॥ ९५ ॥ त्वत्तेजसेतिपू
र्वान्वयि ॥ ९६॥ नेत्रजंतोयंमुमुचुः एवंसौभ्रात्रंकिलानयोरितिहर्षात् स्वस्यतद्वैपरीत्येनशोकाच्च स्वांकगंकृत्वेतिशेषः ॥ ९७ ॥ ९८ ॥ धनपालकंकुबेरमनुग

सीतायाश्चरणौपश्चाद्ववंदेविनयान्वितः ॥ रामोमातरमासाद्यविवर्णांशोकविह्वलाम् ॥ ९१ ॥ जग्राहप्रणतःपादौम
नोमातुःप्रसादयन् ॥ कैकेयींचसुमित्रांचननामेतरमातरः ॥ ९२ ॥ भरतःपादुकेतेतुराघवस्यसुपूजिते ॥ योजयामा
सरामस्यपादयोर्भक्तिसंयुतः ॥ ९३ ॥ राज्यमेतन्न्यासभूतंमयानिर्यातितंतव ॥ अद्यमेसफलंजन्मफलितोमेमनो
रथः ॥ ९४ ॥ यत्पश्यामिसमायातमयोध्यांत्वामहंप्रभो ॥ कोष्ठागारंबलंकोशंकृतंदशगुणंमया ॥ ९५ ॥ त्वत्तेजसा
जगन्नाथपालयस्वपुरंस्वकम् ॥ इतिब्रुवाणंभरतंदृष्ट्वासर्वेकपीश्वराः ॥ ९६ ॥ मुमुचुर्नेत्रजंतोयंप्रशशंसुर्मुदान्विताः ॥
ततोरामःप्रहृष्टात्माभरतंस्वांकगंमुदा ॥ ९७ ॥ ययौतेनविमानेनभरतस्याश्रमंतदा ॥ अवरुह्यतदारामोविमानाग्र्या
न्महीतलम् ॥ ९८ ॥ अब्रवीत्पुष्पकंदेवोगच्छवैश्रवणंवह ॥ अनुगच्छानुजानामिकुबेरंधनपालकम् ॥ ९९ ॥ रामो
वसिष्ठस्यगुरोःपदांबुजंनत्वायथादेवगुरोःशतक्रतुः ॥ दत्त्वामहार्हासनमुत्तमंगुरोरुपाविवेशाथगुरोःसमीपतः ॥ १००॥
इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेयुद्धकांडेचतुर्दशःसर्गः ॥ १४ ॥ ॥ ७ ॥ ॥ ततस्तुकैकयीपु
त्रोभरतोभक्तिसंयुतः ॥ शिरस्यंजलिमाधायज्येष्ठंभ्रातरमब्रवीत् ॥ १ ॥ मातामेसत्कृतारामदत्तंराज्यंत्वयामम ॥ ददा
मितत्तेचपुनर्यथात्वमददामम ॥ २ ॥

च्छेत्येतदनुजानामीत्यर्थः ॥ ९९ ॥ १०० ॥ ॥ इतिश्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादि० युद्धकांडेचतुर्दशःसर्गः ॥ १४ ॥ ततस्त्विति ॥ १ ॥ सत्कृ
तामत्पुत्रायराज्यदानपूर्वकंवनवासंकुर्वितितद्वाक्यपालनेनसत्कृता ॥ २ ॥

इत्युक्त्वारामपादयोर्भक्त्याप्रणम्यमातृत्वाद्गुरुणाकैकेय्यासहप्रार्थयामास मद्वाक्यपालनेनाहंसंतुष्टा अतःपरंस्वेच्छयापुनस्तद्ददामितत्सर्वथागृहाणेतिप्रार्थयामास ॥ ३ ॥ मायामाश्रित्येति अन्यथासच्चिदानंदरूपस्यभगवतोदानप्रतिग्रहयोरनुपपत्तेरितिभावः सकलंराज्यंप्रतिजग्राहेत्यन्वयः ॥ ४ ॥ मायाश्रयणेहेतुमाह स्वाराज्येति स्वाराज्यमात्मनःसुखरूपतानिरस्तातिशयइतराभिभावकतारूपोयस्मात्तादृशानंदरूपस्यआनंदावल्यांमनुष्यानंदादुत्तरोत्तरशतगुणानंदक्रमेणानंदकथनस्यब्रह्मानंदेसमाप्तेस्तदभिभावकत्वरूपातिशयस्यक्वाप्यभावादितिभावः ॥ ५ ॥ जगदीशितृत्वमेवदर्शयति यस्येति ॥ ६ ॥ लीलयासृष्टामहासृष्टिरनेककोटिब्रह्मांडात्मिकायेनतस्य एतत् अयोध्याराज्यम् ॥ ७ ॥ भजतांभक्तानांकामपूरस्यअभिलाषसमूहस्यविधित्सयापूरणेच्छयालीलयागृहीतमानुषदेहेनसर्वमपिमानुषव्यवहारंअनुवर्ततेलोकशिक्षणायकरोति ॥ ८ ॥ श्मश्रुकृंतकोनापितः संभाराःसमुद्रजलादिरूपाः ॥ ९ ॥ स्नातेकेशसंस्कारोद्वर्तनादिपूर्वकंकृतस्नाने ॥ १० ॥ विशोधितजटःकेशरूपतांप्रापितजटः महार्हवसनोपेतःधृतबहुमूल्यवस्त्रः ॥ ११ ॥ प्रतिकर्मउद्वर्तनादिसंस्कारः राजयोषितःदशरथस्त्रियः ॥ १२ ॥

इत्युक्त्वापादयोर्भक्त्यासाष्टांगंप्रणिपत्यच ॥ बहुधाप्रार्थयामासकैकेय्यागुरुणासह ॥ ३ ॥ तथेतिप्रतिजग्राहभरताद्राज्यमीश्वरः ॥ मायामाश्रित्यसकलांनरचेष्टामुपागतः ॥४॥ स्वाराज्यानुभवोयस्यसुखज्ञानैकरूपिणः ॥ निरस्तातिशयानंदरूपिणःपरमात्मनः ॥५॥ मानुषेणतुराज्येनकिंतस्यजगदीशितुः ॥ यस्यभ्रूभंगमात्रेणत्रिलोकीनश्यतिक्षणात् ॥ ६ ॥ यस्यानुग्रहमात्रेणभवंत्याखंडलश्रियः ॥ लीलासृष्टमहासृष्टेःकियदेतद्रमापतेः ॥७॥ तथापिभजतांनित्यंकामपूरविधित्सया ॥ लीलामानुषदेहेनसर्वमप्यनुवर्तते ॥ ८ ॥ ततःशत्रुघ्नवचनान्निपुणःश्मश्रुकृंतकः ॥ संभाराश्चाभिषेकार्थमानीताराघवस्यहि ॥ ९ ॥ पूर्वंतुभरतेस्नातेलक्ष्मणेचमहात्मनि ॥ सुग्रीवेवानरेंद्रेचराक्षसेंद्रेविभीषणे ॥१०॥ विशोधितजटःस्नातश्चित्रमाल्यानुलेपनः ॥ महार्हवसनोपेतस्तस्थौतत्रश्रियाज्वलन् ॥ ११ ॥ प्रतिकर्मचरामस्यलक्ष्मणश्चमहामतिः ॥ कारयामासभरतःसीतायाराजयोषितः ॥ १२ ॥

सुमध्यमांजानकीम् ॥ १३ ॥ अकारयतप्रतिकर्मैतिशेषः ॥ १४ ॥ सूर्यसंकाशंस्यंदनमित्यन्वयः ॥ १५ ॥ १६ ॥ अन्वीयुःअनुजग्मुः पुरमयोध्यापुरम्
॥ १७ ॥ १८ ॥ रत्नदंडमितिश्वेतातपत्रव्यजनचामराणांविशेषणम् ॥ १९ ॥ अरिंदमःसुग्रीवः असुरनायकोविभीषणः ॥ २० ॥ स्तूयमानस्यरामस्यस्तु

महार्हवस्त्राभरणैरलंचक्रुःसुमध्यमाम् ॥ ततोवानरपत्नीनांसर्वासामेवशोभना ॥ १३ ॥ अकारयतकौसल्याप्रहृष्टा
पुत्रवत्सला ॥ ततःस्यंदनमादायशत्रुघ्नवचनात्सुधीः ॥ १४ ॥ सुमंत्रःसूर्यसंकाशंयोजयित्वाग्रतःस्थितः॥ आरुरोह
रथंरामःसत्यधर्मपरायणः ॥ १५ ॥ सुग्रीवोयुवराजश्चहनुमांश्चविभीषणः ॥ स्नात्वादिव्यांबरधरादिव्याभरणभूषि
ताः ॥ १६ ॥ राममन्वीयुरग्रेचरथाश्वगजवाहनाः ॥ सुग्रीवपत्न्यःसीताचययुर्यानैःपुरंमहत् ॥ १७ ॥ वज्रपाणिर्य
थादेवैर्हरिताश्वरथेस्थितः ॥ प्रययौरथमास्थायतथारामोमहत्पुरम् ॥ १८ ॥ सारथ्यंभरतश्चक्रेरत्नदंडंमहाद्युतिः ॥
श्वेतातपत्रंशत्रुघ्नोलक्ष्मणोव्यजनंदधे ॥ १९ ॥ चामरंचसमीपस्थोन्यवीजयदरिंदमः ॥ शशिप्रकाशंत्वपरंजग्राहा
सुरनायकः॥ २० ॥ दिविजैःसिद्धसंघैश्चऋषिभिर्दिव्यदर्शनैः ॥ स्तूयमानस्यरामस्यशुश्रुवेमधुरध्वनिः ॥ २१ ॥ मा
नुषंरूपमास्थायवानरागजवाहनाः ॥ भेरीशंखनिनादैश्चमृदंगपणवानकैः ॥ २२ ॥ प्रययौराघवश्रेष्ठस्तांपुरींसमलं
कृताम् ॥ ददृशुस्तेसमायांतंराघवंपुरवासिनः ॥ २३ ॥ दूर्वादलश्यामतनुंमहार्हकिरीटरत्नाभरणाचितांगम् ॥ आर
क्तकंजायतलोचनांतंदृष्ट्वाययुर्मोदमतीवपुण्याः ॥ २४ ॥

तिवाक्यानामितिशेषः ॥ २१ ॥ वानराइत्यस्यप्रययुरितिशेषः ॥ २२ ॥ तेपुरवासिनः येवनगमनकालेदुःखिताबभूवुस्तेइत्यर्थः ॥ २३ ॥ आचितांगंव्याप्तां
गम् कंजंकमलम् पुण्याःपुण्यवंतः अर्शआद्यजंतः आययुःप्रापुः ॥ २४ ॥

विचित्ररत्नैरंचितंयुक्तंयत्सूत्रंस्वर्णमयंकटिसूत्रंतेनबद्धःपीतांबरोयस्यतं अमूल्यमुक्ताफलकृतैःदिव्यहारैः ॥ २५ ॥ हरिभिर्वानरैःरवितुल्यभासंतत्तुल्यकां
तिं निवीताकंठकक्षमध्यधृताकल्पद्रुमपुष्पमालायेनतम् ॥ २६ ॥ प्रहर्षवेगेनोत्कलिताअतिप्रवृद्धाआननश्रीर्यासांताः आहितमत्यावश्यकमपिगृहकार्यम

विचित्ररत्नांचितसूत्रनद्धपीतांबरंपीनभुजांतरालम् ॥ अनर्घ्यमुक्ताफलदिव्यहारैर्विरोचमानंरघुनंदनंप्रजाः ॥ २५ ॥
सुग्रीवमुख्यैर्हरिभिःप्रशांतैर्निषेव्यमाणंरवितुल्यभासम् ॥ कस्तूरिकाचंदनलिप्तगात्रंनिवीतकल्पद्रुमपुष्पमालम् ॥
॥ २६ ॥ श्रुत्वास्त्रियोराममुपागतंमुदाप्रहर्षवेगोत्कलिताननश्रियः ॥ अपास्यसर्वंगृहकार्यमाहितंहर्म्याणिचैवारुरुहुः
स्वलंकृताः ॥ २७ ॥ दृष्ट्वाहरिंसर्वदृगुत्सवाकृतिंपुष्पैःकिरंत्यःस्मितशोभिताननाः ॥ दृग्भिःपुनर्नेत्रमनोरसायनंस्वानंद
मूर्तिंमनसाभिरेभिरे ॥ २८ ॥ रामःस्मितस्निग्धदृशाप्रजास्तथापश्यन्प्रजानाथइवापरःप्रभुः ॥ शनैर्जगामाथपितुःस्व
लंकृतंगृहंमहेंद्रालयसन्निभंहरिः ॥ २९ ॥ प्रविश्यवेश्मांतरसंस्थितोमुदारामोववंदेचरणौस्वमातुः ॥ क्रमेणसर्वाःपि
तृयोषितःप्रभुर्ननामभक्त्यारघुवंशकेतुः ॥ ३० ॥ ततोभरतमाहेदंरामःसत्यपराक्रमः ॥ सर्वसंपत्समायुक्तंममसंदिर
मुत्तमम् ॥ ३१ ॥ मित्रायवानरेंद्रायसुग्रीवायप्रदीयताम् ॥ सर्वेभ्यःसुखवासार्थंमंदिराणिप्रकल्पय ॥ ३२ ॥

पास्येत्यर्थः ॥ २७ ॥ सर्वदृशामुत्सवभूताआकृतिर्यस्यतंनेत्रमनसोःरसायनभूतमत्यानंदकरत्वात्तादृशंरामंदृग्भिर्दर्शनव्यापारैर्मनसाचाभिरेभिरे आलिंगित
वत्यः ॥ २८ ॥ स्मितयुतयाअतएवस्निग्धयादृशाप्रजाःपश्यन्दर्शनेनसर्वसंमाननंकुर्वन्प्रजानाथइवब्रह्मेव ॥ २९ ॥ स्वमातुश्चरणौववंदे अनेनाग्रेसर्वमातृप्रवे
शानंतरंसर्वप्रजासंमाननविलंबेनपश्चाद्भगवत्प्रवेशइतिसूचितम् ॥ ३० ॥ ३१ ॥ सर्वेभ्यःअन्येभ्योवानरविभीषणादिभ्यः ॥ ३२ ॥

॥ ३३ ॥ ३४ ॥ ३५ ॥ शातकुंभंजंबुस्वर्णम् ॥ ३६ ॥ ३७॥ ३८ ॥ ३९ ॥४० ॥ सर्वौषधीरसैरभ्यषिंचन्नित्यन्वयः नभःस्थितैर्दैवतैःसहस्तुवद्भिःसगणैश्च

रामेणैवसमादिष्टोभरतश्चतथाकरोत् ॥ उवाचचमहातेजाःसुग्रीवंराघवानुजः ॥ ३३ ॥ राघवस्याभिषेकार्थंचतुःसिं
धुजलंशुभम् ॥ आनेतुंप्रेषयस्वाशुदूतांस्त्वरितविक्रमान् ॥ ३४ ॥ प्रेषयामाससुग्रीवोजांबवंतंमरुत्सुतम् ॥ अंगदंच
सुषेणंचतेगत्वावायुवेगतः ॥ ३५ ॥ जलपूर्णान्शातकुंभकलशांश्चसमानयन् ॥ आनीतंतीर्थसलिलंशत्रुघ्नोमंत्रिभिः
सह ॥ ३६ ॥ राघवस्याभिषेकार्थंवसिष्ठायन्यवेदयत् ॥ ततस्तुप्रयतोवृद्धोवसिष्ठोब्राह्मणैःसह ॥ ३७ ॥ रामंरत्नमये
पीठेससीतंसंन्यवेशयत् ॥ वसिष्ठोवामदेवश्चजाबालिगौतमस्तथा ॥ ३८ ॥ वाल्मीकिश्चतथाचक्रुःसर्वेरामाभिषेच
नम् ॥ कुशाग्रतुलसीयुक्तपुण्यगंधजलैर्मुदा ॥ ३९ ॥ अभ्यषिंचन्रघुश्रेष्ठंवासवंवसवोयथा ॥ ऋत्विग्भिर्ब्राह्मणैःश्रे
ष्ठैःकन्याभिःसहमंत्रिभिः ॥ ४० ॥ सर्वौषधीरसैश्चैवदैवतैर्नभसिस्थितैः ॥ चतुर्भिर्लोकपालैश्चस्तुवद्भिःसगणैस्तथा ॥
॥ ४१ ॥ छत्रंचतस्यजग्राहशत्रुघ्नःपांडुरंशुभम् ॥ सुग्रीवराक्षसेंद्रौतौदधतुःश्वेतचामरे ॥ ४२ ॥ मालांचकांचनींवा
युर्ददौवासवचोदितः ॥ सर्वरत्नसमायुक्तंमणिकांचनभूषितम् ॥ ४३ ॥ ददौहारंनरेंद्रायस्वयंशक्रस्तुभक्तितः ॥ प्रजगुर्दे
वगंधर्वाननृतुश्चाप्सरोगणाः ॥ ४४ ॥ देवदुंदुभयोनेदुःपुष्पवृष्टिःपपातखात् ॥ नवदूर्वादलश्यामंपद्मपत्रायतेक्षणम्
॥ ४५ ॥ रविकोटिप्रभायुक्तकिरीटेनविराजितम् ॥ कोटिकंदर्पलावण्यंपीतांबरसमावृतम् ॥ ४६ ॥ दिव्याभरण
संपन्नंदिव्यचंदनलेपनम् ॥ अयुतादित्यसंकाशंद्विभुजंरघुनंदनम् ॥ ४७ ॥ वामभागेसमासीनांसीतांकांचनसन्निभा
म् ॥ सर्वाभरणसंपन्नांवामांकेसमुपस्थिताम् ॥ ४८ ॥

तुर्भिर्लोकपालैश्चसहवसिष्ठादयोभ्यषिंचन्नित्यन्वयः ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ खात्आकाशात् ॥ ४५ ॥ ४६ ॥ ४७ ॥ वामांकेवामभागेस्थिताम् ॥ ४८ ॥

ईदृशींसीतांवामेनकरेणालिंग्यसंस्थितंदृष्ट्वाशिवःस्तोतुमुपचक्रमेइत्यन्वयः ॥ ४९ ॥ ५० ॥ सशक्तिकायमायाशक्त्यवतारसीतासहिताय ॥ ५१ ॥ आद्यं
तौउत्पत्तिनाशौतद्राहित्यादेवमध्यहीनः यतोमाययासृजसिअतएवतेननलिप्यसेतन्नाशादिकृतदोषभाङ्नभवसीत्यर्थः नह्यैंद्रजालिकःस्वमायानिर्मितजीवादि
नाशेपितद्वधभाग्भवति ॥ ५२ ॥ गुणसंवृतःगुणसमूहयामाययासंवृतः गुणशब्दोत्रतत्समूहमायापरः प्रपन्नाःशरणागतायेभक्तास्तेषांयदनुविधानंमोक्षस्त
न्निमित्तमित्यर्थः त्वदवतारलीलाश्रवणादिभिस्तेषांपापक्षयद्वारामोक्षोभवतीत्याशयः सुरमानुषादिरूपैर्नानावतारैर्लीलांविधत्सेइत्यन्वयः सुरावताराउपेंद्राद्याः

रक्तोत्पलकरांभोजांवामेनालिंग्यसंस्थितम्॥ सर्वातिशयशोभाढ्यंदृष्ट्वाभक्तिसमन्वितः ॥ ४९ ॥ उमयासहितोदेवः
शंकरोरघुनंदनम्॥सर्वदेवगणैर्युक्तःस्तोतुंसमुपचक्रमे ॥ ५० ॥ श्रीमहादेवउवाच ॥ नमोस्तुरामायसशक्तिकायनी
लोत्पलश्यामलकोमलाय ॥ किरीटहारांगदभूषणायसिंहासनस्थायमहाप्रभाय ॥ ५१ ॥ त्वमादिमध्यांतविहीनएकः
सृजस्यवस्यात्सिचलोकजातम् ॥ स्वमाययातेननलिप्यसेत्वंयत्स्वेसुखेजस्ररतोनवद्यः ॥ ५२ ॥ लीलांविधत्सेगुणसं
वृतस्त्वंप्रपन्नभक्तानुविधानहेतोः ॥ नानावतारैःसुरमानुषाद्यैःप्रतीयसेज्ञानिभिरेवनित्यम् ॥ ५३ ॥ स्वांशेनलोकंस
कलंविधायतंबिभर्षिचत्वंतदधःफणीश्वरः ॥ उपर्यधोभान्वनिलोडुपौषधीप्रवर्षरूपोवसिनैकधाजगत् ॥ ५४ ॥ त्वमि
हदेहभृतांशिखिरूपःपचसिभुक्तमशेषमजस्रम् ॥ पवनपंचकरूपसहायोजगदखंडमनेनबिभर्षि ॥ ५५ ॥

मानुषारामकृष्णाद्याः एवंभूतस्त्वंज्ञानिभिरेवनित्यंप्रतीयसेनत्वन्यैस्तेतुमनुष्योयंकश्चिदित्येवंप्रतियंति ॥ ५३ ॥ सकलंलोकंस्वांशेनविधायतंलोकंतदधःफणी
श्वरोभूत्वात्वंबिभर्षि भानुःसूर्यः अनिलोवायुः उडुपश्चंद्रः ओषध्योव्रीह्याद्याः प्रवर्षोमेघः नैकधाअनेकप्रकारेण ॥ ५४ ॥ प्रकारांतरेणापिरक्षकत्वमाह
त्वमिति शिखिरूपोजाठराग्निरूपः पवनपंचकंप्राणापानसमानोदानव्यानाः तदुक्तंगीतायां अहंवैश्वानरोभूत्वाप्राणिनांदेहमाश्रितः प्राणापानसमायुक्तःपचा
म्यन्नंचतुर्विधमिति ॥ ५५ ॥

हेईशचंद्रादिगतंयत्तेजोयच्चाशेषशरीरिणांचिच्चैतन्यंयच्चतनुभृतांशौर्यंधैर्यमायुश्चतदखिलंतवसत्त्वंत्वद्रूपासत्तैवप्राभवत् तत्तद्रूपेणप्रादुर्भूतेत्यर्थः ॥ ५६ ॥
विरिंचिर्ब्रह्मा विभागोभेदः हेईशवादिनांतत्तद्भक्तत्वेनतत्रतत्रेश्वरत्वाभिमानवतांतत्तद्रूपेणपरस्परस्माद्भिन्नइवभासि तत्त्वमाह अनन्यद्भेदशून्यमतएवैकमीदृ
शंब्रह्मैवत्वंत्वमेवचब्रह्मादयः अतोनैषांभेदइतिभावः ॥ ५७ ॥ प्रकारांतरेणापिसर्वस्यब्रह्मरूपतांस्थापयति मत्स्यादीति एकस्यैवयथादशरूपत्वंतथैकस्यैव
सदसद्विभागरूपतासद्ब्रह्मविश्वादिकमसत्तदितरत्सर्वं सएकस्त्वमेव यतोभवतोन्यन्नविभातिबहुशः पर्यालोचनेपिनज्ञानविषयोभवतीत्यर्थः ॥ ५८ ॥ अनं

चंद्रसूर्यशिखिमध्यगतंयत्तेजईशचिदशेषतनूनाम् ॥ प्राभवत्तनुभृतामिहधैर्यंशौर्यमायुरखिलंतवसत्त्वम् ॥ ५६ ॥ त्वं
विरिंचिशिवविष्णुविभेदात्कालकर्मशशिसूर्यविभागात् ॥ वादिनांपृथगिवेशविभासिब्रह्मनिश्चितमनन्यदिहैकम् ॥
॥ ५७ ॥ मत्स्यादिरूपेणयथात्वमेकःश्रुतौपुराणेषुचलोकसिद्धः ॥ तथैवसर्वंसदसद्विभागस्त्वमेवनान्यद्भवतोविभाति
॥ ५८ ॥ यद्यत्समुत्पन्नमनंतसृष्टावुत्पत्स्यतेयच्चभवच्चयच्च ॥ नदृश्यतेस्थावरजंगमादौत्वयाविनातःपरतःपरस्त्वम्
॥ ५९ ॥ तत्त्वंनजानंतिपरात्मनस्तेजनाःसमस्तास्तवमाययातः ॥ त्वद्भक्तसेवामलमानसानांविभातितत्त्वंपरमेकमै
शम् ॥ ६० ॥

तसृष्टौअंतरहितायांसृष्टौ तदुक्तंपातंजले सर्वथासृष्ट्याद्युच्छेदोनैवकृतार्थमुक्तंप्रत्येवतुतन्निवृत्तिरिति अनादिर्भगवान्कालोनांतोस्यद्विजविद्यते अव्युच्छिन्ना
स्ततस्त्वेतेसर्गस्थित्यंतसंयमाइतिस्मृतिश्च तादृश्यांसृष्टौयज्जातंयद्भावियच्चवर्तमानंतत्त्वयाविनानदृश्यतेसर्वंत्वद्रूपमेवदृश्यतेतस्त्वंपरतःसर्वोत्कृष्टाद्धिरण्यगर्भाद
पिपरइत्यर्थः ॥ ५९ ॥ नन्वेवंरूपंमांसर्वेजनाःकिमितिनजानंतितत्राह तत्त्वमिति परमात्मनस्तेएतत्तत्त्वंएतेसमस्ताजनास्तवमाययासंवृताइतिशेषः अतोनजा
नंति तर्हिसर्वथामामेवंकेपिनजानंतिनेत्याह त्वद्भक्तेति तेतवैशंतत्त्वंजानंतीत्यर्थः ॥ ६० ॥

तेतवचैतन्यरूपमात्मतत्त्वंब्रह्मादयोपिनविदुः यतस्तेबहिरर्थेषुभावश्चित्तंयेषांतादृशाः ततोऽबुधःत्वद्रूपज्ञानासमर्थोऽपिइदंरूपमेवत्वांप्रकृतदृश्यमानरूपमेवत्वां भजन्ध्यायन् अदुःखोनिवृत्तसकलदुःखःसन्मुक्तिमुपैति ॥ ६१ ॥ अपरमपिसुलभंसाधनंस्वानुष्ठितत्वेनात्युपादेयतांचतत्रसूचयन्नाह अहमिति अनिशंगृणन् उच्चारयन्मरणसमयेजंतूनांमुक्तयेहेरामतवनामरूपंमंत्रंदिशामिउपदिशामि ॥ ६२ ॥ ६३ ॥ अखिलदेवसौख्यंअखिलदेवराज्यरूपसौख्यंयतस्त्वयाराक्षसरूपोस्माकंदुष्टशत्रुर्हतः ॥ ६४ ॥ धरादेवाभूदेवाविद्वांसस्तैर्यज्ञेषुदत्तायज्ञभागायेनखलेनहृताः सत्वयाहतस्तेनतेभागानोस्माकंपुरावद्रावणोत्पत्तिप्राक्कालइवभविष्यंति ॥ ६५ ॥ लब्धसत्त्वास्तत्पिंडप्राप्त्यालब्धबलाः ॥ ६६ ॥ विष्टिकर्मणिवेतनदानंविनाबलात्कर्मकरणंविष्टिस्तत्कर्मणिअभियुक्ताःप्रेरिताः दशास्यंवहामस्तदीयपल्लक्यादिवहनेनेतिशेषः दुःखजाताद्दुःखसमूहात् ॥ ६७ ॥

ब्रह्मादयस्तेनविदुःस्वरूपंचिदात्मतत्त्वंबहिरर्थभावाः ॥ ततोबुधस्त्वामिदमेवरूपंभक्त्याभजन्मुक्तिमुपैत्यदुःखः ॥ ६१ ॥
अहंभवन्नामगृणन्कृतार्थोवसामिकाश्यामनिशंभवान्या ॥ मुमूर्षमाणस्यविमुक्तयेहंदिशामिमंत्रंतवरामनाम ॥ ६२ ॥
इमंस्तवंनित्यमनन्यभक्त्याशृण्वंतिगायंतिलिखंतियेवै ॥ तेसर्वसौख्यंपरमंचलब्ध्वाभवत्पदंयांतुभवत्प्रसादात् ॥ ६३ ॥
इंद्रउवाच ॥ रक्षोधिपेनाखिलदेवसौख्यंहृतंचमेब्रह्मवरेणदेव ॥ पुनश्चसर्वंभवतःप्रसादात्प्राप्तंहतोराक्षसदुष्टशत्रुः ॥ ६४ ॥
देवाऊचुः ॥ हृतायज्ञभागाधरादेवदत्तामुरारेखलेनादिदैत्येनविष्णो ॥ हतोद्यत्वयानोवितानेषुभागाःपुरावद्भविष्यंतियुष्मत्प्रसादात् ॥ ६५ ॥
पितरऊचुः ॥ हतोद्यत्वयादुष्टदैत्योमहात्मन्गयादौनरैर्दत्तपिंडादिकान्नः ॥ बलादत्तिहत्वागृहीत्वासमस्तानिदानींपुनर्लब्धसत्त्वाभवामः ॥ ६६ ॥
यक्षाऊचुः ॥ सदाविष्टिकर्मण्यनेनाभियुक्तावहामोदशास्यंबलाद्दुःखयुक्ताः ॥ दुरात्माहतोरावणोराघवेशत्वयातेवयंदुःखजाताद्विमुक्ताः ॥ ६७ ॥

पुरारावणराज्यात्पूर्वम् ॥ ६८ ॥ अभिविद्रुताबलेनस्ववशतांनीताः ॥ ६९ ॥ यतोयंहतोतएवंस्थितास्त्वयातद्दुःखमोचनेनपरित्राताः ॥ ७० ॥ ७१ ॥ ॥ ७२ ॥ ७३ ॥ हृदिअंतर्यामितयास्थितमेवराजेंद्रंदृश्यमानराजेंद्ररूपंध्यायंतोययुरित्यन्वयः ॥ ७४ ॥ ७५ ॥ ॥ इतिश्रीमत्सक०युद्ध०पंचदशः

गंधर्वाऊचुः ॥ वयंसंगीतनिपुणागायंतस्तेकथामृतम् ॥ आनंदामृतसंदोहयुक्ताःपूर्णाःस्थिताःपुरा ॥ ६८ ॥ पश्चाद्दुरात्मनारामरावणेनाभिविद्रुताः ॥ तमेवगायमानाश्चतदाराधनतत्पराः ॥ ६९ ॥ स्थितास्त्वयापरित्राताहतोयंदुष्टराक्षसः ॥ एवंमहोरगाःसिद्धाःकिन्नरामरुतस्तथा ॥ ७० ॥ वसवोमुनयोगावोगुह्यकाश्चपतत्रिणः ॥ सप्रजापतयश्चैतेतथाचाप्सरसांगणाः ॥ ७१ ॥ सर्वेरामंसमासाद्यदृष्ट्वानेत्रमहोत्सवम् ॥ स्तुत्वापृथक्पृथक्सर्वेराघवेणाभिवंदिताः ॥ ७२ ॥ ययुःस्वंस्वंपदंसर्वेब्रह्मरुद्रादयस्तथा ॥ प्रशंसंतोमुदारामंगायंतस्तस्यचेष्टितम् ॥ ७३ ॥ ध्यायंतस्त्वभिषेकार्द्रंसीतालक्ष्मणसंयुतम् ॥ सिंहासनस्थंराजेंद्रंययुःसर्वेहृदिस्थितम् ॥ ७४ ॥ खेवाद्येषुध्वनत्सुप्रमुदितहृदयैर्देववृंदैःस्तुवद्भिर्वर्षद्भिःपुष्पवृष्टिंदिविमुनिनिकरैरीड्यमानंसमंतात् ॥ रामःश्यामःप्रसन्नास्मितरुचिरमुखःसूर्यकोटिप्रकाशःसीतासौमित्रिवातात्मजमुनिहरिभिःसेव्यमानोविभाति ॥ ७५ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेयुद्धकांडेपंचदशःसर्गः ॥ १५ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ श्रीमहादेवउवाच ॥ रामेभिषिक्तेराजेंद्रेसर्वलोकसुखावहे ॥ वसुधासस्यसंपन्नाफलवंतोमहीरुहाः ॥ १ ॥ गंधहीनानिपुष्पाणिगंधवंतिचकाशिरे ॥ सहस्रशतमश्वानांधेनूनांचगवांतथा ॥ २ ॥ ददौशतवृषान्पूर्वंद्विजेभ्योरघुनंदनः ॥ त्रिंशत्कोटिंसुवर्णस्यब्राह्मणेभ्योददौपुनः ॥ ३ ॥

सर्गः ॥ १५ ॥ ॥ छ ॥ ॥ रामेइति उत्तरार्धेजातेतिजाताइतिचशेषः ॥ १ ॥ निर्गंधानिगंधयुतानि अश्वानांधेनूनांगवांचसहस्रशतंददौ ॥ २ ॥ शतवृषानित्यत्रशतशब्दोऽनंतवाची ॥ ३ ॥

॥ ४ ॥ अंगदेबाहुभूषणे ॥ ५ ॥ ६ ॥ अवमुच्यभर्त्रांकंठेप्रतिमुक्तंपुनःकंठादवतार्येत्यर्थः ॥ ७ ॥ विलोकयन्वैदेहींपश्यन् ॥ ८ ॥ गौरवेणसीताकृतादरेण ॥ ९ ॥ १० ॥ यद्वस्तुदेवैरपिदुर्लभंतदपितववररूपंचदास्याम्येवेत्यर्थः ॥ ११ ॥ उक्तंचान्यत्र राज्योत्सवागतजनायरघुप्रवीरःप्रीत्यात्वनेकमणिरत्नविभूषणानि दत्त्वानिलात्मजमपास्यविदेहजायैमालांददौरघुपतिःपरमादरेण ॥ १ ॥ तयाहनूमतेदत्तासैवमालाह्यमूलिका दशनैःशकलीकृत्यत्यक्तातेनजलाशये ॥ २ ॥ हाहेतिजल्पितंसर्वैस्तदाससुरवानरैः स्वजातीयमरेकर्मत्वयाकृतमरिंदम ॥ ३ ॥ रामस्ततोमारुतिमत्युदारमाहूयचारादभिवर्तमानम् पप्रच्छकस्मान्महतीसुमाला

वस्त्राभरणरत्नानिब्राह्मणेभ्योमुदातथा ॥ सूर्यकांतिसमप्रख्यांसर्वरत्नमयींस्रजम् ॥ ४ ॥ सुग्रीवायददौप्रीत्याराघवो भक्तवत्सलः ॥ अंगदायददौदिव्येत्यंगदेरघुनंदनः ॥ ५ ॥ चंद्रकोटिप्रतीकाशंमणिरत्नविभूषितम् ॥ सीतायैप्रददौहारं प्रीत्यारघुकुलोत्तमः ॥ ६ ॥ अवमुच्यात्मनःकंठाद्धारंजनकनंदिनी ॥ अवैक्षतहरीन्सर्वान्भर्तारंचमुहुर्मुहुः ॥ ७ ॥ रामस्तामाहवैदेहीमिंगितज्ञोविलोकयन् ॥ वैदेहियस्यतुष्टासिदेहितस्मैवरानने ॥ ८ ॥ हनूमतेददौहारंपश्यतोराघवस्यच ॥ तेनहारेणशुशुभेमारुतिर्गौरवेणच ॥ ९ ॥ रामोपिमारुतिंदृष्ट्वाकृतांजलिमुपस्थितम् ॥ भक्त्यापरमयातुष्टइदं वचनमब्रवीत् ॥ १० ॥ हनूमंस्तेप्रसन्नोस्मिवरंवरयकांक्षितम् ॥ दास्यामिदेवैरपियद्दुर्लभंभुवनत्रये ॥ ११ ॥

त्यक्तात्वयाब्रूहिविदेहजार्पिता ॥ ४ ॥ ब्रह्मेतियद्ब्रह्मविदोवदंतिह्यात्मेश्वरश्चेतिवदंतिसंतः सीतापतेत्वंतदसीतिबुद्ध्वात्यक्तामयेयंसकलार्तिरूपा ॥ ५ ॥ हनूमन्यदिमत्तस्त्वंवरंकिमपिनेच्छसि तवेच्छांतर्हिनिर्मुक्तांकरिष्यामिचनिष्फलाम् ॥ ६ ॥ श्रीरामश्रवणेदास्येममास्तुसफलास्पृहा तस्याविरोधिनीयातुनिर्मूलांकुरुतांप्रभो ॥ ७ ॥ ममस्वांतेसदैवत्वंसीतयासहतिष्ठसि अद्यैवसर्वेपश्यंतुस्थितंत्वांजानकीपते ॥ ८ ॥ विदीर्यवक्षःस्थलमंजनीसुतःप्रदर्शयामासचराममद्वयम् हृदंबुजेसंस्थितमब्जलोचनंमहीसुताराधितपादपंकजम् ॥ ९ ॥ मारुतेर्वैभवंदृष्ट्वासर्वेसंतोषमागताः रामेणालिंगितःश्रीमान्हनूमानंजनीसुतः ॥ १० ॥ जयशब्दोमहानासीत्तदाराघवमंडपे सीताप्रमुदितातस्मैवरानभयदान्ददौ ॥ ११ ॥ रामलीलामृतंचैतत्परमानंददायकम् श्रोतॄणांचाथगृणतांपापसंघविदाहकम् ॥ १२ ॥

तंतथोदारचरितम् ॥ १२ ॥ १३ ॥ मुक्तःसततंममनामस्मरणाज्जीवन्मुक्तःसन्तिष्ठ ॥ १४ ॥ १५ ॥ ईश्वराभ्यांसीतारामाभ्याम् ॥ १६ ॥ कृच्छ्रादिति

हनूमानपितंप्राहनत्वारामंप्रहृष्टधीः ॥ त्वन्नामस्मरतोरामनतृप्यतिमनोमम ॥ १२ ॥ अतस्त्वन्नामसततंस्मरन्स्थास्यामि
भूतले ॥ यावत्स्थास्यतितेनामलोकेतावत्कलेवरम् ॥ १३ ॥ ममतिष्ठतुराजेंद्रवरोयंमेभिकांक्षितः ॥ रामस्तथेति
तंप्राहमुक्तस्तिष्ठयथासुखम् ॥ १४ ॥ कल्पांतेममसायुज्यंप्राप्स्यसेनात्रसंशयः ॥ तमाहजानकीप्रीतायत्रकुत्रापिमारुते
॥ १५ ॥ स्थितंत्वामनुयास्यंतिभोगाःसर्वेममाज्ञया ॥ इत्युक्तोमारुतिस्ताभ्यामीश्वराभ्यांप्रहृष्टधीः ॥ १६ ॥
आनंदाश्रुपरीताक्षोभूयोभूयःप्रणम्यतौ ॥ कृच्छ्राद्ययौतपस्तप्तुंहिमवंतंमहामतिः ॥ १७ ॥ ततोगुहंसमासाद्यरामःप्रांजलिमब्रवीत्
॥ सखेगच्छपुरंरम्यंशृंगवेरमनुत्तमम् ॥ १८ ॥ मामेवचिंतयन्नित्यंभुंक्ष्वभोगान्निजार्जितान् ॥ अंतेममैवसारूप्यंप्राप्स्यसेत्वंनसंशयः ॥ १९ ॥ इत्युक्त्वाप्रददौतस्मैदिव्यान्याभरणानिच ॥ राज्यंचविपुलंदत्त्वाविज्ञानंचददौविभुः ॥ २० ॥ रामेणालिंगितोहृष्टोययौस्वभवनंगुहः ॥ येचान्येवानराःश्रेष्ठाअयोध्यांसमुपागताः ॥ २१ ॥ अमूल्याभरणैर्वस्त्रैःपूजयामासराघवः ॥ सुग्रीवप्रमुखाःसर्वेवानराःसविभीषणाः ॥ २२ ॥ यथार्हंपूजितास्तेनरामेणपरमात्मना ॥ प्रहृष्टमनसःसर्वेजग्मुरेवयथागतम् ॥ २३ ॥ सुग्रीवप्रमुखाःसर्वेकिष्किंधांप्रययुर्मुदा ॥ विभीषणस्तुसंप्राप्यराज्यंनिहतकंटकम् ॥ २४ ॥

रामदर्शनवियोगतःकृच्छ्रम् ॥ १७ ॥ १८ ॥ मामेवचिंतयन्नित्यनेनभोगेष्वनासक्तोभवेतिसूच्यते ॥ १९ ॥ विद्यमानराज्यादधिकदेशराज्यम् विज्ञानमात्मतत्त्वज्ञानम् ॥ २० ॥ आलिंगितःबहिःशरीरेणसर्वदास्वानुसंधानदानेनांतश्चालिंगितः ॥ २१ ॥ पूजयामासतानितिशेषः ॥ २२ ॥ २३ ॥ २४ ॥

॥ २५ ॥ अनिच्छन्नित्यस्ययौवराज्यमितिकर्म ॥ २६ ॥ कर्माध्यक्षःसर्वकर्मसाक्षी कर्तृत्वादिविहीनोनिरभिमानित्वादतएवनिर्विकारः ॥ २७ ॥ स्वानंदेन
तुष्टइत्यनेनलौकिकानंदसामग्रीनिरपेक्षत्वमुक्तम् लोकानामुपदेशकृत् अनेनलोकोपदेशएवयज्ञाद्यनुष्ठानप्रयोजनमुक्तम् ॥ २८ ॥ रामेराज्यमितिसौराज्य

रामेणपूजितःप्रीत्याययौलंकामनिंदितः ॥ राघवोराज्यमखिलंशशासाखिलवत्सलः ॥ २५ ॥ अनिच्छन्नपिरामेण
यौवराज्येभिषेचितः॥ लक्ष्मणःपरयाभक्त्यारामसेवापरोभवत् ॥ २६॥ रामस्तुपरमात्मापिकर्माध्यक्षोऽपिनिर्मलः॥
कर्तृत्वादिविहीनोपिनिर्विकारोपिसर्वदा ॥ २७॥ स्वानंदेनापितुष्टःसन्लोकानामुपदेशकृत् ॥ अश्वमेधादियज्ञैश्वस
र्वैर्विपुलदक्षिणैः ॥ २८ ॥ अयजत्परमानंदोमानुषंवपुराश्रितः॥ नपर्यदेवन्विधवानचव्यालकृतंभयम् ॥ २९॥ नव्या
धिजंभयंचासीद्रामेराज्यंप्रशासति॥ लोकेदस्युभयंनासीदनर्थोनास्तिकश्चन ॥ ३० ॥ वृद्धेषुसत्सुबालानांनासीन्मृत्यु
भयंतथा॥ रामपूजापराःसर्वेसर्वेराघवचिंतकाः ॥ ३१ ॥ ववर्षुर्जलदास्तोयंयथाकालंयथारुचि ॥ प्रजाःस्वधर्मनिर
तावर्णाश्रमगुणान्विताः ॥ ३२ ॥ औरसानिवरामोऽपिजुगोपपितृवत्प्रजाः ॥ सर्वलक्षणसंयुक्तःसर्वधर्मपरायणः ॥
॥ ३३ ॥ दशवर्षसहस्राणिरामोराज्यमुपास्तसः ॥ ३४ ॥ इदंरहस्यंधनधान्यऋद्धिमद्दीर्घायुरारोग्यकरंसुपुण्यदम् ॥
पवित्रमाध्यात्मिकसंज्ञितंपुरारामायणंभाषितमादिशंभुना ॥ ३५ ॥

माह नपर्यदेवन्निति व्यालाःसर्पाव्याघ्राश्च ॥ २९ ॥ दस्यवश्चोराः ॥ ३० ॥ अनर्थाभावमेवप्रपंचयति वृद्धेष्विति ॥ ३१ ॥ वर्णाश्रमाणांयेगुणाःधर्माः
पुराणेषूक्तास्तैरन्विताः ॥ ३२ ॥ औरसानिवस्वस्मिन्प्रीतिमतीःप्रजारामःपितृवज्जुगोप पितरिपुत्राणामिवप्रजानांरामेस्नेहः पितुःपुत्रेष्विवप्रजासुरामस्येतिबोधि
तम् ॥ ३३ ॥ उपास्तअकरोदितियावत् ॥ ३४ ॥ धनधान्यऋद्धिमत्तद्युक्तंयद्दीर्घमायुरारोग्यंचतयोःकारकमात्मानमधिकृत्यभवमाध्यात्मिकम् ॥ ३५ ॥

समाहितस्तदेकचित्तः परितुष्टमानसः भगवत्कथापठनजानंदेनेतिभावः मनोगताशिषःमनसाआशास्यमानानर्थान् ॥ ३६ ॥ रामाभिषेकंरावणजयपूर्व
कंप्राप्तम् आर्यसंमतंशिष्टसंमतंतेनस्वयंशिष्टमितियावत् ॥ ३७ ॥ यआध्यात्मिकेत्यत्रसंधिरार्षः ॥ ३८ ॥ अधिरामसंहितांराममधिकृत्यप्रवृत्तामध्यात्मरामा

श्टणोतिभक्त्यामनुजःसमाहितोभक्त्यापठेद्वापरितुष्टमानसः ॥सर्वाःसमाप्नोतिमनोगताशिषोविमुच्यतेपातककोटिभिः
क्षणात् ॥ ३६ ॥ रामाभिषेकंप्रयतःश्टणोतियोधनाभिलाषीलभतेमहद्धनम् ॥ पुत्राभिलाषीसुतमार्यसंमतंप्राप्नोतिरा
मायणमादितःपठन् ॥ ३७ ॥ श्टणोतियोध्यात्मिकरामसंहितांप्राप्नोतिराजाभुवमृद्धसंपदम् ॥ शत्रून्विजित्यारिभिरप्र
धर्षितोव्यपेतदुःखोविजयीभवेन्नृपः ॥ ३८ ॥ स्त्रियोऽपिश्टण्वंत्यधिरामसंहितांभवंतिताजीवसुताश्चपूजिताः ॥ वंध्या
ऽपिपुत्रंलभतेसुरूपिणंकथामिमांभक्तियुतांश्टणोतिया ॥ ३९ ॥ श्रद्धान्वितोयःश्टणुयात्पठेन्नरोविजित्यकोपंचतथावि
मत्सरः ॥ दुर्गाणिसर्वाणिविजित्यनिर्भयोभवेत्सुखीराघवभक्तिसंयुतः ॥४०॥ सुराःसमस्ताअपियांतितुष्टतांविघ्नाःसम
स्ताअपयांतिश्टण्वताम् ॥ अध्यात्मरामायणमादितोनृणांभवंतिसर्वाअपिसंपदःपराः ॥ ४१ ॥ रजस्वलावायदिराम
तत्पराश्टणोतिरामायणमेतदादितः ॥ पुत्रंप्रसूतेऋषभंचिरायुषंपतिव्रतालोकसुपूजिताभवेत् ॥ ४२ ॥ पूजयित्वातुये
भक्त्यानमस्कुर्वंतिनित्यशः ॥ सर्वैःपापैर्विनिर्मुक्ताविष्णोर्यांतिपरंपदम् ॥ ४३ ॥ अध्यात्मरामचरितंकृत्स्नंश्टण्वंतिभ
क्तितः ॥ पठंतिवास्वयंवक्त्रात्तेषांरामःप्रसीदति ॥ ४४ ॥

यणाख्याम् ॥ ३९ ॥ कोपमित्युपलक्षणंकामादीनाम् विमत्सरःअनीर्ष्यः सर्वाणिदुर्गाणिदुःखस्थानानि ॥ ४० ॥ श्टण्वतांपुंसांसुरास्तुष्यंति विघ्नानश्यंति
संपदश्चभवंति ॥ ४१ ॥ रामतत्परारामैकचित्ता रजस्वलायाःश्रवणंचतुर्थेह्न्यारभ्यद्वादशरात्रांतम् ॥४२॥ पुजयित्वेत्यादेःपुस्तकमितिशेषः ॥ ४३ ॥ ४४ ॥

॥ ४५ ॥ आयुष्यंआयुर्जनकम् कल्पकोटिपर्यंतंकृतमघम् ॥ ४६ ॥ ४७ ॥ वैराग्यविज्ञानयुतंश्रोतॄणांतदुभयदातृत्वादितिभावः अस्मिन्भवेसंसारेइत्यर्थः ॥ ४८ ॥ योभूतेश्वरोभवःशिवोसकृदखिलवेदराशिमालोड्ययत्तारकंब्रह्मतदेवरामः विष्णुरहस्यमूर्तिषुअत्यंतरहस्यमूर्तिः मुख्यामूर्तिरितिविज्ञायाखिलवेदानां सारभूताउपनिषदस्तदर्थसंग्रहमुद्धृत्यसंक्षेपतइदंरामस्यनिगूढतत्त्वंप्रियायैप्राह तस्मैनमइतिशेषः अयंश्लोकस्तत्रश्रोतुःशिवशिष्यस्येतिबोध्यम् ॥ ४९ ॥

रामएवपरंब्रह्मतस्मिंस्तुष्टेखिलात्मनि ॥ धर्मार्थकाममोक्षाणांयद्यदिच्छतितद्भवेत् ॥ ४५॥ श्रोतव्यंनियमेनैतद्रामायणमखंडितम् ॥ आयुष्यमारोग्यकरंकल्पकोट्यघनाशनम् ॥ ४६ ॥ देवाश्चसर्वेतुष्यंतुग्रहाःसर्वेमहर्षयः ॥ रामायणस्यश्रवणेतुष्यंतिपितरस्तथा ॥ ४७ ॥ अध्यात्मरामायणमेतदद्भुतंवैराग्यविज्ञानयुतंपुरातनम् ॥ पठंतिश्टण्वंतिलिखंतियेनरास्तेषांभवेऽस्मिन्नपुनर्भवोभवेत् ॥ ४८ ॥ आलोड्याखिलवेदराशिमसकृद्यत्तारकंब्रह्मतद्रामोविष्णुरहस्यमूर्तिरितियोविज्ञायभूतेश्वरः ॥ उद्धृत्याखिलसारसंग्रहमिदंसंक्षेपतःप्रस्फुटंश्रीरामस्यनिगूढतत्त्वमखिलंप्राहप्रियायैभवः ॥ ४९ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेयुद्धकांडेषोडशःसर्गः ॥ १६ ॥ इतियुद्धकांडंसमाप्तम्

॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ कांडेयुद्धात्मकेसर्गानवसप्तनीलकंठोक्ताः ॥ सार्धैकादशशतश्लोकामनुसंख्यायुताः ॥ ॥ छ ॥ ॥ छ ॥

इतिश्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिबिरुदावलीविराजमानस्यहिम्मतिवर्मणःपुत्रस्यश्रीरामवर्मणःकृतावध्यात्मरामायणेसेतौयुद्धकांडेषोडशःसर्गः ॥ ॥ १६ ॥ ॥ छ ॥ ॥ छ ॥ ॥ श्रीसीतारामचंद्रार्पणमस्तु ॥ ॥ युद्धेयुद्धादिभिःश्रांतान्वानरान्प्रतिपूज्यच ॥ स्वानंदेनस्थितोयोध्यांसरामःपातुसर्वदा ॥ १ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ इति श्रीमदध्यात्मरामायणे युद्धकांडः समाप्तः ॥

॥ अथ श्रीमद्ध्यात्मरामायणे उत्तरकांडः प्रारभ्यते ॥


उत्तरकांड ७.
ल०
वि०
ग०

श्रीगणेशायनमः ॥ १ ॥ मृधेयुद्धे ॥ १ ॥ २ ॥ कथंकेनप्रकारेण ॥ ३ ॥ श्रद्दधत्याः एतच्छ्रवणेश्रद्धावत्याः कथामृतमास्वाद्यमेममतदास्वादनविषयातृष्णात्यंतंवर्धते ॥ ४ ॥ रामेराज्यमुपस्थिते राज्यंप्राप्तवतीत्यर्थः अभिवंदितुंनंतुंस्तोतुंच ॥ ५ ॥ तानेवऋषीनाह विश्वामित्रइति ॥ ६ ॥ मुनिभिःशिष्यैःसहितइ

जयतिरघुवंशतिलकःकौसल्याहृदयनंदनोरामः ॥ दशवदननिधनकारीदाशरथिःपुंडरीकाक्षः ॥ १ ॥ पार्वत्युवाच ॥ अथरामःकिमकरोत्कौसल्यानंदवर्धनः ॥ हत्वामृधेरावणादीन्राक्षसान्भीमविक्रमः ॥ १ ॥ अभिषिक्तस्त्वयोध्यायां सीतयासहराघवः ॥ मायामानुषतांप्राप्यकतिवर्षाणिभूतले ॥ २ ॥ स्थितवान्लीलयादेवःपरमात्मासनातनः ॥ अत्यजन्मानुषंलोकंकथमंतेरघूद्वहः ॥ ३ ॥ एतदाख्याहिभगवन्श्रद्दधत्याममप्रभो ॥ कथापीयूषमास्वाद्यतृष्णामेतीव वर्धते ॥ रामचंद्रस्यभगवन्ब्रूहिविस्तरशःकथाम् ॥ ४ ॥ श्रीमहादेवउवाच ॥ राक्षसानांवधंकृत्वाराज्यंरामउपस्थिते ॥ आययुर्[1]मुनयःसर्वेश्रीराममभिवंदितुम् ॥५॥ विश्वामित्रोसितःकण्वोदुर्वासाभृगुरंगिराः ॥ कश्यपोवामदेवोत्रिस्तथासप्तर्षयोमलाः ॥६॥ अगस्त्यःसहशिष्यैश्चमुनिभिःसहितोभ्यगात् ॥ द्वारमासाद्यरामस्यद्वारपालमथाब्रवीत् ॥७॥ ब्रूहिरामायमुनयःसमागत्यबहिःस्थिताः ॥ अगस्त्यप्रमुखाःसर्वेआशीर्भिरभिनंदितुम् ॥८॥ प्रतीहारस्ततोराममगस्त्यवचनाद्द्रुतम् ॥ नमस्कृत्वाब्रवीद्वाक्यंविनयावनतःप्रभुम् ॥९॥ कृतांजलिरुवाचेदमगस्त्योमुनिभिःसह ॥ देवत्वद्दर्शनार्थायप्राप्तोबहिरुपस्थितः ॥१०॥ तमुवाचद्वारपालंप्रवेशययथासुखम् ॥ पूजिताविविशुर्वेश्मनानारत्नविभूषितम् ॥ ११ ॥

त्यर्थः ॥ ७ ॥ अगस्त्यप्रमुखामुनयआशीर्भिरभिनंदितुंसमागत्यबहिःस्थिताःसंतीतिरामायब्रूहीत्यन्वयः ॥ ८ ॥ ९ ॥ कृतांजलिःप्रतीहारइतिशेषः प्राप्तःस्वाश्रमादागतःबहिर्द्वारिउपस्थितोस्तीतिशेषः ॥ १० ॥ पूजिताःप्रतीहारेणमार्गप्रदर्शनादिनापूजिताःकृतादराइतियावत् ॥ ११ ॥

---

[1] अथरावणस्यब्रह्मानुग्रहजबलवैभवप्रतिपादनद्वारातज्जेतृत्वेन भगवतिपराक्रमातिशयंप्रतिपादयितुंत्वद्दत्तवैभवंत्वयैवोपसंहृतमितिभगवन्महिमानंचस्तोतुमृषयआगताइत्याहआययुरिति .

गांमधुपर्कार्थंवृषभंच महोक्षंवामहाजंवाश्रोत्रियायोपकल्पयेदितिस्मृतेः ॥ १२ ॥ यथार्हतःअर्होयोग्यतातदनतिक्रमादित्यर्थः भगवतःसकाशात्पूजालाभे
नप्रहर्षः ॥ १३ ॥ अब्रुवन्अपृच्छन् तमेवाभिनयति कुशलमित्यादि ॥ १४ ॥ सरावणस्तेनभारःक्लेशवध्योनकिंतुसुकरवधइत्यर्थः ॥ १५ ॥ सुकरत्वमेवदर्श

दृष्ट्वारामोमुनीन्शीघ्रंप्रत्युत्थायकृतांजलिः॥ पाद्यार्घ्यादिभिरापूज्यगांनिवेद्ययथाविधि॥ १२॥ नत्वातेभ्योददौदिव्या
न्यासनानियथार्हतः॥ उपविष्टाःप्रहृष्टाश्चमुनयोरामपूजिताः॥ १३॥ संपृष्टकुशलाःसर्वेरामंकुशलमब्रुवन्॥ कुश
लंतेमहाबाहोसर्वत्ररघुनंदन॥ १४॥ दिष्ट्येदानींप्रपश्यामोहतशत्रुमरिंदम॥ नहिभारःसतेरामरावणोराक्षसेश्वरः
॥ १५॥ सधनुस्त्वंहिलोकाँस्त्रीन्विजेतुंशक्तएवहि॥ दिष्ट्यात्वयाहताःसर्वेराक्षसारावणादयः॥ १६॥ सत्यमेत
न्महाबाहोरावणस्यनिबर्हणम्॥ असत्यमेतत्संग्रामेरावणेर्यन्निषूदनम्॥ १७॥ अंतकप्रतिमाःसर्वेकुंभकर्णादयो
मृधे॥ अंतकप्रतिमैर्बाणैर्हतास्तेरघुसत्तम॥ १८॥ दत्ताचेयंत्वयाऽस्माकंपुरात्यभयदक्षिणा॥ हत्वारक्षोगणान्सं
ख्येकृतकृत्योद्यजीवसि॥ १९॥ श्रुत्वातुभाषितंतेषांमुनीनांभावितात्मनाम्॥ विस्मयंपरमंगत्वारामःप्रांजलिरब्रवी
त्॥ २०॥ रावणादीनतिक्रम्यकुंभकर्णादिराक्षसान्॥ त्रिलोकजयिनोहित्वाकिंप्रशंसथरावणिम्॥ २१॥ ततस्त
द्वचनंश्रुत्वाराघवस्यमहात्मनः॥ कुंभयोनिर्महातेजारामंप्रीत्यावचोब्रवीत्॥ २२॥ शृणुरामयथावृत्तंरावणेराव
णस्यच॥ जन्मकर्मवरादानंसंक्षेपाद्वदतोमम॥ २३॥

यंति सधनुरिति इंद्रजितंस्मृत्वाहुर्दिष्ट्येति ॥ १६ ॥ तदेवस्पष्टयति सत्यमिति रावणेर्मेघनादस्य ॥ १७ ॥ १८ ॥ यादक्षिणापुरादत्तादातुंप्रतिज्ञातासारक्षोग
णान्हत्वापूर्णाकृताअतःकृतकृत्यःसन्जीवसित्वमेवजीवतवजीवनमेवश्लाघ्यंजीवनमित्यर्थः ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ यथावृत्तंजातंतथाशृणु ॥ २३ ॥

---

१ महांतंचतंउक्षाणंचेतिविग्रहे अचतुरेतिसूत्रेणाच्प्रत्ययेनिपातनमिदम् २ कुंभकर्णादादिःकुंभकर्णआदिर्येषामितितंत्रेणनिर्देशेरावणादयइत्यर्थः

॥ २४ ॥ मुनिपुंगवःमुनिश्रेष्ठःसन् अवसत् तपस्तेपेच ॥ २५ ॥ २६ ॥ विघ्नंचक्रुःगायननृत्यादिभिरितिशेषः ॥ २७ ॥ २८ ॥ प्रपश्यतीत्यत्रनुमभावआर्षः

पुराकृतयुगेरामपुलस्त्योब्रह्मणःसुतः ॥ तपस्तप्तुंगतोविद्वान्मेरोःपार्श्वंमहामतिः ॥ २४ ॥ तृणबिंदोराश्रमेसौन्यवसन्मुनिपुंगवः ॥ तपस्तेपेमहातेजाःस्वाध्यायनिरतःसदा ॥ २५ ॥ तत्राश्रमेमहारम्येदेवगंधर्वकन्यकाः ॥ गायंत्योननृतुस्तत्रहसंत्योवादयंतिच ॥ २६ ॥ पुलस्त्यस्यतपोविघ्नंचक्रुःसर्वाअनिंदिताः ॥ ततःक्रुद्धोमहातेजाव्याजहारवचोमहत् ॥ ॥ २७ ॥ यामेदृष्टिपथंगच्छेत्सागर्भंधारयिष्यति ॥ ताःसर्वाःशापसंविग्नानतंदेशंप्रचक्रमुः ॥ २८ ॥ तृणबिंदोस्तुराजर्षेःकन्यातन्नाशृणोद्वचः ॥ विचचारमुनेरग्रेनिर्भयातंप्रपश्यती ॥ २९ ॥ बभूवपांडुरतनुर्व्यंजितांतःशरीरजा ॥ दृष्ट्वासादेहवैवर्ण्यंभीतापितरमन्वगात् ॥ ३० ॥ तृणबिंदुश्चतांदृष्ट्वाराजर्षिरमितद्युतिः ॥ ध्यात्वामुनिकृतंसर्वमवैद्विज्ञानचक्षुषा ॥ ३१ ॥ तांकन्यांमुनिवर्यायपुलस्त्यायददौपिता ॥ तांप्रगृह्याब्रवीत्कन्यांबाढमित्येवसद्विजः ॥ ३२ ॥ शुश्रूषणपरांदृष्ट्वामुनिःप्रीतोब्रवीद्वचः ॥ दास्यामिपुत्रमेकंतेउभयोर्वंशवर्धनम् ॥ ३३ ॥ ततःप्रासूतसापुत्रंपुलस्त्याल्लोकविश्रुतम् ॥ विश्रवा[1]इतिविख्यातःपौलस्त्योब्रह्मविन्मुनिः ॥ ३४ ॥ तस्यशीलादिकंदृष्ट्वाभरद्वाजोमहामुनिः ॥ भार्यार्थंस्वांदुहितरंददौविश्रवसेमुदा ॥ ३५ ॥ तस्यांतुपुत्रःसंजज्ञेपौलस्त्याल्लोकसंमतः ॥ पितृतुल्योवैश्रवणोब्रह्मणाचानुमोदितः ॥ ३६ ॥

॥ २९ ॥ व्यंजितःप्रकटीकृतोंतःमध्येशरीरजोगर्भोयस्याःसा ॥ ३० ॥ अवैत्अजानात् ॥ ३१ ॥ ३२ ॥ उभयोःमातापित्रोः ॥ ३३ ॥ यंप्रासूतसविश्रवाइतिविख्यातइत्यर्थः ॥ ३४ ॥ शीलमुत्तमस्वभावः ॥ ३५ ॥ वैश्रवणः[2]कुबेरः ॥ ३६ ॥

---

[1] यस्मात्तुविश्रुतोवेदस्त्वयेहाध्ययतोमम । तस्मात्सविश्रवानामभविष्यतिनसंशयइतिवाल्मीकीये [2] अपत्यप्रत्ययसंनियोगेनविश्रवसोविश्रवणादेशः

तत्तपसातस्यतपसामनोभिलषितंधनेशत्वरूपंददौ ॥ ३७ ॥ ३८ ॥ प्राहपितरमितिकर्म वरंदत्त्वेत्यस्यस्थानंनदत्तवानित्यनेनान्वयः ॥ ३९ ॥ हिंसापीडायत्रक स्यापिस्वाम्यंनास्तितादृशंवदेत्यर्थः ॥ ४० ॥ ४१ ॥ अन्यैःरिपुभिर्दुष्प्रधर्षा ॥ ४२ ॥ पुरादैत्यानांरसातलप्रवेशोत्तरमितःप्रागित्यर्थः ॥ ४३ ॥ ४४ ॥ ४५ ॥

ददौतत्तपसातुष्टोब्रह्मातस्मैवरंशुभम् ॥ मनोभिलषितंतस्यधनेशत्वमखंडितम् ॥ ३७ ॥ ततोलब्धवरःसोपिपितरंद्रष्टु मागतः॥ पुष्पकेणधनाध्यक्षोब्रह्मदत्तेनभास्वता ॥ ३८ ॥ नमस्कृत्वाथपितरंनिवेद्यतपसःफलम्॥ प्राहमेभगवान्ब्रह्मादत्त्वावरमनिंदितम् ॥ ३९ ॥ निवासायनमेस्थानंदत्तवान्परमेश्वरः॥ ब्रूहिमेनियतंस्थानंहिंसायत्रनकस्यचित् ॥ ॥ ४० ॥ विश्रवाअपितंप्राहलंकानामपुरीशुभा॥ राक्षसानांनिवासायनिर्मिताविश्वकर्मणा ॥ ४१ ॥ त्यक्त्वाविष्णुभयाद्दैत्याविविशुस्तेरसातलम्॥ सापुरीदुष्प्रधर्षान्यैर्मध्येसागरमास्थिता ॥ ४२ ॥ तत्रवासायगच्छत्वंनान्यैःसाधिष्ठितापुरा॥ पित्रादिष्टस्त्वसौगत्वातांपुरींधनदोविशत्॥ ४३॥ सतत्रसुचिरंकालमुवासपितृसंमतः॥ कस्यचित्त्वथकालस्यसुमालीनामराक्षसः॥ ४४ ॥ रसातलान्मर्त्यलोकंचचारपिशिताशनः॥ गृहीत्वातनयांकन्यांसाक्षाद्देवीमिवश्रियम् ॥ ४५ ॥ अपश्यद्धनदंदेवंचरंतंपुष्पकेणसः ॥ हितायचिंतयामासराक्षसानांमहामनाः ॥ ४६ ॥ उवाचतनयांतत्रकैकसींनामनामतः॥ वत्सेविवाहकालस्तेयौवनंचातिवर्त्तते ॥ ४७ ॥ प्रत्याख्यानाच्चभीतैस्त्वंनवरैर्गृह्यसेशुभे॥ सात्वंवरयभद्रंतेमुनिंब्रह्मकुलोद्भवम्॥ ४८॥ स्वयमेवततःपुत्राभविष्यंतिमहाबलाः॥ ईदृशाःसर्वशोभाढ्याधनदेनसमाःशुभे ॥ ४९ ॥ तथेतिसाश्रमंगत्वामुनेरग्रेव्यवस्थिता॥ लिखंतीभुवमग्रेणपादेनाधोमुखीस्थिता ॥ ५०॥

॥ ४६ ॥ ४७ ॥ गृह्यसेप्राथ्र्यसे क्वचित्तथैवपाठः ॥ ४८ ॥ ईदृशाइत्यस्यैवविवरणंधनदेनसमाइति ॥ ४९ ॥ साआश्रममितिच्छेदः लज्जावशात्भूलेखनादि ॥ ५० ॥

का किंजातीया कन्यासिउतविवाहितासीतिप्रश्नः ॥ ५१ ॥ ५२ ॥ ५३ ॥ त्वत्तोप्येवंविधौसुतावित्यत्रकाकुः यस्तेपुत्रोभविष्यतिसमहामतिर्भविष्यती त्यर्थः ॥ ५४ ॥ तदेवाह महाभागवतइति रामभक्त्येत्यस्ययुक्तइतिशेषः एकस्मिंस्तस्मिन्नेवतत्परःसर्वदादत्तचित्तः ॥ ५५ ॥ तद्रक्षोजातमात्रेणतस्यरक्षसो

तामपृच्छन्मुनिःकात्वंकन्यासिवरवर्णिनि ॥ साब्रवीत्प्रांजलिर्ब्रह्मन्ध्यानेनज्ञातुमर्हसि ॥ ५१ ॥ ततोध्यात्वामुनिःसर्वं
ज्ञात्वातांप्रत्यभाषत ॥ ज्ञातंतत्त्वाभिलषितंमत्तःपुत्रानभीप्स्यसि ॥ ५२ ॥ दारुणायांतुवेलायामागतासिसुमध्यमे ॥
अतस्तेदारुणौपुत्रौराक्षसौसंभविष्यतः ॥ ५३ ॥ साब्रवीन्मुनिशार्दूलत्वत्तोप्येवंविधौसुतौ ॥ तामाहपश्चि[1]मोयस्तेभ
विष्यतिमहामतिः ॥ ५४ ॥ महाभागवतःश्रीमान्रामभक्त्यैकतत्परः ॥ इत्युक्त्वासातथाकालेसुषुवेदशकं[2]धरम् ॥ ५५ ॥
[3]रावणंविंशतिभुजंदशशीर्षंसुदारुणम् ॥ तद्रक्षोजातमात्रेणचचालचवसुंधरा ॥ ५६ ॥ बभूवुर्नाशहेतूनिनिमित्तान्य
खिलान्यपि ॥ कुंभकर्णस्ततोजातोमहापर्वतसन्निभः ॥ ५७ ॥ ततःशूर्पणखानामजातारावणसोदरी ॥ ततोविभीषणो
जातःशांतात्मासौम्यदर्शनः ॥ ५८ ॥ स्वाध्यायीनियताहारोनित्यकर्मपरायणः ॥ कुंभकर्णस्तुदुष्टात्माद्विजान्संतुष्टचे
तसः ॥ ५९ ॥ भक्षयन्नृषिसंघांश्चविचचारातिदारुणः ॥ रावणोपिमहासत्त्वोलोकानांभयदायकः ॥ ववृधेलोकनाशा
यत्यामयोदेहिनामिव ॥ ६० ॥

जन्ममात्रेण ॥ ५६ ॥ नाशहेतूनिरक्षोवंशस्यलोकानांचेतिशेषः ॥ ५७ ॥ ५८ ॥ स्वाध्यायीवेदाध्ययनवान्नित्यकर्माग्निहोत्रादितुष्टचेतसः अतिशांतानि त्यर्थः भक्षयन्नित्यनेनान्वयः ॥ ५९ ॥ आमयोरोगः ॥ ६० ॥

---

[1] पश्चिमःकनिष्ठः. [2] कामरूपत्वाच्चांतःपुरादौएकवक्त्रत्वंद्विभुजत्वंचास्येतिबोध्यम् . [3] अपत्यप्रत्ययसंनियोगेनविश्रवसोरवणादेशः .

सकलांतरस्थंजानासि सर्वांतर्यामित्वात् तदेवस्फुटयति सर्वहृदिस्थितोहीत्यंतेन हिर्यतइत्यर्थे विज्ञानदृक्विज्ञानेनस्वरूपेणदृक्सर्वद्रष्टाअनेनचित्तादिकरणांतरनैरपेक्ष्यमुक्तं अतएवसाक्षीसाक्षाद्द्रष्टा नन्वहंमनुष्यःकुतोममेदृशत्वंतत्राह त्वंलीलेति वस्तुतोनमनुष्यस्त्वमितिभावः स्वमहिमन्स्वमात्रज्ञेयमहिमन् अन्यैस्त्वन्महिमादुर्ज्ञेयइत्यर्थः मायागुणैःरजआदिभिर्नाज्यसेनस्पृश्यसे एवंसर्वज्ञस्यतवाग्रेकथनंयद्यप्यनुचितंतथापिभवतालीलार्थंप्रतिचोदितःपृष्टोरक्षोद्भवंवक्ष्यामि रक्षोद्भवमित्यत्रसंधिरार्षः ॥ ६१ ॥ ननुत्वंमामेवंकथंज्ञातवानसीत्यत्राह जानामीति मूढोप्यहंभवदनुग्रहतएवंविशेषणंत्वांजानामि अनंतंदेशकालापरिच्छेद्यं अक्षराजत्वाभ्यांनाशोत्पत्तिराहित्यमुक्तं सांसारिकान्प्रतिगूढंगुप्तंकृतंनिजरूपंयेनतं अथापित्वामनुप्रवृत्तःत्वत्प्रवृत्तिमार्गमनुप्रवृत्तोंगीकृतप्रवृत्तिमार्ग इहलोकेचरामि ॥ ६५ ॥ इनवंशेसूर्यवंशेपवित्राकीर्तिर्यस्यसः एतत्सकलमप्युदाहृतमंतर्यामित्वादिदृश्यमानंजगच्चमायाश्रितमेव तत्रहेतुःअनन्यकत्वात् नविद्यतेऽन्यत्यस्यसोनन्यकस्तस्यभावस्तत्त्वंममतादृशत्वात्धर्मरहितत्वात्इतराधारत्वादेरप्यसंभवात्सर्वंधर्मजालमपिगृह्यमाणंमायाश्रितमेवजानीहीतिशेषः स्वावतारस्यमुख्यप्रयोजनमाह मत्कीर्तनमिति स्वकीर्तनद्वारापापहरणार्थमेवावतारइतिभावः ॥ ६३ ॥ इतिश्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिबिरुदावलीविराजमानस्यहिम्मतिवर्मणःपुत्रस्यश्रीरामवर्मणःकृतावध्यात्मरामायणसेतौउत्तरकांडेप्रथमःसर्गः ॥ १ ॥

रामत्वंसकलांतरस्थमभितोजानासिविज्ञानदृक्साक्षीसर्वहृदिस्थितोहिपरमोनित्योदितोनिर्मलः॥त्वंलीलामनुजाकृतिःस्वमहिमामायागुणैर्नाज्यसेलीलार्थंप्रतिचोदितोद्यभवतोवक्ष्यामिरक्षोद्भवम्॥ ६१ ॥ जानामिकेवलमनंतमचिंत्यशक्तिंचिन्मात्रमक्षरमजंविदितात्मतत्त्वम्॥त्वांरामगूढनिजरूपमनुप्रवृत्तोमूढोप्यहंभवदनुग्रहतश्चरामि ॥ ६२ ॥ एवंवदंतमिनवंशपवित्रकीर्तिःकुंभोद्भवंरघुपतिःप्रहसन्बभाषे ॥ मायाश्रितंसकलमेतदनन्यकत्वान्मत्कीर्तनंजगतिपापहरंनिबोध ॥ ६३ ॥ ॥इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेउत्तरकांडेप्रथमःसर्गः ॥ १ ॥

॥ १ ॥ अथेति तत्रविश्रवसआश्रमे पितरंविश्रवसम् ॥ २ ॥ सामीप्यंगत्वासामीप्यंप्राप्य ॥ ३ ॥ ४ ॥ अचिरेणेतिच्छेदः ॥ ५ ॥ मांपश्यशिवेनचक्षुषेतिशेषः दुष्करंतपःकर्तुमित्यन्वयः ॥ ६ ॥ फलस्यवांछितस्यसिद्ध्यर्थं सहानुजःकुंभकर्णविभीषणसहितः स्वंस्वंनियमंस्वस्ववासनोद्भूतंराजसतामससात्त्विकरूपम् ॥ ७ ॥

श्रीरामवचनंश्रुत्वापरमानंदनिर्भरः ॥ मुनिःप्रोवाचसदसिसर्वेषांतत्रशृण्वताम् ॥ १ ॥ अथवित्तेश्वरोदेवस्तत्रकालेन
केनचित् ॥ आययौपुष्पकारूढःपितरंद्रष्टुमंजसा ॥ २ ॥ दृष्ट्वातंकैकसीतत्रभ्राजमानंमहौजसम् ॥ राक्षसीपुत्रसामी
प्यंगत्वारावणमब्रवीत् ॥ ३ ॥ पुत्रपश्यधनाध्यक्षंज्वलंतंस्वेनतेजसा ॥ त्वमप्येवंयथाभूयास्तथायत्नंकुरुप्रभो ॥ ४ ॥
तच्छ्रुत्वारावणोरोषात्प्रतिज्ञामकरोद्द्रुतम् ॥ धनदेनसमोवापिह्यधिकोवाचिरेणतु ॥ ५ ॥ भविष्याम्यंबमांपश्यसं
तापंत्यजसुव्रते ॥ इत्युक्त्वादुष्करंकर्तुंतपःसदशकंधरः ॥ ६ ॥ आगमत्फलसिद्ध्यर्थंगोकर्णंतुसहानुजः ॥ स्वंस्वंनिय
ममास्थायभ्रातरस्तेतपोमहत् ॥ ७ ॥ आस्थितादुष्करंघोरंसर्वलोकैकतापनम् ॥ दशवर्षसहस्राणिकुंभकर्णोकरोत्त
पः ॥ ८ ॥ विभीषणोऽपिधर्मात्मासत्यधर्मपरायणः ॥ पंचवर्षसहस्राणिपादेनैकेनतस्थिवान् ॥ ९ ॥ दिव्यवर्षसहस्रंतु
निराहारोदशाननः ॥ पूर्णेवर्षसहस्रेतुशीर्षमग्नौजुहावसः ॥ एवंवर्षसहस्राणिनवतस्यातिचक्रमुः ॥ १० ॥ अथवर्षसहस्रे
तुदशमेदशमंशिरः ॥ छेत्तुकामस्यधर्मात्माप्राप्तश्चाथप्रजापतिः ॥ वत्सवत्सदशग्रीवप्रीतोस्मीत्यभ्यभाषत ॥ ११ ॥ वरं
वरयदास्यामियत्तेमनसिकांक्षितम् ॥ दशग्रीवोपितच्छ्रुत्वाप्रहृष्टेनांतरात्मना ॥ १२ ॥ अमरत्वंवृणोमीशवरदोयदिमे
भवान् ॥ सुपर्णनागयक्षाणांदेवतानांतथासुरैः ॥ अवध्यत्वंतुमेदेहितृणभूताहिमानुषाः ॥ १३ ॥ दुष्करंअन्यैरितिशेषः

॥ ८ ॥ ९ ॥ १० ॥ दशमंशिरश्छेत्तुकामस्यप्रजापतिःप्राप्तःसमीपमितिशेषः ॥ ११ ॥ १२ ॥ वृतममरत्वमेवभगवदिच्छावशात्स्वयमेवविवृणोति सुपर्णेत्यादि ॥ १३ ॥

---

१ सापत्नत्वात् ।

तथास्त्वित्यस्यावददितिशेषः ॥ १४ ॥ अक्षयाणिसुपर्णादिकृतक्षयरहितानि ॥ १५ ॥ १६ ॥ विभीषणस्यधर्मविषयबुद्धिप्राप्तिकामनयातपःकर्तृत्वादरेणवत्सेतिद्विःसंबोधनम् ॥ १७ ॥ तदेवाह देवमेइत्यादिना ॥ १८ ॥ तथैवचभविष्यसि धर्मबुद्धिरेवभविष्यसि ॥ १९ ॥ २० ॥ वाण्यादेवप्रार्थितया ॥ २१ ॥

॥ ४ ॥ तथास्त्वितिप्रजाध्यक्षःपुनराहदशाननम् ॥ अग्नौहुतानिशीर्षाणियानितेऽसुरपुंगव ॥ १४ ॥ भविष्यंतियथापूर्वमक्षयाणिच[1]सत्तम ॥ १५ ॥ एवमुक्त्वाततोरामदशग्रीवंप्रजापतिः ॥ विभीषणमुवाचेदंप्रणतंभक्तवत्सलः ॥ १६ ॥ विभीषणत्वयावत्सकृतंधर्मार्थमुत्तमम् ॥ तपस्ततोवरंवत्सवृणीष्वाभिमतंहितम् ॥ १७ ॥ विभीषणोपितंनत्वाप्रांजलिर्वाक्यमब्रवीत् ॥ देवमेसर्वदाबुद्धिर्धर्मेतिष्ठतुशाश्वती ॥ मारोचयत्वधर्मेमेबुद्धिःसर्वत्रसर्वदा ॥ १८ ॥ ततःप्रजापतिःप्रीतोविभीषणमथाब्रवीत् ॥ वत्सत्वंधर्मशीलोसितथैवचभविष्यसि ॥ १९ ॥ अयाचितोपितेदास्येत्ह्यमरत्वंविभीषण ॥ कुंभकर्णमथोवाचवरंवरयसुव्रत ॥ २० ॥ वाण्याव्याप्तोथतंप्राहकुंभकर्णःपितामहम् ॥ स्वप्स्यामिदेवषण्मासान्दिनमेकंतुभोजनम् ॥ २१ ॥ एवं[2]मस्त्वितितंप्राहब्रह्मादृष्ट्वादिवौकसः ॥ सरस्वतीचतद्वक्त्रान्निर्गताप्रययौदिवं ॥ २२ ॥ कुंभकर्णस्तुदुष्टात्माचिंतयामासदुःखितः ॥ अनभिप्रेतमेवास्याल्किंनिर्गतमहोविधिः ॥ २३ ॥ सुमालीवरलब्धांस्तान्ज्ञात्वापौत्रान्निशाचरान् ॥ पातालान्निर्भयःप्रायात्प्रहस्तादिभिरन्वितः ॥ २४ ॥ दशग्रीवंपरिष्वज्यवचनंचेदमब्रवीत् ॥ दिष्ट्यातेपुत्रसंवृत्तोवांछितोमेमनोरथः ॥ २५ ॥ यद्भयाच्चवयंलंकांत्यक्त्वायातारसातलम् ॥ तद्गतंनोमहाबाहोमहद्विष्णुकृतंभयम् ॥ २६ ॥

॥ २२ ॥ आस्यादितिच्छेदः अहोविधिर्दुर्लंघ्यइतिशेषः ॥ २३ ॥ वरलब्धान्प्राप्तवरान्पौत्रान्पुत्रीपुत्रान् बिदादित्वादञ् प्रायात्रावणादिसमीपमितिशेषः ॥ २४ ॥ मेवांछितोमनोरथस्तेदिष्ट्यासंवृत्तः ॥ २५ ॥ अतोयद्भयादिति तद्विष्णुकृतंभयंनोस्माकंगतम् सर्वावध्यत्वस्यत्वयाप्राप्तत्वात् ॥ २६ ॥ ॥ ४ ॥

---

१ चकारात् छंदतस्तवरूपंचमनसायद्यथेप्सितमित्यन्यत्रोक्तंसंग्राह्यं छंदतइच्छामात्रेणेत्यर्थः २ एवमित्यत्रषण्मासादर्वाग्जागरणंनेतिनियमः.

इयंलंकापूर्वमस्माभिरुषिता अनेनास्मत्संबंधादियंतवधनभूतेतिध्वनितम् इदानींतेभ्रात्राधनदेनाक्रांतांत्वंप्रत्यानेतुंस्वाधीनांकर्तुमर्हसि ॥ २७ ॥ ननुज्येष्ठेभ्रातरिकथंबलंयोग्यंतत्राह राज्ञांबंधुःकुतःसुहृत्कुतः सर्वथैतानुपमर्द्यैवराज्यप्रवृत्तेरितिभावः ॥२८॥ एवंश्रुत्वारावणवाक्यंश्रुत्वेत्यर्थः ॥ २९ ॥ ३० ॥ सौभ्रात्रं भ्रात्रादिभिःप्रीतिः ॥ ३१ ॥ देवैरनुष्ठितंलंकाहरणरूपंवैरमिदानींतनमेवनकिंतुप्राचीनमेव एवंचैतैरस्मद्द्वेषकरणवदस्माकमपितद्द्वेषकरणंनदोषायेतिभावः

अस्माभिःपूर्वमुषितालंकेयंधनदेनते ॥ भ्रात्राऽक्रांतामिदानींत्वंप्रत्यानेतुमिहार्हसि ॥ २७ ॥ साम्नावाथबलेनापिराज्ञांबंधुःकुतःसुहृत् ॥ इत्युक्तोरावणःप्राहनार्हस्येवंप्रभाषितुम् ॥ २८ ॥ वित्तेशोगुरुरस्माकमेवंश्रुत्वातमब्रवीत् ॥ प्रहस्तःप्रश्रितंवाक्यंरावणंदशकंधरम् ॥२९ ॥ शृणुरावणयत्नेननैवंत्वंवक्तुमर्हसि ॥ नाधीताराजधर्मास्तेनीतिशास्त्रंतथैवच ॥ ३० ॥ शूराणांनहिसौभ्रात्रंशृणुमेवदतःप्रभो ॥ कश्यपस्यसुतादेवाराक्षसाश्चमहाबलाः॥ ३१ ॥ परस्परमयुध्यंतत्यक्त्वासौहृदमायुधैः ॥ नैवेदानींतनंराजन्वैरंदेवैरनुष्ठितम् ॥ ३२ ॥ प्रहस्तस्यवचःश्रुत्वादशग्रीवोदुरात्मनः॥ तथेतिक्रोधताम्राक्षस्त्रिकुटाचलमन्वगात् ॥ ३३ ॥ दूतंप्रहस्तंसंप्रेष्यनिष्कास्यधनदेश्वरम् ॥ लंकामाक्रम्यसचिवैराक्षसैःसुखमास्थितः ॥ ३४ ॥ धनदःपितृवाक्येनत्यक्त्वालंकांमहायशाः ॥ गत्वाकैलासशिखरंतपसातोषयच्छिवम् ॥ ॥ ३५॥ तेनसख्यमनुप्राप्यतेनैवपरिपालितः ॥ अलकांनगरींतत्रनिर्ममेविश्वकर्मणा ॥ ३६ ॥ दिक्पालत्वंचकारात्रशिवेनपरिपालितः ॥ रावणोराक्षसैःसार्धमभिषिक्तःसहानुजैः ॥ ३७ ॥

॥ ३२ ॥ दुरात्मनःप्रहस्तस्येत्यन्वयः ॥ ३३ ॥ धनदनामकमीश्वरंनिष्कास्य ॥ ३४ ॥ धनदःतद्दूतगमनोत्तरंपितृसमीपंगत्वारावणएवमाहात्रकिमुचितमितिपृष्टवांस्तेनचत्यागएवोचितोस्यावध्यत्वादित्युक्तेतांत्यक्तवानितिगाथापौराणिकी ॥ ३५ ॥ निर्ममेकारितवान् ॥ ३६ ॥ रावणोऽनुजैःसार्धंराक्षसैरभिषिक्तःलंकाराज्यइतिशेषः ॥ ३७॥

असुराणांतदवताररूपरक्षसाम् यद्वाक्रूरकर्मत्वाद्रक्षःस्वप्यसुरपदप्रयोगःएवमसुरेष्वपिराक्षसपदप्रयोगइतिबोध्यम् कालखंजायतद्वंश्याय नाम्नाविद्युज्जिह्वाय भगिनींशूर्पणखाम् ॥ ३८ ॥ राक्षसानांविश्वकर्मादितेःसुतोमयःमंदोदरींकन्यांरावणायददौ पुनःशक्तिंचामोघांस्वनिर्मितांददौ ॥ ३९ ॥४०॥ स्वयंदत्तामिति

राज्यंचकारासुराणांत्रिलोकींबाधयन्खलः ॥ भगिनींकालखंजायददौविकटरूपिणीम् ॥ ३८ ॥ विद्युज्जिह्वायनाम्ना
सौमहामायीनिशाचरः ॥ ततोमयोविश्वकर्माराक्षसानांदितेःसुतः ॥ ३९ ॥ सुतांमंदोदरींनाम्नाददौलोकैकसुंदरीम् ॥
रावणायपुनःशक्तिममोघांप्रीतमानसः ॥ ४० ॥ वैरोचनस्यदौहित्रींवृत्रज्वालेतिविश्रुताम् ॥ स्वयंदत्तामुदवहत्कुंभ
कर्णायरावणः ॥ ४१ ॥ गंधर्वराजस्यसुताशैलूषस्यमहात्मनः ॥ विभीषणस्यभार्यार्थेधर्मज्ञांसमुदावहत् ॥ ४२ ॥ सं[1]
रमांनामसुभगांसर्वलक्षणसंयुताम् ॥ ततोमंदोदरीपुत्रंमेघनादमजीजनत् ॥ ४३ ॥ जातमात्रस्तुयोनादंमेघवत्समु
मोचह ॥ ततःसर्वेब्रुवन्मेघनादोयमितिचासकृत् ॥ ४४ ॥ कुंभकर्णस्ततःप्राहनिद्रामांबाधतेप्रभो ॥ ततश्चकारयामास
गुहांदीर्घांसुविस्तराम् ॥ ४५ ॥ तत्रसुष्वापमूढात्माकुंभकर्णोविघूर्णितः ॥ निद्रितेकुंभकर्णेतुरावणोलोकरावणः ॥ ४६ ॥
ब्राह्मणान्ऋषिमुख्यांश्चदेवदानवकिन्नरान् ॥ देवश्रियोमनुष्यांश्चनिजघ्नेसमहोरगान् ॥ ४७ ॥ धनदोपिततःश्रुत्वारा
वणस्याक्रमंप्रभुः ॥ अधर्ममाकुरुष्वेतिदूतवाक्यैर्न्यवारयत् ॥ ४८ ॥ ततःक्रुद्धोदशग्रीवोजगामधनदालयम् ॥ विनि
र्जित्यधनाध्यक्षंजहारोत्तमपुष्पकम् ॥ ४९ ॥

तत्पित्रेतिशेषः ॥ ४१ ॥ ४२ ॥ ४३ ॥ मेघनादेतिनाम्नोन्वर्थत्वमाह जातमात्रइति ॥ ४४ ॥ ४५ ॥ ४६ ॥ देवादीन्समहोरगान्निजघ्ने देवश्रियश्चनिजघ्नेहतवानित्यर्थः देवस्त्रियइतिपाठांतरम् ॥ ४७ ॥ अक्रमंदेवादिष्वन्यायाचरणम् ॥ ४८ ॥ उत्तमपुष्पकंवाहनेषूत्तमंपुष्पकाख्यंवाहनमित्यर्थः ॥ ४९ ॥

---

[1] अस्यामानससरस्तीरेजन्मास मानसंसरोजलद्वागमनिमित्ततस्तच्छिशुपर्यंतंववृधेततोभीतायाःकन्यायाआक्रंदितंश्रुत्वातस्यामात्राकन्यास्नेहेनसरोमावर्धस्वेत्युक्तं ततःसासरमाऽभवत् पृषोदरादित्वात्साधुः

स्वर्गलोकंमेरूर्ध्वस्थितंशक्रलोकं अनेनयमादिलोकास्तदधःस्थिताइतिध्वनयति ॥ ५० ॥ दैवतैःसहितेनेंद्रेणास्ययुद्धमभवदित्यर्थः ॥ ५१ ॥ ५२ ॥ प्रथ
मतइंद्रग्रहणंततस्तस्यबंधनम् ततोबद्धस्यस्वपुरेआनयनम् ॥ ५३ ॥ इंद्रमोचनप्रतिदानत्वेनतदभीष्टानेकवरदानम् ॥ ५४ ॥ ५५ ॥ शापमाह वानरैरिति को

ततोयमंचवरुणंनिर्जित्यसमरेसुरः॥ स्वर्गलोकमगात्तूर्णंदेवराजजिघांसया ॥ ५० ॥ ततोऽभवन्महद्युद्धमिंद्रेणसहदै
वतैः॥ ततोरावणमभ्येत्यबबंधत्रिदशेश्वरः ॥ ५१ ॥ तच्छ्रुत्वासहसागत्यमेघनादःप्रतापवान्॥ कृत्वाघोरंमहद्युद्धंजि
त्वात्रिदशपुंगवान् ॥ ५२ ॥ इंद्रंगृहीत्वाबद्ध्वासौमेघनादोमहाबलः॥ मोचयित्वातुपितरंगृहीत्वेंद्रंययौपुरम् ॥ ५३ ॥
ब्रह्मातुमोचयामासदेवेंद्रंमेघनादतः॥ दत्त्वावरान्बहूंस्तस्मैब्रह्मास्वभवनंययौ ॥ ५४ ॥ रावणोविजयीलोकान्सर्वान्
जित्वाक्रमेणतु॥ कैलासंतोलयामासबाहुभिःपरिघोपमैः ॥ ५५ ॥ तत्रनंदीश्वरेणैवंशप्तोयंराक्षसेश्वरः॥ वानरैर्मानु
षैश्चैवनाशंगच्छेतिकोपिना॥ ५६ ॥ शप्तोप्यगणयन्वाक्यंययौहैहयपत्तनम्॥ तेनबद्धोदशग्रीवःपुलस्त्येनविमोचितः
॥ ५७ ॥ ततोपिबलमासाद्यजिघांसुर्हरिपुंगवम्॥ धृतस्तेनैवकक्षेणवालिनादशकंधरः ॥ ५८ ॥ भ्रामयित्वातुचतुरः
समुद्रान्रावणंहरिः ॥ विसर्जयामासततस्तेनसख्यंचकारसः ॥ ५९ ॥ रावणःपरमप्रीतएवंलोकान्महाबलः॥ चकार
स्ववशेरामबुभुजेस्वयमेवतान् ॥ ६० ॥ एवंप्रभावोराजेंद्रदशग्रीवःसहेंद्रजित् ॥ त्वयाविनिहतःसंख्येरावणोलोक
रावणः ॥ ६१ ॥

पिनाकोपवता कैलासचालनादयंकोपः वानरमुखंनंदीश्वरंदृष्ट्वारावणेनहसितमित्यतोवाशापः ॥ ५६ ॥ अगणयन्किमस्यशापेनभवितेतितच्छापगणनामकुर्व
न् हैहयपत्तनंसहस्रार्जुननगरम् ॥ ५७ ॥ बलंहैहयप्रतिरूपंबलम् हरिपुंगवंवालिनम् तद्धननोद्यमेनगतस्यविपरीतंततएवानिष्टलाभइत्याह तेनैवकक्षेणधृत
इति विषममत्रालंकारः ॥ ५८ ॥ सरावणः ॥ ५९ ॥ ६० ॥ ६१ ॥

अत्ररावणबंधकेंद्रबंधकतयारामपृष्टइंद्रजितउत्कर्षउक्तः ॥ ६२ ॥ एतत्तवानाश्चर्यायेत्याह भवानिति आदिकृत्उत्पत्तिकर्ता जगतोभगवत्स्वरूपत्वमेवाह
त्वन्नाभीति अग्निस्तेइति मुखादग्निरजायतेतिश्रुतेर्वागग्निमप्येतीतिश्रुतेश्च ॥ ६३ ॥ ६४ ॥ बाहुभ्यामित्याद्यपिश्रुतिसिद्धमितितद्विदांस्पष्टमेव ॥ ६५ ॥ प्रा

मेघनादश्चनिहतोलक्ष्मणेनमहात्मना ॥ कुंभकर्णश्चनिहतस्त्वयापर्वतसन्निभः ॥ ६२ ॥ भवान्नारायणःसाक्षाज्जगता
मादिकृद्विभुः ॥ त्वत्स्वरूपमिदंसर्वंजगत्स्थावरजंगमम् ॥ ६३ ॥ त्वन्नाभिकमलोत्पन्नोब्रह्मालोकपितामहः ॥ अग्निस्ते
मुखतोजातोवाचासहरघुत्तम ॥ ६४ ॥ बाहुभ्यांलोकपालौघाश्चक्षुर्भ्यांचंद्रभास्करौ ॥ दिशश्चविदिशश्चैवकर्णाभ्यां
तेसमुत्थिताः ॥ ६५ ॥ घ्राणात्प्राणःसमुत्पन्नश्चाश्विनौदेवसत्तमौ ॥ जंघाजानूरुजघनाद्भुवर्लोकादयोऽभवन् ॥ ६६ ॥
कुक्षिदेशात्समुत्पन्नाश्चत्वारःसागराहरे ॥ स्तनाभ्यामिंद्रवरुणौवालखिल्याश्चरेतसः ॥ ६७ ॥ मेढ्राद्यमोगुदान्मृत्युर्म
न्योरुद्रस्त्रिलोचनः ॥ अस्थिभ्यःपर्वताजाताःकेशेभ्योमेघसंहतिः ॥ ६८ ॥ ओषध्यस्तवरोमभ्योनखेभ्यश्चखरादयः ॥
त्वंविश्वरूपःपुरुषोमायाशक्तिसमन्वितः ॥ ६९ ॥ नानारूपइवाभासिगुणव्यतिकरेसति ॥ त्वामाश्रित्यैवविबुधाःपिबं
त्यमृतमध्वरे ॥ ७० ॥ त्वयासृष्टमिदंसर्वंविश्वंस्थावरजंगमम् ॥ त्वामाश्रित्यैवजीवंतिसर्वेस्थावरजंगमाः ॥ ७१ ॥

णःप्राणवायुः जंघाजानूरुजघनादितिसमाहारद्वंद्वः ॥ ६६ ॥ वालखिल्याऋषिविशेषाः ॥ ६७ ॥ ६८ ॥ विश्वरूपःविराडित्यर्थः मायागुणानांसत्त्वादीनां
व्यतिकरेसतिआधिक्यन्यूनताभ्यांश्लेषेसतिनानारूपोब्रह्मविष्णुरुद्रादिरूपोभासि ॥ ६९ ॥ अग्निरूपंत्वामाश्रित्यैवअमृतंहविरध्वरेदेवाःपिबंति ॥ ७० ॥
त्वमेवसृष्टिस्थितिकर्तेत्याह त्वयेति ॥ ७१ ॥

त्वद्युक्तमखिलंवस्तुव्यवहारेपिराघव ॥ क्षीरमध्यगतंसर्पिर्यथाव्याप्याखिलंपयः ॥ ७२ ॥ त्वद्भासाभासतेर्कादिनत्वं
तेनावभाससे॥ सर्वगंनित्यमेकंत्वांज्ञानचक्षुर्विलोकयेत् ॥ ७३ ॥ नाज्ञानचक्षुस्त्वांपश्येदंधदृक्भास्करंयथा ॥ योगि
नस्त्वांविचिन्वंतिस्वदेहेपरमेश्वरम् ॥ ७४ ॥ अतन्निरसनमुखैर्वेदशीर्षैरहर्निशम् ॥ त्वत्पादभक्तिलेशेनगृहीतायदियो
गिनः ॥ ७५ ॥ विचिन्वंतोहिपश्यंतिचिन्मात्रंत्वांनचान्यथा॥ मयाप्रलपितंकिंचित्सर्वज्ञस्यतवाग्रतः ॥ क्षंतुमर्हसिदेवे
शतवानुग्रहभागहम् ॥ ७६ ॥ दिग्देशकालपरिहीनमनन्यमेकंचिन्मात्रमक्षरमजंचलनादिहीनम् ॥ सर्वज्ञमीश्वरम
नंतगुणंव्युदस्तमायंभजेरघुपतिंभजतामभिन्नम् ॥ ७७ ॥ इतिश्रीमद्रामायणेउत्तरकांडेद्वितीयःसर्गः ॥ २ ॥

व्यवहारेतत्कालेपि अखिलंवस्तुत्वद्युक्तमेव सत्त्वेनभातत्वेनचसर्वव्यवहारःसत्ताभातत्वेचसर्वत्रत्वदीयेएवेतिभावः तदेवदृष्टांतेनोपपादयति सर्पिर्यथाखिलंपयोव्याप्यतिष्ठतितथात्वमखिलंव्याप्यतिष्ठसीति सर्वत्रसदितिभासतेइतिचव्यवहारः तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभातीतिश्रुतेः ॥ ७२ ॥ तदेवाह त्वद्भासेति ईदृशस्त्वंनसर्ववेद्यइत्याह सर्वगमिति ॥ ७३ ॥ ज्ञानचक्षुषोप्यात्मन्येवत्वांपश्यंतीत्याह योगिनइति नतुस्वस्माद्भेदेनेत्यर्थः एतेनसर्वत्रचैतन्यभूतस्त्वमेवेतिसूचितं विचिन्वंतिपश्यंति ॥ ७४ ॥ तथादर्शनेकारणमाह अतदिति अतत्दृश्यंजडंतन्निरसनमुखैर्नस्त्रीनपुमानित्यादिरूपैर्वेदशीर्षैरुपनिषद्भागैःपश्यंति वस्तुतोनिर्धर्मकत्वात्केनापिरूपेणवक्तुमशक्यतयानिषेधमुखेनैवश्रुतयोब्रह्मप्रतिपादयंतीतिभावः तदपितेषांज्ञानंत्वद्भक्तिंविनोपनिषन्मात्रेणनेत्याह त्वत्पादेति अन्यथानेतिभावः ॥ ७५ ॥ विचिन्वंतःउपनिषत्सुविचारयंतःअन्यथाकेनचिद्धर्मेणधर्मवंतंनपश्यंतीत्यर्थः ॥ ७६ ॥ भजतांभक्तानांअभिन्नंस्वाभिन्नत्वेनबुद्धिविषयम् ॥ ७७ ॥ इतीश्रीमत्सकल० श्रीरामवर्मणःकृतौउत्तरकांडेद्वितीयःसर्गः ॥ २ ॥

वालीति रवींद्राविति आत्मावैपुत्रनामासीतिश्रुतेस्तयोरेववानराकारत्वमुक्तम् ॥ १ ॥ सभाआस्तइतिच्छेदः ॥ २ ॥ योगंध्यानम् ॥ ३ ॥ किंचिद्ध्यात्वातदत्यजत् भूमावितिशेषः भूमौपतितमात्रेणतेनसलिलेनदार्ढ्यंप्राप्तमितिशेषः तस्मात्कपिर्जातः ॥ ४ ॥ द्रुहिणोब्रह्मा मेसमीपेवसेत्यन्वयः ब्रह्मणेति एवमुक्तइत्यन्वयः ऋक्षाधिपःसएवकपिः ॥ ६ ॥ उद्यतउद्यमवान् फलमूलार्थंतल्लाभार्थमद्रौपर्यटन्वापीमपश्यत् ॥७॥ छायामयंस्वच्छायारूपं प्रतिकपिंस्वविरोधिकपिम्

श्रीरामउवाच ॥ वालिसुग्रीवयोर्जन्मश्रोतुमिच्छामितत्त्वतः ॥ रवींद्रौवानराकारौजज्ञातइतिनःश्रुतम् ॥ १ ॥ अगस्त्यउवाच ॥ मेरोःस्वर्णमयस्याद्रेर्मध्यशृंगेमणिप्रभे ॥ तस्मिन्सभास्तेविस्तीर्णाब्रह्मणःशतयोजना ॥ २ ॥ तस्यांचतुर्मुखःसाक्षात्कदाचिद्योगमास्थितः ॥ नेत्राभ्यांपतितंदिव्यमानंदसलिलंबहु ॥ ३ ॥ तद्गृहीत्वाकरेब्रह्माध्यात्वाकिंचित्तदत्यजत् ॥ भूमौपतितमात्रेणतस्माज्जातोमहाकपिः ॥ ४ ॥ तमाहद्रुहिणोवत्सकिंचित्कालंवसात्रमे ॥ समीपेसर्वशोभाढ्येततःश्रेयोभविष्यति ॥ ५ ॥ इत्युक्तोन्यवसत्तत्रब्रह्मणावानरोत्तमः ॥ एवंबहुतिथेकालेगतेऋक्षाधिपःसुधीः ॥ ॥ ६ ॥ कदाचित्पर्यटन्नद्रौफलमूलार्थमुद्यतः ॥ अपश्यद्दिव्यसलिलांवापींमणिशिलान्विताम् ॥ ७ ॥ पानीयंपातुमागच्छत्तत्रच्छायामयंकपिम् ॥ दृष्ट्वाप्रतिकपिंमत्वानिपपातजलांतरे ॥ ८ ॥ तत्रादृष्ट्वाहरिंशीघ्रंपुनरुत्प्लुत्यवानरः ॥ अपश्यत्सुंदरींरामामात्मानंविस्मयंगतः ॥ ९ ॥ ततःसुरेशोदेवेशंपूजयित्वाचतुर्मुखम् ॥ गच्छन्मध्याह्नसमयेदृष्ट्वानारींमनोरमाम् ॥ १० ॥ कंदर्पशरविद्धांगस्त्यक्तवान्वीर्यमुत्तमम् ॥ तामप्राप्येवतद्बीजंवालदेशेपतद्भुवि ॥ ११ ॥ वालीसमभवत्तत्रशक्रतुल्यपराक्रमः ॥ तस्यदत्त्वासुरेशानःस्वर्णमालांदिवंगतः ॥ १२ ॥

॥ ८ ॥ आत्मानंसुंदरींरामांतद्रूपंस्त्रीरूपमपश्यत् ॥ ९ ॥ सुरेशइंद्रश्चतुर्मुखंपूजयित्वापुरंगच्छन्मनोरमांतांनारींदृष्ट्वातामप्राप्यैवतयासहमीलनंविनैववीर्यंत्यक्तवान् ॥ १० ॥ ११ ॥ १२॥

तस्यग्रीवादेशेमहद्बीजमसृजत् त्यक्तवान् ॥ १३ ॥ १४ ॥ पूर्ववत्पुंरूपमित्यर्थः ॥ १५ ॥ १६ ॥ समाश्वास्यभाविनोदुर्वारत्वान्ममस्त्रीरूपताकथमित्यादिखेदोमास्त्वित्याश्वास्येत्यर्थः देवतादूतंदेवदूतमित्यर्थः ॥ १७ ॥ १८ ॥ सौभाग्यवलितांतद्युक्ताम् ॥ १९ ॥ वशेभविष्यंतिअनुगाश्चभविष्यंति ॥ २० ॥

भानुरप्यागतस्तत्रतदानीमेवभामिनीम् ॥ दृष्ट्वाकामवशोभूत्वाग्रीवादेशेसृजन्महत् ॥ १३॥ बीजंतस्यास्ततःसद्योम
हाकायोऽभवद्धरिः ॥ तस्यदत्त्वाहनूमंतंसहायार्थंगतोरविः ॥ १४ ॥ पुत्रद्वयंसमादायगत्वासानिद्रिताक्कचित् ॥ प्रभा
तेऽपश्यदात्मानंपूर्ववद्वानराकृतिम् ॥ १५ ॥ फलमूलादिभिःसार्धंपुत्राभ्यांसहितःकपिः ॥ नत्वाचतुर्मुखस्याग्रेऋक्षरा
जःस्थितःसुधीः ॥ १६ ॥ ततोऽब्रवीत्समाश्वास्यबहुशःकपिकुंजरम् ॥ तत्रैकंदेवतादूतमाहूयामरसन्निभम् ॥ १७ ॥
गच्छदूतमयादिष्टोगृहीत्वावानरोत्तमम् ॥ किष्किंधांदिव्यनगरींनिर्मितांविश्वकर्मणा ॥ १८ ॥ सर्वसौभाग्यवलितां
देवैरपिदुरासदाम् ॥ तस्यांसिंहासनेवीरंराजानमभिषेचय ॥ १९ ॥ सप्तद्वीपगतायेयेवानरासंतिदुर्जयाः ॥ सर्वेतेऋ
क्षराजस्यभविष्यतिवशेऽनुगाः ॥ २० ॥ यदानारायणःसाक्षाद्रामोभूत्वासनातनः ॥ भूभारासुरनाशायसंभविष्यति
भूतले ॥ २१॥ तदासर्वेसहायार्थेतस्यगच्छंतुवानराः ॥ इत्युक्तोब्रह्मणादूतोदेवानांसमहामतिः ॥ २२ ॥ यथाज्ञप्तस्त
थाचक्रेब्रह्मणातंहरीश्वरम् ॥ देवदूतस्ततोगत्वाब्रह्मणेतन्निवेदयत् ॥ २३ ॥ तदादिवानराणांसाकिष्किंधाऽभून्नृपा
श्रयः ॥ सर्वेश्वरस्त्वमेवासीरिदानींब्रह्मणाऽर्थितः ॥ २४ ॥

॥ २१ ॥ २२ ॥ तत्तस्यकिष्किंधाराज्यादिदानम् ॥ २३ ॥ तदादितत्प्रभृति हेनृप वानराणांसाकिष्किंधाआश्रयोऽभूत् त्वमेवेदानींब्रह्मणाऽर्थितःसन्सर्वेश्वरःसर्ववानरेश्वरः ॥ २४ ॥

लीलानृदेहिनालीलागृहीतमनुष्यदेहेन अयंपराक्रमस्तवनाश्चर्यायेत्याह सर्वभूतेति यस्त्वामेवंवेत्तिसोऽपिस्वेच्छयासृष्टिसंहारसमर्थोभवतिचेत्साक्षात्तवकिं वाच्यमितिभावः ॥ २५ ॥ नन्वीदृशस्यानाश्चर्यस्यकिंवर्णनेनतत्राह तथाऽपीति सर्वलोकपापनाशायात्मनस्तेषांसुखायचानाश्चर्यमपिआश्चर्यवत्कृत्वावर्ण्यतेइत्यर्थः ॥ २६ ॥ २७ ॥ तज्जन्मनस्त्वदाश्रयत्वात्त्वदुपकारार्थत्वात्यस्तयोर्जन्मकथयेत्सपातकैर्मुच्यते ॥ २८ ॥ यदर्थंसीताहृतातांत्वदाश्रयांत्वद्विष

भूमेर्भारोहृतःकृत्स्नस्त्वयालीलानृदेहिना ॥ सर्वभूतांतरस्थस्यनित्यमुक्तचिदात्मनः ॥ २५ ॥ अखंडानंदरूपस्यकि
यानेषपराक्रमः ॥ तथाऽपिवर्ण्यतेसद्भिर्लीलामानुषरूपिणः ॥ २६ ॥ यशस्तेसर्वलोकानांपापहत्यैसुखायच ॥ यइदं
कीर्तयेन्मर्त्योवालिसुग्रीवयोर्महत् ॥ २७ ॥ जन्मत्वदाश्रयत्वात्समुच्यतेसर्वपातकैः ॥ अथान्यांसंप्रवक्ष्यामिकथांराम
त्वदाश्रयाम् ॥ २८ ॥ सीताहृतायदर्थंसारावणेनदुरात्मना ॥ पुराकृतयुगेरामप्रजापतिसुतंविभुम् ॥ २९ ॥ सनत्कु
मारमेकांतेसमासीनंदशाननः ॥ विनयावनतोभूत्वाह्यभिवाद्येदमब्रवीत् ॥ ३० ॥ कोन्वस्मिन्प्रवरोलोकेदेवानांबलव
त्तरः ॥ देवाश्चयंसमाश्रित्ययुद्धेशत्रुंजयंतिहि ॥ ३१ ॥ कंयजंतिद्विजानित्यंकंध्यायंतिचयोगिनः ॥ एतन्मेशंसभगवन्
प्रश्नंप्रश्नविदांवर ॥ ३२ ॥ ज्ञात्वातस्यहृदिस्थंयत्तदशेषेणयोगदृक् ॥ दशाननमुवाचेदंशृणुवक्ष्यामिपुत्रक ॥ ३३ ॥
भर्तायोजगतांनित्यंयस्यजन्मादिकंनहि ॥ सुरासुरैर्नुतोनित्यंहरिर्नारायणोऽव्ययः ॥ ३४ ॥ यन्नाभिपंकजाज्जातोब्र
ह्माविश्वसृजांपतिः ॥ सृष्टंयेनैवसकलंजगत्स्थावरजंगमम् ॥ ३५ ॥

यांकथांवक्ष्यामि प्रजापतेःसुतंमानसंसुतम् ॥ २९ ॥ ३० ॥ अस्मिन्लोकेप्रवरःश्रेष्ठः विवक्षितंश्रैष्ठ्यमेवाह देवानामित्यादि बलवत्तरत्वमेवप्रकटयति देवाश्चेति ॥ ३१ ॥ ३२ ॥ तस्यरावणस्यहृत्स्थंतादृशान्मेमरणंभवत्वितीच्छारूपम् ॥ ३३ ॥ यःसुरासुरैर्नुतःसहरिर्नारायणादिपदवाच्यइत्यर्थः ॥ ३४ ॥ अथ तल्लक्षणमाह यन्नाभीति अनेनब्रह्मसहितजगत्स्रष्टृत्वरूपंतल्लक्षणमुक्तम् ॥ ३५ ॥

अनुजपंतिध्यायंति ॥ ३६ ॥ ३७ ॥ कांवेति वाशब्दोवाक्यालंकारे ॥ ३८ ॥ ३९ ॥ हरेर्गतिंमुक्तिम् साचक्रमेणहिरण्यगर्भेणसहेतिबोध्यम् ॥ ४० ॥ एवंमुक्तीच्छुरपिरावणोभगवन्मायावशात्तमोगुणप्रधानत्वाच्चभगवद्द्वेषेणैवमुक्तिंप्रार्थयते योत्स्येऽहमितिकथंयोत्स्यइत्यर्थः ॥ ४१ ॥ ४२ ॥ सुखीभवेत्य

तंसमाश्रित्यविबुधाजयंतिसमरेरिपून् ॥ योगिनोध्यानयोगेनतमेवानुजपंतिहि ॥ ३६ ॥ महर्षेर्वचनंश्रुत्वाप्रत्युवाचदशाननः ॥ दैत्यदानवरक्षांसिविष्णुनानिहतानिच ॥ ३७ ॥ कांवागतिंप्रपद्यंतेप्रेत्यतेमुनिपुंगव ॥ तमुवाचमुनिश्रेष्ठोरावणंराक्षसाधिपम् ॥ ३८ ॥ दैवतैर्निहतानित्यंगत्वास्वर्गमनुत्तमम् ॥ भोगक्षयेपुनस्तस्माद्भ्रष्टाभूमौभवंतिते ॥ ॥ ३९ ॥ पूर्वार्जितैःपुण्यपापैर्म्रियंतेचोद्भवंतिच ॥ विष्णुनायेहतास्तेतुप्राप्नुवंतिहरेर्गतिम् ॥ ४० ॥ श्रुत्वामुनिमुखात्सर्वंरावणोहृष्टमानसः ॥ योत्स्येऽहंहरिणासार्धमितिचिंतापरोऽभवत् ॥ ४१ ॥ मनःस्थितंपरिज्ञात्वारावणस्यमहामुनिः ॥ उवाचवत्सतेऽभीष्टंभविष्यतिनसंशयः ॥ ४२ ॥ कंचित्कालंप्रतीक्षस्वसुखीभवदशानन ॥ एवमुक्त्वामहाबाहोमुनिःपुनरुवाचतम् ॥ ४३ ॥ तस्यस्वरूपंवक्ष्यामित्यरूपस्यापिमायिनः ॥ स्थावरेषुचसर्वेषुनदेषुचनदीषुच ॥ ४४ ॥ ओंकारश्चैवसत्यंचसावित्रीपृथिवीचसः ॥ समस्तजगदाधारःशेषरूपधरोहिसः ॥ ४५ ॥ सर्वेदेवाःसमुद्राश्चकालःसूर्यश्चचंद्रमाः ॥ सूर्योदयोदिवारात्रीयमश्चैवतथाऽनिलः ॥ ४६ ॥ अग्निरिंद्रस्तथामृत्युःपर्जन्योवसवस्तथा ॥ ब्रह्मारुद्रादयश्चैवयेचान्येदेवदानवाः ॥ ४७ ॥

स्यततइत्यादिः ततोमरणलाभेनसुखित्वम् ॥ ४३ ॥ स्थावरेषुनदेषुनदीषुचव्याप्तइतिशेषः ॥ ४४ ॥ इदमुपलक्षणंतदाह ओंकारइतिप्रणवरूपत्वेनसर्ववाङ्मयव्याप्तिरुक्ता ओंकारोवैसर्वावागितिश्रुतेः तदेवाह सत्यंवाक्यंसावित्रीगायत्रीच सइत्यनेनार्थोऽपिसर्वस्तद्रूपएवेत्याह पृथिवीचेति इदमुपलक्षणंतदाह समस्तेति ॥ ४५ ॥ ४६ ॥ शेषादयोदानवांताःसर्वेतद्रूपाएवेतिविराड्रूपमुक्तम् ॥ ४७ ॥

सूर्यादौप्रकाशोऽग्नेर्ज्वलनंरक्षासंहारौचतदधीनाएवेत्याह विद्योततीति तत्सर्वमयत्नेनैवेत्याह क्रीडांकरोतीति क्रीडामिवकरोतीत्यर्थः नतुकश्चिच्छ्रमस्तस्येति भावः ॥ ४८ ॥ उक्तमेवार्थंसामान्येनोपसंहरति तेनेति अथैतद्ध्यानाशक्तंप्रतिअन्यद्ध्येयंरूपमाह नीलोत्पलेति विद्युद्वर्णांबरंपीतांबरंजांबूनदप्रख्यांतत्सदृशकांतिम् देवींपश्यन् स्वदर्शनेनसृष्टिव्यापारादौप्रवर्तयन्नालिंग्यतिष्ठतीति अनेनतस्याःस्वतोनात्यंतंभेदइतिदर्शितंशक्तिशक्तिमतोस्तादात्म्यस्यैवशास्त्रसिद्धांत

विद्योततिज्वलत्येषपातिचात्तीतिविश्वकृत् ॥ क्रीडांकरोत्यव्ययात्मासोऽयंविष्णुःसनातनः ॥ ४८ ॥ तेनसर्वमिदंव्याप्तं त्रैलोक्यंसचराचरम् ॥ नीलोत्पलदलश्यामोविद्युद्वर्णांबरावृतः ॥ ४९ ॥ शुद्धजांबूनदप्रख्यांश्रियंवामांकसंस्थिताम् ॥ सदानपायिनींदेवींपश्यन्नालिंग्यतिष्ठति ॥ ५० ॥ द्रष्टुंनशक्यतेकैश्चिद्देवदानवपन्नगैः ॥ यस्यप्रसादंकुरुतेसचैनंद्रष्टुमर्हति ॥ ५१ ॥ नचयज्ञतपोभिर्वानदानाध्ययनादिभिः ॥ शक्यतेभगवान्द्रष्टुमुपायैरितरैरपि ॥ ५२ ॥ तद्भक्तैस्तद्गतप्राणैस्तच्चित्तैर्धूतकल्मषैः ॥ शक्यतेभगवान्विष्णुर्वेदांतामलदृष्टिभिः ॥ ५३ ॥ अथवाद्रष्टुमिच्छातेशृणुत्वंपरमेश्वरम् ॥ त्रेतायुगेसदेवेशोभवितानृपविग्रहः ॥ ५४ ॥ हितार्थंदेवमर्त्यानामिक्ष्वाकूणांकुलेहरिः ॥ रामोदाशरथिर्भूत्वामहासत्त्वपराक्रमः ॥ ५५ ॥ पितुर्नियोगात्सभ्रात्राभार्ययादंडकेवने ॥ विचरिष्यतिधर्मात्माजगन्मात्रास्वमायया ॥ ५६ ॥

त्वात् ॥ ४९ ॥ ५० ॥ तादृशोऽपितत्प्रसादंविनाद्रष्टुमशक्यइत्याह द्रष्टुमिति ॥ ५१ ॥ तद्दर्शनेतद्भक्तिरेवासाधारणउपायइत्याह नचेति ॥ ५२ ॥ तद्भक्तैरितिचशक्यतेद्रष्टुमितिशेषः ॥ ५३ ॥ अथवाद्रष्टुमिच्छाएतैरुपायैर्विनापीतिशेषः नृपविग्रहः गृहीतराजशरीरः ॥ ५४ ॥ हितार्थमित्यस्यत्वद्बधार्थमितिहृत्स्थःशेषः महासत्त्वपराक्रमःमहांतौबलपराक्रमौयस्यसः ॥ ५५ ॥ जगन्मातृत्वंजगत्कारणत्वपालकत्वाभ्याम् ॥ ५६ ॥

॥ ५७ ॥ असुराध्यक्षइतिच्छेदः तमोगुणप्रधानत्वाद्विरोधेप्सुः ॥ ५८ ॥ एतदर्थंत्वद्विरोधेनत्वत्तोमृत्युलाभार्थम् त्वयात्मेति त्वत्कर्तृकात्मवधेच्छयेत्यर्थः
॥५९॥ ६० ॥ ॥ इतिश्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिबिरु॰अध्यात्मरामायणेसेतौउत्तरकांडेतृतीयःसर्गः ॥३॥ ॥छ॥ नारदोऽपिसर्वतोबलवंतंत्वां

एवंतेसर्वमाख्यातंमयारावणविस्तरात् ॥ भजस्वभक्तिभावेनतदारामंश्रियायुतम् ॥ ५७ ॥ एवंश्रुत्वाऽसुराध्यक्षोध्या
त्वाकिंचिद्विचार्यच ॥ त्वयासहविरोधेप्सुर्मुमुदेरावणोमहान् ॥ ५८ ॥ युद्धार्थीसर्वतोलोकान्पर्यटन्समवस्थितः ॥
एतदर्थंमहाराजरावणोऽतीवबुद्धिमान् ॥ हृतवाञ्जानकींदेवींत्वयात्मवधकांक्षया ॥ ५९॥ इमांकथांयःशृणुयात्पठेद्वा
संश्रावयेद्वाश्रवणार्थिनांसदा ॥ आयुष्यमारोग्यमनंतसौख्यंप्राप्नोतिलाभंधनमक्षयंच ॥ ६० ॥ इतिश्रीमदध्यात्मरा
मायणेउमामहेश्वरसंवादेउत्तरकांडेतृतीयःसर्गः ॥ ३ ॥ ॥छ॥ ॥छ॥ ॥ एकदाब्रह्मणोलोका
द्रायांतंनारदंमुनिम् ॥ पर्यटन्रावणोलोकान्दृष्ट्वानत्वाब्रवीद्वचः ॥ १ ॥ भगवन्ब्रूहिमेयोद्धुंकुत्रसंतिमहाबलाः ॥ योद्धु
मिच्छामिबलिभिस्त्वंज्ञातासिजगत्त्रयम् ॥ २ ॥ मुनिर्ध्यात्वाहसुचिरंश्वेतद्वीपनिवासिनः ॥ महाबलामहाकायास्तत्र
याहिमहामते ॥ ३ ॥ विष्णुपूजारतायेवैविष्णुनानिहताश्चये ॥ तएवतत्रसंजाताअजेयाश्चसुरासुरैः ॥ ४ ॥ श्रुत्वात
द्रावणोवेगान्मंत्रिभिःपुष्पकेणतान् ॥ योद्धुकामःसमागत्यश्वेतद्वीपसमीपतः ॥ ५ ॥ तत्प्रभाहततेजस्कंपुष्पकंनाचल
त्ततः ॥ त्यक्त्वाविमानंप्रययौमंत्रिणश्चदशाननः ॥ ६ ॥ प्रविशन्नेवतद्वीपंधृतोहस्तेनयोषिता ॥ पृष्टश्चत्वंकुतःकोऽसि
प्रेषितःकेनवावद ॥ ७ ॥

त्वत्सामीप्यंप्राप्तानेवचाहेत्याह एकदेति ॥ १ ॥ ज्ञाताऽसीतितृन् ॥ २ ॥ ३ ॥ ४ ॥ मंत्रिभिःसहपुष्पकेणश्वेतद्वीपसमीपतःसमागत्यस्थितः ॥ ५ ॥ तद्वीपप्रभ
याहततेजस्कंप्रतिरुद्धगतिकम् मंत्रिणश्चप्रययुः पद्भ्यामितिशेषः ॥ ६ ॥ योषितादासीरूपयाकयाचित् ॥ ७ ॥

॥ ८ ॥ विष्णुनाहतःसर्वथावैकुंठंयामि यास्यामीतिनिश्चितःनिश्चयवान्सन् ॥ ९ ॥ १० ॥ स्वकंवधंस्वीयंवधमित्यर्थः ॥ ११ ॥ एवंकथामुक्त्वास्वाश्रमंजि
गमिषूरामंभगवंतंस्तौति रामेति सकलज्ञानवत्वेहेतुः विज्ञानदृक्विज्ञानंस्वस्वरूपमेवदृक्ज्ञानकारणंयस्य ज्ञानेइतरकरणानपेक्षइतियावत् अतएवभूतंअतीतं
भव्यंभाविइदंवर्तमानंएवंत्रिषुकालेषुयाकलनातत्तत्कालवैशिष्ट्यंतस्यसाक्षाद्द्रष्टा विकल्पोज्झितःत्यक्तसंशयइत्यर्थः भक्तानामनुवर्तनायस्वचरितकीर्तनादि

इत्युक्तोलीलयास्त्रीभिर्हसंतीभिःपुनःपुनः ॥ कृच्छ्रा[1]द्धस्ताद्विनिर्मुक्तस्तासांस्त्रीणांदशाननः ॥ ८ ॥ आश्चर्यमतुलंलब्ध्वा
चिंतयामासदुर्मतिः ॥ विष्णुनानिहतोयामिवैकुंठमितिनिश्चितः ॥ ९ ॥ मयिविष्णुर्यथाकुप्येत्तथाकार्यंकरोम्यहम् ॥
इतिनिश्चित्यवैदेहीं[2]जहारविपिनेऽसुरः ॥ १० ॥ जानन्नेवपरात्मानंसजहारावनीसुताम् ॥ मातृवत्पालयामासत्वत्तःकां
क्षन्वधंस्वकम् ॥ ११ ॥ रामत्वंपरमेश्वरोऽसिसकलंजानासिविज्ञानदृक्भूतंभव्यमिदंत्रिकालकलनासाक्षीविकल्पो
ज्झितः ॥ भक्तानामनुवर्तनायसकलांकुर्वन्क्रियासंहतिंत्वांशृण्वन्मनुजाकृतिर्मुनिवचोभासीशलोकार्चितः ॥ १२ ॥
स्तुत्वैवंराघवंतेनपूजितःकुंभसंभवः ॥ स्वाश्रमंमुनिभिःसार्धंप्रययौहृष्टमानसः ॥ १३ ॥ रामस्तुसीतयासार्धंभ्रातृभिः
सहमंत्रिभिः ॥ संसारीवरमानाथोरममाणोऽवसद्गृहे ॥ १४ ॥ अनासक्तोऽपिविषयान्बुभुजेप्रिययासह ॥ हनूमत्प्रमुखैः
सद्भिर्वानरैःपरिवेष्टितः ॥ १५ ॥ पुष्पकंचागमद्राममेकदापूर्ववत्प्रभुम् ॥ प्राहदेवकुबेरेणप्रेषितंत्वामहंततः ॥ १६ ॥

नातेषांपापक्षयायसकलक्रियासंहतिंकुर्वन्मनुजाकृतिःनतुवस्तुतोमनुष्यइत्यर्थः ईशलोकैरिंद्रादिभिरर्चितस्त्वंमुनीनामस्माकंवचआशृण्वन्भासिशोभसे ॥ १२ ॥
रामेणपूजितोऽगस्त्यएवंराघवंस्तुत्वास्वाश्रमंययौ ॥ १३ ॥ संसारीवनतुवस्तुतस्तथा ॥ १४ ॥ अनासक्तोऽप्यासक्तवद्विषयान्बुभुजेसद्भिःसाधुभिः ॥ १५ ॥
ततोभवदाज्ञयाकुबेरसमीपगमनानंतरंकुबेरेणत्वांप्रतिप्रेषितमितिप्राह ॥ १६ ॥

---

[1] हस्तदंशनादिभिरितिशेषः [2] श्वेतद्वीपस्थस्त्रीकृतापमानेनस्त्रीजातित्वात्

अथकुबेरवचआह जितमिति ॥ १७ ॥ यावद्गच्छेदितिपाठेऽपियदागच्छेदित्येवार्थः मांयाहिमांप्रत्यागच्छेत्यर्थः ॥ १८ ॥ तदाआगच्छेतिच्छेदः आगमनोत्तरमात्मानमंतर्धायतिष्ठ यथासर्वलोकोमांदेवत्वेननजानीयादित्यर्थमेवमुक्तिः ॥ १९ ॥ २० ॥ शासतिशिक्षयतिसतिपालयतीतियावत् ॥ २१ ॥ २२ ॥ ततः

जितंत्वंरावणेनादौपश्चाद्रामेणनिर्जितम् ॥ अतस्त्वंराघवंनित्यंवहयावद्वसेद्भुवि ॥ १७ ॥ यदागच्छेद्रघुश्रेष्ठोवैकुंठंयाहिमांतदा ॥ तच्छ्रुत्वाराघवःप्राहपुष्पकंसूर्यसन्निभम् ॥ १८ ॥ यदास्मरामिभद्रंतेतदागच्छममांतिकम् ॥ तिष्ठांतर्धायसर्वत्रगच्छेदानींममाज्ञया ॥ १९ ॥ इत्युक्त्वारामचंद्रोऽपिपौरकार्याणिसर्वशः ॥ भ्रातृभिर्मंत्रिभिःसार्धंयथान्यायंचकारसः ॥ २० ॥ राघवेशासतिभुवंलोकनाथेरमापतौ ॥ वसुधासस्यसंपन्नाफलवंतश्चभूरुहाः ॥ २१ ॥ जनाधर्मपराःसर्वेपतिभक्तिपराःस्त्रियः ॥ नापश्यत्पुत्रमरणंकश्चिद्राजनिराघवे ॥ २२ ॥ समारुह्यविमानाग्र्यंराघवःसीतयासह ॥ वानरैर्भ्रातृभिःसार्धंसंचचारावनिंप्रभुः ॥ २३ ॥ अमानुषाणिकार्याणिचकारबहुशोभुवि ॥ ब्राह्मणस्यसुतंदृष्ट्वाबालंमृतमकालतः ॥ २४ ॥ शोचंतंब्राह्मणंचापिज्ञात्वारामोमहामतिः ॥ तपस्यंतंवनेशूद्रंहत्वाब्राह्मणबालकम् ॥ २५ ॥ जीवयामासशूद्रस्यददौस्वर्गमनुत्तमम् ॥ लोकानामुपदेशार्थंपरमात्मारघूत्तमः ॥ २६ ॥ कोटिशःस्थापयामासशिवलिंगानिसर्वशः ॥ सीतांचरमयामाससर्वभोगैरमानुषैः ॥ २७ ॥ शशासरामोधर्मेणराज्यंपरमधर्मवित् ॥ कथांसंस्थापयामाससर्वलोकमलापहाम् ॥ २८ ॥

कदाचित्पृथिव्यांसम्यग्रक्षणंवर्ततेनैवेतिद्रष्टुंपुष्पकंस्मृत्वातत्रारुह्यपृथिव्यांसंचारंकुर्वन्ननेकान्यमानुषाणिकार्याणिचकारेत्याह समारुह्येति ॥ २३ ॥ तेषांमध्येकियत्कर्माहब्राह्मणस्येति अकालतःअकाले सार्वविभक्तिकस्तसिः ॥ २४ ॥ २५ ॥ लोकानामुपदेशार्थंयद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनइतिन्यायेन ॥ २६ ॥ २७ ॥ कथांस्वचरित्रविषयाम् ॥ २८ ॥

॥ २९ ॥ शिक्षयन्जनानितिभगवतोधर्माचरणंलोकशिक्षार्थमेवेतिभावः ॥ ३० ॥ प्रेमप्ररूढावस्थाप्रीतिः अनुवृत्तिरानुकूल्यम् प्रश्रयस्तन्मतानुष्ठानम् दमइंद्रियनिग्रहः भावज्ञाअभिप्रायज्ञामनोहराआसीदितिशेषः ॥ ३१ ॥ आक्रीडविपिनंपुष्पवाटिका ॥ ३२ ॥ ३३ ॥ रामस्यपदांबुजेकराभ्यांलालयंतीराममाह ॥ ३४ ॥ चिदानंदज्ञानसुखस्वरूप आदिमध्यांतहीनआद्यंतयोरभावादेवमध्यस्याप्यभावः अशेषस्यजगतःकारण ॥३५॥ हेदेवदेवाइंद्राद्याःतेतववैकुंठागमनंप्रतिबहुशोमांप्रार्थयमानावचोऽब्रुवन् ॥ ३६॥ निर्विषयचित्तःसविषयत्वसंपादकत्वेनचिच्छक्तिरूपयामायया विसृज्यत्यक्त्वास्वकंसनातनंधामवैकुंठंचहित्वा ॥३७॥ अतःप्रथमंत्वमागच्छततःसआगमिष्यत्येवशक्त्याविनाशक्तिमतःस्थातुमशक्यत्वात् ॥ ३८ ॥ ३९ ॥

[1]दशवर्षसहस्राणिमायामानुषविग्रहः ॥ चकारराज्यंविधिवल्लोकवंद्यपदांबुजः ॥ २९ ॥ एकपत्नीव्रतोरामोराजर्षिःसर्वदाशुचिः ॥ गृहमेधीयमखिलमाचरन्शिक्षयन्जनान् ॥३०॥ सीताप्रेम्णाऽनुवृत्त्याचप्रश्रयेणदमेनच ॥ भर्तुर्मनोहरासाध्वीभावज्ञासाह्रियाभिया ॥३१॥ एकदाक्रीडविपिनेसर्वभोगसमन्विते ॥ एकांतेदिव्यभवनेसुखासीनंरघूत्तमम् ॥ ३२ ॥ नीलमाणिक्यसंकाशंदिव्याभरणभूषितम् ॥ प्रसन्नवदनंशांतंविद्युत्पुंजनिभांबरम् ॥ ३३ ॥ सीताकमलपत्राक्षीसर्वाभरणभूषिता ॥ राममाहकराभ्यांसालालयंतीपदांबुजे ॥ ३४॥ देवदेवजगन्नाथपरमात्मन्सनातन ॥ चिदानंदादिमध्यांतरहिताशेषकारण ॥३५॥ देवदेवाःसमासाद्यमामेकांतेऽब्रुवन्वचः ॥ बहुशोऽर्थयमानास्तेवैकुंठागमनंप्रति ॥३६॥ त्वयासमेतश्चिच्छक्त्यारामस्तिष्ठतिभूतले ॥ विसृज्यास्मान्स्वकंधामवैकुंठंचसनातनम् ॥ ३७॥ आस्तेत्वयाजगद्धात्रिरामःकमललोचनः ॥ अग्रतोयाहिवैकुंठंत्वंतथाचेद्रघूत्तमः ॥ ३८ ॥ आगमिष्यतिवैकुंठंसनाथान्नःकरिष्यति ॥ इतिविज्ञापिताहंतैर्मयाविज्ञापितोभवान् ॥३९॥

---

[1] सीतात्यागोत्तरमश्वमेधप्रवृत्यातदंतेदशवर्षसहस्राणिवाजिमेधानथाकरोदितिवाल्मीक्युक्तेर्दशवर्षसहस्राणिदशवर्षशतानिच कृत्वावासस्यसमयंत्रिदशेष्वितिपुराप्रतिज्ञत्वादत्रवर्षशब्दोदिनपरः विवाहोत्तरंद्वादशाधिकान्ययोध्यायांचतुर्दशवनेएकंपुनरयोध्यायामित्येवंकिंचिदधिकसप्तविंशतिर्गतानीतिबोध्यम्।

॥ ४० ॥ लोकवादरूपंमिषंकल्पयित्वाततोभीतः अपरइवपृथग्जनइवत्वांत्यजामि सर्वस्यापिस्वकल्पनारूपत्वादिममपिजनमनसिकल्पयिष्यामीत्याशयः
॥ ४१ ॥ ४२ ॥ प्रत्ययार्थंसीतानेदृशीतिविश्वासार्थम् ॥ ४३ ॥ ४४ ॥ ४५ ॥ हास्यविषयेप्रौढाश्चतेकथासुसुज्ञाः ॥ ४६ ॥ इहएतज्जन्मविषये ॥४७॥

यद्युक्तंतत्कुरुष्वाद्यनाहमाज्ञापयेप्रभो ॥ सीतायास्तद्वचःश्रुत्वारामोध्यात्वाऽब्रवीत्क्षणम् ॥ ४० ॥ देविजानामिसकलं
तत्रोपायंवदामिते ॥ कल्पयित्वामिषंदेविलोकवादंत्वदाश्रयम् ॥ ४१ ॥ त्यजामित्वांवनेलोकवादाद्भीतइवापरः ॥ भ
विष्यतःकुमारौद्वौवाल्मीकेराश्रमांतिके ॥ ४२ ॥ इदानींदृश्यतेगर्भःपुनरागत्यमेंतिकम् ॥ लोकानांप्रत्ययार्थंत्वंकृत्वाश
पथमादरात् ॥ ४३ ॥ भूमेर्विवरमात्रेणवैकुंठंयास्यसिद्रुतम् ॥ पश्चादहंगमिष्यामिएषएवसुनिश्चयः ॥ ४४ ॥ इत्यु
क्त्वातांविसृज्याथरामोज्ञानैकलक्षणः ॥ मंत्रिभिर्मंत्रतत्त्वज्ञैर्बलमुख्यैश्चसंवृतः ॥ ४५ ॥ तत्रोपविष्टंश्रीरामंसुहृदःपर्यु
पासत ॥ हास्यप्रौढकथासुज्ञाहासयंतःस्थिताहरिम् ॥ ४६ ॥ कथाप्रसंगात्पप्रच्छरामोविजयनामकम् ॥ पौराजानप
दामेकिंवदंतीहशुभाशुभम् ॥ ४७ ॥ सीतांवामातरंवामेभ्रातॄन्वाकैकयीमथ ॥ नभेतव्यंत्वयाब्रूहिशापितोऽसिममो
परि ॥ ४८ ॥ इत्युक्तःप्राहविजयोदेवसर्वेंवदंतिते ॥ कृतंसुदुष्करंसर्वंरामेणविदितात्मना ॥ ४९ ॥ किंतुहत्वादशग्रीवं
सीतामाहृत्यराघवः ॥ अमर्षंपृष्ठतःकृत्वास्वंवेश्मप्रत्यपादयत् ॥ ५० ॥ कीदृशंहृदयेतस्यसीतासंभोगजंसुखम् ॥
याहृताविजनेऽरण्येरावणेनदुरात्मना ॥ ५१ ॥

सीताम्मित्यादेःप्रतीतिशेषः तत्तद्विषयंकिंशुभाशुभंवदंतीत्यर्थः शापितोऽसित्वशपथपूर्वंपृच्छामीत्यर्थः ॥ ४८ ॥ ४९ ॥ वेश्मप्रत्यपादयत्गृहंप्रवेशितवान्
॥ ५० ॥ यादुष्टेनरावणेनहृताबलान्नीतासापिगृहंप्रवेशितेतिअकृत्यमेतदितिशेषः ॥ ५१ ॥

किंचैवंसतिअस्मदादीनामपियोषितांदुष्कर्ममर्षणंतद्योग्यंसहनयोग्यंभवेत्भविष्यतीत्यर्थः तदेवस्पष्टयति यादृगिति नियतंनियमेनप्रजास्तादृश्योभवंति राज
व्यवहारानुरूपव्यवहाराभवंतीत्यर्थः ॥ ५२ ॥ ५३ ॥ ५४॥ लोकापवादःकलंकः समानीयअंतःपुरान्निष्कास्य ॥ ५५॥ रथेनपुनरायाहीत्युक्त्यासीतायाअ

अस्माकमपिदुष्कर्मयोषितांमर्षणंभवेत् ॥ यादृक्भवतिवैराजातादृश्योनियतंप्रजाः ॥ ५२ ॥ श्रुत्वातद्वचनंरामःस्वज
नान्पर्यपृच्छत ॥ तेऽपिनत्वाऽब्रुवन्राममेवमेतन्नसंशयः ॥ ५३ ॥ ततोविसृज्यसचिवान्विजयंसुहृदस्तथा ॥ आहूय
लक्ष्मणंरामोवचनंचेदमब्रवीत् ॥ ५४ ॥ लोकापवादस्तुमहान्सीतामाश्रित्यमेऽभवत् ॥ सीतांप्रातःसमानीयवाल्मी
केराश्रमांतिके ॥ ५५ ॥ त्यक्त्वाशीघ्रंरथेनत्वंपुनरायाहिलक्ष्मण ॥ वक्ष्यसेयदिवाकिंचित्तदामांहतवानसि ॥ ५६ ॥
इत्युक्तोलक्ष्मणोभीत्याप्रातरुत्थायजानकीम् ॥ सुमंत्रेणरथेकृत्वाजगामसहसावनम् ॥ ५७ ॥ वाल्मीकेराश्रमस्यां
तेत्यक्त्वासीतामुवाचसः ॥ लोकापवादभीत्यात्वांत्यक्तवान्राघवोवने ॥ ५८ ॥ दोषोनकश्चिन्मेमातर्गच्छाश्रमपदं
मुनेः ॥ इत्युक्त्वालक्ष्मणःशीघ्रंगतवान्रामसन्निधिम् ॥ ५९ ॥ सीताऽपिदुःखसंतप्ताविललापातिमुग्धवत् ॥ शिष्यैः
श्रुत्वाचवाल्मीकिःसीतांज्ञात्वासदिव्यदृक् ॥ ६० ॥ अर्घ्यादिभिःपूजयित्वासमाश्वास्यचजानकीम् ॥ ज्ञात्वाभविष्यं
सकलमार्पयन्मुनियोषिताम् ॥ ६१ ॥ तास्तांसंपूजयंतिस्मसीतांभक्त्यादिनेदिने ॥ ज्ञात्वापरात्मनोलक्ष्मींमुनिवाक्ये
नयोषितः ॥ सेवांचक्रुःसदातस्याविनयादिभिरादरात् ॥ ६२ ॥

पिरथेननयनंसूचितंनतुसाक्षात्तथोक्तम् तस्यांक्रोधातिशयंद्योतयितुमेवमांहतवानसि अत्रार्थेविपरीतोक्तौमद्वधप्रयुक्तप्रायश्चित्तमित्यर्थः ॥ ५६ ॥ ५७ ॥
॥ ५८ ॥ ५९ ॥ अतिमुग्धवत्अत्यज्ञवत् शिष्यैःशिष्यमुखैः ॥ ६० ॥ मुनियोषितामार्पयत्एषासर्वथारक्षणीयेतितासांहस्तेदत्तवान् ॥ ६१ ॥ परात्म
नोविष्णोः ॥ ६२ ॥

मुनिसेवितांघ्रिः मुनिभिःसेवितावंघ्रीयस्य मुनीनांसेवितावंघ्रीयेनेतिवा ॥ ६३ ॥ इति०अ०रा०उ०चतुर्थःसर्गः ॥ ४ ॥ ॥छ॥ ॥ अथभगवान् शिवोरामलक्ष्मणसंवादमुखेनपरतत्त्वमुपदेष्टुमाह ततइति जगतांयानिमंगलानिआनंदास्तेषामुपजीव्यभूतंमंगलंब्रह्मानंदःसएवात्मास्वरूपंतेन तस्यैवानंदस्यान्यानिमात्रामुपजीवंतीतिश्रुतेः मंगलानांचमंगलमितिस्मृतेश्च किंचजगतांमंगलंकल्याणंयस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तयाउत्तमांश्रोत्रादीनांमोक्षदत्वेनात्युत्तमांरामायणकीर्तिंवाल्मीक्यादिकृतनानाविधरामायणप्रवर्तिकांरावणवधादिजांकीर्तिंविधायस्थितोरघूत्तमःततःसीतापरित्यागानंतरंपूर्वैःस्ववंशजैरा

रामोपिसीतारहितःपरात्माविज्ञानदृक्केवलआदिदेवः ॥ संत्यज्यभोगानखिलान्विरक्तोमुनिव्रतोभून्मुनिसेवितांघ्रिः ॥ ॥ ६३ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेउत्तरकांडेचतुर्थःसर्गः ॥ ४ ॥ ॥ छ ॥ ॥ श्रीमहादेवउवाच ॥ ततोजगन्मंगलमंगलात्मनाविधायरामायणकीर्तिमुत्तमाम् ॥ चचारपूर्वाचरितंरघूत्तमोराजर्षिवर्यैरभिसेवितंयथा ॥ १ ॥ सौमित्रिणापृष्टउदारबुद्धिनारामःकथाःप्राहपुरातनीःशुभाः ॥ राज्ञःप्रमत्तस्यनृगस्यशापतोद्विजस्यतिर्यक्त्वमथाहराघवः ॥ २ ॥ कदाचिदेकांतउपास्थितंप्रभुंरामंरमालालितपादपंकजम् ॥ सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्रवीत् ॥ ३ ॥

चरितंप्रजापालनसत्कथाश्रवणादिकंकेवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपिराजर्षिश्रेष्ठैर्यथाऽभिसेवितंतथाचचारकृतवान् ॥ १ ॥ उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारादानशीलाबुद्धिर्यस्यतेन पुरातनीःप्राचीनराजसंबंधिनीःशुभाःधर्माधर्मनिर्णेत्रीः प्रमत्तस्यस्वगोमंडलमिश्रितब्राह्मणगोदानात्प्रमत्तस्यनृगस्यराज्ञोद्विजस्यशापात्तिर्यक्त्वमाह तेनाज्ञानकृतब्रह्मस्वापहारेणपरमधार्मिकस्यापीदृश्यवस्थेतिसर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ २ ॥ एकांतेविजनेउपस्थितंप्राप्तम् विनयान्वितःसन्भक्त्यागुरुरयमितिबुद्ध्याप्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभावनंभावनांतःकरणंयेनसः शुद्धांतःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेनशुद्धांतःकरणइत्यर्थः ॥ ३ ॥

हेमहामते महतीसर्वविषयामतिर्यस्यतस्यसंबोधनम् त्वंशुद्धबोधोऽसिं अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत्प्रतिबिंबत्वात् अधीशोऽसिअंतर्यामित्वान्नियंताऽसि वास्तवभेदाभावाच्चसर्वात्मत्वम् औपाधिकभेदाश्चनियंतृनियम्यभावोबोध्यः निराकृतिःअस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैःकथमेवंनज्ञायतेऽतआह ज्ञानदृशांस्वयमेवंप्रतीयसे ज्ञायतेनेनेतिज्ञानंवेदांतवाक्यजातंतदेवदृक्दर्शनसाधनंयेषांतेषामितिसंबंधसामान्येषष्ठी तैरित्यर्थः तादृशदृक्लाभश्चत्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृंगवदाहितःकृतःसंगोयेनतादृशांतःकरणसंगवताम् त्वच्चरणकमलसँल्लग्नांतःकरणवतामित्यर्थः ॥ ४ ॥ अथप्रार्थयते अहमिति भवस्यसंसारस्यापवर्गोनिवृत्तिर्यस्मात्तादृशंतवपदांबुजंप्रपन्नोऽस्मि शरणंप्राप्तोऽस्मि योगिभावितंयो

त्वंशुद्धबोधोऽसिहिसर्वदेहिनामात्माऽस्यधीशोऽसिनिराकृतिःस्वयम् ॥ प्रतीयसेज्ञानदृशांमहामतेपादाब्जभृंगाहितसंगसंगिनाम् ॥ ४ ॥ अहंप्रपन्नोऽस्मिपदांबुजंप्रभोभवापवर्गंतवयोगिभावितम् ॥ यथांजसाज्ञानमपारवारिधिंसुखंतरिष्यामितथानुशाधिमाम् ॥ ५ ॥ श्रुत्वाऽथसौमित्रिवचोऽखिलंतदाप्राहप्रपन्नार्तिहरःप्रसन्नधीः ॥ विज्ञानमज्ञानतमोपशांतयेश्रुतिप्रपन्नंक्षितिपालभूषणः ॥ ६ ॥

गिभिःसंसारमुक्तयेभावितम् अनेनतस्यभवापवर्गत्वेसदाचारःप्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपंयदज्ञानंसंसारमूलकारणंयथासुखमक्लेशेनतरिष्यामितथामामनुशाधिशिक्षय अपारवारिधिमित्यनेनसपारप्रसिद्धसमुद्राद्व्यतिरेकउक्तःअशक्यतरणताऽनेनध्वनिता ॥ ५ ॥ अथोत्तरमवतारयति श्रुत्वेति रामःसौमित्रिवचःश्रुत्वा अथशब्दोवाक्यालंकारे तदाश्रवणाव्यवहितकालेएवप्रपन्नानांभक्तानामार्तिंसंसारदुःखंहरतितादृशः प्रसन्नाभ्रमादिहीनाभक्तानुग्रहपराचधीर्यस्यसः क्षितिपालानांराज्ञांभूषणभूतोज्ञानरूपतमसउपशांतयेतदर्थम् संधिरार्षः श्रुतिभिःतमेवविदित्वातिमृत्युमेतीत्यादिश्रुतिभिःप्रपन्नंतत्फलकत्वेनबोधितंविज्ञानमात्मतत्त्वज्ञानमितिसामान्यतःप्रथमंप्राह ॥ ६ ॥

अथतादृशज्ञानप्राप्तयेक्रमेणबहिरंगांतरंगसाधनान्याह आदाविति स्ववर्णाश्रमेषुशास्त्रेणवर्णितायाःक्रियानित्यनैमित्तिकयज्ञदानादिरूपास्ताःकृत्वासमासादितशुद्धमानसः प्राप्तांतःकरणशुद्धिः तत्पूर्वमुपात्तसाधनःतदनुष्ठानपूर्वकमेवउपात्तानिसाधनानिशमदमादीनियेनतादृशःअनेनकर्मणांबहिरंगत्वंशमादीनामंतरंगत्वंस्फुटमेवोक्तं किंच शमदमवैराग्यदार्ढ्यपर्यंतंकर्मानुष्ठानमेवेतिसूचितं ततस्तत्कर्मानुष्ठानंसमाप्यत्यक्त्वा संन्यस्येतियावत् आत्मलब्धयेआत्मज्ञानायतत्फलकायतत्त्वमस्यादिवाक्यार्थविचारायसद्गुरुंश्रोत्रियंब्रह्मनिष्ठमित्यादिलक्षणलक्षितंसमाश्रयेत् सेवेत अनेनव्युत्पत्तिबलेनस्वयमेववाक्यार्थविचारःक्रिय

आदौस्ववर्णाश्रमवर्णिताःक्रियाःकृत्वासमासादितशुद्धमानसः ॥ समाप्यतत्पूर्वमुपात्तसाधनःसमाश्रयेत्सद्गुरुमात्मलब्धये ॥ ७ ॥ क्रियाशरीरोद्भवहेतुरादृताप्रियाप्रियौतौभवतःसुरागिणः ॥ धर्मेतरौतत्रपुनःशरीरकंपुनःक्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

माणोनफलायेतिसूचितम् ॥ ७ ॥ संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वादज्ञाननिवृत्तेश्चतत्त्वज्ञानैकसाध्यत्वात्तत्त्वज्ञानस्यचवेदांतविचारसाध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यतेकथ्यते तदेवोपपादयति आदृताआदरपूर्वंपूर्वजन्मार्जिताक्रियाएतस्यशरीरोद्भवस्यजन्मनोहेतुःतत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौशास्त्रप्रसिद्धौ धर्मेतरौधर्माधर्मौ प्रियाप्रियौसुखदुःखजनकौभवतःकस्यचिदधर्मेएवसुखत्वबुद्ध्याप्रवृत्तिःकस्यचिद्धर्मेएवंकदाचिदित्यप्यूह्यं एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रियाइत्येवंचक्रवद्विपरिवृत्तिःयथाचक्रेभ्राम्यमाणेऽधोभागःकदाचिदुपरिउपरितनश्चाधःपुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनकभावेनपरिवृत्तिरितिबोध्यम् ॥ ८ ॥

---

१ अत्यावश्यकमंतरंगंतदपेक्षयान्यूनावश्यंबहिरंगं यथामनुष्योयंप्रातरुत्थायप्रथमंतावच्छरीरकार्याणिकरोति ततःसुहृदांततःसंबंधिनां अर्थानामितिपूर्वपूर्वमंतरंगम् ।

तस्याचाज्ञानमेवमूलमित्याह अज्ञानमेवेति अत्रविधौसंसारनिवृत्तिलक्षणेकर्तव्येऽर्थेतद्धानमेवमूलकारणत्वादज्ञानहान[1]मेवविधीयते साधनत्वेनेतिशेषः ननुक
मैंवतन्नाशकमस्तुकिंज्ञानेनेत्याशंक्याह विद्यैवज्ञानमेवतन्नाशविधौमूलाज्ञाननाशनेपटीयसीसमर्था नकर्मसमर्थमितिशेषः यतस्तत्तज्जंअज्ञानजं आत्मस्वरूपा
ज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोज्ञानजन्यत्वंबोध्यं ननुतज्जन्यस्यापितन्नाशकत्वंवृश्चिककर्कट्यादौदृष्टमित्याशंक्यतज्जन्यत्वंवाननाशकत्वेप्रयोजकं
किंतुसविरोधत्वमेवेत्याह यत्सविरोधंतदीरितंनाशकमुक्तमित्यर्थः ॥ ९ ॥ अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञानना
शोनापिरागनाशोवस्तुतःकर्मानुष्ठानात्पुनःसदोषंक्षयिफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत् कर्मणश्चपुनःसंसारएवेतिनमुक्तिप्रत्याशा ततस्तस्माद्बुधोविवेकीज्ञानवि

अज्ञानमेवास्यहिमूलकारणंतद्धानमेवात्रविधौविधीयते ॥ विद्यैवतन्नाशविधौपटीयसीनकर्मतज्जंसविरोधमीरितम्
॥ ९ ॥ नाज्ञानहानिर्नचरागसंक्षयोभवेत्ततःकर्मसदोषमुद्भवेत् ॥ ततःपुनःसंसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवा
न्भवेत् ॥ १० ॥ ननुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्तव्यताप्राणभृतःप्रचोदिताविद्यासहाय
त्वमुपैतिसापुनः ॥ ११ ॥

चारवान् ज्ञायतेऽनेनेतिज्ञानंवेदांतवाक्यंतद्विचारवान्भवेत् ॥ १० ॥ इदानींज्ञानस्यैवमोक्षहेतुत्वंवक्तुंज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेन नन्विति न
न्वितिशंकायां यथाविद्यावेदमुखेनश्रुतिपुराणलक्षणेनब्रह्मविदाप्नोतिपरमित्यादिनापुरुषार्थसाधनमुक्ता तथाउभाभ्यामेवपक्षाभ्यांयथाखेपक्षिणांगतिः तथैव
ज्ञानकर्मभ्यांप्राप्यतेब्रह्मशाश्वतमित्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंचक्रियाकर्तव्यतातृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्येअवश्यकर्तव्यतयाप्र
चोदितानित्यनैमित्तिकरूपा एवंचतदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजननीयेयथादंडचक्रादीनांपर
स्परसहायता ॥ ११ ॥

---

[1] अज्ञानहानं अज्ञानत्यागोनाशइतियावत् यद्वा ओहाङ्गतावित्यस्मात्ल्युटि गत्यर्थत्वात्ज्ञानार्थकत्वंहानंज्ञानंअयंरज्जौभुजंगभासइत्यादिवत् मिथ्याज्ञानपूर्वकंज्ञानं.

कर्तव्यतेतिस्वोक्तमेवविवृणोति कर्मेति वीरहावाएषदेवानांयोग्निमुद्वासयतेयावज्जीवमग्निहोत्रंजुहोतीतिश्रुतिः तत्रसिद्धांतीशंकते नन्विति ध्रुवंस्थिरंकार्यमिदं
पुरुषार्थमोक्षजनिकाविद्यायतःस्वतंत्राविनाऽपिसहायेनस्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तनसमर्थमनसाऽपिकिंचित्सहायभूतंवस्तुनापेक्षते तथाफ
लेजननीयेसहायांतरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतंत्रत्वात्तेजोवदित्यनुमानंसूचितम् ॥१२॥ समुच्चयवादीपरिहरति नेति त्वदुक्तंने
त्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवतीत्यादिवेदेनबोधितःस्थिरकार्योऽपिअध्वरः यथाऽन्यानपिकारकादिकान् आरादुपकारकप्रयाजा
द्यंगानिदेशकालादीनिचप्रकांक्षते तथाविद्यापिअग्निहोत्रंजुहोतीत्यादिविधिवाक्यतःतत्समूहेनप्रकाशितैःकर्मभिःसहितैवमुक्तयेविशिष्यतइत्यर्थः विद्याफल

कर्माकृतौदोषमविश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा ॥ ननुस्वतंत्राध्रुवकार्यकारिणीविद्यानकिंचिन्मनसाऽप्य
पेक्षते ॥ १२ ॥ नसत्यकार्योऽपिहियद्वदध्वरःप्रकांक्षतेऽन्यानपिकारकादिकान् ॥ तथैवविद्याविधितःप्रकाशितैर्विशि
ष्यतेकर्मभिरेवमुक्तये ॥ १३ ॥ केचिद्वदंतीतिवितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥ देहाभिमानादभिवर्धतेक्रि
याविद्यागताहंकृतितःप्रसिद्ध्यति ॥ १४ ॥

दानेकर्मापेक्षा अंगित्वात् प्रयाजाद्यंगापेक्षदर्शादिवदितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥ तदनूद्यसिद्धांतीदूषयति केचिदिति यत्केचिद्वितर्कवादिन
इतिज्ञानकर्मणीसमुच्चित्यमुक्तिसाधनंवदंति तदप्यसत् यथाकेवलंकर्ममोक्षसाधनमित्यसत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात्दृष्टोयोवि
रोधःसर्वलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरोधमेवाहदेहाभिमानात्क्रियावर्धते अनात्मनिदेहादावात्मत्वाभिमानात्क्रियावृद्धिः विद्यातुगताहंकृतितः
गताहंकृतिर्यस्यतस्यनष्टाहंकृतेःप्रसिद्ध्यति सार्वविभक्तिकस्तसिः एवंचाहंकारसत्तामूलकत्वात्क्रियाज्ञानयोःसमुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

अथपूर्वपक्ष्युक्तानुमानंदूषयन्विद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदांतवाक्यानांयद्विशेषेणरोचनंरलयोरभेदादालोचनंविचारस्तेनांचिताप्रापिताया चरमाआत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिःसाविद्येतिभण्यतेविद्वद्भिरितिशेषः पुनःसमुच्चयवारणायविद्याकर्मणोर्वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिः कर्तव्यकर्मादिभिरंगैश्चसहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादिनिहंति तत्रकर्तृत्वादिबुद्धिंनिहंति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हि विद्या अतःस्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनयितव्येतन्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभंगापत्तेरितिपूर्वपक्ष्युक्तहेतोरसिद्धिरितिभावः ॥ १५ ॥

विशुद्धविज्ञानविरोचनांचिताविद्याऽत्मवृत्तिश्चरमेतिभण्यते ॥ उदेतिकर्माखिलकारकादिभिर्निहंतिविद्याऽखिलकारकादिकम् ॥ १५ ॥ तस्मात्त्यजेत्कार्यमशेषतःसुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ॥ आत्मानुसंधानपरायणःसदानिवृत्तसर्वेंद्रियवृत्तिगोचरः ॥ १६ ॥

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाःकर्मणासहविरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतःकर्मत्यजेत् काम्यंतुसर्वथात्याज्यमेवनित्यनैमित्तिकमपियावच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्मणिचित्तस्थैर्यपर्यंतंकर्तव्यमेव ततस्तदनुसंधानंप्रतिबंधकत्वात्प्रयोजनाभावाच्चतदपित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिंद्रियाणांगोचराविषयाःशब्दादयोयस्मात्तादृशःसन् आत्मनःसच्चिदानंदस्यानुसंधानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेंद्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वंप्राणायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

रागिविरागिभेदेनकर्मणांकर्तव्यतेत्याह यावदिति मायया विद्ययाशरीरादिष्वनात्मसुआत्मधीरहंकर्तेत्यादिरूपायावद्वर्ततेतावद्विधिवादकर्मणांविधिर्यजेतेत्यादि वादःकर्तव्यताबोधकोयेषांकर्मणांविधेयोवशवर्तीतत्कर्मकर्ताभवेत् तदपगमेतुतदखिलंजगन्नेतीतिवाक्यैः अथातआदेशोनेतिनेतीत्यादिवाक्यैर्निषिध्यमिथ्यात्वेननिर्णीयतद्विलक्षणतयासत्यत्वेनपरात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत् निरूपितमेतत् ॥ १७ ॥ आत्मविज्ञानेसत्यवश्यमविद्यानिवर्ततइत्याह यदेति आत्मनि शुद्धेंऽतःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायांतःकरणरूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकंनाशकंभास्वरंप्रकाशशीलंयद्विज्ञानंइतरवृत्त्यु

यावच्छरीरादिषुमाययाऽत्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥ नेतीतिवाक्यैरखिलंनिषिध्यतज्ज्ञात्वापरात्मानम
थत्यजेत्क्रियाः ॥ १७ ॥ यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभातिभास्वरम् ॥ तदैवमायाप्रविलीयतेंऽजसा
सकारकाकारणमात्मसंसृतेः ॥ १८ ॥ श्रुतिप्रमाणाभिविनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥ विज्ञानमा
त्रादमलाद्वितीयतस्तस्मादविद्यानपुनर्भविष्यति ॥ १९ ॥

पमर्दनपूर्वकंब्रह्माकाराऽखंडावृत्तिर्यदावभातिअसंभावनादितिरस्कारेणोदेति तदैवसकारकाजन्मांतरप्रापककर्मसहितामायातत्त्वज्जीवोपाधिभूताविद्यांऽजसाझटितिविलीयतेनश्यति ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवेत्यवतिभावः ॥ १८ ॥ उक्तमेवार्थंपुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जनितज्ञानेननाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीतिकाकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाद्वितीयतःशुद्धाद्वितीयात्मविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाद्यतोनष्टातस्मात्सपुनर्नभविष्यतिरज्जुवज्ज्ञानमूलकस्यसर्पस्यरज्जुज्ञानेननिवृत्तस्ययथानपुनरुत्पत्तिरितिभावः ॥ १९ ॥

विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदाढर्याय यदीति यदिनष्टातत्त्वज्ञाननाशितासानपुनःप्रसूयतेनोत्पद्यतेतदाकारणाभावादहंमतिःकथंभवेत् कथमपिनभवेदित्यर्थः तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसास्वतंत्राइतरनिरपेक्षैवनकिमप्यपेक्षतेद्वितीयस्यासंभवात् अतःकेवलाऽसहायैवविमोक्षायविभातितत्फलिकाभवतीत्यर्थः ॥ २० ॥ अत्रार्थेश्रुतिरपिप्रमाणमित्याह सेति साप्रसिद्धानकर्मणानप्रजयाधनेनत्यागेनैकेअमृतत्वमानशुरित्यादिकातैत्तिरीयश्रुतिःप्रशस्तानामर्थवादैःप्राशस्त्येनबोधितानामपिकर्मणांन्यासंत्यागंसादरंस्फुटमाह नतुकर्मसमुच्चयमित्यर्थः तथावाजिनांवाज

यदिस्मनष्टानपुनःप्रसूयतेकर्ताऽहमस्येतिमतिःकथंभवेत् ॥ तस्मात्स्वतंत्रानकिमप्यपेक्षतेविद्याविमोक्षायविभातिकेवला ॥ २० ॥ सातैत्तिरीयश्रुतिराहसादरंन्यासंप्रशस्ताखिलकर्मणांस्फुटम् ॥ एतावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनम् ॥ २१ ॥ विद्यासमत्वेनतुदर्शितस्त्वयाक्रतुर्नदृष्टांतउदाहृतःसमः ॥ फलैःपृथक्त्वाद्बहुकारकैःक्रतुः संसाध्यतेज्ञानमतोविपर्ययम् ॥ २२ ॥

सनेयिनाम् एतावदरेखल्वमृतत्वमित्यादिकाज्ञानंविमोक्षायसाधनंनकर्मेत्येतदाह ॥ २१ ॥ अहंकारत्यागरूपकारणवैषम्यात्क्रियाज्ञानयोर्वैषम्यमुक्त्वाफलप्रयुक्तमपिवैषम्यमाह विद्येति हेसमुच्चयवादिन्त्वयाक्रतुरग्निष्टोमादिर्विद्यासमत्वेनदर्शितःपरंतुसमोदृष्टांतोनोदाहृतः अनेनक्रतुर्विद्यासमः श्रुतिबोधितकर्तव्यताकत्वादित्यनुमानंनिरस्तम् दृष्टांताभावात् अन्वय्येवानुमानंनव्यतिरेकीतिभावः एतच्चाकरेविस्तरेणप्रपंचितम् ननुविद्याकर्मणीसमे एकफलत्वाच्चक्रदंडादिवदित्यनुमानमितिचेत्तत्राह फलैःपृथक्त्वात्षष्ठ्यर्थेतृतीया फलानांभेदादित्यर्थः एवंचस्वरूपासिद्धोहेतुरितिभावः समानकारकत्वमपिहेतुर्नेत्याह क्रतुर्बहुभिःकारकैरहंममताभिमानरूपैरांतरैर्बाह्यैश्चदेशकालादिनियमैश्चसाध्यते ज्ञानंत्वतोविपर्ययवदतोनतयोःसाम्यमितिभावः ॥ २२ ॥

नन्वकरणेप्रत्यवायभियाकर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनहिनिश्चयेनाहंप्रत्यवायसहितोभविष्यामीत्येवंशुद्धात्मनिअनात्मधर्मस्यधीरज्ञस्य तत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पापादेरनात्मधर्मतानिश्चयाच्च तस्माद्बुधैःकर्मक्रियात्मभिःषष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानांविधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्मविधिभिरवश्यकर्तव्यतयाबोधितमपित्याज्यमित्यर्थः ॥ २३ ॥ अथविरक्तस्यकार्यमाह श्रद्धेति गुरुशास्त्रयोर्विश्वासःश्रद्धातदन्वितोबुभुत्सुःशुद्धमानसोऽपिनिष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोःप्रसादाल्लब्धतत्त्वमसीतिवाक्यतःश्रुतमात्माजीवयोरैकात्म्यंविज्ञा

सप्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धानतुतत्त्वदर्शिनः ॥ तस्माद्बुधैस्त्याज्यमपिक्रियात्मभिर्विधानतःकर्मविधिप्रकाशितम् ॥ २३ ॥ श्रद्धान्वितस्तत्त्वमसीतिवाक्यतोगुरोःप्रसादादपिशुद्धमानसः ॥ विज्ञायचैकात्म्यमथात्मजीवयोःसुखीभवेन्मेरुरिवाप्रकंपनः ॥ २४ ॥ आदौपदार्थावगतिर्हिकारणंवाक्यार्थविज्ञानविधौविधानतः ॥ तत्त्वंपदार्थौपरमात्मजीवकावसीतिचैकात्म्यमथानयोर्भवेत् ॥ २५ ॥

यमननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य चएवार्थः साक्षात्कृत्यैवसुखीभवेत् सकलदुःखहीनोभवेदित्यर्थः अप्रकंपनः विषयाभिलाषाक्षोभितांतःकरणः ॥ २४ ॥ महावाक्यंविवरीतुंवाक्यार्थस्यपदार्थबोधपूर्वकत्वमाह आदाविति विधानतःभ्रमप्रमादराहित्येनवाक्यार्थविज्ञानस्यविधावुत्पत्तौआदौप्रथमंमुख्यमितियावत्पदार्थावगतिःकारणम् हिप्रसिद्धंतस्यपदत्रयंतत्त्वमसीति तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वंपदार्थोजीवःअनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहायसंगृह्यतयोश्चिदात्मताम् ॥ संशोधितांलक्षणयाचलक्षितांज्ञात्वा
स्वमात्मानमथाद्वयोभवेत् ॥ २६ ॥ एकात्मकत्वाज्जहतीनसंभवेत्तथाऽजहल्लक्षणताविरोधतः ॥ सोऽयंप
दार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः ॥ २७ ॥

ननुसर्वज्ञत्वादिगुणस्येशस्यकिंचिज्ज्ञत्वधर्मवताजीवेनैकात्म्यंविरुद्धमित्याशंक्याह प्रत्यगिति अहंबुद्धिवेद्यत्वंप्रत्यक्त्वंजीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोःपरमात्मजीवात्मनोर्विरोधंविहायत्यक्त्वातयोःसंशोधितांयुक्तिभिःसम्यग्विचारितांतत्त्वंपदाभ्यांशक्त्यभावेऽपिवक्ष्यमाणप्रकारयालक्षणयालक्षितांचिदात्मतांसंगृह्यतत्त्वंपदोपस्थितिविषयांकृत्वास्वमात्मानंतथाज्ञात्वाऽथएकात्मज्ञानानंतरंअद्वयोभवेत्चित्स्वरूपतांप्राप्तइवभवेत् पूर्वमपितत्स्वरूपएवविस्मृतकंठचामीकरन्यायेनचतत्प्राप्तिरतइवेत्युक्तम् अयंभावः तत्त्वंपदयोर्द्वावर्थौवाच्योलक्ष्यश्च तत्रतत्पदस्यमायोपाधिःसर्वज्ञत्वादिविशिष्टोवाच्यः त्वंपदस्यापिकिंचिज्ज्ञत्वादिविशिष्टोमायाकार्याविद्योपाधिरविद्यावदंतःकरणोपाधिर्वावाच्यः उभयोरपिविशेषणांशत्यागेनशुद्धश्चिदात्मालक्ष्यःतत्रवाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपिलक्ष्ययोरैक्यंनिर्बाधमेवेति ॥ २३ ॥ उक्तलक्षणस्वरूपमाह एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागंगायांघोषइत्यत्रगंगापदार्थस्यप्रवाहस्यघोषाधारतानुपपत्त्यासर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृतेनएकात्मकत्वात् विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् तथाऽजहल्लक्षणताजहत्स्वार्थलक्षणावत्त्वमपिअत्रनसंभवति यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकपदस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा सापिन विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् अतोभागलक्षणाजहदजहल्लक्षणायुज्येत अदोषतःपूर्वोक्तदोषाभावात् विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च तत्रदृष्टांतःसोयंपदार्थाविवयथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोतीतानुभवविषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः तयोश्चविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेनानुभवगतातीतत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः ॥ २७॥

अथत्याज्यत्वायजीवोपाधिमाह रसापृथ्वीआदिर्येषांतानिपंचीकृतानियानिभूतानितेभ्यःसंभवोयस्यतत् पंचीकरणंचेत्थंएकैकंभूतंद्विधाविभज्यतत्रैकैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपंचात्मकंभवति भागाधिक्याच्चप्रातिस्विकतयाभूरादिव्यवहारोऽपि सुखदुःखयोरादीनियानिकर्माणितेषांभोगस्तत्कर्मजसुखदुःखानुभवस्तस्यालयमाश्रयभूतमाद्यंतवत्उत्पत्तिनाशयोगि आदिकर्मजंप्राग्भवीयकर्मजन्यंमायामयंपरंपरयामायाविकारः तद्विकारभूतविकारत्वात् एतच्छरीरमात्मनःस्थूलमुपाधिंवदंतीतिशेषः ॥२८॥ अथसूक्ष्मोपाधिमाह सूक्ष्ममिति बुधाअन्यत्स्थूलशरीरविलक्षणंशरीरंलिंगदेहाख्यंआत्मनउपाधिंविदुः तत्स्वरूपमाह सूक्ष्मंचक्षुराद्यविषयःमनोबुद्धिदशेंद्रियैःप्राणैश्चयुतम् संकल्पात्मकंमनःनिश्चयात्मिकाबुद्धिः घ्राणर

रसादिपंचीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरीरमाद्यंतवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥ सूक्ष्मंमनोबुद्धिदशेंद्रियैर्युतंप्राणैरपंचीकृतभूतसंभवम् ॥ भोक्तुःसुखादेरनुसाधनंभवेच्छरीरमन्यद्विदुरात्मनोबुधाः ॥ २९ ॥ अनाद्यनिर्वाच्यमपीहकारणंमायाप्रधानंतुपरंशरीरकम् ॥ उपाधिभेदात्तुयतःपृथक्स्थितंस्वात्मानमात्मन्यवधारयेत्क्रमात् ॥ ३० ॥

सनाचक्षुस्त्वक्श्रोत्रेतिपंचज्ञानेंद्रियाणि वाक्पाणिपादपायूपस्थानिकर्मेंद्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतंएतत्सप्तदशसमुदायात्मकम् तदाधारभूतान्याहापंचीकृतभूतसंभवंतेभ्यउत्पन्नंअतएवादृश्यम् तथाभोक्तुःसुखदुःखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यैतदनुगतस्यैवभोगसाधनमितिभावः एतद्वियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥ इतिजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह अनादीति अनादिउत्पत्तिहीनम् नानाविधपरिणामशालितयापरिणामरूपेणनश्वरमितिअनादित्वमात्रोक्त्यासूचितम् अनिर्वाच्यंसत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपंचस्यजनकम् ईदृशीमायातुब्रह्मणःपरंईश्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् स्वार्थेकः एवमुपाधिभेदादेकमेवचैतन्यंयतःपृथक्स्थितंजीवईशइतिभेदबुद्धिविषयमतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

अथवाक्यार्थविचारफलमाह कोशेष्विति आनंदमयस्यब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्संगात्तत्तदाकृतिर्विभातियथाजपादिसंगात्स्फटिकोऽनेकाकृतिर्भाति आनंदमयस्यापिजीवत्ववादिनांतुतेनसहपंचसुकोशेष्वितिबोध्यं अस्मिन्महावाक्येपरितोविचारितेसम्यग्विचारितेसत्ययमात्मासंगरूपःअन्नमयादिभिःसंगरहितः असंगोनहिसज्जतइतिश्रुतेः अजोऽद्वयश्चविज्ञायते स्थूलोहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसंगात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः एवंचतदुपाधिकृततद्रूपताप्रतीतिनिरासएवविचारफलमितिभावः ॥ ३१ ॥ जाग्रदाद्यवस्थाऽपिबुद्धिधर्मोनात्मधर्मइत्याह बुद्धेरिति इहआत्मनिस्वप्नादिभेदेनजाग्रत्स्वप्नसुषुप्तिभेदेनयात्रिधावृत्तिर्दृश्यतेसाऽपिगुणत्रयात्मनःसत्त्वरजस्तमोरूपगुणत्रयस्वरूपायाबुद्धेर्धर्मः उक्तावस्था

कोशेष्वयंतेषुतुतत्तदाकृतिर्विभातिसंगात्स्फटिकोपलोयथा ॥ असंगरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारिते ॥ ३१ ॥ बुद्धेस्त्रिधावृत्तिरपीहदृश्यतेस्वप्नादिभेदेनगुणत्रयात्मनः ॥ अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषानित्येपरेब्रह्मणिकेवलेशिवे ॥ ३२ ॥ देहेंद्रियप्राणमनश्चिदात्मनांसंघादजस्रंपरिवर्ततेधियः ॥ वृत्तिस्तमोमूलतयाज्ञलक्षणायावद्भवेत्तावदसौभवोद्भवः ॥ ३३ ॥

त्रयस्योक्तमूलकत्वात् एतदवस्थात्रयस्यास्मिन्अवस्थानंव्यभिचारतोमृषाबुद्ध्यध्यासनिबंधनंनतुवास्तवमित्यर्थः अन्योऽन्यतोव्यभिचारतस्तस्यावस्थात्रयस्यस्वरूपतोमृषात्वात्तद्भानस्यमृषात्वमेव स्वप्नकालेजाग्रत्सुषुप्त्योरभावात् जाग्रतिइतरद्वयस्याभावात् सुषुप्तावितरयोरभावात् परस्परंव्यभिचारोबोध्यः आत्मनस्तदनाश्रयत्वंविशेषणैराह नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीतेब्रह्मणिव्यापकेकेवलेऽसंगेशिवेआनंदरूपेएवंभूतेसदैकरसेपरस्परव्यभिचारधर्माधानमसंभवीतिभावः ॥ ३२ ॥ अथत्याज्यत्वायसंसारमूलभूतांवृत्तिमाह देहेति एषांसंघात्इतरेतराध्यासविषयात् अजस्रंयावद्धियोबुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञलक्षणाअज्ञत्वज्ञापिकायावत्परिवर्ततेतावद्भवोद्भवःसंसारोद्भवोभवेत् तमःपदंरजसोप्युपलक्षणम् रजस्तमःप्रधानाबुद्धिःसंसारहेतुत्वात्सर्वथात्याज्येतिभावः ॥ ३२॥

कृतमहावाक्यविचारस्यकर्तव्यमाह नेतीति अथातआदेशोनेतिनेतीतिप्रमाणेननिराकृतंमिथ्यात्वेनगृहीतमखिलंजगत्येनसः ततोहृदासत्त्वप्रधानेनमनसा सम्यगास्वादितंचिल्लक्षणंघनामृतंदुःखासंभिन्नंसुखंयेनसः स्वर्गादितुपरिणामदुःखत्वात्तत्संभिन्नमेव एवंभूतोऽशेषंजगद्देहेंद्रियादिदृश्यसमूहंत्यजेत् हानोपादानबुद्धिविषयंनकुर्यात् किंतूदासीनस्तत्रभवेत् ननुदेहेंद्रियादिभिरेवतज्ज्ञानलाभात्कथमुपजीव्यस्यत्यागइत्याशंक्यदृष्टांतदर्शनेनपरिहरति यथातृषावान्आत्तःसद्रसोमाधुर्यंयेनतादृशंनारिकेलनारंगादिफलांतर्वर्त्यंभःपीत्वातत्स्थानभूतंतत्फलंजहातितत्रोदासीनोभवतितद्वत्सर्वदृश्यसारांशोब्रह्मतल्लाभेसतिनिःसारंदृश्यंनोपादेयंनापिहेयमितिभावः यतोभयादिसंभावनातद्धेयमित्युच्यते ॥ ३४ ॥ इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह कदाचिदिति कदापीत्य

नेतिप्रमाणेननिराकृताखिलोहृदासमास्वादितचिद्घनामृतः ॥ त्यजेदशेषंजगदात्तसद्रसंपीत्वायथांऽभः
प्रजहातितत्फलम् ॥ ३४ ॥ कदाचिदात्मानमृतोनजायतेनक्षीयतेनापिविवर्धतेऽनवः ॥ निरस्तसर्वातिश
यःसुखात्मकःस्वयंप्रभःसर्वगतोऽयमद्वयः ॥ ३५ ॥

र्थः अनवःउत्पत्त्यनंतरंविद्यमानोहिनवः तेनजन्मानंतरास्तित्वंव्यावर्तितं नवत्वाभावेनैवजीर्णत्वाभावादवस्थांतरापत्तिरूपपरिणामोऽपिनिरस्तः अनेनजायतेऽस्तिविपरिणमतेवर्धतेपक्षीयतेनश्यतीतिषड्भावविकारराहित्यमुक्तं एवंचैतद्भिन्नंसर्वमुक्तषड्भावविकारवत्त्वादनित्यमितिततोविरज्येतेतिबोधितं यतईदृशोतएव निरस्तःसर्वस्यदेहेंद्रियादेरतिशयोमहत्त्वंयेनस्वलाभात्सः यल्लाभान्नापरोलाभइतिश्रुतेः यतःसुखात्मकःआनंदस्वरूपः स्वयंप्रभःस्वप्रकाशः देहेंद्रियादिस्तुदुःखस्वरूपःपरप्रकाश्यश्च यस्यभासासर्वमिदंविभातीतिश्रुतेः सर्वगतोव्यापकः अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव नततोऽतिरिक्तइतिभावः अयमात्माब्रह्मेतिश्रुतेः ॥ ३५ ॥

अ०रा० ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशंकते एवंविधेइति दुःखमयःदुःखप्रचुरः उत्तरयति अज्ञानमूलकोयोऽध्यासो उ०कां०
देहांतःकरणादौअहंममेत्यध्यासस्तद्वशात् एवंचभ्रांतिरूपातत्प्रतीतिरितिभावः नन्वेवंकथंतस्यसंसारस्यनिवृत्तिस्तत्राह ज्ञानेति आविर्भूतइतिशेषः ज्ञानस्या ॥ ७ ॥
॥ ११ ॥ ज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापिविलयइत्यर्थः यथारज्जुसर्पस्यलयइत्यर्थः ॥ ३६ ॥ अथाध्यासलक्षणमाह यद

एवंविधेज्ञानमयेसुखात्मकेकथंभवोदुःखमयःप्रतीयते ॥ अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत
विरोधतःक्षणात् ॥ ३६ ॥ यदन्यदन्यत्रविभाव्यतेभ्रमादध्यासमित्याहुरमुंविपश्चितः ॥ असर्पभूतेहिवि
भावनंयथारज्ज्वादिकेतद्वदपीश्वरेजगत् ॥ ३७॥ विकल्पमायारहितेचिदात्मकेऽहंकारएषःप्रथमःप्रकल्पि
तः ॥ अध्यासएवात्मनिसर्वकारणेनिरामयेब्रह्मणिकेवलेपरे ॥ ३८ ॥

न्यदिति यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौभ्रमात्भ्रमजनकाद्दोषाद्विभाव्यतेविज्ञायते अमुंविपश्चितोविद्वांसोऽध्यासइत्याहुः यथाऽसर्पभूतेरज्ज्वादौअहिविभा ॥ ११॥
वनंसर्पारोपोरज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपिजगद्देहादिसंसारात्मकंसर्वंविभाव्यतेआत्मज्ञानाभावाद्यथार्थतयाज्ञायते ॥ ३७ ॥ आत्मनिजगद्भानेकीदृशोऽध्या
सोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतत्संगरहितेचिदात्मकेचित्स्वरूपेसर्वकारणेनिरामयेदुःखासंभिन्नानंदमयेकेवलेसर्वविकारशून्ये
परेदृश्यविलक्षणेब्रह्मणिव्यापकेआत्मनिप्रथममहंकारःकल्पितःसएवाध्यासः अहंबुद्ध्यात्मकोऽध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यतिरेकौप्रमाणयति इच्छादीति परेसर्वसाक्षिणिआत्मनिसंसृतिहेतवः भासमानसंसारकारणंसदाकालत्रयेऽपिइच्छादिरागादिसुखादिधर्मिकाःइच्छोपेक्षेरागद्वेषौसुखदुःखेइत्येवमादिद्वंद्वधर्मिकाःधियएव धीषुसतीषुसंसारइत्यन्वयमुक्त्वातद्व्यतिरेकमाह यस्मात्कारणात्प्रसुप्तौतदभावात्धीवृत्त्यभावात् परआत्मानोऽस्माभिः तृतीयार्थेषष्ठी सुखरूपेणस्वस्वरूपमात्रेणविभाव्यतेनिश्चीयते नतुसंसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखम

इच्छादिरागादिसुखादिधर्मिकाःसदाधियःसंसृतिहेतवःपरे ॥ यस्मात्प्रसुप्तौतदभावनःपरःसुखस्वरूपेण
विभाव्यतेहिनः ॥ ३९ ॥ अनाद्यविद्योद्भवबुद्धिबिंबितोजीवःप्रकाशोऽयमितीर्यतेचितः ॥ आत्माधियः
साक्षितयापृथक्स्थितोबुद्ध्यापरिच्छिन्नपरःसएवहि ॥ ४० ॥

हमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९ ॥ पुनस्तत्त्वंपदार्थस्वरूपमाह अनादीति अनादिर्याविद्याततउद्भवोयस्याबुद्धेरंतःकरणस्यतत्रबिंबितःप्रतिबिंबितश्चितःप्रकाशःसजीवइतीर्यतेआत्मापरमात्माधियःसाक्षितयाधीधर्मासंगेनैवपृथक्स्थितः अंतर्यामितयेत्यर्थः जीवोऽहंसुखीत्यादिप्रकारेणांतःकरणधर्माध्यासवान्परमात्मातुसाक्षितयासर्वत्रविद्यमानोऽपिनतथेतिभावः अतएवबुद्ध्यापरिच्छिन्नपरःबुद्धिलक्षणपरिच्छेदरहितःअतएवपरःएवंचज्ञानेनप्रतिबिंबाधारविलयेप्रतिबिंबस्यविलयात्सजीवःसएवपरमात्मैवहिप्रसिद्धंसइत्यस्यचावृत्तिर्बोध्या ॥ ४० ॥

चिद्बिंबसाक्षात्मधियांप्रसंगतस्त्वेकत्रवासादनलाक्तलोहवत् ॥ अन्योऽन्यमध्यासवशात्प्रतीयतेजडाजडत्वंचचिदात्मचेतसोः ॥ ४१ ॥ गुरोःसकाशादपिवेदवाक्यतःसंजातविद्यानुभवोनिरीक्ष्यतम् ॥ स्वात्मानमात्मस्थमुपाधिवर्जितंत्यजेदशेषंजडमात्मगोचरम् ॥ ४२ ॥ प्रकाशरूपोऽहमजोऽहमद्वयोसकृद्विभातोऽहमतीवनिर्मलः ॥ विशुद्धविज्ञानघनोनिरामयःसंपूर्णआनंदमयोऽहमक्रियः ॥ ४३ ॥

अथबुद्ध्यात्मनोःपरस्पराध्यासवशात्परस्परधर्मभानमितिदार्ढ्यायपुनराह चिद्बिंबेति चिदात्मचेतसोरन्योन्याध्यासवशात्परस्परतादात्म्यारोपाज्जडाजडत्वंप्रतीयते चेतसोवृत्तीनांज्ञानत्वंजीवात्मनोजडत्वंप्रतीयते अतएवज्ञानाश्रयआत्मेतिचितएवतार्किकव्यवहारः जीवात्मनिजडात्माकथ्यतेबुधैरितिस्मार्तव्यवहारश्च अत्रहेतुःचिदित्यादि चिद्बिंबंयस्यसचिदाभासःअक्षैःसहितःसाक्षःसेंद्रियःसचासावात्मामनःधीरंतःकरणंतेषांप्रकृष्टसंगादतिसन्निकर्षादध्यासइत्यर्थः अत्रदृष्टांतःअनलाक्तलोहवत्अग्नितप्तलोहपिंडवत् अग्निधर्मोदाहकत्वंलोहधर्मश्चवर्तुलत्वाद्यनलेभासते तत्रहेतुरेकत्रवासात्परस्पराविभागेनवृत्तेरित्यर्थः तद्वदेतयोरपिपरस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥ उक्तमेवार्थंदार्ढ्यायपुनराह गुरोरिति वेदवाक्यतइत्यनेनश्रवणंगुरोःसकाशादपि ततश्चानेनमननमुक्तं ताभ्यांसंजातोविद्ययाज्ञानरूपस्यात्मनोऽनुभवोयस्यसः अनेनकृतनिदिध्यासनइत्यर्थः तंचिदानंदस्वरूपंस्वात्मानमुपाधिवर्जितंरहितोपाधिधर्ममात्मस्थंहृत्स्थंनिरीक्ष्यअपरोक्षीकृत्याशेषंजडंदृश्यंत्यजेत् तत्रोदासीनोभवेदितिभावः ॥ ४२ ॥ ज्ञेयंनिरुपाधिकंस्वरूपंश्लोकद्वयेनाह प्रकाशेति अहंप्रकाशरूपःस्वप्रकाशःपरप्रकाशहीनःपरप्रकाशरूपोयथाघटादिः अजोजन्मादिहीनः अद्वयःसजातीयद्वितीयरहितः असकृद्विभातः सकृदपिपरेणभासकांतरेणप्रकाशितःसकृद्विभातःनसकृद्विभातोसकृद्विभातः नतत्रसूर्योभातिनचंद्रतारकमितिश्रुतेःनतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलःमायाकृतावरणविक्षेपरहितःविशुद्धविज्ञानघनः विशुद्धचिदेकरसः निरामयःकर्तृत्वाभिमानरहितः संपूर्णःदेशकालपरिच्छेदहीनः आनंदमयःआनंदरूपःस्वार्थेमयट्अक्रियःपरिणामहीनः ॥ ४३ ॥

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिंत्यशक्तिमान्यः परमात्मा अतींद्रियज्ञानंइंद्रियातिरिक्तज्ञानरूपः यतोवाचोनिवर्तंतेअप्राप्यमनसास
हइतिश्रुतेः अविक्रियात्मकोऽपरिणामी अनंतपारःअंतःकालतःपारःपरंतीरंतावविद्यमानौयस्य तेनेदृशकालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदिअहर्नि
शंविभावितःसोऽहमित्यर्थः ॥ ४४ ॥ एवंभावनायाःफलमाह एवमिति उक्तरीत्यासदाआत्मानंअखंडितात्मनाविषयानाकृष्टचित्तेनविचारमाणस्यध्यायतः
धातूनामनेकार्थत्वात्चरमाणएवचारमाणः स्वार्थेऽण् विशुद्धभावनाब्रह्माकारांतःकरणवृत्तिरुदेतीतिशेषः साचोदिताकारकैर्देहांतरप्रापककर्मभिःसहाविद्याम

सदैवमुक्तोऽहमचिंत्यशक्तिमानतींद्रियज्ञानमविक्रियात्मकः॥अनंतपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृ
दिवेदवादिभिः॥ ४४ ॥एवंसदात्मानमखंडितात्मनाविचारमाणस्यविशुद्धभावना॥हन्यादविद्यामचिरे
णकारकैरसायनंयद्वदुपासितंरुजः॥४५॥ विविक्तआसीनउपारतेंद्रियोविनिर्जितात्माविमलांतराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६॥

चिरेणशीघ्रमेवहन्यात् यथोपासितंसेवितंरसायनंरुजोहन्यात्तद्वत् ॥ ४५ ॥ तत्रध्यानेइतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मा
सनाद्युपविष्टः उपारतेंद्रियःतेनशमदमादिसंपन्नःविनिर्जितात्माप्राणायामादिभिर्जितांतःकरणःअतएवविमलांतराशयोविशुद्धचित्तःविज्ञानदृक्विज्ञानेएवदृक्
भावनंयस्यसःद्रष्टृदृश्यभानरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनःतत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसंग आत्मसंस्थि
तःआत्मन्येवसंस्थासमाप्तिःसंजातायस्यसः तेननकदापिविषयांतरसंचारवच्चित्तः विभावयेत्ध्यायेत् ॥ ४६ ॥

विश्वंयदेतत्परमात्मदर्शनंविलापयेदात्मनिसर्वकारणे ॥ पूर्णश्चिदानंदमयोवतिष्ठतेनवेदबाह्यंनचकिंचिदांतरम्
॥ ४७॥ पूर्वंसमाधेरखिलंविचिंतयेदोंकारमात्रंसचराचरंजगत् ॥ तदेववाच्यंप्रणवोहिवाचकोविभाव्यतेज्ञानवशान्न
बोधतः॥ ४८ ॥ अकारसंज्ञःपुरुषोहिविश्वकोह्युकारकस्तैजसईर्यतेक्रमात्॥ प्राज्ञोमकारःपरिपठ्यतेखिलैःसमाधिपूर्वं
नतुतत्त्वतोभवेत्॥ ४९ ॥ विश्वंत्वकारंपुरुषंविलापयेदुकारमध्येबहुधाव्यवस्थितम् ॥ ततोमकारेप्रविलाप्यतैजसंद्वितीयवर्णं
प्रणवस्यचांतिमे॥ ५० ॥

किंच यदेतत्भूतंभविष्यद्वर्तमानंविश्वंपरमात्मादर्शनंभासकोयस्यतत् तस्यभासासर्वमिदंविभातीतिश्रुतेः तत्सर्वकारणेमायासन्निधानात्सर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह संपूर्णःअवाप्तसमस्तकामः तस्यकाम्याभावात् चिदानंदमयःतद्रूपोवतिष्ठते बाह्यमांतरंचदृश्यंनजानाति सर्वत्रब्रह्मदर्शनादितिभावः ॥ ४७ ॥ समाधिसिद्धेःपूर्वंयत्कर्तव्यंतदाह पूर्वमिति समाधेःसकलविषयव्यासंगनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिःसमाधिस्ततःपूर्वंअखिलंसचराचरंजगत्ओंकारमात्रंविचिंतयेत् ओंकारोमीयतेनयेतिमात्राप्रमाणंबोधकत्वेनपरिच्छेदकोयस्यतथाजानीयात् तदेवविवृणोति तदेवेति जगदेवेत्यर्थः प्रणवोवाचकोविभाव्यतेएतत्हिप्रसिद्धइत्यर्थः इयंभावनाज्ञानवशादेवनबोधतः निर्विशेषब्रह्मसाक्षात्कारस्तदुत्तरंनेत्यर्थःतस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥ उक्तमर्थंविवृणोति अकारेति अकारसंज्ञस्तद्वाच्यःपुरुषोहिविश्वकोविश्वएवविश्वकः विश्वशब्देनपरिभाषितः अयं जाग्रत्साक्षीविराट् ततःस्वप्नसाक्षीतैजसःतेनपदेनपरिभाषितः लिंगदेहाभिमानीहिरण्यगर्भउकारकः उकारप्रतिपाद्यईर्यते ततःसुषुप्तिसाक्षीप्राज्ञपदवाच्योमायोपाधिकोमकारस्तद्वाच्यःपठ्यतेऽखिलैर्वेदैः इयंभावनासमाधिपूर्वंसमाधेःपूर्वमेव नतत्त्वतःतत्त्वसाक्षात्कारेसतिनभवेत् सर्वस्यब्रह्मणिप्रविलयात् ॥ ४९ ॥ अथविलापनप्रकारमाहद्वाभ्याम् विश्वंत्विति उकारमध्येबहुधाव्यवस्थितंस्थूलदेहनिबंधनंस्थूलदेहाभिमानेनस्थितंविश्वंपुरुषंतद्वाचकमकारंविलापयेत् तुश्चार्थे विलीनंभावयेत्ततस्तैजसंलिंगदेहाभिमानिनंपुरुषंतद्वाचकंप्रणवद्वितीयवर्णमुकारंविलीनविश्वकंमकारेविलाप्यविलीनंभावयित्वा ॥ ५० ॥

ततस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणंकारणत्वाभिमानिनंपुरुषंइहात्मनिचिद्घनेपरेविलापयेत् तथाभावयेत् ततःसोऽहंसर्वविलापाधिष्ठानंपरंब्रह्मविभावयेत् तद्विशिनष्टि सदाविमुक्तिमत् नित्यमुक्तम् नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथंब्रह्मत्वभावनेत्याशंक्याहंपदार्थंविशिनष्टि उपाधितोमुक्तःअतएवामलः तथाभावनेसाधनम् विज्ञानदृग्विज्ञानंनिदिध्यासनंब्रह्ममात्रप्रत्ययाविच्छेदरूपाद्दृक्तत्साक्षात्कारेसाधनंयस्यसः ॥ ५१ ॥ एवंभावनावतोलक्षणमाह एवमिति उक्तप्रकारेणसदाजातापरमात्मन्येकभावनायस्यसः परिविस्मृतमखिलंपुत्रदेहादियेनसः अतएवस्वस्वरूपानंदेनैवतुष्टःनतुविषयानंदेन तस्यपरिणामेदुःखरूपत्वात्ततोविरक्तइत्यर्थः साक्षान्नित्यात्मनिसुखप्रकाशकः साक्षादौपाधिकनामरूपभेदराहित्येननित्यमखंडितमात्मस्वरूपंयत्सुखप्रकाशश्चतद्रूपः एवंरूपोविमु

मकारमप्यात्मनिचिद्घनेपरेविलापयेत्प्राज्ञमपीहकारणम् ॥ सोऽहंपरब्रह्मसदाविमुक्तिमद्विज्ञानदृङ्मुक्तउपाधितोऽम
लः॥ ५१ ॥ एवंसदाजातपरात्मभावनःस्वानंदतुष्टःपरिविस्मृताखिलः॥ आस्तेसनित्यात्मसुखप्रकाशकःसाक्षाद्विमुक्तो
ऽचलवारिसिंधुवत् ॥ ५२ ॥ एवंसदाऽभ्यस्तसमाधियोगिनोनिवृत्तसर्वेंद्रियगोचरस्यहि ॥ विनिर्जिताशेषरिपोरहंसदा
दृश्योभवेयंजितषड्गुणात्मनः॥ ५३ ॥ ध्यात्वैवमात्मानमहर्निशंमुनिस्तिष्ठेत्सदामुक्तसमस्तबंधनः ॥ प्रारब्धमश्नन्नभि
मानवर्जितोमय्येवसाक्षात्प्रविलीयतेततः॥ ५४ ॥

क्तोजीवन्मुक्तः अचलंनिश्चलंवारियस्यतादृशसिंधुवदास्ते विषयसंबंधरूपलहरीरहितआस्तइत्यर्थः ॥ ५२ ॥ ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह एवमिति उक्तप्रकारेणसदाभ्यस्तसमाधेर्योगिनः निवृत्ताःसर्वेषामिंद्रियाणांगोचराविषयाःशब्दादयोयस्य विनिर्जिताअशेषारिपवःकामादयोयेनतस्य तज्जयेनविषयेष्वंतःकरणाप्रवृत्तिःसूचिता अतएवसर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोधरूपत्वस्वतंत्रत्वनित्यमलुप्तत्वानंतरूपाःषड्गुणायस्यतादृशआत्माजितोवशीकृतोयेनतस्यसदादृश्योभवेयम् एतेनमद्भक्तस्ययोगिनोऽहंदृश्योनतुभक्तिविमुखस्येतिसूचितम् ॥ ५३ ॥ एवंविधोजीवन्मुक्तःप्रारब्धवशेनअनभिमानःभोगानश्नंस्तिष्ठेत् ततोमय्येवविलीयतेमद्रूपोभवतीत्याह ध्यात्वैवमिति ॥ ५४ ॥

सर्वधर्मापेक्षयायमेवधर्मोज्यायानित्याह आदौचेति भवंसंसारंआदिमध्यावसानेषुसर्वथाभयशोकयोःकारणंविदित्वातत्कारणीभूतंविधिवादैर्यजेतेत्यादिभिश्चोदितंबोधितंसमस्तंकर्ममार्गंकाम्यंहित्वाअखिलात्मनांजीवानांस्वरूपभूतंमामात्मानंपरमेश्वरंभजेत् यथाधनस्यार्जनेनादौदुःखंमध्येपालनकृतंतत्रराजादिकृतभयमंतेनाशेशोकपर्यवसायिदुःखमेवंपदार्थमात्रेद्रष्टव्यम् ॥ ५५ ॥ मय्यभेदभावनयानामरूपाविभागेनमद्रूपएवभवतीत्यमुमर्थंसदृष्टांतमाह आत्मनीति आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपंजीवमभेदेनविभावयन्यदातिष्ठतीतिशेषः तदामयात्मनापरमेश्वरेणाभेदेनभवति अभिन्नोभवति तत्रदृष्टांतः यथासमुद्रेप्रविष्टंनद्यादिजलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभंगे यथाचर्मभस्त्रिकाद्यवच्छिन्नो

आदौचमध्येचतथैवचांततोभवंविदित्वाभयशोककारणम् ॥ हित्वासमस्तंविधिवादचोदितंभजेत्स्वमात्मानमथाखिलात्मनाम्॥५५॥आत्मन्यभेदेनविभावयन्निदंभवत्यभेदेनमयाऽत्मनातदा॥यथाजलंवारिनिधौयथापयःक्षीरेवियद्व्योम्न्यनिलेयथाऽनिलः ॥ ५६ ॥ इत्थंयदीक्षेतहिलोकसंस्थितोजगन्मृषैवेतिविभावयन्मुनिः ॥ निराकृतत्वाच्छ्रुतियुक्तिमानतोयथेंदुभेदोदिशिदिग्भ्रमादयः ॥ ५७॥

वायुरनिलेमहावायौनामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥ एवमात्मतत्त्वज्ञस्यजगत्सत्यत्वभ्रमःस्वतएवापैतीत्याह इत्थमिति हिरप्यर्थे लोकसंस्थितोऽपि जीवन्मुक्तिदशायांप्रारब्धवशाल्लोकव्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयन्सन्यदियदाइत्थमीक्षते ऐकात्म्यंजानीयात्तदानिवृत्तजगत्सत्यत्वभ्रमोभवतीतिशेषः तत्रहेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहितानुमानरूपात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टांतोयथेंदुभेदः एकचंद्रेद्विचंद्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्ततेयथाचदिशिप्राच्यादौअन्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्वते एवं भ्रमतःपुरुषस्यदिक्षुभ्रमणभ्रमोनिकटवर्तिवृक्षादौचभ्रमणभ्रमस्तत्स्थैर्यज्ञानेननिवर्ततेतद्वत् ॥ ५७ ॥

ईदृशज्ञानेमदाराधनमेवोपायइत्याह यावदिति अखिलंजगत्मदात्मकंमदधिष्ठानकंमद्विवर्तभूतंयावन्नपश्येत्तावन्मत्प्राप्तयेश्रद्धालुःभगवदाराधनमेवज्ञानप्रापकमित्यत्रदृढविश्वासवान् अतिशयेनोर्जितावृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणंचिह्नंयस्यसः तावन्मदाराधननिष्ठोभवेत्एवंहितस्यहृदिअहमहर्निशंदृश्योभवामि येयथामांप्रपद्यंतेतांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥ स्वोक्तवचनजातस्यश्रुतिसमत्वंकथमेतदालोचनमपिमदाराधनप्रतिबंधकदुरितध्वंसोपायइत्याह रहस्यमिति श्रुतिसारसंग्रहत्वेनातिगोपनीयताअप्रमाणशंकाकलंकराहित्यंसूचितम् आलोचयतिसम्यग्विचारयति ॥ ५९ ॥ अथभगवान्उक्तमेवार्थंसंक्षेपेणदार्ढ्यायपुनराह भ्रातरिति यदीतियदित्यर्थे यदिदंजगत्परिदृश्यतेतत्सर्वंमायैवेतिज्ञात्वेतिशेषः चेतसासर्वंपरिहृत्यतत्रौदासीन्यंकृत्वाम

यावन्नपश्येदखिलंमदात्मकंतावन्मदाराधनतत्परोभवेत् ॥ श्रद्धालुरत्यूर्जितभक्तिलक्षणोयस्तस्यदृश्योऽहमहर्निशंहृदि ॥ ५८ ॥
रहस्यमेतच्छ्रुतिसारसंग्रहंमयाविनिश्चित्यतवोदितंप्रिय ॥ यस्त्वेतदालोचयतीहबुद्धिमान्समुच्यतेपातकराशिभिःक्षणात् ॥ ५९ ॥
भ्रातर्यदीदंपरिदृश्यतेजगन्मायैवसर्वंपरिहृत्यचेतसा ॥ मद्भावनाभावितशुद्धमानसःसुखीभवानंदमयोनिरामयः ॥ ६० ॥
यःसेवतेमामगुणंगुणात्परंहृदाकदावायदिवागुणात्मकम् ॥ सोहंस्वपादांचितरेणुभिःस्पृशन्पुनातिलोकत्रितयंयथारविः ॥ ६१ ॥

द्भावनयामदैक्यभावनयाभावितंशुद्धंमानसंयस्यतादृशस्तिष्ठइत्युपदिश्याशिषंप्राह निरामयःसन्सुखीभव सर्वदुःखनिवृत्त्येतिभावः ततोंऽतरंगामन्यामाशिषमाह आनंदमयोभव तद्रूपोभवेत्यर्थः यद्यपिपूर्वमानंदरूपत्वमस्त्येवतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत् ॥ ६० ॥ एवंरीत्यास्वोपासकस्यलोकपावनत्वमाह यइति कदावायदाकदाचिदित्यर्थः हृदानिर्मलेनांतःकरणेनयोमामगुणंप्राकृतसत्त्वरजस्तमोरूपगुणरहितम् सच्चिदानंदरूपत्वात् अतएवगुणात्परंगुणादव्याकृतात्परंमायातीतम् यदिवायद्वेत्यर्थे गुणात्मकंसर्वज्ञत्वादिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतंदृश्यमानंरूपंसेवते सद्विविधोऽप्युपासकःअहंमत्स्वरूपएव मामकइत्यर्थोवा प्रियोहिज्ञानिनोऽत्यर्थमहंसचममप्रियइत्युक्तेः तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन्लोकत्रयमपिपुनाति अज्ञानध्वांतनिरसनेनपवित्रीकरोति यथारविःस्वकरैर्जगद्वितिमिरीकरोतितद्वत् ॥ ६१ ॥

इदानीमेतद्ग्रंथार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह विज्ञानंविज्ञानजनकंकरणव्युत्पत्त्येतिबोध्यम् वेदांतैरुपनिषद्वाक्यैर्वेद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेतादृशमत्फलप्राप्तिःकथमित्याशंक्यभवत्येवेतिसूचयंस्तत्रहेतुमाह मद्वचनेषुभक्तिर्विश्वासोयदीत्यर्थाद्गुरुवाक्यविश्वासस्यैवफलदायकत्वादितिभावः ॥ ६२ ॥ इतिश्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिबिरुदावलीविराजमानस्याहिं०उत्तरकांडेसेतौपंचमःसर्गः ॥ ५ ॥ ॥ ७ ॥

विज्ञानमेतदखिलंश्रुतिसारमेकंवेदांतवेद्यचरणेनमयैवगीतम् ॥ यःश्रद्धयापरिपठेद्गुरुभक्तियुक्तोमद्रूपमेतियदिमद्वचनेषुभक्तिः ॥ ६२ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेउत्तरकांडेश्रीरामगीतायांपंचमःसर्गः ॥ ५ ॥ ७ ॥

श्रीमहादेवउवाच ॥ एकदामुनयःसर्वेयमुनातीरवासिनः ॥ आजग्मूराघवंद्रष्टुंभयाल्लवणरक्षसः ॥ १ ॥ कृत्वाग्रेतुमुनिश्रेष्ठंभार्गवंच्यवनंद्विजाः ॥ असंख्याताःसमायातारामादभयकांक्षिणः ॥ २ ॥ तान्पूजयित्वापरयाभक्त्यारघुकुलोत्तमः ॥ उवाचमधुरंवाक्यंहर्षयन्मुनिमंडलम् ॥ ३ ॥ करवाणिमुनिश्रेष्ठाःकिमागमनकारणम् ॥ धन्योस्मियदियूयंमांप्रीत्याद्रष्टुमिहागताः ॥ ४ ॥ दुष्करंचापियत्कार्यंभवतांतत्करोम्यहम् ॥ आज्ञापयंतुमांभृत्यंब्राह्मणादैवतंहिमे ॥ ५ ॥ तच्छ्रुत्वासहसाहृष्टश्च्यवनोवाक्यमब्रवीत् ॥ मधुनामामहादैत्यःपुराकृतयुगेप्रभो ॥ ६ ॥ आसीदतीवधर्मात्मादेवब्राह्मणपूजकः ॥ तस्यतुष्टोमहादेवोददौशूलमनुत्तमम् ॥ ७ ॥ प्राहचानेनयंहंसिसतुभस्मीभविष्यति ॥ रावणस्यानुजाभार्यातस्यकुंभीनसीश्रुता ॥ ८ ॥

॥ एकदेति लवणरक्षसः लवणनाम्नोभयादित्यर्थः ॥ १ ॥ रामाल्लवणकृतभयनाशकांक्षिणः ॥ २ ॥ ३ ॥ हेमुनिश्रेष्ठाःअहंकिंभवत्कार्यंकरवाणि मत्समीपेभवदागमनस्यचाकिंकारणंयदियत्प्रीत्यासर्वदुःखनिवर्तनक्षमत्वबुद्ध्यायाप्रीतिस्तयायावद्द्रष्टुमागतास्तद्धन्योस्मि ॥ ४ ॥ ५ ॥ ६ ॥ अनुत्तमंनविद्यतेशत्रुवधेउत्तममधिकंयस्मात्तत् ॥ ७ ॥ ८ ॥

यतोदुरात्माऽतःसर्वैर्दुर्धर्षोदुःसहः ॥ ९ ॥ वोयुष्माकंमाभीःभवत्वितिशेषः ॥ १० ॥ विगतज्वराःगतदुःखाः ॥ ११ ॥ लवणराक्षसमित्यस्यकोवाहनिष्यतीत्यनेनान्वयः कोवाब्राह्मणेभ्योभयंदद्यात् दास्यतीत्यर्थः ॥ १२ ॥ १३ ॥ १४ ॥ वधायचवधायत्वित्यर्थः हन्यांहनिष्यामीत्यर्थः ॥ १५ ॥ १६ ॥ अभिषेचने

तस्यांतुलवणोनामराक्षसोभीमविक्रमः॥ आसीद्दुरात्मादुर्धर्षोदेवब्राह्मणहिंसकः ॥ ९ ॥ पीडितास्तेनराजेंद्रवयंत्वांश
रणंगताः॥ तच्छ्रुत्वाराघवोप्याहमाभीर्वोमुनिपुंगवाः॥ १० ॥ लवणंनाशयिष्यामिगच्छंतुविगतज्वराः॥ इत्युक्त्वाप्रा
हरामोपिभ्रातॄन्कोवाहनिष्यति ॥ ११॥ लवणंराक्षसंदद्याद्ब्राह्मणेभ्योऽभयंमहत् ॥ तच्छ्रुत्वाप्रांजलिःप्राहभरतोराघवा
यवै ॥ १२ ॥ अहमेवहनिष्यामिदेवाज्ञापयमांप्रभो ॥ ततोरामंनमस्कृत्यशत्रुघ्नोवाक्यमब्रवीत्॥ १३॥ लक्ष्मणेनमहत्का
र्यंकृतंराघवसंयुगे॥ नंदिग्रामेमहाबुद्धिर्भरतोदुःखमन्वभूत्॥ १४॥ अहमेवगमिष्यामिलवणस्यवधायच॥ त्वत्प्रसादा
द्रघुश्रेष्ठहन्यांतंराक्षसंयुधि ॥ १५॥ तच्छ्रुत्वास्वांकमारोप्यशत्रुघ्नंशत्रुसूदनः॥ प्राहाद्यैवाभिषेक्ष्यामिमथुराराज्यकारणा
त्॥ १६॥ आनाय्यचसुसंभारान्लक्ष्मणेनाभिषेचने॥ अनिच्छंतमपिस्नेहादभिषेकमकारयत्॥ १७॥ दत्त्वातस्मैशरंदिव्यं
रामःशत्रुघ्नमब्रवीत्॥ अनेनजहिबाणेनलवणंलोककंटकम्॥ १८॥ सतुसंपूज्यतच्छूलंगेहेगच्छतिकाननम्॥ भक्षणार्थं
तुजंतूनांनानाप्राणिवधायच॥ १९॥ सतुनायातिसदनंयावद्वनचरोभवेत्॥ तावदेवपुरद्वारितिष्ठत्वंधृतकार्मुकः॥ २०॥

निमित्तम् विषयसप्तम्यामयमर्थःफलति अकारयत्वसिष्ठादिभिरितिशेषः ॥ १७ ॥ १८ ॥ गेहेसंपूज्यस्थापयित्वावनंगच्छतीत्यर्थः ॥ १९ ॥ सतुयावद्वनचरोभवेत्भवतिसदनंनायातितावदेवेत्यन्वयः ॥ २० ॥

---

१ नायंमयाशरःपूर्वंरावणस्यवधार्थिना। मुक्तःशत्रुघ्नभूतानांमहान्ह्रासोभवेदितीतिवाल्मीक्युक्तेरल्पलक्ष्येमहास्त्रप्रयोगेणतन्मात्रहनने नशाम्यतिकिंतुभूतानिसंहरतिअतोभूतदययानक्षिप्तइतिभावः अनेनरावणादपिलवणस्यमहाबलत्वेनदिव्यशरपर्याप्तविषयत्वमुक्तम्।

क्रुद्धःसन्योत्स्यतेशू[१]लंविनैवेतिशेषः ॥ २१ ॥ २२ ॥ २३ ॥ त्वमग्रेप्रथममेकएवराक्षसंसाधयनाशय पश्चाद्वधोत्तरंसेनात्वत्समीपमागमिष्यतीत्यर्थः ॥ २४॥ ॥ २५ ॥ स्फीतांसमृद्धांजनपदांजनवासस्थानभूताम् पूर्वंतुवनत्वान्नतथा ॥ २६ ॥ २७ ॥ क्रममेवाह उपनीतौचेति ॥ २८ ॥ यत्पुराशंकरेणपार्वत्यैप्रोक्तं

योत्स्यतेसत्वयाक्रुद्धस्तदावध्योभविष्यति ॥ तंहत्वालवणंक्रूरंतद्वनंमधुसंज्ञितम् ॥ २१ ॥ निवेश्यनगरंतत्रतिष्ठत्वंमेनुशासनात् ॥ अश्वानांपंचसाहस्रंरथानांचतदर्धकम् ॥ २२ ॥ गजानांषट्शतानीहपत्तीनामयुतत्रयम् ॥ आगमिष्यतिपश्चात्त्वमग्रेसाधयराक्षसम् ॥ २३ ॥ इत्युक्त्वामूर्ध्न्यवघ्रायप्रेषयामासराघवः॥ शत्रुघ्नंमुनिभिःसार्धमाशीर्भिरभिनंद्यच ॥ २४ ॥ शत्रुघ्नोपितथाचक्रेयथारामेणचोदितः ॥ हत्वामधुसुतंयुद्धेमथुरामकरोत्पुरीम् ॥ २५ ॥ स्फीतांजनपदांचक्रेमथुरांदानमानतः ॥ सीतापिसुषुवेपुत्रौद्वौवाल्मीकेरथाश्रमे ॥ २६ ॥ मुनिस्तयोर्नामचक्रेकुशोज्येष्ठोनुजोलवः ॥ क्रमेणविद्यासंपन्नौसीतापुत्रौबभूवतुः ॥ २७ ॥ उपनीतौचमुनिनावेदाध्ययनतत्परौ ॥ कृत्स्नंरामायणंप्राहकाव्यंबालकयोर्मुनिः ॥ २८ ॥ शंकरेणपुराप्रोक्तंपार्वत्यैपुरहारिणा ॥ वेदोपबृंहणार्थायतावग्राहयतप्रभुः ॥ २९ ॥ कुमारौस्वरसंपन्नौसुंदरावश्विनाविव ॥ तंत्रीतालसमायुक्तौगायंतौचेरतुर्वने ॥ ३० ॥ तत्रतत्रमुनीनांतौसमाजेसुररूपिणौ ॥ गायंतावभितोदृष्ट्वाविस्मितामुनयोब्रुवन् ॥ ३१ ॥

रामायणंतद्वेदोपबृंहणार्थायवेदतात्पर्यार्थज्ञाननिमित्तमग्राहयत शब्दतोर्थतश्चबोधितवानित्यर्थः ॥ २९ ॥ तंत्रीशब्दतालाभ्यांसमायुक्तौअवैषम्येणयुक्तौयथातयोर्वैषम्यंनभवतितथागायंतौचेरतुः तंत्रीलयेतिपाठेतंत्र्यालयोमूर्च्छनातत्रसमायुक्तौअत्यंतनिपुणौ ॥ ३० ॥ ३१ ॥

---

[१] यावत्करस्थःशूलोयंभविष्यतिसुतस्यते । अवध्यःसर्वभूतानांशूलहस्तोभविष्यतीतिमधुंप्रतिरुद्रवरदानोक्तेः ।

भूलोकेगंधर्वकिन्नरमध्येनेदृशःदेवालयेस्वर्गेदेवेषुनपातालेनागेषुनअथवाब्रह्मलोकेपिनेदृशोगाथकःनाज्ञायीत्यस्यैवविवरणम् नादर्शिसाक्षादीदृशंगानंस्वकर्णाभ्यांनश्रुतमित्यर्थः नाश्राविकर्णोपकर्णिकयामुकदेशेईदृशोविशिष्टगातास्तीतिनश्रुतमपीत्यर्थः ॥ ३२ ॥ स्तुवद्भिर्मुनिभिःसहेतिशेषः ॥ ३३ ॥ ३४ ॥ वितानेयज्ञसंसदि दिदृक्षवःयज्ञमितिशेषः संगृह्यगृहीत्वा ऋषिवाटस्यऋषिवाटस्थानस्य ॥ ३५ ॥ ३६ ॥ ज्ञानशास्त्रंतत्त्वज्ञानकारणंशास्त्रंइतःपरंमुनिवि

गंधर्वैष्विहकिन्नरेषुभुविवादेवेषुदेवालयेपातालेष्वथवाचतुर्मुखगृहेलोकेषुसर्वेषुच ॥ अस्माभिश्चिरजीविभिश्चिरतरंदृष्टादिशःसर्वतोनाज्ञायीदृशगीतवाद्यगरिमानादर्शिनाश्राविच ॥ ३२ ॥ एवंस्तुवद्भिरखिलैर्मुनिभिःप्रतिवासरम् ॥ आसातेसुखमेकांतेवाल्मीकेराश्रमेचिरम् ॥ ३३ ॥ अथरामोश्वमेधादींश्चकारबहुदक्षिणान् ॥ यज्ञान्स्वर्णमयींसीतांविधायविपुलद्युतिः ॥ ३४ ॥ तस्मिन्वितानेऋषयःसर्वेराजर्षयस्तथा ॥ ब्राह्मणाःक्षत्रियावैश्याःसमाजग्मुर्दिदृक्षवः॥ ३५ ॥ वाल्मीकिरपिसंगृह्यगायंतौतौकुशीलवौ ॥ जगामऋषिवाटस्यसमीपंमुनिपुंगवः ॥ ३६ ॥ तत्रैकांतेस्थितंशांतंसमाधिविरमेमुनिम् ॥ कुशःपप्रच्छवाल्मीकिंज्ञानशास्त्रंकथांतरे ॥ ३७ ॥ भगवन्श्रोतुमिच्छामिसंक्षेपाद्भवतोखिलम् ॥ देहिनःसंसृतिर्बंधःकथमुत्पद्यतेदृढः ॥ ३८॥ कथंविमुच्यतेदेहीदृढबंधाद्भवाभिधात् ॥ वक्तुमर्हसिसर्वज्ञमह्यंशिष्यायतेमुने ॥३९॥ वाल्मीकिरुवाच ॥ शृणुवक्ष्यामितेसर्वंसंक्षेपाद्बंधमोक्षयोः ॥ स्वरूपंसाधनंचापिमत्तःश्रुत्वायथोदितम् ॥ ४० ॥ तथैवाचरभद्रंतेजीवन्मुक्तोभविष्यसि ॥ देहएवमहागेहमदेहस्यचिदात्मनः॥४१॥

योगकालस्यसन्निहितत्वादिदंगुह्यंतत्त्वंपप्रच्छेतिभावः ॥ ३७ ॥ भवतःसकाशादितिशेषः संसृतिर्बंधःसंसाररूपोबंधः ॥ ३८ ॥ ३९ ॥ तच्चमत्तःश्रुत्वायथामयोदितंकथितंभविष्यति ॥ ४० ॥ तथैवाचरेत्यन्वयः अदेहस्यवस्तुतोदेहसंबंधहीनस्यापिदेहोमहागेहमेवयथागृहस्वामिनागृहस्यनतादात्म्यंतथास्यचिदात्मनोदेहेनापिनतदितिभावः ॥ ४१ ॥

तस्यचिदात्मनोस्मिन्देहेहंकारएवमंत्रीसचाहंकारस्तेनैवकल्पितःतत्सान्निध्येनमायायास्तद्रूपःपरिणामइत्यतस्तेनकल्पितइत्युक्तं सोहंकारःस्वंस्वीयंदेहरूपगेहविषयमहंकारंममेत्याकाराभिमानंचिदात्मनिआरोप्य ॥ ४२ ॥ तेनचिदात्मनातादात्म्यमभेदमापन्नोयतोतःस्वचेष्टितंचिदानंदेविदधातिननुजडस्याहंकारस्यकथंचेष्टितत्वमतआह तद्भासितवपुस्तत्संपर्कादेवतादृशसामर्थ्यवानयंजातइत्यर्थः ॥४३॥ तेनाहंकारेणसंकल्पितोयमेवससंकल्पान्करोत्वितिसंकल्पविषयीकृतः यद्वा स्वीयसंकल्पेनैवतद्वान्कृतोत्यंतसन्निकर्षेणतादात्म्यापन्नत्वात् यथाभार्याविशिष्टएवगृहस्थोगृहस्थस्यभार्येतिचव्यवहारस्तद्वदयंव्यवहारोबोध्यः तदीयसंकल्परूपनिगडेनावृतोबद्धःसंकल्पयतिकामयते ॥४४॥ तानिकामयन्तदलाभेलब्धनाशेचशोचति त्रयःतमःसत्त्वरजोरूपाः ॥४५॥ तदेवाह तमइत्यादि अतएवजगतःस्थितेःकारणं तेषांकार्यविशेषानाह तमोरूपादिति तमोरूपात्तमोगुणप्राधान्येनकृतात्संकल्पादित्यर्थः वृत्तिवृत्तिमतोरभेदात् तमोरूपादित्युक्तकारणानुरूपत्वात्कार्यस्यतत्कृतचेष्टायास्तामसत्वम् ॥ ४६ ॥ ४७ ॥ मोक्षोप्यनयैववृत्त्याप्राप्यइत्याहादूरेति अतएवसपुरुषःसुखरूपस्तिष्ठति हिप्रसिद्धं यस्यरजोरूपःसंकल्पःसलोकेव्यवहारवान् ॥ ४८ ॥

तस्याहंकारएवास्मिन्मंत्रीतेनैवकल्पितः ॥ देहगेहाभिमानंस्वंसमारोप्यचिदात्मनि ॥ ४२ ॥ तेनतादात्म्यमापन्नःस्व
चेष्टितमशेषतः ॥ विदधातिचिदानंदेतद्भासितवपुःस्वयम् ॥ ४३ ॥ तेनसंकल्पितोदेहीसंकल्पनिगडावृतः ॥ पुत्रदार
गृहादीनिसंकल्पयतिचानिशम् ॥ ४४ ॥ संकल्पयन्स्वयंदेहीपरिशोचतिसर्वदा ॥ त्रयस्तस्याहमोदेहाअधमोत्तमम
ध्यमाः ॥ ४५ ॥ तमःसत्त्वरजःसंज्ञाजगतःकारणंस्थितेः ॥ तमोरूपाद्धिसंकल्पान्नित्यंतामसचेष्टया ॥ ४६ ॥ अत्यं
तंतामसोभूत्वाकृमिकीटत्वमाप्नुयात् ॥ सत्त्वरूपोहिसंकल्पोधर्मज्ञानपरायणः ॥ ४७ ॥ अदूरमोक्षसाम्राज्यःसुख
रूपोहितिष्ठति ॥ रजोरूपोहिसंकल्पोलोकेसव्यवहारवान् ॥ ४८ ॥

ततःव्यवहारयुतःपुत्रदारानुरंजितः संसारेराजससंकल्पकृततत्तत्कर्मवशात्तिष्ठति यस्यसंकल्पएतत्पूर्वोक्तंत्रिविधमपिरूपंपरित्यज्यशाम्यतीतिशेषः ॥ ४९ ॥ सपरंपदमाप्नोतिसत्त्वरूपसंकल्पस्यहिक्रमेणसर्वसंकल्पनाशद्वारादूरमोक्षत्वंप्रागुक्तंबोध्यम् आत्मपरिक्षयेअत्रात्मासंकल्पःअतस्त्वंदृष्टीःसर्वेंद्रियज्ञानानिपरित्यज्यमनसैवमनोविनियम्यविषयेभ्योनिवर्त्य ॥ ५० ॥ बाह्येंद्रियविषयसहितोयआभ्यंतरेंद्रियविषयोर्थस्तस्यतद्विषयस्यसंकल्पस्यक्षयंकुरुसंकल्पंत्यजेत्यर्थः

परितिष्ठतिसंसारेपुत्रदारानुरंजितः ॥ त्रिविधंतुपरित्यज्यरूपमेतन्महामते ॥ ४९ ॥ संकल्पःपरमाप्नोतिपदमात्मपरिक्षये ॥ दृष्टीःसर्वाःपरित्यज्यनियम्यमनसामनः ॥ ५० ॥ सबाह्याभ्यंतरार्थस्यसंकल्पस्यक्षयंकुरु ॥ यदिवर्षसहस्राणि तपश्चरसिदारुणम् ॥ ५१ ॥ पातालस्थस्यभूस्थस्यस्वर्गस्थस्यापितेनघ ॥ नान्यःकश्चिदुपायोस्तिसंकल्पोपशमादृते ॥ ॥ ५२ ॥ अनाबाधेविकारेस्वेसुखेपरमपावने ॥ संकल्पोपशमेयत्नंपौरुषेणपरंकुरु ॥ ५३ ॥ संकल्पतंतौनिखिलाभावाःप्रोक्ताःकिलानघ ॥ छिन्नेतंतौनजानीमःक्वयांतिविभवाःपराः ॥ ५४ ॥ निःसंकल्पोयथाप्राप्तव्यवहारपरोभव ॥ क्षयेसंकल्पजालस्यजीवोब्रह्मत्वमाप्नुयात् ॥ ५५ ॥

अन्योपायेननसर्वथासुखप्राप्तिरित्याह यदीति ॥ ५१ ॥ तादृशतपःपूर्वकंपातालाद्यन्यतमलोकस्थस्यापितवसंकल्पोपशमादृतेतंविना ॥ ५२ ॥ अनाबाधे दुःखासंमिश्रे अविकारेविषयसंबंधंविनैवप्राप्ये परमपावनेस्वात्मरूपेसुखेतत्प्राप्तिनिमित्तंनकश्चिदुपायोस्तीत्यर्थस्तस्मात्तद्रूपोपशमेयत्नंकुरु ॥ ५३ ॥ संकल्पस्यैवाधारत्वात्तन्नाशेएवसर्वविषयनिवृत्तिरित्याह संकल्पतंताविति विभवाः विशिष्टोभवःसंसारोयेभ्यस्तादृशास्तेपराभवास्तेक्वयांतीतिनजानीमः सर्वथानश्यंत्येवेतिभावः ॥ ५४ ॥ तस्मान्निःसंकल्पस्त्यक्तेच्छोयथाप्राप्तंव्यवहारंकुर्वित्यर्थःसंकल्पक्षयफलमाह क्षयेइति ॥ ५५ ॥

प्रसभंहठेन विकल्पजालंत्यक्त्वाअधिगतःपरमार्थोब्रह्मतत्त्वंयेनतद्भावमुपेत्यप्राप्यतदद्वितीयंपदंअधिगमयप्राप्नुहि विततसुखायानुच्छेद्यसुखाय तदर्थंनिदिध्या
सनमुपदिशति सुषुप्तिकालिकाचित्तवृत्तिर्यस्यतादृशोभव सकलविषयरहितचित्तवृत्तिरेवब्रह्माकाराचित्तवृत्तिरितिभावः ॥ ५६ ॥ इतिश्रीमत्सकलराज
वि० उत्तरकांडेषष्ठःसर्गः ॥ ६ ॥ ॥ ७ ॥ ॥ वाल्मीकिनेति सद्गुरूपदेशात् कुशस्योत्तमाधिकारित्वाच्चतत्कालमेवनिदिध्यासनांतसाधनसंप

अधिगतपरमार्थतामुपेत्यप्रसभमपास्यविकल्पजालमुच्चैः ॥ अधिगमयपदंतदद्वितीयंविततसुखायसुषुप्तचित्तवृत्तिः
॥ ५६ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेउत्तरकांडेषष्ठःसर्गः ॥ ६ ॥ ॥ ७ ॥ ॥ ७ ॥ वाल्मीकिना
बोधितोसौकुशःसद्योगतभ्रमः ॥ अंतर्युक्तोबहिःसर्वमनुकुर्वंश्चकारसः ॥ १ ॥ वाल्मीकिरपितौप्राहसीतापुत्रौमहा
धियौ ॥ तत्रतत्रचगायंतौपुरेवीथिषुसर्वतः ॥ २ ॥ रामस्याग्रेप्रगायेतांशुश्रूषुर्यदिराघवः ॥ नग्राह्यंवैयुवाभ्यांतद्यदि
किंचित्प्रदास्यति ॥ ३ ॥ इतितौचोदितौतत्रगायमानौविचेरतुः ॥ यथोक्तंऋषिणापूर्वंतत्रतत्राभ्यगायताम् ॥ ४ ॥ तां
सशुश्रावकाकुत्स्थःपूर्वंचर्यांततस्ततः ॥ अपूर्वपाठजातिंचगेयेनसमभिप्लुताम् ॥ ५ ॥ बालयोराघवःश्रुत्वाकौतूहल
मुपेयिवान् ॥ अथकर्मांतरेराजासमाहूयमहामुनीन् ॥ ६ ॥ राज्ञश्चैवनरव्याघ्रःपंडितांश्चैवनैगमान् ॥ पौराणिका
न्शब्दविदोयेचवृद्धाद्विजातयः ॥ ७ ॥ एतान्सर्वान्समाहूयगायकौसंप्रवेशयत् ॥ तेसर्वेहृष्टमनसोराजानोब्राह्मणाद
यः ॥ ८ ॥ रामंतौदारकौदृष्ट्वाविस्मितात्यनिमेषणाः ॥ अवोचन्सर्वएवैतेपरस्परमथागताः ॥ ९ ॥

दितिभावः यत्करोतितदनुकुर्वन्निवतत्रास्थाभावादितिभावः ॥ १ ॥ २ ॥ यदिकिंचिद्राघवोधनंदास्यतितन्नग्राह्यम् ॥ ३ ॥ यथोक्तंयथाशिक्षितम् ॥ ४ ॥
अपूर्वपाठजातिंअपूर्वपठनरीतिं गेयेनगानेनव्याप्ताम् ॥ ५ ॥ ६ ॥ शब्दविदःव्याकरणविदः ॥ ७ ॥ संप्रवेशयत् अडभावआर्षः ॥ ८ ॥ रामंदारकौचदृष्ट्वावि
स्मिताःसंतोऽनिमेषणाअपश्यन्नितिशेषः ॥ ९ ॥

बिंबंप्रतिबिंबम् ॥ १० ॥ ११ ॥ अतिमानुषंमनुष्यलोकीयगानमतिक्रांतम् ॥ १२ ॥ १३ ॥ नौआवांवन्यभोजनौस्वइतिशेषः ॥ १४ ॥ १५ ॥ १६ ॥

इमौरामस्यसदृशौबिंबाद्बिंबमिवोदितौ ॥ जटिलौयदिनस्यातांनचवल्कलधारिणौ ॥ १० ॥ विशेषंनाधिगच्छामो
राघवस्यानयोस्तदा ॥ एवंसंवदतांतेषांविस्मितानांपरस्परम् ॥ ११ ॥ उपचक्रमतुर्गातुंतावुभौमुनिदारकौ ॥ ततःप्रव
त्तंमधुरंगांधर्वमतिमानुषम् ॥ १२ ॥ श्रुत्वातन्मधुरंगीतमपराह्णेरघूत्तमः ॥ उवाचभरतंचाभ्यांदीयतामयुतंवसु ॥ १३ ॥
दीयमानंसुवर्णंतुनतज्जगृहतुस्तदा ॥ किमनेनसुवर्णेनराजन्नौवन्यभोजनौ ॥ १४ ॥ इतिसंत्यज्यसंदत्तंजग्मतुर्मुनि
सन्निधिम् ॥ एवंश्रुत्वातुचरितंरामःस्वस्यैवविस्मितः ॥ १५ ॥ ज्ञात्वासीताकुमारौतौशत्रुघ्नंचेदमब्रवीत् ॥ हनूमं
तंसुषेणंचविभीषणमथांगदम् ॥ १६ ॥ भगवंतंमहात्मानंवाल्मीकिंमुनिसत्तमम् ॥ आनयध्वंमुनिवरंससीतंदेवसं
मितम् ॥ १७ ॥ अस्यास्तुपर्षदोमध्येप्रत्ययंजनकात्मजा ॥ करोतुशपथंसर्वेजानंतुगतकल्मषाम् ॥ १८ ॥ सीतांतद्व
चनंश्रुत्वागताःसर्वेंतिविस्मिताः ॥ ऊचुर्यथोक्तंरामेणवाल्मीकिंरामपार्षदाः ॥ १९ ॥ रामस्यहृद्गतंसर्वंज्ञात्वावाल्मी
किरब्रवीत् ॥ श्वःकरिष्यतिवैसीताशपथंजनसंसदि ॥ २० ॥ योषितांपरमंदैवंपतिरेवनसंशयः ॥ तच्छ्रुत्वासहसाग
त्वासर्वेप्रोचुर्मुनेर्वचः ॥ २१ ॥ राघवस्यापिरामोपिश्रुत्वामुनिवचस्तथा ॥ राजानोमुनयःसर्वेश्शृणुध्वमितिचाब्रवीत्
॥ २२ ॥ सीतायाःशपथंलोकाविजानंतुशुभाशुभम् ॥ इत्युक्ताराघवेणाथलोकाःसर्वेदिदृक्षवः ॥ २३ ॥ ब्राह्मणाःक्ष
त्रियावैश्याःशूद्राश्चैवमहर्षयः ॥ वानराश्चसमाजग्मुःकौतूहलसमन्विताः ॥ २४ ॥

॥ १७ ॥ प्रत्ययंसर्वजनस्यशुद्धत्वनिश्चयोत्पादकंशपथमित्यन्वयः सीतामितिपूर्वान्वयि ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ राघवस्यापिसविधंतद्वचऊचुरित्यन्वयः राजानोमुनयइतिसंबोधने ॥ २२ ॥ सीतायाःशपथंदृष्ट्वातस्याःशुभाशुभंधर्माधर्मरूपंविजानंतुनिर्णयंतु ॥ २३ ॥ २४ ॥

॥ २५ ॥ बाष्पकंठासैव ॥ २६ ॥ २७ ॥ २८ ॥ अपापापिलोकापवादभीत्यात्यक्ता ॥ २९ ॥ सासीताप्रत्ययंविश्वासजनकंशपथम् अत्रस्थानेऋषेरतिक
रुणरसाक्रांतचित्ततयाइमावितिपदपौनरुक्त्यंनदोषाय ॥ ३० ॥ तत्रादौभगवान्वाल्मीकिःस्वधर्मशपथैःसीतायाअदुष्टत्वंख्यापयति प्रचेतसइत्यादिना ॥ ३१॥

ततोमुनिवरस्तूर्णंससीतःसमुपागमत् ॥ अग्रतस्तमृषिंकृत्वायांतीकिंचिदवाङ्मुखी ॥ २५॥ कृतांजलिर्बाष्पकंठासी
तायज्ञंविवेशतम् ॥ दृष्ट्वालक्ष्मीमिवायांतींब्रह्माणमनुयायिनीम् ॥ २६ ॥ वाल्मीकेःपृष्ठतःसीतांसाधुवादोमहानभू
त्॥ तदामध्येजनौघस्यप्रविश्यमुनिपुंगवः॥२७॥ सीतासहायोवाल्मीकिरितिप्राहचराघवम्॥ इयंदाशरथेसीतासुव्र
ताधर्मचारिणी॥२८॥ अपापातेपुरात्यक्ताममाश्रमसमीपतः ॥ लोकापवादभीतेनत्वयाराममहावने ॥ २९ ॥ प्र
त्ययंदास्यतेसीतातदनुज्ञातुमर्हसि ॥ इमौतुसीतातनयाविमौयमलजातकौ ॥ ३० ॥सुतौतुतवदुर्धर्षौतथ्यमेतद्ब्रवी
मिते ॥ प्रचेतसोहंदशमःपुत्रोरघुकुलोद्वह॥ ३१ ॥ अनृतंनस्मराम्युक्तंयथैमौतवपुत्रकौ ॥ बहून्वर्षगणान्सम्यक्तप
श्चर्यामयाकृता॥३२॥ नोपाश्नीयांफलंतस्यादुष्टेयंयदिमैथिली॥वाल्मीकिनैवमुक्तस्तुराघवःप्रत्यभाषत॥ ३३ ॥एव
मेतन्महाप्राज्ञयथावदसिसुव्रत ॥ प्रत्ययोजनितोमह्यंतववाक्यैरकिल्बिषैः ॥ ३४ ॥ लंकायामपिदत्तोमेवैदेह्याप्र
त्ययोमहान्॥ देवानांपुरतस्तेनमंदिरेसंप्रवेशिता ॥ ३५ ॥ सेयंलोकभयाद्ब्रह्मन्नपापापिसतीपुरा ॥ सीतामयापरि
त्यक्ताभवांस्तत्क्षंतुमर्हति ॥३६॥

यथाद्ययावदनृतमुक्तंनस्मरामितथाइमौतवपुत्रकाविति वाक्यमपिसत्यमेवेत्यर्थः ॥ ३२ ॥ ३३ ॥ प्रत्ययोविश्वासः ॥ ३४ ॥ महान्प्रत्ययजनकः शपथोऽग्नि
प्रवेशरूपः ॥ ३५ ॥ लोकभयात्लोककृतदुर्वादभयात् ॥ ३६ ॥

जगतीमध्येतद्वर्तिलोकमध्ये शुद्धायांशपथेनसर्वलोकज्ञातशुद्धतायाम् ॥ ३७ ॥ ३८ ॥ ३९ ॥ विवरंप्रवेशायछिद्ररूपंमार्गम् ॥ ४० ॥ महाद्भुतमत्याश्चर्यंदि
व्यंसिंहासनंप्रादुरासीत् ॥ ४१ ॥ सर्वाश्चर्यत्वदिव्यत्वोपपादकंरविप्रभमिति ॥ ४२ ॥ दोर्भ्यांगृहीत्वास्वागतमितितामुवाचाथैनामासनेसंन्यवेशयत् ॥ ४३ ॥

ममैवजातौजानामिपुत्रावेतौकुशीलवो ॥ शुद्धायांजगतीमध्येसीतायांप्रीतिरस्तुमे ॥ ३७॥ देवाःसर्वेपरिज्ञायरामा
भिप्रायमुत्सुकाः ॥ ब्रह्माणमग्रतःकृत्वासमाजग्मुःसहस्रशः ॥३८ ॥ प्रजाःसमागमन्हृष्टाःसीताकौशेयवासिनी ॥ उद
ङ्मुखीह्यधोदृष्टिःप्रांजलिर्वाक्यमब्रवीत् ॥ ३९ ॥ रामादन्यंयथाहंवैमनसापिनचिंतये ॥ तथामेधरणीदेवीविवरंदातु
मर्हति ॥ ४० ॥ तथाशपंत्याःसीतायाःप्रादुरासीन्महाद्भुतम् ॥ भूतलाद्दिव्यमत्यर्थंसिंहासनमनुत्तमम् ॥ ४१ ॥ नागें
द्रैर्ध्रियमाणंचदिव्यदेहैरविप्रभम् ॥ भूदेवीजानकींदोर्भ्यांगृहीत्वास्नेहसंयुता ॥ ४२ ॥ स्वागतंतामुवाचैनामासनेसंन्य
वेशयत् ॥ सिंहासनस्थांवैदेहींप्रविशंतींरसातलम् ॥ ४३ ॥ निरंतरापुष्पवृष्टिर्दिव्यासीतामवाकिरत् ॥ साधुवादश्चसु
महान्देवानांपरमाद्भुतः ॥ ४४ ॥ ऊचुश्चबहुधावाचोअंतरिक्षगताःसुराः ॥ अंतरिक्षेचभूमौचसर्वेस्थावरजंगमाः ॥
॥ ४५ ॥ वानराश्चमहाकायाःसीताशपथकारणात् ॥ केचिच्चिंतापरास्तस्याःकेचिद्ध्यानपरायणाः ॥ ४६ ॥ केचिद्रा
मंनिरीक्षंतःकेचित्सीतामचेतसः ॥ मुहूर्तमात्रंतत्सर्वंतूष्णींभूतमचेतनम् ॥ ४७ ॥

साधुवादश्चआसीदितिशेषः ॥ ४४ ॥ बहुधावाचःबहुप्रकारवाचःसीतेमैवंकर्तुमर्हाइतिराघवोगृहीतशपथोपिपुनःशपथग्रहणेप्रवृत्तइत्येवंबहुप्रकारवाचः
॥ ४५ ॥ सीताशपथकारणात्बहुधावाचऊचुरित्यनुकर्षः तस्याश्चिंतापराःक्वसीतागमिष्यतीत्यादिचिंतायुक्ताःध्यानपरायणाःभूप्रविष्टसीतारूपस्यध्यानपरा
यणाः ॥ ४६ ॥ रामंनिरीक्षंतः किंकरिष्यतीत्याद्येवंसीतांनिरीक्षंतःकथंगच्छत्येवेत्याद्येवंप्रकारेणअचेतनमासीदितिशेषः ॥ ४७ ॥

भविष्यतःकार्यस्यगौरवंनिश्चयंज्ञात्वैवज्ञात्वापि ॥ ४८ ॥ अजानन्निवशुशोचलोकव्यवहारानुसारेणेत्यर्थः बोधितःभाविनोदुःपरिहरत्वादिकथाभिःकृतदुःखा
पनयनः ॥ ४९ ॥ ऋत्विजोयेइत्यत्रतान्विससर्जेत्यनुकर्षः ॥ ५० ॥ तान्ऋत्विक्प्रभृतीन् ॥ ५१ ॥ एकांतेसमुपस्थितःतत्रैवस्थितआसीत् ॥ ५२ ॥ ध्यान
निरतेराघवेसतीत्यर्थः रामंतच्चरित्रैर्ऋषिवाक्यैश्चतत्कृपावशान्नारायणंज्ञात्वा ॥ ५३ ॥ प्रणतानारायणोयमितिबुद्ध्याआदिःकारणंस्वयंचोत्पत्तिनाशरहितस्तद

सीताप्रवेशनंदृष्ट्वासर्वंसंमोहितंजगत् ॥ रामस्तुसर्वंज्ञात्वैवभविष्यत्कार्यगौरवम् ॥ ४८ ॥ अजानन्निवदुःखेनशुशो
चजनकात्मजाम् ॥ ब्रह्मणाऋषिभिःसार्धंबोधितोरघुनंदनः ॥ ४९ ॥ प्रतिबुद्धइवस्वप्नाच्चकारानंतराःक्रियाः ॥ विसस
र्जऋषीन्सर्वानृत्विजोयेसमागताः ॥ ५० ॥ तान्सर्वान्धनरत्नाद्यैस्तोषयामासभूरिशः ॥ उपादायकुमारौतावयोध्या
मगमत्प्रभुः ॥ ५१ ॥ तदादिनिःस्पृहोरामःसर्वभोगेषुसर्वदा ॥ आत्मचिंतापरोनित्यमेकांतेसमुपस्थितः ॥ ५२ ॥ एकां
तेध्याननिरतेएकदाराघवेसति ॥ ज्ञात्वानारायणंसाक्षात्कौसल्याप्रियवादिनी ॥ ५३ ॥ भक्त्यागत्यप्रसन्नंतंप्रणता
प्राहहृष्टधीः ॥ रामत्वंजगतामादिरादिमध्यांतवर्जितः ॥ ५४ ॥ परमात्मापरानंदःपूर्णःपुरुषईश्वरः ॥ जातोसिमेगर्भंगृ
हेममपुण्यातिरेकतः ॥ ५५ ॥ अवसानेममाप्यद्यसमयोभूद्रघूत्तम ॥ नाद्याप्यबोधजःकृत्स्नोभवबंधोनिवर्तते ॥ ५६ ॥

भावादेवचमध्यवर्जितः ॥ ५४ ॥ सर्वेषांपरमउत्कृष्टआत्माअंतर्यामिविधयाप्रेरकत्वात् परानंदःहिरण्यगर्भानंदादपिउत्कृष्टोयआनंदस्तद्रूपःपूर्णःपुरुषःप्राप्तसर्व
कामत्वात्पूर्णः अतएवेश्वरःसर्वनियंताईदृशोपित्वंममगर्भरूपेगृहेमदीयपुण्याधिक्याज्जातोजातइव ॥ ५५ ॥ अवसानेस्वस्याअवसानकालेऽतिवार्धकेइत्यर्थः
त्वदवतारसमाप्तिकालेचसमयःप्रश्नावसरःअबोधजःअज्ञानजः कृत्स्नोननिवर्ततेसर्वदात्वत्संगात्किंचिन्निवृत्तोऽपिसर्वथाननिवर्ततइतिभावः ॥ ५६ ॥

इदानीमपिअवसानकालेपितथासंक्षेपतोबोधयेत्यन्वयः ॥ ५७ ॥ निर्वेदोविषयेष्वलंप्रत्ययस्तेनवादिनीमीदृशवचनवक्त्रीम् ॥ ५८ ॥ त्रीन्मार्गानाह कर्मेत्यादि अत्रेदंबोध्यम् ज्ञानयोगस्त्रिधा एतज्जन्मानुष्ठितकर्मयोगसंपादितचित्तशुद्ध्याजातः एतज्जन्मानुष्ठितभक्तियोगकृतचित्तशुद्ध्याजातः पूर्वार्जिताभ्यामाभ्यां संपादिततयाएतजन्मनितदनुष्ठानानपेक्षोवेति अन्यथाकेवलकर्मभक्तिभ्यांज्ञानंविनामोक्षस्यतमेवविदित्वातिमृत्युमेति नान्यःपंथाविद्यतेयनायेतिश्रुतिविरुद्धतयायथाश्रुतमूलासंगतिःस्यादितिदिक् तेषांमध्येभक्तियोगरूपोमार्गोज्ञानजननेसुलभइत्यर्थः ॥ ५९ ॥ गुणभेदतःतमोरजःसत्त्वरूपगुणभेदेनतामसीराजसी

इदानीमपिमेज्ञानंभवबंधनिवर्तकम् ॥ यथासंक्षेपतोभूयात्तथाबोधयमांविभो ॥ ५७ ॥ निर्वेदवादिनीमेवंमातरं मातृवत्सलः ॥ दयालुःप्राहधर्मात्माजराजर्जरितांशुभाम् ॥ ५८ ॥ मार्गास्त्रयोमयाप्रोक्ताःपुरामोक्षाप्तिसाधकाः ॥ कर्मयोगोज्ञानयोगोभक्तियोगश्चशाश्वतः ॥५९॥ भक्तिर्विभिद्यतेमातस्त्रिविधागुणभेदतः ॥ स्वभावोयस्ययस्तेनतस्य भक्तिर्विभिद्यते ॥ ६० ॥ यस्तुहिंसांसमुद्दिश्यदंभंमात्सर्यमेववा ॥ भेददृष्टिश्चसंरंभीभक्तोमेतामसःस्मृतः ॥ ६१ ॥ फलाभिसंधिर्भोगार्थीधनकामोयशस्तथा ॥ अर्चादौभेदबुद्ध्यामांपूजयेत्सतुराजसः ॥ ६२ ॥ परस्मिन्नर्पितंयस्तुकर्मनिर्हरणायवा ॥ कर्तव्यमितिवाकुर्याद्भेदबुद्ध्याससात्त्विकः ॥ ६३ ॥

सात्त्विकीचेतित्रिधेत्यर्थः ॥ ६० ॥ भक्तित्रैविध्याद्भक्तस्यापित्रैविध्यंतत्रतामसंभक्तमाह यस्त्विति हिंसांशत्रोः दंभंपूजालाभादिफलकम् मात्सर्यंपरगुणद्वेषः भेददृष्टिःअरिमित्रादिदृष्टिः संरंभीतत्तद्विषयकाग्रहवान् ॥ ६१ ॥ फलंस्वर्गस्तदभिसंधिस्तत्कामः भोगऐहिकःयशइत्यस्ययशःकामइत्यर्थः गोबलीवर्दन्यायेनपृथङ्निर्देशः अर्चादौप्रतिमादौआदिनास्थंडिलादिपूजास्थानसंग्रहः भेदबुद्ध्याअयमुपास्योहमुपासकइत्येवंरूपया ॥ ६२ ॥ योनिर्हरणायपापनाशायकर्ममत्पूजनरूपंपरस्मिन्मयिअर्पितंकुर्याद्भगवतःप्रेरणायायदस्वतंत्रेणमयाकृतंतेनसएवतुष्यत्वितिबुद्धिर्ब्रह्मार्पणंनाम अथवाशास्त्रबोधितत्वादवश्यकर्तव्यमितिबुद्ध्यावायःकुर्यात्ससात्त्विकः अत्रापिभेदबुद्ध्येत्युपादानादभेदबुद्धिरेतत्फलमितिसूचितम् ॥ ६३ ॥

एतत्फलीभूतंनिर्गुणभक्तियोगलक्षणमाह मद्गुणेति अविच्छिन्नामनोवृत्तिरित्यंतेनअनंतगुणालयेमयियाअविच्छिन्नामनोवृत्तिरेतत्सगुणध्यानस्यनिर्गुणध्यानस्यलक्षणंप्रापकम् तत्रदृष्टांतः यथागंगांबुनोंबुधौइत्यनेनाभेदविषयत्वंमनोवृत्तेर्दर्शितम् ॥ ६४ ॥ अहैतुक्यंफलानुद्देशः अतएवाव्यवहिताविशेषेणाबहिता संबद्धासार्ष्टिःसारूप्यम् ॥ ६५ ॥ उक्तफलानिददात्यपिपरंतुभक्तामत्सेवनंविनातेषुमत्सेवायाअभावात्तानिनगृह्णंतिनांगीकुर्वंतिसएवसालोक्यादितिरस्कारए

मद्गुणाश्रयणादेवमय्यनंतगुणालये ॥ अविच्छिन्नामनोवृत्तिर्यथागंगांबुनोंबुधौ ॥ तदेवभक्तियोगस्यलक्षणंनिर्गुण
स्यहि ॥ ६४ ॥ अहैतुक्यव्यवहितायाभक्तिर्मयिजायते ॥ सामेसालोक्यसामीप्यसार्ष्टिसायुज्यमेववा ॥ ६५ ॥ ददात्य
पिनगृह्णंतिभक्तामत्सेवनंविना ॥ सएवात्यंतिकोयोगोभक्तिमार्गस्यभामिनि ॥ ६६ ॥ मद्भावंप्राप्नुयात्तेनअतिक्र
म्यगुणत्रयम् ॥ महताकामहीनेनस्वधर्माचरणेनच ॥ ६७ ॥ कर्मयोगेनशस्तेनवर्जितेनविहिंसनम् ॥ मद्दर्शनस्तुति
महापूजाभिःस्मृतिवंदनैः ॥ ६८ ॥ भूतेषुमद्भावनयासंगेनासत्यवर्जनैः ॥ बहुमानेनमहतांदुःखिनामनुकंपया ॥ ६९ ॥
स्वसमानेषुमैत्र्याचयमादीनांनिषेवया ॥ वेदांतवाक्यश्रवणान्ममनामानुकीर्तनात् ॥ ७० ॥ सत्संगेनार्जवेणैवह्यह
मःपरिवर्जनात् ॥ कांक्षयाममधर्मस्यपरिशुद्धांतरोजनः ॥ ७१ ॥

वआत्यंतिकोयोगः सएवपूर्णोभक्तोयोमत्सेवारहितंमोक्षमपिनबहुमन्यतेइति ॥ ६६ ॥ तेनभक्तियोगेनगुणत्रयंतद्रूपांमायामतिक्रम्यमद्भावंमदैक्यंप्राप्नुयात् अथकर्मयोगमाह महतेति कामहीनेनफलोद्देशहीनेनस्वधर्मोनित्यनैमित्तिकरूपः ॥ ६७ ॥ तादृशकर्मयोगेनमद्भावंप्राप्नुयात् कथंभूतेनविहिंसनंहिंसावर्जितेनहिंसारहितेनेतियावत् उक्तभक्तियोगप्राप्त्युपायमाह मद्दर्शनेति स्मृतिःस्मरणम् वंदनंप्रणतिः ॥ ६८ ॥ सर्वभूतेषुमद्भावनयाईश्वरभावनया असंगेनदुष्टसंगपरित्यागेन ॥ ६९ ॥ यमादयोयमनियमप्राणायामादयः ॥ ७० ॥ अहमःअहंकृतेःअहंकर्तेत्यादिबुद्धेः ममधर्मस्यमत्पूजादिरूपस्यकांक्षयाइच्छया ॥ ७१ ॥

अंजसाशीघ्रमायातिमदभिन्नोभवति स्वाश्रयात्वायुनास्वाश्रयापकर्षणात् ॥ ७२ ॥ अहमात्माव्यवस्थितः सर्वत्रचेतनोहमेवेत्यर्थः ॥ ७३ ॥ तंसर्वत्रचैतन्य संपादकंमामज्ञात्वा बहिःक्रियोत्पन्नैरनेकभेदैर्द्रव्यैर्गंधपुष्पधूपादिभिर्हेअंबमेतोषणंसंतोषंनकुरुतेनजनयतीत्यर्थः सर्वभूतस्थितत्वेनमामज्ञात्वाकृतयापूजया मोक्षफलदोममसंतोषोनेत्यर्थः ॥ ७४ ॥ सर्वप्राण्यपमानकर्त्रायावत्प्रतिमानपूजितातावदेवविशिष्टानांसापूजायोग्या तदनंतरंनतत्पूजेत्यर्थः अर्चितइत्यस्य

मद्गुणश्रवणादेवयातिमामंजसाजनः ॥ यथावायुवशाद्गंधःस्वाश्रयात्घ्राणमाविशेत् ॥ ७२ ॥ योगाभ्यासरतंचित्त मेवमात्मानमाविशेत् ॥ सर्वेषुप्राणिजातेषुह्यहमात्माव्यवस्थितः ॥ ७३ ॥ तमज्ञात्वाविमूढात्माकुरुतेकेवलंबहिः ॥ क्रियोत्पन्नैर्नैकभेदैर्द्रव्यैर्मेनांबतोषणम् ॥ ७४ ॥ भूतावमानिनार्चायामर्चितोहंनपूजितः ॥ ७५ ॥ तावन्मामर्चयेद्देवंप्र तिमादौस्वकर्मभिः ॥ यावत्सर्वेषुभूतेषुस्थितंचात्मनिनस्मरेत् ॥ ७६ ॥ यस्तुभेदंप्रकुरुतेस्वात्मनश्चपरस्यच ॥ भिन्नदृष्टे र्भयंमृत्युस्तस्यकुर्यान्नसंशयः ॥ ७७ ॥ मामतःसर्वभूतेषुपरिच्छिन्नेषुसंस्थितम् ॥ एकंज्ञानेनमानेनमैत्र्याचार्चेदभि न्नधीः ॥ ७८ ॥

व्याख्यापूजितइति ॥ ७५ ॥ तावन्मामर्चयेदित्यर्धंमध्यमणिन्यायेनोत्तरान्वय्यपि यावत्सर्वभूतस्थितंमामात्मनिनस्मरेत्सएवाहमितिनजानीयात् तावदेवपू जादावधिकारोनतदुत्तरंपूज्यपूजकभावापगमादितिभावः ॥ ७६ ॥ इयमेवभावनामुख्येतिध्वनयितुंभेदंनिंदति यस्त्विति भिन्नदृष्टेस्तस्यमृत्युर्भयंकुर्यात्अत्र संशयोनास्तीत्यर्थः ॥ ७७ ॥ तस्माद्भेदंत्यक्त्वैवाहमुपास्यइत्याह मामतइति एकंमांज्ञानेनमानेनएवंज्ञानपूर्वकंसर्वप्राणिसंमानेनमैत्र्यासर्वत्रमित्रबु द्ध्यामामर्चेदितीयमेवमेमुख्यापूजा क्वापिशत्रुबुद्धिःसर्वथानकार्येतिभावः अभिन्नधीःएकएवचेतनोभगवान्सर्वत्रेत्येवंबुद्धिरित्यर्थः ॥ ७८ ॥

तथासर्वभूतानिचेतसाप्रणमेत्तत्रहेतुर्ज्ञात्वेति ॥ ७९ ॥ ईश्वरजीवयोरितिपरस्परजीवानांचेत्यपिबोध्यम् ज्ञानयोगोभक्तियोगसहितोज्ञानयोगइत्यर्थः ॥ ८० ॥ एकतरंकेवलभक्तियोगमपीत्यर्थः शममृच्छतितस्यपरिणामेज्ञानयोगप्रापकत्वादितिभावः ॥ ८१ ॥ भक्तियोगेनउत्कृष्टोयमीश्वरःपूज्यइत्येवंरूपेण तत्रासामर्थ्येआह पुत्ररूपेणवेति ॥ ८२ ॥ तिस्रोगतीःसात्त्विकराजसतामसीः तत्रसात्त्विकीअर्चिरादिगतिः राजसीधूमादिगतिस्तामसीजायस्वम्रियस्वेत्येवंरूपा

चेतसैवानिशंसर्वभूतानिप्रणमेत्सुधीः ॥ ज्ञात्वामांचेतनंशुद्धंजीवरूपेणसंस्थितम् ॥ ७९ ॥ तस्मात्कदाचिन्नेक्षेतभेदमीश्वरजीवयोः ॥ भक्तियोगोज्ञानयोगोमयामातरुदीरितः ॥ ८० ॥ आलंब्यैकतरंवापिपुरुषःशममृच्छति ॥ ततोमांभक्तियोगेनमातःसर्वहृदिस्थितम् ॥ ८१ ॥ पुत्ररूपेणवानित्यंस्मृत्वाशांतिमवाप्स्यसि ॥ श्रुत्वारामस्यवचनंकौसल्यानंदसंयुता ॥ ८२ ॥ रामंसदाहृदिध्यात्वाछित्त्वासंसारबंधनम् ॥ अतिक्रम्यगतीस्तिस्रोप्यवापपरमांगतिम् ॥ ८३ ॥ कैकेयीचापियोगंरघुपतिगदितंपूर्वमेवाधिगम्यश्रधाभक्तिप्रशांताहृदिरघुतिलकंभावयंतीगतासुः ॥ गत्वास्वर्गंस्फुरंतीदशरथसहितामोदमानावतस्थेमाताश्रीलक्ष्मणस्याप्यतिविमलमतिःप्रापभर्तुःसमीपम् ॥ ८४ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेउत्तरकांडेमातृणांस्वर्गप्रस्थानंनामसप्तमःसर्गः ॥ ७ ॥ ॥ छ ॥ श्रीमहादेवउवाच ॥ अथकालेगतेकस्मिन्भरतोभीमविक्रमः ॥ युधाजितामातुलेनह्याहूतोगात्ससैनिकः ॥ १ ॥

तत्राद्यादहराद्युपासकानांद्वितीयाकर्मिणांतृतीयान्येषांपरमांगतिम् नास्यप्राणाह्युत्क्रामंत्यत्रैवसमवलीयंतइतिज्ञानिप्राप्याम् ॥ ८३ ॥ पूर्वमेवचित्रकूटगिरौ ॥ ८४ ॥ ॥ इतिश्रीमत्सकलराजविपदुद्धरण०उत्तरकांडेसप्तमःसर्गः ॥ ७ ॥ ॥ अथेति कस्मिन्कस्मिंश्चिदित्यर्थः मातुलेनाहूतःस्वदेशसमीपवर्तिगंधर्वविषयस्थगंधर्ववधार्थम् ॥ १ ॥

तिस्रःकोटीर्गंधर्वनायकान्हत्वेत्यन्वयः पुरेपुष्करावतीतक्षशिलाख्ये ॥ २ ॥ सुतौपुष्करतक्षनामानौ ॥ ३ ॥ ४ ॥ कुमारौस्वपुत्रौपश्चिमांदिशंयाहीतिशेषः ॥

रामाज्ञयागतास्तत्रहत्वागंधर्वनायकान् ॥ तिस्रःकोटीःपुरेद्वेतुनिवेश्यरघुनंदनः ॥ २ ॥ पुंष्करंपुष्करावत्यांतक्षंतक्षशि
लाह्वये ॥ अभिषिच्यसुतौतत्रधनधान्यसुहृद्वतौ ॥ ३ ॥ पुनरागत्यभरतोरामसेवापरोभवत् ॥ ततःप्रीतोरघुश्रेष्ठोल
क्ष्मणंप्राहसादरम् ॥ ४ ॥ उभौकुमारौसौमित्रेगृहीत्वापश्चिमांदिशम् ॥ तत्रभिल्लान्विनिर्जित्यदुष्टान्सर्वापकारिणः
॥ ५ ॥ अंगदश्चित्रकेतुश्चमहासत्वपराक्रमौ ॥ द्वयोर्द्वेनगरेकृत्वागजाश्वधनरत्नकैः ॥ ६ ॥ अभिषिच्यसुतौतत्रशीघ्र
मागच्छमांपुनः ॥ रामस्याज्ञांपुरस्कृत्यगजाश्वबलवाहनः ॥ ७ ॥ गत्वाहत्वारिपून्सर्वान्स्थापयित्वाकुमारकौ ॥ सौ
मित्रिःपुनरागत्यरामसेवापरोभवत् ॥ ८ ॥ ततस्तुकालेमहतिप्रयातेरामंसदाधर्मपथेस्थितंहरिम् ॥ द्रष्टुंसमागाद्दषिवे
षधारीकालस्ततोलक्ष्मणमित्युवाच ॥ ९ ॥ निवेदयस्वातिबलस्यदूतंमांद्रष्टुकामंपुरुषोत्तमाय ॥ रामायविज्ञापनम
स्तितस्यमहर्षिमुख्यस्यचिरायधीमन् ॥ १० ॥ तस्यतद्वचनंश्रुत्वासौमित्रिस्त्वरयान्वितः ॥ आचचक्षेथरामायससं
प्राप्तंतपोधनम् ॥ ११ ॥ एवंब्रुवंतंप्रोवाचलक्ष्मणंराघवोवचः ॥ शीघ्रंप्रवेश्यतांतातमुनिःसत्कारपूर्वकम् ॥ १२ ॥

॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ततःसमागमनानंतरम् ॥ ९ ॥ अतिबलस्यमहर्षिमुख्यस्यदूतंरामंद्रष्टुकामंपुरुषोत्तमायनिवेदयस्वयस्याहंदूतस्तस्यमहर्षिमुख्यस्यरा
मायचिरायविज्ञापनमस्तिरामंप्रतिचिरकालंबोधनीयंवाक्यमस्ति ॥ १० ॥ ससौमित्रिरित्यन्वयः ॥ ११ ॥ १२ ॥

---

१ वाल्मीकीयेतक्षंतक्षशिलायांतुपुष्फलंपुष्फलावतेइतिलकारघटितौतत्रतुरलयोरंकत्वस्मरणादेकतरस्मिन्समाधेयम् ।

॥ १३ ॥ वर्धस्वेत्यस्यभूराज्याधिकस्वर्गराज्यलाभेनवर्धस्वेतितद्धृदयस्थितोर्थः ॥ १४ ॥ तेनानामयंपृष्टोरामस्तस्मैअनामयंपृष्ट्वाप्रोवाचेत्यन्वयः ॥ १५ ॥
यदर्थंयत्प्रापणार्थंतत्स्वस्वामिवाक्यम् ॥ १६ ॥ द्वंद्वमेवरहस्यमेवअनालक्ष्यंतृतीयेनेतिशेषः ॥ १७ ॥ तदेवस्पष्टयति नान्येनेति निरीक्षेद्वाकथयंतावावामिति

लक्ष्मणस्तुतथेत्युक्त्वाप्रावेशयततापसम् ॥ स्वतेजसाज्वलंतंतंघृतसिक्तंयथानलम् ॥ १३ ॥ सोभिगम्यरघुश्रेष्ठंदीप्य
मानःस्वतेजसा ॥ मुनिर्मधुरवाक्येनवर्धस्वेत्याहराघवम् ॥ १४ ॥ तस्मैसमुनयेरामःपूजांकृत्वायथाविधि ॥ पृष्ट्वाना
मयमव्यग्रोरामःपृष्टोथतेनसः ॥ १५ ॥ दिव्यासनेसमासीनोरामःप्रोवाचतापसम् ॥ यदर्थमागतोसित्वमिहतत्प्रापय
स्वमे ॥ १६ ॥ वाक्येनचोदितस्तेनरामेणाहमुनिर्वचः ॥ द्वंद्वमेवप्रयोक्तव्यमनालक्ष्यंतुतद्वचः ॥ १७ ॥ नान्येनचैतच्छ्रोतव्यं
नाख्यातव्यंचकस्यचित् ॥ शृणुयाद्वानिरीक्षेद्वायःसवध्यस्त्वयाप्रभो ॥ १८ ॥ तथेतिचप्रतिज्ञायरामोलक्ष्मणमब्रवी
त् ॥ तिष्ठत्वंद्वारिसौमित्रेनायात्वत्रजनोरहः ॥ १९ ॥ यद्यागच्छतिकोवापिसवध्योमेनसंशयः ॥ ततःप्राहमुनिंरामोये
नवात्वंविसर्जितः ॥ २० ॥ यत्तेमनीषितंवाक्यंतद्वदस्वममाग्रतः ॥ ततःप्राहमुनिर्वाक्यंशृणुरामयथातथम् ॥ २१ ॥
ब्रह्मणाप्रेषितोस्मीशकार्यार्थैतेंतिकंप्रभो ॥ अहंहिपूर्वजोदेवतवपुत्रःपरंतप ॥ २२ ॥ मायासंगमजोवीरकालःसर्व
हरःस्मृतः ॥ ब्रह्मात्वामाहभगवान्सर्वदेवर्षिपूजितः ॥ २३ ॥

शेषः ॥ १८ ॥ अत्ररहारहस्थानेजनआवाभ्यामतिरिक्तस्तृतीयोजनइत्यर्थः ॥ १९ ॥ कोवापित्वंवाअन्योवायेनत्वंविसर्जितःप्रेषितस्तस्यवामनीषितंअथवा
तेतवैवमनीषितंयद्वाक्यंतद्वदस्व ॥ २० ॥ यथातथंसत्यमित्यर्थः ॥ २१ ॥ त्वंकइतिजिज्ञासांसंभाव्यस्वयमेवोत्तरमाहाहंहीति पूर्वजःसर्वसृष्ट्यपेक्षयापूर्वः
महत्तत्त्वस्यैवायमंशविशेषइत्याह अतिरिक्तमेवेदंतत्त्वमितिशैवाः ॥ २२ ॥ मायासंगमस्तदीक्षणमात्रम् ॥ २३ ॥

अथब्रह्मवाक्यमाह रक्षितुमिति समयःअवतारसमयेकृतःकालः एतावंतंकालंभूलोकेस्थित्वापुनःस्वर्गमागंतेत्येवंरूपः ननुममस्वर्गेणकःसंबंधइत्याशंकांनिवर्तयितुंपूर्वकथामाह पुरेति सदेवसोम्येदमग्रआसीदितिश्रुतेः मायापिकार्याक्षमत्वात्त्वदभेदेनैवतदेतिभावः ॥ २४ ॥ भार्ययामाययाभवत्सान्निध्येनतस्याअप्येवंपरिणामशीलत्वादितिभावः भोगवतंशेषम् नुमभावआर्षः एतावुभावपिमहत्तत्त्वाधिष्ठातारावित्याहुः ॥ २५ ॥ ससत्वौसपराक्रमौ तन्मेदोस्थिसंचयंतद्रूपाम्

रक्षितुंस्वर्गलोकस्यसमयस्तेमहामते ॥ पुरात्वमेकएवासीर्लोकान्संहृत्यमायया ॥ २४ ॥ भार्ययासहितस्त्वंमामादौ पुत्रमजीजनः॥ तथाभोगवतंनागमनंतमुदकेशयम्॥२५॥ माययाजनयित्वात्वंद्वौससत्त्वौमहाबलौ ॥ मधुकैटभकौ दैत्यौहत्वामेदोस्थिसंचयम् ॥ २६ ॥ इमांपर्वतसंबद्धांमेदिनींपुरुषर्षभ ॥ पद्मेदिव्यार्कसंकाशेनाभ्यामुत्पाद्यमामपि ॥ २७॥ मांविधायप्रजाध्यक्षंमयिसर्वंन्यवेदयत्॥ सोहंसंयुक्तसंभारस्त्वामवोचंजगत्पते॥२८॥ रक्षांविधत्स्वभूतेभ्यो येमेवीर्यापहारिणः॥ ततस्त्वंकश्यपाज्जातोविष्णुर्वामनरूपधृत्॥ २९॥ हृतवानसिभूभारंवधाद्रक्षोगणस्यच ॥ सर्वासूत्सार्यमाणासुप्रजासुधरणीधर॥ ३०॥ रावणस्यवधाकांक्षीमर्त्यलोकमुपागतः॥ दशवर्षसहस्राणिदशवर्षशतानिच॥ ३१ ॥ कृत्वावासस्यसमयंत्रिदशेष्वात्मनःपुरा॥ सतेमनोरथःपूर्णःपूर्णेचायुषितेनृषु॥ ३२ ॥ कालस्तापसरूपेणत्वत्समीपमुपागमम् ॥ ततोभूयश्चतेबुद्धिर्यदिराज्यमुपासितुम् ॥ ३३ ॥

॥ २६॥इमांमेदिनींनिर्मितवानितिशेषः तत्रसुप्तस्यनाभ्यांविद्यमानेपद्मेमामुत्पाद्य ॥२७॥ तंचमांप्रजाध्यक्षंविधायभवान्मयिसर्वंप्रजोत्पादनपालनादिभारंन्यवेदयत्स्थापितवान् संयुक्तसंभारःअंगीकृतप्रजोत्पादनादिव्यवहारः ॥२८॥ मेवीर्यापहारिणःमेवीर्यस्यमत्प्रजानांदुःखदाइत्यर्थः ततःमांप्रतिज्ञानोत्तरमित्यर्थः ॥ २९ ॥ ३० ॥ ३१ ॥ समयंवासकालप्रतिज्ञाम् मनोरथःप्रतिज्ञाविषयःकालःनृषुनृलोकेआयुषिपूर्णेसति ॥ ३२ ॥ अहंकालस्तापसरूपेणत्वत्समीपमुपागमंप्राप्तवानस्मि ॥ ३३ ॥

तत्तथाभवराज्यमुपास्त्वेत्यर्थः ॥ ३४ ॥ ३५ ॥ कृत्स्नस्यजगतोंतकंनाशकम् कालमित्यर्थः ॥ ३६ ॥ कार्यार्थंसंभवः तेननिष्पन्नकार्यस्यावस्थानेनप्रयोजनमित्यर्थः ॥ ३७ ॥ मनोरथःअयमेवमेमनोरथोयदितोगमनमितिभावः ॥ ३८ ॥ स्थातव्यंतद्रक्षणायोद्युक्तेनभाव्यम् माययेत्यनेनसर्वमिदंमायैवेतिध्वनयति

तत्तथाभवभद्रंतेएवमाहपितामहः ॥ यदितेगमनेबुद्धिर्देवलोकंजितेंद्रिय ॥ ३४ ॥ सनाथाविष्णुनादेवाभवंतुविगतज्वराः ॥ चतुर्मुखस्यतद्वाक्यंश्रुत्वाकालेनभाषितम् ॥ ३५ ॥ हसन्रामस्तदावाक्यंकृत्स्नस्यांतकमब्रवीत् ॥ श्रुतंतववचोमेद्यममापीष्टतरंतुतत् ॥ ३६ ॥ संतोषःपरमोज्ञेयस्त्वदागमनकारणात् ॥ त्रयाणामपिलोकानांकार्यार्थंममसंभवः ॥ ३७ ॥ भद्रंतेस्त्वागमिष्यामियतएवाहमागतः ॥ मनोरथस्तुसंप्राप्तोनमेत्रास्तिविचारणा ॥ ३८ ॥ मत्सेवकानांदेवानांसर्वकार्येषुवैमया ॥ स्थातव्यंमाययापुत्रयथाचाहप्रजापतिः ॥ ३९ ॥ एवंतयोःकथयतोर्दुर्वासामुनिरभ्यगात् ॥ राजद्वारंराघवस्यदर्शनापेक्षयाद्रुतम् ॥ ४० ॥ मुनिर्लक्ष्मणमासाद्यदुर्वासावाक्यमब्रवीत् ॥ शीघ्रंदर्शयरामंमेकार्यंमेत्यंतमाहितम् ॥ ४१ ॥ तच्छ्रुत्वाप्राहसौमित्रिर्मुनिंज्वलनतेजसम् ॥ रामेणकार्यंकिंतेद्यकिंतेभीष्टंकरोम्यहम् ॥ ४२ ॥ राजाकार्यांतरेव्यग्रोमुहूर्तंसंप्रतीक्ष्यताम् ॥ तच्छ्रुत्वाक्रोधसंतप्तोमुनिःसौमित्रिमब्रवीत् ॥ ४३ ॥ अस्मिन्क्षणेतुसौमित्रेनदर्शयसिचेद्विभुम् ॥ रामंसविषयंवंशंभस्मीकुर्यांनसंशयः ॥ ४४ ॥ श्रुत्वातद्वचनंघोरमृषेर्दुर्वाससोभृशम् ॥ स्वरूपंतस्यवाक्यस्यचिंतयित्वासलक्ष्मणः ॥ ४५ ॥

॥ ३९ ॥ आदृतंयथाभवतितथादर्शनेच्छयाराजद्वारमभ्यगात् ॥ ४० ॥ ४१ ॥ रामेणकार्यंकिंतेइतितत्सर्वंकार्यमहंसंपादयामीतिभावः तदेवाह किंतेइत्यादि ॥ ४२ ॥ ४३ ॥ वंशंदशरथस्येतिशेषः तेनसर्वेषांभवदादीनांनाशंकरिष्यामीत्यर्थः ॥ ४४ ॥ भृशमतिशयेनघोरमित्यन्वयः स्वरूपंवाच्यंव्यंग्यंचार्थम् ॥ ४५ ॥

कारणाद्दुर्वासोरूपात् ॥ ४६ ॥ ४७ ॥ ४८ ॥ वर्षसहस्राणांसंबंधीयउपवासस्तस्यसमापनं समासआर्षः ॥ ४९ ॥ यत्सिद्धंगृहेस्तितद्भोजनमिच्छामि ॥ ॥ ५० ॥ अमृतममृतवत्स्वादु ॥ ५१ ॥ कालेनभाषितमित्यन्वयः स्मृत्वाचशोकादियुक्तःसन् ॥ ५२ ॥ मनसाहतप्रायंज्ञात्वाप्रतिज्ञायाअन्यथाकर्तुमशक्य

सर्वनाशाद्वरंमेद्यनाशोह्येकस्यकारणात् ॥ निश्चित्यैवंततोगत्वारामायप्राहलक्ष्मणः॥४६॥ सौमित्रेर्वचनंश्रुत्वारामः कालंव्यसर्जयत् ॥ शीघ्रंनिर्गम्यरामोपिददर्शात्रेःसुतंमुनिम् ॥ ४७ ॥ रामोभिवाद्यसंप्रीतोमुनिंपप्रच्छसादरम् ॥ किं कार्यंतेकरोमीतिमुनिमाहरघूत्तमः ॥ ४८ ॥ तच्छ्रुत्वारामवचनंदुर्वासाराममब्रवीत् ॥ अद्यवर्षसहस्राणामुपवाससमापनम् ॥ ४९ ॥ अतोभोजनमिच्छामिसिद्धंयत्तेरघूत्तम ॥ रामोमुनिवचःश्रुत्वासंतोषेणसमन्वितः ॥ ५० ॥ससिद्धमन्नंमुनयेयथावत्समुपाहरत् ॥ मुनिर्भुक्त्वान्नममृतंसंतुष्टःपुनरभ्यगात् ॥ ५१ ॥ स्वमाश्रमंगतेतास्मिन्रामःसस्मारभाषितम् ॥ कालेनशोकदुःखार्तोविमनाश्चातिविह्वलः ॥ ५२ ॥ अवाङ्मुखोदीनमनानशशाकाभिभाषितुम् ॥ मनसालक्ष्मणंज्ञात्वाहतप्रायंरघूद्वहः ॥ ५३ ॥ अवाङ्मुखोबभूवाथतूष्णीमेवाखिलेश्वरः॥ ततोरामंविलोक्याहसौमित्रिर्दुःखसंप्लुतम् ॥ ५४ ॥ तूष्णींभूतंचिंतयंतंगर्हंतंस्नेहबंधनम् ॥ मत्कृतेत्यजसंतापंजहिमांरघुनंदन ॥ ५५ ॥ गतिः कालस्यकलितापूर्वमेवेदृशीप्रभो ॥ त्वयिहीनप्रतिज्ञेतुनरकोमेध्रुवंभवेत् ॥ ५६ ॥ मयिप्रीतिर्यदिभवेद्यद्यनुग्राह्यता तव ॥ त्यक्त्वाशंकांजहिप्राज्ञमामाधर्मंत्यजप्रभो ॥ ५७ ॥

त्वादितिभावः ॥ ५३ ॥ ५४ ॥ स्नेहकृतंबंधनंगर्हंतंनिंदंतं स्नेहाद्वधेऽशक्ततातदकरणेचप्रतिज्ञाहानिरितिचिंतयंतम् ॥ ५५ ॥ पूर्वमेवेदृशीति इदमवश्यंभावीतिभावः मत्कृतेत्वत्प्रतिज्ञाहानौममापिनरकइत्यर्थः ॥ ५६ ॥ धर्मंमात्यजेत्यन्वयः अनेनप्रतिज्ञापालनमेवक्षत्रियस्यमुख्योधर्मस्तद्विधेयानांचतत्प्रतिज्ञानिर्वाहणंपरमोधर्मइतिचसूचितम् ॥ ५७ ॥

चलितमानसस्त्यक्तभ्रातृस्नेहः ॥ ५८ ॥ मुनेर्दुर्वाससः ॥ ५९ ॥ ६० ॥ भूभारहारिणस्तावन्मात्रफलकतयाधृतशरीरस्यतवपूर्वंत्वत्तःपूर्वमित्यर्थः लक्ष्मणगम
नंनिर्दिष्टं भावीसत्वर्थोंस्माभिर्ज्ञातएवास्ते ॥ ६१ ॥ प्रतिज्ञातेर्थेपरित्यक्तेअन्यथाकृते ॥ ६२ ॥ धर्मेनष्टेराज्ञइतिशेषः तवत्रैलोक्यपालकत्वेनत्वद्धर्मनाशेसंपू

सौमित्रिणोक्तंतच्छ्रुत्वारामश्चलितमानसः ॥ आहूयमंत्रिणःसर्वान्वसिष्ठंचेदमब्रवीत् ॥ ५८ ॥ मुनेरागमनंयत्तुका
लस्यापिहिभाषितम् ॥ प्रतिज्ञामात्मनश्चैवसर्वमावेदयत्प्रभुः ॥ ५९ ॥ श्रुत्वारामस्यवचनंमंत्रिणःसपुरोहिताः ॥ ऊचुः
प्रांजलयःसर्वेरामसक्लिष्टकारिणम् ॥ ६० ॥ पूर्वमेवहिनिर्दिष्टंतवभूभारहारिणः ॥ लक्ष्मणेनवियोगस्तेज्ञातोविज्ञान
चक्षुषा ॥ ६१ ॥ त्यजाशुलक्ष्मणंराममाप्रतिज्ञांत्यजप्रभो ॥ प्रतिज्ञातेपरित्यक्तेधर्मोभवतिनिष्फलः ॥ ६२ ॥ धर्मे
नष्टेखिलेरामत्रैलोक्यंनश्यतिध्रुवम् ॥ त्वंतुसर्वस्यलोकस्यपालकोसिरघूत्तम ॥ ६३ ॥ त्यक्त्वालक्ष्मणमेवैकंत्रैलोक्यं
त्रातुमर्हसि ॥ रामोधर्मार्थसहितंवाक्यंतेषामनिंदितम् ॥ ६४ ॥ सभामध्येसमाश्रुत्यप्राहसौमित्रिमंजसा ॥ यथेष्टंग
च्छसौमित्रेमाभूद्धर्मस्यसंशयः ॥ ६५ ॥ परित्यागोवधोवापिसतामेवोभयंसमम् ॥ एवमुक्तेरघुश्रेष्ठेदुःखव्याकुलिते
क्षणः ॥ ६६ ॥ रामंप्रणम्यसौमित्रिःशीघ्रंगृहमगात्स्वकम् ॥ ततोगात्सरयूतीरमाचम्यसकृतांजलिः ॥ ६७ ॥ नव
द्वाराणिसंयम्यमूर्ध्निप्राणमधारयत् ॥ यदक्षरंपरंब्रह्मवासुदेवाख्यमव्ययम् ॥ ६८ ॥ पदंतत्परमंधामचेतसासोभ्यचिं
तयत् ॥ वायुरोधेनसंयुक्तंसर्वेदेवाःसहर्षयः ॥ ६९ ॥

र्णत्रैलोक्यनाशइतिभावः ॥ ६३ ॥ ६४ ॥ समाश्रुत्य वसिष्ठादिवाक्यंश्रुत्वेत्यर्थः ॥ ६५ ॥ सतामुभयंसममेवेत्यन्वयः उक्तेउक्तवतीत्यर्थः ॥ ६६ ॥ ६७ ॥
नवद्वाराणिचक्षुषीकर्णौनासिकामुखंपायूपस्थेब्रह्मरंध्रंचेति ॥ ६८ ॥ अभ्यचिंतयत्वासुदेवोहमित्यध्यायत ॥ ६९ ॥

तुष्टुवुःपुष्पैःसमाकिरंश्च विबुधैःकैश्चिददृश्यम् कैरपिदेवैर्नदृश्यमित्यर्थः ॥ ७० ॥ ७१ ॥ हरौहर्यंशे सिद्धलोकगतयोगिनःतल्लोकस्थयोगिनइत्यर्थः आहित प्राप्तंमहाहिरूपंयेनतत् दुग्धंयथादधिभावमापद्यते तथायमेवदेहस्तत्राहिरूपतांप्राप्तइत्यर्थः ॥ ७२ ॥ ॥ इतिश्रीमत्सकलराजवि०उत्तरकांडेअष्टमःसर्गः

साग्नयोलक्ष्मणंपुष्पैस्तुष्टुवुश्चसमाकिरन् ॥ अदृश्यंविबुधैःकैश्चित्सशरीरंसवासवः ॥ ७० ॥ गृहीत्वालक्ष्मणंशक्रःस्वर्गलोकमथागमत् ॥ ततोविष्णोश्चतुर्भागंतंदेवंसुरसत्तमाः ॥ सर्वेदेवर्षयोदृष्ट्वालक्ष्मणंसमपूजयन् ॥ ७१ ॥ लक्ष्मणेहिदिवमागतेहरौसिद्धलोकगतयोगिनस्तदा ॥ ब्रह्मणासहसमागमन्मुदाद्रष्टुमाहितमहाहिरूपकम् ॥ ७२ ॥ इतिश्रीमदध्यात्मरा०उमामहेश्वरसंवादेउत्तरकांडेअष्टमःसर्गः ॥८॥ ॥ ९ ॥ श्रीमहादेवउवाच ॥ लक्ष्मणंतुपरित्यज्यरामोदुःखसमन्वितः ॥ मंत्रिणोनैगमांश्चैववसिष्ठंचेदमब्रवीत् ॥ १ ॥ अभिषेक्ष्यामिभरतमधिराज्येमहामतिम् ॥ अद्यचाहंगमिष्यामिलक्ष्मणस्यपदानुगः ॥ २ ॥ एवमुक्तेरघुश्रेष्ठेपौरजानपदास्तदा ॥ द्रुमाइवच्छिन्नमूलादुःखार्ताःपतिताभुवि ॥ ३ ॥ मूर्च्छितोभरतोवापिश्रुत्वारामाभिभाषितम् ॥ गर्हयामासराज्यंसप्राहेदंरामसन्निधौ ॥४॥ सत्येनचशपेनाहंत्वांविनादिविवाभुवि ॥ कांक्षेराज्यंरघुश्रेष्ठशपेत्वत्पादयोःप्रभो ॥ ५ ॥ इमौकुशलवौराजन्नभिषिंचस्वराघव ॥ कोशलेषुकुशंवीरमुत्तरेषुलवंतथा ॥ ६ ॥

॥ ८ ॥ · ॥ ९ ॥ ॥ नैगमावणिजः ॥ १ ॥ अद्यचाहमित्यर्थः पदानुगःपदान्यनुलक्षीकृत्यगंता अन्यथातेनबहुव्यवधानंस्यादित्यर्थः ॥ २ ॥ उक्तेउक्तवतिसति ॥ ३ ॥ भरतोवापिभरतश्चापीत्यर्थः राज्यंगर्हयामासतन्निंदापूर्वकमिदंप्राहचेत्यर्थः ॥ ४ ॥ सत्येनशपेसत्यंमेनश्यतुयदिराज्याकांक्षेत्येकःशपथः त्वत्पादयोश्चशपेत्वत्पादयोःस्पर्शनेचशपथइत्यपरःशपथः ॥ ५ ॥ तर्हिसर्वगमनेकोराज्यंपालयिष्यतीत्याशंक्याहेमाविति ॥ ६ ॥

---

१ शेषशंखचक्रैःशेषशायीविष्णुःस्वमूर्त्याचतुर्भागवान् तत्रशेषांशंलक्ष्मणंचतुर्थभागमित्यर्थः ।

॥ ७ ॥ तंतथाकठोरंवदंतम् पतिताभुवीतिशेषः ॥ ८ ॥ तातेतिसंबोधनम् ॥ ९ ॥ भावानुगंअभिप्रायानुगम् पूज्येतिल्यबार्षः ॥१० ॥ ११ ॥ अयंत्वदनुगमन

गच्छंतुदूतास्त्वरितंशत्रुघ्नानयनायहि ॥ अस्माकमेतद्गमनंस्वर्वासायशृणोतुसः ॥ ७ ॥ भरतेनोदितंश्रुत्वापतितास्ताः
समीक्ष्यतम् ॥ प्रजाश्चभयसंविग्नारामविश्लेषकातराः ॥ ८ ॥ वसिष्ठोभगवान्राममुवाचसदयंवचः ॥ पश्यता
तादरात्सर्वाःपतिताभूतलेप्रजाः ॥९॥ तासांभावानुगंरामप्रसादंकर्तुमर्हसि ॥ श्रुत्वावसिष्ठवचनंताःसमुत्थाप्यपूज्यच
॥ १० ॥ सस्नेहोरघुनाथस्ताःकिंकरोमीतिचाब्रवीत् ॥ ततःप्रांजलयःप्रोचुःप्रजाभक्त्यारघूद्वहम् ॥ ११ ॥ गंतुमिच्छ
सियत्रत्वमनुगच्छामहेवयम् ॥ अस्माकमेषापरमाप्रीतिर्धर्मोयमक्षयः ॥ १२ ॥ तवानुगमनेरामहृद्गतानोदृढामतिः ॥
पुत्रदारादिभिःसार्धमनुयामोद्यसर्वथा ॥ १३ ॥ तपोवनंवास्वर्गंवापुरंवारघुनंदन ॥ ज्ञात्वातेषांमनोदार्ढ्यंकालस्यव
चनंयथा ॥१४॥ भक्तंपौरजनंचैवबाढमित्याहराघवः ॥ कृत्वैवनिश्चयंरामस्तस्मिन्नेवाहनिप्रभुः ॥ १५॥ प्रस्थापयामा
सचतौरामभद्रःकुशीलवौ ॥ अष्टौरथसहस्राणिसहस्रंचैवदंतिनाम् ॥१६॥ षष्टिंचाश्वसहस्राणामेकैकस्मैददौबलम् ॥
बहुरत्नौबहुधनौहृष्टपुष्टजनावृतौ ॥ १७॥ अभिवाद्यगतौरामंकृच्छ्रेणतुकुशीलवौ ॥ शत्रुघ्नानयनेदूतान्प्रेषयामा
सराघवःतेदूतास्त्वरितंगत्वाशत्रुघ्नायन्यवेदयन् ॥ १८ ॥ कालस्यागमनंपश्चादत्रिपुत्रस्यचेष्टितम् ॥ लक्ष्मणस्यचनि
र्याणंप्रतिज्ञांराघवस्यच ॥१९॥ पुत्राभिषेचनंचैवसर्वंरामचिकीर्षितम् ॥ श्रुत्वातद्दूतवचनंशत्रुघ्नःकुलनाशनम् ॥२०॥

रूपः ॥ १२ ॥ १३ ॥ तपोवनाद्यन्यतमंयद्गंतासितदनुयामइत्यर्थः ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ कृच्छ्रेणभगवद्वियोगजदुःखासहिष्णुतयाक्लेशेन ॥ १८॥
अत्रिपुत्रस्यदुर्वाससःप्रतिज्ञांप्रजासुसहनयनविषयाम् ॥ १९ ॥ चिकीर्षितंस्वगमनरूपम् कुलस्यभ्रातृसमूहस्यनाशनम् ॥ २० ॥

॥ २१ ॥ २२ ॥ अक्षयैर्ऋषिभिः अतिचिरजीविभिर्वसिष्ठाद्यैः ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ मेवचनात्स

व्यथितोपिधृतिंलब्ध्वापुत्रावाहूयसत्वरः ॥ अभिषिच्यसुबाहुंवैमथुरायांमहाबलः ॥ २१ ॥ यूपकेतुंचविदिशानगरे
शत्रुसूदनः ॥ अयोध्यांत्वरितंप्रागात्स्वयंरामदिदृक्षया ॥ २२ ॥ ददर्शचमहात्मानंतेजसाज्वलनप्रभम् ॥ दुकूलयुग
संवीतंऋषिभिश्चाक्षयैर्वृतम् ॥ २३ ॥ अभिवाद्यरमानाथंशत्रुघ्नोरघुपुंगवम् ॥ प्रांजलिर्धर्मसहितंवाक्यंप्राहमहामतिः
॥ २४ ॥ अभिषिच्यसुतौतत्रराज्येराजीवलोचन ॥ तवानुगमनेराजन्विद्धिमांकृतनिश्चयम् ॥ २५ ॥ त्यक्तुंनार्हसिमां
वीरभक्तंतवविशेषतः ॥ शत्रुघ्नस्यदृढांबुद्धिंविज्ञायरघुनंदनः ॥ २६ ॥ सज्जीभवतुमध्याह्नेभवानित्यब्रवीद्वचः ॥ अ
थक्षणात्समुत्पेतुर्वानराःकामरूपिणः ॥ २७ ॥ ऋक्षाश्चराक्षसाश्चैवगोपुच्छाश्चसहस्रशः ॥ ऋषीणांदेवतानांचपुत्रा
रामस्यनिर्गमम् ॥ २८ ॥ श्रुत्वाप्रोचूरघुश्रेष्ठंसर्वेवानरराक्षसाः ॥ तवानुगमनेविद्धिनिश्चितार्थान्हिनःप्रभो ॥ २९ ॥
एतस्मिन्नंतरेरामंसुग्रीवोपिमहाबलः ॥ यथावदभिवाद्याहराघवंभक्तवत्सलम् ॥ ३० ॥ अभिषिच्यांगदंराज्येआगतो
स्मिमहाबलम् ॥ तवानुगमनेरामविद्धिमांकृतनिश्चयम् ॥ ३१ ॥ श्रुत्वातेषांदृढंवाक्यंऋक्षवानररक्षसाम् ॥ विभी
षणमुवाचेदंवचनंमृदुसादरम् ॥ ३२ ॥ धरिष्यतिधरायावत्प्रजास्तावत्प्रशाधिमे ॥ वचनाद्राक्षसंराज्यंशापितोसि
ममोपरि ॥ ३३ ॥ नकिंचिदुत्तरंवाच्यंत्वयामत्कृतकारणात् ॥ एवंविभीषणंतूक्त्वाहनूमंतमथाब्रवीत् ॥ ३४ ॥ मा
रुतेत्वंचिरंजीवममाज्ञांमामृषाकृथाः ॥ जांबवंतमथप्राहतिष्ठत्वंद्वापरांतरे ॥ ३५ ॥

शाधिराक्षसंरक्षःसंबंधिराज्यंचप्रशाधि अतोन्यन्मावदेत्याह शापितोसीति अन्यवचनोक्तौमद्वधपातकंतवेतिभावः ॥ ३३ ॥ ३४ ॥ ममाज्ञांचिरंजीवेत्येवंरू
पाम् द्वापरांतरेएतच्चतुर्युगीभिन्नंयत्किंचिच्चतुर्युग्यंतर्गतद्वापरे ॥ ३५ ॥

युद्धंभवेत्भविष्यति ततःस्वर्गंगमिष्यसीतिशेषः अत्रजांबवद्ग्रहणंमैंदद्विविदयोरप्युपलक्षणम् तान्हनुमज्जांबवदादिभिन्नान् ॥ ३६ ॥ ३७ ॥ प्रास्थानिकंमहाप्रस्थानोचितम् क्षौमांबरइत्यादिरामविशेषणम् ॥ ३८ ॥ पद्मालक्ष्मीः पूर्वंगतासीतातत्कालेलक्ष्मीरूपेणसन्निहिताजातेत्यर्थः ॥ ३९ ॥ अरुणकंजहस्तारक्त

मयासार्धंभवेद्युद्धंयत्किंचित्कारणांतरे ॥ ततस्तान्राघवःप्राहऋक्षराक्षसवानरान् ॥ सर्वानेवमयासार्धंप्रयातेतिदयान्वितः ॥ ३६ ॥ ततःप्रभातेरघुवंशनाथोविशालवक्षाःसितकंजनेत्रः ॥ पुरोधसंप्राहवसिष्ठमार्यंयांत्वग्निहोत्राणिपुरोगुरोमे ॥ ३७ ॥ ततोवसिष्ठोपिचकारसर्वंप्रास्थानिकंकर्ममहद्विधानात् ॥ क्षौमांबरोदर्भपवित्रपाणिर्महाप्रयाणायगृहीतबुद्धिः ॥ ३८ ॥ निष्क्रम्यरामोनगरात्सिताभ्राच्छशीवयातःशशिकोटिकांतिः ॥ रामस्यसव्ये[1]सितपद्महस्तापद्मागतापद्मविशालनेत्रा ॥ ३९ ॥ पार्श्वेथदक्षे[2]रुणकंजहस्ताश्यामाययौभूरपिदीप्यमाना ॥ शास्त्राणिशस्त्राणिधनुश्चबाणाजग्मुःपुरस्ताद्धृतविग्रहास्ते ॥ ४० ॥ वेदाश्चसर्वेधृतविग्रहाश्चययुश्चसर्वेमुनयश्चदिव्याः ॥ माताश्रुतीनांप्रणवेनसाध्वीययौहरिंव्याहृतिभिःसमेता ॥ ४१ ॥ गच्छंतमेवानुगताजनास्तेसपुत्रदाराःसहबंधुवर्गैः ॥ अनावृतद्वारमिवापवर्गंरामंव्रजंतंययुराप्तकामाः ॥ ४२ ॥ सांतःपुरःसानुचरःसभार्यःशत्रुघ्नयुक्तोभरतोनुयायात् ॥ गच्छंतमालोक्यरमासमेतंश्रीराघवंपौरजनाःसमस्ताः ॥ ४३ ॥ सबालवृद्धाश्चययुर्द्विजाग्र्याःसामात्यवर्गाश्चसमंत्रिणोययुः ॥ सर्वेगताःक्षत्रमुखाःप्रहृष्टावैश्याश्चशूद्राश्चतथापरेच ॥ ४४ ॥

पद्महस्ताभूस्तदधिष्ठात्रीदेवता एवमग्रेपिबोध्यम् ॥ ४० ॥ दिव्यामुनयःसनकादयः श्रुतीनांमातागायत्री ॥ ४१ ॥ अनावृतद्वारमिवापवर्गतुल्यंव्रजंतंराममनुययुः ॥ ४२ ॥ अनुयायात् अन्वगच्छदित्यर्थः क्वचित्तथैवपाठः ॥ ४३ ॥ सामात्यवर्गाःसमंत्रिणोद्विजाग्र्याययुःक्षत्रमुखाः क्षत्रंक्षत्रियामुखंमुख्याअग्रेसरायेषांतादृशावैश्यादयः ॥ ४४ ॥

---

[1] वाल्मीकीयेतथैवस्पष्टमुक्तत्वात्। [2] दक्षिणेइदंवाल्मीकीयस्थेनविरुद्धमतएकतरस्मिन्मन्यतरार्थेप्रामाण्याप्रामाण्येनलक्षणाकर्तव्या।

॥ ४५ ॥ दुःखबाह्यसुखयोगाभावेहेतुः आनंदरूपानुगताआनंदरूपंराममनुगताः तदनुगमनात्तदानंदप्रतिभासात्तदयोगःसर्वत्रवैराग्यंचेतिभावः ॥ ४६ ॥
जग्मुरनुजग्मुः योराममनारामंनयातोनानुयातस्तादृशोजंतुर्नासीदित्यर्थः ॥ ४७ ॥ राजनिगतेखिलंपुरंशून्यंबभूव हरिनेत्रजातांसरयूं ॥ ४८ ॥ स्मृतंपाव

सुग्रीवमुख्याहरिपुंगवाश्चस्नाताविशुद्धाःशुभशब्दयुक्ताः ॥ नकश्चिदासीद्भवदुःखयुक्तोदीनोथवाबाह्यसुखेषुसक्तः
॥ ४५ ॥ आनंदरूपानुगताविरक्ताययुश्चरामंपशुभृत्यवर्गैः ॥ भूतान्यदृश्यानिचयानितत्रयेप्राणिनःस्थावरजंगमाश्च
॥ ४६ ॥ साक्षात्परात्मानमतंनशक्तिंजग्मुर्विरक्ताःपरमेकमीशम् ॥ नासीदयोध्यानगरेतुजंतुःकश्चित्तदाराममना
नयातः ॥ ४७ ॥ शून्यंबभूवाखिलमेवतत्रपुरंगतेराजनिरामचंद्रे ॥ ततोतिदूरंनगरात्सगत्वादृष्ट्वानदींतांहरिनेत्रजा
ताम् ॥ ४८ ॥ ननंदरामःस्मृतपावनोतोददर्शचाशेषमिदंहृदिस्थम् ॥ अथागतस्तत्रपितामहोमहान्देवाश्चसर्वैंऋषय
श्चसिद्धाः ॥ ४९ ॥ विमानकोटीभिरपारपारंसमावृतंखंसुरसेविताभिः ॥ रविप्रकाशाभिरभिस्फुरत्स्वंज्योतिर्मयंतत्र
नभोबभूव ॥ ५० ॥ स्वयंप्रकाशैर्महतांमहद्भिःसमावृतंपुण्यकृतांवरिष्ठैः ॥ ववुश्चवाताश्चसुगंधवंतोववर्षवृष्टिःकुसु
मावलीनाम् ॥ ५१ ॥ उपस्थितेदेवमृदंगनादेगायत्सुविद्याधरकिन्नरेषु ॥ रामस्तुपद्भ्यांसरयूजलंसकृत्स्पृष्ट्वापरिक्रा
मदनंतशक्तिः ॥ ५२ ॥ ब्रह्मातदाप्राहकृतांजलिस्तंरामंपरात्मन्परमेश्वरस्त्वम् ॥ विष्णुःसदानंदमयोसिपूर्णोजानासि
तत्त्वंनिजमैशमेकम् ॥ ५३ ॥

नंविराड्रूपमात्मनोयेनसः अशेषमिदंजगत्हृदिस्थंददर्श आत्मानंविराड्रूपंस्मृतवानित्यर्थः
॥ ४९ ॥ अपारपारंअवधिरूपपारद्वयहीनंतादृशमपिविमानावृतमासीत् ज्योतिर्मयंनक्षत्रगणप्रचुरमिव ॥ ५० ॥ येत्रलोकेपुण्यंकृत्वास्वर्गेसर्वेभ्यआधिक्यं
प्राप्तास्तैश्चनभःसमावृतम् चौपादपूरणे ॥ ५१ ॥ परिक्रामत्पर्यक्रामत्जलोपर्यगच्छदित्यर्थः तत्रैवहेतुगर्भंविशेषणमनंतशक्तिरिति ॥ ५२ ॥ हेपरमात्म
न्परमेश्वरःजगत्सृष्टिस्थितिलयकर्तात्वमेवेत्यर्थः त्वमैशंएकंनिजंतत्त्वंब्रह्मरूपंजानासि ॥ ५३ ॥

नन्वेवंब्रह्मज्ञस्यब्रह्मरूपस्यकथंशरीरपरिग्रहोतआह तथापीति भक्तानुग्रहार्थंमाययासर्वमिदंकृतमितिभावः अतोवैष्णवंदेहंप्रविश्यदेवान्पाहिरक्ष ॥ ५४ ॥
यदीतियइत्यर्थः अथवायोपरोदेहस्तवरोचतेतंवाप्रविश्यपाहि एवंविष्णुरूपंत्वांमांविनाअन्येपुरुषानजानंति ॥ ५५ ॥ एवंविष्णुरूपंज्ञात्वाभक्त्याप्रणमति स

तथापिदासस्यममाखिलेशकृतंवचोभक्तपरोसिविद्वन् ॥ त्वंभ्रातृभिर्वैष्णवमेकमाद्यंप्रविश्यदेहंपरिपाहिदेवान् ॥५४॥
यद्वापरोवायदिरोचतेतंप्रविश्यदेहंपरिपाहिनस्त्वम् ॥ त्वमेवदेवाधिपतिश्चविष्णुर्जानंतिनत्वांपुरुषाविनामाम् ॥५५॥
सहस्रकृत्वस्तुनमोनमस्तेप्रसीददेवेशपुनर्नमस्ते ॥ पितामहप्रार्थनयासरामःपश्यत्सुदेवेषुमहाप्रकाशः ॥ ५६ ॥ मुष्णं
श्चचक्षूंषिदिवौकसांतदाबभूवचक्रादियुतश्चतुर्भुजः ॥ शेषोबभूवेश्वरतल्पभूतःसौमित्रिरत्यद्भुतभोगधारी ॥ ५७ ॥
बभूवतुश्चक्रदरौचदिव्यौकैकेयिसूनुर्लवणांतकश्च ॥ सीताचलक्ष्मीरभवत्पुरैवरामोहिविष्णुःपुरुषःपुराणः ॥ ५८ ॥
सहानुजःपूर्वशरीरकेणबभूवतेजोमयदिव्यमूर्तिः ॥ विष्णुंसमासाद्यसुरेंद्रमुख्यादेवाश्चसिद्धामुनयश्चयक्षाः ॥ ५९ ॥
पितामहाद्याःपरितःपरेशंस्तवैर्गृणंतःपरिपूजयंतः ॥ आनंदसंप्लावितपूर्णचित्ताबभूविरेप्राप्तमनोरथास्ते ॥ ६० ॥

हस्रेति ॥५६॥ चक्षूंषिमुष्णन्नूस्वप्रभयेतिशेषःरामदेहएवतथाभूतोजातः अनेनविष्णुदेहएवमाययाद्विभुजत्ववैशिष्ट्येनलोकदृग्गोचरआसीदितिसूचितम् भोगः
सर्पशरीरंपूर्वंगतोपिसतस्मिन्नवसरेतेनदेहेनसन्निहितः ॥ ५७ ॥ दरःशंखःलवणांतकःशत्रुघ्नःसीताचपुरैवलक्ष्मीरूपाभवत्सापितत्कालेलक्ष्मीरूपेणसन्निहिता
आसीदितिशेषःहियतोरामोविष्णुरित्यर्थः ॥ ५८ ॥ पूर्वशरीरकेणविष्णुदेहेन ॥ ५९ ॥ ६० ॥

नन्वेवंभगवतोविष्णुरूपप्राप्त्यावैकुंठवासइत्यायातम्   एवंचसभापर्वणिभारतेसर्वदिक्पालसभावर्णनेयमसभाप्रस्तावेदाशरथीरामोयमसभायांदृष्टइतिनारदेनोक्तंतद्विरुध्यतेइतिचेत् अत्रवदामः अवतारपरिग्रहस्यहिप्रयोजनद्वयंदुष्टवधेनशिष्टपालनंस्वाचरणेनलोकानांधर्ममर्यादाबोधनंच एतदर्थमेवतेषांतत्तत्कर्मानुष्ठानेप्रवृत्तिरन्यथाअकामस्यभगवतःकिंयज्ञाद्यनुष्ठानेन एवंचधर्मबोधनार्थंतदनुष्ठानवत्आजन्मेदृशधर्मानुष्ठानस्यामुकलोकवासःफलमितिबोधयितुंदाशरथिरामत्वंप्रत्यभिज्ञापकेनमायिकेनकेनचिच्छरीरेणतल्लोकेवासेनाक्षतेः रामायणेएतदर्थाकथनंतुइतिहासेषुउक्तत्वात्सर्वज्ञानांवाल्मीक्यादीनांभूतभाविसर्वार्थ

तदाहविष्णुर्द्रुहिणंमहात्माएतेहिभक्तामयिचानुरक्ताः॥यांतंदिवंमामनुयांतिसर्वेतिर्यक्शरीराअपिपुण्ययुक्ताः॥६१॥
वैकुंठसाम्यंपरमंप्रयांतुसमाविशस्वाशुममाज्ञयात्वम् ॥ श्रुत्वाहरेर्वाक्यमथाब्रवीत्कःसांतानिकान्यांतुविचित्रभोगा
न् ॥ ६२ ॥ लोकान्मदीयोपरिदीप्यमानांस्त्वद्भावयुक्ताःकृतपुण्यपुंजाः ॥ येचापितेरामपवित्रनामगृणंतिमर्त्यालय
कालएव ॥ ६३ ॥ अज्ञानतोवापिभजंतुलोकांस्तानेवयोगैरपिचाधिगम्यान् ॥ ततोतिहृष्टाहरिराक्षसाद्याःस्पृष्ट्वाज
लंत्यक्तकलेवरास्ते ॥ ६४ ॥

ज्ञानवत्त्वादित्यन्यत्रविस्तरः तदेतितदातस्मिन्समयेविष्णुर्द्रुहिणंब्रह्माणमाह मदनुगमनादेवपुण्ययुक्तत्वानुमानम् ॥ ६१ ॥ वैकुंठसाम्यंवैकुठसमानलोकम् स्वार्थेष्यञ्चातुर्वर्ण्यादित्वादार्षत्वाद्वा एतान्ममाज्ञयासमाविशत्वतादृशलोकंप्रवेशयत्व कोब्रह्मासांतानिकलोकविशेषाः॥ ६२ ॥ तेषांलोकानामुत्तमत्वमाह मदीयोपरिदीप्यमानान्ब्रह्मलोकादूर्ध्वंदीप्यमानान् अपिचयेपिमनुष्यालयकालएवमरणकालएव नतुततःप्रागपिकदाचित् तत्राप्यज्ञानतोवाअज्ञानतएव वाशब्दएवार्थः येपवित्रनामरामेत्येतद्गृणंतिवदंतितेपितानेवलोकान्योगैःप्राप्यान्भजंतु अनेनाजन्माभ्यस्तयोगोंतकालेत्वन्नामस्मर्ताचसमइतिसूचितम् ॥
॥ ६३ ॥ ६४ ॥

योयद्वंशजःसतद्रूपमेवप्रापेत्यर्थः तदाह प्रभाकरमिति आदित्यजवीर्यवत्त्वात् आदित्यदेहजवीर्योत्पन्नत्वात् ॥ ६५ ॥ सांतनिकाख्येत्यत्रह्रस्वआर्षः ॥ ६६ ॥
रामदृष्टा भगवद्दृष्ट्याक्षीणसर्वपापाःविमुक्तसंगाभूत्वेतिशेषः ॥ ६७ ॥ अंजःशीघ्रम् ॥ ६८ ॥ अथरामायणपाठफलमाह यइति तथापापंकुर्वन्नेषरामायण
श्लोकमपिपठन्विमुक्तसर्वपापःरामस्यसालोक्यंप्रयाति राघवचोदितेनअंतर्यामिविधयारघुनाथप्रेरितेन ॥ ६९ ॥ ७० ॥ आप्तोव्याप्तःसंबद्धोभविष्यदर्थोय

प्रपेदिरेप्राक्तनमेवरूपंयद्वंशजाऋक्षहरीश्वरास्ते ॥ प्रभाकरंप्रापहरिप्रवीरःसुग्रीवआदित्यजवीर्यवत्त्वात् ॥ ६५ ॥ ततो
विमग्नाःसरयूजलेषुनराःपरित्यज्यमनुष्यदेहम् ॥ आरुह्यदिव्याभरणाविमानंप्रापुश्चतेसांतनिकाख्यलोकान् ॥ ६६ ॥
तिर्यक्प्रजाताअपिरामदृष्टाजलंप्रविष्टादिवमेवयाताः ॥ दिदृक्षवोजानपदाश्चलोकारामंसमालोक्यविमुक्तसंगाः ॥
॥ ६७ ॥ स्मृत्वाहरिंलोकगुरुंपरेशंस्पृष्ट्वाजलंस्वर्गमवापुरंजः ॥ एतावदेवोत्तरमाहशंभुःश्रीरामचंद्रस्यकथावशेषम्
॥ ६८ ॥ यःपादमप्यत्रपठेत्सपापाद्विमुच्यतेजन्मसहस्रजातात् ॥ दिनेदिनेपापचयंप्रकुर्वन्पठेन्नरःश्लोकमपीहभक्त्या
॥ ६९ ॥ विमुक्तसर्वाघचयःप्रयातिरामेतिसालोक्यमनन्यलभ्यम् ॥ आख्यानमेतद्रघुनायकस्यकृतंपुराराघवचो
दितेन ॥ ७० ॥ महेश्वरेणाप्तभविष्यदर्थंश्रुत्वातुरामःपरितोषमेति ॥ रामायणंकाव्यमनंतपुण्यंश्रीशंकरेणाभिहितं
भवान्यै ॥ ७१ ॥ भक्त्यापठेद्यःशृणुयात्सपापैर्विमुच्यतेजन्मशतोद्भवैश्च ॥ अध्यात्मरामंपठतश्चनित्यंश्रोतुश्चभक्त्या
लिखितुश्चरामः ॥ ७२ ॥

यत्तदाख्यानंश्रुत्वारामःपरितोषमेति भगवंतंसर्वगतंरामंश्रावयामीतिबुद्ध्यायोवाचयतितद्वाचितंतत्सर्वगत्वात्श्रुत्वावाचकस्योपरितोषमेति तत्परितोषेचतस्यस
र्वार्थसिद्धिरितिभावः अनंतपुण्यंवाचकश्रोत्रोरनंतपुण्यदमित्यर्थः ॥ ७१ ॥ अध्यात्मरामंतत्पदघटितमध्यात्मरामायणाख्यंपुराणमित्यर्थः श्रोतुःलिखितुश्चा
तिप्रसन्नःसन्सदासमीपेस्थितोभूत्वाश्रियमातनोतीत्यन्वयः ॥ ७२ ॥

महान्देवैरपिदुर्जयःविभीषणःपूर्वंप्रतिज्ञाताभिषेकः ॥ ५० ॥ विभीषणस्यानुमतेलंकाधीशत्वात्तदाज्ञांगृहीत्वा ॥ ५१ ॥ ५२ ॥ ५३ ॥ अनिंदितांरावण
तिरस्कारादप्राप्तनिंदाम् ॥ ५४ ॥५५॥ भक्त्येति प्रह्वत्वादेर्हेतुकथनंपूर्वस्मृतिंपूर्वमागतोयःसएवायमितिस्मृतिंस्मरणंययौप्राप्तवती ॥५६॥ भवत्अभवदित्यर्थः

सहायेनत्वयावीरजितोमेरावणोमहान् ॥ विभीषणोऽपिलंकायामभिषिक्तोमयानघ ॥ ५० ॥ ततःप्राहहनूमंतंपार्श्व
स्थंविनयान्वितम् ॥ विभीषणस्यानुमतेगच्छत्वंरावणालयम् ॥ ५१ ॥ जानक्यैसर्वमाख्याहिरावणस्यवधादिकम् ॥
जानक्याःप्रतिवाक्यंमेशीघ्रमेवनिवेदय ॥ ५२ ॥ एवमाज्ञापितोधीमान्रामेणपवनात्मजः ॥ प्रविवेशपुरींलंकांपूज्य
मानोनिशाचरैः ॥ ५३ ॥ प्रविश्यरावणगृहंशिंशपामूलमाश्रिताम् ॥ ददर्शजानकींतत्रकृशांदीनामनिंदिताम् ॥ ५४॥
राक्षसीभिःपरिवृतांध्यायंतींराममेवहि ॥ विनयावनतोभूत्वाप्रणम्यपवनात्मजः ॥ ५५ ॥ कृतांजलिपुटोभूत्वाप्रह्वोभ
क्त्याग्रतःस्थितः ॥ तंदृष्ट्वाजानकीतूष्णींस्थित्वापूर्वस्मृतिंययौ ॥ ५६ ॥ ज्ञात्वातंरामदूतंसाहर्षात्सौम्यमुखीभवत् ॥ सतां
सौम्यमुखींदृष्ट्वातस्यैपवननंदनः ॥ रामस्यभाषितंसर्वमाख्यातुमुपचक्रमे ॥ ५७ ॥ देविरामःससुग्रीवोविभीषणस
हायवान् ॥ कुशलीवानराणांचसैन्यैश्चसहलक्ष्मणः ॥ ५८ ॥ रावणंससुतंहत्वासबलंसहमंत्रिभिः ॥ त्वामाहकुशलंरा
मोराज्येकृत्वाविभीषणम् ॥ ५९ ॥ श्रुत्वाभर्तुःप्रियंवाक्यंहर्षगद्गदयागिरा ॥ किंतेप्रियंकरोम्यद्यनपश्यामिजगत्त्रये ॥ ६० ॥
समंतेप्रियवाक्यस्यरत्नान्याभरणानिच ॥ एवमुक्तस्तुवैदेह्याप्रत्युवाचप्लवंगमः ॥ ६१ ॥

अडभावआर्षः रामस्यभाषितंसंदेशम् ॥ ५७ ॥ वानराणांसैन्यैःसहैवलक्ष्मणश्चकुशलीसर्वेकुशलिनइत्यर्थः ॥ ५८ ॥ राज्येविभीषणंकृत्वाइत्यनेननिरवशे
षसर्वकृत्यसिद्धिरुक्ता ॥ ५९ ॥ तेप्रियवाक्यस्यसमंरत्नादिषुनकिंचित्पश्यामि ॥ ६० ॥ ६१ ॥

योयदंशजःसतद्रूपमेवप्रापेत्यर्थः तदाह प्रभाकरमिति आदित्यजवीर्यवत्त्वात् आदित्यदेहजवीर्योत्पन्नत्वात् ॥ ६५ ॥ सांतनिकाख्येत्यत्रह्रस्वआर्षः ॥ ६६ ॥ रामदृष्टा भगवद्दृष्ट्याक्षीणसर्वपापाःविमुक्तसंगाभूत्वेतिशेषः ॥ ६७ ॥ अंजःशीघ्रम् ॥ ६८ ॥ अथरामायणपाठफलमाह यइति तथापापंकुर्वन्नेषरामायणश्लोकमपिपठन्विमुक्तसर्वपापःरामस्यसालोक्यंप्रयाति राघवचोदितेनअंतर्यामिविधयारघुनाथप्रेरितेन ॥ ६९ ॥ ७० ॥ आप्तोव्याप्तःसंबद्धोभविष्यदर्थोय

प्रपेदिरेप्राक्तनमेवरूपंयदंशजाऋक्षहरीश्वरास्ते ॥ प्रभाकरंप्रापहरिप्रवीरःसुग्रीवआदित्यजवीर्यवत्त्वात् ॥ ६५ ॥ ततो
विमग्नाःसरयूजलेषुनराःपरित्यज्यमनुष्यदेहम् ॥ आरुह्यदिव्याभरणाविमानंप्रापुश्चतेसांतनिकाख्यलोकान् ॥ ६६ ॥
तिर्यक्प्रजाताअपिरामदृष्टाजलंप्रविश्यादिवमेवयाताः ॥ दिदृक्षवोजानपदाश्चलोकारामंसमालोक्यविमुक्तसंगाः ॥
॥ ६७ ॥ स्मृत्वाहरिंलोकगुरुंपरेशंस्पृष्ट्वाजलंस्वर्गमवापुरंजः ॥ एतावदेवोत्तरमाहशंभुःश्रीरामचंद्रस्यकथावशेषम्
॥ ६८ ॥ यःपादमप्यत्रपठेत्सपापाद्विमुच्यतेजन्मसहस्रजातात् ॥ दिनेदिनेपापचयंप्रकुर्वन्पठेन्नरःश्लोकमपीहभक्त्या
॥ ६९ ॥ विमुक्तसर्वाघचयःप्रयातिरामेतिसालोक्यमनन्यलभ्यम् ॥ आख्यानमेतद्रघुनायकस्यकृतंपुराराघवचो
दितेन ॥ ७० ॥ महेश्वरेणाप्तभविष्यदर्थंश्रुत्वातुरामःपरितोषमेति ॥ रामायणंकाव्यमनंतपुण्यंश्रीशंकरेणाभिहितं
भवान्यै ॥ ७१ ॥ भक्त्यापठेद्यःशृणुयात्सपापैर्विमुच्यतेजन्मशतोद्भवैश्च ॥ अध्या[illegible]पठतश्चनित्यंश्रोतुश्चभक्त्या
लिखितुश्चरामः ॥ ७२ ॥

स्तदाख्यानंश्रुत्वारामःपरितोषमेति भगवंतंसर्वगतंरामंश्रावयामीतिबुद्ध्यायोवाचयतितद्वाचितंतत्सर्वगत्वात्श्रुत्वावाचकस्योपरितोषमेति तत्परितोषेचतस्यसर्वार्थसिद्धिरितिभावः अनंतपुण्यंवाचकश्रोत्रोरनंतपुण्यदमित्यर्थः ॥ ७१ ॥ अध्यात्मरामंतत्पदघटितमध्यात्मरामायणाख्यंपुराणमित्यर्थः श्रोतुःलिखितुश्चातिप्रसन्नःसन्सदासमीपेस्थितोभूत्वाश्रियमातनोतीत्यन्वयः ॥ ७२ ॥

॥ अथ श्रीमद्ध्यात्मरामायणे युद्धकांडः प्रारभ्यते ॥


युद्धकांड ६.
कुंभकर्ण
मारुति
रावण
राम

श्रीगणेशायनमः ॥ यथावदिति ॥ १ ॥ यदन्येनमनसास्मर्तुमपिनशक्यमित्यन्वयः ॥ २ ॥ धर्षयितुंअशोकवनिकादिनाशेन ॥ ३ ॥ सुग्रीवस्येदृशइति भृ
त्यइतिशेषः ॥ ४ ॥ कपीश्वरःसुग्रीवः ॥ ५ ॥ जानक्याःपरिमार्गणरूपंकार्यमनेनसुकृतंसम्यक्कृतं एवंहनुमंतंस्तुत्वाप्रकृतमाह समुद्रमित्यादि यतःसीदतीव

श्रीमहादेवउवाच॥ यथावद्भाषितंवाक्यंश्रुत्वारामोहनूमतः॥ उवाचानंतरंवाक्यंहर्षेणमहतावृतः ॥ १ ॥ कार्यंकृतंहनु
मतादेवैरपिसुदुष्करम् ॥ मनसापियदन्येनस्मर्तुंशक्यंनभूतले ॥ २ ॥ शतयोजनविस्तीर्णंलंघयेत्कःपयोनिधिम् ॥ लं
कांचराक्षसैर्गुप्तांकोवाधर्षयितुंक्षमः ॥ ३ ॥ भृत्यकार्यंहनुमताकृतंसर्वमशेषतः ॥ सुग्रीवस्येदृशोलोकेनभूतोनभविष्य
ति ॥ ४ ॥ अहंचरघुवंशश्चलक्ष्मणश्चकपीश्वरः॥ जानक्यादर्शनेनाद्यरक्षिताःस्मोहनूमता ॥ ५ ॥ सर्वथासुकृतंकार्यं
जानक्याःपरिमार्गणम्॥ समुद्रंमनसास्मृत्वासीदतीवमनोमम ॥ ६ ॥ कथंनक्रझषाकीर्णंसमुद्रंशतयोजनम् ॥ लंघ
यित्वारिपुंहन्यांकथंद्रक्ष्यामिजानकीम् ॥ ७ ॥ श्रुत्वातुरामवचनंसुग्रीवःप्राहराघवम्॥ समुद्रंलंघयिष्यामोमहानक्रझ
षाकुलम् ॥ ८ ॥ लंकांचविधमिष्यामोहनिष्यामोद्यरावणम् ॥ चिंतांत्यजरघुश्रेष्ठचिंताकार्यविनाशिनी ॥ ९ ॥ एता
न्पश्यमहासत्वान्शूरान्वानरपुंगवान् ॥ त्वत्प्रियार्थंसमुद्युक्तान्प्रवेष्टुमपिपावकम् ॥ १० ॥ समुद्रतरणेबुद्धिंकुरुष्वप्रथ
मंततः॥ दृष्ट्वालंकांदशग्रीवोहतइत्येवमन्महे ॥ ११ ॥ नहिपश्याम्यहंकंचित्त्रिषुलोकेषुराघव ॥ गृहीतधनुषोयस्तेतिष्ठेद
भिमुखोरणे ॥ १२ ॥ सर्वथानोजयोरामभविष्यतिनसंशयः॥ निमित्तानिचपश्यामितथाभूतानिसर्वशः॥ १३॥

॥ ६ ॥ अतःकथमित्यादि ॥ ७ ॥ ८ ॥ यतश्चिंताकार्यविनाशिनीअतस्तांत्यज ॥ ९ ॥ त्वत्प्रियनिमित्तंपावकंप्रवेष्टुमपिसमुद्युक्तान् ॥ १० ॥ प्रथमंसमुद्र
तरणविषयंनिश्चयमातिष्ठेत्यर्थः लंकादर्शनोत्तरकालमस्माभीरावणोहतइत्येवमन्महेएषएवास्माकंनिश्चयइत्यर्थः ॥ ११ ॥ कंचित्कमपि ॥ १२ ॥ निमित्ता
निशकुनानि ॥ १३ ॥

॥ १४ ॥ येनकेनप्रकारेणसमुद्रशोषणेनसेतुनावादेवदानवैर्दुःसाध्यंयोद्धुंप्रवेष्टुंचेतिशेषः ॥ १५ ॥ प्रतीकारंतन्नाशोपायम् ॥ १६ ॥ दिव्यत्वेनत्रिकूटशिखरस्थत्वेनचेतरासाध्यत्वम् ॥ १७ ॥ प्राकारोनगरवेष्टनभित्तिः परिखाःप्राकारसंलग्नाःप्राकाराद्बहिर्देशस्थाःखाताः ॥ १८ ॥ वाप्यःस्वल्पजलाशयाःअवतर

सुग्रीववचनंश्रुत्वाभक्तिवीर्यसमन्वितम् ॥ अंगीकृत्याब्रवीद्रामोहनूमंतंपुरस्थितम् ॥ १४ ॥ येनकेनप्रकारेणलंघयामोमहार्णवम् ॥ लंकास्वरूपंमेब्रूहिदुःसाध्यंदेवदानवैः ॥ १५ ॥ ज्ञात्वातस्यप्रतीकारंकरिष्यामिकपीश्वर ॥ श्रुत्वारामस्यवचनंहनूमान्विनयान्वितः ॥ १६ ॥ उवाचप्रांजलिर्देवयथादृष्टंब्रवीमिते ॥ लंकादिव्यापुरीदेवत्रिकूटशिखरेस्थिता ॥ १७ ॥ स्वर्णप्राकारसहितास्वर्णाट्टालकसंयुता ॥ परिखाभिःपरिवृतापूर्णाभिर्निर्मलोदकैः ॥ १८ ॥ नानोपवनशोभाढ्यादिव्यवापीभिरावृता ॥ गृहैर्विचित्रशोभाढ्यैर्मणिस्तंभमयैःशुभैः ॥ १९ ॥ पश्चिमद्वारमासाद्यगजवाहाःसहस्रशः ॥ उत्तरेद्वारितिष्ठंतिसाश्ववाहाःसपत्तयः ॥ २० ॥ तिष्ठंत्यर्बुदसंख्याकाःप्राच्यामपितथैवच ॥ रक्षिणोराक्षसावीराद्वारंदक्षिणमाश्रिताः ॥ २१ ॥ मध्यकक्षेप्यसंख्यातागजाश्वरथपत्तयः ॥ रक्षयंतिसदालंकांनानास्त्रकुशलाःप्रभो ॥ ॥ २२ ॥ संक्रमैर्विविधैर्लंकाशतघ्नीभिश्चसंयुता ॥ एवंस्थितेपिदेवेशशृणुमेतत्रचेष्टितम् ॥ २३ ॥ दशाननबलौघस्यचतुर्थांशोमयाहतः ॥ दग्ध्वालंकांपुरींस्वर्णप्रासादोधर्षितोमया ॥ २४ ॥ शतघ्न्यःसंक्रमाश्चैवनाशितामेरघूत्तम ॥ देवत्वद्दर्शनादेवलंकाभस्मीकृताभवेत् ॥ २५ ॥ प्रस्थानंकुरुदेवेशगच्छामोलवणांबुधेः ॥ तीरंसहमहावीरैर्वानरौघैःसमंततः ॥ २६ ॥

णसोपानसहिताःकूपविशेषाः ॥ १९ ॥ सहस्रशस्तिष्ठंतीतिशेषः ॥ २० ॥ २१ ॥ २२ ॥ संक्रमाःपरिबद्धाःसर्वप्रवेशायोग्यामार्गाः मेचेष्टितंमत्कृतोव्यवहारः ॥ २३ ॥ २४ ॥ संक्रमानाशिताःप्राकारपातनेनपूरयित्वासर्वप्रवेशयोग्याःकृताः ॥ २५ ॥ लवणांबुधेस्तीरंगच्छामइत्यन्वयः ॥ २६ ॥

॥ २७ ॥ विजयोन्वर्थनामा ॥ २८ ॥ सुतरांदुर्धर्षामपिनाशयामि ॥ २९ ॥ यूथपाःजांबवदाद्याः ॥ ३० ॥ त्वंमयासहयाहीतिशेषः ॥ ३१ ॥ ३२ ॥ सेनापाःसेनापालाः ॥ ३३ ॥ वारणेंद्राःगजेंद्राः ॥ ३४ ॥ क्ष्वेलंतः क्ष्वेलाःयुद्धार्थंगच्छतांशूराणांगतिविशेषाः ॥ ३५ ॥ हरिभ्यांहनुमदंगदाभ्याम् नक्षत्रसदृ

श्रुत्वाहनूमतोवाक्यमुवाचरघुनंदनः ॥ सुग्रीवसैनिकान्सर्वान्प्रस्थानायाभिनोदय ॥ २७ ॥ इदानीमेवविजयोमुहूर्तः परिवर्त्तते ॥ अस्मिन्मुहूर्तेगत्वाहंलंकांराक्षससंकुलाम् ॥ २८ ॥ सप्राकारांसुदुर्धर्षांनाशयामिसरावणाम् ॥ आनेष्यामिचसीतांमेदक्षिणाक्षिस्फुरत्यधः ॥ २९ ॥ प्रयातुवाहिनीसर्वावानराणांतरस्विनाम् ॥ रक्षंतुयूथपाःसेनामग्रेपृष्ठेचपार्श्वयोः ॥ ३० ॥ हनूमंतमथारुह्यगच्छाम्यग्रेंगदंततः ॥ आरुह्यलक्ष्मणोयातुसुग्रीवत्वंमयासह ॥ ३१ ॥ गजोगवाक्षोगवयोमैंदोद्विविदएवच ॥ नलोनीलःसुषेणश्चजांबवांश्चतथापरे ॥ ३२ ॥ सर्वेंगच्छंतुसर्वत्रसेनापाःशत्रुघातिनः ॥ इत्याज्ञाप्यहरीन्रामःप्रतस्थेसहलक्ष्मणः ॥ ३३ ॥ सुग्रीवसहितोहर्षात्सेनामध्यगतोविभुः ॥ वारणेंद्रनिभाःसर्वेवानराःकामरूपिणः ॥ ३४ ॥ क्ष्वेलंतःपरिगर्जंतोजग्मुस्तेदक्षिणांदिशम् ॥ भक्षयंतोययुःसर्वेफलानिचमधूनिच ॥ ३५ ॥ ब्रुवंतोराघवस्याग्रेहनिष्यामोघ्ररावणम् ॥ एवंतेवानरश्रेष्ठागच्छंत्यतुलविक्रमाः ॥ ३६ ॥ हरिभ्यामुह्यमानौतौशुशुभातेरघूत्तमौ ॥ नक्षत्रैःसेवितौयद्वच्चंद्रसूर्याविवांबरे ॥ ३७ ॥ आवृत्त्यपृथिवींकृत्स्नांजगाममहतीचमूः ॥ प्रस्फोटयंतःपुच्छाग्रानुद्वहंतश्चपादपान् ॥ ३८ ॥ शैलानारोहयंतश्चजग्मुर्मारुतवेगतः ॥ असंख्याताश्चसर्वत्रवानराःपरिपूरिताः ॥ ३९ ॥

शाअन्येहरयः हनूमदंगदयोरत्युच्चत्वादंबरस्थचंद्रसूर्योपमा ॥ ३७ ॥ आवृत्त्यआच्छाद्य प्रस्फोटयंतःशौर्यावेशकृतभूम्याघातेनपादपानुद्वहंतः हस्तैर्युद्धार्थमितिशेषः ॥ ३८ ॥ सर्वत्रयावद्दर्शनपथदेशे ॥ ३९ ॥

नअसज्जतआसक्तानाभूत्अविश्रमंजगामेतियावत् ॥ ४० ॥ तेवानराः ॥ ४१ ॥ आनुपूर्व्येणक्रमेणआययुःप्राप्ताः हनूमंतंहनूमतः पंचम्यर्थेआर्षीद्वितीया सुग्रीवयुतोरामः ॥ ४२ ॥ सलिलसमीपंप्राप्यसुग्रीवंप्रतिरामोवचनमब्रवीदित्यन्वयः आगताःप्राप्ताःस्मः ॥ ४३ ॥ निरुपायेनउपायंविना अस्यतारणेअस्य

हृष्टास्तेजग्मुरत्यर्थंरामेणपरिपालिताः ॥ गताचमूर्दिवारात्रंक्कचिन्नासज्जतक्षणम् ॥ ४० ॥ काननानिविचित्राणिपश्यन्मलयसह्ययोः ॥ तेसह्यंसमतिक्रम्यमलयंचतथागिरिम् ॥ ४१ ॥ आययुश्चानुपूर्व्येणसमुद्रंभीमनिःस्वनम् ॥ अवतीर्यहनूमंतंरामःसुग्रीवसंयुतः॥ ४२॥ सलिलाभ्याशमासाद्यरामोवचनमब्रवीत् ॥ आगताःस्मोवयंसर्वेसमुद्रंमकरालयम् ॥ ४३ ॥ इतोगंतुमशक्यंनोनिरुपायेनवानराः॥ अत्रसेनानिवेशोस्तुमंत्रयामोऽस्यतारणे ॥ ४४ ॥ श्रुत्वा रामस्यवचनंसुग्रीवःसागरांतिके ॥ सेनांन्यवेशयत्क्षिप्रंरक्षितांकपिकुंजरैः॥४५॥ तेपश्यंतोविषेदुस्तंसागरंभीमदर्शनम्॥ महोन्नततरंगाढ्यंभीमनक्रभयंकरम् ॥ ४६ ॥ अगाधंगगनाकारंसागरंवीक्ष्यदुःखिताः ॥ तरिष्यामःकथंघोरंसागरंवरुणालयम्॥ ४७॥ हंतव्योस्माभिरद्यैवरावणोराक्षसाधमः॥ इतिचिंताकुलाःसर्वेरामपार्श्वेव्यवस्थिताः॥ ४८ ॥ रामःसीतामनुस्मृत्यदुःखेनमहतावृतः॥ विलप्यजानकींसीतांबहुधाकार्यमानुषः॥ ४९ ॥

समुद्रस्यतरणे स्वार्थेणिच् मंत्रयामःउपायानितिशेषः ॥ ४४ ॥ ४५ ॥ विषेदुःदुःखिताबभूवुः महोन्नतैस्तरंगैराढ्यंसंपन्नं ॥ ४६ ॥ गगनाकारंविपुलत्वेनतत्सादृश्यम् दुःखितावानराःकथंतरिष्यामइत्यादेःइतिचिंताकुलाइत्यनेनान्वयः. ॥ ४७ ॥ अद्यैवहंतव्योहंतुमर्हः ॥ ४८ ॥ दुःखेनमहतावृतःआसीदितिशेषः तत्रहेतुः कार्यमानुषःकार्यार्थंमानुषःनाटितमानुष्यत्वः एवंचेदंदुःखादितस्यनटनमेवेतिभावः ॥ ४९ ॥

वस्तुतोनतस्यदुःखादिइत्याहाद्वितीयइति द्वितीयाद्विभयंभवतीतिश्रुतेस्तस्यनदुःखादीतिभावः तदुपपादकंचिदात्मैकइति अनेकचेतनकल्पनेगौरवात्सोऽद्विती
यएकइतिभावः किंच योरामस्यस्वरूपंतत्त्वतःतत्त्वमस्यादिवाक्यतोजानातिसोपिदुःखादिभयतोमुच्यते स्वयमानंदस्वरूपस्यभगवतोनदुःखादिइतिकिंवक्तव्य
मितिभावः दुःखादीत्यत्रादिशब्दग्राह्यमाह दुःखेति ॥ ५० ॥ ५१ ॥ तत्त्वज्ञमपितानिकुतोनस्पृशंतीत्यत्रहेतुमाह अज्ञानलिंगानीति तस्यतत्त्वज्ञानेननाशादि
तिभावः चिदात्मनिसर्वथाऽज्ञानरहितेतानिकुतःसंतिकथंभवंतीत्यर्थः तदेवदाढर्यायपुनराह देहेति ॥ ५२ ॥ तस्यसुखरूपत्वेहेतुमाह संप्रसादेइति सुषुप्तावित्य

अद्वितीयश्चिदात्मैकःपरमात्मासनातनः ॥ यस्तुजानातिरामस्यस्वरूपंतत्त्वतोजनः ॥ ५० ॥ तंनःस्पृशतिदुःखादिकि
मुतानंदमव्ययम् ॥ दुःखहर्षभयक्रोधलोभमोहमदादयः ॥ ५१ ॥ आज्ञानलिंगान्येतानिकुतःसंतिचिदात्मनि ॥ देहा
भिमानिनोदुःखंनादेहस्यचिदात्मनः ॥ ५२ ॥ संप्रसादेद्वयाभावात्सुखमात्रंहिदृश्यते ॥ बुद्ध्याद्यभावात्संशुद्धेदुःखंतत्र
नदृश्यते ॥ अतोदुःखादिकंसर्वंबुद्धेरेवनसंशयः ॥ ५३ ॥ रामःपरात्मापुरुषःपुराणोनित्योदितोनित्यसुखोनिरीहः ॥ तथा
पिमायागुणसंगतोऽसौसुखीवदुःखीवविभाव्यतेबुधैः ॥ ५४ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेयुद्धकां
डेप्रथमःसर्गः ॥ १ ॥ ॥ छ ॥ ॥ छ ॥ ॥ लंकायांरावणोद्दृष्ट्वाकृतंकर्महनूमता ॥ दुष्करंदैवतैर्वापिह्रियाकिंचि
दवाङ्मुखः ॥ १ ॥

र्थः द्वयाभावाद्वितीयाभावात् ननुशुद्धेऽपिदुःखंकुतोनतत्राह बुद्ध्याद्यभावादिति यतोबुद्धिरहितेतत्रनदृश्यते अतोबुद्धेरेवतत्सर्वमित्यर्थः ॥ ५३ ॥ नित्यो
दितत्वेननाशराहित्यम् अबुधैर्मायागुणैःसंगतःतत्संगतत्वेनकल्पितःसुखीवदुःखीवचविभाव्यते ॥ ५४ ॥ इतिश्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिबिरु
दावलीविराजमानस्य हिम्मतिवर्मणःपुत्रस्यश्रीरामवर्मणःकृतावध्यात्मरामायणेसेतौयुद्धकांडेप्रथमःसर्गः ॥ १ ॥ ॥ छ ॥ ॥ लंकायामिति दै
वतैर्वापिदैवतैरपीत्यर्थः वापादपूरणे ॥ १ ॥

॥ २ ॥ अक्षंहत्वेत्यनुकर्षः ॥ ३ ॥ स्वस्थइत्यनेनभवत्कृतांगवैकृतराहित्यंसूचितम् ॥ ४ ॥ यत्कृतंसन्मंत्रयध्वमित्यन्वयः ॥ ५ ॥ लोकजितःइंद्रादिलोकजयि
नः ॥ ६ ॥ तदेवाहेंद्रस्त्विति पत्तनेपुरेकुबेरंजित्वापुष्पकमानीयभुज्यतइत्यन्वयः ॥ ७ ॥ यदायमोजितस्तदाकालदंडादपिभयंनाभूत्तत्कुतोमानुषाद्भयमितिभा

आहूयमंत्रिणःसर्वानिदंवचनमब्रवीत् ॥ हनूमताकृतंकर्मभवद्भिर्दृष्टमेवतत् ॥ २ ॥ प्रविश्यलंकांदुर्धर्षांदृष्ट्वासीतांदुरा
सदाम् ॥ हत्वाचराक्षसान्वीरानक्षंमंदोदरीसुतम् ॥ ३ ॥ दग्ध्वालंकामशेषेणलंघयित्वाचसागरम् ॥ युष्मान्सर्वानति
क्रम्यस्वस्थोगात्पुनरेवसः ॥ ४ ॥ किंकर्तव्यमितोऽस्माभिर्यूयंमंत्रविशारदाः ॥ मंत्रयध्वंप्रयत्नेनयत्कृतंमेहितंभवेत्
॥ ५ ॥ रावणस्यवचःश्रुत्वाराक्षसास्तमथाब्रुवन् ॥ देवशंकाकुतोरामात्तवलोकजितोरणे ॥ ६ ॥ इंद्रस्तुबद्धानिक्षिप्तः
पुत्रेणतवपत्तने ॥ जित्वाकुबेरमानीयपुष्पकंभुज्यतेत्वया ॥ ७ ॥ यमोजितःकालदंडाद्भयंनाभूत्तवप्रभो ॥ वरुणोहुंकृ
तेनैवजितःसर्वेपिराक्षसाः ॥ ८ ॥ मयोमहासुरोभीत्याकन्यांदत्त्वास्वयंतव ॥ त्वद्वशेवर्ततेद्यापिकिमुतान्येमहासुराः
॥ ९ ॥ हनूमद्धर्षणंयत्तुतदवज्ञाकृतंचनः ॥ वानरोयंकिमस्माकमस्मिन्पौरुषदर्शने ॥ १० ॥ इत्युपेक्षितमस्माभिर्धर्ष
णंतेनकिंभवेत् ॥ वयंप्रमत्ताःकिंतेनवंचिताःस्मोहनूमता ॥ ११ ॥ जानीमोयदितंसर्वेकथंजीवन्गमिष्यति ॥ आज्ञा
पयजगत्कृत्स्नमवानरममानुषम् ॥ १२ ॥

वः सर्वेपिराक्षसाइत्यस्यत्वदधीनाइतिशेषः ॥ ८ ॥ ९ ॥ नोस्माकंयातदवज्ञातस्मिन्नवज्ञातत्कृतमित्यर्थः अवज्ञाकारणमाहुः अयंवानरः किमस्माकंकरिष्य
तीतिशेषः अस्मिन्वानरेपौरुषस्यदर्शनेकिंफलं निष्फलंतत् ॥ १० ॥ इतीत्यादि धर्षणंतेनकिंभवेदिति तस्योपेक्षाभावेइत्यादि अयंकिं कःपदार्थः इतिवयंप्रम
त्तास्तेनप्रमादेनहनूमतावंचिताः ॥ ११ ॥ यदितंजानीमःअयमेवंरूपइतियदिजानीमइत्यर्थः गमिष्यति गतःस्यादित्यर्थेआर्षम् ॥ १२ ॥

सर्वानाज्ञापयएकैकंवेत्यर्थः ॥ १३ ॥ यत्कर्मत्वयारब्धंतत्केवलंस्वात्मनाशाय आरंभकालएवनाशःप्रसक्तःपरंतुभाग्याज्जीवितोसियत्तदारामेणनदृष्टोसि
॥ १४ ॥ जीवन्नायासीत्यत्रहेतुभूतंरामस्वरूपमाह रामोनेति ॥ १५ ॥ त्वयाआनीतेतिच्छेदः ॥ १६ ॥ विषपिंडमिवतत्सदृशम् आगीर्यनिगीर्यमहामीनोय

कृत्वायास्यामहेसर्वैंप्रत्येकंवानियोजय ॥ कुंभकर्णस्तदाप्राहरावणंराक्षसेश्वरम् ॥ १३ ॥ आरब्धंयत्त्वयाकर्मस्वात्म
नाशायकेवलम् ॥ नदृष्टोसितदाभाग्यात्त्वंरामेणमहात्मना ॥ १४ ॥ यदिपश्यतिरामस्त्वांजीवन्नायासिरावण ॥ रामो
नमानुषोदेवःसाक्षान्नारायणोव्ययः ॥ १५ ॥ सीताभगवतीलक्ष्मीरामपत्नीयशस्विनी ॥ राक्षसानांविनाशायत्वया
नीतासुमध्यमा ॥ १६ ॥ विषपिंडमिवागीर्यमहामीनोयथातथा ॥ आनीताजानकीपश्चात्त्वयाकिंवाभविष्यति ॥ १७ ॥
यद्यप्यनुचितंकर्मत्वयाकृतमजानता ॥ सर्वंसमंकरिष्यामिस्वस्थचित्तोभवप्रभो ॥ १८ ॥ कुंभकर्णवचःश्रुत्वावाक्य
मिंद्रजिदब्रवीत् ॥ देहिदेवममानुज्ञांहत्वारामंसलक्ष्मणम् ॥ सुग्रीवंवानरांश्चैवपुनर्यास्यामितेंतिकम् ॥ १९ ॥ तत्राग
तोभागवतप्रधानोविभीषणोबुद्धिमतांवरिष्ठः ॥ श्रीरामपादद्वयएकतानःप्रणम्यदेवारिमुपोपविष्टः ॥ २० ॥ विलोक्य
कुंभश्रवणादिदैत्यान्मत्तप्रमत्तानतिविस्मयेन ॥ विलोक्यकामातुरमप्रमत्तोदशाननंप्राहविशुद्धबुद्धिः ॥ २१ ॥

थापश्चात्तप्यतितथात्वयाजानकीआनीता अथकिंवाभविष्यतीतिपश्चात्तप्स्यसेइतिशेषः ॥ १७ ॥ सर्वंसमंकरिष्यामिपराक्रमेणेतिभावः ॥ १८ ॥ १९ ॥
एकतानःतन्मात्रविषयध्यानवान् देवारिंरावणंप्रणम्योपतत्समीपेभ्रातृत्वादुपविष्टः ॥ २० ॥ कुंभश्रवणः कुंभकर्णः आदिनेंद्रजित् मत्तप्रमत्तान् अतिशयेनम
त्तानित्यर्थः कामातुरंदशाननंविलोक्यप्राह ॥ २१ ॥

कुंभकर्णेंद्रजितौयस्ययुधिस्थातुंनशक्तौतौप्रसिद्धौमहापार्श्वमहोदरावपिनशक्तौ तथानिकुंभकुंभातिकायाअपिनशक्ताअन्येषांकागणनेतिभावः ॥ २२ ॥ नचतेविमोक्षःततोमहाग्रहादितिशेषः महाधनेनरत्नादिना ॥ २३ ॥ अभिव्याप्येत्यनेनयुगपत्सर्वदेशावच्छेदेनशिरश्छेदसूचनम् तेनपराक्रमातिशयवर्णनम्

नकुंभकर्णेंद्रजितौचराजंस्तथामहापार्श्वमहोदरौतौ॥ निकुंभकुंभौचतथातिकायःस्थातुंनशक्तायुधिराघवस्य॥ २२॥
सीताभिधानेनमहाग्रहेणग्रस्तोसिराजन्नचतेविमोक्षः॥तामेवसत्कृत्यमहाधनेनदत्त्वाभिरामायसुखीभवत्वम्॥ २३॥
यावन्नरामस्यशिताःशिलीमुखालंकामभिव्याप्यशिरांसिरक्षसाम् ॥ छिंदंतितावद्रघुनायकस्यभोतांजानकींत्वंप्रति
दातुमर्हसि ॥ २४ ॥ यावन्नगाभाःकपयोमहाबलाहरींद्रतुल्यानखदंष्ट्रयोधिनः॥ लंकांसमाक्रम्यविनाशयंतितेताव
द्द्रुतंदेहिरघूत्तमायताम् ॥ २५ ॥ जीवन्नरामेणविमोक्ष्यसेत्वंगुप्तःसुरेंद्रैरपिशंकरेण ॥ नदेवराजांकगतोनमृत्योःपाता
ललोकानपिसंप्रविष्टः॥ २६॥ शुभंहितंपवित्रंचविभीषणवचःखलः॥ प्रतिजग्राहनैवासौम्रियमाणइवौषधम्॥ २७॥
कालेननोदितोदैत्योविभीषणमथाब्रवीत् ॥ मद्दत्तभोगैःपुष्टांगोमत्समीपेवसन्नपि ॥ २८ ॥ प्रतीपमाचरत्येषममैवहि
तकारिणः॥ मित्रभावेनशत्रुर्मेजातोनास्त्यत्रसंशयः ॥ २९ ॥ अनार्येणकृतघ्नेनसंगतिर्मेनयुज्यते ॥ विनाशमभिकां
क्षंतिज्ञातीनांज्ञातयःसदा ॥ ३० ॥

तांरक्षःकुलस्यकालरात्रिरूपाम् ॥ २४ ॥ हरींद्रतुल्याःमहासिंहसदृशायावन्नविनाशयंतितावत्ततःप्राक्देहीत्यन्वयः ॥ २५ ॥ सुरेंद्रैःकुबेरादिभिः देवराजः इंद्रः नमृत्योःलोकंगतोपीतिशेषः ॥ २६ ॥ २७ ॥ दैत्योरावणः मद्दत्तैर्भोगैःभोगसाधनैः ॥ २८ ॥ प्रतीपंप्रतिकूलम् ॥ २९ ॥ कृतघ्नत्वादेवानार्येण अत्रार्थांतरन्यासमाह विनाशमिति ॥ ३० ॥

योन्योनिशाचरएवंविधंवाक्यंब्रूयात्तंतस्मिन्क्षणेएववचनकथनकालएवहन्मि त्वंतुभ्रातृत्वाद्धननायोग्यइतितवधिक्कारएववधइत्याह धिगित्यादि ॥ ३१ ॥ परुषंधिगितिवचनम् ॥ ३२ ॥ रावणंप्रतिवचोब्रवीदित्यन्वयः यदब्रवीत्तदाह मेति यद्यपिप्रियवादिनमेवमाम् ॥ ३३ ॥ त्वंधिक्करोषितथापिपितुःसमोज्येष्ठो भ्रातात्वमितितवहितंब्रवीमिइतिशेषः तदाह कालइति सर्वसंहर्तेत्यर्थः ॥ ३४ ॥ कालीसर्वसंहारेसहायभूताशक्तिः ॥ ३५ ॥ तेनैवरामेणअंतर्यामित्वादिति

योन्यस्त्वेवंविधंब्रूयाद्वाक्यमेकंनिशाचरः ॥ हन्मितस्मिन्क्षणएवधिक्त्वांरक्षःकुलाधमम् ॥ ३१ ॥ रावणेनैवमुक्तःसन्परुषंसविभीषणः॥ उत्पपातसभामध्याद्गदापाणिर्महाबलः ॥३२॥ चतुर्भिर्मंत्रिभिःसार्धंगगनस्थोब्रवीद्वचः॥ क्रोधेनमहताविष्टोरावणंदशकंधरम् ॥ माविनाशमुपैहित्वंप्रियवादिनमेवमाम् ॥ ३३ ॥ धिक्करोषितथापित्वंज्येष्ठोभ्रातापितुःसमः॥ कालोराघवरूपेणजातोदशरथालये ॥ ३४ ॥ कालीसीताभिधानेनजाताजनकनंदिनी ॥ तावुभावागतावत्रभूमेर्भारापनुत्तये ॥ ३५ ॥ तेनैवप्रेरितस्त्वंतुनशृणोषिहितंमम ॥ श्रीरामःप्रकृतेःसाक्षात्परस्तात्सर्वदास्थितः॥ ३६ ॥ बहिरंतश्चभूतानांसमःसर्वत्रसंस्थितः ॥ नामरूपादिभेदेनतत्तन्मयइवामलः ॥ ३७ ॥ यथानानाप्रकारेषुवृक्षेष्वेकोमहानलः॥ तत्तदाकृतिभेदेनभिद्यतेज्ञानचक्षुषाम्॥ ३८ ॥

भावः स्वकर्तव्यनिर्वाहार्थंतवतथाप्रेरणेतितात्पर्यम् अंतर्यामित्वमेवतस्यव्युत्पादयति श्रीरामइति प्रकृतेःसाक्षाद्द्रष्टेत्यर्थः एवंचप्रकृतिकार्यद्रष्टृत्वमर्थात्सिद्धम् तत्किंप्रकृतिसंबद्धस्तथासतितद्धर्मलेपापत्तिर्हरिद्रादिसंबंधाद्वस्त्रस्येवेत्यतआह परस्तात्सर्वदेति पंकपद्मन्यायेनतद्धर्मासंबद्धः ॥ ३६ ॥ प्रकृतिद्रष्टृत्वमेवाह बहिरिति समोनतुन्यूनाधिकभावेनापिवैषम्येण यथाकर्मफलप्रदत्वादितिभावः वस्तुतस्तद्व्यतिरिक्तंनैवकिंचित्सदस्तीत्याह नामेति यत्किंचित्सत्त्वेननामादि प्रतीयतेतत्सर्वंतन्मयत्वादेवतथाप्रतीतिविषयइतिभावः ॥ ३७ ॥ एकस्यानेकरूपत्वंदृष्टांतेनसाधयति यथेति ॥ ३८ ॥

दार्ष्टांतिकेयोजयति पंचेति अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयाःपंचकोशाः आदिनाभूतादीनि तत्रान्नमयःस्थूलशरीरम् ततःक्रमेणसूक्ष्माअन्ये दृष्टांतांतरमाह नीलेति ॥ ३९ ॥ सएषःरामः स्वमायागुणाःसत्त्वादयस्तेर्बिंबितायस्मिन्निति विग्रहःतेषुप्रतिबिंबितइतिवा ॥ ४० ॥ तत्ररजोगुणप्रतिबिंबेप्रधानपुरुषावित्याह प्रधानेति प्रधानंपरिणामि पुरुषःस्वभोगापवर्गार्थंतत्प्रवर्तकइत्युभाभ्यांसृष्टिः तमोगुणप्रतिबिंबंकालइत्याहकालरूपेणेति कलनांसंहारम् अर्थात्सत्त्वगुणप्रतिबिंबतोव्यक्तमित्युच्यते सचांतर्यामितयासर्वपालकोदुर्ज्ञेयतयाचाव्यक्तमितिभावः ॥ ४१ ॥ तत्रकालरूपीसंहारप्रधानइदानींरामइत्याह

पंचकोशादिभेदेनतत्तन्मयइवाबभौ ॥ नीलपीतादियोगेननिर्मलःस्फटिकोयथा ॥ ३९ ॥ सएवनित्यमुक्तोपिस्वमायागुणबिंबितः ॥ कालःप्रधानंपुरुषोऽव्यक्तंचेतिचतुर्विधः ॥ ४० ॥ प्रधानपुरुषाभ्यांसजगत्कृत्स्नंसृजत्यजः ॥ कालरूपेणकलनांजगतःकुरुतेव्ययः ॥ ४१ ॥ कालरूपीसभगवान्रामरूपेणमायया ॥ ४२ ॥ ब्रह्मणाप्रार्थितोदेवस्त्वद्वधार्थमिहागतः ॥ तदन्यथाकथंकुर्यात्सत्यसंकल्पईश्वरः ॥ ४३ ॥ हनिष्यतित्वांरामस्तुसपुत्रबलवाहनम् ॥ हन्यमानंनशक्नोमिद्रष्टुंरामेणरावण ॥ ४४ ॥

कालेति ॥ ४२ ॥ ननुसर्वसमस्यभगवतोमद्वधेकथंप्रवृत्तिरतआह ब्रह्मणेति परिपालनानुगुण्येनदुष्टनिग्रहेपिनसमत्वहानिः कर्मानुरूपफलदातृत्वमेवतस्य समत्वम् तदननुरूपफलदानेहितस्यवैषम्यमापद्येतनचतदस्तियथानेकेषुकर्मानुरूपफलदोराजासर्वेषुसमइत्येवव्यवह्रियतेनतुविषमइतिभावः अन्यथाकारणाभावेहेतुः सत्यसंकल्पत्वम् ॥ ४३ ॥ हनिष्यतीति सत्यसंकल्पत्वादेवेतिभावः नन्वेवमवश्यंभाविनिमद्वधेतवगमनेनकिंतत्राह हन्यमानमिति हेरावणत्वांस्वामिबुद्धिविषयंस्वीयत्वबुद्धिविषयंचराक्षसकुलंहन्यमानंद्रष्टुंनशक्नोमिअतस्त्वयिराक्षसकुलेचतांबुद्धिंविहायरामेवानरेषुचोक्तबुद्धिंकृत्वाराघवंगच्छामि तथाबुद्धिकृतमेवचदुःखमितिभावः ॥ ४४ ॥

॥ ४५ ॥ विसृज्यसर्वमित्यनेनवैराग्यमुक्तम् भगवद्भजनेतस्यमुख्यांगत्वात् परिपूर्णोमनसिभावोमानसोमनोरथोयस्यसः भगवद्भजनंकार्यमितितस्यसार्वदिको मनोरथः ॥ ४६ ॥ ॥ इतिश्रीमत्सकलराजविपदुद्धरण०युद्धकांडेद्वितीयःसर्गः ॥ २ ॥ ॥ छ ॥ ॥ विभीषणइति ॥ १ ॥ तेदारहर्तूरावणस्याहमनुजोनाम्नाविभीषणइत्यन्वयः ॥ २ ॥ भ्रात्रारावणेनाहंनिरस्तःधिक्कृतः अविदितात्मनःअविदितस्वस्वरूपस्य ॥ ३ ॥ प्रेषयसत्कृत्यप्रेषयेत्यर्थः कालरूपस्यतवपाशःअंतर्यामितयाप्रेरणातदधीनतांप्राप्तः ॥ ४ ॥ अश्रवणमात्रमेवनकिंत्वधिकमपीत्याह हंतुमिति भयात्तद्भयात्संसारेएववैराग्येणतस्मादेवमोक्षायतदिच्छावान्त्वांशरणंगतइत्यन्वयः ॥ ५ ॥ ६ ॥ सीताहर्तुरनुजइतिविशेषेणविश्वासार्होनेत्यन्वयः ॥ ७ ॥

त्वांराक्षसंकुलंकृत्स्नंततोगच्छामिराघवम् ॥ मयियातेसुखीभूत्वारमस्वभवनेचिरम् ॥ ४५ ॥ विभीषणोरावणवाक्यतःक्षणाद्विसृज्यसर्वंसपरिच्छदंगृहम् ॥ जगामरामस्यपदारविंदयोःसेवाभिकांक्षीपरिपूर्णमानसः ॥ ४६ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेयुद्धकांडेद्वितीयःसर्गः ॥ २ ॥ ॥ छ ॥ ॥ विभीषणोमहाभागश्चतुर्भिर्मंत्रिभिःसह ॥ आगत्यगगनेरामसंमुखेसमवस्थितः ॥ १ ॥ उच्चैरुवाचभोस्वामिन्रामराजीवलोचन ॥ रावणस्यानुजोऽहंतेदारहर्तुर्विभीषणः ॥ २ ॥ नाम्नाभ्रात्रानिरस्तोहंत्वामेवशरणंगतः ॥ हितमुक्तंमयादेवतस्यचाविदितात्मनः ॥ ३ ॥ सीतांरामायवैदेहींप्रेषयेतिपुनःपुनः ॥ उक्तोपिनशृणोत्येषकालपाशवशंगतः ॥ ४ ॥ हंतुंमांखड्गमादायप्राद्रवद्राक्षसाधमः ॥ ततोचिरेणसचिवैश्चतुर्भिःसहितोभयात् ॥ ५ ॥ त्वामेवभवमोक्षायमुमुक्षुःशरणंगतः ॥ विभीषणवचःश्रुत्वासुग्रीवोवाक्यमब्रवीत् ॥ ६ ॥ विश्वासार्होनतेराममायावीराक्षसाधमः ॥ सीताहर्तुर्विशेषेणरावणस्यानुजोबली ॥ ७ ॥

विवरेऽन्येनयुद्धासत्त्यादिरूपेछिद्रे ॥ ८ ॥ ममैवंबुद्धिःतवबुद्ध्यांतःकरणेनकिंनिश्चितंतद्वदेत्यर्थः ॥ ९ ॥ यदीच्छामीति अनेनसत्यसंकल्पईश्वरोहमितिसूचितं
सहेश्वरान् अत्रेश्वराइंद्राद्याः ॥१०॥ अभयमितिच्छेदः ॥ ११ ॥ नन्वेवंविधेभ्योऽभयदानंनोचितमितिचेत्तत्राह सकृदेवेति तवास्मीतिप्रपन्नायअंगीकृतव
ते याचते शत्रंतं अभयमितिशेषः सर्वभूतेभ्यः सर्वप्राणिभ्यः निकृष्टायापीतिशेषः तादृशायाप्यभयंददामीतिमेव्रतं तत्रास्मैअभयादानेमेव्रतभंगःस्यादितिन

मंत्रिभिःसायुधैरस्मान्विवरेनिहनिष्यति ॥ तदाज्ञापयमेदेववानरैर्हन्यतामयम् ॥ ८ ॥ ममैवंभातितेरामबुद्ध्याकिंनि
श्चितंवद॥ श्रुत्वासुग्रीववचनंरामःसस्मितमब्रवीत् ॥ ९ ॥ यदीच्छामिकपिश्रेष्ठलोकान्सर्वान्सहेश्वरान् ॥ निमिषार्धेन
संहन्यांसृजामिनिमिषार्धतः ॥ १० ॥ अतोमयाभयंदत्तंशीघ्रमानयराक्षसम् ॥ ११ ॥ सकृदेवप्रपन्नायतवास्मीति
चयाचते॥ अभयंसर्वभूतेभ्योददाम्येतद्व्रतंमम ॥ १२ ॥ रामस्यवचनंश्रुत्वासुग्रीवोहृष्टमानसः॥ विभीषणमथानाय्य
दर्शयामासराघवम् ॥ १३ ॥ विभीषणस्तुसाष्टांगंप्रणिपत्यरघूत्तमम्॥ हर्षगद्गदयावाचाभक्त्याचपरयान्वितः॥ १४॥
रामंश्यामंविशालाक्षंप्रसन्नमुखपंकजम्॥ धनुर्बाणधरंशांतंलक्ष्मणेनसमन्वितम् ॥ १५ ॥ कृतांजलिपुटोभूत्वास्तोतुं
समुपचक्रमे ॥ १६ ॥ विभीषणउवाच ॥ नमस्तेरामराजेंद्रनमःसीतामनोरम ॥ नमस्तेचंडकोदंडनमस्तेभक्तवत्सल
॥ १७ ॥ नमोऽनंतायशांतायरामायामिततेजसे॥ सुग्रीवमित्रायचतेरघूणांपतयेनमः ॥ १८ ॥ जगदुत्पत्तिनाशानां
कारणायमहात्मने॥ त्रैलोक्यगुरवेऽनादिगृहस्थायनमोनमः ॥ १९ ॥

किंचिद्वाच्यमितिभावः ॥ १२ ॥ १३ ॥ १४ ॥ रामंश्याममित्यादिध्यानप्रकारः ॥ १५ ॥ १६ ॥ अथस्तौतिनमस्तेइति ॥ १७ ॥ १८ ॥ जगदिति यतोवा
इमानिभूतानिजायंतेयेनजातानिजीवंतियत्प्रयंत्यभिसंविशंतीतिश्रुतिबोधितजगत्स्थित्युत्पत्तिनाशकारणायेत्यर्थः त्रैलोक्यगुरवेअंतर्यामितयेतिभावः अनादि
गृहस्थायसदामायागृहिण्यास्वशक्तिरूपयायुतायेत्यर्थः ॥ १९ ॥

नदेवपुनःस्पष्टमाह त्वमादिरिति उत्पत्तिकारणस्थानमित्यर्थः निधनस्थानंलयस्थानम् एवंचोत्पत्त्यादयोपित्वद्विवर्तभूताएवनातिरिक्ताइतिसूचितम् स्वेच्छाचारत्वेननपराधीनत्वंसूचितम् ॥ २० ॥ व्याप्यव्यापकरूपेणेति यथामहामत्स्यस्याल्पमत्स्योव्याप्यः ॥ २१ ॥ हृतज्ञानास्त्वद्रूपंजगदितिज्ञानहीनाः अतएवनष्टात्मानः अतएवनष्टकंठचामीकरवत्अज्ञातंस्वस्वरूपंयेषांते अतएवविचेतसःविरुद्धेप्रवृत्तिमार्गेचेतोयेषांतेगतागतंजन्ममरणरूपंसंसारम् ॥ २२ ॥ यावदन्यविषयरहितेनज्ञानस्वरूपभवद्विषयचित्तेनभवान्नज्ञायतेतावज्जगत्सत्यंभातित्वत्स्वरूपज्ञानेतुत्वमेवसर्वरूपेणैवभासीतिज्ञानेतुभासमानस्यजगतोमिथ्यात्वंभा

त्वमादिर्जगतांरामत्वमेवस्थितिकारणम् ॥ त्वमंतेनिधनस्थानंस्वेच्छाचारस्त्वमेवहि ॥ २० ॥ चराचराणांभूतानांब
हिरंतश्चराघव ॥ व्याप्यव्यापकरूपेणभवान्भातिजगन्मयः॥ २१ ॥ त्वन्माययाहृतज्ञानानष्टात्मानोविचेतसः॥ गता
गतंप्रपद्यंतेपापपुण्यवशात्सदा ॥ २२ ॥ तावत्सत्यंजगद्भातिशुक्तिकारजतंयथा ॥ यावन्नज्ञायतेज्ञानचेतसानान्य
गामिना ॥ २३ ॥ त्वदज्ञानात्सदायुक्ताःपुत्रदारगृहादिषु ॥ रमंतेविषयान्सर्वानंतेदुःखप्रदान्विभो ॥ २४ ॥ त्वमिंद्रो
ग्निर्यमोरक्षोवरुणश्चतथानिलः॥ कुबेरश्चतथारुद्रस्त्वमेवपुरुषोत्तम ॥ २५ ॥ त्वमणोरप्यणीयांश्चस्थूलात्स्थूलतरःप्र
भो॥ त्वंपितासर्वलोकानांमाताधातात्वमेवहि॥ २६॥ आदिमध्यांतरहितःपरिपूर्णोऽच्युतोऽव्ययः॥ त्वंपाणिपादरहित
श्चक्षुःश्रोत्रविवर्जितः॥ २७॥

ति यथायावच्छुक्तिकास्वरूपेणनज्ञायतेतावत्तत्रभातरजतंसत्यमितिभातिशुक्तिकाज्ञानेतुतन्मिथ्येतिज्ञायतेतद्वत् ॥ २३ ॥ तदेवदार्ढ्यायपुनराह त्वदज्ञानादिति युक्ताःतत्रैवसत्यत्वाभिमानेनलीनचित्ताः रमंतेप्रीत्याभुंजंते अंतेवियोगेदुःखप्रदान् ॥ २४ ॥ त्वमेवसर्वरूपइत्याह त्वमिति ॥ २५ ॥ अणीयान्सर्वथादुर्ज्ञेयत्वात् स्थूलतरःविभुत्वात् मातापितृवत्सर्वत्रसमःपालनेइत्याह त्वंपितेत्यादि ॥ २६ ॥ अच्युतःकयापिशक्त्याच्युतोहीनोन अनेनसर्वशक्तिमत्त्वम् अव्ययःव्ययोत्रवृद्ध्यपक्षयस्तद्रहितः त्वंपाणीति अपाणिपादोजवनोग्रहीतेतिश्रुतेः ॥ २७ ॥

विपरीतक्रमेणश्रोतेत्याद्युक्तिः कोशेभ्यःअन्नमयप्राणमयमनोमयविज्ञानमयानंदमयेभ्यःपंचकोशेभ्योव्यतिरिक्तस्तद्दोषास्पृष्टः निर्गुणःस्वतोनिर्गुणइत्यर्थः मायासंबंधात्तुगुणवानिव निरुपाश्रयःआधारांतररहितः ॥ २८ ॥ निर्विकल्पःवस्तुतोनिर्धर्मकत्वान्निर्विकल्पकज्ञानस्यैवविषयोनसविकल्पकस्येतिभावः अतएवनिराकारः त्वत्पूज्यस्येश्वरांतरस्याभावान्निरीश्वरः उक्तंनिर्विकारत्वंविवृणोति षड्भावरहितइति जायतेस्तिविपरिणमतेवर्धतेऽपक्षीयतेनश्यतीतिनिरुक्तोक्तषड्भावविकारहीनः अतएवानादिः जगत्तुत्वद्विवर्तएवेतिभावः प्रकृतिसंबंधादपितेनविकारइत्याह प्रकृतेःपरःतद्दोषगुणासंस्पृष्टइत्यर्थः ॥ २९ ॥ नन्वीदृशस्य

श्रोताद्रष्टाग्रहीताचजवनस्त्वंखरांतकः ॥ कोशेभ्योव्यतिरिक्तस्त्वंनिर्गुणोनिरुपाश्रयः ॥ २८ ॥ निर्विकल्पोनिर्विकारो
निराकारोनिरीश्वरः ॥ षड्भावरहितोनादिःपुरुषःप्रकृतेःपरः ॥ २९ ॥ माययागृह्यमाणस्त्वंमनुष्यइवभाव्यसे ॥ ज्ञात्वा
त्वांनिर्गुणमजंवैष्णवामोक्षगामिनः ॥ ३० ॥ अहंत्वत्पादसद्भक्तिनिःश्रेणींप्राप्यराघव ॥ इच्छामिज्ञानयोगाख्यंसौ
धमारोढुमीश्वर ॥ ३१ ॥ नमःसीतापतेरामनमःकारुणिकोत्तम ॥ रावणारेनमस्तुभ्यंत्राहिमांभवसागरात् ॥ ३२ ॥
ततःप्रसन्नःप्रोवाचश्रीरामोभक्तवत्सलः ॥ वरंवृणीष्वभद्रंतेवांछितंवरदोस्म्यहम् ॥ ३३ ॥ विभीषणउवाच ॥ धन्योऽ
स्मिकृतकृत्योऽस्मिकृतकार्योऽस्मिराघव ॥ त्वत्पाददर्शनादेवविमुक्तोऽस्मिनसंशयः ॥ ३४ ॥

ममग्रहणंकुतस्तत्राह माययेति इदंत्वद्दर्शनंमायैव तदेवाह मनुष्यइवेति एवंमायिकस्यास्यतवरूपस्यज्ञानान्नमुक्तिःकिंतुपूर्वोक्तरूपज्ञानादेवेत्याह ज्ञात्वेति तज्ज्ञानकारणंचात्रमायिकेतवरूपेभक्तिरित्येतज्ज्ञानमपिपरंपरयातदुपयोगीतिभावः ॥ ३० ॥ तदेवाहाहमिति भक्तिरूपांनिःश्रेणींप्राप्यज्ञानयोगाख्यंसौधं पूर्वोक्तज्ञानयोगाख्यंसौधम् ॥ ३१ ॥ सर्वविधभक्त्यपेक्षयानतिरूपाभक्तिरेवमुख्येतिध्वनयन्नाहन मइति ॥ ३२ ॥ वांछितंवरंवृणीष्वयतोहंवरदोस्मीत्यन्वयः ॥ ३३ ॥ कृतकृत्यत्वम् सर्वधर्मजनककर्मकृतत्वंअतएवधन्यत्वम् भगवद्दर्शनस्यसर्वधर्मरूपत्वमितिभावः कृतकार्यत्वंचधातूनामनेकार्थत्वात्प्राप्तसकलप्राप्यत्वम् प्राप्यंचसकलधर्मफलम् तदेवाह त्वत्पादेति मुक्तिर्हिसर्वपुण्यफलम् ॥ ३४ ॥

तदेवाह नास्तीति ॥ ३५ ॥ कर्मकृतोबंधःसंसारस्तन्नाशफलंभक्तिलक्षणंकरणंयस्यतादृशंत्वद्विषयज्ञानंदेहि एवंफलंसंप्रार्थ्यतस्यकारणंविनासंभवात्त
त्कारणीभूतांभक्तिंप्रार्थयते त्वद्ध्यानमिति एतदेवमुख्याभक्तिरित्यर्थः परमार्थंपरमउत्कृष्टोमोक्षार्थःप्रयोजनंपरंपरयायस्य ॥ ३६ ॥ तदेवपुनराह नया

नास्तिमत्सदृशोधन्योनास्तिमत्सदृशःशुचिः ॥ नास्तिमत्सदृशोलोकेरामत्वन्मूर्तिदर्शनात् ॥ ३५ ॥ कर्मबंधविनाशाय
त्वज्ज्ञानंभक्तिलक्षणम् ॥ त्वद्ध्यानंपरमार्थंचदेहिमेरघुनंदन ॥ ३६ ॥ नयाचेरामराजेंद्रसुखंविषयसंभवम् ॥ त्वत्पाद्
कमलेसक्ताभक्तिरेवसदास्तुमे ॥ ३७ ॥ ओमित्युक्त्वापुनःप्रीतोरामःप्रोवाचराक्षसम् ॥ शृणुवक्ष्यामितेभद्ररहस्यंम
मनिश्चितम् ॥ ३८ ॥ मद्भक्तानांप्रशांतानांयोगिनांवीतरागिणाम् ॥ हृदयेसीतयानित्यंवसाम्यत्रनसंशयः ॥ ३९ ॥
तस्मात्त्वंसर्वदाशांतःसर्वकल्मषवर्जितः ॥ मांध्यात्वामोक्ष्यसेनित्यंघोरसंसारसागरात् ॥ ४० ॥ स्तोत्रमेतत्पठेद्यस्तुलि
खेद्यःशृणुयादपि ॥ मत्प्रीतयेममाभीष्टंसारूप्यंसमवाप्नुयात् ॥ ४१ ॥ इत्युक्त्वालक्ष्मणंप्राहश्रीरामोभक्तभक्तिमान् ॥
पश्यत्विदानीमेवैषममसंदर्शनेफलम् ॥ ४२ ॥ लंकाराज्येऽभिषेक्ष्यामिजलमानयसागरात् ॥ यावच्चंद्रश्चसूर्यश्चयाव
त्तिष्ठतिमेदिनी ॥ ४३ ॥ यावन्ममकथालोकेतावद्राज्यंकरोत्वसौ ॥ इत्युक्त्वालक्ष्मणेनांबुह्यानाय्यकलशेनतम् ॥ ४४ ॥
लंकाराज्याधिपत्यार्थमभिषेकंरमापतिः ॥ कारयामाससचिवैर्लक्ष्मणेनविशेषतः ॥ ४५ ॥ साधुसाध्वितितेसर्वेवान
रास्तुष्टुवुर्भृशम् ॥ सुग्रीवोऽपिपरिष्वज्यविभीषणमथाब्रवीत् ॥ ४६ ॥

चेइति ॥ ३७ ॥ ३८ ॥ मद्भक्तानामिति सर्वथातवध्यानविषयोभवामीतिभावः ॥ ३९ ॥ शांतःजितेंद्रियःअतएवसर्वपापहीनः ॥ ४० ॥ ४१ ॥ ममसंदर्शनेफ
लंतज्जन्यंफलंमोक्षरूपंकालांतरभवंतिष्ठतु इदानींसांप्रतमेवैहिकंपश्यतु ॥ ४२ ॥ ४३ ॥ ४४ ॥ सचिवैश्चतुर्भिर्विभीषणसचिवैः ॥ ४५ ॥ ४६ ॥

मुख्यत्वहेतुर्भक्त्यारामपरिग्रहात् ॥ ४७ ॥ परमात्मत्वेनसहायानपेक्षतासूचिता अमाययाअच्छलेन ॥ ४८ ॥ दशग्रीवेणेति अस्यांबरेइत्यादि ॥ ४९ ॥ भ्रातरं वालिनाभ्रातृत्वव्यवहारस्यमैत्रीकरणोत्तरंकृतत्वेनतद्भ्रातृत्वाद्भ्रातृसदृशंत्वामित्यन्वयः वनचारिणांवानराणाम् ॥ ५० ॥ अर्थविप्लवोमत्कृतोऽर्थनाशःअहंयद्रा

विभीषणवयंसर्वेरामस्यपरमात्मनः ॥ किंकरास्तत्रमुख्यस्त्वंभक्त्यारामपरिग्रहात् ॥ ४७ ॥ रावणस्यविनाशेत्वंसाहाय्यंकर्तुमर्हसि ॥ विभीषणउवाच ॥ अहंकियान्सहायत्वेरामस्यपरमात्मनः ॥ किंतुदास्यंकरिष्येहंभक्त्याशक्त्यात्वमायया ॥ ४८ ॥ दशग्रीवेणसंदिष्टःशुकोनाममहासुरः ॥ संस्थितोऽस्यंबरेवाक्यंसुग्रीवमिदमब्रवीत् ॥ ४९ ॥ त्वामाहरावणोराजाभ्रातरंराक्षसाधिपः ॥ महाकुलप्रसूतस्त्वंराजासिवनचारिणाम् ॥ ५० ॥ ममभ्रातृसमानस्त्वंतवनास्त्यर्थविप्लवः ॥ अहंयदहरंभार्यांराजपुत्रस्यकिंतव ॥ ५१ ॥ किष्किंधांयाहिहरिभिर्लंकाशक्यानदैवतैः ॥ प्राप्तुंकिंमानवैरल्पसत्त्वैर्वानरयूथपैः ॥ ५२ ॥ तंप्रापयंतंवचनंतूर्णमुत्प्लुत्यवानराः ॥ प्रापद्यंततदाक्षिप्रंनिहंतुंदृढमुष्टिभिः ॥ ५३ ॥ वानरैर्हन्यमानस्तुशुकोराममथाब्रवीत् ॥ नदूतान्घ्नंतिराजेंद्रवानरान्वारयप्रभो ॥ ५४ ॥ रामःश्रुत्वातदावाक्यंशुकस्यपरिदेवितम् ॥ मावधिष्टेतिरामस्तान्वारयामासवानरान् ॥ ५५ ॥ पुनरंबरमासाद्यशुकःसुग्रीवमब्रवीत् ॥ ब्रूहिराजन्दशग्रीवंकिंवक्ष्यामिव्रजाम्यहम् ॥ ५६ ॥ सुग्रीवउवाच ॥ यथावालीममभ्रातातथात्वंराक्षसाधम ॥ हंतव्यस्त्वंमयायत्नात्सपुत्रबलवाहनः ॥ ५७ ॥

जपुत्रस्यभार्यामहरंतत्रतवकिंदुःखमितिशेषः ॥ ५१ ॥ दैवतैःदैवतैरपि ॥ ५२ ॥ निहंतुंप्रापद्यंतप्रपन्नाःकृतारंभाइत्यर्थः ॥ ५३ ॥ घ्नंतिराजानइतिशेषः ॥ ५४ ॥ ॥ ५५ ॥ ५६ ॥ यथावालीतिव्यंग्योक्तिः यथाजायापहारित्वात्समेवध्यस्तथात्वामिभार्यापहारित्वात्त्वमपिवध्यइतिभावः ॥ ५७ ॥

मेस्वामिनःश्रीरामचंद्रस्यभार्यांहृत्वाक्वयास्यसीतिब्रूहीत्यन्वयः शुकमन्वरक्षयत् वानरैःसुग्रीवइतिशेषः अयमत्राशयः शुकवचनात्सुग्रीवस्यभेदायोग्यत्वंनिर्णीय विशकलितंस्थितेषुवानरेषुस्वनगरघातस्यैतैरशक्यत्वंसमुद्रव्यवधानान्निर्णीयघातादिमाकरोत्विति ॥ ५८ ॥ शार्दूलोदर्शनमात्रेनियुक्तोनतुसुग्रीवभेदनेइति तस्याग्रहणम् ॥ ५९ ॥ कपिबलस्यातिमहत्त्वश्रवणमात्रेणदीर्घचिंतापरत्वंरावणस्येत्यनेनशौर्यहानिःसूचिता॥ ६० ॥ उपागतंस्वतटंप्राप्तम् अनभिनंदनेचिह्न

ब्रूहिमेरामचंद्रस्यभार्यांहृत्वाक्वयास्यसि॥ ततोरामाज्ञयाधृत्वाशुकंबध्वान्वरक्षयत् ॥५८॥ शार्दूलोपिततःपूर्वंदृष्ट्वाकपिबलंमहत् ॥ यथावत्कथयामासरावणायसराक्षसः ॥ ५९ ॥ दीर्घचिंतापरोभूत्वानिःश्वसन्नासमंदिरे ॥ ततःसमुद्रमावेक्ष्यरामोरक्तांतलोचनः॥६०॥ पश्यलक्ष्मणदुष्टोसौवारिधिर्मामुपागतम्॥ नाभिनंदतिदुष्टात्मादर्शनार्थममानघ ॥ ६१ ॥ जानातिमानुषोयंमेकिंकरिष्यतिवानरैः॥ अद्यपश्यमहाबाहोशोषयिष्यामिवारिधिम् ॥ ६२ ॥ पादेनैवगमिष्यंतिवानराविगतज्वराः॥ इत्युक्त्वाक्रोधताम्राक्षआरोपितधनुर्धरः ॥६३॥ तूणीराद्बाणमादायकालाग्निसदृशप्रभम्॥ संधायचापमाकृष्यरामोवाक्यमथाब्रवीत् ॥ ६४ ॥ पश्यंतुसर्वभूतानिरामस्यशरविक्रमम् ॥ इदानींभस्मसात्कुर्यांसमुद्रंसरितांपतिम् ॥ ६५ ॥ एवंब्रुवतिरामेतुसशैलवनकानना॥ चचालवसुधाद्यौश्चदिशश्चतमसावृताः ॥ ६६ ॥ चुक्षुभेसागरोवेलांभयाद्योजनमत्यगात् ॥ तिमिनक्रझषामीनाःप्रतप्ताःपरितत्रसुः ॥ ६७ ॥

माह दर्शनार्थमिति नायातीतिशेषः ॥ ६१ ॥ ६२ ॥ आरोपितेति अरोपितज्यंधनुर्धरतीत्यर्थः ॥ ६३ ॥ कालाग्नीतिकालाग्नितुल्यकांतिंसंधायधनुषियोजयित्वेत्यर्थः ॥ ६४ ॥ भस्मसात्कुर्यांभस्मसात्करोमीत्यर्थः ॥ ६५ ॥ तमसावृताआसन्नितिशेषः ॥ ६६ ॥ सागरक्षोभमेवाह योजनंवेलामत्यगात्अतिक्रांतः वेलामारभ्ययोजनपर्यंतंसजलोदेशःशुष्कोजातइत्यर्थः प्रतप्ताःजलौष्ण्यवशात् ॥ ६७ ॥

॥ ६८ ॥ उपायनंरत्नानिपादयोःक्षिप्त्वा ॥ ६९ ॥ प्रणिपत्यचराममाहइत्यन्वयः ॥ ७० ॥ स्वस्यशीघ्रमनागमनेहेतुमाह जडइति जडःतमआच्छादितज्ञानः
एवंचत्वत्स्रष्टस्वभावेनजडत्वेनमदनागमनमितिनमेदोषइतिभावः ॥ ७१ ॥ ननुतवजडत्वंकुतइतिचेत्तत्राह स्थूलानीति स्वभावतोजडान्येवभवतास्रष्टानि ताम
साहंकारतस्त्वयातत्स्रष्टेरितिभावः अतस्त्वदाज्ञारूपंजडत्वंनलंघयंतिनत्यजंतीतितेष्वापोरूपंभूतमहमितिभावः ॥७२॥ तदेवाह तामसादिति अहमःअहंकारात्

एतस्मिन्नंतरेसाक्षात्सागरोदिव्यरूपधृक् ॥ दिव्याभरणसंपन्नःस्वभासाभासयन्दिशः ॥ ६८॥ स्वांतस्थदिव्यरत्नानि
कराभ्यांपरिगृह्यसः॥ पादयोःपुरतःक्षिप्त्वारामस्योपायनंबहु ॥ ६९ ॥ दंडवत्प्रणिपत्याहरामंरक्तांतलोचनम्॥ त्राहि
त्राहिजगन्नाथरामत्रैलोक्यरक्षक ॥ ७० ॥ जडोहंरामतेस्रष्टःसृजतानिखिलंजगत्॥ स्वभावमन्यथाकर्तुंकःशक्तोदेव
निर्मितम् ॥ ७१ ॥ स्थूलानिपंचभूतानिजडान्येवस्वभावतः ॥ स्रष्टानिभवतैतानित्वदाज्ञांलंघयंतिन ॥ ७२ ॥ ताम
सादहमोरामभूतानिप्रभवंतिहि ॥ कारणानुगमात्तेषांजडत्वंतामसंस्वतः ॥ ७३ ॥ निर्गुणस्त्वंनिराकारोयदामायागु
णान्प्रभो॥ लीलयांगीकरोषित्वंतदावैराजनामवान् ॥ ७४॥ गुणात्मनोविराजश्चसत्त्वाद्देवाबभूविरे॥ रजोगुणात्प्रजे
शाद्यामन्योर्भूतपतिस्तव ॥ ७५ ॥ त्वामहंमाययाछन्नंलीलयामानुषाकृतिम् ॥ ७६ ॥

कारणगुणाहिकार्यगुणानारभंतइतिभावः ॥ ७३ ॥ ननुनिर्गुणस्यममकथंभूतस्रष्टृत्वमतआह निर्गुणइति निर्गुणोनिराकारोऽपिलीलयायदामायागुणानंगीकरो
षितदास्रष्टृत्वाद्वैराजनामा स्वार्थेऽण् ॥ ७४ ॥ तत्रकस्माद्गुणात्कस्यसृष्टिस्तत्राह गुणात्मनोविराजइति देवाअत्रसनकादयः प्रजेशामन्वाद्याइंद्राद्याश्च मन्यो
स्तमसः भूतपतिःसंहर्तारुद्रः ॥ ७५ ॥ माययाच्छन्नंछन्नात्मस्वरूपम् तदेवाह लीलयेति ॥ ७६ ॥

जडबुद्धिस्तमोवृतत्वात् जडःस्वरूपेणापिजलरूपत्वात् अतएवमूर्खःत्वांनिर्गुणंसर्वनियंतृपरमेश्वरत्वेनकथंजानामीत्यर्थः इदानींतुत्वत्कृतदंडात्त्वत्स्वरूपंज्ञा
तमितिवदन्अर्थांतरन्यासमाह दंडएवेति ॥ ७७ ॥ भूतानांप्राणिनाम् ॥ ७८ ॥ अमोघमनिष्फलंयथाभवतितथापातिनः ॥ ७९ ॥ ८० ॥ हेराम उत्तरप्रदे

जडबुद्धिर्जडोमूर्खःकथंजानामिनिर्गुणम् ॥ दंडएवहिमूर्खाणांसन्मार्गप्रापकःप्रभो ॥ ७७ ॥ भूतानाममरश्रेष्ठपशूनां
लगुडोयथा ॥ शरणंतेव्रजामीशशरण्यंभक्तवत्सल ॥ अभयंदेहिमेरामलंकामार्गंददामिते ॥ ७८ ॥ रामउवाच ॥ अ
मोघोयंमहाबाणःकस्मिन्देशेनिपात्यताम् ॥ लक्षंदर्शयमेशीघ्रंबाणस्यामोघपातिनः ॥ ७९ ॥ रामस्यवचनंश्रुत्वाकरेदृ
ष्ट्वामहाशरम् ॥ महोदधिर्महातेजाराघवंवाक्यमब्रवीत् ॥ ८० ॥ रामोत्तरप्रदेशेतुद्रुमकुल्यइतिश्रुतः ॥ प्रदेशस्तत्रबह
वःपापात्मानोदिवानिशम् ॥ ८१ ॥ बाधंतेमांरघुश्रेष्ठतत्रतेपात्यतांशरः ॥ रामेणसृष्टोबाणस्तुक्षणादाभीरमंडलम्
॥ ८२ ॥ हत्वापुनःसमागत्यतूणीरेपूर्ववत्स्थितः ॥ ततोब्रवीद्रघुश्रेष्ठंसागरोविनयान्वितः ॥ ८३ ॥ नलःसेतुंकरोत्व
स्मिन्जलेमेविश्वकर्मणः ॥ सुतोधीमान्समर्थोऽस्मिन्कार्येलब्धवरोहरिः ॥ ८४ ॥ कीर्तिंजानंतुतेलोकाःसर्वलोकम
लापहाम् ॥ इत्युक्त्वाराघवंनत्वाययौसिंधुरदृश्यताम् ॥ ८५ ॥ ततोरामस्तुसुग्रीवलक्ष्मणाभ्यांसमन्वितः ॥ नलमाज्ञाप
यच्छीघ्रंबानरैःसेतुबंधने ॥ ८६ ॥

शेद्रुमकुल्यस्तदाख्यः ॥ ८१ ॥ तत्रतेषुपापात्मसु ॥ ८२ ॥ ८३ ॥ ब्रह्मणोलब्धवरत्वात् अस्मिन्कार्येसेतुबंधनकार्ये ॥ ८४ ॥ कीर्तिंसेतुबंधनकृतां याकी
र्तिःसेवात्मिकादृष्टासतीसर्वलोकपापहर्त्री ॥ ८५ ॥ वानरैःसहेतिशेषः ॥ ८६ ॥

पर्वतपादपैःपर्वतैःपादपैश्च ॥ ८७ ॥ ॥ इतिश्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादि० युद्धकांडेतृतीयःसर्गः ॥ ३ ॥ ॥ ४ ॥ ॥ सेतुमितिनिर्वि
घ्नत्वार्थंद्रष्टॄणांपुण्यार्थंच तदेवाह लोकहितायचेति ॥ १ ॥ तदेवस्पष्टयति प्रणमेदिति ॥ २ ॥ संकल्पनियतःसंकल्पपूर्वमित्यर्थः मध्येकार्यांतरमकुर्वन्निति

ततोतिहृष्टःप्लवगेंद्रयूथपैर्महानगेंद्रप्रतिमैर्युतोनलः ॥ बबंधसेतुंशतयोजनायतंसुविस्तृतंपर्वतपादपैर्दृढम् ॥ ८७ ॥ इ
तिश्रीमदध्यात्मरामायणेउमाहेश्वरसंवादेयुद्धकांडेतृतीयःसर्गः ॥ ३ ॥ ॥४॥ ॥ सेतुमारभमाणस्तुतत्ररामेश्वरं
शिवम् ॥ संस्थाप्यपूजयित्वाहरामोलोकहितायच ॥ १ ॥ प्रणमेत्सेतुबंधंयोदृष्ट्वारामेश्वरंशिवम् ॥ ब्रह्महत्यादिपापे
भ्योमुच्यतेमदनुग्रहात् ॥ २ ॥ सेतुबंधेनरःस्नात्वादृष्ट्वारामेश्वरंहरम् ॥ संकल्पनियतोभूत्वागत्वावाराणसींनरः ॥३॥ आ
नीयगंगासलिलंरामेशमभिषिच्यच ॥ समुद्रेक्षिप्ततद्भारोब्रह्मप्राप्नोत्यसंशयम् ॥ ४ ॥ कृतानिप्रथमेनाह्नायोजनानि
चतुर्दश ॥ द्वितीयेनतथाचाह्नायोजनानितुविंशतिः ॥ ५ ॥ तृतीयेनतथाचाह्नायोजनान्येकविंशतिः ॥ चतुर्थेनतथा
चाह्नाद्वाविंशतिरितिश्रुतम् ॥ ६ ॥ पंचमेनत्रयोविंशद्योजनानिसमंततः ॥ बबंधसागरेसेतुंनलोवानरसत्तमः ॥ ७ ॥ ते
नैवजग्मुःकपयोयोजनानांशतंद्रुतम् ॥ असंख्याताःसुवेलाद्रिंरुरुधुःप्लवगोत्तमाः ॥ ८ ॥ आरुह्यमारुतिंरामोलक्ष्म
णोप्यंगदंतथा ॥ दिदृक्षूराघवोलंकामारुरोहाचलंमहत् ॥ ९ ॥ दृष्ट्वालंकांसुविस्तीर्णांनानाचित्रध्वजाकुलाम् ॥ चित्र
प्रासादसंबाधांस्वर्णप्राकारतोरणाम् ॥ १० ॥ परिखाभिःशतघ्नीभिःसंक्रमैश्चविराजिताम् ॥ प्रासादोपरिविस्तीर्णप्रदे
शेदशकंधरः ॥ ११ ॥

यावत् ॥ ३ ॥ क्षिप्ततद्भारःजलानयनपात्रादिभारः ॥ ४ ॥ चतुर्दशयोजनानिसेतुयुक्तानिकृतानि ॥ ५ ॥ ६ ॥ त्रयोविंशदितित्रयोविंशतिरित्यर्थेआर्षं बबंध
एवंक्रमेण बबंधेत्यर्थः ॥ ७ ॥ ८ ॥ महदिति क्लीबत्वमार्षम् ॥ ९ ॥ तोरणंपुरद्वारम् ॥ १० ॥ ११ ॥

॥ १२ ॥ १३ ॥ हेशुकत्वंपरैःपीडितःकिम् ॥ १४ ॥ शुकउवाचतेतववचनंअब्रुवम् सुग्रीवंप्रतीतिशेषः ॥ १५ ॥ मुष्टिभिर्हंतुंनखदंतैर्लोप्तुंछेत्तुंहेराममांरक्षेति

मंत्रिभिःसहितोवीरैःकिरीटदशकोज्वलः॥ नीलाद्रिशिखराकारःकालमेघसमप्रभः ॥ १२॥ रक्तदंडैःसितच्छत्रैरनेकैः
परिशोभितः॥ एतस्मिन्नंतरेबद्धोमुक्तोरामेणवैशुकः ॥ १३ ॥ वानरैस्ताडितःसम्यक्दशाननमुपागतः॥ प्रहसन्राव
णःप्राहपीडितःकिंपरैःशुक ॥ १४ ॥ रावणस्यवचःश्रुत्वाशुकोवचनमब्रवीत्॥ सागरस्योत्तरेतीरेऽब्रुवंतेवचनंयथा ॥
ततउत्प्लुत्यकपयोगृहीत्वामांक्षणात्ततः ॥ १५ ॥ मुष्टिभिर्नखदंतैश्चहंतुंलोप्तुंप्रचक्रमुः ॥ ततोमांरामरक्षेतिक्रोशंतंरघुपुं
गवः ॥ १६ ॥ विसृज्यतामितिप्राहविसृष्टोहंकपीश्वरैः ॥ ततोहमागतोभीत्यादृष्ट्वातद्वानरंबलम् ॥ १७ ॥ राक्षसानां
बलौघस्यवानरेंद्रबलस्यच॥ नैतयोर्विद्यतेसंधिर्देवदानवयोरिव॥ १८ ॥ पुरप्राकारमायांतिक्षिप्रमेकतरंकुरु॥ सीतां
वास्मैप्रयच्छाशुयुद्धंवादीयतांप्रभो ॥ १९ ॥ मामाहरामस्त्वंब्रूहिरावणंमद्वचःशुक॥ यद्बलंचसमाश्रित्यसीतांमेहृतवा
नसि ॥ २० ॥ तद्दर्शययथाकामंससैन्यःसहबांधवः ॥ श्वःकालेनगरींलंकांसप्राकारांसतोरणाम् ॥ २१ ॥ राक्षसंच
बलंपश्यशरैर्विध्वंसितंमया ॥ घोररोषमहंमोक्ष्येबलंधारयरावण ॥ २२ ॥ इत्युक्त्वोपररामाथरामःकमललोचनः ॥
एकस्थानगतायत्रचत्वारःपुरुषर्षभाः ॥ २३ ॥ श्रीरामोलक्ष्मणश्चैवसुग्रीवश्चविभीषणः ॥ एतएवसमर्थास्तेलंकांना
शयितुंप्रभो ॥२४ ॥

क्रोशंतंमांदृष्ट्वाअयंविसृज्यतामितिवानरान्प्राह ॥१६॥१७॥ त्वदुक्तसंधिभेदादिअसंभावितमित्याह राक्षसानामिति ॥ १८ ॥ आयांतिवानराइतिशेषः ॥१९॥
॥ २० ॥ श्वःकालेश्वःप्रातःकालइत्यर्थः नगरींलंकामित्यत्रशरैर्विध्वंसितामितिविभक्तिविपरिणामेनान्वयः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥

लंकानाशस्यप्रकारविशेषमाह उत्पाट्यभस्मीकरणेइति पुनर्विचार्यएकोरामएवतन्नाशेऽलमित्याह तस्येति ॥ २५ ॥ प्रपूरिताम् प्रकर्षेणपूरितालंकाययाताम्
यद्वारामतेजसापूरिताम् ॥ २६ ॥ २७ ॥ २८ ॥ अग्निनंदनःअग्निपुत्रः अथांगदंदर्शयति एषइति ॥ २९ ॥ लांगूलंस्फोटयतिभुव्याहंति ॥ ३० ॥ हनूमंतंद

उत्पाट्यभस्मीकरणेसर्वेतिष्ठंतुवानराः ॥ तस्ययादृग्बलंदृष्टंरूपंप्रहरणानिच ॥ २५ ॥ वधिष्यतिपुरंसर्वमेकस्तिष्ठंतुते
त्रयः ॥ पश्यवानरसेनांतामसंख्यातांप्रपूरिताम् ॥२६॥ गर्जंतिवानरास्तत्रपश्यपर्वतसन्निभाः ॥ नशक्यास्तेगणयितुं
प्राधान्येनब्रवीमिते ॥ २७ ॥ एषयोभिमुखोलंकांनदंस्तिष्ठतिवानरः॥ यूथपानांसहस्राणांशतेनपरिवारितः ॥ २८ ॥
सुग्रीवसेनाधिपतिर्नीलोनामाग्निनंदनः॥ एषपर्वतशृंगाभःपद्मकिंजल्कसन्निभः ॥ २९ ॥ स्फोटयत्यभिसंरब्धोलांगू
लंचपुनःपुनः ॥ युवराजोंगदोनामवालिपुत्रोतिवीर्यवान् ॥ ३० ॥ येनदृष्टाजनकजारामस्यातीववल्लभा ॥ हनूमानेष
विख्यातोहतोयेनतवात्मजः ॥ ३१ ॥ श्वेतोरजतसंकाशोमहाबुद्धिपराक्रमः ॥ तूर्णंसुग्रीवमागम्यपुनर्गच्छतिवानरः
॥ ३२ ॥ यस्त्वेषसिंहसंकाशःपश्यत्यतुलविक्रमः ॥ रंभोनाममहासत्त्वोलंकांनाशयितुंक्षमः ॥ ३३ ॥ एषपश्यतिवैलं
कांदिधक्षन्निववानरः॥शरभोनामराजेंद्रकोटियूथपनायकः ॥ ३४ ॥ पनसश्चमहावीर्योमैंदश्चद्विविदस्तथा॥ नलश्च
सेतुकर्तासौविश्वकर्मसुतोबली ॥ ३५ ॥ वानराणांवर्णनेवासंख्यानेवाकईश्वरः ॥ शूराःसर्वेमहाकायाःसर्वेयुद्धा
भिकांक्षिणः ॥ ३६ ॥

र्शयति येनेति ॥ ३१ ॥ श्वेतःनाम्नायःसुग्रीवसमीपमागम्यपुनर्गच्छतिसश्वेतनामा ॥ ३२ ॥ रंभाख्यंदर्शयति यस्त्विति ॥ ३३ ॥ शरभंदर्शयति एषइति
॥ ३४ ॥ अथपनसादीन्दर्शयति ॥ ३५ ॥ वर्णनेगुणकथने संख्यानेगणने ॥ ३६ ॥

रक्षोगणसहितांलंकामित्यर्थः बलसंख्यानंयोद्धृगणनम् ॥ ३७ ॥ एषांनीलांगदहनूमच्छ्वेतरंभशरभपनसमैंदद्विविदानांदशानाम् नवपंचसप्तएकविंशतिरित्यर्थः ॥ ३८ ॥ ३९ ॥ जगदात्मिकाजगत्स्वरूपामायास्वरूपंदृश्यंजगदेवसूक्ष्मरूपेणेत्याशयः ॥ ४० ॥ समुत्पन्नंस्थूलरूपेणेत्यर्थः जगतस्तस्थुषश्चस्थावरजंगमात्मकस्यसंसारस्य तौसीतारामौ ॥ ४१ ॥ पितरौमातापितरौ तयोर्वैरीतद्वैरवान्कथंभवेत् कथंजीवेदित्यर्थः जगन्मातैवेत्यनेनार्थात्त्वापिमातेतिव्यंग्यम्

शक्ताःसर्वेचूर्णयितुंलंकांरक्षोगणैःसह ॥ एतेषांबलसंख्यानंप्रत्येकंवच्मितेशृणु ॥ ३७ ॥ एषांकोटिसहस्राणिनवपंचच सप्तच ॥ तथाशंखसहस्राणितथार्बुदशतानिच ॥ ३८ ॥ सुग्रीवसचिवानांतिबलमेतत्प्रकीर्तितम् ॥ अन्येषांतुबलंनाहं वक्तुंशक्तोऽस्मिरावण ॥ ३९ ॥ रामोनमानुषःसाक्षादादिनारायणःपरः ॥ सीतासाक्षाज्जगद्धेतुश्चिच्छक्तिर्जगदात्मिका ॥ ४० ॥ ताभ्यामेवसमुत्पन्नंजगत्स्थावरजंगमम् ॥ तस्माद्रामश्चसीताचजगतस्तस्थुषश्चतौ ॥ ४१ ॥ पितरौपृथिवीपालतयोर्वैरीकथंभवेत् ॥ अजानतात्वयानीताजगन्मातैवजानकी ॥ ४२ ॥ क्षणनाशिनिसंसारेशरीरेक्षणभंगुरे ॥ पंचभूतात्मकेराजंश्चतुर्विंशतितत्त्वके ॥ ४३ ॥ मलमांसास्थिदुर्गंधभूयिष्ठेऽहंकृतालये ॥ कैवास्थाव्यतिरिक्तस्यकायेतवजडात्मके ॥ ४४ ॥ यत्कृतेब्रह्महत्यादिपातकानिकृतानिते ॥ भोगभोक्तातुयोदेहःसदेहोत्रपतिष्यति ॥ ४५ ॥ पुण्यपापेसमायातोजीवेनसुखदुःखयोः ॥ कारणेदेहयोगादिनात्मनःकुरुतोनिशम् ॥ ४६ ॥

॥ ४२ ॥ क्षणनाशित्वेनात्यंतास्थिरत्वबोधनम् तत्रहेतुः पंचभूतात्मकेइति पंचविंशतितत्त्वकेतदात्मकेबुद्ध्याहंकारैकादशेंद्रियपंचभूततद्गुणरूपादिपंचकात्मकत्वात् विकारद्वाराचप्रकृतेरप्यत्रानुगमइतिचतुर्विंशतितत्त्वात्मकत्वम् ॥ ४३ ॥ अहंकृतालयेअहंकारस्यालयेस्थानभूते तेभ्यश्चतुर्विंशतिभ्योभिन्नस्यचेतनस्यजडात्मकेदेहेकैवास्था ॥ ४४ ॥यस्यदेहस्यकृतेतत्पोषणादिनिमित्तम् योदेहःस्थूलः ॥ ४५ ॥ सुखदुःखयोःकारणेपुण्यपापे जीवेनसहसमायातः समायास्यतइत्यर्थेआर्षंतत् तेचपुण्यपापेदेहयोगादिनाआत्मनःसुखदुःखेकुरुतोनतुस्वतस्तेआत्मनइत्यर्थः ॥४६ ॥

देहयोगःकीदृशस्तत्राह यावदिति अध्यासादहंकारतादात्म्याध्यासात् उक्तरीत्यायावदवशोहंकुरुतइत्यर्थः एतेनज्ञानिनोदेहसंबंधोपिदुःखाद्यभावाद्देहयोगे नैवदुःखमित्ययुक्तमित्यपास्तम् उक्ताध्यासरूपस्यैवयोगस्यविवक्षितत्वात् ॥ ४७ ॥ उपसंहरति तस्मादिति ॥ ४८ ॥ स्वाज्ञानंस्वस्वरूपस्यशुद्धत्वादेर्यदज्ञानं तद्वशतोबंधंशरीरादिसंबंधंप्राप्यमुह्यति पुनःपुनःकर्मसुप्रवर्तते आत्मानंशुद्धबुद्धमुक्तस्वभावंज्ञात्वा सदास्मरेत्यनेनाविच्छेदेनतत्स्मरणाभ्यासोमोक्षदइत्युक्तम्

यावद्देहोस्मिकर्तास्मीत्यात्माहंकुरुतेवशः॥ अध्यासात्तावदेवस्याज्जन्मनाशादिसंभवः ॥ ४७ ॥ तस्मात्त्वंत्यजदेहादा
वभिमानंमहामते ॥ आत्मातिनिर्मलःशुद्धोविज्ञानात्माऽचलोव्ययः ॥ ४८ ॥ स्वाज्ञानवशतोबंधंप्रतिपद्यविमुह्यति ॥
तस्मात्त्वंशुद्धभावेनज्ञात्वात्मानंसदास्मर ॥ ४९ ॥ विरतिंभजसर्वत्रपुत्रदारगृहादिषु ॥ निरयेष्वपिभोगःस्याद्धसूकर
तनावपि ॥ ५० ॥ देहंलब्ध्वाविवेकाढ्यंद्विजत्वंचविशेषतः ॥ तत्रापिभारतेवर्षेकर्मभूमौसुदुर्लभम् ॥ ५१ ॥ कोविद्वा
नात्मसात्कृत्वादेहंभोगानुगोभवेत् ॥ अतस्त्वंब्राह्मणोभूत्वापौलस्त्यतनयश्वसन् ॥ ५२ ॥ अज्ञानीवसदाभोगाननुधा
वसिकिंमुधा ॥ इतःपरंवात्यक्त्वात्वंसर्वसंगंसमाश्रय ॥ ५३ ॥ राममेवपरात्मानंभक्तिभावेनसर्वदा ॥ सीतांसमर्प्य
रामायतत्पादानुचरोभव ॥ ५४ ॥ विमुक्तःसर्वपापेभ्योविष्णुलोकंप्रयास्यसि ॥ नोचेद्गमिष्यसेधोधःपुनरावृत्तिवर्जि
तः॥ अंगीकुरुष्वमद्वाक्यंहितमेववदामिते ॥ ५५ ॥

॥ ४९ ॥ अथतादृशज्ञानसाधनंवैराग्यमाह विरतिमिति ननुसर्वत्रविरतौभोगसुखंहीयेतेतितत्राह निरयेष्वपीति एवंचेदृशभोगोपिहेयएवेतिभावः ॥५० ॥ सर्वथादुर्लभंतत्रापिभारतेवर्षेकर्मभूमौसुतरांदुर्लभम् विवेकाढ्यंतदाढ्यतायोग्यंदेहंलब्ध्वाविशेषतश्चद्विजत्वंलब्ध्वा ॥ ५१ ॥ कोविद्वान्देहमात्मसात्आत्माधीनंकृत्वा अर्थात्स्वयंदेहभोगानुगोभवेदित्यन्वयः पौलस्त्यतनयश्चेत्यनेनविशुद्धवंशतोक्ता ॥ ५२ ॥ सर्वसंगंत्यक्त्वाराममेवाश्रयेत्यन्वयः ॥ ५३ ॥ ५४ ॥ पुनरावृत्तिवर्जितइतिपुनरावृत्त्याउत्तमलोकाद्वर्जितःहीनःकृतइत्यर्थः ॥ ५५ ॥

मरकतोपलोमरकतमणिस्तद्वत्कांतंश्यामदेहम् ॥ ५६ ॥ इतिश्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादि॰युद्धकांडेचतुर्थःसर्गः ॥ ४ ॥ ॥ छ ॥ श्रुत्वेति
॥ १ ॥ सुतरांदुर्मतेमामनुजीव्यममसेवकोभूत्वेतियावत् गुरुवत्कथंभाषसे सर्वशिक्षकंमांशिक्षन् शिक्षयन्नित्यर्थः ॥ २ ॥ पूर्वकृतंपूर्वोपकृतंयद्यपित्वंवधोचि

सत्संगतिंकुरुभजस्वहरिंशरण्यंश्रीराघवंमरकतोपलकांतिकांतम् ॥ सीतासमेतमनिशंधृतचापबाणंसुग्रीवलक्ष्मणवि
भीषणसेवितांघ्रिम् ॥ ५६ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेयुद्धकांडेचतुर्थःसर्गः ॥ ४ ॥ ॥ छ ॥
श्रुत्वाशुकमुखोद्गीतंवाक्यमज्ञाननाशनम् ॥ रावणःक्रोधताम्राक्षोदहन्निवतमब्रवीत् ॥ १ ॥ अनुजीव्यसुदुर्बुद्धेगुरुव
द्भाषसेकथम् ॥ शासिताहंत्रिजगतांत्वंमांशिक्षन्नलज्जसे ॥ २ ॥ इदानीमेवहन्मित्वांकिंतुपूर्वकृतंतव ॥ स्मरामितेनर
क्षामित्वांयद्यपिवधोचितम् ॥ ३ ॥ इतोगच्छविमूढत्वमेवंश्रोतुंनमेक्षमम् ॥ महाप्रसादइत्युक्त्वावेपमानोगृहंययौ
॥ ४ ॥ शुकोपिब्राह्मणःपूर्वंब्राह्मिष्ठोब्रह्मवित्तमः ॥ वानप्रस्थविधानेनवनेतिष्ठन्स्वकर्मकृत् ॥ ५ ॥ देवानामभिवृद्ध्यर्थं
विनाशायसुरद्विषाम् ॥ चकारयज्ञविततिमविच्छिन्नांमहामतिः ॥ ६ ॥ राक्षसानांविरोधोभूच्छुकोदेवहितोद्यतः ॥ व
ज्रदंष्ट्रइतिख्यातस्तत्रैकोराक्षसोमहान् ॥ ७ ॥ अंतरंप्रेप्सुरातिष्ठच्छुकापकरणोद्यतः ॥ कदाचिदागतोगस्त्यस्तस्याश्रम
पदंमुनेः ॥ ८ ॥ तेनसंपूजितोगस्त्योभोजनार्थंनिमंत्रितः ॥ गतेस्नातुंमुनौकुंभसंभवेप्राप्यचांतरम् ॥ ९ ॥

तस्तथापितेनपूर्वोपकारस्मरणेनत्वांरक्षामीत्यन्वयः ॥ ३ ॥ एवंविधंवाक्यं गृहंवैखानसाश्रमम् ॥ ४ ॥ अमुमेवार्थमितिहासपूर्वकमाह शुकोपीति ॥ ५ ॥
अविच्छिन्नांयज्ञविततिंमध्येविच्छेदरहितंयज्ञविस्तरम् ॥ ६ ॥ शुकोदेवहितोद्यतइतिज्ञात्वाराक्षसानांशुकेविरोधोद्वेष्यत्वबुद्धिरभूत् ॥ ७ ॥ शुकापकरणेशु
कस्यापकारेउद्यतःशुकापकारंआतिष्ठत्प्रतिज्ञातवान् परस्मैपदमार्षं तस्यशुकस्य ॥ ८ ॥ अंतरमवसरम् ॥ ९ ॥

सामिषंसमांसम् ॥ १० ॥ मांसभोज्यं मांसयुक्तभोज्यम् ॥ ११ ॥ तांचशुकभार्यांचांतस्तच्छरीरांतर्माययाप्रविश्यमोहयन् पाकशालातोबहिर्निःसरणाक्ष
मांकुर्वन् ॥ १२ ॥ सःअगस्त्यःअमेध्यंमानुषंमांसंदृष्ट्वाचुकोपकुपितश्वसन्नगस्त्यःशुकमब्रवीत् ॥ १३ ॥ १४ ॥ यतस्त्वंमह्यंमानुषंमांसंदत्तवानसि अतस्त्वं

अगस्त्यरूपधृक्सोपिराक्षसःशुकमब्रवीत् ॥ यदिदास्यसिमेब्रह्मन्भोजनंदेहिसामिषम् ॥ १० ॥ बहुकालंनभुक्तंमे
मांसंछागांगसंभवम् ॥ तथेतिकारयामासमांसभोज्यंसविस्तरम् ॥ ११ ॥ उपविष्टेमुनौभोक्तुंराक्षसोतीवसुंदरम् ॥
शुकभार्यावपुर्धृत्वातांचांतर्मोहयन्खलः ॥ १२ ॥ नरमांसंददौतस्मैसुपक्वंबहुविस्तरम् ॥ दत्त्वैवांतर्दधेरक्षस्ततोदृष्ट्वा
चुकोपसः ॥ १३ ॥ अमेध्यंमानुषंमांसमगस्त्यःशुकमब्रवीत् ॥ अभक्ष्यंमानुषंमांसंदत्तवानसिदुर्मते ॥ १४ ॥ मह्यं
त्वंराक्षसोभूत्वातिष्ठत्वंमानुषाशनः ॥ इतिशप्तःपुरोभीत्याप्राहागस्त्यंमुनेत्वया ॥ १५ ॥ इदानींभाषितंमेद्यमांसंदेहीति
विस्तरम् ॥ तथैवदत्तंमेदेवाकिंमेशापंप्रदास्यसि ॥ १६ ॥ श्रुत्वाशुकस्यवचनंमुहूर्तंध्यानमास्थितः ॥ ज्ञात्वारक्षःकृतंस
र्वंततःप्राहशुकंसुधीः ॥ १७ ॥ तवापकारिणासर्वंराक्षसेनकृतंत्विदम् ॥ अविचार्यैवमेदत्तःशापस्तेमुनिसत्तम ॥ १८ ॥
तथापिमेवचोमोघमेवमेवभविष्यति ॥ राक्षसंवपुरास्थायरावणस्यसहायकृत् ॥ १९ ॥ तिष्ठतावद्यदारामोदशानन
वधायहि ॥ आगमिष्यतिलंकायाःसमीपंवानरैःसह ॥ २० ॥ प्रेषितोरावणेनत्वंचारोभूत्वारघूत्तमम् ॥ दृष्ट्वाशापाद्वि
निर्मुक्तोबोधयित्वाचरावणम् ॥ २१ ॥

मानुषाशनोराक्षसोभूत्वातिष्ठ ॥ १५ ॥ अद्यमेविस्तरंविस्तरयुतंमांसंदेहीतिइदानीमुक्तं तथैवमेमयादत्तमतोमेममशापंकिंप्रदास्यसिआर्षमेतत् ॥ १६ ॥
॥ १७ ॥ १८ ॥ यतोमेवचोमोघमनिष्फलमतएवमेवमदुक्तंभविष्यतितदेववदन्शापांतमाह राक्षसंवपुरिति ॥ १९ ॥ २० ॥ तदागमनोत्तरंरावणेनप्रेषितश्चा
रोभूत्वारघूत्तमंदृष्ट्वाशापाद्विनिर्मुक्तःरक्षःस्वभावाद्विनिर्मुक्तः ॥ २१ ॥

रावणंतत्त्वज्ञानंबोधयित्वाचततोमुक्तःमत्समीपाद्गच्छेतितेनत्यक्तः परंपदंस्ववैखानसंपदम् ॥ २२ ॥ २३ ॥ २४॥ राज्ञोमातुःपिता राज्ञःप्रियश्चेत्यर्थः ॥ २५॥ ॥ २६ ॥ तदादिजानकीप्रवेशदिनादारभ्यपुर्यांलंकायांघोराणिनिमित्तानिउत्पातादृश्यंतेइत्यन्वयः ॥ २७ ॥ घोरत्वविवरणंनाशहेतूनीति खरंकठोरंस्तनितंगर्जि

तत्त्वज्ञानंततोमुक्तःपरंपदमवाप्स्यसि ॥ इत्युक्तोगस्त्यमुनिनाशुकोब्राह्मणसत्तमः ॥ २२ ॥ बभूवराक्षसःसद्योरावणंप्राप्यसंस्थितः ॥ इदानींचाररूपेणदृष्ट्वारामंसहानुजम् ॥ २३ ॥ रावणंतत्त्वविज्ञानंबोधयित्वापुनर्द्रुतम् ॥ पूर्ववद्ब्राह्मणोभूत्वास्थितोवैखानसैःसह ॥ २४ ॥ ततःसमागमद्वृद्धोमाल्यवान्राक्षसोमहान् ॥ बुद्धिमान्नीतिनिपुणोराज्ञोमातुःप्रियःपिता ॥ २५ ॥ प्राहतंराक्षसंवीरंप्रशांतेनांतरात्मना ॥ श्रृणुराजन्वचोमेद्यश्रुत्वाकुरुयथेप्सितम् ॥ २६ ॥ यदाप्रविष्टानगरींजानकीरामवल्लभा ॥ तदादिपुर्यांदृश्यंतेनिमित्तानिदशानन ॥ २७ ॥ घोराणिनाशहेतूनितानिमेवदतःश्रृणु ॥ खरस्तनितनिर्घोषामेघाअतिभयंकराः ॥ २८ ॥ शोणितेनाभिवर्षंतिलंकामुष्णेनसर्वदा ॥ रुदंतिदेवलिंगानिस्विद्यंतिप्रचलंतिच ॥२९॥ कालिकापांडुरैर्दंतैःप्रहसत्यग्रतःस्थिता ॥ खरागोषुप्रजायंतेमूषकानकुलैःसह ॥ ३० ॥ मार्जारेणतुयुध्यंतिपन्नगागरुडेनतु ॥ करालोविकटोमुंडःपुरुषःकृष्णपिंगलः ॥ ३१ ॥ कालोगृहाणिसर्वेषांकालेकालेत्ववेक्षते ॥ एतान्यन्यानिदृश्यंतेनिमित्तान्युद्भवंतिच ॥ ३२ ॥

तंनिर्घोषःसवज्रपातःशब्दश्चयेषांते ॥ २८ ॥ देवलिंगानिदेवस्थानभूताःप्रतिमाः स्विद्यंतिस्वेदवंतिभवंति ॥ २९ ॥ अग्रतःप्रतिराक्षसंपुरःस्थिताकालिकापांडुरैःदंतैःप्रकाशितैर्हसति सर्वान्भक्षयामीत्याशयेनहासः नकुलसहितामूषकामार्जारभक्ष्यामार्जारैर्युध्यंतितेनरक्षोभक्ष्येभ्योवानरमनुष्येभ्यएवरक्षसांभयमितिसूचितम् ॥ ३० ॥३१॥ कालोमृत्युस्वरूपः कालेकालेसायंप्रातश्चेत्यर्थः एतान्युक्तानिएवंजातीयकान्यन्यानिचजातानिदृश्यंते अन्यान्युद्भवंतिजायंते ॥३२॥

शांतिंउत्पातसूचितारिष्टनाशंकर्म तदेवकर्माह सीतामिति ॥३३॥ रामस्यनारायणत्वेगमकमाह यत्पादेति पोतोनौका ज्ञानिनस्तरंतीत्यन्वयः ॥३४॥ भक्त्यापूतंपवित्रंअंतःअंतःकरणंयेषांतेभक्तिपूतांताःआर्षोरेफलोपःसर्वेषांहृदयंआलयःस्थानंयस्य तेनसर्वांतर्यामिणमित्यर्थः ॥३५॥ भक्त्येत्यस्यतथापीत्यादि भक्त्यारा

अतःकुलस्यरक्षार्थंशांतिंकुरुदशानन ॥ सीतांसत्कृत्यसधनांरामायाशुप्रयच्छभो ॥ ३३ ॥ रामंनारायणंविद्धिविद्वेषंत्यजराघवे ॥ यत्पादपोतमाश्रित्यज्ञानिनोभवसागरम् ॥ ३४ ॥ तरंतिभक्तिपूतांतास्ततोरामोनमानुषः ॥ भजस्वभक्तिभावेनरामंसर्वहृदालयम् ॥ ३५ ॥ यद्यपित्वंदुराचारोभक्त्यापूतोभविष्यसि ॥ मद्वाक्यंकुरुराजेंद्रकुलकौशलहेतवे ॥ ३६ ॥ तत्तुमाल्यवतोवाक्यंहितमुक्तंदशाननः ॥ नमर्षयतिदुष्टात्माकालस्यवशमागतः ॥ ३७ ॥ मानवंकृपणंराममेकंशाखामृगाश्रयम् ॥ समर्थंमन्यसेकेनहीनंपित्रामुनिप्रियम् ॥ ३८ ॥ रामेणप्रेषितोनूनंभाषसेत्वमनर्गलम् ॥ गच्छवृद्धोसिबंधुस्त्वंसोढंसर्वंत्वयोदितम् ॥ ३९ ॥ इतोमत्कर्णपदवींदहत्येतद्वचस्तव ॥ इत्युक्त्वासर्वसचिवैःसहितःप्रास्थितस्तदा ॥ ४० ॥ प्रासादाग्रेसमासीनःपश्यन्वानरसैनिकान् ॥ युद्धायायोजयत्सर्वराक्षसान्समुपस्थितान् ॥ ४१ ॥ रामोपिधनुरादायलक्ष्मणेनसमाहृतम् ॥ दृष्ट्वारावणमासीनंकोपेनकलुषीकृतः ॥ ४२ ॥ किरीटिनंसमासीनंमंत्रिभिःपरिवेष्टितम् ॥ शशांकार्धनिभेनैवबाणेनैकेनराघवः ॥ ४३ ॥

मभक्त्या कुलस्यकुशलमेवकौशलंतद्धेतवेतन्निमित्तमित्यर्थः ॥३६॥ नमर्षयति नहितत्त्वेनगृह्णातीत्यर्थः ॥ ३७ ॥ अमर्षमेवप्रकटयति मानवमिति कृपणंअस्मदादिदयापात्रम् शाखामृगावानराः मुनिप्रियत्वेनातिनिःसारत्वंसूचितम् ॥३८॥ यतस्त्वंवृद्धोबंधुरतस्त्वयोदितंसर्वंसोढम् ॥ ३९ ॥ इतस्तववक्त्रान्निःसृतमेतद्वचःकर्णपदवींदहति प्रस्थितःसभामध्याद्रावणइतिशेषः ॥ ४० ॥ समुपस्थितान्सन्निहितान् ॥ ४१ ॥ समाहृतंसमानीयदत्तम् ॥ ४२ ॥ ४३ ॥

श्वेतच्छत्रसहस्राणिअतिमहत्त्वाद्देहस्यानेकच्छत्रधारणा ॥ ४४ ॥ ४५ ॥ पणवानकगोमुखैः वाद्यविशेषैः ॥ ४६ ॥ कृतवाहनास्तद्वहनीयरथारूढाःखड्गादिभिरायुधैर्लक्षिताः तादृशायुधधराइत्यर्थः ॥ ४७ ॥ लंकांसर्वतःप्रतिद्वारंचोपाययुः ॥ ४८ ॥ शृंगाणिसूक्ष्मोन्नतभागाः शिखराणिततोविपुलानि युद्धाय

श्वेतच्छत्रसहस्राणिकिरीटदशकंतथा ॥ चिच्छेदनिमिषार्धेनतदद्भुतमिवाभवत् ॥ ४४ ॥ लज्जितोरावणस्तूर्णंविवेश भवनंस्वकम् ॥ आहूयराक्षसान्सर्वान्प्रहस्तप्रमुखान्खलः ॥ ४५ ॥ वानरैःसहयुद्धायनोदयामाससत्वरः ॥ ततोभेरीमृदंगाद्यैःपणवानकगोमुखैः ॥ ४६ ॥ महिषोष्ट्रैःखरैःसिंहैर्द्वीपिभिःकृतवाहनाः ॥ खड्गशूलधनुःपाशयष्टितोमरशक्तिभिः ॥ ४७ ॥ लक्षिताःसर्वतोलंकांप्रतिद्वारमुपाययुः ॥ तत्पूर्वमेवरामेणनोदितावानरर्षभाः ॥ ४८ ॥ उद्यम्यगिरिशृंगाणिशिखराणिमहांतिच ॥ तरूंश्चोत्पाट्यविविधान्युद्धायहरियूथपाः ॥ ४९ ॥ प्रेक्षमाणारावणस्यतान्यनीकानिभागशः ॥ राघवप्रियकामार्थंलंकामारुरुहुस्तदा ॥ ५० ॥ तेद्रुमैःपर्वताग्रैश्चमुष्टिभिश्चप्लवंगमाः ॥ ततःसहस्रयूथाश्च कोटियूथाश्चयूथपाः ॥ ५१ ॥ कोटीशतयुताश्चान्येरुरुधुर्नगरंभृशम् ॥ आप्लुवंतःप्लुवंतश्चगर्जंतश्चप्लुवंगमाः ॥ ५२ ॥ रामोजयत्यतिबलोलक्ष्मणश्चमहाबलः ॥ राजाजयतिसुग्रीवोराघवेणानुपालितः ॥ ५३ ॥ इत्येवंघोषयंतश्चसमंयुयुधिरेरिभिः ॥ हनूमानंगदश्चैवकुमुदोनीलएवच ॥ ५४ ॥ नलश्चशरभश्चैवमैंदोद्विविदएवच ॥ जांबवान्दधिवक्त्रश्चकेसरीतारएवच ॥ ५५ ॥

स्थिताइतिशेषः ॥ ४९ ॥ रावणस्यभागशः तत्तत्प्रदेशंस्वस्वरक्षणीयांशत्वेनगृहीत्वास्थितानीतिशेषः ॥ ५० ॥ तेद्रुमैरित्याद्यैरुपलक्षिताइतिशेषः सहस्रयूथाः सहस्रसंख्येयायूथायेषाम् ॥ ५१ ॥ आप्लवंतःऊर्ध्वंप्लवंतःपुनरधःपतंतः ॥ ५२ ॥ ५३ ॥ अरिभिःराक्षसैः ॥ ५४ ॥ ५५ ॥

सर्वतोरुरुधुः यथारक्षसांबहिर्निर्गमोनभवतितथास्वयमंतःप्रविविशुरित्यर्थः ॥ ५६ ॥ ५७ ॥ निर्गत्यबलेनवानरांस्ततोनिःसार्यस्वयंचबहिरागत्येत्यर्थः ॥५८॥
समरःमांसशोणिताभ्यांकर्दमयुतभूप्रदेशकः ॥ ५९ ॥ अद्भुतोपमःअद्भुतान्युपमीयंतेऽनेनसःसकलाद्भुतयुद्धोपमानभूतःसमरोबभूवेत्यन्वयः ॥ ६० ॥ ६१ ॥

अन्येचबलिनःसर्वेयूथपाश्चप्लवंगमाः ॥ द्वाराण्युत्प्लुत्यलंकायाःसर्वतोरुरुधुर्भृशम् ॥ तदावृक्षैर्महाकायाःपर्वताग्रैश्च
वानराः ॥ ५६ ॥ निजघ्नुस्तानिरक्षांसिनखैर्दंतैश्चवेगिताः ॥ राक्षसाश्चतदाभीमाद्वारेभ्यःसर्वतोरुषा ॥ ५७ ॥ निर्ग
त्यभिंदिपालैश्चखड्गैःशूलैःपरश्वधैः ॥ निजघ्नुर्वानरानीकंमहाकायामहाबलाः ॥ ५८ ॥ राक्षसांश्चतथाजघ्नुर्वानरा
जितकाशिनः ॥ तथाबभूवसमरोमांसशोणितकर्दमः ॥ ५९ ॥ रक्षसांवानराणांचसंबभूवाद्भुतोपमः ॥ तेहयैश्चगजै
श्चैवरथैःकांचनसन्निभैः ॥६०॥ रक्षोव्याघ्रायुयुधिरेनादयंतोदिशोदश ॥ राक्षसाश्चकपींद्राश्चपरस्परजयैषिणः ॥६१॥
राक्षसान्वानराजघ्नुर्वानरांश्चैवराक्षसाः ॥ रामेणविष्णुनादृष्टाहरयोदिविजांशजाः ॥ ६२ ॥ बभूवुर्बलिनोहृष्टास्तदा
पीतामृताइव ॥ सीताभिमर्शपापेनरावणेनाभिपालितान् ॥ ६३ ॥ हतश्रीकान्हतबलान्राक्षसाञ्जघ्नुरोजसा ॥ चतु
र्थांशावशेषेणनिहतंराक्षसंबलम् ॥ ६४ ॥ स्वसैन्यंनिहतंदृष्ट्वामेघनादोथदुष्टधीः ॥ ब्रह्मदत्तवरःश्रीमानंतर्धानंगतो
सुरः ॥ ६५ ॥सर्वास्त्रकुशलोव्योम्निब्रह्मास्त्रेणसमंततः ॥ नानाविधानिशस्त्राणिवानरानीकमर्दयन् ॥ ६६ ॥ ववर्षश
रजालानितदद्भुतमिवाभवत् ॥ रामोपिमानयन्ब्राह्ममस्त्रमस्त्रविदांवरः ॥ ६७ ॥

विष्णुदृष्टत्वात् वानराणांहृष्टत्वंबलित्वंच सीतायादुष्टभावस्पर्शजनितपापवतारावणेनपालितत्वाद्रक्षसांहतश्रीकत्वाद्यतिरेकालंकारः ॥ ६२ ॥ ६३ ॥
॥ ६४ ॥ अंतर्धानमदृश्यत्वम् ॥ ६५ ॥ ब्रह्मास्त्रेणयुतानिनानाविधानिशस्त्राणिमुंचन्निितिशेषः वानरसेनांपीडयन्रामस्योपरिशरजालानिववर्ष ॥ ६६ ॥६७॥

वानराणांबलंपतितंददर्शततश्चुकोप ॥ ६८ ॥ कुपितश्चाह चापमिति चापहस्तस्यापिक्रोधातिशयेनतद्विस्मरणादिवचापमानयेत्युक्तिः रघूत्तमलक्ष्मण
॥ ६९ ॥ रामवाक्यंश्रुत्वाभीतःसजगाममाययादृश्यःसन्नेवजगाम ॥ ७० ॥ ७१ ॥ दिव्यौषधिसमुद्भवःदिव्यौषधीनांसमुद्भवोयस्मिन्नित्यर्थः संजीवयवान

क्षणंतूष्णीमुवासाथददर्शपतितंबलम् ॥ वानराणांरघुश्रेष्ठश्चुकोपानलसन्निभः ॥ ६८ ॥ चापमानयसौमित्रेब्रह्मास्त्रे
णासुरंक्षणात् ॥ भस्मीकरोमिमेपश्यबलमद्यरघूत्तम ॥ ६९ ॥ मेघनादोपितच्छ्रुत्वारामवाक्यमतंद्रितः ॥ तूर्णंजगाम
नगरंमाययामायिकोऽसुरः ॥ ७० ॥ पतितंवानरानीकंदृष्ट्वारामोऽतिदुःखितः ॥ उवाचमारुतिंशीघ्रंगत्वाक्षीरमहोदधिम्
॥ ७१ ॥ तत्रद्रोणगिरिर्नामदिव्यौषधिसमुद्भवः ॥ तमानयद्रुतंगत्वासंजीवयमहामते ॥ ७२ ॥ वानरौघान्महासत्वान्की
र्तिस्तेसुस्थिराभवेत् ॥ आज्ञाप्रमाणमित्युक्त्वाजगामानिलनंदनः ॥ ७३ ॥ आनीयचगिरिंसर्वान्वानरान्वानरर्षभः ॥
जीवयित्वापुनस्तत्रस्थापयित्वाययौद्रुतम् ॥ ७४ ॥ पूर्ववद्भैरवंनादंवानराणांबलौघतः ॥ श्रुत्वाविस्मयमापन्नोराव
णोवाक्यमब्रवीत् ॥ ७५ ॥ राघवोमेमहान्शत्रुःप्राप्तोदेवविनिर्मितः ॥ हंतुंतंसमरेशीघ्रंगच्छंतुममयूथपाः ॥ ७६ ॥
मंत्रिणोबांधवाःशूरायेचमत्प्रियकांक्षिणः ॥ सर्वैंगच्छंतुयुद्धायत्वरितंममशासनात् ॥ ७७ ॥ येनगच्छंतियुद्धायभीर
वःप्राणविप्लवात् ॥ तान्हनिष्याम्यहंसर्वान्मच्छासनपराङ्मुखान् ॥ ७८ ॥ तच्छ्रुत्वाभयसंत्रस्तानिर्जग्मूरणकोविदाः ॥
अतिकायःप्रहस्तश्चमहानादमहोदरौ ॥ ७९ ॥

रौघानित्यन्वयः ॥ ७२ ॥ आययावितिच्छेदः सिद्धसंकल्पस्यहनूमतएतत्कर्मनसंदेग्धव्यम् ॥७३॥७४॥७५॥ ७६ ॥ मंत्रिणोयेचबांधवास्तेसर्वैंगच्छंतु यत
स्तेमत्प्रियकांक्षिणः ॥ ७७ ॥ प्राणविप्लवात् प्राणनाशभयात् एवंचप्राणनाशेसर्वथाप्राप्तेयशोरक्षणाययुद्धार्थंगमनमेवन्याय्यमितिभावः ॥ ७८ ॥ ७९ ॥

॥ ८० ॥ वानराणामिदंवानरमार्षं तत्सैन्यंप्रविश्यममंथुरर्थात्तत्सैन्यमेव ॥ ८१ ॥ भुशुंडिभिंदिपालाआयुधविशेषाः ॥ ८२ ॥ ८३ ॥ ८४ ॥ रामतेजःसमाविश्यप्राप्य तत्तेजःसमावेशेनबलत्वेहेतुमाह रामशक्तीति ॥ ८५ ॥ सर्वेश्वरःसंकल्पमात्रेणसर्वसंहारसमर्थोपिमाययामनुष्यत्वविडंबनंतदनुकरणंतेनहेतुनात

देवशत्रुर्निकुंभश्चदेवांतकनरांतकौ॥ अपरेबलिनःसर्वेययुर्युद्धायवानरैः॥ ८० ॥एतेचान्येचबहवःशूराःशतसहस्रशः॥ प्रविश्यवानरंसैन्यममंथुर्बलदर्पिताः ॥ ८१ ॥ भुशुंडिभिंदिपालैश्चबाणैःखड्गैःपरश्वधैः ॥ अन्यैश्चविविधैरस्त्रैर्निजघ्नुर्हरियूथपान्॥ ८२ ॥ तेपादपैःपर्वताग्रैर्नखदंष्ट्रैश्चमुष्टिभिः ॥ प्राणैर्विमोचयामासुःसर्वराक्षसयूथपान्॥ ८३ ॥ रामेणनिहताःकेचित्सुग्रीवेणतथापरे॥हनूमताचांगदेनलक्ष्मणेनमहात्मना॥यूथपैर्वानराणांतेनिहताःसर्वराक्षसाः॥ ८४ ॥ रामतेजःसमाविश्यवानराबलिनोऽभवन्॥ रामशक्तिविहीनानामेवंशक्तिःकुतोभवेत्॥ ८५॥ सर्वेश्वरःसर्वमयोविधातामायामनुष्यत्वविडंबनेन॥सदाचिदानंदमयोऽपिरामोयुद्धादिलीलांवितनोतिमायाम्॥ ८६ ॥ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेयु०पंचमःसर्गः॥ ५ ॥

॥ ६ ॥

॥ श्रुत्वायुद्धेबलंनष्टमतिकायमुखंमहत्॥रावणोदुःखसंतप्तःक्रोधेनमहतावृतः॥ १ ॥ निधायेंद्रजितंलंकारक्षणार्थंमहाद्युतिः॥स्वयंजगामयुद्धायरामेणसहराक्षसः॥ २ ॥ दिव्यंस्यंदनमारुह्यसर्वशस्त्रास्त्रसंयुतम्॥ राममेवाभिदुद्रावराक्षसेंद्रोमहाबलः॥ ३ ॥ वानरान्बहुशोहत्वाबाणैराशीविषोपमैः॥पातयामाससुग्रीवप्रमुखान्यूथनायकान्॥ ४॥

न्निर्वाहाययुद्धादिलीलारूपांमायांवितनोति ॥ ८६ ॥ इतिश्रीमत्सकलराज०युद्ध०पंचमःसर्गः ॥ ५ ॥ श्रुत्वेति अतिकायमुखंतत्प्रधानम् ॥ १ ॥ लंकारक्षणार्थंइंद्रजितंलंकायांनिधायस्थापयित्वा ॥ २ ॥ ३ ॥ आशीःसर्पाणांतालुगताजिह्वा दंतइत्यन्ये ॥ ४ ॥

महासत्वंमहाबलम् मयदत्तांमंदोदरीपित्रादत्ताम् ॥ ५ ॥ विभीषणविघातिनींतत्प्राणहराम् रामदत्ताभयत्वादयमसुरएवासुरःवधार्होंनशक्तिश्चमादृशातिरिक्तेष्वमोघैवेति ॥ ६ ॥ उक्त्वाविचार्यविभीषणंपुरतस्तंपृष्ठतःकृत्वाशक्तिसंमुखेस्थितः ॥ ७ ॥ अमोघशक्तितः अमोघसामर्थ्यवत्त्वात् नन्वेवंकथंलक्ष्मणजीवनतत्राह यावंत्यइति संभवंति प्रकटिताभवंति ॥ ८ ॥ ईश्वरचैतन्यसंबंधादेवजडायांमायायांसर्वशक्तिप्रादुर्भावइतितासामाधारभूतोलक्ष्मणोऽतःसर्वशक्तिचाल

गदापाणिंमहासत्त्वंतत्रदृष्ट्वाविभीषणम् ॥ उत्ससर्जमहाशक्तिंमयदत्तांविभीषणे ॥ ५ ॥ तामापतंतीमालोक्यविभीषणविघातिनीम् ॥ दत्ताभयोयंरामेणवधार्होंनायमासुरः ॥ ६ ॥ इत्युक्त्वालक्ष्मणोभीमंचापमादायवीर्यवान् ॥ विभीषणस्यपुरतःस्थितोकंपइवाचलः ॥ ७ ॥ साशक्तिर्लक्ष्मणतनुंविवेशामोघशक्तितः ॥ यावंत्यःशक्तयोलोकेमायायाःसंभवंतिहि ॥ ८ ॥ तासामाधारभूतस्यलक्ष्मणस्यमहात्मनः ॥ मायाशक्त्याभवेत्किंवाशेषांशस्यहरेस्तनोः ॥ ९ ॥ तथापिमानुषंभावमापन्नस्तदनुव्रतः ॥ मूर्च्छितःपतितोभूमौतमादातुंदशाननः ॥ १० ॥ हस्तैस्तोलयितुंशक्तोनबभूवातिविस्मितः ॥ सर्वस्यजगतःसारंविराजंपरमेश्वरम् ॥ ११ ॥ कथंलोकाश्रयंविष्णुंतोलयेल्लघुराक्षसः ॥ ग्रहीतुकामंसौमित्रिंरावणंवीक्ष्यमारुतिः ॥ १२ ॥ आजघानोरसिक्रुद्धोवज्रकल्पेनमुष्टिना ॥ तेनमुष्टिप्रहारेणजानुभ्यामपतद्भुवि ॥ १३ ॥ आस्यैश्चनेत्रश्रवणैरुद्वमन्रुधिरंबहु ॥ विघूर्णमाननयनोरथोपस्थउपाविशत् ॥ १४ ॥

कस्यमायाशक्त्यामायानिर्मितयाशक्त्यानस्मृतिरितिभावः ॥ ९ ॥ नन्वेवंमूर्च्छांऽपिकुतस्तत्राह तथापीति तदनुव्रतः नटवत् अन्यथारावणस्यामनुष्यत्वज्ञानेतत्स्मृतिर्दुर्लभेत्याशयेनमूर्च्छादिनाटनमितिभावः ॥ १० ॥ तोलयितुंचालयितुमपिनशक्तोबभूवस्तुतरामुत्थापयितुम् तेनचातिविस्मितआसीत् तत्रहेतुमाह सर्वस्येति विराजंसर्वजगद्रूपेणभासमानंअतएवजगतःसारम् ॥ ११ ॥ १२ ॥ अपतत्रावणः ॥ १३ ॥ १४ ॥

॥ १५ ॥ भक्त्यातस्यस्वभक्तत्वादितिभावः गुरूणांगरिष्ठानाम् ॥ १६ ॥ नारायणांशजंतत्त्वेनस्वाविषयंज्ञात्वा ॥ १७ ॥ बाणासनंधनुः ॥ १८ ॥ रावणंरथस्थं दृष्ट्वालोकदृष्ट्यातत्साम्यायहनूमंतमारुह्याभिदुद्राव ॥ १९ ॥ वज्रस्यनिष्पेषोनिर्घातः ॥ २० ॥ मेपुरःतिष्ठ क्वगमिष्यसि सर्वत्रसमदर्शिनःतेनेतोगमनेऽपिमदृ

अथलक्ष्मणमादायहनूमान्रावणार्दितम् ॥ आनयद्रामसामीप्यंबाहुभ्यांपरिगृह्यतम् ॥ १५ ॥ हनूमतःसुहृत्त्वेनभक्त्याचपरमेश्वरः॥ लघुत्वमगमद्देवोगुरूणांगुरुरप्यजः ॥ १६ ॥ साशक्तिरपितंत्यक्त्वाज्ञात्वानारायणांशजम् ॥ रावणस्यरथंप्रागाद्रावणोपिशनैस्ततः ॥ १७ ॥ संज्ञामवाप्यजग्राहबाणासनमथोरुषा ॥ राममेवाभिदुद्रावदृष्ट्वारामोपितंक्रुधा ॥ १८ ॥ आरुह्यजगतांनाथोहनूमंतंमहाबलम् ॥ रथस्थंरावणंदृष्ट्वाअभिदुद्रावराघवः॥ १९ ॥ ज्याशब्दमकरोत्तीव्रंवज्रनिष्पेषनिष्ठुरम्॥ रामोगंभीरयावाचाराक्षसेंद्रमुवाचह॥ २० ॥ राक्षसाधमतिष्ठाद्यक्वगमिष्यसिमेपुरः॥ कृत्वापराधमेवंमेसर्वत्रसमदर्शिनः ॥ २१ ॥ येनबाणेननिहताराक्षसास्तेजनालये ॥ तेनैवत्वांहनिष्यामितिष्ठाद्यममगोचरे ॥ २२ ॥ श्रीरामस्यवचःश्रुत्वारावणोमारुतात्मजम्॥ वहंतंराघवंसंख्येशरैस्तीक्ष्णैरताडयत् ॥ २३ ॥ हतस्यापिशरैस्तीक्ष्णैर्वायुसूनोःस्वतेजसा॥ व्यवर्धतपुनस्तेजोननर्दचमहाकपिः ॥ २४ ॥ ततोदृष्ट्वाहनूमंतंसव्रणंरघुसत्तमः ॥ क्रोधमाहारयामासकालरुद्रइवापरः॥ २५ ॥

श्यविषयेगमनंनसंभावितमितिभावः किंचयद्यप्यहंसर्वत्रसमदर्शीतथापिअपराधंकृत्वाजीवनंदुर्लभम् एतावदेवमेसमदर्शित्वंयत्कर्मानुरूपफलदत्वम् अन्यथा वैषम्यनैर्घृण्येआपद्येतेइति ॥ २१ ॥ अन्यदपिसमदर्शित्वमाह येनेति नतुविषादिलिप्तादिभिरित्याशयः ॥ २२ ॥ राघवंवहंतंहनूमंतमताडयत् ॥ २३ ॥ स्वतेजसास्वीयेनस्मृतरौद्रतेजसातेजोव्यवर्धत यद्वारामःस्वतेजसाहनूमतस्तेजोव्यवर्धतव्यवर्धयदित्यर्थः ॥ २४ ॥ २५ ॥

अंजसाशीघ्रंयुगपदेवेतियावत् ॥ २६ ॥ पाकारिरिंद्रः ॥ २७ ॥ तंसमीक्ष्यतादृशावस्थंरावणंसमीक्ष्य ॥ २८ ॥ तादृशावस्थस्यवीरस्यहननानौचित्यंस्मृ
त्वाकार्यशेषंचविचार्यकिरीटमेवचिच्छेद ततोरावणंप्रतिउवाचेतिशेषः तदेवाहानुजानामीति ॥ २९ ॥ लंकांप्रविश्याश्वास्यश्वोबलंपश्यसीत्युक्तइतिशेषः

साश्वंरथंध्वजंसूतंशस्त्रौघंधनुरंजसा ॥ छत्रंपताकांतरसाचिच्छेदशितसायकैः ॥ २६ ॥ ततोमहाशरेणाशुरावणंरघु
सत्तमः ॥ विव्याधवज्रकल्पेनपाकारिरिवपर्वतम् ॥ २७ ॥ रामबाणहतोवीरश्चचालचमुमोहच ॥ हस्तान्निपतितश्चा
पस्तंसमीक्ष्यरघूत्तमः ॥ २८ ॥ अर्धचंद्रेणचिच्छेदतत्किरीटंरविप्रभम् ॥ अनुजानामिगच्छत्वमिदानींबाणपीडितः ॥
॥ २९ ॥ प्रविश्यलंकामाश्वास्यश्वःपश्यसिबलंमम ॥ रामबाणेनसंविद्धोहतदर्पोथरावणः ॥ ३० ॥ महत्यालज्जयायु
क्तोलंकांप्राविशदातुरः ॥ रामोऽपिलक्ष्मणंदृष्ट्वामूर्च्छितंपतितंभुवि ॥ ३१ ॥ मानुषत्वमुपाश्रित्यलीलयानुशुशोचह ॥
ततःप्राहहनूमंतंवत्सजीवयलक्ष्मणम् ॥ ३२ ॥ महौषधीःसमानीयपूर्ववद्वानरानपि ॥ तथेतिराघवेणोक्तोजगामाशुम
हाकपिः ॥ ३३ ॥ हनूमान्वायुवेगेनक्षणात्तीर्त्वामहोदधिम् ॥ एतस्मिन्नंतरेचारारावणायन्यवेदयन् ॥ ३४ ॥ रामेण
प्रेषितोदेवहनूमान्क्षीरसागरम् ॥ गतोनेतुंलक्ष्मणस्यजीवनार्थंमहौषधीः ॥ ३५ ॥ श्रुत्वातच्चारवचनंराजाचिंतापरो
भवत् ॥ जगामरात्रावेकाकीकालनेमिगृहंक्षणात् ॥ ३६ ॥ गृहागतंसमालोक्यरावणंविस्मयान्वितः ॥ कालनेमिरुवा
चेदंप्रांजलिर्भयविह्वलः ॥ अर्घ्यादिकंततःकृत्वारावणस्याग्रतःस्थितः ॥ ३७ ॥

॥ ३० ॥ ३१ ॥ लीलयेत्यनेनवस्तुतःशोकाभावउक्तः ॥ ३२ ॥ वानरानपिअपिनालक्ष्मणम् ॥ ३३ ॥ क्षणान्महोदधिंतीर्त्वागत्वौषधीरानयामीतिप्रतिज्ञा
येतिशेषः जगामेत्यनेनान्वयः प्रस्थातुमुद्यतइत्यर्थः ॥ ३४ ॥ नेतुंआनेतुम् ॥ ३५ ॥ ३६ ॥ स्थितः कालनेमिः ॥ ३७ ॥

किमागमनकारणमितिरावणंपप्रच्छेतिशेषः ॥ ३८ ॥ कष्टमेवाह ममेति ॥ ३९ ॥ गतःयुद्धभूमेःप्रस्थितइत्यर्थः ॥ ४० ॥ कालात्ययःश्वस्तनसूर्योदयरूपः ॥ ४१ ॥ हेईशरावणेतिच्छेदः धारयहृदयेइतिशेषः ॥ ४२ ॥ ४३ ॥ तथैवमेभविष्यतिमृत्युरेवभविष्यतीत्यर्थः ॥ ४४ ॥ असुरकुलमितिच्छेदः किंकिंफलं

किंतेकरोमिराजेंद्रकिमागमनकारणम् ॥ कालनेमिमुवाचेदंरावणोदुःखपीडितः ॥ ३८ ॥ ममापिकालवशतःकष्टमेतदु
पस्थितम् ॥ मयाशक्त्याहतोवीरोलक्ष्मणःपतितोभुवि ॥ ३९ ॥ तंजीवयितुमानेतुमोषधीर्हनुमान्गतः ॥ यथातस्यभवे
द्विघ्नंतथाकुरुमहामते ॥ ४० ॥ माययामुनिवेषेणमोहयस्वमहाकपिम् ॥ कालात्ययोयथाभूयात्तथाकृत्वैहिमंदिरे ॥
॥ ४१ ॥ रावणस्यवचःश्रुत्वाकालनेमिरुवाचतम् ॥ रावणेशवचोमेद्यश्शृणुधारयतत्त्वतः ॥ ४२ ॥ प्रियंतेकरवाण्येव
नप्राणान्धारयाम्यहम् ॥ मारीचस्ययथारण्येपुराभून्मृगरूपिणः ॥ ४३ ॥ तथैवमेनसंदेहोभविष्यतिदशानन ॥ हताः
पुत्राश्चपौत्राश्चबांधवाराक्षसाश्चते ॥ ४४ ॥ घातयित्वाऽसुरकुलंजीवितेनापिकिंतव ॥ राज्येनवासीतयावाकिंदेहेन
जडात्मना ॥ ४५ ॥ सीतांप्रयच्छरामायराज्यंदेहिविभीषणे ॥ वनंयाहिमहाबाहोरम्यंमुनिगणाश्रयम् ॥ ४६ ॥ स्नात्वाप्रा
तःशुभजलेकृत्वासंध्यादिकाःक्रियाः ॥ ततएकांतमाश्रित्यसुखासनपरिग्रहः ॥ ४७ ॥ विसृज्यसर्वतःसंगमितरान्विष
यान्बहिः ॥ बहिःप्रवृत्ताक्षगणंशनैःप्रत्यक्प्रवाहय ॥ ४८ ॥

जडात्मनाजडस्वरूपेण ॥ ४५ ॥ एवंजीवितादौवैराग्यमुपदिश्यकर्तव्यमुपदिशति सीतामिति रम्यत्वोपपादकंमुनिगणाश्रयमिति ॥ ४६ ॥ यत्रैवपद्मासनादौस्थित्वास्थातासुखंलभतेतत्सुखासनम् ॥ ४७ ॥ बहिःकृत्वेतिशेषः दूरेकृत्वाइत्यर्थः बहिःप्रवृत्तंबाह्यविषयेषुप्रवृत्तमक्षगणमिंद्रियगणंप्रत्यक्प्रवाहयआत्मविषयंकुरु सर्वसहायस्यमनसआत्मविषयत्वकरणमेवसर्वेंद्रियाणामात्मविषयत्वकरणम् ॥ ४८ ॥

तदेवोपपादयति प्रकृतेरिति प्रकृतिस्वरूपमाह चराचरमिति एतदेवप्रकृतिरित्यर्थः ॥ ४९ ॥ किंविशेषेणदृश्यंसर्वमेवमायेत्याहाब्रह्मेति ॥ ५० ॥ सैवजगद्वृक्षस्यसर्गादिकारणम् लोहितेत्यादि स्वस्यत्रिगुणात्मकत्वात् राजससात्त्विकतामसाःप्रजाःसृजति ॥ ५१ ॥ तथाकामक्रोधादीन्पुत्रान्हिंसाद्याश्चकन्यकाःसृजति स्वसृष्टस्यजगतोवृद्ध्यर्थमित्यर्थः एवंसृष्ट्वाआत्मानमात्मपदवाच्यंविभुंदेवंस्वैर्गुणैःपदार्थैर्मोहयति तेष्वहंममेतिबुद्धिमंतंकरोति ॥ ५२ ॥ स्वनिष्ठान्जग

प्रकृतेर्भिन्नमात्मानंविचारयसदानघ ॥ चराचरंजगत्कृत्स्नंदेहबुद्धींद्रियादिकम् ॥ ४९ ॥ आब्रह्मस्तंबपर्यंतंदृश्यतेश्रूयतेचयत् ॥ सैषाप्रकृतिरित्युक्तासैवमायेतिकीर्तिता ॥ ५० ॥ सर्गस्थितिविनाशानांजगद्वृक्षस्यकारणम् ॥ लोहितश्वेतकृष्णादिप्रजाःसृजतिसर्वदा ॥ ५१ ॥ कामक्रोधादिपुत्राद्यान्हिंसातृष्णादिकन्यकाः ॥ मोहयत्यनिशंदेवमात्मानंस्वैर्गुणैर्विभुम् ॥ ५२ ॥ कर्तृत्वभोक्तृत्वसुखान्स्वगुणानात्मनीश्वरे ॥ आरोप्यस्ववशंकृत्वातेनक्रीडतिसर्वदा ॥ ५३ ॥ शुद्धोप्यात्माययायुक्तःपश्यतीवसदाबहिः ॥ विस्मृत्यचस्वमात्मानंमायागुणविमोहितः ॥ ५४ ॥ यदासद्गुरुणायुक्तोबोध्यतेबोधरूपिणा ॥ निवृत्तदृष्टिरात्मानंपश्यत्येवसदास्फुटम् ॥ ५५ ॥ जीवन्मुक्तःसदादेहीमुच्यतेप्राकृतैर्गुणैः ॥ त्वमप्येवंसदात्मानंविचार्यनियतेंद्रियः ॥ ५६ ॥

त्कर्तृत्वादीन्गुणान्सन्निधानेनतत्रारोप्यस्ववशंकृत्वाअहंकर्तेत्यादिबुद्धिमत्त्वकरणमेवतस्यवशीकरणम् ॥ ५३ ॥ शुद्धोऽप्ययंदर्शनादिविकारहीनोपिपश्यतीवबहिर्विषयान् स्वमात्मानंस्वस्वरूपम् विस्मरणेहेतुर्मायागुणविमोहितत्वम् ॥ ५४ ॥ तर्हिकिंसर्वथाविस्मृतस्वस्वरूपस्यबंधएवनेत्याह यदेति बोधरूपिणा ज्ञानस्वरूपएवाहमितिजानताजीवन्मुक्तेनेत्यर्थः निवृत्तदृष्टिःबहिर्विषयेभ्यइतिशेषः आत्मानंशुद्धबुद्धमुक्तस्वभावमात्मस्वरूपम् ॥ ५५ ॥ तादृशसद्गुरूपदेशान्निदिध्यासनसंपत्त्याजीवन्मुक्तिदशांप्राप्तःप्राकृतैर्गुणैःसुखदुःखादिभिर्मुच्यते अतोमदुपदेशाच्छुतमात्मानमेवंविचार्यमदुक्तात्मस्वरूपंविचारेणदृढीकृत्य॥ ५६ ॥

ध्यातुमिति मदुक्तप्रकारेणध्यातुमित्यर्थः ॥ ५७ ॥ सगुणंध्येयंरूपमाह हृत्पद्मेति तत्कर्णिकास्थेस्वर्णपीठेस्थितमित्यन्वयः श्लक्ष्णंस्निग्धम् ॥ ५८ ॥ वीरासनंवीरासनस्थम् विद्युत्पुंजनिभांबरंपीतांबरमित्यर्थः ॥ ५९ ॥ भातंशोभायमानम् धनुर्द्वंद्वकरेण एकंस्वस्यैकंरामस्येतिद्वयम् ॥ ६० ॥ सर्वहृदिस्थितमित्यनेनएवंभूतःसर्वप्रेरकत्वेनध्येयः एवंहिसर्वस्यस्वतंत्रत्वाभावनिश्चयेद्वेषादिहानिर्भवतीत्यर्थः ॥ ६१ ॥ भक्तैःकथ्यमानमितिशेषः कृतपूर्वाणिपूर्वंकृतानि यथा

प्रकृतेरन्यमात्मानंज्ञात्वामुक्तोभविष्यसि ॥ ध्यातुंयद्यसमर्थोऽसिसगुणंदेवमाश्रय ॥ ५७ ॥ हृत्पद्मकर्णिकेस्वर्णपीठे मणिगणान्विते ॥ मृदुश्लक्ष्णतरेतत्रजानक्यासहसंस्थितम् ॥ ५८ ॥ वीरासनंविशालाक्षंविद्युत्पुंजनिभांबरम् ॥ किरीटहारकेयूरकौस्तुभादिभिरन्वितम् ॥ ५९ ॥ नूपुरैःकटकैर्भातंतथैववनमालया ॥ लक्ष्मणेनधनुर्द्वंद्वकरेणपरिसेवितम् ॥ ६० ॥ एवंध्यात्वासदात्मानंरामंसर्वहृदिस्थितम् ॥ भक्त्यापरमयायुक्तोमुच्यतेनात्रसंशयः ॥ ६१ ॥ शृणुवैचरितं तस्यभक्तैर्नित्यमनन्यधीः ॥ एवंचेत्कृतपूर्वाणिपापानिचमहांत्यपि ॥ क्षणादेवविनश्यंतियथाऽग्नेस्तूलराशयः ॥ ६२ ॥ भजस्वरामंपरिपूर्णमेकंविहायवैरंनिजभक्तियुक्तः ॥ हृदासदाभावितभावरूपमनामरूपंपुरुषंपुराणम् ॥ ६३ ॥ इति श्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेयुद्धकांडेषष्ठःसर्गः ॥ ६ ॥ ॥ ७ ॥ ॥ कालनेमिवचःश्रुत्वारावणोऽमृतसन्निभम् ॥ जज्वालक्रोधताम्राक्षःसर्पिरद्भिरिवाग्निमत् ॥ १ ॥

ग्नेःस्पर्शात्तूलराशयोनश्यंतितद्वत् ॥ ६२ ॥ वैरंवैरभावम् निजभक्तियुक्तःअनन्यभक्तियुक्तः हृदाहृदयेन सदाभावितभावस्यसत्तारूपस्यब्रह्मणोरूपंशुद्धबुद्धमुक्तस्वभावंयेनतम् वस्तुतःसएवब्रह्मेत्यादिना ॥ ६३ ॥ ॥ इतिश्रीमत्सकलराजविपदुद्धरण० युद्धकांडेषष्ठःसर्गः ॥ ६ ॥ ॥ ७ ॥ ॥

अग्निमत्अतितप्तम् सर्पिर्घृतम् जलसंयोगाद्यथामहाज्वालावद्भवतितथाजज्वालेत्यर्थः ॥ १ ॥

परैर्दत्तंकिंचिद्गृहीत्वाधनलोभात्रामकिंकरतांप्राप्तइवभाषसे ॥ २ ॥ यदिमेवचोनरोचतेतदागत्वातत्त्वदाज्ञप्तमेवकरोमि ॥ ३ ॥ रावणेनैवस्वयमेवनोदितइत्यर्थः ॥ ४ ॥ खलःअंतर्दुष्टःअतएवमुनिवेषधरोनतुमुनिः ॥ ५ ॥ गच्छतोवायुसूनोर्मार्गमासाद्यतदीयमार्गमध्येतपोवनमकल्पयदित्यर्थः ॥ ६ ॥ ७ ॥ मा

निहन्मित्वांदुरात्मानंमच्छासनपराङ्मुखम् ॥ परैःकिंचिद्गृहीत्वात्वंभाषसेरामकिंकरः ॥ २ ॥ कालनेमिरुवाचेदंरावणंदेवकिंक्रुधा ॥ नरोचतेमेवचनंयदिगत्वाकरोमितत् ॥ ३ ॥ इत्युक्त्वाप्रययौशीघ्रंकालनेमिर्महासुरः ॥ नोदितोरावणेनैवहनूमद्विघ्नकारणात् ॥ ४ ॥ सगत्वाहिमवत्पार्श्वेतपोवनमकल्पयत् ॥ तत्रशिष्यैःपरिवृतोमुनिवेषधरःखलः ॥ ५ ॥ गच्छतोमार्गमासाद्यवायुसूनोर्महात्मनः ॥ ततोगत्वाददर्शाथहनूमानाश्रमंशुभम् ॥ ६ ॥ चिंतयामासमनसाश्रीमान्पवननंदनः ॥ पुरानदृष्टमेतन्मेमुनिमंडलमुत्तमम् ॥ ७ ॥ मार्गोविभ्रंशितोवामेभ्रमोवाचित्तसंभवः ॥ यद्वाविश्याश्रमपदंदृष्ट्वामुनिमशेषतः ॥ ८ ॥ पीत्वाजलंततोयामिद्रोणाचलमनुत्तमम् ॥ इत्युक्त्वाप्रविवेशाथसर्वतोयोजनायतम् ॥ ९ ॥ आश्रमंकदलीशालखर्जूरपनसादिभिः ॥ समावृतंपक्वफलैर्नम्रशाखैश्चपादपैः ॥ १० ॥ वैरभावविनिर्मुक्तंशुद्धंनिर्मललक्षणम् ॥ तस्मिन्महाश्रमेरम्येकालनेमिःसराक्षसः ॥ ११ ॥ इंद्रयोगंसमास्थायचकारशिवपूजनम् ॥ हनूमानभिवाद्याहगौरवेणमहासुरम् ॥ १२ ॥ भगवन्रामदूतोहंहनूमान्नामनामतः ॥ रामकार्येणमहताक्षीराब्धिंगंतुमुद्यतः ॥ १३ ॥

र्गोमेविभ्रंशितःत्यक्तः मार्गांतरेआगतमितियावत् उतानाश्रमेआश्रमत्वभ्रमः अथवाकिमनेनविचारेणेत्याह यद्वेति मुनिमिति जातावेकवचनं अशेषतोमुनीन्दृष्ट्वेत्यर्थः ॥ ८ ॥ ९ ॥ उक्तगुणैःपादपैश्च समावृतमाश्रमंप्रविवेशेत्यन्वयः ॥ १० ॥ वैरभावविनिर्मुक्तंयत्राश्रमेऽहिनकुलादयोऽपिपरस्परवैरभावंत्यक्त्वातिष्ठंतितमित्याश्रमविशेषणम् ॥ ११ ॥ इंद्रयोगःकपटम् ॥ १२ ॥ १३ ॥

॥ १४ ॥ ममकमंडलुगतमित्यन्वयः ॥ १५ ॥ तदनंतरंजलपानानंतरंगमनेत्वरामास्तु ॥ १६ ॥ १७ ॥ जलंजलाशयम् ॥ १८ ॥ मायाविकल्पितंस्वमाय

तृषामांबाधतेब्रह्मन्नुदकंकुत्रविद्यते ॥ यथेच्छंपातुमिच्छामिकथ्यतांमेमुनीश्वर ॥ १४ ॥ तच्छ्रुत्वामारुतेर्वाक्यंकालने
मिस्तमब्रवीत् ॥ कमंडलुगतंतोयंममत्वंपातुमर्हसि ॥ १५ ॥ भुंक्ष्वचेमानिपक्वानिफलानितदनंतरम् ॥ निवसस्वसुखे
नात्रनिद्रामेहित्वरास्तुमा ॥ १६ ॥ भूतंभव्यंभविष्यंचजानामितपसास्वयम् ॥ उत्थितोलक्ष्मणःसर्वैवानररामवीक्षिताः
॥ १७ ॥ तच्छ्रुत्वाहनुमानाहकमंडलुजलेनमे ॥ नशाम्यत्यधिकातृष्णाततोदर्शयमेजलम् ॥ १८ ॥ तथेत्याज्ञापया
मासबटुंमायाविकल्पितम् ॥ बटोदर्शयविस्तीर्णंवायुसूनोर्जलाशयम् ॥ १९ ॥ निमील्यचाक्षिणीतोयंपीत्वागच्छम
मांतिकम् ॥ उपदेक्ष्यामितेमंत्रंयेनद्रक्ष्यसिचौषधीः ॥ २० ॥ तथेतिदर्शितंशीघ्रंबटुनासलिलाशयम् ॥ प्रविश्यहनुमां
स्तोयमपिबन्मीलितेक्षणः ॥ २१ ॥ ततश्चागत्यमकरीमहामायामहाकपिम् ॥ अग्रसत्तंमहावेगान्मारुतिंघोररूपिणी
॥ २२ ॥ ततोददर्शहनुमानग्रसंतींमकरींरुषा ॥ दारयामासहस्ताभ्यांवदनंसाममारह ॥ २३ ॥ ततोंतरिक्षेददृशेदिव्य
रूपधरांगना ॥ धान्यमालीतिविख्याताहनूमंतमथाब्रवीत् ॥ २४ ॥ त्वत्प्रसादादहंशापाद्विमुक्तास्मिकपीश्वर ॥ शप्ताहं
मुनिनापूर्वमप्सराकारणांतरे ॥ २५ ॥ आश्रमेयस्तुतेदृष्टःकालनेमिर्महासुरः ॥ रावणप्रहितोमार्गेविघ्नंकर्तुंतवानघ
॥ २६ ॥ मुनिवेषधरोनासौमुनिर्विप्रविहिंसकः ॥ जहिदुष्टंगच्छशीघ्रंद्रोणाचलमनुत्तमम् ॥ २७ ॥

याकल्पितंबटुंशिष्यम् ॥ १९ ॥ अथहनूमंतंप्रत्याह निमील्यचेति ॥ २० ॥ तथेतिउक्त्वेतिशेषः अपिबदितिच्छेदः ॥ २१ ॥ महामायाबहुमायावतीमकरी
मकाराकारा ॥ २२ ॥ २३ ॥ इतिविख्याताअप्सराइतिशेषः ॥ २४ ॥ २५ ॥ २६ ॥ असौनमुनिःकिंतुमुनिवेषधरः ॥ २७ ॥

॥ २८ ॥ महताविलंबेनकिंकृतंअतिविलंबःकिंकृतइत्यर्थः ॥ २९ ॥ ३० ॥ ३१ ॥ महामायिकोरामः मायिनांदैत्यानाम् ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥

गच्छाम्यहंब्रह्मलोकंत्वत्स्पर्शाद्धूतकल्मषा ॥ इत्युक्त्वासाययौस्वर्गंहनुमानप्यथाश्रमम् ॥२८॥ आगतंतंसमालोक्य
कालनेमिरभाषत ॥ किंविलंबेनमहतातववानरसत्तम ॥ २९ ॥ गृहाणमत्तोमंत्रांस्त्वंदेहिमेगुरुदक्षिणाम् ॥ इत्युक्तो
हनुमान्मुष्टिंदृढंबद्धाहराक्षसम् ॥ ३० ॥ गृहाणदक्षिणामेतामित्युक्त्वानिजघानतम् ॥ विसृज्यमुनिवेषंसकालनेमि
र्महासुरः ॥ ३१ ॥ युयुधेवायुपुत्रेणनानामायाविधानतः ॥ महामायिकदूतोसौहनूमान्मायिनांरिपुः ॥ ३२ ॥ जघा
नमुष्टिनाशीर्ष्णिभग्नमूर्धाममाररसः ॥ ततःक्षीरनिधिंगत्वादृष्ट्वाद्रोणंमहागिरिम् ॥ ३३ ॥ अदृष्ट्वाचौषधीस्तत्रगिरि
मुत्पाट्यसत्वरः ॥ गृहीत्वावायुवेगेनगत्वारामस्यसन्निधिम् ॥ ३४ ॥ उवाचहनुमान्राममानीतोयंमहागिरिः ॥ यद्यु
क्तंकुरुदेवेशविलंबोनात्रयुज्यते ॥ ३५ ॥ श्रुत्वाहनूमतोवाक्यंरामःसंतुष्टमानसः ॥ गृहीत्वाचौषधीःशीघ्रंसुषेणेनम
हामतिः ॥ ३६ ॥ चिकित्सांकारयामासलक्ष्मणायमहात्मने ॥ ततःसुप्तोत्थितइवबुद्ध्वाप्रोवाचलक्ष्मणः ॥ ३७ ॥
तिष्ठतिष्ठक्कगंतासिहन्मीदानींदशानन ॥ इतिब्रुवंतमालोक्यमूर्ध्न्यवघ्रायराघवः ॥ ३८ ॥ मारुतिंप्राहवत्साद्यत्वत्प्र
सादान्महाकपे ॥ निरामयंप्रपश्यामिलक्ष्मणंभ्रातरंमम ॥ ३९ ॥ इत्युक्त्वावानरैःसार्धंसुग्रीवेणसमन्वितः ॥ विभी
षणमतेनैवयुद्धायसमवस्थितः ॥ ४० ॥

गृहीत्वातासांतेजोभिवृद्ध्यर्थंस्वयंगृहीत्वासुषेणस्यवैद्यत्वात्तेनचिकित्सांकारयामास एतेनवैद्यकशास्त्राभिनिविष्टत्वेनप्रसिद्धस्यैवचिकित्साधिकारइतिसूचितम्
॥३६ ॥ बुद्ध्वामोहंत्यक्त्वा ॥ ३७ ॥ ३८ ॥ ममभ्रातरमहंनिरामयंगतपीडंपश्यामीत्यन्वयः ॥ ३९ ॥ विभीषणमतेनैव तस्यलंकाछिद्रज्ञत्वात् ॥ ४० ॥

युद्धायाभिमुखाः युद्धंकर्तुंरिपूणामभिमुखाइत्यर्थः ॥४१॥ मातंगोगजः ॥४२॥ राघवेणाऽभिभूतोऽगमत् गृहमितिशेषः समाविश्येति उपविश्येत्यर्थः॥४३॥
मृत्युमेतद्देहप्राणवियोगम् ॥ ४४ ॥ समुपस्थितःलंकामागतइत्यर्थः ॥ ४५ ॥ ४६ ॥ हनिष्यसेइत्यंतःशापःनसंदेहइतितस्यैवस्थिरीकरणं सचानरण्योमामि

पाषाणैःपादपैश्चैवपर्वताग्रैश्चवानराः ॥ युद्धायाभिमुखाभूत्वाययुःसर्वेयुयुत्सवः ॥ ४१ ॥ रावणोविव्यथेरामबाणैर्वि
द्धोमहासुरः ॥ मातंगइवसिंहेनगरुडेनेवपन्नगः ॥ ४२ ॥ अभिभूतोऽगमद्राजाराघवेणमहात्मना ॥ सिंहासनेसमा
विश्यराक्षसानिदमब्रवीत् ॥४३॥ मानुषेणैवमेमृत्युमाहपूर्वंपितामहः॥ मानुषोहिनमांहंतुंशक्तोस्तिभुविकश्चन॥४४॥
ततोनारायणःसाक्षान्मानुषोभून्नसंशयः ॥ रामोदाशरथिर्भूत्वामांहंतुंसमुपस्थितः ॥ ४५ ॥ अनरण्येनयत्पूर्वंशप्तो
हंराशसेश्वराः ॥ उत्पत्स्यतेचमद्वंशेपरमात्मासनातनः ॥४६॥ तेनत्वंपुत्रपौत्रैश्चबांधवैश्चसमन्वितः ॥ हनिष्यसेनसंदे
हइत्युक्त्वामांदिवंगतः॥ ४७॥ सएवरामःसंजातोमदर्थेमांहनिष्यति ॥ कुंभकर्णस्तुमूढात्मासदानिद्रावशंगतः॥ ४८॥
तंविबोध्यमहासत्वमानयंतुममांतिकम् ॥ इत्युक्तास्तेमहाकायास्तूर्णंगत्वातुयत्नतः ॥ ४९ ॥ विबोध्यकुंभश्रवणंनिन्यू
रावणसन्निधिम् ॥ नमस्कृत्यसराजानमासनोपरिसंस्थितः ॥ ५० ॥ तमाहरावणोराजाभ्रातरंदीनयागिरा ॥ कुंभ
कर्णनिबोधत्वंमहत्कष्टमुपस्थितम् ॥ ५१ ॥ रामेणनिहताःशूराःपुत्राःपौत्राश्चबांधवाः ॥ किंकर्तव्यमिदानींमेमृत्युका
लउपस्थिते ॥ ५२ ॥

त्युक्त्वादिवंगतइत्यन्वयः ॥ ४७ ॥ मदर्थेमद्वधार्थेइत्यर्थः समांहनिष्यतिहनिष्यत्येवेतिस्वनिश्चयाभिलाषः इदंज्ञानंरजस्तमोजन्यत्वान्नोत्तमायफलायेतिबो
ध्यम् मूढात्माअत्यंततमःप्रकृतिः निद्राप्रियत्वात् ॥ ४८ ॥ महासत्वंमहाबलम् ॥ ४९ ॥ निन्युःप्रापयामासुः ॥ ५० ॥ ५१ ॥ मृत्युकालेउपस्थितेइदानींमे
किंकर्तव्यंतद्वदेतिशेषः ॥ ५२ ॥

सबलःससैन्यःमूलंसेनाम् ॥५३॥ वानरानाशनीयाइतिचेत्तत्राह वानराणांयुद्धेक्षयंनाशंनपश्यामि अनंतत्वात् हनूमतौषध्यानयनेनजीवनाच्च ॥५४॥ अतस्त्वद्वानराणांबलंहनूमत्सहितंनाशयस्व ॥५५॥ रावणेंद्रस्यसर्वश्रेष्ठस्यरावणस्येत्यर्थः यद्वालोकरावणानांश्रेष्ठस्य परिदेवितं परिदेवनरूपंवचनं ॥५६॥ यत्पापस्य कर्मणःफलंभावित्वेनतेमयागदितंतदद्योपगतंप्राप्तम् ॥५७॥ रामोनारायणइतिपूर्वमेवप्रोक्तःकथितःतवेतिशेषः एवमनेकप्रकारैः रामस्यनारायणत्वंनबुध्यसेत

एषदाशरथीरामःसुग्रीवसहितोबली ॥ समुद्रंसबलस्तीर्त्वामूलंनःपरिकृंतति ॥ ५३ ॥ येराक्षसामुख्यतमास्तेहतावानरैर्युधि ॥ वानराणांक्षयंयुद्धेनपश्यामिकदाचन ॥ ५४ ॥ नाशयस्वमहाबाहोयदर्थंपरिबोधितः ॥ भ्रातुरर्थेमहासत्वकुरुकर्मसुदुष्करम् ॥ ५५ ॥ श्रुत्वातद्रावणेंद्रस्यवचनंपरिदेवितम् ॥ कुंभकर्णोजहासोच्चैर्वचनंचेदमब्रवीत् ॥ ५६ ॥ पुरामंत्रविचारेतेगदितंयन्मयानृप ॥ तदद्यत्वामुपगतंफलंपापस्यकर्मणः ॥५७॥ पूर्वमेवमयाप्रोक्तोरामोनारायणःपरः ॥ सीताचयोगमायेतिबोधितोपिनबुध्यसे ॥ ५८ ॥ एकदाहंवनेसानौविशालायांस्थितोनिशि ॥ दृष्टोमयामुनिःसाक्षान्नारदोदिव्यदर्शनः ॥ ५९ ॥ तमब्रुवंमहाभागकुतोगंतासिमेवद ॥ इत्युक्तोनारदःप्राहदेवानांमंत्रणेस्थितः ॥ ६० ॥ तत्रोत्पन्नमुदंतंतेवक्ष्यामिशृणुतत्त्वतः ॥ युवाभ्यांपीडितादेवाःसर्वेविष्णुमुपागताः ॥ ६१ ॥ ऊचुस्तेदेवदेवेशंस्तुत्वाभक्त्यासमाहिताः ॥ जहिरावणमक्षोभ्यंदेवत्रैलोक्यकंटकम् ॥ ६२ ॥

स्यैतत्फलमागतमितिशेषः ॥ ५८ ॥ ननुत्वयेदंकथंज्ञातंतत्राह एकदेति सानौपर्वतशिखरेविशालायांशिलायामितिशेषः विशालायांनगर्यामित्यन्ये ॥ ५९ ॥ कुतोगंतासिकुतआगतोसीत्यर्थेआर्षं देवानांमंत्रणेदेवानांविचारस्थानेइत्यर्थः तत्रस्थितोहंततआगतइतिप्राहेत्यन्वयः ॥ ६० ॥ युवाभ्यांरावणकुंभकर्णाभ्याम् ॥ ६१ ॥ अक्षोभ्यंकेनाप्यप्रापणीयक्षोभं जहीत्यत्रहेतुगर्भंविशेषणंत्रैलोक्यकंटकमिति ॥ ६२ ॥

रावणकंटकंरावणरूपंकंटकम् ॥ ६३ विष्णोरीश्वरत्वसूचकंसत्यसंकल्पत्वम् ॥ ६४ ॥ ६५ ॥ माययामानुष्यशरीरंनत्वसौवस्तुतोमानुषःकश्चिज्जीवइत्यर्थः भजतइतिद्वितीयाबहुवचनम् ॥ ६६ ॥ भक्तान्प्रसीदतिइत्यस्योपपत्तयेभक्तेरुत्कर्षमाह भक्तिरिति ज्ञानजनकत्वादेवतस्यामोक्षदत्वंकिंबहुनाकर्मभक्तिहीनं कृतंअसत्समंअकृततुल्यंफलाजनकमित्यर्थः ॥ ६७ ॥ सर्वावतारेष्वयंमुख्योवतारइत्याहावताराइति लीलानुकारिणस्तत्तज्जातिचेष्टानुकरणशीलस्येत्यर्थः

मानुषेणमृतिस्तस्यकल्पिताब्रह्मणापुरा॥ अतस्त्वंमानुषोभूत्वाजहिरावणकंटकम् ॥६३॥ तथेत्याहमहाविष्णुःसत्यसंकल्पईश्वरः ॥ जातोरघुकुलेदेवोरामइत्यभिविश्रुतः ॥ ६४ ॥ सहनिष्यतिवःसर्वानित्युक्त्वाप्रययौमुनिः ॥ अतोजानीहिरामंत्वंपरंब्रह्मसनातनम्॥ ६५ ॥ त्यजवैरंभजस्वाद्यमायामानुषविग्रहम् ॥ भजतोभक्तिभावेनप्रसीदतिरघूत्तमः ॥ ६६ ॥ भक्तिर्जनित्रीज्ञानस्यभक्तिर्मोक्षप्रदायिनी ॥ भक्तिहीनेनयत्किंचित्कृतंसर्वमसत्समम् ॥ ६७ ॥ अवताराःसुबहवोविष्णोर्लीलानुकारिणः ॥ तेषांसहस्रसदृशोरामोज्ञानमयःशिवः ॥ ६८ ॥ रामंभजंतिनिपुणामनसावचसानिशम् ॥ अनायासेनसंसारंतीर्त्वायांतिहरेःपदम् ॥ ६९ ॥ येराममेवसततंभुविशुद्धसत्त्वाध्यायंतितस्यचरितानिपठंतिसंतः॥ मुक्तास्तएवभवभोगमहाहिपाशैःसीतापतेःपदमनंतसुखंप्रयांति ॥ ७० ॥ ॥ इतिश्रीमदध्यात्मरामायणे उमामहेश्वरसंवादेयुद्धकांडेसप्तमःसर्गः॥ ७॥ ॥ ८॥ ॥ कुंभकर्णवचःश्रुत्वाभ्रुकुटीविकटाननः॥ दशग्रीवोजगादेदमासनादुत्पतन्निव ॥ १ ॥

॥ ६८ ॥ येनिपुणारामंभजंतितेसंसारंतीर्त्वाहरेःपदंयांति ॥ ६९ ॥ शुद्धसत्वाःशुद्धांतःकरणाः भवःसंसारोभोगःशरीरंयस्यतादृशोयोमहानहिःकालस्तदीयैः पाशैर्बंधनैर्मुक्ताःसीतापतेरनंतसुखंपदंशुद्धंब्रह्मप्रयांतिप्राप्नुवंति ॥ ७० ॥ ॥ इतिश्रीमत्सकलराजविप० अध्यात्मरामायणसेतौयुद्धकांडेसप्तमःसर्गः ॥ ७ ॥ ॥ ८ ॥ ॥ उत्पतन्निव क्रोधादितिशेषः ॥ १ ॥

समीकृत्यअंगीकृत्यमत्समव्यवहारोभूत्वा ॥ २ ॥ ३ ॥ ४ ॥ अभिनादयन्स्वनादप्रतिध्वनियुतंकुर्वन् ॥ ५ ॥ कालयामासपीडयामास ॥ ६ ॥ कालांतक
मिवकालमिवांतकमिवचतंदृष्ट्वादुद्रुवुरित्यर्थः मुद्गरेणयुतमितिशेषः ॥ ७ ॥ पाणिपादैश्चस्वीयैश्चूर्णयंतम् एकवत्त्वाभावआर्षः एवमनेकप्रकारेणचूर्णयंतम्

त्वमानीतोनमेज्ञानबोधनायसुबुद्धिमान् ॥ मयाकृतंसमीकृत्ययुद्ध्यस्वयदिरोचते ॥ २ ॥ नोचेद्गच्छसुषुप्त्यर्थंनिद्रात्वां
बाधतेधुना ॥ रावणस्यवचःश्रुत्वाकुंभकर्णोमहाबलः ॥ ३ ॥ रुष्टोयमितिविज्ञायतूर्णंयुद्धायनिर्ययौ ॥ सलंघयित्वाप्रा
कारंमहापर्वतसन्निभः ॥ ४ ॥ निर्ययौनगरात्तूर्णंभीषयन्हरिसैनिकान् ॥ सननादमहानादंसमुद्रमभिनादयन् ॥ ५ ॥
वानरान्कालयामासबाहुभ्यांभक्षयन्रुषा ॥ कुंभकर्णंतदादृष्ट्वासपक्षमिवपर्वतम् ॥ ६ ॥ दुद्रुवुर्वानराःसर्वेकालांतक
मिवाखिलाः ॥ भ्रमंतंहरिवाहिन्यांमुद्गरेणमहाबलम् ॥ ७ ॥ कालयंतंहरीन्वेगाद्भक्षयंतंसमंततः ॥ चूर्णयंतंमुद्गरेणपा
णिपादैरनेकधा ॥ ८ ॥ कुंभकर्णंतदादृष्ट्वागदापाणिर्विभीषणः ॥ ननामचरणौतस्यभ्रातुर्ज्येष्ठस्यबुद्धिमान् ॥ ९ ॥ वि
भीषणोहंभ्रातुर्मेदयांकुरुमहामते ॥ रावणस्तुमयाभ्रातर्बहुधापरिबोधितः ॥ १० ॥ सीतांदेहीतिरामायरामःसाक्षा
ज्जनार्दनः ॥ नशृणोतिचमांहंतुंखड्गमुद्यम्यचोक्तवान् ॥ ११ ॥ धिक्त्वांगच्छेतिमांहत्वापदापापिभिरावृतः ॥ चतुर्भि
र्मंत्रिभिःसार्धंरामंशरणमागतः ॥ १२ ॥ तच्छ्रुत्वाकुंभकर्णोऽपिज्ञात्वाभ्रातरमागतम् ॥ समालिंग्यचवत्सत्वंजीवराम
पदाश्रयः ॥ १३ ॥

॥ ८ ॥ बुद्धिमान्सर्वास्वप्यवस्थासुज्येष्ठोमंतव्यइतिसदाचाराभिज्ञः ॥ ९ ॥ १० ॥ परिबोधनप्रकारमाह सीतामित्यादि इतिबोधितस्तन्नशृणोतिश्रुतवान्वि
परीतंखड्गमुद्यम्यहंतुमुद्यतइतिशेषः ततःकथंचिन्निवृत्तोमांपदाहत्वाउक्तवांश्च ॥ ११ ॥ किमुक्तवांस्तदाह धिक्त्वांगच्छेतिततोहंचतुर्भिर्मंत्रिभिरिति ॥ १२ ॥
समालिंग्यचाहेतिशेषः तदेवाह वत्सत्वमिति ॥ १३ ॥

ननुमेजीवनंकथंसंभाव्यतेतत्राह महाभागवतोसीति भगवद्भक्तस्यतेनाशःकथमपिनसंभाव्यइतिभावः ॥ १४ ॥ यतोहंमदेनमत्तनेत्रस्ततोममस्वीयपरविभा
गेनकिमपिनदृश्यतेऽस्तस्त्वंगच्छ कदाचित्त्वय्यपिप्रहारसंभवात् ॥ १५ ॥ चिंतापरःकुंभकर्णःकथंनाशमेष्यतीतिचिंतापरः ॥ १६ ॥ यस्यगंधंसमाघ्रायान्येग

कुलसंरक्षणार्थायराक्षसानांहितायच ॥ महाभागवतोसित्वंपुरामेनारदाच्छ्रुतम् ॥ १४ ॥ गच्छतातममेदानींदृश्यतेन
चकिंचन ॥ मदीयोवापरोवापिमदमत्तविलोचनः ॥ १५ ॥ इत्युक्तोश्रुमुखोभ्रातुश्चरणावभिवंद्यसः ॥ रामपार्श्वमुपा
गत्यचिंतापरउपस्थितः ॥ १६ ॥ कुंभकर्णोऽपिहस्ताभ्यांपादाभ्यांपेषयन्हरीन् ॥ चचारवानरींसेनांकालयन्गंधहस्ति
वत् ॥ १७ ॥ दृष्ट्वातंराघवःक्रुद्धोवायव्यंशस्त्रमादरात् ॥ चिक्षेपकुंभकर्णायतेनचिच्छेदरक्षसः ॥ १८ ॥ समुद्गरंदक्षह
स्तंतेनघोरंननादसः ॥ सहस्तःपतितोभूमावनेकानर्दयन्कपीन् ॥ १९ ॥ पर्यंतमाश्रिताःसर्वेवानराभयवेपिताः ॥ राम
राक्षसयोर्युद्धंपश्यंतःपर्यवस्थिताः ॥ २० ॥ कुंभकर्णश्छिन्नहस्तःशालमुद्यम्यवेगतः ॥ समरेराघवंहंतुंदुद्रावतमथोच्छिनत्
॥ २१ ॥ शालेनसहितंवामहस्तमैंद्रेणराघवः ॥ छिन्नबाहुमथायांतंनर्दंतंवीक्ष्यराघवः ॥ २२ ॥ द्वावर्धचंद्रौनिशिता
वादायास्यपदद्वयम् ॥ चिच्छेदपतितौपादौलंकाद्वारिमहास्वनौ ॥ २३ ॥ निकृत्तपाणिपादोपिकुंभकर्णोतिभीषणः ॥
वडवामुखवद्वक्रंव्यादायरघुनंदनम् ॥ २४ ॥ अभिदुद्रावनिनदन्राहुश्चंद्रमसंयथा ॥ अपूरयत्सिताग्रैश्चसायकैस्तद्रघू
त्तमः ॥ २५ ॥

जाःपलायंतेसगंधगजः सयथाक्षुद्रपशून्कालयंश्चरतितद्वद्यंचचार ॥ १७ ॥ वायव्यंशस्त्रंवायव्यास्त्राभिमंत्रितंशस्त्रम् ॥ १८ ॥ १९ ॥ पर्यंतमाश्रितायुद्धभू
मध्येस्थिताहस्तपातभयात्तत्प्रांतमाश्रिताइत्यर्थः ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ वडवामुखंनामसमुद्रेशतयोजनविस्तीर्णंवडवाग्निवासस्थानम् ॥ २५ ॥

॥ २६ ॥ सशरः तत्शिरः ॥ २७ ॥ शिरोलंकाद्वारिपतितम् कायोमहोदधौपतितइतिशेषः ॥ २८ ॥ अस्यशिरोद्वारंरोधयत् अरुंधदित्यर्थः अडभावआर्षः निवृत्तप्रेषणाण्णिच् नक्रादि समुद्रेकायपातात् खगाःपक्षिणः ॥ २९ ॥ अप्सरोभिःसहेतिशेषः ईडिरेतुष्टुवुः कुसुमासारैरामंवर्षंतःअभिनंदिताअभिनंदवंतो

शरपूरितवक्रोसौचुक्रोशातिभयंकरः ॥ अथसूर्यप्रतीकाशमैंद्रंशरमनुत्तमम् ॥ २६ ॥ वज्राशनिसमंरामश्चिक्षेपासुरमृत्यवे ॥ सतत्पर्वतसंकाशंस्फुरत्कुंडलदंष्ट्रकम् ॥ २७ ॥ चकर्तरक्षोधिपतेःशिरोवृत्रमिवाशनिः ॥ तच्छिरःपतितंलंकाद्वारिकायोमहोदधौ ॥ २८ ॥ शिरोस्यरोधयद्द्वारंकायोनक्राद्यचूर्णयत् ॥ ततोदेवाःसऋषयोगंधर्वाःपन्नगाःखगाः ॥ २९ ॥ सिद्धायक्षागुह्यकाश्चअप्सरोभिश्चराघवम् ॥ ईडिरेकुसुमासारैर्वर्षंतश्चाभिनंदिताः ॥ ३० ॥ आजगामतदारामंद्रष्टुंदेवमुनीश्वरः ॥ नारदोगगनात्तूर्णंस्वभासाभासयन्दिशः ॥ ३१ ॥ राममिंदीवरश्याममुदारांगंधनुर्धरम् ॥ ईषत्ताम्रविशालाक्षमैंद्रास्त्रांचितबाहुकम् ॥ ३२ ॥ दयार्द्रदृष्ट्यापश्यंतंवानरान्शरपीडितान् ॥ दृष्ट्वागद्गदयावाचाभक्त्यास्तोतुंप्रचक्रमे ॥ ३३ ॥ नारदउवाच ॥ देवदेवजगन्नाथपरमात्मन्सनातन ॥ नारायणाखिलाधारविश्वसाक्षिन्नमोस्तुते ॥ ३४ ॥ विशुद्धज्ञानरूपोपित्वंलोकानतिवंचयन् ॥ माययामनुजाकारःसुखदुःखादिमानिव ॥ ३५ ॥

बभूवुरितिशेषः ॥ ३० ॥ ३१ ॥ ऐंद्रास्त्रेणयुक्तोबाहुर्यस्यतम् ॥ ३२ ॥ ३३ ॥ देवानांहिरण्यगर्भादीनामपिदेवपूज्य परमात्मन्सर्वेजीवाअंशायस्यतादृश अतएवसनातनसदाभवनित्येत्यर्थः नारंजीवसमूहस्तस्यायन अखिलाधारजगदुत्पत्तिस्थितिनाशकारण विश्वसाक्षिन्अंतर्यामितयेतिभावः ॥ ३४ ॥ अतिवंचयन्स्वस्वरूपगोपनेनसंसारपातिनःकुर्वन् एतदपिमायाकृतमेवतत्त्वतस्तत्रारोपितंबोध्यम् ॥ ३५ ॥

सर्वेषांहृदिस्थितोपिस्वप्रकाशोपित्वंमाययागूह्यमानोभवसि तर्हीदृशत्वेकिंमानमित्यतआह अमलात्मनांव्यक्तएवेति तदनुभवएवतवतादृशत्वेप्रमाणमिति भावः ॥ ३६ ॥ उन्मीलयन्निति तवनिमेषोन्मेषावेवसृष्टिप्रलयाविति भावः ॥ ३७ ॥ यस्मिन्निति यदाधारत्वादिदंभातीतिव्यवहारविषयः भानस्यत्वद्रूपत्वादितिभावः यतएतच्चराचरंजायतेयस्मिन्लीयतेयेनतिष्ठतिचेत्यर्थः सार्वविभक्तिकस्तसिः यस्मादधिकंनकिंचित्तस्मैब्रह्मरूपिणेनमइत्यर्थः ॥ ३८ ॥ यंप्रकृ

त्वंमाययागूह्यमानःसर्वेषांहृदिसंस्थितः॥स्वयंज्योतिःस्वभावस्त्वंव्यक्तएवामलात्मनाम् ॥ ३६ ॥ उन्मीलयन्सृजस्येतन्नेत्रेरामजगत्त्रयम्॥उपसंह्रियतेसर्वंत्वयाचक्षुर्निमीलनात् ॥ ३७ ॥ यस्मिन्सर्वमिदंभातियतश्चैतच्चराचरम्॥ यस्मान्नकिंचिल्लोकेस्मिंस्तस्मैतेब्रह्मणेनमः ॥ ३८ ॥ प्रकृतिंपुरुषंकालंव्यक्ताव्यक्तस्वरूपिणम् ॥ यंजानंतिमुनिश्रेष्ठास्तस्मैरामायतेनमः ॥ ३९ ॥ विकाररहितंशुद्धंज्ञानरूपंश्रुतिर्जगौ ॥ त्वांसर्वजगदाकारमूर्तिंचाप्याहसाश्रुतिः ॥ ४० ॥ विरोधोदृश्यतेदेववैदिकोवेदवादिनाम् ॥ निश्चयंनाधिगच्छंतित्वत्प्रसादंविनाबुधाः ॥ ४१ ॥ माययाक्रीडतोदेवननिरोधोमनागपि ॥ रश्मिजालंरवेर्यद्वद्दृश्यतेजलवद्भ्रमात् ॥ ४२ ॥

तिंजानंतिशक्तिशक्तिमतोरभेदात् यंपुरुषंजानंतिअंशांशिनोरभेदात् ममैवांशोजीवलोकेजीवभूतःसनातनइतिगीतोक्तेः व्यक्तस्वरूपःकालोनिमिषादिःअव्यक्तःक्षणरूपस्तदुभयरूपंकालंयंत्वांजानंतितस्मैनमः ॥ ३९ ॥ ४० ॥ विकाररहितत्ववादसर्वाकारवादयोरापाततोविरोधोदृश्यतेजगतोविकाररूपत्वात् ॥ ४१ ॥ त्वत्प्रसादलभ्यंनिश्चयमाह माययेति एवंचजगदाकाररूपत्वंमायिकमितिनविरोधः मायिकत्वज्ञानंचजगतित्वत्प्रसादंविनादुर्लभमितिभावः ननुमायिकत्वेपिजगतस्तद्रूपत्वंभगवतःकथमित्यत्राह रश्मिजालमिति यथातत्रमरुद्देशावच्छिन्नेरविरश्मिजालेजलभ्रमोमृगाणाम् ॥ ४२ ॥

तथा त्वयिजगद्भ्रांतिज्ञानाच्छुक्तौरजतमिवप्रकल्प्यतेजनैः माययापिनिरधिष्ठानकभ्रमोत्पादनासंभवात् अतस्त्वंतद्रूपइत्युच्यसे यत्तुतेवास्तवंनिर्गुणंरूपंतन्मनसः श्रवणमनननिदिध्यासनादिसंस्कृतस्यमनसोविषयः दृश्यतेपरयाबुद्ध्येतिश्रुतेः ॥ ४३ ॥ तत्तवनिर्गुणंरूपंदृश्यंचक्षुरादिविषयःकथंभवेद्दृश्याभावेदृश्यत्वाभावेकथंभजेत्सेवेत् अतःतज्ज्ञानासंभवात्तद्रूपाविचारेणावताररूपाणिभजंतितावतैवभवार्णवंतरंत्येव ॥ ४४ ॥ ४५ ॥ भीषयंतित्वद्ध्यानान्निवर्तयंति ध्यानदार्ढ्योपायमाह त्वन्नामस्मरतांपुसांत्वद्रूपमपिमानसेभवतीतिशेषः नामस्मरणमेवभगवद्रूपध्यानेदृढउपायइतिभावः ॥ ४६ ॥ सगुणसेवाऽपिमोक्षदेत्याह त्वत्पूजेत्यादि

भ्रांतिज्ञानात्तथारामत्वयिसर्वंप्रकल्प्यते ॥ मनसोविषयोदेवरूपंतेनिर्गुणंपरम् ॥ ४३ ॥कथंदृश्यंभवेद्देवदृश्याभावेभजेत्कथम् ॥ अतस्तवावतारेषुरूपाणिनिपुणाभुवि ॥ ४४ ॥ भजंतिबुद्धिसंपन्नास्तरंत्येवभवार्णवम् ॥ कामक्रोधादयस्तत्रबहवःपरिपंथिनः॥४५॥ भीषयंतिसदाचेतोमार्जारामूषकंयथा ॥ त्वन्नामस्मरतांनित्यंत्वद्रूपमपिमानसे ॥४६॥ त्वत्पूजानिरतानांतिकथामृतपरात्मनाम् ॥ त्वद्भक्तसंगिनांरामसंसारोगोष्पदायते ॥ ४७॥ अतस्तेसगुणंरूपंध्यात्वाहं सर्वदाहृदि ॥ मुक्तश्चरामिलोकेषुपूज्योहंसर्वदैवतैः ॥ ४८ ॥ रामत्वयामहत्कार्यंकृतंदेवहितेच्छया ॥ कुंभकर्णवधेनाद्यभूभारोयंगतःप्रभो ॥ ४९ ॥ श्वोहनिष्यतिसौमित्रिरिंद्रजेतारमाहवे॥हनिष्यसेथरामत्वंपरश्वोदशकंधरम् ॥ ५० ॥

गोष्पदायतेइत्यनेनतस्यशक्यतरणत्वंसूच्यते ॥ ४७ ॥ अतोनिर्गुणसेवायादुष्करत्वात्सगुणसेवायाअपिमोक्षदत्वाच्चेत्यर्थः मुक्तःसंसारक्लेशात् मुक्तावस्थत्वंस्वस्यसूचितम् अतएवसर्वदैवतैःपूज्यः ॥ ४८ ॥ एवंमुख्यरूपेणस्तुत्वाप्रकृतकर्मणापिस्तौतिरामेति गतःगतप्रायः ॥ ४९ ॥ श्वइति इदंतद्वधस्यासन्नकालताद्योतकंवाल्मीक्युक्त्याअग्निवेश्योक्त्याचदिनत्रयेणेंद्रजितोवधःप्रतीयतेअग्रेत्रापिवक्ष्यति अहोरात्रैस्त्रिभिर्वीरःकथंचिद्विनिपातितइति एवंपरश्वइत्यपि आग्निवेश्यरामायणेअष्टादशाहानिरामरावणयोर्द्वंद्वयुद्धस्योक्तेः ॥ ५० ॥

नभोगतः नभःशब्देनभूलोकोर्ध्वलोकास्तदन्यतमस्थितः सर्वंयुद्धवृत्तांतंपश्यामिसाक्षात्करोमि त्वद्भक्तिजनितज्ञानोत्कर्षेणज्ञानप्रतिबंधकस्यसर्वेंद्रियतमसो निवर्तनात् अनेनगमनानुज्ञार्थमुक्तयुद्धदर्शनार्थंस्थेयमित्यस्यावसरोनिराकृतः ॥ ५१॥५२॥ रामेणनिहितंश्रुत्वेत्यन्वयः ॥५३॥ पितरंचातिविह्वलंदृष्ट्वेतिशेषः

पश्यामिसर्वंदेवेशसिद्धैःसहनभोगतः ॥ अनुगृह्णीष्वमांदेवगमिष्यामिसुरालयम् ॥ ५१ ॥ इत्युक्त्वाराममामंत्र्यनार
दोभगवानृषिः ॥ ययौदेवैःपूज्यमानोब्रह्मलोकमकल्मषम् ॥ ५२ ॥ भ्रातरंनिहतंश्रुत्वाकुंभकर्णंमहाबलम् ॥ रावणः
शोकसंतप्तोरामेणाक्लिष्टकर्मणा ॥ ५३ ॥ मूर्छितःपतितोभूमावुत्थायविललापह ॥ पितृव्यंनिहतंश्रुत्वापितरंचाति
विह्वलम् ॥ ५४ ॥ इंद्रजित्प्राहशोकार्तंत्यजशोकंमहामते ॥ मयिजीवतिराजेंद्रमेघनादेमहाबले ॥ ५५ ॥ दुःखस्या
वसरःकुत्रदेवांतकमहामते ॥ व्येतुतेदुःखमखिलंस्वस्थोभवमहीपते ॥ ५६ ॥ सर्वंसमीकरिष्यामिहनिष्यामिचवैरिपू
न् ॥ गत्वानिकुंभिलांसद्यस्तर्पयित्वाहुताशनम् ॥ ५७ ॥ लब्ध्वारथादिकंतस्मादजेयोहंभवाम्यरेः ॥ इत्युक्त्वात्वरितं
गत्वानिर्दिष्टंहवनस्थलम् ॥५८॥ रक्तमाल्यांबरधरोरक्तगंधानुलेपनः ॥ निकुंभिलास्थलेमौनीहवनायोपचक्रमे ॥५९॥
विभीषणोथतच्छ्रुत्वामेघनादस्यचेष्टितम् ॥ प्राहरामायसकलंहोमारंभंदुरात्मनः ॥ ६० ॥ समाप्यतेचेद्धोमोयंमेघ
नादस्यदुर्मतेः ॥ तदाऽजेयोभवेद्राममेघनादःसुरासुरैः ॥ ६१ ॥

॥५४॥शोकार्तंरावणंप्राह त्यजेत्यादि ॥ ५५ ॥ देवांतकेति देवनाशकस्यमनुष्यमात्राद्दुःखावसरःक्वेत्यर्थः ॥ ५६ ॥ समीकरिष्यामि तदीयमुख्यहननेनात्मीयंसर्वंदुःखंदुःखेनसमंकरिष्यामीत्यर्थः तदेवाह हनिष्यामीति तदुपायमाह गत्वेति ॥ ५७ ॥ लब्ध्वेत्यस्ययोत्स्यामीतिशेषः तस्माद्रथादिलाभात् अजेयःयुद्धे इतिशेषः ॥ ५८ ॥ निर्दिष्टमुक्तंहवनस्थलंगत्वाहवनायोपचक्रमेइत्यन्वयः ॥ ५९ ॥ दुरात्मनःइंद्रजितः ॥ ६० ॥ तदाअजेयइतिच्छेदः ॥ ६१ ॥

शीघ्रंहोमसमाप्तेःप्रागेव बालोलक्ष्मणःकथंतंहन्यादितिसंदेहोमास्त्वित्याह हनिष्यतीति ॥ ६२ ॥ रामोमायामानुष्यंनाटयन्नाहाहमेवेति ॥ ६३ ॥ ६४ ॥
लक्ष्मणस्तुतादृशइत्याह लक्ष्मणस्त्विति त्वयासहयत्प्रभृत्यायात् ॥ ६५ ॥ तदादिनिद्रादीनिनजानातिनस्मरति अनुष्ठानंतुदूरापास्तमित्यर्थः तत्त्यागेहेतुः

अतःशीघ्रंलक्ष्मणेनघातयिष्यामिरावणिम् ॥ आज्ञापयमयासार्धंलक्ष्मणंबलिनांवरम् ॥ हनिष्यतिनसंदेहोमेघनादं
तवानुजः ॥ ६२ ॥ श्रीरामचंद्रउवाच ॥ अहमेवागमिष्यामिहंतुमिंद्रजितंरिपुम् ॥ आग्नेयेनमहास्त्रेणसर्वराक्षसघा
तिना ॥ ६३ ॥ विभीषणोपितंप्राहनासावन्यैर्निहन्यते ॥ यस्तुद्वादशवर्षाणिनिद्राहारविवर्जितः ॥ ६४ ॥ तेनैवमृत्यु
र्निर्दिष्टोब्रह्मणास्यदुरात्मनः ॥ लक्ष्मणस्तुअयोध्यायानिर्गम्यायात्त्वयासह ॥ ६५ ॥ तदादिनिद्राहारादीन्नजानाति
रघूत्तम ॥ सेवार्थंतवराजेंद्रज्ञातंसर्वमिदंमया ॥ ६६ ॥ तदाज्ञापयदेवेशलक्ष्मणंत्वरयामया ॥ हनिष्यतिनसंदेहःशे
षःसाक्षाद्धराधरः ॥ ६७ ॥ त्वमेवसाक्षाज्जगतामधीशोनारायणोलक्ष्मणएवशेषः ॥ युवांधराभारनिवारणार्थंजा
तौजगन्नाटकसूत्रधारौ ॥ ६८ ॥ इतिश्रीमदध्यात्मरामायणेउमाम०युद्धकांडेअष्टमःसर्गः ॥८॥ ॥९॥ विभीषणव
चःश्रुत्वारामोवाक्यमथाब्रवीत् ॥ जानामितस्यरौद्रस्यमायांकृत्स्नांविभीषण ॥ १ ॥ सहिब्रह्मास्त्रविच्छूरोमायावीच
महाबलः ॥ जानामिलक्ष्मणस्यापिस्वरूपंममसेवनम् ॥ २ ॥

सेवार्थंतवेति ॥ ६६ ॥ मयासहेतिशेषः ॥ ६७ ॥ तस्यशेषत्वमेवदार्ढ्यायपुनराह त्वमेवेति जगतोनिर्माणरूपंनाटकंतस्यसूत्रधारौमुख्यकारणे ॥ ६८ ॥
॥ इतिश्रीमत्सकलराजवि० युद्धकांडेअष्टमःसर्गः ॥ ८ ॥ ॥ ॥ ९ ॥ ॥ विभीषणेति तस्यइंद्रजितः रौद्रस्यअतितामसस्य ॥ १ ॥ ममसेवनंम
त्सेवाकरणंनिद्रादिराहित्यरूपम् ॥ २ ॥

पूर्वंवनवाससमयेऽहंतस्यानिद्राहारादिराहित्यंज्ञात्वापिभविष्यतःकार्यस्येंद्रजिद्वधरूपस्यगुरुत्वात्तूष्णीमासम् तंननिषिद्धवानित्यर्थः इत्युक्त्वाविभीषणमितिशे
षः ॥ ३ ॥ लक्ष्मणेतिद्विःसंबोधनमादरपूर्वमन्यासाध्यत्वसूचनाय ॥ ४ ॥ सःसैन्यसंवृतऋक्षराजः सचिवसहितोविभीषणश्चत्वामभियास्यतिअनुयास्यति

ज्ञात्वैवासमहंतूष्णींभविष्यत्कार्यगौरवात् ॥ इत्युक्त्वालक्ष्मणंप्राहरामोज्ञानवतांवरः ॥ ३ ॥ गच्छलक्ष्मणसैन्येनम
हताजहिरावणिम् ॥ हनूमत्प्रमुखैःसर्वैर्यूथपैःसहलक्ष्मण ॥ ४ ॥ जांबवानृक्षराजोयंसहसैन्येनसंवृतः ॥ विभीषणश्चस
चिवैःसहत्वामभियास्यति ॥ ५ ॥ अभिज्ञस्तस्यदेशस्यजानातिविवराणिसः ॥ रामस्यवचनंश्रुत्वालक्ष्मणःसवि
भीषणः ॥ ६ ॥ जग्राहकार्मुकंश्रेष्ठमन्यद्भीमपराक्रमः ॥ रामपादांबुजंस्पृश्यहृष्टःसौमित्रिरब्रवीत् ॥ ७ ॥ अद्यमत्का
र्मुकान्मुक्ताःशरानिर्भिद्यरावणिम् ॥ गमिष्यंतिहिपातालंस्नातुंभोगावतीजले ॥ ८ ॥ एवमुक्त्वाससौमित्रिःपरिक्रम्य
प्रणम्यतम् ॥ इंद्रजिन्निधनाकांक्षीययौत्वरितविक्रमः ॥ ९ ॥ वानरैर्बहुसाहस्रैर्हनूमान्पृष्ठतोन्वगात् ॥ विभीषणश्च
सहितोमंत्रिभिस्त्वरितंययौ ॥ १० ॥ जांबवत्प्रमुखाऋक्षाःसौमित्रिंत्वरयान्वगुः ॥ गत्वानिकुंभिलादेशंलक्ष्मणोवा
नरैःसह ॥ ११ ॥ अपश्यद्बलसंघातंदूराद्राक्षससंकुलम् ॥ धनुरायम्यसौमित्रिर्यत्तोभूद्भूरिविक्रमः ॥ १२ ॥ अंगदे
नचवीरेणजांबवान्राक्षसाधिपः ॥ तदाविभीषणःप्राहसौमित्रिंपश्यराक्षसान् ॥ १३ ॥

॥ ५ ॥ विभीषणस्यानुगमनंकार्यसाधकमित्याहाभिज्ञइति तस्यइंद्रजिद्धननदेशस्य विवराणिरिपूणांछिद्राणि ॥ ६ ॥ स्पृश्यस्पृष्ट्वा ॥ ७ ॥ भोगावतीपा
तालगंगा ॥ ८ ॥ सःसंस्मृतात्मरूपःस्मृतस्वनिवासश्च तंरामम् ॥ ९ ॥ १० ॥ ११ ॥ बलसंघातंइंद्रजिद्रक्षणार्थंस्थितम् राक्षससंकुलंराक्षसव्याप्तम् ॥ १२ ॥
अंगदेनवीरेणजांबवान्यत्तोभूदित्यनुकर्षः राक्षसोधिपइत्युत्तरार्धस्थविभीषणान्वयि राक्षसान्इंद्रजिद्रक्षकान् ॥ १३ ॥

॥ १४ ॥ अस्मिन्रक्षोनीकेभिन्नेत्वच्छरभेदेनपलायिते एतत्कर्मइंद्रजिद्धवनकर्म ॥ १५ ॥ १६ ॥ राक्षसेंद्रसुतंप्रतितत्सेनांप्रतीत्यर्थः ॥ १७ ॥ तेराक्षसाः
॥ १८ ॥ शब्दःशूराणांसिंहनादरूपः ॥ १९ ॥ निकुंभिलांचहोमंचेतिकेवलंकर्मत्यागएवनकिंतुतद्देशत्यागोपीत्यर्थः ॥ २० ॥ महताक्रोधेनयुतोयुद्धायसौमि

यदेतद्राक्षसानीकंमेघश्यामंविलोक्यते ॥ अस्यानीकस्यमहतोभेदनेयत्नवान्भव ॥ १४ ॥ राक्षसेंद्रसुतोप्यस्मिन्भि
न्नेदृश्योभविष्यति ॥ अभिद्रवाशुयावद्वैनैतत्कर्मसमाप्यते ॥ १५॥ जहिवीरदुरात्मानंहिंसापरमधार्मिकम्॥ विभीष
णवचःश्रुत्वालक्ष्मणःशुभलक्षणः ॥ १६ ॥ ववर्षशरवर्षाणिराक्षसेंद्रसुतंप्रति ॥ पाषाणैःपर्वताग्रैश्चवृक्षैश्चहरियूथपाः
॥ १७ ॥ निर्जघ्नुःसर्वतोदैत्यांस्तेपिवानरयूथपान् ॥ परश्वधैःशितैर्बाणैरसिभिर्यष्टितोमरैः ॥ १८ ॥ निर्जघ्नुर्वानरानी
कंतदाशब्दोमहानभूत् ॥ ससंप्रहारस्तुमुलःसंजज्ञेहरिरक्षसाम् ॥ १९ ॥ इंद्रजित्स्वबलंसर्वमर्द्यमानंविलोक्यसः ॥ नि
कुंभिलांचहोमंचत्यक्त्वाशीघ्रंविनिर्गतः ॥ २०॥ रथमारुह्यसधनुःक्रोधेनमहतागमत् ॥ समाह्वयित्वासौमित्रिंयुद्धाय
रणमूर्धनि ॥ २१ ॥ सौमित्रेमेघनादोहंमयाजीवन्नमोक्ष्यसे ॥ तत्रदृष्ट्वापितृव्यंसप्राहनिष्ठुरभाषणम् ॥ २२॥ इहैव
जातःसंवृद्धःसाक्षाद्भ्रातापितुर्मम ॥ यस्त्वंस्वजनमुत्सृज्यपरभृत्यत्वमागतः ॥ २३॥ कथंद्रुह्यसिपुत्रायपापीयानसिदु
र्मतिः ॥ इत्युक्त्वालक्ष्मणंदृष्ट्वाहनूमत्पृष्ठतःस्थितम्॥ २४॥ उद्यदायुधनिस्त्रिंशेरथेमहतिसंस्थितः॥ महाप्रमाणमुद्यम्य
घोरंविस्फारयन्धनुः ॥ २५ ॥

त्रिंलक्ष्मणमाह्वयित्वारणमूर्धनिरणभूमध्यभागंअगमत्प्राप्तः ल्यबभावआर्षः ॥ २१ ॥ समाह्वयन्नेवाह सौमित्रेइतिनिष्ठुरभाषणंनिष्ठुरवाक्यम् ॥ २२ ॥
परभृत्यत्वमागतइत्यस्येदृशंत्वांधिगितिशेषः ॥ २३ ॥ द्रुह्यसिमदीयंछिद्रंशत्रुभ्योदर्शयन्नित्यर्थः पृष्ठतः सार्वविभक्तिकस्तसिः पृष्ठेइत्यर्थः ॥ २४ ॥ उद्यंति
प्रकाशंस्थितानिआयुधानिनिस्त्रिंशाश्चयस्मिंस्तादृशेरथेइत्यर्थः महाप्रमाणंसार्धसप्तवितस्ति ॥ २५ ॥

भोवानरायुष्माकंप्राणान्ममबाणाःपास्यंतीतिअवददितिशेषः दाशरथिर्लक्ष्मणः ॥ २६ ॥ इंद्रजित्क्रोधाद्रक्तनयनोबाणपातसमकालंलक्ष्मणमपश्यत् ॥२७ ॥
ततःशरैराहतःपीडितोमूढोमूर्च्छितोभवत् प्रत्याहृतेंद्रियःप्राप्तेंद्रियज्ञानः पुनर्व्यपगतमूर्च्छोऽभवदितियावत् ॥ २८ ॥ सौमित्रिमभिचक्रामतत्संमुखंजगामेत्यर्थः

अद्यवोमामकाबाणाःप्राणान्पास्यंतिवानराः॥ ततःशरंदाशरथिःसंधायामित्रकर्शनः ॥ २६ ॥ ससर्जराक्षसेंद्रायक्रु
द्धःसर्पइवश्वसन्॥ इंद्रजिद्रक्तनयनोलक्ष्मणंसमुदैक्षत ॥ २७॥ शक्राशनिसमस्पर्शैर्लक्ष्मणेनाहतःशरैः॥ मुहूर्तमभ
वन्मूढःपुनःप्रत्याहृतेंद्रियः ॥ २८ ॥ ददर्शावस्थितंवीरंवीरोदशरथात्मजम् ॥ सोभिचक्रामसौमित्रिंक्रोधसंरक्तलोच
नः ॥ २९ ॥ शरान्धनुषिसंधायलक्ष्मणंचेदमब्रवीत्॥ यदितेप्रथमेयुद्धेनदृष्टोमेपराक्रमः ॥ ३० ॥ अद्यत्वांदर्शयिष्या
मितिष्ठेदानींव्यवस्थितः॥ इत्युक्त्वासप्तभिर्बाणैरभिविव्याधलक्ष्मणम् ॥३१॥ दशभिश्चहनूमंतंतीक्ष्णधारैःशरोत्तमैः॥
ततःशरशतेनैवसंप्रयुक्तेनवीर्यवान् ॥ ३२ ॥ क्रोधद्विगुणसंरब्धोनिर्बिभेदविभीषणम् ॥ लक्ष्मणोऽपितथाशत्रुंशरव
र्षैरवाकिरत् ॥ ३३ ॥ तस्यबाणैःसुसंविद्धंकवचंकांचनप्रभम् ॥ व्यशीर्यतरथोपस्थेतिलशःपतितंभुवि ॥ ३४ ॥ ततः
शरसहस्रेणसंक्रुद्धोरावणात्मजः ॥ बिभेदसमरेवीरंलक्ष्मणंभीमविक्रमम् ॥ ३५ ॥ व्यशीर्यतापतद्दिव्यंकवचंलक्ष्मण
स्यच ॥ कृतप्रतिकृतान्योन्यंबभूवतुरभिद्रुतौ ॥ ३६ ॥ अभीक्ष्णंनिःश्वसंतौतौयुद्ध्येतांतुमुलंपुनः॥ शरसंवृतसर्वांगौस
र्वतोरुधिरोक्षितौ ॥ ३७ ॥

॥२९ ॥ ३० ॥ ३१ ॥ संप्रयुक्तेनधनुषःसकाशात्प्रेरितेन ॥ ३२ ॥ ३३ ॥ सुसंविद्धंसुतरांसम्यक्विद्धंरथमध्येविशीर्णंतत्रपुनर्बाणैस्तिलशःखंडितंभुविप
तितम् ॥ ३४ ॥ ३५ ॥ दिव्यमपिलक्ष्मणस्यकवचंतद्बाणैर्व्यशीर्यतापतच्च अन्योन्यंकृतप्रतिकृतौकृतेप्रतिकृतंयाभ्यांतादृशौ संधिरार्षः ॥ ३६ ॥ तुमुलं
अत्याश्चर्यंद्रष्टृभिर्विशिष्यज्ञातुमशक्यंच ॥ ३७ ॥

जयाजयविवर्जितावित्यनेनसमयुद्धतोक्ता ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ऐंद्रंऐंद्रास्त्राभिमंत्रितं यद्वाअगस्त्यद्वाराइंद्रदत्तंतूणीराद्रामेणदत्तमित्यर्थः

सुदीर्घकालंतौवीरावन्योन्यंनिशितैःशरैः ॥ अयुध्यतांमहासत्त्वौजयाजयविवर्जितौ ॥ ३८ ॥ एतस्मिन्नंतरेवीरोल
क्ष्मणःपंचभिःशरैः ॥ रावणेःसारथिंसाश्वंरथंचसमचूर्णयत् ॥ ३९ ॥ चिच्छेदकार्मुकंतस्यदर्शयन्हस्तलाघवम् ॥ सो
न्यत्तुकार्मुकंभद्रंसज्यंचक्रेत्वरान्वितः ॥ ४० ॥ तच्चापमपिचिच्छेदलक्ष्मणस्त्रिभिराशुगैः ॥ तमेवच्छिन्नधन्वानंविव्या
धानेकसायकैः ॥ ४१ ॥ पुनरन्यत्समादायकार्मुकंभीमविक्रमः ॥ इंद्रजिल्लक्ष्मणंबाणैःशितैरादित्यसन्निभैः ॥ ४२ ॥
बिभेदवानरान्सर्वान्बाणैरापूरयन्दिशः ॥ ततऐंद्रंसमादायलक्ष्मणोरावणिंप्रति ॥ ४३ ॥ संधायाकृष्यकर्णांतंकार्मु
कंदृढनिष्ठुरम् ॥ उवाचलक्ष्मणोवीरःस्मरन्रामपदांबुजम् ॥ ४४ ॥ धर्मात्मासत्यसंधश्चरामोदाशरथिर्यदि ॥ त्रिलो
क्यामप्रतिद्वंद्वस्तदेनंजहिरावणिम् ॥ ४५ ॥ इत्युक्त्वाबाणमाकर्णाद्विकृष्यतमजिह्मगम् ॥ लक्ष्मणःसमरेवीरःससर्जें
द्रजितंप्रति ॥४६ ॥ सशरःसशिरस्त्राणंश्रीमज्ज्वलितकुंडलम् ॥ प्रमथ्येंद्रजितःकायात्पातयामासभूतले ॥ ४७ ॥ ततःप्र
मुदितादेवाःकीर्तयंतोरघूत्तमम् ॥ ववर्षुःपुष्पवर्षाणिस्तुवंतश्चमुहुर्मुहुः ॥ ४८ ॥ जहर्षशक्रोभगवान्सहदेवैर्महर्षिभिः ॥
आकाशेपिचदेवानांशुश्रुवेदुंदुभिस्वनः ॥ ४९ ॥ विमलंगगनंचासीत्स्थिराभूद्विश्वधारिणी ॥ निहतंरावणिंदृष्ट्वाजय
जल्पसमन्वितः ॥ ५० ॥ गतश्रमःससौमित्रिःशंखमापूरयद्रणे ॥ सिंहनादंततःकृत्वाज्याशब्दमकरोद्विभुः ॥ ५१ ॥

॥ ४३ ॥ ४४ ॥ ४५ ॥ तंबाणंऐंद्रबाणम् ॥ ४६ ॥ ४७ ॥ रघूत्तमंकीर्तयंतः तद्गुणान्कीर्तयंतः तैरेवस्तुवंतश्चेत्यर्थः ॥ ४८ ॥ ४९ ॥ स्थिराभूत् तावत्पर्यं
तंराक्षसभारेणकंपमानेवासीदितिव्यंग्यं जयजल्पःदेवस्रष्टोजयशब्दः ॥ ५० ॥ ५१ ॥

तेगतश्रमाआसन्नितिशेषः स्तुवद्भिर्लक्ष्मणमितिशेषः ॥ ५२ ॥ राक्षसोविभीषणः ॥ ५३ ॥ ५४ ॥ लक्ष्मणात्तदिंद्रजिन्निधनंश्रुत्वेत्यर्थः ॥ ५५ ॥ सर्वैराक्ष

तेननादेनसंहृष्टावानराश्चगतश्रमाः ॥ वानरेंद्रैश्चसहितःस्तुवद्भिर्हृष्टमानसैः ॥ ५२ ॥ लक्ष्मणःपरितुष्टात्माददर्शाभ्ये
त्यराघवम् ॥ हनूमद्राक्षसाभ्यांचसहितोविनयान्वितः ॥ ५३ ॥ ववंदेभ्रातरंरामंज्येष्ठंनारायणंविभुम् ॥ त्वत्प्रसादाद्रघु
श्रेष्ठहतोरावणिराहवे ॥ ५४ ॥ श्रुत्वातल्लक्ष्मणाद्भक्त्यातमालिंग्यरघूत्तमः ॥ मूर्ध्न्यवघ्रायमुदितःसस्नेहमिदमब्रवीत्
॥ ५५ ॥ साधुलक्ष्मणतुष्टोस्मिकर्मतेदुष्करंकृतम् ॥ मेघनादस्यनिधनेजितंसर्वमरिंदम ॥ ५६ ॥ अहोरात्रैस्त्रिभिर्वी
रःकथंचिद्विनिपातितः ॥ निःसपत्नःकृतोस्म्यद्यनिर्यास्यतिहिरावणः ॥ ५७ ॥ पुत्रशोकान्मयायोद्धुंतंहनिष्यामिरावणम्
॥ मेघनादंहतंश्रुत्वालक्ष्मणेनमहाबलम् ॥ ५८ ॥ रावणःपतितोभूमौमूर्छितःपुनरुत्थितः ॥ विललापातिदीनात्मा
पुत्रशोकेनरावणः ॥ ५९ ॥ पुत्रस्यगुणकर्माणिसंस्मरन्पर्यदेवयत् ॥ अद्यदेवगणाःसर्वेलोकपालामहर्षयः ॥ ६० ॥
हतमिंद्रजितंज्ञात्वासुखंस्वप्स्यंतिनिर्भयाः ॥ इत्यादिबहुशःपुत्रलालसोविललापह ॥ ६१ ॥ ततःपरमसंक्रुद्धोरावणो
राक्षसाधिपः ॥ उवाचराक्षसान्सर्वान्विनाशयिषुराहवे ॥ ६२ ॥ सपुत्रवधसंतप्तःशूरःक्रोधवशंगतः ॥ संवीक्ष्यराव
णोबुद्ध्याहंतुंसीतांप्रदुद्रुवे ॥ ६३ ॥ खड्गपाणिमथायांतंक्रुद्धंदृष्ट्वादशाननम् ॥ राक्षसीमध्यगासीताभयशोकाकुला
भवत् ॥ ६४ ॥

सकुलम् ॥ ५६ ॥ ५७ ॥ मयायोद्धुंनिर्यास्यतीत्यन्वयः ॥ ५८ ॥ ५९ ॥ पर्यदेवयत्शोकंकृतवानित्यर्थः ॥ ६० ॥ पुत्रलालसःपुत्रेलालसाप्रीतिर्यस्यसः
॥ ६१ ॥ सर्वान्राक्षसान्विनाशयिषुर्नाशयितुमिच्छुरुवाच युद्धायगच्छध्वमितिशेषः ॥ ६२ ॥ बुद्ध्यासंवीक्ष्य सीतानाशेरामनाशइतिविचार्येत्यर्थः ॥ ६३ ॥ ६४ ॥

॥ ६५ ॥ हेदशग्रीववैश्रवणानुजत्वादिभिर्ननुनामअतिशयेनप्रसिद्धःकथंस्त्रीवधमिच्छसीत्यन्वयः ॥ ६६ ॥ इतिसुपार्श्वेनोक्तःसरावणोन्यवर्ततनिवृत्तः ॥ ६७ ॥ शुचाशोकेनविमूढधीः सभागमनमेवतदवसरेयुक्तंनतुगृहगमनंविमोहः ॥ ६८ ॥ ॥ इतिश्रीमत्सकलराजवि०यु०नवमःसर्गः ॥ ९ ॥ ॥ ७ ॥

एतस्मिन्नंतरेतस्यसचिवोबुद्धिमान्शुचिः ॥ सुपार्श्वोनाममेधावीरावणंवाक्यमब्रवीत् ॥ ६५ ॥ ननुनामदशग्रीवसाक्षाद्वैश्रवणानुजः ॥ वेदविद्याव्रतस्नातःस्वकर्मपरिनिष्ठितः ॥ ६६ ॥ अनेकगुणसंपन्नःकथंस्त्रीवधमिच्छसि ॥ अस्माभिःसहितोयुद्धेहत्वारामंचलक्ष्मणम् ॥ प्राप्स्यसेजानकींशीघ्रमित्युक्तःसन्न्यवर्तत ॥ ६७ ॥ ततोदुरात्मासुहृदानिवेदितंवचःसुधर्म्यंप्रतिगृह्यरावणः ॥ गृहंजगामाशुशुचाविमूढधीःपुनःसभांचप्रययौसुहृद्वृतः ॥ ६८ ॥ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेयुद्धकांडेनवमःसर्गः ॥ ९ ॥ ॥ ७ ॥ ॥ ॥ सविचार्यसभामध्येराक्षसैःसहमंत्रिभिः ॥ निर्ययौयेवशिष्टास्तैराक्षसैःसहराघवम् ॥ १ ॥ शलभःशलभैर्युक्तःप्रज्वलंतमिवानलम् ॥ ततोरामेणनिहताःसर्वेतेराक्षसायुधि ॥ २ ॥ स्वयंरामेणनिहतस्तीक्ष्णबाणेनवक्षसि ॥ व्यथितस्त्वरितंलंकांप्रविवेशदशाननः ॥ ३ ॥ दृष्ट्वारामस्यबहुशःपौरुषंचाप्यमानुषम् ॥ रावणोमारुतेश्चैवशीघ्रंशुक्रांतिकंययौ ॥ ४ ॥ नमस्कृत्यदशग्रीवशुक्रंप्रांजलिरब्रवीत् ॥ भगवन्राघवेणैवंलंकाराक्षसयूथपैः ॥ ५ ॥ विनाशितामहादैत्यानिहताःपुत्रबांधवाः ॥ कथंमेदुःखसंदोहस्त्वयितिष्ठतिसद्गुरौ ॥ ६ ॥ इतिविज्ञापितोदैत्यगुरुःप्राहदशाननम् ॥ होमंकुरुप्रयत्नेनरहसित्वंदशानन ॥ ७॥ यदिविघ्नोनचेद्धोमेतर्हिहोमानलोत्थितः ॥ ८ ॥

॥ १ ॥ २ ॥ ३ ॥ चापीपादपूरणे मारुतेश्चपौरुषंदृष्ट्वेत्यनुकर्षः ॥ ४ ॥ एवंप्रकारेणराक्षसयूथपैः सहलंकाविनाशितेत्यन्वयः ॥ ५ ॥ तदेवाह महादैत्या इत्यादिं दुःखसंदोहोदुःखसमूहः ॥ ६ ॥ ७ ॥ ८ ॥

तूणीरसायकाः तूणीरस्थिताःसायकाइत्यर्थः संभविष्यंतित्वांसम्यक्प्राप्स्यंति ॥ ९ ॥ १० ॥ सर्वत्रसर्वदिक्षु आदिनाअन्यान्यपिच्छिद्राणि ॥ ११ ॥ १२ ॥

महान्रथश्ववाहाश्वचापतूणीरसायकाः॥ संभविष्यंतितैर्युक्तस्त्वमजेयोभविष्यसि ॥ ९ ॥ गृहाणमंत्रान्मद्दत्तान्गच्छ
होमंकुरुद्रुतम् ॥ इत्युक्तस्त्वरितंगत्वारावणोराक्षसाधिपः ॥ १० ॥ गुहांपातालसदृशींमंदिरेस्वेचकारह ॥ लंकाद्वारक
पाटादिबद्धासर्वत्रयत्नतः ॥ ११ ॥ होमद्रव्याणिसंपाद्ययान्युक्तान्याभिचारिके ॥ गुहांप्रविश्यचैकांतेमौनीहोमंप्रच
क्रमे ॥ १२ ॥ उत्थितंधूममालोक्यमहांतंरावणानुजः॥ रामायदर्शयामासहोमधूमंभयाकुलः ॥ १३ ॥ पश्यरामद
शग्रीवोहोमंकर्तुंसमारभत् ॥ यदिहोमःसमाप्तःस्यात्तदाऽजेयोभविष्यति ॥ १४ ॥ अतोविघ्नायहोमस्यप्रेषयाशुहरी
श्वरान् ॥ तथेतिरामःसुग्रीवसंमतेनांगदंकपिम्॥ १५ ॥ हनूमत्प्रमुखान्वीरानादिदेशमहाबलान्॥ प्राकारंलंघयित्वा
तेगत्वारावणमंदिरम् ॥ १६ ॥दशकोट्यःप्लवंगानांगत्वामंदिररक्षकान्॥ चूर्णयामासुरश्वांश्चगजांश्चन्यहनन्क्षणात्
॥ १७ ॥ ततश्चसरमानामप्रभातेहस्तसंज्ञया ॥ विभीषणस्यभार्यासाहोमस्थानमसूचयत् ॥ १८ ॥ गुहापिधानपा
षाणमंगदःपादघट्टनैः॥ चूर्णयित्वामहासत्त्वःप्रविवेशमहागुहाम् ॥ १९ ॥ दृष्ट्वादशाननंतत्रमीलिताक्षंदृढासनम्॥
ततोऽगदाज्ञयासर्वेवानराविविशुर्द्रुतम् ॥ २० ॥ तत्रकोलाहलंचक्रुस्ताडयंतश्चसेवकान् ॥ संभारांश्चिक्षिपुस्तत्रहोम
कुंडेसमंततः ॥ २१ ॥ स्रुवमाच्छिद्यहस्ताच्चरावणस्यबलाद्रुषा ॥ तेनैवसंजघानाशुहनूमान्प्लवगाग्रणीः॥ २२ ॥

रावणानुजोविभीषणः ॥ १३ ॥ समारभत् आरब्धवान् अजेयइतिच्छेदः ॥ १४ ॥ १५॥ १६ ॥ १७॥ विभीषणस्यभार्यासरमानामहस्तसंज्ञयाहोम
स्थानमसूचयत्ज्ञापितवती ॥ १८ ॥ पादघट्टनैःपादाघातैः ॥ १९ ॥ २० ॥ संभारान्होमसाधनानि ॥ २१ ॥ हनूमान्स्रुवमाच्छिद्यतेनैवजघान ॥ ॥२२ ॥

॥ २३ ॥ २४ ॥ विद्दारनखैर्विदीर्णंकृतवान् ॥ २५ ॥ ततःकंचुकाद्विमुक्ताविभक्तामुक्ताः रत्नसंचयैस्ततोविभक्तैःसहभूमौपतिताइत्यर्थः त्रुटितंवानराणामाकर्षणेनभग्नम् ॥ २६ ॥ तस्यरावणस्यपश्यतएवेत्यर्थः ॥ २७ ॥ नीतारावणहोमस्थानमितिशेषः ॥ २८ ॥ करुणंयथास्यात्तथाक्रोशंतीजगादेत्यन्वयः

घ्नंतिदंतैश्चकाष्ठैश्चवानरास्तमितस्ततः ॥ नजहौरावणोध्यानंहतोपिविजिगीषया ॥ २३ ॥ प्रविश्यांतःपुरेवेश्मन्यंगदोवेगवत्तरः ॥ समानयत्केशबंधेधृत्वामंदोदरींशुभाम् ॥ २४ ॥ रावणस्यैवपुरतोविलपंतीमनाथवत् ॥ विददारांगदस्तस्याःकंचुकंरत्नभूषितम् ॥ २५ ॥ मुक्ताविमुक्ताःपतिताःसमंताद्रत्नसंचयैः ॥ श्रोणिसूत्रंनिपतितंत्रुटितंरत्नचित्रितम् ॥ २६ ॥ कटिप्रदेशाद्विस्रस्तानीवीतस्यैवपश्यतः ॥ भूषणानिचसर्वाणिपतितानिसमंततः ॥ २७ ॥ देवगंधर्वकन्याश्चनीताहृष्टैःप्लुवंगमैः ॥ मंदोदरीरुरोदाथरावणस्याग्रतोभृशम् ॥ २८॥ क्रोशंतीकरुणंदीनाजगाददशकंधरम् ॥ निर्लज्जोसिपरैरेवंकेशपाशेविकृष्यते ॥ २९ ॥ भार्यातवैवपुरतःकिंजुहोषिनलज्जसे ॥ हन्यतेपश्यतोयस्यभार्यापापैश्चशत्रुभिः ॥ ३० ॥ मर्तव्यंतेनतत्रैवजीवितान्मरणंवरम् ॥ हामेघनादतेमाताक्लिश्यतेबतवानरैः ॥ ३१ ॥ त्वयिजीवतिमेदुःखमीदृशंचकथंभवेत् ॥ भार्यालज्जाचसंत्यक्ताभर्त्रामेजीविताशया ॥ ३२ ॥ श्रुत्वातद्देवितंराजामंदोदर्यादशाननः ॥ उत्तस्थौखड्गमादायत्यजदेवीमितिब्रुवन् ॥ ३३ ॥ जघानांगदमव्यग्रःकटिदेशेदशाननः ॥ ततोत्सृज्यययुःसर्वेविध्वंस्यहवनंमहत् ॥ ३४ ॥

त्वंनिर्लज्जोसियत्तवभार्यातवैवाग्रेपरैर्वानरैःकेशपाशेधृत्वाविकृष्यतेच ॥ २९ ॥ अतःकिंजुहोषिकिंनलज्जसे तदेवाह हन्यतेपश्यतइत्यादि ॥ ३० ॥ ३१ ॥ त्वयिजीवतिईदृशंदुःखंभवेत् नभवेदेव त्वन्नाशात्तुमेइदंदुःखंप्राप्तम् चपादपूरणे मेभर्त्राजीविताशयाभार्यालज्जाचेत्युभयमपित्यक्तमित्यर्थः ॥ ३२ ॥ ३३ ॥ ततोत्सृज्यततउत्सृज्येतिच्छेदः आर्षःसंधिः महन्महाफलजनकंहवनमित्यर्थः ॥ ३४ ॥

॥ ३५ ॥ जीवताप्राणिनाकिंनदृश्यतेअसंभावितमपिदृश्यतइत्यर्थः ततोममेदृश्यवस्थेतिशोकंत्यजज्ञानंभाविदुर्लंघ्यमितिज्ञानम् ॥ ३६ ॥ अज्ञानकृतस्य वस्तुतोज्ञानेननाशइतिचेत्सर्वमिदमज्ञानकृतमेवेत्याहाज्ञानेति अतएवकर्तव्याकर्तव्यविषयज्ञाननाशकोऽतःसर्वथाज्ञानालंबेनसत्यक्तुंशक्यइतिभावः किंबहुनासर्वःसंसारएवाज्ञानमूलकस्तन्मूलस्यशरीरादिष्वहंज्ञानस्याज्ञानप्रभवत्वादित्याहाज्ञानप्रभवेति ॥ ३७ ॥ पुत्रदारादिसंबंधएतेमदीयाइत्यध्यासः ततःसंसृतिःबंधककर्मोत्पत्तिः एवंहर्षादयोजन्माद्याश्चाज्ञानमूलाः तत्तज्जनककर्मणामज्ञानजन्यत्वात् इदंलब्धमितिहर्षजनकस्येदंमेनष्टमितिशोकजनकस्यायंमे

रामपार्श्वमुपागम्यतस्थुःसर्वेप्रहर्षिताः॥ रावणस्तुततोभार्यामुवाचपरिसांत्वयन्॥ ३५॥ दैवाधीनमिदंभद्रेजीवताकिन्नदृश्यते॥ त्यजशोकंविशालाक्षिज्ञानमालंब्यनिश्चितम्॥ ३६॥ अज्ञानप्रभवःशोकःशोकोज्ञानविनाशकृत्॥ अज्ञानप्रभवाहंधीःशरीरादिष्वनात्मसु॥ ३७॥ तन्मूलःपुत्रदारादिसंबंधःसंसृतिस्ततः॥ हर्षशोकभयक्रोधलोभमोहस्पृहादयः॥ ३८॥ अज्ञानप्रभवाह्येतेजन्ममृत्युजरादयः॥ आत्मातुकेवलःशुद्धोव्यतिरिक्तोह्यलेपकः॥ ३९॥ आनंदरूपोज्ञानात्मासर्वभावविवर्जितः॥ नसंयोगोवियोगोवाविद्यतेकेनचित्सतः॥ ४०॥ एवंज्ञात्वास्वमात्मानंत्यजशोकमनिंदिते॥ इदानीमेवगच्छामिहत्वारामंसलक्ष्मणम्॥ ४१॥ आगमिष्यामिनोचेन्मांदारयिष्यतिसायकैः॥ श्रीरामोवज्रकल्पैश्चततोगच्छामितत्पदम्॥ ४२॥ तदात्वयामेकर्तव्याक्रियामच्छासनास्त्रिये॥ सीतांहत्वामयासार्धंत्वंप्रवेक्ष्यसिपावकम्॥ ४३॥

हंतेत्यादिभयादिजनकज्ञानस्याज्ञानमूलकत्वाच्च ॥ ३८ ॥ आत्मनस्तुवास्तवोनकेनापिसंबंधइत्याह आत्मात्विति बहुशोव्याख्यातमेतत् ॥ ३९ ॥ सर्वभावैःसुखदुःखैर्विवर्जितः तदेवाह नसंयोगइति तद्बुद्धिरेवमुख्यंतयाहर्षशोकादिकारणमितिभावः ॥ ४० ॥ ४१ ॥ दारयिष्यतिदारणेननाशयिष्यतीत्यर्थः वज्रकल्पैःसायकैर्दारयिष्यतीत्यन्वयः ततस्तत्पदंसर्वोत्तमंस्थानंवैकुंठंगमिष्यामि ॥ ४२ ॥ सीतांहत्वात्वयामेक्रियासपिंडीकरणांताकर्तव्या पुत्राभावेतुपत्नी स्यादितिस्मृतेः यद्वामयासार्धंपावकंप्रवेक्ष्यसिसत्यामिच्छायामितिशेषः ॥ ४३ ॥

सत्यंवाक्यंश्रृणुतथाकुरुच मद्वाक्यार्थमनुतिष्ठचेत्यर्थः ॥ ४४ ॥ प्रधानस्यप्रकृतेःपुरुषाणांजीवानांचेश्वरःनियंता ॥ ४५ ॥ तदेवबोधयंतीतदवतारानाह
मत्स्यइति इदंपुराणेप्रसिद्धम् ॥ ४६ ॥ ४७ ॥ क्रोडरूपेणवाराहरूपेण ॥ ४८ ॥ ४९ ॥ जगत्त्रयमाक्रम्यपादैरितिशेषः ॥ ५० ॥ रामःपरशुरामःमुनेःकश्यप

एवंश्रुत्वावचस्तस्यरावणस्यातिदुःखिता ॥ उवाचनाथमेवाक्यंश्रृणुसत्यंतथाकुरु ॥ ४४ ॥ शक्योनराघवोजेतुंत्वया
चान्यैःकदाचन ॥ रामोदेववरःसाक्षात्प्रधानपुरुषेश्वरः ॥ ४५ ॥ मत्स्योभूत्वापुराकल्पेमनुंवैवस्वतंप्रभुः ॥ ररक्षस
कलापद्भ्योराघवोभक्तवत्सलः ॥ ४६ ॥ रामःकूर्मोभवत्पूर्वंलक्षयोजनविस्तृतः ॥ समुद्रमथनेपृष्ठेदधारकनकाचलम्
॥ ४७ ॥ हिरण्याक्षोतिदुर्वृत्तोहतोनेनमहात्मना ॥ क्रोडरूपेणवपुषाक्षोणीमुद्धरताक्वचित् ॥ ४८॥ त्रिलोककंटकंदै
त्यंहिरण्यकशिपुंपुरा ॥ हतवान्नारसिंहेनवपुषारघुनंदनः ॥ ४९ ॥ विक्रमैस्त्रिभिरेवासौबलिंबद्धाजगत्त्रयम् ॥ आ
क्रम्यादात्सुरेंद्रायभृत्यायरघुसत्तमः ॥ ५० ॥ राक्षसाःक्षत्रियाकाराजाताभूमेर्भरावहाः ॥ तान्हत्वाबहुशोरामोभुवं
जित्वाह्यदान्मुनेः ॥ ५१ ॥ सएवसांप्रतंजातोरघुवंशेपरात्परः ॥ भवदर्थेरघुश्रेष्ठोमानुषत्वमुपागतः ॥ ५२ ॥ तस्यभा
र्यांकिमर्थंवाहृतासीतावनाद्बलात् ॥ ममपुत्रविनाशार्थंस्वस्यापिनिधनायच ॥ ५३ ॥ इतःपरंवावैदेहींप्रेषयस्वरघूत्त
मे ॥ विभीषणायराज्यंतुदत्त्वागच्छामहेवनम् ॥ ५४ ॥ मंदोदरीवचःश्रुत्वारावणोवाक्यमब्रवीत् ॥ कथंभद्रेरणेपुत्रा
न्भ्रातॄन्राक्षसमंडलम् ॥ ५५ ॥ घातयित्वाराघवेणजीवामिवनगोचरः ॥ रामेणसहयोत्स्यामिरामबाणैःसुशी
घ्रगैः ॥ ५६ ॥

स्य ॥ ५१ ॥ भवदर्थेभवन्नाशार्थम् ॥ ५२ ॥ ५३ ॥ रघूत्तमेतत्समीपमित्यर्थः ॥ ५४ ॥ ५५ ॥ राघवेणघातयित्वाकथंजीवामिजीवनेप्रियताबुद्धिंकरोमि
मरणस्यसन्निहितत्वाद्विपरीतबुद्धिरावणस्याह रामेणसहेत्यादि जानामिराघवमितिच ॥ ५६ ॥

रामेणनिधनंप्राप्यपरंपदंयास्यामीतिज्ञात्वैवजानकीबलादानीतेत्यन्वयः ॥ ५७ ॥ हेप्रियेत्वांविमुच्यत्यक्त्वासंसारात् ल्यब्लोपेपंचमी संसारंसंत्यज्यमृतै
बँधुभिःसहगमिष्यामि ॥ ५८ ॥ गम्यतेसागतिःस्थानंपरानंदमयीदुःखराहित्याद्ब्रह्मलोकैकदेशवैकुंठरूपाशुद्धारजस्तमोऽस्पृष्टशुद्धसत्त्वमयीयामुमुक्षुभिःसे
व्यतेदहराद्युपासनाभिःप्राप्यते रामेणसंयुगेहतस्तांगतिंगमिष्यामि ॥ ५९ ॥ इहकल्मषाणिराक्षसदेहेनकृतानिपापानि अंतकालेरामनामस्मरणाद्राममूर्तिदर्श
नाच्चप्रक्षाल्यदूरीकृत्यमुक्तिंयास्यामि ॥ ६० ॥ क्लेशादीति अविद्यास्मितारागद्वेषाभिनिवेशाःपंचक्लेशाइतियोगशास्त्रोक्ताः तत्राविद्याअनित्याशुचिदुःखरूपा

विदार्यमाणोयास्यामितद्विष्णोःपरमंपदम् ॥ जानामिराघवंविष्णुंलक्ष्मींजानामिजानकीम् ॥ ज्ञात्वैवजानकीसीता
मयानीतावनाद्बलात् ॥ ५७ ॥ रामेणनिधनंप्राप्ययास्यामीतिपरंपदम् ॥ विमुच्यत्वांतुसंसाराद्गमिष्यामिसहप्रिये
॥ ५८ ॥ परानंदमयीशुद्धासेव्यतेयामुमुक्षुभिः ॥ तांगतिंतुगमिष्यामिहतोरामेणसंयुगे ॥ ५९ ॥ प्रक्षाल्यकल्मषा
णीहमुक्तिंयास्यामिदुर्लभाम् ॥ ६० ॥ क्लेशादिपंचकतरंगयुगंभ्रमाढ्यंदारात्मजाप्तधनबंधुझषाभियुक्तम् ॥ और्वा
नलाभनिजरोषमनंगजालंसंसारसागरमतीत्यहरिंव्रजामि ॥६७॥ इतिश्रीमदध्यात्मरामा०उमामहे०यु०दशमःसर्गः
॥ १० ॥ ॥छ॥ इत्युक्त्वावचनंप्रेम्णाराज्ञींमंदोदरींतदा ॥ रावणःप्रययौयोद्धुंरामेणसहसंयुगे ॥ १ ॥

नात्मसुनित्यशुचिसुखात्मत्वख्यातिः शुक्तिरजतादिज्ञानानिच अस्मिताशरीराद्यतिरिक्तआत्मानास्तीत्येवंप्रत्ययः रागद्वेषौप्रसिद्धौ अभिनिवेशोमरणादित्रासः
तज्जन्याःस्थूलवृत्तयआदिपदग्राह्याःयासांध्यानहेयत्वंयोगशास्त्रेउक्तं तद्रूपास्तरंगायत्रतंचेमंयुगंतत्परिवृत्तिरूपभ्रमेणाढ्यं दारादिरूपैर्झषैर्ग्राहैर्युक्तंतत्तत्प्राणि
नारोषएवौर्वानलाभोयत्रशोषकत्वात्तं अनंगःकामएवजालंबंधकत्वाद्यत्रतं कामेनहितत्तद्विषयेजनोबध्यते ॥ ६१ ॥ ॥ इतिश्रीमत्सकलराज०युद्ध०दश
मःसर्गः ॥ १० ॥ ॥ छ ॥ ॥ इत्युक्त्वेति ॥ १ ॥

वरूथोरथगुप्तिः ॥ २ ॥ उपस्करोयुद्धसामग्री ॥३॥ रणकर्कशंअतिनिर्दयम् ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ समवेताःअग्रेइतिच्छे

दृढंस्यंदनमास्थायवृतोघोरैर्निशाचरैः॥ चक्रैःषोडशभिर्युक्तंसवरूथंसकूबरम् ॥ २ ॥ पिशाचवदनैर्घोरैःखरैर्युक्तंभयावहम् ॥ सर्वास्त्रशस्त्रसहितंसर्वोपस्करसंयुतम् ॥ ३ ॥ निश्चक्रामाथसहसारावणोभीषणाकृतिः॥ आयांतंरावणंदृष्ट्वाभीषणंरणकर्कशम् ॥ ४ ॥ संत्रस्ताभूत्तदासेनावानरीरामपालिता ॥ ५ ॥ हनूमानथचोत्प्लुत्यरावणंयोद्धुमाययौ ॥ आगत्यहनुमान्रक्षोवक्षस्यतुलविक्रमः ॥ ६ ॥ मुष्टिबंधंदृढंबद्धाताडयामासवेगतः ॥ तेनमुष्टिप्रहारेणजानुभ्यामपतद्रथे ॥ ७ ॥ मूर्च्छितोथमुहूर्तेनरावणःपुनरुत्थितः॥ उवाचचहनूमंतंशूरोसिममसंमतः ॥ ८ ॥ हनूमानाहतंधिङ्मांयस्त्वंजीवसिरावण ॥ त्वंतावन्मुष्टिनावक्षोममताडयरावण ॥ ९ ॥ पश्चान्मयाहतःप्राणान्मोक्ष्यसेनात्रसंशयः ॥ तथेतिमुष्टिनावक्षोरावणेनापिताडितः ॥ १० ॥ विघूर्णमाननयनःकिंचित्कश्मलमाययौ ॥ संज्ञामवाप्यकपिराड्रावणंहंतुमुद्यतः ॥ ११ ॥ ततोन्यत्रगतोभीत्यारावणोराक्षसाधिपः ॥ हनूमानंगदश्चैवनलोनीलस्तथैवच ॥ १२ ॥ चत्वारः समवेताग्रेदृष्ट्वाराक्षसपुंगवान् ॥ अग्निवर्णंतथासर्परोमाणंखड्गरोमकम् ॥ १३ ॥ तथावृश्चिकरोमाणंनिर्जघ्नुःक्रमशोसुरान् ॥ चत्वारश्चतुरोहत्वाराक्षसान्भीमविक्रमान्॥ १४ ॥ सिंहनादंपृथक्कृत्वारामपार्श्वमुपागताः॥ ततःक्रुद्धोदशग्रीवःसंदश्यदशनच्छदम्॥१५॥ विवृत्यनयनेक्रूरोराममेवान्वधावत॥ दशग्रीवोरथस्थस्तुरामंवज्रोपमैःशरैः॥१६॥

दःसंधिरार्षः ॥ १३ ॥ १४ ॥ पृथक्सिंहनादंकृत्वाप्रत्येकंसिंहनादंकृत्वेत्यर्थः दशनच्छदंओष्ठम् ॥ १५ ॥ विवृत्यक्रोधवशाद्विस्तार्य ॥ १६ ॥

तोयदोधाराभिरिवपर्वतमितिशेषः विव्यथेव्यथयामास अंतर्भावितण्यर्थः ॥ १७ ॥ १८ ॥ १९ ॥ ममकार्यंरामस्यरथेनयोजनरूपम् ॥ २० ॥ हरितैःहरि
तवर्णैः ॥ २१ ॥ उपचक्रामरामसमीपमाजगामेत्यर्थः अप्रतर्क्यरथेअन्यैःसर्वैरदृश्यरथेप्रांजलिरब्रवीदित्यन्वयः किमब्रवीत्तदाह देवराजेनेत्यादि ॥ २२ ॥

आजघानमहाघोरैर्धाराभिरिवतोयदः॥ रामस्यपुरतःसर्वान्वानरानपिविव्यथे ॥ १७ ॥ ततःपावकसंकाशैःशरैःकांच
नभूषणैः॥ अभ्यवर्षद्रणेरामोदशग्रीवंसमाहितः॥ १८ ॥ रथस्थंरावणंदृष्ट्वाभूमिष्ठंरघुनंदनम्॥ आहूयमातलिंशक्रो
वचनंचेदमब्रवीत् ॥ १९ ॥ रथेनममभूमिष्ठंशीघ्रंयाहिरघूत्तमम्॥ त्वरितंभूतलंगत्वाकुरुकार्यंममानघ ॥ २० ॥ एव
मुक्तोथतंनत्वामातलिर्देवसारथिः ॥ ततोहयैश्चसंयोज्यहरितैःस्यंदनोत्तमम् ॥ २१ ॥ स्वर्गाज्जयार्थंरामस्यह्युपचक्रा
ममातलिः॥ अब्रवीच्चततोराममप्रतर्क्यरथेस्थितः॥ प्रांजलिर्देवराजेनप्रेषितोस्मिरघूत्तम॥ २२ ॥ रथोयंदेवराजस्य
विजयायतवप्रभो॥ प्रेषितश्चमहाराजधनुरैंद्रंचभूषितम् ॥ २३ ॥ अभेद्यंकवचंखड्गंदिव्यतूणीयुगंतथा॥ आरुह्यचर
थंरामरावणंजहिराक्षसम् ॥ २४ ॥ मयासारथिनादेववृत्रंदेवपतिर्यथा ॥ इत्युक्तस्तंपरिक्रम्यनमस्कृत्यरथोत्तमम्
॥ २५ ॥ आरुरोहरथंरामोलोकाँल्लक्ष्म्यानियोजयन् ॥ ततोभवन्महायुद्धंभैरवंरोमहर्षणम् ॥ २६ ॥ महात्मनोराघ
वस्यरावणस्यचधीमतः॥ आग्नेयेनचआग्नेयंदैवंदैवेनराघवः॥ २७॥ अस्त्रंराक्षसराजस्यजघानपरमास्त्रवित्॥ तत
स्तुससृजेघोरंराक्षसंचास्त्रमस्त्रवित् ॥ २८ ॥ क्रोधेनमहताविष्टोरामस्योपरिरावणः ॥ रावणस्यधनुर्मुक्ताःसर्पाभूत्वा
महाविषाः॥ शराःकांचनपुंखाभाराघवंपरितोऽपतन्॥ २९ ॥

अयंदेवराजस्यरथइतिरूपबोधनं सचतवविजयायतेनप्रेषितः ऐंद्रंस्वीयंधनुश्चतेनप्रेषितम् ॥ २३ ॥ २४ ॥ २५ ॥ लोकान्लक्ष्म्यानियोजयन् रावणवध
स्याल्पकालावशिष्टत्वबोधनेनानंदयन्नित्यर्थः ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥

अनलमग्निम् ॥ ३० ॥ पुरःरावणसंमुखे ॥ ३१ ॥ ३२ ॥ ३३ ॥ घोरेणबाणेनेतिशेषः ॥ ३४ ॥ रथोपस्थे रथकेतुंपातयित्वेत्यनेनतस्यवेतसादिवच्छत्रैर्नं
म्रीकरणंविवक्षितं क्रोधमूर्च्छितःउच्छ्रितक्रोधइत्यर्थः ॥ ३५ ॥ आर्ताकारंआर्तसदृशाकारंअभिनीततदाकारं नतुवस्तुतस्तदाकारम् ॥ ३६ ॥ ३७ ॥ ३८ ॥

तैःशरैःसर्पवदनैर्वमद्भिरनलंमुखैः ॥ दिशश्चविदिशश्चैवव्याप्तास्तत्रतदाऽभवन् ॥ ३० ॥ रामःसर्पांस्ततोदृष्ट्वासमंतात्प
रिपूरितान् ॥ सौपर्णमस्त्रंतद्घोरंपुरःप्रावर्तयद्रणे ॥ ३१ ॥ रामेणमुक्तास्तेबाणाभूत्वागरुडरूपिणः ॥ चिच्छिदुःसर्पबा
णांस्तान्समंतात्सर्पशत्रवः ॥ ३२ ॥ अस्त्रेप्रतिहतेयुद्धेरामेणदशकंधरः ॥ अभ्यवर्षत्ततोरामंघोराभिःशरवृष्टिभिः
॥ ३३ ॥ ततःपुनःशरानीकैराममक्लिष्टकारिणम् ॥ अर्दयित्वातुघोरेणमातलिंप्रत्यविध्यत ॥ ३४ ॥ पातयित्वारथोप
स्थेरथकेतुंचकांचनम् ॥ ऐंद्रानश्वानभ्यहनद्रावणःक्रोधमूर्छितः ॥ ३५ ॥ विषेदुर्देवगंधर्वाश्चारणाःपितरस्तथा ॥ आ
र्ताकारंहरिंदृष्ट्वाव्यथिताश्चमहर्षयः ॥ ३६ ॥ व्यथितावानरेंद्राश्चबभूवुःसविभीषणाः ॥ दशास्योविंशतिभुजःप्रगृही
तशरासनः ॥ ३७ ॥ ददृशेरावणस्तत्रमैनाकइवपर्वतः ॥ रामस्तुभ्रुकुटिंबद्ध्वाक्रोधसंरक्तलोचनः ॥ ३८ ॥ कोपंचका
रसदृशंनिर्दहन्निवराक्षसम् ॥ धनुरादायदेवेंद्रधनुराकारमद्भुतम् ॥ ३९ ॥ गृहीत्वापाणिनाबाणंकालानलसमप्रभम् ॥
निर्दहन्निवचक्षुर्भ्यांददर्शरिपुमंतिके ॥ ४० ॥ पराक्रमंदर्शयितुंतेजसाप्रज्वलन्निव ॥ प्रचक्रमेकालरूपीसर्वलोकस्य
पश्यतः ॥ ४१ ॥ विकृष्यचापंरामस्तुरावणंप्रतिविध्यच ॥ हर्षयन्वानरानीकंकालांतकइवाबभौ ॥ ४२ ॥ क्रुद्धंरामस्य
वदनंदृष्ट्वाशत्रुंप्रधावतः ॥ तत्रसुःसर्वभूतानिचचालचवसुंधरा ॥ ४३ ॥

सदृशंकोपं आत्मनःसदृशंकोपं देवेंद्रधनुर्वर्षाकालेदृश्यमानमिंद्रधनुरितिख्यातंतत्सदृशम् ॥ ३९ ॥ ४० ॥ कालरूपीरामस्तद्रूपमनुसंधायप्रचक्रमे रावण
वधार्थमितिशेषः ॥ ४१ ॥ ४२ ॥ ४३॥

॥ ४४ ॥ लोकसंवर्तकोपमंसर्वलोकप्रलयकृदाडीबकादियुद्धसदृशम् ॥ ४५ ॥ मूर्धानःरामबाणकृत्ताइतिशेषः ॥ ४६ ॥ नदिनमित्यादि अनेनानेकदिनंराम
रावणयोर्निरंतरंयुद्धंवृत्तमितिसूचितं तद्रूपंछिन्नमस्तकरावणरूपं पुनःपुनःशिरःप्रादुर्भावात् ॥ ४७ ॥ तदेवाह ततइति एकवर्चसांतुल्यतेजसाम् ॥ ४८ ॥

रामंदृष्ट्वामहारौद्रमुत्पातांश्चसुदारुणान् ॥ त्रस्तानिसर्वभूतानिरावणंचाविशद्भयम् ॥ ४४ ॥ विमानस्थाःसुरगणाः
सिद्धगंधर्वकिन्नराः ॥ ददृशुःसुमहायुद्धंलोकसंवर्तकोपमम् ॥ ऐंद्रमस्त्रंसमादायरावणस्यशिरोच्छिनत् ॥ ४५ ॥ मू
र्धानोरावणस्याथबहवोरुधिरोक्षिताः ॥ गगनात्प्रपतंतिस्मतालादिवफलानिहि ॥ ४६ ॥ नदिनंनचवैरात्रिर्नसंध्यान
दिशोपिवा ॥ प्रकाशंतेनतद्रूपंदृश्यतेतत्रसंगरे ॥ ४७ ॥ ततोरामोबभूवाथविस्मयाविष्टमानसः ॥ शतमेकोत्तरंछिन्नं
शिरसांचैकवर्चसाम् ॥ ४८ ॥ नचैवरावणःशांतोदृश्यतेजीवितक्षयात् ॥ ततःसर्वास्त्रविद्वीरःकौसल्यानंदवर्धनः
॥ ४९ ॥ अस्त्रैश्चबहुभिर्युक्तश्चिंतयामासराघवः ॥ यैर्यैर्बाणैर्हतादैत्यामहासत्वपराक्रमाः ॥ ५० ॥ तएतेनिष्फलंया
तारावणस्यनिपातने ॥ इतिचिंताकुलेरामेसमीपस्थोविभीषणः ॥ ५१ ॥ उवाचराघवंवाक्यंब्रह्मदत्तवरोह्यसौ ॥ वि
च्छिन्नाबाहवोप्यस्यविच्छिन्नानिशिरांसिच ॥ ५२ ॥ उत्पत्स्यंतिपुनःशीघ्रमित्याहभगवानजः ॥ नाभिदेशेमृतंतस्य
कुंडलाकारसंस्थितम् ॥ ५३ ॥ तच्छोषयानलास्त्रेणतस्यमृत्युस्ततोभवेत् ॥ विभीषणवचःश्रुत्वारामःशीघ्रपराक्रमः
॥ ५४ ॥ पावकास्त्रेणसंयोज्यनाभिंविव्याधरक्षसः ॥ अनंतरंचचिच्छेदशिरांसिचमहाबलः ॥ ५५ ॥ बाहूनपिचसंर
ब्धोरावणस्यरघूत्तमः ॥ ततोघोरांमहाशक्तिमादायदशकंधरः ॥ ५६ ॥

शांतोगतचेष्टः ॥ ४९ ॥ ५० ॥ निष्फलत्वंयाताःप्राप्ताः निष्फलाजाताइतिक्वचित्पाठः ॥ ५१ ॥ ५२ ॥ कुंडलाकारेगर्तेसंस्थितं ॥ ५३ ॥ अनलास्त्रेणाग्ने
यास्त्रेण ॥ ५४ ॥ ५५ ॥ ५६ ॥

शितैस्तीक्ष्णैः ॥ ५७ ॥ तेजोपगमाच्चम्लानरूपोबभूव ॥ ५८ ॥ मुख्यशिरसेत्यनेनान्यानियुद्धादिकालेएवप्रादुर्भवंतीतिसूचितम् ॥ ५९ ॥ ६० ॥ ६१ ॥ प्रथितःकथितः उत्तमांगंशिरः ॥ ६२ ॥ मर्मणिउरस्थलरूपे ॥ ६३ ॥ ६४ ॥ आकाशमयमित्यनेनातिमहत्त्वंसूचितम् आकाशपदेनव्यापकत्वाद्धिरण्यग

विभीषणवधार्थायचिक्षेपक्रोधविह्वलः॥चिच्छेदराघवोबाणैस्तांशितैर्हेमभूषितैः॥५७॥ दशग्रीवशिरश्छेदात्तदातेजोविनिर्गतम्॥म्लानरूपोबभूवाथच्छिन्नैःशीर्षैर्भयंकरैः॥५८॥ एकेनमुख्यशिरसाबाहुभ्यांरावणोबभौ॥रावणस्तुपुनःक्रुद्धोनानाशस्त्रास्त्रवृष्टिभिः ॥ ५९ ॥ ववर्षरामंतंरामस्तथाबाणैर्ववर्षच ॥ ततोयुद्धमभूद्घोरंतुमुलंलोमहर्षणम् ॥ ६० ॥ अथसंस्मारयामासमातलीराघवंतदा ॥ विसृज्यास्त्रंवधायास्यब्राह्मंशीघ्रंरघूत्तम ॥ ६१ ॥ विनाशकालःप्रथितोयःसुरैःसोद्यवर्तते ॥ उत्तमांगंनचैतस्यच्छेत्तव्यंराघवत्वया ॥ ६२ ॥ नैवशीर्ष्णिप्रभोवध्योवध्यएवहिमर्मणि ॥ ततःसंस्मारितोरामस्तेनवाक्येनमातलेः॥ ६३ ॥ जग्राहसशरंदीप्तंनिःश्वसंतमिवोरगम् ॥ यस्यपार्श्वेतुपवनःफलेभास्करपावकौ ॥ ६४ ॥ शरीरमाकाशमयंगौरवेमेरुमंदरौ ॥ पर्वस्वपिचविन्यस्तालोकपालामहौजसः ॥ ६५ ॥ जाज्वल्यमानंवपुषाभातंभास्करवर्चसा॥ तमुग्रमस्त्रंलोकानांभयनाशनमद्भुतम् ॥ ६६ ॥ अभिमंत्र्यततोरामस्तंमहेषुंमहाभुजः॥ वेदप्रोक्तेनविधिनासंदधेकार्मुकेबली ॥ ६७॥ तस्मिन्संधीयमानेतुराघवेणशरोत्तमे ॥ सर्वभूतानिवित्रेसुश्चचालचवसुंधरा ॥ ६८ ॥ सरावणायसंक्रुद्धोभृशमानम्यकार्मुकम् ॥ चिक्षेपपरमायत्तस्तमस्त्रंमर्मघातिनम् ॥ ६९ ॥

र्भोवा गौरवेमेरुमंदरौयस्यसदृशावितिशेषः ॥ ६५ ॥ भास्करवर्चसाभातंतत्तुल्यतेजःप्रकाशम् अस्त्रशब्दोर्थवाचीशस्त्रपार्यायोत्र ॥ ६६ ॥ वेदप्रोक्तेनब्रह्मास्त्रविधिनाअभिमंत्र्येत्यन्वयः ॥ ६७ ॥ ६८ ॥ भृशमतिशयेन ॥ ६९ ॥

वज्रपाणिनात्यक्तोवज्रइवसबाणोरावणोरसिन्यपतत् ॥ ७० ॥ ७१ ॥ वेगवशाद्रावणप्राणहरणोत्तरंभूमौप्रविश्यपुनःस्वाधिष्ठातृदेवतातेजोवशाद्रामतूणीरं प्रविष्टः ॥ ७२ ॥ भ्रमीति शरपतनकालजातभ्रमिवेगेन ॥ ७३ ॥ ७४ ॥ दशग्रीवनिधनंरामविजयंचदृष्ट्वाविदुद्रुवुरित्यन्वयः ॥ ७५ ॥ ततोरामजयंरावण

सवज्रइवदुर्धर्षोवज्रपाणिविसर्जितः ॥ कृतांतइवघोरास्योन्यपतद्रावणोरसि ॥ ७० ॥ सनिमग्नोमहाघोरःशरीरांतकरःपरः ॥ बिभेदहृदयंतूर्णंरावणस्यमहात्मनः ॥ ७१ ॥ रावणस्याहरत्प्राणान्विवेशधरणीतले ॥ सशरोरावणंहत्वारामतूणीरमाविशत् ॥ ७२ ॥ तस्यहस्तात्पपाताशुसशरंकार्मुकंमहत् ॥ गतासुर्भ्रमिवेगेनराक्षसेंद्रोपतद्भुवि ॥ ७३ ॥ तंदृष्ट्वापतितंभूमौहतशेषाश्चराक्षसाः ॥ हतनाथाभयत्रस्ताद्रुद्रुवुःसर्वतोदिशम् ॥ ७४ ॥ दशग्रीवस्यनिधनंविजयंराघवस्यच ॥ ततोविनेदुःसंहृष्टावानराजितकाशिनः ॥ ७५ ॥ वदंतोरामविजयंरावणस्यचतद्वधम् ॥ अथांतरिक्षेव्यनदत्सौम्यस्त्रिदशदुंदुभिः ॥ ७६ ॥ पपातपुष्पवृष्टिश्चसमंताद्राघवोपरि ॥ तुष्टुवुर्मुनयःसिद्धाश्चारणाश्चदिवौकसः ॥७७॥ अथांतरिक्षेननृतुःसर्वतोप्सरसोमुदा ॥ रावणस्यचदेहोत्थंज्योतिरादित्यवत्स्फुरत् ॥ ७८ ॥ प्रविवेशरघुश्रेष्ठंदेवानांपश्यतांसताम् ॥ देवाऊचुरहोभाग्यंरावणस्यमहात्मनः ॥ ७९ ॥ वयंतुसात्विकादेवाविष्णोःकारुण्यभाजनाः ॥ भयदुःखादिभिर्व्याप्ताःसंसारेपरिवर्तिनः ॥ ८० ॥

स्यतद्वधंततोरामाद्वधंचवदंतोविनेदुरनेनान्वयः सिंहनादांश्चक्रुरित्यर्थः ॥ ७६ ॥ ७७ ॥ सूर्यतुल्यंरावणस्यदेहोत्थंतेजोरघुश्रेष्ठंप्रविवेशतंप्रविश्यतदाज्ञयावैकुंठलोकंजगामेतिबोध्यम् ॥ ७८ ॥ ७९ ॥ वयंत्विति वयंदेवाअपितेजसाद्योतमानाअपिसात्विकाअपिसत्वप्रधानाअपिविष्णोर्भगवतःकरुणापात्रभूताअपिभवदुःखादिव्याप्ताःपुनःपुनःसंसारभाजश्च ॥ ८० ॥

अयंराक्षसःक्रूरोपिब्रह्महापिअत्यंततामसोपिपरदाररतत्वाद्विगुणोपि ॥ ८१ ॥ रामंप्रविष्टवांस्तत्प्रवेशेनमोक्षद्वारंलब्धवान् वैकुंठगतानांप्रतिसंचरेमुक्तिश्रवणादित्याश्चर्यमित्यर्थः ॥ ८२ ॥ रावणोद्वेषसंयुक्तोपिभृत्यैःसहरामचरित्रंशुकसारणादिभ्यःश्रुत्वातद्द्वेषादेवानिशंतंहृदिभावयन्अत्रश्रुत्वाभावयन्नित्यनेनश्रवणमनननिदिध्यासनसंपदुक्ता मननमनुक्तमपिअर्थाक्षिप्तंबोध्यम् तथारामात्स्वनिधनंश्रुत्वाभयात्सर्वत्रराघवंपश्यन्इदंफलंलब्धवानितिशेषः तस्यचदर्श

अयंतुराक्षसःक्रूरोब्रह्महातीवतामसः ॥ परदाररतोविष्णुद्वेषीतापसहिंसकः ॥ ८१ ॥ पश्यत्सुसर्वभूतेषुराममेवप्रविष्टवान् ॥ एवंब्रुवत्सुदेवेषुनारदःप्राहसुस्मितः ॥ ८२ ॥ शृणुतात्रसुरायूयंधर्मतत्त्वविचक्षणाः ॥ रावणोराघवद्वेषादनिशंहृदिभावयन् ॥ ८३ ॥ भृत्यैःसहसदारामचरित्रंद्वेषसंयुतः ॥ श्रुत्वारामात्स्वनिधनंभयात्सर्वत्रराघवम् ॥ ८४ ॥ पश्यन्ननुदिनंस्वप्नेराममेवानुपश्यति ॥ क्रोधोपिरावणस्याशुगुरुबोधाधिकोभवत् ॥ ८५ ॥ रामेणनिहतश्चांतेनिर्धूताशेषकल्मषः ॥ रामसायुज्यमेवापरावणोमुक्तबंधनः ॥ ८६ ॥

नस्यसार्वकालिकत्वमाह अनुदिनंस्वप्नेपिराममेवपश्यति अनेनसाक्षात्कारउक्तः एवंसगुणविषयत्वादेषांवैकुंठलोकप्राप्तिद्वारामोक्षजनकत्वंदहराद्युपासनावदितिबोध्यम् ॥ ८३ ॥ ८४ ॥ उपसंहरति क्रोधोपीति अपिनायःप्रीत्यैवमाचरेत्तस्यमुक्तिःसर्वथेतिध्वनितम् गुरुबोधःगुरुसेवाजन्योबोधस्तद्वत् अधिकःसर्वधर्माधिकोऽभवदित्यर्थः ॥ ८५ ॥ भगवतोहस्तान्मृत्युरप्येवंफलकइत्याह रामेणेति सहसमानेदेशेयुज्यतेसयुक्तस्यभावःसायुज्यम् समानलोकवासइत्यर्थः तदेवाभिप्रेत्याग्रेवक्ष्यति वैकुंठंयातीति ॥ ८६ ॥

दुरात्मापरानिष्टादिचिंतकः पापिष्ठत्वंकायिकपापवत्त्वम् तदेवस्फुटयति परधनपरदारेत्यादि स्नेहाद्भयाद्वेत्यनेनोभयोस्तुल्यफलत्वंस्नेहाद्गोप्यादिभयाद्राव
णादिस्तत्रस्नेहवतामैहलौकिकसुखाधिक्यंविशेषइतिबोध्यम् पारलौकिकंतुफलंतुल्यमित्याशयेनवाशब्दः अंतरंगंअंतःकरणंतच्छुद्धंयस्यसःसुरवेराब्रह्मा
॥ ८७ ॥ त्रिभुवनस्यविषमंदुःखदं शरैर्दलितंविदारितंवपुर्यस्यसः बंधुरांगःयथोचितंनतोन्नतांगः एवंध्यातॄणांसर्वभयापहमितितंत्रेषुप्रसिद्धम् ॥ ८८ ॥ इति

पापिष्ठोवादुरात्मापरधनपरदारेषुसक्तोयदिस्यान्नित्यंस्नेहाद्भयाद्वारघुकुलतिलकंभावयन्संपरेतः ॥ भूत्वाशुद्धांतरंगो
भवशतजनितानेकदोषैर्विमुक्तःसद्योरामस्यविष्णोःसुरवरविनुतंयातिवैकुंठमाद्यम् ॥ ८७ ॥ हत्वायुद्धेदशास्यंत्रिभु
वनविषमंवामहस्तेनचापंभूमौविष्टभ्यतिष्ठन्नितरकरधृतंभ्रामयन्बाणमेकम् ॥ आरक्तोपांतनेत्रःशरदलितवपुःसूर्य
कोटिप्रकाशोवीरश्रीबंधुरांगस्त्रिदशपतिनुतःपातुमांवीररामः ॥ ८८ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवा
देयुद्धकांडेरावणवधोनामएकादशःसर्गः ॥ ११ ॥ ॥छ॥ ॥ रामोविभीषणंदृष्ट्वाहनूमंतंतथांगदम् ॥ लक्ष्मणंक
पिराजंचजांबवंतंतथापरान् ॥ १ ॥ परितुष्टेनमनसासर्वानेवाब्रवीद्वचः ॥ भवतांबाहुवीर्येणनिहतोरावणोमया ॥२॥
कीर्तिःस्थास्यतिवःपुण्यायावच्चंद्रदिवाकरौ ॥ कीर्तयिष्यंतिभवतांकथांत्रैलोक्यपावनीम् ॥ ३ ॥ ययोपेतांकलिहरां
यास्यंतिपरमांगतिम् ॥ एतस्मिन्नंतरेदृष्ट्वारावणंपतितंभुवि ॥ ४ ॥ मंदोदरीमुखाःसर्वाःस्त्रियोरावणपालिताः ॥ प
तितारावणस्याग्रेशोचंत्यःपर्यदेवयन् ॥ ५ ॥

श्रीमत्सकल०युद्धकांडेएकादशःसर्गः ॥ ११ ॥ ॥छ॥ रामइति ॥ १ ॥ तेषांवीराणामुत्साहार्थंवाक्यमाह भवतामिति एवंविधवाक्येनबो
धितावीरारणेप्राणव्ययेनापिस्वाभीष्टंसाधयंतीतिसूचितम् ॥ २ ॥ अथपारितोषिकंददाति कीर्तिरिति वःपुण्याकीर्तिः स्थास्यतीति किंचययाकीर्त्यासंयुक्ता
मिमांभवतांविजयकथांयेकीर्तयिष्यंतितेपरमांगतिंयास्यंति ॥ ३ ॥ ४ ॥ ५ ॥

पर्यदेवयत्शोकेनविललापेत्यर्थः ॥ ६ ॥ बोधयस्वशोकापनयनवाक्यःसंसारानित्यत्वंबोधयेत्यर्थः ॥ ७ ॥ ८ ॥ मृतकस्यरावणस्यसमीपेमृतकतुल्यतया निश्चेष्टंपतितम् ॥ ९ ॥ अयंतवकःआत्मनःशुद्धबुद्धस्वभावत्वान्नकेनापिसंबंधइतिभावः ॥ १० ॥ किंचसृष्टेःपुरातवास्यकश्चित्संबंधोनैवासीत्एवमितः परमिदानींचनकश्चित्संबंधःपूर्वापरकालयोःसंबंधाभावेनमध्येपिनवास्तवःसंबंधःकिंत्वाभिमानिकएवेतिभावः तदेवदृष्टांतेनाहयद्वदिति तोयौघेपतिताःसिकताजलवेगाहताः किंचिद्दूरंमिलितायांतिततःकाश्चिद्गुरुतयाअधस्तिष्ठंतिलघुतयाविलीयंतेवाअपरागच्छंतितासांयथानकश्चित्संबंधः ॥ ११ ॥ एवंदेहिनः कालेनतद्वेगेनसंयुज्यंतेवियुज्यंतेचवस्तुतश्चतेषांनकश्चित्संबंधइत्यर्थः दृष्टांतांतरमाह यथेति धानाभृष्टयवास्तासुऊर्ध्वाधरभावेनकाश्चिद्धानाः क्षणंभवंति ततःपुनस्तासांस्निग्धत्वात्ततोनभवंतिवियुज्यंते ॥ १२ ॥ एवमीशमाययाप्रेरितानिभूतानिभूतेषुसंयुज्यंतेवियुज्यंतेचेत्यर्थः एवमयंसंयोगोवियोगश्चतवैवेतिन किंतुसर्वेषामस्माकंतुल्यइत्याह त्वंचेमेवयमित्यादि अस्माकमप्येवंवियोगोभावीतिभावः ॥ १३ ॥

विभीषणःशुशोचार्तःशोकेनमहतावृतः ॥ पतितोरावणस्याग्रेबहुधापर्यदेवयत् ॥ ६ ॥ रामस्तुलक्ष्मणंप्राहबोधयस्व विभीषणम् ॥ करोतुभ्रातृसंस्कारंकिंविलंबेनमानद ॥७॥ स्त्रियोमंदोदरीमुख्याःपतिताविलपंतिच ॥ निवारयतुताः सर्वाराक्षसीरावणप्रियाः ॥ ८ ॥ एवमुक्तोथरामेणलक्ष्मणोऽगाद्विभीषणम् ॥ उवाचमृतकोपांतेपतितंमृतकोपमम् ॥ ९ ॥ शोकेनमहताविष्टंसौमित्रिरिदमब्रवीत् ॥ यंशोचसित्वंदुःखेनकोयंतवविभीषण ॥ १० ॥ त्वंवास्यकतमःसृष्टेःपुरेदानीमतःपरम् ॥ यद्वत्तोयौघपतिताःसिकतायांतितद्वशाः ॥ ११ ॥ संयुज्यंतेवियुज्यंतेतथाकालेनदेहिनः ॥ यथाधानासुवैधानाभवंतिनभवंतिच ॥ १२॥ एवंभूतेषुभूतानिप्रेरितानीशमायया ॥ त्वंचेमेवयमन्येचतुल्याःकालवशोद्भवाः ॥ १३ ॥

यदायस्मिन्कालेयस्माज्जन्ममृत्यूकर्मसहकृतौभगवताकल्पितौतदातस्मिन्कालेतौभविष्यतएवनत्वन्यथेत्यर्थः ॥ १४ ॥ यथाबालोनपेक्षोपिबाल्यस्वभावादेवसृष्टैर्मृन्मयादिभिश्चित्रैः स्वनिर्मितानितादृशानिसृजतिद्वेस्त्रीपुरुषाकारेकृत्वातृतीयमेकंनिर्मायेतइदंजातमनयोरपत्यमितिव्यवहरतिपरस्पराभिघातेननाशयतिचैवमीश्वरोऽनपेक्षोपिसर्जनजन्यफलानपेक्षोऽपिआत्मसृष्टैरेवभूतैःप्राणिभिःस्त्रीपुरुषयाम्यव्यवहारद्वारापराणिसृजतिततः केनचित्कंचिद्धंतिच ननुतेषामेवतत्रकर्तृत्वमस्त्वित्यत्राह अस्वतंत्रैरिति तृणमात्रचालनेपिस्वातंत्र्यरहितैः ननुतत्किंसृज्यमानदेहएवजीवोनेत्याह देहेनेति जीवास्तेनदेहेनदेहिनोनतुदेहात्मा

जन्ममृत्यूयदायस्मात्तदातस्माद्भविष्यतः ॥ ईश्वरःसर्वभूतानिभूतैःसृजतिहंत्यजः॥ १४ ॥ आत्मसृष्टैरस्वतंत्रैरनपेक्षोऽपिबालवत् ॥ देहेनदेहिनोजीवादेहाद्देहोभिजायते ॥ १५॥ बीजादेवयथाबीजंदेहान्यइवशाश्वतः॥ देहिदेहविभागोयमविवेककृतःपुरा ॥ १६ ॥ नानात्वंजन्मनाशश्चक्षयोवृद्धिःक्रियाफलम् ॥ द्रष्टुराभांत्यतद्धर्मायथाऽग्नेर्दारुविक्रियाः ॥ १७ ॥

नएवते ननुदेहःकिमपिकारणमेवनेत्याह देहादिति कर्मद्वारेतिशेषः ॥ १५ ॥ अस्यव्यवहारस्यानादित्वेदृष्टांतमाह बीजादेवेति सचदेहादन्यइवअन्यएवेत्यर्थः भेदकंधर्ममाह शाश्वतइति तेननित्यत्वानित्यत्वाभ्यांदेहदेहिनोर्भेदउक्तः वस्तुतस्तस्यदेहिव्यवहारप्रयोजकोदेहसंबंधोपिकल्पितएवेत्याह देहीति अविवेककृतःअंतःकरणेनात्मनोऽविवेकात्अहंममेत्यादिबुद्धिरितिभावः एवंचदेहएवममताबुद्धेरवास्तवत्वेभ्रात्रादौममत्वबुद्धिःसुतरामवास्तवीतिसूचितम् ॥ १६ ॥ वस्तुतोभ्रात्रादौस्वातिरिक्तत्वबुद्धिर्नाशादिबुद्धिश्चसर्वंमिथ्यैवशुक्तिरजतादिबुद्धिवदित्याह नानात्वमिति नानात्वंभेदःक्रियाफलंसुखदुःखेएतेअतद्धर्माअनात्मधर्माद्रष्टुस्तद्वृत्तित्वेनभांति अंतःकरणतत्कार्यधर्माएवैतेतदविवेकात्आत्मनिभांति यथादारुगतवक्रत्वादिनातद्गताग्नेर्वक्रत्वादीतिभावः ॥ १७ ॥

तइमेनानात्वादयः देहसंयोगाद्देहपदेनांतःकरणमप्युपलक्ष्यते असद्ग्रहोहंममताबुद्धिः यथासदसद्वान्यत्किंचिद्वस्तुआग्रहाद्ध्यायतोभृंगिकीटन्यायेनतथा
प्रथाभवतिध्यायमानवस्तुसदसत्त्वाभ्यांध्यातुरपिसदसत्त्वप्रथाभवतितद्वत् अनेनवास्तवतानाशादीनांनिराकृता एवंचशोकोनिरालंबइतितात्पर्यम् ॥ १८ ॥
ज्ञानाच्चदुःखनिवृत्तिरित्याह प्रसुप्तस्येति यथाप्रसुप्ताहंभावाभावात्संसृतिर्नभाति प्रस्वापोत्रसुषुप्तिःतयाविमुक्तस्यतत्त्वज्ञानाज्जीवन्मुक्तस्यजीवतोऽपिअनहंकृतेः
अहंकाराभावात्तथासंसाराभावात्तज्जन्यदुःखशोकाद्यभावइत्यर्थः ॥ १९ ॥ उपसंहरति तस्मादिति मायामनोधर्मंमायापरिणाममनोधर्मंअहंममताभ्रमंजहि

तइमेदेहसंयोगादात्मनाभांत्यसद्ग्रहात् ॥ प्रथायथातथाचान्यद्ध्यायतोसत्सदाग्रहात् ॥ १८ ॥ प्रसुप्तस्यानहंभावात्तदा
भातिनसंसृतिः ॥ जीवतोऽपितथातद्वद्विमुक्तस्यानहंकृतेः ॥ १९ ॥ तस्मान्मायामनोधर्मंजह्यहंममताभ्रमम् ॥ रामभद्रे
भगवतिमनोधेह्यात्मनीश्वरे ॥ २० ॥ सर्वभूतात्मनिपरेमायामानुषरूपिणि ॥ बाह्येंद्रियार्थसंबंधात्त्याजयित्वामनः
शनैः ॥ २१ ॥ तत्रदोषान्दर्शयित्वारामानंदेनियोजय ॥ देहबुद्ध्याभवेद्भ्रातापितामातासुहृत्प्रियः ॥ २२ ॥ विलक्षणं
यदादेहाज्ज्ञानात्यात्मानमात्मना ॥ तदाकःकस्यवाबंधुर्भ्रातामातापितासुहृत् ॥ २३ ॥ मिथ्याज्ञानवशाज्जातादारा
गारादयःसदा ॥ शब्दादयश्चविषयाविविधाश्चैवसंपदः ॥ २४ ॥

अन्यधर्मस्यान्यनिष्ठत्वेनग्रहाद्भ्रमत्वंमायापरिणामत्वेनमनसोजडत्वमुक्तंमनोमात्रांतःकरणं आत्मनीश्वरेइत्यनेनतस्यैवमुख्यमात्मत्वंमन्ये तत्प्रति
बिंबत्वादात्मव्यवहारमात्रमितिभावः ॥ २० ॥ उक्तमेवपुनराह सर्वभूतात्मनीति बाह्येंद्रियविषयसंबंधात् मनोदूरीकृत्यभगवतिनियोजय तत्संबंधत्यागो
पायमाह तत्रदोषानिति ननुभगवतितदनुसंधानेऽपिकथंसंसारहानिस्तत्राह देहबुद्ध्येति देहेंतःकरणादावात्मबुद्ध्येत्यर्थः भगवतोमनसानुसंधानेतत्प्रसादाद्देह
भिन्नात्मप्रतीतौतदविवेककृतसंसारस्यस्वतएवहानिरितिभावः ॥ २१ ॥ २२ ॥ २३ ॥ तदेवपूनर्दार्ढ्यायाह मिथ्येति अगारंगृहम् ॥ २४ ॥

अज्ञानस्याजस्रंपरिणामास्वभावतयातज्जन्यानांक्षणसंगमभंगुरत्वम् ॥ २५ ॥ प्रारब्धभोगंविनादुस्त्यजमितिबुद्ध्याराज्यादिभुंजन्ननुवर्तस्वतत्पालनेयतस्व
॥ २६ ॥ भूतंभविष्यच्चाभजन्कथमिदंगतंकथमग्रेभविष्यतीत्यविचारयन् एवंभवदोषैर्नलिप्यसे ॥ २७ ॥ २८ ॥ यथावद्वचनंयथोक्तंवचनम् ॥ २९ ॥

बलंकोशोभृत्यवर्गोराज्यंभूमिःसुतादयः ॥ अज्ञानजत्वात्सर्वेतेक्षणसंगमभंगुराः ॥ २५ ॥ अथोत्तिष्ठहृदारामंभावयन्भक्तिभावितम् ॥ अनुवर्तस्वराज्यादिभुंजन्प्रारब्धमन्वहम् ॥ २६ ॥ भूतंभविष्यद्भजन्वर्तमानमथाचरन् ॥ विहरस्वयथान्यायंभवदोषैर्नलिप्यसे ॥ २७ ॥ आज्ञापयतिरामस्त्वांयद्भ्रातुःसांपरायिकम् ॥ तत्कुरुष्वयथाशास्त्रंरुदतीश्चापियोषितः ॥ २८ ॥ निवारयमहाबुद्धेलंकांगच्छंतुमाचिरम् ॥ श्रुत्वायथावद्वचनंलक्ष्मणस्यविभीषणः ॥ २९ ॥ त्यक्त्वाशोकंचमोहंचरामपार्श्वमुपागमत् ॥ विमृश्यबुद्ध्याधर्मज्ञोधर्मार्थसहितंवचः ॥ ३० ॥ रामस्यैवानुवृत्त्यर्थमुत्तरंपर्यभाषत ॥ नृशंसमनृतंक्रूरंत्यक्तधर्मव्रतंप्रभो ॥ ३१ ॥ नार्होऽस्मिदेवसंस्कर्तुंपरदाराभिमर्शिनम् ॥ श्रुत्वातद्वचनंप्रीतोरामोवचनमब्रवीत् ॥ ३२ ॥ मरणांतानिवैराणिनिर्वृत्तंनःप्रयोजनम् ॥ क्रियतामस्यसंस्कारोममाप्येषयथातव ॥ ३३ ॥ रामाज्ञांशिरसाधृत्वाशीघ्रमेवविभीषणः ॥ सांत्ववाक्यैर्महाबुद्धिराज्ञींमंदोदरींतदा ॥ ३४ ॥ सांत्वयामासधर्मात्माधर्मबुद्धिर्विभीषणः ॥ त्वरयामासधर्मज्ञःसंस्कारार्थंस्वबांधवान् ॥ ३५ ॥ चित्यांनिवेश्यविधिवत्पितृमेधविधानतः ॥ आहिताग्नेर्यथाकार्यंरावणस्यविभीषणः ॥ ३६ ॥

विमृश्यभगवच्छत्रोःक्रियाकरणेभगवतोदुःखंस्यादितिविचार्य ॥ ३० ॥ ३१ ॥ ३२ ॥ निर्वृत्तंनिष्पन्नंयथातवभ्रातातथाममापिमरणेनविरोधस्यापगमात्
॥ ३३ ॥ सांत्ववाक्यैःशोकापनोदकवाक्यैः ॥ ३४ ॥ ३५ ॥ अहिताग्नेरग्निहोत्रिणोयथाकार्यंयोग्यंतथैवौर्ध्वदेहिकमकरोत् ॥ ३६ ॥

विधियुक्तंमंत्रादियुक्तम् ॥ ३७ ॥ ३८ ॥ प्रदायचोदकंतस्मैइतिशुद्धंजलंकरकादिपात्रेऽश्वत्थशाखायांतदुद्देशेनबद्धेत्यर्थः अनुनयामासविगतशोकाश्चकार ॥ ३९ ॥ गम्यतामितिविभीषणेनोक्ताइतिशेषः ॥ ४० ॥ युद्धमूर्ध्निहतस्यसद्यःशौचत्वात्तदहरेवसर्वंप्रेतकृत्यंसमाप्यरामसमीपमागमनम् ॥ ४१ ॥ ४२ ॥

तथैवसर्वमकरोद्बंधुभिःसहमंत्रिभिः ॥ ददौचपावकंतस्यविधियुक्तंविभीषणः ॥ ३७ ॥ स्नात्वाचैवार्द्रवस्त्रेणतिलान्दर्भाभिमिश्रितान् ॥ उदकेनचसंमिश्रान्प्रदायविधिपूर्वकम् ॥ ३८ ॥ प्रदायचोदकंतस्मैमूर्ध्नाचैनंप्रणम्यच ॥ ताःस्त्रियोनुनयामाससांत्वमुक्त्वापुनःपुनः ॥ ३९ ॥ गम्यतामितिताःसर्वाविविशुर्नगरंतदा ॥ प्रविष्टासुचसर्वासुराक्षसीषुविभीषणः ॥ ४० ॥ रामपार्श्वमुपागत्यतदातिष्ठद्विनीतवत् ॥ रामोपिसहसैन्येनससुग्रीवःसलक्ष्मणः ॥ ४१ ॥ हर्षंलेभेरिपून्हत्वायथावृत्रंशतक्रतुः ॥ मातलिश्चतदारामंपरिक्रम्याभिवंद्यच ॥ ४२ ॥ अनुज्ञातश्चरामेणययौस्वर्गंविहायसा ॥ ततोहृष्टमनारामोलक्ष्मणंचेदमब्रवीत् ॥ ४३ ॥ विभीषणायमेलंकाराज्यंदत्तंपुरैवहि ॥ इदानीमपिगत्वात्वंलंकामध्येविभीषणम् ॥ ४४ ॥ अभिषेचयविप्रैश्चमंत्रवद्विधिपूर्वकम् ॥ इत्युक्तोलक्ष्मणस्तूर्णंजगामसहवानरैः ॥ ४५ ॥ लंकांसुवर्णकलशैःसमुद्रजलसंयुतैः ॥ अभिषेकंशुभंचक्रेराक्षसेंद्रस्यधीमतः ॥ ४६ ॥ ततःपौरजनैःसार्धंनानोपायनपाणिभिः ॥ विभीषणःससौमित्रिरुपायनपुरस्कृतः ॥ ४७ ॥ दंडप्रणाममकरोद्रामस्याक्लिष्टकर्मणः ॥ रामोविभीषणंदृष्ट्वाप्राप्तराज्यंमुदान्वितः ॥ ४८ ॥ कृतकृत्यमिवात्मानममन्यतसहानुजः ॥ सुग्रीवंचसमालिंग्यरामोवाक्यमथाब्रवीत् ॥ ४९ ॥

॥ ४३ ॥ ४४ ॥ ४५ ॥ लंकांजगामेत्यन्वयः ततःस्वर्णकलशैराक्षसेंद्रस्याभिषेकंप्रचक्रे ॥ ४६ ॥ उपायनपुरस्कृतोग्रेकृतमुपायनंयेन सः आहिताग्न्यादित्वात्परनिपातः ॥ ४७ ॥ आगत्यदंडप्रणामंदंडवत्प्रणामम् ॥ ४८ ॥ कृतकृत्यमिवप्रतिज्ञातार्थसिद्ध्योतिभावः ॥ ४९ ॥

महान्देवैरपिदुर्जयः विभीषणःपूर्वंप्रतिज्ञाताभिषेकः ॥ ५० ॥ विभीषणस्यानुमतेलंकाधीशत्वात्तदाज्ञांगृहीत्वा ॥ ५१ ॥ ५२ ॥ ५३ ॥ अनिंदितांरावण
तिरस्कारादप्राप्तनिंदाम् ॥ ५४ ॥५५॥ भक्त्येति प्रह्वत्वादेर्हेतुकथनंपूर्वस्मृतिंपूर्वमागतोयःसएवायमितिस्मृतिंस्मरणंययौप्राप्तवती ॥५६॥ भवत्अभवदित्यर्थः

सहायेनत्वयावीरजितोमेरावणोमहान् ॥ विभीषणोऽपिलंकायामभिषिक्तोमयानघ ॥ ५० ॥ ततःप्राहहनूमंतंपार्श्व
स्थंविनयान्वितम् ॥ विभीषणस्यानुमतेगच्छत्वंरावणालयम्॥ ५१ ॥ जानक्यैसर्वमाख्याहिरावणस्यवधादिकम्॥
जानक्याःप्रतिवाक्यंमेशीघ्रमेवनिवेदय ॥ ५२ ॥ एवमाज्ञापितोधीमान्रामेणपवनात्मजः ॥ प्रविवेशपुरींलंकांपूज्य
मानोनिशाचरैः॥ ५३ ॥ प्रविश्यरावणगृहंशिंशपामूलमाश्रिताम्॥ददर्शजानकींतत्रकृशांदीनामनिंदिताम्॥ ५४॥
राक्षसीभिःपरिवृतांध्यायंतींराममेवहि ॥ विनयावनतोभूत्वाप्रणम्यपवनात्मजः॥ ५५ ॥ कृतांजलिपुटोभूत्वाप्रह्वोभ
क्त्याग्रतःस्थितः॥ तंदृष्ट्वाजानकीतूष्णींस्थित्वापूर्वस्मृतिंययौ॥ ५६ ॥ ज्ञात्वातंरामदूतंसाहर्षात्सौम्यमुखीभवत्॥ सतां
सौम्यमुखींदृष्ट्वातस्यैपवननंदनः ॥ रामस्यभाषितंसर्वमाख्यातुमुपचक्रमे ॥ ५७ ॥ देविरामःससुग्रीवोविभीषणस
हायवान्॥ कुशलीवानराणांचसैन्यैश्चसहलक्ष्मणः ॥ ५८ ॥ रावणंससुतंहत्वासबलंसहमंत्रिभिः॥ त्वामाहकुशलंरा
मोराज्येकृत्वाविभीषणम्॥५९॥ श्रुत्वाभर्तुःप्रियंवाक्यंहर्षगद्गदयागिरा॥ किंतेप्रियंकरोम्यद्यनपश्यामिजगत्त्रये॥६०॥
समंतेप्रियवाक्यस्यरत्नान्याभरणानिच ॥ एवमुक्तस्तुवैदेह्याप्रत्युवाचप्लवंगमः॥ ६१ ॥

अडभावआर्षः रामस्यभाषितंसंदेशम् ॥ ५७ ॥ वानराणांसैन्यैःसहैवलक्ष्मणश्चकुशलीसर्वेकुशलिनइत्यर्थः ॥ ५८ ॥ राज्येविभीषणंकृत्वाइत्यनेननिरवशे
षसर्वकृत्यसिद्धिरुक्ता ॥ ५९ ॥ तेप्रियवाक्यस्यसमंरत्नादिषुनकिंचित्पश्यामि ॥ ६० ॥ ६१ ॥

॥ अथ श्रीमदध्यात्मरामायणे सुंदरकांडः प्रारभ्यते ॥


सुंदरकांड ५.
मारुती
सीता
मारुती
त्रिजटा
राक्षस
मारुती
रावण
ब्रम्हदेव.
मा०
इं.

श्रीगणेशायनमः ॥ ॥ शतेति ॥ लिलंघयिषुः स्वार्थेणिच् आनंदसंदोहःतत्समूहरूपःतत्समूहवान्वा ॥ १ ॥ २ ॥ रामनिर्मुक्तंरामत्यक्तम् पश्यामीतिभाविन्यपिवर्तमानत्वारोपोऽवश्यंभावित्वद्योतनाय ॥ ३ ॥ कृतार्थः जगन्मातृदर्शनेनेतिभावः ममसमुद्रलंघनमकिंचित्करमित्याह प्राणेति ॥ ४ ॥ अपारमित्युभयान्वयि त्रिविधपरिच्छेदशून्यंतत्पदंतत्स्वरूपम् तदंगभूतायाअंगुलिस्तद्भूषणभूतायामुद्रिकासाअस्यास्तीत्यर्शआद्यच् ॥ ५ ॥ अल्पवारिधिमित्यपारभवांभोधेर्व्य

श्रीमहादेवउवाच॥ ॥शतयोजनविस्तीर्णंसमुद्रंमकरालयम् ॥ लिलंघयिषुरानंदसंदोहोमारुतात्मजः॥ १ ॥ ध्यात्वा रामंपरात्मानमिदंवचनमब्रवीत्॥पश्यंतुवानराःसर्वेगच्छंतंमांविहायसा॥ २ ॥ अमोघंरामनिर्मुक्तंमहाबाणमिवाखिलाः॥ पश्याम्यद्यैवरामस्यपत्नींजनकनंदिनीम् ॥ ३॥ कृतार्थोऽहंकृतार्थोऽहं पुनःपश्यामिराघवम्॥ प्राणप्रयाणसमयेयस्यनामसकृत्स्मरन्॥ ४॥ नरस्तीर्त्वाभवांभोधिमपारंयातितत्पदम्॥ किंपुनस्तस्यदूतोऽहंतदंगांगुलिमुद्रिकः॥ ५॥ तमेवहृदयेध्यात्वालंघयाम्यल्पवारिधिम्॥ इत्युक्त्वाहनुमान्बाहूप्रसार्यायतवालधिः॥ ६॥ ऋजुग्रीवोर्ध्वदृष्टिःसन्नाकुंचितपदद्वयः॥ दक्षिणाभिमुखस्तूर्णंपुप्लुवेऽनिलविक्रमः॥ ७॥ आकाशात्त्वरितंदेवैर्वीक्ष्यमाणोजगामसः॥ दृष्ट्वाऽनिलसुतंदेवागच्छंतंवायुवेगतः॥ ८॥ परीक्षणार्थंसत्त्वस्यवानरस्येदमब्रुवन्॥ गच्छत्येषमहासत्त्वोवानरोवायुविक्रमः॥ ९॥

तिरेकालंकारः तंलंघयामीतिकिंवक्तव्यमित्यन्वयः बाहुइत्यादिवानरोःप्लवनजातिवर्णनम् आयतवालधिःप्रसारितपुच्छः ॥ ६ ॥ ऋजुग्रीवऊर्ध्वदृष्टिरित्यर्थः कर्मधारयः अनिलोवायुःतत्सदृशपराक्रमः ॥ ७ ॥ आकाशात्आकाशेस्थित्वेत्यर्थः ॥ ८ ॥ वानरस्यसत्वस्यवानरीयबलस्यपरीक्षणार्थमिदमब्रुवन् विचारयामासुरित्यर्थः तद्वक्ष्यति एवंविचार्येति धातूनामनेकार्थत्वाद्ब्रूञोऽपिविचारेवृत्तिः ॥ ९ ॥

लंकाप्रवेशेशक्तोऽथवानेतिसंदेहस्तस्मादस्यबलंजानीमहे निर्णेष्यामइत्यर्थः ॥ १० ॥ देवतावृंदःदेवतासमूहः ॥ ११ ॥ १२ ॥ १३ ॥ क्षुधयासंपीडितआत्मा

लंकांप्रवेष्टुंशक्तोवानवाजानीमहेबलम् ॥ एवंविचार्यनागानांमातरंसुरसाभिधाम् ॥ १० ॥ अब्रवीद्देवतावृंदःकौतूह
लसमन्वितः ॥ गच्छत्वंवानरेंद्रस्यकिंचिद्विघ्नंसमाचर ॥ ११ ॥ ज्ञात्वातस्यबलंबुद्धिंपुनरेहित्वरान्विता ॥ इत्युक्त्वासाय
यौशीघ्रंहनुमद्विघ्नकारणात् ॥ १२ ॥ आवृत्त्यमार्गंपुरतःस्थित्वावानरमब्रवीत् ॥ एहिमेवदनंशीघ्रंप्रविशस्वमहामते
॥ १३ ॥ देवैस्त्वंकल्पितोभक्षःक्षुधासंपीडितात्मनः ॥ तामाहहनुमान्मातरहंरामस्यशासनात् ॥ १४ ॥ गच्छामिजानकीं
द्रष्टुंपुनरागम्यसत्वरः ॥ रामायकुशलंतस्याःकथयित्वात्वदाननम् ॥ १५ ॥ निवेक्ष्येदेहिमेमार्गंसुरसायैनमोऽस्तुते ॥ इत्यु
क्तापुनरेवाहसुरसाक्षुधितास्म्यहम् ॥ १६ ॥ प्रविश्यगच्छमेवक्त्रंनोचेत्त्वांभक्षयाम्यहम् ॥ इत्युक्तोहनुमानाहमुखंशीघ्रं
विदारय ॥ १७ ॥ प्रविश्यवदनंतेऽद्यगच्छामित्वरयान्वितः ॥ इत्युक्त्वायोजनायामदेहोभूत्वापुरःस्थितः ॥ १८ ॥ दृष्ट्वाहनु
मतोरूपंसुरसापंचयोजनम् ॥ मुखंचकारहनुमान्द्विगुणंरूपमादधत् ॥ १९ ॥ ततश्चकारसुरसायोजनानांचविंशति
म् ॥ वक्त्रंचकारहनुमांस्त्रिंशद्योजनसम्मितम् ॥ २० ॥ ततश्चकारसुरसापंचाशद्योजनायतम् ॥ वक्त्रंतदाहनूमांस्तुबभू
वांगुष्ठसन्निभः ॥ २१ ॥ प्रविश्यवदनंतस्याःपुनरेत्यपुरःस्थितः ॥ प्रविष्टोनिर्गतोऽहंतेवदनंदेवितेनमः ॥ २२ ॥ एवंवदंतंदृ
ष्ट्वासाहनूमंतमथाब्रवीत् ॥ गच्छसाधयरामस्यकार्यंबुद्धिमतांवर ॥ २३ ॥ देवैःसंप्रेषिताहंतेबलंजिज्ञासुभिःकपे ॥ दृ
ष्ट्वासीतांपुनर्गत्वारामंद्रक्ष्यसिगच्छभो ॥ २४ ॥

यस्यास्तस्याइत्यर्थः ॥ १४ ॥ १५ ॥ निवेक्ष्येप्रवेक्ष्यामि ॥ १६ ॥ मेवक्त्रंप्रविश्यततोनिःसृत्यगच्छेत्यर्थः ॥ १७ ॥ योजनमात्रदीर्घदेहः ॥ १८ ॥ १९ ॥
त्रिंशद्योजनसम्मितंवपुश्चकारेतिशेषः ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ पुनर्गत्वाकिष्किंधामितिशेषः ॥ २४ ॥

॥ २५ ॥ मणिकांचनपर्वतंमण्यादियुक्तश्रृंगयुतंपर्वतम् ॥ २६ ॥ सचिवोभव मध्येविश्रामदानेनसहायोभवेत्यर्थः तत्सहायार्थनिमित्तंमत्प्रेरणेकोहेतुस्त
त्राह सगरैरिति पुरापूर्वंसगरैर्वर्धितइतिहेतोरहंसागरस्तन्नामाऽभवम् ॥ २७ ॥ तस्यवंशेचरामस्तत्कार्यार्थंचायंगच्छति ॥ २८ ॥ अतस्त्वमुत्तिष्ठेत्यन्वयः॥ २९॥

इत्युक्त्वासाययौदेवलोकंवायुसुतःपुनः॥ जगामवायुमार्गेणगरुत्मानिवपक्षिराट्॥ २५ ॥ समुद्रोऽप्याहमैनाकंमणि
कांचनपर्वतम्॥ गच्छत्येषमहासत्त्वोहनुमान्मारुतात्मजः ॥ २६ ॥ रामस्यकार्यसिद्ध्यर्थंतस्यत्वंसचिवोभव ॥ सगरै
र्वर्धितोयस्मात्पुराहंसागरोऽभवम् ॥२७॥ तस्यान्वयेबभूवासौरामोदाशरथिःप्रभुः ॥ तस्यकार्यार्थसिद्ध्यर्थंगच्छत्येष
महाकपिः ॥२८॥ त्वमुत्तिष्ठजलात्तूर्णंत्वयिविश्राम्यगच्छतु ॥ सतथेतिप्रादुरभूज्जलमध्यान्महोन्नतः॥२९॥ नानामणि
मयैःश्रृंगैस्तस्योपरिनराकृतिः॥ प्राहयांतंहनूमंतंमैनाकोऽहंमहाकपे॥ ३० ॥ समुद्रेणसमादिष्टस्त्वद्विश्रामायमारुते॥
आगच्छामृतकल्पानिजग्ध्वापक्वफलानिमे ॥ ३१ ॥ विश्राम्यात्रक्षणंपश्चाद्गमिष्यसियथासुखम् ॥ एवमुक्तोऽथतं
प्राहहनुमान्मारुतात्मजः ॥ ३२ ॥ गच्छतोरामकार्यार्थंभक्षणंमेकथंभवेत् ॥ विश्रामोवाकथंमे स्याद्गंतव्यंत्वरितंमया
॥ ३३ ॥ इत्युक्त्वास्पृष्टशिखरःकराग्रेणययौकपिः ॥ किंचिद्दूरंगतस्यास्यच्छायांछायाग्रहोऽग्रहीत् ॥ ३४ ॥ सिंहि
कानामसाघोराजलमध्येस्थितासदा॥ आकाशगामिनांछायामाक्रम्याकृष्यभक्षयेत्॥ ३५ ॥ तयागृहीतोहनुमांश्चिं
तयामासवीर्यवान्॥ केनेदंमेकृतंवेगरोधनंविघ्नकारिणा॥ ३६ ॥

नानामणिमयैःश्रृंगैर्महोन्नतइत्यन्वयः तस्योपरिनराकृतिर्मनुष्याकारेणस्थितोमैनाकःप्राह ॥ ३० ॥ ३१ ॥ विश्राम्येत्यार्षम् ॥ ३२ ॥ कथंभवेदित्यादेरनुचि
तंतदित्यर्थः तत्रहेतुर्गंतव्यंत्वरितंमयेति ॥ ३३ ॥ कराग्रेणस्पृष्टशिखरोययावित्यन्वयः छायास्पर्शमात्रेणजंतूनांगतिनिरोधेनाकर्षकश्छायाग्रहइत्युच्यते
॥ ३४ ॥ तदेवाह सिंहिकेति भक्षयेत् भक्षयतिइत्यर्थेआर्षः ॥ ३५ ॥ ३६ ॥

विस्मयआश्चर्यम् यत्कस्याप्यदर्शनंवेगरोधश्चेत्याश्चर्यम् प्रसारयत्प्रासारयत अडभावआर्षः ॥ ३७ ॥ सिंहिकांतन्नाम्नींराक्षसीम् ॥ ३८ ॥ दक्षिणंकूलंसाग
रस्येतिशेषः ॥ ३९ ॥ ४० ॥ बहुभिःप्राकारैःअंतर्दुर्गमध्यदुर्गबहिर्दुर्गसंबंधिभिः परिखाःप्राकारबहिर्गर्ताः ॥ ४१ ॥ वेक्ष्यामिप्रवेक्ष्यामि सूक्ष्मःसूक्ष्मशरी

दृश्यतेनैवकोऽप्यत्रविस्मयोमेप्रजायते॥एवंविचिंत्यहनुमानधोदृष्टिंप्रसारयत् ॥ ३७ ॥ तत्रदृष्ट्वामहाकायांसिंहिकां
घोररूपिणीम्॥पपातसलिलेतूर्णंपद्भ्यामेवाहनद्रुषा ॥ ३८ ॥ पुनरुत्प्लुत्यहनुमान्दक्षिणाभिमुखोययौ ॥ ततोदक्षिण
मासाद्यकूलंनानाफलद्रुमम् ॥ ३९ ॥ नानापक्षिमृगाकीर्णंनानापुष्पलतावृतम्॥ ततोददर्शनगरंत्रिकूटाचलमूर्धनि
॥ ४० ॥ प्राकारैर्बहुभिर्युक्तंपरिखाभिश्चसर्वतः॥प्रवेक्ष्यामिकथंलंकामितिचिंतापरोऽभवत् ॥ ४१ ॥ रात्रौवेक्ष्यामि
सूक्ष्मोऽहंलंकांरावणपालिताम्॥एवंविचिंत्यतत्रैवस्थित्वालंकांजगामसः ॥ ४२ ॥ धृत्वासूक्ष्मंवपुर्द्वारंप्रविवेशप्रता
पवान्॥तत्रलंकापुरीसाक्षाद्राक्षसीवेषधारिणी॥ ४३ ॥ प्रविशंतंहनूमंतंदृष्ट्वालंकाव्यतर्जयत्॥ कस्त्वंवानररूपेणमा
मनादृत्यलंकिनीम् ॥ ४४ ॥ प्रविश्यचोरवद्रात्रौकिंभवान्कर्तुमिच्छति ॥ इत्युक्त्वारोषताम्राक्षीपादेनाभिजघानतम्
॥ ४५ ॥ हनुमानपितांवाममुष्टिनावज्ञयाऽहनत्॥ तदैवपतिताभूमौरक्तमुद्वमतीभृशम्॥ ४६ ॥ उत्थायप्राहसालंका
हनूमंतंमहाबलम्॥हनूमन्गच्छभद्रंतेजितालंकात्वयानघ ॥ ४७ ॥ पुराहंब्रह्मणाप्रोक्ताह्यष्टाविंशतिपर्यये ॥ त्रेतायु
गेदाशरथीरामोनारायणोऽव्ययः॥ ४८ ॥

रोभूत्वेत्यर्थः लंकांजगाम रात्राविर्तिशेषः ॥ ४२ ॥ सूक्ष्मंवपुर्धृत्वाद्वारंप्रविवेश ॥ ४३ ॥ ४४ ॥ रात्रौचोरवत्प्रविश्यगच्छसीतिशेषः सत्वंकइत्येकः किंभवानि
त्यादिप्रश्नांतरम् ॥ ४५ ॥ ४६ ॥ ४७ ॥ अष्टाविंशतिपर्ययेइति यद्यप्यन्यत्रचतुर्विंशतिमेपर्यायेत्रेतायांरामावतारोऽष्टविंशतिमेपर्यायेद्वापरांतेकृष्णावतारइ
त्युक्तंतथाऽपिकल्पांतरपरतयाविरोधपरिहारोऽवसेयः ॥ ४८ ॥

योगमायाचसीतेतिजनिष्यतइत्यन्वयः क्वचित्अवतारपूर्वकालेप्रार्थितोजनिष्यतइत्यन्वयः ॥ ४९ ॥ ५० ॥ साचिव्यंसख्यम् ॥ ५१ ॥ ५२ ॥ ५३ ॥ यत
स्त्वयाहंलंकाजितातस्मात्त्वयासर्वंराक्षसकुलंजितम् अथसीतास्थितिस्थानमाह रावणांतःपुरेति ॥ ५४ ॥ ५५ ॥ ५६ ॥ यतोमेराघवस्मृतिरासीदतोऽहमपि

जनिष्यतेयोगमायासीताजनकवेश्मनि ॥ भूभारहरणार्थायप्रार्थितोयंमयाक्वचित् ॥ ४९ ॥ सभार्योराघवोभ्रात्राग
मिष्यतिमहावनम् ॥ तत्रसीतांमहामायांरावणोऽपहरिष्यति ॥ ५० ॥ पश्चाद्रामेणसाचिव्यंसुग्रीवस्यभविष्यति ॥ सु
ग्रीवोजानकींद्रष्टुंवानरान्प्रेषयिष्यति ॥ ५१ ॥ तत्रैकोवानरोरात्रावागमिष्यतितेंतिकम् ॥ त्वयाचभर्त्सितःसोऽपित्वांह
निष्यतिमुष्टिना ॥ ५२ ॥ तेनाहतात्वंव्यथिताभविष्यसियदानघे ॥ तदैवरावणस्यांतोभविष्यतिनसंशयः ॥ ५३ ॥ त
स्मात्त्वयाजितालंकाजितंसर्वंत्वयानघ ॥ रावणांतःपुरवरेक्रीडाकाननमुत्तमम् ॥ ५४ ॥ तन्मध्येऽशोकवनिकादिव्य
पादपसंकुला ॥ अस्तितस्यांमहावृक्षःशिंशपानाममध्यगः ॥ ५५ ॥ तत्रास्तेजानकीघोरराक्षसीभिःसुरक्षिता ॥ दृष्ट्वैव
गच्छत्वरितंराघवायनिवेदय ॥ ५६ ॥ धन्याहमप्यद्यचिरायराघवस्मृतिर्ममासीद्भवपाशमोचनी ॥ तद्भक्तसंगोऽप्य
तिदुर्लभोममप्रसीदतांदाशरथिःसदाहृदि ॥ ५७ ॥ उल्लंघितेऽब्धौपवनात्मजेनधरासुतायाश्चदशाननस्य ॥ पुस्फोरवामा
क्षिभुजश्चतीव्रंरामस्यदक्षांगमतींद्रियस्य ॥ ५८ ॥ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेसुं
दरकांडेप्रथमःसर्गः ॥ १ ॥ ॥ छ ॥ ॥ छ ॥

धन्या तद्भक्तसंगस्यापिदुर्लभत्वांकिंवक्तव्यमितिभावः प्रसीदतांप्रसन्नःसआस्ताम् ॥ ५७ ॥ पुस्फोरस्फुरितमभवत् भुजोवामएव स्त्रियावामांगस्फुरणंशुभसूच
कंपुंसोऽशुभदमितिभावः अतींद्रियस्यइंद्रियाविषयस्यरामस्यदक्षांगंपुस्फोर यद्वारामसंबंधिअतींद्रियंगुप्तंयदिंद्रियंतस्यदक्षांगंदक्षिणभागःपुस्फोर तत्स्फुरणंच
स्त्रीलाभसूचकंपुंसामित्याहुः ॥ ५८ ॥ ॥ इतिश्रीमदध्यात्मरामायणेसुंदरकांडेसेतौप्रथमःसर्गः ॥ १ ॥ ॥ छ ॥

ततइति सूक्ष्मतनुःसूक्ष्मवानररूपः ॥ १ ॥ सीतान्वेषणकार्यार्थीसीतान्वेषणरूपकार्येच्छावान् विविच्यदृष्ट्वा ॥ २ ॥ ततोलंकावाक्यंस्मृत्वाहनूमान्शीघ्रंजगाम ॥ ३ ॥ सुरपादपाःकल्पवृक्षादयः ॥ ४ ॥ फलैरानम्राणिशाखाग्राणियेषांतैःपादपैः ॥ ५ ॥ अभ्रंलिहमत्युच्चंचैत्यप्रासादंदेवतास्थानविशेषम् अत्युच्चत्वान्मणिस्तंभादियुतत्वाच्चविस्मयः ॥ ६ ॥ समतीत्येति चैत्यप्रासादमितिशेषः ॥ ७ ॥ अत्यंतनिबिडपत्रत्वादेवादृष्टआतपोयत्रजनैस्तंस्वर्णवर्णैर्विहंगमैःपक्षि

ततोजगामहनुमान्लंकांपरमशोभनाम् ॥ रात्रौसूक्ष्मतनुर्भूत्वाबभ्रामपरितःपुरीम् ॥ १ ॥ सीतान्वेषणकार्यार्थीप्रविवेशनृपालयम् ॥ तत्रसर्वप्रदेशेषुविविच्यहनुमान्कपिः ॥ २ ॥ नापश्यज्जानकींस्मृत्वाततोलंकाभिभाषितम् ॥ जगामहनुमान्शीघ्रमशोकवनिकांशुभाम् ॥ ३ ॥ सुरपादपसंबाधांरत्नसोपानवापिकाम् ॥ नानापक्षिमृगाकीर्णांस्वर्णप्रासादशोभिताम् ॥ ४ ॥ फलैरानम्रशाखाग्रपादपैःपरिवारिताम् ॥ विचिन्वन्जानकींतत्रप्रतिवृक्षंमरुत्सुतः ॥ ५ ॥ ददर्शाभ्रंलिहंतत्रचैत्यप्रासादमुत्तमम् ॥ दृष्ट्वाविस्मयमापन्नोमणिस्तंभशतान्वितम् ॥ ६ ॥ समतीत्यपुनर्गत्वाकिंचिद्दूरंसमारुतिः ॥ ददर्शशिंशपावृक्षमत्यंतनिबिडच्छदम् ॥ ७ ॥ अदृष्टातपमाकीर्णंस्वर्णवर्णविहंगमम् ॥ तन्मूलेराक्षसीमध्येस्थितांजनकनंदिनीम् ॥ ८ ॥ ददर्शहनुमान्वीरोदेवतामिवभूतले ॥ एकवेणींकृशांदीनांमलिनांबरधारिणीम् ॥ ९ ॥ भूमौशयानांशोचंतींरामरामेतिभाषिणीम् ॥ त्रातारंनाधिगच्छंतीमुपवासकृशांशुभाम् ॥ १० ॥ शाखांतच्छदमध्यस्थोददर्शकपिकुंजरः ॥ कृतार्थोऽहंकृतार्थोऽहंदृष्ट्वाजनकनंदिनीम् ॥ ११ ॥

भिराकीर्णंव्याप्तमित्यर्थंमयूरव्यंसकादित्वात्समासः ॥ ८ ॥ एकवेणींहरणदिनावधिसंस्काररहितामित्यर्थः यद्वा शोभार्थमन्यदावेणीत्रयबंधःपुरतोद्वयंपश्चादेकेति संप्रतितुसंस्काराराहित्यात्पृष्ठलंबिनीएकैवेत्यर्थः दीनांस्वजनविरहाद्दीनामिवशोचंतीम् आत्मानमितिशेषः ॥ ९ ॥ १० ॥ शाखानामंतेप्रांतेयेछदाःपत्राणितेषांमध्यस्थः तद्दर्शनजानंदाभिनयःकृतार्थइत्यादि ॥ ११ ॥

॥ १२ ॥ किमेतत् किंजन्योयंशब्दः ॥ १३ ॥ अलीयततद्दर्शनेनकरिष्यमाणकार्यभंगभियेतिभावः ॥ १४ ॥ १५ ॥ इत्येवंचिंतयन्रावणोराघवेणेति श्लोकोक्तंचिंतयन्नित्यंसदाहृदिराममेवध्यायन्नास्तइतिशेषः अतस्तस्मिन्दिनेपररात्रौ हनूमत्प्रवेशदिनरात्रिसंबंध्यपररात्रेइत्यर्थः समासांताभावस्तदनित्यत्वा

मयैवसाधितंकार्यंरामस्यपरमात्मनः ॥ ततःकिलकिलाशब्दोबभूवांतःपुराद्बहिः ॥ १२ ॥ किमेतदितिसँल्लीनोवृक्षपत्रेषुमारुतिः ॥ आयांतंरावणंतत्रस्त्रीजनैःपरिवारितम् ॥ १३ ॥ दशास्यंविंशतिभुजंनीलांजनचयोपमम् ॥ दृष्ट्वाविस्मयमापन्नःपत्रखंडेष्वलीयत ॥ १४ ॥ रावणोराघवेणाशुमरणंमेकथंभवेत् ॥ सीतार्थमपिनायातिरामःकिंकारणंभवेत् ॥ १५ ॥ इत्येवंचिंतयन्नित्यंराममेवसदाहृदि ॥ तस्मिन्दिनेपररात्रौरावणोराक्षसाधिपः ॥ १६ ॥ स्वप्नेरामेणसंदिष्टः कश्चिदागत्यवानरः ॥ कामरूपधरःसूक्ष्मोवृक्षाग्रस्थोऽनुपश्यति ॥ १७ ॥ इतिदृष्ट्वाऽद्भुतंस्वप्नंस्वात्मन्येवानुचिंत्यसः ॥ स्वप्नःकदाचित्सत्यःस्यादेवंतत्रकरोम्यहम् ॥ १८ ॥ जानकींवाक्शरैर्विद्ध्वादुःखितांनितरामहम् ॥ करोमिदृष्ट्वारामायनिवेदयतुवानरः ॥ १९ ॥ इत्येवंचिंतयन्सीतासमीपमगमद्द्रुतम् ॥ नूपुराणांकिंकिणीनांश्रुत्वासिंजितमंगना ॥ २० ॥

त् ॥ १६ ॥ स्वप्नेनिद्रासमयेरामादिष्टःकश्चिद्वानरोलंकामागत्यवृक्षाग्रस्थोऽनुपश्यतिसीतामितिशेषः ॥ १७ ॥ इतिअद्भुतंस्वप्नंदृष्ट्वाअयंस्वप्नःकदाचित्सत्योभवेत् अतस्तत्रसीतासमीपंगत्वाएवंकरोमीति अचिंतयदितिशेषः ॥ १८ ॥ यदचिंतयत्तदाह जानकीमिति विद्ध्वेतिल्यबार्षः तांवाक्शरैर्विद्धानितरांदुःखितांकरोमितद्दृष्ट्वावानरोरामायनिवेदयतु एवंहिरामःशीघ्रमागच्छेदितिभावः ॥ १९ ॥ नूपुराणिपादभूषणानि किंकिण्योजघनभूषणानि सिंजितंशब्दम् ॥ २० ॥

भीतासीतारूपांगनास्वात्मन्येवस्वशरीरेएवलीयमानास्थितेत्यन्वयः रामेर्पितंस्थापितमांतरंचित्तंयया ॥ २१ ॥ किमाहतदाह सुमध्यमेइत्यादि ॥ २२ ॥ ॥ २३ ॥ लोकाश्चाररूपाःप्रयत्नेनसमंततोवीक्षमाणाअपिरामंनपश्यंति ॥ २४ ॥ त्वयिनिःस्पृहेणइच्छाहीनेन पूर्णकामत्वादित्यांतरोर्थः त्वयासदालिंगितोऽपिध्यानेनसदाहृदिचिंतनात् अतएवसमीपस्थोऽपि यद्वा शक्तिशक्तिमतोरभेदात्सदालिंगितोविभुत्वाच्चसमीपस्थोयद्यपि ॥ २५ ॥ तथाऽप्यस्यरामस्यहृदये

सीताभीतालीयमानास्वात्मन्येवसुमध्यमा॥अधोमुख्यश्रुनयनास्थितारामार्पितांतरा ॥ २१ ॥ रावणोऽपितदासीता
मालोक्याहसुमध्यमे॥मांदृष्ट्वाकिंत्वथासुभ्रुस्वात्मन्येवविलीयसे ॥ २२ ॥ रामोवनचराणांहिमध्येतिष्ठतिसाऽनुजः॥
कदाचिद्दृश्यतेकैश्चित्कदाचिन्नैवदृश्यते ॥ २३ ॥ मयातुबहुधालोकाःप्रेषितास्तस्यदर्शने ॥नपश्यंतिप्रयत्नेनवीक्षमा
णाःसमंततः ॥ २४ ॥ किंकरिष्यसिरामेणनिःस्पृहेणसदात्वयि॥त्वयासदालिंगितोऽपिसमीपस्थोऽपिसर्वदा॥ २५॥
हृदयेऽस्यनचस्नेहस्त्वयिरामस्यजायते॥ त्वत्कृतान्सर्वभोगांश्चत्वद्गुणानपिराघवः॥ २६ ॥ भुंजानोऽपिनजानातिकृ
तघ्नोनिर्गुणोऽधमः॥त्वमानीतामयासाध्वीदुःखशोकसमाकुला ॥ २७॥ इदानीमपिनायातिभक्तिहीनःकथंव्रजेत्॥
निःसत्वोनिर्ममोमानीमूढःपंडितमानवान्॥ २८॥

त्वयित्वद्विषयेस्नेहोनजायते अतएवयत्कालंत्वदुपेक्षातस्येतिभावः सर्वत्रसमत्वात्तस्यनक्वापिस्नेहइतितत्त्वम् किंचत्वत्कृतान्सर्वभोगांस्त्वयास्ववृत्तिद्वारोपनीतान्सर्वभोगान्सर्वविषयान्तथात्वद्गुणान्सुखसंकल्पकामादीन्भुंजानोऽपिअहंभोक्तेतिनजानाति तथाभिमानराहित्यात् अतएवकृतघ्नः अतएवनिर्गुणः योहिगुणवान्सउपकारंमनुतएव अधमःउपकारविस्मरणात् किंचनधमतिशब्दविषयोभवतीत्यधमःशब्दावाच्यइतियावत् कृतघ्नत्वाद्युपपादयति त्वमिति ॥ २६ ॥ ॥ २७ ॥ यतस्त्वयिभक्तिहीनोतःकथंव्रजेत् स्वस्थानतस्त्वत्परित्राणार्थमिमंदेशमित्यर्थः निःसत्वोनिर्बलः निर्ममोममताहीनः त्वयिइयंममेतिबुद्धिहीनः॥२८॥

नराधमम् पंचम्यर्थैबहुव्रीहिरितिकश्चित् ।किंकरिष्यसितादृशोऽनुरागेणाकिंप्रयोजनमित्यर्थः असुरोत्तममितिनराधमव्यतिरेकउक्तः ॥ २९ ॥ देवगंधर्वनागा
नांतद्योषितामित्यर्थः नियोक्त्रीप्रभुतयाआज्ञापयित्री प्रतिपद्यसेअंगीकरोषि ॥ ३० ॥ निधायतृणमंतरे पतिव्रतायाःसाक्षात्परपुरुषेणवार्तालापस्यानौचित्या
दितिभावः त्वंचतृणतुल्यइत्यपिद्योतयितुंच ॥ ३१ ॥ शुनीवेत्युपमयाअत्यंतंपराक्रमराहित्यंसूचितम् ॥ ३२ ॥ अचिरादितिच्छेदः अल्पेनैवकालेनेत्यर्थः

नराधमंत्वद्विमुखांकिंकरिष्यसिभामिनि ॥ त्वय्यतीवसमासक्तंमांभजस्वासुरोत्तमम् ॥ २९ ॥ देवगंधर्वनागानांयक्षकि
न्नरयोषिताम् ॥ भविष्यसिनियोक्त्रीत्वंयदिमांप्रतिपद्यसे ॥ ३० ॥ रावणस्यवचःश्रुत्वासीतामर्षसमन्विता ॥ उवाचाधो
मुखीभूत्वाविधायतृणमंतरे ॥ ३१ ॥ राघवाद्विभ्यतानूनंभिक्षुरूपंत्वयाधृतम् ॥ रहितेराघवाभ्यांत्वंशुनीवहविरध्वरे ॥
॥ ३२ ॥ हृतवानसिमांनीचतत्फलंप्राप्स्यसेऽचिरात् ॥ यदारामशराघातविदारितवपुर्भवान् ॥ ३३ ॥ ज्ञास्यसेमानुषंरामं
गमिष्यसियमांतिकम् ॥ समुद्रंशोषयित्वावाशरैर्बद्ध्वाथवारिधिम् ॥ ३४ ॥ हंतुंत्वांसमरेरामोलक्ष्मणेनसमन्वितः ॥ आ
गमिष्यत्यसंदेहोद्रक्ष्यसेराक्षसाधम ॥ ३५ ॥ त्वांसपुत्रंसहबलंहत्वानेष्यतिमांपुरम् ॥ श्रुत्वारक्षःपतिःक्रुद्धोजानक्याःपरु
षाक्षरम् ॥ ३६ ॥ वाक्यंक्रोधसमाविष्टःखड्गमुद्यम्यसत्वरः ॥ हंतुंजनकराजस्यतनयांताम्रलोचनः ॥ ३७ ॥ मंदोदरीनि
वार्याहपतिंपतिहितेरता ॥ त्यजैनांमानुषींदीनांदुःखितांकृपणांकृशाम् ॥ ३८ ॥

यदारामशराघातैर्विदारितवपुर्भवान्भविष्यतीतिशेषः ॥ ३३ ॥ तदारामंमानुषंज्ञास्यसियमांतिकंचगमिष्यसि शरैः समुद्रंशोषयित्वावा अथअथवावारिधिंब
द्ध्वासेतुबंधेनेतिशेषः ॥ ३४ ॥ तदागमनंचत्वमनुपदमेवद्रक्ष्यसेइत्यन्वयः ॥ ३५ ॥ जानक्याःपरुषाक्षरंवाक्यंश्रुत्वाक्रुद्धोभवदितिशेषः ॥ ३६ ॥ ततःक्रोध
समाविष्टःखड्गमुद्यम्यजनकराजतनयांहंतुमुद्यतोऽभवदितिशेषः ॥ ३७ ॥ अन्यानुरक्तत्वात्तद्वियोगाच्चदैन्यादिविशिष्टाम् ॥ ३८ ॥

यास्त्वामेववरयंतिताबह्व्यःसंतीतियोजना मदेनकाममदेनमत्तेमदयुक्तेइवविलोचनेयासांताः ॥ ३९ ॥ सकामनामद्विषयकामनासहितासतीयथामेवशगाभविष्यतिनतुबलात्तथायतध्वमित्यन्वयः तर्जनंभीषणम् आदरणंसांत्वम् ॥ ४० ॥ ४१ ॥ कुरुतपक्वांकुरुतेत्यर्थः ॥ ४२ ॥ स्वतर्जनैःस्वबुद्धिकल्पितभीषणो

देवगंधर्वनागानांबह्व्यःसंतिवरांगनाः ॥ त्वामेववरयंत्युच्चैर्मदमत्तविलोचनाः ॥ ३९ ॥ ततोऽब्रवीद्दशग्रीवोराक्षसीर्विकृ
ताननाः ॥ यथामेवशगासीताभविष्यतिसकामना ॥ तथायतध्वंत्वरितंतर्जनादरणादिभिः ॥ ४० ॥ द्विमासाभ्यंतरेसी
तायदिमेवशगाभवत् ॥ तदासर्वसुखोपेताराज्यंभोक्ष्यतिसामया ॥ ४१ ॥ यदिमासद्वयादूर्ध्वंमच्छय्यांनाभिनंदति ॥ तदा
मेप्रातराशायहत्वाकुरुतमानुषीम् ॥ ४२ ॥ इत्युक्त्वाप्रययौस्त्रीभीरावणोंऽतःपुरालयम् ॥ राक्षस्योजानकीमेत्यभीषयं
त्यःस्वतर्जनैः ॥ ४३ ॥ तत्रैकाजानकीमाहयौवनंतेव्यथागतम् ॥ रावणेनसमासाद्यसफलंतुभविष्यति ॥ ४४ ॥ अपरा
चाहकोपेनकिंविलंबेनजानकी ॥ इदानींछेद्यतामंगंविभज्यचपृथक्पृथक् ॥ ४५ ॥ अन्यातुखड्गमुद्यम्यजानकींहंतुमु
द्यता ॥ अन्याकरालवदनाविदार्यास्यमभीषयत् ॥ ४६ ॥ एवंतांभीषयंतीस्ताराक्षसीर्विकृताननाः ॥ निवार्यत्रिजटावृ
द्धाराक्षसीवाक्यमब्रवीत् ॥ ४७ ॥ शृणुध्वंदुष्टराक्षस्योमद्वाक्यंवोहितंभवेत् ॥ ४८ ॥ नभीषयध्वंरुदतींनमस्कुरुतजान
कीम् ॥ इदानीमेवमेस्वप्नेरामःकमललोचनः ॥ ४९ ॥ आरुह्यैरावतंशुभ्रंलक्ष्मणेनसमागतः ॥ दग्ध्वालंकांपुरींसर्वांह
त्वारावणमाहवे ॥ ५० ॥

पायैःस्वक्रौर्ययोग्यैर्वा ॥ ४३ ॥ इदंसांत्वस्याप्युपलक्षणम् तदेवाह तत्रैकेति ॥ ४४ ॥ भीषणान्याह अपराचेति किंविलंबेन अस्यावधेइतिशेषः जानकी इदानीमेवछेद्यतांअस्याअंगंपृथकपृथक्विभज्यपच्यतामितिशेषः ॥ ४५ ॥ ४६ ॥ ४७ ॥ मद्वाक्यंशृणुध्वम् यच्छ्रुतंसद्वोहितंभवेत् ॥ ४८ ॥ वाक्यमाहनेति इदानीमेवमेमयारामःस्वप्नेदृष्टइत्यन्वयः ॥ ४९ ॥ कथंदृष्टस्तदाह आरुह्येति समागतःसंयुक्तः ॥ ५० ॥

स्वांकेजानकीमारोप्यअगस्यपर्वतस्यमूर्धनिऊर्ध्वभागेस्थितोदृष्टः एवंरामविषयंशुभस्वप्नमुक्त्वारावण विषयमनिष्टस्वप्नमाह रावणइति ॥ ५१ ॥ वदनमालि
कांस्वमुंडमालांस्वहस्तेकृत्वागाहदित्यर्थः नन्वेवंकिंलंकाऽराक्षसैवभविष्यतीत्याशंक्यनेत्याह विभीषणइति रामस्यसेवांकरोतिएवंविधःस्वप्नेदृष्टोऽतःसोऽत्ररा

आरोप्यजानकींस्वांकेस्थितोदृष्टोऽगमूर्धनि॥ रावणोगोमयह्रदेतैलाभ्यक्तोदिगंबरः॥ ५१ ॥ अगाहत्पुत्रपौत्रैश्चकृत्वा
वदनमालिकाम्॥ विभीषणस्तुरामस्यसन्निधौहृष्टमानसः॥ ५२ ॥ सेवांकरोतिरामस्यपादयोर्भक्तिसंयुतः॥ सर्वथा
रावणंरामोहत्वासकुलमंजसा ॥ ५३ ॥ विभीषणायाधिपत्यंदत्त्वासीतांशुभाननाम्॥ अंकेनिधायस्वपुरींगमिष्यति
नसंशयः ॥ ५४ ॥ त्रिजटायावचःश्रुत्वाभीतास्ताराक्षसस्त्रियः ॥ तूष्णीमासंस्तत्रतत्रनिद्रावशमुपागताः ॥ ५५ ॥ त
र्जिताराक्षसीभिःसासीताभीतातिविह्वला ॥ त्रातारंनाधिगच्छंतीदुःखेनपरिमूर्छिता ॥ ५६ ॥ अश्रुभिःपूर्णनयनाचिं
तयंतीदमब्रवीत्॥ प्रभातेभक्षयिष्यंतिराक्षस्योमांनसंशयः ॥ इदानीमेवमरणंकेनोपायेनमेभवेत्॥ ५७॥ एवंसुदुः
खेनपरिप्लुतासाविमुक्तकंठंरुदतीचिराय॥ आलंब्यशाखांकृतनिश्चयामृतौनजानतीकंचिदुपायमंगना ॥ ५८ ॥ ॥
इतिश्रीमदध्यात्मरामायणेउमाम० सुंदरकांडेद्वितीयःसर्गः ॥ २ ॥ ॥ छ ॥ ॥ उद्बंधनेनवामोक्ष्येशरीरं
राघवंविना॥ जीवितेनफलंकिंस्यान्ममरक्षोधिमध्यतः॥ १ ॥

ज्यंकर्तेत्याह सर्वथेत्यादि ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ त्रातारमप्राप्नुवतीदुःखेनमूर्छितामूर्छितेवाश्रुयुक्तनेत्राचिंतयंतीदमात्मनासहाब्रवीत् ॥ ५६ ॥
॥ ५७ ॥ मृतौकृतनिश्चयामरणस्यकंचिदुपायंकमप्युपायमजानतीशाखामालंब्यचिरायातिष्ठदितिशेषः ॥ ५८ ॥ इतिश्रीमदध्यात्मरामायणेसुंदरकांडेसेतौ
द्वितीयःसर्गः ॥ २ ॥ ॥ छ ॥ ॥ ततस्तदुपायंनिश्चित्याहोद्बंधनेनवेति ॥ १ ॥

उद्बंधनसाधनमाह दीर्घांवेणीति अथानंतरंएवंमरणायनिश्चितबुद्धिंजानकींविलोक्येत्यन्वयः ॥ २ ॥ किंचिद्विचार्यअयंवचनावसरइतिनिश्चित्यसूक्ष्मरूपः
सनूजानक्यास्तस्याएवश्रोत्रगंयथाभवतितथाशनैःशनैरभाषतेत्यन्वयः ॥ ३ ॥ तद्वचआह इक्ष्वाकिति ॥ ४ ॥ लक्षणैःसामुद्रिकोक्तोत्तमलक्षणैः शत्रुहाश
त्रुघ्नाख्यइत्यर्थः ॥ ५ ॥ ६ ॥ रावणेननीतेत्यन्वयः ॥ ७ ॥ मार्गमाणःअन्वेषयन् ॥ ८ ॥ दिवंस्वर्लोकंतल्लोकवासमितियावत् ॥ ९ ॥ रामस्यसंकल्पमात्रा

दीर्घांवेणीममात्यर्थमुद्बंधायभविष्यति ॥ एवंनिश्चितबुद्धिंतांमरणायाथजानकीम् ॥ २ ॥ विलोक्यहनुमान्किंचिद्वि
चार्यैतदभाषत ॥ शनैःशनैःसूक्ष्मरूपोजानक्याःश्रोत्रगंवचः ॥ ३ ॥ इक्ष्वाकुवंशसंभूतोराजादशरथोमहान् ॥ अयो
ध्याधिपतिस्तस्यचत्वारोलोकविश्रुताः ॥ ४ ॥ पुत्रादेवसमाःसर्वैर्लक्षणैरुपलक्षिताः ॥ रामश्चलक्ष्मणश्चैवभरतश्चै
वशत्रुहा ॥ ५ ॥ ज्येष्ठोरामःपितुर्वाक्याद्दंडकारण्यमागतः ॥ लक्ष्मणेनसहभ्रात्रासीतयाभार्ययासह ॥ ६ ॥ उवास
गौतमीतीरेपंचवट्यांमहामनाः ॥ तत्रनीतामहाभागासीताजनकनंदिनी ॥ ७ ॥ रहितेरामचंद्रेणरावणेनदुरात्म
ना ॥ ततोरामोतिदुःखार्तोमार्गमाणोऽथजानकीम् ॥ ८ ॥ जटायुषंपक्षिराजमपश्यत्पतितंभुवि ॥ तस्मैदत्त्वादिवंशी
घ्रमृष्यमूकमुपागमत् ॥ ९ ॥ सुग्रीवेणकृतामैत्रीरामस्यविदितात्मनः ॥ तद्भार्याहारिणंहत्वावालिनंरघुनंदनः ॥ १० ॥
राज्येभिषिच्यसुग्रीवंमित्रकार्यंचकारसः ॥ सुग्रीवस्तुसमानाय्यवानरान्वानरप्रभुः ॥ ११ ॥ प्रेषयामासपरितोवानरा
न्परिमार्गणे ॥ सीतायास्तत्रचैकोऽहंसुग्रीवसचिवोहरिः ॥ १२ ॥

त्सर्वसाधकस्यनवानरमैत्र्याःप्रयोजनमित्यौद्धत्यपरिहारायसुग्रीवेणकृतेत्युक्तंनतुरामेणकृतेति तद्भार्याहारिणंसुग्रीवभार्याहारिणम् ॥ १० ॥ मित्रकार्यंसुग्रीव
कृतमित्रत्वकार्यम् सहायभूतान्समानीयनानापर्वतादिभ्योदूतैर्वानरान्किष्किंधांसमानाय्य ॥ ११ ॥ तान्वानरान्सीतायाःपरिमार्गणेतन्निमित्तंपरितःप्रेषया
मासेत्यन्वयः ॥ १२ ॥

समुद्रमुल्लंघ्यलंकानगरींदृष्ट्वातत्रतत्रजानकींविचिन्वन्शनैःक्रमेणाशोकवनिकांदृष्ट्वातत्रतांविचिन्वन्शिंशपातरुंदृष्टवान् अत्रशिंशपामूलेजानकीमद्राक्षमतो ऽत्रागतोहंकृतकृत्यःसंवृत्तइतिशेषः ॥ १३ ॥ १४ ॥ १५ ॥ वायुनेति तस्यजगत्क्रियासाक्षित्वात्तेनकथितत्वसंभावना ॥ १६ ॥ स्वप्नोवेत्यादिविकल्पत्रयम् सत्यंस्वप्नभ्रमातिरिक्तंकिंचित्कर्तृकंप्रमाजनकंवाक्यमित्यर्थः तत्रदुःखहेतुनानिद्राभावात्स्वप्नस्यासंभवः भ्रमोपिनेत्याह जानाम्येतत् एतत्पदार्थजातंयथास्थि

संपातिवचनाच्छीघ्रमुल्लंघ्यशतयोजनम् ॥ समुद्रंनगरींलंकांविचिन्वञ्जानकींशुभाम् ॥ १३ ॥ शनैरशोकवनिकांविचिन्वन्शिंशपातरुम् ॥ अद्राक्षंजानकीमत्रशोचंतींदुःखसंप्लुताम् ॥ १४ ॥ रामस्यमहिषींदेवींकृतकृत्योहमागतः ॥ इत्युक्त्वोपरराामाथमारुतिर्बुद्धिमत्तरः ॥ १५ ॥ सीताक्रमेणतत्सर्वंश्रुत्वाविस्मयमाययौ ॥ किमिदंमेश्रुतंव्योम्निवायुना समुदीरितम् ॥ १६ ॥ स्वप्नोवामेमनोभ्रांतिर्यदिवासत्यमेवतत् ॥ निद्रामेनास्तिदुःखेनजानाम्येतत्कुतोभ्रमः ॥ १७ ॥ येनमेकर्णपीयूषंवचनंसमुदीरितम् ॥ सदृश्यतांमहाभागःप्रियवादीममाग्रतः ॥ १८ ॥ श्रुत्वातज्जानकीवाक्यंहनुमान्पत्रखंडतः ॥ अवतीर्यशनैःसीतापुरतःसमवस्थितः ॥ १९ ॥ कलविंकप्रमाणांगोरक्तास्यःपीतवानरः ॥ ननामशनकैः सीतांप्रांजलिःपुरतःस्थितः ॥ २० ॥ दृष्ट्वातंजानकीभीतारावणोयमुपागतः ॥ मांमोहयितुमायातोमाययावानराकृतिः ॥ २१ ॥

तस्वरूपेणजानामिअतोनभ्रमसंभवः यद्वाभ्रांतःस्वाज्ञानेभ्रमत्वंनविकल्पयतिममचतथाविकल्पोतोनभ्रमइतिभावः ॥ १७ ॥ तस्मात्सत्यत्वमेवनिश्चित्याह येनेति सममायतोदृश्यताम् ममायतोभूत्वात्मानंदर्शयत्वित्यर्थः ॥ १८ ॥ पत्रखंडतःपत्रसमूहात् ॥ १९ ॥ कलविंकश्चटकः भाषायांचिमणाचिमणी चटकः कलविंकःस्यात्तस्यस्त्रीचटकातयोः पुमपत्येचाटकैरस्यपत्येचटकैवहीत्यमरः पीतवर्णोवानरःपीतवानरः ॥ २० ॥ २१ ॥

॥ २२ ॥ शंकांरावणत्वशंकाम् परमात्मनइतितत्स्वरूपाभिज्ञत्वेनतद्दासत्वसत्यताप्रत्यायनाय ॥ २३ ॥ २४ ॥ २५ ॥ यथात्वंदासोहमितिभाषसेतथावानरमनुष्ययोःसंगतिःप्रतीयतेसात्रकथंघटतइत्यर्थः ॥ २६ ॥ शबर्येति भगवतात्वद्वृत्तांतेशबरींप्रतिपृष्टेसतिसुग्रीवसमीपंगच्छससीतामार्गणंकरिष्यतीतितयोक्त

इत्येवंचिंतयित्वासातूष्णीमासीदधोमुखी ॥ पुनरप्याहतांसीतांदेवियत्त्वंविशंकसे ॥ २२ ॥ नाहंतथाविधोमातस्त्यजशंकांमयिस्थिताम् ॥ दासोऽहंकोसलेंद्रस्यरामस्यपरमात्मनः ॥ २३ ॥ सचिवोऽहंहरींद्रस्यसुग्रीवस्यशुभप्रदे ॥ वायोःपुत्रोऽहमखिलप्राणभूतस्यशोभने ॥ २४ ॥ तच्छ्रुत्वाजानकीप्राहहनूमंतंकृतांजलिम् ॥ वानराणांमनुष्याणांसंगतिर्घटतेकथम् ॥ २५ ॥ यथात्वंरामचंद्रस्यदासोहमितिभाषसे ॥ तामाहमारुतिःप्रीतोजानकींपुरतःस्थितः ॥ २६ ॥ ऋष्यमूकमगाद्रामःशबर्यानोदितःसुधीः ॥ सुग्रीवोऋष्यमूकस्थोदृष्टवान्रामलक्ष्मणौ ॥ २७ ॥ भीतोमांप्रेषयामासज्ञातुंरामस्यहृद्गतम् ॥ ब्रह्मचारिवपुर्धृत्वागतोहंरामसन्निधिम् ॥ २८ ॥ ज्ञात्वारामस्यसद्भावंस्कंधोपरिनिधायतौ ॥ नीत्वासुग्रीवसामीप्यंसख्यंचाकरवंतयोः ॥ २९ ॥ सुग्रीवस्यहृताभार्यावालिनातंरघूत्तमः ॥ जघानैकेनबाणेनततोराज्येभ्यषेचयत् ॥ ३० ॥ सुग्रीवंवानराणांसप्रेषयामासवानरान् ॥ दिग्भ्योमहाबलान्वीरान्भवत्याःपरिमार्गणे ॥ ३१ ॥ गच्छंतंराघवोदृष्ट्वामामभाषतसादरम् ॥ ३२ ॥ त्वयिकार्यमशेषंमेस्थितंमारुतनंदन ॥ ब्रूहिमेकुशलंसर्वंसीतायैलक्ष्मणस्यच ॥ ३३ ॥

इत्यर्थः ॥ २७ ॥ भीतोवालिप्रेरितत्वभ्रांत्या ॥ २८ ॥ तौरामलक्ष्मणौ सख्यंचअकरवंकारितवानित्यर्थः अंतर्भावितण्यर्थः ॥ २९ ॥ तंवालिनंजघान वानराणांराज्येभ्यषेचयत्सुग्रीवमित्यन्वयः ॥ ३० ॥ ससुग्रीवोभवत्याःपरिमार्गणेतन्निमित्तंवानरान्प्रेषयामास ॥ ३१ ॥ ३२ ॥ अशेषंकार्यंत्वयिस्थितंत्वमेवसकलकार्यसाधनेसमर्थः मेमम ॥ ३३ ॥

मेएतदंगुलीयकंसीतायैपरिज्ञानार्थंरामीयएवायमितिनिश्चयार्थंदीयताम् मन्नामाक्षरमुद्रितंमन्नामाक्षरमुद्रयायुतम् ॥ ३४ ॥ ३५ ॥ नमस्कृत्वामुद्रिकांददौ पुनर्नमस्कृत्वाचदूरात्स्थितः अनेनदानवेलायांकिंचित्समीपमुपसृतइतिज्ञायते ॥ ३६ ॥ मुद्रिकांदृष्ट्वाप्रमुदिताजाता ततःशिरसाधृत्वास्रवदानंदनेत्रजाजाता स्रवंतिआनंदेननेत्रजान्यश्रूणियस्याःसा ॥ ३७ ॥ कपेमुद्रिकारक्षणाद्बुद्धिमांस्त्वंमेप्राणदातासि राघवेभक्तोऽसितस्यप्रियकारीचासि अतोराघवस्यतवैवविश्वासोस्तीतिमन्येच ॥ ३८ ॥ विश्वास्यतांयुक्त्यासाधयति नोचेदिति नोचेत्त्वयिविश्वासश्चेन्नस्यात्तदान्यमविश्वस्तंपुरुषरूपंत्वांकथंमत्सन्निधिंप्रेषयेत् ॥ ३९ ॥ यथामेमयिराघवस्यदयाजायतेतथासर्वंराक्षसीकृततर्जनादिकथयेत्यर्थः मासद्वयेति अग्रेमरणमेव त्वदग्रेएवरावणेनतथाप्रतिज्ञातत्वादितिभावः ॥ ॥ ४० ॥ तदेवाह नागमिष्यतीति वानरानीकपैःसार्धमत्रागत्यरावणमुक्तविशेषणंहत्वायदिमांप्रभुर्मोचयेत्तत्कृतबंधनादितिशेषः ॥ ४१ ॥ ४२ ॥ तत्तदा वीरवर्णयब्राह्मणैश्चवर्णितंतस्यवीर्यंसदृशंभवेत्यथावर्णितंभवेत् अन्यथाविपरीतमेवेत्यर्थः ॥ ४३ ॥

अंगुलीयकमेतन्मेपरिज्ञानार्थमुत्तमम् ॥ सीतायैदीयतांसाधुमन्नामाक्षरमुद्रितम् ॥ ३४ ॥ इत्युक्त्वाप्रददौमह्यंकराग्रादंगुलीयकम् ॥ प्रयत्नेनमयानीतंदेविपश्यांगुलीयकम् ॥ ३५ ॥ इत्युक्त्वाप्रददौदेव्यै मुद्रिकांमारुतात्मजः ॥ नमस्कृत्वास्थितोदूराद्बद्धांजलिपुटोहरिः ॥ ३६ ॥ दृष्ट्वासीताप्रमुदितारामनामांकितांतदा ॥ मुद्रिकांशिरसाधृत्वास्रवदानंदनेत्रजा ॥ ३७ ॥ कपेमेप्राणदातात्वंबुद्धिमानसिराघवे ॥ भक्तोऽसिप्रियकारीत्वंविश्वासोऽस्तितवैवहि ॥ ३८ ॥ नोचेन्मत्सन्निधिंचान्यंपुरुषंप्रेषयेत्कथम् ॥ हनुमन्दृष्टमखिलंममदुःखादिकंत्वया ॥ ३९ ॥ सर्वंकथयरामाययथामेजायतेदया ॥ मासद्वयावधिप्राणाःस्थास्यंतिममसत्तम ॥ ४० ॥ नागमिष्यतिचेद्रामोभक्षयिष्यतिमांखलः ॥ अतःशीघ्रंकपींद्रेणसुग्रीवेणसमन्वितः ॥ ४१ ॥ वानरानीकपैःसार्धंहत्वारावणमाहवे ॥ सपुत्रंसबलंरामोयदिमांमोचयेत्प्रभुः ॥ ४२ ॥ तत्तस्यसदृशंवीर्यंवीरवर्णयवर्णितम् ॥ यथामांतारयेद्रामोहत्वाशीघ्रंदशाननम् ॥ ४३ ॥

अतस्तथेति वाचावचनकृतरामप्रेरणया धर्मंबंदीमोक्षजम् यथायथारूपोदृष्टस्तथाजानेशीघ्रमागमिष्यतीत्यादि ॥ ४४ ॥ ४५ ॥ तंहनूमंतंजानकीआह
किमाह रामइत्यादि ॥ ४६ ॥ हनूमानुत्तरयति मेस्कंधावित्यादि ॥ ४७ ॥ आततंविस्तीर्णम् ॥ ४८ ॥ ४९ ॥ भ्रात्रासहरामंद्रष्टुंगच्छामिगत्वाचतवांतिक

तथायतस्वहनुमन्वाचाधर्ममवाप्नुहि ॥हनूमानपितामाहदेविदृष्टोयथामया॥ ४४॥ रामःसलक्ष्मणःशीघ्रमागमिष्य
तिसायुधः॥सुग्रीवेणससैन्येनहत्वादशमुखंबलात्॥ ४५॥ समानेष्यतिदेवित्वामयोध्यांनात्रसंशयः॥ तमाहजानकी
रामःकथंवारिधिमाततम् ॥ ४६ ॥ तीर्त्वायास्यत्यमेयात्मावानरानीकपैःसह ॥ हनुमानाहमेस्कंधावारुह्यपुरुषर्ष
भौ॥ ४७॥ आयास्यतःससैन्यश्चसुग्रवोवानरेश्वरः ॥ विहायसाक्षणेनैवतीर्त्वावारिधिमाततम् ॥ ४८ ॥ निर्दहिष्यति
रक्षौघांस्त्वत्कृतेनात्रसंशयः ॥ अनुज्ञांदेहिमेदेविगच्छामित्वरयान्वितः ॥ ४९ ॥ द्रष्टुंरामंसहभ्रात्रात्वरयामितवांति
कम् ॥ देविकिंचिदभिज्ञानंदेहिमेयेनराघवः ॥ ५० ॥ विश्वसेन्मांप्रयत्नेनततोगंतासमुत्सुकः ॥ ततःकिंचिद्विचार्याथ
सीताकमललोचना ॥ ५१ ॥ विमुच्यकेशपाशांतेस्थितंचूडामणिंददौ ॥ अनेनविश्वसेद्रामस्त्वांकपींद्रसलक्ष्मणः
॥ ५२ ॥ अभिज्ञानार्थमन्यच्चवदामितवसुव्रत ॥ चित्रकूटगिरौपूर्वमेकदारहसिस्थितः॥ मदंकेशिरआधायनिद्रातिरघु
नंदनः ॥ ५३ ॥ ऐंद्रःकाकस्तदागत्यनखैस्तुंडेनचासकृत् ॥ मत्पादांगुष्ठमारक्तंविददारामिषाशया ॥ ५४ ॥

मागंतुंत्वरयामि राघवःयथामांविश्वसेत्जानकींसर्वथादृष्टवानितितथाकिंचिदभिज्ञानंदेहि ॥ ५० ॥ ततोहंसमुत्सुकःरामदर्शनोत्सुकः प्रयत्नेनत्वद्दत्ताभिज्ञानं
रक्षन्गंताराघवसमीपमितिशेषः किंचिद्विचार्यतद्वचसोयुक्तत्वंविचार्य ॥ ५१ ॥ ५२ ॥ ५३ ॥ ऐंद्रःइंद्रलोकस्थःकाकरूपधरइंद्रपुत्रइत्यर्थः आमि
षंमांसम् ॥ ५४ ॥

एतत्त्वत्पादांगुष्ठविदारणरूपम् ॥५५॥ मांपुनःपुनरभिद्रवंतमित्यन्वयः रक्तमास्यंनखंतुंडयस्यतम् ॥५६॥ ज्वलत्तत् अभिमंत्रितंतृणंवायसमभ्यद्रवत् ॥ ५७॥ सवायसोऽपिभीतःलोकान्ऐंद्रब्रह्मांतान्भ्रमंस्तत्रतैरपियदारक्षितुंशक्योनाभवत्तदा ॥ ५८ ॥ रामपदाग्रेऽपतत् ॥ ५९ ॥ ततःकाकोगतइतिशेषः एवंपौरुषवान

ततोरामःप्रबुद्ध्याथदृष्ट्वापादंकृतव्रणम् ॥ केनभद्रेकृतंचैतद्विप्रियंमेदुरात्मना ॥ ५५ ॥ इत्युक्त्वापुरतोऽपश्यद्वायसंमां
पुनःपुनः॥ अभिद्रवंतंरक्तास्यनखतुंडंचुकोपह ॥ ५६ ॥ तृणमेकमुपादायदिव्यास्त्रेणाभियोज्यतत् ॥ चिक्षेपलीलया
रामोवायसोपरितज्ज्वलत् ॥ ५७ ॥ अभ्यद्रवद्वायसश्चभीतोलोकान्भ्रमन्पुनः ॥ इंद्रब्रह्मादिभिश्चापिनशक्योरक्षितुं
तदा ॥ ५८ ॥ रामस्यपादयोरग्रेऽपतद्भीत्यादयानिधेः ॥ शरणागतमालोक्यरामस्तमिदमब्रवीत् ॥ ५९ ॥ अमोघमे
तदस्त्रंमेदत्त्वैकाक्षमितोव्रज ॥ सव्यंदत्त्वाततःकाकएवंपौरुषवानपि ॥ ६० ॥ उपेक्षतेकिमर्थंमामिदानींसोपिराघवः॥
हनूमानपितामाहश्रुत्वासीतानुभाषितम् ॥ ६१ ॥ देवित्वांयदिजानातिस्थितामत्ररघूत्तमः ॥ करिष्यतिक्षणाद्भस्मलं
कांराक्षसमंडिताम्॥ ६२ ॥ जानकीप्राहतंवत्सकथंत्वंयोत्स्यसेऽसुरैः ॥ अतिसूक्ष्मवपुःसर्वेवानराश्चभवादृशाः॥६३॥
श्रुत्वातद्वचनंदेव्यैपूर्वरूपमदर्शयत्॥ मेरुमंदरसंकाशंरक्षोगणविभीषणम् ॥ ६४ ॥ दृष्ट्वासीताहनूमंतंमहापर्वतसन्नि
भम्॥ हर्षेणमहताविष्टाप्राहतंकपिकुंजरम् ॥ ६५ ॥

पिसराघवःइदानीमपिएवमवस्थायामपियदुपेक्षतेतत्किमर्थम् ॥ ६० ॥ ६१ जानाति वर्तमानसामीप्येलट् ज्ञास्यतीत्यर्थः ॥ ६२ ॥ यथात्वंसूक्ष्मवपुस्तथासर्वेऽपिवानराभवादृशाः भवद्वदेवसूक्ष्मवपुषइतिमहावपुर्भीराक्षसैर्युद्धमसंभावितमित्यर्थः ॥ ६३ ॥ श्रुत्वातद्वचनंसीतायाइतिशेषः देव्यैसीतायै ॥ ६४ ॥ ६५ ॥

त्वांराक्षस्योद्रक्ष्यंति दृष्ट्वाचरावणंकथयिष्यंति एवंसतिकोवेदकिंभावीत्याशयः अतोरामांतिकंद्रुतंगच्छतेपंथाःशुभोस्त्वितिशेषः ॥ ६६ ॥ कपिर्जानकींप्रा
हाहंबुभुक्षितोऽस्मिअतस्तवदर्शनान्ममपारणमुचितमितिशेषः नन्वहंरिक्ताकेनत्वांपारयामीतिशंकायामाह तवदृष्टौस्थितैःफलैर्मेपारणाभविष्यतीत्यर्थः॥ ६७॥

समर्थोऽसिमहासत्वद्रक्ष्यंतित्वांमहाबलम् ॥ राक्षस्यस्तेशुभःपंथागच्छरामांतिकंद्रुतम् ॥ ६६ ॥ बुभुक्षितःकपिःप्राहद
र्शनात्पारणंमम ॥ भविष्यतिफलैःसर्वैस्तवदृष्टौस्थितैर्हिमे ॥ ६७ ॥ तथेत्युक्तःसजानक्याभक्षयित्वाफलंकपिः॥ ततः
प्रस्थापितोऽगच्छज्जानकींप्रणिपत्यसः॥ किंचिद्दूरमथोगत्वास्वात्मन्येवानुचिंतयत् ॥ ६८ ॥ कार्यार्थमागतोदूतःस्वा
मिकार्याविरोधतः ॥ अन्यत्किंचिदसंपाद्यगच्छत्यधमएवसः ॥ ६९ ॥ अतोऽहंकिंचिदन्यच्चकृत्वादृष्ट्वाथरावणम् ॥ सं
भाष्यचततोरामदर्शनार्थंव्रजाम्यहम् ॥ ७० ॥ इतिनिश्चित्यमनसावृक्षखंडान्महाबलः॥ उत्पाट्याशोकवनिकांनिर्वृक्षा
मकरोत्क्षणात् ॥ ७१ ॥ सीताश्रयनगंत्यक्त्वावनंशून्यंचकारसः॥ उत्पाटयंतंविपिनंदृष्ट्वाराक्षसयोषितः ॥ ७२ ॥ अ
पृच्छन्जानकींकोसौवानराकृतिरुद्भटः ॥ ७३ ॥ ॥ जानक्युवाच ॥ ॥ भवत्यएवजानंतिमायांराक्षसनिर्मि
ताम् ॥ नाहमेनंविजानामिदुःखशोकसमाकुला ॥ ७४ ॥ इत्युक्तास्त्वरितंगत्वाराक्षस्योभयपीडिताः॥ हनूमताकृतंस
र्वंरावणायन्यवेदयन् ॥ ७५ ॥

ततस्तयाप्रस्थापितोजानकींप्रणिपत्यागच्छत् अनुचिंतयत्अन्वचिंतयत् अडभावआर्षः ॥ ६८ ॥ अन्यत्किंचित्स्वाम्याज्ञप्तादधिकमुत्कृष्टंकर्मेत्यर्थः॥ ६९॥
अन्यत्किंचिद्वीरकर्म रावणंदृष्ट्वासंभाष्यचेत्यन्वयः ॥ ७० ॥ वृक्षखंडान्वृक्षसमूहान्उत्पाट्यनिर्वृक्षामकरोत् ॥ ७१ ॥ सीताश्रयनगंशिंशपारूपम् शून्यंवृक्षै
रितिशेषः विपिनंवनवृक्षान् ॥ ७२ ॥ ७३ ॥ दुःखशोकाभ्यांयुक्ताहमेनंनजानामि ॥ ७४ ॥ ७५ ॥

वानराकृतिदेहभृत्वानरदेहसदृशदेहइत्यर्थः वानरेएवंपराक्रमासंभवादेवमुक्तिः अशोकवनिकांक्षणादुत्पाट्यतैरेवचैत्यप्रासादंबभंज ॥ ७६ ॥ तस्थिवान्स्थितः महाप्रियंमहच्चतदप्रियंचेत्यर्थः ॥ ७७ ॥ नियुतंदशकोट्यः निर्भग्नोयश्चैत्यप्रासादस्तस्यप्रथमंयदंतरंप्रथमायाभूमिस्तत्रसंस्थितः ॥ ७८ ॥ लोहस्तंभएव

देवकश्चिन्महासत्वोवानराकृतिदेहभृत् ॥ सीतयासहसंभाष्यत्वशोकवनिकांक्षणात् ॥ उत्पाट्यचैत्यप्रासादंबभंजामितविक्रमः ॥ ७६ ॥ प्रासादरक्षिणःसर्वान्हत्वातत्रैवतस्थिवान् ॥ तच्छ्रुत्वातूर्णमुत्थायवनभंगंमहाऽप्रियम् ॥ ७७ ॥ किंकरान्प्रेषयामासनियुतंराक्षसाधिपः ॥ निर्भग्नचैत्यप्रासादप्रथमांतरसंस्थितः ॥ ७८ ॥ हनुमान्पर्वताकारोलोहस्तंभकृतायुधः ॥ किंचिल्लांगूलचलनोरक्तास्योभीषणाकृतिः ॥७९॥ आपतंतंमहासंघंराक्षसानांददर्शसः ॥ चकारसिंहनादंचश्रुत्वातेमुमुहुर्भृशम् ॥ ८० ॥ हनूमंतमथोदृष्ट्वाराक्षसाभीषणाकृतिम् ॥ निर्जघ्नुर्विविधास्त्रौघैःसर्वराक्षसघातिनम् ॥ ८१ ॥ ततउत्थायहनुमान्मुद्गरेणसमंततः ॥ निष्पिपेषक्षणादेवमशकानिवयूथपः ॥ ८२ ॥ निहतान्किंकरान्श्रुत्वारावणःक्रोधमूर्छितः ॥ पंचसेनापतींस्तत्रप्रेषयामासदुर्मदान् ॥८३॥ हनूमानपितान्सर्वान्लोहस्तंभेनचाहनत् ॥ ततःक्रुद्धोमंत्रिसुतान्प्रेषयामाससप्तसः ॥८४॥ आगतानपितान्सर्वान्पूर्ववद्वानरेश्वरः ॥ क्षणान्निःशेषतोहत्वालोहस्तंभेनमारुतिः ॥८५॥ पूर्वस्थानमुपाश्रित्यप्रतीक्षन्राक्षसान्स्थितः ॥ ततोजगामबलवान्कुमाराक्षःप्रतापवान् ॥ ८६ ॥

कृतमायुधंयेनसः किंचिल्लांगूलचलनइतिस्वभावोक्तिः ॥ ७९ ॥ तेकिंकरानामराक्षसाः ॥ ८० ॥ भीषणाकृतिंहनूमंतंदृष्ट्वेत्यन्वयः ॥ ८१ ॥ मुद्गरोत्रलोहस्तभः ॥ ८२ ॥ ८३ ॥ सरावणः ॥ ८४ ॥ ८५ ॥ राक्षसान्रावणप्रेषणीयान् ॥ ८६ ॥

आकाशेप्रथममुत्पपाततोगगनादवतरन्मूर्ध्निमुद्गरेणाताडयत् ॥ ८७ ॥ ८८ ॥ ८९ ॥ इंद्रजितंप्रतित्वंतंहंतुंगच्छेतिभंग्यंतरेणाह पुत्रेति हत्वेत्युक्त्वाहंतुमशक्य त्वंविचार्याह बद्ध्वावेति ॥ ९० ॥ दुःखितंवचःआज्ञाकर्तुरभावइवेतिभावः ॥ ९१ ॥ ब्रह्मपाशतःब्रह्मास्त्राभिमंत्रितैःपाशैरित्यर्थः ॥ ९२ ॥ ९३ ॥ हनूमंतंशि

तमुत्पपातहनुमानूद्दृष्ट्वाकाशेसमुद्गरः ॥ गगनात्त्वरितोमूर्ध्निमुद्गरेणव्यताडयत् ॥ ८७ ॥ हत्वातमक्षंनिःशेषंबलंसर्वंच
कारसः ॥ ८८ ॥ ततःश्रुत्वाकुमारस्यवधंराक्षसपुंगवः॥ क्रोधेनमहताविष्टइंद्रजेतारमब्रवीत् ॥ ८९ ॥ पुत्रगच्छाम्यहंत
त्रयत्रास्तेपुत्रहारिपुः॥ हत्वातमथवाबद्ध्वाआनयिष्यामितेंतिकम् ॥ ९० ॥ इंद्रजित्पितरंप्राहत्यजशोकंमहामते ॥ मयि
स्थितेकिमर्थंत्वंभाषसेदुःखितंवचः ॥ ९१ ॥ बद्ध्वानेष्येद्रुतंतातवानरंब्रह्मपाशतः ॥ इत्युक्त्वारथमारुह्यराक्षसैर्बहुभि
र्वृतः॥९२॥ जगामवायुपुत्रस्यसमीपंवीरविक्रमः ॥ ततोतिगर्जितंश्रुत्वास्तंभमुद्यम्यवीर्यवान्॥ ९३ ॥ उत्पपातनभोदे
शंगरुत्मानिवमारुतिः॥ ततोभ्रमंतंनभसिहनूमंतंशिलीमुखैः॥९४॥ विद्धातस्यशिरोभागमिषुभिश्चाष्टभिःपुनः॥ हृदयं
पादयुगलंषड्भिरेकेनवालधिम् ॥ ९५ ॥ भेदयित्वाततोघोरंसिंहनादमथाकरोत् ॥ ततोऽतिहर्षाद्धनुमांस्तंभमुद्यम्यवीर्य
वान्॥ ९६ ॥ जघानसारथिंसाश्वंरथंचाचूर्णयत्क्षणात् ॥ ततोऽन्यंरथमादायमेघनादोमहाबलः ॥ ९७ ॥ शीघ्रंब्रह्मास्त्र
मादायबद्ध्वावानरपुंगवम् ॥ निनायनिकटंराज्ञोरावणस्यमहाबलः ॥ ९८ ॥ यस्यनामसततंजपंतियेऽज्ञानकर्मकृतबं
धनंक्षणात्॥ सद्यएवपरिमुच्यतत्पदंयांतिकोटिरविभासुरंशिवम् ॥ ९९ ॥

लीमुखैर्विद्ध्वासिंहनादमकरोदित्यन्वयः ॥ ९४ ॥ विद्धेत्यस्यैवविवरणंशिरोभागमित्यादिभेदयित्वेत्यंतम् ॥ ९५ ॥ सिंहनादमकरोत् इंद्रजिदितिशेषः ॥ ९६ ॥ ॥ ९७ ॥ ९८ ॥ यस्यरामस्यनामयेप्राणिनोजपंतितेऽज्ञानजन्यकर्मकृतबंधनंसंसारंपरिमुच्यसद्यएवशिवाख्यंतत्पदंसच्चिदानंदाख्यंयांति ॥ ९९ ॥

तस्यरामस्यपदांबुजध्यातामारुतिर्यतः सदैवनिर्मुक्तानिसमस्तानिबंधनानिकर्माणियस्यतादृशोभवति अतस्तस्यपाशैरितरैर्वाबंधनैः किंदुःखमितिशेषः ॥
॥ १०० ॥ ॥ इतिश्रीमदध्यात्मरामायणेसेतौसुंदरकांडेतृतीयःसर्गः ॥ ३ ॥ ॥ ७ ॥ ॥ धृतंस्वहस्तेनपाशबंधनंयेनतादृशम् विशेषेणभीतव
न्नगरंलंकांविलोकयंतम् ईक्षितुंकपींद्रंद्रष्टुम् तमेवानुपश्चाद्यांतइतिपौरविशेषणम् ॥ १ ॥ क्षणमात्रसंगमंक्षणमात्रंसंगमःस्वसंबंधोयस्यतादृशमेनंहनूमंतम्

तस्यैवरामस्यपदांबुजंसदाहृत्पद्ममध्येसुनिधायमारुतिः ॥ सदैवनिर्मुक्तसमस्तबंधनःकिंतस्यपाशैरितरैश्चबंधनैः ॥
॥ १०० ॥ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेसुंदरकांडेतृतीयःसर्गः ॥ ३ ॥ ॥ ७ ॥ ॥
यांतंकपींद्रंधृतपाशबंधनंविलोकयंतंनगरंविभीतवत् ॥ अताडयन्मुष्टितलैःसुकोपनाःपौराःसमंतादनुयांतईक्षितुम् ॥
॥ १ ॥ ब्रह्मास्त्रमेनंक्षणमात्रसंगमंकृत्वागतंब्रह्मवरेणसत्वरम् ॥ ज्ञात्वाहनूमानपिफल्गुरज्जुभिर्धृतोययौकार्यविशेष
गौरवात् ॥ २ ॥ सभांतरस्थस्यचरावणस्यतंपुरोनिधायाहबलारिजित्तदा ॥ बद्धोमयाब्रह्मवरेणवानरःसमागतोऽने
नहतामहासुराः ॥ ३ ॥ यद्युक्तमत्रार्यविचार्यमंत्रिभिर्विधीयतामेषनलौकिकोहरिः ॥ ततोविलोक्याहसराक्षसेश्वरःप्रह
स्तमग्रेस्थितमंजनाद्रिभम् ॥ ४ ॥

ब्रह्मास्त्रंकर्तृकृत्वा ब्रह्मवरेणत्वांमदस्त्रंनपीडयिष्यतीतिब्रह्मदत्तवरेणसत्वरंगतम् हनूमानूतद्गमनंज्ञात्वाऽपिफल्गुतार्णरज्जुभिर्धृतोऽपिकार्यविशेषस्यकर्तव्यरावण
दर्शनादिरूपस्यगौरवाद्बद्धइवययावित्यर्थः ॥ २ ॥ सभांतरस्थस्यसभामध्यस्थस्य तंहनुमंतम् बलारिजिदिंद्रजिद्ब्रह्मवरेण ब्रह्मवरलब्धब्रह्मास्त्रेणसमागतः बंध
पीडामसहिष्णुःस्वयमेवागतइत्यर्थः तद्वृत्तांतमाह अनेनेत्यादि ॥ ३ ॥ एषहरिर्नलौकिकइतितत्पराक्रमकथनम् अंजनाद्रिभंअंजनाचलवत्श्यामकांतिम् ॥ ४ ॥

कुतःकस्माद्देशादागतइतिशेषः ॥ ५ ॥ विमोक्ष्यसेअस्माद्बंधनात्प्राणभयाच्चेतिशेषः अखिलराजसन्निधौअखिललोकराजस्यरावणस्यसन्निधावित्यर्थः ॥ ॥ ६ ॥ ७ ॥ देवगणादीनाममित्रशत्रो आदिनानागादिसंग्रहः अशेषहृत्स्थितेः अशेषहृदयेषुस्थितिर्यस्य सर्वांतर्यामिणइत्यर्थः अनेनतवततःकथमपिनमो क्षइतिसूचितम् किंचत्वन्मृत्युंचिकीर्षोस्तस्यैवप्रेरणयासीताहृतेतिसूचितम् ॥ ८ ॥ सराघवःसुग्रीवमैत्रींकृत्वावालिनंनिहत्यतंप्रसिद्धपराक्रमंसुग्रीवमेववान

प्रहस्तपृच्छैनमसौकिमागतःकिमत्रकार्यंकुतएववानरः ॥ वनंकिमर्थंसकलंविनाशितंहताःकिमर्थंममराक्षसाबलात् ॥
॥ ५ ॥ ततःप्रहस्तोहनुमंतमादरात्पप्रच्छकेनप्रहितोऽसिवानर ॥ भयंचतेमास्तुविमोक्ष्यसेमयासत्यंवदस्वाखिलराजस
न्निधौ ॥ ६ ॥ ततोऽतिहर्षात्पवनात्मजोरिपुंनिरीक्ष्यलोकत्रयकंटकासुरम् ॥ वक्तुंप्रचक्रेरघुनाथसत्कथांक्रमेणरामंम
नसास्मरन्मुहुः ॥ ७ ॥ शृणुस्फुटंदेवगणाद्यमित्रहेरामस्यदूतोऽहमशेषहृत्स्थितेः ॥ यस्याखिलेशस्यहृताधुनात्वयाभा
र्यास्वनाशायशुनेवसद्धविः ॥ ८ ॥ सराघवोभ्येत्यमतंगपर्वतंसुग्रीवमैत्रीमनलस्यसन्निधौ ॥ कृत्वैकबाणेननिहत्यवा
लिनंसुग्रीवमेवाधिपतिंचकारतम् ॥ ९ ॥ सवानराणामधिपोमहाबलीमहाबलैर्वानरयूथकोटिभिः ॥ रामेणसार्धंसह
लक्ष्मणेनभोप्रवर्षणेऽमर्षयुतोऽवतिष्ठते ॥ १० ॥ संचोदितास्तेनमहाहरीश्वराधरासुतांमार्गयितुंदिशोदश ॥ तत्राहमे
कःपवनात्मजःकपिःसीतांविचिन्वञ्छनकैःसमागतः ॥ ११ ॥

राणामधिपतिंचकार अनेनरामस्यकृतोपकारत्वात्तन्निमित्तंसुग्रीवःसर्ववानरैर्लंकांरोत्स्यत्येवेतिसूचितम् मित्रभार्याहारिणंत्वत्तोऽप्यधिकबलंवालिनंयोहत वान् सत्वांसर्वथाहनिष्यत्येवेतिचसूचितम् ॥ ९ ॥ भोइतिरावणसंबोधनम् प्रवर्षणेतदाख्येपर्वतेऽमर्षयुतस्त्वद्विषयक्रोधयुतोऽवतिष्ठते ॥ १० ॥ धरासुतांजा नकीं अनेनकिमागतइत्यस्यचोत्तरंदत्तम् ॥ ११ ॥

वननाशकारणमाह कपित्वादिति चंचलस्वभावत्वादित्यर्थः राक्षसहननहेतुमाह दृष्ट्वेति ॥ १२ ॥ वपुःस्वशरीरंपरिरक्षितम् तत्रहेतुः प्रियोहीति ॥ १३ ॥ त्यक्त्वागतंब्रह्मास्त्रमितिशेषः बद्धइवागतः तथागमनेहेतुर्हितंप्रवक्तुकामइति तवतत्प्रवचनेकिन्निमित्तमतआह करुणेति ॥१४॥ विवेकतः विवेकेनसदसद्विवेकेन लोकस्यगतिंधर्मात्स्वर्गोऽधर्मान्नरकइत्येवंरूपांविचार्य राक्षसींबुद्धिंत्यजेत्यर्थः संसृतेःसंसाराद्योमोक्षस्तस्यहेतुकींहेतुभूताम् विनयादित्वाठक् ईदृशींदैवींदेवप्रो

दृष्टामयापद्मपलाशलोचनासीताकपित्वाद्विपिनंविनाशितम्॥ दृष्ट्वाततोऽहंरभसासमागतान्मांहंतुकामान्धृतचापसा
यकान्॥ १२॥ मयाहतास्तेपरिरक्षितंवपुःप्रियोहिदेहोऽखिलदेहिनांप्रभो॥ ब्रह्मास्त्रपाशेननिबध्यमांततःसमागमन्मेघ
निनादनामकः॥ १३॥ स्पृष्ट्वैवमांब्रह्मवरप्रभावतस्त्यक्त्वागतंसर्वमवैमिरावण॥ तथाप्यहंबद्धइवागतोहितंप्रवक्तुका
मःकरुणारसार्द्रधीः॥ १४॥ विचार्यलोकस्यविवेकतोगतिंनराक्षसींबुद्धिमुपैहिरावण॥ दैवींगतिंसंसृतिमोक्षहेतुकीं
समाश्रयात्यंतहितायदेहिनः॥ १५॥ त्वंब्राह्मणोह्युत्तमवंशसंभवःपौलस्त्यपुत्रोऽसिकुबेरबांधवः॥ देहात्मबुद्ध्यापिचप
श्यराक्षसोनास्यात्मबुद्ध्याकिमुराक्षसोनहि॥१६॥

क्तांगतिंमार्गंपरपीडातोनिवृत्तिरूपंमार्गंसमाश्रय देहिनःस्वस्यात्यंतहितायेत्यर्थः ॥ १५ ॥ ननुतस्मिन्मार्गेममनाधिकारइतिचेन्न ब्राह्मणत्वादिनातत्सत्वादित्याह त्वमिति उत्तमवंशसंभवत्वस्यविवरणंपौलस्त्यपुत्रोऽसीति यदितेदेहएवात्मेतिबुद्धिस्तथाऽपिपश्यविचारयत्वंराक्षसोनासि उत्तमवंशसंभवत्वेनब्राह्मणत्वादिति भावः आत्मबुद्ध्यादेहातिरिक्तआत्मेतिबुद्ध्याराक्षसोनहिभवसीतिकिमुवक्तव्यमितिशेषः ॥ १६ ॥

एवंसर्वथाराक्षसत्वाभावंप्रसाध्याह शरीरेति शरीरंस्थूलंबुद्धिःसूक्ष्मशरीरंइंद्रियाणिचक्षुरादीनितज्जन्यादुःखसंततिराधिव्याधिजा दुःखेत्युपलक्षणंकामादेरपि सातेतवनतेषांचित्तधर्मत्वात् त्वंचतदाश्रयश्चित्तंनेतिशेषपूरणेनव्याख्येयम् तस्याचेतनत्वादितिभावः नन्वात्मनएवदुःखाद्यस्तुइतिनचैवतदतआह तवनिर्विकारतःविकाराभावोनिर्विकारंततःतवविकाराभावात्दुःखादिमत्त्वेचविकारप्रसंगः एवंचात्मनोऽविक्रियत्वप्रतिपादकश्रुतिविरोधस्थाश्चश्रुतयःपूर्वंबहुशोलिखिताः नन्वेवमहंदुःखीत्यादिप्रतीतेःकागतिस्तत्राह अज्ञानहेतोरिति स्वपतःपुरुषस्यप्रतिभासमानस्यापिदृश्यस्ययथाऽसत्त्वंतथाआत्मस्वरूपाद्धेतोर्भासमानायाअस्याः संततेर्दुःखसंततेर्वस्तुतोऽसत्त्वमेवैवंचाहंदुःखीत्यादिप्रतीतिः. स्वप्नकालिकतत्तत्प्रतीतिवद्भ्रमएवेतिभावः ॥ १७ ॥ नन्वेवंसत्यंवस्तुकिमपिनास्त्येवकिंअस्तीत्याह

शरीरबुद्धींद्रियदुःखसंततिर्नतेनचत्वंतवनिर्विकारतः॥ अज्ञानहेतोश्चतथैवसंततेरसत्त्वमस्याःस्वपतोहिदृश्यवत्॥१७॥
इदंतुसत्यंतवनास्तिविक्रियाविकारहेतुर्नचतेऽद्वयत्वतः ॥ यथानभःसर्वगतंनलिप्यतेतथाभवान्देहगतोऽपिसूक्ष्मकः ॥
देहेंद्रियप्राणशरीरसंगतस्त्वात्मेतिबुद्ध्याखिलबंधभाग्भवेत्॥ १८॥

इदंतुसत्यमिति त्वत्स्वरूपंत्वित्यर्थः एतत्तवविक्रियानास्तिअविकारीचेतनएवैकःसत्यः ननुविकारहेत्वज्ञानमपिसत्यमेवनेत्याह तेविकारहेतुर्नचसत्यइतिशेषः तत्रहेतुमाह अद्वयत्वतःएकमेवाद्वितीयंब्रह्मेत्यद्वैतप्रतिपादकश्रुतिविरोधात् तयाहिसतोद्वितीयस्यनिषेधइतिभावः ननुचित्तसंबंधान्ममदुःखमस्त्येवेतिचेन्नेत्याह यथासर्वगतमपिनभःपृथिव्यादिरूपगंधादिभिर्नलिप्यतेसूक्ष्मत्वात्तथादेहगतोऽपिचित्तसमानाधिकरणोऽपियतः सूक्ष्मकोतिसूक्ष्मोतस्तद्गतदुःखादिभिर्वस्तुतोन लिप्यते एवंचनीलंनभइत्यादिप्रतीतिवदहंदुःखीत्यादिप्रतीतिर्भ्रमएवेतिभावः ननुतर्हिमुक्तसंसारिव्यवस्थाकिंनास्त्येवास्तीत्याह देहेत्यादि देहोत्रसूक्ष्मःशरीरंस्थूलमतत्संगतस्तदविवेकाग्रहात्तेष्वेवयात्मबुद्धिस्तयाखिलबंधभाग्भवेत् अविवेकएवमुख्यंसंसारकारणमितिभावः ॥ १८ ॥

ननुतर्हिमुक्तिर्दुर्लभेतिशंकायांतत्कारणमाह चिन्मात्रमिति विवेकोज्ञातएवमोक्षकारणमितितमाह तत्राद्यार्धेनात्मनिजडवैधर्म्यमुक्तम् अजत्वेनोत्पत्तिराहित्यम् अक्षरत्वेनाविनाशित्वम् आनंदभावस्तद्रूपःदेहादौतद्वैधर्म्यमाह देहोपीति पृथिवीविकारैस्तत्परमाणुभिर्जनितइतिअनात्मा अनेनाचेतनत्वजन्यत्वादिवैधर्म्यमुक्तम् प्राणोप्यात्मानयतएषोबहिर्दृश्यमानोजडोऽनिलएव सप्राणोयःप्राणःसवायुरितिश्रुतेः ॥ १९ ॥ मनोपिनात्मेत्याह मनोपीति नोइत्यस्यात्मेतिशेषः नातस्तत्अहंकारस्यविकारः नचापिबुद्धिरिति बुद्धिरहंकारोऽपिनात्मायतःप्रकृतेर्विकारान्महतोजायतइतिप्रकृतेर्विकारजा आत्मनिउक्तमेववै

चिन्मात्रमेवाहमजोहमक्षरोह्यानंदभावोहमितिप्रमुच्यते ॥ देहोऽप्यनात्मापृथिवीविकारजोनप्राणआत्मानिलएषएवसः ॥ १९ ॥ मनोप्यहंकारविकारएवनोनचापिबुद्धिःप्रकृतेर्विकारजा ॥ आत्माचिदानंदमयोऽविकारवान्देहादिसंघाद्व्यतिरिक्तईश्वरः ॥ २० ॥ निरंजनोमुक्तउपाधितःसदाज्ञात्वैवमात्मानमितोविमुच्यते ॥ अतोहमात्यंतिकमोक्षसाधनंवक्ष्येशृणुष्वावहितोमहामते ॥ २१ ॥ विष्णोर्हिभक्तिःसुविशोधनंधियस्ततोभवेज्ज्ञानमतीवनिर्मलम् ॥ विशुद्धतत्त्वानुभवोभवेत्ततःसम्यग्विदित्वापरमंपदंव्रजेत्॥ २२॥

धर्म्यंदार्ढ्यायपुनराह आत्मेत्यादि सएवेश्वरः अनेनचेतनानेकत्वंनेतिदर्शितम् ॥ २० ॥ निरंजनइत्यस्यैवव्याख्या सदाउपाधितोमुक्तःउपाधिभूतचित्तधर्मैर्दुःखादिभिरलिप्तइत्यर्थः एवमात्मानंज्ञात्वाइतःसंसाराद्विमुच्यते नन्वीदृशज्ञानमेवकथंस्यात्तत्राहातोऽहमितिमोक्षस्यात्यंतिकंसाधनंनियतंसाधनमित्यर्थः ॥ ॥ २१ ॥ प्रतिज्ञातमाह विष्णोर्हीति धियश्चित्तस्य नित्यानित्यविवेकद्वाराज्ञानंआत्माचिदानंदमयइत्यादिनोक्तम् ततःतद्विषयनिदिध्यासनतः विशुद्धतत्त्वानुभवोभवेत्अपरोक्षसाक्षात्कारोभवेत् ततःपरमंपदंब्रह्मसायुज्यम् ॥ २२ ॥

उपसंहरति अतइति यस्यभक्तिर्ज्ञानसाधनंसविष्णुरयमेव तद्बोधकेविशेषणेहरिंरमापतिमिति ननुदशरथपुत्रोयंनसइत्यत्राह प्रकृतेःपरमित्यादिदशरथपुत्र
त्वादितुकल्पितमित्याशयः मौर्ख्यंअयंमनुष्यइतिबुद्धिरूपंतत्कृतांशत्रुत्वेनभावनांचविसृज्यभजस्व संप्रतियुक्तंभजनप्रकारमाह सीतामिति ॥ २३ ॥ अथ
व्यतिरेकमुखेनतत्तद्भावनाप्रकारमाह राममिति हृदिस्थमित्यनेनांतर्यामितयाप्रेरकत्वमुक्तम् सुखरूपोऽद्वितीयोमत्प्रेरकइत्येवमभावयन्नितियावत् दुःखरूपास्त

अतोभजस्वाद्यहरिंरमापतिंरामंपुराणंप्रकृतेःपरंविभुम्॥विसृज्यमौर्ख्यंहृदिशत्रुभावनांभजस्वरामंशरणागतप्रियम्॥
सीतांपुरस्कृत्यसपुत्रबांधवोरामंनमस्कृत्यविमुच्यसेभयात्॥ २३ ॥ रामंपरात्मानमभावयन्जनोभक्त्याहृदिस्थसुख
रूपमद्वयम् ॥ कथंपरंतीरमवाप्नुयाज्जनोभवांबुधेर्दुःखतरंगमालिनः ॥ २४ ॥ नोचेत्त्वमज्ञानमयेनवह्निनाज्वलंतमा
त्मानमरक्षितारिवत् ॥ नयस्यधोधःस्वकृतैश्चपातकैर्विमोक्षशंकानचतेभविष्यति ॥ २५ ॥ श्रुत्वामृतास्वादसमानभा
षितंतद्वायुसूनोर्दशकंधरोऽसुरः॥ अमृष्यमाणोऽतिरुषाकपीश्वरंजगादरक्तांतविलोचनोज्ज्वलन्॥ २६॥ कथंममाग्रे
विलपस्यभीतवत्प्लवंगमानामधमोसिदुष्टधीः॥ कएषरामःकतमोवनेचरोनिहन्मिसुग्रीवयुतंनराधमम् ॥ २७॥ त्वां
चाद्यहत्वाजनकात्मजांततोनिहन्मिरामंसहलक्ष्मणंततः ॥ सुग्रीवमग्रेबलिनंकपीश्वरंसवानरंहन्म्यचिरेणवानर ॥ श्रु
त्वादशग्रीववचःसमारुतिर्विवृद्धकोपेनदहन्निवासुरम्॥ २८॥

रंगमालायस्यतस्य ॥ २४ ॥ नोचेत् मदुक्ताकरणेतेनज्वलंतमात्मानमरक्षिता लुटिरूपम् किंचस्वकृतैःपातकैःसीताहरणादिभिररिवत्आत्मानमधोधोनय
सिनयिष्यसीत्यर्थेंआर्षम् विमोक्षशंकातत्संभावनापिनभविष्यतीत्यर्थः ॥ २५ ॥ अमृतास्वादेतितदास्वादेन[illegible]ानआस्वादोयस्यतादृशंभाषितमित्यर्थः॥२६ ॥
वनेचरःसुग्रीवः केषांमध्येतिशयितोनकेषामपीत्यर्थः ॥ २७ ॥ विवृद्धकोपेनकरणेनेत्यर्थः असुरंदहन्निवाहेतिशेषः ॥ २८ ॥

अधमेत्यत्रक्रोधातिशयेनदूरात्संबोधनेप्लुतः ॥ २९ ॥ पार्श्वेस्थितंराक्षसमित्यन्वयः खंडशःकुर्विंतिशेषः असुरस्यममभित्राणिबांधवाश्चपश्यंतु हेराजन् अयं परराजस्योत्कृष्टराजस्यशत्रुराजस्यवावानरोवधयोग्योनभवेत् प्रतापयुक्तैराजभिर्वधयोग्यतासंभावनमप्यनुचितंदूतत्वात्किंपुनर्वधइतिभावः अयंप्रतापयुक्तैरिंद्रजिदादिभिरपिवंधयोग्योनेतिवृथाप्रयासइतिव्यंग्यम् ॥ ३० ॥ वधेबाधकांतरमप्याह हतइति वार्तांसीतावार्तांनिवेदयेत् रामायेत्यन्वयः यंराममुद्दिश्य

नमेसमारावणकोटयोऽधमरामस्यदासोऽहमपारविक्रमः ॥ श्रुत्वातिकोपेनहनूमतोवचोदशाननोराक्षसमेकमब्रवी
त् ॥ २९ ॥ पार्श्वेस्थितंमारयखंडशःकपिंपश्यंतुसर्वेऽसुरमित्रबांधवाः॥ निवारयामासततोविभीषणोमहासुरंसायुध
मुद्यतंवधे॥ राजन्वधार्होनभवेत्कथंचनप्रतापयुक्तैःपरराजवानरः॥ ३० ॥ हतेस्मिन्वानरेदूतेवार्तांकोवानिवेदयेत्॥ रा
मायत्वंयमुद्दिश्यवधायसमुपस्थितः॥३१॥ अतोवधसमंकिंचिदन्यच्चिंतयवानरे॥ सचिन्होगच्छतुहरिर्यंदृष्ट्वायास्यति
द्रुतम्॥ ३२ ॥ रामःसुग्रीवसहितस्ततोयुद्धंभवेत्तव ॥ विभीषणवचःश्रुत्वारावणोप्येदब्रवीत्॥ ३३ ॥ वानराणांहिलां
गूलेमहामानोभवेत्किल॥ अतोवस्त्रादिभिःपुच्छंवेष्टयित्वाप्रयत्नतः॥३४॥ वन्हिनायोजयित्वैनंभ्रामयित्वापुरेऽभितः॥
विसर्जयतपश्यंतुसर्वेवानरयूथपाः॥ ३५ ॥ तथेतिशणपट्टैश्चवस्त्रैरन्यैरनेकशः॥ तैलाक्तैर्वेष्टयामासुर्लांगूलंमारुतेर्दृढम्
॥ ३६ ॥ पुच्छाग्रेकिंचिदनलंदीपयित्वाथराक्षसाः॥ रज्जुभिःसुदृढंबद्ध्वाधृत्वातंबलिनोऽसुराः॥ ३७॥

त्वंवधायसमुपस्थितः यंराममुद्दिश्यत्वमात्मवधायसमुपस्थितः आत्मवधार्थंतदागमनेच्छावान्सत्वच्छंदतःकथमत्रागच्छेदितिगूढोऽर्थः ॥ ३१ ॥ आयास्यतीतिच्छेदः ॥ ३२ ॥ ततोयुद्धंत्वदभिलषितंभवेत् ॥ ३३ ॥ महामानःप्रीतिपूर्वकोममेदमित्युपादेयमित्यभिमानः ॥ ३४ ॥ सर्वेवानरयूथपाः पश्यंतुदग्धपुच्छमेनमितिशेषः ॥ ३५ ॥ ३६ ॥ ३७ ॥

॥ ३८ ॥ किंचित्नगरदाहम् ॥ ३९ ॥ सूक्ष्मोभूत्वाबंधान्निःसृतःततःपुनरपिपर्वताकारोबभूव ततोगोपुरंपुरद्वारमुत्प्लुत्य ॥ ४० ॥ तत्रविद्यमानमेकंस्तंभम् कार्यशेषंलंकादाहरूपम् ॥ ४१ ॥ ४२ ॥ हातातेत्यादिक्रंदमानाः प्रासादशिखरेआरूढाअपिव्याप्तावह्निनेतिशेषः ॥ ४३ ॥ वह्नौपतंत्योदेवताइवदृश्यंते ॥ ४४ ॥

समंताद्भ्रामयामासुश्चोरोयमितिवादिनः ॥ तूर्यघोषैर्घोषयंतस्ताडयंतोमुहुर्मुहुः ॥ ३८ ॥ हनूमतापितत्सर्वंसोढंकिंचि
च्चिकीर्षुणा ॥ गत्वातुपश्चिमद्वारसमीपंतत्रमारुतिः ॥ ३९ ॥ सूक्ष्मोबभूवबंधेभ्योनिःसृतःपुनरप्यसौ ॥ बभूवपर्वताका
रस्ततउत्प्लुत्यगोपुरम् ॥ ४० ॥ तत्रैकंस्तंभमादायहत्वातान्रक्षिणःक्षणात् ॥ विचार्यकार्यशेषंसप्रासादाग्राद्गृहाद्गृहम्
॥ ४१ ॥ उत्प्लुत्योत्प्लुत्यसंदीप्तपुच्छेनमहताकपिः ॥ ददाहलंकामखिलांसाट्टप्रासादतोरणाम् ॥ ४२ ॥ हातातपुत्रना
थेतिक्रंदमानाःसमंततः ॥ व्याप्ताःप्रासादशिखरेप्यारूढादैत्ययोषितः ॥ ४३ ॥ देवताइवदृश्यंतेपतंत्यःपावकेऽखिलाः ॥
विभीषणगृहंत्यक्त्वासर्वंभस्मीकृतंपुरम् ॥ ४४ ॥ ततउत्प्लुत्यजलधौहनूमान्मारुतात्मजः ॥ लांगूलंमज्जयित्वांतःस्वस्थ
चित्तोबभूवसः ॥ ४५ ॥ वायोःप्रियसखित्वाच्चसीतयाप्रार्थितोऽनलः ॥ नददाहहरेःपुच्छंबभूवात्यंतशीतलः ॥ ४६ ॥
यन्नामसंस्मरणधूतसमस्तपापास्तापत्रयानलमपीहतरंतिसद्यः ॥ तस्यैवकिंरघुवरस्यविशिष्टदूतःसंतप्यतेकथमसौ
प्रकृतानलेन ॥ ४७ ॥ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेसुंदरकांडेचतुर्थःसर्गः ॥ ४ ॥ ॥ छ ॥

जलधौतत्समीपेउत्प्लुत्यांतःसमुद्रमध्येलांगूलंमज्जयित्वास्वस्थचित्तोबभूव ॥ ४५ ॥ वायोःप्रियमित्रत्वात्सीताप्रार्थनेनचानलोग्निर्वायुपुत्रस्यहरेःपुच्छंनददाह तावन्मात्रमेवनकिंत्वत्यंतंशीतलश्चबभूव ॥ ४६ ॥ यन्नामस्मरणेनधूतानिदूरीकृतानिसमस्तपापानियैस्ते तापत्रयमाध्यात्मिकाधिभौतिकाधिदैविकभेदात्त्रिजन्यंवह्निमपितरंतितेनतापीड्यंतइत्यर्थः ॥ ४७ ॥ इतिश्रीम०सुं०सेतौचतुर्थःसर्गः ॥ ४ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

अथलंकादाहेऽशोकवनस्थानदाहेपिसीतायादाहसंदेहनिवृत्तयेपुनःसीतांदृष्ट्वातामापृच्छ्यगतइत्याह ततइति हेदेविरामसंनिधिंगच्छामिभवतीमामाज्ञापयत्वि
त्यन्वयः॥ १ ॥ सानुजोरामस्त्वांद्रष्टुमागमिष्यतीत्युक्त्वाजानकींत्रिःपरिक्रम्यप्रदक्षिणंकृत्वा॥ २ ॥ पुनःप्रणम्यगंतुंप्रस्थितइदंवक्ष्यमाणंअब्रवीत् तेभद्रमिति

ततःसीतांनमस्कृत्यहनूमानब्रवीद्वचः॥ आज्ञापयतुमांदेविभवतीरामसन्निधिम्॥ १ ॥ गच्छामिरामस्त्वांद्रष्टुमागमि
ष्यतिसानुजः॥ इत्युक्त्वात्रिःपरिक्रम्यजानकींमारुतात्मजः॥ २ ॥ प्रणम्यप्रस्थितोगंतुमिदंवचनमब्रवीत्॥ देविग
च्छामिभद्रंतेतूर्णंद्रक्ष्यसिराघवम्॥ ३ ॥ लक्ष्मणंचससुग्रीवंवानरायुतकोटिभिः॥ ततःप्राहहनूमंतंजानकीदुःखकर्शि
ता॥ ४ ॥ त्वांदृष्ट्वाविस्मृतंदुःखमिदानींत्वंगमिष्यसि॥ इतःपरंकथंवर्तेरामवार्ताश्रुतिंविना॥ ५ ॥ मारुतिरुवाच॥
यद्येवंदेविमेस्कंधमारोहक्षणमात्रतः॥ रामेणयोजयिष्यामिमन्यसेयदिजानकि॥ ६ ॥ सीतोवाच॥ रामःसागरमा
शोष्यबद्धावाशरपंजरैः॥ आगत्यवानरैःसार्धंहत्वारावणमाहवे॥ ७ ॥ मांनयेद्यदिरामस्यकीर्तिर्भवतिशाश्वती॥ अ
तोगच्छकथंचापिप्राणान्संधारयाम्यहम्॥ ८ ॥ इतिप्रस्थापितोवीरःसीतयाप्रणिपत्यताम्॥ जगामपर्वतस्याग्रेगंतुं
पारंमहोदधेः॥ ९ ॥ तत्रगत्वामहासत्त्वःपादाभ्यांपीडयन्गिरिम्॥ जगामवायुवेगेनपर्वतश्चमहीतलम्॥ १० ॥

विनयोक्तिः॥ ३ ॥ ४ ॥ वार्ताश्रुतिंवार्ताश्रवणम्॥ ५ ॥ यद्येवंरामवार्ताश्रवणंविनास्थातुमशक्यंत्वंयदिमन्यसेयद्येतत्तवचित्तेआयातितर्हिआचरेतिशेषः
॥ ६ ॥ आशोष्येतिमुख्यःपक्षः दययातदकरणेबद्धावेति शरपंजरैःशरसमूहैः॥ ७ ॥ यदिरावणंहत्वामांनयेत्तर्हिरामस्यशाश्वतीकीर्तिर्भवेत् कथंचापिकथं
चिदित्यर्थः॥ ८ महोदधेःपारंगंतुंपर्वतस्याग्रेउपरिभागेजगाम॥९॥ महासत्वोमहाबलस्तत्रोर्ध्वशिखरेगत्वा पर्वतश्चमहीतलंजगामेत्यनुकर्षः॥ १० ॥

तद्गमनमप्यंशेननकिंतुसंपूर्णएवगतइत्याह त्रिंशद्योजनंमहीतउच्छ्रितोऽपिमहीसमानत्वंजगाम गगनांतस्थःगगनमध्यस्थः ॥ ११ ॥ तंमहांतंशब्दंमहान्स्वनःप्र
तिध्वनिर्यस्यतंशब्दंचक्रुः ॥ १२ ॥ हनुमानेवायंकृतकार्यःसमागतइतिशब्देनैवजानीमः केचिद्वानरादृष्ट्वावानरर्षभंपश्यध्वमित्याहुः ॥ १३ ॥ १४ ॥ पूर्वंसी

ततोमहीसमानत्वंत्रिंशद्योजनमुच्छ्रितः॥ मारुतिर्गगनांतस्थोमहाशब्दंचकारसः ॥ ११ ॥ तंश्रुत्वावानराःसर्वेज्ञात्वा
मारुतिमागतम्॥ हर्षेणमहताविष्टाःशब्दंचक्रुर्महास्वनम् ॥ १२ ॥ शब्देनैवविजानीमःकृतकार्यःसमागतः॥ हनूमाने
वपश्यध्वंवानरावानरर्षभम्॥१३॥ एवंब्रुवत्सुवीरेषुवानरेषुसमारुतिः॥ अवतीर्यगिरेर्मूर्ध्निवानरानिदमब्रवीत्॥१४॥
दृष्टासीतामयालंकाधर्षिताचसकानना ॥ संभाषितोदशग्रीवस्ततोऽहंपुनरागतः ॥ १५ ॥ इदानीमेवगच्छामोरामसु
ग्रीवसन्निधिम्॥ इत्युक्त्वावानराःसर्वेहर्षेणालिंग्यमारुतिम् ॥ १६ ॥ केचिच्चुचुंबुर्लांगूलंननृतुःकेचिदुत्सुकाः॥ हनूम
तासमेतास्तेजग्मुःप्रस्रवणंगिरिम्॥ १७ ॥ गच्छंतोददृशुर्वीरावनंसुग्रीवरक्षितम्॥ मधुसंज्ञंतदाप्राहुरंगदंवानरर्षभाः
॥ १८ ॥ क्षुधिताःस्मोवयंवीरदेह्यनुज्ञांमहामते ॥ भक्षयामःफलान्यद्यपिबामोऽमृतवन्मधु ॥ १९ ॥ संतुष्टाराघवंद्रष्टुं
गच्छामोऽद्यैवसानुजम् ॥२०॥ ॥अंगदउवाच॥ ॥ हनूमान्कृतकार्योयंपिबतैतत्प्रसादतः॥ जक्षध्वंफलमूलानि
त्वरितंहरिसत्तमाः॥ २१ ॥ ततःप्रविश्यहरयःपातुमारेभिरेमधु ॥ रक्षिणस्ताननादृत्यदधिवक्रेणनोदितान्॥ २२॥

तापदोक्तौपदांतरोच्चारणपर्यंतंक्रियापदसंदेहःस्यादितिपूर्वंदृष्टेत्युक्तिः ॥ १५ ॥ १६ ॥ केचिच्चुचुंबुरित्यादिहर्षाविष्टवानरजातिलक्षणम् ॥१७॥ १८ ॥ १९ ॥
संतुष्टाःफलभक्षणेनमधुपानेनच ॥ २० ॥ जक्षध्वंभक्षयंत्वित्यर्थः ॥ २१ ॥ दधिवक्रोनामतद्रक्षिणांमुख्यस्तद्रक्षणाधिकृतः ॥ २२ ॥

वानरर्षभाःदधिवक्त्रप्रेरिताःपिबतोवानरांस्ताडयामासुरित्यन्वयः ॥ २३ ॥ २४ ॥ कुमारेणांगदेनहनूमताचनष्टंनाशितमित्यर्थः ॥ २५ ॥ दृष्टाआगतइति
च्छेदः ॥ २६ ॥ नोचेन्ममधुवनंद्रष्टुंकःसमर्थोभवेत् ॥ २७ ॥ अतिहर्षाद्बहुमानेनसुग्रीवंप्रतिराजन्नितिवचः ॥ २८ ॥ अवनीसुताजानकी ॥ २९ ॥ मम

पिबतस्ताडयामासुर्वानरान्वानरर्षभाः॥ ततस्तान्मुष्टिभिःपादैश्चूर्णयित्वापपुर्मधु ॥ २३ ॥ ततोदधिमुखःक्रुद्धःसुग्रीव
स्यसमातुलः॥ जगामरक्षिभिःसार्धंयत्रराजाकपीश्वरः ॥ २४ ॥ गत्वातमब्रवीद्देवचिरकालाभिरक्षितम् ॥ नष्टंमधुव
नंतेद्यकुमारेणहनूमता ॥ २५ ॥ श्रुत्वादधिमुखेनोक्तंसुग्रीवोहृष्टमानसः॥ दृष्ट्वागतोनसंदेहःसीतांपवननंदनः॥२६॥
नोचेन्मधुवनंद्रष्टुंसमर्थःकोभवेन्मम॥ तत्रापिवायुपुत्रेणकृतंकार्यंनसंशयः ॥ २७ ॥ श्रुत्वासुग्रीववचनंहृष्टोरामस्तम
ब्रवीत्॥ किमुच्यतेत्वयाराजन्वचःसीताकथान्वितम् ॥ २८ ॥ सुग्रीवस्त्वब्रवीद्वाक्यंदेवदृष्टावनीसुता॥ हनूमत्प्रमुखाः
सर्वेप्रविष्टामधुकाननम् ॥ २९ ॥ भक्षयंतिस्मसकलंताडयंतिस्मरक्षिणः॥ अकृत्वादेवकार्यंतेद्रष्टुंमधुवनंमम ॥३०॥
नसमर्थास्ततोदेवीदृष्टासीतेतिनिश्चितम्॥ रक्षिणोवोभयंमास्तुगत्वाब्रूतममाज्ञया ॥ ३१ ॥ वानरानंगदमुखानानय
ध्वंममांतिकम् ॥ श्रुत्वासुग्रीववचनंगत्वातेवायुवेगतः ॥ ३२ ॥ हनूमत्प्रमुखानूचुर्गच्छतेश्वरशासनात्॥ द्रष्टुमिच्छ
तिसुग्रीवःसरामोलक्ष्मणान्वितः ॥ ३३ ॥ युष्मानतीवहृष्टास्तेत्वरयंतिमहाबलाः॥ तथेत्यंबरमासाद्ययुस्तेवानरो
त्तमाः ॥ ३४ ॥

मधुवनंद्रष्टुंनसमर्थाइत्यन्वयः ॥ ३० ॥ भोरक्षिणोवोयुष्माकंभयंवानरेभ्यस्ताडनजंमास्तु अतोममाज्ञयागत्वांगदमुखान्वानरान्ब्रूतयुष्मान्रामसुग्रीवावाका
रयतइतिशेषः इत्युक्त्वाममांतिकंमत्समीपंतानानयध्वम् ॥ ३१ ॥ ३२ ॥ ३३ ॥ अतीवहृष्टास्तेरामसुग्रीवलक्ष्मणाःयुष्मान्स्वसमीपागमनायत्वरयंति ॥३४॥

॥ ३५ ॥ भूसंबंधोत्तरंराघवाश्वासनायपूर्वंदृष्टासीतेत्याह ततःक्रमेणरामसुग्रीवौप्रणिपत्य ॥ ३६ ॥ जानकीकुशलंप्राहेत्याह शुचाशोकेन ॥ ३७ ॥ हाइति शोकव्यंजकमात्रम् ॥ ३८ ॥ जन्मारभ्यतवकथांब्रुवतामयासूक्ष्मरूपेणवृक्षशाखांतरेस्थित्वाशनैराश्वासितेत्यन्वयः ॥ ३९ ॥ अत्यर्थंविस्तरेणदंडकागमना

हनूमंतंपुरस्कृत्ययुवराजंतथांगदम् ॥ रामसुग्रीवयोरग्रेनिपेतुर्भुविसत्वरम् ॥ ३५ ॥ हनूमान्राघवंप्राहदृष्टासीतानिरामया ॥ साष्टांगंप्रणिपत्याग्रेरामंपश्चाद्धरीश्वरम् ॥ ३६ ॥ कुशलंप्राहराजेंद्रजानकीत्वांशुचाऽन्विता ॥ अशोकवनिकामध्येशिंशपामूलमाश्रिता ॥ ३७ ॥ राक्षसीभिःपरिवृतानिराहाराकृशाप्रभो ॥ हारामरामरामेतिशोचंतीमलिनांबरा ॥ ३८ ॥ एकवेणीमयादृष्टाशनैराश्वासिताशुभा ॥ वृक्षशाखांतरेस्थित्वासूक्ष्मरूपेणतेकथाम् ॥ ३९ ॥ जन्मारभ्यतवात्यर्थंदंडकागमनंतथा ॥ दशाननेनहरणंजानक्यारहितेत्वयि ॥ ४० ॥ सुग्रीवेणयथामैत्रीकृत्वावालिनिबर्हणम् ॥ मार्गणार्थंचवैदेह्याःसुग्रीवेणविसर्जिताः ॥ ४१ ॥ महाबलामहासत्वाहरयोजितकाशिनः ॥ गताःसर्वत्रसर्वेवैतत्रैकोऽहमिहागतः ॥ ४२ ॥ अहंसुग्रीवसचिवोदासोऽहंराघवस्यहि ॥ दृष्टायज्जानकीभाग्यात्प्रयासःफलितोद्यमे ॥ ४३ ॥ इत्युदीरितमाकर्ण्यसीताविस्फारितेक्षणा ॥ केनवाकर्णपीयूषंश्रावितंमेशुभाक्षरम् ॥ ४४ ॥ यदिसत्यंतदायातुमद्दर्शनपथंतुसः ॥ ततोऽहंवानराकारःसूक्ष्मरूपेणजानकीम् ॥ ४५ ॥ प्रणम्यप्रांजलिर्भूत्वादूरादेवस्थितःप्रभो ॥ पृष्टोऽहंसीतयाकस्त्वमित्यादिबहुविस्तरम् ॥ ४६ ॥

दिकथोक्तेतिशेषः त्वयिरहितेदेशांतरंगतेसतिजानक्यादशाननेनहरणमित्यन्वयः ॥ ४० ॥ वालिनिबर्हणंतद्वधंकृत्वायथासुग्रीवेणमैत्रीसफलाकृतेतिशेषः ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ सःयेनोक्तंसइत्यर्थः ॥ ४५ ॥ ४६ ॥

॥ ४७ ॥ तेनअंगुलीयकलाभेनराघवस्यायंसेवकइत्यतिविश्वस्ता राक्षसीनांतर्जनैःपीड्यमानायथादृष्टास्मि तत्सर्वंपीडनंराघवेकथय ॥ ४८ ॥ त्वच्चिंतापरिनिष्ठितःत्वच्चिंतायांस्थितः ॥ ४९ ॥ त्वद्वार्तांनाधिगम्यअहोरात्रंपरिशोचतित्वामितिशेषः ॥ ५० ॥ ५१ ॥ विश्वसेत्सत्यंजानकींदृष्ट्वाआगतइतिविश्वसेदित्य

मयासर्वंक्रमेणैवविज्ञापितमरिंदम ॥ पश्चान्मयार्पितंदेव्यैभवद्दत्तांगुलीयकम् ॥ ४७ ॥ तेनमामतिविश्वस्तावचनंचेदमब्रवीत् ॥ यथादृष्टास्मिहनुमन्पीड्यमानादिवानिशम् ॥ ४८ ॥ राक्षसीनांतर्जनैस्तत्सर्वंकथयराघवे ॥ मयोक्तंदेविरामोपित्वच्चिंतापरिनिष्ठितः ॥ ४९ ॥ परिशोचत्यहोरात्रंत्वद्वार्तांनाधिगम्यसः॥ इदानीमेवगत्वाहंस्थितिंरामायतेब्रुवे ॥ ५० ॥ रामःश्रवणमात्रेणसुग्रीवेणसलक्ष्मणः ॥ वानरानीकपैःसार्धमागमिष्यतितेंतिकम् ॥ ५१ ॥ रावणंसकुलंहत्वानेष्यतित्वांस्वकंपुरम् ॥ अभिज्ञांदेहिमेदेवियथामांविश्वसेद्विभुः ॥ ५२ ॥ इत्युक्तासाशिरोरत्नंचूडापाशेस्थितंप्रियम्॥ दत्त्वाकाकेनयद्वृत्तंचित्रकूटगिरौपुरा ॥५३॥ तदप्याहाश्रुपूर्णाक्षीकुशलंब्रूहिराघवम्॥ लक्ष्मणंब्रूहिमेकिंचिद्दुरुक्तंभाषितंपुरा ॥ ५४ ॥ तत्क्षमस्वाज्ञभावेनभाषितंकुलनंदन ॥ तारयेन्मांयथारामस्तथाकुरुकृपान्वितः ॥ ५५ ॥ इत्युक्त्वारुदतीसीतादुःखेनमहतावृता ॥ मयाप्याश्वासितारामवदतासर्वमेवते ॥ ५६ ॥ ततःप्रस्थापितोरामत्वत्समीपमिहागतः ॥ तदागमनवेलायामशोकवनिकांप्रियाम् ॥ ५७ ॥

र्थः ॥ ५२ ॥ शिरोरत्नंदत्त्वाचित्रकूटगिरिस्थंकाकवृत्तमप्याह ॥ ५३ ॥ ततःसंदेशमाहेतिशेषः तमाहाश्रुपूर्णाक्षीति यन्मेकिंचिद्दुरुक्तंदुर्वचोभाषितंतत्क्षमस्व तदज्ञभावेनाज्ञतयामयाभाषितम् अतोयथामांरामोस्माद्दुःखात्तारयेत्तथाकृपान्वितःकुरुइतिलक्ष्मणंब्रूहीत्यन्वयः ॥ ५४ ॥ ५५ ॥ महतादुःखेनावृताआसीदितिशेषः सर्वमेववृत्तांतंवदतामयापिसाआश्वासिता प्रियांरावणस्येतिशेषः ॥ ५७ ॥

उत्पाट्य उत्पाटितवृक्षांकृत्वा ॥५८॥ पुनरप्यगमंत्वत्समीपमितिशेषः प्रहृष्टधीःप्रहृष्टचेताः ॥५९॥ प्रत्युपकारिणःमांप्रतिकृतोपकारस्य ॥६०॥ सर्वस्वंआलिंगनम् ॥ ६१ ॥ सःजगत्कर्तृत्वादिपरमैश्वर्यवान् ॥ ६२ ॥ आलिंगनस्यसर्वस्वत्वमुपपादयन्नाह परिरंभइति यतस्त्वंममभक्तोसिअतस्त्वयायंलब्धइतिशेषः

उत्पाट्यराक्षसांस्तत्रबहून्हत्वाक्षणादहम् ॥ रावणस्यसुतंहत्वारावणेनाभिभाष्यच ॥ ५८ ॥ लंकामशेषतोदग्ध्वापुनर
प्यगमंक्षणात् ॥ श्रुत्वाहनुतोवाक्यंरामोत्यंतप्रहृष्टधीः ॥ ५९ ॥ हनूमंस्तेकृतंकार्यंदेवैरपिसुदुष्करम् ॥ उपकारंनपश्या
मितवप्रत्युपकारिणः ॥ ६० ॥ इदानींतेप्रयच्छामिसर्वस्वंममामारुते ॥ इत्यालिंग्यसमाकृष्यगाढंवानरपुंगवम् ॥ ६१ ॥
सार्द्रनेत्रोरघुश्रेष्ठःपरांप्रीतिमवापसः ॥ हनूमंतमुवाचेदंराघवोभक्तवत्सलः ॥ ६२ ॥ परिरंभोहिमेलोकेदुर्लभःपरमात्म
नः ॥ अतस्त्वंममभक्तोसिप्रियोसिहरिपुंगव ॥ ६३ ॥ यत्पादपद्मयुगलंतुलसीदलाद्यैःसंपूज्यविष्णुपदवीमतुलांप्रयांति
॥ तेनैवकिंपुनरसौपरिरब्धमूर्तीरामेणवायुतनयःकृतपुण्यपुंजः ॥६४ ॥ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वर
संवादेसुंदरकांडेपंचमःसर्गः ॥ ५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥

सुंदरकांडेसर्गाःपंचैवाध्यात्मिकशब्दिते ॥ प्रोक्तास्त्रीणिशतानिश्लोकास्त्रिभुवनपापहराः ॥

॥ ६३ ॥ कृतपुण्यपुंजोवायुतनयः तेनैवरामेणपरिरब्धमूर्तिः अतुलांपदवींप्रयांतीतिकिंपुनर्वक्तव्यमितिशेषः ॥६४ ॥ इतिश्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिविरुदावलीविराजमानस्यहिम्मतिवर्मणः पुत्रस्यश्रीरामवर्मणःकृतौअध्यात्मरामायणेसेतौसुंदरकांडेपंचमःसर्गः ॥ ५ ॥ ॥ श्रीकृष्णार्पणमस्तु ॥७॥

॥ इति श्रीमद्ध्यात्मरामायणे सुंदरकांडः समाप्तः ॥

४११२

~~५०१५६~~

प्रयागमाहात्म्य

४११२

॥ श्रीकाशी विश्वनाथपुरी मे ढुंढिराज गणेश के पास दाऊजी अग्निहोत्री के सिद्धविनायक यंत्र मे प्रयागमाहात्म्य मूल छापा गया जिसै लेना होय उसै ढंढिराज गणेश के पास दाऊजी अग्निहोत्री के दुकान पर मिलैगा लि· रामदास छापनेवाला वचनू सम्बत् १९५६ ॥

तीसरीवार ३००

प्रोप्राईटर गणेशप्रसाद वाजपेयी सिद्धविनायक प्रेस बनारस ता: १६ डिसम्बर सं· १८९९

श्रीगणेशायनमः॥ ॐ नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींव्यासंततोजयमुदीरयेत् १ श्रीसू
तउवाच अतः परंप्रवक्ष्यामिप्रयागस्योपवर्णनम् मार्कण्डेयेनकथितंयत्पुरापांडुसूनवे १ भारतेतुरणेवृत्तेप्र
पराज्यंपृथासुतः बभूवविमनाराज्यंप्राप्यचापियुधिष्ठिरः २ भ्रातृशोकेनसंतप्तश्चिंतयन्सपुनःपुनः आसीत्सुयो
धनोराजाएकादशचमूपतिः ३ अस्मान्संपीड्यबहुशःसर्वेतेनिधनंगताः वासुदेवंसमाश्रित्यवयंशेषास्तुपांडवाः ४ अ
हो भीष्मश्चद्रोणश्चकर्णश्चैवमहाबलः सुयोधनश्चराजासौपुत्रभ्रातृसुतोहतः ५ राजानश्चैवनिहताःसर्वेयेशूरमा
निनः किन्मेराज्येनकर्त्तव्यंभोगैर्वाजीवितेनवा ६ धिक्कष्टमितिसंचिंत्यराज्याविक्लवतांगतः निश्चेष्टोवैनिरुत्साहः।
स्तूष्णीमासीदवाङ्मुखः ७ लब्धसंज्ञःपुनर्भूपश्चिंतयन्सपुनःपुनःकतरोविधियोगोवानियमस्तीर्थमेववा ८ येना
हंशीघ्रमासुच्येमहापातकसंचयात् यत्रस्नात्वानरोयातिविष्णुलोकमनुत्तमम् ९ कथंपृच्छामिवैकृष्णंयेनेदंकारि
तोस्म्यहं मष्ठ्योधृतराष्ट्रस्यकथंयत्ननयाहताः १० एवंवैक्लव्यमापन्नेधर्मराज्येयुधिष्ठिरेरुदंतिपांडवाःसर्वेभ्रा
तृशोकपरिप्लुताः ११ येचतत्रमहात्मानःसमेताःपांडवाश्रिताःकुंतीचद्रौपदीचैवयेचतत्रसमागताः १२ भूमौनिप
तिताःसर्वेक्रंदमानाइतस्ततः मार्कण्डेयेनसज्ञातःकाशीस्थेनयुधिष्ठिरः १३ यथावैक्लव्यमापन्नश्चिंतयानःसुदुःखि
तः अचिरेणैवकालेनमार्कंडेयोमहातपाः १४ हस्तिनापुरमागम्यराजद्वारेस्थितोभवत् द्वारपालोपितंदृष्ट्वाराज्ञेका

थितवान्मुदा १५ मार्कण्डेयोत्रत्वांद्रष्टुंद्वारितिष्ठत्यसौमुनिः तच्छ्रुत्वात्वरितंसोपिद्वारमागाद्युधिष्ठिरः १६ स्वागतं
तेमहाभागस्वागतंतेमहामुने अद्यमेसफलंजन्म अद्यमेतारितंकुलं १७ अद्यमेपितरस्तुष्टास्त्वयितुष्टेमहामुनौ
अद्यपूतोस्म्यहंसर्वैःकुलजैःसहदर्शनात् १८ श्रीसूतउवाच सिंहासनमुपस्थाप्यपादशौचार्चनादिभिः युधिष्ठि
रोमहात्मावैपूजयामासतंमुनिं १९ मार्कण्डेयस्ततस्तुष्टःपूजितश्चाहतंनृपं आख्याहित्वरितंराजन्किमर्थंरोदनं
नव २० केनवाविक्लवीभूतःकातेबाधाकिमप्रियं श्रीयुधिष्ठिरउवाच पृच्छामित्वांद्विजश्रेष्ठसर्वज्ञंसर्वदर्शिनं २१ चि
रजीविन्बहुज्ञोसिसर्वधर्मकृदुत्तमः अस्माकंचैवयद्वृत्तंराज्यस्यार्थेमहामुने २२ वत्सित्वंतद्धिचिंत्याहंचिन्तादुःख
मुपागतः मार्कण्डेयउवाच शृणुराजन्महाभागक्षत्रधर्मव्यवस्थितिं २३ नैवंदृष्टंरणेपापंराज्ञांयुद्धेवधाद्द्विषांधर्मेण
युध्यतःस्वैरंपितृपैतामहेपदे २४ त्वंचराजन् धर्मनिष्ठःप्रजापालनतत्परः हतवान्क्षत्रधर्मेणस्वदायंप्रार्थयंस्थिरं
२५ पूर्वंसंक्लेशितोदुष्टैःकूटद्यूतविधायिभिः भ्रातृभिःसहितःसर्वैर्द्रौपद्यासहभार्यया २६ वनेद्वादशवर्षाणिस्वजने
ष्वेकमप्युत्तंतैस्तैःसंपीडितःक्लेशैर्धर्ममेवानुपालयन् २७ राजपुत्रीवरारोहास्वधर्मसमवेक्षती तैस्तैःक्लेशैस्तुसंक्लिष्टा
युष्मान्संप्राप्यपांडवान् २८ तैर्दैवकिन्नदग्धास्तेक्रोधदृष्ट्यानिरीक्षिताः क्षमयातपसाचैवपातिव्रत्येनयुक्तया २९ त्व
यावाक्रूरयादृष्ट्याननिर्दग्धाःपरंतप अहंवाचेत्तदास्यातेदग्धास्स्युस्तत्रदूषितः ३० मन्येतच्चव्यतिक्रान्तंप्राप्तकालंविचिं

त्यते इदानींशृणुराजेंद्रतवसंतापकारणं ३१ किंचिन्तास्तिविशुद्धस्ययजतःक्रतुभिर्मखैःवाजिमेधादिभिर्नित्यंशुद्धो
सित्वंनसंशयः ३२ त्यजपापकृतांचिंतांशोकंकर्तुंनचार्हसि श्रीसूतउवाच इत्युपामंत्रितोराजाप्रणम्यशिरसामुनिं ३३
मार्कंडेयंमहात्मानमिदमाहवचोर्थवत् पृच्छामित्वांमहावाहोत्रिकालज्ञमहाद्युते ३४ कथयत्वंमहाप्राज्ञमुच्यहें।
पातकाद्यस्मा कालुष्यंमनसोमेद्ययथागच्छतिततकुरु ३५ तववाग्जाह्नवीतोयैःस्नानस्यापिविशेषतः केनमेनिर्म
लत्वंनभजतेममममानसं ३६ तथ्यंकथयविप्राग्र्यसंशुद्धेःकारणंपरं मार्कंडेयउवाच शृणुराजन् महाभागयन्मांपृच्छ
सिभारत ३७ विनासांख्येनयोगेनविनाज्ञानेनसुव्रत कथमात्यंतिकीशुद्धिर्भवेद्यदिहमानसे ३८ कालुष्यंत्यजतांचैव
सत्यनिष्ठंसुनिर्मलं दैवीमायामुपाश्रित्ययावत्संसारगह्वरे ३९ प्रविष्टायमतिस्तव्योममेतिपुरुषार्थवित् अनर्थ्यान्विष
यान्मुंचन् विमुखोहरिमेधसः ४० सर्वात्मनःसमदृशश्चात्मनःपरमेष्ठिनः त्वंचराजन् विनीतात्मानित्यंकृष्णमनुव्रतः
४१ यस्यतेपरमोबंधुःसखामैत्रीसुहृद्गुरुः जगद्गुरुरमेयात्मानित्यंचैवहितेरतः ४२ सारथ्यंकृतवान्प्रीत्यामोहस्तस्या
पिकिंविभोनूनंभगवतोमायायोगिनामपिमोहिनी ४३ ययासम्मोहितोजीवआत्मानंत्रिगुणात्मकं परोपिनमनुतेराज
न्मुह्यतेबोधितोपिसन् ४४ नद्यापिपरमंगुह्यंवदतोमेनिशामय निश्चित्यमुनिभिःसर्वैर्यदुक्तंतत्त्वदर्शिभिः ४५ ब्रह्म
णोपिमुखाद्यन्मेश्रुतंसुबहुशस्तया पूर्वनारायणमुखाच्छ्रुतंविस्तरतःपरं ४६ विनायज्ञैर्विनादानैःसांख्ययोगंविनै

वतत् आध्यात्मिकेनयोगेनविनैवतपसातथा ४७ तीर्थसेवनमात्रेणमोहस्तुविनिवर्तते नाज्ञानेनविनामोहःसो
पिपापफलंमहत् ४८ तस्मात्सर्वप्रयत्नेनतीर्थसेवांसमाचरेत् यस्तीर्थेपुनरःस्नातिसमुच्यैतेनसोखिलात् स्वर्गलो
कमवाप्नोतिह्यक्षय्यंफलमश्नुते ॥ निष्कामोविष्णु-भक्तस्तुविष्णुलोकंव्रजेन्नरः ५० तेभ्योपिपरमंगुह्यंसर्ववेदेषुनि
श्चितं ब्रह्मविष्णुशिवाद्यैश्चसुविचार्यदिविस्थितैः ५१ मुनिभिर्निर्मलैर्ज्ञानैर्निश्चित्यचसुगोपितं तीर्थराजाभिगमनंस
र्वाज्ञाननिवारणं ५२ अनेनपुण्यफलदमस्याख्यानंतुलोकदंप्रसिद्धश्रुतिमूलंतुत्रिगुणाघहरंपरं ५३ पदेपदेश्वमेध
स्यफलदंयत्स्मृतंबुधैः तस्माद्गच्छमहाराजप्रयागंप्रतिभारत ५४ दर्शनात्स्पर्शनात्स्नानाद्गंगायमुनसंगमे निष्पा
पोजायतेमर्त्यःसेवनात्स्मरणादपि ५५ मोहोनिवर्ततेसद्योजन्मांतरशतोद्भवः तस्मात्त्वमनादेवतत्त्वंमोहोविनिवर्तते
५६ विनंस्यतिनसंदेहस्तत्त्वज्ञानजंतमः ॥ इतिश्रीमत्स्यपुराणेप्रयागमाहात्म्येमार्कण्डेययुधिष्ठिरसंवादेप्रथमोध्या
यः १ युधिष्ठिरउवाच भगवन् श्रोतुमिच्छामिपुराणऋषिभिस्तुतं ब्रह्मणादेवदेवेन यथावत् कथितंपुरा १ प्रयागस्यतुमाहा
त्म्यंविधिंचरामनेफलं तत्सर्वंश्रोतुमिच्छामियद्यनुग्रहनामपि २ स्नानंकथंचकिंदानंनियमःकोथवाभवेत् कथंतस्यनि
वासःस्यान्मरणेनचकागतिः ३ स्नानस्यकिंफलंतत्रदानस्याप्यथकिंफलं निवासेकिंफलंप्रोक्तंतन्नोवदस्तुविस्तरात् ४ वरा
नुग्रहतोविप्रविधौविंस्तोश्वयच्छ्रुतं मार्कंडेयउवाच कथयिष्यामिराजेंद्रयथावत् यन्मयाश्रुतं १ आप्रयागप्रतिष्ठानाद्ध

त्सुरोवासुकेर्गृहात् कंबलाश्वतरौनागौनागश्चबहुमूलकः ६ एतत्प्रजापतेः क्षेत्रंत्रिषुलोकेषुविश्रुतं अत्रस्नानाद्दिवंयां
तियेमृतास्तेतुमोक्षगाः ७ अत्रब्रह्मादयोदेवारक्षांकुर्वंतिसंगताः प्रयागेतीर्थराजेतुसर्वतीर्थाश्रयेनृप ८ यावंतिसंतिती
र्थानिनावक्तोवक्तुमर्हति कथयितुंनैवशक्यंतेराजन्वर्षशतैरपि ९ संक्षेपेणप्रवक्ष्यामिमहिमानंप्रयागज षष्ठिर्गणासह
स्राणांतत्ररक्षंतिजान्हवीं १० यमुनांरक्षतिसदासवितासप्तवाहनः प्रयागंतुविशेषेणस्वयंरक्षतिविश्वसृट् ११ मंडलंरक्ष
तिहरिर्दैवतैःपरिवारितः तंवटंरक्षतिशिवः शूलपाणिर्महेश्वरः १२ स्थानंरक्षंतिवैदेवाः सर्वपापहरंशुभं अधर्मेण
वृतालोकानैवगच्छंतितत्पदं १३ अल्पमल्पतरंपापंप्राणिनस्तुनराधिप प्रयागस्मरणादेवसर्वमायातिसंक्षयं १४ दर्श
नात्तस्यतीर्थस्यनामसंकीर्तनादपि मृत्तिकालंभनाद्वापिनरःपापात्प्रमुच्यते १५ पंचकुंडानिराजेंद्र येषांमध्येतुजान्हवी प्र
यागदर्शनादेवपापंनश्यतितत्क्षणात् १६ योजनानांसहस्रेषुयोगंगांस्मरतेनरः अपिदुष्कृतकर्मासौलभतेपरमंपदं
१७ कीर्तनान्मुच्यतेपापात् दृष्ट्वाभद्राणिपश्यति अवगाह्यचपीत्वाचपुनात्यासप्तमंकुलं १८ सत्यवादीजितक्रोधोप्यहिं
सोप्यनसूयकः धर्मानुसारीतत्त्वज्ञोगोब्राह्मणहितेरतः १९ गंगायमुनयोर्मध्येप्रवेशादेवसत्वरं निष्पापोजायतेमर्त्यःप
पकर्मरतोपिसन् २० प्रसन्नेनैवमनसासर्वकामानवाप्नुयात् ततःप्राप्यप्रयागंतुसर्वदेवाभिरक्षितं २१ ब्रह्मचारीवसन्मा
संपितृदेवांश्चतर्पयेत् गंगायमुनयोश्चैवसंगमेस्नानमाचरेत् २२ नित्यकर्मरतोविद्वान् पूतात्मानियतेंद्रियः समर्चयेच्चत

3

त्रन्यादेवताःसेष्टदेवताः२३ पूजकस्तीर्थदेवानांनित्यंब्राह्मणपूजकः दीनानाथांस्तर्पयानोदयालुःक्रोधवर्जितः२४ ईप्सितान्लभतेकामान् यत्रयत्राभिजायते नपनस्यसुतादेवीत्रिषुलोकेषुविश्रुता २५ समागतामहाभागायमुनायत्रनिम्नगा यत्रसन्निहितःसाक्षाद्देवदेवोमहेश्वरः२६ गंतव्यंमानवैःपुण्येप्रयागेतुयुधिष्ठिर देवदानवगन्धर्वाऋषयःसिद्धचारणाः२७ तत्रापस्पर्शनाद्राजन्स्वर्गलोकमुपाश्नुते अपिदुष्कृतकर्माणोयेनरादुःखभागिनः२८ क्षेत्रदर्शनमात्रेणजायंतेसुखिनोनराः पृथिव्यामटमानायेलभंतेशर्मनक्कचित् २९ वेणीदर्शनमात्रेणजायंतेसुखिनोनराः भूतप्रेनपिशाचावा वेणीपानीयविंदुभिः३० स्पृष्टमात्राविमुच्यंतेदिव्यदेहधरानृप स्वर्गलोकंप्रयांत्येवनिष्पापाःशुद्धमानसाः३१ नरकेपच्यमानायेयमशासनविप्लुताःआक्रंदमानाःसततंस्वकर्मपरिमोहिताः३२ दैवात्कुलजावेण्यांस्नात्वासंतर्प्पयंतिचेत्॥ तदैवतेप्रमुच्यंतेस्वर्गलोकंव्रजंतिच ३३ दिविस्थाअपियेदेवाभूमौजन्माभिलाषिणः तीर्थराजेनिवत्स्यामोमानुष्यंप्राप्यदुर्लभं३४ तत्रस्नात्वानरोजातुतर्पयेत्कुलजान्यदि तदैवतेविमुच्यंतेनानायोनिगताअपि३५ येषान्नामानिगृह्णीयात्प्रयागंप्राप्यदैवतः तिर्यग्योनिगताश्चापिमुच्यंतेपापिनोनराः३६ अपिदुष्कृतकर्माणोनानादुःखसमन्विताः दैवाद्गंधवहानीतस्तद्रजःपुष्पगंधवत् ३७ निरेनसःक्षणाद्देवसमस्तसुखभाजनाः३८ इतिश्रीमत्स्यपुराणेप्रयागमाहात्म्येद्वितीयोध्यायः२ मार्कंडेयउवाच शृणुराजन्प्रवक्ष्यामिमाहात्म्यंपुनरेवतु यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः१ अ

र्नानांचदरिद्राणांनिश्चित्य वनिवासिनां प्रयागात्परंकिंचिद्वक्तव्यंनकदाचन २ व्याधितोपापकृत्क्रोधीकश्चिच्चेदपि
मानवः गंगायमुनयोस्संगंप्राप्यप्राणान्परित्यजेत् ३ दीप्तकांचनवर्णाभैर्विमानैःसूर्यवर्चसैः गंधर्वाप्सरसांमध्येस्वर्गे
संमोदतेचिरं ४ ईप्सितान्लभतेकामानेवंहिमुनयोविदुः सर्वरत्नमयैर्दिव्यैर्नानारत्नसमाकुलैः ५ वरांगनासमाकीर्णैर्मोद
तेशुभलक्षणैः गीतवादित्रनिर्घोषैः प्रसुप्तः प्रतिबुध्यते ६ यावन्नस्मरतेजन्मतावत्स्वर्गेमहीयते ततः स्वर्गात्परिभ्रष्टः क्षी
णकर्मादिवश्च्युतः ७ हिरण्यरत्नसंपूर्णेप्रसिद्धेजायतेकुले तदेवस्मरतेतीर्थंप्राग्जन्मभवभावनः ८ पुनर्गच्छतितत्तीर्थं
प्रयागंनात्रसंशयः तत्रप्राणान्परित्यज्यब्रह्मलोकंसगच्छति ९ ब्रह्मणासहसंप्राप्यप्रलयेयच्चिदात्मकं तदात्मतांवैतलभ
तेपद्गत्वानपुनर्भवः १० यश्चप्रयागवासीतुगत्वान्यत्रविपद्यते स्वकर्मनिरतोधीरः शुद्धबुद्धिर्जितेंद्रियः ११ तान्लोकान्स
मवाप्नोतियत्रगत्वानशोचति सर्वकामफलावृक्षामहीयत्रहिरण्मयी १२ ऋषयोमुनयःसिद्धास्तत्रलोकेसगच्छति स्त्री
सहस्राकुलेरम्येमंदाकिन्यास्तटेशुभे १३ मोदतेऋषिभिःसार्धंसुकृतेनेवकर्मणा देशस्थोयदिवारण्येविदेशेयदिवागृहे १४
श्रीतीर्थराजंसंस्मृत्ययस्तुप्राणान् परित्यजेत् ब्रह्मलोकमवाप्नोतिसुकृतेनेवकर्मणा १५ तीर्थराजंसमासाद्यनैवकुर्यात्प्रति
ग्रहं यस्यहस्तौचपादौचमनश्चैवसुसंयतं १६ विद्यातपश्चकीर्तिश्चसतीर्थफलमश्नुते प्रतिग्रहान्निवृत्तोयःसंयतःसभ
वेन्नरः १७ जीवैस्तुरहितेदेशेदृष्टिपूतंन्यसेत्पदं सएवनियमःप्रोक्तस्तपस्तीर्थार्थवेदिभिः १८ गायत्र्यादींस्तथामंत्रान्ज

4

पन्विद्यायुतोभवेत् एकादश्युपवासाद्यैर्युक्तोभक्ष्यविवर्जितः १९ अनश्नन्नेवतीर्थेशेप्रातःस्नायीभवेन्नरः पादत्राणं
विनाशक्त्याकंचुकोष्णीषवर्जितः २० तैलाभ्यंगंसमुत्सृज्यब्रह्मचर्येणसंयुतः तपसायःसमायुक्तःसतीर्थफलभाग्भवेत्
२१ स्वार्थस्यरक्षणाच्चैवयथाशक्तिस्वदानतः कीर्तियुक्तोभवेद्यस्तुसतीर्थविंदतेफलं २२ प्रतिग्रहसमर्थोपिनादत्तेयः
प्रतिग्रहम् क्रोधेनरहितःसाधुःसतीर्थफलमश्नुते २३ वेदपारायणात्तुसःप्रतिग्रहसमुद्भवः दोषानश्यतिसर्वोपितस्मा
त्कुर्याज्जपंसदा २४ एवंयस्त्वसमर्थोपिप्रतिग्रहपराङ्मुखः सचाप्नोतिफलसम्यगवाप्नोतिचवांछितं २५ सुवर्णमणि
मुक्तादिप्रतिग्रहपरोनरः स्वकार्येपितृकार्येवादेवताभ्यर्चनेपिवा २६ विफलंतस्यतत्तीर्थगमनंपापमश्नुते अतस्ती
र्थेनगृह्णीयात्पुण्येष्वायतनेषुच २७ निमित्तेषुचसर्वेषुअप्रमत्तोभवेद्द्विजः कपिलांपाटलांरम्यांयस्तुधेनुंप्रयच्छति २८
स्वर्णशृंगींरौप्यखुरांचैलकंठांपयस्विनीं रत्नपुच्छींताम्रपृष्ठींकांस्यदोहांसवत्सकां २९ कौडुंबिकायविप्राययस्तुशीलायत
पस्विने अभ्यर्च्यवासोलंकारैस्तत्पुण्यंकथमुच्यते ३० धर्मात्मनेवेदविदेश्रोत्रियायचभक्तितः त्रिवेण्यांतोषयेच्छक्त्या
दत्तानंत्यमभीप्सता ३१ वासांसिचमहार्हाणिदद्यानिविविधानिच यावद्रोमाणितस्यागोःसंतिगात्रेषुसर्वतः ३२ तावद्वर्षसह
स्राणिस्वर्गलोकेमहीयते यत्रासौलभतेजन्मसागौस्तत्राभिजायते ३३ नपश्यतिसपुण्यात्मानरकंबहुदुःखदं स्वर्गलोका
त्परिभ्रष्टोजंबूद्वीपाधिपोभवेत् ३४ उत्तरान्सकुरून्प्राप्यमोदतेफलमक्षयं अतःक्रीत्वाशतेनापिदद्यादेकांपयस्विनीं ३५ पुत्रा

प्र·मा
५

न्दागान्समदाभृत्यानेकागोस्तारयेत्सदा तस्मात्सर्वेषुदानेषुगोरेकातुविशिष्यते ३६ दुर्गमेविषमेघोरेनस्यापातकसंकटे गौरेव
रक्षांकुरुतेसत्पात्रेप्रतिपादिता ३७ कुपात्रायचसादत्तादातारंनरकंनयेत् नलभ्यंतेयत्रपात्रेनत्रसंकल्पपूर्वकं ३८ पा
त्रेमनसिसंधायतोयेतोयंविनिःक्षिपेत् शालिग्रामसमीपेवासंकल्पंप्रविधायच ३९ ततस्वतद्गृहंगत्वादद्यात्तस्मैद्विजा
यतां एवंकृतेभवेत्तस्यफलंसंपूर्णंहितवै ४० नदोषभाक्प्रतिग्राहीत्वनेनविधिनातथा दाताप्रतिग्रहीताचतद्वालभता
त्सदा ४१ तरंतिदुस्तरंचैवघोरंदुरितसागरं ४२ इतिश्रीमत्स्यपुराणेप्रयागमाहात्म्येतृतीयोध्यायः ३ युधिष्ठिरउवाच य
थायथाप्रयागस्यमहिमानंशृणोम्यहं तथातथाभवत्येवमनसोभावशुद्धता १ भगवन्केनविधिनागच्छेत्तीर्थंनरःसुधीः
विशेषात्तीर्थराजानंप्रयागंप्रतितद्वद २ मार्कंडेयउवाच कथयिष्यामितेवत्सतीर्थयात्राविधिक्रमंयथोक्तमृषिभिःस
र्वैर्विचार्यचसुनिश्चितं ३ प्रस्थानात्पूर्वदिवसेक्षौरंचैवउपोषणं घृतप्रधानकंश्राद्धंविधायतूपसत्तमः ४ प्रथमांवसतिं
प्राप्यघृतशेषेणपारयेत् स्नात्वाप्रतिदिनंगच्छेद्ब्रह्मचारीजितेंद्रियः ५ पादचारेणवसतिंपादत्राणविवर्जितः कंचुकोष्णी
षरहितोयानारोहणवर्जितः ६ अनश्नन्नेववसतिंयावन्नित्यंहरिंस्मरेत् आरोहणंगवांयत्नाद्वर्जयेन्नरकावहं ७ दा
रुणोहिगवांक्रोधस्तेनयानेनयोव्रजेत् सलिलंनचगृह्णंतिपितरस्तस्यदेहिनः ८ ऐश्वर्याहंकृतोयोगोयानमारुह्यग
च्छति निष्फलंतस्ययात्रायांगनंतस्माद्विवर्जयेत् ९ यानमर्द्धफलंहंतिनदर्धार्धमुपानहौ अशक्तस्तुयथाशक्त्याग

रामः
५

5

च्छेद्गत्वाहरिंस्मरन् १० तथापितीर्थयात्रायाः फलंभवतिनान्यथा यस्तुपुत्रांस्तथादारान्स्नात्वा चैवात्मनासह ११॥
आत्मवत्त्वयथाशक्तिब्राह्मणेभ्यःप्रदापयेत् यत्रयत्रचजायेततत्रसर्वैःसहैवतु १२ राजतेरूपसंपन्नैः स्वयंचगुणवान्
भवेत् अनेकभोगसंयुक्तःसंवसेदुत्तरान्कुरून् १३ गंगायमुनयोर्मध्येयस्तुकन्यांप्रयच्छति आर्षेणैवविधानेनय
थाविभवसंभवान् १४ नसपश्यतितंघोरंनरकंतत्प्रभावतः उत्तरान्सकुरून्प्राप्यमोदतेकालमक्षयम् १५ पुत्रान्दारां
श्चलभतेधार्मिकान्रूपसंयुतान् तत्रदानंप्रदातव्यंयथाविभवसारतः १६ तीर्थंप्राप्यसकृत्स्नात्वामुंडनंकारयेत्ततः
देवान्पितॄंस्तर्पयित्वातीर्थेदेवान्समर्चयेत् १७ उपोषितस्तीर्थंप्राप्तंश्राद्धंकुर्याद्विधानतः द्विजानुज्ञानतःप्राप्यस्वयंभु
ञ्जीतवाग्यतः १८ पौत्रैःसहमहाबाहोदीनानाथांश्चतर्पयेत् तेनपुण्यप्रभावेनयावदाभूतसंप्लवं १९ स्वर्गेवसतिधर्मा
त्माविमानेनार्कवर्चसा क्रीडतेप्सरसांमध्येदेवानांक्रीडनेषुच २० वटमूलंसमासाद्ययस्तुप्राणान्परित्यजेत् सर्वा
न्लोकानतिक्रम्यशिवलोकंसगच्छति २१ यत्रतेद्वादशादित्यास्तपंतेरुद्रमाश्रिताः निर्दहंतिजगत्सर्वंवटमूलंनद
ह्यते २२ नष्टचंद्रार्कपवनंयदाचैकार्णवंजगत् तदास्वपितितत्रश्रीर्विष्णुर्वटपुटेसदा २३ देवदानवगंधर्वाऋषयः
सिद्धचारणाःसदासेवंतितत्तीर्थंगं गायमुनसंगमे २४ सर्वेदेवाश्चऋषयोवेणीजलसमाश्रिताः ब्रह्मारुद्रश्चविष्णुश्च
दिशश्चैवदिगीश्वराः २५ साध्याश्चपितरोनागास्तीर्थानिसरितस्तथा सागराःसम्प्रतिष्ठंतिसनकाद्यामहर्षयः २६ त्रं

प्र·मा
६

गिरःप्रमुखाश्चैवतथाब्रह्मर्षयःपरे कपिलाद्यास्तथासिद्धाःसुपर्णाश्चमरुद्गणाः२७विद्याधराश्चक्रधराःसर्वाण्याय
ननानिच वेणीमाधवरूपेणायत्रास्तेभगवान्हरिः २८ शूलटंकेश्वरोरुद्रःस्वयंतिष्ठत्यसौहरः ब्रह्माप्रजापतिर्यत्रकृत्वा
यज्ञाननेकशः२९ स्वयंतिष्ठतिलोकेशोलोकानुग्रहकारकः गंगायमुनयोर्मध्ये पृथिव्याजघनंस्मृतं ३० प्रयागंराजशार्दू
लत्रिषुलोकेषुविश्रुतं ततःपुण्यतमंनास्तित्रिषुलोकेषुभारत ३१ श्रवणात्तीर्थराजस्यनामसंकीर्तनादपिमृत्तिकाल
भनाद्वापिनरःपापात्प्रमुच्यते ३२ तत्राभिषेकंयःकुर्यात्संगमेसंशितव्रतःतुल्यंफलमवाप्नोतिराजसूयाश्वमेधयोः ३३ न
वेदवचनानात नलोकवचनादपि मतिरुत्क्रमणीयातेचप्रयागमरणंप्रति ३४ दशतीर्थसहस्राणिषष्ठिकोट्यस्तथापराः तेषां
सान्निध्यमत्रैवसततंकुरुनंदन ३५ यागतिर्योगयुक्तस्यसत्वस्थस्यमनीषिणःसागतिस्त्यजतःप्राणान्गंगायमुनसंग
मे ३६ व्यर्थंजीवितमेतेषांप्रयागोयैर्नगम्यते भुंजानाअपिभोगांस्तुस्त्रीपुत्रधनसंयुताः ३७ येप्रयागंनसंप्राप्तास्त्रिषुलोके
षुवंचिताः यैर्दैवादिहसंप्राप्तःप्रयागःसुरवल्लभः ३८ तेषांवैसफलंजन्मदीनानामपिदेहिनां मुच्यंतेसर्वपापेभ्यस्तदृष्ट्वै
वतुनतत्क्षणात् ३९ किंवास्वर्गादिलाभेनपुनरावर्ततेयतः प्रयागदर्शनादेवमुच्यतेसर्वपातकात् ४० मरणाद्यत्रकैवल्यं
देवानामपिदुर्लभम् कंबलाश्वतरौनागौयमुनादक्षिणेतटे ४१ तत्रस्नात्वाचपीत्वाचसर्वपापैःप्रमुच्यते शूलटंकेश्वरंदृष्ट्वाशि
वस्थानमनुत्तमं ४२ नरस्तारयतेपूर्वान्दशातीतान्दशापरान् अश्वमेधस्ययज्ञस्यपूजनाल्लभतेफलं ४३ वेणीजलाभि

रामः
६

6

षेकेण पंचामृतघटोद्भवं सहस्रगुणितं पुण्यं लभते नात्र संशयः ४४ पुष्पमात्रप्रदानेन शतसौवर्णिकं फलं विल्वपत्रप्रदानेन अनंतगुणितं भवेत् ४५ गंगायाः पूर्वभागे तु प्रतिष्ठाने नृपोत्तम सामुद्राख्यो महाकूपस्त्रिषु लोकेषु विश्रुतः ४६ ब्रह्मचारी जितक्रोधस्त्रिरात्रं तत्र तिष्ठति यदि मर्त्यो विशुद्धात्मा सोश्वमेधफलं लभेत् ४७ उत्तरेण प्रतिष्ठानात् भागीरथ्यास्तु पूर्वतः हंसप्रपतनं नाम त्रिषु लोकेषु विश्रुतं ४८ अश्वमेधफलं तत्र स्नानमात्रस्य भारत ॥ हंसवन्निर्मलो लोके जायते नात्र संशयः ४९ यावच्चंद्रश्च सूर्यश्च तावत्स्वर्गे महीयते उर्वशीपुलिने रम्ये विपुले हंसपांडुरे ५० परित्यजति यः प्राणांस्तत्र भाग्यवशान्नतु षष्ठिवर्षसहस्राणि षष्ठिवर्षशतानि च ५१ स वसेत्पितृभिः सार्द्धं स्वर्गलोके नराधिप उर्वशीं तं सदा पश्येद्देवलोके नराधिप ५२ पूज्यते तत्र सततमृषिगंधर्वकिन्नरैः ततः स्वर्गात्परिभ्रष्टः क्षीणकर्मा दिवश्च्युतः ५३ उर्वशीसदृशीनां तु कन्यानां लभते शतं मध्ये नारीसहस्राणां वहूनां च पतिर्भवेत् ५४ दशग्रामसहस्राणां भोक्ता भवति भूमिपः कांचीनूपुरशब्देन सुप्तोऽसौ प्रतिबुध्यते ५५ भुक्त्वा तु विपुलान्भोगान् तत्तीर्थं लभते पुनः शुक्लांबरधरो नित्यं नियतः संयतेंद्रियः ५६ एककालं तु भुंजानो मासं भोगादतीवसेत् सुवर्णालंकृतानां तु नारीणां लभते शतं ५७ पृथिव्यां सागरांतायां महाभोगासमन्वितः धनधान्यसमायुक्तो दाता भवति धार्मिकः ५८ भुक्त्वा तु विपुलान् भोगान्तत्तीर्थं लभते पुनः अथ संध्यावटे रम्ये ब्रह्मचारी जितेंद्रियः ५९ उपासीत शुचिः संध्यां ब्रह्मलोकमवाप्नुयात्' कोटितीर्थं समासाद्य यस्तु प्राणान् परित्यजेत् ६० कोटिव

र्षसहस्राणिस्वर्गलोकेमहीयते ततःस्वर्गात्परिभ्रष्टःक्षीणकर्मादिवश्च्युतः ६१ सुवर्णमणिमुक्ताढ्येकुलेजायेतरूपवा
न् ततोभोगावतींगत्वांवासुकेस्तनरेणतु ६२ अश्वमेधाभिधंतीर्थंतत्रपुण्यपरोभवेत् कृत्वाभिषेकंतुनरःसोश्वमेधफलं
लभेत् ६३ धनाढ्योरूपवान्दक्षोदाताभवतिधार्मिकः चतुर्वेदेषुयत्पुण्यंसत्यवादिषुयत्फलं ६४ अहिंसकस्ययोधर्मोग
मनादेवतत्फलं कुरुक्षेत्रसमागंगायत्रकुत्रावगाहिता ६५ कुरुक्षेत्राद्दशगुणायत्रविंध्येनसंगता ततोदशगुणाप्रोक्ताका
श्यांचोत्तरवाहिनी ६६ ततःसावैशतगुणागंगासागरसंगता ततःसहस्रगुणिताकालिंद्यासहसंगता ६७ प्रयागेसानंतगुणा
गंगापश्चिमवाहिनी साराजन्दर्शनादेवमहापापक्षयावहा ६८ महाभाग्येनसालभ्यामकरस्थेरवौभवेत् सूर्येमकरराशि
स्थेमाघेमासेतिदुर्लभा ६९ तत्रस्नानेनदानेनजपहोमार्चनादिना अनंतमक्षयंपुण्यंफलंभवतिनान्यथा ७० तिलद्रो
णयुतंतत्रतिलपात्रघृतान्वितं मधुनाचैवयुक्तंचस्वर्णदक्षिणयासह ७१ विप्रायवेदविदुषेश्रोत्रियायकुटुंबिने पूजा
यित्वाप्रदद्याद्यस्तस्यपुण्यमनंतकं ७२ कल्पक्षयेपितस्यांतोनभवेत्पुण्यकर्मणः यत्रगंगामहाभागसिद्धक्षेत्रंततः
स्मृतं ७३ सर्वतीर्थानितत्रैवनात्रकार्याविचारणा क्षितौतारयतेमर्त्यान्नागांस्तारयतेप्यधः ७४ दिवितारयतेदेवान्त
स्मात्त्रिपथगास्मृता यावदस्थीनितिष्ठंतिगंगायांयस्यदेहिनः ७५ तावद्युगसहस्राणिस्वर्गलोकेमहीयते तीर्थानांप
रमंतीर्थंनदीनांपरमानदी ७६ मोक्षदासर्वभूतानांमहापातकिनामपि सर्वत्रसुलभागंगात्रिषुस्थानेषुदुर्लभा

७७ गंगाद्वारे प्रयागे च गंगासागरसंगमे तत्र स्नात्वा दिवं यांति ये मृतास्तेऽपुनर्भवाः ७८ सर्वेषामेव भूतानां पापोप
हतचेतसां गतिमन्वेषमाणानां नास्ति गंगासमा गतिः ७९ पवित्राणां पवित्रं तु मंगलानां तु मंगलं महेश्वरशिरोभ्रष्टा
सर्वपापहरा शुभा ८० इति श्रीमत्स्यपुराणे प्रयागमाहात्म्ये चतुर्थोध्यायः ४ ॥ श्रीमार्कंडेय उवाच ॥ शृणु राजन् प्रव
क्ष्यामि माहात्म्यं पुनरेव तु यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः १ मानसं नाम तत्तीर्थं गंगाया उत्तरे तटे त्रिरात्रो
पोषितः स्नात्वा सर्वान् कामानवाप्नुयात् २ गोभूहिरण्यदानेन यत्फलं प्राप्नुयान्नरः अकामो वा सकामो वा गंगायां यो
विपद्यते प्राजापत्ये वसेल्लोके ब्रह्मा यावद्वसेत्स्वयं ४ ततैव सह संभूय परं ब्रह्माधिगच्छति हंससारसयुक्तेन किंकि
णीजालमालिना ५ अप्सरोगणसंयुक्तः स्तूयवनांधर्वमुत्तमं रमते ब्रह्मणो लोके यः सकामो म्रियेत वै ६ ततो भूमिपति
र्भूत्वा राजन् राजाभिवंदितः भोगानुच्चावचान् भुंजन् पुनस्तत्रैव गच्छति ७ तत्र मुक्तनतुर्भूत्वा परं ब्रह्माधिगच्छति ग
वांशतसहस्रस्य सम्यक्दत्तस्य यत्फलं ८ प्रयागे माघमासे तु त्र्यहं स्नातस्य तत्फलं गंगायमुनयोर्मध्ये करीषाग्निं तु
साधयेत् ९ अहीनांगो ह्यरोगश्च पंचेंद्रियसमन्वितः यावंति रोमकूपाणि तस्य गात्रेषु धीमतः १० तावद्वर्षसहस्राणि
स्वर्गलोके महीयते ततः स्वर्गात्परिभ्रष्टो जंबूद्वीपपतिर्भवेत् ११ स भुक्त्वा विपुलान् भोगान् तत्तीर्थं लभते पुनः तत्रैव मर।
णं प्राप्य विष्णुलोके महीयते १२ जलप्रवेशं यः कुर्यात्संगमे लोकविश्रुते राहुग्रस्तो यथा सोमो विमुक्तः सर्वपातकैः १३

प्र०मा० सोमलोकमवाप्नोतिसोमेनसहमोदते षष्ठिवर्षसहस्राणिषष्ठिवर्षशतानिच१४स्वर्गलोकमवाप्नोतिगंधर्वाप्सरसेवि
८ तः परिभ्रष्टस्ततोलोकादग्निहोत्रीभवेन्नरः१५भुक्त्वातुविपुलान्भोगान्तत्तीर्थंलभतेपुनः यस्तुदेहंविकर्तित्वाशकु
निभ्यः प्रयच्छति१६विहंगैरुपभुक्तस्यशृणुतस्यापियत्फलं शतवर्षसहस्राणिसोमलोकेमहीयते१७ततःस्वर्गात्प
रिभ्रष्टोजंबुद्वीपपतिर्भवेत् गुणवान्रूपसंपन्नोविद्वान्सुप्रियवाक्यवान्१८ भुक्त्वातुविपुलान्भोगांस्तत्तीर्थंलभते
पुनः अधःशिरास्तुयोभूत्वाधूम्रपानविधानकृत्१९ शतंवर्षसहस्राणिस्वर्गलोकेमहीयते भुक्त्वातुविपुलान्भोगां
स्तत्तीर्थफलमश्नुते२० यामुनेचोत्तरेकूलेप्रयागस्यतुदक्षिणे ऋणप्रमोचनंनामतत्तीर्थंपरमंस्मृतं२१ एकरात्रोषितः 8
स्नात्वाऋणैःसर्वैःप्रमुच्यते सूर्यलोकमवाप्नोतिअनृणश्चसदाभवेत्२२ इतिश्रीम० प्रयाग० पंचमः५॥ युधिष्ठिर
उवाच एतच्छ्रुत्वाप्रयागस्ययत्त्वयापरिकीर्तितं विशुद्धहृदयंजातंप्रयागस्यतुकीर्तनात्१ अनाशकफलंब्रूहिभग
वन्नत्रकीदृशं कं चलोकमवाप्नोतिविमुक्तःसर्वपातकैः२ मार्कंडेयउवाच शृणुराजन्प्रयागेतुअनाशकफलंमहत्
प्राप्नोतिपुरुषोधीमान्श्रद्दधानोजितेंद्रियः३ यावंतोदिविवैलोकास्तेषुसर्वेषुवैचिरं भुक्त्वानानाविधान्भोगान् ततःश्व
द्वीपपतिर्भवेत्४ सप्तद्वीपाधिपत्यंतुप्राप्यरत्नधनैर्युतः पूर्ववासनयायुक्तस्तीर्थराजनिषेवकः५ तत्रैवनिधनंप्राप्यवा राम:
सुदेवपरायणः वैकुंठमेवप्राप्नोतिसन्निधिंप्राप्यवैहरेः६ पुनरावृत्तिरहितस्त्वनाशकफलंमहत् एवंजानीहिसुमहत्तीर्थं ८

राजंप्रतिध्रुवं ७ अहीनांगोह्यरोगश्च पंचेंद्रियसमन्वितः अश्वमेधफलंतस्यगच्छतस्तुपदेपदे ८ कुलानितारयेद्राज
न्दशपूर्वान्दशापरान् मुच्यतेसर्वपापेभ्योगच्छेच्चपरमंपदं ९ युधिष्ठिरउवाच भाग्यंमहन्मेभवतोमुखाद्यच्छृणो
मितीर्थेशकथांविचित्रां पृच्छामिकिंचित्करुणाकरंत्वांभूयोपिशुश्रूषद्वचनामृतेच्छुः १० प्रयागगामनेनैवाऽश्वमेधफ
लमीरितं तत्कथंस्वल्पकार्येपिस्यात्पुण्यंतादृशंविभो मार्कंडेयउवाच ११ शृणुराजन्महागुह्यंसर्वपापप्रणाशनं प्र
यागेमासमात्रंतुयःस्नायान्नियतेंद्रियः १२ मुच्यतेसर्वपापेभ्योयथादृष्टःस्वयंभुवा शुचिस्तुप्रयतोभूत्वाहिंसकःश्रद्ध
यान्वितः १३ निराशीवाहविष्याशीभूमिशायीहरौरतः सगच्छेत्परमंस्थानंयत्रगत्वानशोचति १४ विश्रंभघातकोय
स्तुप्रयागंप्राप्यपापकृत् भिक्षाशीचत्रिषवणंगंगास्नानपरायणः १५ त्रिभिर्मासैःप्रमुच्येतब्राह्मणानामनुग्रहात् अ
ज्ञानादपियस्येहतीर्थयात्रादिकंभवेत् १६ सर्वकामसमृद्धस्तुस्वर्गलोकेमहीयते स्थानंचलभतेनित्यंधनधान्यसमाकु
लं १७ एवंज्ञानेनसंपूर्णःसदाभवतिभोगवान् तारिताःपितरस्तेननरकात्प्रपितामहाः १८ धर्मानुसारीतत्त्वज्ञपृच्छतस्ते
पुनःपुनः गुह्यंवैप्रोच्यतेसर्वंत्वत्प्रीत्यर्थंमयाधुना १९ शृणुराजन् महाप्राज्ञयदुक्तंपद्मयोनिना ऋषीणांसन्निधौपूर्वक
थ्यमानंमयाश्रुतं २० पंचयोजनविस्तीर्णंप्रयागस्यतुमंडलं प्रविष्टमात्रेतद्भूमावश्वमेधःपदेपदे २१ अतीतानान्पुरुषा
न्सप्तश्चापमादिचतुर्दश नरस्तारयतेपूर्वान्यस्तुप्राणान्परित्यजेत् २२ एवंज्ञात्वातुराजेंद्रसदाश्रद्धापरोभवेत् अश्रद्ध

धानः पुरुषः पापोपहतचेतनः २३ न प्राप्नोति परं स्थानं प्रयागं देवरक्षितं युधिष्ठिर उवाच स्नेहाद्वा द्रव्यलोभाद्वा यो
वा कामवशंगतः २४ कथं यात्राफलं तेषां तीर्थस्यापि फलं कथं विक्रेतुः सर्ववस्तूनां कार्याकार्यमजानतः २५ प्रयागे
का गतिस्तस्य चैन ब्रूहि महामुने मार्कंडेय उवाच अनुबंधेन केनापि प्रयागं योधिगच्छति २६ तूर्यांशं सोपि लभते या
त्रायामानवः फलं कृत्वा पापानि बहुशो विकर्मस्थो जितेंद्रियः २७ प्रयागं प्रविशन्नेव निष्पापो जायते क्षणात् अत्रैवो
दाहरंतीममितिहासं पुरातनं २८ पश्चिमस्योदधेः कूले रत्नपाल इति स्मृतः वणिक् बहुधनः सौम्यो द्रव्योपायविशारदः
२९ सोयान्त्रिकेण विधिना क्रयविक्रयकारकः रत्नानि नानाद्वीपेभ्यो समानीय महामतिः ३० संचयं परमं चक्रे नानोपायै
र्विचक्षणः वस्त्राणि धनरत्नानि गृहे यावंति तस्य हि ३१ सुमेरावपि तावंति भविष्यंति न वेति वै दृष्ट्वा संदृश्यते लोकोनि ७
श्चयं नाधिगच्छति ३२ ज्ञातीनामाश्रयः सोति धर्मात्मा सयतेंद्रियः महादानानि यावंति स चकार महामतिः ३३ वाग्मी दा
ता यशस्वी च साधूनामाश्रयप्रदः ईदृशस्यापि तस्यैव पुत्रचिंतापरोऽभवत् ३४ विषयाणां सुखं नैव जायते गृहमेधजं
न जायते तस्य निद्रा व्याकुलस्य कदाचन ३५ अथ तस्य गृहे विप्रो विश्रांतः पथिकोऽगमत् पतित्वा पादयोस्तस्य पूजयि
त्वा विनीतवत् ३६ पप्रच्छ दुःखसंतप्तः स्वप्रजायाश्च कारणं निर्वेदवादिनं वैश्यं दुःखितो द्विजसत्तमः ३७ कृपया परया
विष्टश्चिंतयित्वा वचोऽब्रवीत् आदानाय प्रदानाय ऋणसम्बन्धमाश्रितैः ३८ अन्येष्वापि हि संबंधो जायते वा सुतैरा।

पि दातव्यंवागृहीतव्यंननवास्तीहकस्यचित् ३९ केननेजायतांपुत्रःसंबंधोनहिदृश्यते किमर्थंनप्यसेमोहान्
कस्माच्चिंताप्रपद्यसे ४० अहोकष्टंजनोनूनंकस्यचिन्माययापुनःमुह्यतेव्यर्थमेवेहक्लिश्यतेबहुधाभृशं ४१ कःपि
ताकस्यवाभ्राताकस्यवाकःसुतोभवेत् अनादावत्रसंसारेभ्राम्यमाणःस्वकर्मभिः ४२ कःसमर्थोभगवतोमायांतां
परमोहिनींतर्तुंयःप्रभवेत्तीव्रांवलादेवविशेषतः ४३ तस्मैनमोभगवतेवासुदेवायवेधसे यस्यप्रसादात्संसारंतरंति
सुखेनोनराः ४४ अहोवैश्यकुलश्रेष्ठशृणुमेपरमंवचः प्रयागंव्रजधर्मात्मन् यदिपुत्रफलेस्पृहा ४५ यस्यप्रसादात्स
फलाःकामाःसिध्यंतिदेहिनांमाघःसंप्रतिनोदूरेवृश्चिकस्थोदिवाकरः ४६ मासंप्रयागेयःस्नातिनसमोसोप्यदूरतःकामनाः।
किंपुनस्तस्यसिध्यंतीतिविचारणा ४७ पिपासुस्तत्रचाहंचत्वमप्यागच्छसांप्रतं अवश्यंभवितापुत्रःप्रसादाज्जग
दीशितुः ४८ इत्युक्तोरत्नपालोसौप्रणिपत्यपुनःपुनः तर्हिमांनयसाकंनेद्विजश्रेष्ठोद्धरत्वमां ४९ ततःसवैश्योराज
षेस्वानुयात्रांविधायच प्रातिष्ठत्प्रयागायशुभलग्नेशुभेदिने ५० सार्थवाहःस्वयमभूद्दीनानामनुपालकः समासे
नतुसार्द्धंनप्रयागमगमन्नृप ५१ तेनैवद्विजमुख्येनकारितोविधिरुत्तमः यात्रायाःस्नानदानादेःपुत्रकामस्यसुव्रत
५२ अथतंकारयामाससमाघस्नानविधिंपुनः तस्यचानुग्रहार्थायकेवलंसद्विजोत्तमः ५३ अथस्नात्वासुसंकल्प्यमाघे

संपूज्यदेवताः ब्राह्मणान्भोजयामासदक्षिणाभिरतोषयत् ५४ द्विजाज्ञांततोगृह्यस्वेष्टदेशंजगामह तीर्थराजप्र।
भावेनतस्यपत्नीशुचिव्रता ५५ ज्येष्ठाद्धारवैगर्भंतोषयामासतंपतिं सागर्भोववृधेनित्यंशुक्लपक्षेयथाशशी ५६ ततः
कालेनसंजातःपुत्रस्तस्यसुखावहः रत्नपालोतिसंतुष्टोद्विजानाहूयबुद्धिमान् ५७ सुव्रतान्वेदविदुषःकर्मकांडविदोबु
धःजातकंकारयामासगोरत्नधनसंचयान् ५८ दत्वातेषामाशिषश्चगृहीत्वाहृष्टमानसः सूतमागधवंदिभ्योयथार्हंस
दद्विभुः ५९ दीनानाथांश्चपंग्वादीनन्नाद्यैःसमतोषयत् एवमन्यानिकर्माणिनामादीनिमुदायुतः ६० कारयित्वावि
वाहंचतस्यपुत्रस्यसोकरोत् तस्यस्नेहःप्रतिदिनंववृधेपुत्रदर्शनात् ६१ पुत्रालिंगनतोनंतआनंदःसमवर्धत स्वर्गा
नंदादपिपरोक्ष्यधनस्यधनागमात् ६२ एवंगृहेप्रसक्तस्यधनधान्ययुतस्यच धनदस्येववैश्यस्यरत्नपालस्यतस्यच।
६३ सुखेष्वभिरतस्यास्यजरठस्याविजानतः अविज्ञातगतिःस्वैरंसकालःप्रत्युपस्थितः ६४ पुत्रस्तंदापयामासदशदा
नानिकृत्स्नशः धर्मार्थविनयोपेतःसत्कर्मनिरतःशुचिः ६५ रूपवान्गुणवान्वाग्मीसततंप्रियभाषणः बांधवानांप्रि
योनित्यंवकादानागुणप्रियः ६६ पितृभक्तिसुसंपन्नःपितृमेधंचकारह ददौधनंद्विजातिभ्योयच्चयावत्पितुःप्रियं ६७
प्रयागमविमुक्तंचगयांगत्वापितृप्रियः पितृश्राद्धानिसर्वाणिचकारविधिवत्तदा ६८ देवालयानितत्रापिपूजनार्थंधनं
ददौ सुप्रवृत्तस्तथैवंससदाधर्मपरायणः ६९ वसुपालोवैश्यपुत्रोविषयान्बुभुजेसुखी गायकैर्वादकैःसार्द्धंस्वयंगा

पनतत्परः ७० तादृशैरेवसखिभिः क्रीडतेहर्निशंतया वनिताभिःसमंक्रीडन्संगत्यासततथाविधैः ७१ तत्परःसततंस्रग्वी
दिव्यचंदनचर्चितः वीणावादननृत्यस्तनस्त्वानंदनिर्वृतः ७२ तदेवबहुमेनेसस्वधर्माद्विररामह वेश्यारतोभवत्ता
सांसंसर्गात्पापनयोभवेत् ७३ द्यूतक्रीडारतोनित्यंसत्संगरहितोल्पधीः एवंबहुविधंकालंसदुर्व्यसनतत्परः ७४ तत्र
रूपवतीनामवेश्यासीदतिसुंदरी तस्यामासक्तहृदयःसर्वैरत्नैरतोषयत् ७५ धनंतयासमंपित्र्यंव्ययितंबहुलंस्वकंसापिरू
पवतीतस्मिन्विषक्तहृदयाभवत् ७६ दंपत्योरिवतत्प्रीतिः परस्परमवर्धत ततःकदाचिन्निर्विण्णश्चिंताशोकपरायणः
७७ निर्धनोजनविद्विष्टोयैर्निषिद्धोभवत्पुरा लज्जमानस्तुतान्सर्वान्दृष्ट्वासौदैन्यमागतः ७८ रूपवत्यपितंदृष्ट्वाचिंता
शोकसमन्विता समाश्वासयद्व्यग्राकांतचिंतांत्यजेतिच ७९ अस्तियन्मद्गृहेकिंचित्धनंपश्चात्त्वयार्पितं स्वामीतस्य
भवानेवरसाकृच्छ्रास्मिकेवलं ८० मांविद्धिसततंकांतत्वद्दासींत्वत्परायणां क्रयविक्रययोरर्थंनवपद्यदर्शेप्सितं ॥
८१ गृहीष्वमद्गृहान्नूनंकिमर्थंदैन्यमागतः इत्यथोमुखमासीन माश्वास्यभृशदुःखितं ८२ वस्त्राशनादितद्गेहेप्रेषया
माससादरं धनंबहुविधंदत्वाक्रयविक्रयकारणात् ८३ लज्जामपास्यतंचापियथापूर्वमकारयत् सपुनर्वर्धयामा
सधनव्यय पराङ्मुखः ८४ भोगान्भुंजन्रूपवत्यारेमेबहुदिनंनृप ततःस्ववयसंदृष्ट्वास्वात्मानंरूपवत्यपि ८५
तीर्थकृतमतिश्चापिवसुपालंततोऽब्रवीत् क्रीडितंबहुकालंतेगतंचापिनवंवयः ८६ कृतंबहुविधंपापंनिष्कृतिस्त

प्र.मा स्यचिंत्यतां अत्रत्यावहवोलोकाः स्नानार्थंगंतुमुद्यताः ८७ प्रयागंतीर्थराजंवैसद्यःपातकनाशनं गमिष्यामोवयंचापि
११ क्रियतामर्थसाधनं ८८ तत्रापियदिचेच्छुद्धायुज्यंतांशकटानिच वाणिज्यमपितत्रैवभविष्यतिनसंशयः ८९ इति
निश्चित्यततस्तौनानाभांडंप्रगृह्यच प्रयागंजग्मतुर्हर्षात्स्वजनैःसहितौमिथः ९० शकटाटोपकरणांसहैवविक्रया
र्थकं प्रयागंप्राप्यमासंतुगंगायमुनसंगमे ९१ सस्नतुर्विधिनाचापिउद्यापनसमन्वितं दानानिचक्रतुर्भक्त्याब्राह्म
णान्स्वस्तिवाच्यच ९२ पुनस्तौस्वपुरंयातौकिंचित्कालसमासतुः ततःप्रवयसौभूत्वाकालेननिधनंगतौ ९३ प्रयाग
स्नानमाहात्म्यान्निष्पापौस्वर्गमीयतुः विमानवरमारुह्यदिव्यरत्नविभूषितौ ९४ कांचनापीडशोभाढ्यौनानाभोगस
मन्वितौ विजह्रतुर्वहुदिनंगंधर्वाप्सरसांगणैः ९५ देवोद्यानेषुरम्येषुकमनीयतराकृती ततस्तुपुण्यभोगांतेवैश्योभू
मितलेगतः ९६ कोशलाधिपतेःपुत्रोवसुदानइतिश्रुतः रूपवत्यपितत्कान्ताजनकानाकुलेजनिः ९७ तयोर्विवाहः
संवृत्तोयाश्चासंस्तत्रयोषितः सर्वास्ताअपितेनैवभुक्त्वास्वर्गंततोभुवि ९८ राजकन्यापुनर्भूत्वापातिव्रत्यगुणान्विताः
तमेवाविंदतपतिरेमिरेशुभलक्षणाः ९९ वसुदानोपिसर्वाभिःक्रीडंस्ताभिर्मुदान्वितः रेमेरूपवतीप्राप्यसमुद्रांतभु
वःपतिः १०० ब्राह्मणार्पितलक्ष्मीकोधर्मात्मासत्यसंगरः देवब्राह्मणगोप्ताचद्विजशीतनिवारकः १०१ रूपवत्यपिसा रामः
ज्येष्ठाश्रेष्ठातस्यप्रियाभवत् दानपुण्यपरनाशश्वद्भर्तुश्छन्दानुवर्तिनी २ अग्नियोनांद्विजातीनांसदापूजनतत्परा दे ११

वार्चेनपरानित्यंगवास्तुश्रूषयान्विता ३ पुत्रानसासुषुवेपंचकन्यास्तिस्रोतिरूपिणीः कृत्वादेवालयांस्तत्रनित्य
पूजार्थमादरात् ४ ददौग्रामान्समृद्धांस्तुसुशीलाव्रतकारिणी एवंसराजाधर्मात्माभुक्त्वाभोगान्मनोरमान् ५ बभू
वपरमप्रीतःसदाब्राह्मणमध्यगः कदाचिदुपविष्टःसोस्त्रीणांमध्यगतोपिसन् ६ नर्मक्रीडापरस्ताभिरादर्शेदृष्टवानि
जं आत्मानंजरसायुक्तमवुध्यतसवुद्धिमान् ७ पुत्रांश्चसमहेष्वासान्गुणिनोलोकरंजकान् प्रजानुरागमुद्वीक्ष्यतेषु
सर्वप्रियस्तहः ८ पत्नीभिःसहसंमंत्र्यचानुमान्यपुरोधसं प्रतिपाद्यपितृराज्यंपुत्रायसमनोदधे ९ सभायामुपविष्टस्य
कदाचित्तस्यधीमतःमुनयोभ्यागमन्द्रष्टुंराजर्षिंतंमहाद्युतिं १० तान्दृष्ट्वासहसोत्थायराजर्षिःससभासदः ननामशि
रसातूर्णंस्वागतेनाभ्यनंदयत् ११ पूजयामासतांस्तान्वैक्लृप्तासनपरिग्रहान् ततोनानाकथाश्चक्रुः पूर्वेषांतेमहीक्षिता
म् १२ प्रयागादीनितीर्थानिकीर्तयंतःशुचिव्रताः राजानंतोषयामासुःस्मारयंतोस्ययत्कृतं १३ ततःपूर्वकृतंपत्तुतीर्थराज
ससेवनं तदेवमनसाध्यात्वामुनीशान् पर्यपृच्छत १४ धर्मेणशाशितंराज्यंतोषिताःपितरोग्नयः यजनैःश्राद्धदानैश्चसं
तानेनमखैरपि १५ प्रजाश्चपालिताःसम्यक्सोयंवामदनुग्रहः दातुमिच्छामिपुत्रायराज्यंनिष्कंटकंत्विदं १६ गजवाजिर
थोपेतंप्रभूतधनधान्यवत् वलेनमहतायुक्तंमंत्रिणासंमतेनच १७ भवंतोप्यनुमोदध्वमस्मिन्नर्थेसमाहिताः ब्राह्मणैः
सहितोराजायत्करोतितदाज्ञया १८ सर्वसफलतांयातिमहत्कीर्तिंचविंदति एवमुक्तास्तुमुनयोराजानंविनयान्वितं १९

प्रन्यत्तुईष्टंमनसोमहाराजविधेहितत् अस्माभिर्यच्चवक्तव्यंस्वयमेवतथाकृतं २० यच्चयावच्चकर्तव्यमवशिष्टंच
यत्तव चिंतितंमनसायत्नेप्रयागगमनंप्रति २१ राज्यंपुत्रायदत्वाचप्रयागंगच्छसत्वरं समयस्तीर्थयात्रायाःस्वस्तिते
स्तुसमाहितं २२ सिध्यतांसाध्ययामोवैवयंचापिधरापते इत्युक्त्वामुनयःसर्वेजग्मुश्चापिप्रयागतं २३ अभिषिंच्यसुतं
राज्येराजासांतःपुरस्ततः प्रययौहर्षसंपन्नोनिरहंकृतिरात्मवान् २४ निर्मलोनिस्पृहःशांतोव्रतैःकृच्छ्रादिभिर्युतःनि
त्यंत्रिषवणस्नायीतपःशुद्धकलेवरः २५ कालेननिधनंप्राप्तोराज्ञस्यस्यानुययुःपतिं समानव्रतचारिण्यःपतिव्रतपरा
यणाः २६ प्रजापतिपतिर्ब्रह्माविमानमधिरोप्यतं निनायस्वपदंराजन्नानाभोगसमन्वितं २७ तेनैवसार्द्धंतत्पत्न्योदि
व्यादिव्यंपदंगताः एवंप्रभावःकथितःप्रयागस्यमहाद्भुतः २८ प्रसंगतोपियंप्राप्यदुर्लभागतिराप्यते एतत्तेकथितं
गुह्यमाख्यानंराजसत्तम ३९ इतिश्रीम॰ प्रयाग॰ षष्ठोध्यायः ६॥ युधिष्ठिरउवाच अद्यमेसफलंजन्मअद्यमेतारितंकु
लंप्रीतोस्म्यनुगृहीतोस्मिदर्शनात्तेतपोधन १ अद्यमुक्तोस्मिसर्वस्मात्किल्विषात्त्वदनुग्रहात् शुद्धंमेमानसंजातंदर्शना
देवतेमुने २ शुद्धचित्तोस्म्यहंब्रह्मन्जातामेविमलामतिः श्रीमार्कंडेयउवाचदिष्ट्यातेविमलाबुद्धिर्दिष्ट्याचित्तंस्थिरंत
व ३ दिष्ट्यात्वंनिर्मलोजातः श्रवणाद्देवसुव्रत पृच्छस्वयमस्ववक्तव्यंकिमन्यच्छ्रोतुमिच्छसि ४ युधिष्ठिरउवाच यमुना
स्नानजंपुण्यंकिंवाफलमुदीरितं तन्मेवदसमासेनयद्यनुग्राह्यतामयि ५ मार्कंडेयउवाच तपनस्यसुतादेवीत्रिषुलोकेषु

विष्णुना समागतामहाभागयमुनायत्रनिम्नगासंभूयगंगयासार्द्धंसहैवाब्धिमुपागता स्मरणात्कीर्त्तनाद्वापिसर्वपाप
क्षयावहा तत्रस्नात्वाचपीत्वाचनिष्पापाजायतेक्षणात् गंगयासहसंगम्यसरस्वत्यातथाशुभा ८ तेनवेणीतिविख्याता
त्रैलोक्येपरमोत्तमा पापेंधनदवज्वालापापद्रुमकुठारिका ९ साराजेन्द्रदर्शनादेवसर्वपापौघहारिणी स्वर्गद्वारस्यनिःश्रे
णिर्यावेणीप्रविराजते १० मोक्षंलक्ष्मींहिरण्यञ्चश्रियंवेणीददातिसा तत्रस्नात्वाचपीत्वाचपुनात्यासप्तमंकुलं ११ प्राणां
स्त्यजतियस्तत्रसयातिपरमांगतिं तत्रसूर्यसुतायांयःस्नात्वान्यत्रमृतोयदि १२ सूर्यलोकमवाप्नोतिदिव्यभोगसमन्वि
तः प्राणत्यागीनरस्तत्रकैवल्यपदलाभभूः १३ अग्नितीर्थमितिख्यातंयमुनादक्षिणतटे तत्रस्नात्वानरोयातिवह्नि
लोकंनसंशयः १४ पश्चिमेधर्मराजस्यतीर्थंत्वनरकंस्मृतं तत्रस्नात्वादिवंयांतियमृतास्तेतुमुक्तकाः १५ वीरतीर्थमिति
ख्यातंपश्चिमेतस्यभूपते तत्रस्नात्वावीरलोकंप्राप्नोतिविजयःपुमान् १६ विजयंप्राप्नुयाद्विट्सुशौर्यधैर्ययुतःसदायमु
नादक्षिणेश्रीमान्विष्णुर्माधवनामकः १७ तदधस्तात्तुतीर्थंतत्रस्नात्वाविधानतः पूजयेन्माधवंभक्त्याविष्णुलोकंप्रपद्य
ते १८ प्राणांस्त्यजतिचेत्तत्रजायतेह्यपुनर्भवः तस्मात्तुपूर्वदिग्भागेसोमतीर्थमितिस्मृतं १९ सोमेश्वरंसमभ्यर्च्यसोमलोके
महीयते तत्रसोमस्तपस्तेपेसहस्रंपरिवत्सरान् २० संस्थाप्यलिंगंश्रीशंभोःशांतयेराजयक्ष्मणः यथापूर्वंनिजंदेहंप्रा
प्तःशंभोरनुग्रहात् २१ तत्रस्नात्वानुरोगेणमुक्तोभवतिनान्यथा हित्वाकलेवरंतत्रशिवलोकंसगच्छति २२ कुबेरतीर्थं

तत्पूर्वे तत्र स्नात्वा दिवं व्रजेत् पश्चिमे सोमतीर्थस्य सूर्यतीर्थमिति स्मृतं २३ तत्र स्नात्वा नरो याति सूर्यलोकं न संशयः
तत्पश्चिमे वारुणं तु तीर्थं परमपावनं २४ तत्र स्नात्वा नरो राजन् सर्वपापैः प्रमुच्यते तत्पश्चिमे वायुतीर्थं त्रिषु लोके
षु विश्रुतं २५ तत्र स्नात्वा वायुपीडा न भवेन्मनुजस्य हि उत्तरे यमुनायास्तु गवां तीर्थं परं स्मृतं २६ तत्र स्नात्वा नरो
याति गोलोकं नात्र संशयः तत्पूर्वभागे त्वदितितीर्थं लोके प्रविश्रुतं २७ आदित्या यत्र वै तप्तं तपः परमपावनं पुत्रा
णां परमैश्वर्यं पुनर्यत्राप सा पुरा २८ यत्र ते द्वादशादित्या देवा इंद्रपुरोगमाः उपासंते सदा देवं प्रजापतिमकल्मषाः
२९ तत्र स्नात्वा दिवं याति श्रियं मर्त्योभिगच्छति तीर्थं निरंजनं तत्र यत्र देवाः सवासवाः ३० उपासंतेत्र संध्यायां नित्य
कालं युधिष्ठिर सेवंते मुनयस्तत्र पुण्यतीर्थं सदैव हि ३१ भरद्वाजादयः संति यत्र तत्परमं पदं वेणीमाधवनाम्ना च यत्र
विष्णुः सनातनः ३२ तिष्ठत्यत्र ददन् कामान् दर्शनादघहो नृणां लोकानुग्रहमात्रेण विरूपो विश्वरूपभाक् ३३ यत्र सावि
मला नाम्ना लक्ष्मीः परमपावनी भक्तानामिष्टदा नित्यं दर्शनात्सिद्धिदा नृणां ३४ ॥ तीर्थराजत्वमेतस्य प्रयागस्य यतः स्मृ
तं तत्कारणं त्रयो देवा ब्रह्मविष्णुमहेश्वराः ३५ अधिष्ठितास्ततो राजन् प्रयागं विद्धि पापहृत् तीर्थानां परमं तीर्थं सर्वतीर्थाश्रया
श्रये ३६ तीर्थराजं समाश्रित्य शुद्धत्वं यांति सर्वशः सर्वतीर्थेषु यत्पापं पापिनां यत्तु संस्थितं ३७ आवर्षं निष्कृतिस्तस्य मा रामः
घस्नानात्प्रजायते श्रद्दधानस्ततो गत्वा राजन् स्नानं समाचर ३८ यानि चान्यानि सत्यत्र तीर्थानि तु बहून्यपि एकस्मि ॥१३

13

त्वपिचैतेषांस्नात्वावैत्रिदिवंव्रजेत् ३९ प्राणांस्तत्रपरित्यज्यनभवेज्जन्मभाक्नरः गंगाचयमुनाचैवउभेनस्यफ
लेस्मृते४० गुप्तयातुसरस्वत्यामीलितेजीवभूतयाब्रह्मपुत्र्याऋषीणांतुतपसाफलभूतया४१ अतएवत्रिलोक
स्थैःप्रयागःसेव्यतेसदा गंगात्रिपथगायत्रयमुनाचसरस्वती४२ यत्रसर्वेपितेदेवावेदाश्चऋषिभिःसह तिष्ठंतिसंश्रि
तानित्यंतन्माहात्म्यंतुकोर्हति४३ वक्तुंवर्षसहस्रेणशेषेणापिनशक्यते ब्रह्मणापिकृतोयत्रअश्वमेधामहामखाः।
४४ नस्यकुंडत्रयंतत्रवेदीमध्येप्रतिष्ठितं प्रतिष्ठानमाहवनीयःप्रयागंगार्हपत्यकः४५ अलकापुरमेवैतद्दक्षिणा
ग्निःस्मृतोबुधैः तेषांमध्येसमायातागंगाचयमुनानदी४६ वेदीमध्येनवेदीशःदिव्यरूपधरेनघे यावदत्रास्थितंयत्र
प्रत्येकमघहारिनन्४७ सर्वेषांसंस्थितिस्तत्रवहुनाकथनेनकिम् यस्त्वेतत्कृत्स्नमुत्थायपठतेवाशृणोतियः४८ मु
च्यतेसर्वपापेभ्यःस्वर्गलोकंसगच्छति४९ इतिश्रीम० प्रयागमा० सप्तमोध्यायः ७ युधिष्ठिरउवाच श्रुतंमेब्रह्मणाप्रो
क्तंपुराणेब्रह्मसंभवे तीर्थानांतुसहस्राणिप्रयुतान्यर्बुदानिच१ सर्वाण्येवसुपुण्यानिपापहारीणिसर्वशः पृथिव्यांनै
मिषंपुण्यंमांतरिक्षंचपुष्करं२ कुरुक्षेत्रंहरिद्वारंद्वारकांमथुरांतथा अयोध्यादीनिपुण्यानिपरित्यज्यद्विजोत्तम ३ क
थमेकंप्रयागंत्वमाधिक्येनप्रशंससि अश्रद्धेयमिवाभातिसर्वेभ्योप्यधिकंवदन्४ गतिस्तत्रैवपरमाभोगाश्चैवहि
कामिताः अस्यायासेमहत्पुण्यमयंमेसंशयोमहान्५ त्वंचापिचिरजीवीसनवहुदृष्टावहुश्रुतः वेदतत्वार्थविच्चै

वपुराणानांप्रदर्शकः ६ इमंमेसंशयंछिंधिमूलप्रामाण्यदर्शनात् मार्कंडेयउवाच माकुरुष्वात्रसंदेहमश्रद्धांत्यजभू

पते ७ अश्रद्दधानेतीर्थस्यफलंसम्यक्नजायते अस्मदुक्तेपिचाश्रद्धा नवराजन्महामते ८ श्रुतिमूलंमयाप्रोक्तं
श्रुतिमत्रनिशामय सितासितेसरिच्छ्रेष्ठसंगतेयत्रवैसदा ९ तत्राप्लुतादिवंयांतितनुत्यागेऽपवर्गतांस्वर्गमार्ग
स्यसोपानंमोक्षनिःश्रेणिभूमिका १० यत्रवेणीसुखश्रेणीकामानांसदनंमहत् कस्तत्रापिसंदेहोधर्मक्षेत्रेसुखास्पदे
११ द्रष्टारःसर्ववेदानांपुराणार्थप्रदर्शकाः देवर्षयोनारदाद्यायोगिनःसनकादयः १२ येसिद्धाःकपिलाद्याश्चकश्यपाद्या
महर्षयःब्रह्मर्षयोमलास्तेचप्रयागमुपसेवते १३ जामदग्न्योभरद्वाजोजैगीषव्योथलोमशः पराशरश्चमैत्रेयःकृष्ण
द्वैपायनस्त्रितः १४ कवठोऋष्यशृंगश्चरैभ्यस्त्रयारुणिः शुकःजंबूमार्गनिवासायेनैमिषारण्यवासिनः १५ सैन्धवारण्य
वासायेदंडकारण्यवासिनः कलापग्रामवासाश्चयेवाप्यन्येमहर्षयः १६ गत्वाप्रयागंसेवंतेतस्यमाहात्म्यवर्णने कःश
क्तस्तीर्थराजस्यशंसितुःकोनुजायते १७ चेत्कीकसंतत्रपतेन्मर्त्यस्तस्यसर्वापुनः निःसृत्यनरकान्घोरात्स्वर्गंप्राप्नो
तिशाश्वतं १८ किंपुनःक्लिन्नसर्वांगोवेणीसलिलमज्जनात् अत्रार्थेमत्पुरावृत्तंतन्निशामयभूपते १९ विंध्याटव्यांपुरा
कश्चित् व्याधःपक्षिमृगांतकः लुंठकोमार्गमावृत्यब्रह्मघ्नोदुष्टचेष्टितः २० पथिकानांतुसंचारंज्ञात्वातिष्ठन्निलीयसः अर्का
स्यात्त्वंनिपत्यैवमात्रामादायगच्छति २१ इत्थंतस्करवृत्त्यैवघातयन्बहुधाजनान् निघ्नन्नानाविधान्जीवान्पापक

14

कर्मातिनिष्ठुरः २२ कदाचिद्धनुरादायसकांडमृगयारतः महारण्यंसंप्रविश्यमृगान्निघ्नन्श्रमातुरः २३ व्याघ्रेणपा
तितोदैवान्मृतोमार्गेसपापकृत् यमदूतैस्तदागत्यावध्वानीतोयमक्षयं २४ पीड्यमानोपिबहुधाकशाभिर्यमकिंकरैः
आक्रंदन्प्रापितोघोरनरकेयमशासनात् २५ पाननाभिःसुबह्वीभिः शास्यमानःसुदारुणैःरौरवादिषुघोरेषुक्रमशः
पातितोभृशं २६ कुंभीपाकेनतप्तैलेकालसूत्रेदुरासदे सूचीमुखेचासिपत्रेशाल्मलिक्रकचादिषु २७ अवटेरुध्यमानोहि
पूयशोणितकर्दमे एवंनानाविधायाम्यायातनाबहुवत्सरं २८ वर्तितेनरकेभुंजन्पच्यतेस्वेनकर्मणा मारितोयत्रसिंहे
नवनेव्याधःपुराह्यभूत् अथतेनपथायाताःकेचित्कार्पटिकोत्तमाः २९ पल्लीसमीपमागत्यपक्कणानांचपालिकाःस
मतिक्रम्यविश्रांतानातिदूरंविशश्रमुः ३० विश्वासात्तत्रनिक्षिप्यतांमात्रामलसाङ्कुशं कश्चित्कार्पटिकश्रेष्ठोमात्रा
मासुच्यवंधनात् ३१ मूषकैःकिंनिकृंतनंस्यात्सुप्तोयत्रास्थितोनिशि द्रष्टव्यमितिसंचिंत्यसर्वंह्यत्रपरीक्ष्यच पुनस्तथा
विधंकृत्वाविशश्रामक्षणंभुवि तावन्निद्रान्वितोनेत्रेमुकुलीकृत्यसंस्थितः ३३ तत्रकश्चिन्मृगव्याधोवृक्षमारुह्यति
ष्ठति तेनदृष्टःसंपुटस्तस्यपित्रोस्तस्यास्थिसंभृतः ३४ द्रव्यस्येतिचविज्ञायावरुह्यशनकैस्तरोःमात्रामुन्मुच्यशनकैर्गृही
त्वासंपुटंततः ३५ अपयातस्त्वरण्यानित्वत्रातुघाटितवान्ष्टश्यक् विधानंचष्टयकृत्यदृष्ट्वान्वेष्टनादिकं ३६ दृष्ट्वास्थी
निविनिःश्वस्याक्षिप्त्वाचगृहमागतःसंपुटंपट्टचीरंचगृहीत्वादुःखसंयुतः ३७ अहोमयाहृतंचौर्यात् संपुटंतत्रचापि

हि मंदभाग्यातुलब्धानि तत्रास्थीनिविशेषतः ३८ दैवमेवपरंमन्येधिक्पौरुषमनर्थकं इत्युक्त्वाखेदमागत्यवनमेव
प्रतस्थिवान् ३९ क्षणंसुप्तोस्थितस्यावत्सचकार्पटिकोत्तमः मात्रास्थुमोचनाहष्ट्वारहितांसंपुटेनतु ४० आक्रंदन्भूरिदुः
खेनरुरोदचपुनःपुनः आक्रंदनंतथादृष्ट्वान्यःकार्पटिकस्ततं ४१ पृष्टतोभ्यागतःकश्चित्सपृच्छामासयत्नतःकि
मर्थंरुद्यतेसाधोकेनतेपहृतंवद ४२ नीतंकिंवित्ताडितोवापीडाकाचितवांगके इतिपृष्टःसार्थकेनपांथेनपथिकस्त
तः ४३ सर्वंतत्कथयामासयथासंपुटकोगतः ममभाग्यातुपित्रोर्वाहृतःकेनापिसंपुटः ४४ कोकस्मानामहाभाग
किंकुर्यांकुत्रवाव्रजे कंयामिशरणंतातकुत्रवाहंगवेषये ४५ कउपायोत्रवैकार्योविचार्यैवदमेसखे एवंव्याकु
लचित्तंतंशोचंतंपथिकोब्रवीत् ४६ आगच्छतामयादृष्टःकश्चिद्व्याधोद्विजोत्तम अपाक्रांतःपथानेनत्वत्समीपे
तुसत्वरः ४७ अन्वेषयामोगत्वातुनदूरेसगतोभवेत् तर्कयेहंमहाभागसहयामोवयंद्विज ४८ इत्युक्तःपथिके
नासौगतोमार्गेणयेनच तेनैवजग्मुस्तेविप्राः शोधयंतोवनाद्वनं ४९ अथैकस्मिन्वनोद्देशेचीराणिददृशुःकिल त
त्रापूर्वंएवचास्थीनिददृशुःसुबहून्यपि ५०॥ चीरखंडानिचिह्नानिविदित्वास्वानितेतदा बहून्यस्थीनिदृष्ट्वाचसंशयं
प्रतिपेदिरे ५१ विज्ञानेनचनिश्चित्यस्वीयान्येवेतिपार्थकः पट्टखंडैस्तथोर्णाभिर्जगृहेतन्मतेनच ५२ विचिंत्यचीरखं
डेनबध्वातूर्णंसमीययुः वर्णयंतस्तस्यभाग्यंजहृषुःपथिकाःपरे ५३ ततःसमेत्यतेसर्वेयथागतमगुःशनैः कथ

यंतःकथावद्धोनानातीर्थाश्रयाःपृथक् ५४ ततःकतिपयाहोभिस्तीर्थराजंसमीपयुः अस्थीनिविक्षिप्यपूर्वेण्यांसत्तु
श्वविधिनाततः ५५ अस्थिप्रक्षेपमात्रेणततस्तस्मिनरोजले नरकेयेस्थिताःपूर्वंसर्वेतेत्रिदिवंययुः ५६ त्रिदि
वस्थाश्चपितरोब्रह्मलोकमुपागताः नरकेपच्यमानोयोव्याधउक्तोमयानृप ५७ सोम्नोप्रपात्यमानोपिहिमशी
तलमन्वभूत् क्रकचैःपीड्यमानोपिकायभेदंनयातिच ५८ छेदनंभेदनंचापिसपापीप्रापनक्वचित् दृष्ट्वात
न्महदाश्चर्यंयमदूतायमांतिकं ॥ ५९ ॥ गत्वाशशंसुस्तत्सर्वंयमोप्याश्चर्यमापयौ चित्रगुप्तंचपप्रच्छसुकृ
तंचास्यकिंभवेत् ६० यातनारहितःकस्माज्जातोयंपापजीवितः चित्रगुप्तोप्युवाचैनंसुकृतंनास्यवेद्म्यहं ६१ बाल्या
दारभ्यजीवानांघातनंकृतवानसौ हिंसितावहवोविप्रालुंठितावहवोजनाः ६२ धनंचापहृतंचौर्यात्पथिकानाम
हात्मनां धर्मवार्तानजानातिगोघ्नोयंनिरपत्रपः ६३ कस्मादस्यचजायंतेनरकाःशीतलाःसुखाः एतस्मिन्नंतरेब्र
ह्मासर्वेषांयःपितामहः ६४ विमानंप्रेषयामाससस्वगणैश्चसमन्वितं नेतुंस्वलोकंतंव्याधंशिक्षयित्वेतिचेतिच ६५ ग
त्वातेत्वरितंतत्रशासनंब्रह्मणोवद यमोप्युवाचतान्देवान्कथमेनंतुपापिनं ६६ स्वलोकंनेतुमव्यग्रमर्हथागत्य
सत्तमाः तमूचुर्ब्रह्मणस्तेपिकिंकराःशृणुमानद ६७ वेणीजलेस्यचास्थीनिपतितान्यभवन्प्रभो पूर्वंकृतानिपापानि
तत्क्षणात्विलयंययुः ६८ निष्पापोयंचसंजातःसत्यलोकंप्रयास्यति व्यापादितोयंव्याघ्रेणतस्यास्थीनिचवैततः ६९

पातितानिचतत्रैवकस्यचित्पथिकस्यहि व्याघ्रेणसंपुटास्थीनिनिक्षिप्तानिचसर्वशः ७० संपुटोवस्तुसंपूर्णमिति
वुद्ध्वापहृत्यच उत्पाट्यास्थीनिदृष्ट्वाचनिःश्वस्यचैवनिक्षिपेत् ७१ गवेषयंस्ततस्तानिसंप्राप्यपरिगृह्यच सहैतैः
सहितानदैवादूर्ध्वांनिक्षिप्तवान्द्विजः ७२ वेणीजलस्यसंस्पर्शात्सर्वथाक्षीण पातकः नेतव्योयंविभोःपार्श्वेभाग्य
वानितिनिश्चितं ७३ इत्युक्त्वातंसमारोप्यविमानेसूर्यसन्निभे सत्यलोकायनिन्युस्तेविधात्राज्ञापुरस्कृताः ७४ एवं
परमपापिष्ठोव्याधोप्यामिषभोजनः वेण्याप्लुतास्थिकःसद्यःक्षीणपापोदिवंगतः ७५ इतिश्रीम॰पुराणेप्रयागमाहा
त्म्येअष्टमोध्यायः ८ मार्कंडेयउवाच अन्यच्चशृणुराजर्षेयथादृष्टंयथाश्रुतं कृत्वाप्रमाणंशास्त्रंतुयुज्यतेयोगआत्म
नः १ क्लिश्यतेकेवलंतस्मान्नतत्फलमवाप्नुयात् जन्मांतरसहस्रेणयोगोलभ्येतवानवा २ दानानिदत्त्वाबहुशोब्राह्म
णेभ्योविधिक्रमात् कृच्छ्रचांद्रायणादीनिव्रतानिबहुशस्तथा ३ अटित्वासर्वतीर्थानिपुण्यान्यायतनानिचकृच्छ्रेण
लभ्यतेयच्चतल्लभ्यंतीर्थराजतः ४ स्नानमात्रेणराजेंद्रफलंत्रिदशदुर्लभं मकरस्थेगुरौमाघेमकरस्थेदिवाकरे ५ तत्फलं
समवाप्नोतिसद्यएवनरोत्तम अतिप्रशस्तोयोगोयंबहुपुण्यैरवाप्यते ६ अर्धोदयस्तथायोगस्तीर्थराजेसुदुर्लभः योगाधियो
गाद्युक्तायेपुराणज्ञैरनुत्तमाः ७ अनेकगुणसंकीर्णाःप्राप्यंतेपुण्यगौरवात् विचार्यैवंसुबहुशोदिविगायंतिदेवताः अमा
र्कश्रवणेपातेव्यतीपातेकुहूदिने माघेमासिगुरौसूर्येमकरस्थेमहाफलः अनेकपुण्यसंभारैरयंयोगोह्यवाप्यते ९ विशेषा

तीर्थराजेतु फलदः सद्यएवहित्रिदिवेऽनेनलब्धेतु किमस्माकंफलंभवेत् १० यत्पूर्वसंचितस्यापिहानिर्भवतिकेव
लं मनुष्यलोकेजन्मस्याद्यदिनस्तेनसत्वरं ११ प्रयागंप्राप्ययोगेस्मिन्स्नानमात्रेणसत्वरम् योगादिदुर्लभंयच्चयेन
स्यात्परमंपदं १२ इतिनित्यंहिशोचंतिदेवाःस्वर्गौकसोप्यलंतस्मात्त्वमपिभूपालश्रद्धयास्नानमाचर १३ प्रयागेह्यत्र
नसंदेसर्वकामकरंडके प्रधानेहेतुमाकासन् चतुर्वर्गैकसाधनं १४ यथासर्वेषुभूतेषुसर्वत्रैवचदृश्यते ब्राह्मणेभ्यः
परंनास्तिएवमाहपितामहः १५ तद्वत्प्रयागतीर्थात्तुतीर्थमन्यन्नविद्यते ब्रह्मणश्चैवसर्वेषामाधारःपरमाश्रयः १६ का
मानांपरमाधारःसर्वश्रेयःसमाप्यते यत्रतत्रमहाश्चित्रंकिंवापापस्यसंक्षये १७ सर्वेषांचैवभूतानांब्राह्मणाःश्रेयसां
वरःतथासर्वेषुतीर्थेषुतीर्थराजःप्रशस्यते १८ यथासर्वेषुदेवेषुभगवान्भूतभावनःतथासर्वेषुतीर्थेषुतीर्थराजःप्रश
स्यते १९ यथासर्वेषुमंत्रेषुगायत्रीचोत्तमोत्तमायथाचसर्वयज्ञेषुजपयज्ञःपरःस्मृतः २० तथैवसर्वतीर्थेषुप्रयागःपर
मःस्मृतःसामवेदोहिवेदानांपरमोयद्वदुच्यते २१ तथैवतीर्थराजोपीत्याहुःसर्वेमनीषिणःइंद्रियाणांमनोयद्वद्वृक्षा
णांपिप्पलोयथा २२ नदीनांचयथागंगातथैवेदंमहत्फलं सत्यलोकेस्थितोधाताप्रयागंस्मरतेसदा २३ अतएवनिजं
रूपंद्विधाकृत्वात्रसंस्थितःकदाचिच्चलनेनैवस्थाणुवत्स्थिरतांगतः २४ अनेनैवानुमानेनबुद्ध्यस्वत्वंयुधिष्ठिर मया
गादधिकंनास्तियथावत्कथितंतव २५ युधिष्ठिरउवाच उक्तानिसर्वतीर्थानियमुनाकूलगानितु गंगाकूलगतानिसु

स्नानितीर्थानिमेवद २६ मार्कंडेयउवाच प्रथमंवटमूलेतुतीर्थंसारस्वतंपरं तत्रस्नातोनरोयातिलोकंसारस्वतंध्रुवं।
२७ ततोत्रितीर्थंविख्यातंसिद्धिदंपरमंमहत् यत्रात्रिरनुसूयाचसमाराध्यचभक्तितः २८ कर्तारंसर्वभूतानांधातारंप
रमेश्वरं साधारण्येनसंराध्यब्रह्मरुद्रहरीन्पुरान् २९ पुत्रान्लेभेमहाप्राज्ञस्त्रीन्त्रिभ्योपियशस्विनः सोमंदुर्वाससंचा
पिदत्तात्रेयमितीश्वरान् ३० अंशभूतान्स्त्रयाणांचदेवानांभक्तवत्सलान् तत्रस्नात्वापुत्रकामःपुत्रंप्राप्नोत्यसंशयः ३१ त
तोवृहस्पतेस्तीर्थंयत्रलेभेपरांगतिं गुरुत्वंसर्वदेवानामगाज्जीवःसमान्वयः ३२ तत्रस्नात्वासमाप्नोतिविद्यांयामभिकां
क्षति ततःपरंमहत्तीर्थंविश्वामित्रस्यशर्मदं ३३ यत्रलेभेक्षत्रियोपिब्राह्मण्यमतिदुर्लभं यत्रस्नात्वानरोयातिगायत्रीजा
प्यजंफलं ३४ शक्रतीर्थंततोगत्वास्नात्वासंतर्प्यवैपितॄन् पितामहानिंद्रलोकंसंप्रापयतिसत्वरं ३५ यत्रशक्रःसहस्राक्षः
शापाद्गौतमसंभवात् तत्रस्नात्वानरःपूतोगम्यागमनसंभवात् ३६ मुच्यतेपातकात्सर्वात्स्वर्गलोकंचगच्छति दशाश्व
मेधिकंतीर्थंसर्वयज्ञफलप्रदम् ३७ ब्रह्मणायत्रविहितावाजिमेधादशप्रभो तत्तीर्थंपरमंपुण्यंसर्वकामफलप्रदं ३८ य
त्रस्नात्वासकृन्मर्त्योविधिनाभारतोत्तम अपङ्क्तकरणात्पापान्मुच्यतेनात्रसंशयः ३९ प्राणांस्तत्रपरित्यज्यब्रह्मलोकंच
गच्छति अतःपरंप्रवक्ष्यामिपूर्वकूलस्थितान्यपि ४० ऐलतीर्थमितिख्यातंयत्रराजापुरूरवात् कुरूपत्वंसमुत्सृज्यसुरू
पोभवदच्युतः ४१ तत्रस्नात्वानरोराजन्सुरूपोजायतेध्रुवं नलतीर्थंततःपुण्यंपुण्यश्लोकस्यधीमतः ४२ वीरसेनसुतो

राजास्वराज्यं यत्रलब्धवान् तत्रस्नात्वाहृतंराज्यंपरैःस्वंचप्रपद्यते ४३ सर्वपापविनिर्मुक्तः अन्यदोषैर्नवाध्यते उ
र्वशीतीर्थंविख्यातंततःपरमपावनं ४४ यत्रशापाद्विनिर्मुक्ताउर्वशीस्वर्गमेवच पुनःस्वस्थानमासाद्यमोदतेपूर्वव
न्नृप ४५ तत्रस्नात्वोर्वशीलोकंनरःप्राप्नोत्यनुत्तमं ततस्त्वरुंधतीतीर्थंत्रिषुलोकेषुविश्रुतं ४६ यत्रस्नात्वामुनीनांवै
प्राप्नुयाल्लोकमुत्तमंततःपरंयज्ञतीर्थंत्रिषुलोकेषुविश्रुतं ४७ तत्रस्नात्वानरःसर्वयज्ञानांलभतेफलं देहावसानेसंप्र
प्यब्रह्मलोकंचगच्छति ४८ अन्यान्यपिचतीर्थानिशतानशोथसहस्रशः तीर्थराजंसमाश्रित्यसन्तिभूरिफलानिच ४९
प्रपच्छतिनृणांस्नानात्महिमानंतुकोवदेत् ५ इतिश्रीम०प्रया०नवमोध्यायः ९ युधिष्ठिरउवाच प्रयागेपुण्यकारणा
त् प्राप्यतेगतिरुत्तमा यदिपापंतत्रकुर्याद्ज्ञानाज्ज्ञानतोपिवा १ कांगतिंसमवाप्नोतिकथयैतन्महामुने मार्कंडेयउ
वाच यथापुण्यकृतांतत्रजायतेसुमहत्फलं २ अपकर्मकराणांचतथैवस्यात्फलंमहत् तैलविंदुर्जलेयद्वन्निक्षिप्तः
सकलंजलं ३ व्याप्नोतिपातकंतद्वत्तीर्थराजेसुदुस्तरं नरकेसपतेत्तीव्राभुंजन्वैयमयातनाः ४ तीर्थेनपातकंकार्यंनित्य
मंपरसंचरेत् सावधानैरवस्थेयंयथापापंनजायते ५ अनेकयुगपर्यंतंतस्यनोनिष्कृतिर्भवेत् पुण्यकृत्स्वर्गमाप्नो
तिपापकृन्नरकंव्रजेत् ६ तदेवयदितीर्थेषुकृतमक्षय्यतांव्रजेत् करोतिचेन्नरःपापंतदातीर्थाद्बहिर्व्रजेत् ७ अधो
धोगच्छतिनरस्तीर्थेपापंयथाभवेत् ननिष्कृतिर्युगानेपितीर्थेतस्मात्परित्यजेत् ८ अपिकामातुरोजंतुरेकांत्यजति

मातरं प्रयागमेकमेवंतु पापकर्त्ता परित्यजेत् ९ अन्यत्र यत्कृतं पापं प्रयागं प्राप्य नश्यति प्रयागे यत्कृतं पापं वज्र
लेपो भविष्यति १० नान्यत्र तत्क्षयं याति प्रायश्चित्तशतैरपि युधिष्ठिर उवाच प्रयागकृतपापानां कथं वा निष्कृतिर्भवे
त् ११ एतन्मे वद तत्वेन यथावदनुपृच्छतः मार्कंडेय उवाच राजन्सम्यक्कृतः प्रश्नस्त्वया लोकोपकारिणा १२ शृणु त
न्ते प्रवक्ष्यामि यथा ब्रह्ममुखाच्छ्रुतं प्रमादादप्रमादाद्वा प्रयागे यदघं भवेत् १३ यथा तन्निष्कृतिर्दृष्टा तान्निबोध युधिष्ठि
र अज्ञानेन कृतानि स्युः पातकानीह यानि तु १४ कृच्छ्रचांद्रायणाद्यैस्तु व्रतैर्नानाविधैरपि माघस्नानेनश्चैव तिलपा
त्रप्रदानतः १५ जपैर्होमैस्तथा दानैरनुतापाद्यदा भवेत् ज्ञानात्कृतानि पापानि यानि तेभ्यस्तु पापकृत् १६ करीषाग्निं
प्रविश्याथ तथा प्रायोपवेशनात् वेणीं प्रविश्य वा सद्यो देहानादेव शुध्यति १७ युधिष्ठिर उवाच श्रुत्वेदं त्वन्मुखाद्विप्र न
ष्टो मे शंशयो महान् प्रसन्नं मे मनो जातं सान्निधानात्तवैव हि १८ एकं त्वयोक्तमिच्छामि श्रोतुं भार्गवसत्तम प्राप्यते केन वा
स्वर्गो दानेन तपसापि वा १९ इष्टापूर्तेन वा विप्र भोगान्नानाविधानपि तारतम्यफलं वापि जायते केन तद्वद २० दानैर्व्र
तैश्च तीर्थैश्च इष्टापूर्तैस्तथा जपैः होमैर्वा देवपूजाभिर्ब्राह्मणानां च तर्पणैः २१ तन्मे वदस्व निश्चित्य सर्वं जानाति यद्भवा
न् मार्कंडेय उवाच सर्वं त्वयोक्तं स्वर्गस्य कारणं विद्धि भूपते २२ सर्वैश्च प्राप्यते स्वर्गः पापं यदि न जायते प्रयात्रुः पुण्यतः
स्वर्गे प्रतिबंधः प्रजायते २३ दानेन भोगमाप्नोति दानेनैव सुखी भवेत् यन्न दत्तं द्विजातिभ्यः स्वर्गनो प्राप्नुयान्न तत् २४ ॥

तस्मात्तीर्थेषु पात्राय दद्यादेवस्वशक्तितः यद्यत्प्रियतमं लोके तत्तद्दद्याद्द्विजातिषु २५ अन्नं वस्त्रं च गामश्वं भोगानुच्चा
वचांस्तथा यद्देवेन द्विजे दत्तं तत्स्वर्गेपि न लभ्यते २६ अत्रैवोदाहरंतीममितिहासं पुरातनं श्वेतकेतुरभूद्राजा पुरा
भरतसत्तम २७ धर्मात्मा संयतात्मा च दाता ब्राह्मणपूजकः सत्यशीलः प्रजापालो देवताराधने परः २८ गोभूहिरण्यरत्ना
नि वस्त्राश्वगजभूरुहाः अनेकशो द्विजातिभ्यस्तेन दत्ता महात्मना २९ अथ कालेन बहुना राजा कालवशं गतः दिव्यं ।
विमानमारुह्य गतो ब्रह्मपुरं प्रति ३० नानाभोगसमायुक्तो गंधर्वाप्सरसां गणैः गीयमानोनुगैः सार्धं रेमेत्र मुदान्वितः ३१ मे
रोपृष्ठदेशेषु देवोद्यानेषु भूरिशः एवं संभोगवान् राजा स्वर्गतोपि युधिष्ठिर ३२ क्षुधया पीडितो नित्यं तदा चिंतामुपागतः प
दासोहं सर्वस्यांतु नाशको ह्याकुलेंद्रियः ३३ तदापृच्छद्विधातारं विनयानतकंधरः प्राप्तः स्वर्गमहं देव दिव्यभोगसमन्वि
तः ३४ पीडितः क्षुधया नित्यं संतप्यामि सुदुःखितः कथं क्षुधा निवर्तेत तन्मे ब्रूहि कृपां कुरु ३५ ततोब्रवीद्विधाता च रा
जानममित्रद्युतिं त्वया दत्तानि दानानि सर्वाण्येव नृपोत्तम ३६ अन्नदानं तु न कृतं तेन त्वं पीड्यसे क्षुधा पोषितं स्वशरीरं
यन्मिष्टान्नैः केवलैरपि ३७ भोजिता न द्विजा भक्त्या दीनांधकृपणा अपि न तर्पिताः किमन्नेन द्रव्यमेवाखिलार्थदं ३८ द्विजैः
संबोधितोपि त्वमन्नं नैव ददासि यत् अहं सर्वं विजानामि ज्ञाता मत्तो न कश्चन ३९ अहंकारेण संयुक्तस्तथा कथयसे प
रं परं तत्त्वं न जानासि अन्नदानेन यत्फलं ४० अन्नाद्भवंति भूतानि अन्ने प्राणाः प्रतिष्ठिताः अन्नदः प्राणदस्तस्मादन्नदः

प्र·मा
१९

सुखमाप्नुते ४२ तस्मादन्नं प्रदातव्यं शरीरं चान्नसंभवं राजनक्षुधानिवृत्यर्थं देहं भक्षय नित्यशः ४२ पोषितं यच्छरीरं ते
भविष्यति तथैव तत्प्रत्यहं भक्षितमपि पुनः पुष्टं भविष्यति ४३ क्षुधानिवृत्तये तुभ्यमन्यत्किंचिन्न विद्यते एवं स ब्रह्म
णादिष्टो भक्षयित्वा कलेवरं ४४ पुनयाति स्वकं स्थानं प्रत्यहं वहुवासरं कदाचित्तेन मार्गेण अगस्त्यो भगवानृषिः ४५
प्रयागस्नातुमागच्छद्ददर्श पथितं नृपं विमानेनार्कवर्णेन भ्राजमानेन स्वतेजसा ४६ अवरुह्य विमानात्स्वाद्भक्षयंतं स्वकले
वरं आश्चर्यं परमं प्राप्य पप्रच्छ नृपसत्तमं ४७ अहो स्वर्गभवानेत्य दिव्यरूपसमन्वितः अनेकभोगसंयुक्तः किंकरा
भिर्जुगुप्सितं ४८ वीभत्सं खलु ते कस्मादेवं कर्म समास्थितं को भवांस्तेजसा पूर्णस्तन्मे शंसितुमर्हसि ४९ मुनेर्वाक्यं समा
कर्ण्य श्वेतकेतुः सुदुःखितः प्रणिपत्य मुनिश्रेष्ठं प्रत्युवाच सविस्मयं ५० आकर्णय मुनिश्रेष्ठ योस्मि यत्कर्म यादृशं श्वेत
केतुरिति ख्यातो राजाहमभवं पुरा ५१ अग्नयः सुहुता देवाः पितरश्चैव तर्पिताः दक्षिणाभिरनेकाभीर्यत्तैश्च विविधैरपि
५२ ब्राह्मणास्तोषिता नित्यं प्रजाभिः परिपालनात् अहंकारविमूढेन नान्नदानं कृतं मया ५३ क्षुधया पीडितास्तेन स्वर्गं
प्राप्यापि चास्मयं विप्रश्च ततो ब्रह्मा मामुवाच पितामहः ५४ प्रत्यहं त्वं भुवं गत्वा भक्षय स्वकलेवरं नवक्षुधान्यथा नाशं
नयास्यति कथंचन ५५ एवं ब्रह्मण आदेशान्मयेदं कर्म गर्हितं क्रियते हि मुनिश्रेष्ठ स्वापराधं समन्विदम् ५६ इदानीं मम
भाग्येन संप्राप्तदर्शनं तव यथा मम क्षुधापीडा न भवेत्त्वं तथा कुरु ५७ समुद्रः प्राशितः पूर्वं विंध्यवृद्धिर्निवारिता अतिदै

रा मः
१९

19

वंत्वनेककर्मतवशक्तिर्दुरत्यया ५८ शरणंत्वांप्रपन्नोस्मि कृपयामांसमुद्धर ॥ इतिसंप्रार्थितोराज्ञामहर्षिस्तुष्ट
मानसः ५९ उवाचमधुरंवाक्यंशरणागतवत्सलः ब्रह्मणानकृतंयत्तेममकाशक्तिरूर्जिता ६० तथापितवदीभक्त्वं
दृष्ट्वाकर्मस्तुगर्हितंघृणामेजायतेतस्मान्निष्कृतिंतेहसःशृणु ६१ एह्यागच्छमयासार्द्धंप्रयागंप्रतिमानद निष्कृतिंते
करिष्यामिस्वस्यैवतपसोवलात् ६२ प्रयागस्तीर्थराजोयंसर्वकामफलप्रदः कथंनकुर्यात्तेकाममित्युक्त्वाभ्यगमत्ततः
६३ ततोगत्वाप्रयागंतुसमुनिःशंसितव्रतः त्रिवेण्यांस्नापयित्वातंराजानममितद्युतिं ६४ पुनःप्रोवाचराजानमन्नदान
स्यनिष्क्रयः प्रयागेहिद्विजवर्यायदातव्यःफलमिच्छता ६५ नाद्दत्तमुपतिष्ठेतकल्पकोटिशतैरपि ततःकंकणमुत्तार्य
करेकृत्वाब्रवीन्मुनिं ६६ संकल्पयविधानेनगृह्णीष्वाद्दरमाविभो ततोनुज्ञामनुप्राप्यददौतस्मैसकंकणं ६७ अन्नस्यनिष्क्रयं
कृत्वाअगस्त्यमुनयेतदा ततोनुज्ञामवाप्यैनंप्रणम्यचपुनःपुनः ६८ ययौस्वेष्टगतिंसद्योविमानेनसुवर्चसा अंतर्हि
तशरीरंततस्तत्क्षणादेवसुव्रत ६९ इत्थंप्रभावंतत्तीर्थंतवप्रोक्तंमयानघदानानांकृषिरुक्ताचतवराजर्षिसत्तम ७०
कथयिष्यामितेराजन्यदन्यत्प्रष्टुमिच्छसि ७१ इतिश्रीम०प्रदशमोध्यायः १० युधिष्ठिरउवाच यथायथाकथयसि
महिमानंमहत्तरं तथातथामुनिश्रेष्ठप्रसन्नंहृदयंमम १ तववाक्कर्णपीयूषमास्वाद्यहृदयंमम नानितृप्तंभवतिभो
यथावैजुषतोमृतं २ संश्रावयान्यदपिमेब्रह्मादिप्रतिभाषितं मुनेप्रयागमाहात्म्यंकृपयावदमाम्प्रति ३ दृष्टपद्य

त्वयानतुनश्रुतंकेनचित्क्वचित तस्मात्पृच्छामिसर्वज्ञंसर्वसंदेहनाशनं४ मार्कंडेयउवाच शृणुराजन्महावाहो
माहात्म्यंपुनरेवतु नैमिषपुष्करेचैवगोकर्णंसिंधुसागरं५ गयाचधेनुकंचैवगंगासागरसंगमः अन्यानिचैवती
र्थानियेचपुण्याःशिलोच्चयाः६ दशतीर्थसहस्राणित्रिंशत्कोट्यस्तथापराः प्रयागेसंस्थितानित्यमेवमाहुर्महर्षयः
७ त्रीणिचाप्यग्निकुंडानियेषांमध्येतुजान्हवी प्रयागादभिनिष्क्रांतासर्वतीर्थपुरस्कृता ८ तपनस्यसुतादेवीत्रिषु
लोकेषुविश्रुता यमुनागंगयासार्धंसंगतालोकभाविनी ९ गंगायमुनयोर्मध्येपृथिव्याजघनंस्मृतं प्रयागंराजशा
र्दूलतस्यसाम्यंकिमुद्वहेत १० तिस्रःकोट्योर्द्धकोटीचतीर्थानांवायुरब्रवीत् दिविभुव्यंतरिक्षेचगंगायांतानिसर्वशः
११ प्रयागंचप्रतिष्ठानंकंबलाश्वतरौतथा भोगवत्यथयाचैववेदीप्रोक्ताप्रयागके१२ तत्रमंत्राश्चवेदाश्चमूर्तिमंतो
युधिष्ठिर प्रजापतिमुपासंतेमुनयश्चतपोधनाः१३ यजंतेक्रतुभिर्देवास्तथाचक्रधरानृपाः तस्मात्पुण्यतमंनास्ति
त्रिषुलोकेषुकिंचन१४ प्रभावात्तीर्थराजस्यमहत्वात्तीर्थराजतः यत्रगंगामहाभागासदेशस्तेतपोधन१५ सिद्धक्षे
त्रंतज्ज्ञेयंयत्रगंगासमाश्रिता इदंज्ञात्वाजपेत्कर्णेपुत्रस्यसुहृदस्तथा१६ इदंपुण्यमिदंस्वर्ग्यमिदंमेध्यमिदंसुखं॥
सुशिष्यस्यानुरक्तस्यगोप्यमत्यंतमुत्तमं इदंपुण्यमिदंरम्यंपावनंधर्म्यमुत्तमं महर्षीणामिदंपुण्यंसर्वपापप्रमोचनं१८
अधीतेचद्विजोप्यतंनिर्मलत्वमवाप्नुयात् यस्त्विदंशृणुयान्नित्यंतीर्थपुण्यसदाशुचि१९ जातिस्मरत्वंलभतेनाकपृ

ष्टे च मोदन्ते प्राप्यंते तानितीर्थानि सद्भिः शिष्टानुदर्शिभिः २० स्नाहितीर्थेषु कौरव्य न च वक्रगतिर्भव इदं विश्वं यदा सर्वे
कल्पांते संहरत्यजः २१ तदा नश्यति तत्सर्वं प्रयागं नैव नश्यति वटोपस्तत्र तस्यैव शाखायां वालरूपधृक् २२ शेते पत्र
पुटे देवो मया दृष्टो महाद्भुतः एकीभूय समुद्रास्तु प्लावयंति भुवस्तलं २३ तत्र मज्जज्जलरंगेसु मोह्यमानं समंततः दृष्ट्वा
तस्मिन्वालनिकटे गतवानहं २४ प्रष्टुं किंचिदुपक्रांतः समाश्वास्य भयार्दितः तावत्तस्य हि वालस्य श्वासेनैवोदरं गतः
२५ तत्र दृष्ट्वा जगत्सर्वं माश्वस्तः पूर्ववत्पुनः अनेकचित्रं तत्रैव स्वाश्रमं प्राप्य तस्थिवान् २६ पुनस्तस्यैव निःश्वासात्प
तितः प्रलयार्णवे सम्भ्रांतोस्मि महाग्राहैर्मकरैश्च तिमिंगिलैः ॥ २७ ॥ ग्रस्यमान इव त्रस्यन्कंपमानः पुनः पुनः
एवं तु बहुशो राजन्दृष्टवानस्मि तं वटं २८ युधिष्ठिर उवाच भूम्याः ककुद्वद्दृष्टः प्रयागोपि नद्यांतटान्न नाशः प्रलयेप्यस्ति
तस्य क्षेत्रस्य कर्हिचित् २९ कस्मात्तिष्ठंति ते देवा ब्रह्मविष्णुमहेश्वराः सह देवैः प्रयागेस्मिन्कल्पांतेपि त्यजंति न ३० मार्कं
डेय उवाच प्रयागे निवसंत्येते ब्रह्मविष्णुमहेश्वराः कारणं तत्र वक्ष्यामि शृणु तत्त्वं युधिष्ठिर ३१ पंचयोजनविस्तीर्णं प्रया
गस्य हि मंडलं तिष्ठंति रक्षणार्थाय पापकर्मनिवारकाः ३२ उत्तरेण प्रतिष्ठानाच्छाल्मलो प्रतितिष्ठति ब्रह्मा हि तेन रूपेण
प्रयागं रक्षते सदा ३३ महेश्वरो वटो भूत्वा तिष्ठते परमेश्वरः विष्णुर्माधवरूपेण प्रयागं परिरक्षति ३४ ततो देवाश्च गंधर्वाः
सिद्धाश्च परमर्षयः रक्षंति मंडलं नित्यं पापकर्मनिवारकाः ३५ तस्मिञ्जुहूत्स्वकं देहं नरकं नैव पश्यति एष ब्रह्मा च वि

ष्णुश्चप्रयागेसमहेश्वरः ३६ सप्तद्वीपाः समुद्राश्चपर्वताश्चमहीतले ध्रियमाणाश्चतिष्ठंतियावदाभूतसंप्लवं ३७ ये
चान्येवहवः सर्वे तिष्ठंति च युधिष्ठिर पृथिवीतलमाश्रित्य निर्मितादैवतैस्त्रिभिः ३८ प्रजापतेरिदंक्षेत्रंप्रयागमितिविश्रु
तं एतत्पुण्यंपवित्रंचप्रयागंचयुधिष्ठिर ३९ तस्माद्भूजस्वकौंतेयप्रयागंपरमार्चितं तत्रस्नात्वामहाभागहुत्वादत्वाचभूरि
शः ४० भ्रातृभिः सहितः पार्थसर्वपापंप्रणेत्स्यति गुरूणांचापिमित्राणांभ्रातृणांचवधात्कृतं ४१ तस्मात्पापान्मोहमूला
च्छोकसेपरितप्यसे विलयंयास्यतिक्षिप्रंतत्सर्वंनान्यथाक्वचित् ४२ कुरुराज्यंमहाराजसत्रियोसिविशेषतः यश्चैतेस
शयोनित्यंहृदयेपरिवर्तते ४३ प्रसन्नेहृदयेजातेशोकस्तेनचिराद्दिह नस्यत्यसंशयंराजन् प्रयागस्यप्रभावतः ४४ श्रीसू
तउवाच एवमुक्तोमहातेजामार्कंडेयेनधीमता भ्रातृभिः सहितः सर्वैर्ज्ञातिभिः सहितश्चैतैः ४५ कृष्णेनवहनाज्ञानः पु
राभीष्मेणबोधितः व्यासधौम्यादिभिश्चोक्तोबोधितः प्रियकारकैः ४६ अभिषिक्तोद्विजैः सार्धंकृष्णेनचमहात्मना तान्
सर्वान्पूजयामासब्राह्मणांश्चाप्यतर्पयत् ४७ इतिश्रीम० प्र० एकादशोध्यायः ११ शौनकउवाच राज्येभिषिक्तोधर्मात्मा
भ्रातृभिः सहितस्ततः गतः प्रयागमथकैर्कैर्वासहमहाद्युतिः तन्मेकथयधर्मज्ञकथंवास्यमनोभवेत् श्रीसूतउवाच यथा
सराजानतुपांडवेयोराज्यंसमृद्धंहतकंटकंतत२ प्राप्यार्थमित्राणिसमिद्धतेजाः ससांत्वयित्वास्वजनंचसम्यक् अथो
मुहूर्तेसुदिनेविचिंत्यद्विजैः कृतस्वस्त्ययनोमहात्मा ३ कुंतीचकृष्णाचपुरानृयानैः संप्रेष्यविप्रान्सुमनोमहात्माभीमार्जु

21

नाद्यैः सहितोनुरक्तैः संप्रस्थितः श्रीपतिना सहैव ४ मृकंडपुत्रेण तथास्तभृत्यैर्योग्रानुकूलानुविधायिभिश्च प्राप्तः प्रया
गपुरतो विलोक्य मृकंडपुत्रस्तमुवाच धर्मं ५ पश्य प्रयागं ननु तीर्थराजं ब्रह्मादिभिः सेवितमादरेण संसेव्यते देवगणैः
सदेवगंधर्वसिद्धैर्मुनिभिस्तथैव ६ सितासिते यत्र पतद्वयीव नद्योत्तमी यं तु सरस्वतीव वटो जटाजूट इव प्रयागरुद्रो
जपत्येष पलायिताघः ७ सितासिते यत्र तरंगचामरे नद्यौ विभाते मुनिभानुकन्यके नीलातपत्रं वट एव साक्षात्ती
र्थराजो जयति प्रयागः ८ स कामधर्मार्थविशेषगुंफिता वेणीव सेयं किल मोक्षलक्ष्म्याः ननु प्रांतभागे वट एव राजते सुगुंफ
वत्पट्टनवद्विचित्रः ९ वैकुंठकैलासगतो हरीशयोरूपासकानामतिदूरभावात् सुखेन गंतुं विहिता विधात्रा वेणी मुनि
श्रेणिभिरेव हि लभ्यते १० श्रीमाधवोसौ मुनिवर्यसंघैः संसेव्यमानोनितरां सुरैरपि अन्यत्र कुत्रास्य भवेन्न दर्शनं सोत्र प्रया
सेन विनैव दृश्यते ११ कुत्रापि येषां सुलभं न दर्शनं सर्वेपि ते त्रानुचरंति मर्त्यवत् न पश्य राजन् सुकृतैकलभ्यं तीर्थेशमि
ष्टं सुलभेष्टसिद्धिम् १२ इति संवर्ण्य बहुशो मार्कंडेयो महातपाः राजानं स्नापयामास विप्रैर्व्यासादिभिर्युतः १३ विधि
नाभ्रातृसहितं कृष्णादिस्त्रीयुतं प्रभुम् कृष्णेनानुगतं श्रीन्यावसुदेवेन सादरं १४ ततः स राजा धर्मात्मा देवतैर्ऋषि
भिः सह तर्पयामास विधिवत्स्वपितॄंश्च पितामहान् १५ दक्षिणाभिः सुसंतोष्य महादानानि भूरिशः १६ कृत्वा तत्र
यथान्यायं दीनानाथांश्च भूरिशः भोजयामास सुद्धात्मा भक्त्या परमया युतः १७ गोभूसुवर्णरत्नानि गजाश्वप्रभृती

निच अर्हत्तमेभ्यःसंपूज्यवहुमानपुरःसरं १८ ततोविज्ञापयामास प्रणिपातपुरःसरं अश्वमेधंक्रतुवरंकर्तुंकृतनम
तिःस्वराट् १९ व्यासादीन्नारदादींश्चमार्कंडेयमहामुनिं ततःकृष्णोमहाबाहोराजानंसंप्रहर्षयन् २० उवाचपरमः।
प्रीतःसर्वैस्तैर्मुनिभिःसह सहायमर्थसंपत्तिः प्रभुत्वंचयदिष्यते २१ सर्वंसन्निहितंतत्रयजस्वसुसमाहितः एवंसोनु
मतःसर्वैःकृतसंभारसाधनः २२ अयजद्वाजिमेधेनयज्ञेशंपुरुषोत्तमंप्रत्यक्षोयत्रभगवान्यज्ञानांफलदायकः २३
व्यासादयोविधानज्ञादीक्षायांचक्रिरेनृपंमार्कंडेयःस्वयंयत्रकारयामासकर्मतत् २४ एवंसतुमहायज्ञोवहून्नोव
हुदक्षिणःमुनिप्रसादात्संपूर्णःप्रयागंप्राप्यचाभवत् २५ ततस्तेमुनयःसर्वेतमनुज्ञाप्यहर्षिताःस्वाश्रमान् प्रतिसंज
ग्मुर्वासुदेवंप्रणम्यच २६ वासुदेवोपिभगवान्संपादितमनोरथःराजानंसमनुज्ञाप्यद्वारकांप्रययौततः २७ सूतउवा
च इत्थंसभगवान्राज्ञामार्कंडेयोमहातपाःशोकमज्ञानजंतस्यजातंज्ञानिवधेनच २८ पापसंशयमत्युग्रधैर्यच्युति
करेमहत् नीत्वाप्रयागंधर्मात्मादूरीकृत्यसमाहितः २९ विशुद्धमनसंचक्रेप्रयागस्यप्रभावतः इत्थंप्रभावस्तीर्थे
षुप्रयागःसमुनिप्रियः ३० इत्थंकथितंमाहात्म्यंप्रभावश्चैवशौनक ब्रह्मणानंदिनाचैवयत्प्रोक्तंतत्समासतः ३१ समा
ख्यानंविस्तरतोवक्तुंकोहेतिसत्तम अल्पेनैवप्रयासेनपुरुषार्थचतुष्टयं ३२ सुलभंयत्रसंप्रोक्तंमुनिभिर्ब्रह्मवादिभिः
ब्रह्मणाकपिलेनापिमार्कंडेयेनधीमता ३३ नारदेनकुमारेणप्रोक्तंपौराणिकंपरंइदंप्रयागमाहात्म्यंशृणोतिश्रावये

४११७

श्रीकाशीजीमैंमहल्लाकरनघंटापरलालासिवरतनलालकेमकानमैंबिद्यासागरयंत्रालय
मैंहरिहरक्षेत्रमहात्म्यवहुतसुद्धतापूर्वकछापागया संवत् १९३५ मि· कार्तिकसुक्ल ५ वारबुध

निच अर्हत्तमेभ्यःसंपूज्यवहुमानपुरःसरं १८ ततोविज्ञापयामास प्रणिपातपुरःसरं अश्वमेधंक्रतुवरंकर्तुंकृतम
तिःस्वराट् १९ व्यासादीन्नारदादींश्चमार्कंडेयंमहामुनिं ततःकृष्णोमहावाहोराजानंसंप्रहर्षयन् २० उवाचपरमः।
प्रीतःसर्वैस्तैर्मुनिभिःसह सहायमर्थसंपत्तिः प्रभुत्वंचयदिष्यते २१ सर्वंसन्निहितंतत्रयजस्वसुसमाहितः एवंसोत्र
मतःसर्वैःकृतसंभारसाधनः २२ अथयजह्वाजिमेधेनयज्ञेशंपुरुषोत्तमं प्रत्यक्षोयत्रभगवान्यज्ञानांफलदायकः २३
व्यासादयोविधानज्ञादीक्षायांचक्रिरेनृपंमार्कंडेयःस्वयंयत्रकारयामासकर्मतत् २४ एवंसतुमहायज्ञोवहून्नोव
हुदक्षिणःमुनिप्रसादात्संपूर्णःप्रयागंप्राप्यचाभवत् २५ ततस्तेमुनयःसर्वेतमनुज्ञाप्यहर्षिताःस्वाश्रमान् प्रतिसंज
ग्मुर्वासुदेवंप्रणम्यच २६ वासुदेवोपिभगवान्संपादितमनोरथः राजानंसमनुज्ञाप्यद्वारकांप्रययौततः २७ सूतउवा
च इत्थंसभगवान्राजामार्कंडेयोमहातपाः शोकमज्ञानजंतस्यजातंज्ञातिवधेनच २८ पापसंशयमत्युग्रंधैर्यच्युति
करेमहत् नीत्वाप्रयागंधर्मात्मादूरीकृत्यसमाहितः २९ विशुद्धमनसंचक्रेप्रयागस्यप्रभावतः इत्थंप्रभावस्तीर्थे ७४
षुप्रयागःसमुनिप्रियः ३० इत्थंकथितंमाहात्म्यंप्रभावश्चैवशौनक ब्रह्मणानंदिनाचैवयत्प्रोक्तंतत्समासतः ३१ समा
ख्यानंविस्तरतोवक्तुंकोर्हतिसत्तम अल्पेनैवप्रयासेनपुरुषार्थचतुष्टयं ३२ सुलभंयत्रसंप्रोक्तंमुनिभिर्ब्रह्मवादिभिः
ब्रह्मणाकपिलेनापिमार्कंडेयेनधीमता ३३ नारदेनकुमारेणप्रोक्तंपौराणिकंपरं इदंप्रयागमाहात्म्यंशृणोतिश्रावये

४११७

श्रीकाशीजीमैंमहल्लाकरनघंट्टापरलालासिवरतनलालकेमकानमैंविद्यासागरयंन्त्रालय
मैंहरिहरक्षेत्रमहात्म्यवहुतसुद्धतापूर्वकछापागया संवत् १९३५ मि॰ कार्तिकसुक्क ५ वारबुध

श्रीगणेशायनमः शिवउवाच हर्जोरिवर्चेपरसुन्दरिलीलवालेविम्बानुस्मरपदलोचनकेशशवानाम् योगीश्वरःप्रत
नुनेकरनेत्रकीर्त्तिनीवानुकोभवितुमर्हतिभूतजस्य १ यद्योत्थानमुमापतनैकृतवान्विष्णोरनीयाभवेत् सर्वतत्वमि
दंकलौनमिलतेविष्णुःसदासेवितः विंघास्थानमिधः कुनेवसदनेस्थानाडदिव्यांवसेत् तस्मादुत्तरभागमध्यशि
षरेरेखाविधौमेरडलम् २ देवितत्रविराजीताशुभदिविनाभ्नीसपुत्राद्विजायोगीन्द्रैः प्रदितासुमेरुरचितापारखानगा
सुन्दरी तस्याः पूजनमुर्ज्जेमासिहरिभैस्सूर्य्याकृतिन्मायुतामिष्टान्नैर्विविधैः सकेदलिफलैर्वस्त्रेणापीतेनवासादेविसु
खधर्मेकर्मजननीवैडुर्ज्जेमाल्योदरीवीणावादिनिनादशव्दसुकरिपुत्रादिदात्रीशिवेयेयेशव्दकराःसुखप्रसद्दापो
षिच्छिवस्यासवेतस्थानप्रणमामिसस्दिसदाकर्कूरम्भान्तकम् ४ आघातोदिशिपूर्वदन्तिनतटेदेवोविडुर्नामकः
प्रौढःसर्वकलवरेणासुभगः पाषाणसद्विग्रहः मर्य्यादादशसेषरः प्रभुरभूतसूर्य्योदिनाङ्केदितःसायपातुमहाबलो
वृषधरःशम्भुःसदाप्रस्थितः ५ विघावालननत्परःसुकुशलःसिद्धिप्रदःशंकरःपूर्णविस्फुरितःसदाप्रमुदितःसे
व्राह्कृतोनित्यसः तत्पार्श्वेगणनायकःसुपरदोयोदानवागर्वितः सोप्येषोमतिमान् वलेनविदितोदेवीगणःपातु
माम् ६ सर्वखेतदसादिनासुरचितः कामादिमोहोल्लसत् त्यक्तुसुद्भमनाशरीरमगमत्तत्तद्विरुद्धवपु तज्ञालाहल
मेरितक्षुब्धितलेवीरैः कलापेठितःढोढाकशङ्खप्रसूतिवयसारम्यद्विवाशय्यते ७ गोपालैर्निहतःनितोप्रचलितः
८ङ्कैःविशत्स्फोटितः पूर्णाधारखधःकुवेरभवनेडर्गादिकेरंकितःप्रभातसमयेयेनेरितस्तत्क्षणात् कौवेर्यांदिशिस

वैसेवितरमांबन्देभवानीशिवाम् ऊर्ज्जैस्याष्टमिकांतिथिंसुक्लपक्षीमाधायदिव्यायुधंपीध्रंहरनठात् कुदम्बुसरसत् दीर्घवपुः
सुप्रभोः पाषासास्य प्रारिरमज्जिनमिहप्रेन्त्यंदिशाष्टौसदारूपंसूत्रनरंसुमन्दिरतरौवेरायादिनाशोभितः १० शिवनारय
राख्यानात्त पूर्वस्यांशिशुरूपधृक् विंशद्धस्तोर्द्धकंषड्भिरधःस्वितशिलांप्रति ११ बुद्धावतारोभगवान् मनुमात्रंशरीरवा
न् विश्वेशःश्रीपतिश्वैवतस्यदक्षिणभागगः १२ उमातन्त्मीचतत्रैवसर्वभूषणभूषितादीर्घांशनसमासीनासघमाया
वसीशरा १३ सर्वफलफलैरेषामहालक्ष्मीरुमाश्रितमराडपेसु धृतेराजनिस्वेतचन्दनचर्च्चिते १४ तत्स्थानाच्छतहस्तोर्द्ध
दक्षिणस्यांदिशि शिलाग्रधःपञ्चमितंहस्तचक्रंदेव्याः प्रकीर्त्तितम् १५ पार्वत्युवाच देविचक्रकुतःस्वामिन् कुतश्चा
यातिभैरवीम् मायावीचकुतःआयात् युग्मन्क्षेत्रेचभोप्रभो १६ कस्यांभूमौचक्रस्थाने शंभोकस्यांदिशिप्रभोदेवो
यः कस्यप्रभवःसुस्थानवाससन्चयत् १७ युग्मन्क्षेत्रस्यमाहात्म्यंब्रूहिमेपरमेश्वर येश्वर येनश्रवणमात्रेणपातका
न् मुच्यतेनरः १८ शिवउवाच श्रृणुदेवि प्रवक्ष्यामिमाहात्म्यंहरिकोजयोः शिवस्योत्तरभागेतुक्रोशार्द्धोपरि रान्तसि
१९ उल्लूकानाम्निकादेव्याविभूवरधारिका अवस्त्रांसूत्रहटगागोग्रामप्रतारका २० प्रेतरूपाव्दन्सतठगाअलंकारैर
लंकृतादयारूपायामरक्षिकाचतुर्द्दिनु विराजिका २१ मनुमात्रमधोगेहंदीव्यमेधादिनाषलम् सर्वमीश्वरमेदानंक
पालैरुपलंङ्घितम् २२ तस्यादर्शनमात्रेणसर्वकल्यानमाददेत् कार्त्तिकस्यामलेपक्ष द्वितीयामध्यवासरे २३ तास
चैयेङ्गन्क्तजनः सर्वकामानवाप्नुयात् पुत्रवान्वित्तवान्विद्यायुक्तःशौचसदानरः २४ उल्लूकास्थानमारभ्यहरिजीव

पुरच्चयत् महीगणुकिकामध्येसुक्रन्सेत्रं विधीयते २५ एतन्मध्येश्रियायुक्तः हरिस्तिष्ठतिनित्यसः शिवश्चपार्वती
युक्तोवसेद्रात्रौदिसदा २६ विभीषादेवकन्योकासर्वसंपन्नसयुताभ्रातृयुक्तापुत्ररहिताविधवावत्नसंयुता २७ या
षाणाविग्रहाङ्केनतत्सदेहाशिरोनखावहुग्ररुपासुजनैर्वेष्टिताप्रियभाषिणी २८ उल्लूकास्थानतः माय्यांत्रिश
द्धस्तोर्द्धमीहते अधोद्वादशहस्तञ्चमराडपंविमलंप्रिये २९ तन्मध्येदेवकन्यासारत्नसिंहासनेस्थिताइषद्धास्येन
संयुक्तावहुभूषणविष्टिता ३० अतिद्राकूटविरकैः सत्सभापञ्चजोलकादृष्टकामददात्येवध्रुवंविद्धिवरानने ३१
तत्रैवपञ्चमुनयः करमावस्त्रधारिणः विभूषणयुताइन्द्राःसादिनःकर्मवादिनः ३२ विभीषास्थाननतःकान्तेदक्षि
णस्यादिशिशुभम् हनुमान्महावीरोद्वादशाञ्जोर्द्धमर्द्धते ३३ अधःसप्तमितंहस्तंवहुवानरवेष्टितः रक्तवस्त्रःशि
खान्तूर्सिः कोमलैरुपवेष्टितः ३४ अवहेलनमर्य्यादादम्यतीवादिमषितः रामयुक्तःकलातकःसुवर्णमयसोभीतः
३५ सुपुच्छः द्विभुजःस्वामीवज्रदेहःशिरोरुणात् अकामःक्रोधयुक्तश्चदीर्घदेहःसुराध्यकः ३६ मणिमाल्ययुतोभ
क्तोगिरिधारीसवत्सलः सीतातापहरोभीमैरंकितः कपटेरुद्रः ३७ सरवान्वलैरुष्टःकुर्य्यादाशनमेरितः कोठागा
रगृहंपक्कंपाषाणैरुपशोभितम् ३८ सूर्यचक्रंयुवायुक्तंतस्यपार्श्वेचदक्षिणेमेदिनीपृष्टतःकृत्वामोभागेयुवतींव
सेत् ३९ उदिग्मुखंभवेद्गेहंस्वेतपाषाणमण्डितम् सर्वमिष्टफलंविन्दत् तेषांदर्शनमात्रतः ४० हनुमत्स्थाननतःस्था
नंपश्चिमस्यांदिशिप्रभोःलक्ष्मीनारायणःसाक्षात् सेसशाइमाहाप्रभुः ४१ उर्द्धषोऽशहस्तस्य अधःसूर्यमितंल

२५

येत् कृशणायांधाराजेसुदेडम्मेदेमन्दभासये ४२ तत्रस्थानारदोयोगीवीणावादेनसंयुतः ब्राह्मणाः सर्वभूजानामुपकारकरक
रसदा ४३ तत्सन्निधौसर्वधीषावामभागेप्रवाहीनीचतुर्दिक्षुशुभंद्वारपल्लवैरूपशोभीतम् ४४ मणिदीपमयंगेहंशोभाढ्यसु
मनोहरम् कर्मजंज्योतिरुदितंजाह्नवीजलसंश्रितम् ४५ एतद्दिव्यंमयंस्थानंलक्ष्मीनारायणस्थितम् सन्ध्यायांसर्वपापघ्नं
वन्देनारायणंप्रभुम् ४६ लक्ष्मीनारायणस्थानात्दक्षिणेपक्षवाहिनीपादक्रोशमधोदिग्जेहस्तपरिमितमेधितम् ४७ साध्या
काष्टस्थितादेविपीताम्बरसुधारिताकुक्कुटारूढमगमत् सोपानालमिक्षना ४८ पूर्वद्वारमनेकंकेहारीतैवहुशोभिनाविधु
धन्द्रप्रभाजेकैर्मूर्द्धनिनिकरैस्थिता ४९ भूतसूर्यमणिरिन्द्रःसेवकःसर्वदामहः तस्यास्त्वर्धनमात्रेणदीर्घजीवीभवेन्नरः ५० इ
तिश्रीशिवपार्वतिसम्वादेहरिहरक्षेत्रमाहात्म्येप्रथमोऽध्यायः १ पार्वत्युवाच स्थास्यंयुग्मक्षेत्रस्यवसीनम् यथावाचा
यथानूर्वकथयस्वममप्रभो १ शिवउवाच शृणुदेवीइदंहरस्वेदोक्तंसन्धिदामृतम् मुनिस्थानंञ्चदेवीनास्थानंचैवशुभा
मृतम् २ यस्यदेवस्ययत्स्थानंपूजालीलापुरायत् तत्सर्वंदर्शयामित्वंब्रह्माद्यैरपियत्कृतम् ३ शिवमन्दिरतःप्राच्यां
पञ्चविंशद्धयापरम् कुशाह्वनामकोगाथःसर्वलक्षणलक्षितः ४ सूर्यभ्रातावितालीलःकूपस्तस्वेतमन्दीरे यौनौसर्व्ये
द्वाप्यासीत् योगोलोगोलकर्पुरः ५ हसविम्वफलेकम्ध्येयोयोयोगीयोगवर्द्धकः उत्तरेतद्वियाश्रेयोवर्त्तिनाराश्रयःस
दा ६ तत्रदीपमणिरास्तेभगवन्मूर्त्तिमीदृशाम् योनिकासम्भराकालीशिवांवन्देसदानवे ७ कर्मगेहेस्थितेभाण्डजवे
चकाञ्चनेपुरेचम्मेधारिंश्येभागेमण्डलेमण्डलस्थीते ८ द्वेशिलेचप्रजायेते उर्द्धरेप्रशरोत्सवेभवानीप्रस्थितानत्रसान
माकुलपालिना ९ योनिराकारयेन्तत्रभूतयेन्मण्डपेस्थितेबलेनसहभोमूर्ज्जकलेलंकावतीयथा १० सारमापूर्वभागे

स्यायोध्यायाः कल्पतारुणात् पूजातः सर्वजावानांनिपरंपर्मेचर्मेणा ११ यारुणापूर्णविलायांशिवपूजामथाकरोत् सोऽपरंपू
र्वभागेकास्थानंचविरतेरते १२ कार्त्तिकेशुक्लपक्षेवद्वादश्यांपूजनंदधेः तस्यपूजरनेमात्रेणासर्वसम्पन्नृणामपि: १३ गोलके
भागनंविम्वंभूर्जपत्रंलनालतम् सूर्यवारेलयेस्तोत्रेनिः पाधीयापमाकरोत् १४ जन्तूतपवलैरेताकलावर्त्तिकलेवरम् सर्वेस्व
र्यमाम्नोविष्णुलोकंचगछति १५ ब्रह्मरूपंसदाचीतंशेसमालाविभुषितम् कम्वलाशनमारुढंशिवरूपधरंस्मृलत् १६ एनथा
लितमर्यादास्थानमेतत् विचिन्तयेत् कुंकुमेनसमलिप्यंकपुरागरुसुन्दरे १७ पूजनादर्शनात्तेषास्पर्शनाच्चरमापतेधनभूमि
युतोयातःकन्नेयुग्मविधानतः १८ कुशाह्लस्थानतःकान्तेदक्षिणेविंशहस्तकम् अधोदशमितंहस्तंदीव्यमन्दिरमेदिनम् १९
कलावन्तंनगंतत्रसोणितादिपुरेचयतत् सरस्वतीदीव्यरूपाराजतेसार्वदाकृतम् २० हिमवानहेमकलशैरिद्धिशंरामलाश्रि
तम् जाह्नव्यास्सर्वमिकैलेशादायेनकुशाग्रतः २१ तस्याःपार्श्वेउषितंभास्संभूतनादभयान्वितम् जोल्लुकान्निंशकानाम्निदासी
सासमिगासदा श्रवलैःपूर्वजैयैरासीत् देवकन्यैवराजिता सर्वयस्तेहपूरितैरिमांवाचमनुब्रुवम् २३ तस्याःपूजनमानारेयो
नयेन्मंत्रपञ्चकम् विद्यांपूर्णतमांलभ्येत् सर्वसम्पन्नसंयुताम् २४ ॐॐह्रांह्रींक्लींक्लींफट्इमंमन्त्रंपठेत् वारंपञ्चकंयःपु
मानधः सर्ववान् नह्ययाम्वामिकल्पनारुशिहैःसदा २५ केदलीस्तम्भजडितैराजतीपूर्णपूपकैपूजयेदकिनोयोवैविष्णुलो
कंसगच्छति २६ इतिश्रीशिवपार्वतीसम्वादेहरिहरक्षेत्रमाहात्म्येद्वितीयोध्यायः २ पार्वत्युवाच भगवन्श्रोतुमिच्छामिपु
ण्यक्षेत्रस्यवर्णनम् कथयस्वमाहाभागयेनसर्वमविस्तरम १ इश्वरउवाच श्रृणुदेवीमहाभागेविष्णुसायुज्यदेनवेतत्से।

25
३

त्रंनिर्म्मितंदेवैर्मषपूरितमानसा २ हेमवृक्षंतदाकारंशिवदक्षिणभागमेपल्लवितंफलैर्युक्तंयुग्माङ्कोलमिश्रितम् ३ तन्मू
लेयोगजैकान्तैर्वदतीत्तिरयोहसन् गुल्मसैध्यंसरपद्मपुष्पगन्धानुलेपनम् ४ चित्रैरखाचतत्सत्रैस्त्रिसूत्रंपञ्चरेधिकम् सा
म्वघूल्मंलतायुक्तंहितजेकुठजेऽस्वलत् ५ मध्यमूलेवीजमंत्रंसर्वमीशानमन्दिरम् कल्पकोटिरवैर्जोड्यंमायाकारमवाप्य
णम् ६ तच्छ्रुतेऽतवाक्येनधृतभाराऽपयोनिधेः तस्यपूजनमात्रेणसर्वमैश्वर्यमर्ज्जिवाम् ७ पूजनैरुम्नैकेमासेसप्तम्यांरात्रि
मध्यगेहेमवृक्षंविधानेनपूजयेत्यःसमाविधिः ८ कृपणःसर्वसद्धानोनिर्द्धनोधनवान्भवेत् रोगीरोगात्प्रमुच्येतवन्ध्योमुच्ये
तवन्धनात् ९ पार्वत्युवाच अजस्थानसमस्यांदिश्यारभेहेमवृक्षंमत् कतिहस्तोर्द्धमर्य्यादाअधःकिमवधिंवद १० शिव
उवाच वड्त्रिंशद्विनुवाणौधैरधःपञ्चविशालवित् चतुःकोणमहःसेवातदधोवृक्षमर्हति ११ वहुदेवगणास्तत्रनन्दन्तुदेव
कन्यकेसूर्य्याभूर्य्याइमेवामेवोधस्यस्त्रियोवत् १२ वृन्तसमारोप्यहस्ताभ्यांकपुरागरुचन्दनैः लोचनाभ्यांजवैज्ज्रीतंकेनके
दर्पयामिनः १३ अघत्प्राणमिहोच्यतेव्रणमधुप्यामाप्रवीणाधरांडष्टङ्कजलजेशरोरुहलसद्वेणीमधःकोकिलः एतंप्रा
णानिहन्यमान्यमानमधुरैरासाध्ययोगेश्वरैः किवन्त्येचहुमपूजनेनदिवसैःस्पर्द्धामशंकरः १४ हेमवृक्षस्तुसत्ताच्यांकृष्ण
राधायुतःस्वयम् कृष्णंपाषाणजःसाक्षात् गोपवृन्देश्चवेष्टितम् १५ स्वेतस्फटिकसिंहासेरत्नकुण्डलमण्डितम् दिव्यमञ्जी
रसंकासंकणाकोत्तमवन्दितम् १६ कीरीटमुकुटंदीर्घसषवाणौधवर्द्धनम् तुलसीकुलकान्तारबिल्वमाकारसन्निभम् १७
गुञ्जमालंहयाभारंरूपराजिवलोचनम् वटमूलमिषद्धास्यंपीताम्वरमवेष्टितम् १८ एतद्रूपधरंकृष्णांकरम्वमूलसेवीनम्

ध्यात्वासर्वफलंप्राप्नुसर्वदाकलशोत्थितम् १९ द्वात्रिंशद्धस्तकेउर्द्धे विंशद्धस्तमधः परम्पूर्णदीव्यतरंधाममर्य्यादामप
पुरितम् २० तत्रसिंहस्थलात्पूर्वेतस्मिन्मण्डपमधगेकूलरूपाशिवापूज्याशिवभागस्यमध्यगा २१ कान्चिकरकलेरु
ष्टकर्मकोकीलकुजिता एतद्रूपधरामासापितत्रैवशोभिता २२ येनयेनवलाडईसूर्यसम्मितवासरम् सर्वमीशमयंक्लैशंव
न्देवृन्दसमापतिम् २३ कृष्णाराधासुसद्धाधास्थानात्पश्चिमभागकेशतहस्तमितंदेविनदीतीरसकक्षयः २४ पाषाणविग्रहः
कुर्मःविल्वकाष्ठस्थितःसदातत्पृष्टेमंत्रममृतंहरेरष्टाक्षरंप्रिये २५ नकुशौमन्त्रपूतौशिवधनुजधरौभावुजाङ्क्नसघोपृथ्वीपा
तालमेघेमनशिजशिषरेरषकेम्विर्ज्जजातौतत्पार्श्वेवज्रधाराविभजनसमयेकोललोलीम्वराजेसवीर्य्यपर्मकर्म्मकनकजर।
चितेचोर्द्धशालम्वितस्य २६ इत्यभीतिकरंरूपंयेनयेनाभिवन्दितम् परंपरतरंसोघ्रंशोणितोधामहानदाः २७ तत्पूजनंदशम्यां
वैकार्त्तिकस्यान्हिकेतरेनेनसर्वफलंजातंपूर्णापुरइतिरितम् २८ कुर्मस्यान्तिकसत्स्थानेवहुरतनपश्विनी पक्षिरूढाकलयुक्ता
शिखरेकलशोस्थिता २९ तस्याउभयपार्श्वेवट्टोवालौपरमोत्कटौ कपालभषयालौचद्विविवासकौचतौ ३० तषापूजनमा
त्रेणासर्वमिष्टफलंलभेत् जमपलीगव्छेन सस्वतंकेचिदद्भुतम् ३१ कुर्मकर्मकलैर्येनकार्त्तिकेनित्यमुत्यठेत् पुत्रवित्तसु
घाद्यैःसर्वदाश्वियुतोनरः ३२ कन्सयस्थानतःकान्तेउदिच्यांसूर्य्यमण्डपम् वहुरत्नयुतंदीव्यंमेधमण्डलमण्डितम् ३३ पा
दक्रोशोर्द्धगशोध्यंग्रधोदशमितंवपुःपृष्ठपाषाणवेणाद्यैरर्चितंज्योतिरद्भुतम् ३४ अलंकृतमयीमूर्द्धावेदाङ्कंयन्निरूपित
म् तीर्य्यगरूपंशिवासाध्यंवेणीवोधमयमहत् ३५ द्विभुजस्त्वरद्भालःकृशोदपरात्परमतात्तूकैर्दानवादीशंयेनवोधीतुमर्हति

३६ तस्यसूर्य्यस्यपूजातः सर्व्वसिद्धिंलभेन्मनुः पूर्वंपूर्वाभिषकेनकोजवः केनहारितः ३७ कार्त्तिकेपञ्चमीशुक्के सूर्य्योस्तेयेनपूजि
तः पुनषष्ठीप्रभातस्वपूजयेच्छूद्ध्यान्वितः ३८ तदामनसिनिर्विघ्नंपषाणमिवहनुमित् सघः सूर्य्यपुरंगच्छेत् सत्यंसत्यंर
वरानने ३९ सूर्य्यमण्डपतः प्राच्यांशनद्धस्रमितंशिवेदहस्तोर्द्ध्वंचत्रअधः पञ्चरूपंनारदसुप्रभो ४० पषाणेरत्नसिंहासेकोटिसूर्य्य
समप्रभेवेदासनकलेयुक्ते विभुषणमधः स्वधे ४१ नररूपधरन्देनारदंपूर्वेनारदम् वेणहस्तयुतंदोर्ज्जयवनमालाविभूषितम्
४२ तत्रषोऽशाहस्लायपत्रपीढमयंस्वयंनत्पीणेपरिह्रींमन्त्रप्रणवचादिरुल्लसेत् ४३ अधोवलकम्वलमर्धपत्रंशरोरुहश्चन्द्र
प्रभात्तक्षेत्रमतलोशिशोषार्च्चितपादपल्लवंभजाम्यहंनारदमर्षपूरितम् ४४ पदिक्कयायादशरः सरोकरंभूदम्बूकेलोचनकेशर
स्यफलैरकेलैरकृणादिरर्च्चितंपरात्परंपूर्णमथः परयुमान् ४५ विभूषणाघैरपिमर्गपूरितैरुहश्रितैरेषिकलैरवामृतैः अहः प्र
पूज्यः शरच्चाद्विचोदिशात्प्रभुः पदात्माकुलंदेवतादिभिः ४६ नारदेनसमानीतावाणीब्राह्मणसंमिताप्राणप्रीतिककरादेवाः
सर्वेक्रोविदसंस्रता ४७ जलैरूपदिशादिष्ठावारणींवर्मेणपूर्णगाम् हरहारहरौधेननारदस्यामृतंवच्चः ४८ तत्पूजनात्स्पर्श
नदर्शनाधहरन्तिपापानिभवन्तिसज्जनाः जयन्तिशत्रुन् प्रक्षयन्तिदोषाऊर्ज्जेशितेमध्यत्रयोदशीके ४९ इतिहासभवेदुर्गा
सौभाग्यंचोपवृंहितानारदोपार्ज्जितंपुन्यंस्थानमेतादृशंशिवे ५० एवंवरमिहस्थानेविष्णुपादोदकंशरत् तत्रगन्तव्यमा
त्रेणसवीरः सर्वकाञ्चनः ५१ इतिश्रीशिवपार्वतीसम्वादेहरिहरक्षेत्रमाहात्म्येतृतियोऽध्यायः ३ पार्वत्युवाचअहोना
थवचश्चेदंश्राविलंश्रावितंपूर्णपूरितम् येनविज्ञानमात्रेणसर्वसिद्धिः प्रजापते १ कोटपीनतरेर्मुद्राभाषितापूर्वजन्मनित

त्वरंकोटहर्म्यस्थानंदर्शयत्वंमहाप्रभो २ शिवउवाचआसीत्कोलापुरेराजाहरसिंहेतिनामकः क्षत्रियः सर्वविन्सोघोगुणागारकला
धरः ३ धर्मिष्ठोब्राह्मणोदारः कामीकर्मयुतः सदागायकेनसमाप्रीतिः पापीमर्दनमुद्वहः ४ तस्यपुत्रास्त्रयोजातागोपालः शिवन
न्दनः श्यामसुन्दकोनामापरस्परधुरन्धराः ५ विज्ञातायेनरचिताः कलाधारप्रपूरकाः सर्वशास्त्रार्थनियतादयोचित्तप्रमेहका
६ तद्राज्ञाकोटमरितंचतुःकोणसमावृतम् पूर्वपल्लवितंशाक्षात् कीटाम्बरविवेष्टितम् ७ तलपीनतरांमुद्रांसंत्वयेत्सर्वतो
दिशाम् विभूषणमतःसाक्षात् सर्वैरीशंकलानिधीम् ८ विल्ववृक्षंगराकारकोज्वलंपर्वतामृतम् तामसेनसमायुक्तंचर्म
णाकलुषेरहत् ९ वेणानाम्नीसुधाकन्याराज्ञः स्त्रीधर्मचारिणीकल्यवासीउदारांसीवन्धुनार्हतिसर्वदा १० गीतातस्यासुता
एकजूल्कानामवतीसतीविवाहितादक्षिणापुरेराजत्रेणाहे प्रिये ११ एकादशायुतंकोढंसुवर्णंदत्तवानसोपुष्पकीटकराही
र्धयजद्वात्रोपुरोहितः १२ शिवमन्दिरतः शान्तेउत्तरेवन्तसन्निधौपादार्द्धक्रोशतः उर्द्धंअधपुउषकद्वयम् १३ कोटसुवर्णप्र
तिमाराज्ञःराज्ञीस्तूतास्तूताःप्रस्फुरन्तिसदारात्रेसर्वदापार्वतिध्रुवम् १४ एकस्मिनमन्दिरेकान्तेराज्ञोरूपंसुवल्लभम् वहु
ग्रंसूर्य्यवदीव्यप्रभाकारसुतेजसम् १५ मनुष्ववतकौरेरंकेनेक्षतेप्रतिविम्वत् ततःपश्चिमकेभागेपञ्चपञ्चाशतंरपुः १६
अधोद्वादशहस्तवरज्ञीरूपंमनोहरम् सर्वभूणासंशोभ्यंसुकल्पयमनोपरम् १७ ततःसमीपंपूर्वेद्विहस्तमूर्द्धपञ्चकम् अधः
सुतस्यचास्थानविभूषयुतंविभुम् १८ तस्यपूरयतोव्रह्माअङ्गैरेवाश्रितःसदाकोलेनविल्वपत्रेणपूजनंसर्वफल्गुनाम् १९
नारीकेरेणजलकेर्मषजोसेनहेप्रियेपूजयेद्भक्तितोभ्यन्त्कांसर्वमीश्वरमीरितम् २० तस्मात्वसान्फलंरेमेकामैःसुफलैःप्रिये

27

५

तत्फलेलरास्वादुः स्वर्णवृक्षसमजहम् २१ तस्यवृक्षस्यसत्पूजाकरोनियमः सदासर्वसिद्धिमवाप्नोतिशिवलोकंसगच्छती २२
धनमैश्वर्य्यमतुलंपूर्णमायुयुनिभवेम् इष्टसिद्धिमिममांलंभ्येत् सत्यंसत्यंवरानने २३ पार्वत्युवाच शृणुदेविप्रवक्ष्यामियेनम
भ्यन्तरार्चनम् सवर्णवपुरत्कान्तेहरसिहस्यजाशयः २४ शिवउवाच शृणुदेविप्रवक्ष्यामियेनमध्यन्तरार्चनम् सुवर्णवपुरत्का
न्तेहरसिहस्यजायते २५ अहः प्रतिसदातेनसुवर्णभारविंसतिः दत्वाविप्रादिकेभ्योवैउर्ज्जेशुक्लतरेतिथौ २६ रवेःसहस्त्रभा
रसर्वेषुभारंविंशतिः देहिप्रापपतुंसघोधर्म्मोर्थेन्नृपतिर्वरः २७ इतिपुरायवशादेविमृतेकाञ्चनगवपुः तत्पुत्रस्यकलत्रस्य
तद्वपुः पृथगाचनरत् २८ एकदाववनंराजागतोमृगसुपेटकम् तत्रशत्रुगणाः सर्वेप्रययुः स्वबलैरुहत् २९ अतोयत्रवलं
पाघत् प्रतिविम्वफलंयथाहत्वारिपून् तुरंराजाविषमेषुसमाविशत् ३० तत्रपुरीकरोत्सर्वविभ्रूतिवरसंयुतम् विघावारे
त्सर्वेरेतेकिमघंवहुशः प्रिये ३१ तत्रमतिमनोराज्ञोहरसिंहस्यभूपतेः मन्त्रमुच्चार्य्यविधिवत् शुद्धात्मानोनिरन्तरम् ३२ स
राजागृहमागत्यसर्वकार्यमनातुरम् स्वदेवकुलदेवानांपूजांवक्रेप्रयत्नतः ३३ सपुत्रादिकः पूर्वमुखः पर्णपत्रसमावृतम् त
त्स्वरूपमलंकारंमठेपीडस्सस्मिनम् ३४ तत्पीठेचसुवर्णस्यपञ्चान्तरसुसंयुतम् तत्पूजनकूलदेवत्वत् सर्वस्यदसुना
मकम् ३५ विद्धिपरंपराकृतयेनोत्थाप्यसुपत्रकम् एतत्सर्वंचवस्तुकोटकस्यानतोलघुः ३६ समीपञ्चसमीचीनंदेवस्थानंच
तुस्तुलम् सर्वंक्रतुनरेविषतत्सर्वाभरणपूरितः पूजदर्शनात्स्पर्शात् समंफलमुदीरितम् कार्त्तिकस्यशितेपक्षेदशम्यांहरिमवे
तः ३८ प्रकठितवाहनतः इष्णोतियमसासनम् इदंमाहात्म्यंप्रभुणाश्रुतंदेविममप्रिये ३९ कोटकस्थानतः प्राच्यांदिशात

करप्रभम् अधोरुद्रमितंहस्तंमण्डपंपार्वतीशुभम् ४० तत्रासीत्कालिकादुर्गासर्वभूषणभूषिता सिहस्थाष्टभुजीनरपालक
गासदा ४१ मण्डपेपरमेशान्येचलिपुष्यादिमण्डिते पूर्वेद्वारंसुवरदावलपुष्टिकरीसदा ४२ कार्त्तिकस्याष्टमीकृष्णासर्वपात
कनाशिनीपुष्पंचन्दगन्धवैः पूजयेत् युग्मक्षेत्रके ४३ पुष्पान्जलिपुटोभूत्वानिशिकालींपरंस्मरम् ववधेनिश्चिरात्मानंसर्व
दायकरांलिके ४४ सिद्धिपृष्टंवत्स्यानंविवितः कुरुतेक्रियांएतत् सिद्धिस्थानमुदितंसर्वकार्य्यार्थसाधनम् ४५ परस्यवपु
षसाक्षात्धनंलोभादिनाहनन् सर्कराशनमन्तुतेप्रियवादरतेवले ४६ तेनतत्सिद्धितांयातिमनोज्ञंपूर्णकारणम् तत्स्था
नात् पश्चिमेभागेद्वाविंशत्तमेकरे ४७ प्रहर्षादेवकन्यैकासर्वसम्पन्नसंयुताः विभिरेमन्दमठस्येसुस्थलेऽद्भुतकर्मणा
४८ सुरर्षोमहतीप्राज्ञीअधःषडवधिंवरतत्सुतात् प्रवरः कान्तेजलतेजसकोर्भकात् ४९ तसिन्दुरास्तमभवत् उर्ज्जे।
द्वादशांगेरवौपुण्यक्षेत्रेचजहत् पापमत्यन्तमादधत् ५० नहुपापंविनादेविश्रुतनितीपरापरम् इष्टसिद्धिमहःपूजाक्र
रेनष्टफलंभेत् ५१ तस्यादक्षिणपार्श्वेचचक्रंहरिहरस्यतु चतुः कोणमधःषष्टंकोणाकवर्त्तुलाकृतम् ५२ तस्यपूजासु
विधितोभवेज्जंमनिजन्मकर्मकष्टंचदोषोत्थंहरतेतस्यदर्शनात् ५३ इतिश्रीशिवपार्वतिसम्वादेहरिहरक्षेत्रमाहात्म्ये
चतुर्थोऽध्यायः ४ पार्वत्युवाच कथंकेनेदमजहत् पूर्णकल्पशतंपरम् एकः सर्प्पश्चप्रभवोविश्वभावनभावकः १
जलैःकर्द्दमैःस्नानंकरोतिनियमेनवै तस्यपार्श्वेवसन्तेतेसर्प्पादिकोरणाक्रिया २ तेसर्वाभिष्टफलदासुवर्णप्रतिमाकृ
ताः तत्केनकःक्रमाहन्यकथयस्यममप्रभो ३ शिवउवाच शृणुदेविजगद्धात्रितेसर्पाः शिववल्लभाहरसिंहस्यदेवे

ज्याः दाखादानफलादिह ४ तेषांपूजाशितेउर्ज्जेपञ्चम्यांवरसः प्रभुः धान्यलाजौदिकैर्डधैः शर्करासंयुतैनरस श्रीमानधनधन
सम्पन्नः सर्वदाचनिरन्तरम् तत्क्षीरंपाययेद्योवैसर्वविद्यानिधानकः ६ वर्षमध्येभवेत्सिद्धिः सर्वकार्य्येसर्वदापूर्णवलं
चविदधेत् नरः कान्तेविशुद्धतः ७ सर्प्यस्थाननतः पूर्वेनैऋत्येच्यवन्यस्थलात् धनुश्चरामचन्द्रस्यसर्वलक्षणलक्षितम् ८ च
तुर्हस्तंभ्रुवाशेधंरंधिकापञ्चभिर्युतम् दक्षिणोत्तरदिशिजंघ्यङ्गुलंपापमोचनम् ९ पाषाणविग्रहंशङ्खपवनैर्वेगसंयुतम्
एवंविशेषतः प्राभ्रुत् मन्त्रमण्डितसुन्दरम् १० पूर्वाभितगंद्धानंवहुरत्नादिमण्डितम् कोशजालान्वितसघः पूर्णवीरोभ्रु
वंशिवे ११ पार्वत्युवाच अहोनाथममोत्साहः श्रोतुंत्वन्मुखाञ्जसम् किंधनुः कस्यइचरः कथमत्रसमागतम् १२ श्रीशि
वउवाच शृणुदेविप्रवक्ष्यामियेनवोधस्तवाव्दकः तत्सर्वविस्तरात्पूर्वंकथयामिनसंशयः १३ एकदाराचन्द्रसुत्रेताया
सूर्य्यवंशजः ताडकानिशिचरींहत्वाविस्वामित्रेसंयुतः १४ लक्ष्मणेनचभोदेविआगतोयुग्मक्षेत्रकम् तत्रदृष्टावहूनजीवा
न् सूर्य्येनवसुसंकिताम् १५ कल्मषैरेवप्रहर्तंसूक्ष्मशेषरमण्डिताम् कृत्वावहुविधिंयत्नात्द्रक्षार्थस्वयंप्रभु १६ गण्डकी
जाह्नवीतीरेकोणेवृक्षकटंभूवनसावधानः प्रभुरस्माद्धिमान् प्रियकलानिधि १७ लक्ष्मणंप्रत्युवाचगलदेशाकम् तत्रवहु
गणावाणासुद्दपुष्टन्वितावतः १८ तन्मध्येवाणाइदुरः न्मारयतांशीघ्रलक्ष्मणः अत्रकुरध्वजोडष्टोवन्धुः रावणकस्यवीत् १९
अवस्यंबन्धयित्वातस्यस्युरीमनमत् गिराम् इतिश्रुत्वातुरवीरः शेशसन्निभसस्कतः २० वोलदेशंगतः सान्सान् धनुरानितवा
न्सौतेनवद्धोनितादुष्टोतीरेगण्डकिकादिशान् २१ तद्धनुद्वयन्तस्यश्रीरामस्यवरस्यनतत् स्थापितंतेनवयसातीर्थेवक्षोभने

सदा २२ तत्रगत्वावलंलभ्येत् स्पर्शनाच्छुलिकादिकम् सर्वमैश्वर्य्यमतुलंलभतेतस्यपूजनात् आश्विनस्यशितेपक्षेदश
म्यांमध्यगेरवौयः पूजयतिनियमात्तस्यवर्द्धतआयुषम् २४ तधनुरभवत्सर्वकल्यानमपिउद्वहन् उर्य्यपित्वासदाभस्मअर्पि
तंयेनकर्मणां २५ तद्धनुःस्थानतोंदेविज्ञावाक्शंतंकरः गणेशमूर्त्तिःसुभगाअधोद्वादसहस्रकम् २६ मण्डपेरत्नसंकाशेम
होत्स्नाशसुसंयुते मकुन्दफटिकेशङ्केविदधत् मूर्त्तिसुप्रभो २७ सगणेशश्चतुर्वाहुःसवलःसुखगेहकःपापनाशकरोदेवसुप्र
भस्तेजसन्निभः २८ तस्यपार्श्वेसुसद्विप्रः पुरुषःकर्मधारकः विष्वक्सेनइतिमोतिवेरकम्पितवानसौर्ष्ट सविप्रोब्राह्मणोद्धे
गःसूतःरूपधरोग्नधःकृत्वापूजादिकंकर्मवभुजेमध्यगेरवौ ३० कलाकाष्ठान्तकंविघुस्त्रकोपानलतेजसम् सर्वसर्वोत्त
मंयावत् सर्वप्रियवर्द्धनम् ३१ तंगणेशंचवन्देयःकान्तिकापमकेतरे सूर्य्यतिथौतुर्य्यतिथिजेमान्तवेधयुतेशिवे ३२ पूज
येद्दूर्वमध्येतुश्रणुदेविसदाचयः पूर्णविद्यांसुलभतेसर्वमीश्वरमण्डितम् ३३ वस्त्रपीतेनार्सवेणयेःकृतपूर्विश्वसयुतेहर
मित्कल्पजांवाणींप्रलभेत् वलचारिणीम् ३४ पुत्रवित्तसुमनसाउज्जितोयेनसंस्कृताः नित्यंविभूतिदधतेयेनसर्वास्यर्द्ध
लभेत् ३५ गणेषंस्थानतःप्राच्यांहस्तपंचदसान्वितम् उर्द्ध्वाधःसप्तमितंपाषाणगृहसोभितम् ३६ स्वेतपीतंवकृष्णाचहरी
तंशुभ्रराजितम् कणाकोज्वललध्वश्चपशुरीश्वरभावकः ३७ तस्मिन्सुमन्दिरेदीव्येमूर्त्तिःश्रीरुद्रकस्यचित् रुद्रमुखप
न्वकल्कस्त्रिलोचनइतिस्थितः ३८ सहरश्यामरूपश्चचतुर्वाहुसुसोभितः वंशाहोतुवृषंचाग्रेकणाकोज्वलितन्वतत् ३९
पार्वतीसहितःसाक्षात्चन्द्रभालविराजितः यग्योपवीतोपधरसर्प्पमालाविभुषितः ४० व्याघ्रचर्मपरीधानाःसुलोचनव

लोत्करः पूर्वद्वाराभिमुखकोरलसिंहासनंस्थीतः ४१ अजकामरिपुर्देवसर्वभूतकलानिधिः शुभः प्रदीप्तःकमलेदीप्यिमानः
सदाशिवः ४२ कार्त्तिकस्यशितेकृष्णोपक्षेरुद्रमितेतरेपूजनसुविधानेनविल्वपत्रेणाक्षतैः ४३ ह्रीं पञ्चवारमुच्चार्य्यप्राणावं
तदनन्तरम् विशेषेणायुवावीरःशिवेनसहमोरते ४४ विश्वम्भरः प्रजाध्यस्तपार्श्वेचनायकः जमकिकरकस्यासेवरःसुगकोव
ली ४५ अद्भुतंचरितंकान्तेमनोविकलवेष्टितम् शिलाएष्टंतरौरम्यंसूर्य्यपुत्रसमीपगम् ४६ शिलापाषाणजंदेविचक्रंपंचदशास्र
तम् प्रतिगृहंसुहृन्मन्त्रंचन्द्रलेखेवसत्कृतम् ४७ मधुरवणः साक्षात् विजयसुभटः सदाचक्रेणाचजहत्शीघ्रंपिभूतिकमलाशन
म् ४८ तत्प्रमाणामिहश्रेण्यः शोभमेचवरासनेलक्षनेकन्तुतन्मन्त्रंवीजयदायकम् ४९ तत्सन्निधिगोरक्षोभिनिम्वस्यापैणो
ष्णाम् करोति पध्वसुगमना सर्वमिष्टंफलभेत् ५० गोगीचजपमयुतंकारयेत्तुरमाहरेत् अधनोधनसंपन्नःप्रतिविम्वफलैय
था ५ इतिश्रीशिवपार्वतीसम्वादेहरिहरक्षेत्रमाहात्म्येपञ्चमोऽध्यायः ५ पार्वत्युवाच एकदाशिस्यरासीनेत्वपिभारत्
सन्निभेकवितंप्रतिमांस्वामिन् रूपंहनुमतस्त्वया १ युग्मक्षेत्रस्थितंवायुसन्तुलहनुमान् इहकरोतिविपुलांलक्ष्मीनस्यदर्श
नमात्त्रतः २ सुहृमन्दिरतोवह्निःकोणकेपारक्रोशकेउर्द्धं अधोमनुष्यमात्रसुवर्णपट्टिकोस्थितम् ३ पाषाणजंश्रीनीत्यासासुस्क
रासीतियोस्थलम् चतुःकोणसुवर्षाणोजिलवः प्रतिभूधरः ४ तन्मण्डपंसुपरमंसुवर्णमयपूरितम् दीर्घपुच्छधरः पांशुर
ल्यशोणितसेषितः ५ रक्तवर्णःपणकारःकोलविल्वेतसंयुतः कर्मस्थाःकाकनीपक्षःश्रुतविग्रहकारणः ६ तपस्वीयजम
न् चात्मावहुवेदपरस्वधः रामदूतोवलिवीरोमर्कटश्शिशुधृक्तनुः ७ कटुकोलावणास्तिक्तंमधुरंसर्वसरसम् स्वादकोद्

ह·म· ष्टभुक्कल्लीनगतोध्रुवमिक्षतः ८ सीताप्रीप्रिकरःसेव्यः सूर्य्यमराडलसेप्रितः महिपतिः महोत्कामः कल्पसेषकरेस्वितम् ९
८ एवः सर्वेदिशिस्थतुंमहावलहरः परः प्रभुरासीत् गुणात्मावैयेनकारणमिच्छति १० सर्वमिष्टफलंविन्देत् सर्वकाममवाप्नोति
वलार्थीचवलंविन्देत्धनार्थीविपुलंधनम् ११ कर्मभूपरंहित्वापभुरीश्वरएनितः तद्रार्थवयुषोर्ह्यात् कूलविस्फुरमानसम्
हनुमास्थानतः प्राच्यांहस्तंद्वात्रिंशदिरितम् अधः सप्तमितंहस्तंतालकादेवनिःश्रितम् १३ विहरेत् विश्वविधितःकुलंकुत
नयाशिवेसभागौरीसुतायुक्तेः संस्थितातत्रपार्वति १४ साचगौरीदारुमयीशिवयुक्तापुरंदरीहस्तकर्णतलैःसाक्षात् भगव
न्मूर्णवेष्टिता १५ तस्यादासीविभीष्येकान्तरशञ्चपुरेवसत् साकठोराम्भतावार्णीविभिरेसर्वतोदिशम् १६ तस्यागौर्य्याःप्रभा
सायाः कर्त्तुःसर्वदिशांभजन् सर्वसिद्धिः समाकामश्चभवेत्तस्यचपूजनात् १७ गौरिस्थानतःसुद्देदक्षिसोहस्तसर्वेरीउर्द्धनीच 30
मिहासीहूंमनुमात्रचभोप्रिये १८ वर्तुलाकारमिहसत्कान्तिव्यमनासहहध्येत्सूत्वंकलस्त्रस्यभाराडेताम्रमयेशुभे १९ तत्पात्रेस्व
त्रसीशानंवहूच्यामेग्रसेषितम् त्रिलोकमकरोत् छत्रंयथापारदोमणिः २० तेः सूत्रैःकार्द्धितैःपद्मसानुकूलंचतुर्दिशम् प्र
मतशमयेराजाहरसिंहउदारकः २१ प्रत्यहः पूजयेत्सूत्रंविधिनान्नृपसत्तमः कल्पकोठिशतेरासीन्नपतिश्शोणपुर्ग्गरे २२ अ ८
परञ्चतत्पुत्रादीनलंधयेन्मुक्तिमिदृशीम् सर्वार्थमलभत् दीपंसर्वदासुश्रियासहः २३ किंचरित्रंप्रजापत्यंहर्नयेसिंहकेध्रु
वम् एतच्चरितमेधाव्दमेकंप्रत्तिसदानधे २४ यत्किंचिद्वद्धःयावालेतदीहमोहतेप्रिये क्रियतेचसदाकार्य्यंविश्वशेनःपुरोहि
तः २५ ब्राह्मणोविश्वसन्देहःप्रवणः प्रियनन्दनतस्यापिस्थानमथउत् प्रमाणंश्रणुपार्यति २६ गङ्गातीरोत्तरेभागेवशिष्ठ

नामब्राह्मणःविद्याशीलयुतःश्रीमान् कर्मणापिनिरङ्कितः २७ सहदेवःकनिष्ठश्चतस्यभ्रातासुधीरवान् तस्याद्भमेकजिह्वि
येस्वहस्तपाककारकः २८ अतःस्वक्षवसेराजापूजयेत्तपुरोहितम् एकदाव कस्थानेदेव्याःप्रयत्नतः २९ करोतिसद्विजोनि
ष्टःसर्वलोभादिवर्ज्जितः दैवयोगवशाकस्मिन्पीतमुद्रांहरेद्दिवा ३० तद्दोषवशतोविप्रोमृतेभवतिप्रस्थलः तस्यापिपूजनंकृत्वा
नरःप्राप्नोतिसत्सुखम् ३१ तद्ब्राह्मणतःस्थानात् पश्चिमेसुस्थलेकुलेपूर्णवित्तयुतःकान्तःसर्वभूषणभूषितः ३२ शतद्वयमितं
हस्तंउर्द्धश्रीरूपमद्भुतम् तत्पार्श्वस्थउमानाथःईश्वरःपर्वतान्वितः ३३ तत्समीपगतःसूर्योनिश्रतेपक्षवाहकःसप्ताश्वरथारू
ढोद्विभुजोदीप्तितेजसः ३४ तत्समीपेधनुर्युक्तोपार्ज्जनःकुन्तिकायुतःद्रौपदीचभुजोद्दसेपूर्णनिर्भरमानसा ३५ एतेदेवाविराज
न्तेकुर्वन्तिविपुलंजसः पूजनात्स्पर्शनाद्वापिपूर्णमाप्नुफलंलभेत् ३६ अपरन्त्वाश्राव सर्वेस्पर्शान्तिकरुणानिधिम् रोगीरोगात्प्र
विशाजन कुरुतेद्विसुखंपरम् ३७ सुखमत्यन्तमभजत् विसृजेत् विपुलंधम सर्वदत्तगुडर्विघ्नेसुपरत्वंहिपरस्परम् ३८ तच्छ्री
स्थानुमभःपूर्वेद्विसहस्रधनुर्मितम् पञ्चहस्तमितंदेविपञ्चपाराडवमन्दिरम् ३९ वहुरत्नयुतंदीव्यंसहस्रादित्यतेजसम् चतु
र्वर्त्तंसुधाकारंकमलोत्थानभासकम् ४० पूर्वद्वारंचतुर्दिक्षुसुमनोहरपूर्वकम् अछिद्रंभद्रसतीतंकञ्जुखोपमभासजम् ४१ ह
रिप्रियंप्रभाकाशंजलदेःपप्नुवारधेः समुल्लसतिवेगेनविभिन्नसरसेसदा ४२ कंस्थानंजनंभेदेकिंपुनःसत्यवाद्दसेःविभूतिराज्ञां
विधिजेसुखदासमिहोषधी ४३ तत्रासीत्यन्वभ्रातारोयुधिष्ठिरप्रतापिनःप्रतापीसुकलोविज्ञोविभूषणइतिस्मृतः ४४ सुदर्यो
गुणग्राहीचप्रभाकरकरान्वितः एवंगुणातरंस्तुत्येभ्रमणात्फलंपरम् ४५ स्वचारनियतायेनकर्म्मणायुग्मक्षेत्रकेकल्यकोटिप्रा

तंयस्माउक्तचरितमङ्गनम् ४८ इतिश्रीशिवपार्वतीसम्वादेहरिहरक्षेत्रमाहात्म्येषष्ठोऽध्यायः ६ अथातः संप्रवक्ष्यामि महा
त्म्यंसर्वसम्वरेः येनयत्कर्मसुचरत् तच्छृणुष्वममप्रिये १ हरस्थानतरात्पूर्वेहस्तंकरस्मात्तद्व्यमन्त्रधोदशामितंहस्तंपक्षिणीम
न्दिरस्मृतम् २ कल्पमरालसदृशंसूर्यमण्डलसस्पृहम् मणिमाल्यपुटंपद्मैनाश्रितंचसदानघम् ३ कर्पूरसदृशंदीव्यंसप्रा
न्वितमद्भुतम् तत्रस्थादेवमातासर्व्वभूषणभूषिता ४ अधोमुखीकृष्णाकिप्राकशोहरिहरप्रियाअतिविस्तारवदनाजीह्वलत्तन
पूरिताः ५ सिन्दूरभूषिताकालीवलपुष्टियुताशिवा अर्च्यतेभक्तितःशाग्न्वायोनुषङ्गःप्रसादतः ६ सर्वसिद्धियुतोवीरःसूरशेश
रवर्ज्जितः कलाभिज्ञश्चसततंसूतमागधवन्दितः एवविशिष्टोमनुजप्रचावश्यंतत्प्रपूजनात् उर्ज्जेलषोत्रयोदश्यांसन्ध्याका
लेसुरागमत् ७ विभर्त्तिपादयुगलंशंभुसिन्धुप्रभान्तकः अवश्यंतदवश्यंचतत्फलंप्रवरंभवेत् ८ पक्षिणीस्थानतःप्रान्तस्था
नेकिंजल्कमिदृशम् प्रियंवदमितंयुक्तंतत्प्रमाणमिहोच्यते ९ गोमुखीसुन्दरीएकातन्त्रतिष्टतुसदाप्रियेउर्द्धेत्रिंशन्मितंहस्तंत्र
धःपञ्चगुणंस्मृतम् १० विभूषणयुतैर्मूर्ध्यसुद्धतेजसमूर्द्धजम् दीर्घ्यसिंहासनेस्थातावल्लपुष्टियुतानघे ११ तस्याउत्पादनंवक्ष्ये
योगंकल्पेनसुन्दरि वशिष्ठगुरुणाउर्द्धेमतिस्थानसमुत्थितम् १२ वलयुक्तियुतंवीरसूर्यप्रभुप्रभूतकम् कूललाक्षणतःसुद्धंस
र्वेदाशृणुपार्वति १३ उर्ज्जेकृष्णोत्रयोदश्यांपूजयेत्प्रतिपद्दलैः गोमुखीगोध्येभजहत्सर्वमीशानमेत्रितम् १४ पूर्णमैश्वर्य्यमि
हतेतद्दर्शनप्रभावतः विश्वखण्डमतःकूलंकेनशुद्धासनंसूहत् १५ प्रतिकमिवमेकाश्यंसूर्यमीशानमन्दिरम् तर्प्पणीतल्पकं
मेरुसुद्धमीदृशावाहनम् १६ जल्पयन्तिसदावीरवाहवैः कर्मजंकिलकूपस्थायुद्धसहितावोधवेनसुउर्मेदा १७ मन्दवीरहितार्था

यकल्पकोटिशतैरपिभवभूतप्रवीराणाधैरल्पयशःकोटमद्दहम् १८ तद्दर्शनात्पूजनान्मुक्तिलाभंसदाप्रियेपूर्णमैश्वर्य्यमद धतूचन्त्र
चूराणामीरितम् १९ मंहमन्दगतंगच्छेत्ततस्मैरघेत् भिपाश्रवेः अहःप्रतिसदापूजांकरोतिनिरामदितः २० गोमुखीस्थाननतःप्राच्यां
हस्तद्विशतपञ्चकम् अवगर्भाराजकन्याबहुभूषणभूषिता २१ मणुपस्थाकलायुक्ताकर्मेदान्नाप्रियंवदासुवर्णशहशाप्राणी मो
तिमाल्येनसंयुता २२ पुत्रयुक्ताशुभस्यातापूर्वद्वाराभिगासदावहुदेवगणैरासीत् नवलोचनलोचिताः २३ उर्ज्जेष्टम्यांशितेपक्षेरोहि
णीगर्भेसस्थित मार्गशीर्षेशितेषष्ठ्यांपूजानियमपूकम् २४ श्वेतारुणयुतैःपुष्पैःकल्पतेकरुणादिभिः उद्दैरादिभिरासाभिरर्ज्जेनेक्षे
लसूर्यतः २५ कल्पतेसूत्रतःसाक्षात्वलिरातःपुरातनम् येनपाठानुसारेणभिक्षुकःकर्मभिक्षुकः २६ नारिपुत्रवतिसुद्धापू
र्वेविष्कुम्भभावतःनरेन्द्रइवसपुत्रःदीर्घायुःपुत्रपौत्रवान् २७ सौभाग्येनसदायुक्ताधनपुत्रवतिचसातस्यःपूजनमात्रेणसर्व
सिद्धिप्रजायते २८ अवगर्भाचयानारीतांपूजयतिकार्त्तिके अवश्यंपार्वतिसत्यंस्थिरगर्भाचसाभवेत् २९ कुष्टव्याधादिकान्
रोगान् विचर्चिकसुदारुणान् तस्यादर्शनमात्रेणवनश्यंततक्षणात् ३० अवद्धभिनिकास्थानात्प्राच्यांहचतुष्टयम् अधःपुरुक्षम
त्रंतुधीषणास्थानमुत्तमम् ३१ वलिवर्दयशोदायांरोहिणीतत्रसस्थितामराडमराडोज्ज्वलेदीव्येकुलसम्पन्नविभूतंमाद्यादेवीव
लासाध्वीसर्वभूषणसंयुता ३२ पूर्वद्वारमघोमध्यविषाडजिह्वलसंकुलाःकर्मकालानलिन्याश्चविभूतिवरवाहकाः ३३ सर्वम
राडलनेकान्नेमूर्त्तिस्तत्रविराजते कार्त्तिकस्यामलेपक्षेद्वितीयापूर्णभेगमे ३४ पूजयेधःपुमान्श्रद्धामकारांनित्यमनिशाम् क
ल्पनीयेयथायोग्येसुद्धस्फटिकसकुले ३५ वर्णमध्यस्थिव्येसाक्षात् विद्यावादसुदक्षिणीकल्पकोचलाउर्द्दपञ्चपञ्चाशउर्द्दकम्

३६ सरस्वतीवलोधेनप्रिष्टिसृष्टिरुदारधीः तस्यापूजनमश्वायाः कल्पवृक्षेसुदारुणे ३७ अर्चयेद्भक्तितोविद्वद्बलपुष्टिसवी
रजत् वालरूपधरादेवीसर्वसिद्धिप्रदायीनी ३८ मोक्षदाभूतिदानित्यंपुष्टिसाधनंकारणीश्रद्धायुक्तवतीवालासर्वस्थितिकल
निधिः ३९ वामाउग्राकलाधाराकलयोदितशंकरीजपजोगयतौहेमेविर्मदाकोमलाङ्गना ४० एवंविभूतपतकन्याभक्तिश्रद्धास
मन्वितैः उर्जेष्टम्याद्वयोःपक्षेसर्वसिद्धिप्रदान्तयेत् ४१ वस्त्रैनैवेद्यविविधैफलपुष्पकसयुतैः अर्ज्जयेत्कल्पयेन्नित्यंसर्वापद्वि
निवारसाम् ४२ धीषणास्थानतोयाम्येहस्तपञ्चाशसम्मितम् आनन्दभैरवस्थानंसपद्रवनाशनम् ४३ कर्मस्थंकालतालीयं
कूर्मस्थानमनेश्वरम् महावीरमधःस्थानंतत्पार्श्वेपार्वतिप्रिये ४४ तउर्द्धकुचरत्केकेकुपमध्येद्विहस्तके उग्रस्थाभास्वतीरू
पास्सूर्यस्यमल्लदेवता ४५ वाराणवाराणान्वितैपक्षैःपूर्वस्यांवदनीतटेकोकिलारूढगादेवीमाहावाहुरणोधमा ४६ इशाधाःसूर्यवा
द्उकरनान्वितःकर्मस्थानमचीकार्यकौतुकेनमहर्निशम् ४७ अदततस्फटितेवाद्येकोकौतकसंकुलेविभूतिवल्लयुष्टाकेसूर्य्यस्या
नलिनीहस्ते ४८ अर्ज्जस्याश्विलपक्षेपञ्चम्यांवात्रैयतिथौपूजयेद्भक्तितः साक्षात् विधिवोधनतःसदा ४९ इतिश्रीहरिहरक्षे
त्रमाहात्म्येशिवपार्वतिसंवादेसप्तमोऽध्यायः ७ अथातःसंप्रवक्ष्यामिहरिहर्योवधिंयथाशिवेनकथितंपूर्वंपार्वतीमतिहेम
गे १ भैरवस्थानतःपूर्वेहस्तंद्विशतपञ्चकम् नारदोविश्वविख्यातःकर्मस्थःकोलविक्रमः २ मनुष्याकृतिमादेवःसर्वसम्पन्निध
नधःद्विभुन्नःसटक्कहासःप्रभवःशुचिरात्मन ३ सुस्थदीव्यंमयेगेहेमणिरत्नविभुषितेसजलेवृक्षसंयुक्तआसीत्तत्रद्विजोत्तमः
४ तस्यपार्श्वेस्सूवादेवावहुयोगरताश्चये श्रियाशोभितविद्वेषोत्पन्नगारिकलान्वयः ५ हेमवृक्षतलेसाक्षात् रघुनाथविभूतकः

अमरारिसुरैर्दिग्जैर्मन्यतेदेवसंस्थितैः ६ पुरुषोत्तमदेवस्यषष्ठीनूनतवासरात् वलैर्नारदमूर्च्छीयाःसर्वाङ्गस्ययथोक्तवत् ७ कला
निधिःकलेशश्चकर्मस्थःकर्मवित् हरिःकूलदेवदेवरतः स्तत्रेशोणस्योत्तरभागतः ८ नदीशालग्रवाभारेतत्रशौर्यावतीपुरीमध्ये
नारदविख्यातोविभूतवरधरकः ९ वीजमन्त्रपठेत् योवैधिषणापूर्वकनिर्यवैः नारदैर्मोघमानोयःसर्वसिद्धिःसदाप्रियेकलेवर
कलान्तिःकर्मभूहूलिशाग्रानः १० द्विजस्यसर्वशीतस्यगुणवर्णनकारिणः पुन्यात्मासर्वधर्मस्यपूर्वदक्षिणतक्रमात् ११ वलिपू
जोपहारैस्तुपूजयर्यववासरैः करणामासतिरेतिथ्यांवारेऽनलनिसंयुते १२ अर्द्धरात्रौदिवामध्येयःपूजयतिभक्तितःसपुन्येनरतः
श्रीमान्विधिरेषावधिंवदेत् १३ अथनारदकस्थानात् पश्चिमेधनुषस्त्रयंशिववालीतिविख्यातामहर्षीगुणपोषणी १४
अयोरूपासुधाकान्तिःकल्पद्रुमरताङ्वश्वेतस्फटिकसंकाशाहारमाल्योपशोभिता १५ चतुर्दिक्षुगणादेवाकल्पकोशैर्युताह
स्तालग्रभाख्यामाविश्वमूर्द्धानधेउकिल १६ आश्वत्थमथकोणांकेविल्वपत्रमधार्य्यवान् अदततविस्फुटैःसख्याजिद्दर्शका
मथिक्रमात् १७ दीव्यकोठेसुवर्णस्यप्रतिमातत्रवेश्मनिपूर्जमासेश्चवामार्गेविष्णुलोकंसगच्छति १८ शिववालिकतःस्थानाद्दै
क्षिणेपूर्वकोणाकेप्रभासानामराजकन्यागुणलक्षनलक्षिता १९ उग्ररूपाकलाधारासुखमन्दिरमण्डितापूजनात्तत्फलंल
भेत् श्रणुसत्यनसंशयः २० स्वेतचूर्णलताकारभवभोवितवासरम् विभेतिकलयातत्रउर्ज्जेवैशाषमाघयोः २१ कलेवरख
लैरासीत् उर्वलस्येश्वरस्यतत् कर्मैनसरैर्हृवादिग्जेगुप्तघांशोत्करैः २२ रहेतिपूजनात्कान्तेध्रुवमत्रशिरोरुहत् फलंसर्गे
गुणोपेतंयथोक्तंपविनापुरम् २३ शिवभक्तासुष्टुदेहासत्यकानिरचीचरत् वीर्थ्यीस्याकवल्पवलिनाअरुहन्नमूर्त्तिविग्रह २४

आघापुराशोभ्यमानाशिवशंकरसेवितावालरुपाषोडशाजीसूर्यस्यानिस्तवासता २५ सोमेशुक्रेवियत्कालेमध्याह्नेशुभवाससायज्जे
द्वात्रीसदादेवीसूर्य्ययासहमुद्यति २६ अथवभेशुक्रभेकान्नेविद्यापासमध्यगेवहुग्रग्रेस्थितासाध्वीसर्वमोघादिवर्ज्जिता २७ फलपूर्व्वे
वसात्कोकैर्नान्यथाभवदाप्यहम्सर्व्वोविभूतिभवलैरेषासार्वोन्नशंसयः २८ पार्वत्युवाच अहोनाथवलैरान्सीसूर्य्यवारेग्र्हेउर्क्केत्रेसाक
न्यायाप्रभासासीत् कस्यपत्नीकेयोधरी २९ एतद्वहतवृत्तान्तकृपयाकथयप्रभोयच्छ्रुतंब्रह्मणापूर्वंतत्पुनर्ब्रूहिमांप्रति ३० शिवउवा
चण्डेदेवीप्रवक्ष्यामिराजाशगरवाहनः शोणभद्रपुरेवासीमहायोगरतःसदा ३१ क्षत्रियःकामजिद्दोढःपूर्वकर्मरसाप्रियःशिवेनि
ष्ठामतिर्योगीअल्पभक्भूमिशायकः ३२ धर्मात्मधर्मशीलश्चपुण्यकर्मरतःसदास्त्रीतस्यसुशिक्षावहुवुद्धिमतानघा ३३ विश्व
धारावलैरासीत्विधुमण्डलमण्डितावोधमूर्त्तिर्विभूताक्षीवलपुष्टिरतप्रिये ३४ दम्पत्योःप्रियःसम्यौन्यःशीलयुक्ताम्बरैधृ
ताएवंशिष्टासानारीराज्ञःस्त्रीवृशमानयेत् ३५ क्लीवयुक्तपुर्णीभैर्वलमासीज्जुवाङ्गणाप्रभासातत्सुतायातासुतविरधुरन्धरः ३६
सुतास्थानांद्वक्षेत्रेवैसुस्थाज्ञनरोरत्नेपूजनादुभयोसत्यंसर्वसिद्धिलभेतनतः ३७ प्रभासास्थानतप्राच्यांउद्रसमिश्रसंपुटकम्
अथपञ्चमितंहस्तंक्षीरशापीहरिस्वयम् ३८ दीर्घमण्डपसंमरोडमण्डिरत्नविभुषिते चतुर्दिक्षुयुतंदेवंवहुशोभाढ्यसंयुत
म् ३९ शेषाशापीश्रियायुक्तोमाधवोमन्मथारिजःपूर्वद्वारमयीसैहेयलतःकामवित्पुरः ४० चतुर्वाहुतशाङ्गःपीताम्बर
धरप्रसुप्रणावोवहुलोकाक्षीवलपुष्टिसजःप्रिये ४१ कलेवरप्रभःस्वान्तःरत्नसिंहासनेस्थितःमहादीव्यमयोमूर्त्तिःमणिमा
न्यविभुषितः ४२ स्वेतपाषाणजैर्नैपंद्विमण्ठंमकराङ्कतम् शुभ्रहारयुतालक्ष्मीःशुभ्रासनविराजिता ४३ कलिकोत्तहर

33

णाक्षात्त्व्रह्मरूपधानातनः उर्ज्जेशुक्लेहरेर्वारेपूजनात्सर्वसिद्धिदम् ४४ पुष्पधुपाग्निदीपैश्चद्रव्यैःफलभवादिभिः पूजयेद्दुंरात्रौ
यः सर्वकामफलंलभेत् ४५ तन्मराइपतश्चात्तेसमीपमतिशोयमेयुरश्चर्यमधोमुखात्रिदिनं यः समारभेत् ४६ द्वादशाक्षरसन्मंत्रंज
पेल्लक्षचतुष्टयम् रुद्रमालाक्षतैर्दीव्यैः पीताम्परकैःसदा ४७ ध्रुवंसिद्धिः लभेत्कमं अन्नवृद्धिपस्यरसूत्रयायुश्चविनश्येद्देसत्यंसत्यं
वरानने ४७ इतिश्रीहरिहरक्षेत्रमाहात्म्येशिवपार्वतिसम्वादेऽष्टमोऽध्याय ८ शिवउवाच श्रृणुदेविप्रवक्ष्यामियुग्मक्षेत्रस्य
द्विधिम् शिवस्थानमधः प्राच्यांदक्षस्याग्निकंभागके १ महोग्रमीसूर्य्यभासःप्रभुरद्भुतकर्मणात्प्रधाम्वपुरवासानामनुष्याणांशिवे
रहः २ मराइपेसुखंमासीविघुज्जपनवासचयजेत्सूर्य्यंदिवामध्येसर्वेष्टफलप्राप्तये ३ चतुर्मुखोविवजःकुलदोवलिभुकस्वयम्॥
कपर्द्देःसिध्यतेवैर्य्यंउर्द्देरैस्तुप्रतीयते ४ उर्ज्जेषष्ठ्यांसुधोर्वारेयःपूजयतिनित्यसःसर्वसिद्धिंलभेत्तूर्णंवलिभावरतैस्सदा ५ कर्म।
णाप्रोत्यमाराणस्तुरविवारेऽथचन्द्रजेपुत्रवान् धनवान् यातो निरोगीवलपुष्टितः ६ तत्स्थानात् पूर्वभागेवैवेरीणीनाम्नीतपस्विनी
अङ्किराङ्किःमहावक्त्रासुयसाभास्करोपमा ७ पञ्चविंशन्मितंहस्तप्रधःउर्द्धतउर्द्धेजंद्विगुणेनसमेयेतंदीर्घमराडपराजितम् ८
पाषाणजरत्नपचितवद्दुर्देवगणैर्युतम् उग्ररूपाचसादेविमनरूपद्धतास्वयम् ९ वस्त्रैश्चशोभितामालापाषाणमूर्त्तिसं।
भवाचतुर्वर्त्तिनिकावालावामहस्तेधनुर्धृता १० देवकन्यादयारूपामनसःकार्यदायिकापुत्रदायिनिकामायासधवाकारिणी
मता ११ एवंविशिष्टासादुर्गाविहृसुध्यजवेष्टिताकल्पतेःसहजैरुध्यतविभूतिवलधारका १२ उर्ज्जेमार्गेतथाषाढेषष्ठ्यांवा
नवमीतिथौपूजयेदष्टमींदुर्गांसर्वकल्पानकारिणीम् १३ ततोदक्षिणाकेभागेधुर्द्दरोनामवानरः चतुष्पाददनुजः शान्तोवि

भवेरयिसेवितः १४ अलंकृत्यवुभुवाभिः सूर्य्यसामहतीध्रुवाविभूतिवल्लपुष्यान्नैः पूर्णनिर्धठमानसै १५ अहःप्रतिरसैः
पूजानिर्ज्जाराम्वरभावतःमर्कटः पूरयुगलैरासीन्मकरकुण्डलैः १६ अथोद्वादशाकंहसांमुर्ई द्विशतहायनम् मण्डपेसुखमां
सीनेउग्रसस्थलिकारके १७ तत्रस्थोमर्कठोदेविहर्षनिर्भरमानसा आश्विनेपूजनंदेवि अष्टम्यांवाअमातिथौ १८ रवौवामंगले
पूजावलियुक्योपहारकैः कर्त्तव्याविधितोमार्गेमाघेवैशखेऽथवा १९ वस्त्रैर्निषेवननित्यंवधुमाल्यविभुषणाम् धूपकैःपूजयेद्देवि
मासमनन्तरम् २० तस्यनश्यन्तिरिपवोधनपुत्रसुखान्वितः मनोज्ञमनुवध्नीयात् सर्वेष्टफलसिद्धये २१ उर्द्दरोनामतप्राच्याह
स्तंद्विशतवाराणकम् उर्द्धत्रिंशन्मितहस्तेनरनारायणोविभु २२ द्विरूपोविभवैर्युक्तःपाषाणोमनुषाकृतिःवहुश्रीद्विभुजःशान्तरू
स्संगामीकलेवरः २३ स्येतपाषाणकेदीर्धतन्मेलापितमकम् पूजयेद्भक्तितोनित्यंकुजेसूर्य्येभुशनौ २४ उर्ज्जेमाघेचवैशाखेश्राव
णेचाश्विनेनवेषष्ठ्यावापञ्चमीतिथ्यापूजनात्सर्वसिद्धिदम् २५ पीतवस्त्रैःहरिद्राद्यैःशंखकर्दुरमिश्रितैःदीर्धरम्भाफलैराजक
पूरैर्लवणौर्पुनः २६ गुडशाभरसैरासीन्मधुमण्डलविसुतैः अर्चयेद्भक्तितःश्रीमान् सर्वसिद्धिंलभेन्नरः २७ पार्वत्युवाच शृणु
देवकथंरुपनरनारायणान्वितम् कुत्रासीत्केनवयसाकेनतत्फलमञ्जितम् २८ शिवउवाच एकदावरभूद्राजाप्रभुरीश्वरभावनः
वेष्ठ्येत्वम्पयेत्स्वाम्विन् कुजसूर्य्यदिनान्तरे २९ तस्यपुत्रःप्रभानामावीशःचंशार्ङ्गामकःक्षत्रीयःक्षध्वकथरःसूर्य्यसभाव्यचर्षे
ञैः ३० अरुणात्स्रवंवेलायांभाण्डमण्डोद्धतन्वते हर्हठान्ववगम्येततनोरेषाभवद्दशी ३१ ततुणयमजहज्जीवैर्यैर्गणयतआश्वि
नतक्रुर्य्यादखिलमर्घायांयथाभागक्रमेजिहः ३२ एवमुर्ज्जेसुवित्यन्नेविधुल्लासितकुण्डलैजलैरेखफलंधूर्मैःपूर्णविम्वानुकारकैः

३३ अतीववरदंपुण्यवल्लोनादीनसुभ्रमत् देवैश्वर्य्येनेसाक्षात्मधुमाराडमिवौधग ३४ अल्पश्राः पूजनंतस्यनरनारायणाःप्रभुः
प्रकटितवान् विश्वपुरुषैःकयानि त्रपरिश्रमैः ३५ इत्थुयापवशाद्देवीकरोनियतःप्रभाम् अरुणोदयवेलायापूजनंतीर्थकेतिथौ
३६ तदासुक्तिफलंविन्देतसुखैश्वर्यमेधतेध्रुवंनिकरवर्षैवैसर्वेमिष्ठफलंलभेत् ३७ धौतवस्त्रेनविभवैःप्रीयतेऽह्निदिनेसिधः
कलौपूर्णफलंसाक्षात्विष्णुलोकंसगच्छति ३८ एवंब्रूमोवयंसघोवलंराजप्रियान्वितः विभवैःसगुणैर्भैर्यापुष्टिकामफलप्रदे ३९
इतिश्रीहरिहरक्षेत्रमाहात्म्येशिवपार्वतीसम्वादेनवमोऽध्यायः ९ शिवउवाच अत्याश्चर्यमिदंक्षेत्रंहरिशंकरनिर्मितम् पू
र्ष्टनामागुणीविप्रोवहुवेदरतोनघः १ सङ्कमादिष्टकोणोवैहस्तंद्विशतनिर्मितम् पाषाणमयमर्य्यादरूपंसर्वसुखोपमम् २ तत्रा
सीत्तस्यैर्विप्रोवालरूपधरोविभुः वेष्टितोवलवीराद्यैर्विद्याविभवसंयुतैः ३ कल्पद्रुमतरैःषिन्नःसत्वभोगपुरेप्यसत् पूर्ष्टब्राह्मण
कंनूपंयजेद्गर्ज्जेशितेयमे ४ पुष्पमालाक्षतैरर्च्यमणिमेधमूयैः सदाइष्टकामफलंलभेत् वसुदेववलोहृयैः ५ मनोज्ञंलभतेश्री
मान्बुद्धिविद्याप्रकाशकः अजहत्सर्वदेवाद्यैरपिविश्वकलेवरम् ६ विभूतिचलयैरासीत् येनकल्पद्रुमभेदैभिःसर्वसिद्धिमवाप्नो
तियथाभागमनुत्तमैः ७ पूर्ष्टस्थानतःप्राच्यांहस्तंद्विकरसम्मितम् भूयपपुरीस्थानंसर्वसम्प्रदसंयुतम् ८ आसीउर्द्धमयंधोरक
लिवमणसयुतम् चतुर्हस्तद्विकासीनंकल्पद्रुममनोज्ञककम् ९ अदहतश्चिकारोगंकमलोपगुणग्रणीसिद्धिरोमांचकैरभिर
वलोक्यसदानघे १० तत्रयंत्रंयदोःशीलंखलुकोपमसामगम् जिह्वियादनुजंसाक्षातमणिमाल्यादिभूषितम् ११ तत्रस्थसु
भगंसर्वयंत्रंकामेप्सिदध्रुवम् त्रिकोणमथतत्पूर्वंताम्रेसुद्धकलोपमम् १२ आवर्णसहितक्रीवंकूर्मैरखोर्द्धमण्डितम् अजरा

जरशेषेराब्रह्मशोभाढ्यसेयुतम् १३ कलेवरगुणांपुष्टंपरमोत्साहसूर्यभम् सर्वमन्त्रयुतचक्रंकलिकल्मषनाशनम् १४ अश्व
वल्लंविभुंविश्वंचलपुष्टंशिरोरुहम् मज्जयेत्सुगुणाकार्य्यकलुषोपविनाशनम् १५ उर्जेसप्तमिकाभाद्रेपूर्वेजेसूर्य्यकेतिथौ
अलंकारमिदंपूर्णविषिरोर्णिशुभायणम् १६ अष्टगन्धकधूपाद्यैलिखित्वापूर्ज्जेपत्रकेशोधयेसूर्यसंवाद्यैपरधेमादिपिका
सुदत् १७ धारणात्सर्वकामर्यसुखशौन्दर्य्यविश्रितम् कर्पूरकलशोपेतंविधिपोषसामगम् १८ मार्गेमाघेतथाषाढेग्रहणेचन्द्रसू
र्ययोः अलंकृत्यमधोधाढ्यैस्तर्ज्जेन्यास्तुशिषिन्नमित् १९ वलिभूपकरैर्शोघकुलदीपनसर्वयेत् मूर्च्छापन्नशिशुंविन्देतवलिकोम
लकामदम् २० इतिश्रीहरिहरक्षेत्रमहात्म्येशिवपार्वतीसंवादेदशमोऽध्यायः १० शिवउवाच दशाध्यायूर्वसंभूतारुचिराधन
सुद्धितामहायामणिमाल्याङ्कीपठभूषणभूषिता १ वलाश्वादशनोत्थानाकलशैरुपशोभिताअजाङ्गणेभांगेसुखकोपमयं
स्थलम् २ जलधाररसोपेतंवलभैरुपवेष्टितम् अदहङ्गस्मशात्सर्वकरुणाकरविस्मृता ३ अचलासांसतीरूपाविभूषणयुता
ऽजकैःसाचसाध्वीहयैर्वौधकलशैरुपशोभिता ४ अजन्मानमुनेःकन्यावलभद्रातपस्विनीसुभूषणयुताविघावलिदेवरतोपमैः
५ पार्वत्युवाच कलौकेनप्रभोसाक्षात् काकृतासुर्द्धरीश्वरीकयोत्थाकुतउत्पन्नाकुत्रकर्मितमानसा ६ ह्रासत्वेनशुभंशंभोवदनि
र्भरमानसाश्रयात्प्राहःप्रतीकाशंकर्म्मणायेनशुद्धिता ७ शिवउवाच शृणुदेविइमांसोर्य्योगणकोत्तमसालीनीम् अर्य्ययामा
सविधिवंघयायेनप्रपद्यते ८ अजन्मानमुनिःप्रौढोन्डर्ज्जनःकर्मकारकः रविज्योतिमयस्तीव्रः कल्मषैरवहासकः ९ तपोवली
विधिन्नश्चसरज्जुपदकारिजःमहाभिमानरहितस्तस्यपुत्रीवलामदा १० सहजोत्थारजःसुध्यावीरपूर्णाम्वरम्वदपूजनात्सर्व

कल्पानेरीश्वरीधूर्य्यमभिधा ११ लभेत्सर्वगुणान् देविम्अतीश्त्वर्यमनैरिह· उर्ज्जेष्टम्यांनवन्यांवादिवारात्रौप्रपूजयेत् १२ धनु
षाद्धतमेधास्तिअतिलोचनविह्वलात् अदङ्ज्जेनकाः सर्वैनित्यमर्च्चोदितःपुनः १३ साचएभिः प्रज्ञज्याधिगणायेत्गणमालि
काम् उत्स्यमानाकलाकर्य्यावलवीमथाकरोत् १४ विस्तारवदपूर्सांङ्गीचञ्चलच्चूर्णमाननीवलैरेवविलंघ्येतितत्कर्य्यावलवी
मथाकरोत् १४ विस्तारवदपूर्सांङ्गीचञ्चलच्चूर्णमाननीवलैरेवविलंघ्येतिततत्कलोजाधिशीलनात् १५ साचयुक्तकरावाभाव
लिपुष्पोपहारिणीअजहत् दधिकेतानियेनस्तुनुलतांव्रजेत् १६ प्रतिदिनमहः पूजाज्योतिनिर्भरमानसाअगराद्दिगलेखा
सीन् मधुमधपुरान्तकम् १७ जलपुष्पप्रणीताद्यैर्लैवयोषितवेणुभिः दीपतेतेनमर्य्यादंकलुकोपवलादितः १८ नारीदीर्व्य
लभेत्कान्तंस्वामीनारीलभेत्तमम् शीकराद्यैरधः साक्षात्तविधिपूर्वपरात्परम् १९ वलास्थानमितः प्राच्यांशुभलक्षणलक्षित
म् फलपद्रुमयंदीव्यंतत्रासीनमनोह्विभुम् २० स्वेतयाषाणजमान्यंतस्याहस्तचतुष्टये विदधेसरमां शोभांसुखराशिमयोद्भवैः
२१ अतिचाद्भुमयींमूर्त्तिभैरव्यायप्रपूजयेत् अधोवाणमितंत्तावत् करिणोत्सवमन्दिरे श्येनयत्पूज्यतेदेवः सर्वकार्य्यफलप्रदः
विधुवत्स्वर्ष्यवंदेवंवलिवेदरसोपसम् २३ उर्ज्जेमाघेतथाषाढेवैशाषेश्रावणेऽथवापूजयेद्देवमैश्वर्यैरर्कैभौमदिनेऽथवित् २४
कर्पूरभैपरासीत्शुभमाशनमेरितम् तत्तथाभानुभादेविमूर्तिमान्नुषवेषउत् २५ अवलाप्परुणात् गेहंकालिकोधिगतंमनः
उग्रपूजस्वतः पूर्णविभजेत्तदनन्तरम् २६ विश्वभावः कलाधारः सुगणैः परिसेवितः लभन्तिपुरुषान्यूनकर्मणोत्कर्षदीपकाः।
२७ जपन्तिपजनंमन्त्रंयडक्तमुनिभिर्मतम् विभूतिमभवत्क्लेशकरुणाकरमिरितम् २८ इतिपूर्वजनादेवंकरपालितविधुवत्

ह्रु॰म॰ सबलः सपराक्रम्पविधिमानसकर्मकृत् २९ शिवउवाच शृणुदेविमहामन्त्रमूर्ज्जेवैविन्ध्यवाससम् शंकरस्थानतोदक्षेहस्तं
१४ सुपवहायनम् ३० कर्पूराम्वरमेचासीत् सुखमम्बुजमेरितम् अजाश्वगन्धोनामाभूद्वलिधूपरहोत्तमेः ३१ अगुराम्वरसौभा
ग्यंसुधियासहसं दधत्सदेवो विमलः प्रासीत् कुलकोटिंसमुद्धरेत् ३२ विनाभक्तिंनयेत्प्राज्ञोवहुसज्जनसेवितः पूजांकरोतिनित्य
तैःसर्वानिर्भरमानसम् ३३ तिलाक्षतगुडैः पूज्यउर्ज्जेमार्गेरवौदिनेकलामर्हतिदेवाघैरर्च्चयेत्तेनसर्वदा ३४ तत्पूजनंशुभंनित्यम
णिमाल्यादिसेवितम् कस्तुरीभृगुडंमञ्ज्याकमलोपरसैर्युतम् ३५ एतत्समस्तंवलितोवेणुवाद्यादिभिः सहकिलदेविरहस्यंतत् मे।
हनंसर्वदिसुकम् ३६ इतिहाससुधेश्रीयोदीपनैवेद्यशालिभिः सज्जेनविधिंप्रासीत् कुलमेतितमाश्रयम् ३७ तस्मादजश्वगन्धा
त्तत्स्थानंमुनिभिरीरितम् विधिमोषधमैश्वर्य्यंहस्तंद्विशतहस्तकम् ३८ अधः शूलमितंहस्तंदीर्घमखण्डमण्डितम् कुल
देवमितः साखादखण्डाक्तमहोद्भुतम् ३९ मनुरूपधरदेवंकरदण्डितधारणाम् पूर्णवित्तरुधविल्वकलशैरूपवेष्टितम् ४०। 36
उग्नभूषणासंवेष्टुयन्त्रःश्रियाकिलप्रोषितः तस्यपूतादिकंसर्वमजहाद्दिस्सुचारणाम् ४१ हरिनाथइतिनामाशिवउद्दितमानसः
मठमरसीद्गुणारेमेकर्पूरादिभिरीरितः ४२ पूजनात्सर्वमजहत् कुलकेशरकेशरीकलोदीर्घमधः प्रसीत् अतिवत्सलमानसः १४
४३ सविजः शिवआत्माभूत् अघपुष्पादिभिर्रतः वभूवकुललाभार्थंकुलपुत्रादिसम्प्रदम् ४४ एतद्रहस्यंपरमंसर्वापद्गनाशन
म यःपृष्टत्मातकृत्यायमनोज्ञंलभतेध्रुवम् ४५ अथातः संप्रवक्ष्यामिपुत्रदायीशिवस्ययम् शिवस्थानात्पूर्वकोणेशतहस्तोर्द्ध
सम्मितम् ४६ अधोदशमितंहस्तमठवेणुसमन्वितम् वहुरत्नमयंदीव्यंचतुर्स्सुवेष्टितम् ४७ पाषाणविग्रहंदीर्घंपुष्यमा

लादिभिर्युतम् अश्वजालववैरासीत् कलुषोपविनासक्कृत् ४८ तवासीद्भक्तिदृढतोप्यजः सकलधावकः अद्यागिरः अवैराष्ट्रं
येनतद्धर्मवर्द्धते ४९ योगिनीसम्युतस्स्वामीदेवीतत्रविभूतिदातयोः पूजनमावेणासर्वसिद्धिंलभेत्ततः ५० कीर्तिपुत्रंधनंसौख्यमः
स्वश्येद्धामदोव्यकम् अवशोवंशमाप्नुयान्नात्रकार्याविचारणा ५१ इतिश्रीहरिहरक्षेत्रमाहात्म्येश्विवपार्वतीसम्वादे एकादशो
यः ११ पार्वत्युवाच अहोनाथप्रियैरुग्राकालिनिर्भरमानसाअतिविस्तारवदनाविभूषणायुतामुदा १ कल्पतेसाधुनामार्गेवि
धिशंकरनिर्मितम् अश्वहस्तंचतन्स्थानाडद्धेद्विशतहस्तकम् २ वलिरेभिरधः शान्तेवहुमण्डलमाण्डितः तस्याः पार्श्वेवसेत्साक्षी
सर्वसिद्धिप्रदायकः ३ उसाचेत्साध्वीमहाविराविधुमण्डलवेष्टिताः सूभूषावस्त्रविहिताकौसुमेनसुवेषिता ४ गोडन्द्रीगुप्त
मतिकागरुन्ध्वजवाहना गोमयेनलताविषाशाल्योदनवलिप्रदा ५ सुवक्त्राविम्वकोविष्ठीसुधर्मेनिरतानञ्चावीणावादकृ
तादुर्गापलवीरसोत्तमैः ६ महामायाविभूताङ्गीसुखभूषणभूषितासिन्दुरभूधरामाल्यैरीशानामूर्त्तिपूरणा ७ एतांस्वरू
पांसूक्ष्मक्षिमहिमोपरसान्विताम् विभुयुर्दहनेतेतत् कलुषोपसमक्कृतम् ८ उर्ज्जेमार्गेतथाषाढेश्रावणेफाल्गुणेमधौः अष्ट
म्यांवात्रयोदश्यांदिवारात्रौचपूजयेत् ९ पूजनान्ननारीणामनोज्ञंलभतेध्रुवम् शरीसुखमापन्नवहुरत्नादिसत्त्वमेत् १० दि
नोयमतिक्रान्तमवलोक्यशरीरिणाम् अकालम्मृत्युंनश्वेतविधिरप्रभमानसा ११ तस्याविल्वाश्रुताप्रासीन्शयनाशनवर्द्धिनी
आमल्केनसदाप्रोक्ष्यनित्यमुन्मनमानसा १२ साचवीव्यतराभूषावहुभूषणभूषिताअघवाव्देलभेल्लक्ष्मींकुलकोटिशतेरपि
१३ पीतवस्त्रधृतादेवीकुशुमागुरुचन्दनैः लेपनेनेविधिःसाक्षाद्धुवंदेवाङ्गनाभवेत् १४ मणिमाल्यविभूषान्दीपशुकोपमवर्द्धि

ह·म नीजङ्यान्नीनितराल्लाक्षेशुभमराडलवेष्टितम् १५ तस्माद्दर्शनमात्रेणालभद्दसुपुरन्दरात् पुत्रवान्वित्तवान्देविभवेन्नात्राप्यसंशय
१५ १६ मनोज्ञमुनुरुत्थानंमनोमयमवर्द्धनम् किलकालनिधिः क्रान्तेश्रवलेनसदायुधे १७ आनन्दंच प्रहस्यानेमधुमाल्यरशोयसम्प्र
हरेद्दसुधीयानंकुलकोटिशतैरपि १८ सक्षान्मुक्तिनयेद्देविरहस्यंपरमाद्भुतम् कथयामितवासाग्रेश्रृणुस्रूज्वलमानिभिः १९ काली
साविद्धताकालीकणकोत्तमभाविणीविभृताशङ्खचायादीन्सर्वाङ्गललिताम्वरा २० एवंश्रुतिपुराणोघेरर्च्यमानोनगोत्तमैःस
देवस्तद्दधूसंज्ञःकनिष्टःकुलभाजकः २१ एवव्रतेसदादेवीगर्गेज्जनिशान्चरहनिष्याम्यनिनाधाघैरीश्वरीसत्प्रभासुतः २२ तस्मादे
व्यासुतस्थानाउत्तरेदेवशंकरः मनुरूधृत्तःकालःसुतमागधवेष्टितः २३ सचहस्तमधःप्राज्ञप्रमाणमिनदेवलम् उर्द्धे धनुसहस्त्र
न्नुमणिभूषितकर्पटम् २४ तत्रमन्दःतिदादेवावहवःसन्निमिरुद्राः उग्ररूपाःप्रभायुक्तावल्गुपुष्टिप्रदाःसदा २५ तैरुपवेष्टिताःका 37
न्तेउत्सर्गाद्यरिमानितःसाचदेवीप्रत्यष्टात्माकुलकोत्तमवासता २६ येननास्यद्वैतेमायायैराधानपपूजिताअल्पमावुर्भवेद्देवीध्रु
वंकिमनुशंसयः २७ सर्वदेवगणैःशम्भुसत्रस्थःसुखकारकः पूजनात्स्पर्शनाद्देविसिद्धिंलभेद्ध्रुवम् २८ कार्त्तिकेफाल्गुनेस्रयेयः पू
जयतिभक्तितः कार्यंलभतिनान्यत्रगच्छेद्दनवमन्दिरम् २९ एतत्समस्तंशुफलंलिखितंपञ्चसागरेकरवीरगुणेत्यन्नंतदस्मसुखके १५
यथा ३० तस्माद्देव्रशिवस्थानात्पूर्वमूर्द्धेकराष्ठकम् ५० अधःपन्चदशार्द्धेतुपकपाषाणजंगृहम् ३१ सुखदेवसमुत्पन्नंवलिमराडलमी
यं रितम् हरितश्वेतपीताघैरुच्रैतन्मराडपालयम् ३२ एकेरक्तमयेह्राशमूर्त्तिर्दिव्यशिवावलेः तत्पूजनमहःशान्तःकिलकोटिशतैरपि
३३ तत्रासीद्भगवान्साक्षात् सुखकोपमवर्द्धनम् ददातीसर्वदाभेयीयेनसाध्वादिकंव्रज्ञेम् ३४ तस्यपूजाविधानेनपूर्वद्वारत्र्जाधि

पद्वाराभिगोमहावृक्षः हरितालसमायुतः ३५ चतुर्दिक्षुसुखाः सर्य्यापूणायात्तन्नमानसाः दन्नैर्दर्शितदेहाश्चतद्वारैर्विभिरेसदा ३६ वृ
क्षवृक्षोत्थकालादीन् फलपुष्परघोत्तमान् कलयन्निकलौलोकेगर्भीनदोषसौन्दरी ३७ द्वाराग्रभागेतन्मंत्रपाषाणेलिखितंमुदार्च
चेयतिसदादेवियः कालेफलमाप्नुयात् ३८ तस्यवृक्षस्यपापूजानिर्मिताविधिपूर्वकैयमलोकंनगच्छेद्वैतूर्णंसुखकमालयम् ३९ त
स्मिन्मण्डपकेगत्वानारीपूजनदर्शनात् लभतेमनुजाप्रार्थ्यध्रुवमंत्रनशंसयः ४० तस्मान्मण्डपकादग्नेःकोणेविभवहस्तकम्।
अधोदर्शमितंहस्तकर्पूराद्यैःसुवेस्मितम् ४१ स्येत्तासिदीर्घमजहत् पाषाणंखेतमज्ञकम् जठाधरित्तसंकाशंवुभुषास्जनीकरम्
श्रा ४२ तन्त्रास्त्राणिवहूनिदेविखड्गकालविनाशकः जठाधरःकुलाक्रान्तःकुलभैरितमानसः ४३ कठाक्षःपलविल्वान्तस्तोत्रह्म
रसुशास्त्रकःएभिःसहस्त्रैःमलावाद्यैरथदेववलार्दितः ४४ उत्तरद्वारगाभिधोमुनिशृंगिरवासकः महातपोवलीसान्तोवहुवेद
रतोमुनि ४५ हस्तेमलांविधायाप्यंकुलमेवजपेत्सदाश्रीशिवप्रणमित्साध्विवहुशिष्यगणोपमे ४६ पलाविकृततद्भूमौशिरःसु
खकमानसमहस्लावुश्रीलसेतांगद्धूर्जढमानसा ४७ द्विशृंगोमुनिकृद्वेषःकृशाङ्गःकर्मविक्रमः पूजनादल्पमायुतत् ध्रुवंनश्ये
नशासयः ४८ पुत्रंविलंवलंलभ्येतन्नदीशारसिनोङ्गयम् सर्वमैश्वर्य्यभवतेयेनयेनोस्थशालिना ४९ ऊर्ज्जेभाद्रपदेशुक्लेपञ्चम्यां
विधिपूर्वकम् पूजयेद्यःपुमान् भक्त्यामनोज्ञलभतेप्रिये ५० एवंदुर्गेप्रभाव्यादोगङ्गतीरमहीसमेःपुण्यक्षेत्रेमहोत्कर्षेकिमन्यत्क
थयाम्यहम् ५१ इतिश्रीहरिहरक्षेत्रमाहात्म्येशिवपार्वतीसम्वादेद्वादशोऽध्यायः १२ शिवउवाच अहोनाथप्रियेरुग्राकालीनि
भैरमानसा अतिविस्तारवदनाविभूषणायुतामुदा १ कल्पतेसाधुनामार्गेविधिशंकरनिर्मितम् अस्वहस्तंचतत्स्थानाद्दूर्द्धंद्विशत

ह·म·
१६

हस्तकम् २ वलिरेभिरधःशान्तिवहुमण्डलमण्डितः तस्याःपार्श्वेवसेत्साक्षीसर्वसिद्धिप्रदायकः ३ उसाचेत्साध्वीमहावीराविधुमण्ड
लवेष्टिताः सुभुषावस्त्रविहिताकौस्तुभेनसुवेषिताः गौडाङ्गीगुप्तमतिकागरुडध्वजवाहनागोमयेनलतावेषाशाल्यादनवलिप्र
दा ५ सुवक्त्राविम्बकोविष्ठीसुधर्मेनिरतानधावीणावादकृतादुर्गोपलवीरसोत्तमैः ६ महामायाविभूताङ्गीसुखभूषणाभूषितासिं।
न्दुरभूधरामाल्यैरीशानामूर्त्तिपूरणा ७ एतांस्यपांपूस्ताक्षिमहिमोपरसान्वितात् विभियुर्देहनेततत् कलुषोपसमंकृतम्।८।उर्ज्जे
मार्गेतथाषाढेश्रावणेफाल्गुणेमधौः अष्टम्यांवात्रयोदश्यांदिवारात्रौचपूजयेत् ९ पूजनान्नरनारीणांमनोज्ञलभते ध्रुवम् श
रीरसुखमापन्नवहुरत्नादिसञ्चभत् १० दिनोदयमतिक्रान्तमवलोकयशरीरतपात् अकाशमृत्युंनश्यतविधिरर्षभमानसा ११ तस्यावि
त्वारक्तामासीत् शयनाशनवह्निनी आमल्केनसदाप्रोत्यनित्यमुन्मनमानसा १२ साचदीव्यतराभूषावहुभूषणाभूषितान्नघवारे
लभेल्लक्ष्मींकुलकोटिशतैरपि १३ पीतवस्त्रधृतादेवीकुशुमागुरुचन्दनैः लेपनेनविधिःसाक्षाःढुंवंदेवाङ्गभवेत् १४ मणिमाल्य
विभूषाक्षीपशुकोपमवर्ह्निीजाड्यान्तीतितराज्ञाक्षेशुभमण्डलवेष्टितम् १५ तस्यादर्शनमात्रेणलभद्वसुपुनन्दनात् पुत्रवान्वि
लवान् देविभवेन्नात्राप्यशंसयः १६ मनोज्ञंमनुरूप्यानंमनोमयमवर्हनम् किलकालनिधिःक्रान्तेनवलेनसदायुधैः १७ आनन्दं
चप्रहस्यानेमधुमाल्यरक्षोपमम् प्रहरेद्वसुधीर्यानंकुलकोटिशतैरपि १८ साक्षान्मुक्तिंनयेद्देविरहस्यंपरमाद्भुतम्कथयामितवासा
मेश्टणुसज्वलमानिभिः १९ कालीसाविकृताकालीकराकोलमभाषिणीविभूताघाङ्घ्रयापादीन् सर्वाङ्गेललिताम्परा २० एवंश्रु
तिपुराणाद्यैरर्च्यमानोनगोत्तमैःसदेवस्तद्धूसंज्ञःकनिकःकुलभाजकः २१ एवंव्रतेसदादेवीगर्ज्जेगर्ज्जनिशायरहनिष्याम्यरिना

58

१६

णायैरीश्वरीसत्प्रभासुतः २२ तस्यादेव्यासुतस्थानाडत्तरेदेवशंकरः मनुरूधृतः कालःसुतमागधवेष्टित २३ सचहस्तमधःप्राज्ञप्रमा
णामितंदेवलम् उद्धधनुसहस्रनुमणिभूषितकर्पटम् २४ तत्रमन्देऽतिदादेवावहवः सन्तिमेरुद्राःउग्ररूपाःप्रभायुक्तावलपुष्टिप्रदाःसदा २५
ते रुपवेष्टिताःकानेउत्सग्गोघदिमानितः साचदेवीप्रदृष्टात्माकुलकोन्तमवासमा २६ येननास्यद्धूतेमायायेराधानप्रपूजिता अल्पमायुर्भवे
द्देवीध्रुवकिमनुशंसयः २७ सर्वदेवगणेःशम्भुस्तत्रस्थःसुखकारकःपूजनात्स्पर्शनाद्देविसर्वसिद्धिंलभेद्ध्रुवम् २८ कार्त्तिकेफाल्गुनेसूर्येयःपू
जपतिभक्तितःकार्यंलभतिनान्यत्रगच्छेदनचमन्दिरम् २९ एतत्समस्तंशुफलंलिखितंपद्मसागरेकरवीरगुणोत्पन्नंतदसमसुखकंयथा ३० त
स्मादेवशिवस्थानात्पूर्वेमूर्द्धकराघकम् अधःपञ्चदशाङ्गुलपङ्कपाषाणजंगृहम् ३१ सुखदेवसमुत्पन्नवलिमराडलमीरितम् हरितस्वेतपीताद्यै
रुग्रंतन्मराडपालयम् ३२ एकेरक्तमयेद्वाशेमूर्त्तिदिव्यशिवावलेःतत्पूजनमहःशान्तःकिलकोटिशतैरपि ३३ तत्रासीद्भगवान्साक्षात् सुखको
पमवर्द्धनम् ददातिसर्वदाभर्यायेनसाध्यादिकंव्रजेत् ३४ तस्यपूजाविधानेनपूर्वद्वारस्यअजाधिपेद्वाराभिगोमहावृक्षःहरितालसमायुतः ३५ चतु
र्दिक्षुसुखाःसर्प्याःपूर्णपातन्नमानसाःदत्तेर्दशितदेहाश्चतद्वारेविभिरसदा ३६ वृक्षवृक्षोत्थकालादीन्फलपुष्परशोत्तमान् कलपनिकलौलो
केगर्भेनिर्दोषसौन्दरी ३७ द्वाराग्रभागेतन्मंत्रपाषाणेलिखितंमुदाअर्चयतिसदादेवीयःकालेफलमाप्नुयात् ३८ तस्यवृक्षस्ययापूजानिर्मिताविधि
धिपूर्वकेयमलोकंनगच्छेद्दूरंसुखकमालयम् ३९ तस्मिन्मराडपकेगत्वानारीपूजनदर्शनात् लभतेमनुजाप्रार्थ्यंध्रुवमंत्रेनशंसयः ४०
तस्मान्मराडपकादग्नेःकोणेविभवदृस्तकम् अधोदशमितंहस्तकपूर्णाधेःसुवेस्मितम् ४१ स्वेतासिदीर्घमजदहत् पाषाणंस्वेतमकुकम् जटाधरि
तसंकाशंवुभुषारजनीकरम् ४२ तत्रास्त्राणिवहूनिदेविखड्गकालविनाशकःजटाधरःकुलाक्रान्तःकुलभेरितमानसः ४. वाणास्त्रःपत

विल्वान्नलीप्रस्तीरसुशह्वकःएभिःसहस्त्रैःप्रवालाघैरथदेववल्लादितः ४४ उत्तरद्वारगाभिख्योमुनिश्टंगिरवासकः महातपोवलीसान्नोवहु
वेदरतोमुनिः ४५ हस्तिमलांविधायाम्यकुलमेवजपेन्सदाश्रीशिवप्रणामेन्सधिवहुशिष्यगणोपमे ४६ पलाविकृततङ्कमौशिरः सुखकमानसम् ह
स्तावुग्रौलसेनांनह्धूर्जटमानसा ४७ द्विपृष्टगोमुनिकृद्दष्टःकृशाङ्गःकर्मविक्रमः पूजनादल्पमायुततध्रुवंनश्येनशंसयः ४८ पुत्रंवित्तंवललभ्ये
त्नदीशारसिनोद्भयम् सर्वमैश्वर्य्यभवतेयेनयेनोत्थशालिना ४९ उर्ज्जेभाद्रपदेशुक्लपञ्चम्याविधिपूर्वकम् पूजयेघपुमानभक्त्यामनोज्ञंलभतेप्रिये
५० एवदुर्गेप्रभाष्यादौगङ्गातीरमहीसमेः पुरायक्षेत्रंमहोत्कर्षकिमन्यत्कथयाहम् ५१ इतिश्रीहरिहरक्षेत्रमाहात्म्येशिवपार्वतीसम्वादेद्वा
दशोऽध्यायः १२ शिवउवाचश्रृणुदेवियस्थाक्षेत्रेयश्कृतंकर्मकारितम् येनयेनाधीप्राज्ञःसर्वेसौख्याधिविक्रमः १ सालग्रामीसुताजह्नोःसङ्गमेउ
भयोर्द्वयोःमहात्म्यंश्रणुतत् दुर्गेस्नानात्पापंव्यपोहति २ तस्मिन्विन्देऽद्रवेऽजातिवलिविश्वप्रभावकः आसीत् यलसद्दामेधःपूर्णोविन्दतिसा
स्वतः ३ समीनोमनुहृपांकोदेवरूपधृतःशिवतत्रपूजनमात्रेणमनोज्ञंलभतेध्रुवम् ४ तस्मात्सङ्गमकोत्थानात्स्थानंसुभगमन्दिरम् लक्ष्म्याःरूपवि
शालाक्षविभूतिवलधारणाम् ५ बोऽग्याङ्गीभहामेधामणिमाल्यादिवेष्टितास्वत्रधृतापूर्णोचित्तावलिवेगरसोपमा ६ साक्षाद्विभुजाधार्य्यापूर्णा
लक्ष्मीद्वयान्नधेतस्मादग्निमयेकोणेजलपूर्णेविभुधरः ७ पार्वत्युवाच अहोनाथकुतोलक्ष्मीस्थानंनिर्मितकंशिरः तत्सर्वविस्तराद्ब्रूहियेनक्षेत्र
फलंलभेत् ८ शिवउवाच सङ्गमाद्दस्तपंचाशउर्द्ध्वंत्रधशिवार्यमम् मक्षिरंसुव्रतेलक्ष्म्याःसर्वोपद्रवनाशनम् ९ तत्रमन्देशिलाकारंदीव्यंग
णकसस्मितम् तज्ज्ञेन्यासुमहाभोधःशुभलक्षणलक्षितः १० विभीषाराजकन्यासातत्रासीन्मकरध्वजीश्रीपार्श्वाद्दक्षिणेभागेविधिपूर्वकनूतनान्
११ लक्ष्मीर्विष्णुप्रियाकान्तपूर्वद्वाराभिगामिनीपश्चिमेदक्षिणेउर्ज्जेद्वारंदीर्घतमंशुभम् १२ रचितंवहुमलाद्यैरर्पितंविद्रुमाद्यकम् कल्पितंकर्मभू

द्वैर्वैलपुष्यादिभिर्जितम् १३ पूजनंतस्यवक्ष्यामियथाधर्मेनभाषितम् तुलशीलमाक्ष्यैश्चन्दनादिभिरीरितम् १४ सुवस्त्रैरादितंछत्रंधुर्यदाप्य
भिगामितम् दलयावलयागोर्य्यौशोभिता विष्णुनादिनी १५ सिन्दुराङ्कीजरावेषाकलशैरुपशोभिता चतुर्हस्तुमहापद्मःपत्रकोटिकलोल्लसैः
१६ कर्पूरागरुलोकाद्यैःचाषिताघोररूपिणीएवंप्रकृतिभूताश्चाविविधिरर्द्देमभूतले १७ तत्पूजनात्प्रभासासीत् लभमानसवेषसापुत्रादिसुख
मत्साम्यंयःसुसेर्द्दनिमानसम् १८ अतीवक्रूदतत्तेजसुखसम्पत्तिदायकम् विधेहिवलिभुकदेवःश्रद्धोविश्वासरूपितम् १९ पौषेचैत्रेतथा
भाद्रेमालामासगतेशिवेपूजयेद्यःश्रियारूपसश्रीमानध्रुवमेरितम् २० श्रियाःस्थानात् सुसत्यत्नेभागेत्रिशतहस्तकम् अधःशतार्द्धहस्तं
कंदीव्यमराडलमणितम् २१ पक्कपाषाणजंगेहंपूर्वद्वाराभिगंशुभम् मणिमाल्यविभूताद्यैरर्च्यमानंविभुन्ध्वरे २२ विराजमानःश्रीसाम्यः
शंकरःगौतमीपतिःवलरूपधरोरामोलक्ष्मणाश्चवसेत्ततः २३ एकस्मिन्मराडपेसर्वेतेदेवाश्चविराजिताः अहोविधितरैःपुजांकुर्य्यान्नि
यमपूर्वकैः २४ रामचन्द्रस्यतङ्क्षातुलक्ष्मणस्यप्रतापिनःपूजनादेविसर्वाङ्कलभेदत्रनशंसयः २५ ऊर्ज्जेमाधेतथाषाढेचाश्विनेसर्वसस्मितेनवा।
म्यांवाचतुर्द्दश्यांपूजयेद्योदिवानिशि २६ सर्वमीष्टसुखंविन्देत्सर्वसाधानमीरितम् नारीसधयिकांलभ्येत् पुत्रपौत्रादिकंसुखम् २७ तत्स्था
नाद्दक्षिणेभागेहस्तकिलनवाशिकम् अधोमतुमीततावत् कुलवेषादिसंयुतम् २८ अर्पयेद्देवकन्यायामराडपोज्वलकाननेसखावतीदी
व्यमानामत्तमोलधकाननेहेमवृक्षलताकारंवेष्टष्टेत्सर्वतोदिशम् वलाश्वगन्धंनम्नानंकेनकेनोहिपाचितम् ३० श्वेतताम्रमयंपृष्ठंगजाए
ष्टस्योपमम् सुवर्णप्रतिमानूपंवहुरत्नोपवेष्टितम् ३१ तन्मराडपेगर्गमूर्त्तिःसुखभोजनभोजितःकलिज्ञःकर्मरहितोवहुशास्त्रसुपाठकःस्व
वीरःशास्त्रेसुखावादीलवणाचकपूरितःसुपुत्रःस्त्रीयुतःकान्तेसुकधर्मीहिसोवितः ३३ वैशाषेमेषगेसूर्येसंक्रमेमकरेप्यवापूजांविधायवि

धिवद्व्रतंकुर्याद्यथाविधिः ३४ निराहारःसुखात्मावैतपश्वीभूद्मानसःनिरोगीधनसम्पन्नःइष्टमानसदायकः ३५ गर्गस्यपूजनङ्कृत्वावि
श्वामित्रंमुनियजेत् कौस्तुभाम्बरसुत्सार्य्यअनेकाहतमानसैः ३६ तस्माद्गर्गमुनेःस्थानात्पश्चिमेविंशहस्तकम् अथोह्निमनुमात्रन्तुसूर्य्या
कारंसुमण्डपम् ३७ चतुर्दिक्षुविधंह्यरंचम्पकाद्यैरवार्प्पितम् मण्डिगुम्फतंकंस्थानदण्डदण्डाहतंशिवे ३८ निसोन्सवंमुनेःप्राज्ञःकरु
णाकरकर्द्दमैःसुभाषितपदंद्वन्द्वंमुनिश्रेष्ठरसालयम् ३९ योशनामामुनिःप्रासीत्सुखलाक्षणलाक्षितःसर्व्वभाण्डमयःकान्तेवेदपारगनि
र्वेदः ४० रूपवान्शीलवान्वार्य्यगुणमान्विभुधरःयेनयेनाभिमर्य्यादाप्रकठेत्सर्वदिक्षुतः ४१ कृष्णपाषाणगंगेहरक्तादिमणिगुम्फितम्
शुभशोभाढ्यसंयुक्तंतत्रासीच्छेषसागरः ४२ सचदेवगणोर्युक्तःविलकोमलरूपधृक् पूजनादीष्टलाभाधंकुलकैरुपशोभितम् ४३ सर्वसिद्धि
मवाप्नोतिचान्तेशेषपुरींलभेत् पूजनन्तुहरेर्वारिमतिभूवलभावतः ४४ शृणुदेवियुगाद्यसंक्षेत्रंकवलनिर्मितम् बहुशोभाढ्यसंयुक्तंकुलमा
लिनमेरितम् ४५ क्षेत्रंगत्वातुयत्नोथाद्बलिपूष्योपहारिभिःपूजयेद्यःशिवंदेवान्चान्यान्सर्ग्गाभिगामिकान् ४६ नारीनरादयस्सर्वेस्वेष्टमा
नमयंयपुःकर्पूरवर्त्तिकांकृत्वासुखभाववभूतिदम् ४७ सर्वान् देवान्सुरोद्भूतान्शुरलक्षणलक्षितान्पूजयन्तिजनायेवैसर्वेष्टफलमीरि
पुः ४८ अनेनचविधानेनयकान्मासेतिथौदिनेश्रद्धातन्निपुताद्दुर्गोध्रुवंफलमवाप्नुयात् ४९ धन्यस्तेचनराविभज्यविकलांनार्येश्चतावि
र्द्दराकल्पानंबलिपूजनंनिगदितंशीर्षोशहस्तादितःमांगल्यंप्रतिभूषणंनिगदितंक्षेत्रंमहद्भिर्ज्जनैर्मज्जद्भिःपुरुषैरवश्यमपरंशम्भोःपुरं
गम्यते ५० इतिश्रीलिङ्गोपपुराणेशिवपार्वतीसम्वादेहरिहरक्षेत्रमाहात्म्येत्रयोदशोऽध्यायःसम्पूर्णः शुभं लिखादेविप्रसादतिवाडीका॥

This pages of prashastikashika of Pandit [illegible] sugdyala jy

४११०

॥ अथप्रशस्तिकाशिकाप्रारभ्यते ॥

४११०

प्र० श्रीगणेशायनमः॥नत्वागणपतिंदेवंसर्वविघ्नविनाशनं॥गुरुंचकरुणानाथंब्रह्मानंदाभिधानकं १ प्रशस्तिकाशिकादि
१ व्यावालकृष्णेनरच्यते॥सर्वेषामुपकारायलेखनायत्रिपाटिना २ चतुर्णामपिवर्णानांक्रमतःकार्यकारिणा॥लिख्यतेसर्वे
विद्याऽर्थिप्रवोधायप्रकाशिका ३ यस्यालेखनमात्रेणविद्याकीर्तियशोपिच॥प्रतिष्ठाल भतेशीघ्रमनायासेनधीमता ४ श्री
शब्दागुरुपादपद्मयुग लेलेख्यावुधैःषट्तथा पञ्च श्रीनृपतीन्द्रमौलिचरणेदेयाःस्वभृत्यावलौ॥श्रीशब्दद्वयमेवलेख्य
महितग्रामेचतुष्कंस्त्रियां मित्रेश्रीत्रयमेवदेयमनिशंह्येकंस्वपुत्रस्त्रियोः ५ नत्वादौब्राह्मणानां॥स्वस्तिश्रीमत्सकलविद्या।
विनोदरसरसिकविराजमानसन्मंडलीसमाजमंडनविहितदिग्विजयवादींद्रवृंदमर्दनविद्वज्जनकमलकुलप्रकाशनमार्त्तं
डमूर्त्तिषुसदाचारचरणपरिलब्धगरिष्ठप्रतिष्ठावशीकृतवसिष्ठादिमुनिगणगीयमानयशश्चंद्रकरधवलीकृतजगत्त्रितयेषु
निखिलदनुजपूज्यपादाब्जसुरनिकरमौलिभूषायितमुकुटमणिराजितमहार्घनरमाणिक्यविस्फुरत्किरणनीराजितचर
णपीठसहस्राक्षसमसामंतेपंडिताज्ञावचनेषु १ स्वस्तिश्रीमत्सकलमुनिगणालभ्यकरुणामयनंदनंदनपादारविंद रसास्वा
दमेदुरीभूतमनःषट्पदेषुमुनिचयविहितकर्माचरणप्रसन्नमानसानीतपवित्रकीर्त्तिसत्कथाश्रवणकृतार्थीकृतनिज। राम
निखिलगोत्रोद्भवेषुकृतातिशयपुण्यपरिलब्धभूदेवशरीरविधीयमानतपःपुंजप्रकाशदेदीप्यमानानलदह्यमानपा १

नकसमूहेषु २ स्वस्तिश्रीमत्सदाचारविचारविनिर्जितमहोदारमुनिगणागारापारधर्मभारसंपानसुकुमारतनुतिरस्कृतपरमामयमारविवर्द्धितस्वदर्पदलितसुरनरनागगंधर्वदारसकलविद्याविनोदप्रमुखीकृतविद्वज्जनाधारवादीद्रहारवारवारदयान्वितप्रोद्दंडप्रचंडसंसारमंडलेषु ३ स्वस्तिश्रीमद्गणपपुणपचयप्रोद्भूतसत्कीर्तिगगनामलोदितयशःशरच्चंद्रकरद्योतप्रद्योतितदशदिङ्मंडलनिवासिधरणीसुरप्रख्यातसद्विद्याविलासविनोदेषु ॥ गुणिजनगुणज्ञानचातुर्ये प्रवीणवर्याचार्याभिवादिसकलनीयासदपदद्वंद्वपूरितभक्तविवर्णाभिलाषेषु यम नियमादिसाधनविमर्दीकृतमरुद्गणपरमदांतमुनिवदनप्रोत्फुल्लारुणसरोजकमलानिवासकोशनिःसरदनवरतवचनवरमणिसमूहलक्षणपरीक्षाधुरीणसम्यरीक्षकानुष्ठितादेशेषु ॥

अथ विद्वत्प्रभुप्रशस्तिः ।ःः॥ स्वस्तिश्रीमदनवद्यविद्याविद्योतमानसर्वोपरिविराजमानसज्जनमानसहंसेषु निरंतरदानसंतानतिरस्कृतसंतानेषु मधुरतरंगसंगितगंगासौभगातुंडिलगद्यपद्यानवद्यहृद्यभारतीसंभावनाभिनववदनारविंदेषु स्वरूपशोभानिरूपितकामरूपेषु पीनप्रतिभरागरंजितप्रजाप्रजायमानपरमानंदसंदोहदोपानमहोदरफलेषु देवभूदेवदर्शनपरामर्शनग्रामपर्याप्तग्रामदानावदाततुष्टशिष्टविशिष्टशिष्टाचारानुरूपश्रौतस्मार्तकर्मनिर्माणनिर्मितशर्मसुममाशीराशीःशासनसहस्रमजस्रम् ॥ अथ प्रधानप्रशस्तिः स्वस्तिश्रीसमस्तसामंतसेवानिर्वाहकेषु कोशकृषिकृषीवलगजवाजि

प्र° प° २

गृहपरिवर्हहर्षहेतुनीतिसेतुरक्षणनिपुणेषुपरोपकारसत्कारनिपुणेषुवेदांतेष्विवब्रह्मानंदप्रकाशकेषुपातंजलेष्विववशीकृतसार्वभौमेषुसांख्यागमेष्विवप्रकृतिमधुरेषुविध्युद्देशेष्विवसार्थपरिहारेणपरार्थैकप्रयोगेषुविद्वत्कविवरेष्विवसरसीकृतरसालंकारगुणध्वनिकाव्यकौतुकविचारसंचारिततर्कतरंगेषुतापनेष्विवस्फुरत्प्रत्यगात्मस्वरूपेषुसमस्ताशीराशीःसहस्रमजस्रम् ॥४॥ अथात्मनिष्ठप्रशस्तिप्रस्तावः ॥०॥ स्वस्तिश्रीमदुदारचितचिंतामणिविजितजैगीषव्योक्तिसूक्तवाक्यप्रकटितपातंजलप्रांजलसमाधिविधानतत्तद्भूमिजयोपयुक्तपराजितांगमनजयजनितसार्वभौमसंभावितप्रांतभूमिचतुष्टयविस्पष्टधर्ममेघसमाधिसिद्धिविध्वस्तसमस्तक्लेशकर्मविपाकविरक्तिनिरतिशयानंदसंदोहदोहदांतःकरणप्राप्तनिर्बीजसमाधिव्यक्तीकृतप्रकृतिपुरुषविवेकख्यातिजनितवैराग्यलब्धकैवल्येषुविद्वद्वृंदवारविहितवेदांतार्थसमर्थनपरार्थेषुअस्मदेकार्यीभूतेषुदेवदत्तेषुयत्तदत्तस्यप्रणतिसहस्रमजस्रम् ॥ अथप्रभुप्रशस्तिः ॥६॥ स्वस्तिश्रीमत्समंदमेदुरमंदाकिनीमधुरतरंगधारानिरंतरशीकरसंसिक्तमंदारकुसुमनिष्यंदिमकरंदबिंदुसंदोहसहृदयहृदयसाधितशेषोपयशोपिचरणस्मरणरसिकेषुनिजचरितचमत्कारस्मरणविस्मारितौशीनरशिबिदधीचिकर्णगुणवर्णनेषुअनेककलाप्रकाशत्वेनान्वयीकृतराजशब्देषुप्रतिभटकटकविजययात्रावसरजैत्रभुजभुजंगजिह्वायमानव्यवहारकष्ट

राम° २

52

कोदंडवाहासादिनशरकोदंडतांडवखंडितावनिखंडाखंडलगर्वातिशयिनप्रतापमंडलभिन्नचंडकरमंडलेषुचतुरु
दधिमंडलाहवनीयकुंडप्रचंडप्रतापज्वलनरूपमानमहासादिनवहारिमुंडखंडपुरोडाशपूरितरणधरणिमंडलोद्दामप्र
भावग्रहणमहाग्रहोद्भूतभूतभैरववक्रताशीराशंसनसमुद्भूतमहामुदस्पेषु विष्णुशर्मेषु यज्ञदत्तस्य समस्ताशीः सहस्रमज
स्रम्॥०॥अथपद्यप्रशस्तयः।७॥स्वस्तिश्रीमन्महाप्रौढविद्योपार्जितकीर्त्तिषु स्फुरंतुनतयः काममुकेषुमदाशुभाः १ स्व
स्तिश्रीमत्त्रिलोकाब्जप्रकाशरविमूर्त्तिषु अमुकेषुवरिष्ठेषुनतीनांततयःपरः ॥ २ स्वस्तिश्रीमजगद्वंद्यचरणांबुरुहेषुमे
॥कोटिशोनतयः श्रीमदमुकेषुनिरंतरं ३ कनिष्ठविषये॥०॥स्वस्तिश्रीमच्चिरंजीविप्राणाधिकतरेष्वितः स्फुरंतुकोटि
शःस्नेहाद्याशिषांराशयोमम ४ स्वस्तिश्रीमत्प्राणानंदकंदेषुनितरामितः मनोवांछायविहिताविलसंत्वाशिषःशुभाः ५ स्व
स्तिश्रीमद्रमाकांतपादाब्जरतिशालिषु चिरंजीव्यमुकेष्वाशीर्भवंत्वविरतंमम ६ स्नेहविषये॥०॥स्वस्तिश्रीमत्समंतान्नि
खिलमुनिगणाभ्यस्तविद्याविनोदप्रोद्यद्गोष्ठीकृतनष्ठीकृतविबुधसभामंडनामंडनेषु स्नेहाद्दानम्रमूर्द्धाविहितनतिततिर्भूय
सोमेऽस्तुनित्यंप्राणाधिकेषुकामंसकलसुखमयेष्वादराद्बोधरेषु ७ स्वस्तिश्रीमत्सुवेदाद्गुणगणावलितप्रोल्लसत्पूर्णवि
द्याचंचच्चातुर्यचर्याचरितवपविलासार्थभव्यानकेषु वादीद्रव्यूहहस्तीप्रकरवरशिरश्छेदसिंहेष्वनेनाःस्नेहाद्भूयुर्नितांतंनन

पत्र षिवालय्यसौम्येष्वसंख्याः ८ स्वस्तिश्रीमद्रघुवरपदांभोजभक्तिप्रतापप्रोद्यद्दयान्तिपद्यावलिवलितयशःपूरनद्याधि
पेषु सत्संगस्नेहमुक्तामणिनिकरलसन्मानसेष्वादरान्मे विस्फूर्जंतु प्रकामं नयनरसनयाश्चारुदंड प्रणामाः ९ ॥ अथ कुशलले
खनोपालंभप्रकारः ॥ सर्वं संकरसेव्यमूर्तिकृपया नित्यं वरीवर्तिनः श्रुत्वा सन्मुदमेति सज्जनमनो दैन्यं निजं न्यस्यति भावत्कं कु
शलं प्रतिक्षणमिदं वांछामहे सर्वदा दुष्प्रध्वांतनिवारणैकतरणिज्योतिः परं सौख्यदं १० चंचच्चातुर्यवर्यप्रथितगुणलसत्की
र्त्तिं चंद्रप्रकं सश्रीमद्धर्मप्रतिष्ठाविजितमुनिगणस्नेहपूरैकराशिम् भव्यं तन्यत्र मीहे सकलसुखमयं वर्द्धमानं नितान्तश्रीमन्मी
तिप्रतापादिहनिहितमहोनद्वरीवर्त्तिकामम् ११ भवदीयं वरीवर्द्धमानमीहे सुखेनशम् वरीवर्त्तिनदेवात्र स्नेहपात्रप्रति
स्रणम् १२ शमस्त्यत्र दयासिंधो भवदीयमिहेप्सिते सदैव येन मे चेतः सुखमाप्नोत्यहर्निशं १३ शमस्तीह भृशं भूमन्भवदीयं
समीहते मनो मे परमाह्लादप्राप्तये योगविनतं १४ ॥ ६ ॥ अथ पत्रोपालंभनलेखनप्रकारः । भवत्पत्रं घनश्याम कदाचिदपि ना
गतं मनो मे प-रमप्रेम्णा मोदते नैव तं विना १५ क्रियते स्मरणं भक्त्या भवदीयमहर्निशम् ॥ श्रीमद्भिर्विस्मृतं तत्र को वेद किमु कार
णम् १६ नागतः कोपि तत्रत्यो नरः प्रीतिविवर्द्धनः तस्मात्महोपशीचिंता जायतेंतर्गरीयसी १७ भवत्पत्रसुहृताढ्यं सुखदं च सुधो
पमम् विश्लेषतापसंतापमनःक्लेशनिवारणम् १८ पत्रं कुशलवृत्तांतं दूतं जानंति पंडिताः तद्दुनरं विचार्याशु लिखंति सुखहे

नवे १९ लिख्यते यदिनो पत्रं स्नेहसौख्यप्रकाशकम् तदा चिंताकुलं चेतः शून्यमंतर्विचेष्टितम् २० न धनेन न वभूराज्यं मणिमद्धे
हमद्भुतम् विनापत्रेण वांछामि भवद्वृत्तांतशालिना २१॥ श्री अथ क्षत्रियविषये ॥०॥ स्वस्ति श्रीमत्प्रवलहयगजरथपदातिव
लप्रतापनिर्जितप्रचंडाकांडदोर्दंडारातिचयचमूलब्धयशः पूरमयामृतोदधिप्रकामोद्यच्छरद्राकेशकरप्रकाशप्रकाशी
कृताखंडब्रह्मांडमंडलेषु परमसद्बुद्धिविस्तारितालौकिकपराक्रमानुकामितानेकवलवद्धराधीशगुरुमौलिसन्मुकुटमणि
विस्फुरत्कांतिपरिचुंबितचरणकमलेषु विमलधर्मार्जितधनाधिपविशालतमकनकमयकोशदानातिशयभूपवर्हिहित
वंचस्सु विद्याविनोदप्रमोदानंदितांतःकरणविद्वद्द्विजवरसमूहेषु १ स्वस्ति श्रीमत्समंत्रविधानोक्तशस्त्रास्त्रधारणसंजा
तगरिष्ठसहायमात्रदिक्चक्रपरिप्राप्तजांवूनदविवर्द्धितानेक सुमेरूपमयकोशागाराख्ययापारविहितवहुदक्षिणा
चारयज्ञसंरंभप्रतीक्ष्णधारखड्गनिहितविप्रारण्यनिवासिप्रोद्दंडप्रचंडदरिद्रपंचास्येषु स्वीयपराक्रमामितवरखलानी
नकनकमयसमाजसंदलितगजरथाश्वनिवहदानातिशयलघुनरीकृतसकलसुरमुकुटवंदितचरणकमलद्वंद्वशुनासीर
सहस्रेषु महदुद्भटभटवितततनुरुहोद्गमकरणसध्रीचीनरणांगणगमनरसाह्लादप्रोत्फुल्लांतःकरणीयशोभितवलवत्करा
स्त्रविच्छिन्नविपक्षशिरःसमूहनिःसरद्रुधिरप्रवाहपरितोषितनृत्यद्धरिसुतापतिगणेषु ५ अथ पद्यप्रशस्तयः॥ॐ॥ स्वस्ति

प्र० श्रीमल्लसद्गुरुसमुपार्जितकीर्तिषु स्फुरंतु सततं सम्याः सुरश्लाघ्याः पराशिषः १ स्वस्तिश्रीमद्धनुर्विद्याविलासरसिकेष्वितः॥ आ
प० शिषः संतु विहिताः पुत्रपौत्रार्थविस्तृताः २ स्वस्तिश्रीमच्चलद्विद्युद्युतिजित्खड्गशालिषु विलसंत्वाशिषो भव्याराशयः प्रीतिपूर्वकाः
४ ३ स्वस्तिश्रीमत्प्रचंडार्यदानोच्चासितमेरुषु यशःकीर्तिरमानित्यं वर्द्धयन्त्वाशिषः पराः ४ स्वस्तिश्रीमद्यशश्चंद्रप्रकाशितजगत्त्रि
षु विद्वद्दारिद्र्यदाहेषु राशयस्त्वाशिषां मम ५ स्वस्तिश्रीमद्दरिद्राग्निमग्नविप्रोद्धरेष्वहम् वितनोमि सदा प्रीत्या भव्याशीर्वचनं भृशम्
६ स्वस्तिश्रीमत्प्रचंडप्रबलतरविद्योतचंचत्प्रकाशस्फूर्जत्सप्ताब्धिपारेष्वविरतविजयप्राप्तलक्ष्मीचयेषु विद्वत्साडिम्यगोष्ठीर
सिकरसलसत्स्वांतदेशेष्वनंताः कामंकामार्थिदानप्रकटितमलयेष्वाशिषः संतु नित्याः ७ स्वस्तिश्रीमदुद्दारसंगरबलेन्युद्धप्र
चंडोद्भटव्यालव्यूहविमर्द्दनैकगरुडेष्वानंदददतेष्वलं दत्तक्रांतहरित्तृषार्त्तेनरवव्यामोहविध्वंसकेष्वतन्वंतु धनसकोशनिकर 44
त्विन्यंभवन्त्वाशिषः ८ स्वस्तिश्रीखड्गपात्रप्रकटसहचरप्राप्तदिक्चक्रचक्रे स्वाधीमानोद्धरेशेष्वपरसमसदाचारनिष्ठेष्वनं।
ताः॥ प्रोद्दंडारातिखंडीकरणगलदसृक्पोषितोद्दामशंभुष्वानंदाढ्या भवंतु प्रबलतरबलेष्वाशिषां राशयो नः ९॥ ॐ॥ अथ कुश
लले खनोपालंभप्रकारः॥१॥ श्रीमद्रामपदारविंदयुगलध्यानेन संवर्त्तते भावत्कं प्रतिवासरं गुणनिधे वांछामि चानामयम्॥ यत्कु एम
लापरमंगलसुखमयं प्राप्नोति चेतः फलं चिंतादूरतरं प्रयाति नितरां दुःखप्रदासत्वरं १० विद्वच्चित्तनिवासिदीर्घविलसद्दारिद् ४

विद्वावरणज्ञानध्वांतरवेसभागुणगणग्रामाभिरामाः खिलमस्मद्देशमनामयंप्रतिदिनंसम्यक्समीहामहेस्फूर्जद्दूर्जटिसेवनेननिभृतंभ
व्यंममास्तेसदा ११ नित्यमेवाभिवांछामिभवदीयमनामयं अत्रास्मिभवतांदीर्घकृपयास्नेहपालक १२ अनामयंचरीवर्द्धमानम
त्राऽस्त्यनव्ययम॥ नित्यंतथैहस्वदमहमाशास्महेवरं १३ अनामयंशुभवनामीहेहृदयसौख्यदं यदत्रगिरिजाभर्त्तुसंदैवोदयतिध्रुव
म् १४ नित्यमन्नवरीवर्त्तिभवदीयमुपास्महे सर्वदानामयंराजन्दुःखध्वांतविनाशनम् १५ अथपत्रलेखनोपालंभप्रकारः॥ ॥
बहुपत्रंपयातत्रप्रेषितंप्रीतिपूर्वकम् तदुत्तरकरंभव्यंभावत्केनागतंकथं १६ भवद्विरहचंडांशुप्रतप्तंहृदयंततः परं नत्वत्पप
त्रसंयोगाद्दुःखंमुंचतिनान्यथा १७ पत्रमाश्लेषशुभदंभवदीयमसंशयम् तल्लिखित्वाशुस्नेहलेनप्रेष्यतेनकथंसखे १८ यावन्ना
यातितत्पत्रंस्नेहमयास्सरं प्रदीपकलिकाकारंमंदंजीवःप्रकाशते १९ लेखनीयंसदापत्रंस्मरणीयोह्ययंजनः मच्चेतसि
तथासौख्यमव्ययंभवतिध्रुवम् श्रीमदीयसदाचारयुक्तेपत्रेसमागते हृदयाद्दुःखसंघानांनाशः संजायतेध्रुवम् २९॥ ॥ अ
थवैश्यविषये॥ठ॥ स्वस्तिश्रीमज्जनविचार्यमाणमनुयाज्ञवल्क्यापस्तंबादिसकलमुनिगणवदनकमलोद्गीर्णसच्छास्त्रनिर्णीतध
र्माचरणलब्धप्रतिष्ठावरिष्ठेषुसुरनरगंधर्वाद्यसर्वकार्यनिष्पादनसमर्थेसद्धेतुरक्षणापरायणसाध्वीडितचरणपीठेषु।
शांतप्रकृतिषुविचारवित्ताननमप्रार्थितनिन्यान्यसमीहितदानप्रकटितयशःपूरमहोर्मिषु १ स्वस्तिश्रीमत्सुखदधरणिमंडला

गतानेकभूपालमौलिमुकुटमंजरीसमभिवादितचरणसरोजसर्वदुःखनिरासमुखत्राणादिव्यकार्यनिर्वाहनसमर्थेधनदा
नातिशयपराक्रमेषु सकलमनोभिलाषेरितविद्वद्वृंदसमाधानकरणोत्सवोत्कंठितहृदयानंदसंदोहानंदितपुत्राद्यतिप्रिय
तमात्मीयपरिजनव्यूहेषु नियतसद्विधिपूर्वाष्टादशपुराणश्रवणोपलब्धधर्मज्ञानांजनप्रकाशितनयनतेजः परमेश्वरसमी
हाहृष्टद्विजोपासनविलग्नप्रकृतिषु २ स्वस्तिश्रीमदखंडधरणीमंडलाखंडसन्मानसामंतगणानंगसंगलसदनेककुमारोप
सेवितद्वारदेशेषु विविधषड्रसरचितमोदकादिभोजनप्रपोषितसमस्तपरिजनगोपमानयशःप्रकाशितागणितगुणगणा
लेषु स्वकांतिनिर्जितसुरनरगंधर्वोरगांगनाचयसुवासिनीमयभवनसुखप्रोत्फुल्लांतःकरणावमानितसुरेंद्रनिवासादिस
कलसल्लोकेषु ५ अथपद्यप्रशस्तयः॥ ॥ स्वस्तिश्रीमन्महाबुद्धिसमुपार्जितकीर्तिषु ममाशीर्वचनंभूपाद्यामभक्तिरनेच्छ
लं १ स्वस्तिश्रीचारुचातुर्यवशीकृतधनेष्विनः स्फुरंतुशतशोनित्यमाशिषांराशयःशुभाः २ स्वस्तिश्रीकृषिगोरक्षाविधा
नचतुरेष्वहं ददामिधनपुत्रायुष्करीर्वहुशआशिषः ३ स्वस्तिश्रीभूमिदेवाज्ञाविधिनाविधिवत्सुमे विलसंत्वाशिषःसम्याः
सम्यानृतपरेष्वलं ४ स्वस्तिश्रीमद्धनागारदानोपार्जितकीर्तिषु स्फुरंतुप्रीतिसहितावंवचारुशुभाशिषः ५ स्वस्तिश्रीरामपा
दाब्जपरिचर्याविलासिषु आशिषांराशयोनित्यंभवंतुसुखकारकाः ६ स्वस्तिश्रीमदखंडभूमिवलयप्रोद्दंडदेशांतरस्थानारब्ध

घनाभ्रलीढभवनव्यापाङ्गीविष्वलंस्फूर्जद्बुद्धिविनोदवंचित्तनरेष्वाविर्भवंत्वाशिषश्चंचच्चारुमनोरथेनविहितासत्वार्थवाक्ये।
ष्वितः ७ स्वस्तिश्रीमृगनाभिरामतनुघुष्मापारसंवर्द्धितद्रव्याकारितवाटिकाफलवरैर्नीरैस्तडागोत्थितैःविप्रव्यूहनिषे
वनोत्सुकतरेष्वेताःस्फुरेत्त्वाशिषःपुत्रायुर्धनसन्मंगलमयाःकामंतपोभिःकृताः ८ स्वस्तिश्रीमत्सुराणश्रवणसुखरसास्वा
दविहृर्यमुख्येष्वानंदादानेदुःखप्रहरणवचनेष्वादरात्कोटिशस्तेनिस्पंदानांबुधाराविर— लितवडवद्रोहिदास्निग्धजालेष्वा
विर्भूयुःसमंतात्त्रिगमपथ्यचराःस्वशिषांराशयोमे ९ ॥ ⁘ ॥ अथलेखनोपालंभप्रकारः ॥ चंचत्सुप्रसमृद्धवंसुखमिहस्वाभा
विकवर्त्तते नत्वत्वंप्रतिवासरंगुणनिधेवांछामिसंवर्द्धितं येनांतःकरणस्यदुःखकरिणीचिंताप्रयातिद्रुतंविहृद्वंदविनोदमे
दुरमनःसंतोषदानाग्रणीः १० नानाबुद्धिविचारवर्द्धितधनप्रारब्धविप्रार्चनज्ञानज्ञातपरार्थसाधनमत्तेसाधूत्तमस्तेह।
तः नत्वत्वंसुखमद्भुतंप्रतिदिनंसम्यक्समीहेतरां श्रीगंगागिरिजागणेशकृपयातत्रात्रैववर्त्तते ११ सुखमत्रवरीवर्तिवत्स
दाशास्महेत्वरामयेनानमोदमायातिसर्वदुःखविनाशनं १२ सुखंतत्रत्यमेवाहंवर्द्धमानंदिनेदिने वांछामिसुखसंसिद्धौतत्र
त्रापिचवर्त्तते १३ श्रीमदीयंसुखंभूरिसमीहेहर्निशंरवि पदंतःकमलंदिव्यमुत्फुल्लयतिसत्वरम् १४ अथपत्रलेख।
नोपालंभप्रकारः ॥६॥ कथंनलिखितंपत्रमत्रनिर्वृतिवेदकम् सेवास्तिहृदयेचिंताचित्रमित्रविचार्यते १५ ममास्तिहृद

प्र
पः
६६

यैगुल्मंनर्मविश्लेषसंभवं ःवैधंहृत्तमयं पत्रंकथंनप्रेष्यतेऽधुना १६ लिख्यतेनकथं पत्रंचेत्तश्चिंताभयापहम् संतोषं
सुखदंभव्यंवर्णावृत्तांतसंयुतं १७ विरहोरगदष्टस्यमच्चित्तस्यमुमूर्षतः भवद्दर्शोकिंनस्त्वेकः पत्ररूपोहिगारुडिः १८
यत्रकंदांसिरत्नानिसद्वाक्यममृतंजलंस्नेहश्चिंतामणिस्तस्मिन्मग्नोमेपत्रसागरे १९ पत्रंसद्भिःसदालेख्यमाश्लेषसुखदा
यकम् प्रेष्यतेभवतानात्रकिमित्येवंविचार्यते २० यद्देवायानितत्रत्यंपत्रंप्रीतिविवर्द्धनम् हृदयस्थंतदादुःखंनाशमायाति
सत्वरम् २१ ॥ॐ॥ अथशूद्रविषये ॥६॥ स्वस्तिश्रीमत्सकलगदविनाशकशरीरशासकलेलामकरपरमसुखग्रामनियतवि
हितव्यायामशिथिलता — वपराक्रमसेव्यमानहिंजेनरप्रसादलब्धधनसंतोषितभूसुरसमूहेषुमिष्टस्वादुजलफलमूल
कंदानयनदिव्यवचनोपसेवितजनयः शीलाशीर्वचनपरिवर्द्धितपुत्रादिसमाल्हादमेदुरीभूतचित्तेषुसत्सेवाकरणोत्साहप्रे
रितप्रियतमकलत्रपरिजनगणगुणलवनरतस्वज्ञातिचयेधितप्रतिष्ठागरिष्ठेषु १ स्वस्तिश्रीमत्त्रिवर्गसाधनानुरक्तचेतःसद्वि
चारकृतदानचययशःप्रकाशप्रकाशितदिङ्मंडलेषुसद्वचनानिविमर्शलेखनप्रकारविजितचित्रगुप्तीयपंक्तोद्दण्डेषु
घनसमर्थेषु परोपकारसंभृतधनमोदमुदितांतःकरणावकल्पितसकलस्वज्ञातिवरेषु २ स्वस्तिश्रीमत्सकलधर्माचर
णख्यातसत्कीर्तिप्रचारितनामाङ्कितभिक्षुजात्यभिलाषपूरणकृतार्थीकृतनिजमनुष्यावतारेषुगुरुजनपरिचर्यापरायण

विहितगोविप्रनारायणगुणानुवादगायनश्र

वणविषयीकृतयशसां नसाधितदक्षिणोत्तरायण

46

समयप्रतिष्ठासागरेषु परं गितत्तान चतुरसद्रोमंडनमौलिराजिनवरमुकुटरत्नराजिमंडितमहार्घ्यतरमरकतमणिमरीचिचयचुं
बितपीठेषु ३ ॥ ॥ अथपद्यं ॥६॥ स्वस्तिश्रीविप्रपादाब्जसेवासंसक्तवृत्तिषु आशिषांराशयोभूयुर्ममवाक्कायमा नसाः १ ॥
स्वस्तिश्रीमद्गुरुस्यषु वचनाल्हादशालिषु नित्यंदानरतेष्वाशीरनंतासुसुखप्रदाः २ स्वस्तिश्रीमद्रमानाथसेवकेषु त्रिवर्गदाः
ममाशिषांस्फुरंत्वाशुतनयःशीलभूषिताः ३ ॥ स्वस्तिश्रीमत्सकलगुणगणालंकृतोदारशील स्फूर्जद्गांभीर्यसिंधुष्वतिशयनय
विहृर्यचर्यारतेषु प्रोद्दामोद्दामलक्ष्मीरमणचरणयोः प्रीतियुक्तेषु नित्यंतन्वंत्वायुर्द्दनानि प्रचुरतरसुखंस्वाशिषांराशयो मे ४
॥ ॥ अथकुशललेखन प्रकारः ॥ श्रीमद्दाशरथेः समस्तसुखदश्रीहरिपादांबुजस्य सद्भक्तिभरेण वर्तनंइहानाधिर्विरोभू
रिशःतामेवाहमहर्निशंसुदमयवांछामि संवर्द्धितानि ष्मत्स्नूहमनोभिलाषितफलप्राप्त्सुहृद्दो चितां ९ आरोग्यंसंततंसत्सक
लसुखमयसम्यग्गीहे नितांतंभावलक्षंवर्द्धमानं धरणिसुरसुखोत्कीर्णकीर्तेर्गुणाढ्ये तन्मित्रोत्राववतिष्ठन्त्यधिकरतिरसो कामपूरे
णाकामंवामासीभावचंचुद्युतिभररसिक श्रीहरस्य प्रसादात् १० ॥५॥ अथपत्रलेखनोपालंभप्रकारः नालेखिभवता पत्रंनि
जपत्रंसुशोभनं तच्चिंतामानसंनित्यंदुनोतिखलुमामकं ११ नवापूर्णेनभव्येन स्नेहे है नैकीकृतं परं पत्रसितेनरांकांकं विश्लेषा
तिमिरापहम् १२ चिंतामार्गपरिश्रांतचेतसः श्रमनाशनम् प्रेषणीयंद्रुतंपत्रंस्वीयहस्तासरांकितं १३ मेलनेमेलनेयस्यदर्शो

प्र॰ नेयस्सद्दर्शनम् कथंनप्रेष्यते पत्रंनथाजीवस्यजीवनं १४ अपिदूरतरस्थानामाश्लेषसुखदायकम् पत्रमेकेवरंलोकेकिमुत
प॰ त्प्रेष्यतेनहि १५ मच्चित्तचातकस्यार्तिहरणोद्यतजीवनम् भवत्यत्रघनंनित्यमिहलोकःप्रतीक्षते २० विरहोदधिमग्नस्यमन
७ स्नेहार्द्रचेतसः समुहूर्तंभवत्यत्रसमाचारोनसंशयः १७ विरहव्याधपयोधौनियतंप्रणयिजनोनिमज्जेतयदिनभवेदवलंबो
मित्रान्यत्रागमःपोतं २२ ॥ ॐ ॥ इतिचातुर्वर्ण्यप्रशस्तयःसमाप्ताः॥१॥ अथगुरोः॥ स्वस्तिश्रीमदणिमादिसिद्धिदानोत्साहपूरणा
तःकरणेषुनिगणसभामंडनसमीडितचरणसरोजयुग्मेषु निगमागमोदितषट्प्रयोगसिद्धवशीकृतदिव्यादिसमस्तसिद्धौघेषु
प्रकटीकृतेष्टदेवनप्रसादविजितदशदिग्विलासितपरमाखंडलादिदेवेषु १ पद्यम् स्वस्तिश्रीनिगमागमोदधिवचःपाथप्रमा
थोंल्लसत् सारोद्धाररसप्रयोगकरणज्ञानानतसत्कीर्तिषु शापानुग्रहणक्षमेषुनितरांमूर्ध्नोपराद्धौर्ध्वगाभूयासुर्गुरुपादपद्म
युगलेध्यारात्प्रणामाःशुभाः १ स्वस्तिश्रीमत्कृपासिंधुध्वस्तिध्वांतच्छिदेष्वलम् भूरिशोमत्प्रणामाःसुगुरुपादयुगेष्विनः २॥
अथकुशललेखनप्र॰॥ श्रीमदीयंसदाभाव्यंसमीहेजीवजीवनं भवच्चरणपाथोजरेणोश्चात्रास्तितद्भवम् ३ अथपत्रोपालंभप्र॰कृ
पास्नेहदयाभावपरिभावितमङ्गनम् पत्रंसमीहतेचेतःप्रेष्यतांसौख्यहेतवे ४ ॥ ॐ ॥ अथसंन्यासिनः॥ १॥ स्वस्तिश्रीमत्सकल णम
विद्याविनोदवैशद्यविशदीकृतनिगमरहस्यहृदुप निषदभ्यासपरिभावितांतःकरणातुच्छीकृताखिलेंद्रियार्थेषुप्रोद्ड ७

योगोनमोनमध्यानविलोकितदुर्लभस्वरूपशुद्धसत्वैकराशिपरब्रह्मानंदमयजंगमाजंगमप्रपंचेषु शमदमादिपरिमर्द्दितषड्र्मितरंगासक्तमनोवृत्तित्यक्तमायाविलासदेहात्माभिमानशांतस्वांतान्व्ययचिदानंदाभ्यासभासितनिजबोधेषु १ पद्यम् ॥ स्वस्तिश्रीमत्समस्तोद्भटगुणगरिमाकीर्णवेदांतविद्योल्लासप्रोद्यन्निजांतःकरणगतजगत्कारणानंदकेषु लोकप्रख्यातकर्मोत्थननगुरुयशःपूर्णाविनाभिलाषस्वानंदाभ्यासवर्गीषगणितननतपःसंततुर्यार्थदेषु स्वस्ति श्रीवेदविद्यार्थविन्नमेषु सहस्रशः नतीनांनतयःसंतु समस्तलोकैषणोज्झितः २ अथ कुशललेखनप्रकारः भवच्चरणपाथोजप्रसादादीदृशावरम् तत्रत्यमेधमानेनस्मीहेह निशंपरम् ॥ ॥ अथ पत्रलेखनोपालंभप्रकारः ॥ ६ ॥ संसारतापशीतांशुसमं विज्ञानकाशनं पत्रं नालिख्यते श्रीमन् कथं पूर्णोदयाविधे ३ अथ वैष्णवस्य ॥ ६ ॥ स्वस्ति श्रीमत्सकलदनुजेंद्ररावणदर्पविद्रावणपरमपावनजनपावनरघुवरचरणनखचंद्रप्रकाशितांतःकरणस्वांतस्वभावसमानीकृतध्रुवादिसमस्तभक्तेषु सर्वोत्तमश्लोकगुणानुवादश्रवणगायनरसानुसंधानमहोत्सवानंदमोदितमनोवृत्तिगमिनाहोरात्रसमयेषु सदागमोक्तयथोपदिष्टसच्छिष्योपहारीकृतधननिचयविहितहरिजन्मादिविधिपरितोषितपरोपकारनिरतविहृदूष्मवंहृदप्रतिष्ठागरिष्ठवरिष्ठेषु १ पद्यम् स्वस्ति श्रीरघुवीरचारुचरणध्यानैकबद्धस्पृहास्फूर्जद्भव्यसभाविनोदरसिकेष्वानंदयुक्तेष्वितः चंचत्तु प्रतिवासरं ननिगणास्नेहार्द्रभावोद्धुराः कामंकाम

प्र॰
प॰
८

ददेवशास्त्रिषु चतुर्वर्णाश्रमेशेष्वलम् १ स्वस्तिश्रीरुक्मिणीकान्तचरणद्वन्द्वनिष्ठु वै स्मदास्मत्पूज्येषु स्फुरंतु नतयः शुभाः २॥
अथकुशललेखनप्रकारः॥ः॥ श्रीरामचरणांभोजप्रसादात्त्वंशंभुशंवरीव तिमहाभक्तभ वदीपमुपास्महे ३ःः अथपत्र-
लेखन प्रकारः॥१॥ मध्वर्थदरसास्वादधर्मभक्तिप्रकाशनम् पत्रं नलिखितं पुण्यं किमु चित्रं सुखप्रदं ४ःः अथकवेः॥१॥
स्वस्तिश्रीमद्विविधकविताविचारविनोदवशीकृतानन्तरसरसिकजनान्तःकरणेषु सकलभूपालसमाजविराजमानसन्मंडली-
मंडनवाग्विलासलब्धयशःपूरपवित्रितलोकीनरेषु १॥ पद्यम् स्वस्तिश्रीमत्समेतान्निखिलगुणगणस्फीतविद्याविनदप्रोद्भूतो-
नदकंदेष्वनुपमकविताडंबरोर्मिप्रियेषु विस्फूर्जद्दानशील स्फुटतरसुयशःपूरशुभ्राद्रिराजेष्वानम्रेणेव मूर्ध्नो भवन्तु न-
तिततिर्मेनुरागार्द्रभावा स्वस्तिश्रीवाग्विला—सार्थवशीकृतजगत्त्रिषु विलसंतु नतीनां मे ततयः कविषु समाः २ अथकुश-
ललेखनप्रकारः॥ःः॥ शमस्य त्वभावन्कमीहामहे न त्वराधेन चित्ते मुदं जायमानां भवद्भिर्लिखित्वा वरं पत्रमेकं द्रुतं प्रेषणीयं सु-
खप्राप्तिहेतु ३॥१॥ अथपत्रलेखनोपालंभप्रकारः सुपत्रं प्रशस्तं शुभं पंडितेन्द्र परस्नेहवैशद्यहेतु सुखाढ्यम् भवद्भिः कदा-
चित्कथं लिख्यते नोक विप्रोल्लसन्मौलिचूडामणे तत्तु ४॥ अथगणकस्य॥ स्वस्तिश्रीमत्सकलमनुजाविदितगतिनवग्रहप्र-
चारप्रमाणीकृतसमयसंज्ञानसाधिताखिलपदार्थसंतोषितविबुधसमाजविराजमानसमानमेदुरांतःकरणे—षुअतीताना

48

राम
८

गानसमाचारविचारसिद्धांतप्रकथनोपार्जितप्रतिष्ठावशीकृतस्वर्गवासिशिरोभिरीडितपदद्वंद्वगर्गादिमुनिवरेषु सद्योगाभ्या
ससमाधितमनोवृत्तिपरिध्यानेष्टदेवताप्रभावलब्धवचनसिद्धिप्रदर्शितसकलजीवोपगीतस्फीतसत्कीर्तिचंद्रसुधाधव
लिताखंडदिङ्मंडलेषु १ पद्यं ॥ स्वस्तिश्रीमन्नितांतंसुरनरदनुजप्राप्तवचनप्रभावप्रोद्दामोद्दामबलाद्गगनचरगतिज्ञानस
वीर्थकेषु नस्तैत्रैयोगयुक्तैस्तदनुचविशदैराशिभिः सिद्धिकार्यैस्वानंदास्संतु नित्यंसुजनसुखकृपाः संततीनांविलासाः
१ ॥ स्वस्तिश्रीगर्गवक्त्रोत्थसास्त्रविज्ञानशालिषु गोचराचरणप्राप्तसिद्धिषु प्रोन्नतानतिः २ अथकुशललेखनोपालंभप्र
कारः श्रीमदीयंस्वाचेतः कुशलंहि समीहते भवदीयैवकृपयावरीवर्त्यत्रनन्वपरम् ३ अथपत्रलेखनोपालंभप्रकारः ॥
पत्रंपरानंदकरं वियोगप्रकृष्टचंचद्रुजसिंहरूपम् स्वहस्तवर्णीकुरुभव्यमद्भुतंकथनसौख्यार्थमिहप्रयोजितं४ ॥ः॥
अथपितुः ॥ स्वस्तिश्रीमत्परमानंदमेदुरीभूतांतःकरणधीरत्वप्रेरितपराक्रमोपार्जितातिद्रव्यसंतोषितास्मन्मनोरथाह्
ल्हादाह्लादितात्मसुखानुभवतूर्णपूर्णीभूताखिलार्थाभिलाषेषुमधुरसंभाषितस्तेनपालितललितशिशुवदनसुधासुनिः
सृतामृतोपमेयवचनविलासविनोदोपनीताहोरात्रसमयेषु १ पद्यम् ॥ः॥ स्वस्तिश्रीविविधोद्यमार्जितधनप्रोद्यद्विलासा
वलीस्फूर्जत्सौख्यसमस्ततोषितशिशुस्तोमेषु सोमोपमाः सस्नेहंनितरांहृदुद्भटस्मरः प्रोल्लासितानद्भुतंश्रीमत्पंकजशालि

षुप्रतिदिनं दंडप्रणाममस्मभे १ स्वस्तिश्रीजन्मकर्मार्थप्रवृत्तेषुजनकेष्विनः स्नेहार्द्रभावसहिताः स्फुरंतुननतपःपराः॥ अथ
कुशललेखनप्रकारः भवदाशीर्वचोभावान्कुशलंमेतुवर्त्तते श्रीमदीयसदैवेह कुशलंभाग्यवर्द्धनं ३ वितृष्यापत्रलेखनो
पालंभप्रकारः पितुःपुत्रेष्वभक्तेषु सेवाहीनेष्वपि ध्रुवम् स्नेहो विवर्द्धते नित्यं स्वभावो जन्मदस्य वै ४ पत्रंसंतोषदंपुण्यस्ने
हपंकजभास्करं कथनप्रेष्यतेनाद्यविश्लेषध्वांतनाशन ५ अथमातुः॥ॐ॥ स्वस्ति श्रीश्रीमन्नीषुकृतचयकनिष्ठीकृतारु
धतीषु तपःप्रभावसमानीकृतगिरीद्यात्मजासु स्वामिमनोरथेंगितज्ञानप्रकाशदासीकृतानुसूयासुतजन्मजन्मार्जिता
तिशयदुरितभस्मीकरणपराक्रमस्वाहासु सुपुत्रवागानंददानांतःकरणयशोदासु सकलपुण्यमनोरथपरिपूरणप्रतापक
ल्पलतिकासु स्मरणपवित्रित‾ महाधतमः स्वचित्तमानसगंगासु शिशुनिचयाभिषिक्तशुभनर्मदासु सावयवदयामूर्तिमा
न्नृषुत्रीतानिलघुतरदासाज्ञाविलासक्रियानिवासस्वसमानिभक्तिभरप्रौढरानतितनतिविलासाः १५ पद्यं स्वस्तिश्रीम
हत्तेकमंगलमयप्रोद्दंडभाग्यासरस्फूर्जद्द्व्यसुतादिसौख्यविलसच्चिंताभिलाषाखिलम् भक्त्याभूतलसंस्पृशः स्फुटतरा
श्चत्प्रणामाः प्रभाति‾‾ त्यसंतु दयार्द्रभावकुशलाः सर्वासु कीर्तिप्रदाः ३ स्वस्तिश्रीमहयाभावभोविनासुभृशंपुरा ॥
नतीनांततयः संतु पुण्यास्वंबासु भक्तितः ४॥ॐ॥ अथकुशललेखनप्रकारः॥ॐ॥ मातुराशीर्वचः प्रोद्यत्प्रतापार्कं दि

वानिशं वर्त्ततेत्र भवन्याश्च प्रतिक्षणंसुपास्महे २ मातुः पुत्रेषु या प्रीतिः सातावत्पारमार्थिकी जायते नात्र संदेहो जानंतः करुणोस्त्वहम् ॥ अथ पत्रालेखनोपालंभप्रकारः ॥ मयि सेवाविहीने पि दीने लीलेपदांबुजे भक्त्यामानतः कथं पत्रं प्रेष्यते न महामते पतिं प्रति भार्यायाः प्रशस्तिः ॥ स्वस्ति श्रीमद्दुहामप्रेमहेमभूषितास्मदादिभक्तजनेषु प्राणप्रतिकृतिषु नेत्रयोरधिष्ठानेषु कर्णयोरधिदेवतेषु गिरामागारेषु सौभाग्येषु ममापरमरूपेषु स्वामिचरणेषु गोविंदइविंदिरायाः शंकरइव गिरिजायामहेंद्रइव पुलोमजायामाधवइव राधायाः प्रतिदिनं वर्द्धमानाः समाराधनाः प्रणामाः पूर्वमालाम् २ ॥ अथ स्त्रियाः ॥ स्वस्ति श्रीमन्सरसवाग्विलासविमलचातुर्यपरिचारिकीकृतभव्यभावावलोकनप्रभूतकमलखंजनमीनैणमदनवाणेषु स्वीयसौंदर्यतिरस्कृतविद्युच्छवीरतिरंभाद्यनेकाप्सरःसमूहासु सुरदनुजमनोहारिणीरमासु दर्शनस्पर्शनचेतनीकृतानंगासु संगीतविद्यारहस्योक्तिविविधगतिविचारचारुगमनासु मुकुरसुधाधरसहस्राभिलाषितवदनस्वरूपासु विद्रुमवंधूककनकपल्लवद्युतिजयशोभमानाऽधरासु ध्यानागमविनाशितविश्लेषदुःखसमूहासु मन्समाचारप्रचुरतरपत्रावलोकननिवद्धनयननिमेषासु सितेतरातिदीर्घोरगोपमेयारक्तगुणाभिगुंफितवेणीप्रतिबिंबभ्रमावभासितरोमावलीविराजितचलदलाभिरामकृशोदरीषु रसिकजनावसेव्यकोककारिकासु गंभीरार्थानुभवप्र

खलवदनंगभीरुषुप्राणादप्यधिकप्राणप्रियासु।नितांतालिंगनपूर्वकस्नेहसमूहाः १॥ पद्यं॥ स्वस्तिश्रीशर‾दिंदुमंड
ललसल्लक्ष्मीजितास्यास्वलञ्चनंवजननीलनीरजचलन्नेत्रासुंदरीघोदराः सर्वस्त्रीमुकुटोनमांगविलसद्रत्नावलीरंजित
श्रीपीठासुरहस्यमानसमयस्नेहात्प्रणामाः शुभाः १ स्वस्तिश्रीमत्स्वदेहार्चिःप्रकाशितजगत्त्रिषु एकाचंद्रनिभास्यासुस्ने
हाश्लेषशुभाशिषः २ अथकुशललेखनप्रकारः ॥ त्वन्मूर्तिध्यानयोगेनसुधाकरविशालिना इहास्तिकुशलंकांतेत
ववांछाम्यनुस्मरणम् अथपत्रलेखनोपालंभप्रकारः स्वहस्तकमलार्पणकंस्नेहार्थसुखदंप्रियम् हृदयाल्हादनकरंपत्रंन
प्रेष्यतेकथं ४ अथस्त्रीयस्नेहद्योतनप्रकारः ॥ त्वद्गुणीस्थान्यनागेषुमन्मनः ऐंद्रजालिकम् तिष्ठत्यहर्निशंकांतेनि
तांतमुदमेधयन् ५ अपिपंकजपत्राक्षित्वन्नेत्रकमलेभृशम् ममजीवोयमुन्मन‾‾‾द्विरेफवज्जीवति ६ त्वद्भ्रूधनु
षितन्वंगीकटाक्षशरसंधिते मत्प्राणोयंविचिक्रीडधनुर्द्धरइवाद्भुतः ७ त्वन्नासिकावकाशेषुस्वच्छगंधवहेष्वलम् लीनस
वस्थिरीभूतोस्वात्मासिद्धइवापरः ८ मधूकाभकपोलेनमनोमयरसालयोः सुखमेतिपरेनित्यंममायंहिमनोमृगः ९ बिंब
प्रवालबंधूकपद्मरागारुणाधरे मनोनुरागमुन्मायवरीवर्तिदिनेदिने १० चिबुकेनवशकाररसमुद्रांकितेष्वलम् मदीय
हृदयस्थोयंमज्जनः श्रेष्ठतांगतः ११ नवकंबुसमाग्रीवाविद्धजनमनोहरा मद्भाग्यसमुद्रमध्यस्थावर्ततेहर्निशंसखे १२

न्तवोरस्मि परं स्वह्रेकुचावेवस्त्वयं प्रभुर्वौ पूजाध्यानविहीनोहं नत्रासे सत्करुप्रदः १३ तवनाभिहृदे मुग्नं मनस्तद्गृहणोस्मरः॥
रोमराजीगुणंस्त्रिय्य गुणगान्तरमास्थितः १४ सुंदरीनिवकटिदेशे मुनिजनमनसाप्य दृश्यरूपेस्मिन् दृष्टिर्ब्रह्मणिल
ग्नापश्यत्यहर्निशं मम मनोज्ञे १५ त्वदीयपुण्याब्जसुरूपकोशे हे निर्मदीयास्थिरतामवाप्य प्रोस्फुल्लपकेरुहमध्यदे
शेरमेव चांचल्यगुणं विहाय १६ तवांघ्रियुग्मेकमलोपमेये नितंवभारालसदन्तकामे मनःस्मरेन्नत्वधराऽभिमानो जग
त्रेहस्यागणपत्यनाद्यम् १७ प्राणसंरक्षणहृत्तसंगमाशाकरोत्यसौ प्राणेश्वरं विना नेतु भृशव्याकुलयंतिमां मित्रस्या॥
श्रीम — स्तुसभ्रातृपुत्रपौत्रप्रभृतिषु अस्मज्जीवितापरनामसु श्रीकामरिपुपुर — वासिनः अमुकशर्मणः आशिषाणश
योनंताःशमिह बहुविधं भवत्प्रतापमहिम्नः भवदीयं तत्प्रतिक्षणमुपचीयमानमीहे नरां अथापरं स्वकुशलमंडितं पत्रमस्म
त्संभावनायै प्रेषणीयं १८॥ अथ भ्रातुः॥ स्वस्तिश्रीमदनेकपुण्यगणलभ्यप्राणसकलजीवसंस्तुतज्ञानाभिमानास्थानम
नुष्यदेहोपभोग्यसुखसमूहेषु राजीवब्रह्मप्रकाशना खंडगणामंडनदिनकरेषु सहोदरस्नेहविजितयुधिष्ठिरार्जुनवली
पवासरा — मलस्मणाश्विनीकुमारहनुमानद्गोष्ठीपरिरंजित — सभासमाजश्लाघ्यसत्कीर्तिसंभूतसुधाकरकिरणधवलीकृ
तत्रिलोकीमंडलेषु निरतिशयगतदुरूहदुःखव्यूहपरिशीलनविविधचिंतालतावेष्टिताधर्मगहनोत्पाटनसमर्थबाहुयुगले

षु परमस्नेहयाकशुद्धांतःकरणासुकेषु सदाज्ञाकार्यासु कस्याशिषांनतीनामप्यगणितराशयः १ पद्यम्॥ॐ: स्वस्तिश्रीसहजा
नुरागविलसत्स्फूर्जद्यशश्चंद्रमाहस्तोन्मृष्टमहासितद्युतिवरत्रैलोक्यभूमीस्थलम् धर्मोपायसमर्जितव्ययधनव्यामोहसुक्ले
षितश्वंचतुप्रतिवासरंममतीनां सादराः पंक्तयः १ॐ: स्वस्तिश्रीमन्महत्प्रीतिपरिपालितकीर्तिषु सुहृद्वरानृषुमेनित्यमाशि
षाराशयःपरा॥०॥ अथकुशललेखनप्रकारः अस्माकंशमिहभवत्कृपाकटाक्षैः पूर्णेंदोः शरदिकरोत्करैरिवास्तिभावत्के
प्रतिदिनमेधमानमीहेभूलोकेनिकरप्रशस्यकीर्तिकीर्ते ३ चातकस्त्विचतुरान्पयःकणान्याचतेजलधरपिपासया सोपिपूरय
तिविश्वमंहसाहंतहंतमहतामुदारता ४ जीवनंजीवमात्रस्यजीवनंयद्यपिप्रभो तथाप्यतिविशेषेणजीवनंमानजीवनं ५
मानसोपवनेयोयंकृपाकल्पलताकुरः यत्स्नेहामृतपूरिण्याबहुशास्त्वोविधीयतां ६ दानामज्जनपालकः क्षितितलेलक्षाधि
कायाचकाः किंतेभ्यः प्रतिदास्यतीतिमनसाचिंतांवृथामाकृथाः आस्तेकिंप्रतियाचकंसुरतरुः प्रत्यंबुजंकिंरविः किंचंद्रः
प्रतिकैरवंप्रतिलतांभिन्नः किमंभोधरः ७ सन्मार्गेवर्तमानस्यबहूनामाश्रयस्यच पाथोदपालितस्येहतरोस्त्राताननहीतरः
८ चातकस्यानुमानेनजलंप्रार्थयतेंबुदात् स्वसौदार्यतथानिंदापावयत्यंबुनामहीं ९ संतियद्यपिभूयांसोरसालनवकोकि एम
ला तथापिलितः पूर्वपालनीयोमधुव्रतः १० ।उद्यत्नमूनिसुवहूनिमहामहांसिचंद्रोप्यसौभुवनमंडलमंडनाय सूर्यो

हृतेनेनतद्दृदेशिनवासमेतियेनोदितेनुदिनमस्तमितेचरात्रिः ११ उद्यानद्रुममणिमयूखमूर्छितानामेनासामहहमहीरुहामिह
स्यात् आलंबः क इह दिवो भुवं पयोभिः सिंचंत्तंजगंति विहायवारिवाहं १२ लेखनप्रकारः वर्ननेत्रकुशलैरमापतेनीरजा
स्मचरणप्रसादतः वांछतिप्रतिदिनंमनस्तवस्वांतसौख्यविधिवद्विधायकम् ३ अथपत्रलेखनोपालंभप्रकारः स्वकीयमु
द्राकितपत्रमद्भुतंसहोदरप्रीतिसुखप्रकाशकम् मनोनुरागारुणसुंदरंपरंनचात्रसंप्रेषितमित्यलौकिकम् ४ इदंप्रशस्ति
काशिकासमस्तदुःखनाशिका रसज्ञतुष्टयेकृतात्रिपाठिबालकृष्णकः ५ इति श्री त्रिपाठिबालकृष्णकृताप्रशस्ति
काशिकासमाप्ता ॥

॥ इतिश्रीप्रशस्तिकाशिकासमाप्ता ॥